CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

0103

श्री हरिवंश:

Script : Devanagari

Meterial : Paper

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

0103

श्री हरिवंश

Script: Devanagari

meterial: P.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नमः श्रीसरस
थमक्षरमणुं
सामातिहार्ये
लेशाः शिवा

अथहरिवशस्यहरिवंशाख्यप्रथमपर्वप्रारंभः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF



CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीगणेशायनमः श्रीगुरुभ्योनमः श्रीसरस्वत्यैनमः यंवल्कंसुकुराइवेंद्रियमनोमायाःपरागृहश्यतांनित्युस्तत्स्थविसादिनापिचविराट्
सूत्रेशभावंगतम् तंप्रत्यगृहृगदृश्यमक्षरमणूत्यक्तोपनेत्रत्रयाःश्रीगोपालमुपास्महेश्रुतिशिरोवंशीरवैर्दर्शितम् १ वाल्हस्तेनाभिभाषीवाहि
रुदवसितंयातितर्कोप्रतिष्ठोमीमांसाप्रातिहार्यंभजतिगुणगणंयस्यसंख्यातिसांख्यः हृत्पीठेयोगरूढेनिहितमुपनिषद्वाह्यद्वंद्वैःपरंमेभाग्यं
श्रीलक्ष्मणार्योजगतिविजयतेयस्यलेशाःशिवाद्याः २ व्याचक्रेचित्तशुद्ध्यैशतपथहृदयंयःपुराणेतिहासौश्चित्तैकाग्र्यैकबीजफणिपतिविहितं
योगशास्त्रंचभाष्यैः मूलध्वांतापहत्यैश्रुतिशिखरगिरांब्रह्मसूत्रैरहस्यंवेदव्यासःसभूयादखिलभवभयध्वस्तयेस्मद्विधानाम् ३ हरिविधि-
वसिष्ठशक्तिपराशरव्यासशुकदेवान् वैशंपायनसुश्रवसश्चनुमःपुराणगुरुमुख्यान् ४ कणभक्षमक्षचरणंजैमिनिकपिलौपतंजलिंचनु-
मः श्रीमद्व्यासवचोंबुधिनयसीकरवर्षिणोमुदिरान् ५ सर्वविद्येशतासाक्षिचिकीर्षूपूर्वपूरुषौ श्रीनारायणधीरेशरूपौहरिहरौनुमः ६ बहू-
न्समाहृत्यविभिन्नदेश्यान्कोशान्विनिश्चित्यचपाठमग्र्यम् प्राचांगुरूणामनुसृत्यवाचमारभ्यतेऽयंहरिवंशदीपः ७ टीकांतराणीदुरविप्रभा-
णिवाह्यार्थरत्नानिचकासयंतु अंतर्निगूढार्थचयप्रकाशोदीपःक्षमोभारतमंदिरेऽस्मिन् ८ ईशप्रसादादवितुस्ववंश्यान्भगीरथेनेवम-
याप्रणीता वंशेहरेर्याऽजनितीर्थगंगालोकत्रयीजाड्यमलंधुनोतु ९ उत्तानेष्विहकोशविग्रहबलपद्येषुनैवाश्रितंगंभीरेषुनसेतवोनविहि-
ताःकूटाननस्फोटिताः नच्छिन्नाननतमश्वराननतातिभक्तानालादितानोदीनाश्चविभीषणानविहिताःश्रीलक्ष्मणार्याश्रितैः १० इह
खलुभगवान्पाराशर्यःपरमकारुणिकःसकलसंसारानर्थसंकटात्जडान्जंतून्उद्दिधीर्षुःसर्वश्रुतिरहस्यप्रकाशकंमहाभारताख्यमितिहासं
प्रणिनाय तत्रशतपर्वाणितेष्वंतिमंपर्वत्रयंहरिवंशरूपम् यथोक्तंअनुक्रमणिकाध्याये हरिवंशस्ततःपर्वपुराणंखिलसंज्ञितम् विष्णुपर्व-
शिशोश्चर्याविष्णोःकंसवधस्तथा भविष्यंपर्वचाप्युक्तंखिलेष्वेवाद्भुतंमहत् एतत्पर्वशतंपूर्णंव्यासेनोक्तंमहात्मनेति तथाग्रंथसंख्यायाअपि
एकंशतसहस्रंचमानुषेषुप्रतिष्ठितमित्युक्तायाः हरिवंशेनैवपूरणात् हरिवंशांतेभविष्योत्तरमेतत्तेकथितंभारतंमयेत्युपसंहाराच्चभारतांत-
र्गतत्वमस्य यच्चशाखांतरस्थंशाखांतरेप्रयोजनवशात्पठ्यतेयथाबह्वृचेषुश्रीसूक्तमेधासूक्तादितत्खिलमित्युच्यते तथाचाष्टादशपर्वात्मनी-
तिहासेहरिवंशाख्यंखिलंविष्णुपुराणंभविष्यपुराणरूपंतत्रतत्रसूचितस्यकृष्णमाहात्म्यस्यमोक्षधर्मोपयोगिनोवैराग्यस्यचोपबृंहणार्थंपठित-
म् पुराणंखिलसंज्ञितमितितत्रपुराणशब्दप्रयोगात् एवंचयथाध्वर्युवेदविहितोपिसोमयागोवेदांतरविहिताभ्यांस्तोत्रशस्त्राभ्यांविनानपू-
र्यतेएवंभारतपारायणमपिहरिवंशंविनानपूर्यतइतिज्ञापनार्थंपर्वसंख्यायांश्लोकसंख्यायांचास्यांतर्भावउक्तः अन्यथातत्रसंख्यांतरमेवावक्ष्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दित्यास्तांतावत् टीकांतरोक्तप्रकारास्तिह विस्तरभयादमूलत्वाच्च नलिख्यंते ग्रंथादौ विघ्नविघातायप्रचयगमनायच कृतं मंगलं शिष्यशिक्षायैपुनः
स्मारयति नारायणमिति नरेणअनाद्यविद्यावताजीवेनस्वकर्मद्वारासृष्टंनारंशरीरंतद्देवअयनंप्रवेशस्थानंयस्यसः तन्नारायणंजीवान्नियमयितुमं
तःप्रविष्टंशास्तारम् तथाचश्रुतिः अंतःप्रविष्टःशास्ताजनानामिति तथानरंजीवंहिरण्यगर्भम् ततउत्तमंहिरण्यगर्भाद्युत्कृष्टतरोःतर्यामीतनउत्कृष्टत
मस्तुशुद्धचिदात्मातमिति एवशब्दस्तेषामवश्यंनमस्कार्यत्वमाह चशब्दःसमुच्चयार्थः एतेषांनरनारायणनरोत्तमानांतत्त्वप्रद्योतनींसरस्वतींचनमस्कृत्यै
वततोव्यासः तयैवसरस्वत्यालोकानुग्रहार्थंआविर्भावितजयत्यविद्यामनेनेतिजयसंज्ञमविद्याध्वांतनाशकग्रंथमुदीरयेत्पठेदित्यर्थः १ द्वैपायनोष्ठेत्यादयो

श्रीगणेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींचैवततोजयमुदीरयेत् १ द्वैपायनोष्ठपुटनिःसृतम
प्रमेयंपुण्यंपवित्रमथपापहरंशिवंच योभारतंसमधिगच्छतिवाच्यमानंकिंतस्यपुष्करजलैरभिषेचनेन २ जयतिपराशरसूनुःस
त्यवतीहृदयनंदनोव्यासः यस्यास्यकमलगलितंवाङ्मयममृतंजगत्पिबति ३ योगोशतंकनकशृंगमयंददातिविप्रायवेदविदुषे
बहुविश्रुताय पुण्यांचभारतकथांशृणुयाच्चनित्यंतुल्यंफलंभवतितस्यचतस्यचैव ४ शताश्वमेधस्ययदत्रपुण्यंचतुःसहस्रस्यशत
क्रतोश्च भवेदनंतंहरिवंशदानात्प्रकीर्त्तितंव्यासमहर्षिणाच ५ यद्वाजपेयेनतुराजसूयात्दृष्टंफलंहस्तिरथेनचान्यत् नलभ्यते
व्यासवचःप्रमाणंगीतंचवाल्मीकिमहर्षिणाच ६ योहरिवंशंलेखयतियथाविधिनामहानपापःसपदि सजयतिहरिपदकमलंमधुपो
हिंयथारसेनसंलुब्धः ७

न्यत्रस्थाःषट्श्लोकाविभूतिकथनार्थमत्रपठ्यंते अप्रमेयंअद्भुतम् पुण्यंधर्मवृद्धिकरंपवित्रंदृष्टादृष्टनाशकम् पापहरंदुर्वासनाहरंशिवंकल्याणप्रदम्
पुष्करंआदितीर्थंततोपिपावनमित्यर्थः २ ३ ४ शताश्वमेधसंज्ञस्य चतुःसहस्रस्यचत्वारिसहस्राणिसत्रेपरिवेषणानिअक्षयान्नप्रदानियस्मिन्क्रतौतस्य सह
स्रंसत्रपरिवेषणमितिश्रुतिः शतक्रतोश्चइंद्रपदप्रापकंयत्कर्मतस्यदानात्अर्थतःपाठतश्चपरिशोधनात् दैर्घ्यशोधने ५ हस्तिरथेनहस्तियुक्तरथदानेन ६ जयतिआक्रमते
७ १

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आद्यंपुरुषमित्यादिव्यासवाक्यमवतारयिष्यन्सूतःव्यासंनमस्करोति पितामहाद्यमिति अहंतंद्वैपायनंव्यासंवेदउपासे विदेरुत्तमैकवचनम् विदेरुपा-
स्त्यर्थत्वंचसर्ववेदप्रसिद्धम् तस्यविशेषणंमहानिधानमिति निर्धार्यतेस्थाप्यतेऽस्मिन्सर्वमर्थजातमितिनिधानंवेदईश्वरोवा महत्निधानंयस्मिन्नितिवेद
स्येश्वरस्याधिष्ठानमित्यर्थः तंकंयस्मात्षष्ठंपितामहस्यब्रह्मणआद्यंपितामहाद्यंनारायणंप्रवदंति एवंहिपितृपितामहादिक्रमेणव्यासपराशरशक्तिवसि-
ष्ठब्रह्मभ्यःपंचभ्यःषष्ठोविष्णुरितिभवति परेतुयंपितामहात्षष्ठंवदंतीतिसंयोज्यवसिष्ठब्रह्मणोर्मध्येमत्तुमित्रावरुणौवाकल्पयित्वाव्यासंब्रह्मणःषष्ठमाहुः
परेपितामहपदेनैवविष्णुंगृण्हंति महर्षिः ऋषिर्विप्रःकाव्येनेतिश्रुतेर्महांतंकाव्यस्यकर्त्तारंमंत्रद्रष्टारंवा अक्षय्यविभूतियुक्तंअनंतयोगैश्वर्ययुक्तम् ना
रायणस्यांशाज्जातंअंशजम् एकःशुकःश्रेष्ठोवापुत्रोयस्यतम् यद्वाव्यासएवअहंमनुरभवंसूर्यश्चेतिवामदेववत्प्रत्यगभिन्नब्रह्मानुसंदधानःस्वात्मानमे
वनमस्करोति तथाचदृष्टंमह्यमेवनमोनमइति अस्मिन्पक्षेद्वैपायनंव्यासं अहंमहानिधानंब्रह्मवेदजानेइतिस्वरूपानुवादेनब्रह्मभावोविधीयते यद्वाद्वैपा

पितामहाद्यंप्रवदंतिषष्ठंमहर्षिमक्षय्यविभूतियुक्तम् नारायणस्यांशजमेकपुत्रंद्वैपायनंवेदमहानिधानम्

गजस्तस्येदमसाधारणंशुंडादंडादिलक्षणंतदेवअयनंज्ञापकंयस्यतंद्वैपायनंगजाननम् यद्वाद्वीपीव्याघ्रःतस्येदंचर्मद्वैपंतदेवायनंयस्येतिद्वीपिचर्मप
रीधानाःशश्मश्रुमांसातिभैरवेतिस्मृत्युक्तःशक्तिविग्रहोद्वैपायनस्तम् यद्वाद्वीपेषुसप्तस्वयनंचिन्हंप्रकाशकंस्वरूपंयस्यनतुपातालादिष्वितिद्वीपायनः
स्वार्थेतद्धितःद्वैपायनःसूर्यः यद्वाद्वैपंगजचर्मायनंज्ञापकंयस्यतद्वैपायनंगजचर्मधरंमहेश्वरम् यद्वाअभ्यर्हितत्वात्द्वीपंअयनंस्थानंयस्यस्वार्थेतद्धितःद्वै
पायनःश्वेतद्वीपपतिर्विष्णुःतंवेदउपासे अत्रसर्वेषामपीश्वरत्वात्पितामहात्षष्ठत्वंघटते तथाहिसच्चिदानंदव्याप्यान्मायाशबलात्ब्रह्मणोअव्यक्तम् अ
व्यक्तान्महत् महतोहंकारः अहंकारात्पंचतन्मात्राणि पंचतन्मात्राभ्यःपंचमहाभूतानि तेभ्यश्चतुर्मुखशरीरमितिसृष्टिक्रमस्यागमसिद्धस्यालोचनायाम्
आरोहक्रमेणतेषांपितामहात्षष्ठत्वंघटते महर्षिमितिसर्वज्ञत्वमुक्तं नारायणःपरंब्रह्मतस्यअंशइवांशोमायायांप्रतिबिंबःतेननिर्वृत्तत्वाद्देवमायाशबलम् ना
रायणस्यांशजम् एकोहिरण्यगर्भाख्यःपुत्रोयस्यतम् योब्रह्माणंविदधातिपूर्वमितिश्रुतेः महानिधानंसर्वकारणंमहत्परमंलयस्थानम् ८ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मंगल्यं आनंदावहम् मंगलं आनंदरूपम् विष्णुं व्यापनशीलम् वरेण्यं मुमुक्षुभिर्वरणीयम् अनघं आगंतुकदोषशून्यम् शुचिं स्वभावशुद्धं हृषी-
केशं इंद्रियाणां प्रवर्त्तकम् चराचरस्य गुरुं हितोपदेष्टारम् हरिं सर्वपापहरम् ३ नैमिषारण्य इत्यक्षराधिक्यमार्षम् कुलपतिः एको दशसहस्राणि योऽन्न
दानादिना भरेत् स वै कुलपतिर्नामवेदवेदांगपारग इत्युक्तलक्षणः योगसिद्धिमानित्यर्थः सिद्धौ हेतुः महामुनिः ध्याननिष्ठः अत्रापि हेतुर्धर्मात्मेति तत्र हेतुः
सर्वशास्त्रविशारद इति एतेन सर्वशास्त्रविदां अनुष्ठितक्रतूनां ध्यायिनां प्राप्तयोगैश्वर्याणां कृतकृत्यानामप्येतत् श्रोतुं योग्यमित्यर्थः यथोक्तं आत्मारामाश्च मु
नयो निर्ग्रंथा अप्युरुक्रमे कुर्वत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरिति सौतिः सूतः अग्निकुंडसमुद्भूतः सूतनिर्मलमानसेति पौराणिकप्रसिद्धेरग्निजो लोमहर्ष
णस्तस्य पुत्रं उग्रश्रवसम् न तु ब्राह्मण्यां क्षत्रियात्सूत इति स्मृत्युक्तं तद्धितानर्थक्यापत्तेः ४ ५ ६ अभ्यंगगर्भवासादिक्लेशरहितं द्रोणादीनां जन्म अनुत्त

मंगल्यं मंगलं विष्णुं वरेण्यमनघं शुचिम् नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ३ नैमिषारण्ये कुलपतिः शौनकस्तु महामुनिः सौ
तिं पप्रच्छ धर्मात्मा सर्वशास्त्रविशारदः ४ शौनक उवाच सौते सुमहदाख्यानं भवता परिकीर्त्तितम् भरतानां च सर्वेषां पार्थि
वानां तथैव च ५ देवानां दानवानां च गंधर्वोरगरक्षसाम् दैत्यानामथ सिद्धानां गुह्यकानां तथैव च ६ अत्यद्भुतानि कर्माणि विक्रमा धर्म
निश्चयाः विचित्राश्च कथायोगा जन्म चाग्र्यमनुत्तमम् ७ कथितं भवता पुण्यं पुराणं श्लक्ष्णया गिरा मनः कर्णसुखं सौते प्रीणात्यमृतसं
मितम् ८ तत्र जन्म कुरूणां वै त्वयोक्तं लोमहर्षणे न तु वृष्ण्यंधकानां च तद्भवान्वक्तुमर्हति ९ सौतिरुवाच जनमेजयेन यत्पृष्टः शि
ष्यो व्यासस्य धर्मवित् तत्तेहं संप्रवक्ष्यामि वृष्णीनां वंशमादितः १० श्रुत्वेतिहासं कार्त्स्न्येन भरतानां स भारतः जनमेजयो महाप्राज्ञो वैशं
पायनमब्रवीत् ११ जनमेजय उवाच महाभारतमाख्यानं बह्वर्थं श्रुतिविस्तरम् कथितं भवता पूर्वं विस्तरेण मया श्रुतम् १२
तत्र शूराः समाख्याता बहवः पुरुषर्षभाः नामभिः कर्मभिश्चैव वृष्ण्यंधकमहारथाः १३ तेषां कर्मावदातानि त्वयोक्तानि द्विजोत्तम तत्र
तत्र समासेन विस्तरेणैव मे प्रभो १४ न च मे तृप्तिरस्तीह कथ्यमाने पुरातने एकश्चैव मतो राशिर्वृष्ण्यायः पांडवास्तथा १५

मं रेतः संबंधं विना केवलं ध
र्मसामर्थ्यात् अग्निप्रभृतिभ्यो धृष्टद्युम्नादीनां अत्यद्भुतानि व्यासजन्मादौ दिवैवांधकारसृष्ट्यादीनि ७ भवता कथितं पुराणं मम मनः प्रीणातीति संबंधः ८ तत्र पु
राणे ९ जनमेजय इत्यक्षराधिक्यमार्षम् यत्त्यथा तत्तथा १० इति ह एवं किल आस पूर्ववृत्तं स्वस्य गुरोः सकाशात् पूर्वैः पूर्वं आचार्यो धिगतवानिति यत्र कथ्यते स इति
हासः आसेति असगतिदीप्त्यादानेष्वित्यस्य लिटि रूपं क्रपांतिङंतसमासः पारंपर्यागता कथेत्यर्थः तां श्रुत्वा ११ श्रुतिविस्तरं वेदोपबृंहकं १२ शूराः प्रद्युम्नादयः १३ कर्माव-
दातानि कर्मोत्तमानि उत्तमानि कर्माणीति यावत् विशेषणविशेष्येण बहुलमिति बाहुलकात्समासः तत्र तत्र प्रसंगे प्रसंगे विस्तरेणैव विस्तरेण च १४ पुरातने पुराणे राशिः
कुटुंबः कूटसमुदाय इति वा १५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ग्रंथप्रवृत्तिबीजभूतंशौनकप्रश्नंमंगलाचरणपूर्वकमवतारयति आद्यंपुरुषमिति हरिंनमस्कृत्यशौनकः सौतिंपप्रच्छेतितृतीयचतुर्थगतयोर्वाक्ययो
रन्वयः अत्रभूबीजांकुरतरुफलोपमाः पंचब्रह्मपुरुषाः क्रमेण शुद्धचैतन्यम् १ मायाशबलः २ सूत्रात्मा ३ विराट् ४ विष्णु ५ रितिसंज्ञांलभंते तत्रभू
स्थानीयंशुद्धचैतन्यंआद्यपुरुषमित्यनुसंधत्ते ईशानमितिद्वितीयंमायाशबलंबीजस्थानीयम् मायिनंतुमहेश्वरमितिश्रुतेः पुरुहूतंपुरुष्टुतमित्यंकुरो
पमंतृतीयंसूत्रात्मानम् सहिपुरुभिर्बहुभिर्यजमानैर्यज्ञेहूयतेस्तूयतेच बहूभिरिष्टश्चेत्यपिद्रष्टव्यम् यदाहयास्कः यदेनमृग्भिः शंसंतियजुर्भिर्यजं-
तिसामभिःस्तुवंतीति तथाश्रुतावपि सूत्रात्मानंप्रकृत्यतद्यदिदमाहुरमुंयजामुंयजेत्येतस्यैवसाविसृष्टिरितितस्यैवसर्वयष्टव्यदेवतात्मत्वमाम्नायते
किमेतत्पुरुषत्रयंपृथक्सिद्धंउतप्रथमेस्मिन्नेवजलाशयेतरंगबुद्बुदावितरौकल्पितौइत्याशंक्याह ऋतमेकाक्षरंब्रह्मेति ऋतंसत्यंअबाधितम् ए-
कंमायासंपर्करहितत्वात् अक्षरंसूत्रात्मवन्नक्षरतिअकार्यत्वात् अतएवब्रह्मत्रिविधपरिच्छेदशून्यंयदेवंरूपंवस्तुतदेवव्यक्ताव्यक्तंसूत्रेशानरूपम्
किंव्यक्ताव्यक्तेतस्यपरिणामौनेत्याह सनातनंसर्वदैकरूपंकूटस्थंरज्वादंडधारादिवद्व्यक्ताव्यक्तेतत्रारोपितेइत्यर्थः १ चतुर्थंतरूपमंविराट्पुरुषमाह

आद्यंपुरुषमीशानंपुरुहूतंपुरुष्टुतम् ऋतमेकाक्षरंब्रह्मव्यक्ताव्यक्तंसनातनम्
असच्चसदसच्चैवयद्विश्वंसदसत्परम् परावराणांस्रष्टारंपुराणंपरमव्ययम् २

असदिति यत्सदसत्परंकार्यकारणाभ्यांसूत्रेशानाभ्यामन्यत्शुद्धंब्रह्मतदेवविश्वंविराडाख्यंएनमेवविश्वंविशिनष्टि असदितिसतोविलक्षणम्
अनिर्वचनीयम् यस्मात्सदसच्च सत्दृश्यमानत्वात् असच्चनेहनानास्तिकिंचनेतिश्रुत्याब्रह्मज्ञानोत्तरंतद्बाधस्यदर्शितत्वात् तस्मादिदमसदनि
र्वचनीयमेव नहिपरस्परविरुद्धाभ्यांसत्वासत्वाभ्यामाक्रांतंकिंचिद्वस्त्वस्ति एवंसूत्रेशानयोरप्यनिर्वचनीयत्वंबोध्यंविश्वहेतुत्वात् कार्यकारणयोः
समसत्ताकत्वनियमात् आद्यःपुरुषस्तुनानिर्वचनीयः तत्रकारणत्वस्यौपचारिकत्वात् यथोक्तम् अस्यद्वैतेंद्रजालस्ययदुपादानकारणम् अज्ञा
नंतदुपाश्रित्यब्रह्मकारणमुच्यतइति फलोपमंपंचमंविष्णुमाह परावराणांस्रष्टारमिति परेसूत्रात्मानः अवरेविराजः तेषांस्रष्टारम् परिणतानेकवी
जगर्भाद्वृक्षस्थादपिफलादनेकवटांकुरास्तरवश्चसंभवंतिएवंकार्योपाधिपरिच्छिन्नादपिचतुर्भुजादेःपारंपरार्इसूत्रादयःसंभवंतीतियुक्तंतस्यपराव
राणांस्रष्टृत्वम् पुराणंपुराऽपिनवम् फलवद्यंजन्योनभवतीत्यर्थः अतएवपरंअत्यंतंअव्ययंअपक्षयशून्यम् एतेनविग्रहादिवद्भगवन्मूर्तेर्नित्यत्वमुक्तम् २
तथाचस्मृतिः देवानांकार्यसिद्ध्यर्थमाविर्भवतिसायदा उत्पन्नेतितदालोकेसानित्याप्यभिधीयते २

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वंशकुशलोवंशाख्यानेनिपुणः तेषांवृष्णीनांकुलंवंशम् १६ प्रजापतेः प्रजापतिमारभ्य १७ तांपृष्टांकथांवंशाख्यायिकाम् १८ दिव्यांअलौकिकीं पुण्यांसुखदाम् चित्रांआश्चर्यकरीम् १९ धारयेत्हृदिपुस्तकेवागृहेस्थापयेत् २० एवंमहीकृतांकथांप्रस्तौति अव्यक्तमित्यादिना व्यक्तात्इदंप्रत्यगोचरादहंप्रत्ययगोचराच्चान्यत् अतएवकारणद्रष्टृदृश्ययोर्बीजम् यत्तदितिशास्त्रप्रसिद्धम् नित्यंआद्यन्तशून्यम् सदसदात्मकंसत्यानृतात्मकंमायाशबलंब्रह्मेत्यर्थः तदेवाह प्रधानपुरुषमिति तदुभयात्मकमित्यर्थः तस्मात्कारणात्विश्वंस्थूलसूक्ष्मजगत्निर्ममेकर्मकर्त्तरिप्रयोगः जातमित्यर्थः अतएवतद्विश्वंईश्वरंईश्वराभिन्नम् ईश्वरमित्यनुवाद्यापेक्षयाक्लीबत्वम् २१ तंवैतमेवपुरुषंअव्यक्ताख्यंत्वंब्रह्माणंमहत्तत्त्वाभिमानिनंविद्धि कारणानन्यत्वा

भवांश्चवंशकुशलस्तेषांप्रत्यक्षदर्शिवान् कथयस्वकुलंतेषांविस्तरेणतपोधन १६ यस्ययस्यान्वयेयेयेतांस्तानिच्छामिवेदितुम् सत्वंसर्वमशेषेणकथयस्वमहामुने तेषांपूर्वंविसृष्टिंचविचिन्त्येमांप्रजापतेः १७ सौतिरुवाच सत्कृत्यपरिपृष्टस्तुसमहात्मामहातपाः विस्तरेणानुपूर्व्याचकथयामासतांकथाम् १८ वैशंपायनउवाच शृणुराजन्कथांदिव्यांपुण्यांपापप्रणाशनीम् कथ्यमानांमयाचित्रांबह्वर्थांश्रुतिसम्मिताम् १९ यश्चेमांधारयेत्तातशृणुयाद्वाप्यभीक्ष्णशः स्ववंशधारणंकृत्वास्वर्गलोकेमहीयते २० अव्यक्तंकारणंयत्तन्नित्यंसदसदात्मकम् प्रधानंपुरुषंतस्मान्निर्ममेविश्वमीश्वरम् २१ तंवैविद्धिमहाराजब्रह्माणममितौजसम् स्रष्टारंसर्वभूतानांनारायणपरायणम् २२ अहंकारस्तुमहतस्तस्माद्भूतानिजज्ञिरे भूतभेदाश्चभूतेभ्यइतिसर्गःसनातनः २३ विस्तरावयवंचैवयथाप्रज्ञंयथाश्रुतम् कीर्त्यमानंशृणुमयापूर्वेषांकीर्तिवर्द्धनं २४ धन्यंयशस्यंशत्रुघ्नंस्वर्ग्यमायुःप्रवर्द्धनम् कीर्तनंस्थिरकीर्तीनांसर्वेषांपुण्यकर्मणाम् २५ तस्मात्कल्यायतेकल्यःसमग्रंशुचयेशुचिः आवृष्णिवंशाद्वक्ष्यामिभूतसर्गमनुत्तमम् २६ ततःस्वयंभूर्भगवान्सिसृक्षुर्विविधाःप्रजाः अपएवससर्जादौतासुवीर्यमवासृजत् २७

त्कार्यस्य नारायणपरायणंईश्वराधीनम् २२ महतःसकाशात्अहंकारःजज्ञेइतिविपरिणामेनयोज्यं तस्मादहंकारात्भूतानिआकाशादीनिसूक्ष्माणिजज्ञिरे तेभ्यःसूक्ष्मेभ्योभूतभेदाःपंचस्थूलभूतानिचतुर्विधानिजरायुजादीनिचजज्ञिरे इतिएवंरूपःसर्गःसनातनःप्रवाहरूपउक्तइतिशेषः २३ विस्तरावयवंविस्तरयुक्ताःअवयवाःनानावंशशाखाःप्रशाखारूपाःयस्यतंसर्गम् यथाप्रज्ञंयथाश्रुतिबुद्धिंसंप्रदायंचानतिक्रम्येत्यर्थः २४ २५ यस्मात्पुण्यकर्मणांकीर्तनंधन्यत्वादिगुणंतस्मात्कल्यायश्रोतुंगृहीतुंचसमर्थायतेतुभ्यंआवृष्णिवंशात्वृष्णिवंशंअभिव्याप्यभूतसर्गंचतुर्विधभूतग्रामसृष्टिंवक्ष्यामि कल्पसामर्थ्येइत्यस्यरूपंकल्यइति २६ ततइतिसूक्ष्मभूतसृष्ट्यनंतरंविविधाःभौतिकीःप्रजाःसिसृक्षुरीश्वरःअपःअब्भिरुपलक्षितंस्थूलभूतपंचकंजरायुजाद्युपादानभूतंआदौससर्जतासुचाप्सुवीर्यंअंडोत्पादनसमर्थंअवासृजत् निहितवान् स्वयमेवतत्रप्रविष्टइत्यर्थः २७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतदेवनारायणनामनिर्वचनस्मृत्याद्रढयति आपोनाराइति नाराइत्यस्यव्याख्यानंनरसूनवइति एतेनतत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेरर्थःसंगृहीतः अ-
यनंप्रवेशस्थानम् नयतीतिनरईश्वरः २८ तत्वीर्यंअंडंअभवत् हिरण्यवर्णंचित्प्रकाशरूपम् अयमर्थः उक्तक्रमेअव्यक्तात्ब्रह्माख्यामहांस्ततोहंकारस्त-
तःसूक्ष्मभूतानितेभ्यःपुष्पस्थानीयान्यसंज्ञानिस्थूलभूतानितेषुरेतःस्थानीयश्चित्प्रतिबिंबस्तयोःसंघातोऽण्डंतच्चउदकेशयंस्त्रीरूपेषुसूक्ष्मभूतेषुवस्थितम्
तत्रगर्भेजीववत्ब्रह्माचतुर्मुखोजज्ञेआविर्भूतइति २९ हिरण्येति अंडेवर्षमात्रंस्थित्वाहिरण्यगर्भःअंडंद्वैधंद्विधाकरोत् ताभ्यांचशकलाभ्यांदिवंभुवंचा-
कल्पयदित्यर्थः ३० तयोर्द्वयोःशकलयोर्यदंतरालंसआकाशइत्यर्थः दिशश्चेतिचकाराद्दिगुपाधिंसूर्यंकल्पयित्वादशधाप्राच्यादिभेदेनदधेधृतवान् अंडांत-
राले एवेयंदिगादिकल्पनाततोबहिरस्तीतिभावः ३१ सृष्टेर्हेतून्आहतत्रेति तत्रअंडमध्येरतिविषयेषुप्रीतिंसृष्टिंपिंडसृष्टिंतद्रूपांअंडसमानरूपाम् एतेनपिं-

आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्यताःपूर्वंतेननारायणःस्मृतः २८ हिरण्यवर्णमभवत्तदंडमुदकेशयम् तत्रजज्ञेस्व-
यंब्रह्मास्वयंभूरितिनःश्रुतम् २९ हिरण्यगर्भोभगवानुषित्वापरिवत्सरम् तदंडमकरोद्द्वैधंदिवंभुवमथापिच ३० तयोःशकलयोर्मध्ये
आकाशमसृजत्प्रभुः अप्सुपारिप्लवांपृथ्वींदिशश्चदशधादधे ३१ तत्रकालंमनोवाचंकामंक्रोधमथोरतिम् ससर्जसृष्टिंतद्रूपांस्रष्टुमि-
च्छन्प्रजापतीन् ३२ मरीचिमत्र्यंगिरसंपुलस्त्यंपुलहंक्रतुम् वसिष्ठंचमहातेजास्सोसृजत्सप्तमानसान् ३३ सप्तब्रह्माणइत्येते
पुराणेनिश्चयंगताः नारायणात्मकानांवैसप्तानांब्रह्मजन्मनाम् ३४ ततोऽसृजत्पुनर्ब्रह्मारुद्रंरोषात्मसंभवम् सनत्कुमारंचवि-
भुंपूर्वेषामपिपूर्वजम् ३५ सप्तैतेजनयंतिस्मप्रजारुद्रश्चभारत स्कंदःसनत्कुमारश्चतेजःसंक्षिप्यतिष्ठतः ३६ तेषांसप्तमहावं-
शादिव्यादेवगणान्विताः क्रियावंतःप्रजावंतोमहर्षिभिरलंकृताः ३७

डब्रह्मांडयोरुत्पत्तिप्रकारस्तुल्यइत्युक्तंभवति ३२ अत्र्यंगिरसंअत्रिसहितमंगिरसम् मानसान्मनसासंकल्पमात्रेणजातान् ३३ सप्तमरीच्याद-
यः ब्रह्माणः ब्राह्मणजात्यभिमानिनःगृहाश्रमपराइत्यर्थः नारायणात्मकानांनारायणैकमनसांसप्तानांसनकसनंदनसनातनसनत्कुमारस्कंदनारद-
रुद्राणाम् ब्रह्मणःसकाशाज्जन्मयेषांतेषांब्रह्मजन्मनांब्रह्मपुत्राणांअनादरेषष्ठीश्चाघ्रातृननादृत्यपुराणेवेदमार्गेएवनिश्चयंगताः कर्मैवश्रेयइतिवि-
निश्चिताः ३४ सनत्कुमारम् चात्सनकादीन् पूर्वेषांमरीच्यादीनाम् ३५ सनत्कुमारश्चेतिचात्सनकसनंदनसनातननारदाःस्कंदश्चेतिषट्तेजःसृ-
ष्टिसामर्थ्यंसंक्षिप्यनिगृह्यसृष्टिमकुर्वंतावेवतिष्ठतः ३६ तेषांअष्टानांमध्येसप्त यक्षःपिशाचादिस्रष्टुःरुद्रादन्येदिव्याआदित्यादयः महर्षिभिःकश्य-
पाद्यैः ३७ श्रीगोपालकृष्णायनमः श्रीगोपालोविजयते ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्रिसावतामपेक्षितानिहविर्मन्त्रदेवतादीनितेषांसृष्टिमाह द्वाभ्यांविद्युतइति अत्रप्रजापतेरेतोदेवादेयानांरेतोवर्षवर्षस्यरेतओषधयइतिश्रुतिक्रमेणवयां
सीतिखेचरत्वसामान्याद्देवताउच्यंते पर्जन्यंचेत्योषधीनामप्युपलक्षणम् यज्ञसिद्धयेइतिअत्राप्यपकृष्यते अशानिर्वज्रम् रोहितंऋजु अवक्रमिंद्रधनुः
विद्युदाद्यभिमानिन्योदेवताएवविद्युदादिशब्दैरुच्यंते ३८ निर्मितःसिद्धानामेवऋगादीनामाविष्करणंवेदस्यनित्यत्वात् यष्टव्यसृष्टिमाह सुरवादिति
३९ यष्टृसृष्टिमाह प्रजनादितिप्रजनात्उपस्थेंद्रियात् असुरान्जघनात् पश्चाद्भागात् अस्रूरानितिच्छेदः साध्यान्प्राचीनान्देवान् ४० उच्चेति तस्यआ
पवस्यवसिष्ठापरनाम्नःप्रजापतेः ४१ सृज्यमानाः मनसैवेतिशेषः व्याप्यतिष्ठत आपवस्ययदाप्रजानैवविवर्द्धंतइतिद्वयोःसंबंधः ४२ सः आपवस्यदेहार्द्धः
नारीयद्यद्रूपंगोवडवादिकंगृहीतवतीतत्तज्जातीयंवृषाश्वादिरूपंपुरुषोपिगृहीतवान्तेनमैथुन्यजाः प्रजाः विविधाः ससृजेइत्यर्थः नारीशतरूपानाम ४३

विद्युतोऽशनिमेघांश्चरोहितेंद्रधनूंषिच वयांसिचससर्जादौपर्जन्यंचससर्जह ३८ ऋचोयजूंषिसामानिनिर्ममेयज्ञसिद्धये साध्या
स्तैरयजन्देवानित्येवमनुशुश्रुम सुरवाद्देवानजनयत्पितृंश्चैवोपिवक्षसः ३९ प्रजनाच्चमनुष्यान्वैजघनान्निर्ममेऽस्रूरान् साध्यानज
नयद्देवानित्येवमनुशुश्रुम ४० उच्चावचानिभूतानिगात्रेभ्यस्तस्यजज्ञिरे आपवस्यप्रजासर्गंसृजतोहिप्रजापतेः ४१ सृज्यमानाःप्रजानै
वविवर्द्धंतेयदातदा द्विधाकृत्वात्मनोदेहमर्द्धेनपुरुषोभवत् ४२ अर्द्धेननारीतस्यांससृजेविविधाःप्रजाः दिवंचपृथिवींचैवमहिम्ना
व्याप्यतिष्ठतः ४३ विराजमसृजद्विष्णुःसोऽसृजत्पुरुषविराट् पुरुषंतमनुंविद्धितद्वैमन्वतरंस्मृतम् ४४ द्वितीयमापवस्यैतन्मनोरंतर
मुच्यते सवैराजःप्रजासर्गंससर्जपुरुषःप्रभुः नारायणविसर्गःसप्रजास्तस्याप्ययोनिजाः ४५ आयुष्मान्कीर्तिमान्धन्यःप्रजावान्
श्रुतवांस्तथा आदिसर्गंविदित्वेमंयथेष्टांप्राप्नुयाद्गतिम् ४६ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिआदिसर्गक
थनेप्रथमोऽध्यायः १ वैशंपायनउवाच सस्रृष्टासुप्रजास्वेवमापवोवैप्रजापतिः लेभेवैपुरुषःपत्नींशतरूपामयोनिजाम् १

विष्णुर्हिरण्यगर्भद्वाराविराजंआपवाख्यंअसृजत ४४ मन्वंतरपदंव्याचष्टेसार्द्धेन द्वितीयमिति नारायणस्यविसर्गोहिरण्यगर्भद्वाराव्यवहितःसर्गःसआपवः
अतोस्यविष्णुपौत्रत्वात् अयोनिजाः प्रजाःप्रथमःसर्गःसएवमनुद्वारायोनिजंप्रजासर्गंद्वितीयंससर्ज अतएतदापवस्यमनोरुख्याख्यंद्वितीयंअंतरंव्यवधानंय-
स्मात्सर्गोऽभूत्तस्मात्तत्रमन्वंतरशब्दःप्रयुज्यतइत्यर्थः ४५ एतदुशज्ञानफलमाह आयुष्मानिति ४६ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशा
वतंसश्रीगोविंदसूरिसूनोर्नीलकंठस्यकृतौभारतभावदीपेहरिवंशार्थप्रकाशेआदिसर्गकथनेप्रथमोऽध्यायः १ एवमयोनिजांसृष्टिमुक्त्वायोनिजामपितामा
हसइति प्रजासुअयोनिजासुसृष्टासुसतीषुआपवएव द्विधाकृत्वात्मनोदेहमर्द्धेनपुरुषोभवत् अर्द्धेननारीतिसूचितरीत्यापुरुषोभूत्वापत्नींचलेभे १ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

महिम्नामहत्त्वेन धर्मेणयोगजपुण्येनसापत्नीशतरूपाअनंतरूपाव्यजायतविविधरूपाऽभवत् प्रच्छन्नरूपायाः अनेकरूपधारणसामर्थ्यंतदापवस्यैवत
दनन्यत्वात्तस्याइतिभावः २ प्रत्यपद्यतसंतानायेतिशेषः ३ स्वायंभुवोवैराजः एकसप्ततियुगंकिंचिदधिकामेकसप्ततिम् चतुर्युगमित्यर्थः ४ वसिष्ठतन-
यायांतुकाम्यायांपुत्रमीप्सितम् वीरोवैजनयामासप्रियव्रतमुदारधीरितिवायुपुराणोक्तःप्रियव्रतमाताकाम्याऽन्येत्यर्थः ५ प्रियव्रतस्यभार्याकर्दमपुत्री
काम्यान्येत्याहकाम्यानामेति सायान्सुतान्सुषुवेतानेवाहकाम्यापुत्राइति ६ ७ ८ चतुरःसुतानाहध्रुवमिति शांतमितिविशेषणम् आयुष्मंतंवसं

आपवस्यमहिम्नातुदिवमावृत्यतिष्ठतः धर्मेणैवमहाराजशतरूपाव्यजायत १ सातुवर्षायुतंतप्त्वातपःपरमदुश्चरम् भर्त्तारंदी-
प्ततपसंपुरुषंप्रत्यपद्यत ३ सवैस्वायंभुवस्तातपुरुषोमनुरुच्यते तस्यैकसप्ततियुगमन्वंतरमिहोच्यते ४ वैराजात्पुरुषाद्वीरंशतरू-
पाव्यजायत प्रियव्रतोत्तानपादौवीरान्काम्याव्यजायत ५ काम्यानाममहाबाहोकर्दमस्यप्रजापतेः काम्यापुत्रास्तुचत्वारःसम्रा
ट्कुक्षिर्विराट्प्रभुः प्रियव्रतसमासाद्यपतिंसासुषुवेसुतान् ६ उत्तानपादंजग्राहपुत्रमत्रिःप्रजापतिः उत्तानपादाच्चतुरःसूनृताजन
यत्सुतान् ७ धर्मस्यकन्यासुश्रोणीसूनृतानामविश्रुता उत्पन्नावाजिमेधेनध्रुवस्यजननीशुभा ८ ध्रुवंचकीर्त्तिमंतंचशिवंशांतम
यस्पतिं उत्तानपादोजनयत्सूनृतायांप्रजापतिः ९ ध्रुवोवर्षसहस्राणित्रीणिदिव्यानिभारत तपस्तेपेमहाराजप्रार्थयन्सुमहद्यशः
१० तस्मैब्रह्मादददौप्रीतःस्थानमप्रतिमंप्रभुः अचलंचैवपुरतःसप्तर्षीणांप्रजापतिः ११ तस्यातिमात्रामृद्धिंचमहिमानंनिरीक्ष्यच दे
वासुराणामाचार्यःश्लोकमप्युशनाजगौ १२ अहोऽस्यतपसोवीर्यमहोश्रुतमहोबलम् यदेनंपुरतःकृत्वाध्रुवंसप्तर्षयःस्थिताः १३ त-
स्मात्श्लिष्टिंचभव्यंचध्रुवाच्छंभुर्व्यजायत श्लिष्टेराधत्तसुच्छायापंचपुत्रानकल्मषान् १४ रिपुंरिपुंजयंपुण्यंवृकलंवृकतेजसम् रि
पोराधत्तबृहतीचाक्षुषंसर्वतेजसम् १५ अजीजनत्पुष्करिण्यांवीरण्यांचाक्षुषोमनुम् प्रजापतेरात्मजायामरण्यस्यमहात्मनः १६
मनोरजायंतदशनड्वलायांमहौजसः कन्यायामभवन्श्रेष्ठवैराजस्यप्रजापतेः १७

तथेतिपाठांतरम् ९ महद्यशः तस्यनाममहद्यशइतिश्रुतेःपरब्रह्म
विष्णवाख्यम् १० ब्रह्मापिविष्णुरेवप्रभुर्विप्रीतइतिसंबंधः प्रजापतिः प्रजानांब्रह्मादीनांपतिः ११ अतिमात्रामनंताम् महिमानंमाहात्म्यंउशनाः शुक्रः तस्यदेवा
चार्यत्वंकचद्वारा बृहस्पतिर्हिशुक्रोभूत्वेंद्रस्याभयायासुरेभ्यः क्षयायेमासविद्यामसृजदिति मैत्रायणीयेबृहस्पतेरेवशुक्रत्वाम्नानाद्वा १२ १३ आधत्तवंशस्थ
तत्वेनस्थापितवती १४ सर्वतेजसंसर्वदेवतेजोमयम् यथोक्तम् इंद्रात्प्रभुत्वंज्वलनात्प्रतापंक्रोधंयमाद्वैश्रवणाच्चवित्तम् आयुःकृतिवायुजनार्दनाभ्यामादाय
राज्ञः क्रियतेशरीरमिति १५ विरण्यांवीरणदुहितरि १६ महौजसः महौजसःसंज्ञस्यअस्यैवविशेषणंवैराजस्येति १७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सत्यवागित्यपिपठंति १८ पाठांतरेमहौजसः कन्यायामितिशेषः आग्नेयी अग्निकन्या आंगिरसंशिबिमित्यपिपठंति १९ सुनीथा अंगभार्यामृत्योः पु-
त्री अजायत अजनयत् अपचारात् देवतादिद्रोहात् प्रकोपः मुनीनामितिशेषः २० प्रजार्थंसंतानार्थम् यस्यमुनिप्रकोपहतस्य २१ एषः पृथुः प्रजाः सुदि-
ताः करिष्यतीत्यन्वयः २२ इमांपृथ्वीम् क्षत्रपूर्वजः क्षत्रजातौप्रथमसुत्पन्नः २३ तस्मात्तन्निमित्तीकृत्य पृथोर्यज्ञेहि अभितः सूतमागधावुत्पन्नावितिं
अन्यत्रस्मर्यतइतितस्यतदुत्पत्तिनिमित्तत्वम् निपुणौक्रमात्राज्ञास्तुतौवंशपाठेचकुशलौ २४ गौः गोरूपिणीपृथ्वी सस्यानीतिसर्ववस्तूपलक्षणम् २५

ऊरुः पुरुः शतद्युम्नस्तपस्वीसत्यवान्कविः अग्निष्टुदतिरात्रश्चसुद्युम्नश्चेतितेनव १८ अभिमन्युश्चदशमोनड्वलायाः सुताः स्मृ-
ताः ऊरोरजनयत्पुत्रान् षडाग्नेयीमहाप्रभान् अंगंसुमनसंख्यातिंक्रतुमंगिरसंगयम् १९ अंगात्सुनीथापत्यंवैवेनमेकमजायत
अपचारात्तुवेनस्यप्रकोपः सुमहानभूत् २० प्रजार्थमृषयोयस्यममंथुर्दक्षिणंकरम् वेनस्यपाणौमथितेबभूवमुनिभिः पृथुः २१ तं
दृष्ट्वाऋषयः प्राहुरेषवैमुदिताः प्रजाः करिष्यतिमहातेजायशश्चप्राप्स्यतेमहत् २२ सधन्वीकवचीखड्गीतेजसानिर्दहन्निव पृथु-
र्वैन्यस्तदाचेमाररक्षक्षत्रपूर्वजः २३ राजसूयाभिषिक्तानामाद्यः सवसुधाधिपः तस्माच्चैवसमुत्पन्नौनिपुणौसूतमागधौ २४ तेनेयंगौर्महाराजदुग्धासस्यानिभारत प्रजानांवृत्तिकामेनदेवैःसर्षिगणैःसह २५ पितृभिर्दानवैश्चैवगंधर्वैःसाप्सरोगणैः सर्पैःपुण्य-
जनैश्चैववीरुद्भिः पर्वतैस्तथा २६ तेषुतेषुचपात्रेषुदुह्यमानावसुंधरा प्रादाद्यथेप्सितंक्षीरंतेनप्राणानधारयन् २७ पृथुपुत्रौतुधर्मज्ञौ
जज्ञातेंतर्द्धिपालितौ शिखंडिनीहविर्धानमंतर्द्धानाद्व्यजायत २८ हविर्धानात्षडाग्नेयीधिषणाजनयत्सुतान् प्राचीनबर्हिषंशुक्लंग-
यंकृष्णंव्रजाजिनौ २९ प्राचीनबर्हिर्भगवान्महानासीत्प्रजापतिः हविर्धानान्महाराजयेनसंवर्द्धिताः प्रजाः ३० प्राचीनाग्राः कुशास्त-
स्यपृथिव्यांजनमेजय प्राचीनबर्हिर्भगवान्पृथिवीतलचारिणः ३१ समुद्रतनयायांतुकृतदारोऽभवत्प्रभुः महतस्तपसः पारेस-
वर्णायांमहीपतिः ३२ सवर्णाधत्तसामुद्रीदशप्राचीनबर्हिषः सर्वेप्रचेतसोनामधनुर्वेदस्यपारगाः ३३

पुण्यजनैर्यक्षैः २६ तेषुतेषुपुरा-
णांतरप्रसिद्धेषुतैस्तैर्देवादिभिस्तंतंसजातीयंवत्संकल्पयित्वातत्तत्स्वाभीष्टंवस्तुपृथ्वीसकाशात्दुग्ध्वागृहीतमित्यर्थः २७ अंतर्द्धानादंतर्द्धिसंज्ञात्
२८ आग्नेयीअग्निकन्याधिषणानाम्नी व्रजश्चअजिनश्चव्रजाजिनौ २९ हविर्धानात्स्वपितुरपिमहान् ३० अस्यप्राचीनबर्हिष्ट्वंव्याचष्टे प्राचीनाग्रा
इति यतः पृथिव्यांतस्यप्राचीनाग्राः कुशाः पृथिवीतलचारिणः प्रभवः स्वरूपेप्रसरंतिकृत्स्नभूमंडलव्यापिनः आसन्नतः सप्राचीनबर्हिरित्यर्थः तलंस्वरू- ५
पाधारयोरितिविश्वः ३१ सवर्णायांऊढायांकृतदारोऽभवदित्यध्याहृत्ययोज्यम् ३२ सर्वेप्रचेतसः प्रचेतःसंज्ञाः सर्वेऽपिएकनामानइत्यर्थः ३३ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अपृथग्धर्मचरणाः समानधर्माणः समानशीलाश्च ३४ ३५ प्रजाक्षयेहेतुमाह नाशकादिति ३६ तपसाज्ञानचक्षुषाउपश्रुत्यज्ञात्वायुक्ताः सन्नद्धाः ३७
उन्मूलान्उद्धृतमूलान् ३८ राजावृक्षाणामितिशेषः एतान्प्रचेतःसंज्ञान् ३९ प्राचीनबर्हिषइतितत्पुत्राः संबोध्यंते तद्राजस्येतिबहुत्वेनद्धितस्यलुक् ४०
रत्नेति वृक्षान्शोषयतावायुनातेषांआप्यः सारांशःयथास्वकारणेसौरेतेजसिप्रक्षिप्तः एवंपार्थिवः सारांशअम्मयेसौमेप्रक्षिप्तएवंकन्यारूपवाक्षरेतः
सोमस्यगर्भेधृतमितियुक्तम् वृष्टिर्वैवृक्षाश्चंद्रमसमनुप्रविशन्तीतिश्रुतेरपिऔषधिसाररूपेणवृष्ट्याश्चंद्रप्रवेशोगम्यते तस्माद्युक्तैवेयंसोमोक्तिः वृक्षाणा

अपृथग्धर्मचरणास्तेतप्यंतमहत्तपः दशवर्षसहस्राणिसमुद्रसलिलेशयाः ३४ तपश्चरत्सुपृथिवींप्रचेतस्सुमहीरुहाः अरक्ष्य
माणामावव्रुर्बभूवाथप्रजाक्षयः ३५ नाशकन्मारुतोवातुंवृतंखमभवद्द्रुमैः दशवर्षसहस्राणिनशेकुश्चेष्टितुंप्रजाः ३६ तदुपश्रुत्य
तपसायुक्ताः सर्वेप्रचेतसः मुखेभ्योवायुमग्निंचतेसृजुर्जातमन्यवः ३७ उन्मूलानथतान्दृष्ट्वावृक्षान्वायुरशोषयत् तानग्निर
दहद्घोरएवमासीद्द्रुमक्षयः ३८ द्रुमक्षयमथोबुध्वाकिंचिच्छिष्टेषुशाखिषु उपगम्याब्रवीदेतान्राजासोमःप्रजापतीन् ३९ कोपंयच्छ
तराजानः सर्वेप्राचीनबर्हिषः वृक्षशून्याकृतापृथ्वीशाम्यतामग्निमारुतौ ४०रत्नभूताचकन्येयंवृक्षाणांवरवर्णिनी भविष्यज्जानता
तत्त्वंधृतागर्भेणवैमया ४१ मारिषानामकन्येयंवृक्षाणामितिनिर्मिता भार्यावोस्तुमहाभागासोमवंशविवर्द्धिनी ४२ युष्माकंतेजसो
र्द्धेनममचार्द्धेनतेजसः अस्यामुत्पत्स्यतेपुत्रोदक्षोनामप्रजापतिः ४३ यइमांदग्धभूयिष्ठांयुष्मत्तेजोमयेनवै अग्निनाग्निसमोभूयः
प्रजाःसंवर्द्धयिष्यति ४४ ततःसोमस्यवचनाज्जगृहुस्तेप्रचेतसः संहृत्यकोपंवृक्षेभ्यःपत्नीधर्मेणमारिषाम् ४५ मारिषायांततस्तेवै
मनसागर्भमादधुः दशभ्यस्तुप्रचेतोभ्योमारिषायांप्रजापतिः दक्षोजज्ञेमहातेजाःसोमस्यांशेनभारत ४६ पुत्रानुत्पादयामाससो
मवंशविवर्द्धनान् अचरांश्चचरांश्चैवद्विपदोथचतुष्पदः सदृष्ट्वामनसादक्षःपश्चादप्यसृजत्स्त्रियः ४७ ददौसदशधर्मायकश्य
पायत्रयोदश शिष्टाःसोमायराज्ञेयन्नक्षत्राख्यादिदोपशुः ४८ तासुदेवाःखगानागागावोदितिजदानवाः गंधर्वाप्सरसश्चैवजज्ञिरेऽ
न्याश्चजातयः ४९ ततःप्रभृतिराजेंद्रप्रजामैथुनसंभवाः संकल्पाद्दर्शनात्स्पर्शात्पूर्वेषामभवन्प्रजाः ५०

मियंकन्यामयागर्भेणधृतेति ४१ वृ
क्षाणांकन्येतिवृक्षरेतोजन्यत्वात्तेषांमुख्यत्वम् ४२ तेजसःतपसः ४३ तेजोमयेनतपोजन्येनाग्निना ४४ धर्मेणविवाहविधिना ४५ अंशेनतपोऽर्द्धेन ४६
अचरादीन्स्रष्टव्यपदार्थान्मनसादृष्ट्वाआलोच्यतेषांसृष्ट्यर्थंप्रथमतः बीजग्राहिणीःस्त्रियोऽसृजत् ४७ ४८ अन्याःस्थावराद्याः ४९ दशानांकथंएक
औरसइत्येतामाशंकांसिंहावलोकनन्यायेनपरिहरति ततइति संकल्पस्यैकरूपत्वात्सर्वेषामौरसएकोभवितुंयुक्तइतिभावः ५० ६ ६ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५१ अंगुष्ठादिति एकस्माज्जातयोः स्त्रीपुंसयोः कथंदांपत्यसंबंधइत्येकाशंका ५२ कथमिति ब्रह्मपुत्रस्यसतः कथंप्राचेतसत्वमित्यपराशोमदौहित्रस्य
दक्षस्यकथंसोमश्वशुरत्वमितितृतीयाशंका ५३ एताः क्रमेणनिरस्यति श्लोकत्रयेणउत्पत्तिश्चेति भूतेषुपश्वादिषुउत्पत्तिर्नित्यास्वाभाविकीसापिंड्यनिय
मंविनाप्रजोत्पादनंस्वाभाविकंतथामनुष्येषुनिरोधः नित्यः असपिंडायसुहृहोदिदितिनियमः स्वाभाविकः यद्यप्येवंतथाप्यत्रऋषयः प्रजापतिर्वैस्वांदुहितरमभ्य-
ध्यायदित्यादिश्रुतिदर्शिनः विद्वांसश्चसापिंड्यशास्त्रस्यानित्यांगमिवाचरणार्थत्वंजानानानमुह्यंतिविश्वसृजांकार्यगौरवात्सापिंड्यशास्त्रस्याधुनिकस्य
उल्लंघनेनदोषइत्यर्थः ५४ कल्पभेदाभिप्रायेणद्वितीयांनिरस्यति युगइति ब्राह्मोदक्षोन्यः प्राचेतसोन्यइतिभावः ५५ तृतीयांनिरस्यतिज्येष्ठ्यमिति यथा
जातिकनिष्ठोविश्वामित्रस्तपोबलाद्ब्राह्मणोऽभूत् एवंजन्मकनिष्ठोऽपिदक्षोऽथंगिरः साम्यंलब्ध्वातत्संबंधित्वंगतइतिभावः प्रभावऐश्वर्यादिरत्रसंबंधेका-

जनमेजयउवाच देवानांदानवानांचगंधर्वोरगरक्षसाम् संभवः कथितः पूर्वंदक्षस्यचमहात्मनः ५१ अंगुष्ठाद्ब्रह्मणोजातो
दक्षः प्रोक्तस्त्वयानघ वामांगुष्ठात्तथाचैवतस्यपत्नीव्यजायत ५२ कथंप्राचेतसत्वंसः पुनर्लेभेमहातपाः एतन्मेसंशयंविप्रसम्यगा
ख्यातुमर्हसि दौहित्रश्चैवसोमस्यकथंश्वशुरतांगतः ५३ वैशंपायनउवाच उत्पत्तिश्चनिरोधश्चनित्यौभूतेषुपार्थिव
ऋषयोऽत्रनमुह्यंतिविद्वांसश्चैवयेजनाः ५४ युगेयुगेभवंत्येतेसर्वेदक्षादयोनृपाः पुनश्चैवनिरुध्यंतेविद्वांस्तत्रनमुह्यति ५५ ज्येष्ठ्यं
कानिष्ठ्यमप्येषांपूर्वंनासीज्जनाधिप तपएवगरीयोऽभूत्प्रभावश्चैवकारणम् ५६ इमांविसृष्टिंदक्षस्ययोविद्यात्सचराचराम् प्रजा-
वानायुरुत्तीर्णः स्वर्गलोकेमहीयते ५७ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिप्रजासर्गदक्षोत्पत्तिकथनंनामद्वितीयोऽ
ध्यायः २ जनमेजयउवाच देवानांदानवानांचगंधर्वोरगरक्षसाम् उत्पत्तिंविस्तरेणेमांवैशंपायनकीर्तय १ वैशंपाय
नउवाच प्रजाः सृजेतिव्यादिष्टः पूर्वंदक्षः स्वयंभुवा यथाससर्जभूतानितथाशृणुमहीपते २ मानसान्येवभूतानिपूर्वमेवासृज
त्प्रभुः ऋषीन्देवान्सगंधर्वानसुरानथराक्षसान् यक्षभूतपिशाचांश्चवयः पशुसरीसृपान् ३ यदास्यतास्तुमानस्यानव्यवर्द्धंतवैप्र
जाः अपध्यातांभगवतामहादेवेनधीमता ४ तदासंचिंत्यतुपुनः प्रजाहेतोः प्रजापतिः समेथुनेनधर्मेणसिसृक्षुर्विविधाः प्रजाः ५

रणंहेतुः तेनसोमकश्यपयोः श्वशुरत्वंदक्षस्ययुक्तम् ५६ ५७ इतिश्रीमहाभारतेहरिवंशटीकायांद्वितीयोऽध्यायः २ देवानामिति १ व्यादिष्टः
आज्ञप्तः भूतानिजरायुजादीनि २ मानसान्येवेतिसार्द्धश्लोकः ३ यदास्येति अवृद्धौहेतुः अपध्याताइति पूर्वकल्पीयवैरंस्मरतामहादेवेनदक्षस्य मान-
स्यः प्रजानावर्द्धंतामित्यन्यथाध्यातः ४ प्रजाहेतोः प्रजावृद्ध्यर्थंसिसृक्षुः सन् असिक्नीमावहदित्यन्तरेणसंबंधः ५ ६ ६ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६ वीरण्यामितिजन्यजनकभावलक्षणेपुंयोगेङीष् ७ प्रियोऽभीप्सितः संवादः ज्ञानाधिकारिभिः सहसंलापोयस्यतथाभूतः इदंवक्ष्यमाणंवचनंप्राब्रवी
दितिसार्द्धेनसंबंधः ८ परमेष्ठीब्रह्मायंसुनवरंव्यजीजनत्तंनारदाख्यंकश्यपोसुनिर्दक्षशापभयात् दक्षस्यैवदुहितरिभार्यायाः कनिष्ठस्वसापिज्येष्ठभ्रा-
तापितुः समइतिवदुपचारात्तत्दुहितरीत्युच्यतेतस्यांव्यजीजनदितिसंबंधः अन्येतुदक्षस्यैवकन्यादक्षभार्या नाम्नीतिव्याचक्षतेतन्नवीरण्यामितिविशे
षणानुपपत्तिःस्पष्टा९एतदेवव्याचष्टेसार्द्धेनपूर्वमिति देवर्षिसत्तमःकश्यपः तंनारदापितेवपरमेष्ठीव १० विधिनाशास्त्रीयमार्गेणनिर्मथ्यदेहाभिमानतः

असिक्नीमावहत्पत्नींवीरणस्यप्रजापतेः सुतांसुतपसायुक्तांमहतींलोकधारिणीम् ६ अथपुत्रसहस्राणिवैरिण्यांपंचवीर्यवान्
असिक्न्याजनयामासदक्षएवप्रजापतिः ७ तांस्तदृष्ट्वामहाभागान्संविवर्द्धयिषून्प्रजाः देवर्षिःप्रियसंवादोनारदःप्राब्रवीदिदम्
नाशायवचनंतेषांशापायैवात्मनस्तथा ८ यंकश्यपःसुतवरंपरमेष्ठीव्यजीजनत् दक्षस्यवैदुहितरिदक्षशापभयान्मुनिः ९ पूर्वंसहिस
मुत्पन्नोनारदःपरमेष्ठिना असिक्न्यामथवैरिण्यांभूयोदेवर्षिसत्तमः तंभूयोजनयामासपितेवमुनिपुंगवम् १० तेनदक्षस्यपुत्रावैहर्य
श्वाइतिविश्रुताः निर्मथ्यनाशिताःसर्वेविधिनाचनसंशयः ११ तस्योद्यतस्तदादक्षोनाशायामितविक्रमः महर्षीन्पुरतःकृत्वायाचितः
परमेष्ठिना १२ ततोभिसंधिंचक्रुस्तेदक्षस्तुपरमेष्ठिना कन्यायांनारदोमह्यंतवपुत्रोभवेदिति १३ ततोदक्षस्तुतांप्रादात्कन्यांवैपरमे
ष्ठिने सतस्यांनारदोजज्ञेदक्षशापभयादृषिः १४ जनमेजयउवाच कथंविनाशिताःपुत्रानारदेनमहर्षिणा प्रजापतेर्द्विजश्रेष्ठ
श्रोतुमिच्छामितत्वतः १५ वैशंपायनउवाच दक्षस्यपुत्राहर्यश्वाविवर्द्धयिषवःप्रजाः समागतामहावीर्यानारदस्तानुवाचह
१६ बालिशाबतयूयंवैनास्याजानीथवैक्षवः प्रमाणंस्रष्टुकामास्थप्रजाःप्राचेतसात्मजाः अंतरूर्ध्वमधश्चैवकथंस्रक्ष्यथवैप्रजाः १७
तेतुतद्वचनंश्रुत्वाप्रयाताःसर्वतोदिशम् प्रमाणंद्रष्टुकामास्तेगताःप्राचेतसात्मजाः १८ वायोरनशनंप्राप्यगतास्तेवैपराभवम् अ
द्यापिननिवर्त्ततेसमुद्रेभ्यइवापगाः १९

मन्थायव्यनाशिताअदर्शनंनीताः ११ महर्षीन्मरीच्यादीन्परमेष्ठिनाब्रह्मणा याचितःप्रार्थितः १२ अभिसंधिंमर्या
दांतेमहर्षयःतवब्रह्मणःपुत्रोनारदोमह्यंममकन्यायांभवेत्उत्पद्यतामितिचक्रुःअत्रापिकन्याशब्दार्थःपूर्ववत् १३ त्रयोदशानांदक्षकन्यानांकश्यपायदत्ता
नांमध्येवीरपरमेष्ठिनेकश्यपार्थमितिशेषः यंकश्यपःसुतवरमित्युपक्रमात् १४ १५ १६ यूयंप्रजाःस्रष्टुकामाःस्थअथचभुवःअंतरूर्ध्वंअधश्चप्रमाणंनजा-
नीथातोमूढाःसंतःकथंप्रजाःस्रक्ष्यथेतिसंबंधः भवतीतिभूःप्रपंचःतस्यप्रमाणंसाधकंयद्बुद्ध्यात्मप्रपंचस्यसिद्धिस्तंचिदात्मानंऊर्ध्वमधोऽतश्चसंतंअजानतां
युष्माकंप्रजासृष्टौअधिकारोनास्तीत्यर्थः १७ सर्वतोदिशंसर्वदिगभिमुखाअन्योन्यनिरपेक्षाःसंतआत्मदर्शनार्थंप्रयाताइत्यर्थः १८ वायोरितिल्यबलो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पेपंचमीवासुवैगौतमतत्सूत्रमितिश्रुतेर्वायुंसूत्रात्मानंसमाधिबलेनातीत्यअनशनंअशनाद्यतीतंभुद्धंब्रह्मप्राप्यपराभवंपरंचतद्भवंचआत्यंतिकंकैवल्यंगताःसंतोऽद्यापिननिवर्त्तंतइत्यर्थः दृष्टांतःस्पष्टार्थः १९ २० वचनंउत्क्रोतिशेषः नोदिताःगमनार्थंप्रेरिताः २१ पदवींमार्गम् २२ २३ २४ नाशंसर्वात्मनादेहवियोगम् गर्भवासंवाकुरुपरमेष्ठिनाप्रार्थितत्वात् अधिकारिकत्वेननाशानर्हत्वाच्च २५ २६ दक्षोनत्वसः षष्टिंकन्यानारदेनस्त्री

हर्यश्वेषुप्रणष्टेषुदक्षःप्राचेतसःपुनः वैरिण्यामेवपुत्राणांसहस्रमसृजत्प्रभुः २० विकर्षयिषवस्तेतुशबलाश्वाःप्रजास्तदा पूर्वोक्तवचनेनातनारदेनैवनोदिताः २१ अन्योन्यमूचुस्तेसर्वेसम्यगाहमहामुनिः भ्रातॄणांपदवींज्ञातुंगंतव्यंनात्रसंशयः २२ ज्ञात्वाप्रमाणंपृथ्व्याश्चस्रष्टव्यास्ततःप्रजाः एकाग्राःस्वस्थमनसोयथावद्वत्सुपूर्वशः २३ तेपितेनैवमार्गेणप्रयाताःसर्वतोदिशम् अद्यापिननिवर्त्तंतेसमुद्रादिवसिंधवः २४ नष्टेषुशबलाश्वेषुदक्षःक्रुद्धोऽवदद्वचः नारदनाशमेहीतिगर्भवासंवसेतिच २५ तदाप्रभृतिवैभ्राताभ्रातुरन्वेषणेनृप प्रयातोनश्यतिक्षिप्रंतन्नकार्यंविपश्चिता २६ तांश्चापिनष्टान्विज्ञायपुत्रान्दक्षःप्रजापतिः षष्टिंभूयोसृजत्कन्यावैरिण्यामितिनःश्रुतम् २७ तास्तदाप्रतिजग्राहभार्यार्थंकश्यपःप्रभुः सोमोधर्मश्चकौरव्यतथैवान्येमहर्षयः २८ ददौसदशधर्मायकश्यपायत्रयोदश सप्तविंशतिसोमायचतस्रोरिष्टनेमिने २९ द्वेचैवभृगुपुत्रायद्वेचैवांगिरसेतथा द्वेकृशाश्वायविदुषेतासांनामानिमेशृणु ३० अरुंधतीवसुर्यामीलंबाभानुर्मरुत्वती संकल्पाचमुहूर्त्ताचसाध्याविश्वाचभारत धर्मपत्न्योदशस्वेतास्तास्वपत्यानिमेशृणु ३१ विश्वेदेवास्तुविश्वायाःसाध्यान्साध्याव्यजायत मरुत्वत्यामरुत्वंतोवसोस्तुवसवस्तथा ३२ भानोस्तुभानवस्तातमुहूर्त्तायामुहूर्त्तजाः ३३ लंबायाश्चैवघोषोथनागवीथीचयामिजा पृथिवीविषयंसर्वमरुंधत्यांव्यजायत ३४ संकल्पायास्तुसर्वात्मजज्ञेसंकल्पएवहि नागवीथ्याश्चजामिन्यावृषलवाव्यजायत ३५

त्वादुपदेशानर्हाः दक्षोसृजत् २७ २८ कश्यपस्यैवरूपांतरंअरिष्टनेमिः इनंतोप्ययंशब्दोत्रैवदृश्यते २९ मेममवचनात्शृणुइत्यध्याहृत्ययोज्यम् ३० ३१ अथक्रमेणधर्मपत्नीनांसंततिमाहविश्वेइत्यादिना ३२ मुहूर्त्तजाःमुहूर्त्तायाःपुत्राः क्षणलवादिकालाभिमानिन्योदेवताइत्यर्थः ३३ घोषोमंत्राभिमानिनीदेवतानागवीथीस्वर्गमार्गाभिमानिनीदेवतापृथिवीविषयंआज्यपश्वोषधादि ३४ संकल्पःमानसक्रियाभिमानिनीदेवताअत्रादितःपंचभ्योयागदेवतानांततश्चतसृभ्यःक्रमेणकालमंत्रमार्गहविषांदशम्यासर्वोपादानभूतस्यदेवतोद्देशेनद्रव्यत्यागरूपस्यसंकल्पस्यचसृष्टिरुक्ता जामिन्याअजवीथ्याःसकाशात्वृषलवाकालांतरफलवृष्टिकर्त्तारंधर्मईश्वरद्वाआलंबनइतिअपूर्वसंज्ञाईश्वरप्रीतिसंज्ञावातदभिमानिनीदेवतावृषलंबेत्युच्यतेवृषलइतिपाठेपिवृषंलातिआदत्तइतिव्युत्पत्त्यासएवार्थः ३५ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नक्षत्रनाम्न्योऽश्विन्याद्याः कृतूपयोगिन्य एवैता अपि ३६ ३७ ३८ ३९ मनोहरायाः धरस्यापरभार्यायाः ४० अनिलस्य शिवा भार्येत्येकम् द्वौ पुत्रावनलस्येत्यप
रम् ४१ पृष्ठजाः कुमारानुजाः अनलस्य चत्वारः पुत्रा इत्यर्थः ४२ कुमार एव स्कंदापरनामा कार्त्तिकेय इत्याह अपत्यमिति तं स्कंद इत्याचक्षत इति छांदोग्ये सनत्कु-
मारस्यैव स्कंदश्रवणात् सनत्कुमारश्च स एव अत एव तेजसः पादेन स्वचतुर्थांशेनाग्निना सृष्टः एतच्च शाखादिच ४३ पुत्रौ दुहिता च पुत्रश्चेति पुत्रौ ४४ तावेवा
ह बृहस्पतेरिति बृहस्पतिस्तत्स्वसा च ब्रह्मचारिणी नाम योगसिद्धत्वादसक्ताऽपि गुणोत्कर्षात् प्रभासस्याष्टमवसोर्भार्याभूत् तस्यां च विश्वकर्मा जज्ञ इति श्लोक

याराजन् सोमपत्न्यस्तु दक्षः प्राचेतसो ददौ सर्वा नक्षत्रनाम्न्यस्ता ज्योतिषे परिकीर्तिताः ३६ ये त्वन्ये ख्यातिमंतो वै देवा ज्योतिःपुरो
गमाः वसवोऽष्टौ समाख्यातास्तेषां वक्ष्यामि विस्तरम् ३७ आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलौ प्रत्यूषश्च प्रभासश्च वसवो नाम
भिः स्मृताः ३८ आपस्य पुत्रो वैतंड्यः श्रमः शांतो मुनिस्तथा ध्रुवस्य पुत्रो भगवान् कालो लोकप्रकालनः ३९ सोमस्य भगवान्वर्चा व
र्चस्वी येन जायते धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा मनोहरायाः शिशिरः प्राणोऽथ रमणस्तथा ४० अनिलस्य शिवा भार्या यस्याः
पुत्रो मनोजवः अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य तु ४१ अग्निपुत्रः कुमारस्तु शरस्तंबश्रियान्वितः तस्य शाखो विशाखश्च नैगमेय
श्च पृष्ठजाः ४२ अपत्यं कृत्तिकानां तु कार्त्तिकेय इति स्मृतः स्कंदः सनत्कुमारश्च सृष्टः पादेन तेजसः ४३ प्रत्यूषस्य विदुः पुत्रमृषिं नाम्ना
च देवलम् द्वौ पुत्रौ देवलस्यापि क्षमावंतौ तपस्विनौ ४४ बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी योगसिद्धा जगत्कृत्स्नमसक्ता विच-
चार ह ४५ प्रभासस्य तु सा भार्या वसूनामष्टमस्य च विश्वकर्मा महाभागस्तस्यां जज्ञे प्रजापतिः ४६ कर्त्ता शिल्पसहस्राणां त्रिदशानां च
वर्द्धकिः भूषणानां च सर्वेषां कर्त्ता शिल्पवतां वरः ४७ यः सर्वासां विमानानि देवतानां चकार ह मनुष्याश्चोपजीवंति यस्य शिल्पं महात्म
नः ४८ सुरभी कश्यपाद्रुद्रानेकादश विनिर्ममे महादेवप्रसादेन तपसा भाविता सती ४९ अजैकपादहिर्बुध्न्यस्त्वष्टा रुद्राश्च भारत त्व
ष्टुश्चैवात्मजः श्रीमान् विश्वरूपो महायशाः ५० हरश्च बहुरूपश्च त्र्यंबकश्चापराजितः वृषाकपिश्च शंभुश्च कपर्दी रैवतस्तथा ५१ मृ
गव्याधश्च सर्पश्च कपाली च विशांपते एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः ५२ शतं त्वेवं समाख्यातं रुद्राणाममितौजसाम् पुरा
णे भरतश्रेष्ठ यैर्व्याप्ताः सचराचराः ५३ लोका भरतशार्दूल कश्यपस्य निबोध मे अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा खशा ५४ सुर
भिर्विनता चैव ताम्रा क्रोधवशा इरा कद्रुर्मुनिश्च राजेंद्र तास्वपत्यानि मे शृणु ५५ द्वयार्थः ४५ ४६ वर्द्धकिः तक्षा ४७ ४८ कश्यपाय त्रयोदश कन्या
दक्षो ददौ विसृष्टं तत्र सुरभ्याः संततिमाह सुरभीति ४९ अजैकपादित्येकः अहिर्बुध्न्य इत्येकः ५० ५१ ५२ व्याप्ता इत्येतच्छ्लोका इत्युत्तरस्थेन संबध्यते शतं
अनंतं असंख्याताः सहस्राणि ये रुद्रा अधि भूम्यामिति श्रुतेः ५३ कश्यपस्य भार्या इति शेषः ५४ ५५ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५६ पूर्वमन्वंतरेइत्यस्यव्याख्यानंचाक्षुषस्यांतरे मनोरिति उपस्थितेपूर्वमन्वंतरस्यावसानेइत्यर्थः ५७ मन्वंतरेवैवस्वतेइतिशेषः ५८ ५९ जज्ञातेपुन
रितिकश्यपादित्योरेवपूर्वस्कतपः पृश्निसंज्ञयोरुदरेजातत्वात् ६० ६१ ६२ ६३ विघ्नतः विघ्नदादयः विघ्नतो ऽशनिमेघाश्च रोहितेंद्रधनूंषिचेतिपूर्वा-
काः चनस्यः रोहितेंद्रधनुषोरभेदात्बहुपुत्रस्यप्रजापतिविशेषस्य ६४ प्रत्यंगिरसजाः अंगिरसांप्रतीपः तास्त्यन्त्वान्यत्रगतः सोयंप्रत्यंगिराः यआंगिर
सः शौनहोत्रोभूत्वाभार्गवशौनकोभवदितिस्मृतेः तस्माज्जातास्तेनदृष्टाऋचः मंत्राः प्रत्यंगिरसजाः अथर्ववेदेपिशौनकीयाशाखाप्रसिद्धातत्रचप्रत्यंगिर
समंत्राः शांतिकराः प्रसिद्धाः प्रहरणानिवज्राद्यभिमानिन्योदेवताः ६५ एतेप्रजापतेरर्वाचीनाः ऋतुलिंगवत्पुनः पुनर्जायंतइत्यर्थः त्रयस्त्रिंशत्त्विति तुश

पूर्वमन्वंतरे श्रेष्ठाद्वादशासन्सुरोत्तमाः तुषितानामतेन्योन्यमूचुर्वैवस्वतेंतरे ५६ उपस्थितेतियशस्विचाक्षुषस्यांतरेमनोः हिता
र्थंसर्वसत्वानांसमागम्यपरस्परम् ५७ आगच्छतद्रुतंदेवाअदितिंसंप्रविश्यवै मन्वंतरेप्रसूयामस्तन्नःश्रेयोभविष्यति ५८ वैशं
पायनउवाच एवमुक्त्वातुतेसर्वेचाक्षुषस्यांतरेमनोः मारीचात्कश्यपाज्जातास्तेदित्यादक्षकन्यया ५९ तत्रविष्णुश्चशक्रश्च
जज्ञातेपुनरेवहि अर्यमाचैवधाताचत्वष्टापूषाचभारत ६० विवस्वान्सविताचैवमित्रोवरुणएवच अंशोभगश्चातितेजा आदित्या
द्वादशस्मृताः ६१ चाक्षुषस्यांतरेपूर्वमासन्येतुषिताःसुराः वैवस्वतेंतरेतेवै आदित्याद्वादशस्मृताः ६२ सप्तविंशतियाःप्रोक्ताःसोम
पत्न्योथसुव्रताः तासामपत्यान्यभवन्दीप्तान्यमिततेजसाम् ६३ अरिष्टनेमिपत्नीनामपत्यानीहषोडश बहुपुत्रस्यविदुषश्चतस्रो
विद्युतःस्मृताः ६४ प्रत्यंगिरसजाःश्रेष्ठाऋचोब्रह्मर्षिसत्कृताः कृशाश्वस्यतुराजर्षेर्देवप्रहरणानिच ६५ एतेयुगसहस्रांतेजायंतेपु
नरेवह सर्वेदेवगणास्तात त्रयस्त्रिंशत्तुकामजाः ६६ तेषामपिचराजेंद्रनिरोधोत्पत्तिरुच्यते ६७ यथासूर्यस्यगगनेउदयास्तमयाविह
एवंदेवनिकायास्तेसंभवंतियुगेयुगे ६८ दित्याःपुत्रद्वयंजज्ञेकश्यपादितिनःश्रुतम् हिरण्यकशिपुश्चैवहिरण्याक्षश्चवीर्य-
वान् ६९

द्धोविशेषार्थः त्रयस्त्रिंशदष्टौवसवएकादशरुद्राद्वादशादित्याइंद्रःप्रजापतिश्च तत्रपृथिव्यग्नी वाय्वंतरिक्षे द्युसूर्यौ चंद्रनक्षत्राणिवसवः वा
क्पाणिपादपायूपस्थानिपंचकर्मेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणइतिपंचज्ञानेंद्रियाणि सर्वसाधारणंमनश्चेत्येकादशरुद्राः आदित्यामासाधिष्ठात्र्योदेव-
ताः अनुपदोक्ताविषुवादयः कालाइतियावत् इंद्रःपर्जन्यः प्रजापतिर्जीवः एतेभोक्तृभोग्यात्मकास्त्रयस्त्रिंशद्देवाः कामजाः सोऽकामयतबहुस्यांप्रजायेये
तिश्रुतेरीश्वरात्कामतोजाताः एतेप्रतिकल्पंसकृदेवजायंतेइतरेऋतुलिंगवदेकस्मिन्कल्पेप्यसकृज्जायंतइत्यर्थः ६६ कामजानांजन्मादिमत्वंद्रढयतितेषा-
मित्यर्द्धेन निरोधसहिताउत्पत्तिर्निरोधोत्पत्तिरुच्यतेवेदइतिशेषः ६७ एतदेवदृष्टांतेनद्रढयति यथेति देवनिकायाः देवानांशरीराण्येवजायंतेनतुतदुपहितआत्मा ८
[illegible] ६८ आदित्यानुक्त्वादैत्यानाह दित्याइत्यादिना ६९ ६.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सैंहिकेयास्त्रयोदशवक्ष्यमाणाव्यंसशल्यादयः ७० ७१ ७२ ७३ ७४ ७५ ७६ ७७ ७८ ७९ दनोर्वंशमाह अभवन्नित्यादिना पुत्रा इति पौत्रादी-

सिंहिकाचाभवत्कन्याविप्रचित्तेःपरिग्रहः सैंहिकेयाइतिख्यातास्तस्याःपुत्रामहाबलाः गणोस्यसहराजेंद्र दशसाहस्रमुच्यते
७० तेषांपुत्राश्चपौत्राश्चशतशोथसहस्रशः असंख्यातामहाबाहोहिरण्यकशिपोःशृणु ७१ हिरण्यकशिपोःपुत्राश्चत्वारःप्र
थितौजसः अनुह्रादश्चह्लादश्चप्रह्रादश्चैववीर्यवान् ७२ संह्रादश्चचतुर्थोभूत्ह्रादपुत्रोह्रदस्तथा संह्रादपुत्रःसुंदश्चनिसुं
दस्तावुभौस्मृतौ ७३ अनुह्रादसुतोह्यायुःशिबिःकालस्तथैवच विरोचनश्चप्राह्रादिर्बलिर्जज्ञेविरोचनात् ७४ बलेःपुत्रशत
मासीत् बाणज्येष्ठं नराधिप धृतराष्ट्रश्चसूर्यश्चचंद्रमाश्चेंद्रतापनः ७५ कुंभनाभोगर्दभाक्षःकुक्षिरित्येवमादयः बाणस्तेषाम
तिबलोज्येष्ठःपशुपतेःप्रियः ७६ पुराकल्पेहिबाणेनप्रसाद्योमापतिंप्रभुम् पार्श्वतोविहरिष्यामिइत्येवंयाचितोवरः ७७ बाणस्य
चेंद्रदमनोलोहित्यामुदपद्यत गणास्तथासुरराजन् शतसाहस्रसंमिताः ७८ हिरण्याक्षसुताःपंचविद्वांसःसुमहाबलाः झर्झरः
शकुनिश्चैवभूतसंतापनस्तथा ७९ महानाभश्चविक्रांतःकालनाभस्तथैवच अभवन्दनुपुत्राश्चशतंतीव्रपराक्रमाः तपस्विनो
महावीर्याःप्राधान्येननिबोधतान् ८० द्विमूर्द्धाशकुनिश्चैवतथाशंकुशिराविभुः शंकुकर्णोविराधश्चगवेष्ठीदुंदुभिस्तथा अयो
मुखःशंबरश्चकपिलोवामनस्तथा ८१ मरीचिर्मघवांश्चैवइराशंकुशिरावृकः विक्षोभणश्चकेतुश्चकेतुवीर्यशतह्रदौ ८२ इंद्रजि
त्सत्यजिच्चैववज्रनाभस्तथैवच महानाभश्चविक्रांतःकालनाभस्तथैवच ८३ एकचक्रोमहाबाहुस्तारकश्चमहाबलः वैश्वानरः
पुलोमाचविद्रावणमहासुरौ ८४ स्वर्भानुर्वृषपर्वाचतुहुंडश्चमहासुरः सूक्ष्मश्चैवनिचंद्रश्चऊर्णनाभोमहागिरिः ८५ असिलो
माचकेशीचशठश्चबलकोमदः तथागगनमूर्धाचकुंभनाभोमहासुरः ८६ प्रमदोमयश्चकुपथोहयग्रीवश्चवीर्यवान् वैसृपःस-
विरूपाक्षःसुपथोथहराहरौ ८७ हिरण्यकशिपुश्चैवशतमायुश्चशंबरः शरभःशलभश्चैवविप्रचित्तिश्चवीर्यवान् ८८ एते
सर्वेदनोःपुत्राःकश्यपादभिजज्ञिरे विप्रचित्तिप्रधानास्तेदानवाःसुमहाबलाः ८९ एतेषांयदपत्यंतुतन्नशक्यंनराधिप प्रसंख्या
तुंमहीपालपुत्रपौत्राद्यनंतकम् ९० स्वर्भानोस्तुप्रभाकन्यापुलोम्नश्चसुताजयम् उपदानवीहयशिराःशर्मिष्ठावार्षपर्वणी ९१
पुलोमाकालिकाचैववैश्वानरसुतेउभे बह्वपत्येमहावीर्येमारीचेस्तुपरिग्रहः ९२

नामसुपलक्षणंशतंअनंताः ८० एतेषुप्रधानान्द्विमूर्द्धादीन्
विप्रचित्यंतान्एकषष्टिंगणयतिद्विमूर्द्धइत्यादिना ८१ ८२ ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९० ९१ ९२ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

९३ ९४ ९५ ९६ ९७ ९८ ९९ १०० १ २ ३ ४ ५ ६

तयोःपुत्रसहस्राणिषष्टिंदानवनंदनःचतुर्दशशतानन्यान्हिरण्यपुरवासिनः ९३ मारीचिर्जनयामासमहतातपसान्वितः पौलो
माःकालकेयाश्चदानवास्तेमहाबलाः ९४ अवध्यादेवतानांचहिरण्यपुरवासिनः कृताःपितामहेनाजौनिहताःसव्यसाचिना ९५ प्र
भायानहुषःपुत्रोस्तृंजयश्चशचीकृतः पुरुंजज्ञेथुशर्मिष्ठादुष्यन्तमुपदानवी ९६ ततोपरेमहावीर्यादानवास्त्वतिदारुणाः सिंहिकायाम
थोत्पन्नाविप्रचित्तेःसुतास्तदा ९७ दैत्यदानवसंयोगाज्जातास्तीव्रपराक्रमाः सैंहिकेयाइतिख्यातास्त्रयोदशमहाबलाः ९८ व्यंसःश-
ल्यश्चबलिनोनभश्चैवमहाबलः वातापिर्नमुचिश्चैवइल्वलःखसृमस्तथा ९९ आंजिकोनरकश्चैवकालनाभस्तथैवच सुकःपोतरण
श्चैववज्रनाभश्चवीर्यवान् १०० राहुर्ज्येष्ठस्तुतेषांवैसूर्यचंद्रविमर्दनः मूकश्चैवतुहुंडश्चह्रादपुत्रौबभूवतुः १ मारीचःकंदपुत्रश्चता
टकायाव्यजायत शिवमाणस्तथाचैवसुरकल्पश्चवीर्यवान् २ एतेवैदानवाःश्रेष्ठादनुवंशविवर्द्धनाः तेषांपुत्राश्चपौत्राश्चशतशोथस
हस्रशः ३ संह्रादस्यतुदैत्यस्यनिवातकवचाःकुले समुत्पन्नाःसुतपसामहाताभावितात्मनः ४ तिस्रःकोट्यःसुतास्तेषांमणिमत्या
निवासिनाम् तेप्यवध्यास्तुदेवानामर्जुनेननिपातिताः ५ षट्सुतास्सुमहासत्वास्ताम्रायाःपरिकीर्तिताः काकीश्येनीचभासीचसुग्री
वीसुचिगृध्रिका ६ काकीकाकानजनयदुलूकीप्रत्युलूककान् श्येनीश्येनांस्तथाभासीभासान्गृध्रांश्चगृध्र्यपि ७ शुचिरौदकान्
पक्षिगणान्सुग्रीवीतुपरंतप अश्वानुष्ट्रान्गर्दभांश्चताम्रावंशःप्रकीर्तितः ८ विनतायास्तुपुत्रौद्वावरुणोगरुडस्तथा सुपर्णःपत
तांश्रेष्ठोदारुणःस्वेनकर्मणा ९ सुरसायाःसहस्रंतुसर्पाणाममितौजसाम् अनेकशिरसातातखेचराणांमहात्मनाम् १० काद्रवेयाश्च
बलिनःसहस्रममितौजसः सुपर्णवशगानागाजज्ञिरेनेकमस्तकाः ११ तेषांप्रधानाःसततंशेषवासुकितक्षकाः ऐरावतोमहापद्मः
कंबलाश्वतरावुभौ १२ एलापत्रस्तथाशंखककोंटकधनंजयौ महानीलमहाकर्णौधृतराष्ट्रबलाहकौ १३ कुहरःपुष्पदंष्ट्रश्चदुर्मुखः
सुमुखस्तथा शंखश्चशंखपालश्चकपिलोवामनस्तथा १४ नहुषःशंखरोमाचमणिरित्येवमादयः तेषांपुत्राश्चपौत्राश्चगरुडेननि-
पातिताः १५ चतुर्दशसहस्राणिक्रूराणामुरगाशिनाम् गणंक्रोधवशाविद्धितस्यसर्वेचदंष्ट्रिणः १६ स्थलजाःपक्षिणोब्जाश्चधरायाः
प्रसवाःस्मृताः गास्तुवैजनयामाससुरभिर्महिषांस्तथा १७ इरावृक्षलतावल्लीस्तृणजातीश्चसर्वशः खशातुयक्षरक्षांसिमुनिर-
प्सरसस्तथा १८ १

७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ ६९ ६९

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० इतिश्रीमहाभारतेहरिवंशेटीकायांतृतीयो

अरिष्टांतुमहासत्वान्गंधर्वानमितौजसः एतेकश्यपदायादाः कीर्त्तिताः स्थाणुजंगमाः १९ तेषांपुत्राश्चपौत्राश्चशतशोथसहस्रशः एषमन्वंतरेतातसर्गः स्वारोचिषेस्मृतः २० वैवस्वतेतुमहतिवारुणेवितनेक्रतौ जुह्वानस्यब्रह्मणोवैप्रजासर्गइहोच्यते २१ पूर्वंयत्रतुब्रह्मर्षीनुत्पन्नान्सप्तमानसान् पुत्रत्वेकल्पयामासस्वयमेवपितामहः २२ ततोविरोधेदेवानांदानवानांचभारत दितिर्विनष्टपुत्रावैतोषयामासकश्यपम् २३ तांकश्यपःप्रसन्नात्मासम्यगाराधितस्तया वरेणछंदयामाससाचवव्रेवरंततः २४ पुत्रमिंद्रवधायाय समर्थममितौजसम् सचतस्यैवरंप्रादात्प्रार्थितंसुमहातपाः २५ दत्वाचवरमव्यग्रोमारीचस्तामभाषत भविष्यतिसुतस्तेययद्येनंधारयिष्यसि २६ इंद्रहंतानिहतातेगर्भंवैशरदांशतम् यदिधारयसेशौचतत्पराव्रतमास्थिता २७ तथेत्यभिहितोभर्त्तातयादेव्यामहातपाः धारयामासगर्भंतुशुचिःसावसुधाधिप २८ ततोभ्युपगमाद्दित्यागर्भमाधायकश्यपः रोचयन्वैगणश्रेष्ठंदेवानाममितौजसाम् २९ तेजःसंहृत्यदुर्धर्षमवध्यममरैरपि जगामपर्वतायैवतपसेसंशितव्रतः ३० तस्याश्चैवांतरप्रेप्सुरभवत्पाकशासनः ऊनेवर्षशतेचास्याददर्शांतरमच्युतः ३१ अकृत्वापादयोःशौचंदितिःशयनमाविशत् निद्रांचकारयामासतस्याःकुक्षिंप्रविश्यसः ३२ वज्रपाणिस्ततोगर्भंसप्तधातंन्यकृंतत सपाट्यमानोवज्रेणगर्भस्तुरुरोदह ३३ मारोदीरितितंशक्रःपुनःपुनरथाब्रवीत् सोऽभवत्सप्तधागर्भस्तमिंद्रोरुषितःपुनः ३४ एकैकंसप्तधाचक्रेवज्रेणैवारिकर्षणः मरुतोनामदेवास्तेबभूवुर्भरतर्षभ ३५ यथैवोक्तंमघवतातथैवमरुतोऽभवन् देवाएकोनपंचाशत्सहायावज्रपाणिनः ३६ तेषामेवप्रवृद्धानांभूतानांजनमेजय रोचयन्वैगणश्रेष्ठंदेवानाममितौजसाम् ३७ निकायेषुनिकायेषुहरिःप्रादात्प्रजापतिम् क्रमशस्तानिराज्यानिपृथुपूर्वाणिभारत ३८ सहरिःपुरुषोवीरःकृष्णोजिष्णुःप्रजापतिः पर्जन्यस्तपनोव्यक्तस्तस्यसर्वमिदंजगत् ३९ भूतसर्गमिमंसम्यग्जानतोभरतर्षभ मरुतांचशुभंजन्मशृण्वतःपठतोपिवा नावृत्तिभयमस्तीहपरलोकभयंकुतः ४० इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिमरुतोत्पत्तिकथनेतृतीयोऽध्यायः ३ वैशंपायनउवाच अभिषिच्याधिराज्येतुपृथुंवैन्यंपितामहः ततःक्रमेणराज्यानिव्यादेष्टुमुपचक्रमे १

ध्यायः ३ एवंसाधारण्येनसर्वांसृष्टिमुक्त्वापृथुर्वैन्यस्तदाचेमांररक्षक्षत्रपूर्वजः राजसूयाभिषिक्तानामाद्यःसवसुधाधिपइतिप्रागुक्तंपृथोराद्यत्वंविवृणोतिसर्वेषांराज्यानांतदानंतर्यंदर्शयन् अभिषिच्येत्यादिना अधिराज्येराज्ञामपिराजत्वेवैन्यंवेनस्यपुत्रंराज्यानिसोमादीनांव्यादेष्टुमाज्ञापयितुम् १

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नक्षत्रग्रहयोः जात्यभिप्रायेणद्विवचनम् नक्षत्रजातीयग्रहजातीययोरित्यर्थः यज्ञानांयज्ञाद्यधिष्ठात्रीणांदेवतानाम् २ ३ ४ ५ शूलेनपाणिलंब्यवह
र्तुं शीलमस्येतिशूलपाणीतंशूलपाणिनम् ६ विष्णुशूलपाणिभ्याअच्युतावृषभौनारायणवृषभध्वजौदैवतेष्वपिईश्वरावतारणामनेकत्वात् ७ ८ गंधानाग
धाश्रयद्रव्याणांमरुतःपूर्वोक्ताएकोनपंचाशत् अत्रतुप्राणवायवोमरुच्छब्दार्थः अशरीरिणांस्थूलशरीरहीनानांप्रेतादीनामित्यर्थः शब्दश्चाकाशम्भतद्भूतां
भेर्यादीनांअस्मदादिशरीराणांच क्षुवामितिपाठेतयोः क्षेत्राणामितिसएवार्थः ९ १० ११ १२ पूर्वंद्वादशादित्याउक्ताः इहतु आदित्यपदेन अर्कस्यरश्मयो-

द्विजानांवीरुधांचैवनक्षत्रग्रहयोस्तथा यज्ञानांतपसांचैवसोमंराज्येभ्यषेचयत् २ अपांतुवरुणंराज्येराज्ञांवैश्रवणंप्रभुम् बृह-
स्पतिंतुविश्वेषांददावांगिरसंपतिम् ३ भृगूणामधिपंचैवकाव्यंराज्येऽभ्यषेचयत् आदित्यानांतथाविष्णुंवसूनामथपावकम् ४
प्रजापतीनांदक्षंतुमरुतामथवासवम् दैत्यानांदानवानांचप्रह्लादममितौजसम् ५ वैवस्वतंचपितॄणांयमंराज्येभ्यषेचयत् मातृ
णांचव्रतानांचमंत्राणांचतथागवाम् ६ यक्षाणांराक्षसानांचपार्थिवानांतथैवच नारायणंतुसाध्यानांरुद्राणांवृषभध्वजम् ७ वि
प्रचित्तिंतुराजानंदानवानामथादिशत् सर्वभूतपिशाचानांगिरिशंशूलपाणिनम् ८ शैलानांहिमवंतंचनदीनामथसागरम् गंधा
नांमरुतांचैवभूतानामशरीरिणाम् शब्दाकाशवतांचैववायुंचबलिनांवरम् ९ गंधर्वाणामधिपतिंचक्रेचित्ररथंप्रभुम् नागानां
वासुकिंचक्रेसर्पाणामथतक्षकम् १० वारणानांचराजानमैरावतमथादिशत् उच्चैःश्रवसमश्वानांगरुडंचैवपक्षिणाम् ११ मृगा
णामथशार्दूलंगोवृषंचगवांपतिम् वनस्पतीनांराजानंप्लक्षमेवादिशत्प्रभुम् १२ सागराणांनदीनांचमेघानांवर्षणस्यच आदित्या
नामधिपतिंपर्जन्यमभिषिक्तवान् १३ सर्वेषांदंष्ट्रिणांशेषंराजानमभ्यषेचयत् सरीसृपाणांसर्पाणांराजानंचैवतक्षकम् १४ गंधर्वा
प्सरसांचैवकामदेवंतथाप्रभुम् ऋतूनामथमासानांदिवसानांतथैवच १५ पक्षाणांचक्षपाणांचमुहूर्ततिथिपर्वणाम् कलाकाष्ठा
प्रमाणानांगतोरयनयोस्तथा १६ गणितस्याथयोगस्यचक्रेसंवत्सरंप्रभुम् एवंविभज्यराज्यानिक्रमेणसपितामहः १७ दिशापा
लानथततःस्थापयामासभारत पूर्वस्यांदिशिपुत्रंतुवैराजस्यप्रजापतेः १८ दिशापालंसुधन्वानंराजानंचाभ्यषेचयत् दक्षिणस्यांम
हात्मानंकर्दमस्यप्रजापतेः १९

ग्राह्याः येपृथिवीरसंशोषयित्वासहस्रगुणंउत्सृजंतितेषामधिपतिःपर्जन्यः १३ दंष्ट्रिणांनागानाम् सर्पाणांतद्वि
शेषाणांसरीसृपाणांडुंडुभादीनांनिर्विषाणाम् १४ ऋतूनामित्यादिषष्ठ्यंतानांदेवतानामित्यनेनसंबंधः ऋत्वाद्यभिमानिनीनांदेवतानांसंवत्सरंसंवत्स १०
राभिमानिनंदेवंराजानमभ्यषेचयदित्यर्थः १५ १६ गणितस्यगत्यादिपरिमाणस्ययोगस्यउपसर्गादेः १७ १८ १९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२० पर्जन्यस्यपुत्रमित्यनुषंगः २१ २२ अद्यापीत्येतासांदेवतानामधिकारित्वेनाकल्पस्थायित्वमुक्तंराजेतिएभिःसोमादिभिःपृथुःराजराज्येराजसू-
येऽभिषिक्तःपूर्वंतुप्रजापतिनाऽभिषेकोराज्यागउक्तः २३ २४ एतत्श्रवणंअधिष्ठानंप्रतिष्ठाहेतु २५ २६ २७ २८ २९ ३० ३१ ३२ ३३

पुत्रंशंखपदंनामराजानंसोभ्यषेचयत् पश्चिमायांदिशितथाराजसःपुत्रमच्युतम् २० केतुमंतंमहात्मानंराजानंसोभ्यषेचयत्
तथाहिरण्यरोमाणंपर्जन्यस्यप्रजापतेः २१ उदीच्यांदिशिदुर्द्धर्षंराजानंसोभ्यषेचयत् तैरियंपृथिवीसर्वासप्तद्वीपासपर्वता २२ य
थाप्रदेशमद्यापिधर्मेणपरिपाल्यते राजसूयाभिषिक्तस्तुपृथुरेभिर्नराधिपैः वेददृष्टेनविधिनाराजराज्येनराधिप २३ ततोमन्वंतरेऽ
तीतेचाक्षुषेऽमिततेजसि वैवस्वतायमनवेब्रह्माराज्यमथादिशत् तस्यविस्तरमाख्यास्येमनोर्वैवस्वतस्यह २४ तवानुकूल्याद्राजेंद्रय
दिसुश्रूषसेनघ महच्चैतदधिष्ठानंपुराणपरिकीर्त्तितम् धन्यंयशस्यमायुष्यंस्वर्गवासकरंशुभम् २५ जनमेजयउवाच विस्त
रेणपृथोर्जन्मवैशंपायनकीर्त्तय यथामहात्मनातेनदुग्धाचेयंवसुंधरा २६ यथाचपितृभिर्दुग्धायथादेवैर्यथर्षिभिः यथादैत्यै-
श्चनागैश्चयथायक्षैर्यथाद्रुमैः २७ यथाशैलैःपिशाचैश्चगंधर्वैश्चद्विजोत्तमैः राक्षसैश्चमहासत्वैर्यथादुग्धावसुंधरा २८ तेषांपात्र
विशेषांश्चवैशंपायनकीर्त्तय वत्सान्क्षीरविशेषांश्चदोग्धारंचानुपूर्वशः २९ यस्माच्चकारणात्पाणिर्वेनस्यमथितःपुरा क्रुद्धैर्महर्
षिभिस्तातकारणंतच्चकीर्त्तय ३० वैशंपायनउवाच हंततेकथयिष्यामिपृथोर्वैन्यस्यविस्तरम् एकाग्रःप्रयतश्चैवशृणु
ष्वजनमेजय ३१ नाशुचेःक्षुद्रमनसःकुशिष्यायाव्रतायच कीर्त्तनीयमिमंराजन्कृतघ्नायाहितायवा ३२ स्वर्ग्यंयशस्यमायु
ष्यंधर्म्यंवेदैःसंमितम् रहस्यमृषिभिःप्रोक्तंशृणुराजन्यथातथम् ३३ यश्चैनंकथयेन्नित्यंपृथोर्वैन्यस्यविस्तरम् ब्राह्मणेभ्यो
नमस्कृत्यनसशोचेत्कृताकृतैः ३४ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिपृथूपाख्यानेचतुर्थोऽध्यायः ४
वैशंपायनउवाच आसीद्धर्मस्यगोप्तावैपूर्वमत्रिसमःप्रभुः अत्रिवंशसमुत्पन्नस्त्वंगोनामप्रजापतिः १ तस्यपुत्रोभवद्वेनोना
त्यर्थंधर्मकोविदः जातोमृत्युसुतायांवैसुनीथायांप्रजापतिः २ समातामहदोषेणवेनःकालात्मजात्मजः स्वधर्मंपृष्ठतःकृत्वाकामा
ल्लोभेष्ववर्त्तत ३ मर्यादांस्थापयामासधर्मापेतांसपार्थिवः वेदधर्मानतिक्रम्यसोऽधर्मनिरतोऽभवत् ४

नसशोचेत्कृताकृतैरितिमयापापंकृतंधर्मोनकृतइतिपश्चात्तापेननशोचेत् एतच्छ्रवणंसर्वपापनाशनंसर्वक्रतुफलप्रदंचेत्यर्थः ३४ इतिश्रीमहा
भारतेहरिवंशेटीकायांचतुर्थोऽध्यायः ४ आसीत् १ २ कालात्मजायाः आत्मजः ३ ४ ५ ६ ७ ८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

प्रवृत्तं देवतोद्देशेन त्यक्तम् हुतं अग्नौ प्रक्षिप्तमपि सोमं न पपुः यतो निःस्वाध्यायवषट्काराः ५ तत्र हेतुमाह नेति धर्मद्वेषादिराज्ञि दत्तमपि हविर्देवा न भुंजत इति भावः ६ मयि देवतारूपे मन्निमित्तं न त्वन्यदेवतार्थम् मयि अग्निरूपे ७ ८ ९ निधने वंशे निधनं कुलनाशयोरिति विश्वः १० ११ १२ १३ १४

निःस्वाध्यायवषट्कारस्तस्मिन् राजनि शासति प्रवृत्तं न पपुः सोमं हुतं यज्ञेषु देवताः ५ न यष्टव्यं न होतव्यमिति तस्य प्रजापतेः आसीत्प्रतिज्ञा क्रूरेयं विनाशे प्रत्युपस्थिते ६ अहमिज्यश्च यष्टा च यज्ञश्चेति कुरूद्वह मयि यज्ञा विधातव्या मयि होतव्यमित्यपि ७ तमतिक्रान्तमर्यादमाददानमसाम्प्रतम् ऊचुर्महर्षयः सर्वे मरीचिप्रमुखास्तदा ८ वयं दीक्षां प्रवेक्ष्यामः संवत्सरगणान् बहून् अधर्मं कुरु मा वेन नैष धर्मः सनातनः ९ निधने त्रेः प्रसूतस्त्वं प्रजापतिरसंशयम् प्रजाश्च पालयिष्येऽहमिति ते समयः कृतः १० तांस्तदा ब्रुवतः सर्वान् महर्षीनब्रवीत्तदा वेनः प्रहस्य दुर्बुद्धिरिममर्थमनर्थवित् ११ वेन उवाच स्रष्टा धर्मस्य कश्चान्यः श्रोतव्यं कस्य वै मया श्रुतवीर्यतपःसत्यैर्मया वा कः समो भुवि १२ प्रभवं सर्वभूतानां धर्माणां च विशेषतः सम्मूढा न विदुर्नूनं भवन्तो मामचेतसः १३ इच्छन् दहेयं पृथिवीं प्लावयेयं तथा जलैः खं भुवं चैव संरुन्धेयं नात्र कार्या विचारणा १४ यदा न शक्यते मोहादवलेपाच्च पार्थिवः अनुनेतुं तदा वेनस्ततः क्रुद्धा महर्षयः १५ निगृह्य तं महात्मानो विस्फुरन्तं महाबलम् ततोऽस्य सव्यमूरुं ते ममन्थुर्जातमन्यवः १६ तस्मिंस्तु मथ्यमाने वै राज्ञ ऊरौ प्रजज्ञिवान् ह्रस्वोऽतिमात्रः पुरुषः कृष्णश्चापि बभूव ह १७ स भीतः प्राञ्जलिर्भूत्वा स्थितवान् जनमेजय तमत्रिर्विह्वलं दृष्ट्वा निषीदेत्यब्रवीत्तदा १८ निषादवंशकर्त्तासौ बभूव वदतां वर धीवरानसृजच्चाथ वेनकल्मषसम्भवान् १९ ये चान्ये विन्ध्यनिलयास्तुषारास्तुबरास्तथा अधर्मरुचयो ये च विद्धि तान् वेनसम्भवान् २० ततः पुनर्महात्मानः पाणिं वेनस्य दक्षिणम् अरणीमिव संरब्धा ममन्थुस्ते महर्षयः २१ पृथुस्तस्मात्समुत्तस्थौ करात् ज्वलनसन्निभः दीप्यमानः स्ववपुषा साक्षादग्निरिव ज्वलन् २२ स धन्वी कवची जातः पृथुरेव महायशाः आद्यमाजगवं नाम धनुर्गृह्य महारवम् शरांश्च दिव्यान् रक्षार्थं कवचं च महाप्रभम् २३ तस्मिन् जाते ऽथ भूतानि सम्प्रहृष्टानि सर्वशः समापेतुर्महाराज वेनश्च त्रिदिवं गतः २४ समुत्पन्नेन कौरव्य सत्पुत्रेण महात्मना त्रातः स पुरुषव्याघ्र पुन्नाम्नो नरकात्तदा २५ तं समुद्राश्च नद्यश्च रत्नान्यादाय सर्वशः तोयानि चाभिषेकाय सर्व एवोपतस्थिरे २६

पाठांतरे अपनेतुं अधर्मादपाक्रष्टुम् १५ निगृह्य जीवंतमपि पातयित्वा १६ १७ १८ धीवरान् नाविकान् १९ तुषारास्तुंबराश्च प्रांत्यदेशीयाः म्लेच्छविशेषाः विंध्यनिलयाः गोंड इति कोल इति च प्रसिद्धाः मध्यदेशीयाः २० २१ २२ गृह्य गृहीत्वा रक्षार्थं प्रजानां स्थित इति शेषः २३ २४ २५ २६ ६॥ ६॥ ६॥ ६॥

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२७ २८ २९ अपरंजिताः पीडिताः अनुरागादिति अनुरज्यंतेस्मिन् प्रजाइतिराजपदनिर्वचनंदर्शितम् ३० तस्तंभिरेस्थलवत्कर्मिनावभूवुः अभिउप
रियास्यतोगंतुमिच्छतः ध्वजभंगोरक्षाणांशास्त्रादिभिर्गोपुरादिभिर्वा ३१ पुटकेपुटकेपत्रेपत्रे ३२ सूत्यांसोमाभिषवकाले अभिषवः सोमवल्याः कंडनंर

पितामहश्चभगवान्देवैरांगिरसैः सह स्थावराणिचभूतानिजंगमानितथैवच २७ समागम्यतदावैन्यमभ्यषिंचन्नराधिपम् महता
राजराज्येनप्रजापालमहाद्युतिम् २८ सोभिषिक्तोमहातेजाविधिवद्धर्मकोविदैः आदिराज्येतदाराज्ञापृथुर्वैन्यःप्रतापवान् २९ पित्रा
ऽपरंजितास्तस्यप्रजास्तेनानुरंजिताः अनुरागात्ततस्तस्यनामराजेत्यजायत ३० आपस्तस्तंभिरेचास्यसमुद्रमभियास्यतः पर्वताश्च
ददुर्मार्गंध्वजभंगश्चनाभवत् ३१ अकृष्टपच्यापृथिवीसिध्यंत्यन्नानिचिंतया सर्वकामदुघागावःपुटकेपुटकेमधु ३२ एतस्मिन्नेवका
लेतुयज्ञेपैतामहेशुभे सूतःसूत्यांसमुत्पन्नःसौत्येहनिमहामतिः ३३ तस्मिन्नेवमहायज्ञेजज्ञेप्राज्ञोऽथमागधः पृथोःस्तवार्थंतौतत्रस
माहूतौसुरर्षिभिः ३४ तावूचुरृषयःसर्वेस्तूयतामेषपार्थिवः कर्मैतदनुरूपंवांपात्रंचायंनराधिपः ३५ तावूचतुस्तदासर्वांस्तानृषीन्
सूतमागधौ आवांदेवानृषींश्चैवप्रीणयावःस्वकर्मभिः ३६ नचास्यविद्मोवैकर्मनतथालक्षणंयशः स्तोत्रंयेनास्यकुर्यावराज्ञस्तेजस्विनो
द्विजाः ३७ ऋषिभिस्तौनियुक्तौचभविष्यैःस्तूयतामिति यानिकर्माणिकृतवान्पृथुःपश्चान्महाबलः ३८ सत्यवाक्दानशीलोयंसत्य
संधोनरेश्वरः श्रीमान्जैत्रःक्षमाशीलोविक्रांतोदुष्टशासनः ३९ धर्मज्ञश्चकृतज्ञश्चदयावान्प्रियभाषणः मान्यमानयिताय्ज्वाब्रह्म
ण्यःसत्यसंगरः ४० शमःशांतश्चनिरतोव्यवहारस्थितोनृपः ततःप्रभृतिलोकेषुस्तवेषुजनमेजय आशीर्वादाःप्रयुज्यंतेसूतमागध
वंदिभिः ४१ तयोःस्तवैस्तैःसुप्रीतःपृथुःप्रादात्प्रजेश्वरः अनूपदेशंसूतायमगधान्मागधायच ४२ तंदृष्ट्वापरमप्रीताःप्रजाश्चाहुर्महर्
षयः वृत्तीनामेषवोदाताभविष्यतिजनेश्वरः ४३ ततोवैन्यंमहाराजप्रजाःसमभिदुद्रुवुः त्वंनोवृत्तिंविधत्स्वेतिमहर्षिवचनात्तदा ४४ सो
भिद्रुतःप्रजाभिस्तुप्रजाहितचिकीर्षया धनुर्गृह्यपृषत्कांश्चपृथिवीमार्दयद्वली ४५ ततोवैन्यभयात्त्रस्तागौर्भूत्वाप्राद्रवन्मही तां
पृथुर्धनुरादायद्रवंतीमन्वधावत ४६

सनिष्काशनार्थम् अन्यत्रतुवैन्यस्यैवयज्ञेऽग्निकुंडात्सूतमागधौजातावित्युक्तम् तत्कल्पभेदात्समा
धेयम् ३३ ३४ ३५ ३६ विद्मःजानीवइत्युक्तमस्यद्विवचनम् ३७ पश्चात्पूर्वस्मिन्कल्पेयानिकृतवान्तैरेव अस्मिन्कल्पे भविष्यैः कर्मभिःस्तूयतामिति
योजना प्रतिकल्पंसमाननामरूपायाएवसृष्टेः सूर्याचंद्रमसौधातायथापूर्वमकल्पयदितिश्रवणात् ३८ ३९ ४० ४१ ४२ ४३ ४४
४५ ४६ श्रीगोवर्द्धनोद्धारणायनमः ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ इतिहरिवंशेटीकायांपंचमोऽध्यायः ५ १ २ ३ ४ ५ ६ ७ ८ संपश्यदिव्यंद-

सालोकान्ब्रह्मलोकादीन्गत्वावैन्यभयात्तदा प्रददर्शाग्रतोवैन्यंप्रगृहीतशरासनम् ४७ ज्वलद्भिर्निशितैर्बाणैर्दीप्ततेजसमच्युत
म् महायोगमहात्मानंदुर्धर्षममरैरपि ४८ अलभंतीतुसात्राणंवैन्यमेवान्वपद्यत कृतांजलिपुटाभूत्वापूज्यालोकैस्त्रिभिःसदा ४९
उवाचवैन्यंनाधर्मंस्त्रीवधंकर्तुमर्हसि कथंधारयितासिप्रजाराजन्विनामया ५० मयिलोकाःस्थिताराजन्मयेदंधार्यतेजगत् म
द्विनाशेविनश्येयुःप्रजाःपार्थिवविद्धितत् ५१ नमामर्हसिमांहंतुश्रेयश्चेत्त्वंचिकीर्षसि प्रजानांपृथिवीपालशृणुचेदंवचोमम ५२ उ
पायतःसमारब्धाःसर्वेसिद्ध्यंत्युपक्रमाः उपायंपश्ययेनत्वंधारयेथाःप्रजान्नृप ५३ हत्वापिमांनशक्तस्त्वंप्रजाधारयितुंनृप अनुभूताभ
विष्यामियच्छकोपंमहाद्युते ५४ अवध्याश्चस्त्रियःप्राहुस्तिर्यग्योनिगतेष्वपि सत्वेषुपृथिवीपालनधर्मंत्यक्तुमर्हसि ५५ एवंबहु-
विधवाक्यंश्रुत्वाराजामहामनाः कोपंनिगृह्यधर्मात्मावसुधामिदमब्रवीत् ५६ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशप
र्वणिपृथूपाख्यानेपंचमोऽध्यायः ५ पृथुरुवाच एकस्यार्थाययोहन्यादात्मनोवापरस्यवा बहून्वैप्राणिनोथेकंभवेत्तस्येहपात
कम् १ सुखमेधंतिबहवोयस्मिंस्तुनिहतेसति तस्मिन्नास्तिहतेभद्रेपातकंचोपपातकम् २ एकस्मिन्यत्रनिधनंप्रापितेदुष्टकारिणि ब
हूनांभवतिक्षेमंतत्रपुण्यप्रदोवधः ३ सोऽहंप्रजानिमित्तंत्वांहनिष्यामिवसुंधरे यदिमेवचनंनाद्यकरिष्यसिजगद्धितम् ४ त्वांनिहत्याद्य
बाणेनमच्छासनपराङ्मुखीम् आत्मानंप्रथयित्वाहंप्रजाधारयितास्वयम् ५ सात्वंशासनमास्थायममधर्मभृतांवरे संजीवयप्रजाःस
र्वाःसमर्थाह्यसिधारणे ६ दुहितृत्वंचमेगच्छततएनमहंशरम् नियच्छेयंत्वद्वधार्थमुद्यतंघोरदर्शनम् ७ पृथिव्युवाच स-
र्वमेतदहंवीरविधास्यामिनसंशयः उपायतःसमारब्धाःसर्वेसिध्यंत्युपक्रमाः ८ उपायंपश्ययेनत्वंधारयेथाःप्रजाइमाः वत्संतुममसंप
श्ययत्रक्षरेयंयेनवत्सला ९ समांचकुरुसर्वत्रमांत्वंधर्मभृतांवर यथाभिस्यंदमानंमेक्षीरंसर्वत्रभावयेत् १० वैशंपायनउवाच त
तउत्सारयामासशैलान्शतसहस्रशः धनुष्कोट्यातदावैन्यस्तेनशैलाविवर्द्धिताः ११ पृथुर्वैन्यस्तदाराजामहींचक्रेसमांततः मन्वं-
तरेष्वतीतेषुविषमासीद्वसुंधरा १२ स्वभावेनाभवंस्तस्याःसमानिविषमाणिच चाक्षुषस्यांतरेपूर्वमासीदेवंतदाकिल १३ नहि
पूर्वविसर्गेवैविषमेपृथिवीतले प्रविभागःपुराणांचग्रामाणांवातदाऽभवत् १४

स्याकल्पय ९ १० तेनशैलोपरिशैलंस्थापयताशैलाः

विवृद्धिंप्रापिताः इष्टकाभित्तिवत् ११ १२ १३ १४ छ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सत्यानृतंवाणिज्यम् १५ १६ १७ तदावैन्येनभूमेर्दोहनात्प्राक् १८ पृथ्वींपृथिवीतः सस्यजातानिव्रीह्यादीनिदुदोहप्रपूरितवान् १९ सोमः ब्रा-
ह्मणराजत्वात्वत्सः २० छंदांसिवेदाः तत्रहितदर्थभूततपोब्रह्मचकृच्छ्रचांद्रायणअग्निहोत्रादिकंच शाश्वतनत्विदानींकल्पितम् २१ २२ऊर्जस्करंअमृ

नसस्यानिनगोरक्षानकृषिर्नवणिक्पथः नैवसत्यानृतंतत्रनलोभोनचमत्सरः १५ वैवस्वतेंतरेचास्मिन्सांप्रतंसमुपस्थिते वै
न्यात्प्रभृतिराजेंद्रसर्वस्यैतस्यसंभवः १६ यत्रयत्रसमंत्वस्याभूमेरासीदिहानघ तत्रतत्रप्रजाः सर्वाःसंवासंसमरोचयन् १७ आहारः
फलमूलानिप्रजानामभवत्तदा कृच्छ्रेणमहतायुक्तइत्येवमनुशुश्रुम १८ संकल्पयित्वावत्संतुमनुंस्वायंभुवंप्रभुम् स्वपाणौपुरुषव्याघ्र
दुदोहपृथिवींततः सस्यजातानिसर्वाणिपृथुर्वैन्यःप्रतापवान् १९ तेनान्नेनप्रजास्तात वर्त्तंतेद्यापिनित्यशः ऋषिभिः श्रूयतेचापिपु-
नर्दुग्धावसुंधरा वत्सःसोमोभवत्तेषांदोग्धाचांगिरसःसुतः २० बृहस्पतिर्महातेजाः पात्रंछंदांसिभारत क्षीरमासीदनुपमंतपोब्रह्म
चशाश्वतम् २१ पुनर्देवगणैःसर्वैःपुरंदरपुरोगमैः कांचनंपात्रमादायदुग्धेयंश्रूयतेमही २२ वत्सस्तुमघवानासीद्दोग्धाचसविताप्र
भुः क्षीरमूर्जस्करंचैववर्त्ततेयेनदेवताः २३ पितृभिःश्रूयतेचापिपुनर्दुग्धावसुंधरा राजतंपात्रमादायस्वधाममितविक्रमैः २४ य-
मोवैवस्वतस्तेषामासीद्वत्सःप्रतापवान् अंतकश्चाभवद्दोग्धाकालोलोकप्रकालनः २५ नागैश्चश्रूयतेदुग्धावत्संकृत्वातुतक्षकम् अ-
लाबुपात्रमादायविषंक्षीरंनरोत्तम २६ तेषामैरावतोदोग्धाधृतराष्ट्रःप्रतापवान् नागानांभरतश्रेष्ठसर्पाणांचमहीपते २७ तेनैव
वर्त्तयंत्युग्रामहाकायाविषोल्बणाः तदाहारास्तदाचारास्तद्वीर्यास्तदुपाश्रयाः २८ असुरैःश्रूयतेचापिपुनर्दुग्धावसुंधरा आयसं
पात्रमादायमायाःशत्रुनिबर्हिणीम् २९ विरोचनस्तुप्राह्लादिर्वत्सस्तेषामभूत्तदा ऋत्विक्द्विमूर्द्धादैत्यानांमधुर्दोग्धामहाबलः ३०
तयैतेमाययाद्यापिसर्वेमायाविनोसुराः वर्त्तयंत्यमितप्रज्ञास्तदेषाममितंबलम् ३१ यक्षैश्चश्रूयतेतातपुनर्दुग्धावसुंधरा आमपा
त्रेमहाराजपुरांतर्द्धानमक्षयम् ३२ वत्संवैश्रवणंकृत्वायक्षैःपुण्यजनैस्तदा दोग्धारजतनाभस्तुपितामणिवरस्ययः ३३ यक्षानुजो
महातेजास्त्रिशीर्षःसुमहातपाः तेनतेवर्त्तयंतीतिपरमर्षिरुवाचह ३४ राक्षसैश्चपिशाचैश्चपुनर्दुग्धावसुंधरा शावंकपालमादायप्र
जाभोक्तुंनरर्षभ ३५ दोग्धारजतनाभस्तुतेषामासीत्कुरूद्वह वत्सःसुमाली कौरव्यक्षीरंरुधिरमेवच ३६

तंयज्ञियंहविरितियावत् २३ २४ २५ २६ २७ २८ २९ द्विमूर्द्धेतिमधोर्विशेषणम् ३० ३१ ३२ ३३ तेनअंतर्धानेनतेयक्षाः वर्त्तयंतिपरशरीर
माविश्य अप्रत्यक्षास्तेजीवंतीत्यर्थः ३४ प्रजाभोक्तुंस्वसंतानानितर्पयितुम् ३५ ३६ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ३७ गंधान्सुरभिद्रव्याणि ३८ ३९ औषधीःज्योतिष्मत्यादिकाः ४० शैलंशिलामयम् ४१ ४२ धात्रीपाथयित्री मातेवपोषणकरी विधात्रीतद्विपरीता
सर्वमात्मन्युपसंहरतीत्यर्थः ४३ प्रतिष्ठा आश्रयः योनिरुत्पादिक्रमेणउत्पत्तिस्थानम् दोग्ध्री धेनुरूपा ४४ ४५ अभ्युपगमात्पुत्रीत्वेन अंगीकारात् ४६

तेनक्षीरेणयक्षाश्चराक्षसाश्चामरोपमाः वर्त्तयंतिपिशाचाश्च भूतसंघास्तथैवच ३७ पृथ्वपत्रेपुनर्दुग्धागंधर्वैःसाप्सरोगणैः वत्संचि
त्ररथंकृत्वाशुचीन्गंधान्नरर्षभ ३८ तेषांचक्ररुचिर्वत्सासीद्दोग्धाभरतसत्तम गंधर्वराजोतिबलो महात्मासूर्यसन्निभः ३९ शैलै
श्चभूयतेराजन्पुनर्दुग्धावसुंधरा ओषधीर्वैमूर्त्तिमतीरत्नानिविविधानिच ४० वत्सस्तुहिमवानासीन्मेरुर्दोग्धामहागिरिः पात्रं
तुशैलमेवासीत्तेनशैलाःप्रतिष्ठिताः ४१ वृक्षैर्गुल्मैश्चभूयतेराजन्पुनर्दुग्धावसुंधरा पालाशंपात्रमादायदग्धच्छिन्नप्ररोहणम् ४२
दुदोहपुष्पितःसालोवत्सःप्लक्षोभवत्तदा सेयंधात्रीविधात्रीचपावनीचवसुंधरा ४३ चराचरस्यसर्वस्यप्रतिष्ठायोनिरेवच सर्वका
मदुघादोग्ध्रीसर्वसस्यप्ररोहिणी ४४ आसीदियंसमुद्रांतामेदिनीतिपरिश्रुता मधुकैटभयोःकृत्स्नामेदसाभिपरिप्लुता तेनेयम्
दिनीदेवीप्रोच्यतेब्रह्मवादिभिः ४५ ततोभ्युपगमाद्राज्ञः पृथोर्वैन्यस्यभारत दुहितृत्वमनुप्राप्तादेवीपृथ्वीतिचोच्यते पृथ्व्याःप्रवि
भक्ताचशोधिताचवसुंधरा ४६ सस्याकरवतीस्फीतापुरपत्तनमालिनी एवंप्रभावोवैन्यःसराजासीद्राजसत्तमः ४७ नमस्यश्चैवपू-
पूज्यश्चभूतग्रामैर्नसंशयः ब्राह्मणैश्चमहाभागैर्वेदवेदांगपारगैः ४८ पृथुरेवनमस्कार्योब्रह्मयोनिःसनातनः पार्थिवैश्च
महाभागैःपार्थिवत्वमभीप्सुभिः ४९ आदिराजोनमस्कार्यःपृथुर्वैन्यःप्रतापवान् योधैरपिचविक्रांतैःप्राप्तुकामैर्जयंयुधि
पृथुरेवनमस्कार्योयोधानांप्रथमोनृपः ५० योहियोद्धारणंयातिकीर्त्तयित्वापृथुंनृपम् सघोररूपान्संग्रामान्क्षेमीतरतिकीर्त्तिमा
न् ५१ वैश्यैरपिचवित्ताढ्यैःपण्यवृत्तिविधायिभिः पृथुरेवनमस्कार्योवृत्तिदातामहायशाः ५२ तथैवशूद्रैःशुचिभिस्त्रिवर्णपरिचारि
भिः आदिराजोनमस्कार्यःश्रेयःपरमभीप्सुभिः ५३ एतेवत्सविशेषाश्चदोग्धारःक्षीरमेवच पात्राणिचमयोक्तानिकिंभूयोवर्णयामि
ते ५४ यइदंशृणुयान्नित्यंपृथोश्चरितमादितः पुत्रपौत्रसमायुक्तोमोदतस्सचिरंभुवि ५५ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरि
वंशपर्वणिषष्ठोऽध्यायः ६

पुरंराजधानी पत्तनंमहापणिकनगरम् ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ वेनांध्येननिरोध्यसत्वर जसीधीधर्मनाशेकृतेसं
तः सत्वपृथुंपृथ्व्यमव्यधुरितस्तद्द्रजोधीवरं सत्वाक्रांतमनोवनिप्रियपयः संकल्पवत्साजनाधीपात्रेदुदुहुर्यथैवमितरैःप्राज्ञैरनुष्ठीयतां आख्यायिकाया अवांत १३
रतात्पर्यंतुपुण्यभाजिराज्ञिपृथ्वीबीजानिप्रसूतेपाप निग्रसतीति ५५ इतिश्रीहरिवंशेटीकायांषष्ठोऽध्यायः ६ ॐ ॐ ॐ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मन्वंतरेति १ २ ३ ४ ५ मेरुसावर्णाश्चत्वारः ब्रह्मसावर्णिः रुद्रसावर्णिः मेरुसावर्णिः दक्षसावर्णिश्च एतेमेरौतपः कृत्वासिद्धिंप्राप्ताइतिसर्वेऽपिमेरुसाव
र्णाइत्युच्यंते ६ तेषांमनूनांपुत्रान् प्रथममन्वंतरगतान् ७ ऋष्यादीनाहमरीचिरितिचतुर्भिः ८ अपरेमरीच्यादिभ्योन्ये ९ पुत्रइतिनाम १० ११ और्व-

जनमेजयउवाच मन्वंतराणिसर्वाणिविस्तरेणतपोधन तेषांपूर्वविसृष्टिंचवैशंपायनकीर्त्तय १ यावंतोमनवश्चैवयावंतं
कालमेवच मन्वंतरमहंब्रह्मन् श्रोतुमिच्छामितत्वतः २ वैशंपायनउवाच नशक्योविस्तरस्तातवक्तुंवर्षशतैरपि मन्वंतराणां
कौरव्यसंक्षेपत्वेवमेशृणु ३ स्वायंभुवोमनुस्तातमनुःस्वारोचिषस्तथा औत्तमस्तामसश्चैवरैवतश्चाक्षुषस्तथा ४ वैवस्वतश्चकौर-
व्यसांप्रतोमनुरुच्यते सावर्णिश्चमनुस्तातभौत्यारोच्यस्तथैवच ५ तथैवमेरुसावर्णाश्चत्वारोमनवःस्मृताः अतीतावर्त्तमानाश्चतथै
वानागताश्चये ६ कीर्त्तितामनवस्तातमयैतेतुयथाश्रुतम् ऋषींस्तेषांप्रवक्ष्यामिपुत्रान्देवगणांस्तथा ७ मरीचिरत्रिर्भगवानंगिराः
पुलहःक्रतुः पुलस्त्यश्चवसिष्ठश्चसप्तैतेब्रह्मणःसुताः ८ उत्तरस्यांदिशितथाराजन्सप्तर्षयोऽपरे यामानामतथादेवाआसन्स्वा-
यंभुवेंतरे ९ आग्नीध्रश्चाग्निबाहुश्चमेधामेधातिथिर्वसुः ज्योतिष्मान्धृतिमान्हव्यःसवनःपुत्रएवच १० मनोःस्वायंभुवस्यैतेद
शपुत्रामहौजसः एतत्तेप्रथमंराजन्मन्वंतरमुदाहृतम् ११ और्वोवसिष्ठपुत्रश्चस्तंबःकाश्यपएवच प्राणोबृहस्पतिश्चैवदत्तोनिश्च्य
वनस्तथा १२ एतेमहर्षयस्तातवायुप्रोक्तामहाव्रताः देवाश्चतुषितानामस्मृताःस्वारोचिषेंतरे १३ हविध्रःसुकृतिर्ज्योतिरापोमूर्त्ति-
रयस्मयः प्रथितश्चनभस्यश्चनभऊर्जस्तथैवच १४ स्वारोचिषस्यपुत्रास्तेमनोस्तातमहात्मनः कीर्त्तिताःपृथिवीपाल महावीर्यपराक्र
माः १५ द्वितीयमेतत्कथितंतवमन्वंतरंमया इदंतृतीयंवक्ष्यामितन्निबोधनराधिप १६ वसिष्ठपुत्राःसप्तासन्वासिष्ठाइतिविश्रुताः
हिरण्यगर्भस्यसुताऊर्ज्जानाममहौजसः १७ ऋषयोत्रमयाप्रोक्ताःकीर्त्त्यमानान्निबोधमे औत्तमेयान्महाराजदशपुत्रान्मनोरमान्
१८ ईषऊर्ज्जस्तनूर्जश्चमधुर्माधवएवच शुचिःशुक्रःसहश्चैवनभस्योनभएवच १९ भानवस्तत्रदेवाश्चमन्वंतरमुदाहृतम् मन्व
तरंचतुर्थंतेकथयिष्यामितच्छृणु २० काव्यःपृथुस्तथैवाग्निर्जह्नुर्धामाचभारत कपीवानकपीवांश्चतत्रसप्तर्षयोऽपरे २१

इतिसार्द्धचतुष्टयेनद्वितीयमन्वंतरगतानृष्यादयउक्ताः वसिष्ठपुत्रऔर्वनामा १२ १३ १४ १५ १६ वसिष्ठेति येसप्तवसिष्ठपुत्रा आसन्पूर्वंतेऽत्रतृती
येमन्वंतरेहिरण्यगर्भपुत्राःऊर्जसंज्ञाः १७ सप्तर्षयोमयाप्रोक्ताइतिपूर्वान्वयिकीर्त्यमानान् औत्तमेयान्निबोधेत्युत्तरेणान्वयः १८ १९ च
तुर्थमाहमन्वंतरमिति २० २१ ५ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

भा॰ ह॰ टी॰ २२ २३ २४ पंचममाह वेदबाहुरिति २५ सोमजः ऊर्ध्वबाहुः आत्रेयः सत्यनेत्रः २६ तथाप्रकृतयः अभूतरजः स्वभावाः पारिप्लवोरैभ्यश्चदेव- अ॰
१४ तागणविशेषौ २७ २८ २९ षष्ठंतइति ३० ३१ आद्यादयः पंचदेवगणाः दिवौकसइतिसर्वेषांविशेषणम् आद्याइत्यत्रास्ता आप्याइतिगौडाःप ७
ठंति ३२ नड्वलायाःपुत्रानाड्वलेयाः ३३ सप्तमंवैवस्वतमन्वंतरमाह अत्रिरिति ३४ ३५ ३६ ३७ ३८ प्राग्दिशः पूर्वकल्पप्रकाराःस प्तस

पुराणेकथितास्तातपुत्राःपौत्राश्चभारत सत्यादेवगणाश्चैवतामसस्यांतरेमनोः २२ पुत्रांश्चैवप्रवक्ष्यामितामसस्यमनोर्नृप ख्याति
स्तपस्यःसुतपा स्तपोमूलस्तपोधनः २३ तपोरतिरकल्माषस्तन्वीधन्वीपरंतपः तामसस्यमनोरेतेदशपुत्रामहाबलाः २४ वायुप्रोक्ता
महाराजपंचममद्दनंतरम् वेदबाहुर्यदुध्रश्चमुनिर्वेदशिरास्तथा २५ हिरण्यरोमापर्जन्यऊर्द्ध्वबाहुश्चसोमजः सत्यनेत्रस्तथात्रेय
एतेसप्तर्षयोऽपरे २६ देवाश्चाभूतरजसस्तथाप्रकृतयोऽपरे पारिप्लवश्चरैभ्यश्चमनोरंतरमुच्यते अथपुत्रानिमांस्तस्यनिबोधगदतोम
म धृतिमानव्ययोयुक्तस्तत्त्वदर्शीनिरुत्सुकः २८ अरण्यश्चप्रकाशश्चनिर्मोहःसत्यवाक्कृती रैवतस्यमनोःपुत्राः पंचमंचैतदंतर
म् २९ षष्ठंतेसंप्रवक्ष्यामितन्निबोधनराधिप भृगुर्नभोविवस्वांश्चसुधामाविरजास्तथा ३० अतिनामासहिष्णुश्चसप्तैतेवैमहर्षयः
चाक्षुषस्यांतरेतातमनोर्देवानिमान्शृणु ३१ आद्याःप्रभूताऋषयःपृथग्भावादिवौकसः लेखाश्चनामराजेंद्रपंचदेवगणाःस्मृताः
ऋषेरंगिरसःपुत्रामहात्मानोमहौजसः ३२ नाड्वलेयामहाराजदशपुत्राश्चविश्रुताः ऊरुप्रभृतयोराजन्षष्ठमन्वंतरंस्मृतम् ३३
अत्रिर्वसिष्ठोभगवान्कश्यपश्चमहानृषिः गौतमोऽथभरद्वाजोविश्वामित्रस्तथैवच ३४ तथैवपुत्रोभगवानृचीकस्यमहात्मनः स
प्तमोजमदग्निश्चऋषयःसांप्रतंदिवि ३५ साध्यारुद्राश्चविश्वेचमरुतोवसवस्तथा आदित्याश्चाश्विनौचापिदेवावैवस्वतेस्मृतौ ३६
मनोर्वैवस्वतस्यैतेवर्त्ततेसांप्रतेंतरे इक्ष्वाकुप्रमुखाश्चैवदशपुत्रामहात्मनः ३७ एतेषांकीर्त्तितानांतुमहर्षीणांमहौजसाम् राजन्पुत्रा
श्चपौत्राश्चदिक्षुसर्वासुभारत ३८ मन्वंतरेषुसर्वेषुप्राग्दिशःसप्तसप्तकाः स्थितालोकव्यवस्थार्थंलोकसंरक्षणायच ३९ मन्वंतरेव्य
तिक्रांतेचत्वारःसप्तकागणाः कृत्वाकर्मदिवंयांतिब्रह्मलोकमनामयम् ४० ततोन्येतपसायुक्ताःस्थानमापूरयंत्युत अतीतावर्त्तमा-
नाश्चक्रमेणैतेनभारत ४१

काः एकोनपंचाशत्मरुतोदेवाः प्रागुक्ताअपिप्रतिमन्वंतरंभवंतीतिज्ञेयम् ३९ तेषांमध्येचत्वारः सप्तकाअष्टाविंशति
मरुतः मन्वंतरसमाप्तौक्रममुक्तिपदंब्रह्मणःस्थानंप्राप्नुवंति ४० ततोन्येयजमानाः तपोबलान्मन्वंतरांतरेतत्पदमारुह्यस्थानंपूरयंतितेनसप्तसप्तकाः १४
पूर्यंतेएवंप्रतिमन्वंतरंज्ञेयम् एतेनकर्मिणामपिपरंपरयामुक्तिरस्तीतिदर्शितम् ४१

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सप्तातीतानि एकंचानागतमित्यष्टावुक्तानीतिद्रष्टव्यम् अनागतानिषट्मेमत्तः निबोधबुध्यस्व ४२ सावर्णाःपंचतेषामेकोवैवस्वतउक्तः ४३ परमेष्ठि
सुताइतिसमासैकदेशस्यविशेषणंप्रजापतेरिति लुप्तविभक्तिकंवापरमेष्ठिपदंद्रष्टव्यम् तेषांचतुर्णामपिमेरुसावर्णित्वेयोगमाह महांतइति यतोमे
रौतपश्चक्रुस्ततोमेरुसावर्णास्तेजाताइत्यर्थः ४४ ४५ सप्तैवमहर्षयःप्रतिमन्वंतरमितिशेषः अष्टमस्याहमनोरिति दीप्तिमान्तृतीयः अश्वत्थामाच

एतान्युक्तानिकौरव्यसप्तातीतानिभारत मन्वंतराणिषट्चापिनिबोधानागतानिमे ४२ सावर्णामनवस्तातपंचतांश्चनिबोधमे ए
कोवैवस्वतस्तेषांचत्वारस्तुप्रजापतेः ४३ परमेष्ठिसुतास्तातमेरुसावर्णतांगताः दक्षस्यैतेहिदौहित्राःप्रियायास्तनयान्नृप महांतस्त
पसायुक्तामेरुपृष्ठेमहौजसः ४४ रुचेःप्रजापतेःपुत्रोरौच्योनाममनुःस्मृतः भूत्यांचोत्पादितोदेव्याभौत्योनामरुचेःसुतः ४५ अनाग
ताश्चसप्तैतेस्मृतादिविमहर्षयः मनोरंतरमासाद्यसावर्णस्येहतान्शृणु ४६ रामोव्यासस्तथात्रेयोदीप्तिमानितिविश्रुतः भारद्वाज
स्तथाद्रौणिरश्वत्थामामहाद्युतिः ४७ गौतमस्यात्मजश्चैवशरद्वान्नामगौतमः कौशिकोगालवश्चैवरुरुःकाश्यपएवच ४८ एतेस
प्तमहात्मानोभविष्यामुनिसत्तमाः ब्रह्मणःसदृशाश्चैतेधन्याःसप्तर्षयःस्मृताः ४९ अभिजात्याथतपसामंत्रव्याकरणैस्तथा ब्रह्मलो
कप्रतिष्ठास्तुस्मृताःसप्तर्षयोमलाः ५० भूतभव्यभवज्ज्ञानंबुद्ध्वाचैवतुयःस्वयम् तपसावैप्रसिद्धायसंगताःप्रविचिंतकाः ५१ मंत्रव्या
करणाद्यैश्चऐश्वर्यात्सर्वशश्चये एतान्भार्यान्विजोज्ञात्वानैष्ठिकानिचनामच ५२ सप्ततेसप्तभिश्चैवगुणैःसप्तर्षयःस्मृताः दीर्घा
युषोमंत्रकृतईश्वरादिव्यचक्षुषः ५३ बुद्ध्याप्रत्यक्षधर्माणोगोत्रप्रावर्तकास्तथा कृतादिषुयुगाख्येषुसर्वेष्वेवपुनःपुनः ५४ प्रवर्त
यंतित्वर्णानाश्रमांश्चैवसर्वशः सप्तर्षयोमहाभागाःसत्यधर्मपरायणाः ५५ तेषांचैवान्वयोत्पन्नाजायंतीहपुनःपुनः मंत्रब्राह्मण
कर्त्तारोधर्मेप्रशिथिलेतथा ५६ यस्माच्चवरदाःसप्तपरेभ्यएवयाचिताः तस्मान्नकालोनवयःप्रमाणमृषिभावने ५७ एषसप्तर्षि
कोद्देशोव्याख्यातस्तेमयानृप सावर्णस्यमनोःपुत्रान्भविष्यान्शृणुसत्तम ५८ वरीयांश्चावरीयांश्चसंमतोधृतिमान्वसुः च
रिष्णुरप्यधृष्णुश्चवाजःसुमतिरेवच सावर्णस्यमनोःपुत्राभविष्यादशभारत ५९ प्रथममेरुसावर्णंप्रवक्ष्यामिमुनीन्शृणु मे
धातिथिस्तुपौलस्त्योवसुःकाश्यपएवच ६० ज्योतिष्मान्भार्गवश्चैवद्युतिमानगिरास्तथा सवनश्चैववासिष्ठआत्रेयोहव्यवाह
नः ६१

तुर्यः ४७ कृपःपंचमः गालवःषष्ठः रुरुःसप्तमः इतराणिपदानितेषामेवविशेषणानि ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५
५६ ५७ ५८ ५९ प्रथममेरुसावर्णाख्येनवमे मेधातिथ्यादीनांगोत्राणिपौलस्त्यादीनि ६० ६१ [illegible] [illegible] [illegible] [illegible] [illegible]

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

भा॰टी॰ ३५ रोहितइत्यस्यैवमनोर्नामांतरम् ६२ अयंपुत्रिकापुत्रोपिदक्षपुत्रइत्युच्यते ६३ पृथुरित्येकः ६४ द्वितीयस्यदक्षसावर्णस्य हविष्मदादीनांगोत्राणि- अ॰ २
पौलहादीनि वसिष्ठपुत्राणांशक्त्यादीनांमध्येअष्टमश्चइत्येके अष्टमइतिसंज्ञेवचातस्य ६५ नभसः नभःसंज्ञस्य अंगिरसःपुत्रः सत्योनामसप्तमः अंगेनो रसारातितियोगादोरसः पुत्रोंऽगिराइत्युच्यते नभसइतिषष्ठ्यंतस्यैवपुत्रेलब्धेसत्यइति अंगिरसःस्तत्यर्थविशेषणंसत्यवादी ६६ द्वौगणौदक्षिणोत्त

पौलहःसत्यइत्येतेसुनयोरोहितेंतरे देवतानांगणास्तत्रत्रयएवनराधिप ६२ दक्षपुत्रस्यपुत्रास्तेरोहितस्यप्रजापतेः मनोःपुत्रोधृष्टकेतुःपंचहोत्रोनिराकृतिः ६३ पृथुश्रवाभूरिधामाऋचीकोबृहतोगयः प्रथमस्यतुसावर्णेनवपुत्रामहौजसः ६४ दशमेत्वथपर्याये द्वितीयस्यांतरेमनोः हविष्मान्पौलहश्चैवसुकृतिश्चैवभार्गवः आपोमूर्तिस्तथात्रेयोवसिष्ठश्चाष्टमःस्मृतः ६५ पौलस्त्यःप्रमतिश्चैवनभोगश्चैवकाश्यपः अंगिरानभसःसत्यःसप्तैतेपरमर्षयः ६६ देवतानांगणौद्वौतौऋषिमंत्राश्चयेस्मृताः मनोःसुतास्तत्सोजाश्चनिकुषजश्चवीर्यवान् ६७ शतानीकोनिरामित्रोवृषसेनोजयद्रथः भूरिद्युम्नःसुवर्चाश्चदशत्वेतेमनोःसुताः ६८ एकादशेथपर्यायेतृतीयस्यांतरेमनोः तस्यसप्तऋषीश्चापिकीर्त्यमानान्निबोधमे ६९ हविष्मान्काश्यपश्चापिहविष्मान्यश्चभार्गवः तरुणश्चतथात्रेयोवासिष्ठस्त्वनघस्तथा ७० अंगिराश्चोदधिष्णाश्चपौलस्त्योनिश्वरस्तथा पुलहश्चाग्नितेजाश्चभाव्याःसप्तमहर्षयः ७१ ब्रह्मणस्तुसुतादेवागणास्तेषांत्रयःस्मृताः संवर्त्तगाःसुशर्माचदेवानीकःपुरूद्वहः ७२ क्षेमधन्वाद्दृढायुश्चआदर्शःपंडकोमनुः सावर्णस्यतुपुत्रावैतृतीयस्यनवस्मृताः ७३ चतुर्थस्यतुसावर्णेऋषीन्सप्तनिबोधमे द्युतिर्वसिष्ठपुत्रश्चआत्रेयःसुतपास्तथा ७४ अंगिरास्तपसोमूर्त्तिस्तपस्वीकाश्यपस्तथा तपोशनश्चपौलस्त्यःपौलहश्चतपोरविः ७५ भार्गवःसप्तमस्तेषांविक्षेपस्तुतपोधृतिः पंचदेवगणाःप्रोक्तामानसाब्रह्मणश्चते ७६ देववायुरदूरश्चदेवश्रेष्ठोविदूरथः मित्रवान्मित्रदेवश्चमित्रसेनश्चमित्रकृत् मित्रबाहुःसुवर्चाश्चद्वादशस्यमनोःसुताः ७७ त्रयोदशेथपर्यायेभाव्येमन्वंतरेमनोः अंगिराश्चैवधृतिमान्पौलस्त्योहव्यपस्तुयः ७८ पौलहस्तत्वदर्शीचभार्गवश्चनिरुत्सुकः निष्प्रकंपस्तथात्रेयोनिर्मोहःकश्यपस्तथा ७९ सुतपाश्चैववासिष्ठःसप्तैतेतुमहर्षयः त्रयएवगणाःप्रोक्तादेवतानांस्वयंभुवा ८०

रमार्गाभिमानिनौ अग्न्यादिधूमादिऋषिसंतोमंत्रप्रतिपाद्यादेवाः मनोःसुतइतिछेदः मनोःसुतइत्येवप्रथमस्ययौगिकंना
मवीर्यवान्ततृतीयस्य अन्यथादशसंख्याया अपूर्तिर्मनोःसुताइत्यस्यपुनरुक्तिश्चदुःसमाधेयास्यात् ६८ तृतीयस्यरुद्रसावर्णाख्यस्य ६९ ७० अंगिरःपुल १५
हशब्दयोस्तद्धितलोपआर्षः ७१ ७२ नवेतिपित्रासहनवत्वंज्ञेयम् ७३ ७४ ७५ ७६ ७७ ७८ ७९ ८० ७ ७ ७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८१ ८२ ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९० इतिहरिवंशेटीकायांसप्तमोऽध्यायः ७ मन्वंतरस्येति अध्यायःसर्वस्यकालपरिच्छेददर्श
नार्थः १ देवादीनांअहोरात्राणिभजेत् पृथक्कुर्यात् विभजतेइतिपाठेसूर्यइतिशेषः लौकिकंअस्मदीयमानवंमनोःपरंब्राह्मंतांलोकप्रसिद्धांगणनामु
पादायउपजीव्यदेवाद्यहोरात्राणांसंख्यांशृणु २ अष्टादशनिमेषास्तुकाष्ठाइत्यस्यमूलंमृग्यम् विष्णुपुराणेपिकाष्ठानिमेषादशपंचचैवेत्येतावत्याएव
संख्यायादर्शनात् तैर्मुहूर्त्तैस्त्रिंशताऽहोरात्रमितिप्राहुरित्युत्तरेणान्वयः ३ अहोरात्रलक्षणमाहचंद्रेति विशेषेणपरिदृश्यमानाचंद्रसूर्ययोर्गतिरुदयादु-

त्रयोदशास्यपुत्रास्तेविज्ञेयास्तुरुचेःसुताः चित्रसेनोविचित्रश्चनयोधर्मभृद्धृतः ८१ सुनेत्रःक्षत्रवृद्धिश्चसुतपानिर्भयोदृढः रौच्य
स्यैतेमनोःपुत्राअंतरेतुत्रयोदशे ८२ चतुर्दशेथपर्यायेभौत्यस्यैवांतरेमनोः भार्गवोह्यतिबाहुश्चसुचिरांगिरसस्तथा ८३ युक्तश्चैवतथा-
त्रेयोशुक्रोवासिष्ठएवच अजितःपौलहश्चैवअंत्याःसप्तर्षयश्चते ८४ एतेषांकल्यमुत्थायकीर्तनात्सुखमेधते यशश्चाप्नोतिसुमहदायुश्चै
वभवेत्तथा ८५ अतीतानागतानांवैमहर्षीणांसदानरः देवतानांगणाःप्रोक्ताःपंचवैभरतर्षभ ८६ तरंगभीरुर्वप्रश्चतरस्वानुग्रएवच
अभिमानीप्रवीणश्चजिष्णुःसंक्रंदनस्तथा ८७ तेजस्वीसबलश्चैवभौत्यस्यैतेमनोःसुताः भौत्यस्यैवाधिकारेतुपूर्णकल्पस्तुपूर्यते ८८ इ
त्येतेनामतोतीतामनवःकीर्तितामया तैरियंपृथिवीतातससमुद्रांतासपत्तना ८९ पूर्णंयुगसहस्रंतुपरिपाल्यानराधिप प्रजाभिश्चैवतपसा
संहारस्तेषुनित्यशः ९० इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिमन्वंतरविवर्णननामसप्तमोऽध्यायः ७ जनमेजयउ०
मन्वंतरस्यसंख्यानंयुगानांचमहामते ब्रह्मणोन्हःप्रमाणंचवक्तुमर्हसिमेद्विज १ वैशंपायनउवाच अहोरात्रंभजेत्सूर्योमान
वंलौकिकपरम् तामुपादायगणनांशृणुसंख्यामरिंदम २ निमेषैःपंचदशभिःकाष्ठात्रिंशत्तुताःकला त्रिंशत्कलोमुहूर्त्तस्तैस्त्रिंशतातै
र्मनीषिणः ३ अहोरात्रमितिप्राहुश्चंद्रसूर्यगतिंनृप विशेषेणतुसर्वेषुअहोरात्रेचनित्यशः ४ अहोरात्राःपंचदशपक्षइत्यभिशब्दितः
द्वौपक्षौतुस्मृतोमासोमासौद्वावृतुरुच्यते ५ अब्दद्वयनमृतुस्तुअयनंत्वृतुभिस्त्रिभिः दक्षिणंचोत्तरंचैवसंख्यातत्त्वविशारदैः ६ मा
नेनानेनयोमासःपक्षद्वयसमन्वितः पितॄणांतदहोरात्रमितिकालविदोविदुः ७ कृष्णपक्षस्त्वहस्तेषांशुक्लपक्षस्तुशर्वरी कृष्णपक्षे
त्वहःश्राद्धंपितॄणांवर्त्ततेनृप ८

दयांतरावधिः तांतावंतंकालंसर्वेषुमेरोःपरितोभूप्रदेशेषुअहोरात्रेइतिप्राहुरित्यत्रप्रज्यते नित्यशइतिसार्वदिकत्वं-
मेतयोरुक्तम् ४ ५ ६ ७ कृष्णेति चंद्रलोकस्थाःपितरःशुक्लपक्षेचंद्रांतर्हितंसूर्यंनपश्यंति कृष्णेतुचंद्रसूर्याभिमुख्यात्तदाश्रितास्तंपश्यंतीतिशुक्लकृष्णपक्षौ
तेषांक्रमेणरात्र्यहनी अतएवकृष्णपक्षःसंपूर्णोवादिनांतत्वादत्यावश्यकतयाअमावास्याश्राद्धकालइत्यर्थः ८ ६। ६। ६।

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मानुषेणेतिसार्द्धेनमकरादामिथुनांतंरविरथाक्षरश्म्योर्ध्वेणाकर्षणेऽनुदिनंक्रियमाणेउत्तराभिमुखः सूर्योमेरुमूर्द्धस्थानांदेवानांदृश्योभवतीतितेषांतं
दादिनम् कर्कादाधावद्धनुरंतंतयोरेवरश्म्योर्ध्वेणक्रमादुन्मोचनेक्रियमाणेदक्षिणाभिमुखः सूर्योदेवानामदृश्योभवतीतितदातेषांरात्रिरिति ९ दिव्यमितिदे
वानांदशभिर्वर्षैर्मनोरहोरात्रएकः दशभिस्तैःपक्षः १० दशभिःपक्षैर्मासः तैर्द्वादशभिर्ऋतुः तैस्त्रिभिरयनंतद्द्वयेनतैःपङ्क्तिःसंवत्सरः द्वासप्ततिसहस्राणिदि-
व्याब्दाएकंमनोर्वर्षमित्यर्थः ११ संध्याशम्यस्तस्यपूर्वापरौभागौ १२ १३ १४ १५ द्वादशसाहस्रोवर्षाणांयुगमित्युच्यते १६ युगपदार्थमाह कृतमिति चतु
र्युगीयुगशब्दार्थः तन्युगंएकसप्तत्यागणितंकिंचिदधिकंचमन्वंतरंप्रोक्तंसहस्रस्यचतुर्दशांशत्वात् १७ एतावतःकालस्यांतेमनोर्ब्रह्मलोकंप्रतिगमनेनाद
र्शनंभवतीतितदेवअयनमित्युच्यते तस्यापिमनोःद्वेअयनेभवतः पूर्वरूपमार्षम् अयंभावः इतःपूर्वंधूमादिमार्गेणगत्वादेवलोकंप्राप्याधिकारनिर्वर्तन-

मानुषेणतुमानेनयोवैसंवत्सरःस्मृतः देवानांतदहोरात्रंदिवाचैवोत्तरायणम् दक्षिणायनंस्मृतारात्रिःप्राज्ञैस्तत्त्वार्थकोविदैः ९ दिव्यमब्दं
दशगुणमहोरात्रंमनोःस्मृतम् अहोरात्रंदशगुणंमानवःपक्षउच्यते १० पक्षोदशगुणोमासोमासैर्द्वादशभिर्गुणैः ऋतुर्मनूनांसप्रोक्तः
प्राज्ञैस्तत्त्वार्थदर्शिभिः ऋतुत्रयेणत्वयनंतद्द्वयेनैववत्सरः ११ चत्वार्येवसहस्राणिवर्षाणांतुकृतंयुगम् तावच्छतीभवेत्संध्यासंध्यांश-
श्चतथानृप १२ त्रीणिवर्षसहस्राणित्रेतास्यात्परिमाणतः तस्याश्चत्रिशतीसंध्यासंध्यांशश्चतथाविधः १३ तथावर्षसहस्रेद्वेद्वापरंपरि-
कीर्तितम् तस्यापिद्विशतीसंध्यासंध्यांशश्चतथाविधः १४ कलिर्वर्षसहस्रंचसंख्यातोत्रमनीषिभिः तस्यापिशतिकासंध्यासंध्यांशश्चैव
तद्विधः १५ एषाद्वादशसाहस्रीयुगसंख्याप्रकीर्तिता दिव्येनानेनमानेनयुगसंख्यांनिबोधमे १६ कृतंत्रेताद्वापरंचकलिश्चैवचतुर्युग
म् युगंतदेकसप्तत्यागणितंनृपसत्तम १७ मन्वंतरमितिप्रोक्तंसंख्यानार्थविशारदैः अयनंचापितस्योक्तंद्वेऽयनेदक्षिणोत्तरे १८ मनुः
प्रलीयतेयत्रसमाप्तेचायनेप्रभोः ततोपरोमनुःकालमेतावंतंभवत्युत १९ समतीतेषुराजेंद्रप्रोक्तःसंवत्सरःसवै तदेवचायुतंप्रोक्तंमुनि
नातत्त्वदर्शिना २०

दंतेअधःपतनमंतरेणैवउत्तरायणमार्गेणब्रह्मलोकंगच्छतीति तथाचोक्तम् अधिकारिकान्प्रकृत्यकृत्वाकर्मदिवंयांतिब्रह्मलोकं
सनातनमिति १८ प्रभोःक्षीणस्यमनोरयनेगमनकालेसमाप्तेसम्यक्प्राप्तेसति १९ समतीतेष्वितिसार्द्धः अनेनैवक्रमेणअनेकेषुमनुषु अतीतेषुसवक्ष्य-
माणोब्रह्मणः संवत्सरःप्रोक्तः कियद्भिर्मन्वंतरैः संवत्सरःपूर्यतइत्याह तदेवेति अयुतंमन्वंतराणिब्रह्मणोहोरात्रमुक्तंतदनुपातेन अहरपिब्रह्मणःकल्प्यम्
कथ्यतइतियोजना अयंभावः षष्ट्यधिकशतत्रयंसंवत्सरस्यअंशाः प्रत्यंशंचतुर्दशमनवः तेनचतुर्दशभिर्गुणितंषष्ट्यधिकशतत्रयंचत्वारिंशदधिकंसह-
स्रपंचकमनूनांअब्दंभवति तावानेवकालोरात्रिरिति अशीत्यधिकमयुतंमनवःब्रह्मणोंऽशरूपेअहोरात्रेभवंति अत्रचांशानांदिनानिकिंचिदधिकानिपंच १६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वर्द्धंते तानि विहाय अन्हां षष्ट्यधिकशतत्रयेण यावंतोंऽशाः मनूनामयुतेन पूर्यंते तावानेव ब्रह्मणो होरात्रस्तदर्द्धं चाहरिति २० २१ युगसहस्रे चतुर्यु-
गसहस्रे २२ २३ २४ २५ संहारसंभवधाराया अंतरं विच्छेदो ब्रह्मतत्तु वक्तुमशक्यं तज्ज्ञानं विना च न धाराविच्छेदोस्तीति भावः २६ प्रजानां जरायुजा-
दीनां सृष्टिसंहारौ मन्वंतरेषु चतुर्दशस्वपि मध्ये मध्ये उपरतौ भवतः २७ शेषः स्थूलभूतानि तत्सहिता देवास्तिष्ठंति तत्र हेतुस्तपसेति २८ निःशेषत्वमे-

ब्रह्मणस्तदहः प्रोक्तं कल्पश्चेति स कथ्यते सहस्रयुगपर्यंता या निशा प्रोच्यते बुधैः २१ निमज्जत्यप्सु यत्रोर्वी सशैलवनकानना
तस्मिन् युगसहस्रे तु पूर्णे भरतसत्तम २२ ब्राह्मो दिवसपर्यंते कल्पो निःशेष उच्यते युगानि सप्ततिस्तानि साग्राणि कथितानि ते २३
कृतत्रेतादियुक्तानि मन्वंतरमुच्यते चतुर्दशैते मनवः कीर्तिताः कीर्त्तिवर्द्धनाः २४ वेदेषु सपुराणेषु सर्वेषु प्रभविष्णवः प्रजानां प
तयो राजन् धन्यमेषां च कीर्त्तनम् २५ मन्वंतरेषु संहाराः संहारांतेषु संभवाः न शक्यमंतरं तेषां वक्तुं वर्षशतैरपि २६ विसर्गस्य प्रजा
तां वै संहारस्य च भारत मन्वंतरेषु संहाराः श्रूयंते भरतर्षभ २७ सशेषास्तत्र तिष्ठंति देवा ब्रह्मर्षिभिः सह तपसा ब्रह्मचर्येण श्रुतेन-
च समन्विताः २८ पूर्णे युगसहस्रे तु कल्पो निःशेष उच्यते तत्र सर्वाणि भूतानि दग्धान्यादित्यतेजसा २९ ब्रह्माणमग्रतः कृत्वा सहादि
त्यगणैर्विभो प्रविशंति सुरश्रेष्ठं हरिं नारायणं प्रभुम् ३० यः स्रष्टा सर्वभूतानां कल्पांतेषु पुनः पुनः अव्यक्तः शाश्वतो देवस्तस्य सर्वमि
दं जगत् ३१ तत्र संवर्त्तते रात्रिः सकलैकार्णवे तदा नारायणो दधे निद्रां ब्राह्मवर्षसहस्रकम् ३२ तावतामिति कालस्य रात्रिरित्यभिश
ब्दिता निद्रायोगमनुप्राप्तो यस्यां शेते पितामहः ३३ सा च रात्रिरपक्रांता सहस्रयुगपर्यया तदा प्रबुद्धो भगवान् ब्रह्मा लोकपितामहः
३४ पुनः सिसृक्षया युक्तः सर्गाय विदधे मनः सैव स्मृतिः पुराणे यत्तदृत्तं तद्विचेष्टितम् ३५ देवस्थानानि तान्येव केवलं च विपर्ययः
ततो दग्धानि भूतानि सर्वाण्यादित्यरश्मिभिः ३६ देवर्षियक्षगंधर्वाः पिशाचोरगराक्षसाः जायंते च पुनस्तात युगे भरतसत्तम ३७
यथर्त्तावृतुलिंगानि नानारूपाणि पर्यये दृश्यंते तानि तान्येव तथा ब्राह्मीषु रात्रिषु ३८ निष्क्रमित्वा प्रजाकारः प्रजापतिरसशायम्
ये च वै मानुषा देवाः सर्वे चैव महर्षयः ३९

वाह तत्रेति २९ आदित्या अपि दग्धेंधनानलवत्स्वात्मानमुपसंहृत्य ब्रह्मणा सह विष्णुं प्रविशंति तेन स्थूलानां
पृथिव्यप्तेजसां नाशो दर्शितः ३० ३१ अयं च लयः सुषुप्तिसदृश इत्याह तत्रेत्यादिना ३२ ३३ ३४ ३५ देवानां सूर्यादीनां च क्षरादीनां च ब्रह्मांडे पिंडे च तान्येव न किंचि
दपूर्वं दृश्यते केवलं विपर्ययः दर्शनानामदर्शनैः सह विपर्ययो मणिप्रवालधारामात्रमित्यर्थः ३६ दग्धानि पूर्वं आसन् तानि देवादयश्च प्राग्विष्णौ लीनाः संतः पुनर्जा
यंते ३७ ऋतुलिंगानि शीतोष्णवृष्ट्यादीनि ३८ निष्क्रमित्वा नारायणान्निष्क्रम्य पृथग्भूय प्रजाकारः प्रजाकर्त्ता पुनः पुनर्भूतानि ससृजे इति चतुर्थेन संबंधः किंस-
र्गाणि भूतान्यविशेषेण पुनः सृजति नेत्याह ये चेति सार्द्धेन ३९ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तेसंगताः शब्देनब्रह्मणासहसंगः एकीभावेन गतिर्येषांतेतत्त्वविदः शब्दसंगाः शब्दसत्वेहेतुः शाश्वदिति शब्दधर्मः स्वाभाविकोगुणोदेहादिषात्मबु-
द्धिः तस्याविसर्गतस्त्यागात् तेपुनर्नभवंति अन्येतुनविष्णुभक्ता अपिमोहकंचुकापनयनाभावाज्जायंत इत्यर्थः ५० तत्पूर्वोक्तप्रकारंयुगसंख्यानम्
४१ ४२ व्यक्ताव्यक्तः स्थूलसूक्ष्मरूपः तस्यमनोः तदंशस्यमनोः विसर्गकीर्त्तयिष्यामीत्युत्तरेणसंबंधः ४३ ४४ यत्रवृष्णिवंशे ५५ इतिहरिवंशटी-
कायांअष्टमोऽध्यायः ८ वैवस्वतस्यमनोः विसर्गंकीर्त्तयिष्यामीत्युक्तंतदेवाह विवस्वानित्यादिना दाक्षायिण्यांदक्षकन्यायां अदित्याम् त्वाष्ट्रीत्वष्टुः
पुत्री १ सुरेणुरितिसंज्ञायाएवनामांतरं भामिनीकोपना भाविनीतिपाठेशब्दचित्तेति २ दीप्तेन अत्युष्णेन भर्तृरूपेण ३ तद्रूपंतस्याः संज्ञायाः रूपंमं-

तेसंगताः सुब्रह्मसंगाः शाश्वद्धर्मविसर्गतः नभवंतिपुनस्तात युगेभरतसत्तम ५० तत्सर्वंक्रमयोगेन कालसंख्याविभागवित् स
हस्रयुगसंख्यानंकृत्वादिवसमीश्वरः ५१ रात्रियुगसहस्रांतां कृत्वाचभगवान्विभुः संहरत्यथभूतानिसृजतेचपुनः पुनः ५२ व्य
क्ताव्यक्तोमहादेवोहरिर्नारायणःप्रभुः तस्यतेकीर्त्तयिष्यामिमनोर्वैवस्वतस्यह ५३ विसर्गंभरतश्रेष्ठसांप्रतस्यमहाद्युते वृष्णिवं-
शप्रसंगेन कथ्यमानंपुरातनम् ५४ यत्रोत्पन्नोमहात्मासहरिर्वृष्णिकुलेप्रभुः सर्वासुरविनाशायसर्वलोकहितायच ५५ इति
श्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिअष्टमोऽध्यायः ८ वैशंपायनउवाच विवस्वान्कश्यपाज्जज्ञे दाक्षायण्या
मरिंदम तस्यभार्याभवत्संज्ञात्वाष्ट्रीदेवीविवस्वतः १ सुरेणुरितिविख्यातात्रिषुलोकेषुभामिनी सावैभार्याभगवतोमार्त्तंडस्यमहा
त्मनः २ भर्तृरूपेणनातुष्यद्रूपयौवनशालिनी संज्ञानामसुतपसादीप्तेनेहसमन्विता ३ आदित्यस्याहितद्रूपंमंडलस्यस्यतेजसा
गात्रेषुपरिदग्धंवैनातिकांतमिवाभवत् ४ नखल्वयंमृतोंऽडस्थइतिस्नेहादभाषत अज्ञानात्कश्यपस्तस्मात् मार्त्तंडइतिचोच्यते ५
तेजस्त्वभ्यधिकंतात नित्यमेवविवस्वतः येनातितापयामासत्रीन्लोकान्कश्यपात्मजः ६ त्रीण्यपत्यानिकौरव्य संज्ञायांतपतांवरः
आदित्योजनयामास कन्यांद्वौचप्रजापती ७

डलस्यतेजसागात्रेषुदग्धम् ४ दाहेहेतुमाह नखल्वितिद्वाभ्याम् भिक्षार्थंआगतेनबुधेनगर्भगौरवा
त् तच्छीघ्रंभिक्षांनप्रयच्छती अदितिः शप्तातवगर्भोयंम्रियतामितितत् श्रुत्वाव्याकुलामदितिंप्रतिभार्यास्नेहात् कश्यपः स्वसामर्थ्यात् बुधशापंनिवार्य
अभाषत अयंखलु इतिनिश्चयेननमृतः अपितु अंडस्थएवास्तीतितस्मादतितेरज्ञानात्त्वमम अंडमृतमित्येवंरूपात्विपरीतज्ञानात् अयंमार्त्तंडइत्यु-
च्यतेमृतंअंडमस्येतिमृतांडस्तस्माज्जातोमार्त्तंडः शकंध्वादित्वात्पररूपम् ५ तेजइति सएवंकश्यपमाहात्म्याज्जीवितोऽतितेजस्वीसंज्ञां अतिसान्नि १७
ध्यादत्यंतंपत्तापयामासेतिभावः ६ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रजापतीआह मनुरिति मनुःश्राद्धदेवाख्योयमभ्य यमजौयमलौ ८ विवर्णाविषमवर्णदुःसहाकारम् स्वांछायांस्वस्यप्रतिमांसवर्णांसमानरूपाम् ९ छाया
संज्ञांउवाचेतिसंबंधः १० शाधिआज्ञापय ११ मद्यंमम १२ नेत्वयाइदंमत्कृत्यंभगवतेसूर्याय १३ तुभ्यंतव १४ ब्रीडितेवलज्जितेवयतस्तपस्विनी आलोच

मनुर्वैवस्वतःपूर्वंश्राद्धदेवःप्रजापतिः यमश्चयमुनाचैवयमजौसंबभूवतुः ८ साविवर्णंतुतद्रूपंदृष्ट्वासंज्ञाविवस्वतः असहंतीचस्वां
छायांसवर्णांनिर्ममेततः ९ मायामयीतुसासंज्ञातस्याश्छायासमुत्थिता प्रांजलिःप्रणताभूत्वाछायासंज्ञांनरेश्वरः १० उवाचकिंम-
याकार्यंकथयस्वशुचिस्मिते स्थितास्मितवनिर्देशंशाधिमांवरवर्णिनी ११ संज्ञोवाच अहंयास्यामिभद्रंतेस्वमेवभवनंपितुः
त्वयेहभवनेमह्यंवस्तव्यंनिर्विकारया १२ इमौचबालकौमह्यंकन्याचेयंसुमध्यमा संभाव्यास्तेनचाख्येयमिदंभगवतेक्वचित् १३
छायोवाच आकचग्रहणाद्देविआशापान्नैवकर्हिचित् आख्यास्यामिमतंतुभ्यंगच्छदेवियथासुखम् १४ वैशंपायनउ-
वाच समादिश्यसवर्णांतुतथेत्युक्ताचसातया त्वष्टुःसमीपमगमद्व्रीडितेवतपस्विनी १५ पितुःसमीपगासातुपितानिर्भर्त्सि
तातदा भर्त्तुःसमीपंगच्छेतिनियुक्ताचपुनःपुनः १६ अगच्छद्वडवाभूत्वाछाद्यरूपमनिंदिता कुरूनथोत्तरान्गत्वातृणान्यथचचार
ह १७ द्वितीयायांतुसंज्ञायांसंज्ञेयमितिचिंतयन् आदित्योजनयामासपुत्रमात्मसमंतदा १८ पूर्वजस्यमनोस्तातसदृशोयमितिप्र-
भुः सवर्णत्वान्मनोर्भूयःसावर्णइतिचोक्तवान् १९ मनुरेवाभवन्नाम्नासावर्णइतिचोच्यते द्वितीयोयःसुतस्तस्याःसविज्ञेयःशनैश्च
रः २० संज्ञातुपार्थिवीतात स्वस्यपुत्रस्यवैतदा चकाराभ्यधिकंस्नेहंनतथापूर्वजेषुवै २१ मनुस्तस्याक्षमत्तत्तुयमस्तस्यानचक्षमे
तांसरोषाच्चबाल्याच्चभाविनोर्थस्यवैबलात् यदासंतर्जयामाससंज्ञांवैवस्वतोयमः २२ तंशशापततःक्रोधात्सावर्णजननीनृ
प चरणःपततामेषतवेतिभृशदुःखिता २३ यमस्तत्तुपितुःसर्वंप्रांजलिःप्रत्यवेदयत् भृशंशापभयोद्विग्नःसंज्ञावाक्यप्रतोदि
तः २४ शापोयंविनिवर्त्तेतप्रोवाचपितरंतदा मात्रास्नेहेनसर्वेषुवर्त्तितव्यंसुतेषुवै २५ सेयमस्मानपाहाययवीयांसंबुभूषति तं
स्यामयोद्यतःपादोनतुदेहेनिपातितः २६

नवतोअनाकारितायाममइहागमनंभर्त्तुस्त्यागश्चाकीर्त्तिकरइत्याशयः १५ १६ आछाद्यगोपयित्वा १७
१८ पूर्वस्यभ्रातुःसमानवर्णत्वादयंसावर्णइत्युक्तोनतुसवर्णायाअपत्यत्वादित्यर्थः १९ पृथिवीतिपूर्वोक्तासुरेणुरेवसंज्ञाख्यातस्याइयंप्रकृतिः पार्थि-
वीद्वितीयासंज्ञा अन्येतुछायानिपातेनपृथिव्याउत्थितत्वात्पार्थिवीत्याहुः २१ तत्तस्याःमनुःक्षमत्क्षांतवान्आर्षअडभावादि २२ २३ प्र
तोदितःव्यथितःविरेजितइतिपाठेतापितः २४ २५ बुभूषतिभूषयितुमिच्छति २६ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२७ २८ २९ ३० ३१ ३२ ३३ अभ्यधिकःस्नेहःकनीयसि तत्संज्ञाकृत्यंपरिहरंतीगूहमाना ३४ ससमाधायसस्थिरंकृत्वायोगा
त् ध्यानात् ३५ समयेआकेशग्रहणात्आशापाच्चनैनत्प्रकाशयिष्यामीतिनियमे अतिगतेअतिक्रांतेसति ३६ ३७ शाड्वलेहरिततृणे ३८ भवान्द्र

बाल्याद्वायदिवामोहात्तद्भवान्क्षंतुमर्हति यस्मात्तेपूजनीयाहंलंघितास्मित्वयाकृत २७ तस्मात्तवैषचरणःपतिष्यतिनसंशयः
अपत्यंदुरपत्यंस्यान्नांबाकुजननीभवेत् २८ शप्तोहमस्मिलोकेशजनन्यानपतांवर तवप्रसादाच्चरणोनपतेन्ममगोपते २९
विवस्वानुवाच असंशयंपुत्रमहद्भविष्यत्यत्रकारणम् येनत्वामाविशत्क्रोधोधर्मज्ञंसत्यवादिनम् ३० नशक्यमन्यथाकर्तुंमे
यामातुर्वचस्तव कृमयोमांसमादाययास्यंतिधरणीतलम् ३१ तवपादान्महाप्राज्ञततस्त्वंप्राप्स्यसेसुखम् कृतमेवंवचस्तथ्यंमा
तुस्तवभविष्यति ३२ शापस्यपरिहारेणत्वंचत्रातोभविष्यसि आदित्योथाब्रवीत्संज्ञांकिमर्थंतनयेषुवै ३३ तुल्येष्वप्यधिकःस्ने
हःक्रियतेतिपुनःपुनः सातत्परिहरंतीतुनाचचक्षेविवस्वते ३४ आत्मानंससमाधाययोगात्तथ्यमपश्यत तांशप्तुकामोभगवान्
नाशायकुरुनंदन ३५ मूर्द्धजेषुचजग्राहसमयेतिगतेपिच सातत्सर्वंयथावृत्तमाचचक्षेविवस्वते ३६ विवस्वानथतच्छ्रुत्वाक्रु-
द्धस्त्वष्टारमभ्यगात् त्वष्टातुतंयथान्यायमर्चयित्वाविभावसुम् निर्दग्धुकामंरोषेणसांत्वयामासवैतदा ३७ त्वष्टोवाच त
वातितेजसाविष्टमिदंरूपंनशोभते असहंतीचतत्संज्ञावनेचरतिशाड्वले ३८ द्रष्टाहितांभवानद्यस्वांभार्यांशुभचारिणीम् नित्यंत
पस्यभिरतांवडवारूपधारिणीम् ३९ पर्णाहारांकृशांदीनांजटिलांब्रह्मचारिणीम् हस्तिहस्तपरिक्लिष्टांव्याकुलांपद्मिनीमिव श्लाघ्यां
योगबलोपेतांयोगमास्थायगोपते ४० अनुकूलंतुतेदेवयदिस्यान्ममतन्मतम् रूपंनिवर्तयाम्यद्यतवकांतमरिंदम ४१ रूपंविवस्वत
श्चासीत्तिर्यगूर्ध्वसमंतुवै तेनासौसंभृतोदेवोरूपेणतुविभावसुः ४२ तस्मात्त्वष्टुःसवैवाचंबहुमेनेप्रजापतिः समनुज्ञातवांश्चैवत्व
ष्टारंरूपसिद्धये ४३ ततोभ्यपगमात्त्वष्टामार्तंडस्यविवस्वतः भ्रमिमारोप्यतत्तेजःशातयामासभारत ४४ ततोनिर्भासितंरूपंतेज-
सासंहतेनवै कांतात्कांततरंद्रष्टुमधिकंशुशुभेतदा ४५ मुखेनिर्वर्तितंरूपंतस्यदेवस्यगोपतेः ततःप्रभृतिदेवस्यमुखमासीत्तुलोहि
तम् मुखरागंतुयत्पूर्वंमार्तंडस्यमुखच्युतम् ४६

द्रक्ष्यति ३९ हस्तिहस्तेनगजशुंडादंडेनपरिक्लिष्टांपद्मिनीमिव ४० तन्मदंतःकरणस्थंमतंअद्यतव
रूपंकांतंमनोहरंनिवर्तयामिसंपादयामीति ४१ तेनपूर्वेणरूपेणसंभृतःसंपूर्णः ४२ ४३ भ्रमिंभ्रामणयंत्रंआरोप्यरूपंशातयामासतनूकृतवान्घृष्टवानित्यर्थः
४४ निर्भासितंप्रकटीकृतंअसंहतेनपृथक्कृतेनतेजसाहेतुनासंहतेनेतिस्पष्टार्थः ४५ निर्वर्तितंभ्रामणयोगान्निकर्षणेनसंपादितम् ४६ ६७ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४७ ४८ ४९ ५० स्वभार्यारूपलीलया भार्यायै अनुरूपलीला अश्वरूपेण संचरणम् ५१ ५२ समभावयत् संगमकरोत् ५३ विचेष्टंती मैथुनप्रति
कूलां चेष्टां कुर्वाणा परपुंसोपशंकया शुक्रं निरवमत् ५४ ५५ ५६ तेन भ्रातुः मातृशापज क्लेशेन मभाप्येवं माभूदिति धर्मसेवाश्रयदित्यर्थः ५७ ५८ ५९

आदित्या द्वादशैवेह संभूता सुखसंभवाः धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ४७ इंद्रो विवस्वान् पूषा च पर्जन्यो दशमस्तथा
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ४८ हर्षं लेभे ततो देवो दृष्ट्वादित्यान् स्वदेहजान् गंधैः पुष्पैरलंकारैर्भास्वता मुकुटेन च ४९
एवं संपूजयामास त्वष्टा वाक्यमुवाच ह गच्छ देव निजां भार्यां कुरूंश्चाप्युत्तरान् ५० वडवारूपमास्थाय वने चरति शाड्वले स तथा
रूपमास्थाय स्वभार्यारूपलीलया ५१ ददर्श योगमास्थाय स्वां भार्यां वडवां ततः अधृष्यां सर्वभूतानां तेजसा नियमेन च ५२ वडवा
वपुषा राजंश्चरंतीमकुतोभयाम् सोऽश्वरूपेण भगवांस्तां मुखे समभावयत् ५३ मैथुनाय विचेष्टंती परपुंसोपशंकया सा तन्निरवम
च्छुक्रं नासिकाभ्यां विवस्वतः ५४ देवौ तस्यामजायेतामश्विनौ भिषजां वरौ नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति ५५ मार्तंडस्या
त्मजावेतावष्टमस्य प्रजापतेः तां तु रूपेण कांतेन दर्शयामास भास्करः ५६ सा च दृष्ट्वैव भर्तारं तुतोष जनमेजय यमस्तु कर्मणा तेन भृ
शं पीडितमानसः ५७ धर्मेण रंजयामास धर्मराज इमाः प्रजाः स लेभे स कर्मणा तेन परमेण महाद्युतिः ५८ पितृणामाधिपत्यं च लोक
पालत्वमेव च मनुः प्रजापतिस्त्वासीत् सावर्णः स तपोधनः ५९ भाव्यः सोऽनागते काले मनुः सावर्णिकेंऽतरे मेरुपृष्ठे तपो घोरमद्यापि चर
ति प्रभुः ६० भ्राता शनैश्चरस्त्वस्य ग्रहत्वमुपलब्धवान् नासत्यौ यौ समाख्यातौ स्वर्वैद्यौ तौ बभूवतुः ६१ सेवतापि तथा राजन्नश्वानां
शांतिदोऽभवत् त्वष्टा तु तेजसा तेन विष्णोश्चक्रमकल्पयत् ६२ तदप्रतिहतं युद्धे दानवांतचिकीर्षया यवीयसी तयोर्या तु यमी कन्या
यशस्विनी ६३ अभवत् सा सरिच्छ्रेष्ठा यमुना लोकभाविनी मनुरित्युच्यते लोके सावर्ण इति चोच्यते ६४ द्वितीयो यः सुतस्तस्य मनो
र्भ्राता शनैश्चरः ग्रहत्वं स च लेभे वै सर्वलोकाभिपूजितम् ६५ य इदं जन्म देवानां शृणुयाद्वापि धारयेत् आपद्भ्यः स विमुच्येत प्राप्नुया
च्च महद्यशः ६६ इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्वणि वैवस्वतोत्पत्तौ नवमोऽध्यायः ९ वैशंपायन उवाच
मनोर्वैवस्वतस्यासन् पुत्रा वै नव तत्समाः इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्यातिरेव च १ नरिष्यंश्च तथा प्रांशुर्नाभागारिष्टसप्तमाः
करूषश्च पृषध्रश्च नवैते भरतर्षभ २

६० ६१ ६२ तयोर्मनुयमयोः ६३ ६४ ६५ देवानां यमादीनामश्विनोश्च ६६ इति हरिवंशटीकायां नवमो
ऽध्यायः ९ १ नाभागारिष्ट इत्यत्र दिष्ट इत्यपि पठंति नाभानेदिष्ठं वै मानवमिति श्रुतेः नाभानेदिष्ट इति पाठः प्रामाणिकः २ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नृपक्रियांराज्यंकारयामासपुरूरवसः स्रुता: २४ २५ दंडोयच्छब्दार्थः २६ २७ नरिष्यन्तुनाभागौमनोःपंचमद्वितीयौपुत्रौ २८ धृष्णोः तृतीयस्य २९
३० आनर्त्तविषयोद्वारकादेशः कुशस्थलीद्वारवती ३१ ३२ सुवैवतत्रजरादिपरिणामाभावात् ३३ ३४ ३५ ३६ इतिहरिवंशेटीकायांदशमोऽध्यायः
१०

स्रुद्युम्नः कारयामासप्रतिष्ठानेनृपक्रियाम् उत्कलस्यत्रयःपुत्रास्त्रिषुलोकेषुविश्रुताः धृष्टकश्चांबरीषश्चदंडश्चेतिस्रुतास्त्रयः
२४ यश्चकारमहात्मावैदंडकारण्यमुत्तमम् वनंतुल्लोकविख्याततापसानामनुत्तमम् २५ तत्रप्रविष्टमात्रस्तुनरःपापात्प्रमुच्यते
स्रुद्युम्नश्चादिवंयातऐलसुतायभारत २६ मानवेयोमहाराजस्त्रीपुंसोर्लक्षणैर्युतः धृतवान्यइलेत्येवंस्रुद्युम्नश्चेतिविश्रुतः २७
नरिष्यतःशकाःपुत्रानाभागस्यतुभारत अंबरीषोभवत्पुत्रःपार्थिवर्षभसत्तमः २८ धृष्णोस्तुधार्ष्टकंक्षत्रंरणधृष्टंबभूवह शर्यातेर्
मिथुनंत्वासीदानर्त्तोनामविश्रुतः २९ पुत्रःकन्यासुकन्याचयापत्नीच्यवनस्यह आनर्त्तस्यतुदायादोरेवोनामसमहाद्युतिः ३० आनर्त्त
विषयश्चासीत्पुरीचास्यकुशस्थली रेवस्यरैवतःपुत्रःककुद्मीनामधार्मिकः ३१ ज्येष्ठःपुत्रशतस्यासीद्राज्यंप्राप्यकुशस्थलीम् स-
कन्यासहितःश्रुत्वागांधर्वंब्रह्मणोऽतिके ३२ मुहूर्त्तंभूतंदेवस्यगतंबहुयुगंप्रभो आजगामयुवैवाथस्वांपुरीयादवैर्वृताम् ३३ कृतां
द्वारवतींनाम्नाबहुद्वारांमनोरमाम् भोजवृष्ण्यंधकैर्गुप्तांवासुदेवपुरोगमैः ३४ ततःसरैवतोज्ञात्वायथातत्त्वमरिंदम कन्यांतांब
लदेवायस्रुव्रतांनामरेवतीम् ३५ दत्वाजगामशिखरंमेरोस्तपसिसंस्थितः रेमेरामोपिधर्मात्मारेवत्यासहितःसुखी ३६ इति
श्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिदशमोऽध्यायः १० जनमेजयउवाच कथंबहुयुगेकालेसमतीतेद्विजोत्तम
नजरारेवतींप्राप्तारैवतंचककुद्मिनम् १ मेरुंगतस्यवातस्यशार्यातेःसंततिःकथम् स्थितापृथिव्यामद्यापिश्रोतुमिच्छामितत्त्वतः
२ वैशंपायनउवाच नजराक्षुत्पिपासेवानमृत्युर्भरतर्षभ ऋतुचक्रंनभवतिब्रह्मलोकेसदानघ ३ ककुद्मिनस्तुतंलोकं
रैवतस्यगतस्यह हतापुण्यजनैस्तातराक्षसैःसाकुशस्थली ४ तस्यभ्रातृशतंचासीद्धार्मिकस्यमहात्मनः तद्वध्यमानंरक्षोभि
र्दिशःप्राद्रवदच्युत ५ विद्रुतस्यतुराजेंद्रतस्यभ्रातृशतस्यवै तेषांतुतेभयाक्रांताःक्षत्रियास्तत्रतत्रह ६

कथमिति जन्मवतःपरिणामावश्यंभावात्कथंतयोर्जरायाअप्राप्तिरितिप्रश्नः १ शर्यातिप्रपौत्रस्यरैवतस्य २ उत्तरमाहनजरेति जाठराग्निप्रभावे-
ण क्षुधादयोभवंतितत्पाचितान्नेनपरिणामांतरंजायतेपूर्वपरिणामश्चनश्यति ततोजराप्रवर्त्तते अग्नेश्चप्रवर्त्तकःकालःसूर्यादिनिर्वर्त्यः ब्रह्मलोके
तुसूर्याद्यभावान्नतन्मूलकाःकालाग्निक्षुज्जराइत्यर्थः ३ ४ ५ ६ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

३ ४ ५ ६ इडानाम्नीकन्या ७ दंडधरोराजा भद्रेमांअनुगच्छस्वेतितामिडाप्रत्युवाचेतिपूर्वेणसंबंधः तंमनुंइडाप्रत्युवाचेत्युत्तरेणसंबध्यते ८ ९ १०
११ १२ १३ मानवीघृतपदीमैत्रावरुणीतिमंत्रलिंगादिडायाउभयसंबंधोघटते तत्राद्यमाह आवयोरितिद्वितीयमाहमनोरिति १४ १५ तत्रमित्रावरु-

अकरोत्पुत्रकामस्तुमनुरिष्टिंप्रजापतिः मित्रावरुणयोस्तातपूर्वमेवविशांपते ३ अनुत्पन्नेषुनवसुपुत्रेष्वेतेषुभारत तस्यांतुव-
र्तमानायामिष्ट्यांभरतसत्तम ४ मित्रावरुणयोरंशेमुनिराहुतिमाजुहोत् आहुत्यांहूयमानायांदेवगंधर्वमानुषाः ५ तुष्टिंतुपरमां
जग्मुस्तुनयश्चतपोधनाः अहोस्यतपसोवीर्यमहोस्यश्रुतमद्भुतम् ६ तत्रदिव्यांबरधरादिव्याभरणभूषिता दिव्यसंहननाचैवइडा
जज्ञेइतिश्रुतिः ७ तामिडेत्येवहोवाचमनुर्दंडधरस्तदा अनुगच्छस्वमांभद्रेतमिडाप्रत्युवाचह धर्मयुक्तमिदंवाक्यंपुत्रकामंप्रजा
पतिम् ८ इडोवाच मित्रावरुणयोरंशेजातास्मिवदतांवर तयोःसकाशंयास्यामिनमांधर्मोहतोवधीत् ९ सैवमुक्त्वाम
नुंदेवंमित्रावरुणयोरिडा गत्वांतिकंवरारोहाप्रांजलिर्वाक्यमब्रवीत् १० अंशेस्मियुवयोर्जातादेवौकिंकरवाणिवाम् मनुनाचा
हमुक्तावैअनुगच्छस्वमामिति ११ तांतथावादिनींसाध्वीमिडांधर्मपरायणाम् मित्रश्चवरुणश्चोभावूचतुर्यन्निबोधतत् १२ अ
नेनतवधर्मेणप्रश्रयेणदमेनच सत्येनचैवसुश्रोणिप्रीतौस्वोवरवर्णिनि १३ आवयोस्त्वंमहाभागेख्यातिंकन्येतियास्यसि म-
नोर्वंशधरःपुत्रस्त्वमेवचभविष्यसि १४ सुद्युम्नइतिविख्यातस्त्रिषुलोकेषुशोभने जगत्प्रियोधर्मशीलोमनोर्वंशविवर्द्धनः १५ निवृ
त्तासातुतच्छ्रुत्वागच्छंतीपितुरंतिकम् बुधेनांतरमासाद्यमैथुनायोपमंत्रिता १६ सोमपुत्राद्बुधाद्राजंस्तस्यांजज्ञेपुरूरवाः जनयित्वा
ततःसातामिडासुद्युम्नतांगता १७ सुद्युम्नस्यतुदायादास्त्रयःपरमधार्मिकाः उत्कलश्चगयश्चैवविनताश्वश्चभारत १८ उत्कलस्योत्क
लाराजन्विनताश्वस्यपश्चिमा दिक्पूर्वाभरतश्रेष्ठगयस्यतुगयापुरी १९ प्रविष्टेतुमनौतातदिवाकरमरिंदम दशधातद्दधत्क्षत्रमकु
र्वत्पृथिवीमिमाम् २० यूपांकितावसुमतीयस्येयंसवनाकरा इक्ष्वाकुर्ज्येष्ठदायादोमध्यदेशमवाप्तवान् २१ कन्याभावाच्चसुद्युम्नोनै
नंगुणमवाप्तवान् वसिष्ठवचनाच्चासीत्प्रतिष्ठानेमहात्मनः २२ प्रतिष्ठाधर्मराजस्यसुद्युम्नस्यकुरूद्वह तत्पुरूरवसेप्रादाद्राज्यंप्रा
प्यमहायशाः २३

णयोर्वाक्यंश्रुत्वापितुर्मनोः १६ १७ १८ १९ प्रविष्टइति मनौसूर्यंप्रविष्टेपुत्रानुत्पाद्यत्यक्ताधिकारेसति इक्ष्वाकुप्रभृतयोदशम-
नोःपुत्राः पृथिवींदशधाविभज्यगृहीतवंतः २० २१ सुद्युम्नएनंगुणंमध्यदेशराजत्वम् वसिष्ठानुग्रहात्तुसुद्युम्नोपितत्समीपदेशेराज्यंलेभेइत्याहवसि
ष्ठेति प्रतिष्ठानेप्रयागैकदेशे २२ २३

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७ ८ वैश्यौ वैश्यायासुतसन्नत्वात् मातृजातयः पुत्राः स्युरितिवचनात् ब्राह्मणतांउपशांतिंगतौ ९ १० ११ क्षुवतः क्षुतंकुर्वतः १२ विकुक्षित्वात्-
विपुलकुक्षित्वात् अयोधताम् अप्रतियोधृताम् १३ १४ १५ श्राद्धेति एतेनयदर्थंयदुद्दिष्टंतस्मैतददत्वान्यत्रविनियुज्यतेचेद्दोषो भवतीतिदर्शितम्

अन्ववायस्तुसुमहांस्तत्रतत्रविशांपते येषामेतेमहाराजशार्याताइतिविश्रुताः ७ क्षत्रियाभरतश्रेष्ठदिक्षुसर्वासुविश्रुताः सर्वशः
पर्वतगणान् प्रविष्टाःकुरुनंदन ८ नाभागारिष्टपुत्रौद्वौवैश्यौब्राह्मणतांगतौ करूषस्यचकारूषाः क्षत्रियायुद्धदुर्मदाः ९ प्रांशो
रेकोभवत्पुत्रः प्रजातिरितिनः श्रुतम् पृषध्रोहिंसयित्वातुगुरोर्गांजनमेजय १० शापाच्छूद्रत्वमापन्नोनवैतेपरिकीर्तिताः वैवस्व
तस्यतनयामनोर्वैभरतर्षभ ११ क्षुवतश्चमनोस्तातइक्ष्वाकुरभवत्सुतः तस्यपुत्रशतंत्वासीदिक्ष्वाकोर्भूरिदक्षिणम् १२ तेषां
विकुक्षिर्ज्येष्ठस्तुविकुक्षित्वादयोधताम् प्राप्तःपरमधर्मज्ञःसोयोध्याधिपतिःप्रभुः १३ शकुनिप्रमुखास्तस्यपुत्राःपंचाशदुत्तमाः
उत्तरापथदेशस्थारक्षितारोमहीपते १४ चत्वारिंशदथाष्टौचदक्षिणस्यांतथादिशि शशादप्रमुखाश्चान्येरक्षितारोविशांपते १५ इ
क्ष्वाकुस्तुविकुक्षिंवैअष्टकायामथादिशत् मांसमानयश्राद्धार्थंमृगान्हत्वामहाबलः १६ श्राद्धकर्मणिचोद्दिष्टेअकृतेश्राद्धकर्मणि
भक्षयित्वाशशंतातशशादोमृगयागतः १७ इक्ष्वाकुणापरित्यक्तोवसिष्ठवचनात्प्रभुः इक्ष्वाकौसंस्थितेतातशशादस्तुपुरमथावसत्
शशादस्यतुदायादःककुत्स्थोनामवीर्यवान् इंद्रस्यवृषभूतस्यककुत्स्थोजयतासुरान् १८ पूर्वमाडीबकेयुद्धेककुत्स्थस्तेनहिस्मृ
तः अनेनास्तुककुत्स्थस्यपृथुरानेनसःस्मृतः १९ विष्टराश्वः पृथोःपुत्रस्तस्मादार्द्रस्त्वजायत आर्द्रस्ययुवनाश्वस्तुश्रावस्तस्त
स्यात्मजः २० जज्ञेश्रावस्तकोराजाश्रावस्तीयेननिर्मिता श्रावस्तस्यतुदायादोबृहदश्वोमहायशाः २१ कुवलाश्वःसुतस्तस्य
राजापरमधार्मिकः यःसधुंधुवधाद्राजाधुंधुमारत्वमागतः २२ जनमेजयउवाच धुंधोर्वधंमहाप्राज्ञश्रोतुमिच्छामितत्
त्वतः यदर्थंकुवलाश्वःसन्धुंधुमारत्वमागतः २३ वैशंपायनउवाच कुवलाश्वस्यपुत्राणांशतमुत्तमधन्विनाम् सर्ववि
द्यासुनिपुणाबलवंतोदुरासदाः २४ बभूवुर्धार्मिकाःसर्वेयज्वानोभूरिदक्षिणाः कुवलाश्वंसुतंराज्येबृहदश्वोऽन्वयोजयत् २५ पु
त्रसंक्रामितश्रीस्तुवनंराजासमाविशत् तमुत्तंकोथविप्रर्षिःप्रयांतंप्रत्यवारयत् २६

मृगयागतः मृगयातआगतएवइक्ष्वाकुणापरित्यक्तइत्युत्तरेणान्वयः १६ वसिष्ठवचनात् हविरिदमुच्छिष्टंनपितृयोग्यमित्येवंरूपात् संस्थितेमृ
ते १७ ककुत्स्कंधः तत्रतिष्ठतीतिककुत्स्थः १८ १९ २० श्रावस्तीपुरी २१ २२ २३ २४ २५ २६ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

रक्षणंअस्माकमितिशेषः २७ २८ २९ ३० समेषुपर्वताद्यभावान्निम्नोन्नतवर्जितेषु मरुषुनिर्जलेषु धन्वसुअल्पोदकेषु उज्जानकःजनस्यसमूहो-

उत्तंकउवाच भवतारक्षणंकार्यंतत्तावत्कर्तुमर्हसि निरुद्विग्नस्तपःकर्त्तुंनहिशक्नोमिपार्थिव २७ त्वयाहिपृथिवीराजन्
रक्ष्यमाणामहात्मना भविष्यतिनिरुद्विग्नानारण्यंगन्तुमर्हसि २८ पालनेहिमहान्धर्मःप्रजानामिहदृश्यते नतथाऽदृश्यतेरण्ये
मातेऽभूद्बुद्धिरीदृशी २९ ईदृशोनहिराजेन्द्रधर्मःक्वचनदृश्यते प्रजानांपालनेयोवैपुराराजर्षिभिःकृतः रक्षितव्याप्रजाराज्ञातास्त्वं
रक्षितुमर्हसि ३० ममाश्रमसमीपेहिसमेषुमरुधन्वसु समुद्रोवालुकापूर्णउज्जानकइतिश्रुतः देवतानामवध्यश्चमहाकायोमहा
बलः ३१ अंतर्भूमिगतस्तत्रवालुकांतर्हितोमहान् राक्षसस्यमधोःपुत्रोधुंधुर्नामामहासुरः शेतेलोकविनाशायतपआस्थायदा
रुणम् ३२ संवत्सरस्यपर्यन्तेसनिःश्वासंप्रमुंचति यदातदाभूश्चलतिसशैलवनकानना ३३ तस्यनिःश्वासवातेनरजउद्धूयतेमहत्
आदित्यपथमावृत्यसप्ताहंभूमिकंपनम् ३४ सविस्फुलिंगसांगारंसधूममतिदारुणम् तेनतातनशक्नोमितस्मिन्स्थातुंस्वकाश्रमे
३५ तंमारयमहाकायंलोकानांहितकाम्यया लोकाःस्वस्थाभवंत्वद्यतस्मिन्विनिहतेऽसुरे ३६ त्वंहितस्यवधायैकःसमर्थःपृथि
वीपते विष्णुनाचवरोदत्तोमह्यंपूर्वयुगेनघ ३७ यस्त्वंमहासुरंरौद्रंहनिष्यसिमहाबलम् तस्यत्वंवरदानेनतेजआप्याययिष्यसि
३८ नहिधुंधुर्महातेजास्तेजसाल्पेनशक्यते निर्दग्धुंपृथिवीपालसाहिवर्षशतैरपि वीर्यंहिसुमहत्तस्यदेवैरपिदुरासदम् ३९
सएवमुक्तोराजर्षिरुत्तंकेनमहात्मना कुवलाश्वंसुतंप्रादात्तस्मैधुंधुनिवारणे ४० बृहदश्वउवाच भगवन्न्यस्तशस्त्रो
ह्ययंतुतनयोमम भविष्यतिद्विजश्रेष्ठधुंधुमारोनसंशयः ४१ सतंव्यादिश्यतनयंराजर्षिर्धुंधुमारणे जगामपर्वतायैवतपसे
संशितव्रतः ४२ कुवलाश्वस्तुपुत्राणांशतेनसहपार्थिवः प्रायादुत्तंकसहितोधुंधोस्तस्यविनिग्रहे ४३ तमाविशत्तदाविष्णुर्भगवांस्ते
जसाप्रभुः उत्तंकस्यनियोगाद्वैलोकस्यहितकाम्यया ४४ तस्मिन्प्रयातेदुर्धर्षेदिविशब्दोमहानभूत् एषश्रीमानवध्योद्यधुंधुमारोभ
विष्यति ४५ दिव्यैर्माल्यैश्चतंदेवाःसमंतात्समवाकिरन् देवदुंदुभयश्चापिप्रणेदुर्भरतर्षभ ४६ सगत्वाजयतांश्रेष्ठस्तनयैःसहवीर्य
वान् समुद्रंखानयामासवालुकार्णवमव्ययम् ४७ नारायणेनकौरव्यतेजसाप्यायितःसर्वे बभूवसमहातेजाभूयोबलसमन्वितः
४८

जानकंतद्रहितंउज्जानकः उज्जालकेतिपाठेजलसमूहवर्जितः ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ निवारणेविनाशेनिमित्ते ४० ४१
४२ ४३ ४४ ४५ ४६ वालुकार्णवंवालुकापूर्णमुदकमयं वालुकापूर्णमितिगौडाः ४७ ४८ छ छ छ छ

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे अपध्वंस विलोमज इति वदन् संबोधयन् १५ वर्त्तयवस १६ तं एवं वदंतं पितरं १७ १८ तेनाधर्मेण विप्रविवाहविघ्नजेन पितृक्षोभेण न तु राज्ञः प्र
जात्यागेन प्रव्रजतो विरक्तस्य दोषाभावात् तस्मिन्नपरितोषोयः पितुरासीदित्यादि शेषग्रंथाच्च १९ तस्य त्रिशंकोर्विषये देशे संन्यस्य न्यासरूपे-
णस्थापयित्वा २० शेषस्य कुटुंबस्य २१ विक्रीयंतं विक्रीयमाणम् २२ २३ यस्माद्गले बद्धः अतो गालव इति २४ इति हरिवंशे टीकायां द्वाद-
शोऽध्यायः १२ स सेति भक्तिर्विश्वामित्रस्याराध्यत्वात् कृपा तत्कुटुंबस्य अनाथत्वात् प्रतिज्ञा वसिष्ठ शिष्यत्वस्य परिहारे प्रकृतत्वात् एभि-

अपध्वंसेति बहुशो वदन् क्रोधसमन्वितः पितरं सोऽब्रवीत्त्यक्तः क्व गच्छामीति वै मुहुः १५ पिता त्वेनमथोवाच श्वपाकैः सह वर्त्तय
नाहं पुत्रेण पुत्रार्थी त्वयाद्य कुलपांसन १६ इत्युक्तः स निराक्रामन्नगराद्वचनात्पितुः न चैनं वारयामास वसिष्ठो भगवानृषिः १७ स तु स
त्यव्रतस्तात श्वपाकावसथान्तिके पित्रा त्यक्तोवसद्वीरः पिता तस्य वनं ययौ १८ ततस्तस्मिंस्तु विषये नावर्षत्पाकशासनः समा द्वादश राज
द्र तेनाधर्मेण वै तदा १९ दारांस्तु तस्य विषये विश्वामित्रो महातपाः संन्यस्य सागरानूपे चचार विपुलं तपः २० तस्य पत्नी गले बध्वा मध्यमं
पुत्रमौरसम् शेषस्य भरणार्थाय व्यक्रीणाद्गोशतेन वै २१ तं तु बद्धं गले दृष्ट्वा विक्रीयंतं नृपात्मजः महर्षिपुत्रं धर्मात्मा मोक्षयामास भारत
२२ सत्यव्रतो महाबाहुर्भरणं तस्य चाकरोत् विश्वामित्रस्य तुष्ट्यर्थमनुकंपार्थमेव च २३ सोभवद्गालवो नाम गलबंधान्महातपाः मह
र्षिः कौशिकस्तात तेन वीरेण मोक्षितः २४ इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्वणि द्वादशोऽध्यायः १२ वैशंपायन उ०
सत्यव्रतस्तु भक्त्या च कृपया च प्रतिज्ञया विश्वामित्रकलत्रं तद्बभार विनये स्थितः १ हत्वा मृगान्वराहांश्च महिषांश्च वनेचरान् वि-
श्वामित्राश्रमाभ्याशे मांसं वृक्षे बबंध सः २ उपांशुव्रतमास्थाय दीक्षां द्वादशवार्षिकीम् पितुर्नियोगादवसत्तस्मिन्वनगते नृपे ३ अयो
ध्यां चैव राष्ट्रं च तथैवांतःपुरं मुनिः याज्योपाध्यायसंबंधाद्वसिष्ठः पर्यरक्षत ४ सत्यव्रतस्तु बाल्याद्वा भाविनोर्थस्य वा बलात् वसिष्ठेऽ
भ्यधिकं मन्युं धारयामास वै तदा ५ पित्रा तु तं तदा राज्यात्त्यज्यमानं स्वमात्मजम् न वारयामास मुनिर्वसिष्ठः कारणेन ह ६ पाणिग्रहणमं
त्राणां निष्ठा स्यात्सप्तमे पदे न च सत्यव्रतस्तस्य तमुपांशुमबुध्यत ७ जानन्धर्मं वसिष्ठस्तु न मां त्रातीति भारत सत्यव्रतस्तदा रोषं वसिष्ठे
मनसाकरोत् ८

त्रिभिः कारणैर्विश्वामित्रकलत्रं बभार पुपोष १ २ उपांशुव्रतं परेषामविदितनियमम् आस्थाय अंगीकृत्य वनगते प्यवसत् ३ ४ ५
कारणेन अपराधी अयं कंचित्कालं प्रायश्चित्तं चरतु इत्याशयेन ६ निष्ठा समाप्तिः उपांशुं नायं परदारहरः अपि तु कन्याहरो तत एनं द्वादशवार्षिक्यां दीक्षायां समा
प्तायामभिषेक्ष्यामीति गूढं आशयम् ७ वसिष्ठाशयमबुध्वैव तदुपरि रोषमकरोदित्याह जानन्निति ८ ९ ९ ९ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४९ सुरवजेनाग्निनातस्यपुत्रशतंदग्धमित्युत्तरेणसंबंधः सच वारिस्रुस्रावस्वदेहजलेन क्षयमाप्तुवितवानित्यर्थः ५० ५१ ५२ ५३ ५४ ५५ ५६
इतिहरिवंशेटीकायांएकादशोऽध्यायः ११ तस्यधुंधुमारस्य १ २ ३ तस्यसंहताश्वस्यापराहैमवतीहिमवतः कन्या अस्यांप्रसेनजिज्जातइतिशेषः

तस्यपुत्रैः खनद्भिस्तु वालुकांतर्हितस्तदा धुंधुरासादितोराजन्दिशमाश्रित्यपश्चिमाम् ४९ मुखजेनाग्निनाक्रोधाल्लोकानुद्वर्त्तय-
न्निव वारिस्रुस्रावयेगेनमहोदधिरिवोदये ५० सोमस्यभरतश्रेष्ठधारोर्मिकलिलंमहत् तस्यपुत्रशतंदग्धंत्रिभिरूनंतुरक्षसा ५१ त
तः सराजाकौरव्यराक्षसंतमहाबलम् आससादमहातेजाधुंधुंधुंधुनिबर्हणः ५२ तस्यवारिमयंवेगमपिबत्सनराधिपः योगीयो-
गेनवन्हिंचशमयामासवारिणा ५३ निहत्यतंमहाकायंबलेनोदकराक्षसम् उत्तंकंदर्शयामासकृतकर्मानराधिपः ५४ उत्तंकस्तुव
रंप्रादात्तस्मैराज्ञेमहात्मने ददौतस्याक्षयंवित्तंशत्रुभिश्चापराजयम् ५५ धर्मेरतिंचसततंस्वर्गेवासंतथाक्षयम् पुत्राणांचाक्षया
न्लोकान्स्वर्गेयेरक्षसाहताः ५६ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिएकादशोऽध्यायः ११ वैशंपायनउवाच
तस्यपुत्रास्त्रयः शिष्टादृढाश्वोज्येष्ठउच्यते चंद्राश्वकपिलाश्वौतुकुमारौद्वौकनीयसौ १ धौंधुमारिर्दृढाश्वस्तुहर्यश्वस्तस्यचात्मजः ह
र्यश्वस्यनिकुंभोभूत्क्षत्रधर्मरतः सदा २ संहताश्वोनिकुंभस्यपुत्रोरणविशारदः अकृशाश्वः कृशाश्वश्चसंहताश्वसुतौनृप ३ तस्यहै
मवतीकन्यासतांमातादृषद्वती विख्यातात्रिषुलोकेषुपुत्रश्चास्याः प्रसेनजित् ४ लेभेप्रसेनजिद्भार्यांगौरींनामपतिव्रताम् अभिश-
प्तातुसाभर्त्रानदीवैबाहुदाभवत् ५ तस्याः पुत्रोमहानासीद्युवनाश्वोमहीपतिः मांधातायुवनाश्वस्यत्रिलोकविजयीसुतः ६ तस्य
चैत्ररथीभार्याशशबिंदोः सुताऽभवत् साध्वीबिंदुमतीनामरूपेणासदृशीभुवि ७ पतिव्रताचज्येष्ठाचभ्रातृणामयुतस्यसा तस्यामु
त्पादयामासमांधाताद्वौसुतौनृप ८ पुरुकुत्संचधर्मज्ञंमुचुकुंदंचधार्मिकम् पुरुकुत्ससुतस्त्वासीत्त्रसदस्युर्महीपतिः ९ नर्मदायामस-
थोत्पन्नः संभूतस्तस्यचात्मजः संभूतस्यतुदायादः सुधन्वानामपार्थिवः १० सुधन्वनः सुतश्चासीत्त्रिधन्वारिपुमर्दनः राज्ञस्त्रिधन्व
नस्त्वासीद्विद्वांस्त्रय्यारुणः सुतः ११ तस्यसत्यव्रतोनामकुमारोभून्महाबलः पाणिग्रहणमंत्राणांविघ्नंचक्रेसुदुर्मतिः १२ येनभार्याहृ
तापूर्वंकृतोद्वाहापरस्यवै बाल्यात्कामाच्चमोहाच्चसंहर्षाच्चापलेनच १३ जहारकन्यांकामात्सकस्यचित्पुरवासिनः अधर्मशंकुनातेन
राजात्रय्यारुणोत्यजत् १४
४ ५ ६ ७ ८ ९ १० ११ पाणीति मंत्राणांनावेहिसंभवावहैसहरेतोदधावहैपुंसेपुत्रायवेत्तवैइत्याद्यर्थानांविघ्नंप्रतिबंधंचक्रे १२ परस्परेणपूर्वंकृतोद्वाहाऊढाक
न्यास्वभार्याकृतेत्यन्वयः सखासप्तपदीभवेत्संतिमंत्रांतेभार्यात्वमुत्पद्यते नततः प्राक्अतस्तांप्रागेवजहारसंहर्षादभिनिवेशात् १३ शंकुनापापरूपेणाकालेनकिद्
ध्वांतंअत्यजत् १४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९ १० वसिष्ठाशयंविवृणोति ११ इतिनन्यवारयदितिपूर्वेणसंबंधः १२ १३ १४ दशेति अनुपदोक्ताः क्रोधादयश्चत्वारः अध्यायादौचोक्ताः सत्यव्रत-
त्वादयश्चत्वारः पूर्वाध्यायांतेविश्वामित्रस्यतुष्ट्यर्थमनुकंपार्थमेवचेतिद्वौइत्येवंदशधर्मास्तद्गतः ननुक्षुधेति अन्यालाभोदर्शितः क्षमादित्यन्यान्वेषणाश
क्तिरुक्ता अनुकंपापरदुःखेनदुःखित्वंकृपापरदुःखपरिहारार्थोयत्नइतिविशेषः एतान्दशधर्माननुगतः सन्नृपानेति भावि संज्ञांगृहीत्वा १५ १६ १७ शंकुपू

गुणबुध्यातुभगवान्वसिष्ठः कृतवांस्तथा नचसत्यव्रतस्तस्यतमुपांशुमबुध्यत ९ तस्मिन्नपरितोषोयः पितुरासीन्महात्मनः तेनद्वाद
शवर्षाणिनावर्षत्पाकशासनः १० तेनत्विदानींवहतादीक्षांतांदुर्वहांभुवि कुलस्यनिष्कृतिस्तातकृतासावैभवेदिति ११ नतंवसिष्ठोभ
गवान्पित्रात्यक्तंन्यवारयत् अभिषेक्ष्याम्यहंपुत्रमस्येत्येवंमतिर्मुनेः १२ सतुद्वादशवर्षाणिदीक्षांतामुद्वहन्बली उपांशुव्रतमास्थायमह
त्सत्यव्रतोनृप १३ अविद्यमानेमांसेतुवसिष्ठस्यमहात्मनः सर्वकामदुघांदोग्ध्रीं ददर्शसनृपात्मजः १४ तांवैक्रोधाच्चमोहाच्चश्रमाच्चैवक्षु
धार्दितः दशधर्मानुगतोराजाजघानजनमेजय १५ मत्तःप्रमत्तउन्मत्तः श्रांतः क्रुद्धोबुभुक्षितः त्वरमाणश्चभीरुश्चलुब्धः कामीचतेदश
१६ तंचमांसंस्वयंचैवविश्वामित्रस्यचात्मजान् भोजयामासतच्छ्रुत्वावसिष्ठोप्यस्यचुक्रुधे क्रुद्धस्तुभगवान्वाक्यमिदमाहनृपात्मज
म् १७ वसिष्ठउवाच पातयेयमहंक्रूरतवशंकुमसंशयम् यदितेद्वाविमौशंकूनस्यातांवैकृतौपुनः १८ पितुश्चापरितोषेणगुरो
र्दोग्ध्रीवधेनच अप्रोक्षितोपयोगाच्चत्रिविधस्तेव्यतिक्रमः १९ एवंत्रीण्यस्यशंकूनितानिदृष्ट्वामहातपाः त्रिशंकुरितिहोवाचत्रिशं
कुरितिसःस्मृतः २० विश्वामित्रस्तुदाराणामागताभरणेकृते सतुतस्मैवरंप्रादान्मुनिः प्रीतस्त्रिशंकवे २१ छंद्यमानोवरेणाथवरंवव्रेनृ
पात्मजः सशरीरोव्रजेस्वर्गमित्येवंयाचितोमुनिः २२ अनावृष्टिभयेतस्मिन्गतेद्वादशवार्षिके अभिषिच्यचराज्येपित्र्येतुयाजयामासतं
मुनिः २३ मिषतांदेवतानांचवसिष्ठस्यचकौशिकः सशरीरंतदातंतुदिवमारोपयत्प्रभुः २४ तस्यसत्यरथानामभार्याकैकयवंशजा कुमा
रंजनयामासहरिश्चंद्रमकल्मषम् २५ सवैराजाहरिश्चंद्रस्त्रैशंकवइतिस्मृतः आहर्ताराजसूयस्यसम्राडितिविश्रुतः २६ हरिश्चंद्र
स्यपुत्रोभूद्रोहितोनामवीर्यवान् येनेदंरोहितपुरंकारितंराज्यसिद्धये २७ कृत्वाराज्यंसराजर्षिः पालयित्वातथाप्रजाः संसारासारतांज्ञा
त्वाद्विजेभ्यस्तत्पुरंददौ २८ हरितोरोहितस्याथचंचुर्हारीतउच्यते विजयश्चसुदेवश्चचंचुपुत्रौबभूवतुः २९

वैतंदोषम् इमौवक्ष्यमाणौ
१८ शंकुत्रयमेवविवृणोति पितुरिति अप्रोक्षितोपयोगात् असंस्कृतमांसभक्षणात् १९ २० २१ २२ भयेगतेविश्वामित्रप्रसादसामर्थ्यादितिशेषः २३
मिषतामित्यनादरेषष्ठी पश्यतोदेवादीननादृत्येत्यर्थः २४ तस्यत्रिशंकोः २५ २६ २७ २८ २९ छ. छ. छ. छ.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३० शकादयोम्लेंछभेदाः ३१ निरसंतिस्मराज्यात्दूरीकुर्वंतिस्मतत्रहेतुर्नास्त्यर्थमिति ३२ गरेणविषेणसहजातइतिसगरस्तंमातुर्गरसंयोगेप्यमरणेहेतुमा
ह और्वस्येतिभार्गवेणऔर्वेण ३३ ३४ निरसन्निरस्तवान् ३५ इतिहरिवंशेटीकायांत्रयोदशोऽध्यायः १३ कथंगरेणसहसन् कथंअच्युतोनमृतइत्यर्थः
१ २ व्यसनिनः मृगयापरस्त्रीद्यूतपरस्य ३ पंचशकादयः हैहयाइतितालजंघाइतिचैकोराशिः हैहयार्थेहैहयार्थम् ४ राजासगरपिता ५ ६ ७ ८

जेता क्षत्रस्यसर्वस्यविजयस्तेनसंस्मृतः रुरुकस्तनयस्तस्यराजाधर्मार्थकोविदः ३० रुरुकस्यवृकःपुत्रोवृकाद्बाहुस्तुजज्ञिवान् शकैर्यव
नकांबोजैःपारदैःपल्हवैःसह ३१ हैहयास्तालजंघाश्चनिरस्यंतिस्मतंनृपम् नात्यर्थंधार्मिकस्तातसहिधर्मयुगेभवत् ३२ सगरस्तुसुतो
बाहोर्जज्ञेसहगरेणवै और्वस्याश्रममागम्यभार्गवेणाभिरक्षितः ३३ आग्नेयमस्त्रंलब्ध्वाच भार्गवात्सगरोनृपः जिगायपृथिवींहत्वातालं
जंघान्सहैहयान् ३४ शकानांपल्हवानांचधर्मंनिरसदच्युतः क्षत्रियाणांकुरुश्रेष्ठपारदानांसधर्मवित् ३५ इतिश्रीमहाभारतेखि
लेषुहरिवंशेहरिवंशपर्वणित्रिशंकुचरितकथनंनामत्रयोदशोऽध्यायः १३ जनमेजयउवाच कथंससगरोजातोगरेणैवसहाच्यु
तः किमर्थंचशकानांसक्षत्रियाणांमहौजसाम् १ धर्मंकुलोचितंक्रुद्धोराजानिरसदच्युतः एतन्मेसर्वमाचक्ष्वविस्तरेणतपोधन २ वैशं
पायनउवाच बाहोर्व्यसनिनस्तातहृतंराज्यमभूत्किल हैहयैस्तालजंघैश्चशकैःसार्द्धंविशांपते ३ यवनाःपारदाश्चैवकांबोजाःपल्ह
वाःखसाः एतेह्यपिगणाःपंचहैहयार्थेपराक्रमन् ४ हृतराज्यस्तदाराजासवैबाहुर्वनंययौ पत्न्याचानुगतोदुःखीसवैप्राणानवासृ
जत् ५ पत्नीतुयादवीतस्यसगर्भापृष्ठतोऽन्वगात् सपत्न्याचगरस्तस्यैदत्तःपूर्वमभूत्किल ६ सातुभर्त्तुश्चितांकृत्वावनेतामभ्यरोह
त् और्वस्तांभार्गवस्तातकारुण्यात्समवारयत् ७ तस्याश्रमेचतगर्भंगरेणैवसहाच्युत व्यजायतमहाबाहुंसगरंनामपार्थिवम् ८
और्वस्तुजातकर्मादितस्यकृत्वामहात्मनः अध्याप्यवेदशास्त्राणिततोऽस्त्रमभ्यपादयत् ९ आग्नेयंतमहाभागइअमरैरपिदुःसहम् स
तेनास्त्रबलेनाजौबलेनचसमन्वितः १० हैहयान्निजघानाशुक्रुद्धोरुद्रःपशूनिव आजहारचलोकेषुकीर्तिंकीर्तिमतांवरः ११ ततःश
कान्सयवनान्कांबोजान्पारदांस्तथा पल्हवांश्चैवनिःशेषान्कर्तुंव्यवसितस्तदा १२ तेवध्यमानावीरेणसगरेणमहात्मना वसिष्ठंश
रणंगत्वाप्रणिपेतुर्मनीषिणम् १३ वसिष्ठस्त्वथतान्दृष्ट्वासमयेनमहाद्युतिः सगरंवारयामासतेषांदत्वाभयंतदा १४ सगरःस्वांप्रतिज्ञां
चगुरोर्वाक्यंनिशम्यच धर्मंजघानतेषांवैवेषान्यत्वंचकारह १५

अस्त्रंअस्त्रग्राममभ्यपादयत्ददौ ९ १० ११ १२ १३ समयेनशर-
णागतोरक्षणीयइतिशिष्टमर्यादया १४ धर्मंजघानक्षत्रधर्मात्च्यावितवान् यतोवेषान्यत्वंतेषांचकार १५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 १६ १७ १८ १९ खसादीन्विजित्य इमांवसुधरां अस्यां भुवि अश्वंचप्रेरयामासेति द्वयोः संबंधः २० २१ पूर्वदक्षिणे अग्निकोणेऽपहृतं इंद्रेणेतिशे
षः २२ तेखनंतः पुत्राः हरिं आसेदुरिति द्वयोः संबंधः आसेदुरित्यभिसुखमाप्य विषादमाप्ताइत्यर्थः २३ २४ तस्यप्रतिबुध्यतः योगनिद्रांत्यजतः २५ २६

अर्द्धंशकानांशिरसोमुंडं कृत्वाव्यसर्जयत् यवनानांशिरः सर्वंकांबोजानांतथैवच १६ पारदामुक्तकेशाश्चपल्हवाःश्मश्रुधारिणः निः
स्वाध्यायवषट्काराः कृतास्तेनमहात्मना १७ शकायवनकांबोजाः पारदाश्चविशांपते कोलिसर्पाः समहिषा दार्वाश्चोलाः सकेरलाः १८
सर्वेते क्षत्रियास्तात धर्मस्तेषांनिराकृतः वसिष्ठवचनाद्राजन् सगरेणमहात्मना १९ खसास्तुषाराश्चोलाश्चमद्रान्किष्किंधकास्तथा कौं
तलाश्चतथावंगान्साल्वान्कोंकणकास्तथा २० सधर्मविजयीराजाविजित्येमांवसुंधराम् अश्वंवैप्रेरयामासवाजिमेधायदीक्षितः २१
तस्यचारयतः सोश्वः समुद्रेपूर्वदक्षिणे वेलासमीपेऽपहृतो भूमिंचैवप्रवेशितः २२ सतंदेशंतदापुत्रैःखानयामासपार्थिवः आसेदुस्ते
ततस्तत्रखन्यमानेमहार्णवे २३ तमादिपुरुषंदेवंहरिंकृष्णंप्रजापतिम् विष्णुंकपिलरूपेणस्वपंतंपुरुषोत्तमम् २४ तस्यचक्षुःसमुत्थेन
तेजसाप्रतिबुध्यतः दग्धास्तेवैमहाराजचत्वारस्त्ववशेषिताः २५ बर्हकेतुःसुकेतुश्चतथाधर्मरथोनृपः शूरःपंचजनाश्चैवतस्यवंशकरानृ
पः २६ प्रादाच्चतस्मैभगवान्हरिर्नारायणोवरान् अक्षयंवंशमिक्ष्वाकोः कीर्तिंचाप्यनिवर्तिनीम् २७ पुत्रंसमुद्रंचविभुःस्वर्गवा
संतथाऽक्षयम् पुत्राणांचाक्षयाँल्लोकान्तस्ययेचक्षुषाहताः २८ समुद्रश्चार्घमादायववंदेतंमहीपतिम् सागरत्वंचलेभेसकर्म
णातेनतस्यवै २९ तंचाश्वमेधिकंसोश्वंसमुद्रादुपलब्धवान् आजहाराश्वमेधानांशतंसुमहायशाः पुत्राणांचसहस्राणिषष्टिस्त
स्येतिनःश्रुतं ३० इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिसगरोत्पत्तिर्नामचतुर्दशोऽध्यायः १४ जनमेजयउवाच
सगरस्यात्मजावीराः कथंजातामहात्मनः विक्रांताःषष्टिसाहस्राविधिनाकेनवाद्विज १ वैशंपायनउवाच द्वेभार्येसगरस्या
स्तांतपसादग्धकिल्बिषे ज्येष्ठाविदर्भदुहिताकेशिनीनामविश्रुता २ कनीयसीतुयातस्यपत्नीपरमधर्मिणी अरिष्टनेमिदुहितारूपे
णाप्रतिमाभुवि ३ और्वस्ताभ्यांवरंप्रादात्तन्निबोधजनाधिप षष्टिंपुत्रसहस्राणिगृह्णात्वेकातपस्विनी ४ एकंवंशधरंत्वेकायथेष्टंवृ
णोत्विति तत्रैकाजगृहेपुत्रान्लुब्धाञ्छूरान्बहूंस्तथा ५ एकंवंशधरंत्वेकातथेत्याहचतांमुनिः केशिन्यसूतसगरादसमंजसमात्मजम्
६ राजापंचजनोनामबभूवसुमहाबलः इतरासुषुवेतुंबींबीजपूर्णामितिश्रुतिः ७

कायांचतुर्दशोऽध्यायः १४ सगरेति १ २ ३ ४ ५ ६ तुंबीं अलाबुम् ७ ७ ७ ७ ७ ७ २७ २८ २९ ३० इतिश्रीमहाभारतेहरिवंशेटी

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८ ९ १० ११ नारायणंनारायणीयंतेजः कपिलक्रोधाग्निं असमंजसएवपंचजनः १२ दिलीपएवखट्वांगः १३ अनुसंधिताः ध्यानबलेनतत्त्वतोज्ञाताः बुध्यासूक्ष्मयासत्येनब्रह्मभावेन मुहूर्त्तमात्रेणचित्तैकाग्र्यंसंपाद्यसर्वंब्रह्मेतिज्ञातवानित्यर्थः १४ १५ भागीरथीभगीरथस्यापत्यमिति १६ १७ १८

तत्रषष्टिसहस्राणिगर्भास्तेतिलसंमिताः संबभूवुर्यथाकालंववृधुश्चयथाक्रमम् ८ घृतपूर्णेषुकुंभेषुतान्गर्भान्निदधेपिता धात्रीश्चैकैकशः प्रादात्तावतीरेवपोषणे ९ ततोदशसुमासेषुसमुत्तस्थुर्यथासुखम् कुमारास्तेयथाकालंसगरप्रीतिवर्धनाः १० षष्टिः पुत्रसहस्राणितस्यैवमभवन्नृप गर्भादलाबुमध्याद्वैजातानिपृथिवीपते ११ तेषांनारायणंतेजः प्रविष्टानांमहात्मनाम् एकः पंचजनोनामपुत्रोराजाबभूवह १२ सुतः पंचजनस्यासीदंशुमान्नामवीर्यवान् दिलीपस्तनयस्तस्यखट्वांगइतिविश्रुतः १३ येनस्वर्गादिहागत्यमुहूर्त्तंप्राप्यजीवितम् त्रयोऽनुसंधितालोकाबुध्यासत्येनचानघ १४ दिलीपस्यतुदायादोमहाराजोभगीरथः यःसगंगांसरिच्छ्रेष्ठामवातारयतप्रभुः १५ कीर्तिमान्समहाभागःशक्रतुल्यपराक्रमः समुद्रमानयच्चैनांदुहितृत्वेनकल्पयन् तस्माद्भागीरथीगंगाकथ्यतेवंशचिंतकैः १६ भगीरथसुतोराजाश्रुतइत्यभिविश्रुतः नाभागस्तुश्रुतस्यासीत्पुत्रःपरमधार्मिकः १७ अंबरीषस्तुनाभागिःसिंधुद्वीपपिताऽभवत् अयुताजित्तुदायादःसिंधुद्वीपस्यवीर्यवान् १८ अयुताजित्सुतस्त्वासीदृतुपर्णोमहायशाः दिव्याक्षहृदयज्ञोवैराजानलसखोबली १९ ऋतुपर्णसुतस्त्वासीदार्तुपर्णिर्महीपतिः सुदासस्तस्यतनयोराजाविंद्रसखोऽभवत् २० सुदासस्यसुतस्त्वासीत्सौदासोनामपार्थिवः ख्यातःकल्माषपादोवैनाम्नामित्रसहस्तथा २१ कल्माषपादस्यसुतःसर्वकर्मेतिविश्रुतः अनरण्यस्तुपुत्रोऽभूद्विश्रुतःसर्वकर्मणः २२ अनरण्यसुतोनिघ्नोनिघ्नपुत्रौबभूवतुः अनमित्रोरघुश्चैवपार्थिवर्षभसत्तमौ २३ अनमित्रस्यधर्मात्माविद्वान्दुलिदुहोऽभवत् दिलीपस्तनयस्तस्यरामस्यप्रपितामहः २४ दीर्घबाहुर्दिलीपस्यरघुर्नाम्नाभवत्सुतः अयोध्यायांमहाराजोरघुश्चासीन्महाबलः २५ अजस्तुरघुतोजज्ञेअजाद्दशरथोऽभवत् रामोदशरथाज्जज्ञेधर्मात्मासुमहायशाः २६ रामस्यतनयोजज्ञेकुशइत्यभिविश्रुतः अतिथिस्तुकुशाज्जज्ञेनिषधस्तस्यचात्मजः २७ निषधस्यनलःपुत्रोनभःपुत्रोनलस्यतु नभस्यपुंडरीकस्तुक्षेमधन्वाततःस्मृतः २८ क्षेमधन्वसुतस्त्वासीद्देवानीकःप्रतापवान् आसीदहीनगुर्नामदेवानीकसुतःप्रभुः २९ अहीनगोस्तुदायादःसुधन्वानामपार्थिवः सुधन्वनःसुतश्चैवततोजज्ञेनलोनृपः ३०

१९ २० २१ २२ हेपार्थिवर्षभ २३ रामस्यप्रपितामहोदिलीपःखट्वांगाख्यादिलीपादन्यः २४ २५ २६ २७ निषधात्मजोनलोवीरसेनसुतान्नलादन्यः नलौद्वावितिवक्ष्यमाणत्वात् २८ २९ अतएवसुधन्वनःसुतइत्यत्रानलइतिच्छेदः तृतीयस्यनलस्याभावात् ३०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ इतिहरिवंशेटीकायांपंचदशोऽध्यायः १५ एवंवंशानुकीर्त्तनंश्रुत्वा तत्रप्रागुक्तंयमस्य मनुर्वैवस्वतः
पूर्वंश्राद्धदेवः प्रजापतिर्यमश्चेतिश्राद्धदेवत्वम् वैवस्वतपितॄणांचयमराज्येऽभ्यषेचयदितिपितृराज्यत्वंचोक्तम् तत्रकिंतत्श्राद्धंकेचतेपितरइतिपृच्छति कथ
मित्यादिना विवस्वतःसुतस्येतिशेषः यमस्यकथंश्राद्धदेवत्वमित्यर्थः १ २ ३ ४ ५ पितृविद्यावंशमाहहंतेत्यादिना ६ सनत्कुमारान्मार्कंडेयोमार्कंडेयात् भी

उक्थोनामसधर्मात्मानलपुत्रोबभूवह वज्रनाभःसुतस्तस्यउक्थस्यचमहात्मनः ३१ शंखस्तस्यसुतोविद्वान्ध्युषिताश्वइतिश्रुतः पु
ष्यस्तस्यसुतोविद्वान् अर्थसिद्धिस्तुतत्सुतः ३२ सुदर्शनःसुतस्तस्य अग्निवर्णःसुदर्शनात् अग्निवर्णस्यशीघ्रस्तुशीघ्रस्यतुमरुःसुतः
३३ मरुस्तुयोगमास्थायकलापद्वीपमास्थितः तस्यासीद्धि श्रुतवतःपुत्रोराजाबृहद्बलः ३४ नलौद्वावेवविख्यातौपुराणेभरतर्षभ वीर
सेनात्मजश्चैवयश्चेक्ष्वाकुकुलोद्वहः ३५ इक्ष्वाकुवंशप्रभवाःप्राधान्येनेहकीर्तिताः एतेविवस्वतोवंशेराजानोभूरितेजसः ३६ पठन्सम्य
गिमांसृष्टिमादित्यस्यविवस्वतः श्राद्धदेवस्यदेवस्यप्रजानांपुष्टिदस्यच ३७ प्रजावानेतिसायुज्यमादित्यस्यविवस्वतः विपाप्माविरजाश्चै
व आयुष्मांश्चभवत्युत ३८ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिआदित्यवंशानुकीर्त्तनंनामपंचदशोऽध्यायः १५ ज
नमेजयउवाच कथंवैश्राद्धदेवत्वंआदित्यस्यविवस्वतः श्रोतुमिच्छामिविप्राग्र्यश्राद्धस्यचपरंविधिम् १ पितॄणामादिसर्गंचकएतेपि
तरःस्मृताः एवंचश्रुतमस्माभिःकथ्यमानंद्विजातिभिः २ स्वर्गस्थाःपितरोयेचदेवानामपिदेवताः इतिवेदविदःप्राहुरेतदिच्छामिवेदितुम् ३
येचतेषांगणाःप्रोक्तायच्चतेषांबलंपरम् यथाचश्रुतमस्माभिःश्राद्धप्रीणातिवैपितॄन् ४ प्रीताश्चपितरोयेनश्रेयसायोजयंतिहि एववेदि
तुमिच्छामिपितॄणांसर्गमुत्तमम् ५ वैशंपायनउवाच हंततेकथयिष्यामिपितॄणांसर्गमुत्तमम् यथाचश्रुतमस्माभिःश्राद्धः
प्रीणातिवैपितॄन् प्रीताश्चपितरोयस्मैश्रेयसायोजयंतिहि ६ मार्कंडेयेनकथितंभीष्मायपरिपृच्छते अपृच्छद्धर्मराजोहिशरतल्पगतंपु
रा एवमेवपुराप्रश्नंयन्मात्वपरिपृच्छसि ७ तत्तेनुपूर्व्याविक्ष्यामिभीष्मेणोदाहृतंयथा गीतंसनत्कुमारेणमार्कंडेयायपृच्छते ८ यु
धिष्ठिरउवाच पुष्टिकामेनधर्मज्ञकथंपुष्टिरवाप्यते एतदेवश्रोतुमिच्छामिकिंकुर्वाणोनशोचति ९ भीष्मउवाच श्राद्धैःप्रीणा
तिहिपितॄन्सर्वकामफलैस्तुयः तत्परःप्रयतःश्राद्धीप्रेत्यचेहचमोदते १० पितरोधर्मकामस्यप्रजाकामस्यचप्रजाम् पुष्टिकामस्यपुष्टिंच
प्रयच्छंतियुधिष्ठिर ११

ष्मोभीष्माद्धर्मराजइतिमहद्भिः प्रवर्त्तितत्वात्श्रेष्ठतरेयंविद्येतिभावः ७ ८ ९ तत्परःपितृप्रीतिपरः श्राद्धीश्रा-
द्धकर्त्ता १० धर्मकामस्यधर्ममितिशेषः ११ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्राद्धैः पितॄन्प्रीणातीत्येतदाक्षिपति वर्त्तंत इति त्रिभिः १२ १३ १४ पितरो धर्मादीन् प्रयच्छंतीत्येतदाक्षिपति कथंचेति अन्येन नरकादिस्थेभ्यः कान्
मानुषान् देवताभूतान् वा वयं पितॄन्यजाम इति प्रश्नः १५ १६ १७ प्रत्यक्षमतिक्रम्यापि शास्त्रोक्तमेव श्राद्धकर्म कर्त्तव्यमित्याख्यायिकामुखेन प्रश्नो
त्तरमवतारयति अत्रेति १८ १९ २० कल्पे बौधायनादिसूत्रे २१ २२ २३ व्यवस्थानं तिष्ठाम् २४ चतुर्थं अंशं तथा चतुर्थमेवांशम् २५ प्रमा

युधिष्ठिर उवाच वर्त्तंते पितरः स्वर्गे केषांचिन्नरके पुनः प्राणिनां नियतं ह्युक्तं कर्मजं फलमुच्यते १२ श्राद्धानि चैव कुर्वंति फलका
माः सदा नराः अभिसंधाय पितरं पितुश्च पितरं तथा १३ पितुः पितामहं चैव त्रिषु पिंडेषु नित्यशः तानि श्राद्धानि दत्तानि कथं गच्छंति
वै पितॄन् १४ कथं च शक्तास्ते दातुं नरकस्थाः कथं पुनः के वा ते पितरोन्ये स्म कान्यजामो वयं पुनः १५ देवा अपि पितॄन् स्वर्गे यजंतीति
च नः श्रुतम् एतदिच्छाम्यहं श्रोतुं विस्तरेण महाद्युते १६ स भवान् कथयत्वेतां कथाममितबुद्धिमान् यथा दत्तं पितॄणां वै तारणाय ह क्ल
प्यते १७ भीष्म उवाच अत्र ते कीर्त्तयिष्यामि यथा श्रुतमरिंदम यं च ते पितरोऽन्ये स्म यान्यजामो वयं पुनः पित्रा मम पुरा गीतं
लोकांतरगतेन वै १८ श्राद्धकाले मम पितुर्मया पिंडः समुद्यतः तं पिता मम हस्तेन भित्वा भूमिमयाचत १९ हस्ताभरणपूर्णेन केयूराभरणे
न च रक्तांगुलितलेनाथ यथा दृष्टः पुरा मया २० नैष कल्पे विधिर्दृष्ट इति संचिंत्य चाप्यहम् कुशेष्वेव ततः पिंडं दत्तवानविचारयन् २१ त
तः पिता मे सुप्रीतो वाचा मधुरया तदा उवाच भरतश्रेष्ठ प्रीयमाणो मयानघ २२ त्वया दायादवानस्मि कृतार्थोऽमुत्र चेह च सत्पुत्रेण त्वया
पुत्र धर्मज्ञेन विपश्चिता २३ मया तु तव जिज्ञासा प्रयुक्ता सा दृढव्रत व्यवस्थानं तु धर्मेषु कर्त्तुं लोकस्य चानघ २४ यथा चतुर्थं धर्मस्य रक्षि
ता लभते फलम् पापस्य हि तथा मूढः फलं प्राप्नोत्यरक्षिता २५ प्रमाणं यद्धि कुरुते धर्माचारेषु पार्थिवः प्रजास्तदनुवर्त्तंते प्रमाणाचरितं
सदा २६ त्वया च भरतश्रेष्ठ वेदधर्माश्च शाश्वताः कृताः प्रमाणं प्रीतिश्च मम निर्वर्त्तिता तुला २७ तस्मात्तवाहं सुप्रीतः प्रीत्या वरमनुत्तम
म् ददामि तं प्रतीच्छ त्वं त्रिषु लोकेषु दुर्लभम् २८ न ते प्रभविता मृत्युर्यावज्जीवितुमिच्छसि त्वत्तोऽभ्यनुज्ञां संप्राप्य मृत्युः प्रभविता तव
२९ किं वा ते प्रार्थितं भूयो ददामि वरमुत्तमम् तद्ब्रूहि भरतश्रेष्ठ यत्ते मनसि वर्त्तते ३० इत्युक्तवंतं तमहमभिवाद्य कृतांजलिः अब्रुवं कृ
तकृत्योऽहं प्रसन्ने त्वयि सत्तम ३१ यदि त्वनुग्रहं भूयस्त्वत्तोऽर्हामि महाद्युते प्रश्नमिच्छामि वै किंचिद्व्याहृतं भवता स्वयम् ३२ स मामुवा
च धर्मात्मा ब्रूहि भीष्म यदीच्छसि छेत्तास्मि संशयं तात यन्मां पृच्छसि भारत ३३ अपृच्छं तमहं तात तत्रांतर्हितमेव च गतं सुकृतिनां लोकं
कौतूहलसमन्वितः ३४

याचरितं धर्मे प्रमाणभूतस्य राज्ञ आचरितम् २६ २७ प्रतीच्छ प्रतिगृहाण २८ २९ ३० ३१ व्याहृतं उक्तम् ३२ ३३ ३४ ७ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रूयंतइतिकर्मणापितृलोकोविद्ययादेवलोकइतिश्रुतेः ब्रह्मलोकादर्वाचीनाः लोकाःपितृलोकाइत्युच्यंते देवलोकपदेनब्रह्मलोकः एवंतदुभयप्राप
कौमार्गौच पितृयानदेवयानौ तत्रस्वर्लोकस्थानांदेवानांतदूर्ध्वलोकत्रयगताःपितरोदेवतात्वेनमान्याः इतिगम्यते देवाःपितरःपितरोदेवाइति देवानांपितॄ
णांचाभेदोपिश्रूयते अन्येजनकादयोमृतास्तेभ्योनिकृष्टाः पितरः इत्युच्यंतइतित्रेधासंशयेवयंकान्यजामहइतिप्रश्नः ३५ तत्रपित्रादीनांदेवताभाव
प्राप्यस्वर्गादूर्ध्वस्थानेस्थितानदत्तश्राद्धप्रीणात्तु लोकांतरगतास्तुतान्कथंप्रीणयेदितिपृच्छतिकथमिति ३६ कानितियद्यधःस्थाःपितरः कथंतर्हितैः
नदेवाद्यायजेरन् यद्युपरिस्थास्तर्हिकथमस्मदादयोऽल्पपुण्यास्तत्रगच्छेरन्ततः पक्षद्वयेपिश्राद्धदानंव्यर्थमित्याक्षेपाभिप्रायः ३७ ३८ ३९

भीष्मउवाच श्रूयंतेपितरोदेवादेवानामपिदेवताः देवाश्चपितरोन्येवाकान्यजामोवयंपुनः ३५ कथंचदत्तमस्माभिःश्राद्धंप्रीणा
त्ययोपितॄन् लोकांतरगतास्तातकिन्नुश्राद्धस्यवाफलम् ३६ कान्यजंतिस्मलोकावैसदेवनरदानवाः सयक्षोरगगंधर्वाःसकिन्नरम
होरगाः ३७ अत्रमेसंशयस्तीव्रःकौतूहलमतीवच तद्ब्रूहिममधर्मज्ञसर्वज्ञोह्यसिमेमतः एतच्छ्रुत्वावचस्तस्यभीष्मस्योवाचवैपिता
३८ शंतनुरुवाच संक्षेपेणैवतेवक्ष्येयन्मांपृच्छसिभारत पितरश्चयथोद्भूताःफलंदत्तस्यचानघ ३९ पितॄणांकारणंश्राद्धेशृणु
सर्वंसमाहितः आदिदेवसुतास्तातपितरोदिविदेवताः ४० तान्यजंतिस्मवैलोकाःसदेवासुरमानुषाः सयक्षोरगगंधर्वाःसकिन्नरमहो
रगाः ४१ आप्यायितास्तेश्राद्धैःपुनराप्याययंतिच जगत्सदेवगंधर्वमितिब्रह्मानुशासनम् ४२ तान्यजस्वमहाभागश्राद्धैःपुष्टैरतंद्रि
तः तेतेश्रेयोविधास्यंतिसर्वकामफलप्रदाः ४३ त्वयाचाराध्यमानास्तेनामगोत्रादिकीर्तनैः अस्मानाप्याययिष्यंतिस्वर्गस्थानपि
भारत ४४ मार्कंडेयस्तुतेशेषमेतत्सर्वंप्रवक्ष्यति एषवैपितृभक्तश्चविदितात्माचभारत ४५ उपस्थितश्चश्राद्धेद्यसमेवानुग्रहायवै
एनंपृच्छमहाभागमित्युक्त्वांतरधीयत ४६ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिश्राद्धकल्पप्रसंगोनामषोडशोऽ
ध्यायः १६ भीष्मउवाच ततोहंतस्यवचनात्मार्कंडेयंसमाहितः प्रश्नंतमेवान्वपृच्छंयन्मेपृष्टःपुरापिता १ समामुवाच
धर्मात्मामार्कंडेयोमहातपाः भीष्मवक्ष्यामिकार्त्स्न्येनशृणुष्वप्रयतोनघ २ अहंपितृप्रसादाद्धिदीर्घायुष्ट्वमवाप्तवान् पितृभक्त्यैव-
लब्धंचप्राग्लोकेपरमंयशः ३

आदिदेवसुताः ब्रह्मणःपुत्राः ४० ४१ तेदेवादिभिस्तर्पिताः संतःजगत् भूरादिलोकान्तत्रस्थांश्चदेवगंधर्वमनुष्या
दीनाप्याययंतियोगबलेन तस्माद्यत्रकुत्रस्थितान्पित्रादीन्तएवश्राद्धीयमन्नादिकंप्रापयंति इष्टंचयजमानायप्रयच्छंति मुक्तेषुतुपितृषुस्वयंतृप्ताः सं-
तोयजमानमेवत्रिवर्गेणतर्पयंतीत्यर्थः ४२ अतंद्रितैःसुरत्यकल्पानुष्ठितैः अतंद्रितः अनलसः ४३ अस्मान्पित्रादीन् ४४ ४५ ४६ इतिहरिवंशटी॰ षोडशः १६ २५

ततोहंमेमया १ २ ३ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४ ५ ६ ७ हेनारायण गुणात्मकं मायामयशरीरं तपोवीर्यात् मत्तपःसामर्थ्यात् समुत्पन्नं आविर्भूतमपि त्वां अहं त्वत्तः कथं विद्यां इति अहं तं अपृच्छमि
तियोजना ८ स्वमतमाह देवतं हीति ९ स्मयमानो गर्वितइव तेत्वया तपः सुचरितं नेति मामाहेतिशेषः १० क्षणेनेति पूर्वं अंगुष्ठमात्रोपि क्षणात् महापु
रुषलक्षणो भूदित्यर्थः ११ नारायणस्यगुणः शुद्धसत्वं तदात्मकम् १२ हे भार्गव भृगुवंशज १३ यवीयांसः कनिष्ठाः १४ १५ वयंत्विति बहुवचनं सनकादी-

सोऽहंयुगस्यपर्यंते बहुवर्षसहस्रिके अधिरुह्यगिरिंमेरुंतपोतप्यंसुदुश्चरम् ४ ततःकदाचित्पश्यामि दिव्यंप्रज्वाल्यतेजसा विमानं
महदायान्तमुत्तरेणगिरिस्तदा ५ तस्मिन्विमानेपर्यंके ज्वलितादित्यसन्निभम् अपश्यंतत्रचैवाहं शयानंदीप्ततेजसम् ६ अंगुष्ठमात्रं
पुरुषमग्नावग्निमिवाहितम् सोऽहंतस्मैनमस्कृत्यप्रणम्यशिरसाविभुम् ७ सन्निविष्टंविमानस्थं पाद्यार्घाभ्यामपूजयम् अपृच्छंचैव
दुर्धर्षंविद्यामत्वांकथंविभो ८ तपोवीर्यात्समुत्पन्नं नारायणगुणात्मकम् देवतंह्यसि देवानामितिमेवर्त्ततेमतिः ९ समामुवाचधर्मात्मा
स्मयमानइवानघ नतेतपःसुचरितंयेनमानावबुध्यसे १० क्षणेनैवप्रमाणंसबिभ्रदन्यदनुत्तमम् रूपेणनमयाकश्चित् दृष्टपूर्वःपुमान्
क्वचित् ११ सनत्कुमारउवाच विद्धिमांब्रह्मणःपुत्रंमानसंपूर्वजंविभोः तपोवीर्यसमुत्पन्नं नारायणगुणात्मकम् १२ सनत्कु-
मारइतियःश्रुतोदेवेषुवैपुरा सोऽस्मिभार्गवभद्रंतेकंकामंकरवाणिते १३ येत्वन्येब्रह्मणःपुत्रायवीयांसस्तुतेमम भ्रातरःसप्तदुर्धर्षास्तेषांवं
शाःप्रतिष्ठिताः १४ क्रतुर्वसिष्ठःपुलहःपुलस्त्योत्रिस्तथांगिराः मरीचिस्तुतथाधीमान् देवगंधर्वसेविताः त्रीन्लोकान्धारयंतीमान् देवगं
धर्वपूजिताः १५ वयंतुयतिधर्माणःसंयोज्यात्मानमात्मनि प्रजाधर्मंचकामंचव्यपहायमहामुने १६ यथोत्पन्नस्तथैवाहं कुमारइतिविद्धि
माम् तस्मात्सनत्कुमारेतिनामैतन्मेप्रतिष्ठितम् १७ मद्भक्त्यातेतपश्चीर्णंममदर्शनकांक्षया एषदृष्टोस्मिभवताकंकामंकरवाणिते १८
इत्युक्तवंतंतमहंप्रत्यवोचंसनातनम् अनुज्ञातोभगवताप्रीयमाणेनभारत १९ ततोहमेनंमर्थवैतमपृच्छंसनातनम् पृष्टःपितॄणांसर्गंच
फलंप्राहुस्यचानघ २० चिच्छेदसंशयंभीष्मसतुदेवेश्वरोमम समामुवाचधर्मात्माकथांतेबहुवार्षिके रमेत्वयाहंविप्रर्षेशृणुसर्वंयथात
थम् २१ देवानसृजतब्रह्मामांयक्षंतीतिभार्गव तमुत्सृज्यतथात्मानं अयजंस्तेफलार्थिनः २२ तेशप्ताब्रह्मणामूढानष्टसंज्ञादिवौकसः
नस्मकिंचिद्विजानंतिततोलोकोप्यमुह्यत २३

नंतर्भाव्य १६ सनत् निरंतरं कुमारइव रागद्वेषादिशून्य इति सनत्कुमारपदस्यनिर्वचनमाह यथेति
१७ १८ १९ २० बहुवार्षिकेकथांते चिरारब्धायाःकथायाअंतेमामुवाच रमेअहंत्वयातुष्यामि मय्येनसंतुष्टोस्मि २१ देवानिति तंस्वपितरंउत्सृज्य फ
लार्थिनइंद्रियप्रीणनारव्यदृष्टफलार्थिनः २२ ततोलोकोपितदनुसारीअमुह्यत २३ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२४ व्यभिचारः पूज्यपूजातिक्रमः आत्मपूजाच वःयुष्माभिः यथैतैरहमवज्ञातएवं एतत्पुत्रा अप्येतान् शिष्यत्वेनावजानंत्वित्याशयेनाहपुत्रानिति २५ आ
र्त्तवत् नीचत्वापादनात् पीडिताइवभयतात्मनः निगृहीतचित्ताः ध्यानेनालोच्यप्रायश्चित्तानिशशंसुरित्यर्थः २६ तानिचवाङ्मनःकर्मजानिस्तोत्रेणभक्ति
श्रद्धापुरस्कृतेनध्यानेननमस्कारादिक्रिययाचजातानीत्यर्थः २७ प्रायइति भोपुत्रकाः यूयंलब्धसंज्ञाः प्राप्तज्ञानाः भवतइतिशेषः कुतः लब्धसंज्ञाः यतःप्राय
श्चित्तस्य अर्थतत्त्वंप्रयोजनयाथात्म्यंतदभिज्ञाः तच्चयेप्स्योजन्मविद्याचलभ्यतेतेवाङ्मनःकर्मभिर्यष्टव्याइति २८ गम्यतामित्युक्तास्तेपितामहमुपागच्छ
न्निति संबंधः अभिशप्ताःपुत्रकाइतिवदद्भिःपुत्रैःपराभूताः संशयस्तुकथमस्मत्पुत्राः संतोऽस्मान्पुत्राइतिसंबोधयंतीतिएतद्युक्तमयुक्तंवेत्येवंरूपस्तस्यछेद

तेभूयःप्रणताःशप्ताःप्रायाचंतपितामहम् अनुग्रहायलोकानांततस्तानब्रवीदिदम् २४ प्रायश्चित्तंचरध्वंवैव्यभिचारोहिवःकृतः पुत्रां
श्चपरिपृच्छध्वंततोज्ञानमवाप्स्यथ २५ प्रायश्चित्तार्थिनःपुत्रानपृच्छन्नार्त्तवत् तेभ्यस्तेप्रयतात्मानःशशंसुस्तनयास्तदा २६ प्रायश्चि
त्तानिधर्मज्ञावाङ्मनःकर्मजानिवै शंसंतिकुशलानित्यंचक्षुष्मंतोमपिनित्यशः २७ प्रायश्चित्तार्थतत्त्वज्ञालब्धसंज्ञादिवौकसः गम्यतांपुत्र
काश्चेतिपुत्रैरुक्ताश्चतेतदा २८ अभिशप्तास्ततेदेवाःपुत्रवाक्येननिंदिताः पितामहमुपागच्छन्संशयच्छेदनायवै २९ ततस्तानब्रवीद्दे
वोयूयंवैब्रह्मवादिनः तस्माद्यदुक्तंयुष्माकंतत्तथाननतदन्यथा ३० यूयंशरीरकर्त्तारस्तेषांदेवाभविष्यथ तेतुज्ञानप्रदातारःपितरोवोनसंश
यः ३१ अन्योन्यपितरोयूयंतेचैवेतिनसंशयः देवाश्चपितरश्चैवतद्बुध्यध्वंदिवौकसः ३२ ततस्तेपुनरागम्यपुत्रानूचुर्दिवौकसः ब्रह्मणाच्छि
न्नसंदेहाःप्रीतिमंतःपरस्परम् ३३ यूयंवैपितरोस्माकंयैर्वयंप्रतिबोधिताः धर्मज्ञाःकश्चवःकामःकोवरोवःप्रदीयताम् ३४ यदुक्तंचैव
युष्माभिस्तत्तथाननतदन्यथा उक्ताश्चयस्माद्युष्माभिःपुत्रकाइतिवैवयम् तस्माद्भवंतःपितरोभविष्यंतिनसंशयः ३५ योऽनिष्ट्वातुपि
तॄन्श्राद्धैःक्रियाःकाश्चित्करिष्यति राक्षसादानवानागाःफलंप्राप्स्यंतितस्यतत् ३६ श्राद्धैराप्यायिताश्चैवपितरःसोममव्ययम् आ
प्याय्यमानायुष्माभिर्वर्द्धयिष्यंतिनित्यदा ३७ श्राद्धैराप्यायितःसोमोलोकानाप्याययिष्यति ससमुद्रपर्वतवनंजंगमाजंगमैर्वृतम् ३८
श्राद्धानिपुष्टिकामाश्चयेकरिष्यंतिमानवाः तेभ्यःपुष्टिंप्रजाश्चैवदास्यंतिपितरःसदा ३९

नाय २९ ब्रह्मवादिनःयस्तानिविजानात्सपितुःपितासदिति
मंत्रार्थज्ञाः भवंतः अतोयत्तैरुक्तंतत्तथैवनतत्रसंशयःकार्यः पुमान्तानिस्तुतिगुह्यानिविजानात् विजानीयात् सपितुः पितासन् दीप्यतेइतिमंत्रपदानामर्थः
३० यूयमितिश्लोकत्रयेणदेवाःपितरःपितरोदेवाःइतिमंत्रपादार्थमुपबृंहयति ३१ ३२ ३३ ३४ ३५ ३६ श्राद्धैरिति पितरोलौकिकाःयुष्माभिर्द्रव्यैःपितृभिराप्याय्य
मानाःस्वयंच आप्यायिताःसंतःस्वाधिदेवताःसोमंवर्द्धयंति तर्पयंति छांदोग्येनह्युक्तंप्रथममागच्छेत्तद्धोमीयमिति प्राणाग्निहोत्रे आध्यात्मिकदेवतातृप्त्याआ
धिदैविकदेवतातृप्तेर्दर्शनात् ३७ ३८ ३९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भावयिष्यंतिवर्द्धयिष्यंति ४० ४१ ४२ इतिहरिवंशटीकायां सप्तदशोऽध्यायः १७ एवंपितॄणामुत्पत्तिमुक्त्वातेषांगणभेदानाह इत्युक्त इत्यध्यायेन देवंतमेवसनत्कुमारम् १ २ सोमवर्द्धनाः श्राद्धद्वारा ३ चत्वारोगणाः स्वकालाः आंगिरसः सुस्वधाः सोमपाश्चेत्येतेमूर्त्तिमंतः कर्मजदिव्यविग्रहवंतः त्रयः वैराजाः अग्निष्वात्ताः बर्हिषदश्चेति एतेअमूर्त्ताः कामरूपाः आकाशादपिमहांतः परमाणूदरेपिप्रविशंतीतितादृशसामर्थ्यवंतः ४ ५ अभ्यर्हितत्वात्प्रथमंत्रीन्गणानाहधर्मेति ६ यत्रयेषुलोकेषुलोकाः विषयाः सनातनाः नित्याविर्भूताः यत्रातीतमनागतंव्यवहितंविप्रकृष्टंचसर्ववर्त्तमानंसन्निहितमेवेत्यर्थः भास्वराश्चिन्मात्रशरीराअभौतिकाः विराजस्यप्रजापतेर्मानसाः पुत्राः मनोमात्रशरीराः ७ ८ एतइति येयोगभ्रष्टाः निर्गुणंब्रह्मअप्राप्यसगुणमात्रशरणाअपि-

श्राद्धेयेचप्रदास्यंतित्रीन्पिंडान्नामगोत्रतः सर्वत्रवर्त्तमानांस्तान्पितरःसपितामहान् भावयिष्यंतिसततंश्राद्धदानेनतर्पिताः एवमाज्ञापितपूर्वंब्रह्मणापरमेष्ठिना इतितद्वचनंसत्यंभवत्वद्यदिवौकसः पुत्राश्चपितरश्चैववयंसर्वेपरस्परम् सनत्कुमारउवाच त एतेपितरोदेवादेवाश्चपितरस्तथा अन्योन्यपितरोह्येतेदेवाश्चपितरश्चह इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणि सप्तदशोऽध्यायः मार्कंडेयउवाच इत्युक्तोहंभगवतादेवदेवेनभास्वता सनत्कुमारेणपुनः पृष्टवान्देवमव्ययम् १ संदेहमसरश्रेष्ठंभगवंतमरिंदमम् निबोधतन्मेगांगेयनिखिलंसर्वमादितः २ कियंतोवैपितृगणाः कस्मिन्लोकेप्रतिष्ठिताः वर्त्ततिदेवप्रवराद्वानांसोमवर्द्धनाः ३ सनत्कुमारउवाच सप्तैतेजयतांश्रेष्ठस्वर्गेपितृगणाःस्मृताः चत्वारोमूर्त्तिमंतश्चत्रयस्तेषाममूर्त्तयः ४ तेषांलोकंविसर्गंचकीर्त्तयिष्यामितच्छृणु प्रभावंचमहत्त्वंचविस्तरेणतपोधन ५ धर्ममूर्त्तिधरास्तेषांत्रयोयेपरमागणाः तेषांनामानिलोकांश्चकथयिष्यामितच्छृणु ६ लोकाःसनातनानामयत्रतिष्ठंतिभास्वराः अमूर्त्तयःपितृगणास्तेवैपुत्राःप्रजापतेः ७ विराजस्यद्विजश्रेष्ठवैराजाइतिविश्रुताः यजंतितान्देवगणाविधिदृष्टेनकर्मणा एतेवैयोगविभ्रष्टालोकान्प्राप्यसनातनान् पुनर्युगसहस्रांतेजायंतेब्रह्मवादिनः ९ तेतुप्राप्यस्मृतिंभूयः सांख्ययोगमनुत्तमम् यांतियोगगतिंसिद्धाःपुनरावृत्तिदुर्लभाम् १० एतेस्युःपितरस्तातयोगिनांयोगवर्द्धनाः आप्याययंतियेपूर्वंसोमंयोगबलेनच तस्माच्छ्राद्धानिदेयानियोगिनांतुविशेषतः एषवैप्रथमःसर्गःसोमपानांमहात्मनाम् १२ एतेषांमानसीकन्यामेनानाममहागिरेः पत्नीहिमवतःश्रेष्ठायस्यामैनाकउच्यते १३

परवैराग्याभावात्सनातनान्प्रजापतिलोकान्प्राप्यापिप्रजापतिनासहकल्पांतेमुक्तिमलब्ध्वापुनःकल्पांतरेसनकादिरूपेणब्रह्मवादिनोभूत्वाप्रजापतितएवजायंते ९ नदनंतरंमुच्यंतइत्याहतेत्विति १० ११ सोमपानांसोमंपाययंतिवर्द्धयंतितेसोमपास्तेषांश्राद्धानिददत्सन्तत्सालोक्यंप्राप्यतद्द्वेवमुक्तिंप्राप्नोतीत्यर्थः १२ एवंस्त्रियोपिअधिकारेसतिश्राद्धंददत्यःपितृकन्यावत्उत्तरो-

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ ह॰ टी॰ नरउत्तमस्थानंप्राप्यक्रमेणमुन्यंतइत्याशयेनसर्वेषांपितृगणानांप्रत्येकंकन्यासंततिमाहएतेषामिति १३ १४ १५ १६ पाटलायाःपुष्पंएकमेवादधौ अ॰ प॰
२७ स्वीकृतवती १७ उइतिसंबुध्यर्थः १८ १९ तिस्रःकुमार्योयस्मिन्तत् त्रिकुमारीकम् २० यथासनत्कुमारादयोऊर्ध्वरेतसएवंएताअपीत्यर्थः २१ पुं १८ १
सामिवस्त्रीणामूर्ध्वरेतसामपिशाश्वतोलोकोनास्तीतितासांपतिवरणेनदर्शयतिउमेत्यादिना २२ २३ २४ द्वितीयमग्निष्वात्ताख्यंगणमाहलोकाइति

मैनाकस्यस्रुतः श्रीमान्क्रौंचोनाममहागिरिः पर्वतप्रवरःपुत्रोनानारत्नसमन्वितः १४ तिस्रःकन्यास्तुमेनायांजनयामासशैलराट् अ
पर्णामेकपर्णांचतृतीयामेकपाटलाम् १५ तपश्चरंत्यःसुमहत्दुश्चरंदेवदानवैः लोकान्संतापयामासुस्तास्तिस्रःस्थाणुजंगमान्
१६ आहारमेकपर्णेनएकपर्णासमाचरत् पाटलापुष्पमेकंचविदधावेकपाटला १७ एकातत्रनिराहारातांमातापत्यषेधयत् उमाइति
निषेधंतीमातृस्नेहेनदुःखिता १८ सातथोक्तातयामात्रादेवीदुश्चरचारिणी उमेत्येवाभवत्ख्याताविषुलोकेषुसुंदरी १९ तथैवनाम्ना
तेनेहविश्रुतायोगधर्मिणी एतत्तुत्रिकुमारीकंजगत्स्थास्यतिभार्गव २० तपःशरीरास्ताःसर्वास्तिस्रोयोगबलान्विताः सर्वाश्चब्रह्मवादि
न्यःसर्वाश्चैवोर्ध्वरेतसः २१ उमातासांवरिष्ठाचज्येष्ठाचवरवर्णिनी महायोगबलोपेतामहादेवमुपस्थिता २२ असितस्यैकपर्णातुदेवल
स्यमहात्मनः पत्नीदत्तामहाब्रह्मन्योगाचार्यायधीमते २३ जैगीषव्यायतुतथाविद्धितामेकपाटलाम् एतेचापिमहाभागेयोगाचार्यावु
पस्थिते २४ लोकाःसोमपदानाममरीचेर्यत्रवैसुताः पितरोयत्रवर्त्तंतेदेवास्तान्भावयंत्युत २५ अग्निष्वात्ताइतिख्याताःसर्वएवामि
तौजसः एतेषांमानसीकन्याअच्छोदानामनिम्नगा २६ अच्छोदनामविख्यातंसरोयस्याःसमुत्थितम् तयानदृष्टपूर्वास्तेपितरस्तुकदा
चन २७ अपश्यमूर्त्तानथपितृन्सादद्दशशुचिस्मिता संभूतामनसातेषांपितृन्स्वान्नाभिजानती २८ व्रीडितातेनदुःखेनबभूववर
वर्णिनी साद्दष्ट्वापितरंवव्रेवसुंनामांतरिक्षगम् २९ अमावसुरितिख्यातमायोःपुत्रंयशस्विनम् अद्रिकाप्सरसायुक्तंविमानेधि
ष्ठितंदिवि ३० सातेनव्यभिचारेणमनसःकामरूपिणी पितरंप्रार्थयित्वान्यंयोगभ्रष्टापपातह ३१ त्रीण्यपश्यद्विमानानिपतमाना
दिवश्च्युता त्रसरेणुप्रमाणानिसापश्यत्तेषुतान्पितृन् ३२ सुसूक्ष्मानपरिव्यक्तानग्नीनग्निष्विवाहितान् त्रायध्वमित्युवाचार्त्ता
पततीतानवाक्शिराः ३३

सोमपदाःसोमयाजिप्राप्याःमरीचेःप्रजापतिपुत्रस्यलोकाः २५ अग्निषुअग्निसाध्येषुकर्मसुआत्ताःगृहीताःपित्र्यादिधि
ष्टिषु २६ २७ अमूर्त्तानपिपितृन्दिव्यदृष्ट्याददर्शदृष्ट्वापिएतेममपितरइतिनज्ञातवती २८ व्रीडितातेषांविशेषतःस्वरूपाज्ञानात् २९ ३० व्यभिचारेणास्वपित्र २७
तिक्रमेण ३१ ३२ सुसूक्ष्मान्त्रसरेणुप्रमाणानामपिविमानानामेकदेशेस्थितत्वात् अतएवअपरिव्यक्तान्अग्नीन्निर्मथ्यान् अग्निषुआहवनीयेषुआहिता
न्चातुर्मास्येषुसोमेअतिथ्यःष्टौच ३३ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

३४ ३५ ३६ सद्यःसंकल्पमात्रात्कर्माणियोगजधर्मैः देवत्वेतैजसदेहप्राप्तौसत्याम् मानुषेतुकर्मानंतरंप्रेत्यमृत्वाकर्माणिफलंति ३७ ३८ ३९ ४० ४१
महाभिषस्यप्राग्जन्मनि तस्यैवशंतनुरूपेणावतीर्णस्य ४२ इयंकथाआदिपर्वणिअनुसंधेया ४३ ४४ ४५ तृतीयंगणमाह वैभ्राजाइति विभ्राजःसूर्य-

तैरुक्तासातुमाभैषीरितिस्वोम्निव्यवस्थिता ततःप्रसादयामासतान्पितॄन्दीनयागिरा ३४ ऊचुस्तेपितरःकन्यांभ्रष्टैश्वर्यांव्यतिक्र-
मात् भ्रष्टैश्वर्यास्वदोषेणपतसित्वंशुचिस्मिते ३५ यैःक्रियंतेहिकर्माणिशरीरैर्दिविदैवतैः तैरेवतत्कर्मफलंप्राप्नुवंतीहदेवताः ३६ स-
द्यःफलंतिकर्माणिदेवत्वेप्रेत्यमानुषे तस्मात्त्वंतपसःपुत्रीप्रेत्येदंप्राप्स्यसेफलम् ३७ इत्युक्तापितृभिःसातुपितॄन्प्रसादयत्स्वकान् ध्या
त्वाप्रसादंतेचक्रुस्तस्याःसर्वेनुकंपया ३८ अवश्यंभाविनंज्ञात्वातेर्थमूचुस्ततस्तताम् अस्यराज्ञोवसोःकन्यात्वमपत्यंभविष्यसि ३९ उत्प
न्नस्यपृथिव्यांतुमानुषेषुमहात्मनः कन्याचभूत्वालोकान्स्वान्पुनःप्राप्स्यसिदुर्लभान् ४० पराशरस्यदायादंत्वंपुत्रंजनयिष्यसि सवे
दमेकंब्रह्मर्षिश्चतुर्धाविभजिष्यति ४१ महाभिषस्यपुत्रौद्वौशंतनोःकीर्तिवर्द्धनौ विचित्रवीर्यंधर्मज्ञंतथाचित्रांगदंशुभम् ४२ एतानु-
त्पाद्यपुत्रांस्त्वंपुनर्लोकानवाप्स्यसि व्यतिक्रमात्पितॄणांचजन्मप्राप्स्यसिकुत्सितम् ४३ अस्यैवराज्ञःकन्यात्वंअद्रिकायांभविष्यसि अ
ष्टाविंशेभवित्रीत्वंद्वापरेमत्स्ययोनिजा ४४ एवमुक्तातुदाशेयीजातासत्यवतीतदा मत्स्ययोनौसमुत्पन्नाराज्ञस्तस्यवसोःसुता ४५ वैभ्राजा
नामतेलोकादिविसंतिसुदर्शनाः यत्रबर्हिषदोनामपितरोदिविविश्रुताः ४६ तान्वैदेवगणाःसर्वेयक्षगंधर्वराक्षसाः नागाःसर्पाःसुपर्णाश्च
भावयंत्यमितौजसः ४७ एतेपुत्रामहात्मानःपुलस्त्यस्यप्रजापतेः महात्मानोमहाभागास्तेजोयुक्तास्तपस्विनः ४८ एतेषांमानसीकन्यापीवरी
नामविश्रुता योगाचयोगिपत्नीचयोगिमातातथैवच ४९ भवित्रीद्वापरंप्राप्ययुगंधर्मभृतांवरा पराशरकुलोद्भूतःशुकोनाममहातपाः
५० भविष्यतियुगेतस्मिन्महायोगीद्विजर्षभः व्यासादरण्यांसंभूतोविधूमोग्निरिवज्वलन् ५१ सतस्यांपितृकन्यायांपीवर्यांजनयिष्यति
कन्यांपुत्रांश्चचतुरोयोगाचार्यान्महाबलान् ५२ कृष्णंगौरंप्रभुंशंभुंकृत्वीकन्यांतथैवच ब्रह्मदत्तस्यजननीमहिषीत्वणुहस्यच ५३ एतानु
त्पाद्यधर्मात्मायोगाचार्यान्महाव्रतान् श्रुत्वास्वजनकाद्धर्मान्व्यासादमितबुद्धिमान् ५४ महायोगीततोगंतापुनरावर्तिनींगतिम् यत्तत्पद
मनुद्विग्नमव्ययंब्रह्मशाश्वतम् ५५ अमूर्तिमंतःपितरोधर्ममूर्तिधरामुने कथायत्रेयमुत्पन्नावृष्ण्यंधककुलान्वया ५६

स्योमेवैभ्राजाःबर्हिषदइतिकेवलंइष्टियायज्ञकप्राप्याः ४६ ४७ ४८ पीवर्याएवविशेषणानियोगाचेत्यादीनियोगास्वयंयोगिनी योगिनःपत्नी यो
गिनोमाताचेति ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ अमूर्तिमंतइत्यादिना

देवपूज्यांस्त्रीन्गणानुव्याख्याय मनुष्यपूज्येषु मूर्तेषु चतुर्षुगणेषु प्रथममाह सुकालाइति द्विजाः ब्राह्मणाः भावयंतितर्पयंति ५७ नवैववंशेइतिमार्कं
डेयस्यभीष्मंप्रतिवचनंसुकस्येयअपराभार्या ५८ द्वितीयमाह मरीचीगर्भान्सूर्यरश्मिप्रकाशयान् ५९ ६० ६१ ६२ शांडिल्यस्यशांडिल्यगोत्रोत्पन्न
स्य ६३ तृतीयंगणमाहसुस्वधाइति कर्दमस्यपितरः पुलहात्समुत्पन्नाः ६४ दिविआकाशे ६५ ६६ कवेर्दुहितरिस्वधायांहिरण्यगर्भस्याग्नेः सुताः ६७
६८ भावयतिपुनाति ६९ तेषांपितॄणांअभ्युपगमात्पूज्यत्वेनांगीकारात् ७० अत्रैव हेतुमाह पितॄणामिति सर्वेषांसप्तानामपिगणानां आदिसर्गेणप्रथ
मसमुत्पन्नत्वेनेत्यर्थः तस्मात् एनंयमंतेश्राद्धदेवंवदंति अयंभावः यमः पितॄणामधिपतिरितिश्रुतेः स्वधर्मेणयमपितृत्वरूपेणहेतुनासर्वश्राद्धदेवताधिपति
त्वादयमेवश्राद्धदेवइति एनमितिबुद्धौसन्निहितस्यान्वादेशेननिर्देशः यतोयंपितॄणामादिसर्गस्तस्मादेनंयमंश्राद्धदेवमितिवदंतिवेदाउदाहृताइति ७१ स्वधां

सुकालानामपितरोवसिष्ठस्यप्रजापतेः निरतादिविलोकेषुज्योतिर्भासिषुभास्वराः सर्वकामसमृद्धेषु द्विजास्तान्भावयंत्युत ५७ ते
षांवैमानसीकन्यागोर्नाम्नादिविविश्रुता नवैववंशेयादत्ताशुकस्यमहिषीप्रिया एकशृंगेतिविख्यातासाध्यानांकीर्तिवर्द्धिनी ५८ म
रीचिगर्भास्ताल्लोकान्समाश्रित्यव्यवस्थिताः येत्वथांगिरसः पुत्राः साध्यैः संवर्द्धिताः पुरा ५९ तान्क्षत्रियगणास्तातभावयतिफला
र्थिनः तेषांतुमानसीकन्यायशोदानामविश्रुता ६० पत्नीसाविश्वमहतः स्नुषावैवृद्धशर्मणः राजर्षेर्जननीचापिदिलीपस्यमहात्मनः
६१ तस्ययज्ञेपुरागीतागाथाः प्रीतैर्महर्षिभिः तदादेवयुगेतातवाजिमेधेमहामखे ६२ अग्नेर्जन्मतथाकृत्वाशांडिल्यस्यमहात्मनः
दिलीपंयजमानंयेपश्यंतिसुसमाहिताः सत्यव्रतंमहात्मानंतेपिस्वर्गजितानराः ६३ सुस्वधानामपितरः कर्दमस्यप्रजापतेः समुत्पन्ना
स्तुपुलहान्महात्मानोद्विजर्षभाः ६४ लोकेषुदिविवर्तंतेकामगेषुविहंगमाः तान्वैश्यगणास्तातभावयंतिफलार्थिनः ६५ तेषांवैमान
सीकन्याविरजानामविश्रुता ययातेर्जननीब्रह्मन्महिषीनहुषस्यच ६६ त्रयएतेगणाः प्रोक्ताश्चतुर्थंतुनिबोधमे उत्पन्नायेस्वधायांतेसोम
पावैकवेःसुताः हिरण्यगर्भस्यसुताः शूद्रास्तान्भावयंत्युत ६७ मानसानामतेलोकायत्रतिष्ठंतितेदिवि तेषांवैमानसीकन्यानर्मदासरितांव
रा ६८ याभावयतिभूतानिदक्षिणापथगामिनी पुरुकुत्सस्ययापत्नीत्रसदस्योर्जनन्यपि ६९ तेषामथाभ्युपगमात्मनुस्तातयुगेयुगे प्रव
र्तयतिश्राद्धानिनष्टेधर्मेप्रजापतिः ७० पितॄणामादिसर्गेणसर्वेषांद्विजसत्तम तस्मादेनंस्वधर्मेणश्राद्धदेवंवदंतिवै ७१ सर्वेषांराजतंपात्रम
थवारजतान्वितम् दत्तंस्वधांपुरोधायश्राद्धंप्रीणातिवैपितॄन् ७२ सोमस्याप्यायनंकृत्वाअग्नेर्वैवस्वतस्यच उदगायनमप्यग्नावग्न्यभावेऽ
प्सुवापुनः ७३

पुरोधायस्वधाशब्दंपूर्वंकृत्वास्वधापितृभ्यइत्येवंमंत्रेणेत्यर्थः ७२ सोमस्येति अग्नौसोमस्यअग्नेर्वैवस्वतस्ययमस्यआप्यायनंकृत्वा २८
सोमायपितृमतेस्वधानमोग्नयेकव्यवाहनायस्वधानमोयमायांगिरसेस्वधानमइतिस्वधांपुरोधायतिस्रआहुतीर्हुत्वेत्यर्थः हुत्वापितॄन्प्रीणातीत्यग्रिमे

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

णान्वयः वैवस्वतस्यचेतिचकारः तृतीयाहुतेर्विकल्पार्थः अतएवाश्वलायनानांसानास्त्येवअपिशब्दोवाऽर्थेउदगायनमप्यत्रकर्त्तव्यं स्वधामंत्रेणहोमेदक्षिणापवर्गाआहुतीर्दद्यात् स्वाहामंत्रेणहोमेतुउदगपवर्गेअप्याहुती भवतः यदाहाश्वलायनः सोमायपितृमतेस्वधानमोऽग्नयेकव्यवाहनायस्वधानमइतिस्वाहाकारेणाग्निंपूर्वमितिउदगायनपदाद्देवान्स्वाहांतपक्षोपिसूचितः दैर्घ्यंआर्षंआकारप्रश्लेषजंवाअग्न्यभावेऽप्स्वइतिच्छेदः एतच्चतीर्थेएवज्ञेयम् वापुनःपुनरत्रपक्षांतरमस्तीत्यर्थः अग्निमुखावैदेवाः पाणिमुखाःपितरइतिब्राह्मणात् ब्राह्मणपाणावपिहोतव्यमितिज्ञेयम् ७३ ७४ ७५ देवतानामपेक्षयापितरःपूर्वंआप्यायनेनप्रीतिकराइत्यर्थः शीघ्रेति देवाश्चिरप्रसादाइतिदुराराध्याइतिभावः ७६ भार्गवेतिमार्कंडेयंसंबोधयतिसनत्कुमारः ७७ सविज्ञानंआत्मप्रधि

पितॄन्प्रीणातियोभक्त्यापितरःप्रीणयंतितम् यच्छंतिपितरःपुष्टिंप्रजाश्चविपुलास्तथा ७४ स्वर्गमारोग्यमेवाथयदन्यदपिचेप्सितम् देवकार्यादपिमुनेपितृकार्यंविशिष्यते ७५ देवतानांहिपितरःपूर्वमाप्यायनस्मृतम् शीघ्रप्रसादास्त्वक्रोधालोकस्याप्यायनपरम् ७६ स्थिरप्रसादाश्चसदातान्नमस्यस्वभार्गव पितृभक्तोसिविप्रर्षेमद्भक्तश्चविशेषतः ७७ श्रेयस्तेद्यविधास्यामिप्रत्यक्षंकुरुतत्स्वयम् दिव्यंचक्षुःसविज्ञानंप्रदिशामिचतेनघ ७८ गतिमेतामप्रमत्तोमार्कंडेयनिशामय नहियोगगतिर्दिव्यापितॄणांचपरागतिः ७९ त्वहिधेनापिसिद्धेनदृश्यतेमांसचक्षुषा सएवमुक्त्वादेवेशोमासुपस्थितमग्रतः ८० चक्षुर्दत्वासविज्ञानंदेवानामपिदुर्लभम् जगामगतिमिष्टांवैदितीयोग्निरिवज्वलन् ८१ तन्निबोधकुरुश्रेष्ठयन्मयासीन्निशामितम् प्रसादात्तस्यदेवस्यदुर्ज्ञेयंप्राकृतैर्मानुषैः ८२ इति श्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिअष्टादशोऽध्यायः १८ मार्कंडेयउवाच आसन्पूर्वयुगेतातभरद्वाजात्मजाद्विजाः योगधर्ममनुप्राप्यभ्रष्टादुश्चरितेनवै १ अपभ्रंशमनुप्राप्तायोगधर्मोपचारिणः महतःसरसःपारेमानसस्यविसंज्ञिताः २ तमेवार्थमनुध्यांतोनष्टमप्स्विवमोहिताः अप्राप्ययोगतेसर्वेसंयुक्ताःकालधर्मणा ३ ततस्तेयोगविभ्रष्टादेवेषुप्रविशेषिताः जाताःकौशिकदायादाःकुरुक्षेत्रेनरर्षभाः ४ हिंसयाविहरिष्यंतोधर्मोपितृकृतेनवै ततस्तेपुनराजातिंभ्रष्टाःप्राप्स्यतिकुत्सिताम् ५

कज्ञानोपेतम् ७८ एतांश्राद्धफलरूपांनिशामयपश्यमांसचक्षुषानहिदृश्यतइतिसंबंधः ७९ एवमुक्त्वाचक्षुर्दत्वाजगामेतिद्वयोःसंबंधः ८० ८१ निशामितंचक्षुर्दानात्प्राकृतन्मुखेनश्रुतंतत्तन्निबोधबुध्यस्व ८२ इ० हरि० टी० ष्टादशोऽध्यायः १८ अत्रइत्युक्त्वाभगवान्देवइत्युपसंहारात्सनत्कुमारवाक्यमेवमार्कंडेयउवाच आसन्नित्यादिदुश्चरितेनयोगविरोधिनाकर्मणा १ सरसःपारेअपभ्रंशंअनुप्राप्ताःपतिताः २ अनुध्यांतःअनुध्यायंतः योगंयोगसिद्धिम् कालधर्मणामृत्युना ३ ततइति योगभ्रष्टाःदेवलोकमेवगच्छंतिनत्वन्यांगतिमितिभावः ४ हिंसयेतिपितृकृतेपित्र्यर्थंधर्ममुद्दिश्यहिंसयाविहरिष्यंतइतिश्राद्धव्यपदेशेनब्राह्मणाअपि हिंसवृत्त्याजीवंतइत्यर्थः ततएवपापात्तेकुत्सितांआजातिंजन्मप्राप्स्यंति ५ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तेषामिति पित्राराधनप्रभावात्तेनीचजातयोपिजातिस्मरा अभूवन्नित्यर्थः ६ जातिस्मरत्वादेवधर्मपराअपिजाताः ब्राह्मण्यंचजन्मांतरे लब्धवंत इत्याहततइ
ति ७ ८ तेनवसार्कंडेयस्य ९ योगोयोगसिद्धिः व्यसनैर्मृगयादिभिः कटुतांक्रूरत्वंइताःप्राप्ताः गुरुद्रोहिणश्चैनंयोगंप्राप्यापिनाशयंतीतिसंबंधः १० येअयाच्या
निदारादीनिनयाचंतेतेयोगंप्राप्नुवंतीतिपंचमस्थेनान्वयः एवंसर्वत्रयोज्यम् ११ नष्टानुगवेषिणः नष्टद्रव्यादिसाधनार्थचोरान्वेषणपराः १२ १३ अनार्यसंकथाग्रा
म्यगोष्ठी गोष्ठीषुआत्ममीमांसासु १४ १५ एवंविधाउक्तप्रकाराः १६ १७ १८ कालस्यपरिणामेन कालक्रमेण आद्रीः श्रद्धावान् १९ इत्युक्त्वेतिमार्कंडेयवा

तेषांपितृप्रसादेनपूर्वजातिकृतेनवै स्मृतिरुत्पत्स्यतेप्राप्यतांतांजातिंजुगुप्सिताम् ६ तेधर्मचारिणोनित्यंभविष्यंतिसमाहिताः ब्रा
ह्मण्यंप्राप्तिलप्स्यंतिततोभूयःस्वकर्मणा ७ ततश्चयोगंप्राप्स्यंतिपूर्वजातिकृतंपुनः भूयःसिद्धिमनुप्राप्ताःस्थानंप्राप्स्यंतिशाश्वतम् ८
एवंधर्मेचतेबुद्धिर्भविष्यतिपुनःपुनः योगधर्मेचनितरांप्राप्स्यसेबुद्धिमुत्तमाम् ९ योगोहिदुर्लभोनित्यमल्पप्रज्ञैःकदाचन लब्ध्वापिनाश
यंत्येनंव्यसनैःकटुतांगताः अधर्मेष्वेववर्त्तंतेप्रादयंतेगुरूनपि १० याचंतेनत्वयाच्यानिरक्षंतिशरणागतान् नावजानंतिकृपणान्प्राप्यंते
नधनोष्मणा ११ युक्ताहारविहाराश्चयुक्तचेष्टाःस्वकर्मसु ध्यानाध्ययनसंयुक्ताश्चननष्टानुगवेषिणः १२ नोपभोगरतानित्यंनमांसमधुभक्ष
णाःनचकामपरानित्यंनविप्राऽसेविनस्तथा १३ नाऽनार्यसंकथासक्तानालस्योपहतास्तथा नात्यंतमानसंसक्तागोष्ठीषुनिरतास्तथा १४
प्राप्नुवंतिनरायोगंयोगोवैदुर्लभोह्यवि प्रशांतास्त्वजितक्रोधामानाहंकारवर्जिताः १५ कल्याणभाजनंयेतुतेभवंतियतव्रताः एवंवि
धास्त्वंतात ब्राह्मणाह्यभवंस्तदा १६ स्मरतिह्यात्मनोदोषप्रमादकृतमेवतु ध्यानाध्ययनसंयुक्ताश्चशांतेवर्त्मनिसंस्थिताः १७ योगध
र्माद्धिधर्मज्ञनधर्मोस्तिविशेषवान् वरिष्ठःसर्वधर्माणांतमेवाचरभार्गव १८ कालस्यपरिणामेनलघ्वाहारोजितेंद्रियः तत्परःप्रयतः
श्राद्धीयोगधर्ममवाप्स्यसि १९ इत्युक्त्वाभगवान्देवस्तत्रैवांतरधीयत अष्टादशैववर्षाणित्वेकाहमिवमेभवत् २० उपासतस्तंदेवेशंवर्षा
ण्यष्टादशैवमे प्रसादात्तस्यदेवस्यनग्लानिरभवत्तदा २१ नक्षुत्पिपासेकालंवाजानामिस्मतदानघ पश्चाच्छिष्यसकाशात्तुकालःसंविदि
तोमया २२ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिपितृकल्पेएकोनविंशोऽध्यायः १९ मार्कंडेयउवाच तस्मि
न्नंतर्हितेदेवेवचनात्तस्यवैप्रभोः चक्षुर्हिदिव्यंसविज्ञानंप्रादुरासीत्तदामम १ ततोहंतानपश्यंवैब्राह्मणान्कौशिकात्मजान् आपगेयकुरुक्षे
त्रेयाननुवाचविभुर्मम २ स्यं २० उपासतस्तंदेवेशमितिपादः पूर्वेणसंबध्यते अष्टादशवर्षाणिमेग्लानिर्नाभवदित्युत्तरेणान्वयः २१ २२ इ
तिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिटीकायांएकोनविंशोऽध्यायः १९ तस्मिन् १ तान्पूर्वंभरद्वाजदायादान्सतः द्वितीयेजन्मनिकुरुक्षेत्रे-
कौशिकात्मजान् अपश्यम् आपगेयहेभीष्म विभुःसनत्कुमारः २

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तेषांकुशिकात्मजानांयःसप्तमोद्विजः पितृवर्तीनामसएवसप्तमेजन्मनिब्रह्मदत्तोऽभवत् ३ ४ ५ ६ तेषांभारद्वाजानाम् ७ ८ ९ १० प्रतीपस्येतिद्वयोः संबंधः ११ १२ सखाआसेतिपदच्छेदः आसीदित्यर्थः शिक्षांवेदांगंक्रमःसंहितायाःपदानांचसहपाठः अन्नाद्यकामोनिर्भजंब्रूयात्सर्गकामः प्रतृणमुभ

ब्रह्मदत्तोभवद्राजायस्तेषांसप्तमोद्विजः पितृवर्तीतिविख्यातोनाम्नाशीलेनकर्मणा ३ शुकस्यकन्याकृत्वीतंजनयामासपार्थिवम् अणुहात्पार्थिवश्रेष्ठात्काम्पिल्येनगरोत्तमे ४ भीष्मउवाच यथोवाचमहाभागोमार्कंडेयोमहातपाः तस्यवंशमहंराजन्कीर्त यिष्यामितच्छृणु ५ युधिष्ठिरउवाच अणुहःकस्यवैपुत्रःकस्मिन्कालेबभूवह राजाधर्मभृतांश्रेष्ठोयस्यपुत्रोमहायशाः ६ ब्रह्म दत्तोनरपतिःकिंवीर्यःसबभूवह कथंचसप्तमस्तेषांसबभूवनराधिपः ७ नह्यल्पवीर्यायशुकोभगवाँल्लोकपूजितः कन्यांप्रदद्याद्योगात्मा कृत्वींकीर्तिमतांप्रभः ८ एतदिच्छाम्यहंश्रोतुंविस्तरेणमहाद्युते ब्रह्मदत्तस्यचरितंतद्भवान्वक्तुमर्हति ९ यथाचवर्तमानास्तेसंसारेच द्विजातयः मार्कंडेयेनकथितास्तद्भवान्प्रब्रवीतुमे १० भीष्मउवाच प्रतीपस्यतुराजर्षेस्तुल्यकालोनराधिपः पितामहस्यमेरा जन्बभूवेतिमयाश्रुतम् ११ ब्रह्मदत्तोमहाभागोयोगीराजर्षिसत्तमः रुतज्ञःसर्वभूतानांसर्वभूतहितेरतः १२ सखायस्यगालवोयस्ययोगा चार्योमहायशाः शिक्षामुत्पाद्यतपसाक्रमोयेनप्रवर्तितः कंडरीकश्चयोगात्मातस्यैवसचिवोमहान् १३जात्यंतरेषुसर्वेषुसखायःसर्वएवते सप्तजातिषुसप्तैवबभूवुरमितौजसः यथोवाचमहाभागोमार्कंडेयोमहातपाः १४ तस्यवंशमहंराजन्कीर्तयिष्यामितच्छृणु ब्रह्मदत्त स्यपौराणपौरवस्यमहात्मनः १५ बृहत्क्षत्रस्यदायादःसुहोत्रोनामधार्मिकः सुहोत्रस्यापिदायादोहस्तीनामबभूवह १६ तेनेदंनिर्मि तंपूर्वंहस्तिनापुरमुत्तमम् हस्तिनश्चापिदायादास्त्रयःपरमधार्मिकाः १७ अजमीढोद्विमीढश्चपुरुमीढस्तथैवच पुरुमीढस्यदायादोरा जाऽऽहहदिषुर्नृप बृहद्धनुर्बृहदिषोःपुत्रस्तस्यमहायशाः १८ बृहद्धर्मेतिविख्यातोराजापरमधार्मिकः सत्यजित्तनयस्तस्यविश्वजित्तस्यचा त्मजः १९ पुत्रोविश्वजितश्चापिसेनजित्पृथिवीपतिः पुत्राःसेनजितश्चासन्चत्वारोलोकविश्रुताः २० रुचिरःश्वेतकेतुश्चमहिम्नार स्तथैवच वत्सश्चावंतकोराजायस्यैतेपरिवत्सकाः २१ रुचिरस्यतुदायादःपृथुसेनोमहायशाः पृथुसेनस्यपारस्तुपारान्नीपस्तुज ज्ञिवान् २२ नीपस्यैकशतंतातपुत्राणाममितौजसाम् महारथानांराजेन्द्रशूराणांबाहुशालिनाम् नीपाइतिसमाख्याताराजानःस र्वएवते २३

यकामउभयमंतरेणेतिश्रुतिप्रसिद्धएवपूर्वैरज्ञानादप्रवर्तितःसन् गालवेनप्रवर्तितइत्यर्थः तस्यब्रह्मदत्तस्य १३ सप्तजातिषुसप्त सुजन्मसुतेसप्तपरस्परंसहायाबभूवुरितिसंबंधः १४ १५ १६ १७ १८ १९ २० आवंतकोअवंत्यांभवोराजासेनजित्यस्यएतेरुचिरादयःपरिवत्सकाःपुत्राः २१ २२ २३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

२४ २५ २६ २७ पुत्रइति तस्यब्रह्मदत्तस्यतनयोविष्वक्सेनोनामसचयोगात्मायोगेनधृतशरीरः २८ एतदेवव्याचष्टेविभ्राजइति विभ्राजोब्रह्मदत्त
स्यपितामहः स्वकृतेनवक्ष्यमाणेनकर्मणाविष्वक्सेनरूपेणपुनरिमंलोकंब्रह्मदत्तःपुत्रोभूत्वाआयातइत्यर्थः २९ पूजनीययाविचित्रचटकया ३० ३१ ३२

तेषांवंशकरोराजानीपानांकीर्त्तिवर्द्धनः कांपिल्येसमरोनामसचेष्टसमरोऽभवत् २४ समरस्यपरःपारःसदश्वइतितेत्रयः पुत्राः
परमधर्मज्ञाः पारपुत्रःपृथुर्बभौ २५ पृथोस्तुसुकृतोनामसुकृतेनेहकर्मणा जज्ञेसर्वगुणोपेतोविभ्राजस्तस्यचात्मजः २६ विभ्राजस्य
तुपुत्रोऽभूदणुहोनामपार्थिवः बभौशुकस्यजामाताकृत्वीभर्त्तामहायशाः २७ पुत्रोऽणुहस्यराजर्षिर्ब्रह्मदत्तोऽभवत्प्रभुः योगात्मातस्यत
नयोविष्वक्सेनःपरंतपः २८ विभ्राजःपुनरायातःस्वकृतेनेहकर्मणा ब्रह्मदत्तस्यपुत्रोन्यःसर्वसेनइतिश्रुतः २९ चक्षुषीतस्यनिर्भि-
न्नेपक्षिण्यापूजनीयया सुचिरोषितयाराजन्ब्रह्मदत्तस्यवेश्मनि ३० अथास्यपुत्रस्त्वपरोब्रह्मदत्तस्यजज्ञिवान् विष्वक्सेनइतिख्या
तोमहाबलपराक्रमः ३१ विष्वक्सेनस्यपुत्रोऽभूद्दंडसेनोमहीपतिः भल्लाटोस्यकुमारोऽभूद्राधेयेनहतःपुरा ३२ दंडसेनात्मजःशूरोमहा
त्माकुलवर्द्धनः भल्लाटपुत्रोदुर्बुद्धिरभवच्चयुधिष्ठिर ३३ सतेषामभवद्राजानीपानामन्तकृन्नृप उग्रायुधेनयस्यार्थेसर्वेनीपाविनाशिताः
उग्रायुधोमदोत्सिक्तोमयाथोनिहतोयुधि दर्पान्वितोदर्परुचिःसततंचानयेरतः ३५ युधिष्ठिरउवाच उग्रायुधःकस्यसुतः
कस्मिन्वंशेयजज्ञिवान् किमर्थंचैवभवतानिहतस्तद्ब्रवीहिमे ३६ भीष्मउवाच अजमीढस्यदायादोविद्वान्राजायवीनरः धृ
तिमांस्तस्यपुत्रस्तुतस्यसत्यधृतिःसुतः ३७ जज्ञेसत्यधृतेःपुत्रोदृढनेमिःप्रतापवान् दृढनेमिसुतश्चापिसुधर्मानामपार्थिवः ३८ आ
सीत्सुधर्मणःपुत्रःसार्वभौमःप्रजेश्वरः सार्वभौमइतिख्यातःपृथिव्यामेकराड्विभुः ३९ तस्यान्ववायेमहतिमहान्पौरवनंदनः महतश्चा
पिपुत्रस्तुराजारुक्मरथःस्मृतः ४० पुत्रोरुक्मरथस्यापिसुपार्श्वोनामपार्थिवः सुपार्श्वतनयश्चापिसुमतिर्नामधार्मिकः ४१ सुमतेरपि
धर्मात्मासंनतिर्नामवीर्यवान् तस्यवैसंनतेःपुत्रःकृतोनाममहाबलः ४२ शिष्योहिरण्यनाभस्यकौशल्यस्यमहात्मनः चतुर्विंशतिधातेन
सप्राच्याःसामसंहिताः ४३ स्मृतास्तेप्राच्यसामानःकार्त्तयोनामसामगाः कार्त्तिरुग्रायुधःसोथवीरःपौरवनंदनः ४४ बभूवयेनवि-
क्रम्यपृषतस्यपितामहः नीपोनाममहातेजाःपंचालाधिपतिर्हतः ४५ उग्रायुधस्यदायादःक्षेम्योनाममहायशाः क्षेम्यात्सुवीरोनृ-
पतिःसुवीरात्तुनृपंजयः ४६ नृपंजयाद्बहुरथइत्येतेपौरवाःस्मृताः सचाप्युग्रायुधस्तातदुर्बुद्धिरभवत्तदा ४७

३३ ३४ ३५ ३६ ३७ ३८ ३९ महानितिनाम ४० ४१ ४२ ४३ कार्त्तिःकृतस्यपुत्रःयेनपंचालाधिपतिर्हतइतिसंबंधः ४४ ४५ ४६ ४७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४८ ४९ ५० ५१ ५२ प्रस्तारः कुशास्तरणम् ५३ ५४ बालंदृष्ट्वाबालोयंयुद्धायोग्यइतिज्ञात्वाहमेवयुद्धायमनोदधेधृतवान् ५५ ५६ ५७
प्रवृत्तेति उच्छृंखलप्रवृत्तेः शास्त्रनियंत्रितस्यचयुद्धंप्रथमोमुख्यः कल्पोनभवतीत्यर्थः ५८ ५९ ६० ६१ ६२ ६३ संक्रमः उपायांतरेणशमः ६४

प्रवृद्धचक्रोबलवान्नीपांतकरणोमहान् सदर्पपूर्णोहत्वाजौनीपानन्यांश्चपार्थिवान् ४८ पितर्युपरतेमह्यंश्रावयामासकिल्बिषम्
मामामात्यैःपरिवृतशयानंधरणीतले ४९ उग्रायुधस्यराजेंद्र दूतोभ्येत्यवचोऽब्रवीत् अद्यत्वजननींभीष्मगंधकालींयशस्विनीम् स्त्री
रत्नंममभार्यार्थेप्रयच्छकुरुपुंगव ५० एवंराज्यंचतेस्फीतंधनानिचनसंशयः प्रदास्यामियथाकाममहंवैरत्नभाक्कृते ५१ ममप्रज्व
लितंचक्रंनिशाम्येदंसुदुर्जयम् शत्रवोविद्रवंत्याजौदर्शनादेवभारत ५२ राष्ट्रस्येच्छसिचेत्स्वस्तिप्राणानांवाकुलस्यवा शासनेममति
ष्ठस्वनहितेशांतिरन्यथा ५३ अधःप्रस्तारशयनेशयानस्तेनचोदितः दूतात्तदहितंमेतद्वैवाक्यमग्निशिखोपमम् ५४ ततोहतस्यदुर्बु
द्धेर्विज्ञायमतमच्युत आज्ञापयद्वैसंग्रामेसेनाध्यक्षांश्चसर्वशः विचित्रवीर्यंबालंचमृदुपाश्रयमेवच दृष्ट्वाक्रोधपरीतात्मायुद्धायैवमनो
दधे ५५ निगृहीतस्तदाहतैःसचिवैर्मंत्रकोविदैः ऋत्विग्भिर्वेदकल्पैश्चसुहृद्भिश्चार्थदर्शिभिः ५६ स्निग्धैश्चशास्त्रविद्भिश्चसंयुगस्यनि
वर्तने कारणंचाविवत्स्वास्मियुक्तरूपंतदाऽनघ ५७ मंत्रिणऊचुः प्रवृद्धचक्रःपापोसौत्वंचाशौचगतःप्रभो नचैषःप्रथमः
कल्पोयुद्धस्यकदाचन ५८ तेवयंसामपूर्वंवैदानंभेदंतथैवच प्रयोक्ष्यामस्ततःशुद्धोदेवतान्यभिवाद्यच ५९ कृतस्वस्त्ययनोविप्रैर्हुत्वाग्नी
नार्च्यचद्विजान् ब्राह्मणैरभ्यनुज्ञातःप्रयास्यसिजयायवै ६० अस्त्राणिनप्रयोज्यानिनप्रवेश्यश्चसंगरः आशौचेवर्तमानेतुवृद्धानामिति
शासनम् ६१ सामदानादिभिःपूर्वमपिभेदेनवाततः तंहनिष्यसिविक्रम्यशंबरंमघवानिव ६२ प्राज्ञानांवचनंकालेवृद्धानांचविशेषतः
श्रोतव्यमितितच्छ्रुत्वानिवृत्तोस्मिनराधिप ६३ ततस्तैःसंक्रमःसर्वःप्रयुक्तःशास्त्रकोविदैः तस्मिन्कालेकुरुश्रेष्ठकर्मचारब्धमुत्तमम् ६४ ससा
मादिभिरेवादावुपायैःप्राज्ञचिंतितैः अनुनीयमानोदुर्बुद्धिरनुनेतुंनशक्यते ६५ प्रवृत्तंतस्यतच्चक्रमधर्मनिरतस्यवै परदाराभिलाषेणास
धस्तान्निवर्त्तितम् ६६ नत्वहंतस्यजानेतन्निवृत्तंचक्रमुत्तमम् हतस्त्वकर्मणातंतुपूर्वंसद्भिश्चनिंदितम् ६७ कृतशौचः शरीचापीरथी
निष्क्रम्यवैपुरात् कृतस्वस्त्ययनोविप्रैःप्रायोधयमहंरिपुम् ६८ ततःसंसर्गमागम्यबलेनास्त्रबलेनच त्र्यहमुन्मत्तवद्युद्धंदेवासुरमिवा
भवत् ६९ समयास्त्रप्रतापेननिर्दग्धोरणमूर्द्धनि पपाताभिमुखःशूरस्त्यक्त्वाप्राणान्नरिंदम ७०

६५ तस्यउग्रायुधस्य ६६ अहंतस्यच
क्रंआज्ञानिवृत्तंभग्नमितिजाने तंचस्वकर्मणाहतंजाने ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४ ७५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

कांपिल्ये दक्षिणपांचाले नीपेश्वरे पृषतस्य पितामहे उग्रायुधेन हते उग्रायुधे च भीष्मेण हते सतीति विवेकः ७१ आहिछत्रं आहिछत्रा नगरी सं वंधिनमु
त्तरपांचालम् ७२ अपवर्जितं दत्तम् ७३ उभयं दक्षिणोत्तरपांचालद्वयम् ७४ ७५ ७६ सा यस्य राज्ञो गृहे निरोधिता तस्य विप्रियं किमर्थं चकारेत्यन्वयः
७७ असौ पूजनीया किं किमर्थं तेन सख्यं चकार ७८ शितिपक्षा शुक्लपक्षा शोणशिराः लोहितमस्तका शितिपृष्ठा कृष्णोपरिभागा शिती धवलमेचकौ इति को-

एतस्मिन्नंतरे तात कांपिल्ये पृषतोऽभ्ययात् हते नीपेश्वरे चैव हते चोग्रायुधे नृपे ७१ आहिछत्रं स्वकं राज्यं पित्र्यं प्राप महाद्युतिः द्रुपद
स्य पिता राजन् समेवानुमते तदा ७२ ततोऽर्जुनेन तरसा निर्जित्य द्रुपदं रणे आहिछत्रं सकांपिल्यं द्रोणायाथापवर्जितम् ७३ प्रतिगृह्य त
तो द्रोण उभयं जयतां वरः कांपिल्यं द्रुपदायैव प्रायच्छद्विदितं तव ७४ एष तद्रुपदस्यादौ ब्रह्मदत्तस्य चैव ह वंशः कार्त्स्न्येन वै प्रोक्तो नीपस्यो
ग्रायुधस्य च ७५ युधिष्ठिर उवाच किमर्थं ब्रह्मदत्तस्य पूजनीया शकुंतिका अध चकार गांगेय ज्येष्ठपुत्रं पुरा विभो ७६ निरोधि-
ता गृहे चापि किमर्थं चैव यस्य सा चकार विप्रियं भद्र तस्य राज्ञो महात्मनः ७७ पूजनीया चकारासौ किं सख्यं तेन चैव ह एतन्मे संशयं सर्वं ब्रू
हीति यथातथम् ७८ भीष्म उवाच शृणु सर्वं महाराज यथावृत्तं सभूःपुरा ब्रह्मदत्तस्य भवने तन्निबोध युधिष्ठिर ७९ काचिच्छकु
निका राजन् ब्रह्मदत्तस्य वै सखी शितिपक्षा शोणशिराः शितिपृष्ठा शितोदरी ८० सखी सा ब्रह्मदत्तस्य स कृतं बहु सौहृदा तस्याः कुलायम
भवद्गेहे तस्य नरोत्तम ८१ सा सदा हनि निर्गत्य तस्य राज्ञो गृहोत्तमात् चचाराभोधितीरेषु पल्वलेषु सरःसु च ८२ नदीपर्वतकुंजेषु वने
षूपवनेषु च प्रफुल्लेषु तडागेषु कल्हारेषु सुगंधिषु ८३ कुमुदोत्पलकिंजल्कसुरभीकृतवायुषु हंससारसघुष्टेषु कारंडवकृतेषु च ८४
चरित्वा तेषु सा राजन् निशि कांपिल्यमागमत् नृपतेर्भवनं प्राप्य ब्रह्मदत्तस्य धीमतः ८५ राज्ञा तेन सदा राजन् कथायोगं चकार सा आश्च
र्याणि च दृष्टानि यानि वृत्तानि कानिचित् ८६ चरित्वा विविधान् देशान् कथयामास तानि सा कदाचित्तस्य नृपतेर्ब्रह्मदत्तस्य कौरव ८७ पु
त्रोऽभूद्राजशार्दूल सर्वसेनेति विश्रुतः पूजनीया च सा तस्मिन् प्रासूताडमथापि च ८८ तस्मिन्नोडे पुरा द्यावैकतानिलप्रास्फुटत्तदा स्फु
टितो मांसपिंडस्तु वै बाहुपादास्यसंयुतः ८९ बभूव कश्चिदक्षहीनो बभूव पृथिवीपते चक्षुष्मानप्यभूत्पश्चादीषत्पक्षोत्थितश्च ह
९० अथ सा पूजनीया वै राजपुत्रस्य पुत्रयोः तुल्यस्नेहात्प्रीतिमतो दिवसे दिवसेऽभवत् ९१ आजहार सदा सा य च चामृतफलद्वयम्
अमृतस्वादुसदृश सर्वसेनतनूजयोः ९२ स बालो ब्रह्मदत्तस्य पूजनीयासुतश्च ह तेफले भक्षयित्वा च पृथक्कौ प्रीतमानसौ ९३

शकारा:

८० कुलायं नीडम् ८१ ८२ ८३ ८४ ८५ ८६ ८७ सर्वसेनः इति च्छेदः तस्मिन्काले गृहे च ८८ तत् अंडम् स्फुटितः व्यक्तीभूतः ८९ ९० ९१ ९२ ९३ ६७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९४ तेनशिशुनानीडादाकृष्यधात्रीतंप्रक्रीडयामास ९५ ९६ ९७ ९८ ९९ १०० १०१ १०२ धाशांतीकूजंती १०३ १०४ १०५ १०६ १०७
१०८ १०९ पातव्योरक्षणीयः ११० १११ मत्तःप्रमत्तउन्मत्तः श्रांतःक्रुद्धोबुभुक्षितः त्वरमाणश्चभीतश्चलुब्धःकामीचतेदशेतिएतेषांदशानांधर्मो

अभूतांनित्यमेवेहखादेतांतौचतेफले तस्यांगतायामथचपूजन्यांवैसदाहनि ९४ शिशुनाचटकेनाथधात्रीतंतुशिशुंनृप तेनप्र-
क्रीडयामासब्रह्मदत्तात्मजंसदा ९५ नीडात्तमाकृष्यतदापूजनीयाकृतात्ततः क्रीडताराजपुत्रेणकदाचिच्चटकःसतु ९६ निगृहीतःकंध
रायांशिशुनादृढमुष्टिना दुर्भगमुष्टिनाराजन्नसूनसद्यस्तुजीजहत् ९७ तंतुपंचत्वमापन्नंदृष्ट्वातस्यबालघातितम् कथंचिन्मोचितंदृष्ट्वा
नृपतिर्दुःखितोऽभवत् ९८ धात्रीतस्यजगर्हेतांतदाश्रुपरमोनृपः तस्थौशोकान्वितोराजाशोचंस्तंचटकंतदा ९९ पूजनीयापितत्कालंगृ
हीत्वातुफलद्वयम् ब्रह्मदत्तस्यभवनमाजगामवनेचरी १०० अथापश्यत्तमागम्यगृहेतस्मिन्नराधिप पंचभूतपरित्यक्तंशावंतंस्वतनू
द्भवम् १०१ सुमोहदृष्ट्वातंपुत्रंपुनःसंज्ञामथालभत् लब्धसंज्ञाचसाराजन्विललापतपस्विनी १०२ पूजनीयोवाच नतुत्वमा
गतापुत्रवाशांतोपरिसर्पसि कुर्वंश्चाटुसहस्राणिअव्यक्तकलयागिरा १०३ व्यादितास्यःक्षुधार्त्तश्चपीतेनास्यनपुत्रक शोणेनताल्लुनापु
त्रकथमद्यनसर्पसि १०४ पक्षाभ्यांतापरिष्वज्यनतुवाशामिचाप्यहम् चीचीकूचीतिवाशांतत्वामद्यनशृणोमिकिम् १०५ मनोरथोय
स्तुममपश्येयंपुत्रकंकदा व्यात्तास्यंवारियाचंतंस्फुरत्यक्षममाग्रतः १०६ समेमनोरथोभग्नस्त्वयिपंचत्वमागते विलप्यैवंबहुविधंराजा
नमथसाब्रवीत् १०७ ननुमूर्द्धाभिषिक्तस्त्वंधर्मंवेत्सिसनातनम् अथकस्मान्ममसुतंधात्र्याघातितवानसि १०८ त्वत्पुत्रेणचाकृष्य
क्षत्रियाधर्मशासमे नचनूनंश्रुतातेऽमूदियमांगिरसीस्मृतिः १०९ शरणागतःक्षुधार्त्तश्चशत्रुभिश्चाप्युपद्रुतः चिरोषितश्चयस्यगृहेपा
तव्यःसर्वदाभवेत् ११० अपालयन्नरोयातिकुंभीपाकमसंशयम् कथमस्यहविर्दैवा गृह्णंतिपितरःस्वधाम् ११ एवमुक्त्वामहाराजद
शधर्मगतासती शोकार्त्तातस्यबालस्यचक्षुषीनिर्बिभेदसा १२ कराभ्यांराजपुत्रस्यततस्तच्चक्षुरस्फुटत् कृत्वाचाथनृपस्तत्सुस्व-
पांततोवरम् १३ अथराजाकृतंदृष्ट्वापूजनीयामुवाचह विशोकाभवकल्याणिकृतंतेभीरुशोभनम् १४ गतशोकानिवृत्तस्त्वंज
यंसख्यमस्कृते पुरेवत्सभद्रंतेनिवर्त्तस्वरमस्वच १५ पुत्रपीडोद्भवश्चापिनकोपःपरमस्त्वयि ममास्तिसारिभद्रंतेकर्त्तव्यंचकृतंत्व
या १६ पूजनीयोवाच आत्मौपम्येनजानामिपुत्रस्नेहंतवाप्यहम् नचाहंवस्तुमिच्छामितवपुत्रमचक्षुषम् कृत्वावैरा
जशार्दूलत्वद्गृहेकृतकिल्बिषा १७ निर्विवेकित्वम् गतामासादशधर्मगता १२ १३ तेलया १४ अजर्यअविनाशि १५ १६ अचक्षुषंकृत्वाव-
स्तुंनइच्छामि १७ श्रीगोपीजनवल्लभायनमः श्रीगोपालोविजयते

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१८ १९ २० विस्रंभं विश्वासम् २१ २२ गर्भसंकरितेषु संकीर्णजातिषु २३ अपीति प्रावारः पिपीलः मुंगलाइतिमहाराष्ट्राः सहि पूर्वमपक्षएव पक्षोत्पत्तौ अ॰ प॰
उत्पत्याधः पतन् पक्षिभिर्भार्यतइतिप्रसिद्धम् अन्येतु प्रावारः पञ्चात्येषु पामर इतिप्रसिद्धः सकिलकुड्यवृक्षादिगह्वरे भाष्यउत्पद्यते सचपक्षोत्थानेसह- ३० १
साउच्चैरुत्पत्य भूमौ पतितः पक्षिभिः खाद्यतेतद्वदितिव्याचख्युः २४ २५ आर्द्रः स्निग्धः २६ हरिरिंद्रः फेनेनवज्रगर्भेण २७ मत्तंमद्यादिनाप्रमत्तंअनवहि

गाथाश्चाप्युशनोगीताइमाः शृणुमयेरिताः कुमित्रंचकुदेशंचकुराजानंकुसौहृदम् कुपुत्रंचकुभार्यांचदूरतः परिवर्जयेत् १८ कुमि
त्रेसौहृदंनास्तिकुभार्यायांकुतोरतिः कुतः पिंडः कुपुत्रेवैनास्तिसत्यंकुराजनि १९ कुसौहृदेकविश्वासः कुदेशेनतुजीव्यते कुराजनिभयं
नित्यंकुपुत्रेसर्वतोऽसुखम् २० अपकारिणिविस्रंभयः करोतिनराधमः अनाथोदुर्बलोयद्वन्नचिरंसतुजीवति २१ नविश्वसेदविश्वस्ते
विश्वस्तेनातिविश्वसेत् विश्वासाद्भयमुत्पन्नंमूलान्यपिनिकृंतति २२ राजसेविषुविश्वासगर्भसंकरितेषुच यःकरोतिनरोमूढोनचिर-
सतुजीवति २३ अप्युन्नतिंप्राप्यनरः प्रावारः कीटकोयथा सविनश्यत्यसंदेहमाहैवमुशनानृप २४ अपिमार्दवभावेनगात्रंसंलीयबु
द्धिमान् अरिंनाशयतेनित्यंयथावल्लीमहाद्रुमम् २५ मृदुरार्द्रःकृशामूलाशनैःसंलीयतेरिपुः वल्मीकइववृक्षस्यपश्चान्मूलानिकृंत-
ति २६ अद्रोहसमयंकृत्वासुनीनामग्रतोहरिः जघाननमुचिंपश्चाद्दर्पाफेनेनपार्थिव २७ कृतंमत्तंप्रमत्तंवाघातयंतिरिपुंनराः विषेण
वन्हिनावापिशस्त्रेणाप्यथमायया २८ नचशेषंप्रकुर्वंतिपुनर्वैरभयान्नराः घातयंतिसमूलंहिशुल्बेमासुपमानृप २९ शत्रुशेषमृणा
च्छेषंशेषमग्नेश्चभूमिप पुनर्वर्धेतसंभूयतस्माच्छेषंनशेषयेत् ३० हसतेजल्पतेवैरीएकपात्रेभुनक्तिच एकासनंचारोहतिस्मरतेतच्च
किल्बिषम् ३१ कृत्वासबंधकंचापिविश्वसेच्छत्रुणानहि पुलोमानंजघानाजौजामातासन्शतक्रतुः ३२ निधायमनसावैरंप्रियव-
क्ताहयोनरः उपसर्पेन्नतंप्राज्ञः कुरंगइवलुब्धकम् ३३ नचासन्नेनिवर्तव्यसवैरेवर्द्धितेरिपौ पातयेत्तंसमूलंहिनदीरयइवद्रुमम् ३४
अमित्रादुन्नतिंप्राप्यनोन्नतोस्मीतिविश्वसेत् तस्मात्प्राप्योन्नतिंनश्यत्प्रावारइवकीटकः ३५ इत्येतास्त्वुशनोगीतागाथाधार्याविपश्चि
ता कुर्वताचात्मरक्षांवैनरेणपृथिवीपते ३६ मयापिकिल्बिषंतुभ्यंप्रयुक्तमतिदारुणम् पुत्रमंधंप्रकुर्वंत्यातस्मान्नोविश्वसेत्वयि ३७ एव
मुक्त्वाप्रदुद्रावतदाकाशेपतंगिनी इत्येतत्तेमयाख्यातंपुराभूतमिदंनृप ३८ ब्रह्मदत्तस्यराजेंद्रयद्वृत्तंपूजनीयया श्राद्धंचपृच्छसेयन्मायु
धिष्ठिरमहामते ३९ अतस्तेवर्णयिष्येहमितिहासंपुरातनम् गीतंसनत्कुमारेणमार्कंडेयायपृच्छते ४०

तम् २८ २९ ३० ३१ ३२ ३३ ३४ ३५ धार्याहृदीतिशेषः ३६ ३७ ३८ ३९ ४० ६७ ६७ ६७ ६७ ३२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चरितंनिबोधेति अनुवर्त्तते ४२ इतिहरिवंशेटीकायांविंशोऽध्यायः २० श्राद्धेप्रासंगिकंपरिसमाप्यप्रकृतंश्राद्धमाहात्म्यमेवानुसंधत्तेश्राद्धेइति प्रतिष्ठितः श्रुतधनकुलपुत्रपश्वादिबाहुल्येनमहत्वंप्राप्तः योगप्राप्योमोक्षः ब्रह्मात्मैक्यंवा १ यत्फलंप्राप्तमितिसंबंधः सप्तजातिषुसप्तजन्मसु भारद्वाजकौशिकव्याधमृगचक्रवाकहंसश्रोत्रियदायादत्वेषु भरद्वाजपुत्रत्वेप्रमादादित्वात्तदारभ्यगणना ततःश्राद्धात्निवर्त्ततेसंपद्यतेबुद्धिः ज्ञानम् २ पीडयागोहिंसया ३ ४ तथानामानुरूपैः कर्मभिः कविः परलोकभयदर्शी स्वसृमः स्वेविषयतिसर्त्तुंशीलमस्येतिपरलोकार्थी ५ कौशिकस्यविश्वामित्रस्यसुताः येपूर्वंविश्वामित्रेणशप्ताः अंतान्वयाः प्रजाभक्षीश्वेति तएतेपंचाशत् तेषांमध्येवाग्दुष्टादयः सप्तयेषांसंततिरंध्राः पुंड्राइत्यादिः श्रुतिप्रसिद्धा ६ उपरतेशापंदत्वाउदासीने

श्राद्धस्यफलमुद्दिश्यनियतंसुकृतस्यच तन्निबोधमहाराजसप्तजातिषुभारत ४१ सगालवस्यचरितंकंडरीकस्यचैवहि ब्रह्मदत्ततृतीयानांयोगिनांब्रह्मचारिणाम् ४२ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिचटकाख्याननामविंशोऽध्यायः २० मार्कंडेयउवाच श्राद्धेप्रतिष्ठितोलोकः श्राद्धेयोगःप्रवर्त्तते हंततेवर्त्तयिष्यामिश्राद्धस्यफलमुत्तमम् १ ब्रह्मदत्तेनयत्प्राप्तंसप्तजातिषुभारत ततएवहिधर्मस्यबुद्धिर्निर्वर्ततेशनैः २ पीडयाप्यथधर्मस्यकृतेश्राद्धेपुरानघ यत्प्राप्तंब्राह्मणैःपूर्वंतन्निबोधमहामते ३ ततोहृतानधर्मिष्ठान्कुरुक्षेत्रेपितृव्रतान् सनत्कुमारनिर्दिष्टानपश्यसप्तवैद्विजान् ४ दिव्येनचक्षुषातेनयानुवाचपुराविभुः वाग्दुष्टःक्रोधनोहिंस्रःपिशुनः कविरेवच ५ स्वसृमःपितृवर्त्तीचनामभिःकर्मभिस्तथा कौशिकस्यसुतास्तातशिष्यागार्ग्यस्यभारत ६ पितर्युपरतेसर्वेव्रतवतस्तदाभवन् विनियोगाद्गुरोस्तस्यगांदोग्ध्रींसमकालयन् समानवत्सांकपिलांसर्वान्यायागतांतदा ७ तेषांपथिक्षुधार्त्तानांबाल्यान्मोहाच्चभारत क्रूराबुद्धिःसमभवत्तांगांवैहिंसितुंतदा ८ तान्कविःस्वसृमश्चैवयाचेतेनेतिवैतदा नचाशक्यन्ततताभ्यातदावारयितुंद्विजाः ९ पितृवर्त्तीतुयस्तेषांनित्यंश्राद्धान्हिकोद्विजः ससर्वानब्रवीद्भ्रातॄन्कोपाद्धर्मेसमाहितः १० यद्यवश्यंप्रहंतव्यापितॄनुद्दिश्यसाधिमाम् प्रकुर्वीमहिगांसम्यक्सर्वएवसमाहिताः ११ एवमेषापिगोर्द्धर्मप्राप्स्यतेनात्रसंशयः पितॄनभ्यर्च्यधर्मेणनाधर्मोस्मान्भविष्यति १२ तथेत्युक्त्वाचतेसर्वेप्रोक्षयित्वाचगांततः पितृभ्यःकल्पयित्वैनामुपायुंजतभारत १३ उपयुज्यचगांसर्वेगुरोस्तस्यन्यवेदयन् शार्दूलेनहताधेनुर्वत्सोयंगृह्यतामिति १४

सतिव्रतवंतोगार्ग्यस्यगृहेब्रह्मचर्यार्थंयासंकृतवंतः समकालयन् वनमनयन् समानवत्सांकपिलवत्साम् न्यायागतामितिविशेषणात्चोरद्रव्यापहारेऽप्योदोषइतिगम्यते ७ ८ ९ श्राद्धान्हिकःनित्यश्राद्धकृत् १० प्रकुर्वीमहि हिंसयासाधयेमहि इहिंसायामित्यस्यरूपम् ११ १२ उपायुंजतअभक्षयन् १३ १४ ६९ ६९ ६९ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उपचर्यवंचयित्वाकालेनमृत्कना १५ १६ लुब्धकस्यात्मजा असृज्यंतेतिसंबंधः १७ स्मृतिः पूर्वजातिस्मरणम् प्रत्यवमर्शः स्वकृतकर्मानुसंधानम् १८
१९ २० २१ हिंसायांमृगयायामपिधर्मोबालगर्भिणीमैथुनासक्तादिवर्जनंतत्परतैः २२ अवासृजन् अनशनादिनाःत्यजन् २३ तेनमातापितृपूजनेन
भासान् हिंसाधर्मरतत्वेन भयानिचोत्पाद्य जातिस्मरत्वंसंविग्नत्वंच कर्मद्वयफलमित्यर्थः २४ उन्मूखइतिय: पूर्ववाग्दुष्टः सनित्यंपरनिंदनोन्मुखत्वात् दु-
र्धमुख एवजातः क्लेशेन आहारंगृण्हातीत्यर्थः क्रोधनस्तुनित्यंपरोद्वेजकत्वात् स्वयमपिनित्यसंत्रस्तोभूत् एवंपिशुनः स्तब्धकर्णोबधिरोभूत् हिंस्रोपि-

आर्जवात्सतुतंवत्संप्रतिजग्राहवैद्विजः मिथ्योपचर्य्यतेतंतुगुरुमन्यायतोद्विजाः कालेनसमयुज्यंतसर्वएवायुषःक्षये १५ तेवैक्रूर
तयाहिंस्रा अनार्यत्वाद्गुरौतथा उग्राहिंसाविहाराश्चसप्तजातासहोदराः १६ लुब्धकस्यात्मजास्तात बलवतोमनस्विनः पितॄनभ्य
र्च्यधर्मेणप्रोक्षयित्वाचगांतदा १७ स्मृतिःप्रत्यवमर्शश्चतेषांजात्यंतरेभवत् जाताव्याधादशार्णेषुसप्तधर्मविचक्षणाः १८ स्वकर्म-
निरताःसर्वेलोभानृतविवर्जिताः तावन्मात्रंप्रकुर्वंतियावतापाणधारणम् १९ शेषंध्यानपराःकालमनुध्यायंतिकर्मतत् नामधेया
निचाप्येषामिमान्यासन्नराधिप २० निर्वैरोनिर्वृतिःशांतोनिर्मन्युःकृतिरेवच वैधसोमातृवर्त्तीचव्याधाःपरमधार्मिकाः २१ तैरेवमु
षितैस्तातहिंसाधर्मरतैःसदा माताचपूजितावृद्धापिताचपरितोषितः २२ यदामातापिताचैवसंयुक्तौकालधर्मणा तदाधनूंषितेत्यक्त्वा
वनेप्राणानवासृजन् २३ शुभेनकर्मणातेनजाताजातिस्मरामृगाः भासात्तुत्रासंविग्नारम्येकालंजरेगिरौ २४ उन्मुखोनित्यवित्रस्तः
स्तब्धकर्णोविलोचनः पंडितोघस्मरोनादीनामतस्तेऽभवन्मृगाः २५ तमेवार्थमनुध्यातोजातिस्मरणसंभवम् आसन्वनचराःक्षांता
निर्द्वंद्वानिष्परिग्रहाः २६ तेसर्वेशुभकर्माणःसधर्माणोवनेचराः योगधर्ममनुप्राप्ताविहरंतिस्मतत्रह २७ जहुःप्राणान्मरुंसाध्यलब्धा
हारास्तपस्विनः तेषांमरुंसाधयतांपदस्थानानिभारत तथैवाद्यापिदृश्यंतेगिरौकालंजरेनृप २८ कर्मणातेनतेतातशुभेनाशुभवर्जि-
ताः शुभाच्छुभतरांयोनिंचक्रवाकत्वमागताः २९ शुभेदेशेशरद्वीपेसप्तैवासन्जलौकसः त्यक्त्वासहचरीधर्मंमुनयोब्रह्मचारिणः ३०
निस्पृहोनिर्ममःक्षांतोनिर्द्वंद्वोनिष्परिग्रहः निर्वृतिर्निभृतश्चैवशकुनानामतःस्मृताः ३१

लोचनोंधोभूत् कविःपंडितोभूत् घस्मरोघस्मरः य
थेष्टाहारोभूत् पितृवर्त्तीतुश्राद्धकर्तृत्वात्नादीनादरूखभोक्ताभूत् तद्धिमृगाणांअत्यंतंप्रियंइत्यन्वर्थनामतातेषांज्ञेया २५ अनुध्यातः आनुध्यायंतः
२६ सधर्माणःसमानाःअहिंसादयोधर्मायेषांते २७ मरुर्निर्जलोदेशःतंसाध्यसाधयित्वाजलत्यागव्रतेनेत्यर्थः गिरिशृंगान्निपत्येत्यन्ये मरुर्नागिरिधन्वनो
रितिमेदिनी पदस्थानानिपदचिन्हानिसार्द्धः २८ २९ शरद्वीपेजलद्वीपे शरस्तेजनकेबाणेदध्यग्रेनाशरंजलेइतिमेदिनी सहचरीधर्मंमैथुनम् ३० ३१ ३३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३२ ३३ ३४ ३५ पंचमइति चतुर्थस्यनाम ३६ पंचमोवागृदुष्टादिषुपंचसंख्यापूरणः कविनामासप्तमेजन्मनिभाविनिपांचिकोनामराजामात्योऽभूत्
षष्ठः खसृमःसकंडरीकनामाभावी सप्तमः पितृवर्त्तीसब्रह्मदत्तोभावी ३७ निर्वृत्त्यानिष्पत्त्या प्रतिभानात्पूर्वजन्मकर्मस्फुरणात् ३८ ब्रह्मवेदःकृतंपाठतो
र्थतश्चाधिगतम् ३९ ४० ४१ ४२ स्वतंत्राख्यःसप्तमोहंसः ४३ निष्फलेननिःसुखेन ४४ इतिश्रीमहाभारतेहरिवंशेटीकायांएकविंशः २१

तेतत्रपक्षिणःसर्वेशकुनाधर्मचारिणः निराहाराजहुःप्राणांस्तपोयुक्ताःसरित्तटे ३२ अथतेसोदराजाताहंसामानसचारिणः जातिस्म
राःसुसंयुक्ताःसप्तैवब्रह्मचारिणः ३३ विप्रयोनौयतोमोहात्मिथ्योपचरितोगुरुः तिर्यग्योनौततोजाताःसंसारेपरिबभ्रमुः ३४ यतश्च
पितृवाक्यार्थःकृतःस्वार्थेव्यवस्थितैः ततोज्ञानंचजातिंचतेहिप्रापुर्गुणोत्तराम् ३५ सुमनाःशुचिवाक्शुद्धःपंचमश्छिद्रदर्शनः सुनेत्र
श्चस्वतंत्रश्चशकुनानामतःस्मृताः ३६ पंचमःपांचिकस्तत्रसप्तजातिष्वजायत षष्ठस्तुकंडरीकोभूद्ब्रह्मदत्तस्तुसप्तमः ३७ तेषांतुतपसा
तेनसप्तजातिकृतेनवै योगस्यचापिनिर्वृत्त्याप्रतिभानाच्चशोभनात् ३८ पूर्वजातिषुयद्ब्रह्मश्रुतंगुरुकुलेषुवै तथैवावस्थिताबुद्धिःसंसा
रेष्वपिवर्त्ततां ३९ तेब्रह्मचारिणःसर्वेविहगाब्रह्मवादिनः योगधर्ममनुध्यातोविहरंतिस्मतत्रह ४० तेषांतत्रविहगानांचरतांसहचा
रिणाम् नीपानामीश्वरोराजाविभ्राजःपौरवान्वयः ४१ विभ्राजमानोवपुषाप्रभावेनसमन्वितः श्रीमानंतःपुरवृतोवनंतत्प्रविवेशह ४२
स्वतंत्रश्चविहगोसौस्पृहयामासतंनृपम् दृष्ट्वायांतंश्रियोपेतंभवेयमहमीदृशः ४३ यद्यस्तिसुकृतंकिंचित्तपोवानियमोपिवा खिन्नोऽ
स्म्युपवासेनतपसानिष्फलेनच ४४ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिएकविंशोऽध्यायः २१ मार्कंडेय
उवाच ततस्तंचकथाकोह्यभूच्चतुःसहचारिणौ आवांतंसचिवौस्यावस्त्वप्रियहितैषिणौ १ तथेत्युक्त्वाचतस्यासीत्तदायोगात्मिका
मतिः एवंतेसमयंचक्रुःशुचिवाक्तमुवाचह २ यस्मात्कामप्रधानस्त्वंयोगधर्ममपास्यवै एवंवरंप्रार्थयसेतस्माद्वाक्यंनिबोधमे ३ राजा
त्वंभवितातातकांपिल्येनात्रसंशयः भविष्यतःसखायौचद्वाविमौसचिवौतव ४ शप्त्वाचाऽनभिभाष्यांस्तांश्चत्वारश्चक्रुरंडजाः तांस्त्री
नभीप्सतोराज्यंव्यभिचारप्रधर्षितान् ५ शप्ताःखगास्त्रयस्तेतुयोगभ्रष्टाविचेतसः तानयाचंतचतुरस्त्रयस्तेसहचारिणः ६ तेषांप्रसा
दंतेचक्रुरथैतान्सुमनाऽब्रवीत् सर्वेषामेववचनात्प्रसादानुगतंवचः ७

ततस्तम् १ शुचिवाक्द्वितीयोहंसः २ वाक्यंशापरूपम् ३ शापमे
वाहराजेति ४ तेचत्वारस्तांस्त्रीन्शप्त्वाऽनभिभाष्यान् भाषणानर्हान्चक्रुः शापेहेतुः व्यभिचारप्रधर्षितानितिव्यभिचारोयोगधर्मभ्रंशः ५ चतुरः चतु
संख्यान् ६ सर्वेषांवचनात्वचनंप्राप्यवचोऽब्रवीत् अडभावःसंधिर्वाऽर्षः ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८ अस्य अनेन कृतेन उपदेशेनेति शेषः ९ उपादेशमेवाह गामिति प्रोक्षयित्वा प्रोक्षणादिभिः संस्कारैः संस्कृत्य धर्मेण पितृयज्ञविधिना अस्माकं अस्माभि स्त्वां पितृभ्य उपकल्प्य ज्ञानयोगः प्राप्य इति शेषः तस्य विशेषणं योगसाधन इति १० इमं वक्ष्यमाणम् सप्तव्याधा दशार्णेष्विति श्लोकद्वयरूपम् पुरुषान्तरितं पुरुषान्तरव्यवधानेन श्रुत्वा ११ इति हरिवंशे टीकायां द्वाविंशोऽध्यायः २२ ते योगइति ते हंसाः उपशोषयन् शोषितवंत इत्युत्तरेणान्वयः १ अडभाव आर्षः २ वपुषैव च चार न तु यानेन ३ अपश्यत् एकाग्र्यादिना बाह्यलक्षणेन योगधर्मात्मकान् ज्ञातवान् निर्वेदात् पक्षिष्वपि योगोक्तिमानुषेषु मयि नास्तीति धिङ् मामित्यात्मन्योदासिन्यात् ४ अणून् सूक्ष्मान् अर्थान् हंतिप्राप्नोतीत्यणुह पदं निर्वक्ति अणुधर्मेति ५ ६ पितॄणां बर्हिषदां कन्या पीवरी नाम्नी ७ योगास्त्वयं योगवान्

अंतर्धानं भविता शापो युष्माकं नात्र संशयः इतश्च्युताश्च मानुष्यं प्राप्य योगमवाप्स्यथ ८ सर्वसत्वरुतज्ञश्च स्वतंत्रोऽयं भविष्यति पितृप्रसादात्यस्माभिरस्य प्राप्तः कृतेन वै ९ गां प्रोक्षयित्वा धर्मेण पितृभ्य उपकल्प्यताम् अस्माकं ज्ञानसंयोगः सर्वेषां योगसाधनः १० इमं च वाक्यसंदर्भं श्लोकमेकमुदाहृतम् पुरुषांतरितं श्रुत्वा ततो योगमवाप्स्यथ ११ इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्वणि पितृवाक्ये द्वाविंशोऽध्यायः २२ मार्कंडेय उवाच ते योगधर्मनिरताः सप्त मानसचारिणः पद्मगर्भोरविंदाक्षः क्षीरगर्भः सुलोचनः १ उरुबिंदुः स्वबिंदुश्च हैमगर्भस्तु सप्तमः वाय्वंबुभक्षाः सततं शरीराण्युपशोषयन् २ राजा विभ्राजमानस्तु वपुषा तत् हृतं तदा चचारांतःपुरवृतो नंदनं मघवानिव ३ स तानपश्यत् खचरान् योगधर्मात्मकान्नृप निर्वेदाच्च तमेवार्थमनुध्यायन् पुरं ययौ ४ अणुहो नाम तस्यासीत् पुत्रः परमधार्मिकः अणुधर्मरतिर्नित्यमणुः सोऽध्यगमत्पदम् ५ शादात्कन्या शुकस्तस्मै कृत्वी पूजितलक्षणाम् सत्वशीलगुणोपेता योगधर्मरता सदा ६ सा ह्युद्दिष्टा पुरा भीष्म पितृकन्या मनीषिणा सनत्कुमारेण तदा सन्निधौ मम शोभना ७ सत्यधर्मभृतां श्रेष्ठा दुर्विज्ञेया कृतात्मभिः योगा च योगपत्नी च योगमाता तथैव च ८ यथा ते कथितं पूर्वं पितृकल्पेषु वै मया विभ्राजस्तु हराज्ये स्थापयित्वा नरेश्वरः ९ आमन्त्र्य पौरान् प्रीतात्मा ब्राह्मणान् स्वस्ति वाच्य च प्रायात्सरस्तपश्चर्तुं यत्र ते सहचारिणः १० स वै तत्र निराहारो वायुभक्षो महातपाः त्यक्त्वा कामांस्तपस्तेपे सरसस्तस्य पार्श्वतः ११ तस्य संकल्प आसीच्च तेषामेकतरस्य वै पुत्रत्वं प्राप्य योगेन युज्येयमिति भारत १२ कृत्वाभिसंधिं तपसा महता स समन्वितः महातपाः स विभ्राजो विरराजांशुमानिव १३ ततो विभ्राजितं तेन वैभ्राजं नाम तद्वनम् सरस्तच्च कुरुश्रेष्ठ वैभ्राजमिति संज्ञितम् १४

नी ८ ९ यत्र ते हंसाः १० ११ तस्येति योगिनः पुत्रो योगवानेव भविष्यतीति भावः १२ १३ तच्च सरो मानसाख्यम् १४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१५।१६।१७ स्वतंत्रः सप्तमो हंसः यः प्राक् पितृवर्त्तीत्युक्तः १८ बाभ्रव्यवत्सौ राजामात्यौ तयोः श्रोत्रिययोः कुले १९ पांचिकः सर्वजातिषु पंचमः कविः सपां
चालोऽभूत् अपरः षष्ठः स्वसृमः सकंडरीकोऽभूत् २० बह्वृचः ऋग्वेदी अध्वर्युः यजुर्वेदी २१ सर्वसत्वरुतज्ञः सर्वप्राणिभाषाभिज्ञः २२ पूर्वजातोक्तं तं धा
ढ़ तेन हेतुना कोविदा आसन् २३ २४ २५ लेभे ब्रह्मदत्त इति शेषः २६ २७ शेषा इति आढ्यकुले जन्म ब्रह्मकोपजम् दरिद्रकुले जन्म तु पुण्यप्राप्यमि

यत्र ते शकुना राजन् चत्वारो योगधर्मिणः योगभ्रष्टास्त्रयश्चैव देहन्यासकृतोऽभवन् १५ कांपिल्ये नगरे ते तु ब्रह्मदत्तपुरोगमाः जाताः स
प्त महात्मानः सर्वे विगतकल्मषाः १६ ज्ञानध्यानतपःपूजावेदवेदांगपारगाः स्मृतिमंतोऽपि चत्वारस्त्रयस्तु परिमोहिताः १७ स्वतंत्रस्त्वणु
हाज्जज्ञे ब्रह्मदत्तो महायशाः पश्चात्त्वासीत्स कांपिल्ये संकल्पः पूर्वचिंतितः १८ छिद्रदर्शी सुनेत्रश्च तथा बाभ्रव्यवत्सयोः जातौ श्रोत्रिय
दायादौ वेदवेदांगपारगौ १९ सहायौ ब्रह्मदत्तस्य पूर्वजातिसुहृत्तमौ पांचालः पांचिकश्चैव कंडरीकस्तथापरः २० पांचालो बह्वृच
स्त्वासीदाचार्यत्वं चकार ह द्विवेदः कंडरीकस्तु छंदोगोऽध्वर्युरेव च २१ सर्वसत्वरुतज्ञस्तु राजासीदणुहात्मजः पांचालकंडरीकाभ्यां
तस्य सख्यमभूत्तदा २२ ते ग्राम्यधर्माभिरताः कामस्य वशवर्त्तिनः पूर्वजातिकृतेनासन् धर्मकामार्थकोविदाः २३ अणुहस्तु नृप
श्रेष्ठो ब्रह्मदत्तमकल्मषम् राज्येऽभिषिच्य योगात्मा परां गतिमवाप्तवान् २४ ब्रह्मदत्तस्य भार्या तु देवलस्यात्मजाभवत् असितस्य हि
दुर्धर्षा सन्नतिर्नाम नामतः २५ तामेकभावसंपन्नां लेभे कन्यामनुत्तमाम् सन्नतिं सन्नतिमतीं देवलाद्योगधर्मिणीम् २६ पंचमः पां
चिकस्तत्र सप्तजातिषु भारत षष्ठस्तु कंडरीकोऽभूत् ब्रह्मदत्तस्तु सप्तगः २७ शेषा विहंगमा ये वै कांपिल्ये सहचारिणः ते जाताः श्रोत्रिय
कुलेषु दरिद्रे सहोदराः २८ धृतिमान् सुमना विद्वान् तत्वदर्शी च नामतः वेदाध्ययनसंपन्नाश्चत्वारश्छिद्रदर्शिनः २९ तेषां संवित्तथो
त्पन्ना पूर्वजातिकृता तदा ते योगनिरताः सिद्धाः प्रस्थिताः सर्व एव हि ३० आमंत्र्य पितरं तात पिता तानब्रवीत्तदा अधर्म एष युष्मा
कं यन्मां त्यक्त्वा गमिष्यथ ३१ दारिद्र्यमनपाकृत्य पुत्रार्थांश्चैव पुष्कलान् शुश्रूषां सप्रयुज्यैव कथं वै गंतुमर्हथ ३२ तं ते तमूचुर्द्विजाः
सर्वे पितरं पुनरेव च करिष्यामो विधानं ते येन त्वं वर्त्तयिष्यसि ३३ इमं श्लोकं महार्थं त्वं राजानं सहमंत्रिणम् श्रावयेथाः समागम्य ब्रह्म
दत्तमकल्मषम् ३४ प्रीतात्मा दास्यति स ते ग्रामान् भोगांश्च पुष्कलान् यथेप्सितांश्च सर्वार्थान् गच्छ तात यथेप्सितम् ३५

ति भावः २८ छिद्रदर्शिनः छिद्रं महापथं प्रतिगंतुमवकाशस्तद्दर्शिनः स्वसहचारिणां वा भोगासक्तिरूपं दूषणं पश्यंतः छिद्रं दूषणरंध्रयोरिति मेदिनी
२९ संवित् प्रस्थातुमैकमत्यम् ३० ३१ पुत्रार्थान् वंशसंतानगयाश्राद्धादीन् ३२ वर्त्तयिष्यसि जीविष्यसि अस्माभिरुत्सृतस्य तव संतानाद्यपेक्षा नास्ती
ति भावः ३३ इमं सप्तव्याधा इत्यादिं वक्ष्यमाणं श्लोकद्वयम् ३४ ३५ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

परांनिर्वृतिंमोक्षम् ३६ इतिहरिवंशटीकायांत्रयोविंशोऽध्यायः २३ ब्रह्मेति यस्तेषांहंसानामन्यतमस्यपुत्रोभूत्वा योगेनयुज्येयमित्यकामयत सर्वै
भ्राजोनामराजा तेषांसप्तमस्य ब्रह्मदत्तस्यतनयो जायतेत्यन्वयः १ एतदेवव्याकरोतिकदाचिदित्यादिना २ पिपीलिकस्यरुतंशब्दम् ३ ४ व्रीडितेवनतु-
व्रीडितास्वयंयोगाचार्यस्नुतात्वात् बहुतिथंबहुकालमितिशेषः ५ ६ ७ ८ विद्ययायोगबलेन ९ मांप्रत्याथयस्वममप्रतीतिमुत्पादय १० परं अ-

एतावदुक्त्वातेसर्वेपूजयित्वाचतंगुरुम् योगधर्ममनुप्राप्य परांनिर्वृत्तिमाययुः ३६ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्व
णित्रयोविंशोऽध्यायः २३ मार्कंडेयउवाच ब्रह्मदत्तस्यतनयः सर्वेभ्राजस्त्वजायत योगात्मातपसायुक्तोविष्वक्सेनइतिश्रुतः
१ कदाचिद्ब्रह्मदत्तस्तु भार्ययासहितोवने विजहारप्रहृष्टात्मा यथाशच्याशचीपतिः २ ततः पिपीलकरुतंसशुश्रावनराधिपः कामि
नींकामिनस्तस्यपाचतःक्रोशतोभृशम् ३ श्रुत्वातुयाच्यमानांतां क्रुद्धांसूक्ष्मांपिपीलिकाम् ब्रह्मदत्तोमहाहासमकस्मादेवचाहसत्
४ ततः सासन्नतिर्दीनाव्रीडितेवाभवत्तदा निराहारावहुतिथंबभूववरवर्णिनी ५ प्रसाद्यमानाभर्त्रासातमुवाचशुचिस्मिता त्वयाहं
हसिताराजन्नाहंजीवितुमुत्सहे ६ सतत्कारणमाचख्यौनचसाश्रद्दधातितत् उवाचचैनंकुपितानैषभावोस्तिमानुषे ७ कोवैपिपील-
करुतंमानुषोवेत्तुमर्हति ऋतेदेवप्रसादाद्वापूर्वजातिकृतेनवा ८ तपोबलेनवाराजन्विद्ययावानराधिप यद्येषवैप्रभावस्तेसर्वसत्वरु
तज्ञता ९ यथाहमेतज्जानीयांतथाप्रत्याययस्वमाम् प्राणान्वापिपरित्यक्ष्येराजन्सत्येननेशपे १० तत्तस्यावचनंश्रुत्वामहिष्याःपरुषा
क्षरम् सराजापरमापन्नोदेवश्रेष्ठमगात्ततः ११ शरणंसर्वभूतेशंभक्त्यानारायणंहरिम् समाहितोनिराहारः षड्रात्रेणमहायशाः १२
ददर्शदर्शनेराजादेवनारायणंप्रभुम् उवाचचैनंभगवान्सर्वभूतानुकंपकः १३ ब्रह्मदत्तप्रभातेत्वंकल्याणंसमवाप्स्यसि इत्युक्त्वाभ
गवान्देवस्तत्रैवांतरधीयत १४ चतुर्णांतुपितायोसौब्राह्मणानांमहात्मनाम् श्लोकंसाधीत्यपुत्रेभ्यःकृतकृत्यइवाभवत् १५ सरा-
जानमथान्विच्छन्सहमंत्रिणमच्युतम् नददर्शांतरंकिंचित्श्लोकंश्रावयितुंतदा १६ अथराजासरःस्नातोलब्ध्वानारायणाद्वरम् प्रविवे
शापुरींप्रीतोरथमारुह्यकांचनम् १७ तस्यरश्मीन्प्रत्यगृह्णात्कंडरीकोद्विजर्षभः चामरव्यजनंचापिबाभ्रव्यःसमवाक्षिपत् १८ इद-
मंतरमित्येवततःसब्राह्मणस्तदा श्रावयामाससराजानंश्लोकंतसचिवोचतौ १९ सप्तव्याधादशार्णेषुमृगाःकालंजरेगिरौ चक्रवाकाः
शरद्वीपेहंसाःसरसिमानसे २०

त्वंतं आपन्नः आपद्ग्रस्तोभूत् ११ १२ १३ १४ १५ अंतरमवसरम् १६ सरःस्नातः सरसिस्नातः १७
बाभ्रव्यः पांचालः १८ इदमंतरमित्येव अयमवसरइतिमत्वा १९ २० छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तेइतितेषांमध्येऽभिजाताः कुलीनाश्चत्वारोवयमितिशेषः यूयंचयइतिशेषः अवसीदथयोगाद्भ्रष्टतयाविशीर्णाःस्थ २१ २२ स्वस्तरश्मिप्रतोदौतावित्यत्र
समुदायिधर्मेणसमुदायोविशेष्यते कृतंपिबंतावित्यत्रपिबदपिबत्समुदायेपिबंतावितिवत् छत्रिणोगच्छंतीत्यत्रछत्र्यछत्रिसमुदायेवालिंगसमवायाच्छ
त्रिणइतिविशेषणंतद्वत् एवंपतितव्यजनावित्यपि २३ प्रत्यागच्छत्पुरमितिशेषः २४ तंयोगंपूर्वजन्मनिअभ्यस्तम् २५ २६ अथैनमिति यासुरोर्दोग्ध्रीकौशि
कदायादैःपित्तर्थंप्रयुक्ता सैवभार्यारूपेणराजानमेत्ययोगंस्मारितवती मत्स्यपकारायेति केचित्पौराणिकींकथामाचक्षते योगाद्धेतोः २७ २८ २९ ३० सांख्यं

तेभिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः प्रस्थितादीर्घमध्वानंयूयंकिमवसीदथ २१ तच्छ्रुत्वामोहमगमत्ब्रह्मदत्तोनराधिपः सचि
वश्चास्यपांचाल्यःकंडरीकश्चभारत २२ स्वस्तरश्मिप्रतोदौतौपतितव्यजनावुभौ दृष्ट्वाविमूढुरस्त्वस्थाःपौराश्चसुहृदस्तथा २३ मु-
हूर्तमेवराजासमहताप्यारथेस्थितः प्रतिलभ्यततःसंज्ञांप्रत्यागच्छदरिंदमः २४ ततस्तेनस्मरःस्मृत्वायोगंतमुपलभ्यच ब्राह्मणान्विपु-
लैरर्थैर्भोगैश्चसमयोजयत् २५ अभिषिच्यस्वराज्येतुविष्वक्सेनमरिंदमम् जगामब्रह्मदत्तोथसदारोवनमेवह २६ अथैनंसन्नतिर्धी
रादेवलस्यसुतातदा उवाचपरमप्रीतायोगाद्वनगतंनृपम् २७ जानंत्वातंमहाराजपिपीलिकरुतज्ञताम् चोदितःक्रोधमुद्दिश्यसक्तःका
मेष्ववैमया २८ इतोवयगुमिथ्यामोगतिमिष्टामनुत्तमाम् तवचांतर्हितोयोगस्ततःसंस्मारितोमया २९ सराजापरमप्रीतःपत्न्याःश्रुत्वाव
चस्तदा प्राप्ययोगबलाद्देवगतिंप्रापसुदुर्लभाम् ३० कंडरीकोपिधर्मात्मासांख्ययोगमनुत्तमम् प्राप्ययोगगतिंसिद्धोविशुद्धस्तेनक-
र्मणा ३१ क्रमप्रणीयपांचाल्यःशिक्षाचोत्पाद्यकेवलाम् योगाचार्यगतिंप्रापयशश्चाग्र्यंमहातपाः ३२ एवमेतत्पुरावृत्तममप्रत्यक्षमच्यु
त तद्धारयस्वगांगेयश्रेयसायोक्ष्यसेततः ३३ येचान्येधारयिष्यंतितेषांचरितमुत्तमम् तिर्यग्योनिषुतेजातुनगमिष्यंतिकर्हिचित् ३४
श्रुत्वाचेदमुपाख्यानमहार्थंमहतांगति योगधर्मोहृदितस्सदापरिवर्त्ततिभारत ३५ सतेनैवानुबंधेनकदाचिल्लभतेशमम् ततोयोगगतिंया-
तिसुशुद्धांताक्कचिद्दुर्लभाम् ३६ वैशंपायनउवाच एवमेतत्पुरागीतंमार्कंडेयेनधीमता श्राद्धस्यफलमुद्दिश्यसोमस्याप्या-
यनायवै ३७

प्राप्ययोगमतिःयोगनिष्ठः पाठांतरेसांख्यंयोगगतिंचप्राप्येत्यन्वयः ३१ क्रमंवैदिकप्रसिद्धंप्रणीयविरच्यशिक्षांवर्णानांस्थानं
करणप्रयत्नपूर्वकमुच्चारणसंप्रदायम् ३२ एतत्श्राद्धमाहात्म्यम् ३३ तेषांवागुदुष्टादीनाम् ३४ परिवर्ततिसर्वभावेनतिष्ठति ३५ तेनैवहृदियोगावस्था
नेन ३६ एवमिति श्राद्धस्यफलंपितॄणांतृप्तिः साचसोमाप्यायनद्वाराभवति तदेतद्देवानामन्नंतंदेवाभक्षयंतीतिसोमस्यदेवान्नत्वश्रवणात् देवभावंग-
ताःपितरःसाक्षादेवसोमंपिबंतीत्यर्थः ३७ श्रीगोपीजनवल्लभायनमः ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

येतुभूमौसंतितेपिसोमद्वारैवतृप्यंतीत्याहसोमोहीति भूमिस्थान्पितॄन्दिव्यौषध्यादिद्वारासोमस्तर्पयतीत्यर्थः एनेनअग्नौप्रास्ताहुतिः सम्यगादित्यमु
पतिष्ठतइतिस्मृतेः ब्रह्मणाग्नौस्मार्ताग्नौश्रौताग्नौवापितृबुद्ध्यायद्धुतंतदादित्यंगच्छति आदित्यस्यसुषुम्नाख्येनरश्मिनासोमस्याप्यायनंभवतिततःपि
तृणांतृप्तिरितिसर्वेषांपूर्वत्वादादित्यएवश्राद्धदेवोस्त्वित्युत्तरं पूर्वंक्तंतस्यकथंवैश्राद्धदेवत्वमादित्यस्यविवस्वतइतिप्रश्नस्यनिगूढमितिदिक् ३८ इति
हरिवंशटीकायांचतुर्विंशोऽध्यायः २४ पिता मानसात्संकल्पात् विधित्सतः विधातुमिच्छतः १ तत्रप्रजासर्गेतस्थौनिष्ठावानभूत् अतएवसोत्रिः भूता
नांशुभान्येवस्वतनयैःसह कर्मादिनाअचचार २ काष्ठादिवन्निश्चेष्टः ३ अनुत्तरंनामममौनाख्यंसर्वेंद्रियनिग्रहरूपम् ४ अनिमिषस्यनिमेषरहितस्येत्यने
नसूर्यादिबाह्यज्योतीरश्मिषुधारणा तस्याःफलंसोमत्वंसोमवत्सुक्लभास्वररूपत्वंकीटभृंगन्यायेनध्येयसारूप्यंप्राप्तइत्यर्थः महासत्वस्येत्यनेनतापकस्यर

सोमोहिभगवान्देवोलोकस्याप्यायनंपरम् वृष्णिवंशप्रसंगेनतस्यवंशंनिबोधमे ३८ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंश
पर्वणिपितृकल्पसमाप्तिर्नामचतुर्विंशोऽध्यायः २४ वैशंपायनउवाच पितासोमस्यवैराजन्जज्ञेऽत्रिर्भगवानृषिः ब्रह्म
णोमानसात्पूर्वंप्रजासर्गंविधित्सतः १ तत्रात्रिःसर्वभूतानांतस्थौस्वैस्तनयैर्युतः कर्मणामनसावाचाशुभान्येवचचारसः २ अहिंस्रःस
र्वभूतेषुधर्मात्मासंशितव्रतः काष्ठकुड्यशिलाभूतऊर्ध्वबाहुर्महाद्युतिः ३ अनुत्तरंनामतपोयेनतप्तंमहत्पुरा त्रीणिवर्षसहस्राणिदिव्या
नीतिहिनःश्रुतम् ४ तत्रोर्ध्वरेतसस्तस्यस्थितस्यानिमिषस्यह सोमत्वंतनुरापेदेमहासत्वस्यभारत ५ ऊर्ध्वमाचक्रमेतस्यसोमत्वंभावि
तात्मनः नेत्राभ्यांवारिसुस्रावदशधाद्योतयद्दिशः ६ तंगर्भंविधिनाहृष्टादशदेव्योदधुस्तदा समेत्यधारयामासुर्नचताःसमशक्नुवन् ७
सताभ्यःसहसैवाथदिग्भ्योगर्भःप्रभान्वितः पपातभासयन्लोकान्शीतांशुःसर्वभावनः ८ यदानधारणेशक्तास्तस्यगर्भस्यतादिशः
ततस्ताभिःसहैवाशुनिपपातवसुंधराम् ९ पतितंसोममालोक्यब्रह्मालोकपितामहः रथमारोपयामासलोकानांहितकाम्यया १० स-
हिवेदमयस्तातधर्मात्मासत्यसंग्रहः युक्तोवाजिसहस्रेणसितेनेतिहिनःश्रुतम् ११

जसोऽभावात्शांतप्रकाशतेजोरूपत्वंदर्शितंतन्वाः ५
भावितात्मनः शुद्धशांतप्रकाशशुक्लभास्वररूपेणतेजसारंजितशरीरस्य नेत्राभ्यांनेत्रतःसोमत्वंउक्तरूपंतेजःऊर्ध्वमाचक्रमे तत्रप्रकारमाहवारीति वारि
जलंभूत्वासुस्रावेति ६ देव्योदिग्देवताः नचसमशक्नुवन्धारयितुम् ७ ताभ्यःसकाशात्सर्वभावनः औषध्यादिद्वारेणसर्वेषामाप्यायनकरः ८ ताभिःता
भ्यःसहैवयुगपदेव ९ पतितम् लतारूपेणस्थितम् आलोक्य १० रथस्वरूपमाहसहीति वेदमयः वेदैर्दारुभिरिवनिर्मितः धर्मोविग्रहादिः तत्स्वरूपोध- ३६
र्मात्मा सत्यंब्रह्मसंगृह्यतेज्ञानेनआत्मसाक्रियतइतिसत्यसंग्रहः वाजिस्थानीयामंत्राः ११

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

परमात्मनिविष्णुरूपे अतएवयागेसोमंरथेनानीयतस्यआतिथ्यार्थंवैष्णवीमिष्टिंनिर्वपंतियाज्ञिकाः १२ ऋग्भिरित्यनेनैवतदारूढानिसामान्यपिल-
क्ष्यंते बहुलैर्बहुभिः १३ आप्यायमानम् अंशुरंशुष्टेदेवसोमाप्यायतामितिमंत्रेणऋत्विग्भिः पुष्टीक्रियमाणंतेजोदिविमंडलरूपेणस्थित्वासर्वाल्लोकान
वभासयति १४ सः ब्रह्मातेनसोमवतारथमुख्येन १५ तस्यसोमस्यच्यावितंरथवेगेनक्षारितम् १६ त्रयोदेवापितृभूतलोकाः चत्वारोनरपशुपक्षिसरीसृपाः
भूरादयोजरायुजादयश्चेत्यन्ये १७ यथादशवारमावृत्तानवनवतिरेवंदशगुणिताः दशदशतिः तेनदशतिशब्दः षष्टिसप्ततिवत् शतवाची तेनसहस्रंपद्मा-
नांवत्सराणामित्यर्थः १८ हिरण्यवर्णाःरजतवत्शुक्लाः हिरण्यंस्वर्णरूप्ययोरितिविश्वः तासामपांनिधि आश्रयः अतएवमणिद्वाराचंद्रोजलंक्षरतिसूर्यइ-

तस्मिन्निपतितेदेवाःपुत्रेऽत्रेःपरमात्मनि तुष्टुवुर्ब्रह्मणःपुत्रामानसाःसप्तयेसुताः १२ तथैवांगिरसस्तत्र भृगुरेवात्मजैःसह ऋग्भिर्य
जुर्भिर्बहुलैरथर्वांगिरसैरपि १३ तस्यसंस्तूयमानस्यतेजःसोमस्य भास्वतः आप्यायमानं लोकांस्त्रीन् भासयामाससर्वशः १४ सतेन
रथमुख्येनसागरांतांवसुंधराम् त्रिःसप्तकृत्वोऽतियशाश्चकाराभिप्रदक्षिणम् १५ तस्ययच्च्यावितंतेजः पृथ्वीमन्वपद्यत औष
ध्यस्ताःसमुद्भूतास्तेजसाप्रज्वलंत्युत १६ ताभिर्धार्यास्त्रयोलोकाः प्रजाश्चैवचतुर्विधाः पोष्टाहिभगवान्सोमोजगतोजगतीपते १७
सलब्धतेजाभगवान्संस्तवैस्तैश्चकर्मभिः तपस्तेपेमहाभागपद्मानांदशतीर्दश १८ हिरण्यवर्णायादेव्योधारयंत्यात्मनाजगत्
निधिस्तासामभूद्देवःप्रख्यातःस्वेनकर्मणा १९ ततस्तस्मैददौराज्यंब्रह्माब्रह्मविदांवरः बीजौषधीनांविप्राणामपांचजनमेजय २०
सोऽभिषिक्तोमहाराजराजराज्येनराजराट् लोकांस्त्रीन्भासयामासस्वभासाभास्वतांवरः २१ सप्तविंशतिमिंदोस्तुदाक्षायण्योमहा
व्रताः ददौप्राचेतसोदक्षोनक्षत्राणीतियाविदुः २२ सतत्प्राप्यमहद्राज्यंसोमःसोमवतांवरः समाजह्रेराजसूयंसहस्रशतदक्षिणम् २३
होतास्यभगवानत्रिरध्वर्युर्भगवान्भृगुः हिरण्यगर्भश्चोद्गाताब्रह्माब्रह्मत्वमेयिवान् २४ सदस्यस्तत्रभगवान्हरिर्नारायणःस्वय
म् सनत्कुमारप्रमुखैराद्यैर्ब्रह्मर्षिभिर्वृतः २५ दक्षिणामददात्सोमस्त्रीन्लोकानितिनःश्रुतम् तेभ्योब्रह्मर्षिमुख्येभ्यःसदस्येभ्यश्च
भारत २६ तंसिनिश्चकुहूश्चैवद्युतिःपुष्टिःप्रभावसुः कीर्तिर्धृतिश्चलक्ष्मीश्चनवदेव्यःसिषेविरे २७

वाग्निम् तेनयथार्कोभासांनिधिरेवंचंद्रोऽपां
निधिः १९ २० राजराज्येनसाम्राज्यविधानेन २१ इंदोः भार्याइतिशेषः २२ सोमवतांपितॄणांवरः पतिः सोमःसुधांशुकर्पूरकुबेरपितृदैवतेइतिविश्वःसहस्रशतं-
लक्षंगावोदक्षिणायस्मिन् २३ हिरण्यगर्भअंगिराःतस्यारण्यकेसूत्रावतारत्वावगमात्हिरण्यगर्भत्वं ब्रह्मावसिष्ठश्चतुर्मुखोवा २४ सदस्यःउपद्रष्टासप्तदश-
ऋत्विक्सदस्यंसप्तदशंकौषीतकिनःसमामनंतिसकर्मणामुपद्रष्टाभवतीतिगृह्यात् २५ सदस्येभ्यः सभ्येभ्यः २६ सिनिः सिनीवाली सैडपर्वणियापूर्वामावा
स्यासासिनीवालीयाउत्तरासाकुहूः तत्साहचर्यात्द्युतिपुष्टीअपिपूर्वोत्तरपौर्णमास्यौ सिषेविरेनित्यमितिशेषः अश्विन्यादयस्तुपर्यायेणैवसेवंतइतिभावः २७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

प्राप्य ताभिःसहेतिशेषः अन्यथातत्कीर्त्तनवैयार्थ्यापत्तिः अतएवस्वमूर्त्त्यासहदशधादशभिःप्रकारैर्दिशोदशभासयन्निलकक्रमम् २८ विबभ्राम ऐ-
श्वर्यमदेनाविनयान्चलिता अनयेनअनीत्या आहृताताडिता २९ अनयमेवाह वृहस्पतेरिति ३० व्यसर्जयत् दत्तवान् तस्मिन्सोमबृहस्पतिःसंरब्धो
युद्धायोद्युक्तो ऽभूत्सार्द्धश्लोकः ३१ उशनेति तस्याकार्यकारित्वाद्क्रूरत्वं गमतस्यसोमस्यदैत्यगुरुत्वादुशनाः शुक्रःपार्ष्णिंजग्राह तदातस्मिन्नेवकाले-
आंगिरसोंगिरसःशिष्योरुद्रः वृहस्पतेःपार्ष्णिग्राहो ऽभूदितिद्वयोःसंबंधः तत्रहेतुःसहीति सरुद्रोबृहस्पतेः पितुः अंगिरसः शिष्यः ३२ तेनगुरुपुत्रस्नेहे
नेति आजगवं अजस्यगोश्चश्रृंगाभ्यांनिर्मितम् अजस्यरुद्रस्यगौः वृषभःनंदीतेनशिवसारूप्यप्राप्ययोगात्कामरूपत्वंचप्राप्यपत्सूर्वस्वशरीरमुत्सृष्ट-

प्राप्यावभृथमव्यग्रःसर्वदेवर्षिपूजितः विरराजाधिराजेंद्रोदशधाभासयन्दिशः २८ तस्यतत्प्राप्यदुष्प्राप्यमैश्वर्यंमुनिसत्कृतम्
विबभ्रामामतिस्तात विनयादनयाहता २९ वृहस्पतेःसवैभार्यांतारांनामयशस्विनीम् जहारतरसासोमोऽवमत्यांगिरःसुतान् ३०
सयाच्यमानोदेवैश्चतथादेवर्षिभिःसह नैवव्यसर्जयत्तारांतस्मैआंगिरसेतदा ससंरब्धस्ततस्तस्मिन् देवाचार्योबृहस्पतिः ३१ उश
नास्तस्यजग्राह पार्ष्णिमांगिरसस्तदा सहिशिष्योमहातेजाःपितुःपूर्वोबृहस्पतेः ३२ तेनस्नेहेनभगवान्रुद्रस्तस्यबृहस्पतेः पार्ष्णि
ग्राहोऽभवद्देवःप्रगृह्याजगवंधनुः ३३ तेनब्रह्मशिरोनामपरमास्त्रंमहात्मना उद्दिश्यदैत्यानुत्सृष्टंयेनैषांनाशितंयशः ३४ तत्रतद्युद्ध
मभवत्प्रख्यातंतारकामयम् देवानांदानवानांचलोकक्षयकरंमहत् ३५ तत्रशिष्टास्तुयेदेवास्तुषिताश्चैवभारत ब्रह्माणंशरणंजग्मु
रादिदेवंसनातनम् ३६ ततोनिवार्योशनसंरुद्रंज्येष्ठंचशंकरम् ददावंगिरसेतारांस्वयमेवपितामहः ३७ तामंतःप्रसवांदृष्ट्वातारां-
माहबृहस्पतिः मदीयायांनतेयोनौगर्भोधार्यःकथंचन ३८ अयोनावुत्सृजत्तंसाकुमारंदस्युहंतमम् इषीकास्तंबमासाद्यज्वलंतमि
वपावकम् ३९ जातमात्रःसभगवान्देवानामक्षिपद्वपुः ततःसंशयमापन्नाइमामकथयन्सुराः ४० सत्यंब्रूहिसुतःकस्यसोमस्याथबृ
हस्पतेः पृच्छ्यमानायदादेवैर्नाहसासाध्वसाधुवा ४१ तदातांशप्तुमारब्धःकुमारोदस्युहंतमः तंनिवार्यततोब्रह्मातारांपप्रच्छसंशयम्
४२ यदत्रतथ्यंतद्ब्रूहितारेकस्यसुतस्त्वयम् साप्रांजलिरुवाचेदंब्रह्माणंवरदंप्रभुम् ४३

तस्यश्रृंगाज्जातं आजगवमितिया ३३ तेनरुद्रेण
एषांदैत्यानां ३४ तारकामयंतारानिमित्तत्वात्प्रधानम् ३५ शिष्टाधर्मपराःदेवाः वृहस्पतिपक्षीयाः तुषः दोषकंचुकंसंजातंयेषांतेगुरुदारहर्त्तुःसोमस्यप-
क्षपातिनस्तुपितादेवाः ३६ ददौमत्सरपर्यंत ३७ अंतःप्रसवांगर्भवतीम् ३८ अयोनौअस्थाने तदेवाहइषीकेति दस्युहंतमंअतिशयेनदस्यूनांहंतारम् ३९
अक्षिपत्स्वतेजसातिरश्चकार ४० ४१ पप्रच्छ मातरंविनाब्रह्मापिगर्भस्यधातारंनवेदेतिभावः ४२ ४३ ७ ७ ७ ७

३७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

धातागर्भस्याधायकः अतएवप्रजायाः पतिःरेतःसिचः पुत्रोनक्षत्रपतेरितिभावः तथाचश्रुतिः जनयितुःपुत्रोभवतिसांपरायेमोघंवेत्ताकुरुतेतंतुमेतमिति
४४ सूर्योदयेऽर्कसांनिध्यात्स्वायेणास्तंगतएवभवति यदात्वुदेति तदा उत्पातंजनयतीत्याह प्रतीति ४५ ततःबुधात् वैराजोमनुस्तस्यपुत्रिकाइला ४६ यस्य
पुरूरवसः तत्रऔरूत्येनिमित्तेसति ४७ क्षीणमंडलः अल्पपरिधिः ४८ ४९ ५० ५१ इतिहरिवंशटीकायांपंचविंशोऽध्यायः २५ बुधस्येति १ शत्रु-

सोमस्येतिमहात्मानंकुमारंदस्युहंतमम् ततस्तंमूर्ध्न्युपाघ्रायसोमोधाताप्रजापतिः ४४ बुधइत्यकरोन्नामतस्यपुत्रस्यधीमतः प्रतिकू
लंचगगनेसमभ्युत्तिष्ठतेबुधः ४५ उत्पादयामासततःपुत्रंवैराजपुत्रिका तस्यापत्यंमहाराजोबभूवैलःपुरूरवाः ४६ उर्वश्यांजज्ञिरेयस्य
पुत्राःसप्तमहात्मनः प्रसह्यधर्षितस्तत्रसोमोवैराजयक्ष्मणा ४७ ततोयक्ष्माभिभूतस्तुसोमःप्रक्षीणमंडलः जगामशरणायाथपितरंसो
ऽत्रिमेवतु ४८ तस्यतत्तापशमनंचकारात्रिर्महातपाः सराजयक्ष्मणामुक्तःश्रियाजज्वालसर्वतः ४९ एवंसोमस्यवैजन्मकीर्तितंकीर्तिवर्द्धन
म् वंशमस्यमहाराजकीर्त्यमानंचमेशृणु ५० धन्यमारोग्यमायुष्यंपुण्यंसंकल्पसाधनम् सोमस्यजन्मश्रुत्वैवपापेभ्योविप्रमुच्यते ५१ इ
तिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिपंचविंशोऽध्यायः २५ वैशंपायनउवाच बुधस्यतुमहाराजविद्वान्पुत्रःपुरूरवाः ते
जस्वीदानशीलश्चयज्वाविपुलदक्षिणः १ ब्रह्मवादीपराक्रांतःशत्रुभिर्युधिदुर्जयः आहर्त्ताचाग्निहोत्रस्ययज्ञानांचमहीपतिः २ सत्यवा
दीपुण्यमतिःकाम्यःसंवृतमैथुनः अतीवत्रिषुलोकेषुयशसाऽप्रतिमःसदा ३ तंब्रह्मवादिनंक्षांतंधर्मज्ञंसत्यवादिनम् उर्वशीवरयामा-
सहित्वामानंयशस्विनी ४ तयासहावसद्राजावर्षाणिदशपंचच पंचषट्सप्तचाष्टौचदशचाष्टौचभारत ५ वनेचैत्ररथेरम्येतथामंदा-
किनीतटे अलकायांविशालायांनंदनेचवनोत्तमे ६ उत्तरान्सकुरून्प्राप्यमनोरथफलद्रुमान् गंधमादनपादेषुमेरुपृष्ठेतथोत्तरे ७ एते
षुवनमुख्येषुसुरैराचरितेषुच उर्वश्यासहितोराजारेमेपरमयामुदा ८ देशेपुण्यतमेचैवमहर्षिभिरभिष्टुते राज्यंसकारयामासप्रयागे
पृथिवीपतिः ९ तस्यपुत्राबभूवुस्तेसप्तदेवसुतोपमाः दिविजातामहात्मानआयुर्धीमानमावसुः १० विश्वायुश्चैवधर्मात्माश्रुतायुश्च
तथापरः दृढायुश्चवनायुश्चशतायुश्चोर्वशीसुताः ११ जनमेजयउवाच गांधर्वीचोर्वशीदेवीराजानंमानुषंकथम् देवान्उत्सृ
ज्यसंप्राप्तातन्नोब्रूहिबहुश्रुत १२ वैशंपायनउवाच ब्रह्मशापाभिभूतासामानुषंसमपद्यत ऐलंतुसावरारोहासमयात्समुपस्थि
ता १३

भिर्दुर्जयइतिसंबंधः २ काम्यःकमनीयः ३ मानंदेवभोग्याहंकथंमानुषंगच्छेयमितिगर्वम् ४ तयेति दशादिसंख्याष्टकंक्रमात् उत्तरस्थेनेचैत्रर-
थादिस्थानाष्टकेनान्वेति ५ विशालायांबदर्याम् ६ ७ ८ ९ दिविस्वर्गेजाताः १० ११ १२ १३ ७९ ७९ ७९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१४ घृतमात्राघृतस्यलेशः एकंकालंसकृदित्यर्थः घृतस्यस्तोकंसकृदन्हआश्नामीतिलिंगात् १५ त्वत्तःत्वयि १६ १७ एकोनषष्टिंपूर्वोक्तदशादिसं- अ० १
ख्यानांसंकलनात् १८ १९ २० भेत्स्यतिसमयम् २१ २२ २३ अन्ह्रियतन्हृतः एवमुक्तइतिसंबंधः २४ २५ २६ जायया प्रधावितः २७ पदंग २६ १

आत्मनःशापमोक्षार्थंसमयंसाचकारह अनग्नदर्शनंचैवसकामायांचमैथुनम् १३ द्वौमेषौशयनाभ्याशेसदाबद्धौचातिष्ठतः घृतमा
त्रंतथाहारःकालमेकंतुपार्थिव १४ यद्येषसमयोराजन्यावत्कालंचतेदृढः तावत्कालंतुवत्स्यामित्वत्तःसमयएषनः १५ तस्यास्तंसम
यंसर्वंसराजासमपालयत् एवंसावसतीतत्रपुरूरवसिभामिनी १६ वर्षाण्येकोनषष्टिंस्तुतत्सक्ताशापमोहिता उर्वश्यांमानुषस्थायां
गंधर्वाश्चिंतयान्विताः १७ गंधर्वाऊचुः चिंतयध्वंमहाभागायथासातुवरांगना समागच्छेत्पुनर्देवानुर्वशीस्वर्गभूषणम् १८
ततोविश्वावसुर्नामतत्राहवदतांवरः मयातुसमयस्ताभ्यांक्रियमाणःश्रुतःपुरा १९ व्युत्क्रांतसमयसावैराजनंत्यक्ष्यतेयथा तदहंवेद्म्यशे
षेणयथाभेत्स्यत्यसौनृपः २० ससहायोगमिष्यामियुष्माककार्यसिद्धये एवमुक्त्वागतस्तत्रप्रतिष्ठानंमहायशाः २१ निशायामथचा-
गम्यमेषमेकंजहारसः मातृवद्वर्ततेसातुमेषयोश्चारुहासिनी २२ गंधर्वागमनंज्ञात्वाशापांतंचयशस्विनी राजानमब्रवीत्तत्रपुत्रोमेऽह्रि
यतेतिसा २३ एवमुक्तोविनिश्चित्यनग्नोनैवोदतिष्ठत नग्नंमांद्रक्ष्यतेदेवीसमयोवितथोभवेत् २४ ततोभूयस्तुगंधर्वाद्वितीयंमेषमाद
दुः द्वितीयेतुहृतेमेषेऐलंदेव्यब्रवीदिदम् २५ पुत्रोमेऽपहृतोराजन्ननाथायाइवप्रभो एवमुक्तस्तथोत्थायनग्नोराजाप्रधावितः २६ मेष
योःपदमन्विच्छन्गंधर्वैर्विद्युदप्यथ उत्पादितासुमहतीययातद्भुवनमहत् २७ प्रकाशितंवैसहसाततोनग्नमवैक्षत नग्नंदृष्ट्वाति-
रोभूतासाप्सराकामरूपिणी २८ उत्सृष्टावुरणौदृष्ट्वाराजागृह्यागतोगृहे अपश्यन्नुर्वशींतत्रविललापसुदुःखितः २९ चचारपृथि-
वींसर्वांमार्गमाणइतस्ततः अथापश्यत्सतांराजाकुरुक्षेत्रेमहाबलः ३० प्लक्षतीर्थेपुष्करिण्याहैमवत्यांसमाप्लुताम् क्रीडंतीमप्सरोभि
श्चपंचभिःसहशोभनाम् ३१ तांक्रीडंतींततोदृष्ट्वाविललापसुदुःखितः साचापितत्रतंदृष्ट्वाराजानमविदूरतः ३२ उर्वशीताःसखीः
प्राहसएषपुरुषोत्तमः यस्मिन्नहमवात्संवैदर्शयामासतन्नृपम् ३३ समाविग्नास्तुताःसर्वाःपुनरेवनराधिप जायेहतिष्ठमनसाघोरेव
चसितिष्ठह ३४ एवमादीनिसूक्तानिपरस्परमभाषत उर्वशीचाब्रवीदैलंसगर्भाहंत्वयाप्रभो ३५

तिच्छिन्हम् २८ २९ उरणौमेषौ गृह्यगृही
त्वा ३० ३१ हैमवत्यांहैमानिसौवर्णानिपद्मादीनिनद्यत्याम् हैमवतीसंज्ञायामितिवा ३२ ३३ ३४ समाविग्नाःपुनरुर्वशीगमनशंकया हयेजायेमनसातिष्ठघो ३८
रेइतिसूक्तादिमर्थतः पठतिजायेइति हयेइत्यस्यव्याख्यानंवचसीति हयेतिष्ठेतिसंबंधात्जायेइत्यस्याः संबुद्धेःपादादिस्थत्वादाद्युदात्तत्वम् ३५ सगर्भाहमि
त्यपगमनानर्हत्वमुक्तम् ३६ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३७ ३८ ३९ समतांसारूप्यंसालोक्यंवा ४० ४१ ४२ निक्षिप्येत्यनेनपुत्रान् अग्निंचसहपुरंनप्रवेशयेदितिदर्शितम् सः त्रेताग्निंग्रामाद्बहिः प्राङ्निहित
म् तत्रगत्वास्वस्थानेनापश्यत् अपितुअश्वत्थंदृष्टवान् तत्राग्निस्थानेअभ्येत्याग्निमित्यपिपठंति ४३ तंअश्वत्थंशमीजातंशमीगर्भोत्पन्नंनाशंअदर्शन
म् ४४ अरणीमंथनेनाग्न्युत्पादनार्थंकाष्ठद्वयंततोऽश्वत्थात्तद्ग्राह्यमितिसमादिशत् ४५ तेषांगंधर्वाणाम् ४६ त्रेतात्रित्ववेशि स्यम् गुणआर्षः पृषोदरादि

संवत्सरात्कुमारास्ते भविष्यंतिनसंशयः निशामेकांचनृपते निवत्स्यसिमयासह ३७ इतोजगामराजाथस्वपुरंतुमहायशाः गतेसंव-
त्सरेभूयउर्वशीपुनरागमत् ३८ उषितश्चतयासार्द्धं एकरात्रंमहायशाः उर्वश्यथाब्रवीदैलंगंधर्वावरदास्तव ३९ तान्वृणीष्वमहाराज
ब्रूहिचैनांस्त्वमेवहि वृणीष्वसमतांराजन्गंधर्वाणांमहात्मनाम् ४० तथेत्युक्त्वावरंवव्रेगंधर्वाश्चतथास्त्विति पूरयित्वाग्निनास्थालींगं
धर्वाश्चतमथाब्रुवन् ४१ अनेनेष्ट्वासलोकान्नःप्राप्स्यसित्वंनराधिप तानादायकुमारांस्त्वंनगरायोपचक्रमे ४२ निःक्षिप्याग्निमरण्येतुस
पुत्रस्तुगृहंययौ सत्रेताग्निंतुनापश्यदश्वत्थंतत्रदृष्टवान् ४३ शमीजातंतुतंदृष्ट्वा अश्वत्थंविस्मितस्तदा गंधर्वेभ्यस्तदाशंसत् अग्निनाशं
ततस्तुसः ४४ श्रुत्वातमर्थमखिलमरणींतुसमादिशत् अश्वत्थादरणींकृत्वामथित्वाग्निंयथाविधि मथित्वाग्निंत्रिधाकृत्वा अयजत्सनरा
धिपः इष्ट्वायज्ञैर्बहुविधैर्गतस्तेषांसलोकताम् ४६ गंधर्वेभ्योवरंलब्ध्वात्रेताग्निंसमकारयत् एकोग्निःपूर्वमेवासीदैलस्त्रेतामकारयत् ४७
एवंप्रभावोराजासीदैलस्तुनरसत्तम देशेपुण्यतमेचैवमहर्षिभिरभिष्टुते ४८ राज्यंसकारयामासप्रयागेपृथिवीपतिः उत्तरेजान्हवीतीरे-
प्रतिष्ठानेमहायशाः ४९ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिऐलोत्पत्तिर्नामषड्विंशोऽध्यायः २६ वैशंपायनउवाच
ऐलपुत्राबभूवुस्तेसर्वेदेवसुतोपमाः दिविजातामहात्मानआयुर्धीमानमावसुः १ विश्वायुश्चैवधर्मात्मा श्रुतायुश्चतथापरः दृढायुश्चव
नायुश्चशतायुश्चोर्वशीसुताः अमावसोश्चदायादोभीमोराजाथनग्नजित् २ श्रीमान्भीमस्यदायादोराजासीत्कांचनप्रभः विद्वांस्तुकां
चनस्यापिसुहोत्रोभून्महाबलः ३ सोहोत्रिरभवज्जह्नुःकेशिन्यागर्भसंभवः आजह्रेयोमहासत्रंसर्वमेधमहामखम् ४ पतिलोभेनयंगं-
गापतित्वेभिससारह नेच्छतःप्लावयामासतस्यगंगाचतत्सदः ५ सतयाप्लावितंदृष्ट्वायज्ञवाटंसमंततः सोहोत्रिरब्रवीद्गंगांक्रुद्धोभरत
सत्तम ६ एषतेविफलंयत्नंपिबन्नंभःकरोम्यहम् अस्यगंगेवलेपस्यसद्यःफलमवाप्नुहि ७ राजर्षिणाततःपीतांगंगांदृष्ट्वामहर्षयःउप
निन्युर्महाभागांदुहितृत्वेनजान्हवीम् ८

त्वाद्धाविकारः अग्नित्रयंअकल्पयदित्यर्थः ४७ ४८ ४९ इतिहरिवंशेटीकायांषड्विंशोऽध्यायः २६ ऐलेति १ अ
थनग्नजिदितिद्वितीयःपुत्रः २ विदुषःपुत्रःसुहोत्रः ३ महत्सत्रम् अन्नदानंयत्रतंमखंसर्वमेधसंज्ञम् ४ पतिलोभेनपतिगुणलोभेन ५ ६ ७ ८ ९ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 जन्होर्भार्यात्वमिच्छंत्यागंगायाः दुहितृत्वप्राप्तेर्वध्यसंकल्पत्वंजातमित्याशंक्याह युवनाश्वस्येति केनचिन्निमित्तेनयुवनाश्वोगंगांमानुषीभवेतिशशाप साच
तस्यैवदुहितृत्वंप्राप्यात्मसंकल्पमपिसत्यंचकारेतिसार्धस्यार्थः गंगास्त्वार्धेनकावेरीनिर्ममे पाठांतरेगंगायाअर्धेननिर्मितांकावेरींजन्होर्भार्यांविद्यादितिशेषः
९ १० ११ १२ राजाकुशिकः इंद्रसमंपुत्रंलभेयमितितपस्तेपेइत्यन्वयः शक्रश्चमत्समोन्योभविष्यतीतित्रासादभ्येत्यतस्यपुत्रोजज्ञिवान्जातः १३ एतदेवस्य-

युवनाश्वस्यपुत्रींतुकावेरींजन्हुरावहत् युवनाश्वस्यशापेनगंगार्धेनाथनिर्ममे कावेरींसरितांश्रेष्ठांजन्होर्भार्यामनिंदिताम् ९ जन्हुस्तु
दयितंपुत्रंसुनहंनामधार्मिकम् कावेर्यांजनयामास अजकस्तस्यचात्मजः १० अजकस्यतुदायादोबलाकाश्वोमहीपतिः बभूवमृगया
शीलःकुशस्तस्यात्मजोऽभवत् ११ कुशपुत्राबभूवुर्हिचत्वारोदेववर्चसः कुशिकःकुशनाभश्चकुशांबोमूर्तिमांस्तथा १२ पल्हवैःसु-
हसंवृद्धोराजावनचरैस्तदा कुशिकस्तुतपस्तेपेपुत्रमिंद्रसमंविभुः १३ लभेयमितितंशक्रस्त्रासादभ्येत्यजज्ञिवान् १३ पूर्णेवर्षसहस्रेवै
तंतुशक्रोह्यपश्यत अत्युग्रतपसंदृष्ट्वासहस्राक्षःपुरंदरः १४ समर्थःपुत्रजननेस्वमंशंसमवासयत् पुत्रत्वेकल्पयामाससदेवेंद्रःसुरो
त्तमः १५ सगाधिरभवद्राजामघवान्कौशिकःस्वयम् पौरुकुत्स्यभवद्भार्यागाधिस्तस्यामजायत १६ गाधेःकन्यामहाभागानाम्नासत्य
वतीशुभा तांगाधिर्भृगुपुत्रायऋचीकायददौप्रभुः १७ तस्याःप्रीतोभवद्भर्त्ताभार्गवोभृगुनंदनः पुत्रार्थंकल्पयामासचरुंगाधेस्त-
थैवच १८ उवाचाहूयतांभर्त्ताऋचीकोभार्गवस्तदा उपयोज्यश्चरुरयंत्वयामात्रात्वयंतव तस्यांजनिष्यतेपुत्रोदीप्तिमान्क्षत्रियर्षभः
अजेयःक्षत्रियैर्लोकेक्षत्रियर्षभसूदनः २० तवापिपुत्रंकल्याणिधृतिमंतंतपोनिधिम् शमात्मकंद्विजश्रेष्ठंचरुरेषविधास्यति २१ एव-
मुक्त्वातुतांभार्यामृचीकोभृगुनंदनः तपस्यभिरतोनित्यमरण्यंप्रविवेशह २२ गाधिःसदारस्तुतदाऋचीकाश्रमभ्यगात् तीर्थयात्रा
प्रसंगेनसुतांद्रष्टुंजनेश्वरः २३ चरुद्वयंगृहीत्वातदृषेःसत्यवतीतदा चरुमादाययत्नेनसातुमात्रेन्यवेदयत् २४ माताव्यत्यस्यदैवेन
दुहित्रेस्वंचरुंददौ तस्याश्चरुमथाज्ञानादात्मसंस्थंचकारह २५ अथसत्यवतीगर्भंक्षत्रियांतकरंतदा धारयामासदीप्तेनवपुषा-
घोरदर्शनम् २६ तामृचीकस्ततोदृष्ट्वायोगेनाभ्यनुसृत्यच तामब्रवीद्द्विजश्रेष्ठःस्वांभार्यांवरवर्णिनीम् २७ मात्रासिवंचिताभद्रेच
रुव्यत्यासहेतुना जनिष्यतिहिपुत्रस्तेक्रूरकर्मातिदारुणः २८

एयतिपूर्णेइति १४ स्वंअंशंतस्यशरीरेरेतोरूपेणअवासयत्स्थापितवान् ततःभार्या-
यांतवपुत्रत्वेनकल्पयामासेत्यर्थः १५ पौरुकुत्सीपुरुकुत्सस्यपुत्रीभार्याकुशिकस्याभवत् १६ १७ गाधेस्तथैवचेतिप्रीतःसन्पुत्रार्थंचरुंकल्पयामासेत्यर्थः
१८उपयोज्यःभक्षणीयः अयमयमितिचरुद्वयस्यपृथक्प्रदर्शनम् १९ तस्यांतवमातरि २० २१ २२ २३ २४ व्यत्यस्यविपर्यासंकृत्वा अज्ञानान्ऋषिणा
तुल्यःस्वपुत्रोभूयादितिमोहात् आत्मसंस्थंचकारस्वयंभक्षितवती २५ २६ योगेनध्यानेनअभ्यनुसृत्यज्ञात्वा २७ २८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विश्वंब्रह्मकृत्स्नोवेदः २९ मेमम ईदृशस्त्वत्तोब्राह्मणापसदोब्राह्मणाधमोमाभवेदितिसंबंधः ३० नैषइति पितुर्मातुर्वादोषात्पुत्रउग्रकर्माभवेत् इहतुतवैव
प्रमादाच्चरुव्यत्यासोजातः नतुममायंसंकल्पः तथाक्रूरप्रकारःपुत्रोभवेदित्यर्थः ३१ शमात्मकंकृतंसृजेथाइतिकिंपुनरितिसंबंधः ३२ काममिति आत्मावैपुत्र-
नामासीतिश्रुतेः पुत्रस्यभर्त्रभिन्नत्वात्तद्भार्यायाश्चसपत्नीतुल्यत्वेनतस्याएवएवंविधःपुत्रोस्तु यदिएतदन्यथाकर्तुंनशक्यं शक्यंचेत्तस्यामपितादृशःपुत्रोमा
भूदितिभावः ३३ तवेवममपौत्रेविशेषोनास्ति तस्यापिपरंपरयाममात्मकत्वादितिभावः ३४ ३५ भृगोःभार्गवस्यऋचीकस्ययजनात् देवताराधनात् वैष्णवःपा

त्माताजनिष्यतेचापिब्रह्मभूतस्तपोधनः विश्वंहिब्रह्मतपसामयातस्मिन्समर्पितम् २९ एवमुक्तामहाभागा भर्त्रासत्यवतीतदा प्रसाद
यामासपतिंपुत्रोमेनेदृशोभवेत् ब्राह्मणापसदस्त्वत्तइत्युक्तोमुनिरब्रवीत् ३० नैषसंकल्पितःकामोमयाभद्रेतथास्त्विति उग्रकर्माभवेत्पु
त्रः पितुर्मातुश्चकारणात् पुनःसत्यवतीवाक्यमेवमुक्ताब्रवीदिदम् ३१ इच्छंल्लोकानपिमुनेसृजेथाःकिंपुनःसुतम् शमात्मकमृजुंत्वंमे-
पुत्रंदातुमिहार्हसि ३२ काममेवंविधःपौत्रोममस्यात्तवचप्रभो यद्यन्यथानशक्यंवैकर्तुमेतद्द्विजोत्तम ३३ ततःप्रसादमकरोत्सतस्यास्तपसो
बलात् भद्रेनास्तिविशेषोमेपौत्रेचवरवर्णिनि त्वयायथोक्तंवचनंतथाभद्रंभविष्यति ३४ ततःसत्यवतीपुत्रंजनयामासभार्गवम् तपस्य
भिरतंदान्तंजमदग्निंशमात्मकम् ३५ भृगोश्चरुविपर्यासेरौद्रवैष्णवयोःपुरा यजनाद्वैष्णवांशाज्जमदग्निरजायत ३६ साहिसत्यवतीपुण्या
सत्यधर्मपरायणा कौशिकीतिसमाख्याताप्रवृत्तेयंमहानदी ३७ इक्ष्वाकुवंशप्रभवोरेणुर्नामनराधिपः तस्यकन्यामहाभागाकामलीनामरे
णुका ३८ रेणुकायांतुकामल्यांतपोविद्यासमन्वितः आर्चीकोजनयामासजामदग्न्यंसुदारुणम् ३९ सर्वविद्यान्तगंश्रेष्ठंधनुर्वेदस्यपारगम्
रामंक्षत्रियहन्तारंप्रदीप्तमिवपावकम् ४० और्वस्यैवमृचीकस्यसत्यवत्यांमहायशाः जमदग्निस्तपोवीर्याज्जज्ञेब्रह्मविदांवरः ४१ मध्यमश्च
शुनःशेफःशुनःपुच्छःकनिष्ठकः विश्वामित्रंतुदायादंगाधिःकुशिकनंदनः ४२ जनयामासपुत्रंतुतपोविद्याशमात्मकम् प्राप्यब्रह्मर्षिसम
तांयोयंसप्तर्षितांगतः ४३ विश्वामित्रस्तुधर्मात्मानाम्नाविश्वरथःस्मृतः जज्ञेभृगुप्रसादेनकौशिकाद्वंशवर्धनः ४४ विश्वामित्रस्यतुसुता
देवरातादयःस्मृताः प्रख्यातास्त्रिषुलोकेषुतेषांनामानिमेशृणु ४५ देवश्रवाःकतिश्चैवयस्मात्कात्यायनाःस्मृताः शालावत्यांहिरण्याक्षोरे-
णोर्जज्ञेथरेणुमान् ४६ सांकृतिर्गालवश्चैवमुद्गलश्चेतिविश्रुताः मधुच्छंदोजयश्चैवदेवलश्चतथाष्टकः ४७

लनकर्माप्यंशः शमात्मकोजमदग्निर
जायत ३६ ३७ ३८ आर्चीकोजमदग्निःजामदग्न्यंरामंसुदारुणंरुद्रांशत्वात् ३९ ४० ४१ ४२ ४३ भृगोःऋचीकस्यप्रसादेन ४४ ४५ देवश्रवाःकतिःहि
रण्याक्षश्चशालावत्यांरेणुमत्प्रभृतयोदेवलांताः रेणुसंज्ञायाम् ४६ अष्टकादयस्त्वयोदृषद्वत्याम् ४७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गोत्राणिपौत्रादयः ४८ पाणिनादयोद्वादश ४९ ५० देवलाः देवलपुत्राः रेणवः रेणोः पौत्राइत्यर्थः याज्ञवल्क्यादयः षट् शालावतीपौत्राः हिरण्याक्षपुत्राः ५१ अ॰ ५
सांकृत्याः गालवाश्चरेणोः पौत्राः बादरायणिनश्चेत्यत्रबादरायणिनरश्चेतिपाठांतरम् ५२ एतेसांकृत्यादयः ऋष्यंतरेप्रवरभेदेविवाहोयेषांतेऋष्यंतरविवा- २७ १
ह्याः पौरवस्यराज्ञः ब्रह्मर्षेः वसिष्ठादिकस्यताभ्यांसहकौशिकस्यसंबंधोस्तीत्यर्थः ५३ भार्गवइति पूर्वजमदग्नेः कनिष्ठोभ्राताशुनःशेफइतिउक्तत्वात् शुखोतु

कच्छपोहारितश्चैवविश्वामित्रस्यवैसुताः तेषांख्यातानिगोत्राणिकौशिकानांमहात्मनाम् ४८ पाणिनोबभ्रवश्चैवध्यानजप्यास्तथैवच पार्थिवादेवराताश्च शालंकायनबाष्कलाः ४९ लोहितायामदूताश्चतथाकारीषवःस्मृताः सौश्रुताःकौशिकाराजन्तथान्येसैंधवायनाः ५० देवलारेणवश्चैवयाज्ञवल्क्याघमर्षणाः औदुंबराह्यभिष्णातास्तारकायनचुंचुलाः ५१ शालावत्याहिरण्याक्षाःसांकृत्यागालवास्तथा बादरायणिनश्चान्याविश्वामित्रस्यधीमतः ५२ ऋष्यंतरविवाह्याश्चकौशिकाबहवःस्मृताः पौरवस्यमहाराजब्रह्मर्षेःकौशिकस्यच संबंधोप्यस्यवंशेस्मिन्ब्रह्मक्षत्रस्यविश्रुतः ५३ विश्वामित्रात्मजानांतुशुनःशेफोऽग्रजःस्मृतः भार्गवःकौशिकत्वंहिप्राप्तःसमुनिसत्तमः ५४ विश्वामित्रस्यपुत्रस्तुशुनःशेफोभवत्किल हरिदश्वस्ययज्ञेतुपशुत्वेविनियोजितः ५५ देवैर्दत्तःशुनःशेफोविश्वामित्रायवैपुनः देवैर्दत्तः सवैयस्माद्देवरातस्ततोऽभवत् ५६ देवरातादयःसप्तविश्वामित्रस्यवैसुताः दृषद्वतीसुतश्चापिविश्वामित्रात्तथाष्टकः ५७ अष्टकस्यसुतोलौहिः प्रोक्तोजह्नुगणोमया अतऊर्ध्वंप्रवक्ष्यामिवंशमायोर्महात्मनः ५८ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिअमावसुवंशकीर्तनंनामसप्तविंशोऽध्यायः २७ वैशंपायनउवाच आयोःपुत्रास्तथापंचसर्ववीरामहारथाः स्वर्भानुतनयायांचप्रभायांजज्ञिरेनृप १ नहुषःप्रथमंजज्ञेवृद्धशर्माततःपरम् रंभोरजिरनेनाश्चत्रिषुलोकेषुविश्रुताः २ रजिःपुत्रशतानीहजनयामासपंचवै राजेयमितिविख्यातंक्षत्रमिंद्रभयावहम् ३ यत्रदेवासुरेयुद्धेसमुत्पन्नेसुदारुणे देवाश्चैवासुराश्चैवपितामहमथाऽब्रुवन् ४ आवयोर्भगवन्युद्धेकोविजेताभविष्यति ब्रूहिनःसर्वभूतेशश्रोतुमिच्छामतेवचः ५ ब्रह्मोवाच येषामर्थायसंग्रामंरजिरात्तायुधःप्रभुः योत्स्यतेतेजयिष्यंतित्रींल्लोकान्नात्रसंशयः ६ यतोरजिर्धृतिस्तत्रश्रीश्चतत्रयतोधृतिः यतोधृतिश्चश्रीश्चैवधर्मस्तत्रजयस्तथा ७ तेदेवदानवाःप्रीतादेवेनोक्तारजेर्जये अभ्ययुर्जयमिच्छंतोवृण्वानाभरतर्षभम् ८

आंगिरसोजन्मनास्याजीगर्तःशुतः कविरितितस्यांगिरसत्वंदृष्टं तत्कल्पांतराभिप्रायेणज्ञेयम् ५४ हरिदश्वस्यहरिश्चंद्रस्य ५५ देवावाइमंमह्यमरासतेतिसहदेवरातोवैश्वामित्रआसेतिश्रुत्यर्थंसंगृह्णातिदेवैरिति ५६ ५७ ५८ इतिहरिवंशेटीकायांसप्तविंशोऽध्यायः २७ आयोःस्वर्भानोःराहोः १ २ ३ यत्रकालेसमुत्पन्नेउपस्थिते ४ ५ ६ ७ देवेनब्रह्मणारजेः रजिंप्राप्यजयमिच्छंतः संतःजयेजयनिमित्तं ४० भरतर्षभंरजिंअभ्ययुः ८ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

९ १० ११ भोशक्रपुरोगमाः भोदेवाः पाठांतरेस्फुगमम् १२ १३ १४ १५ समयेदेवराज्यप्राप्तिरूपेतिष्ठेथाः त्वंदेवानामेवइंद्रोभवनत्वस्माकंत्वदपेक्षास्तीति
तिभावः १६ वज्रपाणिनः वज्रपाणेः १७ १८ १९ २० २१ दिवंब्रह्मलोकंप्राप्तेसति आचारात्पितुर्द्रव्यंसर्वैर्भ्रातृभिर्विभज्यग्राह्यमितिव्यवहारात् २२

सहिस्वर्भानुदौहित्रः प्रभायांसमपद्यत राजापरमतेजस्वीसोमवंशप्रवर्द्धनः ९ तेहृष्टमनसः सर्वेरजिंदैतेयदानवाः ऊचुरस्मज्जयाय-
त्वंगृहाणवरकार्मुकम् १० अ थोवाचरजिस्तत्रतयोर्वैदेवदैत्ययोः स्वार्थज्ञः स्वार्थमुद्दिश्ययशःस्वंचप्रकाशयन् ११ रजिरुवाच य
दिदैत्यगणान्सर्वान्जित्वाशक्रपुरोगमाः इंद्रोभवामिधर्मेणततोयोत्स्यामिसंयुगे १२ देवाः प्रथमतोभूयः प्रत्यूचुर्हृष्टमानसाः एवंयथे
ष्टंनृपतेकामः संपद्यतांतव १३ श्रुत्वासुरगणानांतुवाक्यंराजारजिस्तदा पप्रच्छासुरमुख्यांस्तुयथादेवानपृच्छत १४ दानवादर्पपू-
र्णास्तुस्वार्थमेवानुगम्यह प्रत्यूचुस्तंनृपवरंसाभिमानमिदंवचः १५ अस्माकमिंद्रः प्रह्लादोयस्यार्थेविजयामहे अस्मिंस्तुसमयेराजन्
तिष्ठेथाराजसत्तम १६ सतथेतिब्रुवन्नेवदेवैरप्यभिचोदितः भविष्यसींद्रोजित्वैवंदेवैरुक्तस्तुपार्थिवः जघानदानवान्सर्वान्येवध्याव
ज्रपाणिनः १७ सविप्रनष्टांदेवानांपरमश्रीः श्रियंवशी निहत्यदानवान्सर्वानाजहाररजिः प्रभुः १८ ततोरजिंमहावीर्यंदेवैः सहशतक्रतुः
रजेः पुत्रोहमित्युक्त्वापुनरेवाब्रवीद्वचः १९ इंद्रोसितातदेवानांसर्वेषांनात्रसंशयः यस्याहमिंद्रः पुत्रस्तेख्यातिंयास्यामिकर्मभिः २० सतु
शक्रवचः श्रुत्वावंचितस्तेनमायया तथेत्येवाब्रवीद्राजाप्रीयमाणः शतक्रतुम् २१ तस्मिंस्तुदेवसदृशेदिवंप्राप्तेमहीपतौ दायाद्यमिंद्रा
दाजह्रुराचारात्तनयारजेः २२ पंचपुत्रशतान्यस्यतद्वैस्थानंशतक्रतोः समाक्रमंतबहुधास्वर्गलोकंत्रिविष्टपम् २३ ततोबहुतिथेकालेस
मतीतेमहाबलः हृतराज्योब्रवीच्छक्रोहृतभागोबृहस्पतिम् २४ इंद्रउवाच बदरीफलमात्रंवैपुरोडाशंविधत्स्वमे ब्रह्मर्षेयेन-
तिष्ठेयंतेजसाप्यायितः सदा २५ ब्रह्मन्कृशोहंविमनाहृतराज्योहृताशनः हतौजादुर्बलोमूढोरजिपुत्रैः कृतः प्रभो २६ बृहस्पतिरुवा
च यद्येवंचोदितः शक्रत्वयास्यांपूर्वमेवहि नाभविष्यत्त्वत्प्रियार्थमकर्तव्यंममानघ २७ प्रयतिष्यामिदेवेंद्रत्वत्प्रियार्थंनसंशयः यथा-
भागंचराज्यंचनचिरात्प्रतिलप्स्यसे २८ तथातातकरिष्यामिमाभूत्तेविक्लवंमनः ततः कर्मचकारास्यतेजसोवर्द्धनंतदा २९ तेषांचबुद्धि-
संमोहमकरोद्द्विजसत्तमः नास्तिवादार्थशास्त्रंहिधर्मविद्वेषणंपरम् ३०

२३ महांश्चासावबलश्चेतिअतिदुर्बलइत्यर्थः २४ २५ २६ हेशक्र यदित्वया
हंपूर्वमेवएवंचोदितः स्याम् तर्हि त्वत्प्रियार्थंमम अकर्तव्यंकर्तुमयोग्यंकुशास्त्रप्रणयनंकर्तव्यंनाभविष्यत् २७ २८ २९ नास्तिधर्मईश्वरइतिवादोयत्र
तन्नास्तिवादम् तच्चतदर्थशास्त्रंचततत्नास्तिवादार्थशास्त्रम् ३० ५ ५ ५ ५

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 कथांतरे वार्त्ताप्रसंगेपि ३१ ३२ प्रवक्तुः उपदेष्टुः ३३ निर्वृतिंसुखम् ३४ ३५ ३६ ३७ इतिहरिवंशटीकायां अष्टाविंशोऽध्यायः २८ रंभः १ २ ३ ४
क्षत्रवृद्धस्य वृद्धशर्मापरपर्यायस्य ५ ६ ७ गृत्समदसंततौ शुनकादयोब्राह्मणाः अन्येक्षत्रियादयश्चशूद्रांताः पुत्राजाताः शलः मध्यमः स सुहोत्रपुत्रः

परमंतर्कशास्त्राणामसतांतन्मनोगतम् नहिधर्मप्रधानानांरोचतेतत्कथांतरे ३१ तेनबृहस्पतिकृतंशास्त्रंश्रुत्वाल्पचेतसः पूर्वोक्त
धर्मशास्त्राणामभवन्द्वेषिणःसदा ३२ प्रवक्तुर्न्यायरहितंतन्मतंबहुमेनिरे तेनाधर्मेणतेपापाः सर्वएवक्षयंगताः ३३ त्रैलोक्यराज्यंशक्र
स्तुप्राप्यदुष्प्रापमेवच बृहस्पतिप्रसादाद्धिपरांनिर्वृतिमभ्ययात् ३४ तेयदातुपुनःसंमूढाराज्योन्मत्ताविधर्मिणः ब्रह्मद्विषश्चसंवृत्ताहतन-
वीर्यपराक्रमाः ३५ ततोलेभेपुनरैश्वर्यमिंद्रःस्थानंतथोत्तमम् हत्वारजिसुतान्सर्वान्कामक्रोधपरायणान् ३६ यइदंच्यावनंस्थानात्प्रति
ष्ठांचशतक्रतोः शृणुयाद्धारयेद्वापिनसदौरात्म्यमाप्नुयात् ३७ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिआयुर्वंशकीर्त्तनंनाम
अष्टाविंशोऽध्यायः २८ वैशंपायनउवाच रंभोनपत्यस्तत्रासीद्वंशंवक्ष्याम्यनेनसः अनेनसःसुतोराजा प्रतिक्षत्रोमहायशाः १ प्रति
क्षत्रसुतश्चापिसृंजयोनामविश्रुतः सृंजयस्यजयःपुत्रोविजयस्तस्यचात्मजः २ विजयस्यकृतिःपुत्रस्तस्यहर्यश्वतःसुतः हर्यश्वतसुतोरा
जासहदेवःप्रतापवान् ३ सहदेवस्यधर्मात्मानदीनइतिविश्रुतः नदीनस्यजयत्सेनोजयत्सेनस्यसंकृतिः ४ संकृतेरपिधर्मात्माक्षत्रधर्मा-
महायशाः अनेनसःसमाख्याताः क्षत्रवृद्धस्यमेशृणु ५ क्षत्रवृद्धात्मजस्तत्रसुनहोत्रोमहायशाः सुनहोत्रस्यदायादास्त्रयः परमधार्मिकाः
६ काशःशलश्चद्वावेतौतथागृत्समदःप्रभुः पुत्रोगृत्समदस्यापिशुनकोयस्यशौनकाः ७ ब्राह्मणाः क्षत्रियाश्चैववैश्याः शूद्रास्तथैवच
शलात्मजश्चार्ष्टिषेणस्तनूजस्तस्यकाशकः ८ काशस्यकाशयाराजन्पुत्रोदीर्घतपास्तथा धन्वस्तुदीर्घतपसोविद्वान्धन्वंतरिस्ततः ९
तपसोंतेसुमहतोजातोवृद्धस्यधीमतः पुनर्धन्वंतरिर्देवोमानुषेष्विहजज्ञिवान् १० जनमेजयउवाच कथंधन्वंतरिर्देवोमानुषे-
ष्विहजज्ञिवान् एतद्वेदितुमिच्छामि तन्मेब्रूहियथातथम् ११ वैशंपायनउवाच धन्वंतरेःसंभवोयंश्रूयतांभरतर्षभ जातःसहि
समुद्रात्तुमथ्यमानेपुरामृते १२ उत्पन्नः कलशात्पूर्वंसर्वतश्चश्रियावृतः अभ्यसन्सिद्धिकार्यंहिविष्णुंदृष्ट्वाहितस्थिवान् १३ अब्ज
स्त्वमितिहोवाचतस्मादब्जस्तुसःस्मृतः अब्जःप्रोवाचविष्णुंवैतवपुत्रोस्मिवैप्रभो १४

तस्यात्मजः शलात्मजः ८ काशः सुनहोत्रस्यप्रथमःपुत्रः त-
स्य अपत्यानिकाशयः तेषुदीर्घतपाःप्रथमइतिशेषः ततोधन्वाख्यात् धन्वंतरिर्जातः ९ पुनरिति समुद्रात्उत्पत्तिमपेक्ष्यद्वितीयवारंजज्ञिवान्जातः १० ११
१२ कलशात्समुद्रात् अभ्यसन्विष्णुंजपन्ध्यायन्वा १३ अप्सुजातत्वादब्जस्त्वमितिहोवाचविष्णुरितिशेषः १४ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१५ होत्रं हौम्यम् विनियुक्तं विद्धि जानीहि १६ उपहोमाः नारिष्टादयः क्षुद्रास्तुभ्यं मह तेदातुमयोग्या इति भावः मुख्यहोममेव मदर्थं कल्पयेत्याशंकायामाह अ
र्वागिति हे पुत्र त्वं तु इदानीतनोसि अतस्त्वदर्थेऽन्यद्वैदिकं प्रधानं कल्पयितुमशक्यमित्यर्थः १७ संभूत्यां जन्मनि १८ तेनैव द्वितीयेनैव अयं भावः सोपानारोह
क्रमेणाऽधिकारिकेऽग्नौ ऊर्ध्वपदमारूढे सत्यन्यो भूमौ कृतकर्मा तत्स्थानमारोहति यथोक्तं मन्वन्तराध्यायेऽत्रैव कृत्वा कर्म दिवं याति ब्रह्मलोकं सनातनम् ततोन्ये
तपसा युक्ताः स्थानमापूरयन्त्यतेति १९ अष्टधेति चिकित्सांगानां भेदादायुर्वेदस्याप्यष्टधात्वं च अंगानि च वैद्यके उक्तानि कायबालगृहोर्ध्वांगशल्यदंष्ट्राजरावृषा

विधित्स्व भागं स्थानं च मम लोके सुरेश्वर एवमुक्तः स हृष्टात्मा तथ्यं प्रोवाच तं प्रभुः १५ कृतो यज्ञविभागो हि याज्ञियैर्हि सुरैः पुरा देवेषु विनि
युक्तं हि विद्धि होत्रं महर्षिभिः १६ न शक्यमुपहोमा वै तुभ्यं कर्तुं कदाचन अर्वाक्प्रभूतोसि देवानां पुत्र त्वं तु न हीश्वरः १७ द्वितीयायां तु संभूत्यां-
लोके ख्यातिं गमिष्यसि अणिमादिश्च ते सिद्धिर्गर्भस्थस्य भविष्यति १८ तेनैव त्वं शरीरेण देवत्वं प्राप्स्यसे प्रभो चरुमंत्रैर्व्रतैर्जाप्यैर्यक्ष्यंति-
त्वां द्विजातयः १९ अष्टधा त्वं पुनश्चैवमायुर्वेदं विधास्यसि अवश्यंभावी ह्यर्थोयं प्राग्दृष्टस्त्वब्जयोनिना २० द्वितीयं द्वापरं प्राप्य भविता त्वं नसं
शयः इमं तस्मै वरं दत्वा विष्णुरंतर्दधे पुनः २१ द्वितीये द्वापरे प्राप्ते सौनहोत्रिः स काशिराट् पुत्रकामस्तपस्तेपे धिन्वन् दीर्घतपास्तदा २२ प्रप-
द्ये देवतां तां तु पास्ये पुत्रं प्रदास्यति अब्जदेवः कृतार्थाय तदाराधितवान्नृपः २३ ततस्तुष्टः स भगवान् अब्जः प्रोवाच तं नृपम् यदीच्छसि वरं ब्रूहि
तत्ते दास्यामि सुव्रत २४ नृप उवाच भगवन् यदि तुष्टस्त्वं पुत्रो मे ख्यातिमान् भव तथेति समनुज्ञाय तत्रैवांतरधीयत २५ तस्य गे
हे समुत्पन्नो देवो धन्वंतरिस्तदा काशिराजो महाराज सर्वरोगप्रणाशनः २६ आयुर्वेदं भरद्वाजात् प्राप्येह भिषजां क्रियाम् तमष्टधा पुनर्व्य
स्य शिष्येभ्यः प्रत्यपादयत् २७ धन्वंतरेस्तु तनयः केतुमानिति विश्रुतः अथ केतुमतः पुत्रो वीरो भीमरथः स्मृतः २८ सुतो भीमरथस्यापि दि
वोदासः प्रजेश्वरः दिवोदासस्तु धर्मात्मा वाराणस्यधिपोऽभवत् २९ एतस्मिन्नेव काले तु पुरीं वाराणसीं नृप शून्यां निवासयामास क्षेमको-
नाम राक्षसः ३० शप्ता हि सा मतिमता निकुंभेन महात्मना शून्या वर्षसहस्रं वै भवित्री नात्र संशयः ३१ तस्यां तु शप्तमात्रायां दिवोदासः प्रजेश्व
रः विषयांते पुरीं रम्यां गोमत्यां संन्यवेशयत् ३२

न् अष्टावंगानि तस्याहुश्चिकित्सा येषु संश्रितेति कायचिकित्सा बालचिकित्सेत्यादि ग्रहो भूतप्रेतादिः ऊर्ध्वांग-
शिरोनेत्रादि शल्यं शस्त्रपातादि दंष्ट्रा स्थावरजंगमात्मकं विषम् तेषां चिकित्सा जरा रसायनादिना जरायाः दूरीकरणं वृषः वाजीकरणतंत्रम् अवश्यंभावित्वं पूर्वकल्पस
दृशत्वादुत्तरकल्पस्य तच्च प्रजापतिरेव वेद २० २१ धिन्वन् प्रीणयन् देवादीनिति शेषः २२ अब्जं धन्वंतरिदेवं आराधितवान् २३ २४ २५ २६ २७ २८ २९ एतस्मिन् दिवो
दासराज्यस्य काले शून्यां सतीं पश्चाद्राक्षसो रुद्रानुचरः निवासयामास ३० शून्यत्वे हेतुमाह शप्ता हीति निकुंभेन रुद्रगणेन ३१ विषयांते गोमत्यां स्वदेशसीम्नि गोमती
तीरे ३२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

भद्रश्रेण्यस्ययदुवंशमहिषत्पुत्रस्य ३३ ३४ सिद्धिक्षेत्रंमोक्षक्षेत्रम् ३५ ३६ श्वसुरस्यहिमालयस्यांतिकेयदा ऽवसत्तदैवदिवोदासोवाराणसींप्राप्तवानित्यर्थः
पूर्वं ३७ ३८ मेनापार्वत्याजननी जुगुप्सतेनिंदति ३९ निंदामेवाह सपार्षदइति ४० अवरदा अवरान्नीचान्शिवनिंदकान्दक्षादीन् द्यतिखंडयतीतितथा

भद्रश्रेण्यस्यपूर्वंतुपुरीवाराणसीत्यभूत् भद्रश्रेण्यस्यपुत्राणांशतमुत्तमधन्विनाम् ३३ हत्वानिवेशयामासदिवोदासोनरर्षभः भद्र
श्रेण्यस्यतद्राज्यंहृतंतेनबलीयसा ३४ जनमेजयउवाच वाराणसींनिकुंभस्तुकिमर्थंशप्तवान्प्रभुः निकुंभःकश्चधर्मात्मासिद्धि
क्षेत्रंशशापयः ३५ वैशंपायनउवाच दिवोदासस्तुराजर्षिर्नगरींप्राप्यपार्थिवः वसतिस्ममहातेजाःस्फीतायांतुनराधिपः ३६ एत
स्मिन्नेवकालेतुकृतदारोमहेश्वरः देव्याःसप्रियकामस्तुन्यवसच्छ्वशुरांतिके ३७ देवाज्ञयापार्षदायेत्वनेकरूपास्तपोधनाः पूर्वोक्तैरूपदेशै
श्चतोषयंतिस्मपार्वतीम् ३८ हृष्यतेवैमहादेवीमेनानैवप्रहृष्यति जुगुप्सत्यसकृत्तांवैदेवींदेवंतथैवसा ३९ सपार्षदस्त्वनाचारस्तवभर्त्ता
महेश्वरः दरिद्रःसर्वदेवासौशीलंतस्यनवर्त्तते ४० मात्रातथोक्तावरदास्त्रीस्वभावाच्चुकुधे स्मितंकृत्वाचवरदाभवपार्श्वमथागमत् ४१ वि
वर्णवदनादेवीमहादेवमभाषत नेहवत्स्याम्यहंदेवनयमांस्वंनिकेतनम् ४२ तथाकर्त्तुंमहादेवःसर्वलोकानवैक्षत वासार्थंरोचयामासपृथि
व्यांकुरुनंदन ४३ वाराणसींमहातेजाःसिद्धिक्षेत्रंमहेश्वरः दिवोदासेनतांज्ञात्वानिविष्टांनगरींभवः ४४ पार्श्वेतिष्ठंतमाहूयनिकुंभमिदमब्र
वीत् गणेश्वरपुरींगत्वाशून्यांवाराणसींकुरु ४५ मृदुनैवाभ्युपायेनह्यतिवीर्यःसपार्थिवः ततोगत्वानिकुंभस्तुपुरींवाराणसींतदा ४६ स्व
प्नेनिदर्शयामासकंडुकंनामनापितम् श्रेयस्तेहंकरिष्यामिस्थानंमेरोचयानघ ४७ मद्रूपांप्रतिमांकृत्वानगर्यंतेतथैवच ततःस्वप्नेयथादि-
ष्टंसर्वंकारितवान्नृप ४८ पुरीद्वारेतुविज्ञाप्यराजानंचयथाविधि पूजांतुमहतींतस्यनित्यमेवप्रयोजयत् ४९ गंधैश्चधूपमाल्यैश्चप्रोक्षणी
यैस्तथैवच अन्नपानप्रयोगैश्चअत्यद्भुतमिवाभवत् ५० एवंसंपूज्यतेतत्रनित्यमेवगणेश्वरः ततोवरसहस्रंतुनागराणांप्रयच्छति पुत्रा
न्हिरण्यमायुश्चसर्वान्कामांस्तथैवच ५१ राज्ञस्तुमहिषीश्रेष्ठासुयशानामविश्रुता पुत्रार्थमागतादेवीसाध्वीराज्ञाप्रचोदिता ५२ पूजांतु
विपुलांकृत्वादेवीपुत्रमयाचत पुनःपुनरथागत्यबहुशःपुत्रकारणात् ५३ नप्रयच्छतिपुत्रंहिनिकुंभःकारणेनहि राजातुयदिनःकुप्ये
त्कार्यसिद्धिस्ततोभवेत् ५४ अथदीर्घेणकालेनक्रोधोराजानमाविशत् भूतएषमहान्द्वारिनागराणांप्रयच्छति ५५

शिवनिंदकःपितामेहतः

इदानींतादृशींमातरंमाहिंसेयमित्यभिप्रायेणशिवपार्श्वमुपागमत् ४१ ४२ वासार्थंवाराणसीमितिसंबंधः ४३ ४४ ४५ ४६ निदर्शयामास प्रत्यक्षंउत्पादितवान्
४७ ४८ राजनंविज्ञाप्य यथोद्दिष्टंस्थानप्रतिमादिकंनगर्यंतेनगराद्बहिर्निकटे कारितवानितियोजना ४९ ५० ५१ ५२ ५३ ५४ ५५ छ,

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५६ ५७ ५८ राजाचासौकिल्बिषीतिसमासः ५९ प्रभुःनिकुंभः ६० शून्याभूदितिशेषः द्वितीयांतपाठेशासेत्यस्य शापेनकृत्वेत्यर्थः इत्यास्वर्गगतइत्यत्र
वधात्वर्थस्यकरणत्वेनैवान्वयः ६१ पदंस्थानम् मोक्षलक्ष्मीविलासाख्यप्रासादम् ६२ देवः स्वरूपानुरूपेतत्ररमते देवीतुमायास्वरूपा सोच्छेदहेतौत
त्रक्षेत्रेनरमतइतिभावः गृहविस्मयात् गृहेऽविमुक्तेयोविस्मयः आश्चर्यम् अनधिकारिणामपिमुक्तिप्रदानम् तस्मात्हेतोर्नरमते अत्रपुर्यामितिसंबंधः
सार्द्धः ६३ अहंनित्यमुक्तईश्वरोवेश्मगृहं शरीराख्यननिवत्स्यामिनिवासयितुंनेच्छामि हियस्मात्मेममगृहं अविमुक्तम् यत्कालत्रयेऽपिनविमुक्तं अहेया
नुपादेयात्मस्वरूपत्वात् तदेवप्रत्यक्चैतन्यंममगृहम् स्वेमहिम्निप्रतिष्ठितोहं देहप्रतिष्ठोनभविष्यामीत्यर्थः तत्रत्वदिष्टेसंसारप्रदेशे गृहंत्वपितृगृहमिति-
कथापक्षे अन्यथात्वमेवदेहंप्राप्नुहि अहंत्वसंगएवास्मीत्यर्थः एतेनकाशीत्यागएवसंसारस्वीकारः तदत्यागएवमोक्षाख्यास्वरूपस्थितिरितिदर्शितम् ६४

प्रीतोवरान्वैशतशोममकिंनप्रयच्छति मामकैःपूज्यतेनित्यंनगर्यांमेसदैवहि ५६ विज्ञापितोमयात्यर्थंदेव्यामेपुष्पकारणात् नददा
तिचपुत्रमेकृतघ्नःकेनहेतुना ५७ ततोनार्हतिसत्कारममत्सकाशाद्विशेषतः तस्मात्तुनाशयिष्यामिस्थानमस्यदुरात्मनः ५८ एवंसतुविनि
श्चित्यदुरात्माराजकिल्बिषी स्थानंगणपतेस्तस्यनाशयामासदुर्मतिः ५९ भग्नमायतनंदृष्ट्वाराजानमशपत्प्रभुः यस्मादनपराधस्यत्वया
स्थानंविनाशितम् पुर्यकस्मादियंशून्यातवनूनंभविष्यति ६० ततस्तेनतुशापेनशून्यावाराणसीतदा शप्त्वापुरींनिकुंभस्तुमहादेवमथागम
त् ६१ अकस्मात्तुपुरीसातुविद्रुतासर्वतोदिशम् तस्यांपुर्यांततोदेवोनिर्ममेपदमात्मनः ६२ रमतेतत्रवैदेवोरममाणोगिरेःसुताम् नरतितत्र
वैदेवीलभतेगृहविस्मयात् वसाम्यत्रनपुर्यांतुदेवीदेवमथाऽब्रवीत् ६३ देवउवाच नाहंवेश्मनिवत्स्यामिअविमुक्तंहिमेगृहम् ना
हंतत्रगमिष्यामिगच्छदेविगृहंप्रति ६४ हसन्नुवाचभगवान्त्र्यंबकस्त्रिपुरांतकः तस्मात्तदविमुक्तंहिप्रोक्तंदेवेनवैस्वयम् ६५ एवंवारा-
णसीशप्ताअविमुक्तंचकीर्तितम् ६६ यस्मिन्वसतिवैदेवःसर्वदेवनमस्कृतः युगेषुत्रिषुधर्मात्मासहदेव्यामहेश्वरः ६७

त्रीणिश्रवणमननध्याना
नि अंबकानिनेत्राणिविज्ञापकानियस्यसत्र्यंबकः तथाच श्रुतिरात्मावा अरेद्रष्टव्यः श्रोतव्योमंतव्योनिदिध्यासितव्यइत्यात्मदर्शनसाधनत्वेनश्रवणादित्रयंवि
धत्ते अतएवत्रिपुरांतकः त्रयाणांस्थूलसूक्ष्मकारणानांपुराणां शरीराणांअंतकोविनाशकः प्रविलापनकर्त्ता अविद्यास्वरूपाप्येशापुरतत्वंनजानातीतिहसन् य-
स्मान्महादेवेन अविमुक्तंहिमेगृहमित्युक्तं तस्मात्तदविमुक्तसंज्ञंवाराणसीक्षेत्रं ६५ अत्रप्रकृतस्याविमुक्तस्यकीर्तनंउपरिधारणन्यायेनचवाराणस्यामुख्यमविमुक्त
त्वंदर्शयति तथाहि जाबालाः सोविमुक्तेप्रतिष्ठितइत्यविमुक्तप्रतिष्ठत्वमात्मनउपक्षिप्य कुत्रतदविमुक्तमित्याकांक्षायांवरणायांनास्यांचमध्येप्रतिष्ठितइत्याधिभौति
कमविमुक्तंउक्त्वाकतमच्चास्यस्थानंभ्रुवोर्घ्राणस्यचयः संधिरितिप्रश्नपूर्वकंशरीरेतत्स्थानं भ्रूघ्राणसंधिरित्यामनंति विस्तरस्त्वस्मत्कृतायामविमुक्तनिरुक्तौद्रष्टव्यः
६६ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अंतर्धानमितिसार्द्धः पुरमस्यास्तीतिपुरीमहादेवः अंतर्हितायामपिपुर्याम् स्वयमंतर्हितःसन्वसति देवताप्रतिमाद्युच्छेदेपिदेवतासान्निध्यंननिवर्त्ततइत्य
र्थः पुनः कृतयुगारंभेपुरीनगरीवसतइति व्याख्यानेपिअंतर्धानमात्रंपुर्याउक्तंनतूच्छेदः एवंपुरपतेरपिद्रष्टव्यम् किंच यावत्कलेःसंध्यांशोस्तितावदत्रद्वापरध
र्माणांक्रियतामप्यनुवृत्तेः षट्त्रिंशत्सहस्रवत्सरपर्यंतंकलावपिपुरीनांतर्हिताभवति तन्निवृत्तौकेवलस्यकलेःप्रवृत्तौसत्यामेवचभवति अन्यथासंप्रत्यक्षोपलंभोन-
युज्यतेतिदिक् ६८ भद्रश्रेण्यस्यपुत्रशतंहत्वा तेषुचरमोदुर्दमोबालत्वादुपेक्षितः बालइतिसंधिरार्षः घृणयादयया ६९ दायाद्यंपुत्रत्वंकृतवानस्वीकृतवान्

अंतर्धानंकलौयातितत्पुरंहिमहात्मनः अंतर्हितेपुरेतस्मिन्पुरीसावसतेपुनः एवंवाराणसीशप्तानिवेशंपुनरागता ६८ भद्रश्रेण्यस्य
पुत्रोवैदुर्दमोनामविश्रुतः दिवोदासेनबालेतिघृणयासचवर्जितः ६९ हैहयस्यतुदायाद्यंकृतवान्वैमहीपतिः आजन्हेपितृदायाद्यंदि-
वोदासहृतंबलात् ७० भद्रश्रेण्यस्यपुत्रेणदुर्दमेनमहात्मना वैरस्यांतमहाराजक्षत्रियेणविधित्सता ७१ दिवोदासाद्वृषद्वत्यांवीरोजज्ञे
प्रतर्दनः तेनपुत्रेणबालेनप्रहृतंतस्यवैपुनः ७२ प्रतर्दनस्यपुत्रौद्वौवत्सभार्गौबभूवतुः वत्सपुत्रोह्यलर्कस्तुसंनतिस्तस्यचात्मजः ७३ अ-
लर्कःकाशिराजस्तुब्रह्मण्यःसत्यसंगरः अलर्कंप्रतिराजर्षिंश्लोकोगीतःपुरातनैः षष्टिंवर्षसहस्राणिषष्टिंवर्षशतानिच युवारूपेणसंपन्न
आसीत्काशिकुलोद्वहः ७५ लोपामुद्राप्रसादेनपरमायुरवापसः तस्यासीत्सुमहद्राज्यंरूपयौवनशालिनः शापस्यांतेमहाबाहुर्हत्वाक्षेम
कराक्षसम् ७६ रम्यांनिवेशयामासपुरींवाराणसींपुनः संनतेरपिदायादःसुनीथोनामधार्मिकः ७७ सुनीथस्यतुदायादःक्षेम्योनामम
हायशाः क्षेम्यस्यकेतुमान्पुत्रःसुकेतुस्तस्यचात्मजः ७८ सुकेतोस्तनयश्चापिधर्मकेतुरितिस्मृतः धर्मकेतोस्तुदायादःसत्यकेतुर्महारथः
७९ सत्यकेतुसुतश्चापिविभुर्नामप्रजेश्वरः आनर्त्तस्तुविभोःपुत्रःसुकुमारस्तुतत्सुतः ८० सुकुमारस्यपुत्रस्तुधृष्टकेतुःसुधार्मिकः
धृष्टकेतोस्तुदायादोवेणुहोत्रःप्रजेश्वरः ८१ वेणुहोत्रसुतश्चापिभर्गोनामप्रजेश्वरः वत्सस्यवत्सभूमिस्तुभृगुभूमिस्तुभार्गवात् ८२ ए
तेत्वंगिरसःपुत्राजातावंशेथभार्गवे ब्राह्मणाःक्षत्रियावैश्यास्त्रयःपुत्राःसहस्रशः इत्येतेकाशयःप्रोक्तानहुषस्यनिबोधमे ८३ इति
श्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिएकोनत्रिंशोऽध्यायः २९

आजन्हेआहृतंदुर्दमेनेत्युत्तरेणान्वयः ७० ७१ तेनबालेनैवप्रहृतंअपहृतं
तस्यदुर्दमस्यराज्यमितिशेषः ७२ ७३ ७४ ७५ लोपामुद्रा अगस्त्यभार्या शापस्यनिकुंभदत्तस्य ७६ रम्यामिति सहस्रवर्षपर्यंतंराक्षसाधिष्ठितत्वादरम्यैवपुराआ
सीदितिगम्यते संनतेरलर्कपुत्रस्य ७७ ७८ ७९ ८० ८१ वत्सस्यअलर्कपितुःपुत्रांतरमाह वत्सभूमिरिति भार्गवात्वत्सभ्रातुः ८२ अंगिरसःगालवस्यांगिरसत्वात् ४३
भार्गवेविश्वामित्रस्यभार्गवत्वात् तयोःवत्सभूमिभृगुभूम्योःकाशयःकाशवंश्याः ८३ इतिहरिवंशटीकायांएकोनत्रिंशोऽध्यायः २९ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उत्पन्नाः पितरः स्वधासंज्ञाः वैश्यपूज्यास्तेषां कन्यायां विरजाख्यायाम् १ २ मोक्षं मोक्षमार्गम् ३ ययातेर्भार्यान्तरमाह देवयानीमिति ४ ५ असंगं सर्वत्रास्खलितगतिम् ६ ७ ८ ९ शापकारणमाह गार्ग्यस्य हीति वाक्क्रूरं निष्ठुरभाषिणमिति हिंसने हेतुरुक्तः १० लोहगंधिः बाह्यसदृशः लोहोऽस्त्रीशस्त्रके लोहो-

वैशंपायन उवाच उत्पन्नाः पितृकन्यायां विरजायां महौजसः नहुषस्य तु दायादाः षडिंद्रोपमतेजसः १ यतिर्ययातिः संयातिरायातिः पांचिको भवः सुयातिः षष्ठस्तेषां वै ययातिः पार्थिवोऽभवत् यतिर्ज्येष्ठस्तु तेषां वै ययातिस्तु ततः परम् २ काकुत्स्थकन्यां गां नाम लेभे परमधार्मिकः यतिस्तु मोक्षमास्थाय ब्रह्मभूतोऽभवन्मुनिः ३ तेषां ययातिः पंचानां विजित्य वसुधामिमाम् देवयानीमुशनसः सुतां भार्यामवाप सः शर्मिष्ठामासुरीं चैव तनयां वृषपर्वणः ४ यदुं च तुर्वसुं चैव देवयानी व्यजायत द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ५ तस्मै शक्रो ददौ प्रीतो रथं परमभास्वरम् असंगं कांचनं दिव्यं दिव्यैः परमवाजिभिः ६ युक्तं मनोजवैः शुभ्रैर्येन भार्यां सुवाह सः स तेन रथमुख्येन षड्रात्रेणाजयन्महीम् ययातिर्युधि दुर्धर्षस्तथा देवान्सवासवान् ७ स रथः पौरवाणां तु सर्वेषामभवत्तदा यावत्तु वसुनाम्नो वै कौरवाज्जनमेजयः ८ कुरोः पुत्रस्य राजेंद्र राज्ञः पारिक्षितस्य ह जगाम स रथो नाशं शापाद्गार्ग्यस्य धीमतः ९ गार्ग्यस्य हि सुतं बालं स राजा जनमेजयः वाक्क्रूरं हिंसयामास ब्रह्महत्यामवाप सः १० स लोहगंधी राजर्षिः परिधावन्नितस्ततः पौरजानपदैस्त्यक्तो न लेभे शर्म कर्हिचित् ११ ततः स दुःखसंतप्तो नालभत्संविदं क्वचित् इंद्रोतः शौनकं राजा शरणं प्रत्यपद्यत १२ याजयामास चेंद्रोतः शौनको जनमेजयम् अश्वमेधेन राजानं पावनार्थं द्विजोत्तमः १३ स लोहगंधो व्यनशत्तस्यावभृथमेत्य ह स च दिव्यो रथो राजन् वसोश्चेदिपतेस्तदा दत्तः शक्रेण तुष्टेन लेभे तस्माद्बृहद्रथः १४ बृहद्रथात्क्रमेणैव गतो बार्हद्रथं नृपम् ततो हत्वा जरासंधं भीमस्तं रथमुत्तमम् १५ प्रददौ वासुदेवाय प्रीत्या कौरवनंदनः सप्तद्वीपां ययातिस्तु जित्वा पृथ्वीं ससागराम् १६ व्यभजत्पंचधा राजन्पुत्राणां नाहुषस्तदा दिशि दक्षिणपूर्वस्यां तुर्वसुं मतिमान्नृपः १७ प्रतीच्यामुत्तरस्यां च द्रुह्युं चानुं च नाहुषः दिशि पूर्वोत्तरस्यां वै यदुं ज्येष्ठं न्ययोजयत् १८ मध्ये पूरुं च राजानमभ्यषिंचत नाहुषः तैरियं पृथ्वी सर्वा सप्तद्वीपा सपत्तना १९ यथाप्रदेशमद्यापि धर्मेण प्रतिपाल्यते प्रजास्तेषां पुरस्तात्तु वक्ष्यामि नृपसत्तम २० धनुर्न्यस्य पृषत्कांश्च पंचभिः पुरुषर्षभैः जरावानभवद्राजा भारमावेश्य बंधुषु निःक्षिप्तशस्त्रः पृथिवीं निरीक्ष्य पृथिवीपतिः २१

जोंगके इति मेदिनी जोंगकः पतितः ज्ञातिबाह्य इति यावत् जुगुप्सागेस्य रूपम् ११ संविदम् स्वास्थ्यज्ञानोपायम् इंद्रोतशब्दोऽदंतः सांतश्च १२ १३ तस्मात् वसोः १४ १५ १६ दक्षिणपूर्वस्याम् आग्नेयकोणे १७ पूर्वोत्तरस्याम् ऐशान्याम् १८ मध्ये कुरुपांचालेषु १९ २० पंचभिः पुत्रैः कृतकृत्यः सन् धनुर्न्यस्तवान् ततश्च जरावान् अभूदित्यर्थः २१ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 २२ २३ अनिर्दिष्टा इदंमेदेहीतिविशेषतोऽनुक्ता मयाचप्रतिश्रुता तदिदंदास्यामीति तांअज्ञातां अनपाकृत्य ऋणवत् अपरिहृत्य ज्ञाताचेत्स्यात्तर्हितांनि
धाय तवजरांगृहीतुंममावकाशःस्यादितिभावः २४ २५ २६ २७ कइति पितृवचनमुल्लंघ्यापित्यर्थसाधनंनधर्मायेतिभावः देशिकः गुरुः विद्याप्रदः २८ २९

शतिमान्नभवद्राजा ययातिरपराजितः एवंविभज्य पृथिवींययातिर्यदुमब्रवीत् २२ जरांमेप्रतिगृण्हीष्वपुत्रकृत्यांतरेणवै तरुणस्तववरू-
पेणचरेयंपृथिवीमिमाम् जरांत्वयिसमाधायतंयदुःप्रत्युवाचह २३ अनिर्दिष्टामयाभिक्षाब्राह्मणस्यप्रतिश्रुता अनपाकृत्यतांराजन्
नगृहीष्यामितेजराम् २४ जरायांबहवोदोषाःपानभोजनकारिताः तस्माज्जरांनतेराजन्गृहीतुमहमुत्सहे २५ सन्तितेबहवःपुत्रामत्तःप्रि
यतरानृप प्रतिगृहीतुंधर्मज्ञपुत्रमन्यंवृणीष्ववै २६ सएवमुक्तोयदुनाराजाकोपसमन्वितः उवाचवदतांश्रेष्ठोययातिर्गर्हयन्सुतम् २७
क आश्रयस्तवान्योस्तिकोवाधर्मोविधीयते मामनादृत्यदुर्बुद्धेयदहंतवदेशिकः २८ एवमुक्त्वायदुंतातशशापैनंसमन्युमान् अराज्याते
प्रजामूढभवित्रीतिनराधम २९ सतुर्वसुंचद्रुह्युंचाप्यनुंचभरतर्षभ एवमेवाब्रवीद्राजाप्रत्याख्यातश्चतैरपि ३० शशापतानतिक्रुद्धो
ययातिरपराजितः यथातेकथितंपूर्वंमयाराजर्षिसत्तम ३१ एवंशप्त्वासुतान्सर्वान्चतुरःपुरुपूर्वजान् तदेववचनंराजापूरुमप्याहभारत
३२ तरुणस्तववरूपेणचरेयंपृथिवीमिमाम् जरांत्वयिसमाधायत्वंपूरोयदिमन्यसे ३३ सजरांप्रतिजग्राहपितुःपूरुःप्रतापवान् ययाति
रपिरूपेणपूरोःपर्यचरन्महीम् ३४ समार्गमाणःकामानामंतंभरतसत्तम विश्वाच्यासहितोरेमेवनेचैत्ररथेप्रभुः ३५ यदावितृष्णःका
मानांभोगेषुसनराधिपः तदापूरोःसकाशाद्वैस्वांजरांप्रत्यपद्यत ३६ तत्रगाथामहाराजशृणुगीताययातिना याभिःप्रत्याहरेत्कामान्
सर्वतोंगानिकूर्मवत् ३७ नजातुकामःकामानामुपभोगेनशाम्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते ३८ यत्पृथिव्यांव्रीहियव
हिरण्यपशवःस्त्रियः नालमेकस्यतत्सर्वमितिपश्यन्नमुह्यति ३९ यदाभावंनकुरुतेसर्वभूतेषुपापकम् कर्मणामनसावाचाब्रह्मसंपद्य
तेतदा ४० यदान्यस्मान्नबिभ्येतयदाचास्मान्नबिभ्यति यदानेच्छतिनद्वेष्टिब्रह्मसंपद्यतेतदा ४१ यादुस्त्यजादुर्मतिभिर्यानजीर्यतिजी
र्यतः योसौप्राणान्तिकोरोगस्तांतृष्णांत्यजतःसुखम् ४२ जीर्यन्तिजीर्यतःकेशादन्ताजीर्यन्तिजीर्यतः जीविताशाधनाशाचजीर्यतोपिनजी
र्यति ४३ यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखम् तृष्णाक्षयसुखस्यैतेनार्हतःषोडशींकलाम् ४४ एवमुक्त्वासराजर्षिःसदारःप्रावि-
शद्वनम् कालेनमहताचापिचचारविपुलंतपः ४५

३० पूर्वम् आदिपर्वणि ३१ ३२ ३३ ३४ अंतम् तृष्णावसानम् विश्वाची अप्सराः इंद्रशापात्कु
कुत्स्थंकन्यागोनाम्नीजाता साययातिनाऊढेतिज्ञेयम् ३५ अवितृष्णइतिच्छेदः ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ७३ ७३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४६ पंच यदुप्रभृतयः ४७ ४८ ४९ इतिहरिवंशेटीकायांत्रिंशोऽध्यायः ३० पूरोः १ २ उत्तमंउत्कृष्टंपौरुषंयस्मिन् ३ ४ ५ ६ ७ ८ ९ धनेयुश्चेत्यत्र
वनेनित्यइत्यपिपाठः १० स्त्रीरत्नकूटाः स्त्रीरत्नान्युर्वश्यादीनि कूटानिहीनानि याभ्यस्ताः ११ १२ येन अत्रिणा १३ १४ अत्रिश्रेष्ठानीति धर्मशास्त्रे

भृगुतुंगेतपस्तप्त्वातपसोंतेमहातपाः अनश्नन्देहमुत्सृज्यसदारःस्वर्गमाप्तवान् ४६ तस्यवंशेमहाराजपंचराजर्षिसत्तमाः यैर्व्याप्तापृ
थिवीसर्वासूर्यस्येवगभस्तिभिः ४७ यदोस्तुशृणुराजर्षेर्वंशंराजर्षिसत्कृतम् यत्रनारायणोजज्ञेहरिर्वृष्णिकुलोद्वहः ४८ धन्यःप्रजावानायु
ष्मान्कीर्तिमांश्चभवेन्नरः ययातेश्चरितंपुण्यंपठञ्शृण्वन्नराधिप ४९ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिययातिच
रितेत्रिंशोऽध्यायः ३० जनमेजयउवाच पूरोर्वंशमहंब्रह्मञ्श्रोतुमिच्छामितत्वतः द्रुह्योश्चानोर्यदोश्चैवतुर्वसोश्चपृथक्पृथक् १
वृष्णिवंशप्रसंगेनस्ववंशंपूर्वमेवतु विस्तरेणानुपूर्व्याचतद्भवान्वक्तुमर्हति २ वैशंपायनउवाच शृणुपूरोर्महाराजवंशमुत्तमपौ
रुषम् विस्तरेणानुपूर्व्याच्चयत्रजातोसिपार्थिव ३ हंततेकीर्तयिष्यामिपूरोर्वंशमनुत्तमम् द्रुह्यस्यानोर्यदोश्चैवतुर्वसोश्चनराधिप ४ पूरोः
पुत्रोमहावीर्योराजासीज्जनमेजयः प्रचिन्वांस्तुसुतस्तस्ययःप्राचीमजयद्दिशम् ५ प्रचिन्वतःप्रवीरोभून्मनस्युस्तस्यचात्मजः राजाचाभ
यदोनाममनस्योरभवत्सुतः ६ तथैवाभयदस्यासीत्सुधन्वातुमहीपतिः सुधन्वनोबहुगवः शम्यातिस्तस्यचात्मजः ७ शम्यातेस्तुरह
स्यातीरौद्राश्वस्तस्यचात्मजः रौद्राश्वस्यघृताच्यांवैदशाप्सरसिसूनवः ८ ऋचेयुःप्रथमस्तेषांकृकणेयुस्तथैवच कक्षेयुःस्थंडिलेयुश्च
सन्नतेयुस्तथैवच ९ दशार्णेयुर्जलेयुश्चस्थलेयुश्चमहायशाः धनेयुश्चवनेयुश्चपुत्रिकाश्चदशस्त्रियः १० रुद्राशूद्राचभद्राचम
लदामलहातथा खलदाचैवराजेंद्रनलदासुरसापिच तथागोचपलाचतुस्त्रीरत्नकूटाचताःदश ११ ऋषिर्जातोत्रिवंशेतुतासांभर्ता
प्रभाकरः रुद्रायाजनयामाससुतंसोमंयशस्विनम् १२ स्वर्भानुनाहतेसूर्येपतमानेदिवोमहीम् तमोभिभूतेलोकेचप्रभायेनप्रकाशि
ता १३ स्वस्तितेस्त्वितिचोक्तोवैपतमानोदिवाकरः वचनात्तस्यविप्रर्षेर्नपपातदिवोमहीम् १४ अत्रिश्रेष्ठानिगोत्राणियश्चकारमहात
पाः यज्ञेष्वत्रेर्धनंचैवसुरैर्यस्यप्रवर्तितम् १५ सतासुजनयामासपुत्रिकासुसनामकान् दशपुत्रान्महात्मासतपस्युग्रेरतान्सदा १६
तेतुगोत्रकराराजन्नृषयोवेदपारगाः स्वस्त्यात्रेयाइतिख्याताःकिलत्रिधनवर्जिताः १७

आत्रेयीवधेब्रह्महत्याव्रतस्योक्तत्वात् यज्ञेचआत्रेयायब्राह्मणा
यस्वातंत्र्येणदक्षिणाविधानात् अत्रिरेवसर्वेषुगोत्रप्रवर्तकेषुश्रेष्ठः १५ पुत्रिकासु तुभ्यंकन्यांप्रदास्यामिदेवाग्निगुरुसन्निधौ अस्यांयोजायतेपुत्रःसमेपुत्रो
भवेदिति पुत्रिकाकरणविधिनाप्राप्तासु १६ अतएवाह किलत्रिधनवर्जिताइति १७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४३ ४४ शक्रेणसहेति शक्रवद्देवत्वंप्राप्तइत्युक्तम् ४५ लोमपादापरनामा दशरथोयमन्यः ४६ ऋष्यशृंगस्य शांताभर्तुःप्रसादेन ४७ ४८ पूर्णभद्रोमुनिः
तस्यप्रसादेन ४९ वैभांडकिर्विभांडकपुत्रऋष्यशृंगः तस्यार्थे इंद्रवारणंऐरावतंवारणम् वारिजलेरणतिचरतीतिवारणम् समुद्रोद्भवमित्यर्थः ५० ५१

अंगपुत्रोमहानासीद्राजेंद्रोदधिवाहनः दधिवाहनपुत्रस्तुराजादिविरथोऽभवत् ४३ पुत्रोदिविरथस्यासीत् शक्रतुल्यपराक्रमः विद्वान्
धर्मरथोनामतस्यचित्ररथःसुतः ४४ तेनचित्ररथेनाथतदाविष्णुपदेगिरौ यजतासहशक्रेणसोमःपीतोमहात्मना ४५ अथचित्ररथस्यापि
पुत्रोदशरथोऽभवत् लोमपादइतिख्यातोयस्यशांतासुताभवत् ४६ तस्यदाशरथिर्वीरश्चतुरंगोमहायशाः ऋष्यशृंगप्रसादेनजज्ञेकुलवि
वर्द्धनः ४७ चतुरंगस्यपुत्रस्तुपृथुलाक्षइतिस्मृतः पृथुलाक्षसुतोराजाचंपोनाममहायशाः ४८ चंपस्यतुपुरीचंपायामालिन्यभवत्पुरा पूर्ण
भद्रप्रसादेनहर्यंगोऽस्यसुतोऽभवत् ४९ ततोवैभांडकिस्तस्यवारणंशक्रवारणम् अवतारयामासमहीं मंत्रैर्वाहनमुत्तमम् ५० हर्यंगस्यतुदा-
यादोराजाभद्ररथःस्मृतः पुत्रोभद्ररथस्यासीद्बृहत्कर्माप्रजेश्वरः ५१ बृहद्दर्भःसुतस्तस्यतस्माज्जज्ञेबृहन्मनाः बृहन्मनास्तुराजेंद्रजनयामा
सवैसुतम् ५२ नाम्नाजयद्रथंनामयस्माद्दृढरथोनृपः आसीद्दृढरथस्यापिविश्वजिज्जनमेजय ५३ दायादस्तस्यकर्णस्तुविकर्णस्तस्य-
चात्मजः तस्यपुत्रशतंत्वासीदंगानांकुलवर्द्धनम् बृहद्दर्भसुतोयस्तुराजानाम्नाबृहन्मनाः ५४ तस्यपत्नीद्वयंचासीच्चैद्यस्यैतेसुतेशुभे य-
शोदेवीचसत्याचताभ्यांवंशस्तुभिद्यते ५५ जयद्रथस्तुराजेंद्रयशोदेव्यांव्यजायत ब्रह्मक्षत्रोत्तरःसत्यांविजयोनामविश्रुतः ५६ विजयस्य
धृतिःपुत्रस्तस्यपुत्रोधृतव्रतः धृतव्रतस्यपुत्रस्तुसत्यकर्मामहायशाः ५७ सत्यकर्मसुतश्चापिसूतस्त्वधिरथस्तुवै यःकर्णंप्रतिजग्राहततः
कर्णस्तुसूतजः ५८ एतद्वःकथितंसर्वंकर्णंप्रतिमहाबलम् कर्णस्यवृषसेनस्तुवृषस्तस्यात्मजःस्मृतः ५९ एतेंऽगवंशजाःसर्वेराजानःकीर्त्ति-
तामया सत्यव्रतामहात्मानःप्रजावंतोमहारथाः ६० ऋचेयोस्तुमहाराजरौद्राश्वतनयस्यह शृणुवंशंमनुप्रोक्तंयत्रजातोसिपार्थिव ६१
इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिकुक्षेयुवंशानुकीर्तनेएकत्रिंशोऽध्यायः ३१ वैशंपायनउवाच अनाधृष्युस्तुराज
र्षिर्ऋचेयुश्चैकराट्स्मृतः ऋचेयोर्ज्वलनानामभार्यावैतक्षकात्मजा १ तस्यांसदेव्यांराजर्षिर्मतिनारोमहीपतिः मतिनारसुताश्चासन्त्र
यःपरमधार्मिकाः २ तंसुराधोऽप्रतिरथःसुबाहुश्चैवधार्मिकः गौरीकन्याचविख्यातामांधातृजननीशुभा ३

५२ ५३ ५४ ५५ ब्रह्मक्षत्रोत्तरःब्राह्म-
णेभ्यःशांत्यादिना क्षत्रियेभ्यःशौर्यादिनाउत्तरःश्रेष्ठः ५६ ५७ सत्यकर्मणःपुत्रःसूतः ब्राह्मण्यांक्षत्रियाज्जातत्वात् एतेनैवतस्यब्राह्मणीपरिग्रहःसूच्यते ५८ ५९
६० ६१ इतिहरिवंशेटीकायांएकत्रिंशोऽध्यायः ३१ अनाधृष्यः अजय्यः ऋचेयुरेव १ समतिनारोजातइतिशेषः २ तंसुर्नामतः आद्योज्येष्ठः तंसुरोधइत्यपपाठः ३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कक्षेयोः रौद्राश्वस्तस्य तृतीयस्य १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ महामनसो ज्येष्ठपुत्रस्योशीनरस्य संततिमुक्त्वा कनिष्ठपुत्रस्य-

कक्षेयोस्तनयाश्चासन्त्रयएवमहारथाः सभानरश्चाक्षुषश्च परमंयुस्तथैवच १८ सभानरस्य पुत्रस्तु विद्वान्कालानलोनृपः काला
नलस्य धर्मज्ञः सृंजयोनामवैसुतः १९ सृंजयस्याभवत्पुत्रोवीरोराजापुरंजयः जन्मेजयोमहाराजपुरंजयसुतोऽभवत् २० जन्मेजयस्यरा
जर्षेर्महाशालोऽभवत्सुतः वेदेषुसपरिज्ञातः प्रतिष्ठितयशाभुवि २१ महामनानामसुतोमहाशालस्यधार्मिकः जज्ञेवीरः सुरगणैः पूजि
तः सुमहायशाः २२ महामनास्तुपुत्रौद्वौजनयामासभारत उशीनरंचधर्मज्ञंतितिक्षुंचमहाबलम् २३ उशीनरस्यपत्न्यस्तु पंचराज
र्षिवंशजाः नृगाकृमीनवादर्वापंचमीचदृषद्वती २४ उशीनरस्यपुत्रास्तु पंचतासुकुलोद्वहाः तपसावैसुमहताजातावृद्धस्यभारत
२५ नृगायास्तुनृगः पुत्रः कृम्यांकृमिरजायत नवायास्तुनवः पुत्रोदर्वायाः सुव्रतोऽभवत् २६ दृषद्वत्यास्तुसंजज्ञे शिबिरौशीनरोनृपः
शिबेस्तु शिबयस्तात यौधेयास्तुनृगस्यह २७ नवस्यनवराष्ट्रंतु कृमेस्तु कृमिलापुरी सुव्रतस्यतथाम्बष्ठा शिबिपुत्रान्निबोधमे २८ शिबे
श्चपुत्राश्चत्वारोवीरास्त्रैलोक्यविश्रुताः वृषदर्भः सुवीरश्चमद्रकः केकयस्तथा २९ तेषांजनपदाः स्फीताः केकयामद्रकास्तथा वृषदर्भा
तपाज्ञज्ञे सुतः सुतपसोबलिः जातोमानुषयोनौतुसराजाकांचनेषुधिः ३२ महायोगीसतुबलिर्बभूवनृपतिः पुरा पुत्रानुत्पादयामास
पंचवंशकरान्भुवि ३३ अंगः प्रथमतोजज्ञेवंगः सुह्मस्तथैवच पुंड्रः कलिंगश्चतथा बालेयंक्षत्रमुच्यते ३४ बालेयाब्राह्मणाश्चैवतस्य
वंशकराभुवि बलेस्तुब्रह्मणादत्तावराः प्रीतेनभारत ३५ महायोगित्वमायुश्चकल्पस्यपरिमाणतः संग्रामेचाप्यजेयत्वंधर्मेचैवप्रधान
ता ३६ त्रैलोक्यदर्शनंचैवप्राधान्यंप्रसवेतथा बलेचाप्रतिमत्वंवैधर्मतत्त्वार्थदर्शनम् ३७ चतुरोनियतान्वर्णान्त्वंचस्थापयितासु-
वि इत्युक्तोविभुनाराजा बलिः शांतिंपरांययौ ३८ तस्यतेतनयाः सर्वेक्षेत्रजामुनिपुंगवाः संभूतादीर्घतमसः सुदेष्णायांमहौजसः ३९
बलिस्तानभिषिच्येह पंचपुत्रानकल्मषान् कृतार्थः सोऽपियोगात्मा योगमाश्रित्यसप्रभुः ४० अधृष्यः सर्वभूतानांकालापेक्षीचरन्न-
पि कालेनमहताराजन्स्वंचस्थानमुपागमत् ४१ तेषांजनपदाः पंच अंगावंगाः ससुह्मकाः कलिंगाः पुंड्रकाश्चैवप्रजास्त्वंगस्यमेशृ
णु ४२

तितिक्षोर्वंशमाह तितिक्षोस्तुप्रजाः शृण्विति ३० ३१ यः पूर्वंबलिर्दानवेंद्रआसीत् सएवसुतपसः पुत्रोबलिनामाभूत् ३२ ३३ बालेयंबलेरपत्यम् ३४
३५ ३६ प्रसवे अभ्यनुज्ञायांवशित्वाख्यांसिद्धिमित्यर्थः ३७ परांशांतिम् ज्ञानजंमोक्षम् ३८ क्षेत्रजाः बलेरूर्ध्वरेतस्त्वात् ३९ ४० स्वंस्थानम् सुतलम् ४१ ४२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४ काण्वायनाः कण्वस्यगोत्रापत्यानि ५ हेभूप यस्यकस्यकन्याईलिनी आसीत् सः ईलिनोनामराजाब्रह्मवादिनि ब्राह्मणसमुदाये अधिअधिकः आसीत् तं सुभ्रूः ताईलिनीस्त्रीस्त्रियं भार्याअभ्यगच्छत अधिगतवान् तस्मात्कण्वोऽभ्यजायत इलानाम्नीतुयस्यासीत्कन्येतिपाठस्त्वप्रमादिकः तंस्रनास्वानुजभगोत्रस्यदुहितापरिणीतेत्येवमर्थकत्वादयुक्तम् ६ धर्मनेत्रः धर्मस्यप्रवर्त्तकः ७ ८ ९ १० दुष्यंतप्रतिराजानमितिसार्द्धश्लोकद्वयंस्पष्टार्थम् ११ १२ १३ पुराआदिपर्वणि आं

सर्ववेदविदस्तत्रब्रह्मण्याः सत्यवादिनः सर्वेकृतास्त्रावलिनः सर्वेयुद्धविशारदाः ४ पुत्रः प्रतिरथस्यासीत्कण्वः समभवन्नृपः मेधातिथिः सुतस्तस्ययस्मात्काण्वायनाद्विजाः ५ ईलिनी भूपयस्यासीत्कन्यावैजनमेजय ब्रह्मवादिन्यधिस्त्रीचतंसुस्तामभ्यगच्छत ६ तंसोः सुरोधोराजर्षिर्धर्मनेत्रोमहायशाः ब्रह्मवादीपराक्रांतस्तस्यभार्योपदानवी ७ उपदानवीसुतान्लेभेचतुरस्त्वैलिकात्मजान् दुष्यंतमथ सुष्मंतंप्रवीरमनघंतथा ८ दुष्यंतस्यतुदायादोभरतोनामवीर्यवान् ससर्वदमनोनामनागायुतबलोमहान् ९ चक्रवर्तीसुतोजज्ञेदुष्यंतस्यमहात्मनः शकुंतलायांभरतोयस्यनाम्नास्थभारताः १० दुष्यंतप्रतिराजानंवागुवाचाशरीरिणी माताभस्त्रापितुःपुत्रोयेनजातःसएवसः ११ भरस्वपुत्रंदुष्यंतमावमंस्थाः शकुंतलाम् रेतोधाः पुत्रउन्नयतिनरदेवयमक्षयात् १२ त्वंचास्यधातागर्भस्यसत्यमाहशकुंतला भरतस्यविनष्टेषुतनयेषुमहीपतेः १३ मातॄणांतातकोपेनमयातेकथितंपुरा बृहस्पतेरांगिरसः पुत्रोराजन्महामुनिः संक्रामितोभरद्वाजोमरुद्भिः क्रतुभिर्विभुः १४ अत्रैवोदाहरंतीमंभरद्वाजस्यधीमतः धर्मसंक्रमणंचापिमरुद्भिर्भरतायवै १५ अयोजयद्भरद्वाजोमरुद्भिः क्रतुभिर्हितम् पूर्वंतुवितथेतस्यकृतेवैपुत्रजन्मनि १६ ततोऽथवितथोनामभरद्वाजसुतोऽभवत् ततोऽथवितथेजातेभरतस्तुदिवंययौ १७ वितथंचाभिषिच्याथभरद्वाजोवनंययौ सराजावितथः पुत्रान्जनयामासपंचवै १८ सुहोत्रंचसुहोतारंगयंगर्गंतथैवच कपिलंचमहात्मानंसुहोत्रस्यसुतद्वयम् १९ काशकंचमहासत्त्वंतथागृत्समतिंनृपः तथागृत्समतेःपुत्राब्राह्मणाः क्षत्रियाविशः २० काशस्यकाश्यपोराजन्पुत्रोदीर्घतपास्तथा बभूवदीर्घतपसोविद्वान्धन्वंतरिःसुतः २१ धन्वंतरेस्तुतनयः केतुमानितिविश्रुतः अथकेतुमतः पुत्रोवीरोभीमरथोनृपः २२

गिरसः आंगिरसोवापत्यंभरद्वाजः क्रतुभिः क्रतुदेवताभिर्मरुद्भिः संक्रामितः भरतपुत्रत्वंप्रापितः १४ १५ धर्मसंक्रमणंव्याचष्टे अयोजयदिति वितथेमातृभिः पुत्रघातनात् १६ १७ १८ १९ काशकश्चेति पूर्वोक्ताकाशिकगृत्समदौ आयुसंज्ञात्क्षत्रवृद्धशर्मसुहोत्रक्रमेणचतुर्थौ इमौतुनस्मादेवनहुषययातिपूर्वादिक्रमेण एकविंशस्यसुहोत्रस्यपुत्रौ अतोनिविप्रकर्षात्ततोऽन्यौ अतएवईषन्नामभेदोपिगृत्समदोगृत्समतिरित्यादिर्दृश्यते २० २१ २२ श्रीगोपालोविजयते ॐ ॐ ॐ ॐ ॐ ४६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दिवोदासपदंव्युत्पादयति दिवोदासइतीति दिवःसमस्तस्वर्गान् दस्यतिउपक्षिणोति आत्मैश्वर्यबलेनेतिदिवोदासः कर्मण्यण् विभक्तेरलुक् आर्षः २३ समा
नान्वयेयथासमाननामानोभवंति एवंसमानकर्माणोपिभवंतीतिज्ञापयन् पूर्वदिवोदासवत् अनेनापिवाराणसीराज्यादिकंकृतम् पूर्वनिकुंभादियन्निकुं-
भांतरेणतद्वंश्येनवाराणसीशप्ता तद्वत्पूर्वक्षेमकवंश्येन क्षेमकांतरेणानिवेशितेत्यादि एकस्मिन्नपिकल्पेऽसकृत्समाननामकर्मणांपुंसांजन्मनविरुध्यतइत्य-
भिप्रेत्याह एतस्मिन्नंतरेइत्यादि २४ २५ २६ भद्रश्रेण्यस्येति पूर्वोदिवोदासआयोर्वृद्धशर्मादिक्रमेणदशमः भद्रश्रेण्यश्चनहुषादिक्रमेणयदुवंशजएकाद

कृतोभीमरथस्यापिदिवोदासःप्रजेश्वरः दिवोदासइतिख्यातःसर्वरक्षोविनाशनः २३ एतस्मिन्नेवकालेतुपुरींवाराणसींनृप शून्यांनिवे
शयामासक्षेमकोनामराक्षसः शप्ताहिसामतिमतानिकुंभेनमहात्मना २४ शून्यावर्षसहस्रंवैभवित्रीतिनराधिप तस्यातुशप्तमात्रायांदि
वोदासःप्रजेश्वरः विषयांतेपुरींरम्यांगोमत्यांसंन्यवेशयत् २५ भद्रश्रेण्यस्यपूर्वंतुपुरीवाराणसीभवत् यदुवंशप्रसूतस्यतपस्यभिरतस्यच
२६ भद्रश्रेण्यस्यपुत्राणांशतमुत्तमधन्विनाम् हत्वानिवेशयामासदिवोदासःप्रजेश्वरः २७ दिवोदासस्यपुत्रस्तुवीरोराजाप्रतर्दनः प्रत
र्दनस्यपुत्रौद्वौवत्सोभार्गवएवच २८ अलर्कोराजपुत्रस्तुराजासन्नतिमान्भुवि हैहयस्यतुदायाद्यंहृतवान्वैमहीपतिः २९ आजन्हेपि
तृदायाद्यंदिवोदासहृतंबलात् भद्रश्रेण्यस्यपुत्रेणदुर्दमेनमहात्मना दिवोदासेनबालेतिघृणयापरिवर्जितः ३० अष्टारथोनामनृपःसुतो
भीमरथस्यवै तेनपुत्रेषुबालेषुप्रहृतंतस्यभारत ३१ वैरस्यांतमहाराजक्षत्रियेणविधित्सता अलर्कःकाशिराजस्तुब्रह्मण्यःसत्यसंगरः ३२
षष्टिंवर्षसहस्राणिषष्टिंवर्षशतानिच तस्यासीत्सुमहद्राज्यंरूपयौवनशालिनः ३३ युवारूपेणसंपन्नआसीत्काशिकुलोद्वहः लोपामु
द्राप्रसादेनपरमायुरवापसः ३४ वयसोंतेमहाबाहुर्हत्वाक्षेमकराक्षसम् शून्यांनिवेशयामासपुरींवाराणसींनृप ३५ अलर्कस्यतुदाया
दःसुनीथोनामपार्थिवः सुनीथस्यतुदायादःक्षेम्योनाममहायशाः ३६ क्षेम्यस्यकेतुमान्पुत्रोवर्षकेतुस्ततोभवत् वर्षकेतोस्तुदायादो
विभुर्नामप्रजेश्वरः ३७ आनर्तस्तुविभोःपुत्रःसुकुमारस्ततोभवत् पुत्रस्तुसुकुमारस्यसत्यकेतुर्महारथः ३८ ततोभवन्महातेजाराजा
परमधार्मिकः वत्सस्यवत्सभूमिस्तुभार्गभूमिस्तुभार्गवात् ३९ एतेत्वंगिरसःपुत्राजातावंशेथभार्गवे ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्च
भरतर्षभ ४०

शःयदोस्त्वष्टमःतयोःसमानकालजत्वाद्विरोधोयुक्तःयस्तुआयोःनहुषादिक्रमेणपुरुवंश्योऽष्टाविंशोदिवोदासःतस्यततोष्टमेनभद्रश्रेण्येनसहात्यंतं-
कालविप्रकर्षाद्विरोधोनसंभवतीति अयंएतत्समानकालीनोन्यएवभद्रश्रेण्योज्ञेयइतिभावः २७ २८ २९ ३० अष्टारथःप्रतर्दनःभीमरथस्येतिदिवोदासस्यविशेष
णम् तस्यदुर्दमस्यबालेषुअसमर्थेषुपुत्रेषु ३१ अलर्कःप्रतर्दनस्यपौत्रःपुरींनिवेशयामासेतितृतीयेनान्वयः ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तेषांपंचानांदेशानांरक्षणे अलंसमर्थाएतेइतिश्रुतत्वात्पंचालाइतिनाम ६७ ६८ ६९ अयंदिवोदासोब्राह्मणः ७० शारद्वतोगौतमस्य ७१ सत्यधृतेः शरद्वतःपौ
त्रस्य पूर्वशरद्वतः सकाशात्कृपस्यजन्मउक्तम् अतोयंसत्यधृतिः पितामहस्यसमाननामेतिगम्यते अत्रेयंकथा शरद्वतः तपोविघ्नार्थंआगतांजालपदीमप्सर
संदृष्ट्वा शरद्वान्चकमे साचतद्वाक्यंतरात्पद्भुता ततस्तामनुधावतोमहर्षेरेतश्चस्कंद ततोमिथुनंजातमिति ७२ ७३ ७४ दिवोदासस्यक्षत्रियस्य ७५ ७६ ७७

अलंसंरक्षणेतेषांपंचालाइतिविश्रुताः मुद्गलस्यतुदायादोमौद्गल्यःसुमहायशाः ६७ सर्वएतेमहात्मानः क्षत्रोपेताद्विजातयः एतेह्यंगि
रसःपक्षंसंश्रिताःकाण्वमौद्गलाः ६८ मौद्गलस्यसुतोज्येष्ठोब्रह्मर्षिःसुमहायशाः इंद्रसेनोयतोगर्भंवध्यश्वंप्रत्यपद्यत ६९ वध्यश्वान्मि
थुनंजज्ञेमेनकायामितिश्रुतिः दिवोदासश्चराजर्षिरहल्याचयशस्विनी ७० शरद्वतस्यदायादमहल्यासमसूयत शतानंदमृषिश्रेष्ठंतस्या
पिसुमहायशाः ७१ पुत्रःसत्यधृतिर्नामधनुर्वेदस्यपारगः तस्यसत्यधृतेरेतोदृष्ट्वाप्सरसमग्रतः ७२ अवस्कन्नंशरस्तंबेमिथुनंसमपद्य
त कृपयातच्चजग्राह शंतनुर्मृगयांगतः ७३ कृपःस्मृतःसवैतस्माद्गौतमीचकृपीतथा एतेशारद्वताःप्रोक्ताएतेतेगौतमाःस्मृताः ७४ अतऊ
र्ध्वंप्रवक्ष्यामिदिवोदासस्यसंततिम् दिवोदासस्यदायादोब्रह्मर्षिर्मित्रयुर्नृपः ७५ मैत्रायणस्ततस्सोमोमैत्रेयास्तुततःस्मृताः एतेहिसंश्रि
ताःपक्षंक्षत्रोपेतास्तुभार्गवाः ७६ आसीत्पंचजनःपुत्रःसृंजयस्यमहात्मनः सुतःपंचजनस्यापिसोमदत्तोमहीपतिः ७७ सोमदत्तस्य
दायादःसहदेवोमहायशाः सहदेवसुतश्चापिसोमकोनामपार्थिवः ७८ अजमीढात्पुनर्जातःक्षीणवंशेतुसोमकः सोमकस्यसुतोजंतु
र्यस्यपुत्रशतंबभौ ७९ तेषांयवीयान्पृषतोद्रुपदस्यपितामभुः धृष्टद्युम्नस्तुद्रुपदात्धृष्टकेतुश्चतत्सुतः ८० अजमीढाःस्मृतात्येतेमहात्मा
नस्तुसोमकाः पुत्राणामजमीढस्यसोमकत्वंमहात्मनः ८१ महीषीत्वजमीढस्यधूमिनीपुत्रगृद्धिनी तृतीयातस्यपूर्वेषांजननीपृथिवीप
ते ८२ सातुपुत्रार्थिनीदेवीव्रतचर्यासमन्विता तेपेवर्षायुतंतस्मात्तपःपरमदुश्चरम् ८३ हुत्वाग्निंविधिवत्सातुपवित्रमितभोजना अग्नि
होत्रकुशेष्वेवसुष्वापजनमेजय धूमिन्यासतयादेव्याप्त्वजमीढःसमेयिवान् ८४ ऋक्षंसंजनयामासधूम्रवर्णंसुदर्शनम् ऋक्षात्संवर
णोजज्ञेकुरुःसंवरणात्तथा यःप्रयागादतिक्रम्यकुरुक्षेत्रंचकारह ८५ पुण्यंचरमणीयंचपुण्यकृद्भिर्निषेवितम् तस्यान्ववायःसुमहा
न्तस्यनाम्नास्थकौरवाः ८६ कुरोश्चपुत्राश्चत्वारःसुधन्वासुधनुस्तथा परिक्षिच्चमहाबाहुःप्रवरश्चारिमेजयः ८७

७८ आजमीढात्सहदेवात् त
स्ययज्ञेपशुभूतस्थानेपुत्रशतंबभौ शतंपुत्रानुद्दिश्य तेनैवपशुनायागस्यकृतत्वात् ७९ यवीयान्कनीयान् ८० ८१ तृतीयाअजमीढस्यभार्याणाम् ८२ ८३
८४ प्रयागादतिक्रम्यप्रयागंत्यक्त्वा कुरुक्षेत्रंस्वस्थानंचकार ८५ ८६ अरिमेजयःशत्रुकंपनः एजतेःखशप्रूर्वपदस्यमुमागमश्च ८७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सुहोत्रस्यवितथपुत्रस्य ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ४९ ५० ५१ ५२ सत्यवतीविश्वामित्रादीनांकनीयसी ५३ ५४ ५५ ५६ ५७ ५८

सुहोत्रस्यबृहत्सुनोबृहतस्तनयास्त्रयः अजमीढोद्विमीढश्चपुरुमीढश्चवीर्यवान् ५१ अजमीढस्यपत्न्यस्तुतिस्रोवैयशसान्विताः नी
लिनीकेशिनीचैवधूमिनीचवरांगना ५२ अजमीढस्यकेशिन्यांजज्ञेजन्हुःप्रतापवान् आजन्हेयोमहासत्रंसर्वमेधंमहामखम् ५३ पति
लोभेनयंगंगाविनीताभिससारह नेच्छतःप्लावयामासतस्यगंगाथतत्सदः ५४ सतयाप्लावितंदृष्ट्वायज्ञवाटंपरंतप जन्हुरप्यब्रवीद्गंगां
क्रुद्धोभरतसत्तम ५५ एषतेत्रिषुलोकेषुसंक्षिप्यापःपिबाम्यहम् अस्यगंगेऽवलेपस्यसद्यःफलमवाप्नुहि ५६ ततःपीतांमहात्मानोगंगां
दृष्ट्वामहर्षयः उपनिन्युर्महाभागादुहितृत्वायजान्हवीम् ५७ युवनाश्वस्यपुत्रींतुकावेरींजन्हुरावहत् गंगाशापेनदेहार्द्धंयस्याःपश्चान्न
दीकृतम् ५८ जन्होस्तुदयितःपुत्रस्त्वजकोनामवीर्यवान् अजकस्यतुदायादोबलाकाश्वोमहीपतिः ५९ बभूवमृगयाशीलःकुशिकस्तस्य
चात्मजः पन्हवैःसहसंवृद्धोराजावनचरैस्तदा ५० कुशिकस्तुतपस्तेपेपुत्रमिंद्रसमंप्रभुः लभेयमितितंशक्रस्त्रासादभ्येत्यजज्ञिवान् ५१
सगाधिरभवद्राजामघवान्कौशिकःस्वयम् विश्वामित्रस्तुगाधेयोराजाविश्वरथस्तदा ५२ विश्वकृद्विश्वजिच्चैवतथासत्यवतीनृप ऋची-
काज्जमदग्निस्तुसत्यवत्यामजायत ५३ विश्वामित्रस्यतुसुतादेवरातादयःस्मृताः प्रख्यातास्त्रिषुलोकेषुतेषांनामानिमेशृणु ५४ देवश्रवाः
कतिश्चैवयस्मात्कात्यायनाःस्मृताः शालावत्याहिरण्याक्षोरेणोर्जज्ञेथरेणुमान् ५५ सांकृत्योगालवोराजन्मौद्गल्यश्चेतिविश्रुताः तेषांख्या
तानिगोत्राणिकौशिकानांमहात्मनाम् ५६ पाणिनोबभ्रवश्चैवध्यानजप्यास्तथैवच पार्थिवादेवराताश्चशालंकायनसौश्रवाः ५७ लौहित्या
यामदूताश्चतथाकारीषयःस्मृताः विश्रुताःकौशिकाराजन्तथान्येसैंधवायनाः ५८ ऋष्यंतरविवाह्याश्चकौशिकाबहवःस्मृताः पौरवस्य
महाराजब्रह्मर्षेःकौशिकस्यह ५९ संबंधोह्यस्यवंशेस्मिन्ब्रह्मक्षत्रस्यविश्रुतः विश्वामित्रात्मजानांतुशुनःशेफोग्रजःस्मृतः ६० भार्गवःकौ
शिकत्वंहिप्राप्तःसमुनिसत्तमः देवरातादयश्चान्येविश्वामित्रस्यवैसुताः ६१ दृषद्वतीसुतश्चापिविश्वामित्रात्तथाष्टकः अष्टकस्यसुतोलौ-
हिःप्रोक्तोजन्हुगणोमया ६२ आजमीढोऽपरोवंशःश्रूयतांपुरुषर्षभ अजमीढस्यनीलिन्यांसुशांतिरुदपद्यत ६३ पुरुजातिःसुशांतेस्तु
बाह्याश्वःपुरुजातितः बाह्याश्वतनयाःपंचबभूवुरमरोपमाः ६४ मुद्गलःसृंजयश्चैवराजाबृहदिषुःस्मृतः यवीनरश्चविक्रांतःक्रुमिलाश्वश्च
पंचमः ६५ पंचैतेरक्षणायालंदशानामितिविश्रुताः पंचानांविद्धिपंचालान्स्फीतैर्जनपदैर्वृतान् ६६

५९ ६० ६१ ६२ अजमीढस्यबृहतःपुत्रस्यपत्न्यंतरेप्रसवांतरमाह आजमीढइति ६३ ६४ ६५ ६६ ६७ ६७ ६७ ६७ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कृतयज्ञाच्चैद्याच्चेदिजा वसंजनयामासेति सार्द्धश्लोकोवाक्यम् ८९ चैद्यश्चेदिदेशयः सचासौउपरिचरश्चेतिसमासः षट्पुत्रान्मानुषीभावे एकांकन्यांम
त्सीभूत्वाजनयामासेत्यर्द्धस्यार्थः ९० कुशस्तृतीयः ९१ मारुतः चतुर्थः यदुः पंचमः मत्स्यः मत्सीसकाशात्कालीसत्यवतीषष्ठी सत्तमः सप्तमः पुत्रः पाठांतरंत्वना
दरणीयम् ९२ ९३ ९४ यस्ययस्मात्संभवाख्यात्सः जरासंधः बृहद्रथाज्जरासंधइतिप्रागुक्तम् इदानींतस्मात्षष्ठोयमित्युक्तम् नत्रद्वितीयोबृहद्रथः संभ-

कधन्वनस्तुदायादः सुहोत्रोमतिमांस्ततः च्यवनस्तस्यपुत्रस्तुराजाधर्मार्थकोविदः ८८ च्यवनात्कृतयज्ञस्तुइष्ट्वायज्ञैःसधर्मवित् विश्रुतं
जनयामासपुत्रमिंद्रसमंनृपः ८९ चैद्योपरिचरंवीरंवसुनामांतरिक्षगम् चैद्योपरिचराज्जज्ञेगिरिकासप्तमानवान् ९० महारथोमगध-
राट्विश्रुतोयोबृहद्रथः प्रत्यग्रहः कुशश्चैवयमाहुर्मणिवाहनम् ९१ मारुतश्चयदुश्चैवमत्स्यः कालीचसत्तमः बृहद्रथस्यदायादः कुशाग्रो
नामविश्रुतः ९२ कुशाग्रस्यात्मजोविद्वान्वृषभोनामवीर्यवान् ९३ वृषभस्यतुदायादःपुष्पवान्नामधार्मिकः दायादस्तस्यविक्रांतोराजा
सत्यहितः स्मृतः ९४ तस्यपुत्रः सधर्मात्मानाम्नाऊर्जस्तुजज्ञिवान् ऊर्ज्जस्यसंभवः पुत्रोयस्यजज्ञेसवीर्यवान् ९५ शकलेद्वेसवैजातोजर
यासंधितःसतु जरयासंधितोयस्माज्जरासंधस्ततःस्मृतः ९६ सर्वक्षत्रस्यजेतासौजरासंधोमहाबलः जरासंधस्यपुत्रोवैसहदेवःप्रतापवा
न् ९७ सहदेवात्मजःश्रीमानुदायुःसमहायशाः उदायुर्ज्जनयामासपुत्रंपरमधार्मिकम् ९८ श्रुतधर्मेतिनामानंमगधान्योवसद्विभुः परि
क्षितस्तुदायादोधार्मिकोजनमेजयः ९९ जनमेजयस्यदायादास्त्रयएवमहारथाः श्रुतसेनोग्रसेनौच भीमसेनश्चनामतः १०० एतेसर्वेम
हाभागाविक्रांताबलशालिनः जनमेजयस्यपुत्रौतुसुरथोमतिमांस्तथा १०१ सुरथस्यतुविक्रांतःपुत्रोजज्ञेविदूरथः विदूरथस्यदाया
दऋक्षएवमहारथः २ द्वितीयःसभवोराजानाम्नातेनैवसंज्ञितः द्वावृक्षौतववंशेस्मिन्द्वावेवतुपरीक्षितौ ३ भीमसेनास्त्रयोराजन्द्वा-
वेवजनमेजयौ ऋक्षस्यतुद्वितीयस्यभीमसेनोऽभवत्सुतः ४ प्रतीपोभीमसेनस्यप्रतीपस्यतुशंतनुः देवापिर्बाल्हिकश्चैवत्रयएवमहा
रथाः ५ शंतनोःप्रसवस्त्वेषयत्रजातोसिपार्थिव बाल्हिकस्यतुराज्यंवैसप्तबाह्यंनरेश्वर ६ बाल्हिकस्यसुतश्चैवसोमदत्तोमहायशाः ज
ज्ञिरेसोमदत्तात्तुभूरिर्भूरिश्रवाःशलः ७

वाच्यइतिवाकल्पभेदात्क्रमभेदइतिवा समाधेयं ९५ ९६ ९७ ९८ परीक्षितःकुरोर्द्वितीयपुत्रस्य ९९ १०० जनमेजय
स्यपुत्रौ मणिमत्यांजातौ पूर्वेभ्योन्यौ १ २ द्वितीयः पूर्वोक्ताद्वृक्षात्कुरुपितामहादन्यः ३ ४ ५ सप्तबाह्यं सप्तविधप्राप्तिबाह्यं साच ज्ञानेधर्मेबलेकामेविज्ञानोपायसंप्र
हेमदर्थेभूभुजांनित्यंप्राप्तिःसप्तविधामतेति ज्ञानेशास्त्रीये विज्ञानेयुक्तिकौशलादौ मदर्थेशरीरभागेचंदनतांबूलादौ शेषंस्पष्टं अन्येतुसप्तकगणाभ्यांबाह्यंभून्य
मित्याहुःसप्तकगणौचसप्तरत्नानिसप्तमहारत्नानितथाहिगजवाजिरथस्त्रीषुनिधिमालांबरद्रुमाः शक्तिःपाशोमणिछत्रविमानानिचतुर्दशेति अस्त्राणिचइषव- ४८
श्चेतिपृथक् निधिर्निधानं मालास्रक् द्रुमाःदिव्याश्चपंकादयः पाशःसपत्रङ्गः विमानंअट्टालः ६ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८ ९ १० ११ १२ १३ १४ १५ १६ १७ अनपत्यः पुत्रापत्यरहितः १८ संवर्त्तायकृत्विजे दत्तासतीसंवर्त्तेनच दुष्यंतपित्रेसुघोरायदत्तासतीतस्या

उपाध्यायस्तुदेवानांदेवापिरभवन्मुनिः च्यवनस्यकृतःपुत्रइष्टश्चासीन्महात्मनः ८ शंतनुस्त्वभवद्राजाकौरवाणांधुरंधरः शंतनोः
संभवक्ष्यामियत्रजातोसिपार्थिव ९ गांगंदेवव्रतंनामपुत्रंसोजनयत्प्रभुः सतुभीष्मइतिख्यातः पांडवानांपितामहः १० कालीविचित्रवी
र्यंतुजनयामासभारत शंतनोर्दयितंपुत्रंधर्मात्मानमकल्मषम् ११ कृष्णद्वैपायनश्चैवक्षेत्रेवैचित्रवीर्यके धृतराष्ट्रंचपांडुंचविदुरंचाप्यजी
जनत् १२ धृतराष्ट्रश्चगांधार्यांपुत्रानुत्पादयच्छतम् तेषांदुर्योधनःश्रेष्ठःसर्वेषामेवसप्रभुः १३ पांडोर्धनंजयःपुत्रःसौभद्रस्तस्यचात्मजः
अभिमन्योःपरिक्षित्तुपितातवजनेश्वर १४ एषतेपौरवोवंशोयत्रजातोसिपार्थिव तुर्वसोस्तुप्रवक्ष्यामिद्रुह्योश्चानोर्यदोस्तथा १५ तुर्वसोस्तु
वन्हिर्वन्हेर्गोभानुरात्मजः गोभानोस्तुसुतोराजात्रैसानुरपराजितः १६ करंधमस्तुत्रैसानोर्मरुत्तस्तस्यचात्मजः अन्यस्त्वावीक्षितोराजा
मरुत्तःकथितस्तव १७ अनपत्योभवद्राजायज्वाविपुलदक्षिणः दुहितासम्मतानामतस्यासीत्पृथिवीपतेः १८ दक्षिणार्थंस्मवैदत्तासंव
र्तायमहात्मने दुष्यंतंपौरवंचापिलेभेपुत्रमकल्मषम् १९ एवंययातेःशापेनजरासंक्रमणेतदा पौरवंतुर्वसोर्वंशःप्रविवेशनृपोत्तम २०
दुष्यंतस्यतुदायादःकरुत्थामःप्रजेश्वरः करुत्थामात्तथाक्रीडश्चत्वारस्तस्यचात्मजाः २१ पांड्यश्चकेरलश्चैवकोलश्चोलश्चपार्थिवः तेषां
जनपदाःस्फीताःपांड्याश्चोलाःसकेरलाः २२ द्रुह्योश्चतनयोराजन्बभ्रुःसेतुश्चपार्थिवः अंगारसेतुस्तत्पुत्रोमरुतांपतिरुच्यते २३ यौव
नाश्वेनसमरेकृच्छ्रेणनिहतोबली युद्धःसुमहदस्यासीत्मासान्परिचतुर्दश २४ अंगारस्यतुदायादोगांधारोनामभारत ख्यायतेत
स्यनाम्नावैगांधारविषयोमहान् २५ गांधारविषयाश्चैवतुरगावाजिनांवराः अनोस्तुपुत्रोधर्मोभूद्धृतस्तस्यात्मजोभवत् २६ घृतात्तु
दुदुहोजज्ञेप्रचेतास्तस्यचात्मजः प्रचेतसःसुचेतास्तुकीर्तितास्त्वनवोमया २७ यदोर्वंशंप्रवक्ष्यामिज्येष्ठस्योत्तमतेजसः विस्तरेणानुपू
र्व्यातुगदतोमेनिशामय १२८ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिपुरुवंशानुकीर्त्तनेद्वात्रिंशोऽध्यायः ३२
वैशंपायनउवाच बभूवुस्तुयदोःपुत्राःपंचदेवसुतोपमाः सहस्रदःपयोदश्चक्रोष्टानीलोंजिकस्तथा १ सहस्रदस्यदायादास्त्रयःप
रमधार्मिकाः हैहयश्चहयश्चैवराजन्वेणुहयस्तथा २ हैहयस्याभवत्पुत्रोधर्मनेत्रइतिस्मृतः धर्मनेत्रस्यकार्तस्तुसाहंजस्तस्यचात्मजः ३

त्तुदुष्यंतंपुत्रंलेभे १९ अतएवतुर्वसोर्वंशःपौरवंवंशंप्रविवेश असंक्रमणेनेतिच्छेदः २० दुष्यंतस्यशकुंतलायांभरतः अन्यस्यांभार्यायांकरुत्थामश्चासीदि
त्यर्थः २१ २२ २३ २४ २५ २६ २७ २८ इतिहरिवंशेटीकायांद्वात्रिंशोऽध्यायः ३२ बभूवुरिति १ २ ३ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४ ५ ६ ७ ८ ९ अत्रिसंभवं दत्तं दत्तात्रेयमित्यर्थः १० पूर्वमित्यनेनएकोवरः ११ अधर्मेणैतिद्वौवरौ १२ संग्रामानितिचतुर्थोवरः १३ योगात् योगब
लात् मायया संकल्पमात्रेण १४ उग्रेणविधिनायुद्धेन १५ १६ १७ १८ गंधर्वउपबर्हणाख्यो वरीदासस्यगंधर्वपतेः पुत्रः १९ २० योगीकायव्यूहेन युग

साहंजनीनामपुरीयेनराज्ञानिवेशिता साहंजस्यतुदायादोमहिष्मान्नामपार्थिवः ४ माहिष्मतीनामपुरीयेनराज्ञानिवेशिता आसी
न्महिष्मतःपुत्रोभद्रश्रेण्यःप्रतापवान् ५ वाराणस्यधिपोराजाकथितःपूर्वमेवतु भद्रश्रेण्यस्यपुत्रस्तुदुर्दमोनामविश्रुतः ६ दुर्दमस्यसु
तोधीमान्कनकोनामवीर्यवान् कनकस्यतुदायादाश्चत्वारोलोकविश्रुताः ७ कृतवीर्यःकृतौजाश्चकृतवर्मातथैवच कृताग्निस्तुचतुर्थो
भूत्कृतवीर्यात्तथार्जुनः ८ यस्तुबाहुसहस्रेणसप्तद्वीपेश्वरोऽभवत् जिगायपृथिवीमेकोरथेनादित्यवर्चसा ९ सहिवर्षायुतंतप्त्वातपःप
रमदुश्चरम् दत्तमाराधयामासकार्त्तवीर्योऽत्रिसंभवम् १० तस्मैदत्तोवरान्प्रादात्चतुरोभूरितेजसः पूर्वंबाहुसहस्रंतुप्रार्थितंसुमह
द्वरम् ११ अधर्मेवर्त्तमानस्यसद्भिस्तत्रनिवारणम् उग्रेणपृथिवींजित्वास्वधर्मेणानुरंजनम् १२ संग्रामान्सुबहून्कृत्वाहत्वाचारीन्स
हस्रशः संग्रामेवर्त्तमानस्यवधंचाप्यधिकाद्रणे १३ तस्यबाहुसहस्रंतुयुध्यतःकिलभारत योगाद्योगेश्वरस्येवप्रादुर्भवतिमायया १४
तेनेयंपृथिवीसर्वासप्तद्वीपासपत्तना ससमुद्रासनगराउग्रेणविधिनाजिता १५ तेनसप्तसुद्वीपेषुसप्तयज्ञशतानिवै प्राप्तानिविधिनाराज्ञा
श्रूयंतेजनमेजय १६ सर्वेयज्ञामहाबाहोस्तस्यासन्भूरिदक्षिणाः सर्वेकांचनयूपाश्चसर्वेकांचनवेदयः १७ सर्वेदेवैर्महाराजविमानस्थै
रलंकृताः गंधर्वैरप्सरोभिश्चनित्यमेवोपशोभिताः १८ यस्ययज्ञेजगौगाथांगंधर्वोनारदस्तथा वरीदासात्मजोविद्वान्महिम्नातस्यवि
स्मितः १९ नारदउवाच नन्नूनंकार्त्तवीर्यस्यगतिंयास्यंतिपार्थिवाः यज्ञैर्दानैस्तपोभिर्वाविक्रमेणश्रुतेनच २० सहिसप्तसुद्वी
पेषुखड्गीचर्मीशरासनी रथीद्वीपाऽननुचरन्योगीसंदृश्यतेनृभिः २१ अनष्टद्रव्यताचैवनशोकोनचविभ्रमः प्रभावेनमहाराज्ञःप्रजा
धर्मेणरक्षतः २२ पंचाशीतिसहस्राणिवर्षाणांवैनराधिपः ससर्वरत्नभाक्सम्राट्चक्रवर्तीबभूवह २३ सएवयज्ञपालोभूत्क्षेत्रपालः
सएवच सएववृष्ट्यापर्जन्योयोगित्वादर्जुनोऽभवत् २४ सवैबाहुसहस्रेणज्याघातकठिनत्वचा भातिरश्मिसहस्रेणशरदीवदिवाकरः
२५ सहिनागान्मनुष्येषुमाहिष्मत्यांमहाद्युतिः कर्कोटकसुतान्जित्वापुर्यांतस्यान्यवेशयत् २६ सवैवेगंसमुद्रस्यप्रावृट्कालेंबुजे
क्षणः क्रीडन्निवभुजोद्भिन्नंप्रतिस्रोतश्चकारह २७

पत् सप्तस्वपि द्वीपेषु दृश्यते २१ २२ २३ यज्ञपालोयजमानः एकेनशरीरेणयागंकरोति अ-
परेणपालनमित्यर्थः २४ २५ कार्त्तवीर्यस्यमाहात्म्यमाह सहीत्यादिना २६ प्रतिस्रोतः विपरीतप्रवाहम् २७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शंकितापरेण भक्तेति शंकावती अभ्येतिसमुद्रमितिशेषः २८ २९ ३० बाहुनाबाहुभिः प्रावर्त्तयत् शरीरभ्रमणेनावर्त्तितवान् क्षीरोदंमंदरइव ३१ ३२ ३३ ३४ पौलस्त्यम् पुलस्त्यापत्यं रक्षःराक्षसम् ३५ ३६ राज्ञः कार्त्तवीर्यस्य ३७ विभावसोर्वन्हेः ३८ ३९ ४० ४१ ४२ यत्रनिमित्तभूते आपवोवसिष्ठः ४३ ते

लुंठितान्क्रीडितातेन फेनस्रग्दाममालिनी चलदूर्मिसहस्रेण शंकिताभ्येतिनर्मदा २८ तस्यबाहुसहस्रेण क्षुभ्यमाणेमहोदधौ भया न्निलीनानिश्चेष्टाः पातालस्थामहासुराः २९ चूर्णीकृतमहावीचिचलन्मीनमहातिमिम् मारुताविद्धफेनौघमावर्त्तक्षोभदुःसहम् ३० प्रा वर्त्तयत्तदाराजासहस्रेणचबाहुना देवासुरसमाक्षिप्तः क्षीरोदमिवमंदरः ३१ मंदरक्षोभचकिता अमृतोद्भवशंकिताः सहसोत्पतिता भीताभीमदृष्ट्वानृपोत्तमम् ३२ नतानिश्चलमूर्द्धानोबभूवुस्तेमहोरगाः सायान्हे कदलीखंडे कंपितास्तस्यवायुना ३३ सवैबध्वाधनु ज्याभिरुत्सिक्तंपंचभिःशरैः लंकेशंमोहयित्वातुसबलंरावणंबलात् निर्जित्यैवसमानीयमाहिष्मत्यांबबंधतम् ३४ श्रुत्वातुबद्धंपौल स्त्यंरावणंत्वर्ज्जुनेनतु ततोगत्वापुलस्त्यस्तमर्जुनंददृशेस्वयम् सुमोचरक्षःपौलस्त्यंपुलस्त्येनानुयाचितः ३५ यस्यबाहुसहस्रस्यबभू वज्यातलस्वनः युगांतेत्वम्बुदस्येवस्फुटतोह्यशनेरिव ३६ अहोबतमृधेवीर्यंभार्गवस्ययदच्छिनत् राज्ञोबाहुसहस्रंतुहैमंतालवनंय था ३७ तृषितेनकदाचित्सभिक्षितश्चित्रभानुना सभिक्षांसददौवीरःसप्तद्वीपान्विभावसोः ३८ पुराणिग्रामघोषांश्चविषयांश्चैवसर्व- शःजज्वालतस्यसर्वाणिचित्रभानुर्दिधक्षया ३९ सतस्यपुरुषेंद्रस्यप्रभावेनमहात्मनः ददाहकार्त्तवीर्यस्यशैलांश्चैववनानिच ४० सशून्य माश्रमंरम्यंवरुणस्यात्मजस्यवै ददाहवनवद्दीप्तश्चित्रभानुःसहैहयः ४१ यंलेभेवरुणःपुत्रंपुराभास्वंतमुत्तमम् वसिष्ठनामसमुनिःख्या तआपवइत्युत ४२ यत्रापवस्तुतंक्रोधाच्छप्तवानर्जुनंविभुः यस्मान्नवर्जितमिदंवनंतेममहैहय ४३ तस्मात्तेदुष्करंकर्मकृतमन्योहनिष्य ति रामोनाममहाबाहुर्जामदग्न्यःप्रतापवान् ४४ छित्वाबाहुसहस्रंतेप्रमथ्यतरसाबली तपस्वीब्राह्मणस्त्वांवधिष्यतिसभार्गवः ४५

वैशंपायनउवाच अनष्टद्रव्यतायस्यबभूवामित्रकर्शन प्रभावेननरेंद्रस्यप्रजाधर्मेणरक्षतः ४६ रामात्ततोस्यमृत्युर्वैतस्यशापान्मु नेर्नृप वरश्चैवहिकौरव्यस्वयमेववृतःपुरा ४७ तस्यपुत्रशतस्यासन्पंचशेषामहात्मनः कृतास्त्राबलिनःशूराधर्मात्मानोयशस्विनः ४८ शूरसेनश्चशूरश्चधृष्णोक्तःकृष्णएवच जयध्वजश्चनाम्नासीदावंत्योनृपतिर्महान् ४९ कार्त्तवीर्यस्यतनयावीर्यवंतोमहारथाः जयध्व- जस्यपुत्रस्तुतालजंघोमहाबलः ५० तस्यपुत्राःशतंख्यातास्तालजंघाइतिश्रुताः तेषांकुलेमहाराजहैहयानांमहात्मनाम् ५१

त्वयादुष्करंकर्मजया दिकंकृतंतत् अन्योहनिष्यतिनाशयिष्यति तवपराजयोभविष्यतीत्यर्थः ४४ ४५ अनष्टद्रव्यताप्रजानामितिशेषः ४६ स्वयमेववृतः दत्तात्रेयात् ४७ ४८ धृष्णोक्तःधृष्ट नामा आवंत्यइतिजयध्वजस्यविशेषणम् ४९ ५० ५१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५२ यदोः प्रथमपुत्रस्यसहस्रदस्यवंशमुक्त्वाद्वितीयस्यपयोदस्यसंततिमाहवृषेति अत्रपयोदएववर्षणाद्धेतोर्वृषशब्देनोच्यते पूर्णकर्मिणः पुण्यकर्मिणः ५३
५४ ५५ शूराइतिश्लोकःपुस्तकांतरेषुनास्ति ५६ ५७ भूतानिपृथिव्यादीनियथाल्लोकानिधारयंतितद्वत् ५८ पंचानांविसर्गविविधंसर्गम् वशीनियंता आत्म
जानांहतानांइंद्रियाणाम् ५९ ६० क्रोष्टोः यदोःपुत्रस्य ६१ इमंवक्ष्यमाणं अजोजातइतिशेषः ६२ इतिहरिवंशेटीकायांत्रयस्त्रिंशोऽध्यायः ३३ गांधारी १ २

वीतिहोत्राःसुजाताश्च भोजाश्चावंतयःस्मृताः तौंडिकेराइतिख्यातास्तालजंघास्तथैवच ५२ भरताश्चसुताजाताबहुत्वान्नानुकीर्त्तिताः
वृषप्रभृतयोराजन्यादवाःपूर्णकर्मिणः ५३ वृषोवंशधरस्तत्रतस्यपुत्रोभवन्मधुः मधोःपुत्रशतंत्वासीद्वृषणस्तस्यवंशभाक् ५४ वृषणा
द्वृष्णयःसर्वेमधोस्तुमाधवाःस्मृताः यादवायदुनाचाग्रेनिरुच्यंतेचहैहयाः ५५ शूराश्चशूरवीराश्चशूरसेनास्तथानघ शूरसेनइतिख्या
तस्तस्यदेशोमहात्मनः ५६ नतस्यवित्तनाशोस्तिनष्टंप्रतिलभेच्चसः कार्त्तवीर्यस्ययोजन्मकीर्त्तयेदिहनित्यशः ५७ एतेययातिपुत्राणांपंच
वंशाविशांपते कीर्त्तितालोकवीराणांयेलोकान्धारयंतिवै ५८ भूतानीवमहाराजपंचस्थावरजंगमान् ५८ श्रुत्वापंचविसर्गंतुराजाधर्मा
र्थकोविदः वशीभवतिपंचानामात्मजानांतथेश्वरः ५९ लभेत्पंचवरांश्चैवदुर्लभानिहलौकिकान् आयुःकीर्तिंतथापुत्रानैश्वर्यंभूमिमेवच
धारणाच्छ्रवणाच्चैवपंचवर्गस्यभारत ६० क्रोष्टोस्तुशृणुराजेंद्रवंशमुत्तमपौरुषम् यदोर्वंशधरस्याथयज्वनःपुण्यकर्मणः ६१ क्रोष्टोर्हिवं
शंश्रुत्वेमंसर्वपापैःप्रमुच्यते यस्यान्ववायजोविष्णुर्हरिर्वृष्णिकुलोद्वहः ६२ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणित्रयस्त्रिं
शोऽध्यायः ३३ वैशंपायनउवाच गांधारीचैवमाद्रीचक्रोष्टोर्भार्येबभूवतुः गांधारीजनयामासअनमित्रंमहाबलम् १ माद्रीयु
धाजितंपुत्रंततोन्यंदेवमीढुषम् तेषांवंशस्त्रिधाभूतोवृष्णीनांकुलवर्द्धनः २ माद्र्याःपुत्रस्यजज्ञातेसुतौवृष्ण्यंधकावुभौ जज्ञातेतनयौ
वृष्णेःश्वफल्कश्चित्रकस्तथा ३ श्वफल्कस्तुमहाराजधर्मात्मायत्रवर्त्तते नास्तिव्याधिभयंतत्रनावर्षभयमप्युत ४ कदाचित्काशिराज
स्यविभोर्भरतसत्तम त्रीणिवर्षाणिविषयेनावर्षत्पाकशासनः ५ सतत्रवासयामासश्वफल्कंपरमार्चितम् श्वफल्कपरिवर्त्तेचववर्षहरि
वाहनः ६ श्वफल्कःकाशिराजस्यसुतांभार्यामविंदत गांदिनीनामसागांतुददौविप्रेषुनित्यशः ७ सामातुरुदरस्थातुबहून्वर्षगणान्
किल निवसंतीनवैजज्ञेगर्भस्थांतांपिताब्रवीत् ८ जायस्वशीघ्रंभद्रंतेकिमर्थमिहतिष्ठसि प्रोवाचचैनंगर्भस्थाकन्यागांचदिनेदिने ९
यदिदद्यांततोद्याहंजाययिष्यामितांपिता तथेत्युवाचतंचास्याःपिताकाममपूरयत् १०

माद्र्याःपुत्रस्ययुधाजितः ३ ४ विषयेदेशे ५ परिवर्त्तेआगम
नमात्रेहरिवाहनःइंद्रः ६ गांदिनीनामनिर्वक्ति गांतुददाविति ७ ८ ९ जाययिष्यामि जन्मगृहीष्यामि १० ६७ ६७ ६७ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

११ उपासंगादयोऽक्रूरभ्रातरः १२ १३ १४ चित्रकस्याक्रूरभ्रातुः १५ १६ देवमीढुषः क्रोष्टुस्तृतीयः पुत्रः शूरंदंत्यादिरयमित्यन्ये शूरसेनात्कार्त्तवीर्यपुत्रादृ
शान्ये १७ प्राणदन्स्वयमेवशब्दंचक्रुः तत्रभगवदवतारस्यभावित्वात् १८ आनकानाम् पटहानाम् १९ २० वसुदेवादयोगंडूषांताः दशशूरस्यपुत्राः पंच-

दातायज्वाचधीरश्चश्रुतवानतिथिप्रियः अक्रूरःसुबुवेतस्मात् श्वफल्काद्भूरिदक्षिणः ११ उपासंगस्तथामद्गुर्मृदुरश्चारिमेजयः अवि
क्षिपस्तथोपेक्षःशत्रुघ्नोथारिमर्द्दनः १२ धर्मधृग्यतिधर्माचगृध्रमोजांतकस्तथा आवाहप्रतिवाहौचसुंदरीचवरांगना १३ अक्रूरेणोग्र
सेनायांसुगात्र्यांकुरुनंदन प्रसेनश्चोपदेवश्चजज्ञातेदेववर्च्चसौ १४ चित्रकस्याभवन्पुत्राः पृथुर्विपृथुरेवच अश्वग्रीवोश्वबाहुश्चसुपार्श्वक
गवेषणौ १५ अरिष्टनेमिरश्वश्चसुधर्माधर्मभृत्तथा सुबाहुर्बहुबाहुश्चश्रविष्ठाश्रवणेस्त्रियौ १६ अश्मक्यांजनयामासशूरंवैदेवमीढुषः
महिष्यांजज्ञिरेशूरात् भोज्यायांपुरुषादश १७ वसुदेवोमहाबाहुः पूर्वमानकदुंदुभिः जज्ञेयस्यप्रसूतस्यदुंदुभ्यःप्राणदन्दिवि १८ आन-
कानांचसंह्रादःसुमहानभवद्दिवि पपातपुष्पवर्षंचशूरस्यभवनेमहत् १९ मनुष्यलोकेकृत्स्नेपिरूपेनास्तिसमोभुवि यस्यासीत्पुरुषाग्र्य
स्यकांतिश्चंद्रमसोयथा २० देवभागस्ततोजज्ञेतथादेवश्रवाःपुनः अनाधृष्टिःकनवकोवत्सवानथगृंजिमः २१ श्यामःशमीकोगंडूषः
पंचचास्यवरांगनाः पृथुकीर्त्तिःपृथाचैवश्रुतदेवाश्रुतश्रवा २२ राजाधिदेवीचतथापंचैतावीरमातरः पृथांदुहितरंवव्रेकुंतिस्तांकुरुनंदन
२३ शूरःपूज्यायवृद्धायकुंतिभोजायतांददौ तस्मात्कुंतीतिविख्यातांकुंतिभोजात्मजापृथा २४ अंत्यस्यश्रुतदेवायांजगृहुःसुबुवेसु-
तः श्रुतश्रवायांचैद्यस्यशिशुपालोमहाबलः २५ हिरण्यकशिपुर्योसौदैत्यराजोऽभवत्पुरा पृथुकीर्त्यांतुतनयःसंजज्ञेवृद्धशर्मणः २६
करूषाधिपतिर्वीरोदंतवक्रोमहाबलः पृथांदुहितरंचक्रेकुंतिस्तांपांडुरावहत् २७ यस्यांसधर्मविद्राजाधर्माज्जज्ञेयुधिष्ठिरः भीमसेन
स्तथावातादिंद्राच्चैवधनंजयः २८ लोकेप्रतिरथोवीरः शक्रतुल्यपराक्रमः अनमित्राच्छिनिर्जज्ञेकनिष्ठाद्वृष्णिनंदनात् २९ शैनेयः
सत्यकस्तस्माद्युयुधानश्चसात्यकिः असंगोयुयुधानस्यभूमिस्तस्याभवत्सुतः ३० भूमेर्युगंधरःपुत्रइतिवंशःसमाप्यते उद्धवोदेवभा
गस्यमहाभागःसुतोऽभवत् पंडितानांपरंप्राहुर्देवश्रवससुद्भवम् ३१ अश्मक्यांप्राप्तवान्पुत्रमनाधृष्टिर्यशस्विनम् निवृत्तशत्रुंशत्रु
घ्नंदेवश्रवाव्यजायत ३२ देवश्रवाःप्रजातस्तुनैषादिर्यःप्रतिश्रुतः एकलव्योमहाराजनिषादैःपरिवर्द्धितः ३३

दुहितरश्चेत्याह देवभागइत्यादिना २१
२२ २३ २४ चैद्यस्यदमघोषस्य २५ २६ पृथांकुंतींकुंतिःकुंतिभोजः २७ २८ अनमित्रात् क्रोष्टुःप्रथमपुत्रात् वृष्णिनंदनात् सर्वयादवाह्लादकात् २९ ३० देवभागस्य
वसुदेवभ्रातुःदेववत्श्रवःकीर्तिर्यस्यतंदेवश्रवसं ३१ देवश्रवाःवसुदेवतृतीयोभ्राता शत्रुघ्नंपुत्रंव्यजायत ३२ सएवकेनचिन्निमित्तेन बालएवपरित्यक्तोनिषादैःसंवर्द्धि
तइतिनैषादिर्जातइत्याह देवश्रवाइति ३३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 वत्सावान्गंडूषस्यवसुदेवानुजौ ३४ विष्वक्सेनः श्रीकृष्णः सुतान्चारुदेष्णादीन् चतुःसंख्यान् ३५ चारुदेष्णपदं निर्वक्ति असंग्रामेणेतिद्वाभ्याम् ३६ चा
रून् मिष्टान् भक्ष्यान् दिशति अतिसृजतीति चारुदेष्ण इत्यर्थः ३७ कनवकस्य वसुदेवभ्रातुः आवगृंजिमौ अवगृंजिमस्य वसुदेवभ्रातुः ३८ श्यामस्य वसुदे
वभ्रातुः पुत्रइवपुत्रोऽनुजएवपुत्रीभूतः शमीकोभूदितिशेषः सुमित्रइतिपाठेपुत्रस्यैवविशेषणम् शोभनमित्रत्वम् भोजत्वात् एकदेशराजानोभोजाः तद्भा
वात् जुगुप्समानः आत्मानंनिंदन्राजसूयंसाम्राज्यहेतुंअवाप तत्रयोग्यतांप्रदर्शयन् तस्यसुमित्रत्वंव्याचष्टे अजातशत्रुरित्यर्द्धेन युधिष्ठिरसहायः शमीकोरा

वत्सावतेत्वपुत्रायवसुदेवः प्रतापवान् अद्भिर्दत्तौसुतंवीरं शौरिः कौशिकमौरसम् ३४ गंडूषायत्वपुत्रायविष्वक्सेनोददौसुतान् चारु
देष्णंसुचारुंचपंचालंकृतलक्षणम् ३५ असंग्रामेणयोवीरोनावर्त्तत कदाचन रौक्मिणेयोमहाबाहुः कनीयान्पुरुषर्षभ ३६ वायसा
नांसहस्राणियंयांतंपृष्ठतोन्वयुः चारुमांसानिभोक्ष्यामश्चारुदेष्णहतानितु ३७ तंद्विजस्तद्विपालश्चसुतौकनवकस्यतु वीरश्चाश्वह
नुश्चैववीरौतावावगृंजिमौ ३८ श्यामपुत्रः शमीकस्तु शमीकोराज्यमावहत् जुगुप्समानोभोजत्वाद्राजसूयमवापसः ३९ अजातशत्रुःश
त्रूणांजज्ञेतस्यविनाशनः वसुदेवसुतान्वीरान्कीर्त्तयिष्यामितान्शृणु ४० वृष्णेस्त्रिविधमेतत्तुबहुशाखंमहौजसम् धारयन्विपुलं
वंशंनानर्थैरिहयुज्यते ४१ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिवृष्णिवंशकीर्त्तनंनामचतुस्त्रिंशोऽध्यायः ३४ ॥ छ ॥
वैशंपायनउवाच याः पत्न्योवसुदेवस्यचतुर्दशवरांगनाः पौरवीरोहिणीनामइंदिराचतथावरा १ वैशाखीचतथाभद्रासुनाम्नीचै
वपंचमी सहदेवाशांतिदेवाश्रीदेवादेवरक्षिता २ वृकदेव्युपदेवीचदेवकीचैवसप्तमी सुतनुर्वडवाचैवद्वेएतेपरिचारिके ३ पौरवीरोहि
णीनामबाल्हिकस्यात्मजाभवत् ज्येष्ठापत्नीमहाराजदयिताऽनकदुंदुभेः ४ लेभेज्येष्ठंसुतंरामंसारणंशठमेवच दुर्दमंदमनंश्वभ्रंपिं
डारकमुशीनरम् ५ चित्रांनामकुमारींचरोहिणीतनयादश चित्रासुभद्रेतिपुनर्विख्याताकुरुनंदन ६ वसुदेवाच्चदेवक्यांजज्ञेशौरिर्म
हायशाः रामाच्चनिशठोजज्ञेरेवत्यांदयितःसुतः ७

ज्ञांराजाभवदितिसार्द्धोर्थः ३९ ४० ४१ इतिहरिवंशेटीकायांचतुस्त्रिंशोऽध्यायः ३४ याइति १ सु
नाम्नींताः पंचपौरव्यः २ देवक्यंताः सप्तदेवकस्यदुहितरः परिचारिकेभोगपत्न्यौ नतुदास्यौ याः पत्न्यइत्युपक्रमात् ३ ४ ५ चित्रांतानिनवापत्यानिसंख्याय रोहि
णीतनयादशेत्युक्तिरयुक्तेत्याशंक्याह चित्रासुभद्रेतिपुनर्विख्यातेति चित्रापुनर्जज्ञे साचद्वितीयेजन्मनिसुभद्रेतिविख्यातेत्यर्थः अत्रपौराणिकीकथा चित्रा
नामकाचिदप्सरामुनिशापाद्रोहिण्यांगर्भवासंलेभे सापुनर्जातमात्राम्रियमाणामयायादवेषुजायमानस्यभगवतोलीलांनद्रष्टाधिक्ष्यामित्यनुतापंचक्रे तत्स्म
तयावासनयापुनस्तत्रैवजन्मधृतवतीति तयासहदशसंख्यापूर्त्तिर्ज्ञेया ६ शौरिः श्रीकृष्णः ७ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८ ९ १० ११ त्रिगर्त्तराजस्यदेवकस्य कन्यावृकदेवीतिपूर्वेणान्वयः तस्यैवत्रिगर्त्तराजस्यभर्त्तापुरोहितः शैशिरायणोगार्ग्यः तदीयः शालोयादवपक्षीयः
पुरोहितः कश्चित्तस्यपौरुषमस्तिनवेतिजिज्ञासांपरीक्षांचक्रे हस्तेन लिंगमभिमृष्टवान् अथ अनंतरंगार्ग्यस्यपौरुषंरेतोनचस्कंद हृढव्रतत्वात् तस्यानुत्था
नात् उत्थानेहिकिंचिदपिरेतः स्कंदेदेव ततोगार्ग्योनपुंसकइतिशालेनोक्तइत्यर्थः यथोक्तंविष्णुपुराणे गार्ग्यंगोष्ठ्यांद्विजंशालः षंढइत्युक्तवान्यदा यदूनां
सन्निधौसर्वेजहसुर्यदियास्तदेति १२ कृष्णायससमः कोपेनात्यंतकृष्णाभास्वरवर्णः कोपेनचास्यावदनंमषीवर्णमभूत्तदेति अन्यत्रदर्शनात् यतोमिथ्या
भिशप्तः मिथ्यैवनपुंसकोऽयमितिअभिशापंप्रापितः प्रख्योऽतिविख्यातः द्वादशमेद्वादशेवर्षेशांतकोपः समन्युनादैन्येनाभिशापजेन परिप्लुतः सन्नभि

सुभद्रायांरथीपार्थादभिमन्युरजायत अक्रूरात्काशिकन्यायांसत्यकेतुरजायत ८ वसुदेवस्यभार्यासुमहाभागासुसप्तसु येपुत्राजज्ञि
रेशूरानामतस्तान्निबोधमे ९ भोजश्चविजयश्चैवशांतिदेवासुतावुभौ वृकदेवःसुदेवायांगदश्चास्तांसुतावुभौ १० उपासंगवरंलेभेतनं
यंदेवरक्षिता अगावहंमहात्मानंवृकदेवीव्यजायत ११ कन्यात्रिगर्त्तराजस्यभर्त्तावैशैशिरायणः जिज्ञासांपौरुषेचक्रेनचस्कंदेथपौरु-
षम् १२ कृष्णायससमप्रख्योवर्षेद्वादशमेतथा मिथ्याभिशप्तोगार्ग्यस्तुमन्युनाभिसमीरितः १३ गोपकन्यामुपादायमैथुनायोपच
क्रमे गोपालीत्वप्सरास्तस्यगोपस्त्रीवेषधारिणी १४ धारयामासगार्ग्यस्य गर्भंदुर्धरमच्युतम् मानुष्यागार्ग्यभार्यायांनियोगाच्छूल-
पाणिनः १५ सकालयवनोनामजज्ञेराजामहाबलः वृषपूर्वार्धकायास्तमवहन्वाजिनोरणे १६ अपुत्रस्यसराज्ञस्तुववृधेतःपुरेशिशुः
यवनस्यमहाराजसकालयवनोऽभवत् १७ सयुद्धकामीनृपतिःपर्यपृच्छद्विजोत्तमान् वृष्ण्यंधककुलंतस्यनारदोकथयद्विभुः १८
अक्षौहिण्यातुसैन्यस्यमथुरामभ्ययात्तदा दूतंसंप्रेषयामासवृष्ण्यंधकनिवेशनम् १९ ततोवृष्ण्यंधकाःकृष्णंपुरस्कृत्यमहामतिम्
समेतामंत्रयामासुर्यवनस्यभयात्तदा २० कृत्वाचनिश्चयंसर्वेपलायनपरायणाः विहायमथुरांरम्यांमानयंतःपिनाकिनम् २१

शापनिवृत्त्यर्थंपरंप्रत्ययमुत्पादयिष्यन् गोपकन्यामुपादायमैथुनायोपचक्रमइतिसार्धः १३ कासौगोपकन्या कुतश्चास्यतत्संयोगइत्याह सार्द्धेनगोपाली-
ति अन्येतुकृष्णायससमयःप्रख्यइतिपठित्वा कृष्णायसंलोहचूर्णंअभक्षत् अयःप्रख्योलोहवर्णइतिव्याख्याय तत्रवैष्णवीयांसंमतिमाहुः सुतमिच्छंस्तपस्तेपेय
दुचक्रभयावहम् आराधयन्महादेवंसोयश्चूर्णमभक्षयत् ददौवरंतुसंतुष्टोवर्षेतुद्वादशेशिवः संयोजयामासचतंयवनेशोह्यनात्मजः तद्योषित्संगमाच्चास्यपुत्रोभू
दलिसप्रभः तंकालयवनंनामेति तच्छब्दार्थोगार्ग्यःसंयोजयामासस्वभार्ययेतिशेषः तत्रमात्रभेदः कल्पभेदाभिप्रायेणव्याख्येयःशेषंस्पष्टं १४ १५ वृषभस्यबलीव
र्दस्येवपूर्वार्द्धकायोनाभेरुपरिदेहप्रदेशोयेषांते वृषपूर्वार्द्धकायाः १६ राज्ञोंतःपुरेववृधेइत्यनेनगोपाल्याऽप्सरसासद्यःशकुंतलावत्परित्यक्तइतिगम्यते १७ १८ १९
२० २१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ईप्सवोजाताइतिशेषः २२ इतिहरिवंशेटीकायांपंचत्रिंशोऽध्यायः ३५ क्रोष्टोरेवेति यथाकृष्णाः क्रोष्टुवंशेजातएवंसत्यभामादयोपितत्रैवजाताइतिवक्तु
मेवकारः क्षत्रियाणांसमानान्वयेपिसापिंड्यनिवृत्त्यूर्ध्वंपुरोहितगोत्रेण अन्योन्यंगोत्रभेदाद्विवाहाभवंतीतियुज्यतएवेतिभावः १ २ कृतप्रसूतिंपुत्रप्रजासमृ
द्धमात्मजं इच्छन् अभूत् तस्यइच्छतः कर्मभिः पुत्रेष्ट्यादिभिः ३ अनुष्ठितः आश्रितः ४ पार्थश्रवसम् पृथु श्रवसपुत्रम् ५ उशतोनामतः स्वधर्मयज्ञम् उश-
तांकामयमानानां वरःश्रेष्ठः ६ ७ मरुत्तःधर्मंचचार तत्रहेतुः प्रेत्यभागिति मरणानंतरंस्वफलप्रदानेनसेवते अप्रेत्यापितद्भाक्सेवनकृत्यतोऽतश्चचार ततश्च

कुशस्थलींद्वारवतींनिवेशयितुमीप्सवः इतिकृष्णस्यजन्मेदंयः शुचिर्नियतेंद्रियः पर्वसुश्रावयेद्विद्वाननृणःसस्सुखीभवेत् २२ इ-
तिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिश्रीकृष्णजन्मानुकीर्त्तननामपंचत्रिंशोऽध्यायः ३५ वैशंपायनउवाच क्रोष्टोरेवा
भवत्पुत्रो वृजिनीवान्महायशाः वृजिनीवत्सुतश्चापिस्वाहिःस्वाहाकृतांवरः १ स्वाहेःपुत्रोभवद्राजाउषद्गुर्वदतांवरः महाक्रतुभिरीजे
योविविधैर्भूरिदक्षिणैः २ कृतप्रसूतिमन्विच्छन्नुषद्गुःसोऽग्र्यमात्मजम् जज्ञेचित्ररथस्तस्यपुत्रःकर्मभिरन्वितः ३ आसीच्चैत्ररथिर्वीरो-
यज्वाविपुलदक्षिणः शशबिंदुःपरंवृत्तंराजर्षीणामनुष्ठितः ४ पृथुश्रवाःपृथुयशाराजासीच्छशबिंदुजः शंसंतिचपुराणज्ञाःपार्थश्रवस
मुत्तमम् ५ अनंतरंसुयज्ञस्तुसुयज्ञतनयोऽभवत् उशतोयज्ञमखिलंस्वधर्ममुशतांवरः ६ शिनेयुरभवत्सूनुरुशतःशत्रुतापनः मरुत्त
स्तस्यतनयोराजर्षिरभवन्नृप ७ मरुत्तोऽलभतज्येष्ठंसुतंकंबलबर्हिषम् चचारविपुलंधर्ममर्षात्प्रेत्यभागपि ८ सुतप्रसूतिमिच्छन्वै
सुतंकंबलबर्हिषः बभूवरुक्मकवचःशतप्रसवतःसुतः ९ निहत्यरुक्मकवचःशतंकवचिनांरणे धन्विनांनिशितैर्बाणैरवापश्रियमुत्त-
माम् १० जज्ञेथरुक्मकवचात्पराजित्परवीरहा जज्ञिरेपंचपुत्रास्तुमहावीर्याःपराजितः ११ रुक्मेषुःपृथुरुक्मश्चज्यामघःपालितोह
रिः पालितंचहरिंचैवविदेहेभ्यःपितादद्दौ १२ रुक्मेषुरभवद्राजा पृथुरुक्मस्यसंश्रितः ताभ्यांप्रव्राजितोराज्याज्ज्यामघोवसदाश्रमे १३
प्रशांतश्चाश्रमस्थःसब्राह्मणेश्चावरोधितः जिगायरथमास्थायदेशमन्यंध्वजीरथी १४ नर्मदाकूलमेकाकीनगरींमृत्तिकावतीम् ऋ
क्षवंतंगिरिंजित्वाशुक्तिमत्यामुवासस: १५ ज्यामघस्याभवद्भार्याशैब्याबलवतीसती अपुत्रोपिचराजासनान्यांभार्यामविंदत १६ त
स्यासीद्विजयोयुद्धेतत्रकन्यामवापसः भार्यामुवाचसंत्रस्तःस्नुषेतिसनरेश्वरः १७

कृतंलेभेइत्यन्वयः ८ कृतंइच्छन्सुतप्रसूतिंनामसुतंले
भेइत्यनुषज्यते ९ १० ११ विदेहेभ्यः विदेहान्त्रातुम् तदधिपतयेराज्ञेददावित्यर्थः १२ आश्रितः ज्येष्ठानुसारीजातः १३ वार्द्धक्यात् अप्रशांतस्त्यक्तराज्य-
लिप्सुः अवरोधितः तपआदिनाउद्दीपितः जिगायजितवान् १४ १५ बलवती प्रगल्भा १६ १७ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१८ तस्याः उपदानवीसंज्ञायाः उग्रेणतपसा परिणतावृद्धापिशैब्या पुत्रंव्यजायतजनितवती १९ २० २१ २२ २३ २४ २५ २६ २७ २८ पुरुद्वान्नामतः न
स्यवैदर्भी भद्रवती भार्यातस्यांमधुर्जातः २९ तस्यैवऐक्ष्वाकीसतीनामद्वितीयाभार्यातस्यांसत्वान्जातः ३० ३१ इतिहरिवंशेटीकायांषट्त्रिंशोऽध्यायः ३६

एतच्छ्रुत्वाब्रवीद्देवीकस्यचेयंस्नुषेतिवै अब्रवीत्तदुपश्रुत्यज्यामघोराजसत्तमः १८ यस्तेजनिष्यतेपुत्रस्तस्यभार्योपदानवी उग्रेणतपसा
तस्याः कन्यायाः सव्यजायत पुत्रंविदर्भस्सुभगा शैब्यापरिणतासती १९ राजपुत्र्यांतुविद्वांसौस्नुषायांक्रथकैशिकौ पश्चाद्विदर्भोऽजनय
च्छूरौरणविशारदौ २० लोमपादंतृतीयंतुपुत्रंपरमधार्मिकम् लोमपादात्मजोबभ्रुराह्वतिस्तस्यचात्मजः २१ आह्वतेः कौशिकश्चैवविद्वान्पर
मधार्मिकः चेदिःपुत्रःकौशिकस्यतस्माच्चैद्यानृपाःस्मृताः २२ भीमोविदर्भस्यसुतःकुंतिस्तस्यात्मजोऽभवत् कुंतेर्धृष्टसुतोजज्ञेरणधृष्टः
प्रतापवान् धृष्टस्यजज्ञिरेशूरास्त्रयःपरमधार्मिकाः २३ आवंतश्चदशार्हश्चबलीविषहरश्चयः दशार्हस्यसुतोव्योमाव्योम्नोजीमूतउच्यते
२४ जीमूतपुत्रोवृकतिस्तस्यभीमरथःसुतः अथभीमरथस्यासीत्पुत्रोनवरथस्तथा २५ तस्यचासीद्दृढरथः शकुनिस्तस्यचात्मजः तस्मा
त्करंभःकारंभिर्देवरातोभवन्नृपः २६ देवक्षत्रोभवत्तस्यदैवक्षत्रिर्महायशाः देवगर्भसमोजज्ञेदेवक्षत्रस्यनंदनः २७ मधूनांवंशकृद्रा
जामधुर्मधुरवागपि मधोर्जज्ञेथवैदर्भ्यांपुत्रोमरुवसास्तथा २८ आसीन्मरुवसःपुत्रः पुरुद्वान्पुरुषोत्तमः मधुर्जज्ञेथवैदर्भ्यांभद्रवत्यांकु
रूद्वहः २९ ऐक्ष्वाकीचाभवद्भार्यासत्वांस्तस्यामजायत सत्वान्सर्वगुणोपेतःसात्वतांकीर्त्तिवर्द्धनः ३० इमांविसृष्टिंविज्ञायज्यामघस्यम
हात्मनः युज्यतेपरयाकीर्त्याप्रजावांश्चभवेन्नरः ३१ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिषट्त्रिंशोऽध्यायः ३६ वै
शंपायनउवाच सात्वतात्सत्वसंपन्नान्कौशल्यासुषुवेसुतान् भजिनंभजमानंचदिव्यंदेवावृधंनृपम् १ अंधकंचमहाबाहुंवृष्णिं
चयदुनंदनम् तेषांविसर्गाश्चत्वारोविस्तरेणेहतान्शृणु २ भजमानस्यसृंजय्यौबाह्यकाथोपबाह्यका आस्तांभार्येतयोस्तस्माज्जज्ञिरे
बहवःसुताः ३ क्रमिश्चक्रमणश्चैवधृष्टःशूरःपुरंजयः एतेबाह्यकसृंजय्यांभजमानाद्विजज्ञिरे ४ अयुताजित्सहस्राजिच्छताजिच्चाथ
दाशकः उपबाह्यकसृंजय्यांभजमानाद्विजज्ञिरे ५ यज्वादेवावृधोराजाचचारविपुलंतपः पुत्रःसर्वगुणोपेतोममस्यादितिनिश्चितः ६
संयुज्यात्मानमेवंतुपर्णाशायाजलंस्पृशन् सदोपस्पृशतस्तस्यचकारप्रियमापगा ७ चिंतयाभिपरीतासाजगामैकाभिनिश्चयम् कल्या
णत्वान्नरपतेस्तस्यसानिम्नगोत्तमा ८

सात्वतात् भजमानदेवावृधौ नामानौ १ २ सृंजय्यौसृंजयपुत्र्यौ ३ ४ ५ ६ आत्मानंचित्तम् संयुज्य
समाधाय जलंस्पृशन् स्नानाचमनादेरुपलक्षणमेतत् ७ एकाएकाकिन्येवनिश्चयंअभिजगामचकार तस्यतदीयहितस्यचिंतया ८ ९ ९ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हंतेतिसस्नेहमालोचने सहव्रता धर्मपत्नी ९ इयेष इच्छितवान् १० ११ १२ अंतिकेदूराच्च योगबलेनानेकधात्मानंकृत्वा संचरंतंतुल्यवत्सश्यामः १३ षट्
षष्ट्याधिकानिसप्तसहस्राणि पुरुषाः अमृतत्वंयुद्धेन मृत्युमासाद्यब्रह्मलोकंगताइत्यर्थः १४ यज्वा बभ्रुरेव १५ तस्यबभ्रोः अंधकात्सत्वतःपुत्रात् काश्य-
स्यदृढाश्वस्य दुहिता १६ १७ १८ १९ २० श्वेतेनसुच्छेन किशोरप्रतिमः तरुणाश्ववदुत्साहवान् किशोरोश्वस्यशावकइतिमेदिनी अशीतिचर्मणायुक्तः अ
शीत्यापुरुषैर्वाह्यंचर्मफलकंदारुमयआसनविशेषः तेनयुक्तः तदारूढः चर्मकृत्तौच फलकेइतिमेदिनी अशीतिचर्मणेत्यस्य अभेद्यात्मत्वंचेत्यर्थः प्राञ्चः प्राहुः
यद्वा नास्तिशीतिः स्वप्नोयेषांते अशीतयोदेवाः तएवचर्मबाणत्राणंतेनयुक्तः देवरक्षितइत्यर्थः २१ अतएवतस्यपरिवारः स्तूयते नापुत्रवानिति भोजमाहुकम्

नाध्यगच्छततांनारींयस्यामेवंविधःसुतः जायेत्तुतस्मात्स्वयंहंत भवाम्यस्यसहव्रता ९ अथभूत्वाकुमारीसा बिभ्रतीपरमंवपुः वरयामास
नृपतिंतामियेषचसप्रभुः १० तस्यामाधत्तगर्भंचतेजस्विनमुदारधीः अथसादशमेमासिसुषुवेसरितांवरा ११ पुत्रंसर्वगुणोपेतंबभ्रुंदे-
वावृधान्नृपात् अत्रवंशेपुराणज्ञागायंतीतिपरिश्रुतम् १२ गुणान्देवावृधस्याथकीर्त्तयंतोमहात्मनः यथैवाग्रेसमदूरात्पश्यामश्चतथां
तिके १३ बभ्रुःश्रेष्ठोमनुष्याणांदेवैर्देवावृधःसमः षष्टिश्चषट्चपुरुषाःसहस्राणिचसप्तच १४ एतेमृतत्वसंप्राप्ता बभ्रुदेवावृधावपि य
ज्वादानपतिर्विद्वान्ब्रह्मण्यःसुदृढायुधः १५ कीर्तिमांश्चमहातेजाःसात्वतानांमहावरः तस्यान्ववायःसुमहान् भोजायेमार्त्तिकावताः १६
अंधकात्काश्यदुहिताचतुरोलभतात्मजान् कुकुरंभजमानंच शमिंकंबलबर्हिषम् १७ कुकुरस्यसुतोधृष्णुर्धृष्णोस्तुतनयस्तथा कपो
तरोमातस्याथतैत्तिरिस्तनयोऽभवत् १८ जज्ञेपुनर्वसुस्तस्मादभिजित्तुपुनर्वसोः तस्यवैपुत्रमिथुनंबभूवाभिजितःकिल १९ आहुकश्चा
हुकीचैवख्यातौख्यातिमतांवरौ इमांचोदाहरंत्यत्रगाथांप्रतितमाहुकम् २० श्वेतेनपरिवारेणकिशोरप्रतिमोमहान् अशीतिचर्मणायु-
क्तःसनृपःप्रथमंव्रजेत् २१ नापुत्रवान्नाशतदोनासहस्रशतायुषः नाशुद्धकर्मानायज्वायोभोजमभितोव्रजेत् २२ पूर्वस्यांदिशिनागानां
भोजस्येत्यनुमोदनम् सोपासंगानुकर्षाणांध्वजिनांसवरूथिनाम् २३ रथानांमेघघोषाणांसहस्राणिदशैवतु रूप्यकांचनकक्षाणांस
हस्राणिदशापिच २४

२२ रूप्यकांचनेत्यर्धः सोपासंगेत्यतः प्राग्द्रष्टव्यः रूप्यमय्यः कांचनमय्यश्चकक्षाः वरत्राः बंधनशृंखलावा येषांतादृशानांनागा
नांदशसहस्राणि पूर्वस्यांदिशि अनुमोदनं अभ्यनुज्ञांएतियाति गंतुंप्राप्नुवंति तथातस्यामेवदिशि रथानांदशसहस्राणि अनुमोदनंयांति उपासंगोयुगम्
अनुकर्षणंरथाधःस्थितंकाष्ठम् वरूथंरथगुप्तिः तद्वतांरथानाम् २३ २४ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उत्तरस्यामपितावंत्येवरथानांनागानांचसहस्राणि तथादिशियथापूर्वोत्तरयोस्तथावशिष्टायामपिदिशिदक्षिणस्यांसपश्चिमायां अनुमोदनंतावंत्येवसहस्राणि
प्रासुवंतीत्यर्थः आभूमिपालान्सर्वान्सामंतान् अभिव्याप्यवशीकृत्यभोजाः स्वज्ञातयस्तं आहुकंउपतिष्ठन्उपातिष्ठन्सेवितवंतः किंकिणीकिणः क्षुद्रघंटिकावं
तोरथादयः किंकिणीशब्दादीकत्तद्धितः किंकिणीकिणइतिदंत्यस्यमूर्द्धन्यत्वमार्षम् भोजान्स्वानुत्तस्त किंकिणीकिणइतिपाठेसर्वान् भूमिपालान्व्याप्यस्वानुउत्त
संस्कृवर्णतन्मयकिंकिणीयुक्ताः रथादयउत्तसकिंकिणीकाः तद्वत्ताउत्तसकिंकिणीकिनः तादृशानकरोदितिशेषः २५ आहुकीं आहुकसंबंधिनींस्वसारं आहुकीसं
ज्ञां अवंतिभ्यः राज्ञीत्वेनददुः २६ कुमार्यःपुत्र्यः २८ वृकदेवीयुक्ताउपदेवी वृकदेव्युपदेवी २९ कंसःपूर्वजः प्रथमः न्यग्रोधादयोष्टौस्कभूमिपइतिशंकोर्विशेषणम्

तावंत्येवसहस्राणिउत्तरस्यांतथादिशि आभूमिपालान् भोजान्स्वानुत्तिष्ठन् किंकिणीकिणः २५ आहुकींचाप्यवंतिभ्यः स्वसारंददुरंधकाः
आहुकस्यतुकाश्यायांद्वौपुत्रौसंबभूवतुः २६ देवकश्चोग्रसेनश्च देवपुत्रसमावुभौ देवकस्याभवन्पुत्राश्चत्वारस्त्रिदशोपमाः २७ देववानुपदे
वश्चस्कदेवोदेवरक्षितः कुमार्यःसप्तचाप्यासन्वस्कदेवायताददौ २८ देवकीशांतिदेवाचस्कदेवादेवरक्षिता वृकदेव्युपदेवीचस्कनाम्नीचैव
सप्तमी २९ नवोग्रसेनस्यस्कुतास्तेषांकंसस्तुपूर्वजः न्यग्रोधश्चस्कनामाचकंकः शंकुःस्कभूमिपः ३० राष्ट्रपालोथस्कतनुरनाधृष्टिश्चपुष्टि
मान् तेषांस्वसारःपंचासन्कंसाकंसवतीतथा ३१ स्कतनूराष्ट्रपालीचकंकाचैववरांगना उग्रसेनःसहापत्योव्याख्यातःकुकुरोद्भवः ३२
कुकुराणामिमंवंशंधारयन्नमितौजसाम् आत्मनोविपुलंवंशंप्रजावानाप्नुयान्नरः ३३ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंश
पर्वणिसप्तत्रिंशोऽध्यायः ३७ वैशंपायनउवाच भजमानस्यपुत्रोथरथमुख्योविदूरथः राजाधिदेवःशूरस्कविदूरथस्कुतोऽभवत् १
राजाधिदेवस्यस्कुताजज्ञिरेवीर्यवत्तराः दत्ताऽतिदत्तबलिनौशोणाश्वःश्वेतवाहनः २ शमीचदंडशर्माचदंडशत्रुश्चशत्रुजित् श्रवणाच
श्रविष्ठाचस्वसारौसंबभूवतुः ३ शमिपुत्रःप्रतिक्षत्रःप्रतिक्षत्रस्यचात्मजः स्वयंभोजः स्वयंभोजाद्धृदीकःसंबभूवह ४ तस्यपुत्राबभूवु
र्हिसर्वेभीमपराक्रमाः कृतवर्माग्रजस्तेषांशतधन्वाथमध्यमः ५ देवर्षेर्वचनात्तस्यभिषग्वैतरणश्चयः स्कदांतश्चविदांतश्चकामदाकाम
दंतिका ६ देववांश्चाभवत्पुत्रोविद्वान्कंबलबर्हिषः असमौजास्तथावीरोनासमौजाश्चतावुभौ ७

गौडपाठेस्कभूषणइतिवातस्यैवविशेषणम्
अन्येतुस्कभूमिपइतिकंसस्यैवनामेत्याहुस्तेषांतस्यपूर्वजोक्तिर्विरुध्यते परेपुनःकंकस्यैवसुभूमिपइतिशंकुपदेलोपमेवकुर्वंति तत्रपाठत्वंव्यासएववे
द ३० ३१ ३२ ३३ इतिश्रीहरिवंशटीकायांसप्तत्रिंशोऽध्यायः ३७ भजमानस्यरथमुख्यःरथवतांमुख्योऽतिरथइतियावत् १ २ ३ ४ ५ देव-
र्षेःच्यवनस्यवचनात्तस्यशतधन्वनःभिषक्प्रभृतयश्चत्वारःपुत्राःकामदाकामदंतिकाचेतिद्वेपुत्र्यौ ६ कंबलबर्हिषःमरुत्तपुत्रस्य देववान्नस्यत्रयः ७ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अंधकाः अंधकस्यपुत्राः तान् अंधकएव असमौजसेददाविनिगम्यते ८ ९ १० ११ निघ्नतः निघ्नात् १२ शत्रुजिच्चसेनाजिच्च शत्रुसेनाजितौ निवसंत्यां कृतनिवासायाम् १३ उपलब्धवान् परंपरयालब्धवान् समुद्रात्समुद्रंप्राप्यनत्तीरेइत्यर्थः कस्माल्लब्धवानित्याकांक्षायामाह तस्येतितस्यप्रसेनसंबंधिनो भ्रातुः सत्राजित्संज्ञस्य १४ निशापायेप्रातःकालेउपस्प्रष्टुस्नानादिकंकर्त्तुम् १५ १६ १७ यथा दिविमंडलिनंत्वांपश्यामि तथैवसन्निहितमपिमंडलमात्रंप

अजातपुत्रायस्कतान्प्रददावसमौजसे सुदंष्ट्रंचारुरूपंचकृष्णमित्यंधकास्त्रयः ८ एतेचान्येचबहवोअंधकाःकथितास्तव अंधकानामि मंवंशंधारयेद्यस्तुनित्यशः ९ आत्मनोविपुलंवंशंलभतेनात्रसंशयः गांधारीचैवमाद्रीचक्रोष्टुर्भार्येबभूवतुः १० गांधारीजनयामासअन मित्रमहाबलम् माद्रीयुधाजितंपुत्रंततोवैदेवमीढुषम् ११ अनमित्रममित्राणांजेतारमपराजितम् अनमित्रसुतोनिघ्नोनिघ्नतोद्वौबभूव तुः १२ प्रसेनश्चाथसत्राजिच्छत्रुसेनाजितावुभौ प्रसेनोद्वारवत्यांतुनिवसंत्यांमहामणिम् १३ दिव्यंस्यमंतकंनामसमुद्रादुपलब्धवान् तस्य सत्राजितःसूर्यःसखाप्राणसमोभवत् १४ सकदाचिन्निशापायेरथेनरथिनांवरः अंब्धिकूलमुपस्प्रष्टुमुपस्थातुंययौरविम् १५ तस्योप तिष्ठतःसूर्यंविवस्वानग्रतःस्थितः अस्पष्टमूर्त्तिर्भगवान्तेजोमंडलवान्प्रभुः १६ अथराजाविवस्वंतमुवाचास्थितमग्रतः यथैवंव्योम्निप श्यामिसदात्वांज्योतिषांपते १७ तेजोमंडलिनंदेवंतथैवपुरतःस्थितम् कोविशेषोस्तिमेत्वत्तःसख्येनोपागतस्यवै १८ एतच्छ्रुत्वातुभग वान्मणिरत्नंस्यमंतकम् स्वकंठादवमुच्यैवएकांतेन्यस्तवान्विभुः १९ ततोविग्रहवंतंतंददर्शनृपतिस्तदा प्रीतिमानथतंदृष्ट्वामुहूर्त्तंकृत वान्कथाम् २० तमभिप्रस्थितंभूयोविवस्वंतंससत्राजित् लोकान्भासयसेयेन त्वं येनत्वंसततंप्रभो तदेतन्मणिरत्नंमेभगवन्दातुमर्हसि २१ ततःस्यमंतकमणिंदत्तवान्तस्यभास्करः सतमाबध्यनगरींप्रविवेशमहीपतिः २२ तंजनाःपर्यधावंतसूर्योयंगच्छतीतिह पुरींविस्मा पयित्वाचराजात्वंतःपुरंययौ २३ तत्प्रसेनजितेदिव्यंमणिरत्नंस्यमंतकम् ददौभ्रात्रेनरपतिःप्रेम्णासत्राजिदुत्तमम् २४ समणिःस्यंदतेरु क्मंवृष्ण्यंधकनिवेशने कालवर्षीचपर्जन्योनचव्याधिभयंह्यभूत् २५ लिप्सांचक्रेप्रसेनात्तुमणिरत्नेस्यमंतके गोविंदोनचतंलेभेशक्तोपि नजहारसः २६ कदाचिन्मृगयांयातःप्रसेनस्तेनभूषितः स्यमंतककृतेसिंहात्वधंप्रापवनेचरात् २७

नउपागतस्यसमीपागतस्यापिइतरजनापेक्षयामेमयात्वत्तोविशेषतः कोनुग्रहः प्राप्तोनकोपि यतः इतरवदहमपित्वांमंडलवंतमेवपश्यामीत्यर्थः १८ १९ श्यामि नत्वाकृतिविशेषम् अतस्तवसख्ये विग्रहवंतंस्पृष्टावयवम् नृपतिःराजा मंडलाधिपतित्वात् नतुक्षत्रियमात्रः २० २१ २२ २३ २४ स्यंदतेप्रस्रवति रुक्मंसुवर्णम् २५ २६ सिं- होदेवताविष्टः नतुपशुमात्रः तेनतादृक्मणिधारिणोधर्षणायोगात् २७ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ऋक्षराजोजांबवान् २८ शशंकिरे कृष्णेनैव प्रसेनंहत्वा मणिर्गृहीतइतिशंकांचक्रुः २९ नकारी अकर्त्ता ३० आप्तकारिभिः अंतरंगैःकिंकरैः ३१ ३२ ३३
३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ वातपतेर्विशेषणंवीरइति ४६ भार्याःकृष्णायतांददावितिपाठे तिस्रोपिदत्ताः अन्यथातां

अथसिंहंप्रधावंतमृक्षराजोमहाबलः निहत्यमणिरत्नंतदादायबिलमाविशत् २८ ततोवृष्ण्यंधकाःकृष्णंप्रसेनवधकारणात् प्रार्थनां
तांमणेर्बुद्ध्वासर्वएवशशंकिरे २९ सशंक्यमानोधर्मात्मानकारीतस्यकर्मणः आहरिष्येमणिमिति प्रतिज्ञायवनंययौ ३० यत्रप्रसेनोमृगयामा
चरत्तत्रचाप्यथ प्रसेनस्यपदंगृह्यपुरुषैराप्तकारिभिः ३१ ऋक्षवंतंगिरिवरंविंध्यंचगिरिमुत्तमम् अन्वेषयन्परिश्रांतःसददर्शमहामनाः
३२ साश्वंहतंप्रसेनंवैनाविंदच्चैवतंमणिम् अथसिंहःप्रसेनस्यशरीरस्याविदूरतः ३३ ऋक्षेणनिहतोदृष्टःपादैर्ऋक्षस्यसूचितः पादैर
न्वेषयामासगुहामृक्षस्यमाधवः ३४ महत्यृक्षबिलेवाणींशुश्रावप्रमदेरिताम् धात्र्याकुमारमादायसुतंजांबवतोनृप क्रीडापयंत्यामणिना
मारोदीरित्यथेरिताम् ३५ धात्र्युवाच सिंहःप्रसेनमवधीत्सिंहोजांबवताहतः सुकुमारकमारोदीस्तवह्येषस्यमंतकः ३६ व्य
क्तीकृतशब्दस्तुतूर्णंबिलमथाविशत् प्रविश्यचापिभगवान्तमृक्षबिलमंजसा ३७ स्थापयित्वाबिलद्वारियदून्लांगलिनासह शार्ङ्गध
न्वाबिलस्थंतुजांबवंतंददर्शह ३८ युयुधेवासुदेवस्तुबिलेजांबवतासह बाहुभ्यामेवगोविंदोदिवसानेकविंशति ३९ प्रविष्टेतुबिलंकृष्णे
बलदेवपुरःसराः पुरींद्वारवतीमेत्यहतंकृष्णंन्यवेदयन् ४० वासुदेवस्तुनिर्जित्यजांबवंतंमहाबलम् भेजेजांबवतींकन्यामृक्षराजस्य
संमताम् मणिंस्यमंतकंचैवजग्राहात्मविशुद्धये ४१ अनुनीयर्क्षराजानंनिर्ययौचतदाबिलात् द्वारकामगमत्कृष्णःश्रियापरमयायुतः
४२ एवंसमणिमाहृत्यविशोध्यात्मानमच्युतः ददौसत्राजितेतंवैसर्वसात्वतसंसदि ४३ एवंमिथ्याभिशस्तेनकृष्णेनामित्रघातिना आत्मा
विशोधितःपापाद्विनिर्जित्यस्यमंतकम् ४४ सत्राजितोदशत्वासन् भार्यास्तासांशतंसुताः ख्यातिमंतस्त्रयस्तेषांभंगकारस्तुपूर्वजः ४५ वीरो
वातपतिश्चैवउपस्वापश्चतेत्रयः कुमार्यश्चापितिस्रोवैदिक्षुख्यातानराधिप ४६ सत्यभामोत्तमास्त्रीणांव्रतिनीचदृढव्रता तथाप्रस्वापि-
नीचैवभार्याकृष्णायतांददौ ४७ सभाक्षोभंगकारिस्तुनारेयश्चनरोत्तमौ जज्ञातेगुणसंपन्नौविश्रुतौरूपसंपदा ४८ माद्रीपुत्रस्यजज्ञे
थपृश्निःपुत्रोयुधाजितः जज्ञातेतनयौपृश्नेःश्वफल्कश्चित्रकस्तथा ४९ श्वफल्कःकाशिराजस्यसुतांभार्यामविंदत गांदिनींनामतस्यांश्च
सदागाःप्रददौपिता ५० तस्यांजज्ञेमहाबाहुःश्रुतवानितिविश्रुतः अक्रूरोऽथमहाभागोयज्वाविपुलदक्षिणः ५१ उपमद्गुस्तथामद्गुर्मृ
दुरश्चारिमेजयः गिरिक्षिपस्तथोपेक्षःशत्रुहाचारिमर्दनः ५२ धर्मभृच्चापिधर्मीचगृध्रभोजांतकस्तथा आवाहप्रतिवाहौचसुंदरीचवरांग
ना ५३

उत्तमत्वेन ख्यातांसत्यभामामेवेतिव्याख्येयम् ४७ ४८ क्रोष्टोःकनिष्ठास्त्रीमाद्री तत्पुत्रस्ययुधाजितोवंशमाह माद्रीति ४९ ५० ५१ ५२ ५३ ५४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दृष्टदोषाः क्षीणगतयोनिश्चेशाया १८ १९ २० २१ २२ २३ २४ दीक्षामयंकवचंदीक्षितस्ययुद्धनिषेधादितरैर्वैराप्रसक्तेस्तेनैवस्वशरीररक्षापिकृतेत्यर्थः
२५ २६ २७ २८ २९ ३० ३१ ३२ कच्छेसजलेतीरप्रदेशे ३३ ३४ योगेनबहुधनदानादिसंबंधेनलिंगेन३५अनार्यकंशाठ्यम् ३६ यत्नयतोहे

तिष्ठस्त्वेहमहाबाहोदृष्टदोषाहयामया पद्भ्यांगत्वाहरिष्यामिमणिरत्नंस्यमंतकम् १८ पद्भ्यामेवततोगत्वाशतधन्वानमच्युतः मिथिला
मभितोराजन्जघानपरमास्त्रवित् १९ स्यमंतकंचनापश्यद्धत्वाभोजंमहाबलम् निवृत्तंचाब्रवीत्कृष्णारत्नंदेहीतिलांगली २० नास्तीतिकृ
ष्णोवाच्ततोरामोरुषान्वितः धिक्शब्दमसकृत्कृत्वाप्रत्युवाचजनार्दनम् २१ भ्रातृत्वान्मर्षयाम्येषस्वस्तितेस्तुव्रजाम्यहम् कृत्यंनमेद्वार
कयानत्वयानचवृष्णिभिः २२ प्रविवेशततोरामोमिथिलामरिमर्दनः सर्वकामैरुपचितैर्मैथिलेनाभिपूजितः २३ एतस्मिन्नेवकालेतुबभ्रुर्म
तिमतांवरः नानारूपान्क्रतून्सर्वानाजहारनिरर्गलान् २४ दीक्षामयंसकवचंरक्षार्थंप्रविवेशह स्यमंतककृतेप्राज्ञोगांदीपुत्रोमहायशाः
२५ अथरत्नानिचान्यानिद्रव्याणिविविधानिच षष्टिंवर्षाणिधर्मात्मायज्ञेषुविनियोजयत् २६ अक्रूरयज्ञाइतितेख्यातास्तस्यमहात्मनः
बह्वन्नदक्षिणाःसर्वेसर्वकामप्रदायिनः २७ अथदुर्योधनोराजागत्वातुमिथिलांप्रभुः गदाशिक्षांततोदिव्यांबलभद्रादवाप्तवान् २८
प्रसाद्यतुततोरामोवृष्ण्यंधकमहारथैः आनीतोद्वारकामेवकृष्णेनचमहात्मना २९ अक्रूरस्त्वंधकैःसार्द्धमपायाद्भरतर्षभ हत्वासत्राजितं
युद्धेसहबंधुंमहाबलम् ३० ज्ञातिभेदभयात्कृष्णस्तमुपेक्षितवानथ अपयातेतथाक्रूरेनावर्षत्पाकशासनः ३१ अनावृष्ट्यायदाराज्य
मभवद्बहुधाकृशम् ततःप्रसादयामासुरक्रूरंकुकुरांधकाः ३२ पुनर्द्वारवतींप्राप्तेतस्मिन्दानपतौततः प्रववर्षसहस्राक्षःकच्छेजलनि-
धेस्तदा ३३ कन्यांचवासुदेवायस्वसारंशीलसंमताम् अक्रूरःप्रददौधीमान्प्रीत्यर्थंकुरुनंदन ३४ अथविज्ञाययोगेनकृष्णोबभ्रुगतं
मणिम् सभामध्यगतंप्राहतमक्रूरंजनार्दनः ३५ यत्तद्रत्नमणिवरंतवहस्तगतंविभो तत्प्रयच्छस्वमानार्हमयिमानार्यकंकृथाः ३६ षष्टि
वर्षेगतेकालेयद्रोषोभून्ममानघ ससंरूढोऽसकृत्प्राप्तस्ततःकालात्ययोमहान् ३७ ततःकृष्णस्यवचनात्सर्वसात्वतसंसदि प्रददौतंम-
णिंबभ्रुरक्लेशेनमहामतिः ३८ ततस्तमार्जवप्राप्तंबभ्रोर्हस्तादरिंदमः ददौहृष्टमनाःकृष्णस्तंमणिंबभ्रवेपुनः ३९ सकृष्णहस्तात्सं
प्राप्तंमणिरत्नंस्यमंतकम् आबध्यगांदिनीपुत्रोविरराजांशुमानिव ४० यस्त्वेवंशृणुयान्नित्यंशुचिर्भूत्वासमाहितः कुरवानांसकलानां
चफलभागिहजायते ४१

नोः रोषोभूत् सचसंरूढः ततश्चकालात्ययप्राप्तश्चिरकालीनोरोषः यदर्थंजातः तद्रत्नंप्रयच्छेतिपूर्वेणान्वयः ३७
३८ ३९ ४० यस्त्वितिद्वौश्लोकौक्वचिन्नपठ्येते ४१ श्रीगोपालोविजयते

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५४ ५५ ५६ ५७ मिथ्याभिशस्तिर्मिथ्याभिशापम् वेदजानाति ५८ इतिहरिवंशटीकायां अष्टत्रिंशोऽध्यायः ३८ यत्तत् बभ्रुरक्रूरस्तद्रत्नं शतधन्वनाहारयामासेत्यन्वयः १ अंतरंतादर्थ्यम् यदर्थसमणिस्तंस्वर्णप्रसवादिरूपमर्थमन्विच्छन्नित्यर्थः अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्येइतिमेदिनी २ ३ समयंशपथम् ४ कृष्णेनभ्रस्तुरवधकुन्द्धेन अभ्युपयस्यामः अनुयास्यामः प्रबलीकर्तुमितिशेषः अत्रोपपत्तिमाहममेति ५ वारणावतात्ह्यहस्तिनापुरम् ६ ७

विश्रुतासांबमहिषीकन्याचास्यवसुंधरा रूपयौवनसंपन्नासर्वसत्त्वमनोहरा ५४ अक्रूरेणोग्रसेन्यांतुसुतौद्वौकुरुनंदन सुदेवश्चोपदेवश्च जज्ञातेदेववर्चसौ ५५ चित्रकस्याभवन्पुत्राः पृथुर्विपृथुरेवच अश्वसेनोश्वबाहुश्चसुपार्श्वकगवेषणौ ५६ अरिष्टनेमेश्चसुता धर्माधर्मभृ देवच सुबाहुर्बहुबाहुश्चश्रविष्ठाश्रवणेस्त्रियौ ५७ इमांमिथ्याऽभिशस्तियः कृष्णस्यसमुदाहृताम् वेदमिथ्याभिशापास्तंनस्पृशंतिकदाच न ५८ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिअष्टत्रिंशोऽध्यायः ३८ वैशंपायनउवाच यत्तत्सत्राजितेकृष्णोमणिरत्नं स्यमंतकम् अदात्तद्धारयामासबभ्रुःशतधन्वना १ सदाहिप्रार्थयामाससत्यभामामनिंदिताम् अक्रूरोंतरमन्विच्छन्मणिंचैवस्यमंतकम् २ सत्राजितंततोहत्वाशतधन्वामहाबलः रात्रौतंमणिमादायततोऽक्रूरायदत्तवान् ३ अक्रूरस्तुततोरत्नमादायभरतर्षभ समयंकारयाचक्रेनावेद्योहंत्वयेत्युत ४ वयमभ्युपयस्यामः कृष्णेनत्वामभिद्रुतम् ममाद्यद्वारकासर्वावशेतिष्ठत्यसंशयम् ५ हतेपितरिदुःखार्तासत्यभामायशस्विनी प्रययौरथमारुह्यनगरंवारणावतम् ६ सत्यभामातुतद्वृत्तंभोजस्यशतधन्वनः भर्तुर्निवेद्यदुःखार्ताप्रार्श्वस्थाश्रूण्यवर्तयत् ७ पांडवानांतुदग्धानांहरिःकृत्वोदकंतदा कुल्यार्थेचापिपांडूनान्ययोजयतसात्यकिम् ८ ततस्त्वरितमागत्यद्वारकांमधुसूदनः पूर्वजंहलिनंश्रीमानिदंवचनमब्रवीत् ९ हतःप्रसेनःसिंहेनसत्राजिच्छतधन्वना स्यमंतकःसमद्गामीतस्यप्रभुरहंविभो १० नदारोहरथंशीघ्रंभोजंहत्वामहाबलम् स्यमंतकोमहाबाहोह्यस्माकंसप्रभविष्यति ११ ततःप्रववृतेयुद्धंतुमुलंभोजकृष्णयोः शतधन्वाततोक्रूरमवैक्षत्सर्वतोदिशम् १२ संरब्धौतावुभौदृष्ट्वातत्रभोजजनार्दनौ शक्तोपिशाठ्याद्धार्दिक्यमक्रूरोनाभ्युपद्यत १३ अपयानेततोबुद्धिंभोजश्चक्रेभयार्दितः योजनानांशतंसाग्रंहययाप्रत्यपद्यत १४ विख्याताहृदयानामशतयोजनगामिनी भोजस्यवडवाराजन् ययाकृष्णमयोधयत् १५ क्षीणांजवेनवडवामध्वनःशतयोजने दृष्ट्वारथस्यतांवृद्धिंशतधन्वानमार्दयत् १६ ततस्तस्याहययास्तुश्रमात्खेदाच्चभारत खमुत्पेतुरथप्राणाः कृष्णोराममथाब्रवीत् १७

कुल्यार्थेअस्थिसंस्कारार्थे कुल्यंस्यात्कीकसेइतिमेदिनी ८ ९ १० ११ भोजःशतधन्वा १२ ५५
शाठ्यात् अशक्तिप्रकाशनात् हार्दिक्यंहृदीकपुत्रंशतधन्वानंनाभ्युपद्यतसाहाय्यार्थंनगतवान् १३ हयया अश्वया १४ १५ १६ १७ ७. ७. ७.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४२ इतिहरिवंशेटीकायांएकोनचत्वारिंशोऽध्यायः ३९ स्यमंतकाख्यानप्रसंगेनसमर्थोपिभगवान्लोकस्थितिंनभिभेदकारुणिकत्वाच्चाक्रूरादीनामपराधा न्क्षांतवानितिश्रुत्वा भगवन्माहात्म्यश्रवणेजातादरोजनमेजयउवाच प्रादुर्भावानिति प्रादुर्भावान्कथयतांसुखाद्वाराहेपिवराहस्यायंवाराहस्ताद्दशोपि प्रा दुर्भावोस्तीतिनोऽस्माभिःश्रुतम् वरंचतदहस्येतिव्युत्पत्त्यावराहशब्दःश्रेष्ठयज्ञवाची १ तस्यचरितंसर्वकार्यजनकत्वंविधिं अपूर्वस्वरूपाविष्करणम् विस्तरं अनुष्ठानेतिकर्तव्यताम् कर्मतेनसंतर्पणीयंदेवतादिकम् गुणःद्रव्यदेशकालादिः संतानः प्रयोगविधिः हेतुं अधिकारम् मनीषितंत्यागात्मकंस्वरूपसंपादनम् एतत्सर्वंअहंनजानेतस्माद्वदेत्यर्थः २ अधियज्ञमेवंवराहस्वरूपादिकंदृष्ट्वाऽधिदेवंतत्पृच्छति किमात्मकः आत्मास्वरूपंमूर्तिर्बाह्यविग्रहः देवतातदधिष्ठातादैव

आब्रह्मभुवनाच्चापियशःख्यातिर्नसंशयः भविष्यतिनृपश्रेष्ठसत्यमेतद्ब्रवीमिते ४२ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्व णिएकोनचत्वारिंशोऽध्यायः ३९ जनमेजयउवाच प्रादुर्भावाःपुराणेषुविष्णोरमिततेजसः सतांकथयतामेववाराहइतिनःश्रु तम् १ नजानेतस्यचरितंनविधिंनैवविस्तरम् नकर्मगुणसंतानंनहेतुंनमनीषितम् २ किमात्मकोवराहःसःकामूर्तिःकाचदेवता किमा चारःप्रभावोवाकिंवातेनपुराकृतम् ३ यज्ञार्थंसमवेतानामिषतांचद्विजन्मनाम् महावराहचरितंकृष्णद्वैपायनेरितम् ४ यथानारायणो ब्रह्मन्वाराहरूपमास्थितः दंष्ट्रयागांसमुद्रस्थामुज्जहारारिसूदनः ५ विस्तरेणैवकर्माणिसर्वाणिरिपुघातिनः श्रोतुमिच्छाम्यशेषेण हरेःकृष्णस्यधीमतः ६ कर्मणामानुपूर्व्याच्चप्रादुर्भावाश्चयेविभोः याचास्यप्रकृतिर्ब्रह्मंस्तांचख्यातुमर्हसि ७ कथंचभगवान्विष्णुःसु रशत्रुनिषूदनः वसुदेवकुलेधीमान्वासुदेवत्वमागतः ८ अमरैरावृतंपुण्यंपुण्यकृद्भिर्निषेवितम् देवलोकंसमुत्सृज्यमर्त्यलोकमिहा गतः ९ देवमानुषयोर्नेतायोभुवःप्रभवोविभुः किमर्थंदिव्यमात्मानंमानुष्येसंन्ययोजयत् १० यश्चक्रंवर्तयत्येकोमानुषाणामनामय म् मानुष्येसकथंबुद्धिंचक्रेचक्रभृतांवरः ११ गोपायनंयःकुरुतेजगतःसार्वलौकिकम् सकथंगांगतोदेवोविष्णुर्गोपत्वमागतः १२ म हाभूतानिभूतात्मायोदधारचकारच श्रीगर्भःसकथंगर्भेस्त्रियाभूचरयाधृतः १३ येनलोकान्क्रमैर्जित्वात्रिभिस्त्रींस्त्रिदशेप्सया स्थापि ताजगतोमार्गास्त्रिवर्गप्रभवास्त्रयः १४

रः आचारस्तस्यकर्तव्योर्थः प्रभावःसामर्थ्यं ३ चरितंईरितंश्रुतंच परंतुतत्तत्वंनज्ञातमित्यर्थः ४ यथाउज्जहार तथाश्रु तमितिपूर्वेणसंबंधः ५ सर्वाणिवराहादीनिनानावतारकृतानि ६ अस्यप्रादुर्भावतरंगस्य याप्रकृतिःसमुद्रस्थानीया ७ कथमिति कर्मबंधहीनोपिकथमुत्तमस्थानादव रंस्थानंप्राप्तइत्यर्थः ८ ९ लीलार्थंअवतारोनस्वप्रयोजनार्थमित्यपिन यतोलीलायामपिजन्मतापपरिहारादेःक्रियतोपिप्रयोजनस्यसत्वात् परमानंदरूपस्यतुतदभावा दित्याक्षिपतिकिमर्थमिति १० ११ १२ १३ क्रमैःपादविक्षेपैः त्रिदशेप्सयादेवानामिष्टसिध्यर्थं त्रयोमार्गाःधर्मेणस्वर्गः अर्थेनायंलोकः कामेनाधोलोकः तेषांमार्गास्त्रि भिःप्राप्यंते १४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जगत्पंचभूतात्मकंसकारणंपीत्वासंहृत्य तोयमयंनिर्विशेषंचिन्मात्ररूपंतत्रैवसलिलएकोद्रष्टेतिसलिलपदप्रयोगात्तादृशंकृत्वा लोकंएकार्णवंचक्रे सर्वंचि-न्मात्रमितिभावनयातन्मात्रंअवशेषयतीतिभावः तत्रसाधनंदृश्यादृश्येनवर्त्मनेति दृश्यंअदृश्यंचिदंशेनजडांशेन चिदचिद्ग्रंथिरूपेणजीवरूपेणैवमार्गेण अयं-भावः योहंकारमाश्रित्यसर्वंसृजति तेनैवसम्यगाश्रितेनसंहरन्नुतमपिमार्गाख्यसरणिरूपंसंहरतीति १५ विषाणाग्रेण दंताग्रेण विषाणंदंतशृंगयोरित्यमरः १६ असुरगणानितिछेदः सुराणासुरेभ्यः १७ द्विधानरसिंहरूपेण १८ १९ सहस्रेत्यनंतवाचि यंअनिरुद्धाख्यंसर्वावतारविभुषांमूलभूतम् महार्णवस्थानीयं

योंतकालेजगत्पीत्वाकृत्वातोयमयंवपुः लोकमेकार्णवंचक्रेदृश्यादृश्येनवर्त्मना १५ यःपुराणेपुराणात्मावाराहंरूपमास्थितः विषाणाग्रे णवसुधामुज्जहारारिसूदनः १६ यःपुरापुरुहूतार्थेत्रैलोक्यमिदमव्ययः ददौजित्वासुरगणान्सुराणांसुरसत्तमः १७ येननैसंहंवपुःकृ त्वाद्विधाकृत्वाचतत्तनुः पूर्वंदैत्योमहावीर्योहिरण्यकशिपुर्हतः १८ यःपुराह्यनलोभूत्वाऔर्वःसंवर्तकोविभुः पातालस्थोर्णवगतंपपौ तोयमयंहविः १९ सहस्रशिरसंयंचाहुःसहस्राक्षंसहस्रदम् सहस्रचरणंदेवंयमाहुर्वैयुगेयुगे २० नाभ्यारण्यांसमुत्पन्नंयस्यपैतामहंगृह म् एकार्णवजलस्थस्यनष्टेस्थावरजंगमे २१ येनतेनिहतादैत्याःसंग्रामेतारकामये सर्वदेवमयंकृत्वासर्वायुधधरंवपुः २२ गरुडस्थेन चोत्सिक्तःकालनेमिर्निपातितः निर्जितश्चमयोदैत्यस्तारकश्चमहासुरः २३ उत्तरांतेसमुद्रस्यक्षीरोदस्यामृतोदधेः यःशेतेशाश्वतंयोग मास्थायतिमिरंमहत् २४ सुरारणिर्गर्भमधत्तदिव्यंतपःप्रकर्षाददितिःपुराणम् शक्रंचयोदैत्यगणावरुद्धंगर्भावसानेनिभृतंचकार २५ पदानियोलोकमयानिकृत्वाचकारदैत्यान्सलिलेशयांस्तान् कृत्वाचदेवांस्त्रिदिवस्यदेवांश्चक्रेसुरेशांस्त्रिदशाधिपत्ये २६ पात्रा-णिदक्षिणादीक्षाचमसोलूखलानिच गार्हपत्येनविधिनाअन्वाहार्येणकर्मणा २७ अग्निमाहवनीयंचवेदींचैवकुशांस्रुवम् प्रोक्षणी यंध्रुवांचैवआवभृथ्यंतथैवच २८ स्वधात्रीणिचयश्चक्रेहव्यकव्यप्रदान्द्विजान् हव्यादांश्चसुरांश्चक्रेक्रव्यादांश्चपितॄनपि २९ भागा र्थेमंत्रविधिनायश्चक्रेयज्ञकर्मणि यूपान्समित्स्रुवंसोमंपवित्रान्परिधीनपि ३० यज्ञियानिचद्रव्याणियज्ञांश्चसचयानलान् सदस्यान्यज मानांश्चमेध्यादींश्चक्रतूत्तमान् ३१

२० नाभ्यानाभिदेशेनउपलक्षिताअरणिः मंथनदंडतुल्यंनालंतस्यांनाभ्यारण्यांपैतामहंगृहंपद्मं २१ २२ उत्सिक्तःदृप्तः २३ ति मिरंयोगमायां २४ सुरारणिःदेवमाताअदितिर्नाम गर्भंवामनरूपं निभृतंपूर्णकामं २५ सलिलेशयान्पातालस्थत्वेनसमुद्रजलपिहितत्वात् त्रिदिवस्यदेवान्स्वर्गे क्रीडापरान् २६ पात्रादीनि यज्ञोपकरणानि २७ आवभृथ्यंयज्ञांतस्नानायहितं तुषनिष्कासःसोमलिप्तादिकं २८ सुधात्रीणिस्वधाप्रभृतीनित्रीणिऊर्ध्वमध्याधोगतिसं ज्ञानि २९ ३० सचयानलान्इष्टकाचयनाद्युक्तानिअग्निस्थापनार्थस्थानानि ३१ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पारमेष्ठ्येन परमेष्ठिनाप्रवर्त्तितेन ३२ ३३ त्रिविधंश्रुतिस्मृतिशिष्टाचाररूपेणत्रिःप्रकारंप्रमाणम् त्रिषुनित्यनैमित्तिककाम्येषुकर्मसुप्रमेयेषु क्षेत्राणिस्था
वरजंगमानि शरीराणि उपचयोवृद्धिः लक्षणंद्विपात्त्वचतुष्पात्त्वादि ३४ त्रयोवर्णाइतिशूद्रस्ययज्ञानर्हत्वान्नविवक्षा लोकाभूरादयः त्रैविद्यंऋग्यजुःसामात्म-
कम् पावकाः गार्हपत्यादयः त्रैकाल्यंभूतंभविष्यद्वर्त्तमानाख्यम् त्रीणिसात्त्विकराजसतामसानि त्रयोपायाः त्रिविधः स्वार्थभ्रंशः अर्थानुष्ठानपादव्यसनरूपः पु
त्रैषणावित्तैषणालोकैषणारूपोवा त्रयोगुणाः सत्वादयः त्रयोवर्णाइत्यादीनांसृष्टाइत्युत्तरस्थेनान्वयः ३५ संख्यातस्त्रयोपिवैपुल्येनप्रत्येकमनंताः यतोनंतं
कर्मसंकल्पाख्यंतेनसृष्टाः येनसृष्टाः सर्वईदृशइत्यत आहसर्वेति ३६ योनृणांगतागताभ्यांमृत्युजन्मभ्यांसर्वत्रब्रह्मांडेनेता यश्चजीवरूपःसन्नइंद्रियपूर्वे

विवभ्राजपुरासर्वंपारमेष्ठ्येनकर्मणा यागानुरूपान्पुःक्रत्वालोकाननुपराक्रमत् ३२ क्षणालवाश्चकाष्ठाश्चकलास्त्रैकाल्यमेवच
मुहूर्त्तास्तिथयोमासाःपक्षाःसंवत्सरास्तथा ३३ ऋतवःकालयोगाश्चप्रमाणंत्रिविधंत्रिषु आयुःक्षेत्राण्युपचयोलक्षणंरूपसौष्ठव
म् ३४ त्रयोवर्णास्त्रयोलोकास्त्रैविद्यंपावकास्त्रयः त्रैकाल्यंत्रीणिकर्माणित्रयोऽपायास्त्रयोगुणाः ३५ त्रयोलोकाःपुरासृष्टायेना
नंत्येनकर्मणा सर्वभूतगणसृष्टःसर्वभूतगुणात्मकः ३६ नृणामिंद्रियपूर्वेणयोगेनरमतेचयः गतागताभ्यांयोनेतासर्वत्रजगदीश्व
रः ३७ योगतिर्धर्मयुक्तानामगतिःपापकर्मणाम् चातुर्वर्ण्यस्यप्रभवश्चातुर्होत्रस्यरक्षिता ३८ चातुर्विद्यस्ययोवेत्ताचातुराश्रम्यस
श्रयः दिगंतरोनभोभूतोवायुराशोविभावसुः ३९ चंद्रसूर्यमयंज्योतिर्योगीशःक्षणदांतकः यत्परंश्रूयतेज्योतिर्यत्परंश्रूयतेतपः ४० यंप
रमाहुरपरंयःपरःपरमात्मवान् आदित्यादिस्तुयोदिव्योयश्चदैत्यांतकोविभुः ४१ युगांतेष्वंतकोयश्चयश्चलोकांतकांतकः सेतुर्योलोक
सेतूनांमेध्योयोमेध्यकर्मणाम् ४२ वेद्योयोवेदविदुषांप्रभुर्यःप्रभवात्मनाम् सोमभूतस्तुसौम्यानामग्निभूतोग्निवर्चसाम् ४३

णयोगेनइंद्रियजन्येनविषयसंबंधेनरमतेसईश्वरः ३७ चातुर्होत्रस्यचत्वारोऋत्विजःहोतारोयत्रयज्ञेतस्य ३८ आन्वीक्षिकीत्रयीवार्त्तादंडनीतिरितिचतसृणांवि
द्यानांसमाहारश्चातुर्विद्यंतस्य दिशः अंतरेगर्भेयस्यसदिगंतरः नभोभूतःआकाशत्वमापन्नःविभावसुः अग्निः यद्वाविशेषेणभातीतिविभाःज्योतिःवसुःधनमन-
तोपृथ्वी ३९ चंद्रसूर्यमयंचंद्रसूर्यप्रधानंमनोज्योतिः चक्षुर्ज्योतिश्चयोगीशोनिर्विकल्पकःमनसोंतकः क्षणदारात्रिरेव अंतकोनाशकोयस्यतत्चक्षुर्ज्योतिःपरंश्रु
तकस्मृत्यंश्रूयते नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतइतिवेदेहश्यते तपःतपसोध्यानस्यप्राप्यंमनसैवेदमाप्तव्यमितिश्रुतेः ४० यंपरंसूत्रात्मानं अपरंविराजंचयंप्राहुःपरः
परस्मादपिपरंसूत्रादपिपरश्चआत्मवान् आत्मेवात्मामायाख्यंशरीरंतद्वान् मायिनंतुमहेश्वरमितिश्रुतेः दिव्योदिविचरः ४१ लोकांतकांतकः मृत्योरपिमृत्युः सेतूनांम
र्यादाविधारकाणां मन्वादीनामपि सेतुःनियंतॄणामपिनियंतेत्यर्थःमेध्यकर्मणांपवित्राणामपिमेध्यःपावनानांगंगादीनामपिपावनानांपावनः ४२ प्रभवात्मनांऐश्व
र्यस्वभावानांमरीच्यादीनांप्रभुःईश्वरः सोमवत्प्रियदर्शनः तद्रूपःसोमभूतः ४३ ५७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४४ वायुरेवप्राणः स्थितिहेतुर्यस्य सवायुप्राणः ४५ अग्नेः प्राणः सन्नग्निद्वारा किंकरोति तदाह रसादिति रसात् अग्निपृथक्कृतादन्नसारात् पाकतारतम्येन-
शोणितादिक्रमेण रेतोद्वारा गर्भः संभवतीति सच्चरसमूलेन हेतुभूतेन कर्मणाग्निव्यापारेणेति द्वयोरर्थः ४६ ४७ तत्र गर्भेऽपांविकारः प्रथमोभागः रेतोरूपः श्वे
तत्वात् सौम्यश्चसः गर्भोप्समंभवः गर्भस्य जठराग्निजन्मायोऽग्निवत् लोहितः स आग्नेयो द्वितीयोभागः ४८ एतदेवाह शुक्रमिति रसात्मकोऽक्तक्रमेण रसस्यै
वविकारो हियस्मात् एषां रसादीनां वीर्यसारः शशिपावकौ शुक्रशोणिते ४९ अग्नीषोमात्मकत्वं जगतः साधयति कफेति त्रिभिः शुक्राश्रयस्य सोमदैवतस्य
कफस्य स्थानं हृदयं तदेव प्रजापतिदैवत्यस्य मनसोपि स्थानम् शोणिताश्रयस्याग्निदैवतस्य पित्तस्य स्थानं नाभिमंडलम् तदेवाग्निदैवत्याया वाचोपि स्थानम् स्था
नस्थानिनोः अधिष्ठेयाधिष्ठात्रोर्देहदेहिनोरिव व्यवहारतो भेदाभावात् सर्वं नामरूपात्मकं जगदग्नीषोमात्मकमित्यर्थः ५० दीव्यति व्यवहरतीति देवोवागभि-

मनुष्याणां मनोभूतस्तपोभूतस्तपस्विनाम् विनयो नयवृत्तीनां तेजस्तेजस्विनामपि सर्गाणां सर्गकारश्च लोकहेतुरनुत्तमः ४४ विग्रहो वि
ग्रहाहाणां गतिर्गतिमतामपि आकाशप्रभवो वायुर्वायुप्राणो हुताशनः ४५ देवा हुताशनप्राणाः प्राणोऽग्नेर्मधुसूदनः रसाद्धि शोणितं जातं
शोणितान्मांसमुच्यते ४६ मांसात्तु मेदसो जन्म मेदसोऽस्थीनि चैव हि अस्थ्नो मज्जा समभवन्मज्जातः शुक्रमेव च ४७ शुक्राद्गर्भः समभव
द्रसमूलेन कर्मणा तत्रापां प्रथमो भागः ससौम्यो राशिरुच्यते गर्भोष्मसंभवोऽग्निर्यो द्वितीयो राशिरुच्यते ४८ शुक्रं सोमात्मकं विद्यादा
र्तवं विद्धि पावकम् भागौ रसात्मकौ ह्येषां वीर्यं च शशिपावकौ ४९ कफवर्गे भवेच्छुक्रं पित्तवर्गे च शोणितम् कफस्य हृदयं स्थानं नाभ्यां पित्तं
प्रतिष्ठितम् ५० देहस्य मध्ये हृदयं स्थानं तन्मनसः स्मृतम् नाभीकोष्ठान्तरं यत्तु तत्र देवो हुताशनः ५१ मनः प्रजापतिर्ज्ञेयः कफः सोमो विभा
व्यते पित्तमग्निः स्मृतं ह्येतदग्नीषोमात्मकं जगत् ५२ एवं प्रवर्त्तिते गर्भे वर्द्धितेऽर्बुदसन्निभे वायुः प्रवेशं संचक्रे संगतः परमात्मना ५३ ततोऽ
ङ्गानि विसृजति बिभर्त्ति परिवर्द्धयन् स पञ्चधा शरीरस्थो भिद्यते वर्द्धते पुनः ५४ प्राणोऽपानः समानश्च उदानो व्यान एव च प्राणः स प्रथमं स्था
नं वर्द्धयन् परिवर्त्तते ५५ अपानः पश्चिमं कायमुदानोर्ध्वं शरीरिणः व्यानो व्यायच्छते येन समानः संनिवर्त्तयेत् भूतावाप्तिस्ततस्तस्य जायते इ
न्द्रियगोचरात् ५६

मानी ५१ ५२ अंबुदसन्निभे यथा धूमज्योतिः सलिलपवनैर्मेघो वर्द्धते एवं गर्भोऽपि अन्नाग्निपानीयप्राणैर्वर्द्धते ऽतोऽचेतन इत्यर्थः वायुः प्राणवायुस
हचरत्वाद्वायुर्जीवः ईश्वरेण सहितः प्रविशति तेनैव सह उत्क्रामति च ५३ ततो देहप्रवेशानंतरं अंगानि शिरआदीनि विसृजति निर्माति बिभर्त्ति पुष्टानि च करोति सः प्राणोपा
धिर्जीवः प्राणस्य पंचधाभावात्स्वयमपि पंचधा भिद्यते सप्राणन्नेव प्राणो नाम भवतीति श्रुतेः ५४ प्रथमं स्थानं हृदयं वर्द्धयन् पिंडमिति शेषः ५५ पश्चिमं कायं जंघादि पादां
तं ऊर्ध्वं उरोदेशात् संधिरार्षः व्यायच्छते व्यायामं बलसाध्यं कर्म करोति येन स व्यानः सर्वदेहसंधिव्यापी समानस्तु नाभिदेशस्थः संनिवर्त्तयेत् अशितपीतादिकं समीकु
र्यात् यथास्थानं प्रापयेदित्यर्थः ततः एवं प्राणकर्मविभागानंतरं तस्य जीवस्य भूतावाप्तिः पृथिव्यादिसाक्षात्कारो जायते सा च इंद्रियगोचरात् इंद्रियाणां यो विषयो रू
पादिस्तद्वारा तदाश्रयो गृह्यत इत्यर्थः ५६ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अत्र हेतुमाह पृथिवीति यतः पृथिव्यादीनि इंद्रियाणि इंद्रियरूपेण परिणम्य शरीरे स्वे स्वे स्थाने नेत्रगोलकादौ विष्टानि प्रविष्टानि अतस्तानि स्वं स्वं योगं प्रचक्रि-
रे पार्थिवं घ्राणं पृथिवीमेव गंधविशिष्टां गृण्हाति आप्यं रसनं अपां गुणं रसमेव गृण्हाति तैजसं चक्षुस्तेजोगुणं रूपम् वायव्यं स्पर्शनेंद्रियं तद्गुणं स्पर्शनम् नाभसं श्रो
त्रं तद्गुणं शब्दं च गृण्हातीत्यर्थः ५७ देहं उपचितं कठिनांशम् पार्थिवं पृथ्वीविकारम् प्राणो वायुविकारः छिद्राण्याकाशस्रावः द्रवभागः सर्वं जलम् ५८ चक्षुः ज्यो
तिः रूपप्रकाशकं जाठराग्निश्च तेषां पृथिव्यादीनां पंचानां तेजात्मा तेजसोंऽशो मनः सर्वेषामिंद्रियाणां यंता नियामकः यस्य मनसो वीर्यात् सामर्थ्यात् ग्रामाः रूपाद्याश्च
या पृथिव्यादयः विषयाः गंधादयः यद्वा ग्रामनगरादयः देशाः पूर्वपश्चिमादयो निर्मिताः तद्वा इदं मनस्येव परं प्रतिष्ठितम् यदिदं किंचेति श्रुतेः ५९ सनातनात् अ

पृथिवी वायुराकाशमापो ज्योतिश्च पंचमम् तस्येंद्रियाणि विष्टानि स्वं स्वं योगं प्रचक्रिरे ५७ पार्थिवं देहमाहुस्तं प्राणात्मानं च मारुतम् छि
द्राण्याकाशयोनीनि जलात्स्रावः प्रवर्त्तते ५८ ज्योतिश्चक्षुश्च तेजात्मा तेषां यंता मनः स्मृतः ग्रामाश्च विषयाश्चैव यस्य वीर्यात्प्रवर्त्तिताः ५९
इत्येवं पुरुषः सर्वान् सृजन् लोकात् सनातनात् कथं लोके निधने ऽस्मिन्नरत्वं विष्णुरागतः ६० एष मे संशयो ब्रह्मन्नेव मे विस्मयो महान् कथं ग-
तिर्गतिमतामापन्नो मानुषीं तनुम् ६१ श्रुतो मे ऽस्य स्ववंशस्य पूर्वेषां चैव संभवः श्रोतुमिच्छामि विष्णोस्तु वृष्णीनां च यथाक्रमम् ६२ आ
श्चर्यं परमं विष्णुर्देवैर्दैत्यैश्च कथ्यते विष्णोरुत्पत्तिमाश्चर्यं समाचक्ष्व महामुने ६३ एतदाश्चर्यमाख्यानं कथयस्व सुखावहम् प्रख्यातब
लवीर्यस्य विष्णोरमिततेजसः कर्म चाश्चर्यभूतस्य विष्णोस्तत्त्वमिहोच्यताम् ६४ इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशप
र्वणि चत्वारिंशोऽध्यायः ४० वैशंपायन उवाच प्रश्नभारो महांस्तात त्वयोक्तः शार्ङ्गधन्वनि यथाशक्त्या तु वक्ष्यामि श्रूयतां वै-
ष्णवं यशः १ विष्णोः प्रभावश्रवणे दिष्ट्या ते मतिरुत्थिता हंत विष्णोः प्रवृत्तिं च शृणु दिव्यां समीरिताम् २ सहस्राक्षं सहस्रास्यं सहस्र-
भुजमव्ययम् सहस्रशिरसं देवं सहस्रकरमव्ययम् ३ सहस्रजिह्वं भास्वंतं सहस्रमुकुटं प्रभुम् सहस्रदं सहस्रादिं सहस्रभुजमव्य
यम् ४ सवनं हवनं चैव हव्यं होतारमेव च पात्राणि च पवित्राणि वेदीं दीक्षां चरुं स्रुवम् ५

नादिसिद्धात् नैधने निधनप्रधाने नरत्वं मानुषत्वम् ६० ६१ ६२ ६३ ६४ इति हरिवंशटीकायां चत्वारिंशोऽध्यायः ४० प्रश्नेति भारत्वात् दुर्वोढव्य
मपि यथाशक्ति वक्ष्यामि १ प्रवृत्तिं लीलाचेष्टितम् २ सहस्राक्षमिति यं विप्रा आहुरिति दशमस्थेनान्वयः सहस्रशब्दोऽनंतवाची अव्ययं अविनाशिनम् ३
अव्ययं अपरिणामिनम् ४ एवं द्वाभ्यां सूक्ष्मं अमूर्त्तरूपमुक्त्वा स्थूलं मूर्त्तरूपमाह सवनमिति सवनं कालं हवनं कर्म हव्यं हूयमानं द्रव्यम् होतारं यजमान ५८
म् पात्राणि उक्तेभ्योऽन्यानि कपालादीनि पवित्राणि कुशमयदेशादीनि दीक्षां संस्कारम् चरुं स्थालीम् ५ ६ ७ ८ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रोक्षणंप्रोक्षणीपात्रम् दक्षिणाअन्वाहार्यादिः अयनंहविर्भिःप्रचरणम् अध्वर्युंप्रसिद्धम् सामगंउद्गातारम् सदनंपत्नीशालाम् ६ होतारंऋत्विजम् चयनंइष्टकामयंस्थंडिलम् ७ ह्रस्वानिएकहायनीशकटादीनिसोमक्रयाद्यर्थानि अतिप्रमाणानिअनडुत्युक्तप्रशालादीनि अर्थफलंस्वर्गादि ८ भागगृहं गायत्र्यादि छंदःछंदांसिवैदेवेभ्योहव्यमूढ्वाथांतानीतिलिंगदर्शनात् अग्रेभुजंप्रायणीयंउदायुधंउदयनीयं ९ यंसर्वयज्ञांगमयंयज्ञे आहुः शाश्वतंनित्यैक रूपम् वेदाख्यप्रमाणरूपम् विभुंक्रतुफलदातारंईश्वरम् धीमतःधीप्रवर्त्तकस्य १० प्रजापतिःसर्ववेददर्शीब्रह्मा ११ १२ १३ हितार्थंश्रेयोर्थम् प्रभवाय

स्रुक्सोमंशूर्पंप्रसुसलंप्रोक्षणंदक्षिणायनम् अध्वर्युंसामगंविप्रंसदस्यंसदनंसदः ६ यूपंसमित्कुशंदर्वींचमसोलूखलानिच प्राग्वंशं यज्ञभूमिंचहोतारंचयनंचयत् ७ ह्रस्वान्यतिप्रमाणानिचराणिस्थावराणिच प्रायश्चित्तानिचार्थंचस्थंडिलानिकुशास्तथा ८ मंत्रंयज्ञ वहंवन्हिंभागंभागवहंचयत् अग्रेभुजंसोमभुजंघृतार्चिषमुदायुधम् ९ आहुर्वेदविदोविप्रायंयज्ञंशाश्वतंविभुम् तस्यविष्णोःसुरेश स्यश्रीवत्सांकस्यधीमतः १० प्रादुर्भावसहस्राणिअतीतानिनसंशयः भूयश्चैवभविष्यंतीत्येवमाहप्रजापतिः ११ यत्पृच्छसिमहाराज पुण्यांदिव्यांकथांशुभाम् यदर्थंभगवान्विष्णुःसुरेशोरिपुसूदनः देवलोकंसमुत्सृज्यवसुदेवकुलेभवत् १२ तत्तेहंसंप्रवक्ष्यामिशृणु सर्वमशेषतः वासुदेवस्यमाहात्म्यंचरितंचमहाद्भुतः १३ हितार्थंसुरमर्त्यानांलोकानांप्रभवायच बहुशःसर्वभूतात्माप्रादुर्भवतिकार्यतः १४ प्रादुर्भावांश्चवक्ष्यामिपुण्यान्दिव्यगुणैर्युतान् छांदसीभिरुदाराभिःश्रुतिभिःसमलंकृतान् १५ शुचिःप्रयतवाक्भूत्वानिबोध जनमेजय इदंपुराणंपरमंपुण्यंवेदैश्चसंमितम् १६ हंततेकथयिष्यामिविष्णोर्दिव्यांकथांशृणु यदायदाहिधर्मस्यग्लानिर्भवतिभा रत धर्मसंस्थापनार्थायतदासंभवतिप्रभुः १७ तस्यत्वेकामहाराजमूर्त्तिर्भवतिसत्तमा नित्यंदिविष्ठायाराजंस्तपश्चरतिदुश्चरम् १८ द्वितीयाचास्यशयनेनिद्रायोगमुपाययौ प्रजासंहारसर्गार्थंकिमध्यात्मविचिंतकम् १९ सुप्त्वायुगसहस्रंसप्रादुर्भवतिकार्यतः पूर्णेयुग सहस्रेतुदेवदेवोजगत्पतिः २० पितामहोलोकपालाश्चंद्रादित्यौहुताशनः ब्रह्माचकपिलश्चैवपरमेष्ठीतथैवच २१ देवाःसप्तर्षयश्चैव त्र्यंबकश्चमहायशाः वायुःसमुद्राःशैलाश्चतस्यदेहंसमाश्रिताः २२ सनत्कुमारश्चमहानुभावोमनुर्महात्माभगवान्प्रजाकरः पुराणदे वोथपुराणिचक्रेप्रदीप्तवैश्वानरतुल्यतेजाः २३

ऐश्वर्याय १४ १५ १६ संभवतिशरीरंधत्ते एतेनप्रवृत्तिप्रधानारजोमूर्त्तिरुक्ता १७ सात्विकीमाह तस्य हीति १८ तामसीमाहद्वितीयेति निद्रायोगंयोगमयींनिद्रांसंहारस्यसर्गःसंहारक्रियातदर्थम् कीदृशंनिद्रायोगम् किमध्यात्मविचिंतकंकुत्सिताःअध्यात्मवि चिंतकाःसविकल्पसमाधिमंतोयस्मात्तम् १९ प्रादुर्भावमेवाहपूर्णेइति तदंगेलीनानांदेवानामाविर्भावएवतस्यप्रादुर्भावइत्यर्थः देवदेवोमहादेवःजगत्पतिर्विष्णुः २० २१ २२ सनदिति सनत्कुमारादिरूपोनारायणः पुराणिशरीराणिब्रह्मादिस्तंबपर्यंतानांप्राणिनांचक्रे २३ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मध्यस्थौदानवावितिद्वयोः संबंधः २४ अमितंवरंकैवल्यम् २५ पुष्करेनाभिकमलेयत्रयस्मात् २६ यत्रपुराणेवेदः मंत्रब्राह्मणराशिः श्रुतिसमाहितः प्रत्य-
क्षेणैवनिहितोदृश्यते प्रत्यक्षश्रुतिमूलकोयमर्थइत्यर्थः २७ यस्यरूपंविष्णाद्विमामविंदक्षुहाप्रविष्टांशरीरस्यसध्येइति वाराहप्रादुर्भावस्यतावत्प्रत्यक्षश्रुतिमू
लकत्वमाह वाराहस्तुश्रुतिसुखइति २८ वेदाः चतुःसंख्यासाम्यात्पादायस्य आदिवराहोपासकैर्यज्ञांगानिवाराहांगेषुचिंतनीयानीत्येवमर्थोयंग्रंथः २९ फल
बीजमहौषधिः फलेवृषणौबीजंतदंतर्गतंरेतः तद्रूपाओषधयोयस्य प्रसवहेतुत्वसामान्यात् ओषधयएवास्यरेतइत्यर्थः विकृतोऽभिषुतः सोमः सोमरसइत्य-

येनचार्णवमध्यस्थौनष्टेस्थावरजंगमे नष्टेदेवासुरगणेप्रणष्टोरगराक्षसे २४ योद्धुकामौसुदुर्धर्षौदानवौमधुकैटभौ हतौप्रभवता
तेनतयोर्दत्वामितंवरम् २५ पुराकमलनाभस्यस्वपतःसागराम्भसि पुष्करेयत्रसंभूतादेवाःसर्षिगणाःपुरा २६ एषपौष्करकोनाम
प्रादुर्भावोमहात्मनः पुराणेकथ्यतेयत्रवेदःश्रुतिसमाहितः २७ वाराहस्तुश्रुतिसुखःप्रादुर्भावोमहात्मनः यत्रविष्णुःसुरश्रेष्ठोवाराह
रूपमास्थितः महीसागरपर्यंतांसशैलवनकाननाम् २८ वेदपादोयूपदंष्ट्रःक्रतुदंतश्चितीमुखः अग्निजिह्वोदर्भरोमाब्रह्मशीर्षोम
हातपाः २९ अहोरात्रेक्षणोदिव्योवेदांगश्रुतिभूषणः आज्यनासःस्रुवतुंडःसामघोषस्वनोमहान् ३० धर्मसत्यमयःश्रीमान्क्रमवि
क्रमसत्कृतः प्रायश्चित्तनखोधीरःपशुजानुर्महाभुजः ३१ उद्गात्रांत्रोहोमलिंगः फलबीजमहौषधिः वाय्वंतरात्मामंत्रस्फिग्विकृतःसो
मशोणितः ३२ वेदीस्कंधोहविर्गंधोहव्यकव्यातिवेगवान् प्राग्वंशकायोद्युतिमान्नानादीक्षाभिराचितः ३३ दक्षिणाहृदयोयोगीमहा
सत्रमयोमहान् उपाकर्मोष्ठरुचकःप्रवर्ग्यावर्त्तभूषणः ३४ नानाछंदोगतिपथोगुह्योपनिषदासनः छायापत्नीसहायोवैमेरुशृंगइवोच्छ्रि
तः ३५ महीसागरपर्यंतांसशैलवनकाननाम् एकार्णवजलेभ्रष्टामेकार्णवगतःप्रभुः ३६ दंष्ट्रयायःसमुद्धृत्यलोकानांहितकाम्यया स
हस्रशीर्षोदेवादिश्चकारपृथिवींपुनः ३७ एवंयज्ञवराहेणभूत्वाभूतहितार्थिना उद्धृतापृथिवीसर्वासागरांबुधरापुरा ३८ वाराहए
षकथितोनारसिंहमतःशृणु यत्रभूत्वामृगेंद्रेणहिरण्यकशिपुर्हतः ३९ पुराकृतयुगेराजन्सुरारिर्बलदर्पितः दैत्यानामादिपुरुषश्च
चारतपउत्तमम् ४० दशवर्षसहस्राणिशतानिदशपंचच जलोपवासनिरतःस्थानमौनदृढव्रतः ४१

र्थः सएवशोणितंयत्र समासैकदेशस्यापि
सोमस्यविशेषणंविकृतइति ३२ ३३ उपाकर्मस्वाध्यायस्वीकारः सएवौष्ठस्यरुचकोभूषणंयस्य प्रवर्ग्योधर्मसंतपनार्थोमहावीरः तस्यावर्त्तः आवृत्तिः सैवभूषणंयस्य
३४ ३५ ३६ चकारःस्थिरामितिशेषः ३७ यज्ञवराहेणयज्ञमयेनवराहेण ३८ नारसिंहप्रादुर्भावः नृसिंहतापिन्यादिप्रत्यक्षश्रुतिमूलएवेत्यभिसंधायाह नारसिंहमि
ति भूत्वाआविर्भूय ३९ दैत्यानांआदिपुरुषः हिरण्यकशिपुः ४० जलोपवासः जलमात्राहारः स्थानंदृढासनंमौनंइंद्रियसंयमः ताभ्यांसहदृढंव्रतंपरिग्रहोयस्यस
तथाविधउपवासः ४१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ धनदः धनप्रदः ५४ ५५ तवाद्भुता इत्यनर्हत्वाच्चतुर्थीस्थाने षष्ठी ५६ ५७

ततः शमदमाभ्यांच ब्रह्मचर्येणचानघ भृशं प्रीतो भवत्तस्य तपसा नियमेनच ४२ ततस्स्वयंभूर्भगवान्स्वयमागत्य भूपते विमाने
नार्कवर्णेन हंसयुक्तेन भास्वता ४३ आदित्यैर्वसुभिः साध्यैर्मरुद्भिर्दैवतैः सह रुद्रैर्विश्वसहायैश्च यक्षराक्षसकिन्नरैः ४४ दिशाभिर्वि
दिशाभिश्च नदीभिः सागरैस्तथा नक्षत्रैश्च मुहूर्तैश्च खेचरैश्च महाग्रहैः ४५ देवर्षिभिस्तपोवृद्धैः सिद्धैः सप्तर्षिभिस्तथा राजर्षिभिः पु
ण्यतमैर्गन्धर्वैश्चाप्सरोगणैः ४६ चराचरगुरुः श्रीमान्वृतः सर्वैः सुरैस्तथा ब्रह्मा ब्रह्मविदां श्रेष्ठो दैत्यं वचनमब्रवीत् ४७ प्रीतोस्मि
तव भक्तस्य तपसानेन सुव्रत वरं वरय भद्रं ते यथेष्टं काममाप्नुहि ४८ हिरण्यकशिपुरुवाच नदेवासुरगन्धर्वा नयक्षोरगरा-
क्षसाः नमानुषाः पिशाचाश्च निहन्युर्मां कथंचन ४९ ऋषयो वानमां शापैः क्रुद्धा लोकपितामह शपेयुस्तपसा युक्ता वरमेतं वृणोम्यहम्
५० नशस्त्रेण नचास्त्रेण गिरिणा पादपेन वा नशुष्केण नचार्द्रेण स्यान्नचान्येन मे वधः ५१ पाणिप्रहारेणैकेन सभृत्यबलवाहनम् योमां ना
शयितुं शक्तः समे मृत्युर्भविष्यति ५२ भवेयमहमेवार्कः सोमो वायुर्हुताशनः सलिलं चान्तरिक्षं च नक्षत्राणि दिशो दश ५३ अहं क्रोधश्च
कामश्च वरुणो वासवो यमः धनदश्च धनाध्यक्षो यक्षः किंपुरुषाधिपः ५४ एवमुक्तस्तु दैत्येन स्वयंभूर्भगवांस्तदा उवाच दैत्यराजं तं प्रहस
न्नृपसत्तम ५५ ब्रह्मोवाच एते दिव्या वरास्तात मया दत्तास्तवाद्भुताः सर्वान्कामानिमांस्तात प्राप्स्यसि त्वं नसंशयः ५६ ए
वमुक्त्वा तु भगवान्जगामाकाशमेव हि वैराजं ब्रह्मसदनं ब्रह्मर्षिगणसेवितम् ५७ श्रुत्वा देवा वरं तं वै दत्तं सलिलयोनिना विमुं विज्ञाप
यामासुर्देवाः शक्रपुरोगमाः ५८ ततो देवाश्च नागाश्च गन्धर्वा मुनयस्तथा वरप्रदानं श्रुत्वा ते पितामहमुपस्थिताः ५९ देवा ऊचुः वरे
णानेन भगवन्बाधिष्यति स नोऽसुरः ततः प्रसीद भगवन्वधोऽप्यस्य विचिन्त्यताम् ६० भगवान्सर्वभूतानां स्वयंभूरादिकृत्प्रभुः स्रष्टा च
हव्यकव्यानामव्यक्तः प्रकृतिर्ध्रुवः ६१ सर्वलोकहितं वाक्यं श्रुत्वा देवः प्रजापतिः प्रोवाच भगवान्वाक्यं सर्वान्देवगणांस्तदा ६२ अव
श्यं त्रिदशास्तेन प्राप्तव्यं तपसः फलम् तपसोऽन्तेऽस्य भगवान्वधं विष्णुः करिष्यति ६३ एतच्छ्रुत्वा सुराः सर्वे वाक्यं पङ्कजसंभवात् स्वानि
स्थानानि दिव्यानि जग्मुस्ते वै मुदान्विताः ६४ लब्धमात्रे वरे चापि सर्वाः सोऽबाधत प्रजाः हिरण्यकशिपुर्दैत्यो वरदानेन दर्पितः ६५ आश्र
मेषु महाभागान्मुनीन्वै शंसितव्रतान् सत्यधर्मरतान्दान्तान्पुरा धर्षितवांस्तु सः ६६

५८ ५९ ६० ६१ वाक्यं देवानामिति शेषः ६२ ६३ ६४ ६५ ६६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९१ ९२ ९३ ९४ ९५ ९६ ९७ उपावर्त्तंतपरिवव्रुः ९८ ९९ स्तननाभिजानुदेशस्थलम् चंद्रादित्ययोर्वृद्धिर्भूयस्त्वतारतस्येन १०० १०१ १०२ १०३
वेदविद्भिः यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानिविश्वेत्यादि प्रत्यक्षवेदविद्भिः अभूतात्मकः अद्भुतरूपोयमपिप्रत्यक्षश्रुतिमूलः यंवैसूर्यंस्वर्भानुस्तम
साऽविध्यदासुरः अत्रयस्तमन्वविंदन्नह्यन्ये अशक्नुवन्निति सूर्यआत्मानंस्वर्भानुर्मायातमसा विपर्ययेण अविध्यत् जीवत्समनयत् अत्रेयर्द्धअक्रत्रेयःअत्रेरपत्यं

शूलोलूखलहस्ताश्चपरश्वधधरास्तथा पाशमुद्गरहस्ताश्चैवतथामुसलपाणयः ९१ नानाप्रहरणाघोरानानावेषामहाजवाः कूर्मकुक्कुट
वक्त्राश्चशशोलूकमुखास्तथा ९२ खरोष्ट्रवदनाश्चैववराहवदनास्तथा भीमामकरवक्त्राश्चक्रोष्टुवक्त्राश्चदानवाः आखुदर्दुरवक्त्रा
श्चघोरावृकमुखास्तथा ९३ मार्ज्जारगजवक्त्राश्चमहावक्त्रास्तथापरे नक्रमेषाननाःशूरागोजाविमहिषाननाः ९४ गोधाशल्यकव
क्त्राश्चक्रौंचवक्त्राश्चदानवाः गरुडाननाःखड्गमुखामयूरवदनास्तथा ९५ गजेंद्रचर्मवसनास्तथाकृष्णाजिनांबराः चीरसंवृतदेहा
श्चतथावल्कलवाससः उष्णीषिणोमुकुटिनस्तथाकुंडलिनोसुराः ९६ किरीटिनोलंबशिखाःकंबुग्रीवाःसुवर्चसः नानावेषधरादै
त्यानानामाल्यानुलेपनाः ९७ स्वान्यायुधानिसंगृह्यप्रदीप्तान्यतितेजसा क्रममाणंहृषीकेशमुपावर्त्तंतसर्वशः ९८ प्रमथ्यसर्वान्
दैतेयान्पादहस्ततलैःप्रभुः रूपंकृत्वामहाभीमंजहाराशुसमेदिनीम् ९९ तस्यविक्रामतोभूमिंचंद्रादित्यौस्तनांतरे नभःप्रक्रममा
णस्यनाभ्यांकिलसमास्थितौ १०० परंप्रक्रममाणस्यजानुदेशेस्थितावुभौ विष्णोरतुलवीर्यस्यवदंत्येवंद्विजातयः १०१ हृत्वासपृ
थिवींकृत्स्नांजित्वाचासुरपुंगवान् ददौशक्रायत्रिदिवंविष्णुर्बलवतांवरः १०२ एषतेवामनोनामप्रादुर्भावोमहात्मनः वेदविद्भिर्द्वि
जैरेवंकथ्यतेवैष्णवंयशः १०३ भूयोभूतात्मकोविष्णोःप्रादुर्भावोमहात्मनः दत्तात्रेयइतिख्यातःक्षमयापरयायुतः ४ तेननष्टेषुवेदे
षुप्रक्रियासुमखेषुच चातुर्वर्ण्येतुसंकीर्णेधर्मेशिथिलतांगते ५ अभिवर्द्धतिचाधर्मेसत्येनष्टेनृतेस्थिते प्रजासुशीर्यमाणासुधर्मे
चाकुलतांगते ६ सहयज्ञक्रियावेदाःप्रत्यानीताहितेनवै चातुर्वर्ण्यमसंकीर्णंकृतंतेनमहात्मना ७ तेनहैहयराजस्यकार्त्तवीर्यस्यधीम
तः वरदेनवरोदत्तोदत्तात्रेयेणधीमता ८ एतद्बाहुद्वयंयत्तेमृधेममकृतेनघ शतानिदशबाहूनांभविष्यंतिनसंशयः ९ पालयिष्यसिकृ
त्स्नांचवसुधांवसुधाधिप दुर्निरीक्ष्योरिवृंदानांधर्मज्ञश्चभविष्यसि १० एषतेवैष्णवःश्रीमान्प्रादुर्भावोद्भुतःशुभः कथितोवैमहाराजय
थाश्रुतमरिंदम भूयश्चजामदग्न्योयंप्रादुर्भावोमहात्मनः ११

निदत्तात्रयः बहुलंपूजार्थंपरयाक्षमयाशांत्यातेनज्ञानमार्गप्रवर्त्तकोयमवतारइतिज्ञेयम् ४
अन्यच्चावतारकृत्यमाह तेनेत्यादिना प्रक्रियासुअनुष्ठानप्रकारेषु शिथिलतांविरलताम् ५ आकुलतांअधर्मेणमिश्रताम् ६ ७ ८ ९ १० ११ ६३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६७ ६८ ६९ ब्रह्मदेवंब्राह्मणानांदैवतम् ७० नोऽस्मान्नोऽस्माकंवा ७१ ७२ ७३ ७४ ७५ ७६ जीमूतघनसंकाशःमेघकदंबवर्णः ७७ ७८ ७९ ८०

दैवांस्त्रिभुवनस्थांस्तु पराजित्यमहासुरः त्रैलोक्यंवशमानीयस्वर्गेवसतिदानवः ६७ यदावरमदोन्मत्तोन्यवसद्दानवोभुवि यज्ञियानकृ
तवान्दैत्यान्देवांश्चैवाप्ययज्ञियान् ६८ आदित्याश्चततोरुद्राविश्वेचमरुतस्तथा शरण्यंशरणंविष्णुमुपाजग्मुर्महाबलम् ६९ वेदयज्ञ
मयंब्रह्मब्रह्मदेवंसनातनम् भूतभव्यभविष्यंचप्रभुंलोकनमस्कृतम् नारायणंविभुंदेवाःशरण्यंशरणागताः ७० देवाऊचुः त्रा
यस्वनोद्यदेवेशहिरण्यकशिपोर्भयात् त्वंहिनःपरमोधाताब्रह्मादीनांसुरोत्तम ७१ त्वंहिनःपरमोदेवस्त्वंहिनःपरमोगुरुः उत्फुल्लांबुज
पत्राक्षः शत्रुपक्षभयंकरः ७२ क्षयायदितिवंशस्यशरणंत्वंभवस्वनः ७२ विष्णुरुवाच भयंत्यजध्वममराह्यभयंवोददाम्य
हम् तथैवत्रिदिवंदेवाःप्रतिपत्स्यथमाचिरम् ७३ एषतंसगणंदैत्यंवरदानेनदर्पितम् अवध्यममरेन्द्राणांदानवेंद्रंनिहन्म्यहम् ७४
वैशंपायनउवाच एवमुक्त्वासभगवान्विसृज्यत्रिदशेश्वरान् हिरण्यकशिपोराजन्नाजगामहरिःसभाम् ७५ नरस्यकृत्वार्द्धतनुं
सिंहस्यार्द्धतनुंप्रभुः नारसिंहेनवपुषापाणिंसंस्पृश्यपाणिना ७६ जीमूतघनसंकाशोजीमूतघननिःस्वनः जीमूतघनदीप्तौजाजीमूत
इववेगवान् ७७ दैत्यंसोतिबलंदृप्तंहृप्तशार्दूलविक्रमम् दृप्तैर्दैत्यगणैर्गुप्तंहतवानेकपाणिना ७८ नृसिंहएषःकथितोभूयोयंवाम
नोऽपरः यत्रवामनमाश्रित्यरूपंदैत्यविनाशकृत् ७९ बलेर्बलवतोयज्ञेबलिनाविष्णुनापुरा विक्रमैस्त्रिभिरक्षोभ्याःक्षोभितास्तेमहा
सुराः ८० विप्रचित्तिःशिविःशंकुरयःशंकुस्तथैवच अयःशिराःशंकुशिराहयग्रीवश्चवीर्यवान् ८१ वेगवान्केतुमानुग्रःसोमव्यग्रो-
महासुरः पुष्करःपुष्कलश्चैववेपनश्चमहारथः ८२ बृहत्कीर्तिर्महाजिह्वःसाश्वोश्वपतिरेवच प्रह्रादोऽश्वशिराःकुंभःसंह्रादोगगनप्रि-
यः अनुह्रादोहरिहरौवराहःशंकरोरुजः ८३ शरभःशलभश्चैवकुपनःकोपनःक्रथः बृहत्कीर्तिर्महाजिह्वःशंकुकर्णोमहास्वनः ८४ दी
र्घजिह्वोर्कनयनोमृदुचापोमृदुप्रियः वायुर्यविष्ठोनमुचिःशंबरोविज्वरोमहान् ८५ चंद्रहंताक्रोधहंताक्रोधवर्द्धनएवच कालकःकाल-
केयश्चवृत्रःक्रोधोविरोचनः ८६ गरिष्ठश्चवरिष्ठश्चप्रलंबनरकावुभौ इंद्रतापनवातापीकेतुमान्बलदर्पितः ८७ असिलोमापुलोमाच-
वाष्कलःप्रमदोमदः खसृमःकालवदनःकरालःकैशिकःशरः ८८ एकाक्षश्चंद्रहाराहुःसंह्रादःसृमरःस्वनः शतघ्नीचक्रहस्ताश्चतथामुस
लपाणयः ८९ महाशिलाप्रहरणाःशूलहस्ताश्चदानवाः अश्मयंत्रायुधोपेताभिंडिपालायुधास्तथा ९०

८१ ८२ ८३ ८४ ८५ ८६ इंद्रतापनश्चवातापिश्चेतिद्वंद्वः ८७ ८८ ८९ ९० छ. छ. छ. छ. छ. छ.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ जनस्थाने दंडकारण्यप्रदेशे

यत्रबाहुसहस्रेणविस्मितंदुर्जयंरणे रामोर्जुनमनीकस्थंजघाननृपतिंप्रभुः १२ रथस्थंपार्थिवंरामः पातयित्वार्जुनंयुधि धर्षयित्वा
पृथाकामंक्रोशमानंचमेघवत् १३ कृत्स्नंबाहुसहस्रंचचिच्छेदभृगुनन्दनः परश्वधेनदीप्तेनज्ञातिभिःसहितस्यवै १४ कीर्णाक्षत्रिय
कोटीभिर्मेरुमंदरभूषणा त्रिःसप्तकृत्वःपृथिवीतेननिःक्षत्रियाकृता १५ कृत्वानिःक्षत्रियांचैवभार्गवःसुमहातपाः सर्वपापविनाशा
यवाजिमेधेनचेष्टवान् १६ तस्मिन्यज्ञेमहादानेदक्षिणांभृगुनंदनः मारीचायददौप्रीतःकश्यपायवसुंधराम् १७ वारणांस्तुरगांश्छी
घ्रान्रथांश्चरथिनांवरः हिरण्यमक्षयंधेनूर्गजेंद्रांश्चमहामनाः ददौतस्मिन्महायज्ञेवाजिमेधेमहायशाः १८ अद्यापिचहितार्थायलोकानां
भृगुनंदनः चरमाणस्तपोदीप्तंजामदग्न्यःपुनःपुनः तिष्ठतेदेववच्छ्रीमान्महेंद्रेपर्वतोत्तमे १९ एषविष्णोःसुरेशस्यशाश्वतस्याव्ययस्यच
जामदग्न्यइतिख्यातःप्रादुर्भावोमहात्मनः २० चतुर्विंशेयुगेचापिविश्वामित्रपुरःसरः जज्ञेदशरथस्याथपुत्रःपद्मायतेक्षणः २१ कृत्वा
त्मानंमहाबाहुश्चतुर्धाप्रभुरीश्वरः लोकेरामइतिख्यातस्तेजसाभास्करोपमः २२ प्रसादनार्थंलोकस्यरक्षसांनिधनायच धर्मस्यचविवृ
द्ध्यर्थंजज्ञेतत्रमहायशाः २३ तमप्याहुर्मनुष्येंद्रंसर्वभूतपतेस्तनुम् यस्मैदत्तानिचास्त्राणिविश्वामित्रेणधीमता २४ वधार्थंदेवशत्रूणां
दुर्धराणिसुरैरपि यज्ञविघ्नकरौयेनमुनीनांभावितात्मनाम् २५ मारीचश्चसुबाहुश्चबलेनबलिनांवरौ निहतौचनिराशौचकृतौतेन-
महात्मना २६ वर्त्तमानेमखेयेनजनकस्यमहात्मनः भग्नंमाहेश्वरंचापंक्रीडतालीलयापुरा २७ यःसमाःसर्वधर्मज्ञश्चतुर्दशवनेवसत्
लक्ष्मणानुचरोरामःसर्वभूतहितेरतः २८ रूपिणीयस्यपार्श्वस्थासीतेतिप्रथिताजनैः पूर्वोचितातस्यलक्ष्मीभर्तारमनुगच्छति २९ च
तुर्दशतपस्तप्त्वावनेवर्षाणिराघवः जनस्थानेवसन्कार्यंत्रिदशानांचकारह सीतायाःपदमन्विच्छन्लक्ष्मणाऽनुचरोविभुः ३० विराधंच
कबंधंचराक्षसौभीमविक्रमौ जघानपुरुषव्याघ्रोगंधर्वौशापविक्षितौ ३१ हुताशनार्केंदुतडिद्घनाभैःप्रतप्तजांबूनदचित्रपुंखैः म
हेंद्रवज्राशनितुल्यसारैःशरैःशरीरेणवियोजितौबलात् ३२ सुग्रीवस्यकृतेयेनवानरेंद्रोमहाबलः वालीविनिहतोयुद्धेसुग्रीवश्चा-
भिषेचितः ३३ देवासुरगणानांहियक्षगंधर्वभोगिनाम् अवध्यंराक्षसेंद्रंतंरावणंयुधिदुर्जयम् ३४ युक्तंराक्षसकोटीभिर्नीलांजन
चयोपमम् त्रैलोक्यरावणंघोरंरावणंराक्षसेश्वरम् ३५ दुर्जयंदुर्धरंदृप्तंशार्दूलसमविक्रमम् दुर्निरीक्ष्यंसुरगणैर्वरदानेनदर्पितम्

३० ३१ वियोजितौविशेषणयोजितौ ३२ ३३ ३४ त्रैलोक्यस्यरावणंआक्रंदकरम् ३५ ३६ छ छ छ छ ३६ छ

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सचिवैः सुग्रीवविभीषणादिभिः ३७ ३८ लवणः शत्रुघ्नरूपिणा तेनैव हतः ३९ ४० जारूथ्यान् त्रिगुणीकृतदक्षिणानित्येके अन्ये तु जारूथ्यामिति सप्तम्यंतं
पाठं प्रकल्प्य अयोध्यायामिति व्याचक्षते जरूथं छंदोगप्रसिद्धः स्तोत्रविशेषस्तदर्हान् जरूथं गरूथम् गण तेः स्तुतिकर्मण इति यास्कः इति गण नेस्स्थ्रन्प्रत्यये आ
देश्चुत्वमिति तस्य जत्वं जृवृभ्यां रूथन्निति सूत्रे जरूथं मांसमिति शाब्दिकाः जारूथ्यान् स्तुत्यान् पुण्यान्वेत्यर्थः ४१ ४२ ४३ ४४ ४५ ४६ सहस्राणि एकादशे-

जघान सचिवैः सार्द्धं ससैन्यं रावणं युधि महाभ्रघनसंकाशं महाकायं महाबलम् ३७ तमागस्कारिणं घोरं पौलस्त्यं युधि दुर्जयम् सभ्रा
तृपुत्रसचिवं ससैन्यं क्रूरनिश्चयम् ३८ रावणं निजघानाशु रामो भूतपतिः पुरा मधोश्च तनयो दृप्तो लवणो नाम दानवः ३९ हतो मधुवने
वीरो वरदृप्तो महासुरः समरे युद्धशौंडेन तथा चान्ये ऽपि राक्षसाः ४० एतानि कृत्वा कर्माणि रामो धर्मभृतां वरः दशाश्वमेधान् जारूथ्याना
जहार निरर्गलान् ४१ नाश्रूयंताशुभा वाचो नाकुलं मारुतो ववौ न वित्तहरणं ह्यासीद्रामे राज्यं प्रशासति ४२ पर्यदेवन्न विधवा नान-
र्थाश्चाभवंस्तदा सर्वमासीज्जगद्दांतं रामे राज्यं प्रशासति ४३ न प्राणिनां भयं चापि जलानिलविघातजम् न च स्म वृद्धा बालानां प्रेतका-
र्याणि कुर्वते ४४ ब्रह्म पर्यचरत्क्षत्रं विशः क्षत्रमनुव्रताः नार्यो नात्यचरन्भर्तॄन् भार्यां नात्यचरत्पतिः ४५ सर्वमासीज्जगद्दांतं निर्दस्युर
भवन्मही रामएको ऽभवद्भर्त्ता रामः पालयिता ऽभवत् ४६ आयुर्वर्षसहस्राणि तथा पुत्रसहस्रिणः अरोगाः प्राणिनश्चासन् रामे राज्यं
प्रशासति ४७ देवतानामृषीणां च मनुष्याणां च सर्वशः पृथिव्यां समवायो ऽभूद्रामे राज्यं प्रशासति ४८ गाथा अप्यत्र गायंति ये पुराणवि
दो जनाः रामे निबद्धतत्त्वार्था माहात्म्यं तस्य धीमतः ४९ श्यामो युवा लोहिताक्षो दीप्तास्यो मितभाषितः आजानुबाहुः सुमुखः सिंहस्कं
धो महाभुजः ५० दशवर्षसहस्राणि दशवर्षशतानि च अयोध्याधिपतिर्भूत्वा रामो राज्यमकारयत् ५१ ऋक्सामयजुषां घोषो ज्याघो
षश्च महात्मनः अव्युच्छिन्नो ऽभवद्राज्ये दीयतां भुज्यतामिति ५२ सत्त्ववान्गुणसंपन्नो दीप्यमानः स्वतेजसा अतिचंद्रं च सूर्यं च रामो
दाशरथिर्बभौ ५३ ईजे क्रतुशतैः पुण्यैः समाप्तवरदक्षिणैः हित्वायोध्यां दिवं यातो राघवः समहाबलः ५४ एवमेष महाबाहुरिक्ष्वाकु
कुलनंदनः रावणं सगणं हत्वा दिवमाचक्रमे प्रभुः ५५ वैशंपायन उवाच अपरः केशवस्यायं प्रादुर्भावो महात्मनः विख्यातो
माथुरे कल्पे सर्वलोकहिताय वै ५६ यत्र शाल्वं च मैंदं च द्विविदं कंसमेव च अरिष्टमृषभं केशिं पूतनां दैत्यदारिकाम् ५७ नागं कुवल
यापीडं चाणूरं मुष्टिकं तथा दैत्यान्मानुषदेहस्थान्सूदयामास वीर्यवान् ५८

निशेषः ४७ समवायः समाजः ४८ ४९ ५० ५१ ५२ ५३ समहाबलः महता बलेन सैन्योपलक्षितेन कृत्स्नजनेन सहितः समहाबलः ५४ ५५ ५६ ५७ ५८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५९ ६० नवमेऽवतारेएतच्चात्रानुक्ताभ्यामपिमत्स्यकूर्माभ्यांसहज्ञेयम् तथावेदव्यासोपिदशमोजज्ञे इतिविशेषणंयोग्यम् ६१ ६२ एतेदशातीताः ६३ उत्पत्स्य
तेएकादशोयम् दशमेऽतीतेसतीत्यग्रिमेणसंबंधः ६४ भाव्याः भवंसततोत्पत्तिंप्रशंसंतितेभाव्याः क्षणिकवादिनोबौद्धाः तैःसहसंपन्नोवादेयुद्धेचसंगतः क्षप
यित्वाजित्वाहत्वाच तानेवविशिनष्टि भाविनाभावंपूर्वोक्तंप्रशंसताबुद्धमुनिनाविष्णोरेवरूपांतरेणभगवताकेनचिदर्थेननिमित्तेनकलौदंभयज्ञप्रवृत्त्यालोकना
शोमाभूदितियज्ञनिंदार्थेननिमित्तेनचोदितान्प्रवर्त्तितान् एतेनकल्कितःप्राक्बौद्धावतारोऽपिसूचितः बौद्धपक्षक्षयार्थश्चकल्क्यात्कृतम् ६५ निष्ठांसमाप्तिम्

छिन्नंबाहुसहस्रंचबाणस्याद्भुतकर्मणः नरकश्चहतःसंख्येयवनश्चमहाबलः ५९ हृतानिचमहीपानांसर्वरत्नानितेजसा दुराचारा
श्चनिहतापार्थिवाश्चमहीतले ६० नवमेद्वापरेविष्णुरष्टाविंशेपुराभवत् वेदव्यासस्तथाजज्ञेजातूकर्ण्यपुरस्सरः ६१ एकोवेदश्चतुर्द्धा
तुकृतस्तेनमहात्मना जनितोभारतोवंशःसत्यवत्याःसुतेनच ६२ एतेलोकहितार्थायप्रादुर्भावामहात्मनः अतीताःकथिताराजन्क
थ्यतेचाप्यनागताः ६३ कल्कीविष्णुयशानामशंभलग्रामकोद्विजः सर्वलोकहितार्थायभूयश्चोत्पत्स्यतेप्रभुः ६४ दशमोभाव्यसंप
न्नोयाज्ञवल्क्यपुरःसरः क्षपयित्वाचतान्सर्वान् भाविनार्थेनचोदितान् ६५ गंगायमुनयोर्मध्येनिष्ठांप्राप्स्यतिसानुगः ततःकुलेव्य
तीतेतुसामात्येसहसैनिके ६६ नृपेष्वथप्रनष्टेषुतदात्वप्रग्रहाःप्रजाः क्षणेननिर्घृतेचैवहत्वाचान्योन्यमाहवे ६७ परस्परहृतस्वाश्च
निराक्रंदाःसुदुःखिताः एवंकष्टमनुप्राप्ताःकलिसंध्यांशकेतदा प्रजाःक्षयंप्रयास्यंतिसार्द्धंकलियुगेनह ६८ क्षीणेकलियुगेतस्मिन्
ततःकृतयुगंपुनः प्रपत्स्यतेयथान्यायस्वभावादेवनान्यथा ६९ एतेचान्येचबहवोदिव्यादेवगुणैर्युताः प्रादुर्भावाःपुराणेषुगीयंते
ब्रह्मवादिभिः ७० यत्रदेवापिमुह्यंतिप्रादुर्भावानुकीर्त्तने पुराणंवर्त्ततेयत्रवेदश्रुतिसमाहितम् ७१ एतदुद्देशमात्रेणप्रादुर्भावा
नुकीर्त्तनम् कीर्त्तितंकीर्त्तनीयस्यसर्वलोकगुरोःप्रभोः ७२ प्रीयंतेपितरस्तस्यप्रादुर्भावानुकीर्त्तनात् विष्णोरतुलवीर्यस्ययःशृणो
तिकृतांजलिः ७३ एतास्तुयोगेश्वरयोगमायाःश्रुत्वानरोमुच्यतिसर्वपापैः ऋद्धिंसमृद्धिंविपुलांश्चभोगान्प्राप्नोतिसर्वंभगवत्प्रसादा
त् ७४ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिएकचत्वारिंशोऽध्यायः ४१

ननुकल्कीम्लेच्छान्निगृहीष्यतीत्यत्रस्मर्यते तत्कथंनिष्ठांग
मिष्यतीत्यत्रोच्यतेऽत आहततइति कुलेव्यतीतेअन्योन्यदारापहारान्नष्टेसति ६६ अप्रग्रहाःअनियंतृकाःईश्वरयत्नंविनैवकामलोभाक्रांताःप्रजाःपरस्परंघातयि
ष्यंतीत्यर्थः ६७ ६८ तदेवोपसंहरति स्वभावादेवनान्यथेति ६९ ७० देवापीतिसंधिरार्षः ७१ उद्देशमात्रेणकीर्त्तनंकृतम् नतुसम्यग्व्याख्यातम् प्रादुर्भावा
नामन्येषामृषभादीनामानंत्यात् ७२ ७३ एतायोगमायाएवनतुतात्विक्योभगवतोलीला अस्मदादिलीलावद्रागपूर्विकाइत्यर्थः तथाचमंत्रः यदचरस्त

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न्वावाद्वृधानोबलानींद्रप्रब्रुवाणोजनेषुमायेत्सातेयानियुद्धान्याहुर्नाद्यशत्रुंननुपुराविवित्सइति अस्यार्थः हे इंद्र परमेश्वर यत् तन्वा मत्स्यकूर्मादिशरीरेण अचरः चरणंकृतवानसि वावृधानः वर्धमानः वृत्रवधे दैत्यादीन् हत्वा महत्त्वं च प्राप्तवानसि लोके बलानि भूमेरुद्धरणादीनि जनेषु प्रब्रुवाणः ख्यापितवानभूः सा सर्वानेतव मायेत्नमायैव साकायानियुद्धान्याहुः देवासुरसंग्रामाः सर्वे मायैव कुतएतत् यतस्त्वां ननु निश्चितं अद्यवर्त्तमानकाले पुरावाशत्रुं नाशनीयं नविवित्से लभसे सर्वस्यांतरात्मत्वात्कालत्रयेपितवशत्रुर्नास्तीति तस्मात्त्वामार्थानुवादवदेतत्पुराणं भगवल्लीलामनुवदतीति मंत्रार्थः ऋद्धिं धर्मफलभूतां संपत्तिम् समृद्धिं योगैश्वर्यम् ७४ इतिहरिवंशे टीकायां एकचत्वारिंशोऽध्यायः ४१ पूर्वं यदा धर्मस्य ग्लानिस्तदा भगवानाविर्भवतीत्युक्तं सा चावतारणा सुदयाद्भवति अतस्तेषां वधेन विष्णोर्जगद्रक्षकत्वं निरूपयति विश्वत्वमित्यादिना विशेषेणाश्वसित्याश्वसित्यभयं प्राप्य जनो यस्मादिति विश्वः आश्वासनकर्त्ता अभयदातेतियाव

वैशंपायनउवाच विश्वत्वंशृणुमे विष्णोर्हरित्वंच कृतेयुगे वैकुंठत्वंचदेवेषु कृष्णत्वंमानुषेषुच १ ईश्वरत्वंचतस्येदंगहनंक
र्मणांगतिम् संप्रत्यतीतांभाव्यांचशृणुराजन्यथातथम् २ अव्यक्तोव्यक्तलिंगस्थोयएषभगवान्प्रभुः नारायणोह्यनंतात्माप्रभवोऽ
व्ययएवच ३ एषनारायणोभूत्वाहरिरासीत्कृतेयुगे ब्रह्माशक्रश्चसोमश्चधर्मःशुक्रोबृहस्पतिः ४ अदितेरपिपुत्रत्वमेत्ययादवनंदनः
एषविष्णुरितिख्यातइंद्रादवरजोऽभवत् ५ प्रसादजंह्यस्यविभोरदित्याःपुत्रजन्मतत् वधार्थंसुरशत्रूणांदैत्यदानवरक्षसाम् ६ प्र
धानात्मापुराह्येषब्रह्माणमसृजत्प्रभुः सोसृजत्पूर्वपुरुषःपुराकल्पेप्रजापतीन् ७ तेतन्वानास्तनूस्तत्रब्रह्मवंशाननुत्तमान् तेभ्यो
ऽभवन्महात्मभ्योबहुधाब्रह्मशाश्वतम् ८ एतदाश्चर्यभूतस्यविष्णोर्नामानुकीर्त्तनम् कीर्त्तनीयस्यलोकेषुकीर्त्यमानंनिबोधमे ९

त् हरतिनाशयतिदुःखदान्दुरितदैत्यादीनितिहरिः विगतंकुंठनंगतिप्रतिघातआलस्यं वैकल्यंवायस्मात्सविकुंठः स्वार्थेऽणि वैकुंठः देवेषु सात्त्विकेषु पालनीयेषु यस्याशक्यत्वादिकं नास्तीत्यर्थः मानुषेषु रजस्तमोग्रस्तेषु उपेक्षणीयेषु कृष्णत्वं कृषिर्भूवाचकः शब्दोणश्चनिर्वृतिवाचकइतिश्रुतेः केवलसत्तारूपेण सांसारिकानंदरूपेण चास्तित्वं च शृणु १ तथा मध्यमेषु ईश्वरत्वं निग्रहानुग्रहकर्तृत्वम् एवंविधां भगवतो नानारूपां कर्मणां लीलानां गतिं भूतां भविष्यां च वक्ष्यमाणां शृणु २ अव्यक्तोपि व्यक्तं लिंगं मूर्त्तिः तत्स्थः यत्र मत्स्याद्यवतारग्रहणे नारायणोसु निरस्तद्रूपः ३ नारायणः जगत्सृष्ट्वा तत्र प्रविश्य जीवभावमनुभूय पुनर्जीवत्वहर्त्ता जीवन्नेव मुक्तो हरिसंज्ञोभूत् कृतयुगे देहिनः सद्योमुच्यंत इति भावः एतस्यैव रूपं ब्रह्मादयः इत्याह ब्रह्मेति ४ ५ ६ प्रधानं त्रिगुणात्मिका माया सैव आत्मा शरीरं यस्य प्रधानात्मा मायावी मायिनं तु महेश्वरमिति श्रुतेः ईश्वरः प्रजापतीन् मरीच्यादीन् ७ तनूस्तन्वानाः कश्यपादिरूपेण स्वरूपाणि विस्तारयंतः ब्रह्मवंशान् नानागोत्राणि ससृजुः ब्रह्म यज्ञः बहुधा प्रकृतिविकृत्यादिरूपः वेदो वा शाखाभेदेन बहुधाभवत् ८ एतत्तु वेदरूपम् यदाह शौनकः वेदाक्षराणि यावंति पठि-

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तानि द्विजातिभिः तावंति हरिनामानि कीर्तितानि नसंशयइतिइतोपि अन्यत् कीर्त्यमानंनिबोध बुध्यस्व वेदजपतुल्यं ९ तदेवाह वृत्त इत्यादिना तारकामय
स्तारकप्रधानः १० तत्रगुरुदारहर्तुः सोमस्य पक्षे तत्तुल्यशीलत्वादसुरा आसन् ११ ते देवाः १२ निर्वाणाः अर्चिषा परिहिताः तमायस्कल्याः तेचते ऽङ्गारा श्च
तद्वर्षिणः आसन्निति शेषः १३ ते मेघाः अन्योन्यवेगैरभिहताः बभूवुरिति शेषः यतः सप्तमारुताः प्रवहादयस्तत्क्षोभकर्त्तारः प्रववुः तैर्धूलिपटलमावर्त्तित-
मित्यर्थः १४ दीप्तं तप्तं तोयं अशनी च तयोः पातैः ररास शब्दं चकार १५ न्युब्जानि अधोमुखानि १६ चतुर्युगानां अंतपर्याये चरमे ऽवांतरप्रलये इत्यर्थः १७ १८

वृत्ते वृत्रवधे तात वर्त्तमाने कृते युगे आसीत्त्रैलोक्यविख्यातः संग्रामस्तारकामयः १० तत्रासन्दानवा घोराः सर्वे संग्रामदर्पिताः घ्नंति
देवगणान्सर्वान्सयक्षोरगराक्षसान् ११ ते वध्यमाना विमुखाः क्षीणप्रहरणा रणे त्रातारं मनसा जग्मुर्देवं नारायणं हरिम् १२ एत
स्मिन्नंतरे मेघा निर्वाणांगारवर्षिणः सार्कचंद्रग्रहगणं छादयंतो नभस्तलम् १३ चंचद्विद्युद्गणाविद्धा घोरा निर्ह्रादकारिणः अन्यो
न्यवेगाभिहताः प्रववुः सप्तमारुताः १४ दीप्ततोयाशनीपातैर्वज्रवेगानिलाकुलैः ररास घोरैरुत्पातैर्दह्यमानमिवांबरम् १५ पेतु
रुल्कासहस्राणि मुहुराकाशगान्यपि न्युब्जानि च विमानानि प्रपतंत्युत्पतंति च १६ चतुर्युगांतपर्याये लोकानां यद्भयं भवेत् तादृशा
न्येव रूपाणि तस्मिन्नुत्पातलक्षणे १७ तमसा निःप्रभं सर्वं न प्रज्ञायत किंचन तिमिरौघपरिक्षिप्ता न रेजुश्च दिशो दश १८ निशे-
व रूपिणी काली कालमेघावगुंठिता द्यौर्न भात्यभिभूतार्का घोरेण तमसावृता १९ तान्घनौघान्सतिमिरान्दोर्भ्यामुत्क्षिप्य सप्र
भुः वपुः संदर्शयामास दिव्यं कृष्णवपुर्हरिः २० बलाहकांजननिभं बलाहकतनूरुहम् तेजसा वपुषा चैव कृष्णं कृष्णमिवाचलम् २१
दीप्तपीतांबरधरं तप्तकांचनभूषणम् धूमांधकारवपुषं युगांताग्निमिवोत्थितम् २२ चतुर्द्विगुणपीनांसं बलाकापंक्तिभूषणम् चा
मीकरकराकारैरायुधैरुपशोभितम् २३ चंद्रार्ककिरणोद्योतगिरिकूटशिलोच्चयम् नंदकानंदितकरं शराशीविषधारिणम् २४

काली निशा दर्श रात्रिः १९ कृष्णां घननीलं वपुर्यस्य स हरिर्वपुर्दर्शयामास २० बलेति मेघवत् कृष्णवर्णं कृष्णकेशं च तेजसा कृष्णवर्णेन २१ २२ चतुर्द्विगुणा अ
ष्टौ पीनाः पुष्टाश्च अंसा बाहुमूलानि यस्य तं चामीकरं स्वर्णं तन्मयाः कराकाराः मुष्टयो येषु तैः चामीकरकराकारैः २३ गिरिकूटं पर्वतवदचंचलं कूटोस्त्री निश्च
ले राशाविति मेदिनी शिलोच्चयं मनः शिलावर्णं नीविबंधनं यस्य तं शिलातु प्रस्तरे मता तथा मनःशिलायां चेति मेदिनी उच्चैस्तरे त्युच्चयः स्यात्समूहे नीविबंध
नइति च नंदकः खड्गः तेन आनंदितः शोभितः करो यस्य तं नंदकानंदितकरम् नंदको हरिखड्गे चेति मेदिनी २४ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२५ हर्यश्वं हरिद्वर्णाअश्वास्तैः संयुक्ते रथेवपुर्दर्शयामासेति पूर्वेणसंबंधः रथसंयुक्ते इत्यत्र संयुक्तरथेइत्यपेक्षितेरथपदस्यपूर्वनिपातः आर्षः चंद्रे
ति २६ रथैदद्दृशेदृष्टः २७ देवैः किंउदासीनैर्दृष्टः शेनेत्याह देवास्तं दद्दृशुरितिबुद्धिपूर्वकं दृष्टवंतइत्यर्थः यस्यचंद्रार्कौचक्रे मंदराद्रिरक्षः शेषः प्रग्रहः मे-
रुः कूबरम् ताराएववरूथगतचित्रकुसुमानि ग्रहादीनिबंधनानि ताद्दृशेविश्वरथेस्थितंदेवा दद्दृशुरित्यर्थः २८ २९ दयिताः देवताः यस्येतिबहुव्रीहिः ३०

शक्तिचित्रहलोदग्रं शंखचक्रगदाधरम् विष्णुशैलक्षमामूलं श्रीवृक्षं शार्ङ्गधन्विनम् २५ हर्यश्वरथसंयुक्ते सुपर्णध्वजशोभि
ते चंद्रार्कचक्ररचिते मंदराक्षधृतांतरे २६ अनंतरश्मिसंयुक्ते दद्दृशे मेरुकूबरे तारकाचित्रकुसुमे ग्रहनक्षत्रबंधुरे २७ भयेष्व
भयदं व्योम्निदेवादैत्यपराजिताः दद्दृशुस्तं स्थितं देवं दिव्यलोकमये रथे २८ ते कृतांजलयः सर्वे देवाः शक्रपुरोगमाः जयशब्दं पु
रस्कृत्य शरण्यं शरणं गताः २९ सतेषां तां गिरः श्रुत्वा विष्णुर्दयितदैवतः मनश्चक्रे विनाशाय दानवानां महामृधे ३० आकाशे तु
स्थितो विष्णुः सोत्तमे पुरुषोत्तमः उवाच देवताः सर्वाः सप्रतिज्ञमिदं वचः ३१ शांतिं भजत भद्रं वो माभैष्ट मरुतां गणाः जितामे दा
नवाः सर्वे त्रैलोक्यं प्रतिगृह्यतांम् ३२ ते तस्य सत्यसंधस्य विष्णोर्वाक्येन तोषिताः देवाः प्रीतिं परां जग्मुः प्राप्येवामृतमुत्थितम्
३३ ततस्तमः संह्रियते विनेशुश्च बलाहकाः प्रववुश्च शिवा वाताः प्रसन्नाश्च दिशो दश ३४ सुप्रभाणि च ज्योतींषि चंद्रं चक्रुः प्रद
क्षिणम् दीप्तिमंति च तेजांसि चक्रुरर्कं प्रदक्षिणम् ३५ न विग्रहं ग्रहाश्चक्रुः प्रसन्नाश्चापि सिंधवः नीरजस्का बभूः मार्गा नाकमा
र्गादयस्त्रयः ३६ यथार्थमूहुः सरितो नापि चुक्षुभिरेऽर्णवाः आसन् शुभानींद्रियाणि नराणामंतरात्मसु ३७ महर्षयो वीत-
शोका वेदानुच्चैरधीयत यज्ञेषु च हविः स्वादु शिवमश्नाति पावकः ३८ प्रवृत्तधर्माः संवृत्ता लोका मुदितमानसाः प्रीत्या परमया
युक्ता देवदेवस्य भूपते विष्णोः सत्यप्रतिज्ञस्य श्रुत्वाऽरिनिधनं गिरम् ३९ इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंश
पर्वणि आश्चर्ये द्विचत्वारिंशोऽध्यायः ४२ वैशंपायन उवाच ततो भयं विष्णुमयं श्रुत्वा दैतेयदानवाः उद्योगं विपुलं च
क्रुः युद्धाय युधि दुर्जयाः १ मयस्तु कांचनमयं त्रिनल्वांतरमव्ययम् चतुश्चक्रं विक्रमंतं सकल्पितमहायुधम् २

सः उत्तमे इति च्छेदः ३१ ३२
३३ संह्रियते संहृतं ३४ ३५ सिंधवः नद्यः नाकमार्गादयस्त्रयः देवयानः पितृयानः मोक्षमार्गश्चेति त्रयः ३६ ३७ ३८ प्रवृत्तधर्मो यज्ञादिः संवृत्तः सम्यक्प्रवृत्तः विष्णो
गिरं श्रुत्वा संवृत्तः ३९ इति हरिवंशे टी० द्विचत्वारिंशोऽध्यायः ४२ ततः विष्णुमयं विष्णुप्रधानं भयं दैत्यानां श्रुत्वा १ त्रिनल्वांतरं द्वादशशतहस्तविस्तृतं नल्वः
किष्कुचतुःशतमित्युक्तेः मयः कांचनमयं रथं आरूढ इति समस्तेनान्वयः महांति आयुधानि यस्मिन् विक्रमंतं विषमेपि जलाग्न्यादिस्थाने गच्छंतम् २ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३ येरथेषु वरास्तेषु उदयंश्रेष्ठम् सूपस्थानं शोभननीडम् अगोपमं पर्वततुल्यम् ईहामृगगणैः कृत्रिमसत्वसमूहैराकीर्णं व्याप्तम् ४ हेममयाः केयूरव लयसदृशाः संधिबंधपट्टिका यस्य ५ लंबकेसरवर्चसं भल्लूकवर्णं सिंहवत् शीघ्रपातित्वेनातितेजस्विनम् ६ ७ शैलोत्करः पर्वतानां राशिः कालश्लोहाष्ट चरणं कृष्णायसमया अष्टौ चरणाश्चक्राणि यस्य तम् तिमिरांगाराः कृष्णाङ्गल्लात् तद्वत् किरणा यस्य ९ दंशितं वेष्टितम् १० ११ १२ १३ १४ सावरो

किंकिणीजालनिर्घोषं द्वीपिचर्मपरिष्कृतम् खचितं रत्नजालैश्च हेमजालैश्च भूषितम् ३ स्वक्षं रथवरोदग्रं सूपस्थानमगोपमम् ईहामृगगणाकीर्णं पक्षिभिश्च विराजितम् दिव्यास्त्रतूणीरधरं पयोधरनिनादितम् ४ गदापरिघसंपूर्णं मूर्त्तिमंतमिवार्णवम् हेमकेयूरवलयस्वर्णमंडलकूबरम् ५ सपताकाध्वजोदग्रं सादित्यमिव मंदरम् गजेंद्राभोगसदृशं लंबकेसरवर्चसम् ६ युक्तमृक्ष सहस्रेण सहस्राब्दुदनादितम् दीप्तमाकाशगं दिव्यं रथं पररथारुजम् ७ अध्यतिष्ठद्रणाकांक्षी मेरुं दीप्तमिवांशुमान् तारस्तु क्रो शविस्तारमायसं वाहयन् रथम् ८ शैलोत्करसमाकीर्णं नीलांजनचयोपमम् काललोहाष्टचरणं लोहेषायुगकूबरम् तिमि रांगारकिरणं गर्जंतमिव तोयदम् ९ लोहजालेन महता सगवाक्षेण दंशितम् आयसैः परिघैः कीर्णं क्षेपणीयैस्तथाश्मभिः १० प्रासैः पाशैश्च विततैरसंसक्तैश्च मुद्गरैः शोभितं त्रासनीयैश्च तोमरैः सपरश्वधैः ११ उद्यंतं द्विषतां हेतोर्द्वितीयमिव मंदरम् यु क्तं खरसहस्रेण सोऽध्यारोहद्रथोत्तमम् १२ विरोचनस्तु संक्रुद्धो गदापाणिरवस्थितः प्रमुखे तस्य सैन्यस्य दीप्तशृंग इवाचलः १३ युक्तं हयसहस्रेण हयग्रीवस्तु दानवः स्यंदनं वाहयामास सपत्नानीकमर्दनम् १४ व्यायतं बहुसाहस्रं धनुर्विस्फारयन्महत् व राहः प्रमुखतस्तस्थौ सावरोह इवाचलः १५ खरस्तु विक्षरन् दर्पान्नेत्राभ्यां रोषजं जलम् स्फुरद्दंतोष्ठवदनः संग्रामं सोऽभ्यकांक्षत १६ त्वष्टा त्वष्टादशहयं यानमास्थाय दानवः व्यूहितो दानवैर्व्यूहः परिचक्राम वीर्यवान् १७ विप्रचित्तिसुतः श्वेतः श्वेतकुंडलभू षणः श्वेतशैलप्रतीकाशो युद्धायाभिमुखः स्थितः १८ अरिष्टो बलिपुत्रस्तु वरिष्ठाद्रिशिलायुधः युद्धायातिष्ठदायस्तो धराधर इवापरः १९ किशोरस्त्वतिसंहृष्टः किशोर इव चोदितः अभवद्दैत्यसैन्यस्य मध्ये रविरिवोदितः २० लंबस्तु लंबमेघाभः प्रलंबांबर भूषणः दैत्यव्यूहगतो भाति सनीहार इवांशुमान् २१ स्वर्भानुर्वक्त्रयोधी तु दशनौष्ठेक्षणायुधः हसंस्तिष्ठति दैत्यानां प्रमुखे स महाग्रहः २२

हः जटावान् अचलो वृक्षः न्यग्रोध इत्यर्थः १५ १६ यानं रथं व्यूहितः व्यूहरचनया स्थापितः १७ १८ आयस्तः कृतश्रमः १९ कि शोर इव अश्वशावक इव २० नीहारो राहुः कंकणग्रस्तार्कवदित्यर्थः २१ २२ ७ ७ ७ ७ ७ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२३ पवनवाहनाः वायुगतयः २४ २५ २६ २७ २८ २९ ३० गाढंसंकुलम् रणौघः संग्रामधारातस्या अभ्युदयउत्कर्षः तस्मै अवकीर्णप्रसृतम्
३१ इतिहरिवंशेटीकायांत्रिचत्वारिंशोऽध्यायः ४३ श्रुतस्ते १ संनह्यंतसन्नद्धाबभूवुः अडभाव आर्षः २ ३ अस्यपार्श्वेरथः पर्य्येतीतितृतीय-

अन्येहयगता भांतिनागस्कंधगताःपरे सिंहव्याघ्रगताश्चान्येवराहर्क्षगताःपरे २३ केचित्खरोष्ट्रयातारः केचित्तोयदवाहनाः
नानापक्षिगताश्चान्येकेचित्पवनवाहनाः २४ पत्तयश्चापरेदैत्याभीषणाविकृताननाः एकपादाद्विपादाश्चनर्दतोयुद्धकाङ्क्षिणः
२५ प्रक्ष्वेडमानाबहवःस्फोटयंतश्चतेभुजान् हृष्टशार्दूलनिर्घोषानेदुर्दानवपुंगवाः २६ तेगदापरिघैरुग्रैर्हेमव्यायामशालिनः
बाहुभिः परिघाकारैस्तर्जयंतिस्मदेवताः २७ प्रासैःपाशैश्चखड्गैश्चतोमराङ्कुशपट्टिशैः चिक्रीडुस्तेशतघ्नीभिः शतधारैश्चमुद्गरैः
२८ गंडशैलैश्चशैलैश्चपरिघैश्चोत्तमायुधैः चक्रैश्चदैत्यप्रवराश्चक्रुरानंदितबलम् २९ एवंतद्दानवंसैन्यंसर्वंयुद्धबलोत्कटम्
देवताभिमुखंतस्थौमेघानीकमिवोत्थितम् ३० तदद्भुतंदैत्यसहस्रगाढंवाय्वग्नितोयाम्बुदशैलकल्पम् बलंरणौघाभ्युदयावकीर्णंसुयुत्सयोन्मत्तमिवावभासे ३१ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणित्रिचत्वारिंशोऽध्यायः ४३ वैशंपायनउवाच श्रुतस्तेदैत्यसैन्यस्यविस्तरस्तातविग्रहे सुराणांसर्वसैन्यस्यविस्तरंवै ध्यावंशृणु १ आदित्यावसवोरुद्रा अ-
श्विनौचमहाबलौ सबलाःसानुगाश्चैवसंनह्यंतयथाबलम् २ पुरुहूतस्तुपुरतोलोकपालःसहस्रदृक् ग्रामणीःसर्वदेवानामा
रुरोहसुरद्विपम् ३ सव्येचास्यरथःपार्श्वेपक्षिप्रवरवेगवान् सुचारुचक्रचरणोहेमवज्रपरिष्कृतः ४ देवगंधर्वयक्षौघैरनुया
तःसहस्रशः दीप्तिमद्भिःसदस्यैश्चब्रह्मर्षिभिरभिष्टुतः ५ वज्रविस्फूर्जितोद्भूतैर्विद्युदिंद्रायुधान्वितैः गुप्तोबलाहकगणैःकाम
गैरिवपर्वतैः ६ समारूढःसभगवान्पर्येतिमघवागजम् हविर्द्धानेषुगायंतिविप्रासोमखेस्थिताः ७ स्वर्गेशक्रानुयानेषुदे
वतूर्यनिनादिषु इंद्रस्यसुपनृत्यंतिशतशोह्यप्सरोगणाः ८ केतुनावंशजातेनराजमानोयथारविः युक्तोहरिसहस्रेणमनोमारु
तरंहसा ९ सस्यंदनवरोभातियुक्तोमातलिनातदा कृत्स्नःपरिवृतोमेरुर्भास्करस्येवतेजसा १० यमस्तुदंडमुद्यम्यकालयुक्तं
चमुद्गरम् तस्थौसुरगणानीकेदैन्यान्नादेनभीषयन् ११ चतुर्भिःसागरैर्गुप्तोलेलिहानैश्चपन्नगैः शंखमुक्तांगदधरोबि
भ्रत्तोयमयंवपुः १२

स्थेनान्वयः पक्षिप्रवरोगरुडःतद्वद्वेगवान् ४ ५ ६ हविर्द्धानेषुहविःस्थापनमंडपेषुगायंतियमितिशेषः ७ ८ पुनःस्यंदनंव
र्णयतिकेतुनेति ९ १० कालयुक्तंमरणप्रापिकयादेवतयायुक्तम् ११ सागरैर्गुप्तोवरुणः तस्थिवानितिचतुर्थेनान्वयः १२ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आविध्यभ्रामयित्वा १३ पांडुरंश्वेतंउद्भूतंउच्चतरंसौक्ष्म्यगुणेनवसनंयस्य हाराणांभारोअर्पितोउदरेयस्यसहारभारार्पितोदरः १४ १५ १६ शं
खपद्मौमूर्तिमंतौनिधिविशेषौताभ्यां १७ १८ १९ चतुर्षुदिक्प्रदेशेषु २० २१ त्रिदिवद्वारचक्रेणस्वर्गप्रदेशेअलातचक्रवत्भ्रममाणेनेत्यर्थः त
पतादीपयतारथेन चचारेत्यन्वयः २२ २३ सोमइतिसोमार्थमेघारूढाउद्धृतास्तेनाभ्युरेश्वेवसोमः पठितुंयुक्तस्तथापिदेवत्वात्समानजातिषुतस्यपाठःकृ
तः २४ अतएवाह तमिति तंसोमंस्वपक्षीयत्वाह्वानवादद्दशुरितितृतीयेनान्वयः ऋक्षनक्षत्रम् द्विजाःब्राह्मणाः जगच्छायांकिततनुं नेशस्यतमसः
क्षयमिति अयमर्थः द्वेधाभूतैरस्मयंरश्मिभिरविशाशिमंडलंभास्यतेतत्र अधोमुखारश्मयः पृथ्वींप्राप्यतत्रस्थेनमहामण्यादितेजसाप्रतिस्रोतःप्रवर्ति-

कालपाशंसमाविध्यहयैः शशिकरोपमैः वाय्वीरितजलोद्गारैः कुर्वन्लीलाःसहस्रशः १३ पांडुरोद्भूतवसनःप्रवालरुचिरांगदः
मणिश्यामोत्तमवपुर्हारभारार्पितोदरः १४ वरुणःपाशभृन्मध्येदेवानांकस्यतस्थिवान् युद्धवेलामभिलषन्भिन्नवेलइवार्णवः
१५ यक्षराक्षससैन्येनगुह्यकानांगणैरपि मणिश्यामोत्तमवपुःकुबेरोनरवाहनः १६ युक्तश्चशंखपद्माभ्यांनिधीनामधिपःप्रभुः
राजराजेश्वरःश्रीमान्गदापाणिरदृश्यत १७ विमानयोधीधनदोविमानेपुष्पकेस्थितः सराजराजःशुशुभेयुद्धार्थीनरवाहनः
प्रेक्ष्यमाणःशिवसखःसाक्षादिवशिवःस्वयम् १८ पूर्वपक्षसहस्राक्षःपितृराजस्तुदक्षिणम् वरुणःपश्चिमपक्षमुत्तरंनरवाहनः
१९ चतुर्षुयुक्ताश्चत्वारोलोकपालाबलोत्कटाः स्वासुदिक्ष्वभ्यरक्षन्वैतस्यदेवबलस्यह २० सूर्यःसप्ताश्वयुक्तेनरथेनांबरगामि
ना श्रियाजाज्वल्यमानेनदीप्यमानैश्चरश्मिभिः २१ उदयास्तमयचक्रेमेरुपर्यंतगामिना त्रिदिवद्वारचक्रेणतपतालोकमव्य
यम् २२ सहस्ररश्मियुक्तेनभ्राजमानःस्वतेजसा चचारमध्येदेवानांद्वादशात्मादिनेश्वरः २३ सोमःश्वेतहयैर्भातिस्यंदनेशीत
रश्मिवान् हिमतोयप्रपूर्णाभिर्भाभिराल्हादयन्जगत् २४ तमृक्षयोगानुगतंशिशिरांशुंद्विजेश्वरम् जगच्छायांकिततनुं
नेशस्यतमसःक्षयम् २५ ज्योतिषामीश्वरंव्योम्निरसानांरसनप्रभम् ओषधीनांपरित्राणनिधानममृतस्यच २६ जग
तःप्रथमंभागंसौम्यंशीतमयंरसम् ददृशुर्दानवाःसोमंहिमप्रहरणस्थितम् २७ यःप्राणःसर्वभूतानांपंचधाभिद्यतेनृ
षु सप्तस्कंधगतोलोकांस्त्रीन्दधारचराचरान् २८

ताः चंद्रमंडलमुत्प्लुत्यगच्छंतितेपार्थिवेननीलिम्नानुरंजिताःनीलमेवचंद्रमंडलमवभासयंतितत्स्वं
द्रस्यजगच्छायांकिततनुत्वंयुक्तं येतुपूर्वंचंद्रमंडलंप्राप्याधःप्रचरंतितद्वाराचंद्रस्यभास्वरप्रकाशनत्वान्नेशस्यतमसःक्षयमितिविशेषणंयुज्यतइति २५ रसा ६५
नांरसनंआश्रयं २६ जगतोऽग्नीषोमात्मकस्यप्रथमंअन्नात्मकंभागं सौम्यंसोमरूपंअतएवरसंरसमयं २७ सप्तस्कंधाः आवहप्रवहादयोंऽशभेदायत्र-
आकाशोदरेतिष्ठंतितत्रगतं पंचधाप्राणापानादिभेदेननृषुजंतुषु २८ ६० ६०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सप्तस्वरा निषादर्षभादयः यस्य वायोर्योनिराकाशः सप्तस्वरेषु गता स्थिता शब्दतन्मात्रागतेत्यर्थः २९ शब्दयोनिजं आकाशजम् ३० ३१ ३२ ३३ ३४ कृष्णवर्त्मा वह्निर्युगांते आभाति स युगांताभः युगांताग्नितुल्य इत्यर्थः ३५ समुद्रयोनिरित्यत्र योनिशब्दः स्थानवाची योनिष्ट इंद्र निषदे अकारीति मंत्रवर्णात् ३६ साकाग्निर्यथा उत्तमतेजा अत्युत्कृष्टतेजाः तत्तुल्यं चक्रं गदाधरो दधारेति तृतीयगतेनान्वयः ३७ भ्राम्यमाणाया गदायाः परिवेषस्योपमा

यमाहुरग्नेर्यंतारं सर्वप्रभवमीश्वरम् सप्तस्वरगता यस्य योनिर्गीतिरुदीर्यते २९ यं वृद्धं स्फुत्तमं भूतं यं वदंत्यशरीरिणम् यमाहुराकाशगमं शीघ्रगं शब्दयोनिजम् ३० स वायुः सर्वभूतायुरुद्धूतः स्वेन तेजसा ववौ प्रव्यथयन्दैत्यान्प्रतिलोमः सतोयदः ३१ मरुतो देवगंधर्वा विद्याधरगणैः सह चिक्रीडुरसिभिः शुभ्रैर्निर्मुक्तैरिव पन्नगैः ३२ सृजंतः सर्पपतयस्तीव्ररोषमयं विषम् शरभूताः सुरेंद्राणां चेरुर्व्यात्तमुखा दिवि ३३ पर्वताश्च शिलाशृंगैः शतशाखैश्च पादपैः उपतस्थुः सुरगणान्प्रहर्त्तुं दानवं बलम् ३४ यः स देवो हृषीकेशः पद्मनाभस्त्रिविक्रमः कृष्णवर्त्मा युगांताभो विश्वस्य जगतः प्रभुः ३५ समुद्रयोनिर्मधुहा हव्यभुक् क्रतुसत्कृतः भूरापो व्योम भूतात्मा सौम्यः शांतिकरोऽरिहा ३६ जगद्योनिर्जगद्बीजो जगद्गुरुरुदारधीः साक्षमग्निमिवोद्यंतमुद्यम्योत्तमतेजसम् ३७ अरिघ्नममरानीकं चक्रं चक्रगदाधरः सपरिवेषमुद्यंतं सवितुर्मंडलं यथा ३८ सव्येनालंब्य महतीं सर्वासुरविनाशिनीम् करेण कालीं वपुषा शत्रुकालप्रदां गदाम् शेषैर्भुजैः प्रदीप्तानि भुजगारिध्वजः प्रभुः ३९ दधारायुधजालानि शार्ङ्गादीनि महायशाः स कश्यपस्यात्मभवं द्विजं भुजगभोजनम् ४० पवनाधिकसंपातं गगनक्षोभणं खगम् भुजगेंद्रेण वदने निविष्टेन विराजितम् ४१ अमृतारंभनिर्मुक्तं मंदराद्रिमिवोच्छ्रितम् देवासुरविमर्देषु शतशो दृष्टविक्रमम् ४२ महेंद्रेणामृतस्यार्थे वज्रेणाहतलक्षणम् शिखिनं चूडिनं चैव तप्तकुंडलभूषणम् विचित्रपक्षवसनं धातुमंतमिवाचलम् ४३ स्फीतक्रोडावलंबेन शीतांशुसमतेजसा भोगिभोगावसक्तेन मणिरत्नेन भास्वता ४४ पक्षाभ्यां चारुपत्राभ्यामावृत्य दिवि लीलया युगांते सेंद्रचापाभ्यां तोयदाभ्यामिवांबरम् ४५ नीललोहितपीताभिः पताकाभिरलंकृतम् केतुवेशप्रतिच्छन्नं महाकायनिकेतनम् ४६

३८ ३९ द्विजं गरुडं आरुह्य युद्धाय समवर्त्ततेति अष्टमद्वादशश्लोकाभ्यां संबंधः ४० ४१ ४२ ४३ क्रोडावक्षः अर्धगिलितस्य सर्पस्य शिरोरत्नेन वक्षःस्थलगतेन भांतमिति शेषः भोगः शरीरम् ४४ अंबरं आवृत्य स्थितमिति शेषः ४५ केतुः शत्रुः केतुर्नारुकपताकारिग्रहोत्पातेषु लक्ष्मणी ति मेदिनी शत्रुवेषेण प्रकटमित्यर्थः महान्कायः लक्ष्मध्वज इति यावत् तस्य निकेतनं अवरोपणस्थानं कायः के देवते मूर्त्तौ संघे लक्ष्मस्वभावयोरिति मेदिनी ४६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४७ ४८ ४९ ५० ५१ अंगिराः बृहस्पतिरब्रवीदित्यर्ड भावः आर्षः ५२ इति हरिवंशे टीकायां चतुश्चत्वारिंशोऽध्यायः ४४ ताभ्यामिति १ स
मीपुः अन्योन्यमभिघ्निताः २ ३ ४ ५ ६ ७ ८ ९ स्पंदिताः रुधिरस्राविणः कृताः पाशजालैर्निर्यत्नाः कृताः संतः शरैः स्पंदिता इति योजना १०

अरुणावरजं श्रीमानारूढः समरे हरिः सुवर्णस्वेन वपुषा सुपर्णं खेचरोत्तमम् ४७
तमन्वयुर्देवगणा मुनयश्च तपोधनाः गीर्भिः परमसन्त्राभिस्तुष्टुवुश्च गदाधरम् ४८
तद्वैश्रवणसंश्लिष्टं वैवस्वतपुरस्सरम् वारिराजपरिक्षिप्तं देवराजविराजितम् ४९
चंद्रप्रभाभिर्विमलं युद्धायसमुपस्थितम् पवनाविद्धनिर्घोषं संप्रदीप्तहुताशनम् ५०
विष्णोर्जिष्णोः सहिष्णोश्च भ्राजिष्णोस्तेजसावृतम् बलं बलवदुद्भूतं युद्धाय समवर्तत ५१
स्वस्त्यस्तु देवेभ्य इति स्तुत्वा तत्रांगिरा ब्रवीत् स्वस्त्यस्तु दैत्येभ्य इति उशना वाक्यमाददे ५२
इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्वणि आश्चर्यतारकामये चतुश्चत्वारिंशोऽध्यायः ४४ वैशंपायन उवाच ता
भ्यां बलाभ्यां संजज्ञे तुमुलो विग्रहस्तदा सुराणामसुराणां च परस्परजयैषिणाम् १
दानवा दैवतैः सार्द्धं नानाप्रहरणोद्यताः समीयुर्युध्यमानावै पर्वताः पर्वतैरिव २
तत्सुरासुरसंयुक्तं युद्धमत्यद्भुतं बभौ धर्माधर्मसमायुक्तं दर्पेण विनयेन च ३
ततो रथैः प्रजविनैर्वाहनैश्च प्रचोदितैः उत्पतद्भिश्च गगनं सासिहस्तैः समंततः ४
विक्षिप्यमाणैर्मुशलैः संप्रेष्यद्भिश्च सायकैः चापैर्विस्फार्यमाणैश्च पात्यमानैश्च मुद्गरैः ५
तद्युद्धमभवद्घोरं देवदानवसंकुलम् जगतस्त्रासजननं युगसंवर्त्तकोपमम् ६
स्वहस्तमुक्तैः परिघैः क्षिप्यमाणैश्च पर्वतैः दानवाः समरे जघ्नुर्देवानिंद्रपुरोगमान् ७
ते वध्यमाना बलिभिर्दानवैर्जितकाशिभिः विषण्णमनसो देवा जग्मुरार्त्तिं परां मृधे ८
तेऽस्त्रजालैः प्रमथिताः परिघैर्भिन्नमस्तकाः भिन्नोरस्का दितिसुतैर्वेमू रक्तं व्रणैर्मुहुः ९
स्पंदिताः पाशजालैश्च निर्यत्नाश्च शरैः कृताः प्रविष्टा दानवीं मायां न शेकुस्ते विचेष्टितुम् १०
संस्तंभितमिवाभाति निःप्राणसदृशाकृति बलं सुराणामसुरैर्निःप्रयत्नायुधं कृतम् ११
मायापाशान्विकर्षंश्च भिंदन्वज्रेण तान्शरान् शक्रो दैत्यबलं घोरं विवेश बहुलोचनः १२
स दैत्यान्प्रमुखे हत्वा तद्दानवबलं महत् तामसेनास्त्रजालेन तमोभूतमथाकरोत्‌ १३
तेऽन्योन्यं नावबुध्यंत देवास्तान्दानवानपि घोरेण तमसाविष्टाः पुरुहूतस्य तेजसा १४
मायापाशैर्विमुक्ताश्च यत्नवतः सुरोत्तमाः वपूंषि दैत्यसंघानां तमोभूतान्यपातयन् १५
अपध्वस्ता विसंज्ञाश्च तमसा नीलवर्चसः पेतुस्ते दानवगणाश्छिन्नपक्षा इवाचलाः १६
तद्घनीभूतदैत्यानामंधकारमहार्णवम् प्रविष्टं बलमसुराणां तमोभूतमिवाबभौ १७

११ १२ १३ १४ १५ १६ १७ छ छ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तामसीं ऐंद्रीम् तमोरूपमयीं मायाम् और्वेण अबिंधनेनाग्निना १८ १९ चंद्रविषयं सोमसमीपम् शीतांशुसलिले शिशिरजले शयात् शयनाद्धेतोः २० २१ देवराजेन इतराग्निवदौर्वाग्नेरपि शांतिर्जलेनैव भविष्यतीति मन्वानेन २२ वरुणस्तु बिंधनोयं वन्हिर्नाम्भोमात्रेण शाम्यतीत्यर्थे आख्यायिकामाह पुरेति ब्रह्मर्षिर्भृगुस्तज्जः २३ २४ २५ इदं तावकम् २६ गोत्रं पुत्रपौत्रादिसंतानम् कौमारं व्रतं ऊर्ध्वरेतस्त्वम् क्लेशं तपोजन्यं खेदम् २७ प्रजाः विनाउच्छिन्नमूलेषु इतिउत्तरस्थेनान्वयः तेषु कारणं वृद्धिहेतुर्नास्ति छिन्नमूलत्वात् २८ त्वयि तु मूले विद्यमाने भजोच्छेदो माभूदित्याह भवानिति २९ द्वितीयां तंतुं

तदासृजन्महामायां मयस्तां तामसीं दहन् युगांताग्निमिवात्युग्रां सृष्टामौर्वेण वन्हिना १८ सा ददाह तमः सर्वं मायामयविकल्पिता दैत्याश्च दीप्तवपुषः सद्य उत्तस्थुराहवे १९ मायामौर्वीं समासाद्य दह्यमाना दिवौकसः भेजिरे चंद्रविषयं शीतांशुसलिलेशयात् २० ते दह्यमाना ह्यौर्वेण तेजसा भ्रष्टतेजसः शरण्यं वज्रिणो देवाः संतप्ताः शरणैषिणः २१ संतप्ते मायया सैन्ये दह्यमाने च दानवैः चोदितो देवराजेन वरुणो वाक्यमब्रवीत् २२ वरुण उवाच पुरा ब्रह्मर्षिजः शक्र तपस्तेपेतिदारुणम् ऊर्वो मुनिः स तेजस्वी सदृशो ब्रह्मणो गुणैः २३ तं तपंतमिवादित्यं तपसा जगदव्ययम् उपतस्थुर्मुनिगणा देवा ब्रह्मर्षिभिः सह २४ हिरण्यकशिपुश्चैव दानवो दानवेश्वरः ऋषिं विज्ञापयामास पुरा परमतेजसम् २५ तमूचुर्ब्रह्म ऋषयो वचनं ब्रह्मसंमितम् ऋषिवंशेषु भगवन् छिन्नमूलमिदं कुलम् २६ एकस्त्वमनपत्यश्च गोत्रं यन्नानुवर्त्तसे कौमारं व्रतमास्थाय क्लेशमेवानुवर्त्तसे २७ बहूनि विप्रगोत्राणि मुनीनां भावितात्मनाम् एकदेहानि तिष्ठंति विभक्तानि विना प्रजाः २८ कुलेषु छिन्नमूलेषु तेषु नो नास्ति कारणम् २८ भवांस्तु तपसा श्रेष्ठः प्रजापतिसमद्युतिः तत्प्रवर्त्तस्व वंशाय वर्द्धयात्मानमात्मना २९ त्वमाधत्स्वोर्जितं तेजो द्वितीयां वै तनुं कुरु ३० स एवमुक्तो मुनिभिर्मुनिर्मनसि ताडितः जगर्हे तानृषिगणान्वचनं चेदमब्रवीत् ३१ यथायं शाश्वतो धर्मो मुनीनां विहितः पुरा सदार्षं सेवतां कर्म वन्यमूलफलाशिनाम् ३२ ब्रह्मयोनौ प्रसूतस्य ब्राह्मणस्यानुवर्त्तिनः ब्रह्मचर्यं सुचरितं ब्रह्माणमपि चालयेत् ३३ द्विजानां वृत्तयस्तिस्रो ये गृहाश्रमवासिनः अस्माकं तु वनं वृत्तिर्वनाश्रमनिवासिनाम् ३४ अब्भक्षा वायुभक्षाश्च दंतोलूखलिकास्तथा अश्मकुट्टा दशनपाः पंचातपतपाश्च ये ३५

पुत्रम् ३० ताडितः क्षोभं नीतः ३१ ३२ ३३ द्विजानामिति तिस्रः याजनाध्यापनप्रतिग्रहाख्या वृत्तयो जीविकाः अस्माकं कौमारव्रतानां तु वनमेव वृत्तिः अनेन समावृत्तानां विनापि विवाहं वानप्रस्थाश्रमोस्तीति गम्यते ३४ दशनपाः दंतोलूखलिका इत्यन्वयः पं दंताः सतुषमेव नीवारादिकं भक्षयंत इत्यर्थः अदंतास्त्वश्मकुट्टाः पंचानामपि अग्निचतुष्टयं सूर्यश्च तेषामातपेन ऊष्मणा तपंति ते पंचातपतपाः ३५ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३६ ३७ ३८ ३९ पंचमंपंचमीशब्दादयोमीयंतएतैरितिपंचमइंद्रियग्रामम् पंचभिरिंद्रियैर्मीयंतइतिपंचमो भूतग्रामस्तंमिलित्वा पंचकमितिपाठस्तु
नार्षः ४० अयोगेसंन्यासिनांध्यानभिक्षूणांअवश्यकर्त्तव्यस्ययोगस्यध्यानस्याभावेकेशाहरणंमुंडनम् वानप्रस्थानांअसंकल्पेपरलोककामनायाअभा
वेकेवलंलोकरंजनार्थंकृच्छ्रादिव्रतक्रिया अब्रह्मचर्ये अध्ययनाद्यभावेपिचर्याब्रह्मचारिधर्माविष्करणम् ४१ यदाइयंमानसीसनत्कुमारादिकाप्रजाब्रह्म
णासृष्टानदादाराः कृतसंयोगश्च कृभावस्यचित्तस्यविपर्ययः कामातुरताच कृनकिंचिदपितदाआसीदित्यर्थः यथेतिपाठेपियदेत्येवार्थः ४२ ४३ योनिःपु-

एतेनतपसितिष्ठंतोव्रतैरपिसुदुष्करैः ब्रह्मचर्यंपुरस्कृत्यप्रार्थयंतेपरांगतिम् ३६ ब्रह्मचर्याद्ब्राह्मणस्यब्राह्मणत्वंविधीयते एव
माहुःपरेलोकेब्रह्मब्रह्मविदोजनाः ३७ ब्रह्मचर्येस्थितंधैर्यंब्रह्मचर्येस्थितंतपः येस्थिताब्रह्मचर्येषुब्राह्मणास्तेदिविस्थिताः ३८
नास्तियोगविनासिद्धिर्नास्तिसिद्धिविनायशः नास्तिलोकेयशोमूलंब्रह्मचर्यात्परंतपः ३९ तन्निगृह्येंद्रियग्रामंभूतग्रामंचपं
चमम् ब्रह्मचर्मेणवर्त्तेतविप्रतःपरमंतपः ४० अयोगेकेशाहरणमसंकल्पेव्रतक्रिया अब्रह्मचर्येचर्याचत्रयंस्याद्दंभसंज्ञित
म् ४१ क्वदाराःक्वसंयोगःक्वचभावविपर्ययः यदियंब्रह्मणासृष्टामनसामानसीप्रजा ४२ यद्यस्तितपसोवीर्यंयुष्माकंममि
तात्मनाम् सृजध्वंमानसान्पुत्रान्प्राजापत्येनकर्मणा ४३ मनसानिर्मितायोनिराधातव्यातपस्विना नदारयोगोबीजंवाव्र
तमुक्तंतपस्विनाम् ४४ यदिदंलुप्तधर्मार्थंयुष्माभिरिहनिर्भयैः व्याहृतंसद्भिरत्यर्थमसद्भिरिवमेमतिः ४५ वपुर्दीप्तांतरात्मा
नमेषकृत्वामनोमयम् दारयोगंविनास्रक्ष्येपुत्रमात्मतनूरुहम् ४६ एवमात्मानमात्मामेद्वितीयंजनयिष्यति वन्येनानेनविधि
नादिधक्षंतमिवप्रजाः ४७ ऊर्वस्तुतपसाविष्टोनिवेश्योरुंहुताशने ममंथैकेनदर्भेणपुत्रस्यप्रभवारणिम् ४८ तस्योरुंसहसा
भित्वाज्वालामालीनिरिंधनः जगतोनिधनाकांक्षीपुत्रोग्निःसमपद्यत ४९ ऊर्वस्योरुंविनिर्भिद्यऔर्वोनामांतकोऽनलः दिधक्ष
न्निवलोकांस्त्रीन्जज्ञेपरमकोपनः ५० उत्पन्नमात्रश्चोवाचपितरंदीनयागिरा क्षुधामेबाधतेतातजगद्भक्ष्येत्यजस्रमाम् ५१

योत्पत्तिस्थानंआधातव्यानिहितगर्भाकर्त्तव्या यतस्तपस्विनांदारयोगंक्लीबत्वमार्षम् बीजंबीजाधानंचव्रतंनविहितम् ४४ ४५ एषोहंमनोमयंस्व
संकल्पसिद्धंवपुःउत्पत्स्येबीजमस्मिन्नितिवपुःयोनिंकृत्वाउद्धाव्यदारयोगंविनापिदीप्तांतरात्मानंआत्मतनूरुहंस्वस्यपुत्रंस्रक्ष्ये ४६ द्वितीयंआत्मानंपुत्रंआ
त्मादेहः ४७ हुताशनेऊरुंनिवेश्येति ऊरौअग्निंसमारोप्यततएवमथित्वाग्निंजनयामासेत्यर्थः सचाग्निःस्वेनब्राह्मेणचतेजसायुक्तोदुःसहोदुर्दमश्चाभू ६७
दितिवाक्यार्थः ४८ ४९ ५० भक्षेभक्षणेलग्निमित्तंमांउद्दिश्यजगत्त्यजस्वपुरोडाशवत्कृत्स्नंजगद्भक्षयितुमामाज्ञापयस्वेत्यर्थः ५१ ६७ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जृंभमाणः प्रसरन् ५२ ५३ ५४ तेजोवीर्यं पुत्र इतियावत् ५५ ५६ ५७ प्रभावकाले यौवनसमये समागमेऽन्तस्येतिशेषः ५८ ५९ वडवाया अश्वाया
मुखसदृशं समुद्रस्य आस्ये मुखे अस्य स्थानम् अन्नं च तत्र प्रविष्टाः भौमा आपः तासां स्तुत्यर्थं मम योनिरित्याद्युक्तक्रमम् शेषं स्पष्टम् ६० ६१ ६२ ६३ प्रभा

त्रिदिवारोहिभिर्ज्वालैर्जृंभमाणो दिशो दश निर्दहन्निव भूतानि वव्रधे सोंऽतकोऽनलः ५२ एतस्मिन्नंतरे ब्रह्मा सर्वलोकपतिः प्रभुः
आजगाम मुनिर्यत्र व्यसृजत्पुत्रमुत्तमम् ५३ स ददर्शोरुमूर्वस्य दीप्यमानं सुताग्निना और्वकोपाग्निसंतप्तान् लोकांश्च ऋषिभिः
सह ५४ तमुवाच ततो ब्रह्मा मुनिमूर्वं सभाजयन् धार्यतां पुत्रजं तेजो लोकानां हितकाम्यया ५५ अस्यापत्यस्य ते विप्र करिष्ये साह्य
मुत्तमम् वासं चास्य प्रदास्यामि प्राशनं चामृतोपमम् ५६ तथ्यमेतन्मम वचः शृणु त्वं वदतां वर ५६ ऊर्व उवाच धन्योऽस्म्यनु
गृहीतोऽस्मि यन्मेऽद्य भगवान् शिशोः मतिमेतां ददातीह परमानुग्रहाय वै ५७ प्रभावकाले संप्राप्ते कांक्षितव्ये समागमे भगवंस्तर्पितः
पुत्रः कैर्हव्यैः प्राप्स्यते सुखम् ५८ कुत्र चास्य निवासो वै भोजनं च किमात्मकम् विधास्यति भवानस्य वीर्यतुल्यं महौजसः ५९ ब्र
ह्मोवाच वडवामुखेऽस्य वसतिः समुद्रस्य भविष्यति मम योनिर्जलं विप्र तच्च तोयमयं वपुः ६० तद्धविस्तव पुत्रस्य विसृजाम्याल
यमुत्तत् तत्रायमास्तां नियतः पिबन्वारिमयं हविः ६१ ततो युगांते भूतानामेष चाहं च पुत्रक सहितौ विचरिष्यावो लोकानिति पुनः
पुनः ६२ एषोऽग्निरंतकाले तु सलिलाशी मया कृतः दहनः सर्वभूतानां सदेवासुररक्षसाम् ६३ एवमस्त्विति सोप्यग्निः संवृतज्वा
लमंडलः प्रविवेशार्णवमुखे निःक्षिप्य पितरि प्रभाम् ६४ प्रतियातस्ततो ब्रह्मा ते च सर्वे महर्षयः और्वस्याग्नेः प्रभावज्ञाः स्वां स्वां ग
तिमुपाश्रिताः ६५ हिरण्यकशिपुर्दृष्ट्वा तदद्भुतमपूजयत् ऊर्वं प्रणतसर्वांगो वाक्यं चेदमुवाच ह ६६ भगवन्नद्भुतमिदं निवृत्तं लो
कसाक्षिकम् तपसा ते मुनिश्रेष्ठ परितुष्टः पितामहः ६७ अहं तु तव पुत्रस्य तव चैव महाव्रत भृत्य इत्यवगंतव्यः श्लाघ्योऽस्मि यदि क
र्मणा ६८ तन्मां पश्य समापन्नं तवैवाराधने रतम् यदि सीदे मुनिश्रेष्ठ तवैव स्यात्पराजयः ६९ ऊर्व उवाच धन्योऽस्म्यनुगृही
तोऽस्मि यस्य तेऽहं गुरुर्मतः नास्ति ते तपसानेन भयमद्येह सुव्रत ७० इमां च मायां गृह्णीष्व मम पुत्रेण निर्मिताम् निरिंधनामग्निम
यीं दुःस्पर्शां पावकैरपि ७१ एषा ते स्वस्य वंशस्य वशगारिविनिग्रहे रक्षिष्यत्यात्मपक्षं च परांश्च प्रहरिष्यति ७२ एवमस्त्विति तां गृह्य
प्रणम्य मुनिपुंगवम् जगाम त्रिदिवं हृष्टः कृतार्थो दानवेश्वरः ७३

यशोमयं तेजः ६४ ६५ ६६ ६७ ६८ समापन्नं शरणागतं सीदे दुःखं प्राप्स्ये
६९ अनेन मामकेन ७० निरिंधनां आराधनाद्युक्तेजनानपेक्षाम् ७१ ७२ ७३ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वरूथिनासेनावता १० ११ १२ १३ १४ १५ प्रवृष्टैःप्रकृष्टवर्षैःसंवृतंव्याप्तम् १६ १७ प्रसिताःबद्धाः १८ १९ २० पाशहस्तेनवरुणेनग्रथितान्

तद्गच्छत्वंसहानेनवरुणेनवरूथिना शमयस्वासुरींमायांययादह्यामसंगरे १० सोमउवाच यन्मांवदसियुद्धार्थेदे
वराजजगत्पते एषवर्षामिशिशिरंदैत्यमायापकर्षणम् ११ एतान्मच्छीतनिर्दग्धान्पश्यत्वंहिमवेष्टितान् विमायान्विमदांश्चै
वदानवांस्त्वमहामृधे १२ वैशंपायनउवाच ततोहिमकरोत्सृष्टाःसबाष्पाहिमवृष्टयः वेष्टयंतिस्मतान्घोरान्दैत्यान्मे
घगणाइव १३ तौपाशशक्तिशस्त्रधरौवरुणेंदूमहारणे जघ्नतुर्हिमपातैश्चपाशघातैश्चदानवान् १४ द्वावंबुनाथौसमरे तौपाश
हिमयोधिनौ मृधेचेरतुरंभोभिःक्षुब्धाविवमहार्णवौ १५ ताभ्यामाप्लावितंसैन्यंतद्दानवमदृश्यत जगत्संवर्त्तकांभोदैःप्रवृष्टैरि
वसंवृतम् १६ तावुद्यतांशुपाशौद्वौशशांकवरुणौरणे शमयामासतुर्मायांदेवौदैतेयनिर्मिताम् १७ शीतांशुजलनिर्दग्धाःपा
शैश्चप्रसितारणे नशेकुश्चलितुंदैत्याविशिरस्काइवाद्रयः १८ शीतांशुनिहतास्तेतुपेतुर्दैत्याहिमार्दिताः हिमप्लावितसर्वांगानि
रूष्माणइवाग्नयः १९ तेषांतुदिविदैत्यानांविपरीतप्रभाणिच विमानानिविचित्राणिनिपतंत्युत्पतंतिच २० तान्पाशहस्तग्रथिता
न्छादितान्हिमरश्मिना मयोददर्शमायांवैदानवान्दिविदानवः २१ सशिलाजालविततांगंडशैलाट्टहासिनीम् पादपोत्कट
कूटाग्रांकंदराकीर्णकाननाम् २२ सिंहव्याघ्रगजाकीर्णांनदंतीमिवयूथपैः ईहामृगगणाकीर्णांपवनाघूर्णितद्रुमाम् २३ नि
र्मितांस्वेनपुत्रेणक्रौंचेनदिविकामगाम् प्रसृतांपार्वतींमायांससृजेदानवोत्तमः २४ साश्मशब्दैःशिलावर्षैःसंपतद्भिश्चपादपैः
निजघ्नेदेवसंघांस्तान्दानवांश्चाप्यजीवयत् २५ नैशाकरीवारुणीचमायेंतर्दधतुस्ततः अश्मभिश्चायसघनैःकिरन्देवग
णान्रणे २६ साश्मसंघाततविषमाद्रुमपर्वतसंकटा अभवद्घोरसंचारापृथिवीपर्वतैरिव २७ नानाहतोश्मभिःकश्चिच्छिला
भिश्चाथताडितः नानिरुद्धोद्रुमगणैर्देवोदृश्यतसंयुगे २८ तदपध्वस्तधनुषंभग्नप्रहरणाविलम् निःप्रयत्नंसुरानीकंवर्ज्ज
यित्वागदाधरम् २९ सहियुद्धगतःश्रीमानीशोनस्मव्यकंपत सहिष्णुत्वाज्जगत्स्वामीनचुक्रोधगदाधरः ३० कालज्ञःकाल
मेघाभःसमीक्षत्कालमाहवे देवासुरविमर्दंसद्रष्टुकामोजनार्दनः ३१

बद्धान्प्रसूतान्मयोददर्श मायांचऔर्वीनष्टांददर्शेत्यध्याहृत्ययोज्यम् २१ सःमायांसमसृजेदितितृतीयेनसंबंधः २२ २३ २४ दानवोत्तमःदेवगणा
न्किरन्दानवानजीवयतइतिसंबंधः २५ मायेतरितिसंधिरार्षः २६ २७ २८ २९ ३० ३१ ६९ ६९ ६९ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७४ तस्मिन् हिरण्यकशिपौव्युत्थितेमृतेसति येनऔर्वेण त्वज्जीवनावधिएषामायावीर्यवतीनतुनतःपरमिति शापरूपमुन्नेयम् ७५ भगवान् भगवा-
निंद्रः ७६ सहसंगस्येति अल्पतोयत्वान्मयाएकाकिनाहंतुमशक्योपिचंद्रसंयोगात् बहुलीभावंप्राप्यऔर्वाग्निर्वारयितुंशक्यतेइत्यर्थः ७७ इतिहरिवंशे
टीकायांपंचचत्वारिंशोऽध्यायः ४५ एवमिति अत्रसोमःशक्रेणप्रार्थितःस्वपक्षानप्यसुरानक्षिणोदित्युच्यते यद्यपि बृहस्पतिर्हि शक्रो भूत्वेंद्रस्याभया
यसुरेभ्यः क्षययेति मैत्रायणिश्रुतेर्बृहस्पतिवच्चंद्रोपिरूपभेदंकृत्वा असुरनाशायैवासुरंकर्मकृतवानतत्साहाय्येनमहांतंतारकामयंसंग्राममुपक्रांतवानिति
समाधेयम् शिशिरायुधंहिमप्रहरणम् १ २ ज्योतिषामीश्वरःसूर्यः तस्यापीश्वरः चंद्रमसावाचसर्वाणिज्योतींषिमहीयंतइतिश्रुतेः अयमर्थः यथापार्थिवं

वरुणउवाच सैषादुर्विषहामायादेवैरपिदुरासदा और्वेणनिर्मितापूर्वंपावकेनोर्वसूनुना ७४ तस्मिंस्तुव्युत्थितेदैत्येनि-
र्वीर्येषानसंशयः शापोह्यस्याःपुरादत्तःसृष्टायेनैवतेजसा ७५ यद्येषाप्रतिहंतव्याकर्त्तव्योभगवान्सुरवी दीयतांमेसखाशक्र
तोययोनिर्निशाकरः ७६ तेनाहंसहसंगम्ययादोभिश्चसमावृतः मायामेतांहनिष्यामित्वत्प्रसादान्नसंशयः ७७ इतिश्रीमहा
भारतेखिलेषुहरिवंशेहरिवंशपर्वणिऔर्वाग्निसंभवोनामपंचचत्वारिंशोऽध्यायः ४५ वैशंपायनउवाच एवमस्त्वितिसं
हृष्टः शक्रस्त्रिदशवर्द्धनः संदिदेशाग्रतःसोमंयुद्धायशिशिरायुधम् १ शक्रउवाच गच्छसोमसहायत्वंकुरुपाशधरस्यवै
असुराणांविनाशायजयायचदिवौकसाम् २ त्वमप्रतिमवीर्यश्चज्योतिषांचेश्वरेश्वरः त्वन्मयंसर्वलोकानांरसंरसविदोविदुः ३ क्ष
यवृद्धीतवाव्यक्तेसागरस्येवमंडले परिवर्त्तस्यहोरात्रंकालंजगतियोजयन् ४ लोकच्छायामयंलक्ष्मतवांकेशशसंज्ञितम् नवि
दुःसोमदेवाऽपियेचनक्षत्रयोगिनः ५ त्वमादित्यपथादूर्ध्वंज्योतिषांचोपरिस्थितः तमउत्सार्यवपुषाभासयस्यखिलंजगत् ६
श्वेतभानुर्हिमतनुर्ज्योतिषामधिपःशशी अब्दकृत्कालयोगात्माइज्योयज्ञरसोऽव्ययः ७ ओषधीशःक्रियायोनिरंभोयोनिरनु
ष्णभाक् शीतांशुरमृताधारश्चपलःश्वेतवाहनः ८ त्वंकांतिःकांतवपुषांत्वंसोमःसोमवृत्तिनाम् सौम्यस्त्वंसर्वभूतानांतिमिरघ्नस्त्व
मृक्षराट् ९

दारुअग्नेर्वर्द्धकंएवंचांद्रमंभःसर्वेषांदिव्यानामबिंधनानांतेजसांवर्धकं अतश्चंद्रोपिसूर्यस्येश्वरइति ३ परिवर्त्तसिपरिवर्त्तयसि ४ लोकच्छायामयंभूमि
प्रतिबिंबरूपंअंकेउत्संगे अयंभावः यथादर्पणंप्राप्यपरावृत्तानयनरश्मयःग्रीवास्थमेवमुखंदर्पणगतमिवपश्यंति एवंचंद्रमंडलंप्राप्यपरावृत्तास्तेदूरत्वदोषात्पृ
थिवींअव्यक्तरूपामिवचंद्रमंडलगतांपश्यंति सएवचंद्रेकलंकइत्युपचर्यतेदेवापिदेवाअपि ५ ६ यज्ञरसःसोमरसाहुतिपूर्वकंपावर्षादिरूपेणअग्नौप्रास्ताहुतिः
सम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिस्मृतेः अव्ययःप्रवाहनित्यः ७ अंभोयोनिरिति यज्ञरसत्वोपपादनम् ८ सोमवृत्तीनांसोमजीविका
नांदेवानां ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मयसृष्टयेतिषष्ठ्याः सुपांसुलुगित्ययादेशइतिशंचः गौडास्तुमायामयसृष्टायाः प्रवृद्धायाः शमायवाइत्येवपदंव्युत्क्रमेणपठंति ३२ व्यपकर्षतांदूरी अ· प·
कृतवंतौअडभावआर्षः ३३ उद्धांतेपादेधृत्वारज्जुखंडवत् शत्रोर्भ्रामणेवेगोययोस्ताभ्यांअतएवप्रवृद्धाभ्याम् ३४ ३५ ३६ भस्मावयवभूतेषुभस्म ४६ १
लेशतांप्राप्तेषु ३७ अपविद्धेषुपातितेषु ३८ ३९ ४० चारित्रबंधुषुसदाचारप्रियेषु ४१ अभिन्नबंधनेनियतमर्यादे ४२ सेयानंसम्यगभयेनप्रचर

ततोभगवतादिष्टौरणेपावकमारुतौ शमनार्थंप्रवृद्धायामायायामयसृष्टया ३२ ततःप्रवृद्धावन्योन्यंप्रवृद्धौज्वालवाहिनौ चो
दितौविष्णुवाक्येनतांमायांव्यपकर्षताम् ३३ ताभ्यामुद्धांतवेगाभ्यांप्रवृद्धाभ्यांमहाहवे दग्धासापार्वतीमाया भस्मीभूतानना
शह ३४ सोनिलोनलसंयुक्तःसोनलश्चानिलाकुलः दैत्यसेनांददहतुर्युगांतइवमूर्च्छितौ ३५ वायुःप्रधावितस्तत्रपश्चादग्नि
श्चमारुतात् चेरतुर्दानवानीकेक्रीडंतावनलानिलौ ३६ भस्मावयवभूतेषुप्रपतत्सूत्पतत्सुच दानवानांविमानेषुकृतकर्मणि
पावके ३७ धातस्कंधापविद्धेषुविमानेषुसमंततः मायाबंधेविनिर्वृत्तेस्तूयमानेगदाधरे ३८ निष्प्रयत्नेषुदैत्येषुत्रैलोक्येमुक्त
बंधने संप्रहृष्टेषुदेवेषुसाधुसाध्वितिसर्वशः ३९ जयेदशशतात्क्षस्यमयस्यचपराजये दिक्षुसर्वासुशुद्धासुप्रवृत्तेधर्मसंस्तरे
४० अपावृत्तेचंद्रपथेअयनस्थेदिवाकरे प्रकृतिस्थेषुलोकेषुनृषुचारित्रबंधुषु ४१ अभिन्नबंधनेमृत्यौहूयमानहुताश
ने यज्ञभागिषुदेवेषुस्वर्गार्थंदर्शयत्सुच ४२ लोकपालेषुसर्वेषुदिक्षुसंयानवर्त्तिषु भावेतपसिशुद्धानामभावेदुष्टकर्मिणा
म् ४३ देवपक्षेप्रमुदितेदैत्यपक्षेविषीदति त्रिपादविग्रहेधर्मे अधर्मेपादविग्रहे ४४ अपावृतेमहाद्वारेवर्त्तमानेचसत्पथे
स्वधर्मस्थेषुवर्णेषुलोकेष्विन्नाश्रमेषुच ४५ प्रजारक्षणयुक्तेषुभ्राजमानेषुराजसु गीयमानासुगाथासुदेवसंस्तवनादिषु
४६ प्रशांतकलुषेलोकेशांतेतपसिदारुणे अग्निमारुतयोस्तस्मिन्वृत्तेसंग्रामकर्मणि तन्मयाविमलालोकास्ताभ्यांजयकृ
तप्रियाः ४७ पूर्वदेवभयंश्रुत्वामारुताग्निकृतंमहत् कालनेमिरितिख्यातोदानवःप्रत्यदृश्यत ४८ भास्कराकारमुकुटःशिं
जिताभरणांगदः मंदराचलसंकाशोमहारजतसंवृतः ४९ शतप्रहरणोदग्रःशतबाहुःशताननः शतशीर्षःस्थितःश्रीमान्
शतशृंगइवाचलः ५० कक्षेमहतिसंवृद्धोहिमांतइवपावकः ५१

णंतेन वर्त्तिषुवर्त्तमानेषु भावेअभ्युदये ४३ ४४ ४५ ४६ तन्मयास्तत्प्र
धानाःजयेनकृतंप्रियंयेषांतेजयकृतप्रियाः क्रियाइतिपाठेजयकृतपदंकृतजयक्रियाइतिव्याख्येयम् ४७ पूर्वदेवानांदैत्यानां आगतंभयंपूर्वदेवभयम् ६९
४८ शिंजितानिशब्दवंतिआभरणानिनूपुरादीनितत्सहितानिअंगदानियस्य ४९ ५० कक्षेवने हिमांतेग्रीष्मेनिदाघइवेतिपाठः ५१ ६९ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दंष्ट्रालंबहिर्निर्गतदंष्ट्रं ओष्ठपुटं दंष्ट्रालोष्ठपुटमाननंयस्यस दंष्ट्रालोष्ठपुटाननः ५२ दृष्टिमंतः नुम् छांदसः दृष्टियुक्तानित्यर्थः ५३ मंदरोदग्रवर्चसम् स्वर्गश्रेष्ठइंद्रः तद्वद्वर्चोदीप्तिर्यस्यइंद्रतुल्यमित्यर्थः मंदरोमंथशैलेस्यात्स्वर्गमंदारयोरपीतिमेदिनी ५४ ५५ ५६ ५७ ५८ ५९ सोच्छ्रयन्सः उच्छ्रयन्निति-च्छेदः पादपूरणार्थःस्तलोपः ६० मयेनपरिध्वक्तः ६१ ६२ इतिहरिवंशेटीकायांषट्चत्वारिंशोऽध्यायः ४६ दानवान्पिप्रीषुः आप्यायितुमिच्छुः प्रीञ्तर्पणे

धूम्रकेशोहरितश्मश्रुर्दंष्ट्रालोष्ठपुटाननः त्रैलोक्यांतरविस्तारी धारयन्विपुलंवपुः ५२ बाहुभिस्तुलयन्व्योमक्षिपन्पद्भ्यांमहीधरान् ईरयन्मुखनिश्वासैर्वृष्टिमंतोबलाहकान् ५३ तिर्यगायतरक्ताक्षंमंदरोदग्रवर्चसम् दिधक्षंतमिवायातंसर्वान्देवगणान्मृधे ५४ तर्जयंतंसुरगणान्छादयंतंदिशोदश संवर्तकालेक्षुधितंदृप्तंमृत्युमिवोत्थितम् ५५ सुतलेनोच्छ्रितवता विपुलांगुलिपर्वणा माल्याभरणपूर्णेनकिंचिच्चलितवर्मणा ५६ उच्छ्रितेनाग्रहस्तेन दक्षिणेनवपुष्मता दानवान्देवनिहतानुत्तिष्ठध्वमितिब्रुवन् ५७ तंकालनेमिंसमरेद्विषतांकालसन्निभम् वीक्षंतिस्मसुराःसर्वेभयवित्रस्तलोचनाः ५८ तंस्मवीक्षंतिभूतानिक्रमंतंकालनेमिनम् त्रिविक्रमंविक्रमंतंनारायणमिवापरम् ५९ सोच्छ्रयन्प्रथमंपादंमारुताघूर्णितांबरः प्राक्रामदसुरोयुद्धेत्रासयन्सर्वदेवताः ६० समयेनासुरेंद्रेणपरिध्वक्तःक्रमन्रणे कालनेमिर्बभौदैत्यःसविष्णुरिवमंदरः ६१ अथविव्यथिरेदेवाःसर्वेशक्रपुरोगमाः दृष्ट्वाकालमिवायांतंकालनेमिंभयावहम् ६२ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिषट्चत्वारिंशोऽध्यायः ४६ वैशंपायनउवाच दानवांश्चापिपिप्रीषुःकालनेमिर्महासुरः व्यवर्द्धतमहातेजास्तपांतेजलदोयथा १ त्रैलोक्यांतर्गतंतंतुदृष्ट्वातेदानवेश्वराः उत्तस्थुरपरिश्रांताःप्राप्येवामृतमुत्तमम् २ तेभीताभयसंत्रस्तामयतारपुरोगमाः तारकामयसंग्रामेसततंजयकांक्षिणः रेजुरायोधनगतादानवायुद्धकांक्षिणः ३ अस्त्रमभ्यस्यतांतेषांव्यूहंचपरिधावताम् प्रेक्षतांचाभवत्प्रीतिर्दानवंकालनेमिनम् ४ येतुतत्रमयस्यासन्मुख्यायुद्धपुरःसराः तेपिसर्वेभयंत्यक्त्वाहृष्टायोद्धुमुपस्थिताः ५ मयस्तारोवराहश्चहयग्रीवश्चवीर्यवान् विप्रचित्तिसुतःश्वेतःखरलंबावुभावपि ६ अरिष्टोबलिपुत्रश्चकिशोरोष्ट्रौतथैवच स्वर्भानुश्चामरप्रख्योवक्त्रयोधीमहाबलः ७ एतेस्त्रविदुषःसर्वेसर्वेतपसिसुव्रताः दानवाःकृतिनोजग्मुःकालनेमिनमुत्तमम् ८

ःस्यनिरूपम् तपांतेग्रीष्मांते १ २ तेपूर्वंभयसंत्रस्ताअपिपश्चाद्भीताः वीतभयसंत्रासाइतिपाठेभाविनीआसीच्छेदशंकासंत्रासः सैवतारकालिंगीतारकामयसंग्रामेताराऽनिमित्तप्रवृत्तेयुद्धे ३ अभ्यस्यतांपुनःपुनः ४ ५ ६ ७ अस्त्रविदुषः अस्त्रविद्वांसः ८ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 गदादिभिरुपलक्षिताः संतोयोत्धुंजग्मुरित्यनुंषजनीयम् ९ १० ११ १२ १३ १४ दीप्तशस्त्राण्येवप्रवराःविद्युतोयस्याम् प्रवरेतियुक्तःपाठः नीमिलि-
तान्यस्तंगतानिनक्षत्राणिदेवतारूपाणियस्याम् १५ वर्चसेत्यावंतम् १६ १७ १८ १९ २० दर्पस्यक्षमापराक्रममयम् विनयस्यचक्षमापक्रममय

तेगदाभिश्चगुर्वीभिश्चक्रैश्चसपरश्वधैः अश्मभिश्चाद्रिसदृशैर्गंडशैलैश्चदंशितैः ९ पट्टिशैर्भिंदिपालैश्चपरिघैश्चोत्तमायुधैः
घातनीभिश्चगुर्वीभिः शतघ्नीभिस्तथैवच १० कालकल्पैश्चमुसलैः क्षेपणीयैश्चमुद्गरैः युगैर्यंत्रैश्चनिर्मुक्तैरर्गलैश्चाग्रताडितैः ११
दोर्भिश्चायतपीनांसैः पाशैःप्रासैश्चमूर्च्छितैः सर्पैर्लेलिह्यमानैश्चविसर्पद्भिश्चसायकैः १२ वज्रैःप्रहरणीयैश्चदीप्यमानैश्चतोमरैः
विकोशैश्चासिभिस्तीक्ष्णैः शूलैश्चशितनिर्मलैः १३ तेवैसंदीप्तमनसःप्रगृहीतोत्तमायुधाः कालनेमिपुरस्कृत्यतस्थुःसंग्राममूर्द्धनि
१४ सादीप्तशस्त्रप्रवरादैत्यानांशुशुभेचमूः द्यौर्निमीलितनक्षत्रासघनेवांबुदागमे १५ देवतानामपिचमूःरुरुचेशक्रपालिता दी-
प्ताशीतोष्णतेजोभ्यांचंद्रभास्करवर्चसा १६ वायुवेगवतीसौम्यातारागणपताकिनी तोयदाविद्धवसनाग्रहनक्षत्रहासिनी १७ य
मेंद्रधनदैर्गुप्तावरुणेनचधीमता संप्रदीप्ताग्निपवनानारायणपरायणा १८ सासमुद्रौघसदृशीदिव्यादेवमहाचमूः रराजास्त्र-
वतीभीमायक्षगंधर्वशालिनी १९ तयोश्चम्वोस्तदातत्रबभूवससमागमः द्यावापृथिव्योःसंयोगोयथास्याद्युगपर्यये २० तद्यु
द्धमभवद्घोरंदेवदानवसंकुलम् क्षमापराक्रममयंदर्पस्यविनयस्यच २१ निश्चक्रमुर्बलाभ्यांतुताभ्यांभीमाःसुरासुराः पूर्वा-
पराभ्यांसंरब्धाःसागराभ्यामिवांबुदाः २२ ताभ्यांबलाभ्यांसंहृष्टाश्चेरुस्तेदेवदानवाः वनाभ्यांपार्वतीयाभ्यांपुष्पिताभ्यांयथाग-
जाः २३ समाजघ्नुस्ततोभेरीःशंखान्दध्मुश्चनैकशः सशब्दोद्यांभुवंचैवदिशश्चसमपूरयत् २४ ज्याघाततलनिर्घोषाधनुषां
कूजितानिच दुंदुभीनांनिनदतादैत्यानांनिर्दधुःस्वनान् २५ तेन्योन्यमभिसंपेतुःपातयंतःपरस्परम् बभंजुर्बाहुभिर्बाहून्द्वंद्व
द्वमन्येसुरासुराः २६ देवतास्त्वशनीर्घोराःपरिघांश्चोत्तमायसान् ससृजुःराजौनिस्त्रिंशान्गदागुर्वीश्चदानवाः २७ गदानिपातै-
र्भग्नांगाबाणैश्चशकलीकृताः परिपेतुर्भृशंकेचिन्न्युब्जाःकेचित्ससर्जिरे २८ ततोरथैःसतुरगैर्विमानैश्चाशुगामिभिः समीयु-
स्तेतुसंरब्धारोषादन्योन्यमाहवे २९

मितियोजना दृप्तेषुदैत्येषुदेवानांक्षमापूर्वकःपराक्रमस्तद्धांतः विनीतेषुदेवेषुदैत्यानांपराक्रमपूर्वि
काक्षमादेवेंद्रैश्वर्यसहनांता २१ भीमाःनिर्भयाः २२ २३ २४ दैत्यानांस्वनान्निर्दधुः अंतर्हितांश्चक्रुः दैत्यमंतर्दधुःस्वनमितिपाठेदैत्यानामिमंदैत्यमित्यर्थः
२५ २६ ससर्जुःप्रयुक्तवंतः २७ न्युब्जाउपरिपृष्ठाः ससर्जिरेसृष्टाःकृताइतियावत् २८ २९ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

संवर्त्तमानाः संमुखंगच्छंतः विवर्त्तमानाः परावर्त्तंतः ३० ३१ अन्योन्यस्यदेहंदोर्भ्यांउत्क्षिप्यनिवार्यजघ्नुः ३३ ३४ ३५ ३६ कालनेमिः हिरण्यक-
शिपोः पुत्रः पितरंमेजघानेकइतिवाक्यशेषात् अंबुदोवृत्तिरूपत्वात् पूर्यमाणोविवर्द्धते ३७ गात्रेविनिष्पेषुः गात्रसंगमत्रासात् चूर्णीभूताइत्यर्थः ३८
अस्यमेघेनसाम्यमापादयतिक्रोधादिति निष्पिनष्टीतिनिष्पेषः पेषणकर्त्ता अग्निरूपोनिष्पेषोऽशनिः तन्मिश्रः पवनोयास्कृताः अर्चिषः ३९ ४० ४१ ग्रस्त

संवर्त्तमानाः समरे विवर्त्तंतस्तथापरैः रथारथैर्निरुध्यंतेपदाताश्चपदातिभिः ३० तेषांरथानांतुमुलः सशब्दः शब्दवाहिनाम् ब
भूवाथप्रसक्तानांनभसीवपयोमुचाम् ३१ बभंजिरे रथान्केचित् केचित्संमृदितारथैः संबाधमेकेसंप्राप्यनशेकुश्चलितुंरथाः
३२ अन्योन्यस्याभिसमरे दोर्भ्यामुत्क्षिप्यदर्पिताः संह्लादमानाभरणाजघ्नुस्तत्रासिचर्मिणः ३३ शस्त्रैरन्येविनिर्भिन्नारक्त-
वेमुर्हतायुधि जरज्जलानांसदृशाजलदानांसमागमे ३४ तदस्त्रशस्त्रग्रथितंक्षिप्तोत्क्षिप्तगदाविलम् देवदानवसंक्षुब्धंसं-
कुलंयुद्धमाबभौ ३५ तद्दानवमहामेघंदेवायुधतडित्प्रभम् अन्योन्यबाणवर्षंतत्युद्धंदुर्दिनमाबभौ ३६ एतस्मिन्नंतरेक्रुद्धः
कालनेमिर्महासुरः व्यवर्द्धतसमुद्रौघैः पूर्यमाणइवांबुदः ३७ तस्यविद्युच्चलापीडाः प्रदीप्ताशनिवर्षिणः गात्रेनगशिरःप्राप्ता
विनिःप्येषुर्बलाहकाः ३८ क्रोधान्निःश्वसतस्तस्यभ्रूभेदस्वेदवर्षिणः साग्निनिःष्पेषपवनामुखान्निश्चेरुरर्चिषः ३९ तिर्यगूर्ध्वंच
गगनेववृधुस्तस्यबाहवः पंचास्याः कृष्णवपुषोलेलिहानाइवोरगाः ४० सोऽस्त्रजालैर्बहुविधैर्धनुर्भिः परिघैरपि दिव्यैराकाशमा
वव्रेपर्वतैरुच्छ्रितैरिव ४१ सोऽनिलोद्धूतवसनस्तस्थौसंग्राममूर्द्धनि संध्यातपग्रस्तशिखः साक्षान्मेरुरिवाचलः ४२ ऊरुवेगप्रति
क्षिप्तैः शैलशृंगाग्रपादपैः अपातयद्देवगणान्वज्रेणेवमहागिरीन् ४३ बाहुभिः शस्त्रनिस्त्रिंशैश्छिन्नभिन्नशिरोरसः नशेकु
श्चलितुंदेवाः कालनेमिहतायुधि ४४ मुष्टिभिर्निहताः केचित् केचित्त्वविदलीकृताः यक्षगंधर्वपतयः पेतुः सहमहोरगैः ४५ तेन
वित्रासितादेवाः समरेकालनेमिना नशेकुर्यत्नवंतोपिप्रतिकर्त्तुंविचेतसः ४६ तेनशक्रः सहस्राक्षः स्तंभितः शरबंधनैः ऐरावतग
तः संख्येचलितुंनशशाकह ४७ निर्जलांभोदसदृशोनिर्जलार्णवसप्रभः निर्व्यापारः कृतस्तेनविपाशोवरुणोमृधे ४८ रणे
वैश्रवणस्तेनपरिघैः कालरूपिभिः व्यलपल्लोकपालेशस्त्याजितोधनदक्रियाम् ४९

शिखेनमेरुणादैत्यस्यउद्धूतवसनेनमेरुस्थरत्नभासांचसाम्यम् ४२ ४३ शस्त्राः विशसनकर्त्तारः निस्त्रिंशाः खड्गायेषुतैः बाहुभिः बलिभिरिति-
चापाठः ४४ ४५ ४६ स्तंभितः बद्धः ४७ क्रियांमुद्रादिरूपाम् ४९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 याम्यां इतरेषां यमेन संपादनीयां अचेतनतामितियावत् ५० तेषां तत्कर्म दिशां पालनं कृत्वा कुर्वन् चतुर्द्धा देहं विदधे अन्येभ्योपि दृश्यं तद्द इति कृत्स्नः कृ
र्तरिवनिप्तुगागमश्च ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ इति हरिवंशटीकायां सप्तचत्वारिंशोऽध्यायः ४७ पंचेति विपरीतेन
असामयिकेन कर्षणान अभ्यवर्त्तत नोपतस्थुः १ तेषां वेदादीनाम् २ ३ स्वारूढं शिखिनं चूडावंतम् ४ ५ दानवर्षिणामित्यार्षो दैर्घ्याभावः दानैः

यमः सर्वहरस्तेन दंडप्रहरणो रणे याम्यामवस्थां समरे नीतः स्वां दिशमाविशत् ५० स लोकपालान् उत्साद्य कृत्वा तेषां च कर्म तत् दिक्षु सर्वासु देहं स्वं चतुर्द्धा विदधे तदा ५१ स नक्षत्रपथं गत्वा दिव्यं स्वर्भानुदर्शितम् जहार लक्ष्मीं सोमस्य तं चास्य विषयं महत् ५२ चालयामास शीतांशुं स्वर्गद्वाराच्च भास्करम् सायनं चास्य विषयं जहार दिनकर्म च ५३ सोग्निं देवमुखं दृष्ट्वा चकारात्मसुखं स्वयम् वायुं च तरसा जित्वा चकारात्मवशानुगम् ५४ स समुद्रान् समानीय सर्वांश्च सरितो बलात् चकारात्मवशे वीर्याद् देहभूतांश्च सिंधवः ५५ अपः स्ववशगाः कृत्वा दिविजा याश्च भूमिजाः स्थापयामास जगतीं सुगुप्तां धरणीधरैः ५६ स स्वयंभूरिवाभाति महाभूतपतिर्महान् सर्वलोकमयो दैत्यः सर्वलोकभयावहः ५७ स लोकपालैकवपुश्चंद्रसूर्यग्रहात्मवान् पावकानिलसंघातो रराज युधि दानवः ५८ पारमेष्ठ्ये स्थितः स्थाने लोकानां प्रभवाप्यये तुष्टुवुस्तं दैत्यगणा देवा इव पितामहम् ५९

इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्वणि आद्यवतार कामये सप्तचत्वारिंशोऽध्यायः ४७ वैशंपायन उवाच पंचत्वं नाभ्यवर्त्तंत विपरीतेन कर्मणा वेदो धर्मः क्षमा सत्यं श्रीश्च नारायणाश्रयाः १ स तेषामनुपस्थानात् सक्रोधो दानवेश्वरः वैष्णवं पदमन्विच्छन् ययौ नारायणांतिकम् २ स ददर्श सुपर्णस्थं शंखचक्रगदाधरम् दानवानां विनाशाय भ्रामयंतं गदां शुभाम् ३ सजलांभोदसदृशं विद्युत्सदृशवाससम् स्वारूढं स्वर्णपत्राढ्यं शिखिनं काश्यपं खगम् ४ दृष्ट्वा दैत्यविनाशाय रणे क्षुब्धमवस्थितम् दानवो विष्णुमक्षोभ्यं बभाषे क्षुब्धमानसः ५ अयं स रिपुरस्माकं पूर्वेषां दानवर्षिणाम् अर्णवावासिनश्चैव मधोर्वै कैटभस्य च ६ अयं स विग्रहोऽस्माकमशाम्यः किल कथ्यते येन नः संयुगे घोरे बहवो दानवा हताः ७ अयं स निर्घृणो युद्धे स्त्रीबालनिरपत्रपः येन दानवनारीणां सीमंतोद्धरणं कृतम् ८ अयं स विष्णुर्देवानां वैकुंठश्च दिवौकसाम् अनंतो भोगिनामप्सु स्वयंभूश्च स्वयंभुवः ९

र्षणशीलानामितिवा ६ अशाम्यः शमयितुमशक्यः ७ निर्घृणो निर्दयः अस्त्रीअस्त्रवान् बालवन्निर्लज्जश्च सीमंतस्य केशवेशस्य उद्धरणं खंडनमित्यर्थः ८ देवानां अदितिपुत्राणां मध्ये विष्णुर्वामनः दिवौकसां वसुरुद्रादीनां वैकुंठः कुत्स्यांते प्यकुंठितधामा अनंतः शेषः स्वयंभुवः ब्रह्मणोपि स्वयंभूः धातुर्धातेत्यर्थः ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१० छायांपक्षकोटिम् त्रिधाअंगप्रधानप्रायश्चित्तभेदेनत्रिप्रकारम् नित्यनैमित्तिककाम्यभेदेनवा गार्हपत्याद्युपाधिभेदेनेतिप्रांचः ११ १२ १३ अति
क्रांतस्यकालस्यअतिक्रांतेकालेकृतस्यदैत्यवधस्यफलंआत्मवधम् १४ १५ १६ जात्यंतरं मत्स्यादिरूपम् १७ अनंतआकाशवद्व्यापकोमूर्तिरहितोपिभूत्वा
आविर्भूय पद्मनाभत्वेनरूपेणतन्नाम्नाचरव्यातइत्यर्थः १८ १९ देवतानांअरणिरिवमातेत्यर्थः २० विनंक्ष्यतिअदर्शनंगमिष्यति तथाचजन्मांतरेप्यने

अयंसनाथोदेवानामस्माकंविप्रियेस्थितः अस्यक्रोधेनमहताहिरण्यकशिपुर्हतः १० अस्यछायांसमासाद्य देवाःमरवसुरवेस्थिताः
आज्यंमहर्षिभिर्दत्तमश्नुवंतित्रिधाहुतम् ११ अयंसनिधनेहेतुःसर्वेषांदेवविद्विषाम् यस्यतेजःप्रविष्टानिकुलान्यस्माकमाहवे १२
अयंसकिलयुद्धेषुसुरार्थेत्यक्तजीवितः सवितुस्तेजसातुल्यंचक्रंक्षिपतिशत्रुषु १३ अयंसकालोदैत्यानांकालभूतेमयिस्थिते अति
क्रांतस्यकालस्यफलंप्राप्स्यतिदुर्मतिः १४ दिष्ट्येदानीममक्षमेविष्णुरेषसमागतः अद्यमद्बाणनिष्पिष्टोमामेवप्रणमिष्यति १५ या
स्यात्यपचितिंदिष्ट्यापूर्वेषामयसंयुगे इमंनारायणंहत्वादानवानांभयावहम् १६ क्षिप्रमेववधिष्यामिरणेनारायणाश्रितान् जात्यंत
रगतोप्येषमृधेबाधतिदानवान् १७ एषोऽनंतःपुराभूत्वापद्मनाभइतिस्मृतः जघानैकार्णवेघोरेताबुभौमधुकैटभौ विभिन्नविग्रहस्त्वके
ऊरौनिहतौदानवेश्वरौ १८ द्विधाभूतंवपुःकृत्वासिंहार्द्धनरसंस्थितम् पितरंमेजघानैकोहिरण्यकशिपुंपुरा १९ शुभ्रंगर्भमधत्त
ममादितिर्देवतारणिः यज्ञकालेबलेर्योवैकृत्वावामनरूपताम् त्रींल्लोकानाजहारैकःक्रममाणस्त्रिभिःक्रमैः २० भूयस्त्विदानींसमरे
संप्राप्तेतारकामये मयासहसमागम्यसहदेवैर्विनंक्ष्यति २१ सएवमुक्त्वाबहुधाक्षिपन्नारायणंरणे वाग्भिरप्रतिरूपाभिर्युद्धमेवाभ्य
रोचयत् २२ क्षिप्यमाणोऽसुरेंद्रेणनचुकोपगदाधरः क्षमाबलेनमहतासस्मितंवाक्यमब्रवीत् २३ अल्पदर्पबलोदैत्यस्थितःक्रो
धादसहृदन् हतस्त्वमात्मनोदोषैःक्षमायातीत्यभाषसे २४ अधमस्त्वंसममतोधिगेतत्तववाग्बलम् नतत्रपुरुषाःसंतियत्रगर्ज्ज
तियोषितः २५ अहंत्वांदैत्यपश्यामिपूर्वेषांमार्गगामिनाम् प्रजापतिकृतंसेतुंकोभित्वास्वस्तिमान्भवेत् २६ अद्यत्वांनाशयिष्यामि
देवव्यापारकारकम् स्वेषुस्वेषुचस्थानेषुस्थापयिष्यामिदेवताः २७ वैशंपायनउवाच एवंब्रुवतितद्वाक्यंमृधेश्रीवत्सधा
रिणि जहासदानवःक्रोधात्हस्तांश्चक्रेचसायुधान् २८

नसहवैरंभविष्यत्येवेत्यर्थः २१ २२ २३ दैत्यत्वंअल्पदर्पबलोऽपि क्रोधादसहृदन्स्थि
तः क्षमामतीत्यचभाषसे अतस्त्वमात्मनोदोषैरेवहतः २४ नतत्रेतियोषितःपुरस्तात् गर्जनंनमरणावहंतत्रपुरुषांतराभावात् अत्ररणेतुतस्सतान्तव-
मृत्युरेवास्तीतिभावः २५ तदेवाह अहमितिसेतुंधर्ममर्यादांस्वस्तिमान्कुशली २६ व्यापारःस्वास्थ्यप्रच्युतिः २७ २८ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 २९ ३० ३१ सर्वप्राणेनसर्वबलेन ३२ ३३ ३४ आत्मनोवपुः देहांतरंगरुडरूपम् ३५ व्यवर्द्धंतेति ३६ सइति ३७ ३८ अंबरैः वस्त्रैः ३९ ४० सुव
र्णनेमिपर्यंतंसुवर्णमयोनेमिश्चक्रधारायाःपर्यंतः प्रांतदेशोयस्यतत् वज्रनाभंदृढमध्यम् ४१ स्रक्दामसमाल्याविततम् स्रजांरूपाणांदाम्नांमाल्यापरंपरानद्धं

सबाहुशतमुद्यम्यसर्वास्त्रग्रहणंरणे क्रोधाद्द्विगुणरक्ताक्षोविष्णुंवक्षस्यताडयत् २९ दानवाश्चापिसमरेमयतारपुरोगमाः उद्य
तायुधनिस्त्रिंशाहृष्ट्वाविष्णुमथाद्रवन् ३० सताड्यमानोतिबलैर्दैत्यैःसर्वायुधोद्यतैः नचचालहरिर्युद्धेकंप्यमानइवाचलः ३१
संसक्तश्चसुपर्णेनकालनेमीमहासुरः सर्वप्राणेनमहतींगदामुद्यम्यबाहुभिः ३२ मुमोचज्वलितांघोरांसंरब्धोगरुडोपरि कर्मणाते
नदैत्यस्यविष्णुर्विस्मयमागतः ३३ यदातस्यसुपर्णस्यपतितामूर्ध्निसागदा तदागमत्सदाभूमिंपक्षीव्यथितविग्रहः ३४ सुपर्णंव्य
थितंदृष्ट्वाक्षतंचवपुरात्मनः क्रोधात्संरक्तनयनोवैकुंठश्चक्रमाददे ३५ व्यवर्द्धतचवेगेनसुपर्णेनसमंप्रभुः भुजाश्चास्यव्यवर्द्धन्त
व्याप्नुवन्तोदिशोदिश ३६ सदिशःप्रदिशश्चैवखंचगांचैवपूरयन् ववृधेसपुनर्लोकान्क्रान्तुकामइवौजसा ३७ तंजयायसुरेन्द्रा
णांवर्द्धमानंनभस्तले ऋषयःसहगंधर्वैस्तुष्टुवुर्मधुसूदनम् ३८ सद्यांकिरीटेनलिखन्साभ्रमंबरमंबरैः पद्भ्यामाक्रम्यपृथ्वींचदि
शःप्रच्छाद्यबाहुभिः ३९ सूर्यस्यरश्मितुल्याभंसहस्रारमरिक्षयम् दीप्ताग्निसदृशंघोरंदर्शनीयंसुदर्शनम् ४० सुवर्णनेमिपर्यन्तं
वज्रनाभंभयावहम् मेदोमज्जास्थिरुधिरैर्दिग्धंदानवसंभवैः ४१ अद्वितीयंप्रहारेषुक्षुरपर्यन्तमण्डलम् स्रग्दाममाल्यविततंका
गंकामरूपिणम् ४२ स्वयंस्वयंभुवासृष्टंभयदंसर्वविद्विषाम् महर्षिरोषेराविष्टंनित्यमाहवदर्पितम् ४३ क्षेपणाद्यस्यमुह्यन्तिलो
काःसस्थाणुजंगमाः क्रव्यादानिचभूतानितृप्तिंयान्तिमहाहवे ४४ तमप्रतिमकर्माणंसमानंसूर्यवर्चसा चक्रमुद्यम्यसमरेक्रोधदी
प्तोगदाधरः ४५ संमुष्णन्दानवंतेजःसमरेस्वेनतेजसा चिच्छेदबाहुंचक्रेणश्रीधरःकालनेमिनः ४६ तच्चवक्त्रशतंघोरंसाग्नि
चूर्णाट्टहासिनम् तस्यदैत्यस्यचक्रेणप्रममाथबलाद्धरिः ४७ सच्छिन्नबाहुर्विशिरानप्राकंपतदानवः कबंधावस्थितःसंख्येविशा
खइवपादपः ४८ तंवितत्यमहापक्षौवायोःकृत्वासमंजवम् उरसापातयामासगरुडःकालनेमिनम् ४९ सतस्यदेहोविमुखोविशा
खःखात्सरिभ्रमन् निपपातदिवंत्यक्त्वाक्षोभयन्धरणीतलम् ५०

विततं अलातचक्रवदतिवेगात्प्रयोक्तुर्हस्तसारभ्यलक्ष्यप्रदेशपर्यंतं अविच्छिन्नधारं
विभातीत्यर्थः कामरूपिणमितिसकृत्प्रयुक्तमपिप्रयोक्तुरिच्छयास्थूलसूक्ष्मऋजुतिर्यगादिरूपाणिदधानंपुंस्त्वंतुसर्वत्रतदधिष्ठातृरुद्राभिप्रायेण ४२ ४३ ४४
४५ ४६ साग्निचूर्णानिआग्नेयौषधबलेनगोलोत्क्षेपणयंत्राणि तेषामिव अट्टहासोमहाशब्दः तद्युक्तंसाग्निचूर्णाट्टहासिनंवक्त्रशतं पुंस्त्वमार्षं ४७ ४८
४९ ५०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५१ बाहुभिः दिशः प्रच्छाद्य बाहुभिरिति प्रागुक्तलक्षणैः हरेरिति शेषः व्याप्ताः आक्रांताः ५२ ५३ ५४ ५५ विमर्दे दैत्यानां विनाशे निर्वृत्ते जाते सति
५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ निर्यातयप्रयच्छ मृधे लयैव निहतकंटकम् ६५ ६६ देहै देहेंद्रियादिभिः श्रवणा

तस्मिन्निपतिते दैत्ये देवाः सर्षिगणास्तदा साधुसाध्विति वैकुंठं समेताः प्रत्यपूजयन् ५१ अपरे ये तु दैत्या वै युद्धे दुष्टपराक्रमाः ते
सर्वे बाहुभिर्व्याप्ता न शेकुश्चलितुं रणे ५२ कांश्चित्केशेषु जग्राह कांश्चित्कंठेभ्यपीडयत् पाटयत्कस्यचिद्वक्त्रं मध्ये कांश्चिद्गृथा
गृहीत् ५३ ते गदाचक्रनिर्दग्धा गतसत्त्वा गतासवः गगनाद्भ्रष्टसर्वांगा निपेतुर्धरणीतले ५४ तेषु सर्वेषु दैत्येषु हतेषु पुरुषोत्तमः
तस्थौ शक्रप्रियं कृत्वा कृतकर्मा गदाधरः ५५ तस्मिन्विमर्दे निर्वृत्ते संग्रामे तारकामये तं देशमाजगामाशु ब्रह्मा लोकपितामहः
५६ सर्वैर्ब्रह्मर्षिभिः सार्द्धं गंधर्वैः साप्सरोगणैः देवदेवो हरिं देवं पूजयन्वाक्यमब्रवीत् ५७ ब्रह्मोवाच कृतं देव महत्कर्म
सुराणां शल्यमुद्धृतम् वधेनानेन दैत्यानां वयं हि परितोषिताः ५८ योयं हतस्त्वया विष्णो कालनेमी महासुरः त्वमेकोस्य मृधे
हंता नान्यः कश्चन विद्यते ५९ एष देवान्परिभवन्लोकांश्च सचराचरान् ऋषीणां कदनं कृत्वा मामपि प्रतिगर्ज्जति ६० तदनेन त
वोग्रेण परितुष्टोस्मि कर्मणा यदयं कालतुल्याभः कालनेमी निपातितः ६१ तदागच्छस्व भद्रं ते गच्छामः दिवमुत्तमाम् ब्रह्मर्षय
स्तात तत्रस्था प्रतीक्षंते सदोगताः ६२ अहं मुहूर्षयश्चैव तत्र त्वां वदतां वर विधिवच्चार्चयिष्यामो गीर्भिर्दिव्याभिरच्युत ६३ किं वा
हं तव दास्यामि वरं वरभृतां वरः सुरेष्वपि स दैत्येषु वराणां वरदो भवान् ६४ निर्यातयैतत्त्रैलोक्यं स्फीतं निहतकंटकम् अस्मि-
न्नेव मृधे विष्णो शक्राय सुमहात्मने ६५ एवमुक्तो भगवता ब्रह्मणा हरिरव्ययः देवान्शक्रमुखान्सर्वानुवाच शुभया गिरा ६६
विष्णुरुवाच श्रूयतां त्रिदशाः सर्वे यावंतोत्र समागताः श्रवणावहितैर्देहैः पुरस्कृत्य पुरंदरम् ६७ अस्मिन्नः समरे सर्वे
कालनेमिमुखा हताः दानवा विक्रमोपेताः शक्रादपि महत्तराः ६८ तस्मिन्महति संक्रंदे द्वावेव तु विनिःसृतौ वैरोचनश्च दै
त्येंद्रः स्वर्भानुश्च महाग्रहः ६९ तां दिशं भजतां शक्रो दिशं वरुण एव च याम्यां यमः पालयतां सुत्तरां च धनाधिपः ७० ऋक्षैः सह य
थायोगं काले चरतु चंद्रमाः अब्दं ऋतुमुखं सूर्यो भजतामयनैः सह ७१ आज्यभागाः प्रवर्त्ततां सदस्यैरभिपूजिताः हूयतामग्न
यो विप्रैर्वेददृष्टेन कर्मणा ७२

वहितैर्महावाक्यश्रवणे सादरैः करणैरिंद्रं पुरस्कृत्य महावाक्यं श्रूयतामित्यन्वयः ६७ अस्मिन्नः अस्माभिः ६८
वैरोचनिर्बलिः स्वर्भानुः राहुः ६९ ७० ७१ ७२ श्रीगोपालो विजयते ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७३ त्रिधागार्हपत्यदक्षिणाग्न्याहवनीयरूपेण आत्मजैः स्वाभाविकैर्गुणैर्धर्मैः शमोदमस्तपः शौचमित्यादिनागीतासूपदिष्टैः ७४ ७५ गाः चक्षूंषि
७६ ७७ ७८ विश्रंभः विश्वासः यः युष्माभिः क्षुद्राः वंचकाः ७९ संस्थितिः मर्यादा ८० मोहं विपर्ययबुद्धिं यथाधर्ममप्यधर्मइतिलक्ष्यंति अधर्ममपिध
र्मइतिमत्वानुष्ठास्यंति ८१ अभयमितिच्छेदः ८२ ८३ ८४ इतिश्रीमहाभारतेहरिवंशेटीकायांअष्टचत्वारिंशोऽध्यायः ४८ ब्रह्मणासलिलंसलिला

देवाश्चबलिहोमेनस्वाध्यायेनमहर्षयः श्राद्धेनपितरश्चैवतृप्तिंयांतुयथासुखम् ७३ वायुश्चरतुमार्गस्थस्त्रिधादीप्यतुपावकः
त्रयोवर्णाश्चलोकांस्त्रीन्वर्द्धयंत्वात्मजैर्गुणैः ७४ क्रतवः संप्रवर्त्तंतादीक्षणीयैर्द्विजातिभिः दक्षिणाश्चोपवर्त्तंतांयथार्हंसर्वस
त्रिणाम् ७५ गाश्चसूर्योरसान्सोमोवायुःप्राणांश्चप्राणिषु तर्पयंतःप्रवर्त्तंतांशिवैःसौम्यैश्चकर्मभिः ७६ यथावदनुपूर्व्येणम
हेंद्रसलिलोद्भवाः त्रैलोक्यमातरःसर्वाःसागरंयांतुनिम्नगाः ७७ दैत्येभ्यस्त्यज्यतांभीश्चशांतिंभजतदेवताः स्वस्तिवोस्तुगमिष्या
मिब्रह्मलोकंसनातनम् ७८ स्वगृहेसर्वलोकेवासंग्रामेवाविशेषतः विश्रंभोहिनमंतव्योनित्यंक्षुद्राहिदानवाः ७९ छिद्रेषुप्रह
रंत्येतेनचैषांसंस्थितिर्ध्रुवा सौम्यानामृजुभावानांभवतांचार्जवंमतिः ८० अहंतुदुष्टभावानांयुष्माकंदुरात्मनाम् असम्य
ग्वर्त्तमानानांमोहदास्यामिदेवताः ८१ यदाचकदुराधर्षदानवेभ्योभयंभवेत् तदासंसुपगम्याशुविधास्येवस्ततोभयम् ८२
वैशंपायनउवाच एवमुक्त्वासुरगणान्विष्णुःसत्यपराक्रमः जगामब्रह्मणासार्द्धंब्रह्मलोकंमहायशाः ८३ एतदाश्चर्यमभ
वत्संग्रामेतारकामये दानवानांचविष्णोश्चयन्मात्वंपरिपृच्छसि ८४ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिका
लनेमिवधोनामाष्टचत्वारिंशोऽध्यायः ४८ जनमेजयउवाच ब्रह्मणादेवदेवेनसार्द्धंसलिलयोनिना ब्रह्मलोकंगतोब्रह्मन्
वैकुंठःकिंचकारह १ किमर्थंचादिदेवेननीतःकमलयोनिना विष्णुर्दैत्यवधेवृत्तेदेवैश्चकृतसत्क्रियः २ ब्रह्मलोकेचकिंस्थान
कंवायोगमुपास्तसः कंवादधारनियमंसविभुर्भूतभावनः ३ कथंतस्यासतस्तत्रविश्वंजगदिदंमहत् श्रियमाप्नोतिविपुलांसुरासु
रनरार्चिताम् ४ कथंस्वपितिघर्मांतेबुध्यतेचाम्बुदप्लवे कथंचब्रह्मलोकस्थोधुरंवहतिलौकिकीम् ५ चरितंतस्यविभोर्दिव्यं
भगवतोदिवि विस्तरेणयथातत्त्वंसर्वमिच्छामिवेदितुम् ६

अयंकमलंयोनिः उत्पत्तिस्थानंयस्यतेन १ नीतोब्रह्मलोकमित्यनुकृष्यते
२ उपास्तउपास्ते ३ आसतः आददानस्यपूजामितिशेषः असगतिदीप्त्यादानेष्वित्यस्यरूपंआसतइति ४ घर्मांते आषाढ्यां अंबुदप्लवेमेघानां
नाशेसतिकार्त्तिक्यामित्यर्थः ५ ६ श्रीगोपालकृष्णायनमः ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रवृत्तयः प्रवृत्तीः कर्माणीतिवचनात् ७ मेमत्सकाशात्तत्त्वविष्णोश्चरितम् ८ एषइति यथातंतुभिः पटः कल्पितः एवंलोकैः हरेः शरीरंकल्प्यते यथाचपटः
केवलंपृथ्वीमयः एवंलोकाः विष्णुमयाः एवंदेवेष्वपियोज्यम् ९ तस्येति लोकानांपारं अतएवतेभ्यः परंच आत्मानंवेद १० देवानांइंद्रियाणां अंधकारआ
वरणंयस्मिन्विषयेवेदानामितिपाठेवाइंद्रियाणांगिरांचाविषयस्येत्यर्थः ११ आर्षेणमंत्रप्रतिपाद्येन १२ प्राक्सवने प्रातःसवने १३ १४ ऋषीणांऋत्विजान्
१५ १६ इज्यंतंइज्यमानंआत्मानंविग्रहांतरंदधानम् १७ १८ यत्सामर्थ्यादिकंकिंहीनितंप्रत्यक्षमपिपरोक्षत्वेनजानंतः कथयंति १९ विदुषःसकाशात्

वैशंपायनउवाच शृणुनारायणस्यादौविस्तरेणप्रवृत्तयः ब्रह्मलोकंयथारूढोब्रह्मणासहमोदते ७ कामंतस्यगतिःसूक्ष्मा
देवैरपिदुरासदा यत्तुवक्ष्याम्यहंराजन्स्तन्मेनिगदतःशृणु ८ एषलोकमयोदेवोलोकाश्चैतन्मयास्त्रयः एषदेवमयश्चैवदेवाश्चै
तन्मयादिवि ९ तस्यपारंनपश्यंतिबहवःपारचिंतकाः एषपारंपरंचैवलोकानांवेदमाधवः १० अस्यदेवांधकारस्यमार्गितव्यस्य
दैवतैः शृणुवैयत्तदावृत्तंब्रह्मलोकेपुरातनम् ११ सगत्वाब्रह्मणोलोकंदृष्ट्वापैतामहंपदम् ववंदेतानृषीन्सर्वान्विष्णुरार्षेण
कर्मणा १२ सोग्निंप्राक्सवनेदृष्ट्वाहूयमानंमहर्षिभिः अवदत्तमहातेजाः कृत्वापौर्वाह्णिकींक्रियाम् १३ सददर्शसखेवाज्यैरि
ज्यमानंमहर्षिभिः भागयज्ञियमश्नानंस्वदेहमपरस्थितम् १४ अभिवाद्यांशिवाद्यानामृषीणांब्रह्मवर्चसाम् परिचक्रामसो
चित्योब्रह्मलोकंसनातनम् १५ सददर्शोच्छ्रितान्यूपान्स्वर्णालाग्रविभूषितान् मखेषुचब्रह्मर्षिभिःशतशःकृतलक्षणान्
१६ आज्यधूमंसमाघ्रायशृण्वन्वेदान्द्विजेरितान् यज्ञेरिज्यतमात्मानंपश्यन्स्तत्रचचारह १७ ऊचुस्तमृषयोदेवाःसदस्याःस
दसिस्थिताः अर्घ्याद्यतपूजाःसर्वेपवित्रांतरपाणयः १८ देवेषुवर्तते यज्ञः तद्धिसर्वजनार्दनात् यत्प्रवृत्तंचदेवेभ्यस्ताद्धिमधु
सूदनात् १९ अग्नीषोममयंलोकंयंविदुर्विदुषोजनाः तंसोममग्निलोकंचवेदविष्णुंसनातनम् २० क्षीराद्यथादधिभवेत् द-
ध्नःसर्पिर्भवेद्यथा मथ्यमानेषुभूतेषुतथालोकोजनार्दनात् २१ यथेंद्रियेश्वभूतेश्चपरमात्माभिधीयते तथादेवेश्चवेदेश्चलो
कैश्चविहितोहरिः २२ यथाभूतेंद्रियावाप्तिर्विहिताक्षविदेहिनाम् तथाप्राणेश्वरावाप्तिर्देवानांदिविविष्णवी २३

वेद भवानितिशेषः
२० भूतेषुदेहेंद्रियादिषुमथ्यमानेषुध्यानबलेनप्रविलाप्यमानेषुसत्सु अंतर्दृष्ट्याजनार्दनात् देवायंलोकोभवतीतिगम्यते ईक्षामात्रनिर्वृत्तत्वाल्लोकस्य अ
त्रक्रमेण अव्याकृतईक्षणजगतांक्रमात् क्षीरदधिसर्पींषिदृष्टांताः २१ इंद्रियभूतेः चेतनाव्याप्तेः परमात्मास्वयमेवगोचरोपिविधीयते अज्ञातोज्ञाप्यते त-
थादेवादिभिरनुग्रहादिकर्तृभिर्विष्णुरित्यर्थः चित्तमात्मनइवनियंतृत्वंविष्णोरेवेतिभावः अभिधीयतेविदितइतिपाठेपिसएवार्थः २२ यथेति जीवानांभूतेंद्रि
यसंबंधोभुविभूतेभ्योयथादृष्टएवंदेवानांप्राणोबलंईश्वरः ऐश्वर्यंतदुभयेनसंबंधोविष्णुतोभवतीत्यर्थः २३ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आत्मवान्स्वतंत्रः मंत्रैर्मंत्रइवोच्यतेइति यथावाचोमाधुर्यंवाचैववर्णनीयंएवंविष्णोः स्वरूपंविष्णुनैवार्चनीयमित्यर्थः २४ २५ मतः ज्ञातः २६ त्वयीति अंतरात्मनि अन्यत्रव्यापृते कृतोपियज्ञोनिष्फलइतिभावः २७ २८ ब्रह्मैवलोकः तत्रस्थः समाधिस्थइत्यर्थः समाहितइवपितामहोसुसुदइत्यर्थः ब्रह्मलोकसहितः पितामहोब्रह्मलोकपितामहः ब्रह्मलोकस्थाअपिविष्णुंभजंति ननुकृतकृत्यत्वाभिमानादुदासतइति अध्यायतात्पर्यम् २९ इति हरिवंशटीकायांएकोनपंचाशोऽध्यायः ४९ ऋषिभिः पौराणपुराणेषु विदितम् ब्रह्मलोकेएववैकुंठकैलासयोरंतर्भावइतिभावः १ २ ३ अंबुपतिभरव्यंसमुद्रतुल्यम् ४ संवर्त्तकांबुदाभिमानिभिर्दैवतैरुपेतम् नक्षत्रस्थानंज्योतिश्चक्रंतेनसंकुलम् तिमिरौघेनपरिक्षिप्तंव्याप्तम् सर्वंतत्रसूक्ष्मा

सत्रिणांसत्रफलदः पवित्रंपरमात्मवान् लोकतंत्रधरोह्येषमंत्रैर्मंत्रइवोच्यते २४ ऋषयऊचुः स्वागतंतेसुरश्रेष्ठपद्मनाभमहाद्युते इदंयज्ञियमातिथ्यमंत्रतःप्रतिगृह्यताम् २५ त्वमस्ययज्ञपूतस्यपात्रंपाद्यस्यपावनः अतिथिस्त्वंहिसत्रोक्तःसदृष्टःसततमतः २६ त्वयियोत्सुगतेविष्णोनप्रावर्त्ततनःक्रियाः अवैष्णवस्ययज्ञस्यनहिकर्मविधीयते २७ सदक्षिणस्ययज्ञस्यत्वत्प्रसूतिःफलंभवेत् अद्यात्मानमिहास्माभिरिज्यमानंनिरीक्ष्यसे २८ एवमस्त्वितितान्सर्वान्भगवान्प्रत्यपूजयत् सुसुदेब्रह्मलोकस्थोब्रह्मलोकपितामहः २९ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिलोकवर्णनेएकोनपंचाशत्तमोऽध्यायः ४९ वैशंपायनउवाच ऋषिभिः पूजितस्तैस्तुविवेशहरिरीश्वरः पौराणंब्रह्मसदनंदिव्यंनारायणाश्रमम् १ सतद्विवेशहृष्टात्मातानामंत्र्यसदोगतान् प्रणम्यचादिदेवायब्रह्मणेपद्मयोनये २ स्वेननाम्नापरिज्ञातंसतंनारायणाश्रमम् प्रविशन्नेवभगवान्आयुधानिव्यसर्ज्जयत् ३ सतत्राबुंपतिप्रख्यंददर्शालयमात्मनः स्वधिष्ठितंदेवगणैः शाश्वतैश्चमहर्षिभिः ४ संवर्त्तकांबुदोपेतंनक्षत्रस्थानसंकुलम् तिमिरौघपरिक्षिप्तमप्रधृष्यंसुरासुरैः ५ नतत्रविषयोवायोर्नेंदोर्नचविवस्वतः वपुषःपद्मनाभस्यसदेशस्तेजसावृतः ६ सतत्रप्रविशन्नेवजटाभारंसमुद्वहन् सहस्रशीर्षोभूत्वातुशयनायोपचक्रमे ७

विवसूक्ष्मरूपेणाविद्यमानमपिअविद्ययाआवृतम् अतएवसुरासुरैरप्रधृष्यं अगम्यम् यथावटबीजोदरेकृत्स्नोवटोस्ति अथचतन्नदृश्यतेएवंतत्रहरिमंदिरेकृत्स्नंब्रह्मांडमस्त्दपिनदृश्यते ५ तर्हिनतत्रतत्सत्वेकिंमानमतआह नतत्रेति अनात्मज्योतिषातन्नप्रकाशतेऽपितु आत्मज्योतिषैवेत्यर्थः यथाहिनिद्रावस्थायांसर्वंसूक्ष्मरूपेणासदपिनभाति कदाचित्तुस्वप्नेआत्मज्योतिषाभात्यपि अतएवस्वप्नावस्थामधिकृत्योक्तम् आत्मनैवायंज्योतिषास्तेपल्ययतेविपर्येतीति एवंअधिदैवमपिज्ञेयमितिभावः ६ पूर्वंसहस्रशीर्षाभूत्वातद्विश्वरूपत्वलक्षणंसहस्रशिरस्त्वंत्यक्त्वापिजटाभारस्थानीयंलोककर्मवासनाजालंउद्वहन्शयनंकृतवान् अतए

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

तद्वहन्सोपिधृत्वासूक्ष्मताथपिकार्यलिंगेनवासनास्तीतिगम्यते ७ ८

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कालीकृष्णवर्णासूक्ष्मस्याप्यावरणकर्त्री ८ शिष्येशयनंकृतवान् शयनेसमाधौ क्षीरसमुद्रोनिर्विकल्पः अंभोदःसविकल्पः तदुभयरूपतयानिस्तापे ए
कार्णवोक्तेनव्रतेननिर्विकल्पसमाध्यर्थमुक्तेनव्रतेनसंयमेन ९ जगतोभवायेति अहिंसाप्रतिष्ठायांतत्सन्निधौवैरत्यागइत्येकैकस्ययोगांगस्यनिर्वैरत्वा
दिकंफलंपरत्रस्मर्यते पूर्णस्यतुयोगस्यजगतोभवार्थत्वमुपपन्नतरमितिभावः देवाऋषयश्चाध्यात्मंइंद्रियाणिप्राणाश्चउपासांचक्रिरे केवलंसमीपेस्थिताः
नतुस्वकार्यभोगंनिर्वर्त्तयंतीत्यर्थः १० मातुर्नाभिदेशादुद्भूतंनालंतत्पुष्पेणसंयुज्यते पुष्पंचरेतःसंसर्गाद्गर्भोभवति सचगर्भोमातृभक्तान्नरसेननालद्वारा
पुष्टोभवति ततःपक्वफलन्यायेनवृंताद्गर्भश्च्युतोभवति एवंविष्णोःसकाशादुद्भूतोब्रह्मा वैष्णव्यामाययापुष्टःसन् विष्णुतःच्युतोभूत्वात्मानंततोन्यंमन्य
तइति तदेतत्कथारूपकेणवर्णयतितस्येति नाभिमध्यात्समुत्थितनालद्वारेणाविर्भूतंआद्यंतस्यआद्यंतवतः ब्रह्मणोवेधसः आसनंआश्रयःपद्मंपद्मको

लोकानामंतकालज्ञाकालीनयनशालिनी उपतस्थेमहात्मानंनिद्रातंकालरूपिणी ८ सशिष्येशयनेदिव्येसमुद्रांभोदशीत
ले हरिरेकार्णवोक्तेनव्रतेनव्रतिनांवरः ९ तंशयानंमहात्मानंभवायजगतःप्रभुम् उपासांचक्रिरेविष्णुंदेवाःसर्षिगणास्तथा १०
तस्यसुप्तस्यसुशुभंनाभिमध्यात्समुत्थितम् आद्यंतस्यासनंपद्मंब्रह्मणःसूर्यवर्चसम् सहस्रपत्रंवर्णाढ्यंसुकुमारंविभूषित
म् ११ ब्रह्मसूत्रोद्यतकरःस्वपन्नेवमहामुनिः आवर्त्तयतिलोकानांसर्वेषांकालपर्ययम् १२ विवृतात्तस्यवदनान्निःश्वासप
वनेरिताः प्रजानांपक्तयोह्यस्यनिष्पतंत्युत्पतंतिच १३ तेसृष्टाःप्राणिनोमेध्याविभक्ताब्रह्मणास्वयम् चतुर्द्धास्वांगतिंजग्मुः
कृतांतोक्तेनकर्मणा १४ नतंवेदस्वयंब्रह्मानापिब्रह्मर्षयोव्ययाः विष्णुंनिद्रामयंयोगंप्रविष्टंतमसावृतम् १५ तेतुब्रह्मर्षयःस
र्वेपितामहपुरोगमाः नविदुस्तंक्वचित्सुप्तंक्वचिदासीनमासने १६

शाकारंब्रह्मांडम् ११ ब्रह्मणःइदानींतनस्य सूत्रंप्राग्भवीयोवासनातंतुः सएवउद्यतकरस्थानीयोयस्यसः स्वपन्नेवस्वास्थ्यादप्रच्युतएवसन्
लोकानांकालकृतंपर्ययंऊर्ध्वाधरीभावंआवर्त्तयति अयस्कांतन्यायेनसत्तामात्रादकुर्वतएवसकाशात्लोकस्वाभाव्यादेवसृष्ट्यादयोजायंतइतिभा
वः १२ तस्यब्रह्मणः एवंयथानारायणाद्ब्रह्माऽभवदेवंब्रह्मणःसकाशादन्येप्यभूवन्नित्यर्थः १३ मेध्याः यज्ञार्हाः ब्राह्मणा अपिकर्मभेदात् ब्रह्मणाच
तुर्द्धाब्रह्मक्षत्रविट्शूद्ररूपेणविभागंप्रापिताः स्वांगतिंपरमप्राप्यंईश्वरंकृतांतोक्तेनकृतसिद्धांतेनवेदेनउक्तंयत्कर्मतेनसर्वोपिवर्णःस्वधर्मनिष्ठोमुच्य
तइत्यर्थः १४ नतमिति विष्णोर्निद्रामयंअविद्याशबलमपिरूपंदुर्ज्ञेयंकिमुतशुद्धमितिभावः योगंप्रविष्टंस्वरूपेएवसमाहितम् १५ क्वचिद्देशेकालेवा
सुप्तंस्वक्तव्यवहारं आसीनंउपात्तव्यवहारंवानविदुः सृष्टिप्रावण्यात्योगस्याविचारस्यचाभावादितिभावः १६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

केचिद्विचारयंतीत्याहजागर्त्तीति अत्रदेहेकोजागर्त्तिइंद्रियैर्विषयानुपलभते सभूतयोगाज्जातोमंदशक्तिस्तुल्यश्चेतनोनान्यइतिलोकायतमाशं-
क्याहकःशेतेइति सुप्तावपिभूतयोगस्यसत्वाद्विषयोपलब्ध्यापत्तेर्भूतेभ्योन्यआत्मेत्यर्थः स्मृतावन्तुपात्रकरणत्वेनविषयाननुभवत्मनएवतद्धर्मात्मा
स्त्वित्याशंक्याह कश्चशक्तश्चनेंगतइति विनापिकरणानुग्रहम् स्वप्नेमनसोविषयावभासफलंदृष्टंतच्चवाह्यौघ्यवत्तुदुस्त्यजं अतस्ततोप्यन्यआत्मेत्य
र्थः शक्तःसन्नेंगतेस्वशक्यंकार्यंनकरोतीत्यन्येतन्नयुज्यतइतिपदार्थः मनसःकरणांतरवत्स्वप्रवृत्तिनिवृत्त्योःस्वातंत्र्याभावात् तन्नियामकाबुद्धिरेव
आत्मास्त्वित्याशंक्याह कोभोगवानिति बुद्धेश्चनित्यपरिणामत्वेनकालांतरीयायाः कालांतरेऽभावात् योहंबाल्येइदंफलमभौक्षंसएवयौवनेद्राक्षंसए
वेदानींरसयामीतिबुद्धिभेदेपिआत्मैक्यप्रत्यभिज्ञानात्ततोन्योभोक्तेत्यर्थः अस्तुतर्ह्यहंसुखीत्यनुभवादहंकारएवात्मेतिपक्षमहंगौरइत्यनुभवाद्देह-
स्याप्यात्मतापत्तेरहंकारस्यापिसुषुप्त्यादावदर्शनाच्चाऽप्रदर्शयन्शून्यमेवात्मास्त्वित्याशंक्याहकोद्युतिमानिति सुषुप्तावात्माभावेसुखमहमस्वाप्संनकिंचि

जागर्त्तिकोत्रकःशेतेकश्चशक्तश्चनेंगते कोभोगवान्कोद्युतिमान् कृष्णात्कृष्णांतरश्चकः १७ विमृशंतिस्मतंदेवादिव्याभि
रुपपत्तिभिः नचैनंशेकुरन्वेष्टुकर्मतोजन्मतोपिवा १८ गाथाभिस्तत्वादिष्टाभिर्येतस्यचरितंविदुः पुराणास्तुपुराणेषुऋषयः
संप्रचक्षते १९ श्रूयतेचास्यचरितंदेवेष्वपिपुरातनम् महापुराणात्प्रभृतिपरंतस्यनविद्यते २० यच्चास्यदेवदेवस्यचरितंस्वप्र
भावजम् तेनेमाःश्रुतयोव्याप्तावैदिक्योलौकिकाश्चयाः २१

दयेदिषमितिसुषुप्तिकालीनसुखाज्ञानयोरननुभूतयोःपरामर्शायोगात् तदनु
भवश्चनतदात्मप्रकाशास्तित्वमंतरेणसंभवतीति अस्तिशून्यसाक्षीआत्मासद्रूपइतिभावः अस्तुतर्ह्ययंसाक्षीपुरुषांतरस्यपुरुषांतरेहंसुखीत्यादिव्यव-
हाराभावात्प्रतिशरीरंभिन्नःक्लेशकर्मविपाकाशयैरपरामृष्टःपुरुषविशेषादीश्वराच्चविलक्षणोबंधमोक्षादिभागीत्याशंक्याह कृष्णात्कृष्णांतरश्चकइति शब्दा
दिहीनत्वात्सांख्यमतेप्रधानंअतिसूक्ष्मंव्यवहारतएव वस्तुतस्तुत्रिगुणात्मत्वेनसंहतात्तस्मादसंहतःपुरुषएवसूक्ष्मः नहिततोपिसूक्ष्मईश्वरइतिपातंजलाअप्य
भ्युपगच्छंति श्रुतिश्चनान्योतोस्तिद्रष्टेतिद्रष्टंतरंनिषेधतीतिनसाक्षिणोन्यःकश्चिदात्मास्तीत्यर्थः बंधमोक्षादिव्यवस्थातुतर्कमतेप्यात्मैक्येपिउपाधिभेदात्श
क्यग्रहव्यवस्थावद्भविष्यति क्लेशादिसंबंधस्तुवास्तवःकस्यापिनास्तीतिनात्मभेदोनात्मनोऽनीश्वरत्वंचास्तीतिसर्वमनवद्यंकृष्णात्कृशादित्यर्थः कृशोरेणादि
कनप्रत्ययांतस्येदंरूपंकृष्णइति १७ दिव्याभिःश्रौतीभिःउपपत्तिभिर्युक्तिभिः १८ गाथाभिःयदक्षरंपंचविधंसमेतीत्यादिभिर्मंत्रैः तत्वादिष्टाभिः तेनपरमा-
त्मनानिश्वसितरूपेणनिर्दिष्टाभिः तथाचश्रुतिः अस्यमहतोभूतस्यनिश्वसितमेतद्यदृग्वेदोयजुर्वेदइत्यादि १९ २० २१ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भवति आविर्भवति २२ आविर्भावकालेप्ययंआषाढीमारभ्यकार्त्तिकीपर्यंतंस्वपितीत्याह यत्रैनमिति २३ यज्ञगतिर्यज्ञप्राप्यल्लोकः २४ शारदिप्रवृत्तोय
ज्ञोशारदिवाजपेयेनयजेतेत्यादिश्रुतेर्वाजपेयादिर्यस्येति यज्ञप्रवृत्तावेवायंप्रतिबुध्यते नत्वयज्ञस्येत्यर्थः २५ अतएववार्षिकंवर्षर्तौभवंइदंचक्रंयज्ञवर्ज
नरूपोजलधर्मः भाद्रपदीमारभ्यशरदिपितृयज्ञादीनांप्रवृत्तिदर्शनात् २६ विष्णोःप्रबोधेयज्ञोनिमित्तमित्युक्तम् निद्रायांनिमित्तमाह याहीति गन्ह-
रातमोमयी अकस्मात्निर्निमित्तम् महीक्षितांराज्ञां अन्योन्यंयुध्यतांयदाविनाशस्तदाविष्णुःस्वपितिहिंसादिदोषादयादित्यर्थः २७ इयमेवतामसीनि

भवकालेभवत्येषलोकानांलोकभावनः दानवानामभावायजागर्त्तिमधुसूदनः २२ यत्रैनंवीक्षितुंदेवानशेकुःकृष्णमव्ययम् त
तःस्वपितिधर्मात्माजागर्त्तिजलदक्षये २३ सहिवेदाश्चयज्ञाश्चयज्ञांगानिचसर्वशः यातुयज्ञगतिःप्रोक्तासएवपुरुषोत्तमः २४ त
स्मिन्सुप्तेनवर्त्तंतेमन्त्रपूताःक्रतुक्रियाः शरत्प्रवृत्तयज्ञोयंजागर्त्तिमधुसूदनः २५ तदिदंवार्षिकंचक्रंकारयत्यंबुदेश्वरः वैष्णवंक
र्मकुर्वाणःसुप्तेविष्णौपुरंदरः २६ याह्येषागह्वरामायानिद्रेतिजगतिस्थिता साऽकस्माद्द्वेषिणीघोराकालरात्रिर्महीक्षिताम् २७
तस्यास्तत्तुस्तमोद्वारानिशादिवसनाशिनी जीवितान्तहराघोरासर्वप्राणभृतांभुवि २८ नैतयाकश्चिदाविष्टोजृंभमाणोमुहुर्मुहुः
शक्तःप्रसहितुंवेगंमज्जन्निवमहार्णवे २९ अन्नजाभुविमर्त्यानांश्रमजावाकथंचन सैषाभवतिलोकस्यनिद्रासर्वस्यलौकिकी ३०
त्वमाते क्षीयतेह्येषाप्रायशोक्ष्मविदेहिनाम् मृत्युकालेचभूतानांप्राणान्नाशयतेभृशम् ३१ देवेष्वपिदधारैनानान्योनारायणा
दृते सरवीसर्वहरस्यैषामायाविष्णुशरीरजा ३२ सैषानारायणमुखेदृष्टाकमललोचना लोकानल्पेनकालेनग्रसतेलोकमोहि
नी ३३ एवमेषाहितार्थायलोकानांकृष्णवर्त्मना ध्रियतेसेवनीयाहिपत्न्येवचपतिव्रता ३४ सतयानिद्रयाच्छन्नस्तस्मिन्नाराय
णाश्रमे शेतेविभुःसदाविष्णुर्मोहयन्जगदव्ययः ३५ तस्यवर्षसहस्राणिशयानस्यमहात्मनः जग्मुःकृतयुगंचैवत्रेताचैवयु
गोत्तमम् ३६ सतुद्वापरपर्यंतेज्ञात्वालोकान्सुदुःखितान् प्राबुध्यतमहातेजाःस्तूयमानोमहर्षिभिः ३७ ऋषयऊचुः
जहीहिनिद्रांसहजांभक्तपूर्वामिवस्रजम् इमेतेब्रह्मणासार्द्धंदेवादर्शनकांक्षिणः ३८

शारूपेण निद्रारूपेणचसर्वान्मोहयतीत्याह
तस्याइत्यादिना २८ २९ ३० ३१ सर्वहरस्यकालस्यैषासखी ३२ ३३ एवमभिहितंभक्तस्यान्नादेःसम्यक्पाकःश्रमपरिहारश्चेत्यादिः तदर्थायसेव
नीयायतइत्थंकृष्णवर्त्मनासूक्ष्ममार्गेणपरमेश्वरेणध्रियते मन्निद्रयामदुदरस्थोलोकःसर्वोपिविश्रम्यतामित्याशयवतेत्यर्थोतःपत्न्यापतिव्रतेवस्व
स्वार्थिनासेवया ३४ एवंमहानिद्राप्रसंगाद्वार्षिकांदैनंदिनींचईशस्यजीवस्यनिद्रांप्रपञ्च्यतामेवमहानिद्रामनुसंधत्तेसतयेत्यादिना ३५ ३६ ३७ ३८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा० ह० टी०
७६

अ० प०
५० १

३९ भूर्व्योमेति भूम्याद्यधिष्ठात्रीणां देवतानाम् ४० ४१ ४२ जलं अखंडानंदं संक्षिप्य उपाध्यावेशेन अल्पीकृत्य तिमिरौघं शरीरभासा विदारयन्
४३ ४४ ४५ कस्य देवस्य केन अर्थेन कार्यप्रयोजनम् किंवा सामर्थ्यम् ४६ ४७ ४८ इति हरिवंशटीकायां पंचाशत्तमोऽध्यायः ५० तच्छ्रुत्वा
१ कर्णो नौकापरिवर्त्तकरो महान् दंडः तस्य धारः कर्णधारस्तद्वदिति लुप्तोपमा २ ३ ४ षष्ठं भागं षड्भागम् ५ सुकरैर्यथोचितैः करग्रहैः विशेषेण

इमे त्वां ब्रह्मविद्वांसो ब्रह्मसंस्तववादिनः वर्द्धयंति हृषीकेश ऋषयः संशितव्रताः ३९ एतेषामात्मभूतानां भूतानां भूतभावन
भूर्णु विष्णो सुभावाचो भूर्व्योमाग्न्यनिलाम्भसाम् ४० इमे त्वा सनत्सुनयः सहिता मुनिमंडलैः स्तुवंति देव दिव्याभिर्गाथाभिर्गी
र्भिरजसा ४१ उत्तिष्ठ शतपत्राक्ष पद्मनाभ महाद्युते कारणं किंचिदुत्पन्नं देवानां कार्यगौरवात् ४२ वैशंपायन उवाच स
संक्षिप्य जलं सर्वं तिमिरौघं विदारयन् उदतिष्ठद्धृषीकेशः श्रिया परमया ज्वलन् ४३ स ददर्श सुरान्सर्वान्समेतान्सपितामहान् विवक्ष
तः प्रक्षुभितान्जगदर्थे समागतान् ४४ तानुवाच हरिर्देवो निद्राविध्यातलोचनः तत्त्वदृष्ट्यार्थया वाचा धर्महेत्वर्थयुक्तया ४५ श्रीभग
वानुवाच कुतो वो विग्रहो देवाः कुतो वा भयमागतं कस्य वा केन वा कार्यं किं वा मयि निवर्त्तते ४६ किंस्वित्क्वकुशलं लोके वर्त्तते दानवोत्थि
तम् नृणामायासजननं शीघ्रमिच्छामि वेदितुम् ४७ एष ब्रह्मविदां मध्ये विहाय शयनोत्तमम् शिवाय भवतामर्थे स्थितः किंकरवा
णि वः ४८ इति श्रीमहाभारते खिलेषु हरिवंशे हरिवंशपर्वणि विष्णोर्योगशयनोत्थानं नाम पंचाशत्तमोऽध्यायः ५० वैशंपायन
उवाच तच्छ्रुत्वा विष्णुगदितं ब्रह्मा लोकपितामहः उवाच परमं वाक्यं हितं सर्वदिवौकसाम् १ नास्ति किंचिद्भयं विष्णो सुराणामसु
रान्तक येषां भवान् भयदः कर्णधारो रणे रणे २ शक्रे जयति देवेश त्वयि चासुरसूदन धर्मे प्रयतमानानां मानवानां कुतो भयम् ३ स
त्यधर्मे च निरतान्मानवान्विगतज्वरान् नाकाले धर्मिणो मृत्युः शक्नोति प्रसमीक्षितुम् ४ मानवानां च पतयः पार्थिवाश्च परस्परम्
षड्भागमुपभुंजाना न भेदं कुर्वते मिथः ५ ते प्रजानां शुभकराः करदैरवगाहिताः सकरैर्विप्रयुक्तार्थाः कोशानापूरयन्त्युत ६ स्फीतान्ज
नपदान्सर्वान्पालयंतः क्षमापराः अतीक्ष्णदंडाश्चतुरो वर्णान्जुगुपुरंजसा ७ नोद्वेजनीया भूतानां सचिवैः साधुपूजिताः चतुरंग
बलैर्गुप्ताः षड्गुणानुपभुंजते ८ धनुर्वेदपराः सर्वे सर्ववेदेषु निष्ठिताः यजंते च यथाकालं यज्ञैर्विपुलदक्षिणैः ९

प्रयुक्तार्थाः बहुकरग्रहो
हि राजा प्रजा उद्वासयन्न कोशवृद्धिकरो भवति एते तु न तथा सन्त्वित्यर्थः ६ अंजसा साकल्येन ७ नोद्वेजनीयाः अनुद्वेजकाः संतः षड्गुणान् नीतिशा- ७६
स्त्रोक्तान् संधिविग्रहयानासनद्वैधीभावसमाश्रयाख्यान् उपभुंजते सेवंते ८ ९ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वेदानधीत्यमहर्षीन्दीक्षाभिर्नियमग्रहणैः चर्यायायज्ञक्रियायाच ब्रह्महिरण्यगर्भाख्यंसर्वदेवतामयंतर्पयंति १० एषांनृपाणाम् ११ परेअवरेच्चब्रह्म
णिदृष्टार्थाजातप्रत्ययाः कृतयुगंपापलेशेनाप्यननुविद्धंकृत्स्नधर्मम् १२ यथार्थयावत्प्रयोजनम् १३ १४ १५ तर्पयत्कृदृष्याद्दिनेतिशेषः १६ १७ नराधि
पैः रूपैःस्वशरीरैःयुगांतोवन्हिस्तत्सदृशैः पीड्यमानेत्यन्वयः आसन्नविप्लवाउपस्थितविनाशा १८ शैलोच्चलितबंधनायथासमुद्रेलोहमयैर्लांगलैर्निरुद्धा
सतीमहतापिवायुनानचाल्यते तद्वत्पृथिवीपर्वतैर्जलमध्येधृतास्ति इदानींशैलरूपाणिउच्चलितानिबंधनानियस्यास्तथाविधाभूत् अतएवजलस्यउत्पीडा

वेदानधीत्यदीक्षाभिर्महर्षीन्ब्रह्मचर्यया आद्यैश्वमेधैःशतशस्तर्प्पयंतिपितामहान् १० नेषामविदितंकिंचित्त्रिविधंकविदृश्यते
वैदिकंलौकिकंचैवधर्मशास्त्रोक्तमेवच ११ तेपरावरदृष्टार्थामहर्षिसमतेजसः भूयःकृतयुगंकर्त्तुमुत्सहंतेनराधिपाः १२ तेषामेवप्र
भावेणशिवंवर्षतिवासवः यथार्थंचवहुर्वाताविरजस्कादिशोदश १३ निरुत्पाताचवसुधासुप्रचाराश्चखेग्रहाः चंद्रमाश्चसनक्षत्रः
सौम्यंचरतियोगतः १४ अनुलोमकरःसूर्यस्त्वयनेद्वेचचारह हव्यैश्चविविधैस्तृप्तः शुभगंधोहुताशनः १५ एवंसम्यक्प्रवृत्तेषुवि
वृद्धेषुमखादिषु तर्पयत्सुमहींकृत्स्नांनृणांकालभयंकुतः १६ तेषाज्वलितकीर्त्तीनामन्योन्यवशवर्त्तिनाम् राज्ञांबलैर्बलवतांपीड्य
तेवसुधातलम् १७ सेयंभारपरिश्रांतापीड्यमानानराधिपैः पृथिवीसमनुप्राप्तानौरिवासन्नविप्लवा १८ युगांतसदृशैरूपैःशैलो
च्चलितबंधना जलोत्पीडाकुलास्वेदंधारयंतीमुहुर्मुहुः १९ क्षत्रियाणांवपुर्भिश्चतेजसाचबलेनच नृणांचराष्ट्रैर्विस्तीर्णैःश्राम्यतीव
वसुंधरा २० पुरेपुरेनरपतिःकोटिसंख्यैर्बलैर्वृतः राष्ट्रेराष्ट्रेचबहवोग्रामाःशतसहस्रशः २१ भूमिपानांसहस्रैश्चतेषांचबलिनांबलैः
ग्रामासुताघैराष्ट्रैश्च भूमिर्निर्विवराकृता २२ सेयंनिरामयंकृत्वानिश्वेष्टाकालमग्रतः प्राप्तासमालयंविष्णोभवांश्चास्याःपरागतिः
२३ कर्मभूमिर्मनुष्याणांभूमिरेषाव्यथांगता यथानसीदेत्तत्कार्यंजगत्येषाहिशाश्वती २४ अस्याहिपीडनेदोषोमहान्स्यात्म
धुसूदन क्रियालोपश्चलोकानांपीडितंचजगद्भवेत् २५ श्राम्यतेव्यक्तमेवेयंपार्थिवौघप्रपीडिता सहजायाक्षमात्यक्त्वाचलत्व
मचलागता २६ तदस्याःश्रुतवंतस्मतच्चापिभवताश्रुतम् भारावतरणार्थंहिमंत्रयामसहत्वया २७ सत्पथेहिस्थिताःसर्वेराजा-
नोराष्ट्रवर्द्धनाः नराणान्चत्रयोवर्णाब्राह्मणाननुयायिनः २८

उपर्यागमनेनयापीडातयाआकुलास्वेदंआर्द्रताम् १९ २० २१ निर्विवरानिरुच्छ्वासा
२२ सेयंभूमिर्निरामयंकालंअग्रतःकृत्वा निश्चेष्टासतीममालयंप्राप्तेत्यन्वयः यत्रआश्रयोपिप्रजानांनास्तिकुतोमृत्युस्तंकालंनिमित्तीकृत्य तत्कृतंबहुभार
लंप्राप्यवहनासमर्थाश्रांतवाहसदृशीसतीत्यर्थः २३ नसीदेत्लोष्टवद्बहुभारेणनविशीर्येतजगतीजगदाधारभूता २४ २५ २६ २७ २८ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१५ १६ १७ तेजसादुष्टराजादिरूपेण १८ उपयास्येउपयामि १९ ककुद्मिनंधरंधरंउपलक्षयेजानामि २० पुराणस्यपणस्य कार्षापणादिव्यवहारप्रवृत्तेः प्रागित्यर्थः संक्षिप्तासस्यकृद्दृष्टा असुरौमधुकैटभौकृताविति पाठेपिहताविव्येवार्थः २१ तयोरुत्पत्तिमाह कर्णेति स्रोतोद्भवौस्रवतीतिस्रोतःमलम् तदुद्भवौसंधिरार्षः विष्णुकर्णमलोद्भूताविन्यन्यत्रदृष्टम् काष्ठकुड्यसमौअचेतनौ २२ वायुःप्राणरूपी २३ पर्यमृशत्पस्पर्श २४ २५ २६

यत्त्वयाधार्यतेकिंचित्तेजसाचबलेनच ततस्तवप्रसादेनमयायत्नाच्चधार्यते १५ त्वयाधृतंधारयामिनाधृतंधारयाम्यहम् नहितद्विद्यतेभूतंयत्त्वयानानुधार्यते १६ त्वमेवकुरुषेदेवनारायणयुगेयुगे ममभारावतरणंजगतोहितकाम्यया १७ तवैवतेजसाक्रांतारसातलतलंगताम् त्रायस्वमांसुरश्रेष्ठत्वामेवशरणंगताम् १८ दानवैःपीड्यमानाहंराक्षसैश्चदुरात्मभिः त्वामेवशरणंनित्यमुपयास्येसनातनम् १९ तावन्मेस्तिभयंभूयोयावन्नत्वांककुद्मिनम् शरणंयामिमनसाशतशोप्युपलक्षये २० अहमादौपुराणस्यसंक्षिप्तापद्मयोनिना माचवध्यौकृतौपूर्वंमृन्मयौद्वौमहासुरौ २१ कर्णस्रोतोद्भवौतौहिविष्णोरस्यमहात्मनः महार्णवेप्रस्वपतःकाष्ठकुड्यसमौस्थितौ २२ तौविवेशस्वयंवायुर्ब्रह्मणासाधुचोदितः दिवंप्रच्छादयंतौतुववृधातेमहासुरौ २३ वायुःप्राणौतुतौगृह्यब्रह्मापर्यमृशच्छनैः एकंमृदुतरंमेनेकठिनंवदचापरम् २४ नामनीतुतयोश्चक्रेसविभुःसलिलोद्भवः मृदुस्त्वयंमधुर्नामकठिनःकैटभोऽभवत् २५ तौदैत्यौकृतनामानौचेरतुर्बलदर्पितौ सर्वमेकार्णवंलोकंयोद्धुकामौसुदुर्जयौ २६ तावागतौसमालोक्यब्रह्मालोकपितामहः एकार्णवांबुनिचयेतत्रैवांतरधीयत २७ सपद्मेपद्मनाभस्यनाभिमध्यात्समुत्थिते रोचयामासवसतिंगुह्यांब्रह्माचतुर्मुखः २८ तावुभौजलगर्भस्थौनारायणपितामहौ बहून्वर्षगणानप्सुशयानौनचकंपतुः २९ अथदीर्घस्यकालस्यतावुभौमधुकैटभौ आजग्मतुस्तमुद्देशंयत्रब्रह्माव्यवस्थितः ३० दृष्ट्वातावसुरौघोरौमहाकायौदुरासदौ ब्रह्मणाताडितोविष्णुःपद्मनालेनवैतदा उत्पपाताथशयनात्पद्मनाभोमहाद्युतिः ३१ तद्युद्धमभवद्घोरंतयोस्तस्यचवैतदा एकार्णवेतदालोकेत्रैलोक्येजलतांगते ३२ तदाभूत्तुमुलंयुद्धंवर्षसंख्यासहस्रशः नचतावसुरौयुद्धेतदाश्रममवापतुः ३३ अथातोदीर्घकालस्यतौदैत्यौयुद्धदुर्मदौ ऊचतुःप्रीतमनसौदेवंनारायणंहरिम् ३४

२७ २८ नारायणःपिता महोयोस्तौ २९ ३० ३१ ३२ वर्षाणांसंख्यायस्मिन्युद्धेसहस्रैःसंख्याइतितत् वर्षसंख्यासहस्रशः ३३ अथअनंतरम् अतःयुध्यतोस्तयोर्नारायणस्यचश्रमाभावात्युद्धान्निर्विण्णाविति भावः ३४ श्रीगोपालकृष्णायनमः ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२९ ३० भारनिर्णये भारस्यपरिहरणेनिमित्ते ३१ ३२ ३३ इतिहरिवंशेटीकायांएकपंचाशत्तमोऽध्यायः ५१ बाढम् दुर्दिनहेतुत्वाद्दुर्दिनोमेघ
स्तदाकारस्तद्रूपः सदुर्दिनः गर्जन्मेघसहितः कृत्स्नंउदरम् कृत्स्नंसर्वांबुकुक्षिषुइतिमेदिनी जटामंडलसहितंबिभ्रत्पाठांतरेस्पष्टोर्थः २ रोमांचाःशे
ष्याःसुच्छायाः तैः कृत्वाउद्धृताराजयोरेषाइवतद्वान्स्तनद्वयमुखपर्यंतंअंचितम् रश्मिद्वारास्वतोवापसर्पणंयस्यसःस्तनद्वयमुखांचितः ३ ४ पद्मयोनिर्ग-
तानुगोनुगामीयस्यतम् ५ रत्नपर्वतंमेरुम् कामरूपिणीयथासंकल्पितंतथारूपधारिणीम् ६ वज्रसंधानतोरणांरत्नखचितबहिर्द्वाराम् ७ मनोनिर्माण

सर्वसत्यपरंवाक्यंवर्णाधर्मपरास्तथा सर्ववेदपराविप्राःसर्वेविप्रपरानराः २९ एवंजगतिवर्त्तंतेमनुष्याधर्मकारणात् यथाधर्मवधो
नस्यात्तथामंत्रःप्रवर्त्यताम् ३० सतांगतिरियंनान्याधर्मस्यास्याःसुसाधनम् राज्ञांचैववधःकार्योधरण्याभारनिर्णये ३१ तदा
गच्छमहाभागसहदेवैमत्कारणात् धजामोमेरुशिखरंपुरस्कृत्यवसुंधराम् ३२ एतावदुक्त्वाराजेंद्रब्रह्मालोकपितामहः पृथिव्या
सहविश्वात्माविरराममहाद्युतिः ३३ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणि भारावतरणेएकपंचाशत्तमोऽध्या-
यः ५१ वैशंपायनउवाच बाढमित्येवसहते दुर्दिनांभोदनिःस्वनः प्रतस्थेदुर्दिनाकारःसदुर्दिनइवाचलः १ समुक्तामणि
विद्योतःसचंद्रांभोदवर्चसम् सजटामंडलंकृत्स्नंबिभ्रत्कृष्णोवपुर्हरिः २ सचास्योरसिविस्तीर्णेरोमांचोद्धृतराजिमान् श्रीवत्सोराज
तेश्रीमान्स्तनद्वयमुखांचितः ३ पीतेवसानोवसनेलोकानांगुरुरव्ययः हरिःसोऽभवदालक्ष्यःससंध्याभ्रइवाचलः ४ तंव्रजंतस्वरूप
णेनपद्मयोनिगतानुगम् अनुजग्मुःसुराःसर्वेतद्गतासक्तचक्षुषः ५ नातिदीर्घेणकालेनसंप्राप्तारत्नपर्वतम् ददृशुर्देवतास्तत्र
तांसभांकामरूपिणीम् ६ मेरोःशिखरविन्यस्तांसंयुक्तांसूर्यवर्चसा कांचनस्तंभरचितांवज्रसंधानतोरणाम् ७ मनोनिर्माणचित्रा-
ढ्यांविमानशतमालिनीम् रत्नजालांतरवतींकामगांरत्नभूषिताम् ८ सर्वरत्नसमाकीर्णांसर्वर्त्तुकुसुमोत्कराम् देवमायाधृरादि
व्यांविहितांविश्वकर्मणा ९ तांहृष्टमनसःसर्वेयथास्थानंयथाविधि यथानिदेशंत्रिदशाविविशुस्तांसभांशुभाम् १० तेनिषेदुर्य
थान्तेषुविमानेष्वासनेषुच भद्रासनेषुपीठेषुकुथास्वास्तरणेषुच ११ ततःप्रभंजनोवायुर्ब्रह्मणासाधुचोदितः माशब्दमितिसं
दिदेशसभां तास्सभास्थिताम् १२ निःशब्देस्तिमिततस्मिन्समाजेत्रिदिवौकसाम् प्रभाषेधरणीवाक्यंखेदात्करुणभाषिणी १३ ध
रण्युवाच त्वयाधार्याह्यहंदेवत्वयावैधार्यतेजगत् त्वंधारयसिभूतानिभुवनानिबिभर्षिच १४

चित्राढ्याम् स्वसंकल्पोत्थविचित्रर- ७७
चनावतीम् ८ ९ १० कुथासुकुथः स्त्रीपुंसयोर्वर्णकंबलेपुंसिबर्हिषीतिविश्वः ११ माशब्दंकुरुतेतिवदन्नितिशेषः १२ १३ १४ ७७ ७७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३५ विहितौसुतौब्रह्मणेतिशेषः ३६ सतुगृह्येति ३७ ३८ ३९ कुत्रप्रजा असृजदित्यपेक्षायामाहदैत्ययोरिति ४० विषाणेनदंष्ट्राग्रेण ४१ ४२
४३ गुरुःकारणम् गवांरश्मीनाम् ४४ एतत्सर्वमयासहितम् ४५ ४६ समारोप्यरणस्तंभमितिशेषः ४७ ४८ वीरस्यरणेहतस्य पत्नीतस्याःव्रतं ५२ १

प्रीतौस्वस्तवयुद्धेनश्लाघ्यस्त्वंमृत्युरावयोः आवांजहिनयत्रोर्वीसलिलेनपरिप्लुता ३५ हतौचतत्पुत्रत्वंप्राप्नुयावःसुरोत्तम
यो ह्यावांयुधिनिर्जेतातस्यावांविहितौसुतौ ३६ सतुगृह्यमृधेदोर्भ्यांदैत्यौतावभ्यपीडयत् जग्मतुर्निधनंचापितावुभौमधुकैट
भौ ३७ तौहतौचाप्लुतौतोयेवपुर्भ्यामेकतांगतौ मेदोमुमुचतुर्दैत्यौमथ्यमानौजलोर्मिभिः ३८ मेदसातज्जलंव्याप्तंताभ्यामंत
र्दधेततः नारायणश्चभगवानसृजत्सपुनःप्रजाः ३९ दैत्ययोर्मेदसाछन्नामेदिनीतिततःस्मृता प्रभावात्पद्मनाभस्य शाश्वतीजग
तीकृता ४० वाराहंरूपमास्थायमार्कंडेयस्यपश्यतः विषाणेनाहमेकेनतोयमध्यात्समुद्धृता ४१ कृताहंक्रमताभूयस्तदायुष्माकम
ग्रतः बलेःसकाशाद्दैत्यस्यविष्णुनाप्रभविष्णुना ४२ सांप्रतंविद्यमानाहमेनसेवगदाधरम् अनाथाजगतोनाथंशरण्यंशरणंगता
४३ अग्निःसुवर्णस्यगुरुर्गवांसूर्योगुरुःस्मृतः नक्षत्राणांगुरुःसोमोममनारायणोगुरुः ४४ यदहंधारयाम्येकाजगत्स्थावरजंग
मम् मयाधृतंधारयतेसर्वमेतद्गदाधरः ४५ जामदग्न्येनरामेणभारावतरणेप्सया रोषात्त्रिःसप्तकृत्वाहंक्षत्रियैर्विप्रयोजिता ४६ सा
स्मिवेद्यांसमारोप्यतर्पितानृपशोणितैः भार्गवेणपितुःश्राद्धेकश्यपायनिवेदिता ४७ मांसमेदोस्थिदुर्गंधादिग्धाक्षत्रियशोणि-
तैः रजस्वलेवयुवतिःकश्यपंसमुपस्थिता ४८ समांब्रह्मर्षिरप्याहकिंसुर्विल्यमवाङ्मुखी वीरपत्नीव्रतमिदंधारयंतीविषीदसि
४९ साहंविज्ञापितवतीकश्यपंलोकभावनम् पतयोमेहताब्रह्मन्भार्गवेणमहात्मना ५० साहंविहीनाविक्रांतैःक्षत्रियैःशस्त्रवृ
त्तिभिः विधवाशून्यनगरानधारयितुमुत्सहे ५१ तन्मह्यंदीयतांभर्ताभगवंस्त्वत्समोनृपः रक्षेत्सग्रामनगरांयोमांसागरमालिनीम्
५२ सश्रुत्वाभगवान्वाक्यंबाढमित्यब्रवीत्प्रभुः ततोमांमानवेंद्रायमनवेसंप्रदत्तवान् ५३ सामनुप्रभवंदिव्यंप्राप्येक्ष्वाकुकुलंनृपम्
विपुलेनास्मिकालेनपार्थिवात्पार्थिवंगता ५४ एवंदत्तास्मिमनवेमानवेंद्रायधीमते भुक्ताराजसहस्रैश्चमहर्षिकुलसंमितैः ५५
बहवःक्षत्रियाःशूरामांजित्वादिवमाश्रिताः तेचकालवशंप्राप्यमय्येवप्रलयंगताः ५६ मत्कृतेविग्रहोलोकेवृत्तावर्त्ततएवच क्षत्रि
याणांबलवतांसंग्रामेष्वनिवर्त्तिनाम् ५७ एततत्सुप्रभात्सवृत्तेनदेवेनपरिपाल्यते जगद्धितार्थंकुरुतराज्ञांहेतुरणंक्षये ५८

सद्योहतभर्तृकाया ७८
रूपंइतियावत् ४९ ५० धारयितुंलोकंआत्मानंवेतिशेषः ५१ ५२ मनवेश्राद्धदेवाय ५३ ५४ ५५ ५६ ५७ क्षयेहेतुमितिसंबंधः ५८ ५९ ६०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अवरोसव्यः उत्तारणीयः ६० इतिहरिवंशेटीकायांद्विपंचाशत्तमोऽध्यायः ५२ तेश्रुत्वा तदर्थकृत्यंपृथिव्याः प्रयोजनस्यसाधकंकार्यम् १ २
३ ४ ५ ६ ७ पार्थिवंपृथिवीहितंकार्यप्रयोजनम् कार्यअवश्यकर्त्तव्यम् ८ ९ १० ११ १२ अवरोहत अवतारंकुरुत भावयंतः

यद्यस्तिमयिकारुण्यंभारशैथिल्यकारणात् एकश्चक्रधरःश्रीमानभयंमेप्रयच्छतु ५९ यमहंभारसंतप्तासंप्राप्ताशरणार्थि
नी भारोयद्यवरोप्तव्योविष्णुरेषब्रवीतुमाम् ६० इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिद्विपंचाशत्तमोऽध्या
यः ५२ वैशंपायनउवाच तेश्रुत्वापृथिवीवाक्यंसर्वएवदिवौकसः तदर्थकृत्यंसंचिंत्यपितामहमथाब्रुवन् १ भगव
न्क्रियतामस्याधरण्याभारसंततिः शरीरकर्त्तालोकानात्वंहिलोकस्यचेश्वरः २ यत्कर्त्तव्यमहेंद्रेणयमेनवरुणेनच यद्वाकार्य
धनेशेनस्वयंनारायणेनच ३ यद्वाचंद्रमसाकार्यभास्करेणानिलेनवा आदित्यैर्वसुभिर्वापिरुद्रैर्वालोकभावनैः ४ अश्वि
भ्यांदेववैद्याभ्यांसाध्यैर्वात्रिदशालयैः बृहस्पत्युशनोभ्यांवाकालेनकलिनापिवा ५ महेश्वरेणवाब्रह्मन्विशाखेनगुहेनवा
यक्षराक्षसगंधर्वैश्चारणैर्वामहोरगैः ६ पतगैःपर्वतैश्चापिसागरैर्वामहोर्मिभिः गंगामुखाभिर्दिव्याभिःसरिद्भिर्वासुरेश्वर ७
क्षिप्रमाज्ञापयविभोकथमंशःप्रयुज्यताम् यदितेपार्थिवंकार्यंकार्यंपार्थिवविग्रहे ८ कथमंशावतरणंकुर्मःसर्वेपितामह अं-
तरिक्षगतायेचपृथिव्यांपार्थिवाश्चये ९ सदस्यानांचविप्राणांपार्थिवानांकुलेषुच अयोनिजाश्चैवतनूःसृजामोजगतीतले १०
सुराणामेककार्याणांश्रुत्वेतन्निश्चितंमतम् देवैःपरिवृतःप्राहवाक्यंलोकपितामहः ११ रोचतेमेसुरश्रेष्ठायुष्माकमपिनिश्चयः
सृजध्वंस्वशरीरांशांस्तेजसात्मसमान्भुवि १२ सर्वएवसुरश्रेष्ठास्तेजोभिरवरोहत भावयंतोभुवंदेवीलब्ध्वात्रिभुवनश्रियम्
१३ पार्थिवेभारतेवंशेपूर्वमेवविजानता पृथिव्यांसंभ्रममिमंश्रूयतांयन्मयाकृतम् १४ ससमुद्रःपुरापूर्वंवेलामासाद्यपश्चि
माम् आससाद्धतनूजेनकश्यपेनमहात्मना १५ कथाभिःपूर्ववृत्ताभिर्लोकवेदानुगामिभिः इतिवृत्तैश्चबहुभिःपुराणप्रभवै
र्गुणैः १६ कुर्वतस्तुकथास्तास्ताःसमुद्रःसहगंगया समीपमाजगामाशुयुक्तस्तोयदमारुतैः १७ सवीचिविषमाकुर्वन्गतिंवेग
तरंगिणीम् यादोगणविचित्रेणसंच्छन्नस्तोयवाससा १८

पालयंतः १३ पार्थिवेपृथिवीस्थेवंशेपृथिव्यांयत्मयाकृतंतत्श्रूयतां कीदृशोनइमंसंभ्रमं भूमेर्भयं
विजानतेतिसंबंधः १४ तनूजेनपौत्रेण सहकथाभिर्हेतुभूताभिः कथाप्रसंगनिमित्तम् आसेउपविष्टोऽभूवमितिद्वयोरन्वयः १५ इतिवृत्तैरितिहासैः गुणैर्गुणवद्भिः १६
समुद्रःमूर्त्तिमान् १७ स्थावररूपेण विषमांगतिंकुर्वन् तोयवाससातोयवत्श्वेतेनवाससायादोगणाकारंविशिष्टंचित्तंयस्मिन्तेन १८ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चंद्रमसास्थावरस्यरूपस्यविषमगतिनिमित्तेन १९ २० शांतोसीत्यशांतेपिविरुद्धलक्षणयाउपहासः २१ २२ सकारणांभारावतारणनिमित्तवतीम् २३ २४ २५ २६ २७ देवदेवानांरुद्रादीनाम् २८ विधेयात्माआज्ञाकारी अशपःशापंदत्तवानसि २९ ३० ३१ ३२ ३३ प्रमाणंशरणागतोपेक्षा-

शंखमुक्तामूलतनुःप्रवालद्रुमभूषणः युक्तश्चंद्रमसापूर्णउग्रगंभीरनिःस्वनः १९ समांपरिभवन्नेवस्वांवेलांसमतिक्रमन् क्रुद्धु
ग्रामासचपलैर्लोलवर्णैरंबुविस्रवैः २० तंचद्रेशोव्यवसितःसमुद्रोद्रिविभर्दितुम् उक्तःसरब्धयावाचाशांतोसीतिमयातदा २१ शांतो
सीत्युक्तमात्रस्तुतनुत्वंसागरोगतः संहृतोर्मितरंगौघःस्थितोराजश्रियाज्वलन् २२ भूयश्चैवमयाशप्तःसमुद्रःसहगंगया सकार
णामतिक्रम्यत्वांसुश्यामांकहितकाम्यया २३ यस्मात्त्वंराजतुल्येनवपुषासमुपस्थितः गच्छार्णवमहीपालोराजेवत्वंभविष्यसि २४ तत्रा
पिसहजांलीलांधारयन्स्वेनतेजसा भविष्यसिनृणांभर्ताभारतानांकुलोद्वहः २५ शांतोसीतिमयोक्तस्त्वंयच्चासितनुतांगतः सुतनु
र्यशसालोकेशंतनुस्त्वंभविष्यसि २६ इयंचाप्यायतापांगीगंगासर्वांगशोभना रूपिणीचसरिच्छ्रेष्ठात्वत्रत्वामुपयास्यति २७ एवमुक्त
स्तुमांक्रुद्धःसोभिवीक्ष्यार्णवोऽब्रवीत् मांप्रभोदेवदेवानांकिमर्थंशप्तवानसि २८ अहंतवविधेयात्मात्वत्कृतस्त्वत्परायणः अशापो
ऽसदृशोवाक्यैरात्मजमांकिमात्मना २९ भगवंस्त्वत्प्रसादेनवेगात्पर्वणिवर्द्धितः यद्यहंचलितोब्रह्मन्कोत्रदोषोममात्मनः ३० क्षिप्ता
भिःपवनैरद्भिःस्पृष्टोयद्यस्मिपर्वणि अत्रमेकिंनुभगवन्विद्यतेशापकारणम् ३१ उत्थितैश्चमहावातैःप्रवृद्धैश्चबलाहकैः पर्वणा
चेंदुयुक्तेनत्रिभिःक्षुब्धोस्मिकारणैः ३२ एवंयद्यपराद्धोहंकारणैस्त्वत्प्रकल्पितैः क्षंतुमर्हसिमेब्रह्मन्शापोयंविनिवर्त्यताम् ३३ ए
वंमयिनिरालंबेशापाच्छिथिलतांगते कारुण्यंकुरुदेवेशप्रमाणंयद्यवेक्ष्यसे ३४ अस्याश्चदेवगंगायागांगतायास्त्वदाज्ञया मम
दोषाददोषायाःप्रसादंकर्तुमर्हसि ३५ तमहंत्वब्रुवंवाचामहार्णवमथांबुपम् अकारणज्ञंदेवानांत्रस्तंशापानलेनतम् ३६
शांतिंव्रजनभेतव्यंप्रसन्नोस्मिमहोदधे शापेस्मिन्सरितांनाथभविष्यंशृणुकारणम् ३७ त्वंतातभारतेवंशेस्वदेहस्थेनतेजसा
आधत्स्वसरितांनाथत्यक्त्वेमांसागरीतनुम् ३८ महोदधेमहीपालस्तत्रराजश्रियावृतः पालयंश्चतुरोवर्णान्रंस्यसेसलिलेश्व
र ३९ इयंचतेसरिच्छ्रेष्ठाबिभ्रतीरूपमुत्तमम् तत्कालरमणीयांगीगंगापरिचरिष्यति ४० अनयासहजाह्नव्यामोदमानोम-
माज्ञया इमंसलिलसंक्लेदंविस्मरिष्यसिसागर ४१

यांदोषप्रतिपादकंवेदम् ३४ ३५ ३६ ३७ तेजसात्यक्त्वेतिसंबंधः योगबलेनविभज्येत्यर्थः आ-
धत्स्वगर्भेइतिशेषः ३८ तत्रवंशे ३९ ४० संक्लेदंसंक्लेदनापराधप्राप्तिमानुषयोनिजदुःखंविस्मरिष्यसि तत्रत्यसुखास्वादनेन ४१ ख ख

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्राजापत्येन वैवाहिकेन ४२ ४३ विभावसोरग्नेः तुल्यगुणान् तद्वल्लोकप्रीतिकरान् ४४ तनुं मनुष्यशरीरम् ४५ ४६ ४७ परिप्लवते भुवं श्रयते ४८ सृ
ष्टायां संगतायां भार्यायां सत्यवतीसंज्ञायाम् द्वितीयाभीष्मापेक्षया तनुःपुत्रः चित्रांगदस्य पूर्वमेव मृतत्वाद् गणना ४९ ५० ५१ ५२ ५३ ५४ विविक्तानिवि

त्वन्ताश्चैव कर्त्तव्यं त्वयेदं मम शासनम् प्राजापत्येन विधिना गंगया सह सागर ४२ वसवः प्रच्युताः स्वर्गात् प्रविष्टाश्च रसातलम् तेषा
मुत्पादनार्थाय त्वमस्यां विनियोजितः ४३ अष्टौ तान् जान्हवी गर्भान् पत्यार्थं दधात्वियम् विभावसोस्तुल्यगुणान् सुराणां प्रीतिवर्द्ध
नान् ४४ उत्पाद्य वसवस्तूर्णं शीघ्रं कृत्वा कुरुकुलं महत् प्रवेष्टासि तनुं त्यक्त्वा पुनः सागर सागरीम् ४५ एवमेतन्मया पूर्वं विहितार्थवः
सुरोत्तमाः भविष्यं पश्यता भारं पृथिव्याः पार्थिवात्मकम् ४६ तदेष शंतनोर्वंशः पृथिव्यां रोपितो मया वसवो ये च गंगायां मुत्पन्ना
स्त्रिदिवौकसः ४७ अद्यापि भुवि गांगेयस्तत्रैव वसुरष्टमः सप्तमे वसवः प्राप्ताः स एकः परिप्लवते ४८ द्वितीयायां च सृष्टायां द्वितीया
शंतनोस्तनुः विचित्रवीर्यो द्युतिमान् आसीद्राजा प्रतापवान् ४९ वैचित्रवीर्यौ द्वावेव पार्थिवौ भुवि संमतम् धृतराष्ट्रश्च पाण्डुश्च वि
ख्यातौ पुरुषर्षभौ ५० तत्र पाण्डोः श्रियाजुष्टे द्वे भार्ये संबभूवतुः कुन्ती च माद्री च देवयोषोपमे तु ते ५१ धृतराष्ट्रस्य राज्ञस्तु-
भार्यैका तुल्यचारिणी गान्धारी भुवि विख्याता भर्त्तुर्नित्यव्रतस्थिता ५२ तत्र वंशा विभज्यन्तां विपक्षाः पक्ष एव च पुत्राणां हि तयो रा
ज्ञो भविता विग्रहो महान् ५३ तेषां विमर्दे दायादे नृपाणां भविता क्षयः युगान्तप्रतिमं चैव भविष्यति महद्भयम् ५४ सबलेषु नरे
न्द्रेषु शातयत्स्वितरेतरम् विविक्तपुरराष्ट्रौघा क्षितिः शैथिल्यमेष्यति ५५ द्वापरस्य युगस्यान्ते मया दृष्टं पुरातनम् क्षयं यास्यन्ति श
स्त्रेण मानवैः सह पार्थिवाः ५६ तत्रावशिष्टान्मनुजान् सुप्तान्निशि विचेतसः धक्ष्यते शंकरस्यांशः पावकेनास्त्रतेजसा ५७ अंत
कप्रतिमे तस्मिन् निवृत्ते क्रूरकर्मणि समाप्तमिदमाख्यास्ये तृतीयं द्वापरं युगम् ५८ महेश्वरांशे प्रसृते ततो माहेश्वरं युगम् तिष्यं प्र
वर्त्तते पश्चात् युगं दारुणदर्शनम् ५९ अधर्मप्रायपुरुषं स्वल्पधर्मप्रतिग्रहम् उत्सन्नसत्यसंयोगं वर्द्धितानृतसंचयम् ६० महेश्वरं
कुमारश्च द्वौ च देवौ समाश्रिताः भविष्यन्ति नराः सर्वे लोके नस्थविरायुषः ६१ तदेष निर्णयः श्रेष्ठः पृथिव्याः पार्थिवान्तकः अंशावतर
णं सर्वे सुराः कुरुत माचिरम् ६२ धर्मस्यांशस्तु कुन्त्यां वै माद्र्यां च विनियुज्यताम् विग्रहस्य कलिर्मूलं गान्धार्यां विनियुज्यताम् ६३

जनानि पुरा
दीनि तेषां मोघो यस्यां सा विविक्तपुरराष्ट्रौघा शैथिल्यं निर्बलत्वम् ५५ ५६ शंकरस्यांशः अश्वत्थामा ५७ अंतकप्रतिमे कल्पांततुल्ये ५८ महेश्वरांशो विष्ण्वंशो भी कृष्णे
प्रसृते वैकुंठं गते सति माहेश्वरं रौद्रं युगं तिष्यं कलिः ५९ ६० महेश्वरं रुद्रम् कुमारं स्कंदम् ६१ ६२ धर्मस्येति धर्मपक्षीयाणां ग्रहणं कलिरिति तत्पक्षाणां राक्षसां ६३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६४ योनिंस्थानंनिष्ठामरणंतदर्थः नैष्ठिकः ६५ ६६ ६७ ६८ ६९ पूर्वंआदिपर्वणि ७० क्षीरिकावृक्षः राज्ञीवृक्षः तद्वत्सुधाः वज्रसंहननाः दृढां गाः ७१ ओघबलाः महाप्रवाहबलाः ७२ ७३ ७४ ७५ ७६ नारायणेइति भगवन्तुलोकान्पाहीत्युक्त्वेत्यर्थः ७७ हितेश्वरः हितेसमर्थः ७८ ७९ इति

एतेोपक्षौभविष्यंतिराजानःकालचोदिताः जातरागाःपृथिव्यर्थेसर्वेसंग्रामलालसाः ६४ गच्छलियंवसुमतीस्त्रायोनिंलोकधारिणीम् स्रष्टोयनेष्टिकोराजासुपायोलोकविश्रुतः ६५ श्रुत्वापितामहवचःसाजगामयथागतम् पृथिवीसहकालेनवधायपृथिवीक्षिताम् ६६ देवानचोदयद्ब्रह्मानिग्रहार्थंसुरद्विषाम् नरंचैवपुराणर्षिंशेषंचधरणीधरम् ६७ सनत्कुमारंसाध्यांश्चसुरांश्चाग्निपुरोगमान् वरुणंचयमंचैवसूर्याचंद्रमसौतदा ६८ गंधर्वाप्सरसश्चैवरुद्रादित्यास्तथाश्विनौ ततोंशानवनिंदेवाःसर्वएवावतारयन् ६९ यथातेकथितपूर्वमंशावतरणंमया अयोनिजायोनिजाश्चतेदेवाःपृथिवीतले ७० दैत्यदानवहंतारःसंभूताःपुरुषेश्वराः क्षीरिकावृक्षसंकाशावज्रसंहननास्तथा ७१ नागायुतबलाःकेचित्केचिदोघबलान्विताः गदापरिघशक्तीनांसंघाःपरिघबाहवः ७२ गिरिशृंगप्रहर्तारःसर्वेपरिघयोधिनः वृष्णिवंशसमुत्पन्नाःशतशोथसहस्रशः ७३ कुरुवंशेचतेदेवाःपंचालेषुचपार्थिवाः याज्ञिकानांसमृद्धानांब्राह्मणानांचयोनिषु ७४ सर्वास्त्रज्ञामहेष्वासावेदव्रतपरायणाः सर्वर्द्धिगुणसंपन्नायज्वानःपुण्यकर्मिणः ७५ आचालयंस्तुयेशैलान्क्रुद्धाभिघ्नन्महीतलम् उत्पतेयुश्चाकाशंक्षोभयेयुर्महोदधिम् ७६ एवमादिश्यतान्ब्रह्माभूतभव्यभवत्प्रभुः नारायणेसमावेश्यलोकान्शांतिमुपागमत् ७७ भूयःशृणुयथाविष्णुरवतीर्णोमहीतले प्रजानांवैहितार्थायप्रभुःप्राणहितेश्वरः ७८ ययातिवंशजस्याथवसुदेवस्यधीमतः कुलेपूज्येयशस्केमाजज्ञेनारायणःप्रभुः ७९ इतिश्रीमहाभारतेखिलेषुहरिवंशेहरिवंशपर्वणित्रिपंचाशत्तमोऽध्यायः ५३ वैशंपायनउवाच कृतकार्येगतेकालेजगत्यांचयथानयम् अंशावतरणेवृत्तेसुराणांभारतेकुले १ भागेवतीर्णेधर्मस्यशक्रस्यपवनस्यच अश्विनोर्देवभिषजोर्भागेवैभास्करस्यच २ पूर्वमेवावनिंगतेभागेदेवपुरोधसः वसूनामष्टमेभागेभागेवधरणींगते ३ मृत्योर्भागेक्षितिंगतेकलेर्भागेतथैवच भागेशुक्रस्यसोमस्यवरुणस्यचगांगते ४

हरिवंशेटीकायांत्रिपंचाशत्तमोऽध्यायः ५३ यथानयंयथान्यायं अंशावतरणेवृत्तेसति नारदःप्रत्यदृश्यतेतिषष्ठस्थेनान्वयः १ धर्मस्यभागेयुधिष्ठिरे शक्रस्यार्जुने पवनस्यभीमसेने अश्विनोर्नकुलसहदेवरूपेभागे भास्करस्यकर्णे २ देवपुरोधसोबृहस्पतेर्द्रोणेवसूनामष्टमेभीष्मे ३ मृत्योर्यमस्यविदुरे कलेर्दुर्योधने सोमस्याभिमन्यौ शक्रस्यभूरिश्रवसि वरुणस्यश्रुतायुधेपर्णाशातनये ४ ६७ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शंकरस्याश्वत्थाम्नि मित्रस्य कर्णिके धनदस्य धृतराष्ट्रे गंधर्वादीनां देवकोग्रसेनदुःशासनादिषु ५ अंशे देवतापक्षे इत्यर्थः तिष्ठन् स्थितिमान् ६ सव्यापवृत्तं अप्रदक्षिणवेष्टितम् ७ ८ ९ ग्रहोपमः सूर्यादिसमः धूमकेत्वादिसम उत्पातहेतुत्वादिति वा १० वैरिणां केल्या संग्रामेण किलः क्रीडा यस्य स वैरिकेलिकिलः किल शौक्ल्ये क्रीडायां चेति धातुरिति मांचः लीलाकेलिकिलेति तु विश्वः ११ १२ अकारणं कारणेन त्वया दीनत्वान्निष्फलम् १३ यत् यतः यत् क्षत्रं यु

शंकरस्य गते भागे मित्रस्य धनदस्य च गंधर्वोरगरक्षाणां भागांशेषु गतेषु च ५ भागेष्वेतेषु गगनादवतीर्णेषु मेदिनीम् तिष्ठन्नारायणस्यांशे नारदः समदृश्यत ६ ज्वलिताग्निप्रतीकाशो बालार्कसदृशेक्षणः सव्यापवृत्तविपुलजटामंडलमुद्वहन् चंद्रांशुशुक्ले वसने वसानो रुक्मभूषितः ७ वीणां गृहीत्वा महतीं कक्षासक्तां सरस्वतीमिव ८ कृष्णाजिनोत्तरासंगो हेमयज्ञोपवीतवान् दंडी कमंडलुधरः साक्षाच्छक्र इवापरः ९ भेत्ता जगति गुह्यानां विग्रहाणां ग्रहोपमः गाता चतुर्णां वेदानामुद्गाता प्रथमर्त्विजाम् महर्षिर्विग्रहरुचिर्विद्वान् गांधर्वकोविदः १० वैरिकेलिकिलो विप्रो ब्राह्मः कलिरिवापरः देवगंधर्वलोकानामादिवक्ता महामुनिः ११ स नारदोऽथ ब्रह्मर्षिर्ब्रह्मलोकचरोऽव्ययः स्थितो देवसभामध्ये सत्वरं विष्णुमब्रवीत् १२ अंशावतरणं विष्णोर्यदिदं त्रिदशैः कृतम् क्षयार्थं पृथिवीन्द्राणां सर्वमेतदकारणम् १३ यदेतत्पार्थिवं क्षत्रं स्थितं त्वयि यदीश्वर नृनारायणमुक्तोऽयं कार्यार्थः प्रतिभाति मे १४ न मुक्तं ज्ञानतादेव त्वया तत्त्वार्थदर्शिना भूदेवत पृथिव्यर्थे प्रयोक्तुं कार्यमीदृशम् १५ त्वं हि चक्षुष्मतां चक्षुः श्लाघ्यः प्रभवतां प्रभुः श्रेष्ठो योगवतां योगी गतिर्गतिमतामपि १६ देवभागाननुगतान्दृष्ट्वा किल सर्वार्थयोगविभुः वसुंधरायाः साध्वार्थं मुशस्त्वनाऽनुयुंजसे १७ त्वया सनाथा देवाः शास्त्वन्मयास्त्वत्परायणाः जगत्यां संचरिष्यंति कार्याकार्यंतरंगताः १८ तदहं त्वरया विष्णो प्राप्तः शक्रसभामिमाम् तव संचोदनार्थं वै शृणु चाप्यत्र कारणम् १९ ये त्वया निहता दैत्याः संग्रामे तारकामये तेषां शृणु गतिं विष्णो ये गताः पृथिवीतलम् २० पुरी पृथिव्यां मुदिता मथुरा नाम तत्र श्रुता निविष्टा यमुनातीरे स्फीता जनपदायुता २१ मधुर्नाम महानासीद्दानवो युधि दुर्जयः त्रासनः सर्वभूतानां बलेन महतान्वितः २२ तस्य तत्र महच्चासीन्महापादपसंकुलम् घोरं मधुवनं नाम यत्रासौ न्यवसत्पुरा २३ तस्य पुत्रो महानासील्लवणो नाम दानवः त्रासनः सर्वभूतानां महाबलपराक्रमः २४ स तत्र दानवः क्रीडन्वर्षपूगाननेकशः सदेवतगणांल्लोकांस्तु त्रासयति दर्पितः २५

इं तत्त्वयि स्थितं त्वदधीनं अतः कार्यार्थः प्रयोजनसिद्धिः नृनारायणाभ्यां नरनारायणाभ्यां मुक्त एव मे प्रतिभाति ताभ्यां विना नेत्यर्थः १४ ईदृशं नृनारायणहीनम् १५ अत्र हेतुमाह त्वं हीति त्वां अंतर्यामिणं विना सर्वेप्येते निरर्थका इत्यर्थः १६ अनियुंजसे न नियोजयसि १७ १८ १९ २० २१ २२ २३ २४ २५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अयोध्यायां योद्धुमयोग्यायाम् २६ २७ विषयस्य त्वद्देशस्य आसन्नभूतः सन्निहितोस्मि रिपुश्च ह प्रसिद्धं तवास्मि सामंतं समीपदेशेस्थितं रिपुं सामंतम् २८ २९ ३० सम्यगिति लोकत एव लौकिकं हिताहितं ज्ञातुं शक्यते न तत्र शास्त्रापेक्षास्तीति भावः ३१ जघन्यस्य अवरस्य द्यूतमृगयादौ आदरहीनस्येत्यर्थः ३२ मोहैर्मोहहेतुभिः अधृतिरधीरः ईश्वरो वा ३३ औपधिकं युक्तिमत् महदपि निंद्यमेवेत्यर्थः ३४ निंद्यत्वमेवाह वनेति ३५ त्वया व्रतवतापि

अयोध्यायामयोध्यायां रामे दाशरथौ स्थिते राज्यं शासति धर्मज्ञे राक्षसानां भयावहे २६ स दानवो बलश्लाघी घोरं वनमुपार्थितः
प्रेषयामास रामाय दूतं परुषवादिनम् २७ विषयासन्नभूतोस्मि तव राम रिपुश्च ह नच सामंतमिच्छंति राजानो बलदर्पितम् २८
राज्ञा राज्यव्रतस्थेन प्रजानां हितकाम्यया जेतव्या रिपवः सर्वे स्फीतं विषयमिच्छता २९ अभिषेकार्द्रकेशेन राज्ञा रंजनकाम्यया जे
तव्यानींद्रियाण्यादौ तज्जये हि ध्रुवो जयः ३० सम्यग्वर्त्तितुकामस्य विशेषेण महीपतेः नयानामुपदेशेन नास्ति लोकसमो गुरुः ३१
व्यसनेषु जघन्यस्य धर्ममध्यस्य धीमतः बलज्येष्ठस्य नृपतेर्नास्ति सामंतजं भयम् ३२ सहजैर्बाध्यते सर्वः स्वदेहैरिंद्रियारिभिः अमि
त्राणां प्रियकरैर्मोहैरधृतिरीश्वरः ३३ यत्त्वयास्त्रीकृतं मोहात् सगणो रावणो हतः नैतदौपधिकं मन्ये महद्वैकल्मकुत्सितम् ३४ वन
वासप्रवृत्तेन यत्त्वया व्रतशालिना प्रहृतं राक्षसानीकेनैष दृष्टः सतां विधिः ३५ सतामक्रोधजो धर्मः शंभ मानयति संकृतिम् यत्त्वयाऽनि
हता मोहात् दूषिताश्चाश्रमौकसः ३६ स एष रावणो धन्यो यस्त्वया व्रतचारिणा स्त्रीनिमित्तं हतो युद्धे ग्राम्यान् धर्माननीक्षता ३७ य-
द्येतं निहतः संख्ये दुर्बुद्धिरजितेंद्रियः युद्ध्यस्वाद्य मया सार्धं मृधे यद्यसि वीर्यवान् ३८ तस्य दूतस्य तच्छ्रुत्वा भाषितं तत्त्ववादिनः
धैर्यादसंभ्रांतवपुः सस्मितं राघवोऽब्रवीत् ३९ असदेतत्त्वया दूत भाषितं तस्य गौरवात् यन्मां क्षिपसि दोषेण वेदात्मानं च सुस्थिरम्
४० यद्यहं सत्पथे मूढो यदि वा रावणो हतः यदि वा मे हृता भार्या कालश्च परिदेवना ४१ न वाङ्मात्रेण दुष्यंति साधवः सत्पथे स्थिताः जा
नंति च यथा देवाः सदा सत्स्वितरेषु च ४२ कृतं दूतेन यत्कार्यं गच्छ त्वं दूत माचिरम् नात्मश्लाघिषु नीचेषु सुहृदं तीक्ष्णसद्विधाः ४३ अयं
मे भ्रातानुजो भ्राता शत्रुघ्नः शत्रुतापनः तस्य दैत्यस्य दुर्बुद्धे मृधे प्रतिकरिष्यति ४४ एवमुक्तः स दूतस्तु ययौ सौमित्रिणा सह अनुज्ञा
तो नरेंद्रेण राघवेण महात्मना ४५ स शीघ्रयानः संप्राप्तस्तदा मधुवनं महत् चक्रे निवेशं सौमित्रिर्वनांते युद्धलालसः ४६

यत्त्वमोहान्निहताः रावणादयः तेन आश्रमौकसो व्रतिनो दूषिताः त्वदीयं व्रतोच्छेदनं दृष्ट्वाऽन्येपि व्रतिनो व्रतं लंघयिष्यंति अतो दुराचारप्रवर्त्तकोसीति भावः ३६ तदेवाहस इति ३७ ३८ ३९ ४० परिदेवना आक्रंदनम् ४१ इतरेषु असत्सु ४२ ४३ ४४ सौमित्रिणा शत्रुघ्नेन सह ४५ निवेशं वसतिस्थानम् ४६ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४७ ४८ ४९ ५० विररासविशिष्टंशब्दंचकार ५१ ५२ सः शत्रुघ्नः रुक्मत्सरुंस्वर्णमुष्टिम् ५३ ५४ निवेशंनिवासस्थानम् नगरमितियावत् भ
वायवृद्धये पुर्यानगरस्यनिर्माणेयः परमोधर्मस्तद्वित् ५५ ५६ अट्टाः चतुष्काः ५७ ५८ ५९ ६० ६१ निविष्टविषयोध्यासितमथुरामदे

ततोदूतस्यवचनात्सदैत्यःक्रोधमूर्च्छितः पृष्ठतस्तद्वनंकृत्वायुद्धायाभिमुखःस्थितः ४७ तद्युद्धमभवद्घोरंसौमित्रेर्दानवस्यच
उभयोरेवबलिनोःशूरयोरणमूर्द्धनि ४८ तौशरैःसाधुनिशितैरन्योन्यमभिजघ्नतुः नचतौयुद्धवैमुख्यंश्रमंवाप्युपजग्मतुः ४९
अथसौमित्रिणाबाणैःपीडितोदानवोत्तमः ततःसशूलरहितःपर्यहीयतदानवः ५० सगृहीत्वांकुशंचैवदेवैर्दत्तवरंरणे कर्षणंस
र्वभूतानांलवणोविररासह ५१ शिरोधरायांजग्राहसोंकुशेनचकर्षच प्रवेशयितुमारब्धोलवणोराघवानुजम् ५२ सरुक्मत्सरुमुद्य
म्यशत्रुघ्नःखड्गमुत्तमम् शिरश्चिच्छेदखड्गेनलवणस्यमहामृधे ५३ सहत्वादानवंसंख्येसौमित्रिर्मित्रवत्सलः तद्वनंतस्यदैत्यस्य-
चिच्छेदास्त्रेणबुद्धिमान् ५४ छित्वावनंतसौमित्रिर्निवेशंसोऽभ्यरोचयत् भवायतस्यदेशस्यपुर्याःपरमधर्मवित् ५५ तस्मिन्मधु
वनस्थानेमथुरानामसापुरी शत्रुघ्नेनपुरासृष्टाहत्वातंदानवंरणे ५६ सापुरीपरमोदारासाट्टप्राकारतोरणा स्फीताराष्ट्रसमाकीर्णा
समृद्धबलवाहना ५७ उद्यानवनसंपन्नासुसीमासुप्रतिष्ठिता प्रांशुप्राकारवसनापरिखाकुलमेखला ५८ चलाट्टालककेयूरा-
प्रासादवरकुंडला सुसंवृतद्वारवतीचत्वरोद्गारहासिनी ५९ अरोगवीरपुरुषाहस्त्यश्वरथसंकुला अर्द्धचंद्रप्रतीकाशायमुनातीरशो
भिता ६० पुण्यापणवतीदुर्गारत्नसंचयगर्विता क्षेत्राणिसस्यवंत्यस्याःकालेदेवश्चवर्षति ६१ नरनारीप्रमुदितासापुरीस्मप्रकाशते
निविष्टविषयश्चैवशूरसेनस्ततोऽभवत् ६२ तस्यांपुर्यांमहावीर्योराजाभोजकुलोद्वहः उग्रसेनइतिख्यातोमहासेनपराक्रमः ६३ त-
स्यपुत्रत्वमापन्नोयोसौविष्णोलयाहतः कालनेमिर्महादैत्यःसंग्रामेतारकामये ६४ कंसोनामविशालाक्षोभोजवंशविवर्द्धनः राजा
पृथिव्यांविख्यातःसिंहविस्पष्टविक्रमः ६५ राज्ञांभयंकरोघोरःशंकनीयोमहीक्षिताम् भयदःसर्वभूतानांसत्ययात्ब्राह्मतागतः
६६ दारुणाभिनिवेशेनदारुणेनांतरात्मना युक्तस्तेनैवदर्पेणप्रजानांरोमहर्षणः ६७ नराजधर्माभिरतोनात्मपक्षसुखावहः ना
त्मराज्यप्रियकृच्चंडःकलिरुचिःसदा ६८ सकंसस्तत्रसंभूतस्त्वयायुद्धपराजितः क्रव्यादोबाधतेलोकान्क्रूरेणांतरात्मना ६९ यो
प्यसौहयविक्रांतोहयग्रीवश्चनामतः केशीनामहयोजातःसतस्यैवजघन्यजः ७०

शः ६२ महासेनपराक्रमः कार्त्तिकेयतुल्यः ६३ ६४ ६५
६६ अभिनिवेशेनप्रकृत्या ६७ ६८ क्रव्यादः मांसादोराक्षसइव ६९ जघन्यजइवअनुजइवजातः ७० ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

निरवग्रहो निरर्गलः ७१ ७२ ७३ ७४ ७५ ७६ ७७ ७८ ७९ तवविभ्यतिसागरइतिपाठेव्याख्येयम् तवत्वत्तः बिभ्यतीतिङ्‌स्यांतादेशः छांद
सः ८० नान्येन अनन्येनसर्वेषामंतरात्मनेत्यर्थः त्वयाहतस्यदुर्वृत्तस्यापित्वमेवगतिरितिभावः इतरस्यतुदिवश्च्युतस्यमेदिनीगतिस्तत्राप्यन्येन हतस्यस्थुस्थि
तस्यदुर्वृत्तस्यस्वर्गतिरेवसर्ववीरसाधारणापिदुर्लभाकिमुतत्वत्प्राप्तिः यतस्त्वयिजाग्रतियमरूपेणयातयितुंसावधानेसतीतिश्लोकद्वयार्थः तस्मान्महाकारुणि
कस्त्वंतादृशान्कंसादीन्हंतुंभूमावतारंकुरुष्वेतिभावः ८१ ८२ एतदेवाहतदित्यादिना ८३ अव्यक्ताः नृणांदृष्टुंअस्पष्टाः सुरोत्तमैरपिविष्णुत्वेनदृश्याअपिप

सदुष्टो हेषितपटुः केसरीनिरवग्रहः वृंदावनेवसत्येकोनृणांमांसानिभक्षयन् ७१ अरिष्टोबलिपुत्रश्च ककुद्मीवृषरूपधृक् गवा
मरित्वमापन्नः कामरूपीमहासुरः ७२ रिष्टोनामदितेःपुत्रोवरिष्ठोदानवेषुयः सकुंजरत्वमापन्नोदैत्यः कंसस्यवाहनः ७३ लंबोना
मेतिविख्यातो योसौदैत्येषुदर्पितः प्रलंबोनामदैत्योसौवटंभांडीरमाश्रितः ७४ खरइत्युच्यतेदैत्योधेनुकः सोसुरोत्तमः घोरंतालव
नंदैत्यश्चरत्युत्सादयन्प्रजाः ७५ वाराहश्चकिशोरश्चदानवौयौमहाबलौ मल्लौरंगगतौतौतुजातौचाणूरमुष्टिकौ ७६ यौतौमय-
श्चतारश्चदानवौदानवांतक प्राग्ज्योतिषेतौभौमस्यनरकस्यपुरेरतौ ७७ एतेदैत्याविनिहतास्त्वयाविष्णोनिराकृताः मानुषंवपुरा
स्थायबाधंतेऽमविमानवान् ७८ त्वत्कथाद्वेषिणःसर्वेत्वद्भक्तान्घ्नतिमानुषान् तवप्रसादात्तेषांवैदानवानांक्षयोभवेत् ७९ त्वत्त-
स्तेबिभ्यतिदिविवत्तोबिभ्यतिसागरे पृथिव्यांबिभ्यतित्वत्तोनान्यतस्तुकदाचन ८० दुर्वृत्तस्यहतस्यापित्वयानान्येनश्रीधर दिव
श्च्युतस्यदैत्यस्यगतिर्भवतिमेदिनी ८१ स्थुस्थितस्यचमेदिन्याहतस्यन्नृशरीरिणः दुर्लभस्वर्गगमनंत्वयिजाग्रतिकेशव ८२ तदाग
च्छस्वयंविष्णोगच्छामःपृथिवीतलम् दानवानांविनाशायविसृजात्मानमात्मना ८३ मूर्त्तयोहितवाव्यक्ता दृश्याःदृश्याः सुरोत्तमैः
तासुसृष्टास्त्वयादेवाःसंभविष्यंतिभूतले ८४ तवावतरणंविष्णोकंसःसविनाशिष्यति सेत्स्यतेतवकार्यार्थोयस्यार्थेभूमिरागता
८५ त्वंभारतेकार्यगुरुस्त्वंचक्षुस्त्वंपरायणम् तदागच्छहृषीकेशक्षितौतान्जहिदानवान् ८६ इतिश्रीमहाभारतेखिलेषुह
रिवंशेहरिवंशपर्वणिनारदवाक्यनामचतुःपंचाशत्तमोऽध्यायः ५४ वैशंपायनउवाच नारदस्यवचःश्रुत्वासस्मितंमधुसूदनः
प्रत्युवाचशुभंवाक्यंवरेण्यःप्रभुरीश्वरः १

रब्रह्मभावेनादृश्यास्तेमूर्त्तयः शरीराणि देवास्तु तासुदृश्यास्त्वेवमूर्त्तिषुसंभविष्यंति ८४ ८५
भारतेभरतवर्षे कार्यगुरुः गुरुमहत्कार्यमस्यास्तीतिकार्यगुरुः आहिताग्न्यादित्वात्पूर्वनिपातः चक्षुरिवसत्पथप्रकाशकः ८६ इतिश्रीमहाभार
तेखिलेषुहरिवंशेटीकायांचतुःपंचाशत्तमोऽध्यायः ५४ नारदस्य वरेण्यः भोगमोक्षकामैर्वरणीयः १ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२ पुष्यतिपुष्णातिविग्रहंवैरम् ३ ४ ५ ६ ७ ८ ९ १० क्षयइति एषांकंसादीनांक्ष्माविक्षयः शक्रलोकेसत्क्रियाचमयाकारुणिकेनदृष्टा आलोचिता
स्तेव अपरावृत्तःपुनर्भवमप्रविशेदेहीप्राणीयेषांतेषाम् ११ योगंउद्यमंप्रवेक्ष्यामिअंतर्यामितयाचउक्तंभयामि पार्थिवंपृथिवीविकारंलोकंदेहम् १२

त्रैलोक्यस्याहितार्थायियन्मांवदसिनारद तस्यसम्यक्प्रवृत्तस्यभूयतामुत्तरंवचः २ विदितादेहिनोजातामयैतेक्ष्माविदानवाः
यांचयस्तत्तुमादायदैत्यःपुष्यतिविग्रहम् ३ जानामिकंससंभूतमुग्रसेनसुतंक्ष्मावि केशिनंचापिजानामिदैत्यंतुरगविग्रहम्
४ नागंकुवलयापीडमल्लौचाणूरमुष्टिकौ अरिष्टंचापिजानामिदैत्यंवृषभरूपिणम् ५ विदितोमेखरश्चैवप्रलंबश्चमहासु-
रः सात्वमेविदिताविप्रपूतनादुहिताबलेः ६ कालियंचापिजानामियमुनाह्रदगोचरम् वैनतेयभयाद्यस्तुयमुनाह्रदमाविशत्
७ विदितोमेजरासंधःस्थितोमूर्ध्निमहीक्षिताम् प्राग्ज्योतिषपुरेचापिनरकंसाधुतर्कये ८ मानुषेपार्थिवेलोकेमानुषत्वमुपा
गतम् बाणंचशोणितपुरेगुहप्रतिमतेजसम् ९ दृप्तबाहुसहस्रेणदेवैरपिदुरुज्जयम् मय्यासक्तांचजानामिभारतीमहतीधु
रम् १० सर्वंतच्चविजानामियथायास्यंतितेनृपाः क्षयोक्ष्माविमयादृष्टःशक्रलोकेचसत्क्रिया तेषांपुरुषदेहानामपरावृत्तदेहिना
म् ११ संप्रवेक्ष्याम्यहंयोगमात्मनश्चपरस्यच संप्राप्यपार्थिवंलोकंमानुषत्वमुपागतः १२ कंसादींश्चापितान्सर्वान्वधिष्या-
मिमहासुरान् तेनतेनविधानेनयेनयःशांतिमेष्यति १३ अनुप्रविश्ययोगेनतास्ताहिगतयोमया अमीषांहिसुरेंद्राणांहंतव्या
रिपवोयुधि १४ जगत्यर्थेकृतोयोयमंशोत्सर्गोदिवौकसैः सुरदेवर्षिगंधर्वैरितश्चानुमतेमम १५ विनिश्चयोहिप्रागेवनारदाय
कृतोमया निवासंननुमेब्रह्मन्विदधातुपितामहः १६ यत्रदेशेयथाजातोयेनवेषेणवावसन् तानहंसमरेहन्यांतन्मेब्रूहिपि
तामह १७ ब्रह्मोवाच नारायणेमसिद्ध्यर्थमुपायंशृणुमेविभो क्ष्मावियस्तेजनयिताजननीचभविष्यति १८ यत्र
त्वचमहाबाहोजातःकुलकरोक्ष्मावि यादवानांमहद्वंशमखिलंधारयिष्यति १९ तांश्चासुरान्समुत्पाट्यवंशंकृत्वात्मनोमहत्
स्थापयिष्यसिमर्यादांनृणांतन्मेनिशामय २० पुराहिकश्यपोविष्णोवरुणस्यमहात्मनः जहारयज्ञियागावैपयोदाःसुमहाम-
खे २१ अदितिःसुरभिश्चैतेद्वेभार्येकश्यपस्यतु प्रदीयमानागास्तास्तुनैच्छतावरुणस्यवै २२

१३ गतयोंतर्द्धानादयः हंतव्याःरिपवश्चहंतव्याः १४ अंशोत्सर्गोअंशेनावतरणम् दिवौकसैरितिदच्आर्षः १५ १६ १७ १८ १९
समुत्पाट्यउन्मूल्य महत्माहात्म्यम् यशइतियावत् २० मखेमखार्थम् २१ प्रदीयमानाःमह्यंकश्यपेनप्रत्यर्प्यमाणाः २२ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गुरुणापित्राकश्यपेन २३ नानुजानाति नमत्यर्पयति २४ २५ २६ व्युत्थितस्त्यक्तमर्यादः २७ सेतवोमर्यादाः २८ कर्त्तव्येसर्वस्मिन्कार्ये प्रदीयं-
तांदापनीयास्त्वयेत्यर्थः २९ आत्माब्रह्मैवदेवतायासाम् ३० ३१ उत्सजंउदसृजम् ३२ कश्यपएकोंशोनंदोऽपरोवसुदेवइत्याशयेनाह येनांशेनेति

ततोमांवरुणोभ्येत्यप्रणम्यशिरसाततः उवाचभगवन्गावोगुरुणामेहृताइति २३ कृतकार्योहिगास्ताःसनानुजानातिमे
गुरुः अन्ववर्त्ततभार्येद्वे अदितिंसुरभिंतथा २४ ममताह्यक्षयागावोदिव्याःकामदुघाःप्रभो चरंतिसागरान्सर्वान्रक्षिताः
स्वेनतेजसा २५ कस्ताधर्षयितुंशक्तोममगाःकश्यपादृते अक्षयंयाःक्षरंत्यग्र्यंपयोदेवामृतोपमम् २६ प्रभुर्वाव्युत्थितोब्रह्म
न्गुरुर्वायदिवेतरः त्वयानियम्याःसर्वेवैत्वंहिनःपरमागतिः २७ यदिप्रभवतांदंडोलोकेकार्यमजानताम् नविद्यतेलोकगुरो-
नस्युर्वैलोकसेतवः २८ यथावास्तुतथावास्तुकर्त्तव्येभगवान्प्रभुः ममगावःप्रदीयंतांततोगंतास्मिसागरम् २९ याआत्मदेव
तागावोयागावःसत्वमव्ययम् लोकानांत्वत्प्रवृत्तानामेकंगोब्राह्मणंस्मृतम् ३० त्रातव्याःप्रथमंगावस्त्रातास्त्रायंतितान्द्विजा
न् गोब्राह्मणपरित्राणेपरित्रातंजगद्भवेत् ३१ इत्यंबुपतिनाप्रोक्तोवरुणेनाहमच्युत गवांकारणतत्वज्ञःकश्यपेशापमुत्सृजम्
३२ येनांशेनहृतागावःकश्यपेनमहर्षिणा सतेनांशेनजगतींगत्वागोपत्वमेष्यति ३३ याचसासुरभिर्नाम अदितिश्चसुरारणिः
तेप्युभेतस्यभार्येवैतेनैवसहयास्यतः ३४ ताभ्यांचसहगोपत्वेकश्यपोभुविरंस्यते सतस्यकश्यपस्यांशस्तेजसाकश्यपोपमः ३५
वसुदेवइतिख्यातोगोषुतिष्ठतिभूतले गिरिर्गोवर्द्धनोनाममथुरायास्त्वदूरतः ३६ तत्रासौगोषुनिरतःकंसस्यकरदायकः तस्य-
भार्याद्वयंजातमदितिःसुरभिश्चते ३७ देवकीरोहिणीचैववसुदेवस्यधीमतः सुरभीरोहिणीदेवीचादितिर्देवकीत्वभूत् ३८

गोपत्वंनंदत्वम् ३३ तेषानिसंधिरार्षः ३४ सप्रसिद्धोऽन्योयस्तस्यकश्यपस्यांशःसवसुदेवः गोषुगोपालेषु अधिपतित्वेनतिष्ठति ३५ ३६ तस्येति
अदितेरपियशोदादेवकीभेदेनद्वेरूपेद्रष्टव्ये कश्यपवत्गोष्वित्यनुषंगात् ३७ ३८ छ. छ. छ. छ. ८३

वर्द्धयस्वार्थेणिचु ३९ ४० त्वैतेत्वात्वाम् ४१ आत्मानमितिसार्द्धः ४२ ४३ बालत्वंत्वन्माहात्म्यानभिज्ञत्वम् ४४ ४५ ४६ ४७ धारयितुं
गर्भइतिशेषः ४८ ४९ विक्रांतैःपादप्रतिमाभिरुपलक्षिताःतएवपूजिता ५० ५१ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्द्धरवंशावतंस-

तत्रत्वंशिशुदेहादौगोपालकृतलक्षणः वर्द्धयस्वमहाबाहोपुरात्रैविक्रमेयथा ३९ छादयित्वात्मनात्मानंमायथायोगरूप
या तत्रावतरलोकानांभवायमधुसूदन ४० जयाशीर्वचनैस्त्वेतेवर्द्धयंतिदिवौकसः आत्मानमात्मनाहित्वमवतार्यमहीत
ले ४१ देवकीरोहिणीचैवगर्भाभ्यांपरितोषय गोपकन्यासहस्राणिरमयंश्चरमेदिनीम् ४२ गाश्चतेरक्षतोविष्णोवना
निपरिधावतः वनमालापरिक्षिप्तंधन्याद्रक्ष्यंतितेवपुः ४३ विष्णौपद्मपलाशाक्षगोपालवसतिंगते बालेत्वयिमहाबा
होलोकोबालत्वमेष्यति ४४ त्वद्भक्ताःपुंडरीकाक्षतवचित्तवशानुगाः वनेचारयतोगाश्चगोष्ठेषुपरिधावतः ४५ मज्ज
तोयमुनायांचरतिंप्राप्स्यंतितेत्वयि जीवितंवसुदेवस्यभविष्यतिसुजीवितम् ४६ यस्त्वयाततइत्युक्तःसपुत्रइतिवक्ष्य
ति अथवाकस्यपुत्रत्वंगच्छेथाःकश्यपादृते ४७ काचधारयितुंशक्तात्वांविष्णोअदितिंविना योगेनात्मसमुत्थेनग
च्छत्वंविजयायवै वयमप्यालयान्स्वान्स्वान्गच्छामोमधुसूदन ४८ वैशंपायनउवाच सदेवानभ्यनुज्ञायवि
विक्तेत्रिदिवालये जगामविष्णुःस्वंदेशंक्षीरोदस्योत्तरांदिशम् ४९ तत्रवैपार्वतीनामगुहामेरोःसुदुर्गमा त्रिभिस्तस्यैव
विक्रांतैर्नित्यपर्वसुपूजिता ५० पुराणंतत्रविन्यस्यदेहंहरिरुदारधीः आत्मानंयोजयामासवसुदेवगृहेप्रभुः ५१ इतिश्री
महाभारतेखिलेषुहरिवंशेहरिवंशपर्वणिपितामहवाक्यंनामपंचपंचाशत्तमोऽध्यायः ५५ ॥ श्रीकृष्णार्पणमस्तु

१ ७०२ श्लो का० ४२

श्रीगोविंदसूरिसूनोर्नीलकंठस्यकृतौभारतभावदीपेहरिवंशार्थप्रकाशेहरिवंशपर्वणिटीकायांपंचपंचाशत्तमोऽध्यायः ५५ ॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिहरिवंशस्यहरिवंशाख्यप्रथमपर्वसमाप्तम्

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अथहरिवंशस्यविष्णवाख्यद्वितीयपर्वप्रारंभः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीगणेशायनमः श्रीगुरुभ्योनमः अथविष्णुपर्वप्रारभ्यते ज्ञात्वा १ प्रेषयामास दूतमितिशेषः २ ३ ४ ५ विसृज्यप्रकल्प्य ६ ७ ८
९ १० ११ १२ १३ १४ १५ लघुस्वसाकनिष्ठभगिनी तवैवेतिशेषः अन्येतुपितृस्वसेतिपाठंप्रकल्प्यपितृव्यसंबंधिनीस्वसाव्यवहितभगि

श्रीगणेशायनमः वैशंपायनउवाच ज्ञात्वाविष्णुंक्षितिगतंभागांश्चत्रिदिवौकसाम् विनाशशंसीकंसस्यनारदो
मथुरांययौ १ त्रिविष्टपादापतितोमथुरोपवनेस्थितः प्रेषयामासकंसस्यउग्रसेनसुतस्यवै २ सदूतःकथयामासमुनेरागम-
नंवने सनारदस्यागमनंश्रुत्वात्वरितविक्रमः ३ निर्जगामासुरःकंसःस्वपुर्याःपद्मलोचनः सददर्शातिथिंश्लाघ्यंदेवर्षिंवीतकल्म
षम् ४ तेजसाज्वलनाकारंवपुषासूर्यवर्चसम् सोभिवाद्यर्षयेतस्मैपूजांचक्रेयथाविधि ५ आसनंचाग्निवर्णाभंविसृज्योपजह्रा
रसः निषसादासनेतस्मिन्सचेशक्रसखोमुनिः ६ उवाचचोग्रसेनस्यसुतंपरमकोपनम् पूजितोहंत्वयावीरविधिदृष्टेनकर्मणा ७
गतेत्वेवंममवचःश्रूयतांगृह्यतांत्वया अनुसृत्यदिवंलोकानहंब्रह्मपुरोगमान् ८ गतःसूर्यसखंतातविपुलंमेरुपर्वतम् सनंदनव
नंचैवदृष्टवांश्चैत्ररथंवनम् ९ आप्लुतंसर्वतीर्थेषुसरित्सुसहदैवतैः दिव्यात्रिधाराहृष्टामेगंगात्रिपथगामिनी १० स्मरणा-
देवसर्वेषामहसायाविभेदिनी उपस्पृष्टंचतीर्थेषुदिव्येषुचयथाक्रमम् ११ दृष्टंमेब्रह्मसदनंब्रह्मर्षिगणसेवितम् देवगंधर्वनिर्घोषै
रप्सरोभिश्चनादितम् १२ सोहंकदाचिद्देवानांसमाजेमेरुमूर्द्धनि संगृह्यवीणांससक्तामगच्छंब्रह्मणःसभाम् १३ सोहंतत्रसितो-
ष्णीषान्नानारत्नविभूषितान् दिव्यासनगतान्देवानपश्यंसपितामहान् १४ तत्रमंत्रयतामेवंदेवतानांमयाश्रुतः भवतःसानुग
स्यैववधोपायःसुदारुणः १५ तत्रैषादेवकीयातेमथुरायांलघुस्वसा योस्यागर्भोष्टमःकंससतेमृत्युर्भविष्यति १६ देवानांसतुसर्वस्वं
त्रिदिवस्यगतिश्चसः परंरहस्यंदेवानांसतेमृत्युर्भविष्यति १७ परोपित्वपरस्तेषांस्वयंभूश्चदिवौकसाम् ततस्तेतन्महद्भूतंदिव्यंच
कथयाम्यहम् १८ श्लाघ्यश्चसहितेमृत्युर्भूतपूर्वश्चतंस्मर यत्नश्चक्रियतांकंसदेवक्यागर्भकृंतने १९ एषामेत्वत्कृताप्रीतिर्यद
र्थंचाहमागतः भुज्यतांसर्वकामार्थाःस्वस्तितेस्तुव्रजाम्यहम् २० इत्युक्त्वानारदेयातेतस्यवाक्यंविचिंतयन् जहासोच्चैस्ततःकंसः
प्रकाशदशनश्चिरम् २१ सस्मितंचैवप्रोवाचभृत्यानामग्रतःस्थितः हास्यःखलुससर्वेषुनारदोनविशारदः २२

नीतिव्याचरत्वसुः १६ १७ परोमोक्षः अपरःस्वर्गः तत्प्रदइत्यर्थः १८ १९ स्वस्ति शोभनम् २० २१ २२ छ. छ. छ.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२३ २४ कदनंपीडनम् २५ २६ २७ २८ २९ केलिकिलः युद्धोत्सुकः सुश्लिष्टान् स्निग्धान् ३० कंडूयमानः संघर्षणंजनयन् तंत्रैः उपायैः
३१ ३२ इतिश्रीहरिवंशेविष्णुपर्वणिटीकायांप्रथमोऽध्यायः १ आज्ञापयत आज्ञापितवान् संरब्धः क्रुद्धः १ प्रथमात् प्रथमंजन्मदिनंप्राप्येत्य

नाहंभीषयितुंशक्योदेवैरपिसवासवैः आसनस्थःशयानोवाप्रमत्तोमत्तएववा २३ योहंदोर्भ्यामुदाराभ्यांक्षोभयेयंधरामि
माम् कोस्तिमामानुषेलोकेयःक्षोभयितुमुत्सहेत् २४ अद्यप्रभृतिभूतानामहंदेवानुवर्तिनाम् नृपक्षिपशुसंघानांकरोमि
कदनंमहत् २५ आज्ञाप्यंताहयःकेशीप्रलंबोधेनुकस्तथा अरिष्टोवृषभश्चैवपूतनाकालियस्तथा २६ अटध्वंपृथ्वींकृत्स्नां
यथेष्टंकामरूपिणः प्रहरध्वंचसर्वेषुयेऽस्माकंपक्षदूषकाः २७ गर्भस्थानामपिगतिर्विज्ञेयाचैवदेहिनाम् नारदेनहिगर्भेभ्योभयं
नःसमुदाहृतम् २८ भवंतोहियथाकामंमोदंताविगतज्वराः मांचवोनाथमाश्रित्यनास्तिदेवकृतंभयम् २९ सतुकेलिकिलोवि
प्रोभेदशीलश्चनारदः सुश्लिष्टानपिलोकेस्मिन् भेदयन्लभतेरतिम् ३० कंडूयमानःसततंलोकानटतिचंचलः घटमानोनरेंद्रा
णांतंत्रैर्वैराणिचैवहि ३१ एवंसविलपन्नेववाङ्मात्रेणैवकेवलम् विवेशकंसोभवनंदह्यमानेनचेतसा ३२ इतिश्रीमहाभा
रतेखिलेषुहरिवंशेविष्णुपर्वणिनारदगमनेकंसवाक्यनामप्रथमोऽध्यायः १ वैशंपायनउवाच सोज्ञापयतसंरब्धःसचिवा
नात्मनोहितान् यत्ताभवतसर्वेवैदेवक्यागर्भकृंतने १ प्रथमादेवहंतव्यागर्भास्तेसर्वएवहि मूलादेवतुहंतव्यःसोनर्थोयत्रसंशयः
२ देवकीचगृहेगुप्ताप्रच्छन्नैरभिरक्षिता स्वैरंचरतुविस्रब्धागर्भकालेतुरक्ष्यताम् ३ मासान्वैपुष्पमासादीन्गणयंतुसमस्त्रि
यः परिणामेतुगर्भस्यशेषंज्ञास्यामहेवयम् ४ वसुदेवस्तुसंरक्ष्यःस्त्रीसनाथासुभूमिषु अप्रमत्तैरमहितैरात्रावहनिचैवहि
स्त्रीभिर्वर्षवरैश्चैववक्तव्यंनतुकारणम् ५ एषमानुष्यकोयत्नोमानुषैरेवसाध्यते श्रूयतांयेनदैवंहिमद्विधैःप्रतिहन्यते ६ मंत्र
ग्रामैःसुविहितैरोषधैश्चसुयोजितैः यत्नेनचानुकूल्येनदैवमप्यनुलोम्यते ७ वैशंपायनउवाच एवंसयत्नवान्कंसोदे
वकीगर्भकृंतने भयेनमंत्रयामासश्रुतार्थोनारदात्सवै ८ एवंश्रुत्वाप्रयत्नंवैकंसस्यारिष्टसंज्ञितम् अंतर्हानगतोविष्णुश्चिंतया
मासवीर्यवान् ९ सप्तेमान्देवकीगर्भान्भोजपुत्रोवधिष्यति अष्टमेचमयागर्भेकार्यमाधानमात्मनः १०

र्थः सोऽष्टमोमूलात्गर्भधारणादेवौषधाद्यै
रुपायैर्हंतव्यइत्यर्थः २प्रच्छन्नैरंतःपुररक्षकैः ३ परिणामेदशममासादौ ४स्त्रीसनाथासुअंतःपुरभूमिषुवर्षवरैःनपुंसकैः वसुदेवसन्निधौप्रसवेसतिसगर्भमन्यत्र
मानयतीत्येतदर्थंसोपिरक्ष्यइत्यर्थः ५ ६ अनुलोम्यतेअनुकूलंक्रियते ७ श्रुतार्थःज्ञातप्रयोजनः ८ अरिष्टंअक्षेममितिसंज्ञितंउत्पातरूपमित्यर्थः ९ आधानंस्थापनं १०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गर्भशयनाः जलगर्भशायिनः षड्गर्भानामतः नाम्नाहंसः सुविक्रमोथो दमनोरिपुमर्दनः क्रोधहंतेतिविख्याताः षड्गर्भानामदानवाइतिपुराणप्रसिद्धाः ११
अमृतमाशनोपमाः देवतुल्या अमरकल्पाइत्यर्थः १२ तातनातं स्वपितामहम् लोकपितामहंब्रह्माणम् १३ १४ १५ वरः श्रेष्ठः वरः प्रार्थितोर्थः १६ १७
१८ १९ २० २१ योयुष्माभिः २२ २३ संयताः हिरण्यकशिपुशापेननिरुद्धाः २४ संददर्शसः विष्णुः २५ स्वप्नेति ब्रह्मवरदानादविनष्टं स्थूलदेहानासेयते

तस्यचिंतयतस्त्वेवंपातालमगमन्मनः यत्रतेगर्भशयनाः षड्गर्भानामदानवाः ११ विक्रांतवपुषोदीप्तास्तेमृतमाशनोपमाः अमर
प्रतिमायुद्धे पुत्रावैकालनेमिनः १२ तेतात तातंसंत्यज्याहिरण्यकशिपुंपुरा उपासांचक्रिरेदैत्याः पुरालोकपितामहम् १३ तप्यमाना
स्तपस्तीव्रंजटामंडलधारिणः तेषांप्रीतोभवद्ब्रह्मा षड्गर्भाणांवरंददौ १४ ब्रह्मोवाच भोभोदानवशार्दूलास्तपसाहंसुतो-
षितः ब्रूतवोयस्ययः कामस्तस्यतंतंकरोम्यहम् १५ तेतुसर्वेसमानार्थादैत्याब्रह्माणमब्रुवन् यदिनोभगवान्प्रीतोदीयतांनोवरोवरः
१६ अवध्याः स्यामभगवन्दैवतैःसमहोरगैः शापप्रहरणैश्चैवनियतैःपरमर्षिभिः १७ यक्षगंधर्वपतिभिः सिद्धचारणमानवैः मापभू
दृधानोभगवन्ददासियदिनोवरम् १८ तानुवाचततोब्रह्मासुप्रीतेनांतरात्मना भवद्भिर्यदिदंप्रोक्तंसर्वमेतद्भविष्यति १९ षड्गर्भाणां
वरंदत्वास्वयंभूस्त्रिदिवंगतः ततोहिरण्यकशिपुः सरोषोवाक्यमब्रवीत् २० मामुत्सृज्यवरोयस्माद्वृतोवः पद्मसंभवात् तस्माद्धस्त्या
जितः स्नेहः शत्रुभूतांस्त्यजाम्यहम् २१ षड्गर्भा इतियोयुष्मः शब्दः पित्राभिवर्द्धितः सएवबोगर्भगतान्पितासर्वान्वधिष्यति २२ षड्दे-
वदेवकीगर्भाषड्गर्भावैमहासुराः भविष्यथततः कंसोगर्भस्थान्वोवधिष्यति २३ वैशंपायनउवाच जगामाथततोविष्णुःपा
तालंयत्रतेसुराः षड्गर्भाःसंयताःसंतिजलेगर्भगृहेशयाः २४ संददर्शजलेगुप्तान्षड्गर्भान्गर्भसंस्थितान् निद्रयाकालरूपिण्या
सर्वानंतर्हितान्सवै २५ स्वप्नरूपेणतेषांवैविष्णुर्देहानथाविशत् प्राणेश्वरांश्चनिष्कृष्यनिद्रायैप्रददौतदा २६ तांचोवाचततोनि-
द्रांविष्णुःसत्यपराक्रमः गच्छनिद्रेमयोत्सृष्टादेवकीभवनांतिकम् २७ इमान्प्राणेश्वरान्गृह्यषड्गर्भान्दानवोत्तमान् सर्वप्राणे-
श्वरांश्चैवषड्गर्भान्नामदेहिनः षड्गर्भान्देवकीगर्भेयोजयस्वयथाक्रमम् २८ जातेष्वेतेषुगर्भेषुनीतेषुचयमक्षयम् कंसस्यविफले
यत्नेदेवक्याःसफलेश्रमे २९ प्रसादंतेकरिष्यामिमत्प्रभावसमंभुवि येनसर्वस्यलोकस्यदेविदेवीभविष्यसि ३०

षांविष्णुमायाबलेन स्वप्नवज्ज
न्मांतरप्रतिभासोहिरण्यकशिपुशापनिमित्तोलवणस्येवजातइत्यर्थः प्राणेश्वरान्जीवान्नन्वेवंस्वदेहाद्बहिर्गतैः पुरुषैर्देशांतरेस्वप्नप्रपंचोजाग्रद्वत्सत्यतएवप्रतीय २
तइतिदर्शितम् तेनअस्मद्दृष्ट्याषड्गर्भाणांजन्मयोगमायाकृतत्वादिंद्रजालपुरवत् व्यावहारिकंषड्गर्भंदृष्ट्यातुस्वप्नवत्प्रातिभासिकमितिसिद्धेर्नकश्चिद्दोषः २६ उत्सृष्टा
आज्ञप्ता २७ २८ २९ देवीपूज्या ३०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सप्तमइति सप्तमस्यगर्भस्ययद्यपिप्रसवे जीवनमधिकृद्धं तथापिरोहिण्युदरेप्रवेशस्तस्यांगर्भसंक्रमश्चमायाबलादेवेतिज्ञेयम् ३१ ३२ ३३ ३४ नवमं
त्वंकृष्णामनुतस्याअपिदेवक्युदरेस्वल्पकालंप्रवेशोस्तीतिसिध्यति नवम्यामितिलष्टम्यांकृष्णजन्मनदनंतरंदेव्याइतियुक्तम् एकस्यामपिरात्रौनानाकालि-
कतिथिभेदसंभवात् ३५ अभिजितोनिशायाअष्टममुहूर्त्तस्य गर्भमोक्षंउदरान्निर्गमम् ३६ ३७ व्यत्यासमेवाह अहमिति गर्भसंयोगेअन्योन्यव्य

सप्तमोदेवकीगर्भोयोंशःसौम्योममाग्रजः ससंक्रमयितव्यस्तेसप्तमेमासिरोहिणीम् ३१ संकर्षणात्तुगर्भस्यसतुसंकर्षणोयुवा
भविष्यत्यग्रजोभ्राताममशीतांशुदर्शनः ३२ पतितोदेवकीगर्भःसप्तमोयंभयादिति अष्टमेमयिगर्भस्थेकंसोयत्नंकरिष्यति ३३
यातुसानंदगोपस्यदयिताकृष्णविश्रुता यशोदानामभद्रंतेभार्यागोपकुलोद्वहा ३४ तस्यास्त्वंनवमोगर्भःकुलेस्माकंभविष्य-
सि नवम्यामेवसंजाताकृष्णपक्षस्यवैतिथौ ३५ अहंत्वभिजितोयोगेनिशायायौवनेस्थिते अर्धरात्रेकरिष्यामिगर्भमोक्षंयथासु-
खम् ३६ अष्टमस्यतुमासस्यजातावावांततःसमम् प्राप्स्यावोगर्भव्यत्यासंप्राप्तेकंसस्यनाशने ३७ अहंयशोदांयास्यामित्वंदेविभ-
जदेवकीम् आवयोर्गर्भव्यत्यासेकंसोगच्छतुमूढताम् ३८ ततस्त्वांगृह्यचरणेशिलायांपातयिष्यति निरस्यमानागगनेस्थानंप्रा-
प्स्यसिशाश्वतम् ३९ मच्छवीसदृशीकृष्णासंकर्षणसमानना बिभ्रतीविपुलौबाहूममबाहूपमौदिवि ४० त्रिशिखंशूलमुद्यम्य-
खड्गंचकनकत्सरुम् पात्रींचपूर्णांमधुनापंकजंचसुनिर्मलम् ४१ नीलंकौशेयसंवीतापीतेनोत्तरवाससा शशिरश्मिप्रकाशेनहारेणो-
रसिराजता ४२ दिव्याकुंडलपूर्णाभ्यांश्रवणाभ्यांविभूषिता चंद्रसापत्नभूतेनमुखेनत्वंविराजिता ४३ मुकुटेनविचित्रेणकेशब-
धेनशोभिना भुजंगाभैर्भुजैर्भीमैर्भूषयंतीदिशोदश ४४ ध्वजेनशिखिबर्हाणाउच्छ्रितेनविराजता अंगजेनमयूराणामंगदेनच
भास्वता ४५ कीर्णाभूतगणैर्घोरैर्मन्नियोगानुवर्तिनी कौमारंव्रतमास्थायत्रिदिवंत्वंगमिष्यसि ४६ तत्रत्वांशतदृक्शक्रोमत्प्रदि-
ष्टेनकर्मणा अभिषेकेणदिव्येनदैवतैःसहयोक्ष्यसे ४७ तत्रैवत्वांभगिन्यर्थेगृहीष्यतिसवासवः कुशिकस्यतुगोत्रेणकौशिकी
त्वंभविष्यसि ४८ सतेविंध्येनगश्रेष्ठेस्थानंदास्यतिशाश्वतम् ततःस्थानसहस्रैस्त्वंपृथिवींशोभयिष्यसि ४९ त्रैलोक्यचारिणीसा
त्वंभुविसत्योपयाचना चरिष्यसिमहाभागेवरदाकामरूपिणी ५०

त्यासे ३८ निरस्यमाना आस्फाल्यमाना ३९ ४० कनकत्सरुंस्वर्णमुष्टिम् ४१ ४२
४३ ४४ अंगजेनपिच्छेन ४५ कीर्णापरिवृता कौमारंकुमारीयोग्यम् ४६ शतदृक्सहस्राक्षः ४७ ४८ ४९ सत्याअवश्यफला उपयाचनामसेदंई-
प्सितंकुरु अहंत्वांपूजयिष्यामीत्येवंरूपाप्रार्थनासत्या उपयाचनायस्याःसातया ५० ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५१ ५२ पुत्रतः पुत्रप्रभृतीत्यर्थः ५३ गतिः आपन्निवारयित्री ५४ अनेनवक्ष्यमाणेनतस्यस्तोतुरहंनप्रणश्यामि अदृश्योनभवामि सनित्यंमद्भक्तिं लभतेऽहंचतंनत्यजामीत्यर्थः ५५ इतिहरिवंशेविष्णुपर्वणिटीकायांद्वितीयोऽध्यायः २ आर्यास्तवंअनेनेतिप्राकृतनम् १ सिद्धिर्मुक्तिर्धृतिर्जीवनम् २ सिद्धसेनस्यस्कंदस्य उग्रचारीउग्रेणकर्मणाचरतीत्युग्रचारिणी पुंस्त्वमार्षम् ३ यमस्यभगिनीमृत्युः ४ ५ ६ ७ छागलेमेषविशेषैः ८

तत्रसुंभनिसुंभौद्वौदानवौनगचारिणौ तौचकृत्वामनसिमांसानुगौनाशयिष्यसि ५१ कृत्वानुयात्राभूतैस्त्वंसुरामांसबलिप्रिया तिथौनवम्यांपूजांत्वंप्राप्स्यसेसपशुक्रियाम् ५२ येचत्वांमत्प्रभावज्ञाःप्रणमिष्यंतिमानवाः तेषांनदुर्लभंकिंचित्पुत्रतोधनतोपिवा ५३ कांतारेष्ववसन्नानांमग्नानांचमहार्णवे दस्युभिर्वानिरुद्धानांत्वंगतिःपरमानृणाम् ५४ त्वांतुस्तोष्यंतियेभक्त्यास्तवेनानेनवैशुभे तस्याहंनप्रणश्यामिसत्त्वमेनप्रणश्यति ५५ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुप॰भारावतरणेनिद्रासंविज्ञानोनामद्वितीयोऽध्यायः २ वैशंपायनउवाच आर्यास्तवंप्रवक्ष्यामियथोक्तमृषिभिःपुरा नारायणींनमस्यामिदेवींत्रिभुवनेश्वरीम् १ त्वंहिसिद्धिर्धृतिःकीर्तिःश्रीर्विद्यासन्नतिर्मतिः संध्यारात्रिःप्रभानिद्राकालरात्रिस्तथैवच २ आर्याकात्यायनीदेवीकौशिकीब्रह्मचारिणी जननीसिद्धसेनस्यउग्रचारीमहाबला ३ जयाचविजयाचैवपुष्टिस्तुष्टिःक्षमादया ज्येष्ठायमस्यभगिनीनीलकौशेयवासिनी ४ बहुरूपाविरूपाचअनेकविधिचारिणी विरूपाक्षाविशालाक्षीभक्तानांपरिरक्षिणी ५ पर्वताग्रेषुघोरेषुनदीषुचगुहासुच वासस्तवमहादेविवनेषूपवनेषुच ६ शबरैर्बर्बरैश्चैवपुलिंदैश्चसुपूजिता मयूरपिच्छध्वजिनीलोकान्क्रमसिसर्वशः ७ कुक्कुटैश्छागलैर्मेषैःसिंहैर्व्याघ्रैःसमाकुला घंटानिनादबहुलाविंध्यवासिन्यभिश्रुता ८ त्रिशूलीपट्टिशधरासूर्यचंद्रपताकिनी नवमीकृष्णपक्षस्यशुक्लस्यैकादशीतथा ९ भगिनीबलदेवस्यरजनीकलहप्रिया आवासःसर्वभूतानांनिष्ठात्वंपरमागतिः १० नंदगोपसुताचैवदेवानांविजयावहा चीरवासाःसुवासाश्चरौद्रीसंध्याचरीनिशा ११ प्रकीर्णकेशीमृत्युश्चतथामांसौदनप्रिया लक्ष्मीरलक्ष्मीरूपेणदानवानांवधायच १२ सावित्रीचापिदेवानांमायामंत्रगणेषुच कन्यानांब्रह्मचर्यत्वंसौभाग्यंप्रमदासुच १३ अंतर्वेदीचयज्ञानामृत्विजांचैवदक्षिणा कर्षुकाणांचसीतेतिभूतानांधरणीतिच १४ सिद्धिस्त्वयात्रिकाणांतुमाताभूतगणस्यच यक्षाणांप्रथमायक्षीनागानांसुरसेतिच १५

त्रिशूलीत्यादिषुपुंस्त्वमार्षम् ९ निष्ठामरणंपरमागतिर्मुक्तिः १० ११ १२ १३ सीतालांगलपद्धतिः धत्रीधरणी १४ प्रथमायक्षीकुबेरमातासायांत्रिकाणामितिपाठेसायांत्रिकाणांपोतवणिजाम् १५ ३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१६ राजद्वारादिषु पूर्णा लक्ष्मीरितिशेषः १७ मानसी सत्यसंकल्पात्मिकाचेतोवृत्तिः १८ १९ वसूमतीतिदैर्घ्यं वृत्तानुरोधतः २० २१ २२ २३ २४
२५ २६ २७ व्यासप्रकल्पितं विष्णुनाकृतमपि व्यासेनपद्यस्वरूपेणरचितम् २८ २९ ३० ३१ ३२ ३३ ३४ ३५ इतिहरिवंशेटीकायां

ब्रह्मवादीत्वयोदीक्षाशोभाचपरमातथा ज्योतिषांत्वंप्रभादेविनक्षत्राणांचरोहिणी १६ राजद्वारेषुतीर्थेषुनदीनांसंगमेषुच पूर्णा
चपूर्णिमाचंद्रेत्वंबुद्धिरविकाशफविः १७ सरस्वतीचवाल्मीकेस्मृतिर्द्वैपायनेतथा ऋषीणांधर्मबुद्धिस्तुदेवानामानसीतथा सुरादे
वीतुभूतेषुस्तूयसेत्वंस्वकर्मभिः १८ इंद्रस्यचारुदृष्टिस्त्वंसहस्रनयनेतिच तापसानांचदेवीत्वमरणीचाग्निहोत्रिणाम् १९ क्षुधा
चसर्वभूतानांतृप्तिस्त्वंदैवतेषुच स्वाहातृप्तिर्धृतिर्मेधावसूनांत्वंवसूमती २० आशात्वंमानुषाणांचपुष्टिश्चकृतकर्मणाम् दिश
श्चविदिशश्चैवतथाह्यग्निशिखाप्रभा २१ शकुनीपूतनात्वंचरेवतीचसुदारुणा निद्रापिसर्वभूतानांमोहिनीक्षत्रियातथा २२ वि
द्यानांब्रह्मविद्यात्वंत्वमोंकारोवषट्तथा नारीणांपार्वतींचत्वांपौराणीमृषयोविदुः २३ अरुंधतीचसाध्वीनांप्रजापतिवचोयथा यथा
र्थनामभिर्दिव्यैरिंद्राणीचेतिविश्रुता २४ त्वयाव्याप्तमिदंसर्वंजगत्स्थावरजंगमम् संग्रामेषुचसर्वेषुअग्निप्रज्वलितेषुच नदीतीरे
षुचौरेषुकांतारेषुभयेषुच २५ प्रवासेराजबंधेचशत्रूणांचप्रमर्दने प्राणात्ययेषुसर्वेषुत्वंहिरक्षानसंशयः २६ त्वयिमेहृदयंदेवित्वयि
चित्तमनस्त्वयि रक्षमांसर्वपापेभ्यःप्रसादंकर्त्तुमर्हसि २७ इमंयःस्तवंदिव्यमितिव्यासप्रकल्पितम् यःपठेत्प्रातरुत्थायशुचिःप्रय
तमानसः २८ त्रिभिर्मासैःकांक्षितंचफलंवैसंप्रयच्छति षड्भिर्मासैर्वरिष्ठंतुवरमेकंप्रयच्छति २९ अर्चितातुत्रिभिर्मासैर्दिव्यंचक्षुः
प्रयच्छति संवत्सरेणसिद्धिंतुयथाकामंप्रयच्छति ३० सत्यंब्रह्मचदिव्यंचद्वैपायनवचोयथा नृणांबंधंवधंघोरंपुत्रनाशंधनक्षयम्
३१ व्याधिमृत्युभयंचैवपूजिताशमयिष्यसि भविष्यसिमहाभागेवरदाकामरूपिणी मोहयित्वाचतंकंसमेकात्वंभोक्ष्यसेजगत्
३२ अहमप्यात्मनोवृत्तिंविधास्येगोषुगोपवत् स्ववृद्ध्यर्थमहंचैवकरिष्येकंसगोपताम् ३३ एवंतांससमादिश्यगतोंतर्द्धानमीश्वरः
साचापितंनमस्कृत्यतथास्त्वितिचनिश्चिता ३४ यश्चैतत्पठतेस्तोत्रंशृणुयाद्वाप्यभीक्ष्णशः सर्वार्थसिद्धिंलभतेनरोनास्त्यत्रसंशयः
३५ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिस्वप्नगर्भविधानेआर्याक्स्तुतिर्नामतृतीयोऽध्यायः ३ वैशंपायनउवाच
कृतेगर्भविधानेतुदेवकीदेवतोपमा जग्राहसप्ततान्गर्भान्यथावत्संप्रुदाहृतान् १

तृतीयोऽध्यायः ३ कृतेगर्भविधानेगर्भाधाने समुदाहृतान्योगमायायैविष्णुनाप्रोक्तान् १ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आपन्नं देवक्यां प्राप्तं सा योगमाया रोहिणीं प्रतिनीतवती अथ देवक्याः सप्तमो गर्भो गलित इति लोकप्रवादानंतरम् २ रजस्वला रोहिणी स्वोदरे स्थितं ग
र्भं पातयंती पपात ३ पतितमपि गर्भं अपश्यंती योगमायया तस्यांतर्धानं नीतत्वात् ४ अथैतां योगनिद्रा समाश्वासयदित्याह तामिति रोहिणीं वंशवृद्धि
करीम् ५ कर्षणेनेति पूर्वं देवक्यास्त्वे गर्भे आहितस्य गर्भस्य संप्रति लदुदरे प्रापितस्य गर्भस्य कर्षणेन आकर्षणाद्धेतोस्तव संकर्षणो नाम पुत्रो भविष्यति ६
रोहिणी सोमपत्नी यथा बुधं क्रोडात ह्रत् ७ मार्गेण मार्गणेन सप्तमो गर्भो देवक्याः क्वगतः कदा पतित इति मार्गमाणे एवं कंसीयेषु अष्टमं नूतनं गर्भं देवकी

षड्गर्भान्निःसृतान् कंसस्तान्जघान शिलातले आपन्नं सप्तमं गर्भं सा निनायाथ रोहिणीम् २ सार्द्धरात्रे स्थितं गर्भं पातयंती रज
स्वला निद्रया सहसाविष्टा पपात धरणीतले ३ सा स्वप्नमिव तं दृष्ट्वा स्वे गर्भे गर्भमादधत् अपश्यंती च तं गर्भं मुहूर्त्तं व्यथिताभव
त् ४ तामाह निद्रा संविग्नां नैशे तमसि रोहिणीम् रोहिणीमिव सोमस्य वसुदेवस्य धीमतः ५ कर्षणेनास्य गर्भस्य स्वगर्भे चाहि
तस्य वै संकर्षणो नाम सुतः शुभे तव भविष्यति ६ सा तं पुत्रमवाप्यैवं हृष्टा किंचिदवाङ्मुखी विवेश रोहिणी वेश्म सुप्रभा रोहि-
णी यथा ७ तस्य गर्भस्य मार्गेण गर्भमाधत्त देवकी यदर्थं सप्त ते गर्भाः कंसेन विनिपातिताः ८ तं तु गर्भं प्रयत्नेन रररक्षुस्तस्य मंत्रि
णः सोप्यत्र गर्भवसतौ वसत्यात्मेच्छया हरिः ९ यशोदापि समाधत्त गर्भं तदहरेव तु विष्णोः शरीरजां निद्रां विष्णुनिर्देशकारिणी
म् १० गर्भकाले त्वसंपूर्णे अष्टमे मासि ते स्त्रियौ देवकी च यशोदा च सुषुवाते समं ततः ११ यामेव रजनीं कृष्णो जज्ञे वृष्णिकु
लोद्वहः तामेव रजनीं कन्यां यशोदापि व्यजायत १२ नंदगोपस्य भार्यैका वसुदेवस्य चापरा तुल्यकाले च गर्भिण्यौ यशोदा देव
की तथा १३ देवक्यजनयद्विष्णुं यशोदा तां तु दारिकाम् मुहूर्त्तेभिजिति प्राप्ते सार्द्धरात्रे विभूषिते १४ सागराः समकंपंत चेलु
श्च धरणीधराः जज्वलुश्चाग्नयः शांता जायमाने जनार्द्दने १५ शिवाश्च प्रववुर्वाताः प्रशांतमभवद्रजः ज्योतींष्यतिव्यकाशंत
जायमाने जनार्द्दने १६ अभिजिन्नाम नक्षत्रं जयंती नाम शर्वरी मुहूर्त्तो विजयो नाम यत्र जातो जनार्द्दनः अव्यक्तः शाश्वतः सूक्ष्मो
हरिर्नारायणः प्रभुः १७ जायमानो हि भगवान्नयने मोहयन्प्रभुः अनाहता दुंदुभयो देवानां प्राणदन्दिवि १८

आधत्त ८ अत्र काले
९ १० ११ १२ १३ देवकी विष्णुं अभिजिते मुहूर्त्तेऽजनयत् विभूषिते विभोः विष्णोः उषिते ओषिते व्रजं प्रति प्रवासे जाते सति सार्धरात्रे चतुर्भागायाः रात्रेः सा
र्द्धभागेऽवशिष्टे सति यशोदा तां कन्यकामजनयदित्यर्थः अर्धरात्रे जातस्य विष्णोर्यशोदां प्रति आनयने अर्धयाममात्रं जातं तदानयनसमकालमेव यशोदा दा ४
रिकामसूत अतएव तस्याः जन्म नवम्यामिति प्रागुक्तं संगच्छते १४ समकंपंत उद्रिक्तजला बभूवुस्तत्र हेतुश्चेलुरिति धरणीधराः शेषादयश्चेलुः भगवतो भा
रेणेति भावः १५ १६ १७ १८ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१९ अप्सराइत्यदंतत्वमार्षम् सुरांगनाइतिवापाठः २० वसुदेवश्चेत्यनुषंगः २१ २२ २३ तवज्येष्ठाः संधिरार्षः रूपंचतुर्भुजम् अहरत् तिरो
हितंकृतवान् २४ २५ २६ २७ ताभ्यांतयोरित्यर्थः निवेशनात्सूतिकागृहात् २८ २९ ३० ३१ ३२ तुप्रजातेत्यत्रपुत्रजातेतिपाठेपुत्रवज्जा-

आकाशात्पुष्पवृष्टिंचववर्षत्रिदशेश्वरः गीर्भिर्मंगलयुक्ताभिःस्तुवंतोमधुसूदनम् १९ महर्षयःसगंधर्वाउपतस्थुःसहाप्सराः
जायमानेहृषीकेशेप्रहृष्टमभवज्जगत् २० इंद्रश्चत्रिदशैःसार्द्धंतुष्टावमधुसूदनम् वसुदेवश्चतंरात्रौजातंपुत्रमधोक्षजम् २१
श्रीवत्सलक्षणंदृष्ट्वासुतंदिव्यैश्चलक्षणैः उवाचवसुदेवस्तंरूपंसंहरवैप्रभो २२ भीतोहंदेवकंसस्यतस्मादेवंब्रवीम्यहम् ममपु
त्राहतास्तेनतवज्येष्ठाम्बुजेक्षण २३ वैशंपायनउवाच वसुदेववचःश्रुत्वारूपंचाहरदच्युतः अनुज्ञाप्यपितृत्वेननंदगोप
गृहंनय २४ वसुदेवस्तुसंगृह्यदारकंक्षिप्रमेवच यशोदायागृहंरात्रौविवेशसुतवत्सलः २५ यशोदायास्त्वविज्ञातस्तत्रनिक्षि
प्यदारकम् प्रगृह्यदारिकांचैवदेवकीशयनेन्यसत् २६ परिवर्तेकृतेताभ्यांगर्भाभ्यांभयविक्लवः वसुदेवःकृतार्थोवैनिर्जगामनिवे
शनात् २८ उग्रसेनसुतायाथकंसायानकदुंदुभिः निवेदयामासतदातांकन्यांवरवर्णिनीम् २९ तच्छ्रुत्वात्वरितःकंसोरक्षिभिःस
हवेगिभिः आजगामगृहद्वारंवसुदेवस्यवीर्यवान् ३० सतत्रत्वरितद्वारिकिंजातमितिचाब्रवीत् दीयतांशीघ्रमित्येववाग्भिःसम
भितर्जयत् ३१ ततोहाहाकृताःसर्वादेवकीभवनेस्त्रियः उवाचदेवकीदीनाबाष्पगद्गदयागिरा ३२ दारिकातुप्रजातेतिकंसंसम-
भियाचती श्रीमंतोमेहताःसप्तपुत्रगर्भास्त्वयाविभो ३३ दारिकेयंहतैवैषापश्यस्वयदिमन्यसे दृष्ट्वाकंसस्तुतांकन्यामाकृष्यतमु
दासुतः ३४ हतैवैषायदाकन्याजातेत्यब्रुवदामतिः सागर्भशयनेक्लिष्टागर्भाम्बुक्लिन्नमूर्द्धजा ३५ कंसस्यपुरतोन्यस्तापृथिव्या-
पृथिवीसमा सचैनांगृह्यपुरुषःसमाविध्यावधूयच ३६ उद्यच्छन्नेवसहसाशिलायांसमपोथयत् सावधूताशिलापृष्ठेऽनिष्पिष्टा
दिवमुत्पतत् ३७ हित्वागर्भतनुंसातुसहसामुक्तमूर्द्धजा जगामकंसमादिश्यदिव्यस्रगनुलेपना हारशोभितसर्वांगीमुकुटोज्ज्व
लभूषिता ३८ कन्यैवसाभवन्नित्यंदिव्यादेवैरभिष्टुता नीलपीतांबरधरागजकुंभोपमस्तनी ३९ रथविस्तीर्णजघनाचन्द्रवक्त्रा
चतुर्भुजा विद्युद्विस्पष्टवर्णाभाबालार्कसदृशेक्षणा ४० पयोधरस्तनवतीसंध्येवसपयोधरा सावैनिशितमोग्रस्तेबभौभूतगणा
कुले नृत्यतीहसतीचैवविपरीतेनभास्वती ४१

तापरिवर्तितेतिगूढोभिसंधिः पुत्रेतिसंबोधनंवा ३३ ३४ ३५ गृह्यगृहीत्वा आविध्यभ्रामयित्वा अवधू
यतुच्छीकृत्य ३६ उत्पतत्उदपतत् अनिष्पिष्टेतिछेदः ३७ आदिश्यतिरस्कृत्यजगामखमितिशेषः ३८ ३९ ४० निशिकालेइतिशेषः विपरीतेनविशेषेणपरि-
तःप्रसर्पणेन ४१ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४२ ४३ ४४ ४५ ४६ एकाचासावनंशेतिएकानंशाभगवताएकासतीअविभक्ता अज्ञस्कृतेनैकः सन्नपिस्वाविद्ययाननतोविभक्तोभवति इयंतुन तथा यतःयोगकन्यायोगेनकन्याभूताचित्कलैवेयमित्यर्थइतितांविद्धि ४७ सुमनसः सुराः यादवाः यदुषुजाताः ४८ ४९ मृत्योः परिहारार्थमितिशेषः ५० नैराश्येनकार्कश्येन ५१ हेतुभूतः शस्त्रवत्कालाख्यस्यईश्वरस्यप्रयोज्यः ५२ ५३ यथाभागंयथाकर्मेत्यर्थः तेनईश्वरेपिनदोषः यथोक्तम् स्वकर्मै-

विहायसिगतारौद्रापपौपानमत्युत्तमम् जहासचमहाहासंकंसंचरुषिताब्रवीत् ४२ कंसकंसविनाशायय दहंघातितालया सहसा चससमुत्क्षिप्यशिलायामभिपोथिता ४३ तस्यान्तवांतकालेहं हृष्यमाणस्यशत्रुणा पादयित्वाकरैर्देहमुष्णपास्यामिशोणितं ४४ एवमु क्त्वावचोघोरंसायथेष्टेनवर्त्मना खंसादेवालयंदेवीसगणाविचचारह ४५ साकन्यावृद्धेतत्रवृष्णिसंघसुपूजिता पुत्रवत्पाल्यमानासावसु देवाज्ञयातदा ४६ विद्धिचैनामथोत्पन्नामंशाद्देवीप्रजापतेः एकानंशांयोगकन्यारक्षार्थंकेशवस्यतु ४७ तांवैसर्वेसुमनसः पूजयंतिस्मयाद वाः देववद्दिव्यवपुषाकृष्णः संरक्षितोयया ४८ तस्यांगतायांकंसस्तुतामेनंमृत्युमात्मनः विविक्तेदेवकींचैवव्रीडितःसमभाषत ४९ कंसउवाच मृत्योःस्वसः कृतोयत्नस्तवगर्भामयाहता अन्यएवान्यतोदेविममसमृत्युरूपस्थितः ५० नैराश्येनकृतोयत्नःस्व जनेप्रहृतंमया दैवंपुरुषकारेणनचातिक्रांतवानहम् ५१ त्यजगर्भकृतांचिंतांसंतापंपुत्रजंत्यज हेतुभूतस्त्वहंतेषांसतिकालवि पर्यये ५२ कालएवनृणांशत्रुःकालश्चपरिणामकः कालोनयतिसर्वंवैहेतुभूतस्तुमद्विधः ५३ आगमिष्यंतिवैदेवियथाभागमुप द्रवाः इदंतुकष्टंयज्जंतुःकर्ताहमितिमन्यते ५४ माकार्षीःपुत्रजांचिंतांविलापंशोकजंत्यज एवंप्रायानृणांयोनिर्नास्तिकालस्य संस्थितिः ५५ एषतेपादयोर्मूर्ध्नापुत्रवत्तवदेवकि मद्गतस्त्यज्यतांरोषोजानाम्यपकृतंत्वयि ५६ इत्युक्तवंतंकंसंसादेवकीवाक्य मब्रवीत् सास्रुपूर्णमुखादीनाभर्तारमुपवीक्षती उत्तिष्ठोत्तिष्ठवत्सेतिकंसंमातृवजल्पती ५७ देवक्युवाच ममाग्रतो हतागर्भायेत्वयाकालरूपिणा कारणंत्वंनवैपुत्रकृतांतोप्यत्रकारणम् ५८ गर्भकृंतनमेतन्मेसहनीयंत्वयाकृतम् पादयोःपत तामूर्ध्नास्वंचकर्मजुगुप्सता ५९ गर्भेतुनियतोमृत्युर्बाल्येपिननिवर्तते युवापिमृत्योर्वशगःस्थविरोमृतएवतु ६० कालभूतमि दंसर्वंहेतुभूतस्त्वद्विधः अजातेदर्शनंनास्तियथावायुस्तथैवच ६१ जातोप्यजाततांयातिविधात्रायत्रनीयते तद्गच्छपुत्रमातेभूत्मद्गतंमृत्युकारणम् ६२

वनरंहंतिनशस्त्रंरिपुमृत्यवः नभेतव्यंनवासभ्यंचोरहत्यावलंबतइति एवंसतिमयिदोषोनासंजनीयइतिभावः ५४ ५

संस्थितिःखंडनम् ५५ ५६ वत्सेतिसंबोधनात्कंसादियंज्येष्ठेतिगम्यते ५७ ५८ सहनीयंसोढव्यंक्षांतमित्यर्थः ५९ ६० ६१ मन्योर्दैन्यस्यकारणंमद्गतंतेनतवहृदि माभूदित्यर्थः ६२ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विधिनागर्भाधानादिसंस्कारेण पूर्वदृष्टेनजन्मांतरीयेणकर्मणा प्रजास्सृजतीतिप्रजासर्गः कालस्तेन तत्वतः लोकदृष्टनिमित्तेनस्तेयादिना ६३ का
र्येणदुरन्नादिसेवनेनजन्मनःजातिगुणेनचउपपद्यते परद्रोहादिकंएतैःकारणैस्तेपिमृताः एतैरेवकारणैस्त्वंचकारितइतिनात्रतवदोषइतिभावः ६४
६५ इतिहरिवंशेविष्णुपर्वणिटीकायांचतुर्थोऽध्यायः ४ प्रागेव प्रसवात्पूर्वमेवव्रजेप्रेषितामितिशेषः १ नंदगोपंसपुत्रस्त्रीकंमथुरांप्रतिकरप्रदातुमा
गतमित्यर्थाद्भागवताच्चगम्यते २ गुणैर्जातकर्मादिसंस्कारैर्लिप्याद्यभ्यासैश्च ३ ४ प्रज्ञादैवाधीनमिदमितिधीः ह्रियतेभयादिनेतिशेषः ५ ६ हितत्वा-

मृत्युनापहृतेपूर्वंशोषोहेतुःप्रवर्त्तते विधिनापूर्वदृष्टेनप्रजासर्गेणतत्वतः ६३ मातापित्रोस्तुकार्येणजन्मतस्तूपपद्यते निशम्य
देवकीवाक्यंसकंसःस्वनिवेशनम् ६४ प्रविवेशससंरब्धोदह्यमानेनचेतसा कृत्यप्रतिहतेदीनोजगामविमनाभृशम् ६५ इति
श्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिचतुर्थोऽध्यायः ४ वैशंपायनउवाच प्रागेववसुदेवस्तुव्रजेसुश्रावरोहिणीम् प्र
जातांपुत्रमेवाग्रेचंद्रात्कांततराननम् १ सनंदगोपंत्वरितःप्रोवाचशुभयागिरा गच्छानयासहैवत्वंव्रजमेवयशोदया २ तत्रतौ-
दारकौगत्वाजातकर्मादिभिर्गुणैः योजयित्वाव्रजेतातसंवर्द्धयययथासुखम् ३ रौहिणेयंचपुत्रंमेपरिरक्षशिशुंव्रजे अहंवाच्योभवि-
ष्यामिपितृपक्षेषुपुत्रिणाम् ४ योहमेकस्यपुत्रस्यनपश्यामिशिशोर्मुखम् ह्रियतेहिवलात्प्रज्ञाप्राज्ञस्यापिसतोमम ५ अस्माद्धि
मेभयंकंसान्निर्घृणाद्वैशिशोर्वधे तद्यथारौहिणेयत्वंनंदगोपसमात्मजम् ६ गोपायसियथातातत्वान्वेषीतथाकुरु विघ्नाहिव-
र्द्धवोलोकेबालान्त्रासयंतिहि ७ सचपुत्रोममज्यायान्कनीयांश्चतवाप्ययम् उभावपिसमंनाम्नानिरीक्षस्वयथासुखम् ८ व
र्द्धमानावुभावेतौसमानवयसौयथा शोभेतांगोव्रजेतस्मिन्नंदगोपतथाकुरु ९ बाल्येकेलिकिलःसर्वोबाल्येमुह्यतिमानवः बाल्ये
चंडतमःसर्वस्तत्रयत्नपरोभव १० नचवृंदावनेकार्योगवांघोषःकथंचन भेतव्यंतत्रवसताकेशिनःपापदर्शिनः ११ सरीसृपेभ्यःकी
टेभ्यःशकुनिभ्यस्तथैवच गोष्ठेषुगोभ्योवत्सेभ्योरक्ष्यौतेह्याविमौशिशू १२ नंदगोपगताराात्रिःशीघ्रयानोव्रजाशुगः इमेत्वांव्याह-
रंतीवपक्षिणःसव्यदक्षिणम् १३ रहस्यंवसुदेवेनसोनुज्ञातोमहात्मना यानंयशोदयासार्द्धमारुरोहमुदान्वितः १४ कुमारस्कंध
वाह्यायांशिबिकायांसमाहितः संवेशयामासशिशुंशयनीयांमहामतिः १५

न्वेषीयथावदालोचयन् बालद्रौहिणांस्वरूपमितिशेषः ७ नाम्ना
नामार्थेननिरीक्षस्वयथाकृष्णस्तवचित्तंकर्षतिस्नेहातिशयाद्वशीकरोति तथासंकर्षणोपित्वांरमयत्वित्यर्थः ८ ९ केलिकिलःस्वेच्छाविहारी १० घोषो
गोपग्रामः ११ १२ १३ १४ शिबिकायांआंदोलिकायांशिबिकायांसुखस्वरूपायामितिशेषः मृदुतूलिकायामितितस्यार्थः कशिपुशब्दसादृश्यात् १५ ७५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

बहूदकत्वात् शीतलोऽनिलः सर्पत्यस्मिन् तेन शीतलानिलसर्पिणा १६ स ददर्श गोव्रजमिति पंचदशगतेनान्वयः १७ विशिष्टं रुतं येषां तैः श्वापदैर्विरुत
श्वापदैः लताः फलविसर्पिण्यः कूष्मांड्यादयः वल्ल्य आरोहणसापेक्षा द्राक्षादयः तत्सहिता महांतो द्रुमा यस्मिन् स्यंदतीभिः प्रस्रवतीभिः १८ समानि तीर्थानि
निजलावतरणमार्गा येषु तादृशा जलाशया यत्र १९ भासाः गृध्राः तदनुसृतैः श्येनैः आमिषादा वनविडालादयस्तदनुसृतैस्ततोऽधिकबलैः सृगालादिभि
श्चावृतम् मृगश्चित्रव्याघ्रः २० २१ हंभारवैर्गोशब्दैः वाटो वृत्तिस्थानं कंटकपरिधिः वाटो मार्गवृत्तिस्थानेइति मेदिनी २३ करीषं शुष्कगोमयचूर्णम् २४

जगाम च विविक्तेन शीतलानिलसर्पिणा बहूदकेन मार्गेण यमुनातीरगामिना १६ स ददर्श शुभे देशे गोवर्द्धनसमीपगे यमुना
तीरसंबद्धशीतमारुतसेवितम् १७ विरुतश्वापदैरम्यं लतावल्लीमहाद्रुमम् गोभिस्तृणविलग्नाभिः स्यंदतीभिरलंकृतम् १८ स
मप्रचारं च गवां समतीर्थजलाशयम् वृषाणां स्कंधघातैश्च विषाणोद्धृष्टपादपम् १९ भासामिषादानुसृतैः श्येनैश्चामिषगृध्नुभिः
सृगालमृगसिंहैश्च वसामेदाशिभिर्वृतम् २० शार्दूलशब्दाभिरुतं नानापक्षिसमाकुलम् स्वादुवृक्षफलं रम्यं पर्याप्ततृणवीरुधम्
२१ गोव्रजं गोरुतं रम्यं गोपनारीभिरावृतम् हंभारवैश्च वत्सानां सर्वतः कृतनिःस्वनम् २२ शकटावर्त्तविपुलं कंटकीवाटसंकुलम् प
र्यंते घावृतं वन्यैर्वृहद्भिः पतितैर्द्रुमैः २३ वत्सानां रोपितैः कीलैर्दामभिश्च विभूषितम् करीषाकीर्णवसुधं कटच्छन्नकुटीमठम् २४
क्षेम्यप्रचारबहुलं हृष्टपुष्टजनावृतम् दामनीपाशबहुलं गर्गरोद्गारनिःस्वनम् २५ तक्रनिःस्रावबहुलं दधिमंडार्द्रमृत्तिकम्
मंथानवलयोद्गारैर्गोपीनां जनितस्वनम् २६ काकपक्षधरैर्बालैर्गोपालैः क्रीडनाकुलम् सार्गलद्वारगोवाटमध्ये गोस्थानसंकुल
म् २७ सर्पिषा पच्यमानेन सुरभीकृतमारुतम् नीलपीतांबराभिश्च तरुणीभिरलंकृतम् २८ वन्यपुष्पावतंसाभिर्गोपकन्याभि
रावृतम् शिरोभिर्धृतकुंभाभिर्बद्धैरग्रस्तनांबरैः २९ यमुनातीरमार्गेण जलहारीभिरावृतम् स तत्र प्रविशन्हृष्टो गोव्रजं गोपना
दितम् ३० प्रत्युद्गतो गोपवृद्धैः स्त्रीभिर्वृद्धाभिरेव च निवेशं रोचयामास परिवृत्ते शकटाश्रये ३१ सा यत्र रोहिणी देवी वसुदेवस्य वा
वहा तत्र तं बालसूर्याभं कृष्णा गूढं न्यवेशयत् ३२ इतिश्रीमहाभारते खिलेषु हरिवंशे वि॰ प॰ गोव्रजगमनं नाम पंचमोऽध्यायः ५

क्षेम्याः लब्धलक्षणार्हाः प्रचारास्तत्संचारेण बहुलं समृद्धिमत् दामनी स्थूणाद्वयाक्रांतप्रांता स्थूलरज्जुः यस्यां दामान्यासज्यंते गर्गरो मंथनकुंभः गर्गरो मीन
भेदे स्यान्मंथन्यामपि गर्गरीति विश्वः २५ तक्रे स्यंतं गोरसाधिक्यमुक्तं विस्रावो रेचनप्रणालिकांतदेशे शैवालेन मलिनं मंडउपर्यागतः सारः २६ गोपाः क्री ६
डंत्यस्मिन्निति क्रीडास्थानं आखाडा इति भाषाप्रसिद्धम् २७ २८ अग्रस्तनांबरैः कांचोली इति भाषाप्रसिद्धैः कंचुकैरुपलक्षिताः २९ ३० परिवर्त्ते शकटादिप्राका
रे स्कंधावारे आश्रयस्थाने ३१ ३२ इति हरिवंशे विष्णुपर्वणि टी॰ पंचमोऽध्यायः ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्र असतः अप्रकाशमानस्यबह्लवत्वंगोपत्वम् १ २ पृथुरथोदक्षिणायाअयोजितंदेवासोअमृतासोआस्थुः कृष्णादुदस्थादर्या ३ विहायाश्चिकित्संतीमा
नुषायक्षयायेतिमंत्रोक्तमर्थमुपबृंहयतिशकटस्येति मंत्रार्थस्तुपृथुर्महान्रथः शकटंदक्षिणायाः दिशः संबंधिमृत्स्कक्करमित्यर्थः अयोजियोजितशत्रुभिरि
त्यर्थाल्लभ्यते तमेनंरथंदेवासोदेवाः अमृतासोअमृताः आससंतात्अस्थः परिवार्यस्थितवंतः एतस्मिन्नंतरेसः रथः कृष्णात्कृष्णंप्राप्यतत्प्रेरणेनउदस्था
त्उत्थितः विहायाः आकाशाश्रितः विशेषेणहयतेगच्छतीतिवायंत्रोत्क्षिप्तगोलकवदाकाशमार्गेणोत्थायपतितः सन्नष्टइत्यर्थः ततश्चअर्याईश्वरीस्वामि-
नीमातातत्रत्यप्रजावा चिकित्संतीसंशयवतीमानुषायमानुषस्यक्षयायनाशाय एतेनपततारथेनालंबालकः कथंननाशितइत्यत्रकारणविशेषमपश्यंती

वैशंपायनउवाच तत्रतस्यासतः कालः सुमहानत्यवर्त्तत गोव्रजेनंदगोपस्यबह्लवत्वंप्रकुर्वतः १ दारकौकृतनामानौवहृधाते
सुखंचतौ ज्येष्ठः संकर्षणोनामकनीयान्कृष्णएवतु २ मेघकृष्णस्तुकृष्णोभूद्देहांतरगतोहरिः व्यवर्धतगवांमध्येसागरस्येवांबुदः
३ शकटस्यत्वधः सुप्तःकदाचित्पुत्रगृध्निनी यशोदातंसमुत्सृज्यजगामयमुनांनदीम् ४ शिशुलीलांततः कुर्वन्सहस्तचरणौक्षिपन्
रुरोदमधुरंकृष्णः पादावूर्ध्वंप्रसारयन् ५ सतत्रैकेनपादेनशकटंपर्यवर्त्तयत् न्युब्जपयोधराकांक्षीचकारचरुरोदच ६ एतस्मिन्नंत
रेप्राप्तायशोदाशीघ्रगामिनी स्नातापस्रवदिग्धांगीबद्धवत्सेवसौरभी ७ सादर्शविपर्यस्तंशकटंवायुनाविना हाहेतिकृत्वात्वरिता-
दारकंजगृहेतदा ८ नसाबुबोधतत्केनशकटंपरिवर्त्तितम् स्वस्तिमेदारकायेतिप्रीताभीताचसाभवत् ९ किंतुवक्ष्यतितेपुत्रपितापरम
कोपनः त्वय्यधः शकटेसुप्तेअकस्माच्चविलोडिते १० किंमेस्नानेनदुःस्नानंकिंचमेगमनेननदीम् पर्यस्तेशकटेपुत्रयत्त्वांपश्याम्यपावृत
म् ११ एतस्मिन्नंतरेगोभिराजगामवनेचरः काषायवाससीबिभ्रत्नंदगोपोव्रजांतिकम् १२ सददर्शविपर्यस्तंभिन्नभांडघटीघटम्
अपास्तधूर्विभिन्नाक्षंशकटंचक्रमौलिनम् १३ भीतस्त्वरितमागम्यसहसासास्रुलोचनः अपिमेस्वस्तिपुत्रायेत्यसकृद्वचनंवदन् १४
पिबंतंस्तनमालक्ष्यपुत्रंस्वस्थोब्रवीत्पुनः वृषयुद्धंविनाकेनपर्यस्तंशकटंमम १५ प्रत्युवाचयशोदातंभीतागद्गदभाषिणी नविजानाम्य
हंकेनशकटंपरिवर्त्तितम् १६ अहंनदीगतासौम्यचैलप्रक्षालनार्थिनी आगताचविपर्यस्तमपश्यंशकटंभुवि १७

संदिहानैवातिष्ठन्नलौकिकरकृत्यमेतदित्यवेदीतिभावः एवमेवसर्वेषामर्थानांप्रत्यक्षस्मृतिमूलकत्वमुन्नेयम् वेदोपबृंहणत्वादस्यशास्त्रस्यपुत्रेत्यत्रकर्मे
तिपाठेकर्मगृध्निनीस्नानैकचित्ता ४ ५ ६ ७ विपर्यस्तंविपरीतस्थितम् ८ ९ १० गमनेप्रयोजनमितिशेषः ११ १२ भिन्नानिभांडादीनियेनतम् भांडचक्रो
परितनोव्यूहः पात्राख्यः घटीधुरोग्रभागकलशः घटाघटनाच्चभिन्नानितानियस्येति चक्रमौलिनंचक्रंमौलाविवोपरियस्यतंग्रीवाद्यादित्वादिनिः १३ १४ १५ १६ १७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लोडितंउन्मथितम् १८ १९ सर्वेसर्वात्मनीश्वरे सर्वसमाप्नोषिततोसिसर्वइतिनिर्वचनात्संज्ञाशब्दोयमतोनात्रसर्वनामसंज्ञा २० २१ इतिहरिवंशे विष्णुपर्वणिटीकायांषष्ठोऽध्यायः ६ शकुनीपक्षिणीबकानुजत्वात्वेषधारिणीतिमनुष्यवेषधारिणी कंसस्यधात्रीतिव्रजस्थैःश्रुता १ २ ३ प्रस्नवोत्पीडवर्षिणी प्रस्नवेनक्षीराधिक्येनयस्तनयोरुत्पीडः पीडातेनवर्षिणी ४ ५ ६ ७ ८ तत्रपूतनावधेहेतुकारणंनाध्यगच्छंतनाधिगतवंतः नंदादयःगोपाबालरूपदेवास्तज्जानंत्येवेत्याह मंत्रोहेतिःपक्षिणीनदभ्नात्यस्मानाश्यापदंकृणुतेअग्निधाने शन्नोगोभ्यःपुरुषेभ्यश्चास्तुमानोहिंसीदिहदेवाः कपोतइति हे

तयोःकथयतोरेवमब्रुवंस्तत्रदारकाः अनेनशिशुनायानमेतत्पादेनलोडितम् १८ अस्माभिःसंपतद्भिश्चदृष्टमेतद्यदृच्छया नंदगोपस्ततच्छ्रुत्वाविस्मयंपरमंययौ १९ प्रहृष्टश्चैवभीतश्चकिमेतदितिचिंतयन् नचतेश्रद्दधुर्गोपाःसर्वेमानुषबुद्धयः २० आश्चर्यमितितेसर्वेविस्मयोत्फुल्ललोचनाः स्वेस्थानेशकटंचैवचक्रबंधमकारयन् २१ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिशिशुचर्यायांशकटभंगोनामषष्ठोऽध्यायः ६ वैशंपायनउवाच कस्यचित्त्वथकालस्यशकुनीवेषधारिणी धात्रीकंसस्यभोजस्यपूतनेतिपरिश्रुता १ पूतनानामशकुनीघोराप्राणिभयंकरी आजगामार्धरात्रेवैपक्षौक्रोधाद्विधुन्वती २ ततोर्धरात्रसमयेपूतनाप्रत्यदृश्यत व्याघ्रगंभीरनिर्घोषंव्याहरंतीपुनःपुनः ३ निलिल्येशकटाक्षेसाप्रस्नवोत्पीडवर्षिणी ददौस्तनंचकृष्णायतस्मिन्सुप्तेजनेनिशि ४ तस्यास्तनंपपौकृष्णःप्राणैःसहविनद्यच छिन्नस्तनीतुसहसापपातशकुनीभुवि ५ तेनशब्देनवित्रस्तास्ततोबुबुधिरेभयात् सनंदगोपोगोपाश्चयशोदाचसुविक्लवा ६ तेतामपश्यन्पतितांविसंज्ञांविपयोधराम् पूतनांपतितांभूमौवज्रेणेवविदारिताम् ७ इदंकिंत्विदितिसंत्रस्ताःकस्येदंकर्मचेत्यपि नंदगोपंपुरस्कृत्यगोपास्तेपर्यवारयन् ८ नाध्यगच्छंतचतदाहेतुंतत्रकदाचन आश्चर्यमाश्चर्यमितिब्रुवंतोनुययुर्गृहान् ९ गतेषुतेषुगोपेषुविस्मितेषुयथागृहम् यशोदांनंदगोपस्तुपप्रच्छागतसंभ्रमः १० कोयंविधिर्नजानामिविस्मयोमेमहानयम् पुत्रस्यमेभयंतीव्रंभीरुत्वंसमुपागतम् ११ यशोदात्वब्रवीद्भीतानार्यजानामिकिंत्विदम् दारकेणसहानेनसुप्ताशब्देनबोधिता १२ यशोदायामजानंत्यांनंदगोपःसबांधवः कंसाद्भयंचकाराथविस्मयंचजगाम ह १३

तिरासुधवद्वधकारी पक्षिणीपूतनारूपा अस्मान्व्रजस्थान् नदभ्नातिनाभिभवति मत्कृतअग्निधानेजाठराग्नेर्धानेनिमित्तेशिशोर्जाठरमग्निंस्तनदानेनतर्पयितुंआश्यांअसगमनदीक्षादानेषु आषयतिपरलोकंगमयतिमृत्युनाग्राहयतिवादेहंदीपयतिवा आप्नोति कृष्णातनुस्तस्यापदंस्थानंकृणुते कृष्णांपाययितुंस्वमृत्युरूपांतांतनुंस्पृशतिस्मेत्यर्थः ९ १० ११ १२ १३ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीहरिवंशेविष्णुपर्वणिटीकायांसप्तमोऽध्यायः ७ कालेरिंगिणौजानुभ्यांरंहणशीलौ १ अन्योन्यगतौपरस्परस्मिन्नंतर्भूतौएकमूर्त्तिधरौ एकश
रीराविव २ एकरूपौ अभिन्नौसंतौ निर्माणनिर्मुक्तौजन्महीनौ ३ एकस्यकार्यस्य अंतरंरहस्यंगतौप्राप्तौएककार्यनिष्ठावित्यर्थः ४ देवानांवृत्तांतः सिद्धांतः
पापिष्ठाहंतव्याः यज्ञदानादिकंचप्रवर्त्तनीयमित्येवंरूपस्तदर्थंमानुषभूतौदेववृत्तांतमानुषौ ५ व्यतिषक्ताभिर्मिश्राभिः ग्रस्तौपूर्णमास्यांचंद्रोदयेसूर्यस्यास्त
मयः तदुदयेइंदोरितितयोरन्योन्यकिरणग्रस्तत्वम् ६ सर्पभोगभुजौसर्पदेहतुल्यबाहू कलभसदृशौकलभकाविव स्वार्थेवाकः ७ पावकौअग्निपुत्रौद्वौ
कार्त्तिकेयाविवेत्यभूतोपमा ८ ९ विप्रकुर्वाणौनवनीतचौर्यादिना उपकारंकुर्वाणौ १० ११ १२ १३ १४ १५ तत्तस्येति अर्जुनाभ्यांअर्कनौउद्धर्तुमि-

इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुप॰ शिशुचर्यायांपूतनावधोनामसप्तमोऽध्यायः ७ वैशंपायनउवाच कालेगच्छतितौ
सौम्यौदारकौकृतनामकौ कृष्णसंकर्षणौचोभौरिंगिणौसमपद्यताम् १ तावन्योन्यगतौबालौबाल्यादेवैकतांगतौ एकमूर्त्तिधरौ
कांतौबालचंद्रार्कवर्चसौ २ एकनिर्माणनिर्मुक्तावेकशय्यासनाशनौ एकवेषधरावेकंपुष्यमाणौशिशुव्रतम् ३ एककार्यांतरगतावे
कदेहौद्विधाकृतौ एककार्यौमहावीर्यावेकस्यशिशुतांगतौ ४ एकप्रमाणौलोकानांदेववृत्तांतमानुषौ कृत्स्नस्यजगतोगोपौसंवृ
त्तौगोपदारकौ ५ अन्योन्यव्यतिषक्ताभिःक्रीडाभिरभिशोभितौ अन्योन्यकिरणग्रस्तौचंद्रसूर्याविवांबरे ६ विसर्पंतौतुसर्वत्रस
र्पभोगभुजावुभौ रेजतुःपांसुदिग्धांगौदृप्तौकलभकाविव ७ क्वचिद्भस्मप्रदिग्धांगौकरीषप्रोक्षितौक्वचित् तौतत्रपर्यधावेतांकुमारा
विवपावकी ८ क्वचिज्जानुभिरुद्धृष्टैःसर्पमाणौविरेजतुः क्रीडंतौवत्सशालासुशकृद्दिग्धांगमूर्द्धजौ ९ शुशुभातेश्रियाजुष्टावा-
नंदजननौपितुः जनंचविप्रकुर्वाणौविहसंतौक्वचित्क्वचित् १० तौतत्रकौतूहलिनौमूर्द्धजव्याकुलेक्षणौ रेजतुश्चंद्रवदनौदारकौ
सुकुमारकौ ११ अतिप्रसक्तौतौदृष्ट्वासर्वव्रजविचारिणौ नाशकत्तौवारयितुंनंदगोपःसुदुर्दमौ १२ ततोयशोदासंक्रुद्धाकृष्णंक
मललोचनम् आनाय्यशकटीमूलेभर्त्सयंतीपुनःपुनः १३ दाम्नाचैवोदरेबध्वाप्रत्यबध्नादुलूखले यदिशक्तोसिगच्छेतितमुक्त्वा
कर्मसाकरोत् १४ व्यग्रायांतुयशोदायांनिर्जगामततोंगणात् शिशुलीलांततःकुर्वन्कृष्णोविस्मापयन्व्रजम् १५ सोंगणान्निःसृ
तःकृष्णःकर्षमाणउलूखलम् यमलाभ्यांप्रवृद्धाभ्यामर्जुनाभ्यांचरन्वने मध्यान्निश्चक्रामतयोःकर्षमाणउलूखलम् १६ त्यर्थः अत्रेदमा

म्नायते यत्रमंथांमांविबध्नतेरश्मीन्यमितवाइव उलूखलसुतानामवेद्विंद्रजल्गुलः ताताअद्यवनस्पतीऋष्वावृषेभिःसोतृभिः इंद्रायमधुमत्सुतमिति य-
त्रउलूखलेमंथांमथानमिवमंथानंलोकक्लेशकरंमांविबध्नतेविशेषेणबध्नंतिमातरः रश्मीनादायरश्मिभिरित्यर्थः यमितवाइव विनिगृहीतुमिव नतुवस्तुतोनि
गृहीतुमातृत्वेनमयिस्निग्धत्वात् तेनउलूखलेनसुतानांपीडितानांकर्मणीषष्ठी उलूखलपीडितानस्मान्हेइंद्रमोचनसमर्थअवरक्ष पादादित्वादाद्युदा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्तमाख्यातम् इदु एवमेव त्वंजल्पुलोसि एनम् मुंचामीति जल्पितुम् मांचगोपितुंत्रातुं आदातुं स्वाधीनंकर्तुंचसमर्थोसियत अतोऽवमामित्यर्थः एवं-
यदासर्वान्प्रार्थयन्नपिनमोचनंलभते तदावनस्पत्योरंतरागत्वाबंधनदामतत्रोदित्तु यावद्दृढंकरोति तावद्दूनस्पती एव उन्मूलितौ दृश्यावदति तानाइतितातौनो
ऽस्माकंव्रजवासिनांवनस्पतिभूतौ अतिप्रसिद्धौ यमलौ अर्जुनजातीयौ भोवनस्पती अद्यइदंद्वायइदंप्रतिगंतुंस्कतंतद्दुन्मूलनेन आत्मानंपीडयंतंतदेवमधुमतद् अ
मृतयुक्तम् अतिसम्यगित्यर्थः यतः कथौगतिमंतौ युवांस्थावरत्वान्मुक्तौस्थइत्यर्थः कथंभिर्गतिमद्भिर्जंगमैः जनैः सोतृभिरस्मद्बंधनकरैरुपलक्षितौइति १६

ततस्यकर्षतोवृक्षौतिर्यग्गतमुलूखलम् लग्नंताभ्यांसमूलाभ्यामर्जुनाभ्यांचकर्षच १७ तावर्जुनौकृष्यमाणौतेनबालेनरंहसा स
मूलविटपौभग्नौसतुमध्येजहासवै १८ निदर्शनार्थंगोपानांदिव्यस्यबलमास्थितः तद्धामतस्यबालस्यप्रभावादभवद्दृढम् १९ यमु
नातीरमागम्यागोप्यस्तदहृशुःशिशुम् क्रुदंत्योविस्मयुत्यऽस्ययशोदायैसुरगनाः २० ताःससम्भ्रान्तवदनायशोदामूचुरंगनाः एह्या-
गच्छयशोदेत्वंसम्भ्रमात्किंविलम्बसे २१ यौतौव्रजेनरक्षौतुव्रजेसत्योपयाचनौ पुत्रस्योपरितौवृक्षौपतितौतौमहीरुहौ २२ दृढेनदा
म्नानेनैवबद्धोवत्सइवोदरे जहासवृक्षयोर्मध्येतवपुत्रःसबालकः २३ उत्तिष्ठगच्छदुर्मेधेमूढेपण्डितमानिनि पुत्रमानयजीवंतंमुक्तंमृ
त्यमुखादिव २४ साभीतासहसोत्थायहाहाकारंप्रकुर्वती तंदेशमागमद्यत्रपातितौतौद्रुमोत्तमौ २५ साददर्शतयोर्मध्येद्रुमयो-
रात्मजंशिशुम् दाम्नानिबद्धमुदरेकर्षमाणमुलूखलम् २६ सागोपीगोपवृद्धैश्चसयुवाचव्रजस्तदा पर्यागच्छततद्दृष्टुंगोपमुख्यस-
हृद्भुतम् २७ जजल्पुस्तेयथाकामंगोपावनविचारिणः केनेमौपातितौवृक्षौघोषस्यायतनोपमौ २८ विनावातंविनावर्षंविद्युत्प्र
पतनंविना विनाहस्तिकृतदोषंकेनेमौपातितौद्रुमौ २९ अहोबतनशोभेतांविमूलावर्जुनाविमौ भूमौनिपतितौवृक्षौवितो
योजलदाविव यदीमौघोषरचितौघोषकल्याणकारिणौ ३० नंदगोपप्रसन्नौतेद्रुमावेवगतावपि यत्तेदारकोमुक्तोविपुला-
भ्यामपिक्षितौ ३१ औत्पातिकमिदंघोषेतृतीयंवर्त्ततेत्विह पूतनायाश्चविनाशश्चद्रुमयोःशकटस्यच ३२ अस्मिन्स्थानेनवासोस्य
घोषस्यास्यनयुज्यते उत्पाताह्यत्रदृश्यंतेकथयंतांनशोभनम् ३३ नंदगोपस्तुसहसामुक्त्वाकृष्णमुलूखलात् निवेश्यचाकेत्कृ
चिरंमृतंपुनरिवागतम् ३४

१७ १८ १९ २० २१ सत्योपयाचनौ प्रार्थितप्रदत्वेनदेवताभूतौ २२ २३ २४ २५ २६ २७ २८ २९ ३० विपुलाभ्यामर्जुनाभ्याम् ३१ ३२ ३३ ३४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३५ ३६ एतदिति एवमादीत्यर्थः अत्र तृणावर्त्तवधोपि पुराणांतराद् उपसंहर्त्तव्यः तदुपरहि का श्रुतिस्तु साकं यक्ष्म प्रपत चाषेण किकिदीविना साकं
वातस्य ध्राज्या साकं नश्य निहाकयेति स्वेचरत्वेन यक्षं पूज्यमिवात्मानं मन्तुते मिमीते लोलयति वा यक्ष्म हे यक्ष्म राक्षस तद्वत्पीडकेति वा चाषेण तद्वर्णेन हरिणा
नवहंत्रा साकं प्रपत भूमाविति शेषः किकिदीविनाञ्जः सन्दीव्यतीति किकिदीविः किधातोर्बाहुलकात् किप्रत्यये लिङ्भावे च किकिर्विद्वान्तेन वा तस्य वायोर्ध्रा
ज्यागत्या यया धूलिर्वात्यारूपया एनं उपरि नितवानसि तया साकं नश्य नाशं प्राप्नुहि निहाकया गत्या च साकं वा साहित्यं पतन एव न तु नाशे अनस्तेन सह पतितः
सन् त्वयमेक एव नाशं प्राप्नुहीत्यर्थः एवं देवैरुक्ते तृणावर्त्तः पपात ममारेत्यर्थः ३७ इति हरिवंशे विष्णुपर्वणि टीकायां नवमोऽध्यायः ९ एवं ताविति अध्यायः

नातृप्यत प्रेक्ष्यमाणो वै कृष्णं कमललोचनम् ततो यशोदां गर्हन्त्वै नंदगोपो विवेश ह सच गोपजनः सर्वो व्रजमेव जगाम ह ३५ स
च तेनैव नाम्ना तु कृष्णो वै दामबंधनात् गोष्ठे दामोदर इति गोपीभिः परिगीयते ३६ एतदाश्चर्यभूतं हि बालस्यासीद्विचेष्टितम् कृ
ष्णस्य भरतश्रेष्ठ घोषे निवसतस्तदा ३७ इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि शिशुचर्यायां यमलार्जुनभंगे नवमो
ऽध्यायः ९ वैशंपायन उवाच एवं तौ बाल्यमुत्तीर्णौ कृष्णसंकर्षणावुभौ तस्मिन्नेव व्रजस्थाने सप्तवर्षौ बभूवतुः १
नीलपीतांबरधरौ पीतश्वेतानुलेपनौ बभूवतुर्वत्सपालौ काकपक्षधरावुभौ २ पर्णवाद्यं श्रुतिसुखं वादयंतौ वराननौ शुशुभा
ते वनगतौ त्रिशीर्षाविव पन्नगौ ३ मयूरांगदकर्णौ तु पल्लवापीडधारिणौ वनमालाकुलस्कंधौ द्रुमपोताविवोद्गतौ ४ अरविंद
कृतापीडौ रज्जुयज्ञोपवीतिनौ सशिक्यतुंबकरकौ गोपवेणुप्रवादकौ ५ क्वचिद्धसंतावन्योन्यं क्रीडमानौ क्वचित्क्वचित् पर्णश
य्यासु संसुप्तौ क्वचिन्निद्रांतरेक्षणौ ६ एवं वत्सान्पालयंतौ शोभयंतौ महावनम् चंचूर्यंतौ रमंतौ स्म किशोराविव चंचलौ ७ अ
थ दामोदरः श्रीमान्संकर्षणमुवाच ह आर्य नास्मिन्वने शक्यं गोपालैः सह क्रीडितुम् ८

स्कदेवो अद्य प्रपतेऽदनावृत्परावतं परमां गंतवा उ अधा
शयीत निर्ऋतेरुपस्थेऽधैनं वृकारभसासो अद्युरित्यस्य मंत्रस्योपबृंहणार्थः मंत्रार्थ पुरूरवसं प्रत्युर्वशी वदति स्कदेवः शोभनस्वामिको व्रज आद्यक्षरलोपेन वा
स्कदेवो वा अद्य प्रपतेत् अद्यैव उपद्रवसमकालं गच्छेत् अनावृत् नास्ति आवृत् निरोधको यस्य तादृशोपि परावतं परमात् दूराद्दूरतरं गंतवै गंतुं उ निश्चितं प्रपते
दित्यन्वयः अधपक्षांतरे यदि स्कदेवो न प्रपतेत् तर्हि निर्ऋतेरुपस्थे शयीत अध अथवा एनं व्रजं वा स्कदेवपरिजनं रभसासो रभसा सवेगवंतः वृकाः अद्युः भक्षये
युः तस्माद्धा स्कदेवो वा तत्परिगृहीतो व्रजो वा वृकेभ्यो बिभेति अतस्त्वादृशेनापि द्विप्रवृकेभ्यः सुतरां भेतव्यमिति भावः इतः स्पष्टार्थं मूलम् १ २ पर्णवाद्यं हि तु
पिफलोपेतो वाद्यविशेषः आद्यपदात्तादृशं रुद्रवीणादिकं पर्णवाद्यमत एव त्रिशीर्षाविवेति दृष्टांतः संगच्छते पर्णवाद्यमित्यपि पाठः ३ ४ ५ ६ चंचूर्यंतौ अत्यं
तं संचरंतौ किशोराविव अश्वपोताविव ७ ८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

भा· हृ· टी· अवगीतंवाशितम् भुक्तभोगंकाननम् ९ काननानिउद्यानानिवनानिअरण्यानि आकाशनिकाशानिपत्रादिनाशून्यानि १० परिवृत्तंचक्रा अ· प·
१ कारः परिधिः अर्गलाश्रयेषुनेषुपरिवृत्तार्गलेषु ११ १२ १३ १४ निर्व्यंजनंशाकरूपादिहीनम् १५ १६ १७ कर्त्तव्यमाहतस्मादिति १८ ननुपितृ १० २

अवगीतमिदंसर्वमावाभ्यांभुक्तकाननम् प्रक्षीणतृणकाष्ठंचगोपैर्मथितपादपम् ९ घनीभूतानियान्यासन्काननानिवनानिच तान्याकाशनिकाशानिदृश्यन्तेद्ययथासुखम् १० गोवाटेष्वपियेवृक्षाःपरिवृत्तार्गलेषुच सर्वेगोष्ठाग्निषुगताःक्षयमक्षयवर्चसः ११ संनिकृष्टानियान्यासन्काष्ठानिचतृणानिच तानिदूरावकृष्टानिमार्गितव्यानिभूमिषु १२ अरण्यमिदमल्पोदमल्पकक्षंनिराश्रयम् अन्वेषितव्यविश्रामंदारुणंविरलद्रुमम् १३ अकर्मण्येषुवृक्षेषुस्थितविप्रस्थितद्विजम् संवासस्यास्यमहतोजनेनोत्सादितद्रुमम् [?] १४ निरानन्दंनिरास्वादंनिष्प्रयोजनमारुतम् निर्विहंगमिदंशून्यंनिर्व्यंजनमिवाशनम् १५ विक्रीयमाणैःकाष्ठैश्चशाकैश्चवनसंभवैः उच्छिन्नसंचयतृणोघोषोयंनगरायते १६ शैलानांभूषणंघोषोघोषाणांभूषणंवनम् वनानांभूषणंगावःताश्चास्माकंपरागतिः १७ तस्मादन्यद्वनंयामःप्रत्यग्रयवसेंधनम् इच्छन्त्यनुपभुक्तानिगावोभोक्तुंतृणान्विव [?] १८ तस्माद्वनंनवतृणंगच्छंतुधनिनोव्रजाः नह्यारब्धावरणानांगृहक्षेत्रिणस्तथा प्रशस्तावैव्रजालोकेयथावैचक्रचारिणः १९ शकृन्मूत्रेषुतेष्वेवजातक्षाररसायनम् नतृणंभुंजतेगावोनापितत्पयसेहितम् २० स्थलीप्रायासुरम्यासुनवासुवनराजिषु चरावःसहितागोभिःक्षिप्रंसंवाह्यतांव्रजः २१ श्रूयतेहिवनंरम्यंपर्याप्ततृणसंस्तरम् नाम्नावृन्दावनंनामस्वादुवृक्षफलोदकम् २२ अझिल्लिकंटकवनंसर्वैर्वनगुणैर्युतम् कदंबपादपप्रायंयमुनातीरसंश्रितम् २३ स्निग्धशीतानिलवनंसर्वर्त्तुनिलयंशुभम् गोपीनांसुखसंचारंचारुचित्रवनांतरम् २४ तत्रगोवर्द्धनोनामनातिदूरेगिरिर्महान् भ्राजतेदीर्घशिखरोनंदनस्येवमंदरः २५ मध्येचास्यमहाशाखोन्यग्रोधोयोजनोच्छ्रितः भांडीरोनामशुशुभेनीलमेघइवांबरे २६ मध्येनचास्यकालिंदीसीमंतमिवकुर्वती प्रयातानंदनस्येवनलिनीसरितांवरा २७ तत्रगोवर्द्धनंचैवभांडीरंचवनस्पतिम् कालिंदींचनदींरम्यांद्रक्ष्यावश्चरतःसुखम् २८ तत्रायंकल्प्यतांघोषस्त्यज्यतांनिर्गुणंवनम् संत्रासयावोभद्रंतेकिंचिदुत्पाद्यकारणम् २९

पर्यागताभूमिर्निर्धनापिसुखावहेत्युक्तेः कथंपूर्वस्थानंत्याज्यमित्याह नह्या
रेति चक्रेणसमुदायेनचरंतितेचक्रचारिणोहंससारसादयः अनिकेताइत्यर्थः १९ शकृन्मूत्रेषुतेष्वेवतृणेषुपतितेषुसत्सु २० स्थलीप्रायासुसमभूमि १
तुल्यासुनिस्तृणास्वित्यर्थः २१ २२ २३ स्निग्धवनंशीतानिलंचेतिसंबंधः २४ २५ २६ २७ चरतोमृगादीनितिशेषः २८ २९ छ छ

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३० ३१ ३२ पंचबद्धाः पंचादिसंख्ययासंहताः ३३ ३४ ३५ ३६ अगताः असंचाराः ३७ तदेवाह एवमिति ३८ इतिहरिवंशेविष्णुपर्व
णिटीकायांदशमोऽध्यायः १० एवंवृकान् १ रूक्षोष्यंसुखावासम् २ ३ एषांएभ्यःसकाशात् ४ ५ ६ ७ ८ ९ अवघुष्यतघोषोजातः

एवंकथयतस्तस्यवासुदेवस्यधीमतः प्रादुर्बभूवुःशतशोरक्तमांसवसाशनाः ३० घोराश्चिंतयतस्तस्यस्वतनूरुहजास्तदा वि
निष्पेतुर्भयकराःसर्वशःशतशोवृकाः ३१ निष्पतंतिस्मबहवोव्रजस्योत्सादनायवै वृकान्निष्पतितान्दृष्ट्वागोषुवत्सेषुयोन्नृ
षु ३२ गोपीषुचयथाकामव्रजेत्रासोभवन्महान् तेवृकाःपंचबद्धाश्चदशबद्धास्तथापरे ३३ त्रिंशद्विंशतिबद्धाश्चशतबद्धा-
स्तथापरे निश्चेरुस्तस्यगात्रेभ्यःश्रीवत्सकृतलक्षणाः ३४ कृष्णस्यकृष्णावदनागोपानांभयवर्धनाः भक्षयद्भिश्चतैर्वत्सान्त्रा
सयद्भिश्चगोव्रजान् ३५ निशिबालान्हरद्भिश्चवृकैरुत्सादितेव्रजः नवनेशक्यतेगंतुंनगाश्चपरिरक्षितुम् ३६ नयुनात्किं
चिदाहर्तुंनचवातरितुंनदीम् त्रस्ताःकृष्टिनमनसोगतास्तस्मिन्वनेवसन् ३७ एवंवृकैरुदीर्णैस्तैर्व्याघ्रतुल्यपराक्रमैः व्रजो-
निरपदंचषृङ्गएकस्थानचरःकृतः ३८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिशिशुचर्यायांवृकदर्शनोनाम
दशमोऽध्यायः १० वैशंपायनउवाच एवंवृकांश्चतान्दृष्ट्वावर्द्धमानान्दुरासदान् सस्त्रीपुमान्सघोषोवैसमस्तो
मंत्रयत्तदा १ स्थानेनेहननःकार्यंव्रजामोन्यन्महद्वनम् यच्छिवंचसुखोष्यंचगवांचैवसुखावहम् २ अद्यैवकिंचिरेणास्म
व्रजामःसहगोधनैः यावद्वृकैर्वधंघोरंननःसर्वोव्रजोव्रजेत् ३ एषांधूम्रारुणांगानांदंष्ट्रिणांनखकर्षिणाम् वृकाणांकृष्णव
क्त्राणांबिभीमोनिशिगर्जताम् ४ ममपुत्रोममभ्राताममवत्सोथगौर्मम वृकैर्व्यापादितास्त्येवंक्रंदंतिस्मगृहेगृहे ५ तासां-
रुदितशब्देनगवांहंभारवेणच व्रजस्योत्थापनंचक्रुर्घोषवृद्धाःसमागताः ६ तेषांमतमथाज्ञायगंतुंवृंदावनंप्रति व्रजस्यविनि
वेशायगवांचैवहितायच ७ वृंदावननिवासायतान्ज्ञात्वाकृतनिश्चयान् नंदगोपोबृहद्वाक्यंबृहस्पतिरिवाददे ८ अद्यैव
निश्चयप्राप्तिर्यदिगंतव्यमेवनः शीघ्रमाज्ञाप्यतांघोषःसज्जीभवतमाचिरम् ९ ततोवघुष्यततदाघोषेतत्प्राकृतैर्जनैः शी
घ्रंगावःप्रकाल्यंतांभांडंसमभिरोप्यताम् १० वत्सयूथानिकाल्यंतांयुज्यंतांशकटानिच वृंदावनमितःस्थानान्निवेशायचगम्य
ताम् ११ तच्छ्रुत्वानंदगोपस्यवचनंसाधुभाषिणम् उदतिष्ठद्व्रजःसर्वःशीघ्रंगमनलालसः १२ प्रयात्युत्तिष्ठगच्छामःकिंशेषेसा
धुयोजय उत्तिष्ठतिव्रजेतस्मिन्नासीत्कोलाहलोमहान् १३
भांडंशकटेघिति शेषः १० ११ १२ १३ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

१४ १५ १६ १७ पोतैः नौकाभिः १८ ईरणंउषरं शून्यमित्यर्थः १९ २० २१ २२ २३ २४ निर्योगपाशैः मंथनभांडस्थूणायामंथनदंडेनसं
योजनार्थैः पाशैः मांजरेतिमहाराष्ट्रप्रसिद्धैः शिक्यैर्वाकटकैर्घटाधारकंकणैः सहिताभिः तृणसंकटैः तृणमयीभिराच्छादनीभिः २५ शाखास्फटिकाः

उन्निष्पमानः शकृत्प्रमेशकटीशाकटस्तुसः व्याघ्रघोषमहाघोषो घोषः सागरघोषवान् १४ गोपीनांगर्गरीभिश्च मूर्ध्निचोत्तंभि
तैर्घटैः निष्पपातव्रजात्सक्तिस्ताराप्रक्तिरिवांबरात् १५ नीलपीतारुणैस्तासांवस्त्रैरग्रस्तनोच्छ्रितैः शक्रचापायतेपंक्तिगोपीनां
मार्गगामिनी १६ दामिनीदामभारैश्च केचिल्लायावल्लविभिः गोपामार्गगताभांतिसावरोहाइवद्रुमाः १७ सव्रजोव्रजतांभातिश
कटौघेनभास्वता पोतैःपवननिक्षिप्तैर्निष्पतद्भिरिवार्णवः १८ क्षणेनतद्व्रजस्थानमीरणसमपद्यत द्रव्यावयवनिर्धूतकीर्णवा
यसमंडलैः १९ ततःक्रमेणघोषःसप्राप्तोवृंदावनंवनम् निवेशंविपुलंचक्रेगवांचैवहितायच २० शकटावर्तपर्यंतंचंद्रार्धाकार
संस्थितम् मध्येयोजनविस्तीर्णंतावद्द्विगुणमायतम् २१ कंटकीभिःप्रवृद्धाभिस्तथाकंटकितद्रुमैः निखातोच्छ्रितशाखाग्रैरु
धितुंतत्समंततः २२ मंथैरारोप्यमाणैश्च मंथबंधानुकर्षणैः अद्भिःप्रक्षाल्यमानाभिर्गर्गरीभिःसमंततः २३ कीलैरारोप्यमाणैः
श्च दामनीपाशपाशितैः स्तंभनीभिर्धृताभिश्च शकटैःपरिवर्तितैः २४ नियोगपाशैरासक्तैर्गर्गरीस्तंभमूर्धसु छादनार्थंप्रकीर्णै
श्चकटकैस्तृणसंकटैः २५ शाखाविटंकैर्वृक्षाणांक्रियमाणैरितस्ततः शोध्यमानैर्गवांस्थानैःस्थाप्यमानैरुलूखलैः २६ प्राङ्मुखैः
सिच्यमानैश्च संदीप्यद्भिश्चपावकैः सवत्सचर्मास्तरणैःपर्यंकैश्चावरोपितैः २७ तोयमुत्तारयंतीभिःप्रेक्षंतीभिश्चतद्वनम् शाखा
श्चाकर्षमाणाभिर्गोपीभिश्चसमंततः २८ युवभिःस्थविरैश्चैवगोपैर्व्यग्रकरैर्भृशम् विशसद्भिःकुठारैश्चकाष्ठान्यपितरूनपि
२९ तद्व्रजस्थानमधिकंशुशुभेकाननावृतम् रम्यवननिवेशंवैस्वादुमूलफलोदकम् ३० तास्तुकामदुघागावःसर्वपक्षि
कृतंवनम् वृंदावनमनुप्राप्तानंदनोपमकाननम् ३१ पूर्वमेवतुकृष्णेनगवांवैहितकारिणा शिवेनमनसादृष्टंतद्वनंवनचारि
णा ३२ पश्चिमेतुततोरूक्षेघर्ममासेनिरामये वर्षतीवामृतंदेवस्तृणंतत्रव्यवर्धत ३३ नतत्रवत्साःसीदंतिनगावोनेतरेजनाः
यत्रतिष्ठतिलोकानांभवायमधुसूदनः ३४ ताश्चगावःसघोषस्तुसचसंकर्षणोयुवा कृष्णेनविहितंवासंतमध्यासतनिर्वृताः ३५
इतिश्रीम॰भा॰खि॰ह॰वि॰ वृंदावनप्रवेशोनामैकादशोऽध्यायः ११

पक्ष्युपवेशनस्थानानितैः क्रियमाणैः २६ २७ २८ २९ ३० ३१ ३२ घर्मेग्री
ष्मे तत्रापिपश्चिमेमासे आषाढे ३३ ३४ अध्यासतअध्यासितवंतः ३५ इतिश्रीहरिवंशेविष्णुपर्वणिटीकायामेकादशोऽध्यायः ११ छ छ

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तौतु १ २ ३ ४ ५ ६ ७ कांतानांकदंबानामितिसामानाधिकरण्यम् ८ हासितंविकाशितम् ९ उच्छ्वसंतीवबाष्पमुद्गिरंतीत्यर्थः महीपुरैस्तुल्यं वपुरापद्यते तत्रदृष्टांतंमहावाताः पताकाः महामेघाः महाप्रासादाः १० शिलींध्राः छत्राकाः ११ क्षुभितमानसः कामातुरोऽभूत् १२ हृष्टसारंगनादेनम त्तभ्रमरध्वनिना दर्दुराभेकाः अवकीर्णाव्याप्ता १३ १४ संततोयआसारोधारासंपातस्तेननिर्यत्नाः जडीकृताः नगात्राणि वृक्षशाखाग्राणि १५ तोयेन-

वैशंपायनउवाच तौतुवृंदावनंप्राप्तौवसुदेवसुतावुभौ चेरतुर्वत्सयूथानिचारयंतौसुरूपिणौ १ पूर्णस्तुघर्मसमयस्तयोस्त त्रवनेसुखम् क्रीडतोःसहगोपालैर्यमुनाचावगाहतोः २ ततःप्रावृडनुप्राप्तामनसःकामदीपिनी प्रववर्षुर्महामेघाः शक्रचापां कितोदराः ३ बभूवादर्शनःसूर्योभूमिश्चादर्शनातृणैः महतामेघवातेननवतोयानुवर्षिणा ४ संमार्जिततलाभूमिर्यौवन स्थेवलक्ष्यते नाशितंजलदैरुष्णंतोषितावसुधाजलैः ५ नववर्षावसिक्तानिशक्रगोपकुलानिच नष्टदावाग्निधूमानिवना निप्रचकाशिरे ६ नृत्यव्यापारकालश्चमयूराणांकलापिनाम् मदरक्ताःप्रवृत्ताश्चकेकाःपटुरवास्तथा ७ नवप्रावृषिकांता- नांषट्पदाहारदायिनाम् यौवनस्थकदंबानांनवांभोभ्राजतेवपुः ८ हासितंकुटजैर्वृक्षैःकदंबैर्वासितंवनम् संतप्ताभास्करु करैरभितप्तादवाग्निभिः ९ जलैर्बलाहकोत्सृष्टैरुच्छ्वसंतीवपर्वताः महावातसमुद्धूतमहामेघगणार्पितम् महीमहाराजपुरै स्तुल्यमापद्यतेनभः १० क्वचित्कदंबहासाढ्यंशिलींध्राभरणंक्वचित् संप्रदीप्तमिवाभातिफुल्लनीपद्रुमंवनम् ११ ऐंद्रेणप- यसासिक्तंमारुतेननवीकृतम् पार्थिवंगंधमाघ्रायलोकःक्षुभितमानसः १२ हृष्टसारंगनादेनदर्दुरव्याहृतेनच नवैश्चाशि खिविक्रुष्टैरवकीर्णावसुंधरा १३ भ्रमत्तूर्णमहावर्त्तावेषप्राप्तमहारयाः हरंत्यस्तीरजान्वृक्षान्विस्तारयातिनिम्नगाः १४ संततासारनिर्यत्नाःक्लिन्नपत्रोत्तरच्छदाः नत्यजंतिनगाग्राणिश्रांताइवपतत्रिणः १५ तोयगंभीरलंबेषुस्रवत्सुचनदत्सुच उदरेषुनवाभ्राणांमज्जतीवदिवाकरः १६ महीरुहैरुत्पतितैःसलिलोत्पीडसंकुला अन्विष्यमार्गावसुधाभातिशाड्वलमालिनी १७ वज्रेणेवावरुग्णानांनगानांनगशालिनाम् स्रोतोभिःपरिकृत्तानिपतंतिशिखराण्यधः १८ पततामेघवर्षेणयथानिम्नानुसारिणा पल्वलोत्कीर्णसक्तेनपूर्यंतेवनराजयः १९ हस्तोच्छ्रितमुखावन्यामेघनादानुसारिणः भ्रांत्यातिदृष्ट्वामातंगागागताइवतोयदाः २०

गंभीराणिनिबिडानिलंबानिविस्तृतानिच तेषुउदरेषु १६ महीरुहैर्मार्गविघ्नभूतैरन्वेष्योजलच्छन्नोमार्गोयस्याःसा १७ १८ पल्वलेष्वप्युत्कीर्णं उत्सिक्तंयत्तोयंतत्सक्तेनवर्षेण १९ हस्तः शुंडातयासहउच्छ्रितंमुखंयेषांतेहस्तोच्छ्रितमुखाः २० ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 २१ २२ चंद्रोनभोवसतिंआस्तेवार्षिकींवर्षासुभवाम् २३ दुर्दिनेमेघछन्नेन्हि कालेप्राट्टूकाले दुर्दिनंमेघैराच्छन्नं २४ गोवर्द्धनोनामतः गोवर्द्धनोगवां
वर्द्धयिता २५ कृष्णासारंगाभ्रमराः २६ गूहंत्याच्छादयति २७ सीमानांक्षत्रभूमीनांत्रयाणामपिलक्ष्मीर्नव्यतिरिच्यतेनाधिकाभवत्यपितुसमानैवेत्यर्थः
२८ प्रोषितानांप्रवासिनांऔत्सुक्यंगृहगमनेतत्कारिणः २९ हर्यश्वचापेनइंद्रधनुषारचितंमिश्रितंमध्यमंपदमंतरिक्षम् ३० नभ सिश्रावणे नभश्चक्षुः

प्राट्टट्वृत्तिंचसंदृश्यदृश्याचांबुधरान्घनान् रौहिणेयोमिथःकालेकृष्णंवचनमब्रवीत् २१ पश्यकृष्णाघनान्कृष्णान्बलाकापंक्तिभूषणान् गगनेतवगात्रस्यवर्णचोरान्समुत्थितान् २२ तवनिद्राकरःकालस्तवगात्रोपमंनभः त्वमिवाज्ञातवसतिचंद्रोवसतिवार्षिकीम् २३ एतन्नीलोत्पलश्यामंनीलोत्पलदलप्रभम् संप्राप्तेदुर्दिनेकालेदुर्दिनंभातिवैनभः २४ पश्यकृष्णाजलोदग्रैःकृष्णोरुद्ग्रथितैर्घनैः गोवर्द्धनोयथारम्योभातिगोवर्द्धनोगिरिः २५ पतितेनांभसाह्येतेसमंतान्मददर्पिताः भ्राजंतेकृष्णासारंगाःकाननेषुमुदान्विताः २६ एतान्यंबुप्रहृष्टानिहरितानिमृदूनिच तृणानिशतपत्राक्षपत्रैर्गूहंतिमेदिनीम् २७ क्षरज्जलानांशैलानांवनानांजलदागमे ससस्यानांचसीमानानलक्ष्मीर्व्यतिरिच्यते २८ शीघ्रवातसमुद्धूताःप्रोषितोत्सुक्यकारिणः दामोदरोद्दामरवाःप्रागल्भ्ययातितोयदाः २९ हरेहर्यश्वचापेनत्रिवर्णेनत्रिविक्रम विभाण्त्येनरचितंतवेदंमध्यमंपदम् ३० नभस्येवनभश्चक्षुर्नभात्येवनभस्तले मेघैःशीतातपकरोविरश्मिरिवरश्मिवान् ३१ द्यावापृथिव्योःसंसर्गःसततंविततैःकृतः अव्यवच्छिन्नधारौघैःसमुद्रोघसमैर्घनैः ३२ नीपार्जुनकदंबानांपृथिव्यांचातिवृष्टिभिः गंधैःकोलाहलावातिवातामदनदीपनाः ३३ संप्रवृत्तमहावर्षंलंबमानमहांबुदम् भात्यगाधमपर्यंतंससागरमिवांबरम् ३४ धारानिर्मलनाराचंविद्युत्कवचवर्मिणम् शक्रचापायुधधरंयुद्धसज्जमिवांबरम् ३५ शैलानांचवनानांचद्रुमाणांचवरानन प्रतिच्छन्नानिभासंतेशिखराणिघनैर्घनैः ३६ गजानीकैरिवाकीर्णंसलिलोद्गारिभिर्घनैः वर्णसारूप्यतांयातिगगनंसागरस्यच ३७ समुद्रोद्धूतजनितालोलाःशाद्वलकंपिनः शीताःसपृषतोद्दामाःकर्कशावांतिमारुताः ३८ निशाःसुप्तचंद्रासुमुक्ततोयासुतोयदैः मग्नः सूर्यस्यनभसोनविभातिदिशोदश ३९

सूर्यः ३१ संसर्गःसंबंधः समुद्रोघनिभैः दृढैरित्यर्थः ३२ नीपाःकदंबानामवांतरजातयः पृथिव्यासृष्टैरितिशेषः कोलाहलाःकलकलाः ३३ ३४
यैर्विद्युत्कवचैर्मेघैर्वर्मिणंवर्मवत्पुंस्त्वमार्षम् ३५ घनैर्निबिडैर्मेघैः ३६ गजाजलगजास्तेषामनीकैः ३७ उद्धूतंउद्धूननम् कंपिनःकंपहेतवः सपृषताः
सबिंदवः उद्दामाः महांतः सपृषतोद्दामेतिसंधिरार्षः ३८ सुप्तोअदृश्यःचंद्रोयासु ३९ ६ ६ ६ ६ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चेतनमिति क्षुधाध्मातैर्वायुना पूरितैः कोशैश्चर्मकोशसदृशैर्मेघैरुपलक्षितं पुष्करमंबरं चेतनमिव भातीतिलुप्तोपमा सवर्तश्चलङ्घिर्मेघैर्नभोपिचल तीवेत्यर्थः एवमपि कृष्टयः प्रजाः रम्याणां रात्रीणाम् घृणीनां दिवसानां च विवेकं अन्योन्यतः पृथक्त्वं न यांतीति न अपितु यांत्येवेतियोजना मेघोत्थांधका राघृतानि दिनानि रात्रिकल्पान्यभूवन्नित्यर्थः ४० ४१ ४२ तत्कालज्ञातिभिः नतु यादववज्जन्मज्ञातिभिः ४३ इति हरिवंशे विष्णुपर्वणि टीकायां द्वादशोऽध्यायः १२ कदाचित्तु १ श्रीवत्सेन उरसा धृतेनेशेषः तृतीयांतानां पंचमस्थेन रराजेत्यनेनान्वयः २ हस्तेन पंकजोद्भिन्नविकसत्कमलं तत्तुल्यतेज

चेतनं पुष्करं कोषैः क्षुधाध्मातैः समंततः न घृणीनां न रम्याणां विवेकं यांति कृष्टयः ४० धर्मदोषपरित्यक्तं मेघतोयविभूषितम् प श्यद्वृंदावनं कृष्णो वनं चैत्ररथं यथा ४१ एवं प्रावृड्गुणान्सर्वान् श्रीमान्कृष्णस्य पूर्वजः कथयन्नेव बलवान् व्रजमेव जगाम ह ४२ तौ रमयं तावन्योन्यं कृष्णसंकर्षणावुभौ तत्कालज्ञातिभिः सार्धं चेरतुस्तद्वनं महत् ४३ इति श्रीमहाभारते खिलेषु हरिवंशे वि ष्णुपर्वणि प्रावृड्वर्णनं नाम द्वादशोऽध्यायः १२ वैशंपायन उवाच कदाचित्तु तदा कृष्णो विना संकर्षणेन वै चचार तद्व नं सर्वं कामरूपी वराननः १ काकपक्षधरः श्रीमान् श्यामः पद्मदलेक्षणः श्रीवत्सेनोरसा युक्तः शशांक इव लक्ष्मणा २ सांगदेनाग्रह स्तेन पंकजोद्भिन्नवर्चसा सुकुमाराभिताम्रेण क्रांतविक्रांतगामिना ३ पीतेप्रीतिकरे नृणां पद्मकिंजल्कसप्रभे सूक्ष्मे वसानो वस ने ससंध्य इव तोयदः ४ वत्सव्यापारयुक्ताभ्यां व्यग्राभ्यां दंडरज्जुभिः भुजाभ्यां साधुवृत्ताभ्यां पूजिताभ्यां दिवौकसैः ५ सदृशं पुंडरी कस्य गंधेन कमलस्य च रराज चास्य तद्बाल्ये रुचिरोष्ठपुटं मुखम् ६ शिखाभिस्तस्य मुक्ताभी रराज मुखपंकजम् वृतं षट्पदपंक्ती भिर्यथा स्यात्पद्ममंडलम् ७ तस्यार्जुनकदंबाढ्या नीपकंदलमालिनी रराज माला शिरसि नक्षत्राणां यथा दिवि ८ स तया मालया वीरः शुशुभे कंठसक्तया मेघमालाबुदश्यामो नभस्य इव मूर्तिमान् ९ एकेनामलपत्रेण कंठसूत्रावलंबिना रराज बर्हपत्रेण मं दमारुतकंपिना १० क्वचिद्गायन् क्वचित्क्रीडन् नृत्यंश्च क्वचित्क्वचित् पर्णवाद्यश्रुतिसुखं वादयंश्च क्वचिद्वने ११ गोपवेणुं सुमधुरं कामात्तमपि वादयन् प्रह्लादनार्थं च गवां क्वचिद्वनगतो युवा १२ गोकुले बुधरश्यामश्चचार द्युतिमान्प्रभुः रेमे च तत्र रम्यासु च चार वनराजिषु १३ मयूररवघुष्टासु मदनोद्दीपनीषु च मेघनादप्रतिव्यूहैर्नादितासु समंततः १४

साक्रांतं विक्रांतं गमनं यस्य ता दृशेन गामिना गमनस्वभावेन पादेन ३ ४ दिवौकसैः देवैः ५ ६ बाल्ये पौगंडं दशमावधीत्युक्तेः पौगंडे ७ नीपाः कदंबपुष्पाणि कंदला नवांकुराः तैः शोभ मानानीपकंदलमालिनी ८ नभस्यो भाद्रपदः ९ अमलं दिव्यं पत्रं दलं यस्य तेन बर्हिपत्रेण मयूरपिच्छेन शशभे इत्यनुषंगः १० ११ १२ १३ प्रतिव्यूहैः प्रतिध्वनिभिः १४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आ· हृ· टी· कंदलानि नवांकुरितानि अमलानि च पत्राणि यासु कंदलं तु कपोले स्यादुपरागे नवांकुरे इति विश्वः १५ कामिनीष्विवेति स्रवंतीनामुपमा १६ १७ आ अ· प·
१२ खिनं वटम् १८ १९ चित्रांगवर्णैर्मयूरैः २० २१ निरावर्षं वर्षवारणम् अनातपं आतपनिवारणम् २२ २३ २४ क्रीडनकैः क्रीडासाधनैः २५ २६ २७ १३ २

शाड्वलच्छन्नमार्गासु शिलीध्राभरणासु च कंदलामलपत्रासु स्रवंतीषु नवं जलम् १५ केसराणां नवैर्गंधैर्मदनश्वसितोपमैः अ
भीक्ष्णं निःश्वसंतीषु कामिनीष्विव नित्यशः १६ सेव्यमानो नवैर्वातैर्द्रुमसंघातनिस्सृतैः तास्मिन्कृष्णो सुदुर्लभे सौम्यास्वनराजिषु
१७ स कदाचिद्वने तस्मिन्गोभिः सह परिव्रजन् ददर्श विपुलोदग्रशाखिनं शाखिनांवरम् १८ स्थितं धरण्यां मेघाभं निबिडं दल
संचयैः गगनोत्सौच्छ्रिताकारपर्वताभोगधारिणम् १९ नीलचित्रांगवर्णैश्च सेवितं बहुभिः खगैः फलैः प्रवालैश्च घनैः सेंद्रचाप-
घनोपमम् २० भवनाकारविटपं लतापुष्पसमंडितम् विशालमूलावनतं पवनांभोदधारिणम् २१ आधिपत्यमिवान्येषां तस्य
देशस्य शाखिनाम् कुर्वाणं शुभकर्माणं निरावर्षमनातपम् २२ न्यग्रोधं पर्वताग्राभं भांडीरं नाम नामतः दृष्ट्वा तत्र मतिं चक्रे नि
वासाय ततः प्रभुः २३ स तत्र वयसा तुल्यैर्वत्सपालैः सहानघ रेमे वै वासरं कृष्णः पुरा स्वर्गगतो यथा २४ तं क्रीडमानं गोपालाः
कृष्णं भांडीरवासिनम् रमयंति स्म बहवो वन्यैः क्रीडनकैस्तदा २५ अन्ये स्म परिगायंति गोपा मुदितमानसाः गोपालाः कृष्ण
मेवान्ये गायंति स्म रतिप्रियाः २६ तेषां स गायतामेव वादयामास वीर्यवान् पर्णवाद्यांतरे वेणुं तुंबीवीणां च तत्र ह २७ कदाचिच्चा
रयन्नेव गाः स गोवृषभेक्षणः जगाम यमुनातीरं लतालंकृतपादपम् २८ तरंगापांगकुटिलां वारिस्पर्शसुखानिलाम् तां च प
द्मोत्पलवतीं ददर्श यमुनां नदीम् २९ सुतीर्थां स्वादुसलिलां ह्रादिनीं वेगगामिनीम् तोयवातोद्धतैर्वेगैरवनामितपादपाम् ३० हं
सकारंडवोद्घुष्टां सारसैश्च निनादिताम् अनर्घमिथुनैश्चैव सेवितां मिथुनेचरैः ३१ जलजैः प्राणिभिः कीर्णां जलजैर्भूषितां गुणैः
जलजैः कुसुमैश्चित्रां जलजैर्हरितोदकाम् ३२ प्रसृतस्रोतश्चरणां पुलिनश्रोणिमंडलाम् आवर्तनाभिगंभीरां पक्षरोमानुरंजिता
म् ३३ तटच्छेदोदराकांतां त्रितरंगवलीधराम् फेनप्रहृष्टदशनां प्रसन्नां हंसहासिनीम् ३४ रुचिरोत्पलदंतोष्ठीं नतभ्रूजलजेक्ष
णाम् हृददीर्घललाटांतां कांतां शैवलमूर्द्धजाम् ३५

२८ तरंगा एवापांगाः कटाक्षास्तैः कुटिलं तीरम् २९ ३० मिथुनेचरैश्चक्रवाकादि-
भिः ३१ जलजैर्मीनाद्यैः जलजैर्गुणैः शीतलत्वनिर्मलत्वाद्यैः जलजैः पद्मैः जलजैः शैवालैः ३२ स्त्रीरूपेण वर्णयति प्रसृतेति स्रोतः शब्दे सकारलो १२
पआर्षः ३३ तटच्छेदः प्रवाहस्य मध्ये कार्श्यम् तिस्रः तरंगा एव वलयः तासां धरां तरंगत्रिवलीधराम् ३४ ३५ छ. छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आभोगश्रवणायतां आभोगस्तटस्थउभयतः पूर्णतासैवश्रवणे आयतेयस्यास्ताम् ३६ ३७ वारिषुप्लवंतेविस्तारंयांतिशैवालाः कमलिनीदलानिवातेषां-
यः प्लवः विपुलतासैवक्षौमं अतसीसूत्रमयंवासोयस्यास्ताम् ३८ निपानंपशूनांपानस्थलंतत्रयेश्वापदास्तएवापीडोभूषायस्यास्ताम् ३९ ४० ४१ ४२

चक्रवाकस्तनतटांतीरपार्श्वायतताननाम् दीर्घस्रोतायतभुजामाभोगश्रवणायताम् ३६ कारंडवाकुंडलिनींश्रीमत्पंकजलोच
नाम् तटजाभरणोपेतांमीननिर्मलमेखलाम् ३७ वारिप्लवप्लवक्षौमांसारसारावनूपुराम् काशपुष्पमयवासोवसानांहंसल
क्षणम् ३८ भीमनक्रांगुलिसांगीकूर्मलक्षणभूषिताम् निपानश्वापदापीडांनृभिःपीनपयोधराम् ३९ श्वापदोच्छिष्टसलिलां
आश्रमस्थानसंकुलाम् तांसमुद्रस्यमहिषीमीक्षमाणःसमंततः ४० चचारविपुलांकृष्णोयमुनांसुपशोभयन् तांचरन्सनदीं
श्रेष्ठांददर्शह्रदमुत्तमम् ४१ दीर्घयोजनविस्तारंदुस्तरंत्रिदशैरपि गंभीरमक्षोभ्यजलंनिष्कंपमिवसागरम् ४२ तोयजैःश्वापदै
स्त्यक्तंशून्यंतोयचरैःखगैः अगाधेनांभसापूर्णंमेघपूर्णमिवांबरम् ४३ दुःखोपसर्प्यंतीरेषुससर्पैर्विपुलैर्बिलैः विषारणिभव
स्याग्नेर्धूमेनपरिवेष्टितम् ४४ अभोग्यंतत्पशूनांहिअपेयंचजलार्थिनाम् उपभोगैःपरित्यक्तंसुरैस्त्रिषवणार्थिभिः ४५ आका
शादप्यसंचार्यंखगैराकाशगोचरैः तृणेष्वपिपतत्स्वप्सुज्वलंतमिवतेजसा ४६ समंताद्योजनसाग्रंदेवैरपिदुरासदम् विषानलेन
घोरेणज्वालाप्रज्वलितद्रुमम् ४७ व्रजस्योत्तरतस्तस्यक्रोशमात्रेनिरामये तंदृष्ट्वाचिंतयामासकृष्णोवैविपुलंह्रदम् ४८ अगाधं
ध्यातमानंचकस्यायंमहतांह्रदः अस्मिन्सकालियोनामनीलांजनचयोपमः ४९ उरगाधिपतिःसाक्षात्ह्रदेवसतिदारुणः उत्सृज्य-
सागरावासंयोमयानिर्जितःपुरा ५० भयात्पतगराजस्यसुपर्णस्योरगाशिनः तेनेयंदूषितासर्वायमुनासागरंगमा ५१ भयात्तस्योर
गपतेर्नायंदेशोनिषेव्यते तदिदंदारुणाकारमरण्यंरूढशाद्वलम् ५२ सावरोहद्रुमघोरंकीर्णनानालताद्रुमैः रक्षितंसर्पराजस्य
सचिवैरात्मकारिभिः ५३ वनंनिर्विषयाकारंविषान्नमिवदुःस्पृशम् तैरात्मकारिभिर्नित्यंसर्वतःपरिरक्षितम् ५४ शैवालनलिनै
श्चापिवृक्षैःक्षुपलताकुलैः कर्त्तव्यमार्गौप्राजितेह्रदस्यास्यतटावुभौ ५५ तदस्यसर्पराजस्यकर्त्तव्योनिग्रहोमया यथेयंसरिद
भोदाभवेच्छिवजलाशया ५६ व्रजोपभोग्याचयथानागेचदमितेमया सर्वत्रसुखसंचारासर्वतीर्थसुखाश्रया ५७ एतदर्थंचवा-
सोयंव्रजेस्मिन्गोपजन्मच अमीषामुत्पथस्थानांनिग्रहार्थंदुरात्मनाम् ५८

४३ विषारणयःसर्पाः ४४ ४५ आकाशादपिआकाशमार्गेपि
४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ निर्विषयाकारम् आकाशवन्निरालंबनम् ५४ कर्त्तव्यौनतुस्वतःसिद्धौमार्गौययोस्तौ ५५ ५६ ५७ ५८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५९ ६० इतिहरिवंशेविष्णुपर्वणिटीकायांत्रयोदशोऽध्यायः १३ सोपसृत्येत्यध्याहृत्य योऽहन्नहिमन्वपस्तन र्द्वेत्यपादहस्तो अपृतन्यदिंद्रमितिचोपदि
ष्टं कालियदमनंउपरंहयति तत्रसंभावयवयोरर्थस्तुयोऽहिः सर्पोऽपः यमुनाजलानि ततर्दविषसंपर्केणनाशितवान्तमिंद्रो अहन् हिंसितवान् पीडनमा
त्रमत्रहंत्यर्थः सचअहिः अपात् पादहीनः अहस्तश्चसन् इंद्रंअपृतन्यत् अयोधयदिति एतेनास्यसर्परूपत्वमुक्तमतोऽहिर्दृशारव्योयत्राप्संबंधस्तत्रायमे

एनंकदंबमारुह्यतदेवशिशुलीलया विनिपत्यह्रदेघोरेदमयिष्यामिकालियम् ५९ एवंकृतेबाहुवीर्यंलोकेख्यातिंगमिष्यति
६० इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिबालचरितेयमुनावर्णननामत्रयोदशोऽध्यायः १३ वैशंपायनउवाच सोप
सृत्यनदीतीरबध्वापरिकरदृढम् आरोहच्चपलःकृष्णाःकदंबशिखरंमुदा १ कृष्णाःकदंबशिखरालंबमानोघनाकृतिः ह्रदमध्ये
करोच्छब्दंनिपतन्नंबुजेक्षणः २ कृष्णेनतत्रपतताक्षुभितोयमुनाह्रदः संप्राषिच्यतवेगेनभिद्यमानइवांबुदः ३ तेनशब्देनसं
क्षुब्धंसर्पस्यभवनंमहत् उदतिष्ठज्जलात्सर्पोरोषपर्याकुलेक्षणः ४ सचोरगपतिःक्रुद्धोमेघराशिसमप्रभः ततोरक्तांतनयनः
कालियःसमदृश्यत ५ पंचास्यःपावकोच्छ्वासश्चलज्जिह्वोनलाननः पृथुभिःपंचभिर्घोरैःशिरोभिःपरिवारितः ६ पूरयित्वाह्र
दंसर्वंभोगेनानलवर्चसा स्फुरन्निवचरोषेणज्वलन्निवचतेजसा ७ क्रोधेनतज्जलंतस्यसर्वंशृतमिवाभवत् प्रतिस्रोताश्चभीता
वजगामयमुनानदी ८ तस्यक्रोधाग्निपूर्णेभ्योवक्त्रेभ्योभूच्चमारुतः दृष्ट्वाकृष्णंह्रदगतंक्रीडंतंशिशुलीलया ९ सधूमाःपन्नगें
द्रस्यमुखान्निश्चेरुरर्चिषः सृजतातेनरोषाग्निंसमीपेतीरजाद्रुमाः १० क्षणेनभस्मसान्नीतायुगांतप्रतिमेनवै तस्यपुत्राश्चदाराश्च
भृत्याश्चान्येमहोरगाः ११ वमंतःपावकंघोरंवक्त्रेभ्योविषसंभवम् सधूमंपन्नगेंद्रास्तेनिष्पेतुरमितौजसः १२ प्रवेशितश्चतैः
सर्पैःसकृष्णोभोगबंधनम् निर्यलचरणाकारस्तस्थौगिरिरिवाचलः १३ अदशन्दशनैस्तीक्ष्णैर्विषोत्पीडजलाविलैः तेकृष्णं
सर्पपतयोनममारचवीर्यवान् १४ एतस्मिन्नंतरेभीतागोपालाःसर्वएवते क्रंदमानाव्रजंजग्मुर्बाष्पगद्गदयागिरा १५ गोपा
ऊचुः एषमोहंगतःकृष्णोमग्नोहिकालियेह्रदे भक्ष्यतेसर्पराजेनतदागच्छतमाचिरम् १६ नंदगोपायवैक्षिप्रंसबलायनि
वेद्यताम् एषतेकृष्यतेकृष्णाःसर्पेणेतिमहाह्रदे १७ नंदगोपस्तुतच्छ्रुत्वावज्रपातोपमंवचः आर्तःस्खलितविक्रांतस्तंजगा
मह्रदोत्तमम् १८ सबालयुवतीवृद्धःसचसंकर्षणोयुवा आक्रीडंपन्नगेंद्रस्यजलस्थंसमुपागमत् १९

वंबोद्धव्यः १ लंबमानः अधःपतन्
२ ३ ४ ५ पंचास्यः पंचवदनः ६ भोगेनदेहेन ७ शृतंक्वथितं प्रतिस्रोताःविपरीतप्रवाहा ८ ९ १० ११ १२ १३ तेदशन्नितिपूर्वेणासंबंधः १४ १५ १६ १७ १८ १९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२० २१ २२ सर्पभोगेनसर्पभोगबंधेन स्पंदितंकिंचिच्चालितंधैर्यादितिशेषः २३ २४ २५ २६ २७ २८ २९ ३० परिदेवंतिशोचंति ३१ ३२

नंदगोपमुखागोपास्तेसर्वेसाश्रुलोचनाः हाहाकारंप्रकुर्वंतस्तस्थुस्तीरेह्रदस्यवै २० व्रीडिताविस्मिताश्चैवशोकार्त्ताश्चपुनःपुनः
केचित्तुपुत्रहाहेतिहाधिगित्यपरेपुनः २१ अपरेहाहताःस्मेतिरुरुदुर्भृशदुःखिताः स्त्रियश्चैवयशोदांतांहाहतासीतिचुक्रुशुः २२
यापश्यसिप्रियंपुत्रंसर्पराजवशंगतम् स्पंदितंसर्पभोगेनकृष्यमाणंयथामृतम् २३ अश्मसारमयंनूनंहृदयंतेविलक्ष्यते पुत्रंक-
थमिमंदृष्ट्वायशोदेनावदीर्यसे २४ दुःखितंबतपश्यामोनंदगोपंह्रदांतिके न्यस्यपुत्रमुखेदृष्टिंनिश्चेतनमिवस्थितम् २५ यशोदा-
मनुगच्छंत्यःसर्पावासमिदंह्रदम् प्रविशामोनयास्यामःसर्वादामोदरंविना २६ दिवसःकोविनासूर्यंविनाचंद्रेणकानिशा विनावृ-
षेणकागावोविनाकृष्णंनकोव्रजः २७ विनाकृष्णंनयास्यामोविवत्साइवधेनवः तासांविलपितंश्रुत्वातेषांचव्रजवासिनाम् विलाप
नंदगोपस्ययशोदारुदितंतथा २८ एकभावशरीरज्ञएकदेहोद्विधाकृतः संकर्षणःकृष्णंसंक्रुद्धोबभाषेकृष्णमव्ययम् २९ कृष्णकृष्ण
महाबाहोगोपानांनंदिवर्द्धन दम्यतामेषवैक्षिप्रंसर्पराजोविषायुधः ३० इमेनोबांधवास्तातत्वांमत्वामानुषंविभो परिदेवंतिकरु-
णंसर्वेमानुषबुद्धयः ३१ तच्छ्रुत्वारौहिणेयस्यवाक्यंसंज्ञासमीरितम् विक्रम्यास्फोटयद्बाहूभित्त्वातन्नागबंधनम् ३२ तस्यपद्भ्या-
मथाक्रम्यभोगराशिंजलोत्थितम् शिरःसकृष्णोजग्राहस्वहस्तेनावनाम्यच ३३ तस्यारुरोहसहसामध्यमंतन्महच्छिरः सोऽस्यमू-
र्ध्निस्थितःकृष्णोननर्त्तरुचिरांगदः ३४ मृद्यमानःसकृष्णेनशांतमूर्द्धाभुजंगमः आस्यैःसरुधिरोद्गारैःकातरोवाक्यमब्रवीत्
३५ अविज्ञानान्मयाकृष्णरोषोयःसंप्रदर्शितः दमितोऽहंहतविषोवशगस्तेवरानन ३६ तदाज्ञापयकिंकुर्यांसदारापत्यबांधवः
कस्यवावशतांयामिजीवितंमेप्रदीयताम् ३७ पंचमूर्द्धानंतंदृष्ट्वासर्पंसर्पारिकेतनः अक्रुद्धएवभगवान्प्रत्युवाचोरगेश्वरम् ३८
नवास्मिन्यमुनातोयेनेवस्थानंददाम्यहम् गच्छार्णवजलंसर्पसभार्यःसहबांधवः ३९ यश्चेहभूयोदृश्येतस्थानेवायदिवाजले
तवभृत्यस्तनूजोवाक्षिप्रंवध्यःसमेभवेत् ४० शिवंचास्यजलस्यास्तुत्वंचगच्छमहार्णवम् स्थानेत्विहभवेद्दोषस्तवांतकरणोम-
हान् ४१ मत्पदानिचतेसर्पदृष्ट्वामूर्द्धसुसागरे गरुडःपन्नगरिपुस्त्वयिनप्रहरिष्यति ४२ गृह्यमूर्ध्नातुचरणौकृष्णस्योरगपुंग-
वः पश्यतामेवगोपानांजगामादर्शनंह्रदात् ४३ निर्जितेतुगतेसर्पेकृष्णमुत्तीर्यधिष्ठितम् विस्मितास्तुष्टुवुर्गोपाश्चक्रुश्चैवप्रदक्षिणं ४४

३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० स्थानेअवस्थितौ ४१ नन्वन्यत्रगरुडोमांहनिष्यतिअत्रतुमुनिशापान्नायातीतिचेत्तत्राहमत्पदानीति ४२ ४३ धिष्ठितंतीरेऽवस्थितं ४४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४५ ४६ ४७ ४८ ४९ इतिश्रीहरिवंशेविष्णुपर्वणिटीकायांचतुर्दशोऽध्यायः १४ दमितेइत्यध्यायेसमिंद्गर्द्दभंसमृणोत्यसुंमंत्रमुपबृंहयति हेइंद्र
गर्द्दभंसमृणमारयेतिमंत्रपादार्थः १ २ ३ ४ सदेशोभातीत्युत्तरस्थेनान्वयः ५ ६ ७ लघुक्रमौशीघ्रक्रियौ ८ ९ १० निर्माणभूतंसारभूतम् निर्मा

ऊचुःसर्वेचसंप्रीतानंदगोपंवनेचराः धन्योस्यनुग्रहीतोसियस्यतेपुत्रइदृशः ४५ अद्यप्रभृतिगोपानांगवांगोष्ठस्यचानघ आ
पत्सुशरणंकृष्णः प्रभुश्चायतलोचनः ४६ जाताशिवजलासर्वायमुनासुनिसेविता तीरेचास्याःसुखंगावोविचरिष्यंतिनःसदा
४७ व्यक्तमेववनेजातावयंयत्कृष्णमीदृशम् महद्भूतनजानीमःछन्नमग्निमिवव्रजे ४८ एवंतेविस्मिताःसर्वेस्तुवंतःकृष्णमव्यु
यम् जग्मुर्गोपगणाघोषंदेवाश्चैत्ररथंयथा ४९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिचतुर्दशोऽध्यायः १४ वै
शंपायनउवाच दमितेसर्पराजेतुकृष्णेनयमुनाह्रदे तमेवचेरतुर्देशंसहितौरामकेशवौ १ आजग्मतुस्तौसहितौगोधनैःसह
गामिनौ गिरिंगोवर्द्धनरम्यंवसुदेवसुतावुभौ २ गोवर्द्धनस्योत्तरतोयमुनातीरमाश्रितम् ददृशातेचतौवीरौरम्यंतालवनंमहत्
३ तौतालपर्णमततेरम्येतालवनेरतौ चेरतुःपरमप्रीतौवृषपोताविवोद्धतौ ४ सतुदेशःसदास्निग्धोलोष्ठपाषाणवर्जितः द-
र्भप्रायस्थलीभूतःसुमहान्कृष्णमृत्तिकः ५ तालैस्तैर्विपुलस्कंधैरुच्छ्रितैःश्यामपर्वभिः फलाग्रशाखिभिर्भातिनागहस्तैरिवो
च्छ्रितैः ६ तत्रदामोदरोवाक्यमुवाचवदतांवरः अहोतालफलैःपक्वैर्वासितेयंवनस्थली ७ स्वादून्यार्यसुगंधीनिश्यामानिर-
संतिच पक्वतालानिसहितौपातयावोलघुक्रमौ ८ यद्येषामीदृशोगंधोमाधुर्यघ्राणतर्पणः रसेनामृतकल्पेनभवितव्यंचमेम
तिः ९ दामोदरवचःश्रुत्वारौहिणेयोहसन्निव पातयन्पक्वतालानिचालयामासतांस्तरून् १० तत्तुतालवनंनृणामसेव्यंदुर
तिक्रमम् निर्माणभूतमिरिणंपुरुषादालयोपमम् ११ दारुणोधेनुकोनामदैत्योगर्द्दभरूपवान् खरयूथेनमहताघृतःसमनु
सेवते १२ सतुतालवनंघोरंगर्द्दभःपरिरक्षति नृपक्षिश्वापदगणांस्त्रासयानःसुदुर्मतिः १३ तालशब्दंसतंश्रुत्वासंघुष्टंफलपा
तनात् नामर्षयत्ससंक्रुद्धस्तालस्वनमिवद्विपः १४ शब्दानुकारीसक्रुद्धोदर्पाविद्धसटाननः स्तब्धाक्षोहेषितपटुःखुरैर्निर्द्दार
यन्महीम् १५ आविद्धपुच्छोहृषितोव्यात्ताननइवांतकः आपतन्नेवददृशेरौहिणेयमुपस्थितम् १६ तालानांतमधोदृष्ट्वास
ध्वजाकारमव्ययम् रौहिणेयंखरोदुष्टःसोदशद्दशनायुधः १७

णंनिर्मितौसारेइतिमेदिनी अथापिइरिणंतूषरेशून्येइतिमेदिनी ११ १२ १३ ता
लस्वनंआस्फोटनध्वनिम् १४ दर्पाविद्धसटाननः मदेनाविद्धाभ्रामितासटाकेसरायस्मिन्तथाभूतंआननंयस्य १५ आविद्धंऊर्ध्वीकृतंपुच्छंयेन १६ १७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१८ ताभ्यांतयोरेवपदयोर्जग्राह आवर्जितं नामितंमुखस्कंधंयस्य १९ २० २१ २२ २३ २४ २५ २६ इतिश्रीहरिवंशेविष्णुपर्वणिटीकायांपञ्च
दशोऽध्यायः १५ ॥ ॥ १ २ क्ष्वेडयंतौबाहूआस्फोटयंतौ व्याहरंतौआकारयंतौ ३ नियोगपाशैः अन्नशिक्यैः ४ अन्योन्यसदृशांबरौ

पद्भ्यांसुभाभ्यांचपुनःपश्चिमाभ्यांपराङ्मुखः जघानोरसिदैत्येंद्रोरोहिणेयंनिरायुधम् १८ ताभ्यामेवसजग्राहपद्भ्यांतंदैत्यग
र्दभम् आवर्जितमुखस्कंधंप्रैरयत्तालमूर्द्धनि १९ सभग्नोरुकटिग्रीवोभग्नपृष्ठोदुराकृतिः खरस्तालफलैःसार्द्धंपपातधरणी
तले २० तंगतासुंगतश्रीकंपतितंवीक्ष्यगर्दभम् ज्ञातींस्तथापरांस्तस्यतृणराजनिसोक्षिपत् २१ साभूर्गर्दभदेहैश्चफलैःप
क्वैश्चपातितैः बभासेछन्नजलदाद्यौरिवाव्यक्तशारदी २२ तस्मिन्गर्द्दभदैत्येतुसानुगेविनिपातिते रम्यतालवनंतद्धिभूयोर
म्यतरंबभौ २३ विप्रमुक्तभयंशुभ्रंविविक्ताकारदर्शनम् चरंतिस्मसुखंगावस्तत्तालवनमुत्तमम् २४ ततःप्रविष्टास्तेसर्वेगोपा
वनविचारिणः वीतशोकाभयायासाश्चचूर्यंतेस्मतद्वनम् २५ ततःसुखंप्रकीर्णासुगोषुनागेंद्रविक्रमौ द्रुमपर्णासनेहृष्टौतौयथा
र्हंनिषीदतुः २६ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिधेनुकवधोनामपंचदशोऽध्यायः १५ वैशंपायनउवाच अथ-
तौजातहर्षौतुवसुदेवसुतावुभौ तत्तालवनमुत्सृज्यभूयोभांडीरमागतौ १ चारयंतौविवृद्धानिगोधनानिशुभानिच स्फीतसस्य
प्ररूढानिवीक्ष्यमाणौवनानिच २ क्ष्वेडयंतौप्रगायंतौप्रचिन्वंतौचपादपान् नामभिर्व्याहरंतौचसवत्साःगाःपरंतपौ ३ नियोग
पाशैरासक्तैःस्कंधाभ्यांशुभलक्षणौ वनमालाकुलोरस्कौबालशृंगाविवर्षभौ ४ सवर्णाजनचूर्णाभ्यामन्योन्यसदृशांबरौ महे
द्रायुधसंयुक्तौशुक्लकृष्णाविवांबुदौ ५ कुशाग्रकुसुमानांचकर्णपूरौमनोरमौ वनमार्गेषुकुर्वाणौवन्यवेषधरावुभौ ६ गोवर्द्ध
नस्यानुचरौवनेसानुचरौतुतौ चेरतुर्लोकसिद्धाभिःक्रीडाभिरपराजितौ ७ तावेवंमानुषींदीक्षांवहंतौसुरपूजितौ तज्जाति
गुणयुक्ताभिःक्रीडाभिश्चेरतुर्वनम् ८ तौतुभांडीरमाश्रित्यबालक्रीडानुवर्तिनौ प्राप्तौपरमशाखाढ्यंन्यग्रोधंशाखिनांवरम् ९ त
त्रस्यंदोलिकाभिश्चयुद्धमार्गविशारदौ अश्माभिःक्षेपणीयैश्चतौव्यायाममकुर्वताम् १० युद्धमार्गैश्चविविधैर्गोपालैःसहितावुभौ
मुदितौसिंहविक्रांतौयथाकामंविचेरतुः ११

अन्योन्यदीप्तिसंवलनेनसदृशांबराविव ५ कुसुमानांकुसुमैः कर्णपूरौकुर्वाणौ ६
७ दीक्षांरीतिं ८ ९ स्यंदोलिकाभिर्दोलावलंबैः क्षेपणीयैर्वीटिकाद्यैः १० ११ ॥ ॥ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विष्टंभोदिवोधरुणःपृथिव्याविश्वाउतक्षितयोहस्तेअस्य असत्तउत्सोगृणतेनियुत्वान्मध्वोअंशुःपवतइंद्रियायेत्येतंमंत्रमुपबृंहयति तयोरमयतोरेवमित्या
दिना मंत्रार्थस्तु हेसोमतेतवमध्वोब्रह्मस्वरूपिणःअंशुरिवांशुःअंशःपृथिव्याधरुणःभूमेर्धर्त्तारामरूपधारीशेषः तेत्वयाअसत् अंतर्यामिणाप्रबाधितः
सन्दीप्यमानअतएवउत्सःत्वदाज्ञाकरणेउत्कंठितः नियुत्वान्जगतःप्राणवायुरूपीसूत्रात्मासन्गृणते आत्मनःस्वरूपंत्वद्वाक्याद्वगतंभावयति अहं
परेश्वरादनन्योस्मिदेवकार्यार्थमवतीर्णोस्मीत्यालोचयतीत्यर्थः ततोहेतोःदिवःद्युलोकमंडपस्यविष्टंभःस्तंभाइवभवंति तेविष्टंभःक्विंतस्येदंद्वितीयाबहु

तयोरमयतोरेवंतद्लिप्सुरसुरोत्तमः प्रलंबोत्यागमत्तत्रच्छिद्रान्वेषीतयोस्तदा १२ गोपालवेषमास्थायवन्यपुष्पविभूषितः लोभया
नःसतोवीरौहास्यैःक्रीडनकैस्तथा १३ सोवगाहतनिःशंकस्तेषामध्यममानुषः मानुषवपुरास्थायप्रलंबोदानवोत्तमः १४ प्रक्री-
डितास्ततेसर्वेसहतेनामरारिणा गोपालवपुषंगोपामन्यमानाःस्वबांधवम् १५ सतुच्छिद्रांतरप्रेक्षुःप्रलंबोगोपतांगतः दृष्टिंप्रणि
दधेकृष्णेरौहिणेयेचदारुणाम् १६ अविषह्यंततोमत्वाकृष्णमद्भुतविक्रमम् रौहिणेयवधेयत्नमकरोद्दानवोत्तमः १७ हरिणा
क्रीडितंनामबालक्रीडनकंततः प्रक्रीडितास्तुतेसर्वेद्वौद्वौयुगपदुत्थितौ १८ कृष्णःश्रीदामसहितःपुप्लुवेगोपसूनुना संकर्षण
स्तुप्लुतवान्प्रलंबेनसहानघ १९ गोपालास्त्वपरेद्वंद्वंगोपालैरपरैःसह प्लुत्वालंघयंतोवैतेन्योन्यंलघुविक्रमाः २० श्रीदामानमज-
यत्कृष्णःप्रलंबंरौहिणीसुतः गोपालैःकृष्णपक्षीयैर्गोपालास्त्वपरेजिताः २१ तेवाहयंतस्त्वन्योन्यंसंहर्षात्सहसाद्रुताः भांडीर-
स्कंधमुद्दिश्यमर्यादांपुनरागमन् २२ संकर्षणंतुस्कंधेनशीघ्रमुत्क्षिप्यदानवः द्रुतंजगामविमुखःसचंद्रइवतोयदः २३ सभारम-
सहस्तस्यरौहिणेयस्यधीमतः ववृधेसुमहाकायश्शक्राक्रांतइवांबुदः २४ सभांडीरवटप्रख्यंदग्धांजनगिरिप्रभम् स्वंवपुर्दर्शया-
मासप्रलंबोदानवोत्तमः २५ पंचस्तबकयुक्तेनमुकुटेनार्कवर्चसा दीप्यमानाननोदैत्यःसूर्याक्रांतइवांबुदः २६ महाननोमहा-
ग्रीवःस्कमहानतकोपमः रौद्रःशकटचक्राक्षोनामयंश्चरणैर्महीम् २७ स्रग्दामलंबाभरणःप्रलंबांबरभूषणः वीरःप्रलंबःप्रययौ
लंबतोयइवांबुदः २८ सजहाराथवेगेनरौहिणेयंमहासुरः सागरोपप्लवगतःकृत्स्नंलोकमिवांतकः २९ ह्रियमाणःप्रलंबेनसतु
संकर्षणोबभौ उह्यमानइवाकाशेकालमेघेनचंद्रमाः ३०

वचनं अत्युच्छ्रितान्प्रलंबादीन् बहुत्वंविभूत्यर्थे इंद्रियायतद्वधेनस्ववीर्यंप्रदर्शयितुंपवते
गच्छति किमस्यायुधंतदाह विश्वाइति सर्वाःक्षितयःनाशसाधनान्यायुधानिअस्यहस्ते एवंसंतिअतोमुष्टिमात्रेणतंजघानेत्यर्थः विष्णोःसर्वदेवतामयत्वादत्र- १५
सोमरूपेणैवास्यस्तुतिर्बोद्धव्या एवमन्यत्रापि श्लोकार्थःस्पष्टः १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

देहावेशात्प्रमाद्यतीतिन्यायेन सूत्रांशोपि शमोस्मुमोहेत्याह ससंदिग्धमिति ३१ ३२ ३३ श्रीकृष्णास्तेनं पूर्वरूपस्मरणेन प्रबोधयतीत्याह तमाहेत्यादिना ३४
३५ ३६ ३७ अस्यैवसूत्रात्मत्वं विवृणोति शिरःखंइत्यादिना ३८ ३९ प्राणस्यप्राणमुतचक्षुषश्चक्षुरित्यादिश्रुतिप्रसिद्धंशुद्धंब्रह्मापित्वमेवासीत्याहयत्त्वयेति

ससंदिग्धमिवात्मानंमेनेसंकर्षणस्तदा दैत्यस्कंधगतःश्रीमान्कृष्णंचेदमुवाचह ३१ ह्रियेहंकृष्णदैत्येन पर्वतोदग्रवर्ष्मणा॥ प्रदर्शयि
त्वामहतीमायामानुषरूपिणीम् ३२ कथमस्यमयाकार्यंशासनंदुष्टचेतसः प्रलंबस्यप्रवृद्धस्यदर्पाद्द्विगुणवर्चसः ३३ तमाहस-
स्मितःकृष्णःसाम्नाहर्षकुलेनच अभिज्ञोरौहिणेयस्यवृत्तस्यचबलस्यच ३४ अहोयंमानुषोभावोव्यक्तमेवानुपाल्यते यस्त्वंजग
न्मयदेवगुह्याद्गुह्यतरंगतः ३५ स्मरनारायणात्मानंलोकानांत्वंविपर्यये अवगच्छात्मनात्मानंसमुद्राणांसमागमे ३६ पुरात-
नानांदेवानांब्रह्मणःसलिलस्य आत्मवृत्तप्रभावाणांसंस्मराद्यंचवैपुनः ३७ शिरःखंतेजलंमूर्त्तिःक्षमाभूर्दहनोमुखम् वायुर्लो
कायुरुच्छ्वासोमनःस्रष्टात्वमभूत्तव ३८ सहस्रास्यःसहस्रांगःसहस्रचरणेक्षणः सहस्रपद्मनाभस्त्वंसहस्रांशुधरोरिहा ३९
यत्त्वयादर्शितंलोकेतत्पश्यंतिदिवौकसः यत्त्वयानोक्तपूर्वंहिकस्तदन्वेष्टुमर्हति ४० यद्वेदितव्यंलोकेस्मिन्तत्त्वयासमुदाहृत
म् विदितंयत्तवैकस्यदेवाअपिनतद्विदुः ४१ आत्मजंतेवपुर्व्योम्निनपश्यंत्यात्मसंभवम् यत्तुतेकृत्रिमंरूपंतदर्चंतिदिवौकसः
४२ देवैर्नदृष्टश्चांतस्तेतेनानंतइतिस्मृतः त्वंहिसूक्ष्मोमहानेकःसूक्ष्मैरपिदुरासदः ४३ त्वय्येकजगतःस्तंभेशाश्वतोजगती
स्थिता अचलाप्राणिनांयोनिर्धारयत्यखिलंजगत् ४४ चतुःसागरयोनिस्त्वंचातुर्वर्ण्यविभागवित् चतुर्युगेशोलोकानांचा
तुर्होत्रफलाशनः ४५ यथाहमपिलोकानांतथात्वंतच्चमेमतम् उभावेकशरीरौस्वोजगदर्थेद्विधाकृतौ ४६ लोकानांशाश्वतो
देवस्त्वंहिशेषःसनातनः आवयोर्देहमात्रेणद्विधेदंधार्यतेजगत् ४७ अहंयःसभवानेवयस्त्वंसोहंसनातनः द्वावेवविहितौत्वा-
वामेकदेहौमहाबलौ ४८ तदास्स्वेमूढवत्त्वंकिंप्राणेनजहिदानवम् मूर्ध्निदेवरिपुंदेववज्रकल्पेनमुष्टिना ४९ वैशंपायनउवा
च संस्मारितस्तुकृष्णेनरौहिणेयःपुरातनम् बलेनापूर्यततदात्रैलोक्यांतरचारिणा ५० ततःप्रलंबदुर्वृत्तंबुबुधेसमहाभु
जः मुष्टिनावज्रकल्पेनमूर्ध्निचैनंसमाहनत् ५१ तस्योत्तमांगस्वेकायेविकपालंविवेशह जानुभ्यांचाहतःशेतेगतासुर्दानवोत्तमः ५२

यत्त्वयानोक्तेत्यादिनास्यवेदकर्तृत्वमुक्तं ४० ४१ ४२ ४३ शेषरूपेणवर्णयतित्वय्येवेति ४४ ४५ यथेति अहं अंतर्यामीत्वंसूत्रात्मासर्वज्ञत्वादिकंद्वयोःसममेवेत्यर्थः ४६
४७ अत्यंतसाम्यलक्षणमभेदमाहअहमिति ४८ ४९ संस्मारितइति उक्तिमात्रेणबलदेववत्विशुद्धांतःकरणआत्मनोब्रह्मभावमावगच्छतीत्यर्थः ५० ५१ ५२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५३ ५४ ५५ ५६ ५७ ५८ ५९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांषोडशोऽध्यायः १६ ॥ तयोःप्रवृत्तयोरित्यध्यायद्वयं आया
वभिरहन्येभिरक्तुभिर्वरिष्टंवज्रमाजिघर्तिमायिनि शतंवायस्यप्रचरन्स्वेदमेसंवर्त्तयंतोविचवर्त्तयन्नहेति मंत्रस्योपबृंहणार्थं मंत्रार्थस्तु यस्यवज्रिणः
स्वेदमेस्वगृहेवायुर्वेंद्रोवांतरिक्षस्थानइत्युक्तेरंतरिक्षेशतंवाततोधिकंवासंवर्त्तयंतः संवर्त्तंप्रलयंकुर्वंतःसांवर्त्तकानामसेघाःप्रचरन् प्राचरन्संचारंकृतवंतः सःमायिनि
मायामनुष्येश्रीकृष्णेवरिष्ठंश्रेष्ठतमंवज्रंअशनिंअहतौ महावृष्टिंआजिघर्तिक्षरति अक्तुभीरात्रिभिःसप्तभिरितिपुराणतःसप्तरात्रंवज्रधारेणपर्जन्येनववर्षेत्य-

जगत्यांविप्रकीर्णस्यतस्यरूपमभूत्तदा प्रलंबस्यांबरस्थस्यमेघस्येवविदीर्यतः ५३ तस्यभग्नोत्तमांगस्यदेहात्सुस्रावशोणितम् ब
हुगैरिकसंयुक्तंशैलशृंगादिवोदकम् ५४ सन्निहत्यप्रलंबंतुसंहत्यबलमात्मनः पर्यष्वजतवैकृष्णंरौहिणेयःप्रतापवान् ५५ तं
तुकृष्णश्चगोपाश्चदिविस्थाश्चदिवौकसः तुष्टुवुर्निहतेदैत्येजयाशीभिर्महाबलम् ५६ बलेनायंहतोदैत्योबालेनाक्लिष्टकर्मणा
विवदंत्यशरीरिण्योवाचःस्फुरसमीरिताः ५७ बलदेवेतिनामास्यदेवैरुक्तंदिविस्थितैः बलंतुबलदेवस्यतदाभुविजनाविदुः ५८
प्रलंबेनिहतेदैत्येदेवैरपिदुरासदे ५९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिशिशुचर्यायांप्रलंबवधोनामषोडशोऽध्या
यः १६ वैशंपायनउवाच तयोःप्रवृत्तयोरेवंकृष्णस्यचबलस्यच वनेविचरतोर्मासौव्यतियातौस्मवार्षिकौ १ व्रजमाज-
ग्मतुस्तौतुव्रजेशुश्रुवतुस्तदा प्राप्तंशक्रमहंवीरौगोपांश्चोत्सवलालसान् २ कौतूहलादिदंवाक्यंकृष्णःप्रोवाचतत्रतान् कोयं
शक्रमहोनामयेनवोहर्षआगतः ३ तत्रवृद्धतमस्त्वेकोगोपोवाक्यमुवाचह श्रूयतांतातशक्रस्ययदर्थंध्वजइज्यते ४ देवाना
मीश्वरःशक्रोमेघानांचारिसूदन तस्यचायंमखःकृष्णलोकनाथस्यशाश्वतः ५ तेनसंचोदितामेघास्तस्यचायुधभूषिताः त
स्यैवाज्ञाकराःसस्यंजनयंतिनवांबुभिः ६ मेघस्यपयसोदातापुरुहूतःपुरंदरः संप्रहृष्टःसभगवान्प्रीणयत्यखिलंजगत्
७ तेनसंपादितंसस्यंवयमन्येचमानवाः महोत्सवंप्रयुंजानातर्पयामश्चदेवताः ८ देवेवर्षतिलोकेस्मिन्ततःसस्यंप्रवर्ध
ते पृथिव्यांतर्पितायांतुसामृतंलक्ष्यतेजगत् ९

र्थः तत्रहेतुमाह आयावभिरहन्येभिरितिग्रावभिरितिसमुदायिभिः यावसमुदायःशिलोच्चयोलक्ष्यते
तैःअहन्येभिःअहःकर्तुमर्हंति तेऽहन्याःतैः पर्वतैःकर्तुमाजिसतोत्यर्थः मायीपुनःकिंचकारेत्यतआह विचवर्त्तयन्नहेति च अनंतरंमायीअहाकृ तून्विवर्त्तयन्वि
परितंवर्त्तयन्नास्तेइतिशेषः इंद्रयागार्थमाहृतैःसंभारैर्गिरियागंप्रवर्त्तयतिमायिनिइंद्रोमहतींवृष्टिंचकारेत्यर्थः तयोःप्रवृत्तयोःतयोःप्रवृत्तमानयोः व्यतियातौ १६
व्यतिक्रांतौ १ व्रजंगोपसमाजंशक्रमहंइंद्रोत्सवं २ ३ ४ शाश्वतःकुलपरंपरागतः ५ ६ मेघस्यमेघसंबंधिनः ७ सस्यंधान्यंवर्त्तयामोजीवामः उपयुंजानाःभक्ष
यंतःसंधिरार्षः ८ सामृतंसजलं ९ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सपुंगवाः सवृषाः १० ११ दुदोहेतिगाः सूर्यरश्मीन् पयस्विनीरितिरश्मीलंल्लोकात् अयमर्थः अथास्माकंजठराग्निः प्राणसहायोजलंशोषयतितच्चास्माभिर्ब-
लसाध्येकर्मणिक्रियमाणेरोमकूपद्वाराप्रस्वेदरूपेणवमति एवंवायुसहायः सूर्यः भूम्यादिगतंजलंशोषयति तच्चंद्रेणबलसाध्येनिरंतरभ्रमिरूपेकर्मणिप्रयुक्तः
सन्नकिरणद्वाराचर्मकोशरूपेषुमेघेषुवमति ततस्तान्मेघानिंद्रोभिंदन्वृष्टिंप्रवर्त्तयतीति १२ १३ १४ १५ १६ १७ पयोजलं गोभिः रश्मिभिः पर्जन्यइंद्रः
१८ शक्रस्यविभाविनी पूजयित्री पूजाकालइत्यर्थः महैःउत्सवैः १९ इतिश्रीहरिवंशेविष्णुपर्वणिटीकायांसप्तदशोऽध्यायः १७ गोपवृद्धस्यवचनंश्रुत्वाशक्रप

क्षीरवत्यस्त्विमागावोवत्सवत्यश्चनिर्वृताः तेनसंवर्द्धितागावस्तृणैःपुष्टाःसपुंगवाः १० नासस्यानातृणाभूमिर्नबुभुक्षार्दितोजनः
दृश्यतेयत्रदृश्यन्तेवृष्टिमन्तोबलाहकाः ११ दुदोहसवितुर्गावःशक्रोदिव्याःपयस्विनीः ताःक्षरंतिनवंक्षीरंमेध्यंमेघौघधारितम् १२
वाय्वीरितंतुमेघेषुकरोतिनिनदंमहत् जवेनावर्तितंचैवगर्जतीतिजनाविदुः १३ तस्यचैवोह्यमानस्यवायुयुक्तैर्बलाहकैः वज्राशनि
समाःशब्दाःश्रूयन्तेनगभेदिनः १४ तज्जलंवज्रनिष्पेषैर्विमुंचतिनभोगतः बहुभिःकामगैर्मेघैःशक्रोभृत्यैरिवेश्वरः १५ क्वचिद्दुर्दिनसं-
काशैःक्वचिच्छिन्नाभ्रसंनिभैः क्वचिद्भिन्नांजनाकारैःक्वचिच्छीकरवर्षिभिः १६ मंडयत्येवदेवेंद्रोविश्वमंबुदभोधनैः क्वचिच्छीकर
मुक्ताभंकुरुतेगगनंघनैः १७ एवमेतत्पयोदुग्धंगोभिःसूर्यस्यवारिदः पर्जन्यःसर्वभूतानांभवायभुविवर्षति॥ १८ यस्मात्प्रावृडियं
कृष्णाशक्रस्यतुविभाविनी तस्मात्प्रावृषिराजानःसर्वेशक्रंमुदायुताः महैःसुरेशमर्चंतिवयमन्येचमानवाः १९ इतिश्रीमहाभारते
खिलेषुहरिवंशेविष्णुपर्वणिशिशुचर्यायांघोषयात्रानामसप्तदशोऽध्यायः १७ वैशंपायनउवाच गोपवृद्धस्यवचनंश्रुत्वा
शक्रपरिग्रहे प्रभावज्ञोपिशक्रस्यवाक्यंदामोदरोब्रवीत् १ वयंवनचरागोपाःसदागोधनजीविनः गावोस्मद्दैवतंविद्धिगिरयश्चव
नानिच २ कर्षुकाणांकृषिर्वृत्तिःपण्यंविपणिजीविनाम् गावोस्माकंपरावृत्तिरेतत्त्रैविद्यमुच्यते ३ विद्ययायोययायुक्तस्तस्यसादैवत
परम् सैवपूज्यार्चनीयाचसैवतस्योपकारिणी योन्यस्यफलमश्नानःकरोत्यन्यस्यसत्क्रियाम् ४ द्वावनर्थौसलभतेप्रेत्यचेहचमान
वः कृष्यंतावधिताःसीमासीमांतप्रथितंवनम् ५ वनांतागिरयःसर्वेसाचास्माकंगतिर्ध्रुवा श्रूयंतेगिरयश्चापिवनेस्मिन्कामरूपिणः
प्रविश्यतास्तास्तनवोरमंतेस्वेषुसानुषु ६ भूत्वाकेसरिणःसिंहाव्याघ्राश्चनखिनांवराः वनानिस्वानिरक्षंतित्रासयंतोवनच्छिदः ७य
दात्वेषांविकुर्वंतितेवनालयजीविनः घ्नंतितानेवदुर्वृत्तान्पौरुषादेनकर्मणा ८

रिग्रहेइंद्रमहोत्सवस्वीकारे १ २ पण्यंविक्रेयंद्रव्यंविपणिजीवानांवणि
जांत्रैविद्यंवार्त्तरूपायाःविद्यायाःभेदत्रयं ३।।विद्ययावार्त्तया ४ ५ तनवस्तनूः ६ ७ एषांवनानांविकुर्वंतिविकारंजनयंतिवनालयाःभिल्लाद्याःवनजीविनोगोपरक्षाद्याः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ ह॰ टी॰ ९ कर्मस्वस्तिवाचनादिकंसुरवस्थानेपादपादिसन्निधौसमेदेशे १० वितत्यकुंडमंडपादिकंविस्तार्यक्रियतांएकत्रेतिशेषः ११ १२ प्रमुदिताप्रमुदितजनत्वात् अ॰ ५
१७ १३ प्रियकैः कदंबभेदैः बाणासनैः झिंटीगुच्छैः निर्मयूररुतंवर्षापगमात् १४ बलाकेवबलाकाआकस्मिकपाताऽशनिः तद्रहिताविबलाकाः १५ १६ साभि १८ २
षेकमिवपट्टाभिषिक्तनृपतितुल्यं १७ १८ १९ अभ्युत्स्मयंतिगर्वमाविष्कुर्वंति बहुत्वमार्षं २० कलमापक्कपांडुषुधान्यमंजरीपाकपिंगेषु निर्विष्टाः कृतविवा

मंत्रयज्ञपराविप्राःसीतायज्ञाश्चकर्षकाः गिरियज्ञास्तथागोपा इज्योस्माभिर्गिरिर्वने ९ तन्महांश्रोच्यतेगोपाःगिरियज्ञःप्रवर्त्ततामू क
र्मकृत्वासुरवस्थानेपादपेष्वथवागिरौ १० तत्रहत्वापशून्मेध्यान्वितत्यायतनेशुभे सर्वघोषस्यसंदोहःक्रियतांकिंविचार्यते ११ तंश
रत्कुसुमापीडाःपरिवार्यप्रदक्षिणाम् गावोगिरिंवरंसर्वा स्ततोयातुपुनर्व्रजम् १२ प्राप्ताकिलेयंहिगवांस्वादुतोयतृणागुणैः शरत्प्रमु
दितारम्यागतमेघजलाशया १३ प्रियकैःपुष्पितैर्गौरंश्यामबाणासनैःक्वचित् कठोरतृणमाभातिनिर्मयूररुतंवनम् १४ विजलाविं
मलाव्योम्निविबलाकाविविद्युतः विवर्द्धतेजलधरा विदंताइवकुंजराः १५ पटुनामेघनादेननवतोयानुकर्षिणा पर्णोत्करघनाःसर्वे
प्रसादंयांतिपादपाः १६ सितवर्णांबुदोष्णीषंहंसचामरवीजितम् पूर्णचंद्रामलच्छत्रंसाभिषेकमिवांबरम् १७ हंसैःप्रहसितानीव
समुत्कृष्टानिसारसैः सर्वाणितनुतांयांतिजलानिजलदक्षये १८ चक्रवाकस्तनतटाःपुलिनश्रोणिमंडलाः हंसलक्षणहासिन्यःपति
यांतिसमुद्रगाः १९ कुमुदोत्फुल्लमुदकंताराभिश्चित्रमंबरम् सममभ्युत्स्मयंतीवशर्वरीषुतरेतरम् २० मत्तक्रौंचावघुष्टेषुकलमाप
क्कपांडुषु निर्विष्टरमणीयेषुवनेषुरमतेमनः २१ पुष्करिण्यस्तडागानिवाप्यश्चविकचोत्पलाः केदाराःसरितश्चैवसरांसिचश्रियाः
ज्वलन् २२ पंकजानिचताम्राणितथान्यानिसितान्यपि उत्पलानिचनीलानिभेजिरेवारिजाश्रियम् २३ मदंजहुःसितापांगाःमंदव
वृधिरेनिलाः अभवद्यभ्रमाकाशमभूच्चनिभृतोर्णवः २४ ऋतुपर्यायशिथिलैर्वृत्तनृत्यसमुज्झितैः मयूरांगरुहैर्भूमिर्बहुनेत्रेवल
क्ष्यते २५ स्वपंकमलिनैस्तीरैःकाशपुष्पलताकुलैः हंससारसविन्यासैर्यमुनाभातिशोभना २६ कलमापाकरम्येषुकेदारेषुव-
नेषुच सस्यादाजलजादाश्चमत्ताविरुरुवुःखगाः २७ सिषिचुर्यानिजलदाजलेनजलदागमे तानिसस्यान्यबालानिकाठिन
त्वंगतानिवै २८ त्यक्त्वामेघमयंवासःशरद्गुणविदीपितः एषवैविमलेव्योम्निहृष्टश्चैवसतिचंद्रमाः २९ क्षीरिण्योद्विगुणंगावः
प्रमत्ताद्विगुणंवृषाः वनानांद्विगुणालक्ष्मीःसस्यैर्गुणवतीमही ३०

हा स्तद्वद्रमणीयेषुक्रौंचपुरुषयोःधान्योःवरावरांगनयोश्चसाम्यं २१ २२ १७
२३ सितापांगाःमयूराःनिभृतःपूर्णः २४ ऋतुपर्यायोवर्षापगमस्तेनशिथिलैः वृत्तंसमाप्तं यन्नृत्यंतदासमुज्झितैः २५ विन्यासैःउपवेशनस्थलैः २६ जलजादाः
मत्स्याशिनः २७ २८ २९ ३०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३१ विशोषयन् रसानितिशेषः ३२ ३३ बंधुजीवैः रक्तपुष्पैः अभितः ताम्रासु लोहितासु ३४ ३५ इषुसाह्वाः बाणासनाः निकुंभाः दंतिविपटाः स्वर्णकाः स्वर्णाः पुष्पिताः इति पूर्वेणान्वयः सृमराः मृगविशेषाः तेषां शरद्दिदर्शनात् पेचुकाः घूकाः इति केचित् ३६ ३७ ३८ ३९ ४० ४१ सावतंसैः समुकुटैः बर्हा

ज्योतींषि घनमुक्तानि पद्मवंतिजलानि च मनांसि च मनुष्याणां प्रसादमुपयांति वै ३१ असृजत्सविता व्योम्नि निर्मुक्तो जलदैर्भृशम् शरत्प्रज्वलिततेजस्तीक्ष्णरश्मिर्विशोषयन् ३२ नीराजयित्वा सैन्यानि प्रयांति विजिगीषवः अन्योन्यराष्ट्राभिमुखाः पार्थिवाः पृथिवीक्षितः ३३ बंधुजीवाभिताम्रासु बद्धपंकवतीषु च मनस्तिष्ठति कांतासु चित्राख्यवनराजिषु ३४ वनेषु च विराजंते पादपा वनशोभिनः असनाः सप्तपर्णाश्च कोविदाराश्च पुष्पिताः ३५ इषुसाह्वा निकुंभाश्च प्रियकाः स्वर्णकास्तथा सृमराः पेचुकाश्चैव केतक्यश्च समंततः ३६ व्रजेषु च विशेषेण गर्गरोद्गाररहासिषु शरत्प्रकाशयोषेव गोष्ठे घटतिरूपिणी ॥ ३७ नूनं त्रिदशभूयिष्ठ मेघकालसुखोषितम् पतत्रिकेतनं देवं बोधयंति दिवौकसः ३८ शरद्येव सुसस्यायां माद्यायां प्रावृषः क्षये नीलचंद्रार्कवर्णैश्च रचितं बहुभिर्द्विजैः ३९ फलैः प्रवालैश्च घनमिंद्रचापघनोपमम् भवनाकारविटपं लतापरमसंडितम् ४० विशालमूलावततं पवनाभोगमंडितम् अर्चयामो गिरिं देवं गाश्चैव च विशेषतः ४१ सावतंसैर्विषाणैश्च बर्हापीडैश्च दर्शितैः घंटाभिश्च प्रलंबाभिः पुष्पैः शारदिकैस्तथा ४२ शिवाय गावः पूज्यंतां गिरियज्ञः प्रवर्त्यताम् पूज्यतां त्रिदशैः शक्रो गिरिरस्माभिरिज्यताम् ४३ कारयिष्यामि गोयज्ञं बलादपि न संशयः यद्यस्ति मयि वः प्रीतिर्यदि वा सुहृदो वयम् ४४ गावो हि पूज्याः सततं सर्वेषां नात्र संशयः यदि साम्ना भवत्वीति भवतां वै भवाय च एतन्मम वचस्तथ्यं क्रियतामविचारितम् ४५ इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि षोडशोऽध्यायः १६ वैशंपायन उवाच दामोदरवचः श्रुत्वा हृष्टास्ते गोषु जीविनः तद्वागमृतमश्नानाः प्रत्यूचुरविशंकया १ तवैषा बालमहती गोपानां हर्षवर्द्धनी प्रणयत्येव नः सर्वान् बुद्धिर्वृद्धिकरी नृणाम् २ त्वं गतिस्त्वं रतिश्चैव त्वं वेत्ता त्वं परायणम् भयेष्वभयदस्त्वं नस्त्वमेव सुहृदां सुहृत् ३ त्वत्कृते कृष्ण घोषोयं क्षेमी मुदितगोकुलः कृत्स्नो वसति शांतारिर्यथा स्वर्गगतस्तथा ४ जन्मप्रभृति कर्मैतद्दैवैरस्कुकरं भुवि बोद्धव्यात्त्वाभिमानाच्च विस्मितानि मनांसि नः ५

पीडैः मयूरपत्रभूषाभिस्तथैव शृंगेषु दर्शितैर्बद्धैः ४२ ४३ ४४ ४५ इति हरिवंशे विष्णुप० टी० षोडशोऽध्यायः १६ अविशंकया इंद्रात् भयं अशंकमाना इत्यर्थः १ २ अशंकायां बीजमाहुस्त्वमिति परायणं आश्रयः ३ यथा स्वर्गगतः स्वर्गस्थ इव ४ एतत् शकटभंगादिकर्म दुःष्वेति शेषः बोद्धव्यात् द्रष्टुयोग्यात्त्वाभिमानादहंकारादहंकारयिष्यामि गोयज्ञं बलादेतन्न संशय इत्येवंरूपात् एकश्चकारः पादपूरणार्थः ५ ६ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६ ७ ८ तेनत्वयातुल्यः शक्तिधरः कार्त्तिकेयः ९ १० त्वत्प्रणीतस्त्वयाप्रवर्तितः ११ १२ नद्यःकथामय्योदीर्घकुल्याः द्रोण्यस्ताहृशानिकुंडानि १३ संदोहः पयआदिः गृह्यतांनतुविक्रेयः १४ १५ १६ दध्नोह्रदः घृतावर्त्तः साररूपेण घृतंपयोपर्यावर्त्ततेसतथा १७ प्रभूतश्चासौ आढ्यश्चप्रभूतान्संस्कारकद्रव्यसंयुक्तश्चयस्मिन्नित्यर्थः १८ १९ अधिश्रुतानिवन्हिस्थानिचरुस्थाल्यादीनिपर्यतानिसमीपे आसादितानियस्मिन् २० २१ २२ २३ प्रधानतः मुख्यास्त्

बलेनचपरार्ध्येनयशसाविक्रमेणच उत्तमस्त्वंचमर्त्येषुदेवेष्विवपुरंदरः ६ प्रतापेनचतीक्ष्णेनदीप्त्यापूर्णतयापिच उत्तमस्त्वंचमर्त्येषु देवेष्विवदिवाकरः ७ कान्त्यालक्ष्म्याप्रसादेनवदनेनस्मितेनच उत्तमस्त्वंचमर्त्येषुदेवेष्विवनिशाकरः ८ बलेनवपुषाचैवबाल्येनचरितेनच स्यात्तेशक्तिधरस्तुल्योनतुकश्चनमानुषः ९ यत्त्वयाभिहितंवाक्यंगिरियज्ञंप्रतिप्रभो कस्तच्छ्रयितुंशक्तोवेलामिवमहोदधेः १० स्थितःशक्रमहस्तातश्रीमान्गिरिमहस्त्वयम् त्वत्प्रणीतोद्यगोपानांगवांहेतोःप्रवर्त्यताम् ११ भोजनान्युपकल्प्यंतां पयसःपेशलानिच कुंभाश्चविनिवेश्यंतामुदपानेषुशोभनाः १२ पूर्यंतांपयसानद्योद्रोण्यश्चविपुलायताः भक्ष्यंभोज्यंचपेयंचतत्सर्वमुपनीयताम् १३ भाजनानिचमांसस्यन्यस्यंतामोदनस्यच त्रिरात्रंचैवसंदोहःसर्वघोषस्यगृह्यताम् १४ विहन्यंतांचपशवोभोज्यायेमहिषादयः प्रवर्त्यतांचयज्ञोयंसर्वगोपसमाकुलः १५ आनंदजननोघोषोमहान्मुदितगोकुलः तूर्यप्रणादघोषैश्चवृषभाणांचगर्जितैः १६ हंभारवैश्चवत्सानांगोपानांहर्षवर्द्धनः दध्नोह्रदोघृतावर्त्तःपयःकुल्यासमाकुलः १७ मांसराशिःप्रभूताढ्यःप्रकाशौदनपर्वतः संप्रावर्त्ततयज्ञोस्यगिरेर्गोभिःसमाकुलः १८ तुष्टगोपसमाकीर्णोगोपनारीमनोहरः अथाधिश्रुतपर्यंतेसंप्राप्तेयज्ञसंविधौ १९ यज्ञंगिरेस्तथाचक्रुर्गोपाद्विजैःसह २० यजनांतेतदन्नंतुतत्पयोदधिचोत्तमम् मांसंचमाययाकृष्णोगिरिर्भूत्वासमश्नुते २१ तर्पितांश्चापिविप्रांश्चास्तुष्टाःसंपूर्णमानसाः उत्तस्थुःप्रीतमनसःस्वस्तिवाच्ययथासुखम् २२ भुक्त्वाचावभृथेकृष्णःपयःपीत्वाचकामतः संतृप्तोस्मीतिदिव्येनरूपेणप्रजहाससवै २३ तंगोपाःपर्वताकारंदिव्यस्रगनुलेपनम् गिरिमूर्ध्निस्थितंदृष्ट्वाकृष्णंजग्मुःप्रधानतः २४ भगवानपितेनैवरूपेणाच्छादितःप्रभुः सहितैःप्रणतोगोपैर्ववंदात्मानमात्मना २५ तमूचुर्विस्मितागोपादेवंगिरिवरेस्थितम् भगवंस्त्वद्वशेयुक्तादासाःकिंकुर्मकिंकराः २६ सउवाचततोगोपान्गिरिःप्रभवयागिरा अद्यप्रभृतिचेज्योहंगोषुयद्यस्तिवोदया २७ अहंवःप्रथमोदेवःसर्वकामकरःशुभः ममप्रभावाच्चगवामयुतान्येवभोक्ष्यथ २८ शिवश्चवोभविष्यामिमद्भक्तानांवनेवने रंस्येचसहयुष्माभिर्यथादिविगतस्तथा २९ १८

त्वज्ञाः जग्मुःशरणमितिशेषः २४ २५ तंगिरिशिखरस्थं २६ २७ २८ २९ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३० पर्याप्लुवंतुप्रदक्षिणंकुर्वंतु ३१ ३२ सापीडाः सशिरोभूषणाः ताम्रताः स्तबकांगदाः पुष्पगुच्छाकाराणि बाहुभूषणानियासांताः स्रजश्च आपीडाः शृंगाग्र-
भूषणानितैश्चसहितानिसस्रजापीडानिशृंगाग्राणियासांताः ३३ कालयंतोनियमयंतः धनानिगोधनानि भक्तिच्छेदैर्विभागभेदैः अनुलिप्तांगाः नानावर्णैरनुले
पितानिपृथक्पृथगंगानियैस्तादृशाइत्यर्थः ३४ प्रहरणावृतैः सायुधैः मयूरपत्राणांवृतानिमस्यपंक्तयःतेषां ३५ ३६ ३७ ३८ ३९ इतिहरिवंशेविष्णुपर्वणि
टीकायांसप्तदशोऽध्यायः १७ महेप्रतिहतेशक्र इत्यध्याये नमस्यराजावरुणस्तमश्विनाक्रतुसचंतमारुतस्यवेधसः दाधारदक्षमुत्तममहर्विदंव्रजंचविष्णुः सखिवाँअ

येचेमेप्रथितागोपानंदगोपपुरोगमाः एषांप्रीतःप्रयच्छामिगोपानांविपुलंधनम् ३० पर्याप्लुवंतुक्षिप्रंमांगावोवत्ससमाकुलाः एवंमम
परामीतिर्भविष्यतिनसंशयः ३१ ततोनीराजनार्थंहिवृंदशोगोकुलानितम् परिवव्रुर्गिरिवरंसवृषाणिसमंततः ३२ तागावःप्रद्रुताहृष्टाः
सापीडस्तबकांगदाः सस्रजापीडशृंगाग्राःशतशोथसहस्रशः ३३ अनुजग्मुश्चगोपालाःकालयंतोधनानिच भक्तिच्छेदानुलिप्तांगारक्त
पीतसितांबराः ३४ मयूरचित्रांगदिनोभुजैःप्रहरणावृतैः मयूरपत्रवृतानांकेशबंधैःसुयोजितैः ३५ बभ्राजुरधिकंगोपाःसमवायेतदाद्भु-
ते अन्येवृषानारुरुहुर्नृत्यंतिस्मापरेमुदा ३६ गोपालास्त्वपरेगाश्चजगृहुर्वेगगामिनः तस्मिन्पर्यायनिर्वृत्तेगवांनीराजनोत्सवे ३७ अंत
र्धानंजगामाशुतेनदेहेनसोचलः कृष्णोपिगोपसहितोविवेशव्रजमेवह ३८ गिरियज्ञप्रवृत्तेनतेनाश्चर्येणविस्मिताः गोपाःसबालवृद्धावै
तुष्टुवुर्मधुसूदनम् ३९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणि गिरियज्ञप्रवर्त्तननामसप्तदशोऽध्यायः १७ वैशंपायनउवा
च महेप्रतिहतेशक्रःसक्रोधस्त्रिदशेश्वरः संवर्त्तकंनामगणंतोयदानामथाब्रवीत् १ भोबलाहकमातंगाःश्रूयतांममभाषितम् य
दिवोमत्प्रियंकार्यंराजभक्तिपुरस्कृत २ एतेवृंदावनगतादामोदरपरायणाः नंदगोपादयोगोपाविद्विषंतिममोत्सवम् ३ आजीवोयःप
रस्तेषांगोपत्वंचयतःस्मृतम् तागावःसप्तरात्रेणपीड्यंतांवर्षमारुतैः ४ ऐरावतगतश्चाहंस्वयमेवांबुदारुणम् स्रक्ष्यामिवृष्टिंवातंचव-
ज्राशनिसमप्रभम् ५ भवद्भिश्चंडवर्षेणचरतामरुतेनच हतास्ताःसव्रजागावस्त्यक्ष्यंतिभुविजीवितम् ६ एवमाज्ञापयामाससर्वान्
जलधरान्प्रभुः प्रत्याहतेवैकृष्णेनशासनेपाकशासनः ७ ततस्तेजलदाःकृष्णाघोरनादाभयावहाः आकाशंछादयामासुःसर्वतःपर्व-
तोपमाः ८ विद्युत्संपातजननाःशक्रचापविभूषिताः तिमिरावृतमाकाशंचक्रुस्तेजलदास्तदा ९

पोर्णुतेइत्येनंमंत्रमुपबृंहयति मंत्रार्थस्तु अ
स्यविष्णोस्तंपर्वतार्थं कृतंस्वंस्वेनसंपादितंक्रतुंयज्ञंवरुणोऽश्विनौचसचंत अन्वमोदंत मारुतस्यवायोरपिवेधसः स्रष्टुः ततश्चस्वमखभंगेकृते इंद्रेकुपितेसतिविष्णुःउ-
त्तमंश्रेष्ठंदक्षंवृष्टिनिवारणक्षमंअहर्विदंक्रतोर्लब्धारंपर्वतंदाधारदधारधृतवान् यतःसखिवान्महान्व्रजास्यसखिसमुदायवान् व्रजंअपोर्णुतेतेनाहर्विदाशैलेनआ
च्छादयतीति १ २ ३ ४ ५ ६ ७ ८ ९ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१० दुर्दिनंदुःस्थंदिनम् ११ नृहस्तनागहस्ताभ्यांतुल्यरूपाभिर्धाराभिरितिसंबंधः १२ दुर्दिनंमेघछन्नमहः १३ १४ नष्टसूर्येंदुः कल्पांतः तत्कालसदृशौः १५
खंकृष्णारात्रौइतिशेषः १६ तोयमयीसरसी १७ तोककल्परुताः अत्यल्पशब्दाः प्लवगाः प्रवाहेणगच्छंतितेतीररुहादयः संप्लवंप्रवाहं १८ १९ २० विशेषेणप्रहृ-

गजाइवान्यसंयुक्ताः केचिन्मकरवर्चसः नागाइवान्येगगनेचेरुर्जलदपुंगवाः १० तेन्योन्यंवपुषाबद्धानागयूथास्तुतोपमाः दुर्दिनंविपु
लंचक्रुश्छादयंतोनभस्तलम् ११ नृहस्तनागहस्ताभ्यांवेणूनांचैवसर्वतः धाराभिस्तुल्यरूपाभिर्ववृषुस्तेबलाहकाः १२ समुद्रमि
वेतदाखमारूढनृचक्षुषः दुर्विगाह्यमपर्यंतमगाधंदुर्दिनंमहत् १३ नैवापतन्खेखगमादुद्रुवुर्मृगजातयः पर्वताभेषुमेघेषुखेन
दत्सुसमंततः १४ नष्टसूर्येंदुसदृशेमेघेर्नभसिदारुणैः अतिवृष्टेनलोकस्यविरूपमभवद्वपुः १५ मेघौघनिष्प्रभाकारमदृश्यग्र
हतारकम् चंद्रसूर्यांशुरहितंखंबभूवातिनिष्प्रभम् १६ वारिणामेघमुक्तेनमुच्यमानेनचासकृत् आबभौसर्वतस्तत्रभूमिस्तोय
मयीयथा १७ विनदुर्बर्हिणस्तत्रतोककल्परुताःखगाः विवृद्धिंनिम्नगायाताः प्लवगाःसंप्लवंगताः १८ गर्जितेनचमेघानांपर्जन्यनि
नदेनच तर्जितानीवकंपंतेतृणानितरुभिःसह १९ प्राप्तोंतकालोलोकानांव्यक्तमेकार्णवामही इतिगोपगणावाक्यंव्याहरतिभया
र्दिताः २० तेनोत्पातांबुवर्षेणगावोविप्रहताभृशम् हंभारवैःक्रंदमानाश्चेलुस्तंभितोपमाः २१ निष्कंपसक्थिचरणानिष्प्रयत्नखु
राननाः हृष्टरोमार्द्रतनवःक्षामकुक्षिपयोधराः २२ काश्चित्प्राणाञ्जहुःश्रांतानिपेतुःकाश्चिदातुराः काश्चित्सवत्साःपतितागावःशी
करवर्जिताः २३ काश्चिदाक्रम्यक्रोडेनवत्सांस्तिष्ठंतिमातरः विमुखाःश्रांतसक्थ्यश्चनिराहाराःकृशोदराः २४ पेतुरार्ताविपन्नानागावो
वर्षपराजिताः वत्साश्चोन्मुखकाबाल्लादामोदरमुखाःस्थिताः २५त्राहीतिवदनैर्दीनैः कृष्णमूचुरिवार्दिताः २५ गवांतत्कदनंदृष्ट्वादु
र्दिनागमजंमहत् गोपांश्चासन्ननिधनान् कृष्णःकोपंसमादधे २६ संचिंतयित्वासरक्षोपायदृष्टोपायोमयेतिच आत्मानमात्मनावाक्यमि
दमूचेप्रियंवदः २७ अद्याहमिममुत्पाट्यसकाननवनंगिरिम् कल्पयेयगवांस्थानवर्षत्राणाययदुर्धरम् २८ अयंधृतोमयाशैलःपृथ्वी
गृहनिभोपमः त्रास्यतेसव्रजागावेमद्वश्यश्चभविष्यति २९ एवंसंचिंतयित्वातुकृष्णःसत्यपराक्रमः बाह्वोर्बलंदर्शयिष्यन्समीपंतम
हीधरम् ३० दोर्भ्यामुत्पाटयामासकृष्णोगिरिरिवापरः सधृतःसंगतोमेघैर्गिरिःसव्येनपाणिना गृहभावगतस्तत्रगृहाकारेणवर्चसा
३१ भूमेरुत्पाट्यमानस्यतस्यशैलस्यसानुषु शिलाःप्रशिथिलाश्चेलुर्विनिपेतुश्चपादपाः ३२

ताः विप्रहताः २१ हृष्टरोमाश्चता आर्द्रत १९
नवश्चताः २२ सीकरवेजिताः अंबुकणैश्चलितास्तेभ्योभीतावा २३ २४ २५ २६ २७ इमंगोवर्धनसंज्ञं २८ २९ ३० ३१ ३२ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अगमः पर्वतोऽचलोपिखगमः खगइवाभूदित्यर्थः ३३ ३४ ३५ सशैलोमेघैर्मिश्रीकृतः बर्हवान्मयूरः सइवभातीतियोजना ३६ आप्लुतः खउत्पतितः प
क्षैर्मेघरूपैरित्यर्थः ३७ शतोः गैरिकादिधातून् निर्वर्त्तयामासप्रावर्तयत् ३८ ३९ पुष्पंपुष्पजातिः ४० ४१ ४२ रेफः शब्दंचक्रुः गर्गराः मथनस्थाल्यः ४३

शिखरैर्घूर्णमानैश्चसीदमानैश्चपादपैः विधूतैश्चोच्छ्रितः शृंगैरगमः खगमोऽभवत् ३३ चलत्प्रस्रवणैः पार्श्वैर्मेघौघैरेकतांगतैः भि
द्यमानाश्मनिचयश्चचालधरणीधरः ३४ नमेघानाम्प्रघृष्टानांनशैलस्याश्मघर्षिणः विविदुस्तेजनारूपंवाय्वोस्तस्यचगर्जतः ३५ मेघैः
सशैलसस्थानैर्जलप्रस्रवणार्पितैः मिश्रीकृतइवाभातिगिरिरुद्दामबर्हवान् ३६ आप्लुतायगिरिः पक्षैरितिविद्याधरोरगाः गंधर्वाप्सर
सश्चैववाचोमुचुरितिसर्वशः ३७ सहस्रतलविन्यस्तोमुक्तमूलःक्षितेस्तदा शतोनिर्वर्तयामासकाञ्चनाञ्जनराजतीः ३८ कानिचिच्छि
थिलानीवसंछिन्नान्यूर्ध्वानिकानिचित् गिरेर्मेघप्रघृष्टानितस्यशृंगाणिचाभवन् ३९ गिरिणाकंपमानेनकंपितानांतुशाखिनाम् पुष्प
मुच्चावचंभूमौव्यशीर्यतसमंततः ४० निःसृताः पृथुमूर्द्धानः स्वस्तिकाङ्कविभूषिताः द्विजिह्वपतयःक्रुद्धाःखेचराःखसमंततः ४१ आ
र्तिजग्मुःखगगणाःवर्षेणचभयेनच उत्पत्योत्पत्यगगनात्पुनःपेतुरधोमुखाः ४२ रेफरारोषिताःसिंहाःसजलाइवतोयदाः गर्गराइव
मथ्यंतोनेदुःशार्दूलपुंगवाः ४३ विषमैश्चसमीभूतैःसमैश्चात्यंतदुर्गमैः व्यावृत्तदेहःसगिरिरन्यएवोपलक्ष्यते ४४ अतिवृष्टस्यते
मेघैस्तस्यरूपंबभूवह स्तंभितस्येवरुद्रेणत्रिपुरस्यविहायसि ४५ बाहुदंडेनकृष्णस्यविधृतस्यमहत्तदा नीलाभ्रपटलच्छन्नंतद्गि
रिच्छत्रमाबभौ ४६ स्वप्नायमानोजलदैर्निमीलितगुहामुखः बाहूपधानेकृष्णस्यप्रसुप्तइवसगिरिः ४७ निर्विहंगरुतैर्वृक्षैर्निर्म-
यूररुतैर्वनैः निरालंबइवाभातिगिरिःस्वशिखरैर्वृतः ४८ पर्यस्तैर्घूर्णमानैश्चप्रचलद्भिश्चसानुभिः सज्वराणीवशैलस्यवनानिशि
खराणिच ४९ उत्तमांगगतास्तस्यमेघाःपवनवाहनाः त्वर्यमाणामहेंद्रेणतोयमुमुचुरक्षयम् ५० सलंबमानःकृष्णस्यभुजाग्रे
सघनोगिरिः चक्रारूढइवाभातिदेशोनृपतिपीडितः ५१ सुमेघनिचयस्तस्थौगिरिंतंपरिधायह पुरंपुरस्कृत्ययथास्फीतोजनप-
दोमहान् ५२ निवेश्यतंकरेशैलंतोलयित्वाचसस्मितम् प्रोवाचगोप्तागोपानांप्रजापतिरिवस्थितः ५३ एतद्दैवैरसंभाव्यंदिव्ये
नविधिनामया कृतंगिरिगृहंगोपानिर्वातंशरणंगवाम् ५४ क्षिप्रंविशंतुयूथानिगवामिहहिशांतये निर्वातेषुचदेशेषुनिवसंतु-
यथासुखम् यथाप्रेष्ठंयथायूथंयथासारंयथासुखम् ५५

४४ वृष्टस्यवर्षेणक्लिन्नस्य ४५ ४६ जलदैःप्रावरणभूतैःपक्षेताड्यप्रदैः प्रमैः गुहामुखा
निकंदराद्वाराणिपक्षेस्वदयगुहायामुखानिइंद्रियाणि ४७ वनैःरुतैः शिखरैरितिसंबंधः ४८ ४९ ५० चक्रारूढः परचक्रवशात्रथशकटाद्यारूढ्यपलायमानोयथा-
लंबतेतद्वदित्यर्थः ५१ ५२ ५३ दिव्येनविधिनाअलौकिकेनप्रभावेण ५४ ५५ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

महतीपर्वतबुध्नादपिपुष्कलकुक्षिः ५६ ५७ ५८ प्रदरंगर्तंसुखंगह्वरं विशालगर्भम् ५९ ६० ६१ ६२ ६३ ६४ ६५ स्थावरात्मवान् अकंपइत्यर्थः ६६
इतिश्रीहरिवंशेविष्णुपर्वणिटीकायांअष्टादशोऽध्यायः १८ ७ धृतमिति १ २ ३ ४ पर्याप्तनयनः संप्राप्तनेत्रफलः ५ ६ ७ लोकवृत्तांततत्पर-

विभज्यतामयंदेशः कृतंवर्षनिवारणम् शैलोत्पाटनभूरेषामहतीनिर्मितामया ५६ पंचक्रोशप्रमाणेनक्रोशैकंविस्तरेणमहान् त्रैलो-
क्यमप्युत्सहतेरक्षितुंकिंपुनर्व्रजम् ५७ ततः किलकिलाशब्दोगवांहंभारवैःसह गोपानांतुमुलोजज्ञेमेघनादश्चवाद्यतः ५८
प्राविशंततततोगावोगोपैर्यूथप्रकल्पिताः तस्यशैलस्यविपुलं प्रदरंगह्वरोदरम् ५९ कृष्णोपिमूलेशैलस्यशैलस्तंभइवोछ्रितः
दधारैकेनहस्तेनशैलंप्रियमिवातिथिम् ६० ततोव्रजस्यभांडानियुक्तानिशकटानिच विविशुर्वर्षभीतानितद्गृहंगिरिनिर्मितम्
६१ अतिदैवंतुकृष्णस्यदृष्ट्वातत्कर्मवज्रभृत् मिथ्याप्रतिज्ञोजलदान्वारयामासवैविभुः ६२ सप्तरात्रेतुनिर्वृत्तेधरण्यां
विगतोत्सवः जगामसवृतोमेघैर्वृत्रहास्वर्गमुत्तमम् ६३ निर्वृत्तेसप्तरात्रेतुनिष्प्रयत्नेशतक्रतौ गताभ्रेविमलेव्योम्निदिवसेदी-
प्तभास्करे ६४ गावस्तेनैवमार्गेणपरिजग्मुर्गतश्रमाः स्वंचस्थानंततोघोषः प्रत्ययात्पुनरेवसः ६५ कृष्णोपितंगिरिंश्रेष्ठंस्वस्था-
नेस्थावरात्मवान् प्रीतोनिवेशयामासशिवायवरदोविभुः ६६ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिगोवर्द्धनोद्धरण-
नामाष्टादशोऽध्यायः १८ वैशंपायनउवाच धृतंगोवर्द्धनंदृष्ट्वापरित्रातंचगोकुलम् कृष्णस्यदर्शनंशक्रोरोचयामासविस्मि-
तः १ सनिर्जलांबुदाकारंमत्तंमदजलोक्षितम् आरुह्यैरावतंनागमाजगाममहीतलम् २ सददर्शोपविष्टंवैगोवर्द्धनशिलात-
ले कृष्णमक्लिष्टकर्माणंपुरुहूतःपुरंदरः ३ तंवीक्ष्यबालंमहतातेजसादीप्तमव्ययम् गोपवेषधरंविष्णुंप्रीतिंलेभेपुरंदरः ४
तंसांबुजदलश्यामंकृष्णंश्रीवत्सलक्षणम् पर्याप्तनयनःशक्रःसर्वैर्नेत्रैरुदैक्षत ५ दृष्ट्वाचैनंश्रियाजुष्टंमर्त्यलोकेमरोपमम्
सूपविष्टंशिलापृष्ठेशक्रःसव्रीडितोभवत् ६ तस्योपविष्टस्यसुखंपक्षाभ्यांपक्षिपुंगवः अंतर्धानगतश्छायांचकारोरगभोजनः
७ सविविक्तेवनगतंलोकवृत्तांततत्परम् उपतस्थेगजंहित्वाकृष्णंबलनिषूदनः ८ ससमीपगतस्तस्यदिव्यस्रगनुलेपनः
रराजदेवराजोवैवज्रपूर्णकरःप्रभुः ९ किरीटेनार्कतुल्येनविद्युदुद्योतकारिणा कुंडलाभ्यांसदिव्याभ्यांसततंशोभिताननः १०
पंचस्तबकलंबेनहारेणोरसिभूषितः सहस्रपत्रकांतेनदेहभूषणकारिणा ईक्षमाणःसहस्रेणनेत्राणांकामरूपिणाम् ११

लोकव्यवहारतत्परं ८ ९ १० पंचभिःस्तबकैर्महागुच्छैर्लंबतेइतितेनपंचस्तबकलंबेन ११ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१२ १३ १४ स्वायंभुवेनयोगेनहैरण्यगर्भ्याधारणयातस्यांहिक्रियमाणायांगुरुतरोपिलघुर्भवतिकृष्णाधृतगोवर्धनवत्विपुलतरोप्यल्पोभवत्यमस्यपी-
तसमुद्रवत् १५ गवांकोपेनेतिशेषः १६ १७ रोषितःव्रजपक्षपातेनमयिक्रुद्धःसन्पूर्णत्वस्यास्याच्छादयसीत्यर्थः १८ १९ २० २१ पुंगवःमहोक्षः
२२ प्रकरणंप्रकर्षेणरचनंपाठांतरेप्रवहणंसृष्टिप्रवाहः २३ २४ स्थाणुभ्यःपर्वतेभ्यः २५ गोलोकस्यश्रेष्ठत्वंवक्तुंपीठिकामाह. अपामिति अपांलो

त्रिदशाज्ञापनार्थेनमेघनिर्घोषकारिणा अथदिव्येनमधुरंव्याजहारस्वरेणतम् १२ कृष्णकृष्णमहाबाहोज्ञातीनांनंदिवर्द्धन
अतिदिव्यंकृतंकर्मत्वयाप्रीतिमतागवाम् १३ मयोत्सृष्टेषुमेघेषुयुगांतावर्तकारिषु यत्त्वयारक्षितागावस्तेनास्मिपरितोषि
तः १४ स्वायंभुवेनयोगेनयस्त्वायंपर्वतोत्तमः धृतोवेश्मवदाकाशेकोत्वेतेननविस्मयेत् १५ प्रतिषिद्धेममखेहमयेयंरुषिते
नवै अतिवृष्टिःकृताकृष्णगवांवैसप्तरात्रिकी १६ सात्वयाप्रतिषिद्धेयंमेघवृष्टिर्दुरासदा देवैःसदानवगणैर्दुर्निवार्यामयीरि
ते १७ अहोमेसुप्रियंकृष्णयत्त्वंमानुषदेहवान् समग्रंवैष्णवंतेजोविनिगूह्यसिरोषितः १८ साधितंदेवतानांहिमन्येहंकार्यम
व्ययम् त्वयिमानुष्यसापन्नेयुक्तेवैवस्वतेजसा १९ सेत्स्यतेसर्वकार्यार्थोनकिंचित्परिहास्यते देवानांयद्भवान्नेतासर्वकार्यपु-
रोगमः २० एकस्त्वमसिदेवानांलोकानांचसनातनः द्वितीयंनानुपश्यामियस्तेषांचधुरंवहेत् २१ यथाहिपुंगवःश्रेष्ठोन्यम्ने-
धुरिनियोज्यते एवंत्वमसिदेवानांमग्नानांद्विजवाहन २२ त्वच्छरीरगतंकृष्णजगत्प्रकरणंत्विदम् ब्रह्मणासाधुनिर्दिष्टंधातु
ष्विवकांचनम् २३ स्वयंभूर्भगवान्श्रेष्ठोबुद्ध्याथवयसापिवा नत्वानुगंतुंशक्नोतिपंगुर्द्रुतगतिंयथा २४ स्थाणुभ्योहिमवा
न्श्रेष्ठोन्हदानांवरुणालयः गरुत्मान्पक्षिणांश्रेष्ठोदेवानांचतथाभवान् २५ अपामधस्ताल्लोकोवैतस्योपरिमहीधराः नगा-
नामुपरिष्टाद्भूःपृथिव्युपरिमानुषाः २६ मनुष्यलोकादूर्ध्वंतुखगानांगतिरुच्यते आकाशस्योपरिरविर्द्वारंस्वर्गस्यभानुमान्
२७ देवलोकःपरस्तस्माद्विमानगमनोमहान् यत्राहंकृष्णदेवानामैंद्रेविनिहितःपदे २८ स्वर्गादूर्ध्वंब्रह्मलोकोब्रह्मर्षिगण
सेवितः तत्रसोमगतिश्चैवज्योतिषांचमहात्मनाम् २९ तस्योपरिगवांलोकःसाध्यास्तंपालयंतिहि सोहिसर्वगतःकृष्णम-
हाकाशगतोमहान् ३०. उपर्युपरितत्रापिगतिस्तववतपोमयी यांनविद्मोवयंसर्वेपृच्छंतोपिपितामहम् ३१

कोधस्तात् तस्योपर्यप्सुप्लवंतोम
हीधराः पर्वताःसमुद्रेमग्नान्युपरिदंडानिलोहलांगलानिनाविमिवमहींधारयंतःअतएवनगानामुपरिष्टाद्भूःस्मृताभुवश्चोपरिनगाहृश्यंते २६ २७ २८ सोमग-
तिस्तावतीत्यर्थः कर्मफलंतावदेवेत्यर्थः २९ गोलोकस्तुगोपालोपासनागम्यस्ततोप्युपरीत्याहतस्येति ३० तेनापिगोलोकेपिनविद्मःकुतोलभेमेत्यर्थः ३१ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३२ ३३ गवामेवेत्यन्येषांतपआदिनापिदुष्प्रापइत्यर्थः ३४ सएवगोलोकस्त्वयासहभूमावागतःसन्सीदमानावस्थायांत्वयैवत्रातइत्यर्थः तथाचमंत्रव-
र्णः तावांवास्तून्युश्मसिगमध्यैयत्रगावोभूरिशृंगाअयासः अत्राहतदुरुगायस्यवृष्णःपरमंपदमवभातिभूरीति तानिवांयुवयोःरामकृष्णयोर्वास्तूनि
रम्यस्थानानिगमध्यैगंतुउश्मसि उश्मःकामयामहेनतुनतत्रगंतुंप्रभवामः यत्रयेषुवास्तुषुभूरिशृंगाः महाशृंगवत्यः गावः अयासः संचरंति अत्रभूर्लोकेअहनिश्चि
तंतत्गोलोकाख्यंपरमंपदंभूरिअत्यंतंसुखादपिविशिष्टंअवभाति अत्यंतंशोभते वृष्णः आनंदवर्षुकस्यउरुगायस्यमहाकीर्तेरित्यर्थः ३५ ३६ ३७ ३८-मेभु

लोकस्त्वधोदुष्कृतिनांनागलोकस्तुदारुणः पृथिवीकर्मशीलानांक्षेत्रंसर्वस्यकर्मणः ३२ व्योमस्थिराणांविषयोवायुनातुल्यवृत्तिनाम्
गतिःशमदमाढ्यानांस्वर्गःसुकृतकर्मणाम् ३३ ब्राह्मेतपसियुक्तानांब्रह्मलोकःपरागतिः गवामेवतुगोलोकोदुरारोहातुसागतिः ३४
सतुलोकस्त्वयाकृष्णसीदमानःकृतात्मना धृतोधृतिमताधीरनिघ्नतोपद्रवान्गवाम् ३५ तदहंसमनुप्राप्तोगवांवाक्येनचोदितः ब्रह्मण
श्चमहाभागगौरवात्तवचागतः ३६ अहंभूतपतिःकृष्णदेवराजःपुरंदरः अदितेर्गर्भपर्यायेपूर्वजस्तेपुराकृतः ३७ स्वतेजस्तेजसाचैवय-
त्तेदर्शितवानहम् मेघरूपेणतत्सर्वंक्षन्तुमर्हसिमेविभो ३८ एवंक्षांतमनाःकृष्णस्त्वेनसौम्येनतेजसा ब्रह्मणःशृणुमेवाक्यंगवांचगज
विक्रम ३९ आहत्वांभगवान्ब्रह्मागावश्चाकाशगादिवि कर्मभिस्तोषितादिव्यैस्तवसंरक्षणादिभिः ४० भवतारक्षितागावोगोलोकश्च
महानयम् यदूयपुंगवैःसार्द्धंवर्द्धामप्रसवैस्तथा ४१ कर्षुकान्पुंगवैर्वाह्यैर्मेध्यैनहविषासुरान् श्रियंसकृत्स्नवृत्त्तेनतर्पयिष्यामकृ
मगाः ४२ तदस्माकंगुरुस्त्वंहिप्राणदश्चमहाबलः अद्यप्रभृतिनोराजात्वमिंद्रोवैभवप्रभो ४३ तस्मात्त्वंकांचनैःपूर्णैर्दिव्यस्यपयसोघ
टैः एभिरद्याभिषिंचस्वमयाहस्तावनामितैः ४४ अहंकिलेंद्रोदेवानांत्वंगवामिंद्रतांगतः गोविंदइतिलोकास्त्वांस्तोष्यंतिभुविशाश्वतम्
४५ ममोपरियथेंद्रस्त्वंस्थापितोगोभिरीश्वरः उपेंद्रइतिकृष्णत्वांगास्यंतिदिविदेवताः ४६ येचेमेवार्षिकामासाश्चत्वारोविहितामम ए
षामर्द्धंप्रयच्छामिशरत्कालंतुपश्चिमम् ४७ अद्यप्रभृतिमासौद्वौज्ञास्यंतिममसामनयाः धर्माद्यंचध्वजोमह्यंततःपूजामवाप्स्यसि ४८
समांबुभुजवद्दर्पंत्तदाव्यक्ष्यंतिबर्हिणः अल्पवाचोगतमदायेचान्येमेघनादिनः ४९ शांतिंसर्वेगमिष्यंतिममकालविचारिणः त्रिशंकु
गस्त्याचरितामाशामुपचरिष्यति ५०

स्वादितिशेषः ३९ ४० ४१ ४२ ४३ अभिषिंचस्वआत्मानमितिशेषः अभिषेकादिकंभगवानंगीचकारेत्याहमंत्रः
नरुषभंमासमानानांसपत्नानांविषासहिंहंतारंशत्रूणांकृधिविराजंगोपतिंगवामितिविषासहिंसहनसमर्थम् ४४ ४५ ममेतिइंद्रादुपरीतिविग्रहेरिल्लोपेनउपें
द्रेतिनामनिष्पन्नमित्यर्थः ४६ ४७ वर्षार्द्धआश्विनकार्तिकप्रतिपदिध्वजःअंतसमाप्तिचिन्हम् ४८ ४९ आशांदक्षिणांदिशाम् ५० ७ ७ ७ २१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५१ खगेचातकेप्लवेषुनदीतरणसाधनेषुविगतपूरासुनदीष्वित्यर्थः ५२ निर्यात्यविरेच्य ५३ शस्त्रसंकाशेकृष्णाभास्वरेवानिर्मले ५४ कलमानांशालिकणिशानां
अवनतानिअग्राणियासुतासु ५५ ५६ मखेषुआग्रयणवाजपेयादिषु ५७ ५८ महयंतिपूजयंति ५९ स्थिरेशाश्वतेवृत्तेमहाख्येआचारे ६० दिव्यंपयोमंदाकि-
नीजलंतस्यधरान् ६१ ताःगावःस्वर्गस्थाः ६२ ६३ ववर्षुःदेवाःनेदुःस्वयमेव ६४ एकार्णवाद्विविक्तंपृथग्भूतंक्षीरोदमध्येक्षीरोदतुल्यापृथिव्यभवदित्यर्थः ६५

सहस्ररश्मिरादित्यस्तापयन्स्वेनतेजसा ततःशरदियुक्तायांमौनकामेषुबर्हिषु ५१ याचमानेखगेतोयंविप्लुतेषुप्लवेषुच हंससारसपू
र्णेषुनदीनांपुलिनेषुच ५२ मत्तक्रौंचप्रणादेषुप्रमत्तवृषभेषुच गोषुचैवप्रहृष्टासुक्षरतीषुपयोबहु निवृत्तेषुचमेघेषुनिर्यात्यजगतो
जलम् ५३ आकाशेशस्त्रसंकाशेहंसेषुचचरत्सुच जातपद्मेषुतोयेषुवापीषुचसरस्सुच ५४ तडागेषुचकांतेषुतोयेषुविमलेषुच क
लमावनताग्रासुकृष्णकेदारपंक्तिषु ५५ मध्यस्थसलिलारंभकुर्वतीषुनदीषुच सुसस्यायांचसीमायांमनोहर्यांसुनेरपि ५६ पृथिव्यां
पृथुराष्ट्रायांरम्यायांवर्षसंक्षये श्रीमत्सुपंक्तिमार्गेषुफलवत्सुतृणेषुच इक्षुमत्सुचदेशेषुप्रवृत्तेषुमखेषुच ५७ ततःप्रवर्त्स्यतेपुण्या
शरत्सुप्तोत्थितेत्वयि लोकेस्मिन्कृष्णनिखिलेयथैवत्रिदिवेतथा ५८ नरास्त्वाचैवमांचैवध्वजाकारासुयष्टिषु महेंद्रंचाप्युपेंद्रंचमहय
न्तिमहीतले ५९ येचावयोःस्थिरेवृत्तेमहेंद्रोपेंद्रसंज्ञिते मानवाःप्रणमिष्यन्तितेषांनास्त्यनयागमः ६० ततःशक्रस्तुतान्गृह्यघटान्दि-
व्यपयोधरान् अभिषेकेणगोविंदंयोजयामासयोगवित् ६१ दृष्ट्वातमभिषिक्तंतुगावस्ताःसहयूथपैः स्तनैःप्रस्रवयुक्तैश्चसिषिचुःकृष्ण
मव्ययम् ६२ मेघाश्चदिविमुक्ताभिःसामृताभिःसमन्ततः सिषिचुस्तोयधाराभिरभिषिच्यतमव्ययम् ६३ वनस्पतीनांसर्वेषांसुस्रावेंदु-
निभंपयः ववर्षुःपुष्पवर्षंचनेदुस्तूर्याणिचांबरे ६४ अस्तुवन्मुनयःसर्वेवाग्भिर्मंत्रपरायणाः एकार्णवविविक्तंचदधारवसुधावपुः ६५
प्रसादंसागराजग्मुर्ववुर्वाताजगद्धिताः मार्गस्थोपिबभौभानुश्चंद्रोनक्षत्रसंयुतः ६६ ईतयःप्रशमंजग्मुर्निर्वैररचनानृपाः प्रवालपत्र
शबलाःपुष्पवंतश्चपादपाः ६७ मदंप्रसुस्रुवुर्नागायातास्तोषवनेमृगाः अलंकृतागात्ररुहैर्धातुभिर्भांतिपर्वताः ६८ देवलोकसमोलो
कस्तृप्तोमृतरसैरिव आसीत्कृष्णाभिषेकोहिदिव्यस्वर्गरसोक्षितः ६९ अभिषिक्तंतुतंगोभिःशक्रोगोविंदमव्ययम् दिव्यमाल्यांबर
धरंदेवदेवोब्रवीदिदम् ७० एषतेप्रथमःकृष्णनियोगोगोषुयःकृतः श्रूयतामपरंकृष्णममागमनकारणम् ७१ क्षिप्रंप्रसाध्यतांकंसः
केशीचतुरगाधमः अरिष्टश्चमदाविष्टोराजराज्यंततःकुरु ७२ पितृष्वसरिजातस्तेममांशोहमिवस्थितः सतेरक्ष्यश्चमान्यश्चसख्येच
विनियुज्यताम् ७३

६६ ईतयोऽतिवृष्ट्याद्याः ६७ गात्ररुहैर्वृक्षादिभिः ६८ ६९ ७० नियोगः कृत्योपदेशः ७१ प्रसाध्यतांबध्यतां ७२ ममांशोर्जुनः ७३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ७४ ७५ भारतंभरतानांसुहृदम् ७६ ७७ ७८ ७९ ८० योगोध्यात्मविद्याविधातव्यः अज्ञातोज्ञापनीयः ८१ ८२ ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९०

त्वयाह्यनुगृहीतःसन्तवचित्तानुवर्तकः त्वद्वशोवर्तमानश्चप्राप्स्यतेविपुलंयशः ७४ भारतस्यचवंशस्यसवरिष्ठोधनुर्धरः भविष्यत्यनु
रूपश्चत्वद्वृत्तेनचरिष्यते ७५ भारतत्वयिचायत्तंतस्मिंश्चपुरुषोत्तमे उभाभ्यामपिसंयोगेयास्यंतिनिधनंनृपाः ७६ प्रतिज्ञातंमयाकृष्णऋ
षिमध्येसुरेश्वर मयापुत्रोर्जुनोनामसृष्टःकुंत्याकुलोद्वहः ७७ सोऽस्त्राणांपारतत्त्वज्ञः श्रेष्ठश्चापविकर्षणे तंप्रवेक्ष्यंतिवैसर्वेराजानःशस्त्र
योधिनः ७८ अक्षौहिणीस्तुशूराणांराज्ञांसंग्रामशालिनाम् सएकःक्षत्रधर्मेणयोजयिष्यतिमृत्युना ७९ तस्यास्त्रचरितंमार्गंधनुषोला
घवेनच नानुयास्यंतिराजानोदेवावात्वांविनाप्रभो ८० सतेबंधुःसहायश्चसखाप्रभुर्भविष्यति तस्ययोगोविधातव्यस्त्वयागोविंदमत्कृ-
ते ८१ द्रष्टव्यश्चयथाहंवैत्वयामान्यश्चनित्यशः ज्ञातात्वमेवलोकानामर्जुनस्यचनित्यशः ८२ त्वयाचनित्यंसंरक्ष्यआहवेषुमहत्सु-
सः रक्षितस्यत्वयातस्यनमृत्युःप्रभविष्यति ८३ अर्जुनंविद्धिमांकृष्णमांचैवात्मानमात्मना आत्मातेहंयथाशश्वत्तथैवतवसोऽर्जुनः
८४ त्वयालोकानिमान्जित्वाबलिहस्तात्त्रिभिःक्रमैः देवतानांकृताराजापुराज्येष्ठक्रमादहम् ८५ त्वांचसत्यमयंज्ञात्वासत्येधर्मेस
त्यविक्रमम् सत्येनोपेत्यदेवावैयोजयंतिरिपुक्षये ८६ सार्जुनोनाममेपुत्रःपितुस्तेभगिनीसुतः इहसौहार्दमायातुभूत्वासहचरः
पुरा ८७ तस्यतेयुध्यतःकृष्णस्वस्थानेपिगृहेपिवा वोढव्याधुर्गवेनेवधूःसदारणमूर्द्धनि ८८ कंसेविनिहतेकृष्णत्वयाभाव्यर्थ
दर्शिना अभितस्तन्महद्युद्धंभविष्यतिमहीक्षिताम् ८९ तत्रतेषांनृवीराणामतिमानुषकर्मणाम् विजयस्यार्जुनोभोक्तायशस्त्वंचयो
क्ष्यसे ९० एतन्मेकृष्णकार्त्स्न्येनकर्तुमर्हसिभाषितम् प्रह्वहृतेसुराश्चैवसत्यंचप्रियमच्युत ९१ शक्रस्यवचनंश्रुत्वाकृष्णोगोविंदतांगतः
प्रीतेनमनसायुक्तःप्रतिवाक्यंजगादह ९२ प्रीतोस्मिदर्शनादेवतवशक्रशचीपते यत्त्वयाभिहितंचेदंनकिंचित्परिहास्यते ९३ जानामिभ
वतोभावंजानाम्यर्जुनसंभवम् जानेपितृष्वसारंचपांडोर्दत्तांमहात्मनः ९४ युधिष्ठिरंचजानामिकुमारंधर्मनिर्मितम् भीमसेनंचजानामि
वायोःसंतानजंसुतम् ९५ अश्विभ्यांसाधुजानामिसृष्टंपुत्रद्वयंशुभम् नकुलंसहदेवंचमाद्रीकुक्षिगतावुभौ ९६ कानीनंचापिजानामि
सवितुःप्रथमंसुतम् पितृष्वसारिपुत्रंवैप्रसूतंसूततांगतम् ९७ धार्तराष्ट्रांश्चमेसर्वान्विदितायुद्धकांक्षिणः पांडोरुपरमंचैवशापाशनिनि
पातजम् ९८ तद्गच्छत्रिदिवंशक्रसुखायत्रिदिवौकसाम् नार्जुनस्यरिपुःकश्चित्समरेप्रभविष्यति ९९

९१ ९२ ९३ ९४ ९५ ९६ कानीनंकन्यायांभवम् ९७ ९८ ९९ छ. छ छ छ. छ. छ. छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

निर्यातयिष्यामिप्रत्यर्पयिष्यामि १०० यंत्रितः बद्धः १०१ १०२ इतिहरिवंशेविष्णुपर्वणिटीकायांएकोनविंशोऽध्यायः १९ गतेव्रजालयैर्गोपैःसह १ हृष्टाअभी
तिच्छेदः संधिरार्षः २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ यौवनंकांतिमत्वम् १५ १६ १७ संकाल्यस्ववशेकृत्वाकैशोरंवयो

अर्जुनार्थेचतान्सर्वान्पांडवानक्षतान्युधि कुंत्यानिर्यातयिष्यामिनिवृत्तेभारतेमृधे १०० यच्चवक्ष्यतिमांशक्रतनूजस्तवसोर्जुनः मृ
त्यवत्तत्करिष्यामितवस्नेहेनयंत्रितः १०१ सत्यसंधस्यतच्छ्रुत्वाप्रियंप्रीतस्यभाषितम् कृष्णस्यसाक्षात्त्रिदिवंजगाम त्रिदशेश्वरः १०३
इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिगोविंदाभिषेकोनामएकोनविंशोऽध्यायः १९ वैशंपायनउवाच गतेशक्रेततःकृष्णः
पूज्यमानोव्रजालयैः गोवर्द्धनधरःश्रीमान्विवेशव्रजमेवह १ तस्यवृद्धाभिनंदंतिज्ञातयश्चसहोषिताः धन्याःस्मोनुगृहीताःस्मत्वद्वृत्तेन
नयेनच २ गावोवर्षभयात्तीर्णावयंतीर्णामहाभयात् तवप्रसादाद्गोविंददेवतुल्यपराक्रम ३ अमानुषाणिकर्माणितवपश्यामगोपते
धारणेनास्यशैलस्यविद्मस्त्वांकृष्णदेवतम् ४ कस्त्वंभवसिरुद्राणांमरुतांचमहाबलः वसूनांवाकिमर्थंचवसुदेवःपितातव ५ बलंचबा-
ल्येक्रीडाचजन्मचास्मासुगर्हितम् कृष्णदिव्याचतेचेष्टाशंकितानिमनांसिनः ६ किमर्थंगोपवेषेणरमसेस्मासुगर्हितम् लोकपालोप-
मश्चैवगास्त्वंकिंपरिरक्षसि ७ देवोवादानवोवात्वंयक्षोगंधर्वएववा अस्माकंबांधवोजातोयोसिसोसिनमोस्तुते ८ केनचिद्यदिकार्ये
णवससीहयदृच्छया वयंतवानुगाःसर्वेभवंतंशरणंगताः ९ वैशंपायनउवाच गोपानांवचनंश्रुत्वाकृष्णःपद्मदलेक्षणः प्रत्युवा
चस्मितंकृत्वाज्ञातीन्सर्वान्समागतान् १० मन्यतेमांयथासर्वेभवंतोभीमविक्रमम् तथाहंनावमंतव्यःस्वजातीयोस्मिबांधवः ११ यदि
त्ववश्यंश्रोतव्यंकालःसंप्रतिपाल्यताम् ततोभवंतःश्रोष्यंतिमांचद्रक्ष्यंतितत्वतः १२ यद्यहंभवतांश्लाघ्योबांधवोदेवसप्रभः परिज्ञानेन
किंकार्यंयद्येषोनुग्रहोमम १३ एवमुक्तास्तुतेगोपावसुदेवसुतेनवै बद्धमौनादिशःसर्वेभेजिरेपिहिताननाः १४ कृष्णस्तुयौवनंदृष्ट्वानि
शिचंद्रमसोनवम् शारदींचनिशांरम्यांमनश्चक्रेरतिंप्रति १५ सकरीषांगरागासुव्रजरथ्यासुवीर्यवान् वृषाणांजातदर्पाणांयुद्धानिसम-
योजयत् १६ गोपालांश्चबलोदग्रान्योधयामासवीर्यवान् वनेसवीरोगाश्चैवजग्राहग्राहवद्विभुः १७ युवतीर्गोपकन्याश्चरात्रौसंकाल्य
कालवित् कैशोरकंमानयन्वैसहताभिर्मुमोदह १८ तास्तस्यवदनंकांतंकांतागोपस्त्रियोनिशि पिबंतिनयनाक्षेपैर्गांगतंशशिनंयथा
१९ हरितालार्द्रपीतेनसकौशेयेनवाससा वसानोभद्रवसनंकृष्णःकांततरोऽभवत् २०

दशवर्षावधितस्यकंउपरिभागंएकादशमारभ्येत्यर्थः मा
गुपनयनात् कामचाराद्यनुज्ञास्तीतिवाक्यंमानयन् १८ १९ हरितालस्य आर्द्रपंकःतद्वत्पीतेन २० ७ ७ ७ ५ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तद्व्रजंतासांकदंबम् २१ २२ २३ २४ पंक्तीकृताः मंडलाकारपंक्तिरूपेणस्थिताः द्वंद्वशोद्वाभ्यांप्रदेशाभ्यांवर्ततेगोपः कृष्णोयासांताः द्वंद्वशोगोपास्ताश्चताः कन्य
काश्चेत्यर्थः मनोरमंमंडलमध्यस्थंचरमयंतीत्यर्थः यथोक्तं अंगनामंगनामंतरे माधवोमाधवंमाधवंचांतरेचांगनाः इत्थमाकल्पितेमंडलेमध्यगः संजगौवेणुनादे
वकीनंदनइति श्रुतिश्च पद्मावस्तेपुरुरूपावपूंष्यूर्ध्वातस्थौत्र्यविरेरिहाणा ऋतस्यसद्मविचरामिविद्वान्महद्देवानामसुरत्वमेकमितियद्वापत्तु अभिसारिणीभि
र्गोपीभिरभिसंतुयोग्याकृष्णमूर्तिः पुरुरूपाबहुरूपावपूंषिबहूनिवस्तेपरिधत्तेबहुधालंगतेत्यर्थः तथाप्यन्याऊर्ध्वागोपीसंपर्कंविनातस्थौस्थितामध्येइतिशेषः –
कीदृशीत्र्यविं त्रीन्देशान्पार्श्वद्वयंपुरस्ताच्च अवतिप्रकाशतइतित्र्यविः त्रेधाभूतांदृष्टिंरेरिहाणागिलंती उक्तरूपेरासमंडलेहिएकैकस्यागोप्याउभयतः कृष्णद्वयं

सबद्धांगदनिर्व्यूहश्छिन्नयावनमालया शोभमानोहरिर्गोविंदःशोभयामासतद्व्रजम् २१ नामदासोदरेत्येवंगोपकन्यास्तदाब्रुवन् विचि
त्रंचरितघोषेद्दृश्यातत्तस्यभास्वतः २२ तास्तपयोधरोत्तुंगैरुरोभिःसमपीडयन् भ्रामिताक्षैश्चवदनैर्निरीक्षंतेवरांगनाः २३ तावार्यमा
णापतिभिर्भ्रातृभिर्मातृभिस्तथा कृष्णंगोपांगनारात्रौमृगयंतेरतिप्रियाः २४ तास्तुपंक्तीकृताःसर्वारमयंतिमनोरमम् गायंत्यःकृष्णचरि
तंद्वंद्वशोगोपकन्यकाः २५ कृष्णलीलानुकारिण्यःकृष्णप्रणिहितेक्षणाः कृष्णस्यगतिगामिन्यस्तरुण्यस्तावरांगनाः २६ वनेषुतालहस्
ताग्रैःकूजयंत्यस्तथापराः चेरुर्वैचरितंतस्यकृष्णस्यव्रजयोषितः २७ तास्तस्यनृत्यगीतंचविलाससस्मितवीक्षितम् मुदिताश्चानुकुर्वंत्यः
क्रीडंतिव्रजयोषितः २८ भावनिस्पंदमधुरंगायंत्यस्तावरांगनाः व्रजंगताःसुखंचेरुर्दामोदरपरायणाः २९ करीषपांसुदिग्धांग्यस्ताःकृष्ण
मनुवव्रिरे रमयंत्योयथानागंसप्रमत्तंकरेणवः ३० तमन्याभावविकचैर्नेत्रैःप्रहसिताननाः पिबंत्यतृप्तवनिताःकृष्णंकृष्णमृगेक्षणाः ३१
मुखमस्याब्जसंकाशंतृषितागोपकन्यकाः रत्यंतरगतारात्रौपिबंतिरसलालसाः ३२ हाहेतिकुर्वतस्तस्यप्रहृष्टास्तावरांगनाः जगृहुर्निःसृ
तांवाणींनाम्नादामोदरेरिताम् ३३ तासांग्रथितसीमंतारतिनीत्वाकुलीकृताः चारुविस्रंसिरेकेशाःकुचाग्रेगोपयोषिताम् ३४

पुरस्तादेकः सर्वसाधारणांत्रिधाभूतामपिदृष्टिंप्रदेशत्रयस्थः कात्स्न्येनगिलतितितोन्यत्रनापैतीत्यर्थः सामूर्तिर्भर्तस्याधर्मस्यसद्मभूतातामनुचिंत्यविचरामि
त्वद्विधुकासतीक्रिडीतिकृष्णलीलानुकारात्स्वसुत्वं आरोपयंतीकाप्यवदतद्देवानांकृष्णादीनामन्येषांवाकृष्णेनवियोजयतां असुरत्वंनिर्दयत्वंमहत्एकंमुख्यं
कस्याश्चिद्रासक्रीडायांतिरोहितेकृष्णेइदंवाक्यम् २५ २६ २७ २८ भावः कृष्णेप्रेमातिशयः तस्यानिस्पंदेनबहिराविष्करणेनमधुरंव्रजमंडलंगताःप्रापाः २९ अनु २३
वव्रिरेपरितःवर्तवत्यः ३० ३१ ३२ हाहेतिहाराधेहाचंद्रमुखिइत्यादिशब्दैःस्वस्यविरहातुरत्वंकुर्वतः आविष्कुर्वतः ३३ ३४ ७. ७. ७.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चक्रवालैः मंडलैः हल्लीसकक्रीडनं एकस्य पुंसो बहुभिः स्त्रीभिः क्रीडनं सैव रासक्रीडा गोपीनां मंडलीनृत्यबंधे हल्लीसकं विदुरिति कोशात् तल्लक्षणं तु पृथक् सुरक्त
मसृणं वितस्तिमात्रोन्नतं कोशिनिखन्य शंकुं आक्रम्य पद्भ्यामितरेतरं तु हस्तैर्भ्रमोयं खलु रासगोष्ठी ३५ इति हरिवंशे विष्णुपर्वणि टीकायां विंशोऽध्यायः २०
मदोषार्द्द इति १ निर्वाणांगार इंगालः मेघश्च तदुभयाभः कालः कृष्णवर्णः कालश्चितासंहर्तावेत्यर्थः २ गर्वितं दर्पः तेन आविद्धं भ्रामितं लांगूलं येन सः कठिनं
स्कंधबंधनं ककुदस्य ३ ककुदेति ककुदाघातेन उदग्रं अग्रनिहितं कृतं निर्माणं महाप्रासादादिरचनं येन स तथा ककुदाघातेन ताडिते वृक्षप्रासादमूले सर्वमपि

एवं स कृष्णो गोपीनां चक्रवालैरलंकृतः शारदीषु सचंद्रासु निशासु मुमुदे सुखी ३५ इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुप
र्वणि हल्लीसकक्रीडनं नाम विंशोऽध्यायः २० वैशंपायन उवाच प्रदोषार्द्धे कदाचित्तु कृष्णे रतिपरायणे त्रासयन् समदो गोष्ठमरिष्टः
प्रत्यदृश्यत १ निर्वाणांगारमेघाभस्तीक्ष्णशृंगोर्कलोचनः क्षुरतीक्ष्णाग्रचरणः कालः काल इवापरः २ लेलिहानः सनिष्पेषं जिह्वयोष्ठौ
पुनः पुनः गर्विताविद्धलांगूलः कठिनस्कंधबंधनः ३ ककुदोदग्रनिर्माणः प्रमाणाद्दुरतिक्रमः शकृन्मूत्रोपलिप्तांगो गवामुद्वेजनो भृश
म् ४ महाकटिः स्थूलमुखो दृढजानुर्महोदरः विषाणावलितगतिर्लंबताकंठचर्मणा ५ गवां रहेषु चपलस्तरुघाताकितानतः युद्ध
सज्जविषाणाग्रो द्विषद्वृषभसूदनः ६ अरिष्टो नाम हिंगवामरिष्टो दारुणाकृतिः दैत्यो वृषभरूपेण गोष्ठान्विपरिधावति ७ पातयानो ग
वां गर्भान्दृप्तो गच्छत्यनार्तवम् जृंभमाणश्च चपलो गृष्टीः संप्रचचार ह ८ शृंगप्रहरणो रौद्रः प्रहरन् गोषु दुर्मदः गोष्ठेषु न रतिं लेभे वि
ना युद्धेन गोवृषः ९ कस्यचित्त्वथ कालस्य स वृषः केशवाग्रतः आजगाम बलोदग्रो वैवस्वतवशे स्थितः १० स तत्र गास्तु प्रसभं बाधमानो
मदोत्कटः चकार निर्वृषं गोष्ठं निर्वत्सशिशुपुंगवम् ११ एतस्मिन्नेव काले तु गावः कृष्णसमीपगाः त्रासयामास दुष्टात्मा वैवस्वतवशे
स्थितः १२ सद्यः शनिरिवाभोदो नर्दमानो महास्वरः तालशब्देन तं कृष्णः सिंहनादैश्च मोहयन् १३ अभ्यधावत गोविंदो दैत्यं वृष-
भरूपिणम् स कृष्णं गोवृषो दृष्ट्वा हृष्टलांगूललोचनः १४ रोषितस्तालशब्देन युद्धाकांक्षी ननर्द ह तमापतंतं दुर्वृत्तं दृष्ट्वा वृषभरूपि
णम् तस्मात्स्थानान्न व्यचलत् कृष्णो गिरिरिवाचलः १५ स कुक्षौ वृषभो दृष्टिं प्रणिधाय धृताननः कृष्णस्य निधनाकांक्षी तूर्णमभ्यु
त्पपात ह १६ तमापतंतं प्रमुखे प्रतिजग्राह दुर्द्धरम् कृष्णः कृष्णाजननिभो वृषं प्रतिवृषोपमः १७ स संसक्तस्तु कृष्णो वै वृषेणैव महावृ
षः मुमोच वक्त्रजं फेनं नस्तश्चाथ सशब्दवत् १८

तद्गच्छतइत्यर्थः ४ ५ ६ ७ गृष्टीः सद्यःप्रसूताः गाः संप्रचचार जगाम रेतःसेकायेत्यर्थः ८ ९ १० ११ गावः गाः वैव-
स्वतवशे स्थितः आसन्नमृत्युः १२ १३ हृष्टं उत्फालितं लांगूलं लोचने च येन सः १४ १५ संप्रहर्तुकाम इति शेषः १६ प्रमुखे मुखाग्रे ओष्ठयोरित्यर्थः वेगेन इति वा पाठः १७
नस्तः नासिकातः १८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ टी॰ ५ १९ २० २१ २२ २३ २४ गोरक्षत्रयः गोपाः अयंचार्थोदाशतस्याम् प्रनेमस्मिन् दद्दशेसोमो अंतर्गोपाने ममाविरस्थाकृणोतिसतिग्मशृंगंवृषभंयुयुत्सन्दुह अ॰ प॰ २१ २
स्तस्थौबहुलेबद्धोअंतरितिमंत्रेणोपबृंहितः मंत्रार्थस्तु अंतर्गोपाः अंतःस्थितागोपायन्तंतर्याभीनेमस्मिन्नर्द्धप्रपंचेस्थावरेसोमः सोमादिरूपः प्रदद्दशेप्रकर्षेणदृष्टः
नेममर्द्धप्रपंचंअस्याअस्थिरंजंगमंआविः कृणोतिप्रकटीकरोति सतिग्मशृंगंवृषभंयुयुत्सन् योद्धुमिच्छन्दृष्टमात्रेणभस्मीकर्तुंशक्तोपिलीलयातेनसहयुयुत्सन्
दुहःद्रोहंकृतवान्तंहतवानित्यर्थः ततश्चबहुलेव्रजे अंतः रासमंडलमध्येबद्धः भक्तजनेनप्रेमपाशेनबद्धस्सन् तस्थौक्रीडितुमितिशेषः २५. इतिहरिवंशेवि-

तावन्योन्यावरुद्धांगौयुद्धेकृष्णवृषावुभौ रेजतुर्मेघसमयेसंसक्ताविव तोयदौ १९ तस्यदर्पबलंहत्वा कृत्वाशृंगांतरेपदम् आपीडय
दरिष्टस्यकंठंक्लिन्नमिवांबरम् २० शृंगंचास्यपुनःसव्यमुत्पाट्यमदंडवत् तेनैवप्राहरद्धक्षेसममार मृशंहतः २१ सभिन्नशृंगोभ
ग्नास्योभग्नस्कंधश्चदानवः पपातरुधिरोद्गारीसांबुधारइवांबुदः २२ गोविंदेनहतंदृष्ट्वादृप्तंवृषभदानवम् साधुसाध्विति भूतानितत्कर्मा
स्याभितुष्टुवुः २३ सचोपेंद्रोवृषंहत्वाकांतचंद्रनिशामुखे अरविंदाभनयनः पुनरेवररामसह २४ तेपिगोवृत्तयःसर्वेकृष्णंकमललोचनम्
उपासांचक्रिरेहृष्टाःसर्वेशक्रमिवामराः २५ इतिश्रीभारतेखि॰ हरिवंशेविष्णुपर्वणिवृषभासुरवधोनाम एकविंशोऽध्यायः २१
वैशंपायनउवाच कृष्णंव्रजगतंश्रुत्वावर्धमानमिवानलम् उद्वेगमगमत्कंसःशंकमानस्ततोभयम् १ पूतनायांहतायांचकालीये
चपराजिते धेनुकेप्रलयंनीतेप्रलंबेचनिपातिते २ धृतेगोवर्धनेशैलेविफलेशक्रशासने गोषुत्रातासुचतथास्पृहणीयेनकर्मणा ३ क
कुद्मिनिहतेरिष्टेगोपेषुमुदितेषुच दृश्यमानेविनाशेचसंनिकृष्टेमहाभये ४ कर्षणेवृक्षयोश्चैवबाल्येनाबालकर्मणा अचिंत्यकर्मत
च्छ्रुत्वावर्द्धमानेषुशत्रुषु ५ प्राप्तारिष्टमिवात्मानमेनेसमथुरेश्वरः विसंज्ञेंद्रियभूतात्मागतासुप्रतिमोबभौ ६ ततोज्ञातीन्समाना-
य्यपितरंचोग्रशासनः निशिस्तिमितमूकायांमथुरायांजनाधिपः ७ वसुदेवंचदेवाभंकंकंचाहूययादवम् सत्यकंदारुकंचैवकंकाव
रजमेवच ८ भोजंवैतरणंचैवविकद्रुंचमहाबलम् भयशंखंचधर्मज्ञंविपृथुंचपृथुश्रियम् ९ बभ्रुंदानपतिंचैवकृतवर्माणमेवच
भूरितेजसमक्षोभ्यंभूरिश्रवसमेवच १० एतान्सयादवान्सर्वानाभाष्यशृणुतेतिच उग्रसेनसुतोराजाप्रोवाचमथुरेश्वरः ११
भवंतःसर्वकार्यज्ञावेदेषुपरिनिष्ठिताः न्यायवृत्तांतकुशलास्त्रिवर्गस्यप्रवर्तकाः १२ कर्तव्यानांचकर्तारोलोकस्यविबुधोपमाः तस्थि
वांसोमहावृत्ते निष्कंपाइवपर्वताः १३

ष्णुपर्वणिटीकायांएकविंशोऽध्यायः २१ ॐ कृष्णमिति १ २ ३ ४ ५ प्राप्तारिष्टंप्राप्तमृत्युंअतएवविसंज्ञानि २४
इंद्रियाणिभूतात्माजीवश्चयस्य ६ स्तिमितंनिद्रयामूकायामिवरात्रौनिः शब्देकालेइत्यर्थः ७ ८ ९ बभ्रुरेवदानपतिस्तमक्रूरं १० आभाष्यप्रत्येकंसंबोध्य ११ १२
महावृत्तेमहत्याचारे १३ ॐ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

१४ निसर्गज्ञाःस्वाभाविककर्मज्ञाः १५ सुनियतांशोभनानांविधीनां १६ उदितोदितैःकथाप्रसंगेनउद्भटैः १७ अंगिरसांअग्नीनां १८ व्यावर्तमानंक्षयत् १९
२० २१ शून्यस्यतहृदयशून्यस्यचाराधस्यचारचक्षुर्वर्जितस्यराजानश्चारचक्षुषइत्युक्तेःममकारणात्मदीयात्प्रभावात्नंदगोपस्यगृहेवसुदेवस्यसुतोगो

अर्द्धभवन्तयःसर्वेसर्वेगुरुकुलोषिताः राजमंत्रधराःसर्वेसर्वेधनुषिपारगाः १४ यशःप्रदीपालोकानांवेदार्थानांविवक्षवः आश्रमाणांनि
सर्गज्ञावर्णानांक्रमपारगाः १५ प्रवक्तारःसुनियतानेतारोनयदर्शिनाम् भेत्तारःपरराष्ट्राणांत्रातारःशरणार्थिनाम् १६ एवमक्षत
चारित्रैःश्रीमद्भिरुदितोदितैः द्यौरप्यनुगृहीतास्याद्भवद्भिःकिंपुनर्मही १७ ऋषीणामिववोवृत्तंप्रभावोमरुतामिव रुद्राणामिववःक्रोधो
दीप्तिरंगिरसामिव १८ व्यावर्तमानसुमहत्भवद्भिःख्यातकीर्तिभिः धृतंयदुकुलंवीरैर्भूतलंपर्वतैरिव १९ एवंभवत्सुयुक्तेषुसमवि
त्तानुवर्तिषु वर्द्धमानोमयानर्थोभवद्भिःकिमुपेक्षितः २० एषकृष्णइतिख्यातोनंदगोपसुतोव्रजे वर्द्धमानइवांभोधौमूलंनःपरिकृन्तति
२१ अनमात्यस्यशून्यस्यचाराधस्यममैवतु कारणान्नंदगोपस्यससुतोगोपितोगृहे २२ उपेक्षितइवव्याधिःपूर्यमाणइवार्बुदः नदन्मेघ
इवोष्णांतेसदुरात्माविवर्द्धते २३ तस्यनाहंगतिंजानेनयोगंनपराक्रमम् नंदगोपस्यभवनेजातस्याद्भुतकर्मणः २४ किंतद्भूतसमुद्भूत
देवापत्यनविद्महे अतिदैवैरमानुष्यैःकर्मभिःसोनुमीयते २५ पूतनाशकुनीबाल्येशिशुनोत्तानशायिना स्तनपानेप्सुनापीताप्राणैः
सहदुरासदा २६ यमुनायाह्रदेनागःकालियोदमितस्तथा रसातलंचरान्नीतःक्षणेनादर्शनंह्रदात् २७ नंदगोपसुतोयोगंकृत्वासपुन-
रुत्थितः धेनुकस्तालशिखरात्पातितोजीवितंविना २८ प्रलंबयमृधेदेवानशकुरभिवर्तितुम् बालेनमुष्टिनैकेनसहतःप्राकृतोयथा
२९ वासवस्योत्सवंभंक्त्वावर्षंवासवरोषजम् निर्जित्यगोगृहार्थायधृतोगोवर्द्धनोगिरिः ३० हतस्तरिष्टोबलवान्निःशृंगश्चकृतोव्रजे
अबालोबाल्यमास्थायरमतेशिशुलीलया ३१ प्रबंधःकर्मणामेवतस्यगोव्रजवासिनः सन्निकृष्टंभयंचैवकेशिनोममचध्रुवम् ३२ भू
तपूर्वश्चमेमृत्युःसनूनंपूर्वदैहिकः युद्धाकांक्षीचसयथातिष्ठतीहसमाग्रतः ३३ क्वचगोपत्वमशुभमानुष्यंमृत्युदुर्बलम् क्वचदेवप्रभा-
वेनक्रीडितंव्रजेमम ३४ अहोनीचेनवपुषाछादयित्वात्मनोवपुः कोप्ययंरमतेदेवःश्मशानस्थइवानलः ३५ श्रूयतेहिपुराविष्णुःसु
राणांकारणांतरे वामनेनतुरूपेणजहारपृथिवीमिमाम् ३६ कृत्वाकेसरिणोरूपंविष्णुनाप्रभविष्णुना हतोहिरण्यकशिपुर्दानवानांपि
तामहः ३७

पितः २२ पूर्यमाणःपर्वणिअंबुदःसमुद्रः २३ गतिंनलंयोगंवशीकरणोपायम् २४ दैवैरपीतिदेवेभ्योप्यधिकइतिसोनुमीयते २५ २६ २७ यो
गंनागपाशबंधंकृत्वाछित्वा २८ २९ ३० ३१ प्रबंधःघटनाप्रकारः ३२ ३३ मृत्युदुर्बलंमृत्युयोगेनदुर्बलम् ३४ ३५ ३६ ३७ छ छ छ

भवेनरुद्ररूपिणा विष्णुनातत्प्रसिद्धं ब्रह्मणोवरदानादभेद्यमासीत्तदित्यर्थः ३८ चालितइतिगुरुपुत्रेण कचेन भार्गवः शुक्रः चालितः मृतसंजीविनीं विद्यांकस्मै-
चिदपिनदास्यामीत्येतस्मान्नियमात् भ्रंशितः कथमित्यत आह दार्दुरीं मायांप्रविश्येति यथा दर्दुरो मृत्वापुनः पुनरुत्तिष्ठति एवंकचोपिदानवैर्भ्यासकृन्मृत्युमासाद्यगु
रूदरंप्रवेशितस्ततोगुरोः सकाशात्विद्यांप्राप्यतदुदरंभित्वापुनरुत्थितः मृतंचगुरुंपुनर्जीवितवान्ततस्तामेवदानवैः कृतांकचहत्यांनिमित्तीकृत्यदानवेषुदेवोनव
वर्षेत्यर्थः एवंदानवानांविनाशः रुद्रद्वारात्रिपुरस्यचकचद्वाराप्यनेनैवकृतइतिभावः ३९ सहस्रशिरसइत्यदंतत्वमार्षम् ४० चक्रेकारितवान् ४१ अकूपारेसमुद्रे

अचिंत्यरूपमास्थायश्वेतशैलस्यमूर्द्धनि भवेनच्यावितादैत्याः पुरातत्त्रिपुरंघ्नता ३८ चालितोगुरुपुत्रेण भार्गवोंगिरसेनवै प्रविश्य
दार्दुरींमायामनावृष्टिंचकारह ३९ अनंतःशाश्वतोदेवःसहस्रशिरसोव्ययः वाराहरूपमास्थायप्रोज्जहारार्णवान्महीम् ४० अमृतेनि
र्मितेपूर्वंविष्णुःस्त्रीरूपमास्थितः सुराणामसुराणांचयुद्धंचक्रेसुदारुणम् ४१ अमृतार्थेपुराचापिदेवदैत्यसमागमे दधारमंदरंविष्णु
रकूपारेइतिश्रुतिः ४२ वपुर्वामनमास्थायनंदनीयपुराबलेः त्रिभिःक्रमैस्तुत्रीन्लोकान्जहारत्रिदिवालयम् ४३ चतुर्धातेजसोभा
गंकृत्वादाशरथेगृहे सएवरामसंज्ञोवैरावणंव्यनशत्तदा ४४ एवमेषनिकृत्यावैतत्तद्रूपमुपागतः साधयित्वात्मनःकार्यंसुराणामर्थसिद्ध
ये ४५ तदेषनूनंविष्णुर्वाशक्रोवामरुतांपतिः मत्साधनेच्छयाप्राप्तोनारदोमांप्रयुक्तवान् ४६ अत्रमेशंकतेबुद्धिर्वसुदेवंप्रतिध्रुवा अस्यबु
द्धिविशेषेणवयंकांतरतांगताः ४७ अहंहिरैवतंगतवनेनारदेनसमागतः द्वितीयस्त्विहमांविप्रःपुनरेवाब्रवीद्वचः ४८ यस्त्वयाहिकृतोयत्नः
कंसगर्भकृतेमहान् वसुदेवेनतेरात्रौतत्कर्मविफलीकृतम् ४९ दारिकायात्वयारात्रौशिलायांकंसपातिता तांयशोदासुतांविद्धिकृष्णंच
वसुदेवजम् ५० रात्रौव्यावर्तितावेतौगर्भौतववधायवै वसुदेवेनसंधायमित्ररूपेणशत्रुणा ५१ सातुकन्यायशोदायाविंध्येपर्वतसत्तमे ह
त्वाशुंभनिशुंभौद्वौदानवौनगचारिणौ ५२ कृताभिषेकावरदाभूतसंघनिषेविता अर्च्यतेदस्युभिर्घोरैर्महाबलिपशुप्रिया ५३ सुरा-
पिशितपूर्णाभ्यांकुंभाभ्यामुपशोभिता मयूरांगदचित्रैश्चबर्हभारैर्विभूषिता ५४ हृष्टकुक्कुटसंनादंवनंवायसनादितम् मृगसंघैश्च
संपूर्णंसंविरुद्धैश्चपक्षिभिः ५५ सिंहव्याघ्रवराहाणांनादेनप्रतिनादितम् वृक्षगंभीरनिबिडंकांतारैःसर्वतोवृतम् ५६ दिव्यभृंगारुचमरै
रादर्शैरुपशोभितम् देवतूर्यनिनादैश्चशतशःप्रतिनादितम् ५७ स्थानंतस्यानगेविंध्येनिर्मितंस्वेनतेजसा रिपूणांत्रासजननीनित्यंतत्रम-
नोरमे ५८

कच्छपोभूत्वेतिशेषः ४२ लोकान् आक्रममाणस्त्रिदिवालयंस्वर्गंजहार ४३ व्यनशत् विनाशितवान् ४४ निकृत्याछलेन ४५ मत्साधनेच्छयामद्वधेच्छ
या ४६ ४७ द्वितीयंद्वितीयंवारम् ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ भृंगारुःकनकपात्रंगडुकम् ५७ ५८ छ॰ छ॰ छ॰ छ॰

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५९ महतांकर्मणांपूतनावधादीनांकारणंहेतुम् द्वितीयइतिरामापेक्षयासोपिवसुदेवाज्जातइतिवासुदेवोभवत्येव ६० ६१ ६२ ६३ ६४ अनुबंधेनकार्यानुरो
धेनदारुणांदारुणोदर्काम् ६५ ६६ बांधवकाम्ययामित्रेच्छयामित्रकामेनेत्यर्थः ६७ हस्तिनामिति यथाहस्तिनांकलहेवीरुधोनश्यंति ननुहस्तिनएवंममचक्र

वसुतेपरमप्रीतादैवतैरपिपूजिता यस्त्वयंनंदगोपस्यकृष्णइत्युच्यतेसुतः ५९ अत्रमेनारदःप्राहस्कमहत्कर्मकारणम् द्वितीयोवसुदे
वाद्वैवासुदेवोभविष्यति ६० सुहितेसहजोमृत्युर्बांधवश्चभविष्यति सएववासुदेवोवैवसुदेवसुतोबली ६१ बांधवोधर्मतोमह्यंदर्शनो
तकोरिपुः यथाहिवायसोमूर्ध्निपद्मायस्यावतिष्ठति ६२नेत्रेतुदारितस्यैववक्त्रेणामिषगृद्धिना ६२ वसुदेवस्तथैवायंसपुत्रज्ञातिबांधवः
छिनत्तिममसूलानिमुक्तेचममपार्श्वतः ६३ भ्रूणहत्यापिसंतापोगोवधःस्त्रीवधोपिवा नकृतमस्यलोकोस्तिबांधवस्यविशेषतः ६४ प
तितानुगतमार्गंनिषेवस्यचिरेणसः यःकृतघ्नोनुबंधेनप्रीतिवहतिदारुणाम् ६५ नरकाध्युषितःपंथागंतव्यस्तेनदारुणः अपापेपापहृद
योयःपापमनुतिष्ठति ६६ अहंवास्वजनःश्लाघ्यःसवाश्लाघ्यतरःकृतः नियमैर्गुणवृत्तेनत्वयाबाधवकाम्यया ६७ हस्तिनांकलहेघोरेव
रः ६९ कालस्त्वंहिविनाशायमयापुष्टोविजानता वसुदेवकुलस्यास्ययद्विरोधयसेभृशम् ७० अमर्षीवैरशीलश्चसदापापमतिःशठः
स्थानेयदुकुलमूढशोचनीयत्वयाकृतम् ७१ वसुदेववृथावृद्धयन्मयात्वंपुरस्कृतः श्वेतेनाशिरसावृद्धोनैववर्षशतैर्भवेत् ७२ यस्य-
बुद्धिःपरिणतासवैवृद्धतरोनृणाम् नतेनवृद्धोभवतियेनास्यपलितंशिरः ७३ त्वंचकर्कशशीलश्चबुद्ध्याचनबहुश्रुतः केवलंवयसावृ
द्धोयथाशरदितोयदः ७४ किंत्वंसाधुजानीषेवसुदेवतृथामते हतेकंसेममसुतोमथुरांपालयिष्यति ७५ छिन्नाशस्त्वंवृथावृद्धोममि
थ्यात्वंविचारितम् जिजीविषुर्नसोप्यस्तियोवैतिष्ठेन्ममाग्रतः ७६ मद्दर्तुकामोविश्वस्तेयस्त्वंदुष्टेनचेतसा तत्तेप्रतिकरिष्यामिहपुत्र
वर्धितः पितृष्वसुश्चमेभर्त्तायदूनांप्रथमोगुरुः ७९ कुलेमहतिविख्यातःप्रथितेचक्रवर्तिनाम् गुर्वर्थपूजितःसद्भिर्महद्भिर्धर्मबुद्धिभिः
८०

ष्यास्यचकलहेवसुदेवादयएवनंक्ष्यंतिनत्वायामितिश्लोकद्वयार्थः ६८ ६९ ७० शठोमिथ्याविनीतश्चशठोगूढापराधकृदितिकोशात्त्वयाकुलंय
नशोचनीयंतत्स्थानेयुक्तमित्यर्थः ७१ हेवृद्धयत्यतोमयात्वंपुरस्कृतोऽतोहंवृथाव्यर्थजन्मासमीत्यर्थः ७२ ७३ ७४ ७५ ७६ ७७ मेमया ७८ जातश्चासौसंवृद्ध
श्चजातसंवृद्धः पितृष्वसुरितिपितृव्यसंबंधिन्याःस्वसुरिति ७९ चक्रवर्तिनां यस्यमूर्द्धनिदृश्येत विनाछत्रेणभूपतेः पद्मानुकारिणीछायातमाहुश्चक्रवर्तिनामित्युक्त
लक्षणानां ८०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८१ जयोवाक्षितिशेषउभयथापिलज्जया अवगुंठिता आच्छादितमुखाः यदूनांपुरुषाअस्यंति एकेनकपटिनांसर्वेषुकपटित्वापवादप्रसंगादिति भावः ८२ त
देवाह त्वयेतिवाच्यानिंद्याः ८३ ८४ दानपतेहेअक्रूर ८५ वाच्यस्त्वयावक्तव्यः ८६ ८७ कालनिर्माणयोधिनौ समयानुसारियुद्धकुशलौ व्यायतोद्यमौदीर्घ

किंकरिष्यामहेसर्वेसत्कृवक्तव्यतांगताः यदूनांपृथसुरव्यस्ययस्यतेवृत्तमीदृशम् ८१ मद्धीवाजयोवापिवसुदेवस्यदुर्नयैः सत्कृथा
स्यतिपुरुषायदूनामवगुंठिताः ८२ त्वयाहिमद्धीपापेयतर्कमाणेनवैमृधे अविश्वास्यकृतकर्मवाच्याश्चयदवःकृताः ८३ अथास्यवैर
मुत्पन्नमसकृष्णस्यचोभयोः शांतिमेकतरेशांतिगतेयास्यतियादवाः ८४ गच्छदानपतेक्षिप्रंताविहानयितुंव्रजात् नंदगोपंचगोपां-
श्चकरदान्ममशासनात् ८५ वाच्यश्चनंदगोपोवैकरमादायवार्षिकम् शीघ्रमागच्छनगरंगोपैःसहसमन्वितः ८६ कृष्णसंकर्षणौचे
ववसुदेवसुतावुभौ द्रष्टुमिच्छतिवैकंसःसभृत्यःसपुरोहितः ८७ एतौयुद्धविदौरंगेकालनिर्माणयोधिनौ दृढौचकृतिनौचैवश्रृणोमि
व्यायतोद्यमौ ८८ अस्माकमपिमल्लौद्वौसज्जौयुद्धकृतोत्सवौ ताभ्यांसहनियोत्स्येतेतौयुद्धकुशलावुभौ ८९ द्रष्टव्यौचमयावश्यंवा
लौतावमरोपमौ पितृष्वसुःसुतौमुख्यौव्रजवासौवनेचरौ ९० वक्तव्यश्चव्रजेतस्मिन्समीपव्रजवासिनाम् राजाधनुर्मखंनामकारयि
ष्यतिवैसुखी ९१ सन्निकृष्टवनेतेतु निवसंतुयथासुखम् जनस्यामंत्रितस्यार्थेयथास्यात्सर्वमव्ययम् ९२ पयसःसर्पिषश्चैवदध्नोद
ध्नुत्तरस्यच यथाकामप्रदानायभोज्याधिश्रयणायच ९३ अक्रूरगच्छशीघ्रंत्वंतावानयममाज्ञया संकर्षणंचकृष्णंचद्रष्टुंकौतूह-
लंहिमे ९४ तयोरागमनंप्रीतिःपरमासंस्कृताभवेत् दृष्टातुतौमहावीर्यौतद्विधास्यामियद्धितम् ९५ शासनंयदिवाभूत्वामत्तो-
परिभाषितम् नागच्छेतांयथाकालंनिग्राह्यावपितौमम ९६ सात्वमेवतुबालेषुप्रधानंप्रथमोनमः मधुरेणैवतौमंदौस्वयमेवानयाशु
वै ९७ अक्रूरकुरुमेप्रीतिमेतांपरमदुर्लभाम् यद्येवानोपजप्तोसिवसुदेवेनसुव्रत ९८ तथाकर्तव्यमेतद्धियथातौतागमिष्यतः एव
माक्षिप्यमाणोपिवसुदेवोवसूपमः ९९सागराकारमात्मानंनिश्चकंपमधारयत् ९९ वाक्शल्यैस्ताड्यमानस्तुकंसेनादीर्घदर्शिना क्ष
मामनसिसंधायनोत्तरंप्रत्यभाषत १०० येतुतंददृशुस्तत्राक्षिप्यमाणमनेकधा धिग्धिगित्यसकृत्तेवैशनैःस्म्रुचुरवाङ्मुखाः १०१ अक्रू
रस्तुमहातेजाजानन्दिव्येनचक्षुषा जलंदृष्ट्वेवतृषितःप्रेषितःप्रीतिमानभूत् १०२

यत्तौ ८८ मल्लौचाणूरमुष्टिकौनियोत्स्येतेयुद्धंकरिष्यतः ८९
पितृष्वसुरितिपितृव्यसंबंधिन्याःस्वसुरितिज्ञेयं कालभेदेनयथाश्रुतमेवास्तु ९० ९१ ९२ दध्नुत्तरस्यदधिमंडस्यतक्रस्यवा भोज्याधिश्रयणायच भोज्यंपायसवदन्नं ३६
कर्तुंयत् अधिश्रयणंक्षीरस्यतस्मै ९३ ९४ ९५ ९६ ९७ उपजप्तोभेदितः ९८ सागराकारम् अतिगंभीरं आत्मानंमनः ९९ १०० १०१ १०२ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तस्मिन्नेवमुहूर्तेमध्यरात्रे १०३ इतिहरिवंशेविष्णुपर्वणिटीकायांद्वाविंशोऽध्यायः २२ क्षिप्रमिति १ अंधकःकंकापरनामाउग्रसेनस्यपितामह इतिमान्वः
२ ३ ४ इक्ष्वाकुवंशजोअसमंजाः यथाप्रजापीडकःसन्पित्रानिवृत्तोजातः सएवत्वंपुनर्जातइत्यर्थः ५ सहजंअविकृतंतेतवशिरःउत्तमांगंप्रत्युत्कृत्यकुंडलंजटीमुंड
इतिलक्षणयामूर्द्धन्यान्बध्वोपच्छिधिवेत्यर्थः ६ ७ गौणंवैफल्यं ८ ९ असाधुभिःनिंदादियुक्तैःविवृत्तःस्पष्टीकृतः १० ११ अंतर्गतान्योगबलार्जि

तस्मिन्नेवमुहूर्तेतुमथुरायांसनिर्ययौ प्रीतिमान्पुंडरीकाक्षंद्रष्टुंदानपतिःस्वयम् १०३ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णु
पर्वणिअक्रूरप्रस्थानंनामद्वाविंशोऽध्यायः २२ वैशंपायनउवाच क्षिप्रंयदुवृषंदृष्ट्वासर्वेतेयदुपुंगवाः निपीड्यश्रवणान्हस्तै-
र्मेनिरेतंगतायुषम् १ अंधकोऽनुद्विग्नमनाधैर्याद्विक्लवंवचः प्रोवाचवदतांश्रेष्ठःसमाजेकंसमोजसा २ अश्लाघ्योमहतांपुत्रतेवायं
वाक्यपरिश्रमः अयुक्तोगर्हितःसद्भिर्बांधवेषुविशेषतः ३ अयादवोयदिभवान्शृणुतावद्यदुच्यते नहित्वांयादवंवीरंबलात्कुर्वंतियादवाः
४ अश्लाघ्यावृष्णयःपुत्रयेषांत्वमनुशासिता इक्ष्वाकुवंशजोराजाविनिवृत्तःस्ववंशकृत् ५ भोजोवायादवोवासिकंसोवासियथातथा
सहजंतेशिरस्तातजटीमुंडोपिवाभव ६ उग्रसेनस्त्वयंश्लाघ्योयोस्माककुलपांसनः दुर्जातोयेनयेनत्वमीदृशोजनितःसुतः ७ नचात्मनो
गुणांस्तातप्रवदंतिमनीषिणः परेणोक्तागुणागौणंयांतिवृद्धार्थसंमिताः ८ पृथिव्यांयदुवंशोयंनिंदनीयोमहीक्षिताम् बालःकुलांतक
न्मूढोयेषांत्वमनुशासिता ९ एतैरसाधुभिर्वाक्यैस्त्वयासाध्वितिभाषितैः नचाप्यास्वादितंकार्यमात्माचविवृतःकृतः १० गुरोरनवलिप्त
स्यमान्यस्यमहतामपि क्षेपणंकःशुभंमन्येद्विजस्येववधंकृते ११ मान्याश्चैवाभिगम्याश्चवृद्धास्तातयथाग्नयः क्रोधोहितेषांप्रदहेत्
लोकानंतर्गतानपि १२ बुधेनतातदानेननित्यमभ्युक्षितात्मना धर्मस्यगतिरन्वेष्यामत्स्यस्येवगतिरप्स्विव १३ केवलंत्वंतुदर्पेणवृद्धानग्नि
समानिह वाचातुदसिसमक्ष्यात्वमंत्रोक्तायथाहुतिः १४ वासुदेवंचपुत्रार्थेयदिमंपरिगर्हसि तत्रमिथ्याप्रलापंतेनिंदामिकृपणंवचः
१५ दारुणेचपितापुत्रेनैवदारुणतांव्रजेत् पुत्रार्थेह्यापदःकष्टाःपितरःप्राप्नुवंतिहि १६ छादितोवसुदेवेनयदिपुत्रःशिशुस्तदा मन्यसे
यद्यकर्तव्यंतद्यच्छपितरंस्वकम् १७ गर्हतोवसुदेवंचयदुवंशंचनिंदता त्वयायादवपुत्राणांवैरंजविषमर्जितम् १८ अकर्तव्यंयदिकृतंव
सुदेवेनपुत्रजम् किमर्थमुग्रसेनेनशिशुस्त्वंननिपातितः १९ पुन्नाम्नोनरकात्पुत्रोयस्मात्त्रातापितॄंस्तदा तस्माद्ब्रुवंतिपुत्रेतिपुत्रंधर्मविदोज-
नाः २० जात्याहियादवःकृष्णःसचसंकर्षणोयुवा त्वंचापिविधृतस्ताभ्यांजातवैरेणचेतसा २१

तानपि १२ १३ १४ १५ १६ १७ १८
१९ २० जात्यांहिउत्पत्तावेवत्वयाजातवैरेणचेतसाकृष्णःसंकर्षणश्चधृतः ताभ्यांचत्वमपितथैवजातवैरेणचेतसाधृतंइतित्वमेवबालघ्नःप्रथमोपराधीइत्यर्थः २१ ६१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उद्भूतानि अतिकंपितानि २२ २३ २४ एषइतिसर्वतोभद्रचक्रेकंसस्यजन्मनक्षत्रंमृगशिरः ततोदशमंचित्रातस्यैवनक्षत्रंतत्रघोरोग्रहः राहुः क्रूरोस्तिकुजश्च- वक्रीभूयतत्रैवागतोस्तिताभ्यांकर्मभंव्याप्यजन्मभंविद्धमितितज्जीवनार्थोयत्नः सर्वोनिष्फलोभविष्यतिदेहश्चनंक्ष्यतीतिभावः २५ एवंपश्चिमायामुदितोबुधो- पिराज्यभंगकृदित्याहबुधेनेतिअतिचारंसूर्यमुल्लंघ्यगमनं यथाचबुधसूर्यशुक्राणां अत्यंतंपृथग्दर्शनंमहतेनाशायभवतीतिभावः २६ केतुनापुच्छेनधूमकेतो रुत्पातविशेषस्यभरण्यादीनीतिकंसस्यजन्मकर्मभेधूमकेतुनातृतीयेणउपग्रहेणापिविद्धेइत्यर्थः नानुयांति निशाकरमित्यनेनचित्रास्थेराहौ चित्रातः उत्तराणित्रयो

उद्भूतानीहसर्वेषांयदूनांहृदयानिवै वसुदेवेत्वयाक्षिप्तेवासुदेवेचकोपिते २२ कृष्णेचभवतोद्वेष्येवसुदेवविगर्हणात् शंसंतिचेमानि भयंनिमित्तान्यशुभानिते २३ सर्पाणांदर्शनंतीव्रस्वभानाचनिशाक्षये पुर्यावैधव्यशंसीनिकारणैरनुमीमहे २४ एषघोरोग्रहःस्वातिसु ह्लिखन्नरवेगभस्तिभिः वक्रसंगारकश्चक्रेचित्रायांघोरदर्शनः २५ बुधेनपश्चिमासंध्याव्यासाघोरेणतेजसा वैश्वानरपथेसुक्रोह्यतिचारंचचा रह २६ केतुनाधूमकेतोस्तनक्षत्राणित्रयोदश भरण्यादीनिभिन्नानिनानुयांतिनिशाकरम् २७ प्राक्संध्यापरिघग्रस्ताभाभिर्बाधतिभा स्करम् प्रतिलोमंचयात्येवव्याहरतोमृगद्विजाः २८ शिवास्मशानान्निष्क्रम्यनिःश्वासांगारवर्षिणी उभेसंध्येपुरींघोरापर्येतिबहुवासती २९ उल्कानिर्घातनादेनपपातधरणीतले चलत्यपर्वणिमही गिरीणांशिखराणिच ३० ग्रस्तःस्वर्भानुनासूर्योदिवानक्तमजायत धूमोत्पा तैर्दिशोव्यासाशक्राशनिसमाहताः ३१ प्रस्रवंतिधनारक्तंसाशनिस्तनयित्नवः चलितादेवतास्थानात्त्यजंतिविहगानगान् ३२ या- निराजविनाशायदैवज्ञाःकथयंतिह तानिसर्वाणिपश्यामोनिमित्तान्यशुभानिवै ३३ त्वंचापिस्वजनद्वेषीराजधर्मपराङ्मुखः अनिमित्ता गतक्रोधः सन्निकृष्टभयोह्यसि ३४ यस्त्वंदेवोपमंवृद्धंवसुदेवंवसूपमम् मोहात्क्षिपसिदुर्बुद्धेकुतस्तेशांतिरात्मनः ३५ त्वद्गतोयोहि नःस्नेहस्तंत्यजामोद्यवैवयम् अहितंस्वस्यवंशस्यनत्वांवयमुपास्महे ३६ सहिदानपतिर्धन्योयोद्रक्ष्यतिवनेगतम् पुंडरीकविशालाक्षं कृष्णमक्लिष्टकारिणम् ३७ छिन्नमूलोह्ययंवंशोयदूनांत्वत्कृतेकृतः कृष्णोज्ञातीन्समानाय्यसंधानंकरिष्यति ३८ क्षांतमेवत्वया- नेनवसुदेवेनधीमता कालःसम्यक्परिज्ञातोब्रूहित्वंयद्यदिच्छसि ३९ मह्यंतुरोचतेकंसवसुदेवसहायवान् गच्छकृष्णस्यनिलयंसं धित्तेनचरोच्यताम् ४०

दशनक्षत्राणिजीवपक्षेसतिपूर्वाणित्रयोदशनक्षत्राणिमृत्युपक्षेपतितानि अतस्तत्रत्यः चंद्रोपिनतैर्नक्षत्रैरुत्तमफलकरत्वेनानुगम्यतइत्य र्थः २७ परिघोरविसंडलेतिर्यग्रक्तिर्दंडः बाधतिबाधते २८ पर्येतिपरिक्रामतिवासतीशब्दंकुर्वाणा २९ अपर्वणि अकांडे अकस्मादितियावत् ३० ३१ देवताः देवता २७ प्रतिमाः ३२ ३३ ३४ ३५ ३६ ३७ त्वत्कृतेत्वदर्थंत्वयैवेत्यर्थः संधानंइतस्ततोविप्रकीर्णानांयादवानामानयनेनएकीकरणं ३८ कालेनसम्यक्परिगतनप्रज्ञानंयस्यसः कालः सम्यक्परिज्ञातः ३९ ४०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीमहाभारते हरिवंशे विष्णुपर्वणि टीकायां त्रयोविंशतितमोऽध्यायः २३ अंधकस्येति १ २ ३ ४ प्रागेव अक्रूरप्रेषणात् केशिनः निकटे इतिशेषः ५ ६ वा
जिरूपो दैत्यः ७ निरवग्रहः उच्छृंखलः ८ ९ १० ११ ईरिणं शून्यं १२ १३ निःसंपातः अगम्यः १४ नृशब्दानुसरः मनुष्यशब्दानुसारी कालधर्मणा मृत्यु

इतिश्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि अंधकवचने त्रयोविंशतितमोऽध्यायः २३ वैशंपायन उवाच अंधकस्य वचः श्रु
त्वा कंसः संरक्तलोचनः न किंचिदब्रवीत्क्रोधात् विवेश स्वनिकेतनम् १ ते च सर्वे यथावेश्म यादवाः श्रुतविस्तराः जग्मुर्विगतसंकल्पाः
कंसवेक्षकृत शासिनः २ अक्रूरोपि यथाज्ञप्तः कृष्णदर्शनलालसः जगाम रथमुख्येन मनसा तुल्यगामिना ३ कृष्णस्यापि निमित्तानि
शुभान्यंगगतानि वै पितृतुल्येन शंसंति बांधवेन समागमम् ४ प्रागेव वचनाद्राज्ञो गत्वा माथुरपोऽग्रसेनिना केशिनः प्रेषितो दूतो वधा
योपेंद्रकारणात् ५ स च दूतवचः श्रुत्वा केशी क्लेशकरो नृणाम् वृंदावनगतो गोपान्बाधते स्म दुरासदः ६ मानुषं मांसमश्नानः क्रुद्धो
दुष्टपराक्रमः दुर्दांतो वाजिदैत्योसावकरोत्कदनं महत् ७ निघ्नन्गावैस गोपालान्गवां पिशितभोजनः दुर्मदः कामचारी च स केशी
निरवग्रहः ८ तदरण्यं स्मशानाभं नृणां मांसास्थिभिर्वृतम् यत्रास्ते स हि दुष्टात्मा केशी तुरगदानवः ९ खुरैर्दारयते भूमिं वेगेनारुज
ते द्रुमान् हेषितैः स्पर्द्धते वायुं प्लुतैर्लंघयते नभः १० अतिप्रवृद्धो मत्तश्च दुष्टोऽश्वो वनगोचरः आकंपितसटो रौद्रः कंसस्य चरितानुगः
११ ईरिणं तद्वनं सर्वं तेनैव घोरकर्मणा कृतं तुरगदैत्येन सर्वान्गोपान्जिघांसता १२ तेन दुष्टप्रचारेण दूषितं तद्वनं महत् न नृभिर्गो
धनैर्वापि सेव्यते वनवृत्तिभिः १३ निःसंपातः कृतः पंथास्तेन तद्विषयाश्रयः मदाच्चलितवृत्तेन नृमांसान्यश्नता भृशम् १४ नृशब्दानु
सरः क्रुद्धः स कदाचिद्वनागमे जगाम घोषसंवासं चोदितः कालधर्मणा १५ तं दृष्ट्वा दुद्रुवुर्गोपाः स्त्रियश्च शिशुभिः सह क्रंदमाना ज
गन्नाथं कृष्णं नाथमुपाश्रिताः १६ तासां रुदितशब्देन गोपानां क्रंदितेन च दत्वाभयं तु कृष्णो वै केशिनं सोभिदुद्रुवे १७ केशी चाप्युन्न
तग्रीवः प्रकाशदशनेक्षणः हेषमाणो जवोदग्रो गोविंदाभिमुखो ययौ १८ तमापतंतं संप्रेक्ष्य केशिनं हयदानवम् प्रत्युज्जगाम गोविंद
स्तोयदः शशिनं यथा १९ केशिनस्तं तमभ्याशे दृष्ट्वा कृष्णमवस्थितम् मनुष्यबुद्ध्या गोपाः कृष्णमूचुर्हितैषिणः २० कृष्ण तात न खल्वे
षः सहसा ते हयाधमः उपसर्प्यो भवान्बालः पापश्चैष दुरासदः २१ एष कंसस्य सहजः प्राणस्तात बहिश्चरः उत्तमश्च हयेंद्राणां दानवोऽप्रति
मो युधि २२ त्रासनः सर्वभूतानां तुरगाणां महाबलः अवध्यः सर्वभूतानां प्रथमः पापकर्मणाम् २३

ना १५ १६ १७ जवोदग्रः उग्रः १८ १९ २० २१ २२ २३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२४ २५ वलयोल्ललाटस्थाः क्रोधजं क्रोधात्प्रस्विन्नं २६ रजसा खुरोत्थूतेन वृतं मिश्रं फेनं अथर्येति व्योम्नो विशेषणं अरूषिरेगादेनरजसा व्याप्तेइत्यर्थः नीहारं अवश्यायं एतेनायं मंत्रउपसंहितः नता अर्वा रेणुककाटो अस्तुतेन संस्कृतत्र सुपपतिता अभि उरुगायप्रभयंतस्पता अनुगावो मर्तस्य विचरंतियज्वनइति ताःगा अर्वा अश्वरूपी असुरः रेणुककटिति अतिशयेनवर्षतितेनवा अवृणोति विश्वमितिरेणुककाटः कटेवर्षाचरणयोरित्यस्मात्यङ्लुकि घञ् न अस्तुतेन व्याप्नोति संस्कृतः संस्कारोदाहच्छेदो पथ्यपानादिस्तेनत्रायतइति संस्कृतत्रो वैद्यस्तं प्रत्यर्पिताः गावः न अभ्युपयंति निर्बाधत्वात् यतस्ताः गावः मर्तस्य यज्वनः नंदादेः संबं

गोपानां तद्वचः श्रुत्वा वदतां मधुसूदनः केशिना सह युद्धाय मतिं चक्रे रिसूदनः २४ ततः सव्यं दक्षिणं च मंडलं संपरिक्रमन् पद्भ्यामुभाभ्यां स हयः क्रोधेनारुजते द्रुमान् २५ मुखे लंबसटे चास्य स्कंधे केशाघनावृते वलयं चांगतरंगाभाः सुस्रुवुः क्रोधजं जलम् २६ सफेनं वक्त्रजं चैव ववर्ष रजसा वृतम् हिमकाले यथा व्योम्नि नीहारमिव चंद्रमाः २७ गोविंदं स रविंदाक्षं हेषितोद्गारसीकरैः सफेनैर्वक्त्रनिर्गोर्णैः प्रोक्षयामास भारत २८ खुरोद्भूतावसिक्तेन मधुकक्षोदपांडुना रजसा स हयः कृष्णं चकारारुणमूर्धजम् २९ प्लुतवल्गितपादस्तु तक्षमाणो धरां खुरैः दंतान्निर्दशमानस्तु केशी कृष्णमुपाद्रवत् ३० स संसक्तस्तु कृष्णेन केशी तुरगसत्तमः पूर्वाभ्यां चरणाभ्यां वै कृष्णं वक्षस्यताडयत् ३१ पुनः पुनः स च बली प्राहिणोत्पार्श्वतः खुरान् कृष्णस्य दानवो घोरं प्रहारममितौजसः ३२ वक्त्रेण चास्य घोरेण तीक्ष्णदंष्ट्रायुधेन वै अदशद्बाहुशिखरं कृष्णस्य रुषितो हयः ३३ स लंबकेसरसटः कृष्णेन सह संगतः रराज केशी मेघेन संसक्तः खइवांशुमान् ३४ उरस्तस्योरसा हंतुमियेष बलवान् हयः वेगेन वासुदेवस्य क्रोधाद्द्विगुणविक्रमः ३५ तस्योत्सिक्तस्य बलवान् कृष्णोऽप्यमितविक्रमः बाहुमाभोगिनं कृत्वा मुखे क्रुद्धः समादधत् ३६ स तं बाहुमशक्तो वै खादितुं भेत्तुमेव च दशनैर्मूलनिर्मुक्तैः सफेनं रुधिरं वमन् ३७ विपाटिताभ्यामोष्ठाभ्यां कटाभ्यां विदलीकृतः अक्षिणी विकृते चक्रे विसृते मुक्तबंधने ३८ निरस्तहनुराविष्टः शोणिताक्तविलोचनः उत्कर्णो नष्टचेष्टस्तु स केशी चक्रवद्भ्रमन् ३९ उत्पतन्न सकृत्पादैः शकृन्मूत्रं समुत्सृजन् स्विन्नांगरोमा श्रांतश्च निर्यत्नचरणोऽभवत् ४० केशिवक्त्रविलग्नस्तु कृष्णबाहुरशोभत व्यामुग्नइव घर्मांते चंद्रार्धकिरणैर्घनः ४१ केशी च कृष्णसंसक्तः श्रांतगात्रो व्यरोचत प्रभातावनतश्चंद्रः श्रांतो मेरुमिवाश्रितः ४२

धिन्यः अभयंउरुगाय महाकीर्ति अतुलक्षीकृत्यचरंतीतिमंत्रार्थः २७ २८ खुरोत्थूतं तत्र तदवसिक्तं व्याप्तं तेन मधुकक्षोदो मधुयष्टिचूर्णं तद्वत्पांडुनारजसा २९ ३० ३१ ३२ ३३ ३४ ३५ आभोगिनं अतिप्रवृद्धं ३६ ३७ कटाभ्यां गंडाभ्यां ३८ उत्कर्णः ऊर्ध्वकर्णः उत्क्षिप्तइतिवा ३९ ४० व्यामुग्नो वावक्रेण मंडलेन वेष्टितार्द्रइत्यर्थः ४१ अवनतो मंदतेजाः ४२ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४३ स्वायतंअतिपुष्टं ४४ ४५ ४६ ४७ पशोर्महिषरूपस्य ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ हता अनेनेतिच्छेदः संधिरार्षः ५६ संवर्तकंप्रल

तस्यकृष्णभुजोत्पूताःकेशिनोदशनामुखात् पेतुःशरदिनिस्तोयाःसिताभ्रावयवाइव ४३ सतुकेशीभृशंश्रांतःकृष्णेनाक्लिष्टक
र्मणा स्वभुजस्यायतंकृत्वापाटितोबलवत्तदा ४४ सपाटितोभुजेनाजौकृष्णेनविकृताननः केशीनदन्महानाददानवोव्यथितस्तदा ४५
विघूर्णमानःस्रस्तांगोमुखाद्रुधिरमुद्वमन् भृशव्यंगीकृतवपुर्निकृन्तान्द्रइवाचलः ४६ व्यादितास्योमहारौद्रःसोसुरःकृष्णबाहुना नि
पपातयथाकृत्तोनागोहिद्विदलीकृतः ४७ बाहुनाकृत्तदेहस्यकेशिनोरूपमाबभौ पशोरिवमहाघोरंनिहतस्यपिनाकिना ४८ द्विपाद
पृष्ठपुच्छार्द्धश्रवणेकाक्षनासिके केशिनस्तेद्विधाभूतेद्वेचार्द्धेरेजतुःक्षितौ ४९ केशिदंतक्षतस्यापिकृष्णस्यसुशुभेभुजः वृद्धस्तालइवार
ण्येगजेंद्रदशनांकितः ५० तंहत्वाकेशिनंयुद्धेकल्पयित्वाचभागशः कृष्णःपद्मपलाशाक्षोहसंस्तत्रैवतस्थिवान् ५१ तंहतंकेशिनंदृष्ट्वा
गोपागोपस्त्रियस्तथा बभूवुर्मुदिताःसर्वेहतविघ्नाहृतक्लमाः ५२ दामोदरंतुश्रीमंतंयथास्थानंयथावयः अभ्यनंदन्प्रियैर्वाक्यैःपूज
यंतःपुनःपुनः ५३ गोपाऊचुः अहोतातकृतंकर्महतोयंलोककंटकः दैत्यःक्षितिचरःकृष्णहयरूपंसमास्थितः ५४ कृतंदावन
क्षेमंसेव्यंनृमृगपक्षिणाम् घ्नतापापमिमंतातकेशिनंहयदानवम् ५५ हतानोबहवोगोपागावोवत्सेषुवत्सलाः नैकेचान्येजनपदाहृ
तानेनदुरात्मना ५६ एषसंवर्तकःकर्तुमुद्यतःखलुपापकृत् नृलोकंनिर्नरंकृत्वावस्तुकामोयथासुखम् ५७ नैतस्यप्रमुखेस्थातुंकश्चि
च्छक्तोजिजीविषुः अपिदेवसमूहेषुकिंपुनःपृथ्वीतले ५८ अथाहांतर्हितोविप्रोनारदःखगमोमुनिः प्रीतोस्मिविष्णोदेवेशकृष्णकृ-
ष्णेतिचाब्रवीत् ५९ नारदउवाच यदिदंदुष्करंकर्मकृतंकेशिजिघांसया त्वय्येवकेवलंयुक्तंत्रिदिवेत्र्यंबकस्यवा ६० अहंयुद्धो
त्सुकस्तातत्वद्गतेनांतरात्मना इदंनरहययुद्धंद्रष्टुंस्वर्गादिहागतः ६१ पूतनानिधनादीनिकर्माणितवदृष्टवान् अहंत्वनेनगोविंदकर्मणा
परितोषितः ६२ हयादस्मान्महेंद्रोपिबिभेतिबलसूदनः कुर्वाणाच्चवपुर्घोरंकेशिनोदुष्टचेतसः ६३ यत्त्वयापातितोदेहोभुजेनायतपर्व
णा एषोस्यमृत्युरंतायविहितोविश्वयोनिना ६४ यस्मात्त्वयाहतःकेशीतस्मान्मच्छासनंशृणु केशवोनामनाम्नात्वंख्यातोलोकेभवि-
ष्यसि ६५ स्वस्त्यस्तुभवतोलोकेसाधयाम्यहमाशुगः कृत्यशेषंचतेकार्यंशक्रस्त्वमसिमाचिरम् ६६ त्वयिकार्यांतरगतेनराइवदिवौकसः
विडंबयंतःक्रीडंतिलीलात्वद्भुजमाश्रिताः ६७ अभ्याशेवर्ततेकालोभारतस्याहवोदधेः हस्तप्राप्तानियुद्धानिराज्ञांत्रिदिवगामिनाम् ६८

यं ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ केशिनंवातिहिनस्तीतिकेशवः मत्वर्थीयलोपआर्षः ६५ कृत्यशेषंकंसवधादि ६६ ६७ अभ्याशेसमीपे ६८ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रकीर्णाविस्तृताः दामन्योदीर्घगोबंधनरज्जवोयैस्तेषु काल्यमानेबंधनार्थं नियम्यमाने ७ करीषेषु शकृत्कगोमयचूर्णेषु ८ ९ १० सौम्येंदौ श्वोभूते मृगशिरसि
चंद्रेउपस्थितेसति तद्धिकंसस्यजन्मनक्षत्रंराहुकुजधूमकेतुभिश्चित्रास्थैः प्रागुक्तरीत्यासर्वतोभद्रचक्रेविद्धंसत्चंद्रयोगेमृत्युकरं तेनउत्पादितेमृत्युयोगेसद्यः परे
द्युः कालांतरेवामृत्युर्भवतीति अभिप्रेत्यपुराणांतरेउक्तंरौद्रेतद्जकं हत्वादित्येकंसोनिपातितइतिसंधिरत्रार्षः अग्नीषोमात्मकेरात्रौ तयोरेव प्रकाशमानत्वान्
संधौसंबंधेजगन्मयइतितयोरेव भोक्तृभोग्यात्मकत्वंदर्शितम् ११ पश्चिमेनपश्चिमतः अग्निवद्दीप्तेन पूर्वेणपूर्वतःउत्पलवद्रक्तेन भागेनदग्धाग्निसदृशेनउभय
तोदह्यमानाद्रितुल्येनसूर्यास्तस्यचंद्रोदयस्यचासन्नसमयत्वात् १२ वासंगृहंउशतांकामयमानानांपांथानांबंधुभिःसहसमागमंशंसद्भिर्वयोभिः पक्षिभिःसह

प्रकीर्णदामनीकेषुगास्तथैवाक्रयत्सुच सनिनादेषुगोपेषुकाल्यमानेचगोधने ७ करीषेषुप्रक्रूतेषुदीप्यमानेषुसर्वशः काष्ठभारानत
स्कंधैर्गोपैरभ्यागतैस्तथा ८ किंचिदभ्युद्यतेसोमेमंदरश्मौविराजति ईषद्विगाहमानायांरजन्यांदिवसेगते ९ प्राप्तेदिनव्युपरमेप्रवृ
त्तेक्षणदामुखे भास्करेतेजसिगते सौम्येतेजस्युपस्थिते १० अग्निहोत्राकुलेकाले सौम्येंदौसमुपस्थिते अग्नीषोमात्मकेसंधौवर्त
मानेजगन्मये ११ पश्चिमेनाग्निदीप्तेन पूर्वेणोत्तरवर्चसा दग्धाद्रिसदृशोव्योम्नि किंचित्तारागणाकुले १२ वयोभिर्वासमुशतांबंधुभि
श्चसमागमम् शंसद्भिःस्यंदनेनाशु प्राप्तोदानपतिर्व्रजम् १३ प्रविशन्नेवपप्रच्छसान्निध्यंकेशवस्यसः रोहिणेयस्यचाक्रूरोनंदगोप
स्यचासकृत् १४ सनंदगोपस्यगृहंवासायविबुधोपमः अवतीर्यततोयानात्प्रविवेशमहाबलः १५ हर्षपूर्णेनवक्त्रेणसाश्रुनेत्रेणचै
वहि प्रविशन्नेवचद्वारिददर्शोदोहनेगवाम् १६ वत्समध्येस्थितंकृष्णंसवत्समिवगोवृषम् सतंहर्षपरीतेनवचसागद्गदेनवै १७ ए
हिकेशवताततिप्रत्याहरतधर्मवित् उत्तानशायिनंदृष्ट्वापुनर्दृष्ट्वाश्रियावृतम् १८

दानपतिरक्रूरोव्रजंप्राप्तः वेदेतुदेवानांदूतःपुरुधःप्रसू
तोनागान्नोवोचतुसर्वतातेत्यादिःसदास्वगःपितुमांअस्तुपंथाइतिउद्रायोअश्यांसदनंपुरुक्षोरित्यक्रूरस्यमनोरथोवर्णितः देवानांकंसहंतुकामानांकंसवा
गाद्यभिमानिनामग्न्यादीनामहंदूतोस्मिकृष्णंप्रतिगंतुंप्रस्थितोस्मिपुरुधःबहुप्रकारैःप्रसूतोनिसृष्टःकंसेननोस्मान्प्रति अनागान् निःपापान् सर्वतातासर्वस्य
विस्तारकर्ताहरिःवोचतुवदतु अस्माभिःसहसंभाषणंकरोतु तथापंथाः अपिसदास्वगः सुगम्यः पितुमान् अन्नवान् अस्तुमार्गेप्यंतरायोमाभूदित्यर्थः पुरुक्षोः
बहूनांक्षयकर्तुः सदनंगृहंअश्यांव्याप्नुयांउद्रायोउत्कटसंपदः इतिमंत्रपदानामर्थः १३ सान्निध्यंस्थानम् १४ १५ १६ १७ प्रत्याहरतउक्तवान् उत्ता
नशायिनंकल्यांतेबालंवटपत्रशायिनंश्रियात्रैलोक्याक्रमणलक्ष्म्यावामनंबटुम् १८ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६९ अभितः सर्वतः ७० ७१ ७२ एषमइतिसंदेशज्ञापकंवाक्यंश्रुतिभिः वेदैरुक्तमपिइतः प्रभृतिख्यातिमेष्यतिश्रुतश्च अहश्चकृष्णमहरर्जुनंच विवर्तेतेर-
जसीवेद्याभिः वैश्वानरोजायमानोनराजावातिरज्ज्योतिषाग्निस्तमांसीत्याद्याः अहः युद्ध्यज्ञः कृष्णं अनुएकः विवर्तते विशेषेणजायते तथा अर्जुनं अनु अहर्वि
वर्तते एकश्चकारोन्वाचये अपरः समुच्चये तेन कृष्णार्जुनाभ्यां विभज्यसमुच्चित्यवाक्रियमाणौ द्वौ युद्धयज्ञो विवर्तेतेइत्यर्थः उभे अप्यहनी रजसी रजोगुणकार्ये वे
द्याभिः लब्धुं योग्याभिः श्रीभिर्हेतुभूताभिः लक्ष्म्यर्थंयुद्धा निजायतइत्यर्थः ताभ्यांचसहायाभ्यां वैश्वानरो विश्वेषांनृणां इष्टफलप्रापको धर्मः स्वयमदृष्टरूपोपिजा
यमान आविर्भवन् वाशब्द इवार्थे राजाजायमानः सन् तमांसि अधर्मरूपाणि असुरांधकाराणि अवातिरत् निरस्कृतवान् केन अग्निर्ज्योतिषे अग्निनाज्योतिषे

पंथानःशोधितान्व्योम्निविमानारोहणोर्ध्वगाः अवकाशाविभज्यंतेशक्रलोकेमहीक्षिताम् ६९ उग्रसेनस्कृतेशांतेपदस्थेत्वयिकेशव अभि
तस्तन्महद्युद्धंभविष्यतिमहीक्षिताम् ७० त्वांचाप्रतिमकर्माणंसंश्रयिष्यंतिपांडवाः भेदकालेनरेंद्राणांपक्ष्याहोभविष्यसि ७१ त्वयिरा-
जासनस्थेहिराजश्रियमनुत्तमाम् शक्राल्पत्स्यतिराजानस्त्वत्प्रभावान्नसंशयः ७२ एषमेकृष्णसंदेशःश्रुतिभिःख्यातिमेष्यति देवता-
नादिविस्थानांजगतश्चजगत्पते ७३ दृष्टमेभवतःकर्मदृष्टश्चासिमयाप्रभो कंसेभूयःसमेष्यामिसाधितेसाधुयास्यहम् ७४ एवमुक्त्वा
तुसतदानारदःस्वंजगामह नारदस्यवचःश्रुत्वादेवसंगीतयोनिनः ७५ तथेतिससमाभाष्यपुनर्गोपान्समासदत् गोपाःकृष्णंसमासा
द्यविविशुर्व्रजमेवह ७६ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिकेशिवधेचतुर्विंशतितमोऽध्यायः २४ वैशंपायनउवा
च अथास्तंगच्छतितदामंदरश्मौदिवाकरे संध्यारक्ततलेव्योम्निशशांकेपांडुमंडले १ नीडस्थेषुविहंगेषुसत्सुप्रादुष्कृताग्निषु
ईषत्तमःसंवृतासुदिक्षुसर्वासुसर्वशः २ घोषवासिषुसुप्तेषुवासतीषुशिवासुच नक्तंचरेषुहृष्टेषुपिशिताशनकांक्षिषु ३ शक्रगोपा
ह्वयामोदेप्रदोषेभ्यासतस्करे संध्यामयीमिवगुहांसप्रविष्टदिवाकरे ४ अधिश्रयणवेलायांप्राप्तायांगृहमेधिनाम् वन्यैर्वैखानसैर्म
न्त्रैर्हूयमानेहुताशने ५ उपावृत्तासुगोषुदुह्यमानासुचव्रजे असकृद्व्याहरंतीषुबद्धवत्सासुधेनुषु ६

त्यर्थः खांडवदाहे अग्निनादत्तेचक्रगां
डीवेतद्रूपेणज्योतिषेतिभावः ७३ साधितेहते ७४ संगीतस्ययोनिर्गांधर्वशास्त्रं तद्वतःदिव्यसंगीतयोनिनः ७५ ७६ इतिश्रीहरिवंशेविष्णुपर्वणिटीकायांच
तुर्विंशतितमोऽध्यायः २४ ७ अथास्तमिति १ सत्सुयाज्ञिकेषुप्रादुष्कृताग्निषुसायमग्निहोत्रार्थंप्रकटीकृताग्निषु २ घोषवासिषुघोषगतेषुसुप्तेषुअ
व्यक्तशब्देषुशुकबालकादिषुइतिशेषः ३ शक्रगोपाह्वयामोदेइंद्रगोपानामातपतप्तानां अत्यंतसुखकरे अभ्यासतस्करेस्वाध्यायनिवर्तके आसन्नांधका
रेवा ४ अधिश्रयणं अग्निहोत्रार्थस्यपयसोग्नौस्थापनं वन्यैः नीवाराद्यैः वैखानसैः वानप्रस्थैः ५ ६ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अव्यक्तयौवनवयः संधिगतम् १९ २० रहस्यात्मा औपनिषदः पुरुषः अर्घ्यस्यप्रथमपूजादेः भाजनंपात्रं उदग्रायतनूरुहः उर्ध्वाग्राः श्रेष्ठाय्यकेशायस्य भक्तदर्शनेनसा नंदेनरोमांचितगात्रइत्यर्थः २१ २२ २३ मन्मथाधिनामन्मथः आधीयतेऽस्मिन्निति तथाभूतेनयौवनपौगंडसंधिगतेनेत्यर्थः २४ धरणीतियेनप्रागुक्तेनएकार्णवे उत्तानशायिनापादाग्रेणैवपृथ्वीधृतातथाबटुनापादाभ्यांक्रमणाभ्यांलोकांतरसहिता आक्रांतासाइदानीं तेनवयः संधिगतेन अस्मदादिनेव श्रीयत इत्यत्यंतमाश्चर्य-

अव्यक्तयौवनंकृष्णमक्रूरः प्रशशंसह अयंसपुंडरीकाक्षः सिंहशार्दूलविक्रमः १९ संपूर्णजलमेघाभः पर्वतप्रवराकृतिः मृधेषुधर्षणी येनसश्रीवत्सेनवक्षसा द्विषन्निधनदक्षाभ्यांभुजाभ्यांसाधुभूषितः २० मूर्तिमान्सरहस्यात्माजगतोऽर्घ्यस्यभाजनम् गोपवेषधरोविष्णु रुदग्रायतनूरुहः २१ किरीटलांछनेनापिशिरसाछत्रवर्चसा कुंडलोत्तमयोग्याभ्यांश्रवणाभ्यांविभूषितः २२ हारार्हेणचपीनेनसुवि- स्तीर्णेनवक्षसा ह्रस्वाभ्यांभुजाभ्यांवृत्ताभ्यांदीर्घाभ्यांसुपशोभितः २३ स्त्रीसहस्रोपचर्येणवपुषामन्मथाधिना पीतेवसानोवसनेसोयंविष्णुः सनातनः २४ धरण्याश्रयभूताभ्यांचरणाभ्यामरिंदमः त्रैलोक्याक्रांतिभूताभ्यांभुविपद्भ्यांव्यवस्थितः २५ रुचिराग्रकरश्चास्यचक्रां कितइवेक्षते द्वितीयउद्यतश्चापिगदासंयोगमिच्छति २६ अवतीर्णोभवायेहप्रथमंपदमात्मनः शोभतेद्यप्रभुर्विश्वेस्त्रिदशानांधुरंध रः २७ अयंभविष्येद्दृष्टोवैभविष्यकुशलैर्नरैः गोपालोयादवंवंशंक्षीणंविस्तारयिष्यति २८ तेजसायादवाश्चास्यशतशोथसहस्र शः वंशमापूरयिष्यंतिह्योघाइवमहार्णवम् २९ अस्येदंशासनेसर्वंजगत्स्थास्यतिशाश्वतम् निहतामित्रसामंतंस्थितंकृतयुगेतथा ३० अयमास्थायवसुधांस्थापयित्वाजगद्वशे राज्ञांभविष्यत्यपरिनत्वराजाभविष्यति ३१ नूनंत्रिभिःक्रमैर्जित्वायथानेनप्रभुःकृतः पुरापुरंदरोराजादेवतानांत्रिविष्टपे ३२ तथैववसुधांजित्वाजितपूर्वांत्रिभिःक्रमैः स्थापयिष्यतिराजानमुग्रसेनंनसंशयः ३३ प्रसृष्टवै रगाधायप्रश्नैश्चबहुभिःश्रुतः ब्राह्मणैर्ब्रह्मवादैश्चपुराणायंहिगीयते ३४ स्पृहणीयोहिलोकस्यभविष्यतिचकेशवः तथात्वस्यो त्थिताबुद्धिर्मानुष्यमुपजीवितुम् ३५ अहंत्वस्याद्यवसतिपूजयिष्येयथाविधि विष्णुत्वमनसाचैवपूजयिष्यामिमन्नवित् ३६ यस्त्व ज्ञातिपरिज्ञानप्रादुर्भावश्चवैनृषु अमानुषंवेद्मिचैनंयेचान्येदिव्यचक्षुषः ३७ सोहंकृष्णेनवैरात्रौसंमन्त्र्यविदितात्मना सहाने नगमिष्यामिसव्रजोयादिमंस्यतेे ३८ एवंबहुविधंकृष्णाहृक्षाहित्यर्थकारणेः निवेशनंदगोपस्यकृष्णेनसहसंसदम् ३९ ७

मित्यर्थः २५ अग्रकरोदक्षिणहस्तः द्वितीयोवामः २६ आत्मनोविश्वतैजसप्राज्ञतुरीयाख्यपादचतुष्टयवत उत्पत्तिक्रमापेक्षयाप्रथमंपदंनिर्गुणंब्रह्मेत्यर्थः २७ २८ ३०
२९ ३० ३१ ३२ जित्वात्रैलोक्यमितिशेषः ३३ प्रसृष्टस्यवैरस्यगाधःपारोयंशमकामादीनामन्योविरोधोऽस्मिन् भासेनश्यतीत्यर्थः अतएवायंप्रश्नोपनिषदिषड्भिःप्रश्नैःश्रुतः
ततपूर्वकंप्रतिपादितः ३४ ३५ ३६ ३७ ३८ ३९ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

इति हरिवंशे विष्णुपर्वणि टीकायां पंचविंशतितमोऽध्यायः २५ सनंदगोपस्य अमितदक्षिणो दानपतिः १ २ ३ ४ ५ दशांतेवार्द्धक्ये शोषितं क्षीणरक्तमांसं यतोऽन्वद्वंज
रायस्तम् ६ ७ पुत्रैरमृदितस्तनीमिति कंसापराधं सद्योजातशिशुवधरूपं सूचयति क्रोधोद्दीपनाय ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९

इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि अक्रूरागमनं नाम पंचविंशतितमोऽध्यायः २५ वैशंपायन उवाच सनंदगोपस्य
गृहं प्रविष्टः सहकेशवः गोपवृद्धान्समानीय प्रोवाचामितदक्षिणः १ कृष्णं चैवाब्रवीत्प्रीत्या रौहिणेयेन संगतम् श्वः पुरीं मथुरां तात ग
मिष्यामः सुखाय वै २ यास्यंति च व्रजाः सर्वे गोपालाः सपरिग्रहाः कंसाज्ञया समुचितं करमादाय वार्षिकम् ३ समृद्धस्तत्र कंसस्य भविष्यति
धनुर्महः तद्द्रक्ष्यथ समृद्धं च स्वजनं च समेष्यथ ४ पितरं वसुदेवं च सततं दुःखभाजनम् दीनं पुत्रवधश्रांतं युवामद्य समेष्यथ ५ सततं
पीड्यमानं च कंसेनाशुभबुद्धिना दशांते शोषितं वृद्धं दुःखैः शिथिलतां गतम् ६ कंसस्य भयसंत्रस्तं भवद्भ्यां च विनाकृतम् दह्यमानं दिवा
रात्रौ सोत्कंठेनांतरात्मना ७ तां च द्रक्ष्यसि गोविंद पुत्रैरमृदितस्तनीम् देवकीं देवसंकाशां सीदंतीं विहतप्रभाम् ८ पुत्रशोकेन शुष्यंतीं
त्वद्दर्शनपरायणाम् वियोगशोकसंतप्तां विवत्सामिव सौरभीम् ९ उपप्लुतेक्षणां दीनां नित्यं मलिनवाससम् स्वभानुवदनग्रस्तां श
शांकस्य प्रभामिव १० त्वद्दर्शनपरां नित्यं त्वदागमनकांक्षिणीम् त्वत्कृतेन च शोकेन सीदंतीं वीतपस्विनीम् ११ त्वसंलापेधकुशला
त्वया बाल्ये वियोजिताम् अरूपज्ञा तव विभो बालकस्यास्य दुर्वचसः १२ यदि लाजनविलासा देवकी तात तप्यते अपत्यार्थेन कस्तस्या
वरस्त्वेवानपत्यता १३ अपुत्राणां हि नारीणामेकः शोको विधीयते सपुत्रालफलपुत्रेधिकं प्रजाते न तप्यते १४ त्वं तु शक्रसमः पुत्रो
यस्यास्त्वत्सदृशो गुणैः परेषामप्यभयदानसा शोचितुमर्हति १५ दृष्ट्वा तवाद्य पितरौ परभृत्यत्वमागतौ भर्त्सितौ त्वत्कृते नित्यं कंसे
नाशुभबुद्धिना १६ यदि ते देवकी मान्या पृथिवी वात्मधारिणी तां शोकसलिले मग्नां समुत्तारयितुमर्हसि १७ तं च वृद्धं प्रियसुतं वसुदे
वं सुखोचितम् पुत्रयोगेन संयोज्य कृष्णाधर्ममवाप्स्यसि १८ यथा नागः सुदुर्वृत्तो दमितो यमुनाह्रदे विमूलः सुकृतः शैलो यथा वै वृष
रस्त्वया १९ दर्पोत्सिक्तश्च बलवानरिष्टो विनिपातितः परप्राणहरः केशी दुष्टश्चापि निपातितः २० एतेनैव प्रयत्नेन वृद्धावुद्धृत्य दुःखि
तौ यथाधर्ममवाप्नोषि तत्कृष्ण परिचिंत्यताम् २१ निर्भर्त्स्यमानो यैर्दृष्टः पिता ते कंससंसदि ते सर्वे च कुरु शूरेण नेत्रैर्दुःखान्वितां भृश
म् २२ गर्भावकर्तनादीनि दुःखानि सुबहून्यपि माता ते देवकी कृष्ण कंसस्य सहते वशा २३ मातापितृभ्यां सर्वेण जातेनैतनयेन वै ऋण
वैप्रतिकर्तव्यं यथायोगं सुदाहृतम् २४

२० २१ २२ २३ जीवतो वास्य करणाहृणं प्रतिकर्तव्यमित्यर्थः २४

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 २५ २६ चेलुःप्रस्थानंचक्रुः २७ २८ औपनायकान्उपहारार्थान् २९ ३० ३१ ३२ ३३ ३४ नाशयतेअदर्शनंनयतिवपुस्तेजः ३५ ३६ ३७ गुरुकंभार

एवंते कुर्वतः कृष्णमातापित्रोरनुग्रहम् परित्यजेतांतौशोकंस्याच्चधर्मस्तवानघ २५ वैशंपायनउवाच कृष्णःसविदितार्थो वैतमाहामितविक्रमम् बाढमित्येवतेजस्वीनचक्रोधवशागतः २६ तेचगोपाःसमागम्यनंदगोपपुरोगमाः अक्रूरवचनंश्रुत्वाचेलुःकं सस्यशासनात् २७ गमनायचतेसज्जाबभूवुर्व्रजवासिनः सज्जंचोपायनंकृत्वागोपवृद्धाःप्रतस्थिरे २८ करंचानडुहःसर्पिर्माहिषांश्चौ पनायकान् यथासारंयथायूथंसुपानीयपयोघृतम् २९ तंसज्जयित्वाकंसस्यकरंचोपायनानिच तेसर्वेगोपपतयोगमनायोपतस्थिरे ३० अक्रूरस्यकथाभिश्चसहकृष्णेनजाग्रतः रौहिणेनतृतीयस्यसानिशाव्यत्यवर्तत ३१ ततःप्रभातेविमलेपक्षिव्याहारसंकुले नैशाकरर- श्मिजालेक्षणदाक्षयसंहृते ३२ नभस्यरुणसंस्तीर्णेपर्यस्तेज्योतिषांगणे प्रत्यूषपवनासारैःक्लेदितेधरणीतले ३३ क्षीणाकारासुतारा सुसुप्तनिष्प्रतिभासुच नैशमंतंदर्शरूपमुत्क्रच्छतिदिवाकरे ३४ शीतांशुःशांतकिरणोनिष्प्रभःसमपद्यत एकोनाशयतेरूपमेकोवर्द्धयते वपुः ३५ गोभिःसमवकीर्णासुव्रजनिर्याणभूमिषु मंथानावर्तपूर्णेषुगर्गरेषुनदत्सुच ३६ दामभिर्दृश्यमानेषुवत्सेषुतरुणेषुच गो पैरापूर्यमाणासुघोषरथ्यासुसर्वशः ३७ तत्रैवगुरुकंभांडंशकटारोपितंबहु त्वरिताःपृष्ठतःकृत्वाजग्मुःस्यंदनवाहनाः ३८ कृष्णोथरौहि णेयश्चसचैवामितदक्षिणः त्रयोरथगताजग्मुस्त्रिलोकपतयोयथा ३९ अथाहकृष्णमक्रूरोयमुनातीरमाश्रितः स्यंदनंचाचरक्षस्व- यत्नंचकुरुवाजिषु ४० हयेभ्योयवसंदत्वाहयभांडेरथेतथा प्रगाढयत्नमास्थायक्षणंतातप्रतीक्ष्यताम् ४१ यमुनायाह्रदेह्यस्मिन्- स्तोष्यामिभुजगेश्वरम् दिव्यैर्भागवतैर्मंत्रैःसर्वलोकप्रभुंयतः ४२ गुह्यंभागवतंदेवंसर्वलोकस्यभावनम् श्रीमत्स्वस्तिकमूर्द्धानंप्रण मिष्यामिभोगिनम् सहस्रशिरसंदेवमनंतंनीलवाससम् ४३ धर्मदेवस्यतस्याद्यप्रसादात्प्रभविष्यति सर्वंतदमृतप्रख्यमाशिष्यास्यमरो यथा ४४ स्वस्तिकायतनंद्रक्ष्याद्विजिह्वश्रीविभूषितम् समाजस्तत्रसर्पाणांशात्यर्थंवैभविष्यति ४५ आस्तांमासमुदीक्षंतौभवंतौसंग तावुभौ निष्कृष्टोऽहंजगद्दस्यायावदस्मिह्रदोत्तमात् ४६ तमाहकृष्णःसंहृष्टोगच्छधर्मिष्ठमाचिरम् आवांरवलुनशक्तौस्वरूपयाहीना वुपासितुम् ४७ सह्रदेयमुनायास्तुममज्जामितदक्षिणः रसातलसदंद्रष्टुंनागलोकमिमंयथा ४८ तस्यमध्येसहस्रास्यंहेमतालोच्छ्रि तध्वजम् लांगलासक्तहस्ताग्रंमुसलापाश्रितोदरम् ४९

युक्तंभांडंउपकरणसामग्री ३८ ३९ ४० हयभांडेअश्वभूषणादौ ४१ भुजगेश्वरंशेषमनंताख्यम्
४२ ४३ धर्मदेवस्यधर्माधिष्ठातुः अनुग्रहवशातविषस्याप्यमृतम् ४४ स्वस्तिकस्यायतनभूतंस्वस्तिकायतनंशेषंतत्रशेषसमीपे ४५ ४६ ४७ ४८ ४९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ तस्योत्संगइत्यादिर्ग्रंथः सप्तसप्त शाकिन एकमेकाशतादद्दुः यमुनायामधिश्रुतमुदाधोगव्यंमृजे निराधो अभ्यंमृजेइत्ये
तंमंत्र मुपश्यंहयति मंत्रार्थस्तमारुतंसूक्तं अघमर्षणकाले भगवंतं दध्यात दैवतांमरुतं एवंस्तौति सप्तसप्त एकोनपंचाशत् शाकिनः शक्नुवंतिनेइतिवा शक्नुवंत्येतैरितिवा
शाकिनः शक्तिमंतः शक्तिप्रदावामरुतः एकमेका प्रत्येकं शताशतमैश्वर्यं भवती तियास्तः ऐश्वर्याणिदद्दुः यतो हृश्रितं एषास्यपरमासंपदितिवेदशिरोभ्य आकर्णितंराधोध-

असितांबरसंवीतं पांडुरं पांडुरासनम् कुंडलैकधरं मत्तं सुसमंबुरुहेक्षणम् ५० भोगोत्करासनेशुभ्रे स्वेन देहेन कल्पिते स्वासीनं स्व
स्तिकाभ्यां च वराहाभ्यां महीधरम् ५१ किंचित्सव्यापवृत्तेन मौलिना हेमचूलिना जातरूपमयैः पद्मैर्मालया च्छन्नवक्षसम् ५२ रक्तचं
दनदिग्धांगदीर्घबाहुमरिंदम् पद्मनाभं सिताभ्राभं भाभिर्ज्वलिततेजसम् ५३ ददर्श भोगिनां नाथं स्थितमेकार्णवेश्वरम् पूज्यमानं द्वि
जिह्वैर्द्वैर्वासुकिप्रमुखैः प्रभुम् ५४ कंबलाश्वतरौ नागौ तौ चामरकरावुभौ अवीजयेतां तं देवं धर्मासनगतं प्रभुम् ५५ तस्याभ्याशगतो
भातिवासुकिः पन्नगेश्वरः वृतोन्यैः सचिवैः सर्वैः कर्कोटकपुरःसरैः ५६ तघटैः काञ्चनैर्दिव्यैः पंकजच्छन्नमस्तकैः राजानं स्नापयामासुः
स्नातमेकार्णवांबुभिः ५७ तस्योत्संगे घनश्याम श्रीवत्साच्छादितोरसम् पीतांबरधरं विष्णुमुपविष्टं ददर्श ह ५८ अपरं चैव सोमेन तु
ल्यसंहननप्रक्रमम् संकर्षणमिवासीनं तं दिव्यविष्टरं विना ५९ सकृष्णातत्र सहसा व्याहर्तुमुपचक्रमे तस्य संस्तंभयामास वाक्यं कृष्णः स्व
तेजसा ६० सोनुभूय भुजंगानां तं भागवतमव्ययम् उदतिष्ठत्पुनस्तोयाद्विस्मितोमितदक्षिणः ६१ सतौ रथस्थावासीनौ तत्रैव बलकेश
वौ निरीक्ष्यमाणावन्योन्यं ददर्शाद्भुतरूपिणौ ६२ अथामज्जत्पुनस्तत्र तदाक्रूरः कुतूहलात् इज्यते यत्र देवोसौ नीलवासाः सिताननः
६३ तथैवासीनमुत्संगे सहस्रास्यधरस्य वै ददर्श कृष्णमक्रूरः पूज्यमानं तदा प्रभुम् ६४ भूयश्च सहसोत्थाय तन्मंत्रं मनसा जपन् रथं ते
नैव मार्गेण जगामामितदक्षिणः ६५ तमाह केशवो हृष्टः स्थितमक्रूरमागतम् कीदृशं नागलोकस्य वृत्तं भागवतेक्षद ६६ चिरं च भवताका
लो व्याक्षेपेण विलंबितः मन्ये दृष्टं त्वयाश्चर्यं हृदयं ते यथाचलम् ६७ प्रत्युवाच स तं कृष्णमाश्चर्यं भवता विना किं भविष्यति लोकेषु स्थाव
रेषु चरेषु च ६८ तत्राश्चर्यं मया दृष्टं कृष्ण यत् भुवि दुर्लभम् तदिहापि यया तत्र पश्यामि च रमामि च ६९ संगतश्चापि लोकानामाश्चर्य-
णेह रूपिणा अतः परतरं कृष्ण नाश्चर्यं द्रष्टुमुत्सहे ७० तदागच्छ गमिष्यामः कंसराजपुरीं प्रभो यावन्नास्तं व्रजत्येष रस्तमोहर्तादिवाकरः ७१

नं स्तूत्रांतर्यामिरूपं यमुनायाम् अधिमध्येमृजेमृगयामिपश्यामीत्यर्थः तदेव रथः उत ऊर्ध्वंगव्यं गोषु सूर्यरश्मिषु स्थितंगव्यं मृजेत था अभ्यं अश्वचतिरथे स्थितं च देवरानिमृ
ज अधोपिभूलोकेपश्यामीत्यर्थः ५८ विष्टरं आसनं विना भूमावेव ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ व्याक्षेपेण व्यासंगेन ६७ ६८ ६९ रूपिणा मूर्तिमता ७० ७१ ध्र

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिहरिवंशेविष्णुपर्वणिटीकायांषड्विंशोऽध्यायः २६ तेतुइति प्रायन्मथुरांप्रापुः १ २ ३ ४ ५ ६ यास्यावेति लोडुत्तमद्विवचनं आवामित्यच्छेदः यास्यावो वामितिपाठंप्रकल्प्य आकारलोप आर्षइतिप्रांचोव्याचख्युः तस्यैवकंसस्यैव ७ अनुशिष्टौ आज्ञप्तौ आलानाभ्यांगजबंधनाभ्यां ८ ९ १० ११ १२ गांयुवयोःत्यक्तं

इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणि अक्रूरकृतनागलोककथनंनामषड्विंशोऽध्यायः २६ वैशंपायनउवाच तेतुरुक्त्वा रथवरंसर्वएवामितौजसः कृष्णेनसहिताःप्रायंस्तथासंकर्षणेनच १ आसेदुस्तेपुरींरम्यांमथुरांकंसपालिताम् विविशुस्तेपुरींरम्यांकाले रक्तदिवाकरे २ तौतुस्वभवनंवीरौकृष्णसंकर्षणावुभौ प्रवेशितौबुद्धिमताह्यक्रूरेणार्कवर्चसौ ३ तावाहवरवर्णाभौभीतोदानपतिस्तदा त्यक्तव्यातातगमनेवसुदेवगृहेस्पृहा ४ युवयोर्हिकृतेवृद्धःकंसेनसनिरस्यते भर्त्स्यतेचादिवारात्रौनेहस्थातव्यमित्यपि ५ तद्युवाभ्याहिक तेव्यापित्र्यःस्वसुत्तमम् यथासुखमवाप्नोतितत्कार्यहितान्वितम् ६ तमुवाचततःकृष्णोयास्यावोवामतान्वितौ प्रेक्षंतौमथुरांवीरराज मार्गंचधार्मिक तस्यैवतुगृहंसाधोगच्छावोयदिमन्यसे ७ वैशंपायनउवाच अनुशिष्टौचतौवीरौप्रस्थितौप्रेक्षकावुभौ आलाना भ्यामिवोन्मुक्तौकुंजरौयुद्धकांक्षिणौ ८ तौतुमार्गगतंदृष्ट्वारजकंरंगकारकम् अयाचेतांततस्तौतुवासांसिरुचिराणिवै ९ रजकःसतुतौभा हयुवांकस्यवनेचरौ राजवासांसियौमोदयात्याचेतांनिर्भयावुभौ १० अहंकंसस्यवासांसिनानादेशोद्भवानिवै कामरागाणिशतशोरंजयामि विशेषतः ११ युवांकस्यवनेजातौमृगैःसहविवर्द्धितौ जातरागाविदंदृष्ट्वारक्तमाच्छादनंबहु १२ अहोवांजीवितंत्यक्तंयौभवंतौविहाग तौ मूर्खौप्राकृतविज्ञानौवासोयाचितुमिच्छथः १३ तस्मैचुकोपवैकृष्णोरजकायाल्पमेधसे शासारिष्टायमूर्खायसृजतेवाङ्मयंविषम् १४ तलेनाशनिकल्पेनसतंमूर्द्ध्न्यताडयत् सगतासुःपपातोर्व्यांरजकोव्यस्तमस्तकः १५ तंहतंपरिदेवंत्योभार्यास्तस्यविचुक्रुशुः त्वरितमुक्त केश्यश्चजग्मुःकंसनिवेशनम् १६ तावप्युभौसुवसनौजग्मतुर्माल्यकारणात् वीथींमाल्यापणानांवैगंधाघ्रातौद्विपाविव १७ गुणको नामतत्रासीन्माल्यवृत्तिःप्रियंवदः प्रभूतमाल्यापणवान्लक्ष्मीवान्प्रियदर्शनः १८ तंकृष्णःश्लक्ष्णयावाचामाल्यार्थमभिसृष्टया दे हीत्युवाचतत्कालेमालाकारंसकातरम् १९ ताभ्यांप्रीतोददौमाल्यंप्रभूतंमाल्यजीवनः भवतोःस्वमिदंचेतिप्रोवाचप्रियदर्शनौ २० प्रीतः समनसाकृष्णोगुणकायवरंददौ श्रीस्त्वामत्संश्रयासौम्यधनौघैरभिपत्स्यते २१ सलब्ध्वावरमव्यग्रोमाल्यवृत्तिरधोमुखः कृष्णस्यप तितोमूर्ध्नाप्रतिजग्राहतंवरम् २२

नष्टम् १३ १४ व्यस्तःपृथग्भूतः मस्तकोयस्य १५ परिदेवंत्यः शोचंत्यः १६ १७ गुणकोग्रथकोनामतक्तश्रीदामाख्यः १८
१९ भवतोःस्वं भवदीयमेवैतद्धनम् २० मत्संश्रयामत्प्रीणनप्रभवा २१ २२ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उत्तरं कर्तव्यं कंसभयान्न ज्ञातवान् मौढ्यादित्यर्थः २३ २४ २५ २६ २७ २८ २९ ३० ३१ तीर्थगौ जलान्तर्गतौ अतएव तत्पंकेन दिग्धांगौ ३२ स्थगयति ना-
भिमाच्छादयतीति स्थगुः भुग्नपृष्ठः स्थडु इति टवर्गाद्योपधपाठे तु मूलं मृग्यं तस्य मध्ये उन्नतदेशे शनैः संपीडयामास संताडयामासेति पाठेपि स एवार्थः तुड भेद-
ने इति धातुः संतोलयामासेति पाठेपि विषमपृष्ठं समतया मितवान् ३३ अतएव भग्नमंतर्हितम् ३४ ३५ सतलाक्षेपं अन्योन्यदत्ततालं यथा स्यात्तथा श्रुतौ योत्र

यक्षाविमाविति तदा समेने माल्यजीवकः संभ्रमाद्भयसंविग्नो नोत्तरं प्रत्यपद्यत २३ धक्रदेवस्कृतौ तौ च राजमार्गगतावुभौ कुब्जां दद-
शतुः स्त्रियः सानुलेपनभाजनाम् २४ तामाह कृष्णः कुब्जेति कस्येदमनुलेपनम् नयस्व भुजपत्राक्षि क्षिप्रमाख्यातुमर्हसि २५ सस्मि-
तास्मुखी भूत्वा प्रत्युवाचाम्बुजेक्षणम् कृष्णा जलदगंभीरं विद्युत्कुटिलगामिनी ॥२६॥ राज्ञः स्नानगृहं यामि तद्गृहाणानुलेपनम्
स्थितास्म्यागच्छ भद्रं ते हृदयस्यासि मे प्रियः २७ कुतश्चागम्यते सोऽस्य यन्मां न नावबुध्यसे महाराजस्य दयिता नियुक्तास्म्यनुलेपने
२८ तां तु वाचं हसन्तीं तु कृष्णः कुब्जामवस्थिताम् आवयोर्गात्रसदृशं दीयतामनुलेपनम् २९ वयं हि देशातिथयो मल्लाः प्राप्ता वरा-
नने द्रष्टुं धनुर्महं ह्यस्य राष्ट्रं चैव समृद्धिमत् ३० प्रत्युवाच यसा कृष्णं प्रियोऽसि मम दर्शने राजार्हमिदमव्यग्रं तद्गृहाणानुलेपनम् ३१
तौ तु भावज्ञलिप्ताङ्गौ चारुगात्रौ विरेजतुः तीर्थगौ पङ्कदिग्धाङ्गौ यमुनायां यथा वृषौ ३२ तां च कुब्जां स्थगुं मध्ये द्व्यङ्गुलेनाग्रपाणिना श-
नैः संपीडयामास कृष्णो लीलाविधानवित् ३३ सा च भग्नस्थगुर्मत्वा स्वायताङ्गी शुचिस्मिता जहासोच्चैः स्तननतटा ऋज्वी यष्टिर्लता यथा
३४ प्रणयाच्चापि कृष्णं सा बभाषे मत्तकाशिनी क्व यास्यसि मया रुद्धः कान्त तिष्ठ गृहाण माम् ३५ तौ जातहासावन्योन्यं सतलाक्षेपमव्ययौ
वीक्षमाणौ प्रहसितौ कुब्जायाः श्रुतिविस्तरौ ३६ कृष्णस्तु कुब्जां कामार्तां सस्मितं विससर्ज ह ततस्तौ कुब्जया मुक्तौ प्रविश्य राजसंसद-
म् ३७ तावुभौ व्रजसंवृद्धौ गोपवेषविभूषितौ गूढवेषाननौ भूत्वा प्रविष्टौ नृपवेश्म तत् ३८ धनुःशालागतौ तौ तु बालावपरितर्कि-
तौ हिमवद्वनसंभूतौ सिंहाविव मदोत्कटौ ३९ दिदृक्षन्तौ महत्तत्र धनुरायोगभूषितम् पप्रच्छतुश्च तौ वीरौ वासुधागारिकं तदा ४०
भोः कंसधनुषः पाल श्रूयतामावयोर्वचः कतरत्तद्धनुः सौम्य महायज्ञस्य वर्तते ४१ आयोगभूतं कंसस्य दर्शयस्व यदीच्छसि स तयोर्द-
र्शयामास तद्धनुस्तम्भसन्निभम् ४२ अनारोप्यमसंभेद्यं देवैरपि सवासवैः तद्गृहीत्वा तदा कृष्णस्तोलयामास वीर्यवान् ४३

गतौ विस्तरो गुणकलापो ययोस्तौ ३६ राजसंसदं उपग्रहम् ३७ गूढवेषाननौ गुप्तवेषाकारौ ३८ ३९ आसमंतात् युज्यंते योधा अस्मात् इत्यायोगो विख्या-
तिः तया भूषितम् ४० ४१ आयोगभूतं प्रख्यातं धनुर्महनिमित्तमित्यर्थः ४२ ४३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आ॰ ह॰ टी॰ ५४ ४५ ४६ ४७ ४८ काकइवकाकः भयचकितत्वेनचंचलदृष्टिः उच्छ्वसितीत्युच्छ्वासश्चेतिसमासः कातरश्चसोच्छ्वासश्चेत्यर्थः ४९ संभ्रमोपमंप्रलयतुल्य अ॰ प॰
३३ म् ५० ५१ ५२ ५३ आयसमिवअनाम्यम् ५४ ५५ ५६ ५७ ५८ ५९ ६० इतिहरिवंशेविष्णुपर्वणिटीकायांसप्तविंशोऽध्यायः २७ पूर्वेणाध्याये २७ २
न युवंवस्त्राणिपीवसावसाथेयुवोरछिद्रामंतवोहसर्गाइत्यर्धर्चार्थउपबृंहितः अस्यार्थस्तु युवंयुवां पीवसाबलेनरजकंहत्वेत्यर्थः वस्त्राणिवसाथे युवोः युवयोः
मंतवोमानयितारः मालाकारकुब्जाप्रभृतयः सर्गाः सृजंतिमाल्यानुलेपनादिकतेसर्गाः अच्छिद्राः नीचत्वकुब्जत्वादिदोषहीना भवंतीति अवातिरतमनृतानिविश्वऋ

दोर्भ्यांकमलपत्राक्षःप्रहृष्टेनांतरात्मना तोलयित्वायथाकामंतद्धनुर्दैत्यपूजितम् ४४ आरोपयामासतदानामयामासचासकृ
त् आनाम्यमानंकृष्णेनप्रकर्षादुरगोपमम् ४५ द्विधाभूतमभून्मध्येधनुरायोगभूषितम् भंक्त्वातुतद्धनुःश्रेष्ठं कृष्णस्त्वरितवि
क्रमः निश्चक्रामसमहावेगःसचसंकर्षणोयुवा ४६ धनुषोभंगनादेनवायुनिर्घोषकारिणा चचालातःपुरंसर्वंदिशश्चैवप्रपूरिरे
४७ निर्गम्यत्वायुधागारात्जग्मतुर्गोपसन्निधौ वेगेनायुधपालस्तुगच्छन्संभ्रांतमानसः ४८ समीपंनृपतेर्गत्वाकाकोच्छ्वासो
भ्यभाषत श्रूयतांममविज्ञाप्यमाश्चर्यंधनुषोगृहे ४९ निर्वृत्तमस्मिन्कालेयज्जगतःसंभ्रमोपमम् नरौकस्याप्यसदृशौशिखावि
ततमूर्द्धजौ ५० नीलपीतांबरधरौपीतश्वेतानुलेपनौ तावंतःपुरमज्ञातौप्रविष्टौकामवेषिणौ देवपुत्रोपमौवीरौबालाविवहुता
शनौ ५१ स्थितौधनुर्गृहेसौम्यौसहसाखादिवागतौ मयादृष्टौपरिव्यक्तरुचिराच्छादनस्रजौ ५२ तयोरेकस्तुपद्माक्षःश्यामपीतां
बरस्रजः जग्राहतद्धनुःस्तंरत्नंदुर्ग्राह्यंदैवतैरपि ५३ तच्चबालोमहच्चापंबलाद्यंत्रमिवायसम् आरोपयित्वावेगेननामयामाससलील
या ५४ आकृष्यमाणंतत्तेनविबाणबाहुशालिना मुष्टिदेशेविकूजित्वाद्विधाभूतमभज्यत ५५ ततःप्रचलिताभूमिर्नैवभातिच
भास्करः धनुषोभंगनादेनभ्रमतीवनभस्तलम् ५६ तदद्भुतमहंदृष्ट्वाविस्मयंपरमंगतः भयाद्भयदशत्रूणांतदिहाख्यातुमागतः
नजानामिमहाराजकौतावमितविक्रमौ ५७ एकःकैलाससंकाशएकोंजनगिरिप्रभः सतुतच्चापरत्नंवैभंक्त्वास्तंभमिवद्विपः ५८ नि
ष्पपातानिलगतिःसानुगोमितविक्रमः अगमत्तद्विधाकृत्वानजानेकोप्यसौनृप ५९ श्रुत्वेवंधनुषोभंगंकंसोविदितविस्तरः विसृज्या
युधपालंवैप्रविवेशगृहोत्तमम् ६० इतिश्रीम॰ह॰वि॰कंसधनुर्भं॰नामसप्तविंशोऽध्यायः२७ वैशंपायनउवाच संचिंतयित्वाधनुषो
भंगंभोजविवर्द्धनः बभूवविमनाराजाचिंतयन्भृशदुःखितः १

तेनमित्रावरुणासचेथेइत्यस्योपबृंहणार्थउत्तरोग्रंथः तत्र अयादवोपिकंसोयदुनामाधिपत्यमिच्छ ३३
न्ननृतःतेनप्रयुक्तानिमल्लादीनिअनृतानिविश्वसर्वाणितानिअवातिरतंतिरस्कृतवंतौ ऋतेनसत्येनैवयादवत्वेनगोपत्वाच्छादिततयाप्रागप्रसिद्धेनमित्रावरुणौसूत्रांतर्यामि
णौरामकृष्णौसचेथेसंगच्छेथेयुवां तत्रकंसस्यानृतत्वमत्रमहमात्रकथयाउपलक्ष्यतेसचिंतयित्वेति भोजविवर्द्धनोभोजच्छेदी १ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२ यस्यार्थेयन्निमित्तम् ३ वचनंनवस्कंदेवयत्लोराज्ञावेवविफलीकृतइत्येवंरूपम् ४ प्रेक्षागारंधनुर्महप्रेक्षार्थंकृतंस्थानम् ५ निर्युक्तंनिष्पन्नंश्रेणीनांएकशिल्पोपजीविनांदृढंनिर्युक्तैर्दृढनिर्युक्तैः दृढबद्धैः ६ सएकोमंचारोहणंद्वारंगमापयते तिव्यवहितेनसंबंधः वलभीभिःउभयतोनमत्पक्षद्वयाभिः छदीभिः षट्स्तंभाभिः कोष्ठकैः चतुस्तंभैः ७ सारनिर्व्यूहंदृढंनागदंतागृहान्निर्गतदारुरूपाणियत्र उदगुउच्चं अक्लिष्टं असंकुचितंसुश्लिष्टंचमंचारोहणंयत्रसोपानपंक्तिर्यत्र ८ परिक्षिप्तंव्याप्तं ९ श्वःरंगंधनुर्महं अज्ञापयत आज्ञापितवान् १० सुचित्राइत्यादिमंचवाटानांविशेषणंवपुष्मंतश्चित्रपुरुषादियुक्ताः उत्तरच्छदामहास्तरणानि ११ करी

कथंबालोविगतभीरवसत्समहाबलम् प्रेक्षमाणस्तुपुरुषैर्धनुर्भंक्त्वाविनिर्गतः २ यस्यार्थेदारुणंकर्मकृतंलोकविगर्हितम् पितृष्वस्रात्मजान्वीरान्षड्देवाहन्त्यपोथयम् ३ दैवंपुरुषकारेणनशक्यमतिवर्तितुम् नारदोक्तंचवचनंनूनंमह्यमुपस्थितम् ४ एवंराजाविचिंत्याथनिष्क्रम्यचगृहोत्तमात् प्रेक्षागारंजगामाशुमंचानामवलोककः ५ सदृष्ट्वासर्वनिर्युक्तंप्रेक्षागारंनृपोत्तमः श्रेणीनांदृढनिर्युक्तैर्मंचवाटैर्निरंतरम् ६ सोत्तमागारयुक्ताभिर्वलभीभिर्विभूषितम् छदीभिःसंप्रवृद्धाभिरेकस्तंभैर्विभूषितम् ७ सर्वतःसारनिर्व्यूहंस्वायतस्तुप्रतिष्ठितम् उदक्प्रवणमक्लिष्टंमंचारोहणमुत्तमम् ८ नृपासनपरिक्षिप्तंसंचारपथसंकुलम् छत्रांतद्वेदिकाभिश्चसानुषोघभरक्षमम् ९ सदृष्ट्वाभूषितंरंगमाज्ञापयतबुद्धिमान् श्वःसचित्राःसमाल्याश्चसपताकास्तथैवच १० स्तुवासितावपुष्मंतउपनीतोत्तरच्छदाः क्रियतांमंचवाटाश्चवलभ्योवीथयस्तथा ११ रंगवाटेकरीषस्यकल्प्यंतांराशयोव्ययाः पटास्तरणशोभाश्चवलयश्चानुरूपतः १२ स्थाप्यंतांस्तुनिर्वातांश्चपानकुंभायथाक्रमम् उदभारसहाःसर्वेसकांचनघटोत्तमाः १३ वलयश्चोपकल्प्यंतांकषायाश्चैवकुंभशः प्राश्निकाश्चनिमंत्र्यंतांश्रेण्यश्चसपुरोगमाः १४ आज्ञाचदेयामल्लानांप्रेक्षकाणांतथैवच समाजेमंचशोभाश्चकल्प्यंतांसूपकल्पिताः १५ एवमाज्ञाप्यराजासससमाजविधिमुत्तमम् समाजवाटान्निष्क्रम्यविवेशस्वनिवेशनम् १६ आव्हानंतप्रसचक्रेतस्यमल्लद्वयस्यवै चाणूरस्याप्रमेयस्यमुष्टिकस्यतथैवच १७ तौतुमल्लौमहावीर्यौबलिनौबाहुशालिनौ कंसस्याज्ञांपुरस्कृत्यहृष्टौविविशतुस्तदा १८ तौसमीपगतौदृष्ट्वामल्लौजगतिविश्रुतौ उवाचकंसोनृपतिःसोपन्यासमिदंवचः १९ भवंतौमसविख्यातौमल्लौवीरध्वजोच्छ्रितौ पूजितौचयथान्यायसत्काराहौविशेषतः २० तन्मत्तोयदिसत्कारःस्मर्यतेस्तुकृतानिच कर्तव्यंमेमहत्कर्मभवद्भ्यांस्वेनतेजसा २१

षस्यशुष्कगोमयचूर्णस्यराशयः मल्लानांस्वेदापमार्जनार्थंमंगलार्थंवा १२ पानकुंभाः घटोन्छ्रायिकाः १३ कषायाःरसाः प्राश्निकाःयुद्धधर्मविदः १४ प्रेक्षकाणांयुद्धसाक्षिणाम् १५ १६ १७ १८ सोपन्यासंसोपपत्तिकं १९ वीरध्वजः स्वोत्कर्षसूचकतोडरादितेनउच्छ्रितौ २० २१ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जितश्रमौकदाचिदपिनश्रमवंतौ २२ निपातानंतरंसंबंधमात्रेणेत्यर्थः २३ अक्रियौअशिक्षितौ २४ आयत्यांउत्तरकालेतदालेवर्त्तमानकाले २५ २६ २७ म

यावेतौममसंवृद्धौव्रजेगोपालकावुभौ संकर्षणश्चकृष्णश्चबालावपिजितश्रमौ २२ एतौरंगगतौयुद्धेयुध्यमानौवनेचरौ निपा
तानंतरंशीघ्रंहंतव्यौनात्रसंशयः २३ बालाविमौसुचपलावक्रियावितिसर्वथा नावज्ञातव्यकर्त्तव्यौकर्त्तव्यौयत्नाएवहि २४ ताभ्यांयुधि
निरस्ताभ्यांगोपाभ्यांरंगसंनिधौ आयत्यांचतदात्वेचश्रेयोममभविष्यति २५ नृपतेःस्नेहसंयुक्तैर्वचोभिर्हृष्टमानसौ ऊचतुर्युद्धसं
मत्तौमल्लौचाणूरमुष्टिकौ २६ यद्यावयोस्तौप्रमुखस्थास्यतेगोपकिल्विषौ हताविसत्यवमतव्यौप्रेतरूपौतपस्विनौ २७ यद्यावांप्रतिया
स्येतेतावरिष्टपरिप्लुतौ आवाभ्यांरोषयुक्ताभ्यांप्रमुखेतौवनेचरौ २८ एवंवाग्विषमुत्सृज्यतावुभौमल्लपुंगवौ अनुज्ञातौनरेंद्रेणस्वे
गृहेतौप्रजग्मतुः २९ महामात्रंततःकंसोबभाषेहस्तिजीविनम् हस्तीकुवलयापीडःसमाजद्वारितिष्ठतु ३० बलवानुमदलोलाक्षश्च
पलःक्रोधनोनृषु दानोत्कटकटश्चंडःप्रतिवारणरोषणः ३१ ससंनोदयितव्यस्तेतावुद्दिश्यवनौकसौ वसुदेवसुतौवीरौयथास्यातांगता
युषौ ३२ त्वयान्वेवगजेंद्रेणयदितौगोध्वजीविनौ भवेतांपातितौरंगेपथ्यंमेमहदुत्कटौ ३३ ततस्तौपतितौदृष्ट्वावसुदेवःसबांधवः छि
न्नमूलोनिरालंबःसभार्योविनशिष्यति ३४ येचमेयादवामूर्खाःसर्वेकृष्णपरायणाः विनशिष्यतिछिन्नाशादृष्ट्वाकृष्णंनिपातितम्
३५ एतौहत्वागजेंद्रेणमल्लैर्वास्वयमेववा पुरींनिर्यादवींकृत्वाविचरिष्याम्यहंसुखी ३६ पिताहिमेपरित्यक्तोयादवानांकुलोद्वहः शेषा
श्चमेपरित्यक्तायादवाःकृष्णपक्षिणः ३७ नचाहमुग्रसेनेनजातःकिलसुतार्थिना मानुषेणाल्पवीर्येणयथामामाहनारदः ३८ म
हामात्रउवाच कथमुक्तनारदेनृराजन्देवर्षिणापुरा आश्चर्यमेतत्कथितंत्वत्तःश्रुतमरिंदम ३९ कथमन्येनजातस्त्वमुग्रसेनात्पितु
र्विना तवमात्राकथंराजन्कृतंकर्मेदमीदृशम् ४० अन्यापिप्राकृतानारीनकुर्याच्चजुगुप्सितम् विस्तरंश्रोतुमिच्छामिह्येतन्कौतूहल
हिमे ४१ कंसउवाच यथाकथितवान्विप्रोमहर्षिर्नारदःप्रभुः तथाहंसंप्रवक्ष्यामियदितेश्रवणेमतिः ४२ आगतःशक्रसद
नात्सवेशक्रसखोमुनिः चंद्रांशुशुक्लवसनोजटामंडलमुद्वहन् ४३ कृष्णाजिनोत्तरीयेणरुक्मयज्ञोपवीतवान् दंडीकमंडलुधरःप्रजा
पतिरिवापरः ४४ गाताचतुर्णांवेदानांविद्वान्गांधर्ववेदवित् सनारदोथदेवर्षिर्ब्रह्मलोकचरोव्ययः ४५ तमागतमृषिंदृष्ट्वापूजयित्वा
यथाविधि पाद्यार्घमासनंदत्वासंप्रवेश्योपविश्यह ४६

मुखेतौनिहंतव्याविति शेषः २८ २९ ३० दानोत्कटकटःमदोत्कटगंडः ३१ ३२ ३३ ३४ ३५ ३४
३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ संमुखंगत्वासंप्रवेश्यगृहं ततःपाद्यसहितंअर्घंदत्वा आचमनंचदत्वातत्संनिधौस्वयमुपविश्य ४६ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

भावितात्मवान् पूतचित्तः ४७ ४८ ४९ ५० अस्याः देवक्याः ५१ ५२ रिपवेरिपौ ५३ ५४ कथंकीदृशोद्रुमिलः ५५ ५६ ५७ ५८ ५९ ६० स्त्रीधर्मं अष्टगुणकामबलं

सुखोपविष्टोथमुनिः पृष्टश्चाचकुशलंमम उवाचचप्रीतमनादेवर्षिर्भावितात्मवान् ४७ नारदउवाच पूजितोहंत्वयावीर विधिदृष्टेनकर्मणा इदमेकममवचःश्रूयतांप्रतिगृह्यताम् ४८ गतोहंदेवसदनंसौवर्णंमेरुपर्वतम् सोहंकदाचिद्देवानांसमाजेमेरुमूर्द्धनि ४९ तंमंत्रयतामेवंदेवतानांमयाश्रुतः भवतःसानुगस्यैववधोपायःसुदारुणः ५० तत्रयोदेवकीगर्भोविष्णुर्लोकनमस्कृतः योस्यागर्भोष्टमःकंस सतेमृत्युर्भविष्यति ५१ देवानांसतुसर्वस्वंत्रिदिवस्यगतिश्चसः परंरहस्यंदेवानांसतेमृत्युर्भविष्यति ५२ यत्नश्चक्रियतांकंसगर्भाणांपातनंप्रति नावज्ञारिपवेकार्यादुर्बलेस्वजनेपिवा ५३ नचायमुग्रसेनःसपितातवमहाबलः द्रुमिलोनामतेजस्वीसौभस्यपतिरूर्जितः ५४ श्रुत्वाहंतद्वचस्तस्यकिंचिद्दोषसमन्वितः भूयोपृच्छंकथंब्रह्मन्द्रुमिलोनामदानवः ५५ ममसात्राकथंतस्यब्रूहिविप्रसमागमः एतदिच्छाम्यहंश्रोतुंविस्तरेणतपोधन ५६ नारदउवाच हंततेकथयिष्यामिशृणुराजन्यथार्थतः द्रुमिलस्यचमात्रातेसंवादंचसमागमं ५७ सुयामुननामनगंतवमातारजस्वला प्रेक्षितुंसहितास्त्रीभिर्गतासकुतूहला ५८ सातत्ररमणीयेषुरुचिरद्रुमसानुषु चूचारनगशृंगेषुकंदरेषुनदीषुच ५९ किन्नरोद्गीतमधुराःप्रतिशुश्रावमिनादिताः शृण्वतीकामजननावाचःश्रोत्रसुखावहाः ६० बर्हिणांचैवविरुतंखगानांचविकूजितम् अभीक्ष्णमभिशृण्वतीस्त्रीधर्ममभिरोचयत् ६१ एतस्मिन्नंतरेवायुर्वनराजिविनिःसृतः हृद्यःकुसुमगंधाढ्योववौमन्मथबोधनः ६२ द्विरेफाभरणाश्चैवकदंबावायुघट्टिताः सुसुस्रुर्गंधमधिकंसंततासारमूर्च्छिताः ६३ केसराःपुष्पवर्षैश्चवपुषुर्मदबोधनाः नीपादीपाइवाभातिपुष्पकंटकधारिणः ६४ महीनवतृणच्छन्नाशक्रगोपविभूषिता यौवनस्थेववनितास्वंदधारातंवपुः ६५ अथसौभपतिःश्रीमान्द्रुमिलोनामदानवः भविष्यद्दैवयोगेनविधात्रातत्रनीयते ६६ कामगेनरथेनाशुतरुणादित्यवर्चसा यदृच्छयागतस्तत्रस्फयामुनदिदृक्षया ६७ विहायसाकामगमोमनसाप्याशुगामिना सतंप्राप्यपर्वतेंद्रमवतीर्यरथोत्तमात् ६८ पर्वतोपवनेन्यस्यरथंपररथारुजम् उभौतौसूतसहितौचेरतुर्नगमूर्द्धनि ६९ ततोबहून्यपश्यतांकाननानिवनानिच सर्वर्तुगुणसंपन्नेनंदनस्येवकानने ७० चेरतुर्नगशृंगेषुकंदरेषुनदीषुच नानाधातुपिनद्धैश्चशृंगैर्बहुभिरुच्छ्रितैः ७१ नानारत्नविचित्रेषुकांचनांजनराजतान् नानाकुसुमगंधाढ्यान्नानासत्वगणैर्युतान् ७२

६१ ६२ ६३ ६४ ६५ नीयते अनीयतनीतइत्यर्थः ६६ ६७ विहायसाआकाशमार्गेण कामगमः इच्छयागंतुंशीलः ६८ ६९ काननानि आरोपितवृक्षाणिवनानिरोपितवृक्षाणि ७० ७१ ७२ छ छ छ छ

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९६ अक्षांतं अक्षाणांइंद्रियाणां अंतोनाशोयस्यतम् ९७ प्रसज्जंतींकलहायमानांक्षिप्तःधिक्कृतः ९८ ९९ व्यभिचारादमानुषसंबंधजान् चित्तस्यचंचलत्वात्स्वा-
साभिचारवदयंमानुषजोव्यभिचारस्तवनदोषायेत्यर्थः १०० स्त्रियःकुंतीमदयंतीप्रभृतयः १०१ शुद्धकेशान् यानिकानिचपापानिकेशानाश्रित्यतिष्ठंतीतिवचनात्
निःपापान् अस्मानपिविधुन्वंतीभर्त्सयंतीयदिच्छसितद्भाषसे यथेष्टंमलपसिमौढ्यादित्यर्थः १०२ १०३ १०४ धिगितिकुंत्यादीनामप्यापद्धर्मापेक्षयापुरुषांत
रसंबंधोनकामविकारेणेत्यर्थः सःत्वंतुसर्वासांनिंदांकुर्वन्पापतमोसीत्यर्थः १०५ १०६ १०७ पुमान् ईश्वरः तेनवलत्पुत्रस्यचमयिजातस्य १०८ १०९ ११० चद्य

किंमांवक्ष्यंतिरुषिताबांधवाःकुलपांसनीम् जुगुप्सिताचवत्स्यामिपतिपक्षैर्निराकृता ९६ धिक्त्वामीदृशमक्षांतंदुष्कृतंव्युत्थितेंद्रिय
म् अविश्वास्यमनायुष्यपरदाराभिमर्शनम् ९७ सतामाहप्रसज्जंतीक्षिप्तःक्रोधेनदानवः अहंवैद्रुमिलोनामसौभस्यपतिरूर्जितः ९८
किमाक्षिपसिरोषेणमूढेपंडितमानिनि मानुषंपतिमाश्रित्यनीचंमृत्यवशेस्थितम् ९९ व्यभिचारान्नदुष्यंतिस्त्रियःस्त्रीमानगर्विते न
ह्यासांनियताबुद्धिर्मानुषीणांविशेषतः १०० श्रूयंतेहिस्त्रियोबह्व्योव्यभिचारव्यतिक्रमैः प्रसूतादेवसंकाशान्पुत्रान्निश्चलविक्रमा
न् १०१ अतीवहित्वंस्त्रीलोकेपतिधर्मव्रतासती शश्वत्केशान्विधुन्वंतीभाषसेयद्यदिच्छसि १०२ कस्यत्वमितियच्चाहत्वयोक्तोमत्त
काशिनि कंसस्तस्माद्रिपुध्वंसीतवपुत्रोभविष्यति १०३ सासरोषापुनर्म्लानांदतीतस्यतंवरम् उवाचव्यथितादेवीदानवंधृष्टवादिन
म् १०४ धिक्तेवृत्तंसुदुर्वृत्तयःसर्वानिंदसिस्त्रियः संतिस्त्रियोनीचवृत्ताःसंतिचैवपतिव्रताः १०५ यास्त्वेकपत्न्यःश्रूयंतेऽरुंधतीप्रमु-
खाःस्त्रियः धृतायाभिःप्रजाःसर्वालोकाश्चैवकुलाधम १०६ यस्त्वयाममपुत्रोवैदत्तोवृत्तविनाशनः नमेबहुमतस्त्वेषःशृणुचापियदु
च्यते १०७ उत्पत्स्यतिपुमान्नीचःपतिवंशममाऽव्ययः भविष्यतिसतमृत्युर्यश्चदत्तस्त्वयाकृतः १०८ द्रुमिलस्त्वेवमुक्तस्तुजगामाकं
शमेवतु तेनैवरथमुख्येनदिव्येनाप्रतिगामिना १०९ जगामचपुरींदीनामातातदहरेवते मामेवमुक्त्वाभगवान्नारदोमुनिसत्तमः ११०
दीप्यमानस्तपोवीर्यात्साक्षादग्निरिवज्वलन् वल्लकींवादयमानोहिसमस्वरविमूर्च्छिताम् १११ गायनोलक्ष्यवीथींसजगामब्रह्मणों
तिकम् शृणुचेदमहामात्रनिबोधवचनंमम ११२ तथ्यंचोक्तंनारदेनत्रैलोक्यज्ञेनधीमता अहंबलेनवीर्येणमदेनविनयेनच ११३
प्रभावेणैवशौर्येणतेजसाविक्रमेणच सत्येनचैवदानेननान्योस्तिसदृशःपुमान् ११४ विदित्वासर्वमात्मानंवचनंश्रद्दधाम्यहम् क्षेत्रजो
हंसुनस्तस्यउग्रसेनस्यहस्तिप ११५ मातापितृभ्यांसत्यक्तःस्थापितःस्वेनतेजसा उभाभ्यामपिविद्विष्टोबांधवैश्चविशेषतः ११६

मानःवादयन् १११ लक्ष्यवीथींब्रह्मलोकमार्गंदेवयानम् ११२ ११३ सदृशोमयेतिशेषः ११४ ११५ ११६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७३ ७४ ७५ ७६ ७७ ७८ नारायणोरुंनिर्भिद्यजाताउर्वशीव ७९ ८० ८१ अचिरप्रभाविद्युत्दिवयोषिद्गणानांयोषिद्गणानांयद्वागणानान्यत्तंचप्रद्योतयत्
रूपंदर्धनेतिशेषः ८२ ८३ निर्दयंयथास्यात्तथामेमां ८४ हृदयाग्निः कामाग्निः वर्द्धयतिछिनत्तिदहतीत्यर्थः मन्मथाग्निनाषष्ठ्यर्थेतृतीया ८५ नोपलभ्य

नानाद्विजगणैस्तुष्टान्नानापुष्पफलद्रुमान् नानौषधिसमायुक्तानृषिसिद्धानुसेवितान् ७३ विद्याधरान्किंपुरुषानृक्षवानर
राक्षसान् सिंहान्व्याघ्रान्वराहांश्चमहिषान्शरभान्रुरुशान् ७४ सृमरांश्चमरान्न्यंकून्मातंगान्यक्षराक्षसान् एवंबहुविधान्प
श्यन्चरमाणानगोत्तमम् ७५ दूराद्ददर्शनृपतिर्देवीदेवकृतोपमाम् क्रीडमानासखीभिश्चपुष्पंचैवविचिन्वतीम् ७६ ततश्चरती
रम्याणीसखीभिःसहसंवृताम् दृष्ट्वासोभूपतिर्दूरात्विस्मयन्सूतमब्रवीत् ७७ कस्येयंमृगशावाक्षीवनांतरविचारिणी रूपौदार्य
गुणोपेतामन्मथस्यरतिर्यथा ७८ शचीवपुरुहूतस्यउताहोवातिलोत्तमा नारायणोरुनिर्भिद्यसंभूतावरवर्णिनी ७९ ऐलस्यदयिता
देवीयोषिद्रत्नंकिमुर्वशी ७९ क्षीरार्णवेमथ्यमानेसुरासुरगणैःसह मथानंमंदरंकृत्वामृतार्थमितिनःश्रुतम् ८० ततोमृतात्समुत्त-
स्थौदेवीश्रीलोकभाविनी नारायणांकतुलिताकिंश्रीरेषावरांगना ८१ नीलमेघांतरगताद्योतयत्यचिरप्रभा तथायोषिद्गणान्मध्येरूपं
प्रद्योतयत्वलम् ८२ अतीवसुकुमारांगीसम्पूर्णेंदुनिभानना दृष्ट्वारूपमनिर्देश्यंचाविभ्रांतोव्याकुलेंद्रियः ८३ कामस्यवशमापन्नो
मनोविभ्रमतीवमे भृशंकृततृमेगान्निसायकैःकुसुमायुधः ८४ भित्त्वाहृदिशरान्पंचनिर्दयंहंतिमेमनः ८४ हृदयाग्निर्वर्द्धयति आज्यासि
क्तइवानलः कथमस्यभवेत्कार्यंशमार्थंमन्मथाग्निना ८५ केनोपायेनकिंकुर्मोभजेन्मामत्तगामिनी एवंबहुचिंतयानोनोपलभ्यचदा
नवः ८६ सूतमाहमुहूर्तंतुतिष्ठस्वत्वमिहानघ अहंयास्यामितांद्रष्टुंकस्येयमितियोषितम् ८७ मतीक्षमाणस्तिष्ठस्वयावदागमनंम
म श्रुत्वातुवचनंतस्यतथास्त्वितिवचोब्रवीत् ८८ एवमुक्त्वादानवेंद्रोगमनायमनोदधे वायुंपस्पृश्यबलवान्ध्यानमेवान्वचिंतयत्
८९ मुहूर्तध्यानमात्रेणदृष्टज्ञानबलात्ततः उग्रसेनस्यपत्नीतिज्ञात्वाहर्षमुपागतः ९० उग्रसेनस्यरूपंवैकृत्वास्वंपरिवर्त्यसः उपासर्प-
महाबाहुःप्रहसन्दानवेश्वरः ९१ स्मयमानश्चशनकैर्जग्राहामितवीर्यवान् उग्रसेनस्यरूपेणमातरंतेप्रधर्षयन् ९२ सापतिस्निग्ध-
हृदयातंभावेनोपसर्पती शंकिताचाभवत्पश्चात्तस्यगौरवदर्शनात् ९३ सातमाहोत्थिताभीतानत्वंममपतिर्ध्रुवम् कस्त्वंविकृताचा
रेणनास्मिमलिनीकृता ९४ एकभर्तृव्रतमिदंममसंदूषितंत्वया पत्युर्मेरूपमास्थायनीचनीचेनकर्मणा ९५

अनुपलभ्यधैर्यमितिशेषः ८६ ८७ ८८ ८९ ९० ९१ ९२ गौरवदर्शनात्रतेःस्पर्शगौरवानुभवात् ९३ ९४ ९५ छ. छ. छ. छ. ३५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

११७ ११८ इतिहरिवंशेविष्णुपर्वणिटीकायांअष्टाविंशोऽध्यायः २८ तस्मिन्निति १ यत्रमंचाः भांतिसमाजवाटः प्राङ्मुखैर्मंचागारैः शक्रशक्रभेइतिपंचमचतुर्थ
तृतीयस्थानांपदानांसंबंधः तत्रमंचाः कीदृशा इत्यत आह द्वितीयेनश्लोकेनसचित्रेतिचित्रसहिताः सचित्राः अश्वाश्रयोऽपर्वकोणाश्चरणायेषांतेसचित्राष्टाश्रिचर
णाः २ निर्मुक्तैः विरलतंतुभिरंतःपटैर्युक्तानिपंचागाराणियेषुस्थिताः राजदाराः सर्वंबहिस्थंपश्यंतिबाह्याश्चतान्नपश्यंतीतिताहृशैश्चारुनिर्मुक्तैः ३ स्वनिर्युक्तैः
शोभनाः निर्युक्ताः मल्लादयोयेषुतैः ४ स्वकर्मद्रव्ययुक्ताभिः यस्यशिल्पवतोयदुपकरणद्रव्यंतेनचिन्हिताभिः श्रेणीनांअनेकजातीनामप्येकशिल्पोपजीविनांगणा

एतानपिहनिष्यामियादवान्कृष्णपक्षिणः तद्दिमौघातयित्वातुहस्तिनागोपकिल्बिषौ ११७ तदुच्छ्रगजमारुह्यसांकुशप्रासतोमरः
स्थिरोभवमहामात्रसमाजद्वारिमाचिरम् ११८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिकंसवाक्यनाम अष्टाविंशतितमो
ऽध्यायः २८ वैशंपायनउवाच तस्मिन्महानिनिर्वृत्तेद्वितीयेसमुपस्थिते आपूर्यतमहारंगः पौरैर्युद्धदिदृक्षुभिः १ सचित्राष्टाश्रि
चरणाः सार्गलद्वारवेदिकाः सगवाक्षार्द्धचंद्राश्चस्वतल्पोत्तमभूषिताः २ प्राङ्मुखैश्चारुनिर्मुक्तैर्माल्यदामावतंसितैः अलंकृतैर्विराज
द्भिः शारदैरिवतोयदैः ३ मंचागारैः स्वनिर्युक्तैर्युद्धायस्वविभूषितैः समाजवाटः शुशुभेससमेघोघइवार्णवः ४ स्वकर्मद्रव्ययुक्ताभिःपता
काभिर्निरंतरम् श्रेणीनांचगणानांचमंचाभात्यचलोपमाः ५ अंतःपुरचराणांचप्रेक्षागाराण्यनेकशः रेजुःकांचनचित्राणिरत्नज्वाला-
कुलानिच ६ तानिरत्नौघकृप्तानिससानुप्रगृहाणिच रेजुर्जवनिकाक्षेपैःसपक्षाइवखेनगाः ७ तत्रचामरहारैश्चभूषणानांचसिंजितैः
मणीनांचविचित्राणांविचित्राश्चैरुरर्चिषः ८ गणिकानांपृथङ्मंचाःशुशुभेरास्तरणांबरैः शोभितावारमुख्याभिर्विमानप्रतिमौजसः ९
तत्रासनानिरव्यातानिपर्यंकाश्चहिरण्मयाः प्रकीर्णाश्चकुथाश्चित्राःसपुष्पस्तबकैर्वृताः १० सौवर्णाःपानकुंभाश्चपानभूम्यश्चशोभिताः
फलावदंशापूर्णाश्चचांगेयैःपानयोजिताः ११ अन्येचमंचाबहवःकाष्ठसंचयबंधनाः रेजुःप्रस्तरणास्तत्रशतशोऽथसहस्रशः १२ उत्तमा
गारिकाश्चैवसूक्ष्मजालावलोकिनः स्त्रीणांप्रेक्षागृहाभांतिराजहंसाइवांबरे १३ प्राङ्मुखश्चारुनिर्युक्तोमेरुशृंगसमप्रभः रुक्मपत्र
निभस्तंभश्चित्रनिर्योगशोभितः १४ प्रेक्षागारःसकंसस्यप्रचकाशेऽधिकश्रिया शोभितोमाल्यदामैश्चनिवासकृतलक्षणः १५

नांएकजातीनां ५ ६
तानीतिजवनिकारूपैराक्षेपैरंतर्द्धिकरैस्तिरोहिताधोभागानिरत्नौघैः कृप्तानिकृतानिप्रेक्षागाराणिससानुप्रग्रहाणिउपरिदेशेसपताकानिरेवसपक्षपर्वतवद्भांतीत्यर्थः
७ तत्रप्रेक्षागारेषु ८ ९ कुथाः आस्तरणविशेषाः १० फलावदंशाःजंबीराद्युपदंशास्तैः पूर्णाःचांगेयैःचुक्रिकादिपानरसाः पानयोजिताः पानार्थंस्थापिताः ११ प्रस्तरणाः ३६
प्रकृष्टास्तरणाः १२उत्तमागारिकाः गृहोपरिगृहंयत्तदुत्तमागारंतत्रभवाःसूक्ष्मजालद्वारावलोकोयस्तद्वंतःप्रेक्षागृहाःप्रेक्षार्थागृहाः १३ प्राङ्मुखः प्रेक्षागारः कंसस्यचका
शेइतिद्वयोःसंबंधः १४ १५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१६ राजाकंसः १७ १८ १९ आवलितानिप्रस्फुरितानि अंबराणियेषाम् २० क्ष्वेडितंतत्सहितेन आस्फोटितेन आस्फालनेनउपलक्षितौ २१ २२ २३ करंशुंडा-
दंडम् २४ २५ २६ तालस्वनंगजंकोपयितुंकरतालिकाध्वनिम् २७ २८ बबाधव्याकुलंचकार २९ अपोथयत् पुच्छाकर्षणेन भूमौघर्षितवान् ३० मूढः व्याकुलः

तस्मिन्नानाजनाकीर्णेजनौघध्वनिनादिते समाजवाटेसंक्षुब्धेकंपमानार्णवप्रभे १६ राजाकुवलयापीडःसमाजद्वारिकुंजरः तिष्ठत्वि-
तिसमाज्ञाप्यप्रेक्षागारमुपाययौ १७ सशुक्लवाससीबिभ्रत् श्वेतव्यजनचामरः शुशुभेश्वेतमुकुटःश्वेताभ्रइवचंद्रमाः १८ तस्यसिंहा
सनस्थस्यसुखासीनस्यधीमतः रूपमप्रतिमंदृष्ट्वापौराःप्रोचुर्जयाशिषः १९ ततःप्रविविशुर्मल्लारंगमावलिताम्बराः तिस्रश्चभागशःक
क्षाःप्राविशन्बलशालिनः २० ततस्तूर्यनिनादेनक्ष्वेडितास्फोटितेनच वसुदेवसुतौहृष्टौरंगद्वारमुपस्थितौ २१ वल्गुवीवस्त्रसंवीतौ
सुरचंदनभूषितौ ऊर्ध्वपीडौस्रगापीडौबाहुशस्त्रकृतौयमौ आस्फोटयतावन्योन्यंबाहूचैवार्गलोपमौ २२ तावापतंतौत्वरितौप्रतिषि-
द्धौवरानन्नौ तेनमत्तेननागेनचोद्यमानेनवैभृशम् २३ समत्तहस्तीदुष्टात्माकृत्वाकुंडलिनंकरम् चकारचोदितोयत्ननिहंतुंबलकेशवौ
२४ ततःप्रहसितःकृष्णस्त्वास्यमानोगजेनवै कंसस्यतत्समतंचैवजगर्हेसदुरात्मनः २५ त्वरतेखलुकंसोयंगंतुंवैवस्वतक्षयम् योमाम
नेननागेनप्रधर्षयितुमिच्छति २६ सन्निकृष्टेततोनागेगर्जमानेयथाघने सहसोत्पत्यगोविंदश्चक्रेतालस्वनंप्रभुः २७ क्ष्वेडितास्फोटि
तरवंकृत्वानागस्यचाग्रतः करंससौकरंतस्यप्रतिजग्राहवक्षसा २८ विषाणांतरगोभूत्वापुनश्चरणमध्यगः बबाधेतंगजंकृष्णःपवन-
स्तोयदंयथा २९ सहस्ताग्राद्विनिष्क्रांतोविषाणाग्राच्चदंतिनः विमुक्तःपादमध्याच्चकृष्णोद्विपमपोथयत् ३० सोतिकायस्तुसमूढो
हंतुंकृष्णमशक्नुवन् गजःस्वेष्वेवगात्रेषुमथ्यमानोररासह ३१ पपातभूमौजानुभ्यांदशनाभ्यांतुतोदच मदंसुस्रावरोषाच्चघर्मा
पायेयथाघनः ३२ कृष्णस्तुतेननागेनक्रीडित्वाशिशुलीलया निधनायमतिंचक्रेकंसद्विष्टेनचेतसा ३३ सतस्यप्रमुखेपादंकृत्वाकुं
भादनंतरम् दोर्भ्यांविषाणमुत्पाट्यतेनैवप्राहरत्तदा ३४ सतेनवज्रकल्पेनस्वेनदंतेनकुंजरः हन्यमानःशकृन्मूत्रंमुमोचार्तोररासह
३५ कृष्णजर्जरितांगस्यकुंजरस्यार्तचेतसः कटाभ्यामतिसुस्राववेगवद्भूरिशोणितम् ३६ लांगूलंचास्यवेगेननिष्कर्षहलायुधः
शैलपृष्ठान्द्रुसंलीनंवैनतेयइवोरगम् ३७ तेनैवगजदंतेनकृष्णोहत्वातुदंतिनम् जघानैकप्रहारेणगजारोहणमुल्बणम् ३८ सोर्त-
नादंमहत्कृत्वाविदंतोदंतिनांवरः पपातसमहामात्रोवज्रभिन्नइवाचलः ३९

ररासशब्दंकृतवान् ३१ दशनाभ्यांमूलतोभग्नाभ्यांतुतोदव्यथां
प्राप ३२ ३३ प्रमुखेभ्रूमध्यदेशेविषाणंदंतम् ३४ ३५ ३६ ३७ ३८ सार्तेतिसंधिरार्षः महत्महांतम् ३९ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 तोरणस्यबहिर्द्वारस्य अंगानिस्तंभादीनितोरणंवाहनंगजस्तस्यांगानीति दंतद्वयंद्वाभ्यांगृहीतमित्यन्ये ४० ४१ ४२ भोजराजः कंसः विषसादविषादंप्रापतत्र हेत्वंत
रं पौराणामनुरागंचकृष्णेआलक्ष्य ४३ ४४ इतिहरिवंशेविष्णुपर्वणिटीकायांएकोनत्रिंशोऽध्यायः २९ प्रविशंतंपूर्वजंपुरतःकृत्वाप्रविशंतमित्यन्वयः १ मदेनहस्ति-
संबंधिनालिप्तबाहुदेशमित्यर्थः २ व्यूहमानंकंसंहंतुंविशेषतः तर्कयंतंतंधनमिवसंचरंतंवापक्षे ३ आयस्तमुखःम्लानमुखः ४ ५ ६ ७ अंधं अंधयितारंचाणूरा

ततस्तौतोरणांगानिप्रगृह्यरणकर्कशौ गजस्यपादरक्षांश्चजघ्नतुःपुरुषर्षभौ ४० तांश्चहत्वाविविशतुर्मध्यंरंगस्यतावुभौ नासत्यावश्वि-
नौस्वर्गादवतीर्णाविवेच्छया ४१ वृष्ण्यंधकाश्चभोजाश्चददृशुर्वनमालिनौ क्ष्वेडितोत्कृष्टनादेनबाहोरास्फोटितेनच सिंहनादैश्चतालैश्चह
र्षयामासतुर्जनम् ४२ तौदृष्ट्वाभोजराजस्तुविषसादवृथामतिः पौराणामनुरागंचहर्षंचालक्ष्यभारत ४३ तंहत्वापुंडरीकाक्षोनदंतंद
तिनांवरम् अवतीर्णोर्णवाकारंसमाजंसहपूर्वजः ४४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिकुवलयापीडवधोनामएकोनत्रिंशोऽ
ध्यायः २९ वैशंपायनउवाच प्रविशंतंतुवेगेनमारुतंबलिनांवरम् पूर्वजंपुरतःकृत्वाकृष्णंकमललोचनम् १ गजदंतकृतोल्लेखंवंसक
भुजंदेवकीसुतम् युद्धसंमर्दयोगेनमदेनरुधिरेणच २ वल्गमानंयथासिंहंव्यूहमानंयथाधनम् बहुशब्दप्रहारेणचालयंतंवसुंध-
राम् ३ औग्रसेनिःसमालोक्यदंतिदंतोद्यतायुधम् कृष्णंभृशायस्तमुखःसरोषंसमुदैक्षत ४ भुजासक्तेनशुशुभेगजदंतेनकेश
वः चंद्रार्द्धबिंबसंसक्तोयथैकशिखरोगिरिः ५ वल्गमानेतुगोविंदेसकृत्स्नोरंगसागरः जनौघप्रतिनादेनपूर्यमाणइवाबभौ ६ ततःक्रो
धाभिताम्राक्षःकंसःपरमकोपनः चाणूरमादिशद्युद्धेकृष्णस्यसुमहाबलम् ७ अंध्रमल्लंचनिकृतिंमुष्टिकंचमहाबलम् बलदेवायस
क्रोधोदिदेशाद्रिचयोपमम् ८ कंसेनापिसमाज्ञप्तश्चाणूरःपूर्वमेवतु योद्धव्यंसहकृष्णेनत्वयायत्नवतेतिवै ९ सरोषेणतुचाणूरःकषा
यीकृतलोचनः अभ्यावर्त्ततयुद्धार्थमपांपूर्णोयथाघनः १० अवघुष्टेसमाजेतुनिःशब्दस्तिमितेजने यादवाःसहितास्तत्रइदंवचनम
ब्रुवन् ११ बाहुयुद्धमिदंरंगेसप्राश्निकमकातरम् क्रियाबलसमाज्ञातमशस्त्रनिर्मितंपुरा १२ अद्भिश्चापिश्रमोनित्यंविनेयःकालद-
र्शिभिः करीषेणचमल्लस्यसततंसक्रियास्मृता १३ स्थितोभूमिगतेनैवयोयथामार्गतःस्थितः संयुज्यतश्चपर्यायःप्राश्निकैःसमुदाहृ-
तः १४ बालोवायदिवावृद्धोमध्योवापिकृशोपिवा बलस्थोवास्थितोरंगेज्ञेयःकक्षांतरेणवै १५

परनामानंकृष्णायदिदेशेतिसंबंधः बलदेवाय
मुष्टिकमितिचनिकृतिंकपटवंतमित्यध्याहृत्यसंबंधनीयम् ८ ९ १० अवघुष्टेराजाज्ञयानिःशब्दाभवतेतिश्रावितेः ११ सप्राश्निकंसपरीक्षकं अकातरंभीरुरहितं
निर्मितंविधिना १२ विनेयःपरिहर्तव्यः १३ स्थितःस्थितेनसंयुज्यतोनियुध्यतः १४ एवंबालोबालेनेत्यादिकक्षांतरेणस्वस्वकक्षामध्यतएवेत्यर्थः १५ ६७ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१६ प्रकृतेविशेषमाह तदिदमिति १७ १८ एवंसंदेहमानंजनंभगवानाश्वासयति अहमिति १९ २० यइतिकरीषेणोद्वर्तनंजलेनक्षालनंकषायेणगैरिकेणानुलेपनंचेतिमल्लानांसंप्रदायइत्यर्थः २१ संयमः अन्योन्यंअपसारणंस्थिरता अनपसरणंव्यायामःस्थिरयोरपिहस्तपादादिचालनंसत्क्रियाचालनेपिमर्मास्पर्शितंसत्क्रियायामपिबलाधिक्येनरंगेनियतासिद्धिर्जयाख्याषड्भिःसाधनैर्भवतीत्यर्थः २२ यद्यपिरंगयुद्धमवैरंतथाप्ययंअंधःकंसोवासवैरंकर्तुमुद्यतोस्यवधेनैवजगत्तोषयामिमाविषादंकुरुतेतिभावः २३ २४ निपातानंतरंनहंतव्यमितिनियममतिक्रम्यहताः २५ तदेवाह शस्त्रेति शस्त्रैःशत्रोर्विदारणंतदेवसिद्धिर्म

बलतश्चक्रियातश्चबाहुयुद्धविशारदैः निपातानंतरंकिंचिन्नकर्तव्यंविजानता १६ तदिदंप्रस्तुतंरंगेयुद्धंकृष्णांध्रमल्लयोः बालःकृष्णोमहानंध्रःकथनःस्याद्विचारणा १७ ततःकिलकिलाशब्दःसमाजेसमवर्तत प्राबल्यात्तचगोविंदोवाक्यंचेदमुवाचह १८ अहंबालोमहानंध्रोवपुषापर्वतोपमः युद्धंममानेनसहरोचतेबाहुशालिना १९ युद्धव्यतिक्रमःकश्चिन्नभविष्यतिमत्कृतेः नत्वहंबाहुयोधानांदूषयिष्यामिचान्मतम् २० योयंकरीषधर्मश्चतोयधर्मश्चरंगजः कषायस्यचसंसर्गःसमयोद्योषकल्पितः २१ संयमःस्थिरताशौर्यंव्यायामःसत्क्रियाबलम् रंगेचनियतासिद्धिरेतद्युद्धविदांमतम् २२ अवैरमेवयदयंसवैरंकर्तुमुद्यतः अत्रवैनिग्रहःकार्यस्तोषयिष्याम्यहंजगत् २३ करूषेषुप्रसूतोयंचाणूरोनामनामतः बाहुयोधीशरीरेणकर्मभिश्चारुचिंत्यताम् २४ एतेनबहवोमल्लानिपातानंतरंहताः रंगप्रतापकामेनमल्लमार्गश्चदूषितः २५ शस्त्रासिद्धिस्तुयोधानांसंग्रामेशस्त्रयोधिनाम् रंगसिद्धिस्तुमल्लानांप्रतिमल्लनिपातजा २६ रणेविजयमानस्यकीर्तिर्भवतिशाश्वती हतस्यापिरणेशस्त्रैर्नाकपृष्ठंविधीयते २७ रणेत्युभयतःसिद्धिर्हतस्येहघ्नतोपिवा साहिप्राणांतिकीयात्रामहद्भिःसाधुपूजिता २८ अयंतुमार्गोबलतःक्रियातश्चविनिःसृतः मृतस्यरंगेकःस्वर्गोजयतोवाकुतोरतिः २९ येतुकेचिन्नत्वदोषेणराजःपंडितमानिनः प्रतापार्थंहतामल्लामल्लहंतुर्वधोहिसः ३० एवंसंजल्पतामेवताभ्यांयुद्धंसुदारुणम् उभाभ्यामभवद्घोरंवारणाभ्यांयथावने ३१ कृतप्रतिकृतैश्चित्रैर्बाहुभिश्चससंकटैः सन्निपातावधूतैश्चप्रमाथोन्मथनैस्तथा ३२ तावुभावपिसंश्लिष्टौयथाशैलमयौतथा क्षेपणैर्मुष्टिभिश्चैववराहोद्धूतनिःस्वनैः ३३

ल्लानांतुपातनमात्रंसिद्धिर्नवधइत्यर्थः २६ २७ २८ २९ हंतुःप्रयोज्यस्यप्रयोजकस्यवधोवधजंपापम् ३० ताभ्यांतयोः ३१ संकटः आलिंगनेनावरोधःसन्निपातःउभाभ्यांवक्षःसंश्लेषणावरोधः अवधूतंतयोर्बलवताअन्यस्यदूरीकरणंप्रमाथोभूमौपातनंउन्माथउद्धृत्यनिपातनम् ३२ शैलमयौगंडशैलोपमौकठिनौक्षेपणैरास्फालनैः मुष्टिभिः मुद्रिकांगुलिभिर्हस्ताग्रैः वराहोद्धूतंपादयोर्मध्यंप्रविश्यपक्षेपणंनिःस्वनःनिहीनःस्वनोवाचान्यक्करणंतेः ३३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कीलवज्रनिपातौ कूर्परजानुभ्यामाघातौ प्रसृष्टः अन्योन्यमंगुलिप्रदाः शलाकानखपाताः जत्रुदेशे अंगुष्ठेन कुक्षिदेशे इतरांगुलिभिश्च सहाकर्षणं पादोद्धूतैः ति
र्यक्पादप्रक्षेपेण शत्रोश्चालनं स्थानात् ३४ अवघट्टितैः तिर्यगास्फालितैः ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ तापनीये सौवर्णमये नेत्रे नेत्र

कीलवज्रनिपातैश्च प्रसृष्टाभिस्तथैव च शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः ३४ जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टितैः
तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा ३५ बाहुप्राणेन शूराणां समाजोत्सवसन्निधौ संरज्यत जनः सर्वः सोत्क्रुष्टनिनदोत्थितः ३६ सा
धुवादांश्च मंचेषु घोषयंत्यपरे जनाः ततः प्रस्विन्नवदनः कृष्णः प्रणिहितेक्षणः न्यवारयत तूर्याणि कंसः सव्येन पाणिना ३७ प्रतिषिद्धेषु
तूर्येषु मृदंगादिषु तेषु वै खे संगतान्यवाद्यंत देवतूर्याण्यनेकशः ३८ युध्यमाने हृषीकेशे पुंडरीकनिभेक्षणे स्वयमेवप्रवाद्यंत तूर्यघोषा
स्तु सर्वशः ३९ अंतर्धानगता देवा विमानैः कामरूपिभिः चेरुर्विद्याधरैः सार्द्धं कृष्णस्य जयकांक्षिणः ४० जयस्व कृष्ण चाणूरं दानवं मल्ल
रूपिणम् इति सप्तर्षयः सर्वे ऊचुश्चैव नभोगताः ४१ चाणूरेण चिरं कालं क्रीडित्वा देवकीसुतः बलमाहारयामास कंसस्याभावदर्शिवान्
४२ ततश्चचाल वसुधा मंचाश्चैव व्यघूर्णिरे मुकुटाच्चापि कंसस्य पपात मणिरुत्तमः ४३ दोर्भ्यां मानस्य कृष्णस्तु चाणूरं शीर्णजीवितम् भ्रा
मयन्मुष्टिना मूर्ध्नि वक्षस्याहत्य जानुना ४४ निःसृते साश्रु रुधिरे तस्य नेत्रे सबंधने तापनीये यथा घंटे कक्षोपरि विलंबिते ४५ पपात स तु
रंगस्य मध्ये निःसृतलोचनः चाणूरो विगतप्राणो जीवितांते महीतले ४६ देहेन तस्य मल्लस्य चाणूरस्य गतायुषः सन्निरुद्धो महारंगः स-
शैलेनेव लक्ष्यते ४७ रौहिणेयो हते तस्मिन् चाणूरे बलदर्पिते जग्राह मुष्टिकं रंगे कृष्णस्तोसलकं पुनः ४८ सन्निपाते तु तौ मल्लौ प्रथमे
क्रोधमूर्च्छितौ समेयातां राम कृष्णौ कालस्य वशवर्तिनौ ४९ निघ्नंतावनतौ भूत्वा रंगमध्ये व्यवल्गतुः कृष्णस्तोसलमुद्यम्य गिरिशृंगोप
मं बली भ्रामयित्वा शतगुणं निष्पिपेष महीतले ५० तस्य कृष्णाभिपन्नस्य पीडितस्य बलीयसः मुखाद्रुधिरमत्यर्थमसृज्जगाम सुस्रुष-
तः ५१ संकर्षणस्तु सुचिरं योधयित्वा महाबलः अंध्रमल्लं महामल्लो मंडलानि व्यदर्शयत् ५२ मुष्टिनैकेन तेजस्वी साशनिस्तनयित्नुना
शिरस्यभ्यहनद्वीरो वज्रेणेव महागिरिम् ५३ स निष्पतितमस्तिष्को विस्रस्तनयनो महान् पपात निहतस्तेन ततो नादो महानभूत् ५४
अथ तोशलकं हत्वा कृष्णसंकर्षणावुभौ क्रोधसंरक्तनयनौ रंगमध्ये व्यवल्गताम् ५५ समाजवाटो निर्मल्लः सोऽभवद्भीमदर्शनः अथैतदा
महामल्ले मुष्टिके च निपातिते ५६ ये च संप्रेक्षका गोपा नंदगोपपुरोगमाः भयक्षोभितसर्वांगाः सर्वतत्राववतस्थिरे ५७

पिंडौ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ मस्तिष्कौ गंडप्रदेशस्थौ मांसपिंडौ ५४ ५५ ५६ ५७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५८ ५९ ६० भ्रूभेदो भ्रूहृदयांतरं मध्यं तद्गोचरस्तत्रोद्भूतः रोषाग्नेर्निर्यासो ज्वालाकलाप इवेत्यर्थः ६१ मानसाग्निना क्रोधाग्निना केशवायसधूमेन केशवेयत् आयसं काठिन्यप्रकटीकरणं तदेव धूमवत् गमकं यस्य तेन केशवायसधूमेन रोषः द्विषोपकारा क्षमत्वेन यस्तापः स एव निःश्वासवायुर्यस्य ६२ स्विन्नालीकतलस्य प्रस्विन्नललाटस्य ६३ यथा वृक्षपत्रगताः अवश्यायबिंदवो बालसूर्यकरस्पृष्टा भांति तद्वदित्यर्थः ६४ आज्ञापयत आज्ञापितवान् संधिरार्षः व्यायतान् अति घोरान् ६५

हर्षजं वारि नेत्राभ्यां वर्षमाणा प्रवेपती प्रस्रवोत्पीडिता कृष्णं देवकी समुदैक्षत ५८ कृष्णादर्शनजातेन बाष्पेणाकुलितेक्षणः वसुदेवो जरात्यक्तः स्नेहेन तरुणायते ५९ धारसुरस्याश्रुताः सर्वाः कृष्णास्यसुखपंकजम् पपुर्हि नेत्रभ्रमरैर्निमेषांतरगामिभिः ६० कंसस्याथ सुखस्वेदो भ्रूभेदांतरगोचरः अभवद्रोषनिर्यासः कृष्णासंदर्शनेरितः ६१ केशवायसधूमेन रोषनिःश्वासवायुना दीप्तमंतर्गतं तस्य हृदयं मानसाग्निना ६२ तस्य प्रस्फुरितोष्ठस्य स्विन्नालिकतलस्य वै कंसवक्त्रस्य रोषेण रक्तसूर्यायते वपुः ६३ क्रोधरक्तान्मुखात्तस्य निःसृताः स्वेदबिंदवः यथा रविकरस्पृष्टा वृक्षावश्यायबिंदवः ६४ सोऽज्ञापयत संक्रुद्धः पुरुषान् व्यायतान् बहून् गोपावेतौ समाजौघान्निष्क्रास्येतां वनेचरौ ६५ नचैतौ द्रष्टुमिच्छामि विकृतौ पापदर्शनौ गोपानामपि मे राज्ये न कश्चित्स्थातुमर्हति ६६ नंदगोपश्च दुर्मेधाः पापेष्वभिरतो मम आयसैर्निगडाकारैर्लोहपाशैर्निगृह्यताम् ६७ वसुदेवश्च दुर्वृत्तो नित्यद्वेषकरो मम अवृद्धार्हेण दंडेन क्षिप्रमद्यैव शास्यताम् ६८ ये चेमे प्राकृता गोपा दामोदरपरायणाः ह्रीयंतां गाव एतेषां यच्चास्ति वसु किंचन ६९ एवमाज्ञापयानं तं कंसं परुषभाषिणम् ददर्शायस्तनयनः कृष्णः सत्यपराक्रमः ७० क्षिप्यमाणं पितरं च क्रोधनं नंदगोपं च केशवः ज्ञातीनां च व्यथां दृष्ट्वा विसंज्ञां चैव देवकीम् ७१ स सिंह इव वेगेन केशवो जातविक्रमः आरुरुक्षुर्महाबाहुः कंसनाशाय मच्युतः ७२ रंगमध्यादुत्पपात कृष्णः कंसासनांतिकम् अ सज्जद्वायुना क्षिप्तो यथा खस्थो घनाघनः ७३ ददृशुर्नहि तं सर्वे रंगमध्यादवप्लुतम् केवलं कंसपार्श्वस्थं ददृशुः पुरवासिनः ७४ सोऽपि कंसस्तथायस्तः परीतः कालधर्मणा आकाशादिव गोविंदं मेने तत्रागतं प्रभुम् ७५ स कृष्णो नायतं कृत्वा बाहुं परिघसन्निभम् मूर्द्धनि पुपरामृष्टः कंसो वैरंगसंसदि ७६ मुकुटश्चापतत्तस्य कांचनो वज्रभूषितः शिरसस्तस्य कृष्णेन परामृष्टस्य पाणिना ७७ स हस्तयुक्तः केशश्च कंसो निर्यत्नतां गतः तथैव च विसंज्ञो वै कल्यः समपद्यत ७८ निगृहीतश्च केशेषु गतासुः स्फुरितश्च निःश्वसन् न शशाक मुखं द्रष्टुं कंसः कृष्णस्य वै तदा ७९ विकुंडलाभ्यां कर्णाभ्यां छिन्नहारेण वक्षसा प्रलंबाभ्यां च बाहुभ्यां गात्रैर्विस्तृतभूषणैः ८०

६६ पापेषु कपटेषु निगडाकारैः पादशृंखलारूपैः ६७ ६८ ६९ आयस्तनयनः क्रोधप्रसारितनेत्रः ७० ७१ ७२ घनाघनः महामेघः ७३ ७४ आयस्तः व्याकुलीकृतः ७५ ७६ ७७ ७८ ७९ विस्तृतभूषणैः भ्रष्टाभरणैः ८०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्ते स मुकुटो वीर सर्वरत्नविभूषितः अत्यर्थं शिरसो लक्ष्मीं योऽदधारार्कसप्रभाम् ९ अनेन हि कलत्रेणानवांतःपुरशोभिना कथं-
दीनेन कर्तव्यं त्वयि लोकांतरं गते १० ननु नाम स्त्रियः साध्व्यः प्रियभोगेष्ववंचिताः पत्नीनामपरित्याज्याः स त्वं नस्त्यज्य गच्छसि ११ अ
हो कालो महावीर्यो येन पर्यायकर्मणा कालतुल्यः सपत्नानां त्वं क्षिप्रमपनीयसे १२ वयं दुःखस्यनुचिताः सुखस्यैव त्वयैधिताः कथं व
त्स्याम विधवा नाथ कार्पण्यमाश्रिताः १३ स्त्रीणां चारित्रलुब्धानां पतिरेकः परा गतिः सो हि नः सा गतिश्छिन्ना कृतांतेन बलीयसा १४
वैधव्येनाभिभूताः स्म शोकसंततमानसाः रोदितव्ये ह्रदमग्नाः क्व गच्छामस्त्वया विना १५ सह त्वया गतः कालस्त्वदंके क्रीडितं कृतम्
क्षणेन त्वद्विहीनाः स्म अनित्या हि नृणां गतिः १६ अहो बलविपन्नाः स्म विपन्ने त्वयि मानद एकदुष्कृतकारिण्यः सर्वा वैधव्यलक्षणाः
१७ त्वया स्वगमतिच्छंदलालिताः स्म रतिप्रियाः त्वयि कामवशाः सर्वाः स नस्त्यज्य क्व गच्छसि १८ अस्माकं त्वमनाथानां नाथो ह्यासि सु
रोपम आसां विलपमानानां कुररीणामिव प्रभो प्रतिवाक्यं जगन्नाथ दातुमर्हसि मानद १९ एवमार्तकलत्रस्य शाम्यमानेषु बंधुषु
गमनं ते महाभाग दारुणं प्रतिभाति नः २० नूनं कांततराः कांत परलोके वरस्त्रियः यतस्त्वं प्रस्थितो वीर विहायेमं गृहे जनम् २१ किं नु ते कार
ण वीर भार्यास्वेतास्व भूरिद आर्तनादं रुदंतीषु यन्मोहान्नावबुध्यसे २२ अहो निष्करुणा यात्रा नराणामौर्ध्वदेहिकी यत्परित्यज्य दारांस्त्वा
न्निरपेक्षा व्रजंति हि २३ अपतिर्वः स्त्रियाः श्रेयान्न तु शूरः पतिः स्त्रियाः स्वर्गस्त्रीणां प्रियाः शूरास्तेषामपि च ताः प्रियाः २४ अहो क्षिप्रमहं
श्येनेन यता त्वारणप्रियम् प्रहृतं नः कृतांतेन सर्वासामंतरात्मसु २५ हत्वा जरासंधबलं जित्वा यक्षांश्च संयुगे कथं मानुषमात्रेण हतस्त्वं ज
गतीतले २६ इंद्रेण सह संग्रामं कृत्वा सायकविग्रहम् असमर्थैरजितो युद्धे मर्त्येणासि कथं हतः २७ त्वया सागरमक्षोभ्यं विक्षोभ्य शरवृ
ष्टिभिः रत्नसर्वस्वहरणं जित्वा पाशधरं कृतम् २८ त्वया पौरजनस्यार्थे मदवर्षति वासवे सायकैर्जलदान्जित्वा बलाद्वर्षं प्रवर्तितम् २९
मताः पावनताः सर्वे न वतिष्ठति पार्थिवाः प्रेषयंतो वराहाणि रत्नान्याच्छादनानि च ३० तवैवं देवकल्पस्य दृष्टवीर्यस्य शत्रुभिः कथं प्राणां
तिकं घोरमीदृशं भयमागतम् ३१ शासाः स्मो विधवाशब्दं त्वयि नाथे निपातिते अप्रमत्ताः प्रमत्तेन कृतांतेन निराकृताः ३२ यद्येवं नाथ गं
तव्यं यदि दाव विस्मृता वयम् वाङ्मात्रेणापि यामीति वक्तव्यं कः परिश्रमः ३३ प्रसीद नाथ भीताः स्म पादौ ते याम मूर्द्धभिः अलं दूरप्रवासेन-
निवर्तस्व नराधिप ३४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उत्तरीयेणवलितंवेष्टितंआननंकंठोयस्य ८१ मंचान्निष्क्रम्य अधस्तान्निपात्यतदुपरिस्वयंचनिपत्यकेशेषुतंगृह्यचकर्ष ८२ देहकृष्णंदेहेनलांगलेनेव कर्षितासृ
८३ गतासुषमितिगतासोरपिकर्षणंमित्राणांसंतोषार्थमित्यर्थः ८४ विपरीतेनभूरानर्हेणक्रमेणप्रकारेण ८५ विपर्यस्तंकंधरायास्त्रुटितत्वेनान्यथाभूतम् ८६
असंग्रामेतिस्वर्गःकीर्तिश्चवीरमार्गःतदुभयभ्रष्टइत्यर्थः ८७ अथाप्यस्यसद्गतिरस्तीत्याहतस्येति ८८ ८९ प्रस्रवोत्पीडैःप्रस्रवस्यातिभरैः ९० ९१ कंसभ्रात-

भ्रंशितेनोत्तरीयेणसहसावलितानन: चेष्टमानःसमाक्षिप्तःकंसःकार्ष्णेनतेजसा ८१ चकर्षचमहारंगेमंचान्निष्क्रम्यकेशवः केशेषु
तंबलात्कृष्यकंसंक्लेशाहतागतम् ८२ कृष्यमाणःसकृष्णेनभोजराजोमहाद्युतिः समाजवाटेपरिखांदेहकृष्टांचकारह ८३ समाजवा
टेक्रीडित्वाविकृष्यचगतासुषम् कृष्णोविसर्जयामासकंसदेहमदूरतः ८४ धरण्यांमृदितःशिश्येतस्यदेहःसरजोचितः क्रमेणविपरी
तेनपांसुभिःपरुषीकृतः ८५ तस्यतद्वदनंश्यामंस्रस्तसास्रंसकुंडलम् नविभातिविपर्यस्तंविप्रलाशाययाबुजम् ८६ असंग्रामहतःकं
सःसबाणैरपरिक्षतः केशग्राहान्निरस्तासुवीरमार्गान्निराकृतः ८७ तस्यदेहप्रकाशांतेसहसाकेशवार्पिताः मांसच्छदघनाःसर्वेनरवा
यार्जीवितच्छिदः ८८ तंहत्वापुंडरीकाक्षःप्रहर्षाद्विगुणप्रभः ववंदेवसुदेवस्यपादौनिहतकंटकः ८९ मातुश्चशिरसापादौनिपीड्यय
दुनंदनः सासिंचत्प्रस्रवोत्पीडैःकृष्णमानंदनिःसृतैः ९० यादवांश्चैवतान्सर्वान्यथास्थानंयथावयः पप्रच्छकुशलंकृष्णोदीप्यमानः
स्वतेजसा ९१ बलदेवोपिधर्मात्माकंसभ्रातरमूर्छितम् बाहुभ्यामवतरसासुनामानमपोथयत् ९२ तौजितारीजितक्रोधौचिरविप्रो
षितौव्रजे स्वंपितुर्भवनंवीराजग्मतुर्हृष्टमानसौ ९३ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिकंसवधोनामत्रिंशोऽध्या
यः ३० वैशंपायनउवाच भर्तारंपतितंदृष्ट्वाक्षीणपुण्यमिवग्रहम् कंसपत्न्योहतंकंसंसमतात्पर्यवारयन् १ तंमहीशयनेस
क्तंक्षितिनाथंगतासुषम् भार्याःस्मदृष्ट्वाशोचंतिमृग्योमृगपतिंयथा २ हाहताःस्ममहाबाहोसहसागतबांधवाः वीरपत्न्योहतंवी
रेत्वयिवीरव्रतप्रिये ३ इमामवस्थांपश्यत्यःपश्चिमांतवनोत्थिकाम् कृपणंराजशार्दूलंविलपंत्यःसबांधवाः ४ छिन्नमूलाःस्मसंवृ
त्ताःपरित्यक्तास्त्वयाविभो त्वयिपंचत्वमापन्नेनाथस्माकंमहाबल ५ कानःकोपपरीतानांगीरतिसंसर्गलालसाः लताइवविचेष्टंतीःश
यनीयानिनेष्यति ६ इदंतेसदृशंसौम्यहृद्यंनिःश्वाससारुतम् दहत्यर्कोसुखंकांतंनिस्तोयमिवपंकजम् ७ इमौतेश्रवणौशून्यौन
शोभेतेविकुंडलौ शिरोधरायांसंलीनौस्रस्तकुंडलप्रियौ ८

रंडुमिलोत्पन्नमेवकंसमित्रीभूतंनत्वौग्रसेनिं ९२ तावितिवाह्याभ्यंतरशत्रुजयिनावितिशेषेण
हृद्यार्थः ९३ इतिहरिवंशेविष्णुपर्वणिटीकायांत्रिंशोऽध्यायः ३० भर्तारंपतितंदृष्ट्वेत्यादिस्पष्टार्थः १ २ ३ ४ ५ ६ ७ ८ ९ ९ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पश्चात्तापात्पश्चात्तापात् छांदसस्तकारलोपः २ तस्मिन्तस्याम् ३ ४ ५ स्त्रीणांपरिदेवितमात्रेण कृतांतस्यापिशोकोविधीयतइतियोजना ६ ७ ८ ९ स्वर्गस्थै
स्तुल्यइतिशेषः १० राज्ञांनृपान् ११ कुरुतेददाति १२ १३ विपरीतस्यपापस्य १४ १५ १६ १७ १८ १९ २० २१ २२ प्रती-

सददर्शगृहेकृष्णांयादवैःपरिवारितम् पश्चात्तापात्ध्यायंतंकंसस्यनिधनाविलम् २ कंसनारीविलापांश्चश्रुत्वासकरुणान्बहून् ग
हेमाणतथात्मानंतस्मिन्यादवसंसदि ३ अहोमयातिबाल्येनरोषाद्दोषानुवर्तिना वैधव्यंस्त्रीसहस्राणांकंसस्यास्यवधेकृतम् ४ का
रुण्यंखलुनारीषुप्राकृतस्यापिजायते एवमार्तंरुदतीषुमयाभर्तरिपातिते ५ परिदेवितमात्रेणशोकःखलुविधीयते कृतांतस्यानभिज्ञा
नास्त्रीणांकारुण्यसंभवः ६ कंसस्याहिवधःश्रेयान्प्रागेवाभिमतोमम सतांसुहृज्जनीयस्यपापेष्वभिरतस्यच ७ लोकेपतितवृत्तस्यपरुष-
स्याल्पमेधसः अक्लिष्टमरणंश्रेयोनविद्विष्टस्यजीवितम् ८ कंसःपापपरश्चैवसाधूनामप्यसंमतः धिक्शब्दपतितश्चैवजीवितेतस्यका
दया ९ स्वर्गंतपोभृतांवासःफलंपुण्यस्यकर्मणः इहापियशसायुक्तःस्वर्गस्थैरुपभुज्यते १० यदिस्युर्निर्वृतालोकाःस्युश्चधर्मपराःप्र
जाः नराधर्मप्रवृत्ताश्चनराज्ञामनयःस्पृशेत् ११ निग्रहेदुष्टवृत्तीनांकृतांतःकुरुतेफलम् इष्टधर्मेषुलोकेषुकर्तव्यंपारलौकिकम् १२ अ-
तीवदेवारक्षतिनरंधर्मपरायणम् कर्तारःसुलभालोकेदुष्कृतस्याहिकर्मणः १३ हतःसोयमयाकंसःसाध्वेतदवगम्यताम् मूलच्छेदःकृ
तस्तस्यविपरीतस्यकर्मणः १४ तदेवंसांत्व्यतांसर्वःशोकार्तःप्रमदाजनः पौराश्चपुर्यांश्रेण्यश्चसांत्व्यतांसर्वएवहि १५ एवंब्रुवतिगोविंदेवि
षण्णवदनाननःउग्रसेनोयदून्गृह्यपुत्रकिल्बिषशंकितः १६ सकृष्णंपुंडरीकाक्षमुवाचयदुसंसदि बाष्पसंदिग्धयावाचादीनयासज्ज
मानया १७ पुत्रोनिर्यातितःक्रोधान्नीतोयाम्यांदिशंरिपुः स्वधर्माधिगताकीर्तिर्नामविश्रावितंक्षितौ १८ स्थापितंसत्कृमाहात्म्यंशंकि-
तारिपवःकृताः स्थापितोयादवोवंशोगर्वितास्सुहृदःकृताः १९ सामंतेषुनरेंद्रेषुप्रतापस्तेप्रकाशितः मित्राणित्वांभजिष्यंतिसंश्रयिष्यंति
पार्थिवाः २० प्रकृतयोनुयास्यंतिस्तोष्यंतित्वांद्विजातयः संधिविग्रहसुख्यास्त्वांप्रणमिष्यंतिमंत्रिणः २१ हस्त्यश्वरथसंपूर्णंपदातिगणसं
कुलम् प्रतिगृहाणकृष्णोदकंसस्यबलमव्ययम् २२ धनधान्यंचयत्किंचिद्रत्नान्याच्छादनानिच प्रतीच्छंतुनियुक्तावैत्वदीयाःकृष्णपू
रुषाः २३ स्त्रियोहिरण्यंयानानियदन्यद्रक्षकिंचन एवंहिविहितेयोगेपर्याप्तेकृष्णविग्रहे २४प्रतिष्ठितायांमेदिन्यांयदूनांशत्रुसूदन त्वं
गतिश्चागतिश्चैवयदूनांयदुनंदन २५ शृणुष्ववदतांवीरकृपणानामिदंवचः अस्यत्वत्कोपदग्धस्यकंसस्याशुभकर्मणः २६ तवप्रसादा
ज्ञोविंदप्रेतकार्यंक्रियेतह तस्यकृत्वानरेंद्रस्यविपन्नस्यौर्ध्वदेहिकम् २७
च्छंतु अंगीकुर्वंतु २३ २४ २५ २६ २७ छ छ छ छ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

भा॰ह॰टी॰ ५० ३५ ३६ रुदितं अनुशयः आशयोंऽतःकरणं रुदितानुशयः ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ अ॰ ३१

अहो वीर कथं शेषे निषण्णस्तृणपांसुषु शयानस्य हि ते भूमौ कस्मान्नो हि जनते वपुः ३५ केन सुप्तप्रहारोऽयं दत्तोऽस्माकमतर्कितः यद्दत्तं
केन सर्वासु नारीषु वैवस्व दारुणम् ३६ रुदितानुशयो नाथ जीवत्याः परिदेवनम् किं वयं सति गते तस्य सह मत्या रुदामहे ३७ एतस्मिन्नन्तरे
दीना कंसमाता भयं प्रती धिक् वत्सः धिक् मे पुत्र इति शिरो रुदती भृशम् ३८ सा पश्यन्निहतं पुत्रं निःप्रभं शशिनं यथा हृदयेन विदीर्णेन त्वास्नुषा
णा पुनः पुनः ३९ पुत्रं समभिवीक्षन्ती हा हतास्मीति वाशती स्नुषाणामार्तनादेन विल्लाप रुरोद च ४० सा तस्य वदनं दीनमुत्संगे पुत्रगृद्धि-
नी कृत्वा पुत्रेति करुणं विलल्लापार्तया गिरा ४१ पुत्र शूरव्रते युक्त ज्ञातीनां नन्दिवर्द्धन किमिदं त्वरितं वत्स प्रस्थानं कृतवानसि ४२ प्रसुप्तस्त्वमा
तिविवृते किं पुत्र नियमं विना वत्स नैव विधिर्भूमौ शेरते कृतलक्षणाः ४३ रावणेन पुरा गीतः श्लोकोऽयं साधुसंमतः धन्यज्येष्ठेन लोके पुरास्त
सानां समागमे ४४ एवमूर्जितवीर्यस्य मम देवनिपातिनः बान्धवेभ्यो भयं घोरं दुर्निवार्यं भविष्यति ४५ तथैव ज्ञातिलुब्धस्य मम पुत्रस्य धीमतः
ज्ञातिभ्यो भयमुत्पन्नं शरीरान्तकरं महत् ४६ सा पतिं भूपतिं वृद्धमुग्रसेनं विचेतसम् उवाच रुदती वाक्यं विवत्सा हरिणी यथा ४७ एह्येहि राज
न् सुदुष्टात्मन् पश्य पुत्रं जनेश्वरम् शयानं वीरशयने वज्राहतमिवाचलम् ४८ अस्य कुर्मो महाराज निर्याणसदृशीं क्रियाम् प्रेतत्वमुपपन्नस्य
गतस्य यमसादनम् ४९ वीरभोज्यानि राज्यानि वयं चापि पराजिताः गच्छ विज्ञापिता कृष्णः कंससत्कारकारणात् ५० मरणान्तानि वैराणि शा
न्ते शान्तिर्भविष्यति प्रेतकार्याणि कार्याणि मृतः किमपराध्यते ५१ एवमुक्त्वा पतिं भोजं केशानारुज्य दुःखिता पुत्रस्य मुखमीक्षन्ती विल्ला
पैवसा भृशम् ५२ इमास्ते किं करिष्यन्ति भार्या राजन्सकृदवेषिताः त्वां पतिं रूपतिं प्राप्य यथा विपन्नमनोरथाः ५३ इमं ते पितरं वृद्धं कृष्णस्य
वशवर्तिनम् कथं द्रक्ष्यामि शुष्यन्तं कासारसलिलं यथा ५४ अहं ते जननी पुत्र किमर्थं नाभिभाषसे प्रस्थितो दीर्घमध्वानं परित्यज्य प्रियं
जनम् ५५ अहो धाराल्पभाग्यायाः कृतान्तेनाभिवर्तिना आच्छिद्य मम सद्यो नीयसे नयकोविदः ५६ दानमानगृहीतानि नृशंसान्येता-
नि ते गुणैः रुदन्ति तव भृत्यानां कुलानि कुलयूथप ५७ उत्तिष्ठ नरशार्दूल दीर्घबाहो महाबल त्राहि दीनं जनं सर्वं पुरमन्तःपुरं यथा ५८ रु-
दतीनां भृशार्तानां कंसस्त्रीणां सुविस्तरम् जगामास्तं दिनकरः संध्यारागेण रञ्जितः ५९ इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्व
णि कंसस्त्रीविलापो नाम एकत्रिंशोऽध्यायः ३१ वैशंपायन उवाच उग्रसेनस्तु कृष्णस्य समीपे दुःखितो ययौ पुत्रशोकाभिसंतप्तो विषपी
त इव श्वसन् १ ४०

५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ इति हरिवंशे विष्णुपर्वणि टीकायां एकत्रिंशोऽध्यायः ३१ उग्रसेनः विषपीतः पीतविषः १ छ॰ छ॰ छ॰

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ह॰टी॰ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ दृश्यतेभोगेनानुभूयते ३९ ४० ४१ ४२ ४३ परायणपरः परस्यकर्मणोऽयनंगमनं अ॰ प॰
४१ तत्परस्तदधीनः कालोपिकर्माधीनः तेनस्वकर्मणैवायंमृतइत्यर्थः अहंतुनिमित्तमात्रं शस्त्रवदितिभावः यथोक्तंस्वकर्मैवनरंहंतिनशस्त्रारिमृत्यवः नेभंनेभ्यंन- ३२ २

सस्नुषोहंसभार्यश्चचरिष्यामिमृगैःसह प्रेतसत्कारमात्रेणकृतेबांधवकर्मणि २८ आनृण्यंलौकिकंकृष्णागताःकिलभवंतिहि तस्या
ग्निपश्चिमंकृत्वाचितिस्थानेविधानतः तोयप्रदानमात्रेणकंसस्यानृण्यमाप्नुयाम् २९ एतत्तेकृष्णविज्ञाप्यंस्नेहोत्रमयियुज्यताम् प्राप्नो
तिस्वर्गतितत्रकृपणःपश्चिमांक्रियाम् ३० एतच्छ्रुत्वावचस्तस्यकृष्णःपरमविस्मितः प्रत्युवाचोग्रसेनंवैसांत्वपूर्वमिदंवचः ३१ कालयुक्त
मिदंताततवैतद्यत्प्रभाषितम् सदृशंराजशार्दूलवृत्तस्यचकुलस्यच ३२ यत्त्वमेवंविधोब्रूषेगतेर्थेदुरतिक्रमे प्राप्स्यतेनृपसत्कारंकंसःप्रेत
गतोपिसन् ३३ कुलेमहतितेजन्मवेदान्विदितवानसि कथंनज्ञायतेतातनियतिर्दुरतिक्रमा ३४ स्थावराणांचभूतानांजंगमानांचपा
र्थिव पूर्वजन्मकृतंकर्मकालेनपरिपच्यते ३५ श्रुतवंतोर्थवंतश्चदातारःप्रियदर्शनाः ब्रह्मण्यानयसंपन्नादीनानुग्रहकारिणः ३६ लो
कपालसमास्तातमहेंद्रसमविक्रमाः क्षितिपालाःकृतांतेननीयंतेनृपसत्तम ३७ धार्मिकाःसर्वभावज्ञाप्रजापालनतत्पराः क्षत्रधर्मपरादा
ताःकालेननिधनंगताः ३८ स्वयमात्मकृतंकर्मशुभंवायदिवाशुभम् प्राप्तेकालेतुतत्कर्मदृश्यतेसर्वदेहिनाम् ३९ एषासातर्गतामायादुर्वि
ज्ञेयासुरैरपि ययायंमुह्यतेलोकोह्यत्रकर्मैवकारणम् ४० कालेनाभिहतःकंसःपूर्वकर्मप्रचोदितः नह्यहंकारणंतत्रकालःकर्मचकारणम्
सूर्यसोममयंतातकृत्स्नंस्थावरजंगमम् कालेननिधनंगत्वाकालेनैवचजायते ४१ सकालःसर्वभूतानांनिग्रहानुग्रहेरतः तस्मात्सर्वाणिभू-
तानिकालस्यवशगानिवै ४२ स्वदोषेणैवदग्धस्यसूनोस्तेवनराधिप नाहंवैकारणंतत्रकालस्तत्रचकारणम् ४३ अथवाहंभविष्यामि
कारणंनात्रसंशयः परायणपरःकालःकिंकरिष्यत्यकारणः ४४ कालस्तुबलवान्राजन्दुर्विज्ञेयाहिसागतिः परावरविशेषज्ञायाया
तिसमदर्शिनः ४५ गतिःकालस्यसायेनसर्वंकालस्यगोचरम् ब्रवीमियदहंताततदनुष्ठीयतांवचः ४६ नहिराज्येनमेकार्यंनाप्यहंनृ
पकांक्षितः नचापिराज्यलुब्धेनमयाकंसोनिपातितः ४७ किंतुलोकहितार्थायकीर्त्यर्थंचसुतस्तव व्यंगभूतःकुलस्यास्यसानुजोवि-
निपातितः ४८ अहंसएवगोमध्येगोपैःसहवनेचरः प्रीतिमान्विचरिष्यामिकामचारीयथागजः ४९ एतावच्छतशोप्येवंसत्येनैतद्ब्र
वीमिते नमेकार्यंनृपत्वेनविज्ञाप्यंक्रियतामिदम् ५० भवान्राजास्तुमान्योमेयदूनामग्रणीःप्रभुः विजयायाभिषिच्यस्वस्वराज्येनृपसत्तम
५१ ४१

वासभ्यंचोरहत्यावलंबतइति ४४ सागतिः याकालात्परमोक्षरूपा ४५ येनकर्मणाततवचः वचनप्रतिपाद्यंकर्मानुष्ठीयतां ४६ कांक्षितःकांक्षासंजातायस्यतादृशः ४७
४८ ४९ ५० ५१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५२ श्रीडितश्वासौअधोमुखश्चेतम् ५३ ५४ पुरीमार्गेपुरप्रवेशमार्गे ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ इतिहरिवंशेविष्णुपर्वणिटी०

यदितेमत्प्रियंकार्यंयदिवानास्तितेव्यथा मयानिसृष्टंराज्यंस्वंचिरायप्रतिगृह्यताम् ५२ वैशंपायनउवाच एतच्छ्रुत्वातुवचनंनोत्त
रंप्रत्यभाषत श्रीडिताधोमुखंतंतुराजानंयदुसंसदि ५३ अभिषेकेणगोविंदोयोजयामासधर्मवित् सबद्धमुकुटश्चीमांनुग्रसेनोमहा
द्युतिः ५४ चकारसहकृष्णेनकंसस्यनिधनक्रियाम् ५४ तंसर्वेयादवामुख्याराजानंकृष्णशासनात् अनुजग्मुःपुरीमार्गेदेवाइवशत-
क्रतुम् ५५ रजन्यांतुनिवृत्तायांततःसूर्येविराजिते पश्चिमंकंससंस्कारंचक्रुस्तेयदुपुंगवाः ५६ शिबिकायांसमारोप्यकंसदेहंयथाक्र
मम् नैष्ठिकेनविधानेनचक्रुस्तेकंससत्क्रियाम् ५७ सनीतोयमुनातीरंसुत्तमंनृपतेःसुतः सत्कृतश्चयथान्यायंनैधनेनचिताग्निना ५८
तथैवभ्रातरंचास्यसुनामानंमहाभुजम् संस्कारंलंभयामासुःसहकृष्णेनयादवाः ५९ ताभ्यांतेसलिलंचक्रुर्वृष्ण्यंधकपुरोगमाः अक्ष
यंचास्तुप्रेतेभ्योभाषमाणाःपुनःपुनः ६० हिरण्यस्यसुवर्णस्यदशकोटीस्तथाहरिः गावोरत्नानिवासांसिग्रामान्नागरसंमतान् ६१ ददौ
कंससुहृद्भ्यश्चब्राह्मणेभ्योनृपोत्तमः अक्षयंचापिविप्रेभ्योभाषमाणाःपुनःपुनः ६२ तयोस्तेसलिलंदत्वायादवादीनमानसाः पुरस्कृ
त्योग्रसेनंवैविविशुर्मथुरांपुरीम् ६३ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिउग्रसेनाभिषेककंससंस्कारकथननामद्वात्रिं
शोऽध्यायः ३२ वैशंपायनउवाच सकृष्णस्तत्रबलवान्रौहिणेयेनसंगतः मथुरांयादवाकीर्णांपुरींतांसुखमावसत् १ प्राप्तयौव
नदेहस्तुयुक्तोराजश्रियाज्वलन् चचारमथुरांवीरःसरत्नाकरभूषणाम् २ कस्यचित्त्वथकालस्यसहितौरामकेशवौ गुरुंसांदीपनिंकाश्य
मवंतिपुरवासिनम् ३ धनुर्वेदचिकीर्षार्थंसुभौतावभिजग्मतुः निवेद्यगोत्रंस्वाध्यायमाचारेणाभ्यलंकृतौ ४ शुश्रूषूनिरहंकारावुभौ
रामजनार्दनौ प्रतिजग्राहतौकाश्योविद्याःप्रादाच्चकेवलाः ५ तौचश्रुतिधरौवीरौयथावत्प्रतिपद्यताम् अहोरात्रैश्चतुःषष्ट्यासांगवेद
मधीयताम् ६ चतुष्पादंधनुर्वेदंशस्त्रग्रामंससंग्रहम् अचिरेणैवकालेनगुरुस्तावभ्यशिक्षयत् ७ अतीवमानुषींमेधांचिंतयित्वा
तयोर्गुरुः मेनेतावागतौवीरौदेवौचंद्रदिवाकरौ ८ ददर्शचमहात्मानावुभौतावपिपर्वसु पूजयंतौमहादेवंसाक्षाद्विष्णुंव्यवस्थितम्
९ गुरुंसांदीपनिंकृष्णःकृतकृत्योऽभ्यभाषत गुर्वर्थंकिंददामीतिरामेणसहभारत १० तयोःप्रभावसंज्ञात्वागुरुःप्रोवाचहृष्टवान् पुत्र
मिच्छाम्यहंदत्तंयोमृतोलवणांभसि ११

द्वात्रिंशोऽध्यायः ३२ सकृष्णइति १ २ काश्यंकाशिदेशजं ३ ४ ५ श्रुतिधरौश्रवणमात्रग्राहिणौ ६ चतुष्पादं
दीक्षासंग्रहसिद्धिप्रयोगाख्यैःचतुर्भिःपादैरुपेतंससंग्रहंसरहस्यम् ७ ८ तयोश्चंद्रसूर्यत्वमनुमायतदाराध्यत्वेनकृष्णंप्रत्यक्षेणैवददर्शेत्याहददर्शचेति ९ १० ११

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 तन्मृतंमे १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ रत्नानिचवैवस्वतेनदत्तानि २३ तस्यवैवस्वतस्यदासौरितिशेषः २४ २५

पुत्रएकोपिमेजातः सचापितिमिनाहृतः प्रभासेतीर्थयात्रायांतन्मृतंपुनरानय १२ तथेत्येवाब्रवीत्कृष्णोरामस्यानुमतेस्थितः
गत्वासमुद्रंतेजस्वी विवेशांतर्जलंहरिः १३ समुद्रः प्रांजलिर्भूत्वादर्शयामासस्वंतदा तमाहकृष्णः क्वासौभोपुत्रः सांदीपनेरिति १४
समुद्रः प्रत्युवाचेदं दैत्यः पंचजनोमहान् तिमिरूपेणतंबालंग्रस्तवानितिमाधव १५ उन्मथ्यसलिलादस्मात्ग्रस्तवानितिभारत
सपंचजनमासाद्यजघानपुरुषोत्तमः नचाससादतंबालंगुरुपुत्रंतदाच्युतः १६ सतुपंचजनंहत्वाशंखंलेभेजनार्दनः यःसदेवमनु
ष्येषुपांचजन्यइतिश्रुतः १७ ततोवैवस्वतपुरंजगामपुरुषोत्तमः ततोयमोभ्युपागम्यववंदेतंगदाधरम् १८ तमुवाचाथवैकृष्णोगु
रुपुत्रःप्रदीयताम् तयोस्तत्रतदायुद्धमासीद्घोरतरंमहत् १९ ततोवैवस्वतंघोरंनिर्जित्यपुरुषोत्तमः आससादचतंबालंगुरुपुत्रंत
दाच्युतः २० आनिनायगुरोःपुत्रंचिरनष्टंयमक्षयात् ततःसांदीपनेःपुत्रःप्रसादादमितौजसः २१ दीर्घकालगतःप्रेतःपुनरासीच्छ
रीरवान् तदशक्यमचिंत्यंचदृष्ट्वासुमहदद्भुतम् २२ सर्वेषामेवभूतानांविस्मयःसमजायत सगुरोःपुत्रमादायपांचजन्यंचमाधवः
रत्नानिचमहार्हाणिपुनरायाज्जगत्प्रभुः २३ राक्षसैस्तस्यरत्नानिमहार्हाणिबहूनिच आनाय्यावेदयामासगुरवेवासवानुजः २४
गदापरिघयुद्धेषुसर्वास्त्रेषुचतावुभौ अचिरात्प्रख्यतामासौसर्वलोकधनुर्भृताम् २५ ततःसांदीपनेःपुत्रंतद्रूपवयसंतदा प्रादात्कृष्णः
प्रतीतात्मासहरत्नैरुदारधीः २६ चिरनष्टेनपुत्रेणकाश्यःसांदीपनिस्तदा समेत्यसुमुदेराजन्पूजयन्रामकेशवौ २७ कृतास्त्रौतावुभौ
वीरौगुरुमामंत्र्यसुव्रतौ आयातौमथुरांभूयोवसुदेवसुतावुभौ २८ ततःप्रत्युद्ययुःसर्वेयादवायदुनंदनौ सबलाःहृष्टमनसउग्रसे
नपुरोगमाः २९ श्रेण्यःप्रकृतयश्चैवमंत्रिणःसपुरोहिताः सबालवृद्धासाचैवपुरीसमभिवर्तत ३० नंदितूर्याण्यवाद्यंततुष्टुवुश्चजना
र्दनम् रथ्याःपताकामालिन्योभ्राजंतेस्मसमंततः ३१ प्रहृष्टमुदितसर्वंमत्तःपुरमशोभत गोविंदागमनेत्यर्थंयथेंद्रमहेतथा ३२
मुदिताश्चाथगायंतिराजमार्गेषुगायकाः तत्रासीत्प्रथितागाथायादवानांप्रियंकरा ३३ गोविंदरामौसंप्राप्तौभ्रातरौलोकविश्रुतौ स्वेपु
रेनिर्भयाःसर्वेक्रीडध्वंसहबांधवैः ३४ नतत्रकश्चिद्दीनोवामलिनोवाविचेतनः मथुरायामभूद्राजन्गोविंदसमुपस्थिते ३५ वयांसि
साधुवाक्यानिप्रहृष्टागोहयद्विपाः नरनारीगणाःसर्वेभेजिरेमनसःसुखम् ३६

२६ २७ २८ यदुनंदनौ यदूनामानंदयितारौप्रत्युद्ययुःसंमुखमागमन् २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३७ ३८ ३९ ४० ४१ ४२ ४३ रैवतस्य पर्वतविशेषस्य ४४ ४५ इति हरिवंशे विष्णुपर्वणि टीकायां त्रयस्त्रिंशोऽध्यायः ३३ राजगृहेश्वरो जरासं
धः दुहितृभ्यां अस्तिप्राप्तिसंज्ञाभ्यां कंसभार्याभ्यां निवेदिते सति १ षडंगेन रथगजतुरगपदातिपण्यधान्यापणिकाख्यैः षड्भिरंगैरुपेतेन २ अपचितिमानृण्यं ३

शिवाश्च वाताः प्रववुर्विरजस्का दिशो दश दैवतानि च हृष्टानि सर्वेष्वायतनेषु च ३७ यानि लिंगानि लोकस्य चासन् कृतयुगे पुरा तानि सर्वाण्यदृश्यंत पुरीं प्राप्ते जनार्दने ३८ ततः काले शिवे पुण्ये स्यंदनेनारिमर्दनः हरियुक्तेन गोविंदो विवेश मथुरापुरीम् ३९ विशंतं मथुरारम्यां तं सुपद्ममरिंदमम् अनुजग्मुर्यदुगणाः शक्रं देवगणा इव ४० वसुदेवस्य भवनं ततस्तौ यदुनंदनौ प्रहृष्टौ हृष्टवदनौ चंद्रादित्याविवाचलम् ४१ परेण तेजसोपेतौ स्वैरं द्वाविव रूपिणौ तावायुधानि विन्यस्य गृहे स्वैरं चारिणौ ४२ मुमुदाते यदुवरौ वसुदेव सुतावुभौ उद्यानेषु विचित्रेषु फलपुष्पाढ्यवनामिषु ४३ चेरतुः स महात्मानौ यादवैः परिवारितौ रैवतस्य समीपेषु सरित्सु विमलासु च ४४ पद्मपत्रविस्तृतासु कारंडवयुतासु च एवं तावकनिर्माणौ मथुरायां शुभाननौ उग्रसेनानुगौ भूत्वा कंचित्कालं समोदतुः ४५ इति श्रीमन्महाभारते खिलेषु हरिवंशे विष्णुपर्वणि रामकृष्णप्रत्यागमनं नाम त्रयस्त्रिंशोऽध्यायः ३३ वैशंपायन उवाच कस्यचित्त्वथ कालस्य राजा राजगृहेश्वरः शुश्राव निहतं कंसं दुहितृभ्यां महीपतिः १ ततो नातिचिरात्कालात् जरासंधः प्रतापवान् आजगाम षडंगेन बलेन महतावृतः २ जिघांसुर्हि सदूनं क्रुद्धः कंसस्यापचितिं स्मरन् अस्तिः प्राप्तिश्च नाम्ना ते मागधस्य सुते नृप ३ जरासंधस्य कल्याण्यौ पीनश्रोणिपयोधरे उभे कंसस्य ते भार्ये प्रादाद्बार्हद्रथो नृपः ४ स ताभ्यां सुसुदूरं राजा बध्या पितरमाहुकम् समाश्रित्य जरासंधमनादृत्य च यादवान् शूरसेनेश्वरो राजा यथा ते बहुशः श्रुतः ५ ज्ञातिकार्यार्थसिद्ध्यर्थमुग्रसेनहिते रतः वसुदेवो भवन्नित्यं कंसेन समुपेक्षितम् ६ रामकृष्णौ समाश्रित्य हते कंसे दुरात्मनि उग्रसेनोऽभवद्राजा भोजवृष्ण्यंधकैर्वृतः ७ दुहितृभ्यां जरासंधः प्रियाभ्यां बलवान्नृपः नोदितो वीरपत्नीभ्यां स प्रायान्मथुरां ततः ८ कृत्वा सर्वसमुद्योगं क्रोधादग्निः समुज्ज्वलन् प्रतापवान् तदा येऽत्र जरासंधस्य पार्थिवाः ९ मित्राणि ज्ञातयश्चैव संयुक्ताः सुहृदस्तथा तमेवानुययुः सर्वे सैन्यैः समुदितैर्वृताः १० महेष्वासा महावीर्या जरासंधप्रियैषिणः कारूषो दंतवक्रश्च चेदिराजश्च वीर्यवान् ११ कालिंगाधिपतिश्चैव पौंड्रश्च बलिनां वरः कौशिकश्चैव कुटिलः भीष्मकश्च नराधिपः १२ पुत्रश्च भीष्मकस्यापि रुक्मी मुख्यो धनुर्भृताम् वासुदेवार्जुनाभ्यां यः स्पर्द्धते स महाहवे १३

बार्हद्रथो जरासंधः ४ सः कंसः विक्रांतः आहुकपुत्रमुग्रसेनम् ५ ६ ७ ८ ९ १० ११ १२ १३ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१४ १५ १६ १७ १८ १९ २० इतिहरिवंशेविष्णुपर्वणिटीकायांचतुस्त्रिंशत्तितमोऽध्यायः ३४ १ २ ३ ४ ५ निकषः स्वर्णनिकषवद्बलाबल
निर्णयहेतुः ६ बलंपरेषांसैन्यंगतायुः चिरायुर्वेतिविमृश्यतांविचारणीयमित्यर्थः ७ ८ ९ पार्थिवेपृथ्वीस्थजनयोग्येमृत्युमार्गेइत्यर्थः १० प्रोक्षितानृप

वेणुदारिः श्रुतर्वाचक्रथश्चैवांशुमानपि अंगराजश्चबलवान्वंगानामधिपस्तथा १४ कौशल्यःकाशिराजश्चदशार्णाधिपतिस्तथा
सुवस्वरश्चविक्रांतोविदेहाधिपतिस्तथा १५ मद्रराजश्चबलवान्त्रिगर्तानामथेश्वरः शाल्वराजश्चविक्रांतोदरदश्चमहाबलः १६
यवनाधिपतिःश्रीमान्भगदत्तश्चवीर्यवान् सौवीरराजःशैब्यश्चपांड्यश्चबलिनांवरः १७ गांधारराजःसुबलोनग्नजिच्चमहाबलः दु
र्योधनादयश्चैवधार्तराष्ट्रामहाबलाः १८ एतेचान्येचराजानोबलवंतोमहारथाः तमन्वयुर्जरासंधंविद्विषंतोजनार्दनम् १९ तेशूरसे
नान्विषयमभूतयवसेंधनान् रुरुधुःसंरुध्यमथुरांपुरस्कृत्यबलंतदा २० इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिमथु
रोपरोधोनामचतुस्त्रिंशत्तितमोऽध्यायः ३४ वैशंपायनउवाच मथुरोपवनेगत्वानिविष्टान्तान्नराधिपान् अपश्यन्वृष्ण्यं
धकाःसर्वेपुरस्कृत्यजनार्दनम् १ ततोहृष्टमनाःकृष्णोरामंवचनमब्रवीत् त्वरतेखलुकार्यार्थंदेवतानांनसंशयः २ यथायसंनिकृष्टो
हिजरासंधोनराधिपः लक्ष्यंतेहिध्वजाग्र्याणिरथानांवातरंहसाम् ३ एतानिशशिकल्पानिनृपाणांविजिगीषताम् छत्राण्यार्यविराज
तेप्रोच्छ्रितानिसितानिच ४ अहोनृपरथोदग्राविमलाश्छत्रपंक्तयः अभिवर्ततिनःकृष्णाययथाखेहंसपंक्तयः ५ कालेखलुनृपःप्रा
प्तोजरासंधोमहीपतिः आवयोर्युद्धनिकषःप्रथमःसमरातिथिः ६ आर्यतिष्ठावसहितावनुमासेमहीपतौ युद्धारंभःप्रयोक्तव्योबलं
तावद्विमृश्यताम् ७ एवमुक्तस्ततःकृष्णःस्वस्थःसंग्रामलालसः जरासंधबलंप्रेक्ष्यचकारबलदर्शनम् ८ वीक्ष्यमाणश्चतान्सर्वा
न्नृपान्यदुवरोत्तमः आत्मनैवात्मनोवाक्यमुवाचहृदिसन्निधिम् ९ इमेतेपृथिवीपालाःपार्थिवेवर्त्मनिस्थिताः येषांविनाशोगमिष्यति
शास्त्रदृष्टेनकर्मणा १० प्रोक्षितान्खल्विमान्मन्येमृत्युनानृपपुंगवान् स्वर्गगामीनिचाप्येषांवपूंषिप्रचकाशिरे ११ स्थानेभारपरिश्रांता
वसुधेयंदिवंगता एषांनृपाणांसुस्थानांबलौघैरभिपीडिता १२ महींनिरंतराचेयंबलराष्ट्राभिसंवृता स्वल्पेनखलुकालेनविविक्तापृथि
वीतलम् १३ भविष्यतिनरेंद्रौघैःशतशोविनिपातितैः वैशंपायनउवाच जरासंधस्ततःक्रुद्धःप्रभुःसर्वमहीक्षिताम् १४ नरा
धिपसहस्रौघैरनुयातोमहाद्युतिः व्यायतोदग्रतुरगैःसुयानैःसुसमाहितैः १५

नपशुवदासन्नमृत्यून् ११ स्थानेयुक्तंअस्याःभारावतरणमित्यर्थः यतः इयंदिवंगतादिविस्थंब्रह्माणंप्रतिशरणंगता १२ विविक्तंनिर्जनम् १३ १४ १५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

हेमकक्षैः स्वर्णशृंखलैः १६ प्रेंखमाणैः कूर्दमानैः १७ १८ १९ २० घनानिचनादयानः २१ २२ २३ विमिश्रंसैन्यमितिशेषः २४ निवेशायस्थानपरिग्रहाय २५

रथैः सांग्रामिकैर्युक्तैरसंगगतिभिः क्वचित् हेमकक्षैर्महाघंटैर्वारणैर्वारिदोपमैः १६ महामात्रोत्तमारूढैः कल्पितै रणकोविदैः स्वारू
ढैः सादिभिर्युक्तैः प्रेंखमाणैः प्रवल्गितैः १७ वाजिभिर्मेघसंकाशैः प्लुवद्भिरिवपत्तिभिः खड्गचर्मधरोदग्रैः पत्तिभिर्बलिनांवरैः १८ सहस्र
संख्यासंयुक्तैरुत्पतद्भिरिवोरगैः एवंचतुर्विधैः सैन्यैः कंपमानैरिवांबुदैः १९ नृपः प्रयातोबलवान्जरासंधोधृतव्रतः सरथैर्मेघनिर्घोषै
र्गजैश्चमदसंयुतैः २० हेषमाणैश्चतुरगैः क्ष्वेडमानैश्चपत्तिभिः नादयानोदिशः सर्वास्तस्याः पुर्यावनानिच २१ सराजासागराकारः स
सैन्यः प्रत्यदृश्यत तद्बलंपृथिवीशानांहृष्टयोधजनाकुलम् २२ क्ष्वेडितास्फोटितरवंमेघसैन्यमिवावभौ रथैः पवनसंपातैर्गजैश्चज
लदोपमैः २३ तुरगैश्चजवोपेतैः पत्तिभिः खगमोपमैः २३ विमिश्रंसर्वतोभातिमत्तद्विपसमाकुलम् घर्मांतेसागरगतंयथाभ्रपटलंत
था २४ सबलास्तेमहीपालाजरासंधपुरोगमाः परिवार्यपुरींसर्वेनिवेशायोपचक्रिरे २५ घर्मांतेस्यनिविष्टस्यबलस्याः शिबिरस्यवै
शुक्लपर्यंतपूर्णस्ययथारूपंमहोदधेः २६ वीतरात्रेततः कालेसमुत्तस्थुर्महीक्षितः आरोहणार्थंपुर्यास्तेसर्वेयुयुत्सुलालसाः २७ स
मवायीकृताः सर्वेयमुनासेतुतेनृपाः निविशमन्वयामासुर्युद्धकालकुतूहलाः २८ तेषांतुतुमुलः शब्दः सुश्रुवेपृथिवीक्षिताम् युगां
तेभिद्यमानानांसागराणामिवस्वनः २९ तेषांसकंचुकोष्णीषाः स्थविरावेत्रपाणयः चेरुमाशब्दइत्येववदंतोराजशासनात् ३० तस्य
रूपंबलस्यासीन्निःशब्दस्तिमितस्यवै लीनमीनग्रहस्येवनिःशब्दस्ययथोदधेः ३१ निःशब्दस्तिमितेतस्मिन्योगादिवमहार्णवे जरा
संधोबृहद्वाक्यंबृहस्पतिरिवाददे ३२ शीघ्रंसमभिवर्तंतांबलानिपृथिवीक्षिताम् सर्वतोनगरीचेयंजनौघैः परिवार्यताम् ३३ अ
श्मयंत्राणियुज्यंतांक्षेपणीयाश्चमुद्गराः ऊर्ध्वचापानिवाह्यंतांप्रासावैतोमरास्तथा ३४ दार्यतांचैवटंकाद्यैः खनित्रैश्चपुरीद्रुतम् नृ
पाश्चमुद्गभागज्ञाविन्यस्यंतांसदूरतः ३५ अद्यप्रभृतिसैन्यैर्मेपुरीरोधः प्रवर्ततताम् यावदेतौरणेगोपौवसुदेवसुतावुभौ ३६ संक
र्षणंचकृष्णंचघातयामिशितैः शरैः आकाशमपिबाणौघैर्निःसंपातंयथाभवेत् ३७ मयानुशिष्टास्तुपुरीभूमिषुभूमिपाः तेषु
तेष्ववकाशेषुशीघ्रमारुह्यतांपुरीम् ३८ मद्रः कलिंगाधिपतिश्चेकितानः सबाल्हिकः काश्मीरराजोगोनर्दः करूषाधिपतिस्तथा ३९

शिबिरस्यसेनागृहस्यपटमयस्यजात्याभिप्रायमेकवचनम् २६ २७ २८ २९ सकंचुकोष्णीषाः प्रतीहाराः ३० ३१ योगात्वृत्तिनिरोधात् ३२ ३३
प्रासाः हस्तक्षेप्या भल्लाः ऊर्ध्वदुर्गप्राकारोपरिनिवाह्यंतांप्रापयंतु ३४ ३५ ३६ निःसंपातंकीलितमिव ३७ ३८ ३९ ६७ ६७ ६७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्रुमः किंपुरुषश्चैव पार्वतीयोऽद्यनामयः नगर्याः पश्चिमं द्वारं शीघ्रमारोधयन्त्विति ४० पौरवो वेणुदारिश्च वैदर्भः सोमकस्तथा रुक्मी
च भोजाधिपतिः सूर्याक्षश्च ससाल्वः ४१ विंदानुविंदावावन्त्यौ दन्तवक्त्रश्च वीर्यवान् छागलिः पुरमित्रश्च विराटश्च महीपतिः ४२
कौरव्यो मालवश्चैव शतधन्वा विदूरथः भूरिश्रवास्त्रिगर्तश्च बाणः पञ्चनदस्तथा ४३ उत्तरं नगरद्वारमेते दुर्गसहा नृपाः आरुह्याचा
भिमदुर्ग वज्रप्रतिमगौरवाः ४४ उलूकः कैतवश्चैव वीरश्चांशुमतः सुतः एकलव्यो बृहत्क्षत्रः क्षत्रधर्मा जयद्रथः ४५ उत्तमौजाश्च श
ल्यश्च कौरवाः कैकयास्तथा वैदिशो वामदेवश्च सांकृतिश्च शिनीपतिः ४६ पूर्वं नगरनिर्व्यूहमेते प्रायन्त मस्तकैः दारयन्तो विधावन्तु वाता-
इव बलाहकान् ४७ अहं च दरदश्चैव चेदिराजश्च वीर्यवान् दक्षिणं नगरद्वारं पालयामः सुदंशिताः ४८ एवमेषा पुरी क्षिप्रं समन्ताद्दू
षिताचलैः वज्रपातविषमं प्राप्नोतु तुमुलं भयम् ४९ गदिनो यगदाभिस्तु परिघैः परिघायुधाः अपरे विविधैः शस्त्रैः दारयन्तु पुरी-
मिमाम् ५० अद्यैव नगरी ह्येषा विषमोच्छ्रयसंकटा कार्या भूमिसमा सर्वा भवद्भिर्वसुधाधिपैः ५१ चतुरंगबले व्यूहे त्वं जरासंधो व्यवस्थि
तः अथाभ्ययाद्द्रुतं क्रुद्धः सहसैन्यैर्नराधिपैः ५२ प्रतिजग्मुर्दशार्हास्ते व्यूढानीकाः प्रहारिणः तद्युद्धमभवद्घोरं तेषां देवासुरोपमम्
५३ अल्पानां बहुभिः सार्धं व्यतिषक्तरथद्विपम् ५३ नगरान्निःसृतौ दृष्ट्वा वसुदेवसुतावुभौ क्षुभितं नृपवरानीकं त्रस्तसमूढवाहनम्
५४ रथस्थौ दंशितौ चैव चेरतुस्तत्र यादवौ मकराविव संरब्धौ समुद्रक्षोभणावुभौ ५५ तयोः प्रयुध्यतोः संख्ये मतिरासीन्महात्मनोः
आयुधानां पुराणानामादाने कृतलक्षणा ५६ ततः खान्निपतन्ति स्म दिव्यान्याहवसंप्लवे लेलिहानानि दीप्तानि महान्ति सुहृदानि च
५७ क्रव्यादैरनुयातानि मूर्तिमन्ति बृहन्ति च तृषितान्याहवे भोक्तुं नृपमांसानि वै भृशम् ५८ दिव्यस्रग्दामधारीणि त्रासयन्ति च खेच-
रान् प्रभया भासमानानि पतमानानि चाम्बरात् ५९ हलं संवर्तकं नाम सौनन्दं मुशलं तथा धनुषां प्रवरं शार्ङ्गं गदा कौमोदकी तथा ६०
चत्वार्येतानि तेजांसि विष्णुप्रहरणानि च ताभ्यां समवतीर्णानि यादवाभ्यां महामृधे ६१ जग्राह प्रथमं रामो लांगलं प्रतिमं हलम् सर्पन्तमिव
सर्पेन्द्रं दिव्यमालाकुलमूर्धं ६२ सौनन्दं च ततः श्रीमान् निरानंदकरं द्विषाम् सव्येन सालनाथश्च जग्राह मुशलोत्तमम् ६३ दर्शनीयं त्रि-
लोकेषु धनुर्जलदनिःस्वनम् नाम्ना शार्ङ्गमिति ख्यातं कृष्णो जग्राह वीर्यवान् ६४ देवैर्निगदिता यस्य गदा तस्यापरे करे निःक्षिप्ता कुमुद-
क्षस्य नाम्ना कौमोदकीति सा ६५ ५५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४ ७५ ७६ ७७ ७८ ७९ ८० ८१

तौ संप्रहरणौ वीरौ साक्षाद्विष्णुतनूपमौ समरे रामगोविंदौ रिपूंस्तान्प्रत्ययुध्यताम् ६६ सायुधप्रग्रहौ वीरौ तावन्योन्याश्रयावुभौ
पूर्वजानुजसंज्ञौ तौ रामगोविंदलक्षणौ ६७ द्विषत्सु प्रतिकुर्वाणौ पराक्रांतौ यथेश्वरौ विचेरतुर्यथा देवौ वसुदेवसुतावुभौ ६८
हलमुद्यम्य रामस्तु सर्पेंद्रमिव कोपितः चचार समरे वीरो विद्विषामंतको यथा ६९ विकर्षन्रथवृंदानि क्षत्रियाणां महात्मनाम् चकार रो
षसफलं नागेषु च हयेषु च ७० कुंजरान्लांगलक्षिप्तान्मुशलाक्षेपताडितान् रामो विराजन्समरे निर्ममंथ यथाचलान् ७१ ते वध्यमा
ना रामेण रणे क्षत्रियपुंगवाः जरासंधांतिकं भीताः शरणं प्रतिजग्मिरे ७२ तानुवाच जरासंधः क्षत्रधर्मे व्यवस्थितः धिगेतां क्षत्रवृत्तिं वः स
मरे कातरात्मनाम् ७३ परावृत्तस्य समरे विरथस्य पलायतः भ्रूणहत्यामिवासह्यां प्रवदंति मनीषिणः ७४ भीताः कस्मान्निवर्तध्वं धि-
गेतां क्षत्रवृत्तिताम् क्षिप्रं सर्वे निवर्तध्वं मम वाक्येन चोदिताः ७५ अथवा तिष्ठत रथैः प्रेक्षकाः समवस्थिताः यावदेतौ रणे गोपौ प्रेषयामि
यमक्षयम् ७६ ततस्ते क्षत्रियाः सर्वे जरासंधेन नोदिताः सृजंतः शरजालानि हृष्टा योद्धुं व्यवस्थिताः ७७ ते हयैः कांचनापीडै रथैश्चांबु
दनादिभिः नादैश्चांबुदसंकाशैर्महामात्रप्रणोदितैः ७८ सतनुत्राः सनिस्त्रिंशाः सपताकायुधध्वजाः स्वारोपितधनुष्मतः सतूणीराः सताम
राः ७९ सच्छत्राः सादिनश्चैव चारुचामरवीजिताः रणे तेऽधिगतारज्जुः स्यंदनस्था महीक्षितः ८० ते युद्धरागारथिनो व्यगाहंतायुधावराः ग
दाभिश्चैव गुर्वीभिः क्षेपणीयैश्च मुद्गरैः ८१ एतस्मिन्नंतरे तत्र देवानानंदिवर्द्धनः सुपर्णध्वजमास्थाय कृष्णास्तु रथमुत्तमम् ८२ समभ्यया-
ज्जरासंधं शरैर्विव्याध चाष्टभिः सारथिं चास्य विव्याध पंचभिर्निशितैः शरैः ८३ जघान तुरगांश्चाजौ यतमानस्य वीर्यवान् तं कृच्छ्रगतमाज्ञा
य चित्रसेनो महारथः ८४ सेनानीः कैशिकश्चैव कृष्णं विविधतुः शरैः त्रिभिर्विव्याध संसक्तं बलदेवं च कैशिकः ८५ बलदेवो धनुश्चास्य भ
ल्लेनाजौ द्विधाकरोत् जवेनाभ्यर्दयच्चापि तानरीन्शरवृष्टिभिः ८६ बाहुभिर्बहुधा वीरान्समंतात्स्वर्णभूषणैः तं चित्रसेनः संरब्धो वि-
व्याध नवभिः शरैः ८७ कैशिकः पंचभिश्चापि जरासंधश्च सप्तभिः त्रिभिस्त्रिभिश्च नाराचैस्तान्बिभेद जनार्दनः ८८ पंचभिः पंचभिश्चै
व बलदेवः शितैः शरैः रथं चैवास्य चिच्छेद चित्रसेनस्य वीर्यवान् ८९ बलदेवो धनुश्चास्य भल्लेनाजौ द्विधाकरोत् सच्छिन्नधन्वा विरथो
गदामादाय वीर्यवान् ९० अभ्यधावत्स संरब्धो जिघांसुर्मुशलायुधं सिक्तः क्षतस्तु नाराचैश्चित्रसेनवधैषिणः धनुश्चिच्छेद रामस्य जरासंधो
महाबलः ९१

८२ ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९० ९१

गदयाचजघानाश्वान्क्रोधात्समगधेश्वरः रामंचाभ्यद्रवद्वीरोजरासंधोमहाबलः ९२ आदायमुशलंरामोजरासंधमुपाद्रवत् त
योस्तद्युद्धमभवत्परस्परवधैषिणोः ९३ चित्रसेनस्ततःसक्तंदृष्ट्वारामेणमागधम् रथमन्यंसमारुह्यजरासंधमवारयत् ९४ ततोबले
नमहतागजानीकेनचाप्यथ उभयोरंतरंताभ्यांसंकुलंसमपद्यत ९५ ततःसैन्येनमहताजरासंधोभिसंवृतः रामकृष्णावग्रगान्भोजा
नाससादमहाबलः ९६ तत्रभक्ष्यभितस्येवसागरस्यमहास्वनः प्रादुर्बभूवतुमुलःसेनयोरुभयोरपि ९७ वेणुभेरीमृदंगानांशंखा
नांचसहस्रशः उभयोःसेनयोराजन्प्रादुरासीन्महास्वनः ९८ क्ष्वेडितास्फोटितोत्क्रुष्टैस्तुमुलःसर्वतोऽभवत् उत्पपातरजश्चापिरथुरने
मिसमुद्धतम् ९९ समुद्यतमहाशस्त्राःप्रगृहीतशरासनाः अन्योन्यमभिगर्जंतःशूरास्तत्रावतस्थिरे १०० रथिनःसादिनश्चैवपत्तय-
श्चसहस्रशः गजाश्चातिबलास्तत्रसमुत्पेतुःसमंततः १०१ संसन्निपातस्तुमुलस्त्यक्त्वाप्राणानवर्तत वृष्णिभिःसहयोधानांजरासंध-
स्यदारुणः १०२ ततःशिनिरनाधृष्टिर्बभ्रुर्विपृथुराहुकः बलदेवंपुरस्कृत्यसैन्यस्यार्धेनदंशिताः १०३ दक्षिणंपक्षमासेदुःशत्रुसैन्यस्य
भारत पालितंचेदिराजेनजरासंधेनवाविभो १०४ उदीच्यैश्चमहावीर्यैःशल्यशाल्वादिभिर्नृपैः सृजंतःशरवर्षाणिसमभित्यक्तजीविताः
१०५ आगावहःपृथुःकंकःशतधन्वाविदूरथः हृषीकेशंपुरस्कृत्यसैन्यस्यार्धेनदंशिताः १०६ भीष्मकेणाभिगुप्तश्चरुक्मिणाचमहा-
त्मना देवकेनापिराजेंद्रतथामद्रेश्वरेणच १०७ प्राच्यैश्चदाक्षिणात्यैश्चगुप्तवीर्यबलान्वितैः तेषांचयुद्धमभवत्समभित्यक्तजीवितम्
१०८ शक्त्यृष्टिप्रासबाणौघान्सृजतांतुमुलंमहत् १०८ सात्यकिश्चित्रकःश्यामोयुयुधानश्चवीर्यवान् राजाधिदेवोमृदुरःश्वफल्कश्च
महारथः १०९ सत्राजिच्चप्रसेनश्चबलेनमहतावृताः व्यूहस्यपक्षंतेसव्यंमर्तांयुद्धिषतांमृधे ११० व्यूहस्यार्द्धंसमासेदुर्मृदुरेणाभिरक्षि
तम् राजभिश्चापिबहुभिर्वेणुदारिमुखैःसह १११ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिमथुरोपरोधेयुद्धवर्णनंनामपंच-
त्रिंशतितमोऽध्यायः ३५ वैशंपायनउवाच ततोयुद्धानिवृष्णीनांबभूवुःसुमहांत्यथ मागधस्यमहामात्यैर्नृपैश्चैवानुयायिभिः १
रुक्मिणावासुदेवस्यभीष्मकेणाहुकस्यच क्रथस्यवसुदेवेनकौशिकस्यतुबभ्रुणा २ गदेनचेदिराजस्यदंतवक्त्रस्यशंकुना तथान्यैर्वृ-
ष्णिवीराणांनृपाणांचमहात्मनाम् ३ युद्धमासीद्धिसैन्यानांसैनिकेभरतर्षभ अहानिपंचचैकंचषट्सप्ताष्टौचदारुणम् ४ ४५

१०९ ११० १११ इतिहरिवंशेविष्णुपर्वणिटीकायांपंचत्रिंशतितमोऽध्यायः ३५ ततोयुद्धानीति १ २ ३ अहानिपंचेत्यादिसर्वसंख्यासंकलनेसप्तविंशतिदिनानियुद्धमासी
दित्यर्थः ४

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५ ६ अवेक्ष्यरुक्मिणीमित्यतोज्ञायतेइतः पूर्वंरुक्मिणीहरणमिति अनागतावेक्षणपरंवाइदम् ७ ८ लक्षस्यवधेएककबंधसमुत्थानं अत्रतुसंख्यायाः

गजैर्गजाहयैरश्वाः पदाताश्चपदातिभिः रथैरथाविमिश्राश्चयोधायुयुधिरेनृप ५ जरासंधस्यनृपतेरामेणासीत्समागमः महेंद्रस्ये
ववृत्रेणदारुणोरोमहर्षणः ६ अवेक्ष्यरुक्मिणींकृष्णोरुक्मिणंन्यव्यपोथयत् ज्वलनार्कांशुसंकाशानाशीविषविषोपमान् ७ धा
रयामासकृष्णोवैशरांस्तस्यतुशिक्षया इत्येषासुमहानासीद्बलौघानापरिक्षयः ८ उभयोःसेनयोराजन्मांसशोणितकर्दमः कबंधा
निसमुत्तस्थुःसुबहूनिसमंततः ९ तस्मिन्विमर्देयोधानांसंख्यावृत्तिकराणिच रथीरामोजरासंधेशरैराशीविषोपमैः १० आवृण्वन्नभ्य
याद्वीरस्तत्रराजासमागधः अभ्यवर्ततवेगेनस्यंदनेनाशुगामिना ११ अन्योन्यंविविधैरस्त्रैर्विध्वाविध्वाविनेदतुः तौक्षीणशस्त्रौविर
थौहताश्वौहतसारथी १२ गदेगृहीत्वाविक्रांतौअन्योन्यमभिधावताम् कंपयंतौभुवंवीरौतावुद्यतगदावुभौ १३ ददृशातेमहात्मा
नौगिरीसशिखराविव स्युपारमंतयुद्धानिपश्यंतौतौमहाभुजौ संरब्धावभिधावंतौगदायुद्धेषुविश्रुतौ १४ उभौतौपरमाचार्यौलोके
ख्यातौमहाबलौ मत्ताविवगजौयुद्धेतावन्योन्यमयुध्यताम् १५ ततोदेवाःसगंधर्वाः सिद्धाश्चसमहर्षयः समंततश्चाप्सरसःसमाज
ग्मुःसहस्रशः १६ तद्देवयक्षगंधर्वमहर्षिभिरलंकृतम् शुशुभेभ्यधिकंराजन्दिवंज्योतिर्गणैरिव १७ अभिदुद्रावरामंतुजरासं
धोमहाबलः सव्यंमंडलमाश्रित्यबलदेवस्तुदक्षिणम् १८ प्रहरंतौततोन्योन्यंगदायुद्धविशारदौ दंताभ्यामिवमातंगौनादयंतौ
दिशोदश १९ गदानिपातोरामस्यशुश्रुवेशनिनिःस्वनः जरासंधस्यचरणेपर्वतस्येवदीर्यतः २० नस्मकंपयतेरामंजरासंधकरच्युता
गदागदाभृतांश्रेष्ठंविंध्यंगिरिमिवानिलः २१ रामस्यतुगदावेगंवीर्यात्समगधेश्वरः सेहेधैर्येणमहताशिक्षयाचव्यपोहयत् २२ एवं
तौतत्रसंग्रामेविचरंतौमहाबलौ मंडलानिविचित्राणिविचेरतुररिंदमौ २३ व्यायच्छंतौचिरंकालंपरिश्रांतौचतस्थतुः समाश्वस्य
मुहूर्तंतुपुनरन्योन्यमाहताम् २४ एवंतौयोधमुख्यौतुसमंयुयुधतुश्चिरम् नचतौयुद्धवैमुख्यमुभावेवप्रजग्मतुः २५ अथापश्यद्यु
द्धेयुद्धेविशेषंतस्यवीर्यवान् रामःक्रुद्धोगदांत्यक्त्वाजग्राहमुशलोत्तमम् २६ तमुद्यतंतदादृष्ट्वामुशलंघोरदर्शनम् अमोघंबलदेवे
नक्रुद्धेनतुमहारणे २७ ततोंतरिक्षेवागासीत्सुस्वरालोकसाक्षिणी उवाचबलदेवंतंसमुद्यतहलायुधम् २८ नत्वयारामवध्योय
मलंखेदेनमागधे विहितोस्यमयामृत्युस्तस्मात्साधुव्युपारम अचिरेणैवकालेनप्राणांस्त्यक्ष्यतिमागधः २९

आवृत्तिः कबंधसंख्यैव कर्तुंनशा
क्याइत्यर्थः ९ १० ११ १२ १३ १४ १५ १६ दिवंस्थानं १७ १८ १९ २० २१ २२ २३ आहतांआजघ्नतुः २४ २५ २६ २७ २८ २९ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३० असक्तं निरनुक्रोशं प्रशांतमिति प्रांचः ३१ ३२ ३३ ३४ ३५ ३६ ३७ अक्षौहिण्य इति सा सेनाक्षौहिणी नाम खगांकाग्निकद्विकैर्गजैः रथैरेतैर्हयैस्त्रिघ्नैः ६५६१० पंचघ्नैश्च १०९४५० पदातिभिरिति ३८ अभिभूताः पुनः पुनरावेष्टिताः ३९ ४० इति हरिवंशे विष्णुपर्वणि टीकायां षट्त्रिंशोऽध्यायः

जरासंधस्तु तच्छ्रुत्वा विमनाः समपद्यत नृपजक्तेततस्तस्मै पुनरेव हलायुधः ३० तौ च पारमतां युद्धे वृष्ण्यायस्तेच पार्थिवाः असक्तमभवत्सुद्धं तेषां मेवस्कदारुणम् ३१ दीर्घकालं महाराज निघ्नतामितरेतरम् पराजितं बलं पक्षात्तेजरासंधे महीपतौ ३२ अस्तं याते दिनकरे नानुसस्नुर्यदा निशि समानीय स्वकं सैन्यं लब्धलक्षा महाबलाः ३३ पुरीं प्रविविशुर्हृष्टाः केशवेनाभिपालिताः रथाच्युतान्यायुधान्येव तान्येवा तदधुस्तदा ३४ जरासंधोपि नृपतिर्विमनाः स्वपुरीं ययौ राजानश्चानुगा येस्य स्वराष्ट्राण्येव ते ययुः ३५ जरासंधं तु तं जित्वा मेनिरे नैव निर्जितम् वृष्णयः कुरुशार्दूल राजा ह्यतिबलः सवै ३६ दशचाष्टौ च संग्रामान् जरासंधस्य यादवाः ददुर्नचैनं समरे हंतुशेकुर्महाबलाः ३७ अक्षौहिण्यश्च तस्यासन् विंशतिश्च महामते जरासंधस्य नृपतेस्तदर्थं याः समागताः ३८ अल्पत्वादभिभूतास्तु वृष्णयो भरतर्षभ बार्हद्रथेन राजेंद्र राजभिः सहितेन वै ३९ भूयः कृत्वोद्यमं याताः यादवान्कृष्णपालितान् जित्वा तु मागधं संख्ये जरासंधं महीपतिम् विहरंति स्म सुखिनो वृष्णिसिंहा महारथाः ४० इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि जरासंधापयानं नाम षट्त्रिंशोऽध्यायः ३६ वैशंपायन उवाच स कृष्णस्तत्र बलवान्रौहिणेयेन संगतः मथुरां यादवाधीनां पुरीं तां सुखमावसत् १ प्राप्तयौवनदेहस्तु युक्तो राजश्रिया विभुः चचार मथुरां भीतः सवनाकरभूषणाम् २ कस्यचित्त्वथ कालस्य राजा राजगृहेश्वरः सुस्मार निहतं कंसं जरासंधः प्रतापवान् ३ युद्धाय योजितो भूयो दुहितृभ्यां महीपतिः दश सप्त च संग्रामान् जरासंधस्य यादवाः ४ ददुर्नचैनं समरे हंतुं शेकुर्महारथाः ततो मागधराट् श्रीमान् चतुरंगबलान्वितः ५ भूयोप्यष्टादशं कर्तुं संग्रामं समसमारभत् वैलक्ष्यात्पुनरेवासौ राजा राजगृहेश्वरः ६ जरासंधो बली श्रीमान् पाकशासनविक्रमः ससाधनेन महता बृहद्रथसुतो बली ७ कृष्णस्य वधमन्विच्छन् भूयो वैसन्यवर्तत तस्मिन्सुखासहिताः सर्वे निवृत्ते मगधेश्वरम् यादवा मंत्रयामासुर्जरासंधभयार्दिताः ८ ततः प्राह महातेजा विकद्रुर्नयकोविदः कृष्णं कमलपत्राक्षमुग्रसेनस्य शृण्वतः ९ श्रूयतां तात गोविंद कुलस्यास्य समुद्भवः श्रूयतां सभिभास्यामि प्राप्तकालं महत्ततः १० युक्तं चेन्मन्यसे साधो करिष्यसि वचो मम यादवस्यास्य वंशस्य समुद्भवमशेषतः ११

३६ सकृष्णाः संगतः सखीभूतः इतरेषामित्यर्थात् १ २ ३ ४ ५ पाठांतरे अष्टादशमं अष्टादशं वैलक्ष्यात् लज्जातः ६ ७ संन्यवर्तत पराहत्तः ८ ९ श्रूयतां शृण्वतां पुरः प्राप्तकालोचितम् १० ११ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मेममाग्रे १२ १३ १४ १५ १६ विश्वस्तोज्येष्ठे भ्रातरिलुब्धोपिश्रद्धावान्परित्यजत् १७ १८ १९ २० २१ २२ २३ २४ सम्यक्प्रवृत्तस्येत्य-

यथामेकथितःपूर्वंव्यासेनविदितात्मना आसीद्राजामनोर्वंशेश्रीमानिक्ष्वाकुसंभवः १२ हर्यश्वइतिविख्यातोमहेंद्रसमविक्रमः तस्यासीद्दयिताभार्यामधोर्दैत्यस्यवैसुता १३ देवीमधुमतीनामयथेंद्रस्यशचीतथा सायौवनगुणोपेतारूपेणाप्रतिमाभुवि १४ मनोरथकरीराज्ञःशर्णेभ्योपिगरीयसी १४ दानवेंद्रकुलेजातासश्रोणिःकामरूपिणी एकपत्नीव्रतधराखेचरारोहिणीयथा १५ सातमिक्ष्वाकुशार्दूलंकामयामासकामिनी सकदाचिन्नरश्रेष्ठोभ्रात्राज्येष्ठेनमाधव १६ राज्यान्निरस्तोविश्वस्तःसोयोध्यांसंपरित्यजत् सतदाल्पपरीवारःप्रिययासहितोवने १७ रेमेसमेत्यकालज्ञःप्रोवाचकमलेक्षणः भ्रात्राधिनिकृतराज्यात्प्रोवाचकमलेक्षणा १८ एह्यागच्छनरश्रेष्ठत्यजराज्यकृतांस्पृहाम् गच्छावःसहितोवीरमधोर्ममपितुर्गृहम् १९ रम्यंमधुवननामकामपुष्पफलद्रुमम् सहितौतत्ररंस्यावोयथादिविगतौतथा २० पितुर्मेदयितस्त्वंहिमातुर्मममचपार्थिव मत्प्रियार्थंप्रियतरोभ्रातुश्चलवणस्यवै २१ रंस्यावस्तत्रसहितौराज्यस्थाविलक्षामगौ तत्रगत्वानरश्रेष्ठरम्येमराविवनंदने २२ भद्रंतेविहरिष्यावोयथादेवपुरेतथा तत्त्यजाद्यमहाराजभ्रातरंतेभिमानिन २३ आवयोर्द्वेषिणंनित्यमत्तराज्यमदेनवै धिगिमगर्हितवासंभृत्यवाच्यपराश्रयं २४ गच्छावःसहितौवीरपितुर्मेभवनांतिकम् तस्यसस्यकृपणस्यपूर्वजभ्रातरमति २५ कामातस्यनरेंद्रस्यपत्न्यास्तदुरुचेवचः ततोमधुपुरंराजाहर्यश्वःसजगामच २६ भार्ययासहकामिन्याकामीपुरुषपुंगवः मधुनादानवेंद्रेणससाम्नासमुदाहृतः स्वागतंवत्सहर्यश्वप्रीतोस्मितवदर्शनात् २७ यदेतन्ममराज्यंवैसर्वंमधुवनंविना ददामितवराजेंद्रवासश्चप्रतिगृह्यताम् २८ वनेस्मिन्लवणश्चायंसहायस्तेभविष्यति अमित्रनिग्रहेचैवकर्णधारत्वमेष्यति २९ पालयेनंशुभंराष्ट्रंसमुद्रानूपभूषितं गोसमृद्धंश्रियाजुष्टमाभीरप्रायमानुषम् ३० अत्रतेवसतस्तातदुर्गंगिरिपुरंमहत् भवितापार्थिवावासःसुराष्ट्रविषयोमहान् ३१ अनूपविषयश्चैवसमुद्रातेनिरामयः आनर्त्तनामतेराष्ट्रंभविष्यत्यायतंमहत् ३२

स्वश्वशुरपक्षबलेनभ्रातुर्वधमनिच्छतइत्यर्थः २५ २६ २७ २८ २९ ३० ३१ ३२ ६१ ६१ ६१ ६१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३३ यायातमपीति यादवं ययातिपुत्रस्ययदोः संबंधिनंवंशंतेतववंशः समेष्यतिप्रवेक्ष्यति अतएवसोमस्यवंशं अनुतेतववंशो भविष्यतिसूर्यवंशान्त्च्युतो भविष्य
तीत्यर्थः ननुइहैव ययातितोयदुःयदोः क्रोशक्रोष्टुः देवमीढः देवमीढात्शूरः शूराद्वसुदेवोवसुदेवात्कृष्णइति वंशः प्रागुक्तः पुनः सूर्यवंशीयात् हर्यश्वात् यदुर्यदोर्माधवो
माधवात्सत्वान् सत्वतोभीमः भीमात् अंधकः अंधकाद्रैवतोरैवतात् ऋक्षऋक्षा द्विश्वगर्भस्तस्मात् वसुर्वसोः वसुदेवोवसुदेवात्कृष्णइतितत्कथंयदोः षष्ठस्यैवैकादशत्वंस
चकल्पभेदाभिप्रायमिदंएकग्रंथपठितत्वाद्दित्रिदुःसमाधेयोयंविरोधः सत्यं तथाप्ययमत्रसमाधिः यायातमपिवंशस्तेइत्येतस्मादेववचनात्तएकएव यदुर्गृहात् गृहातस्य
वेशवत् योगबलेनस्सूर्यवंशेपि आविर्भूयसूर्यवंशस्वपक्षे आनीतवान् यथाब्रह्मणोमानसः पुत्रोवसिष्ठः केनचिन्निमित्तेन पुनर्मित्रावरुणाभ्यामपिजन्मलेभेवसिष्ठत्वंचन
जहौएवंयदुरेकएवलीलावशात्क्रमेणदेहद्वयंधृतवान् नतावता द्वौयदूजातौततश्चएकएवयदुर्द्वयोर्वंशयोः कर्ताएवंवसुदेवोपिशूराच्चवसोश्चाविर्भवन्नेकएवकश्चिद्यदोः
पंचमःकश्चिद्दशमइतियथायोगंज्ञेयंकृष्णस्तुवंशद्वयानुगतात् वसुदेवाज्जात एक एवसन् वसोरपिपौत्रः शूरस्यचपौत्रः वसुशूरयोरपिपितृभेदान्नामभेदेपिस्कंदसनत्कुमा

तद्भविष्यमहंमन्येकालयोगेनपार्थिव अध्यास्यतांयथाकालंपार्थिवंवृत्तमुत्तमम् ३३ यायातमपिवंशस्तेसमेष्यतित्वयादवम् अ
नुवंशंचवंशस्तेसोमस्यभविताकिल ३४ एषमेविभवस्तातनवेमंविषयोत्तमम् दत्वायास्यामितपसेसागरंलवणालयम् ३५ लवणे
नसमायुक्तस्त्वमिमंविषयोत्तमम् पालयस्वाखिलंतातस्वस्यवंशस्यवृद्धये ३६ बाढमित्येवहर्यश्वः प्रतिजग्राहतत्पुरम् सचदैत्यस्तपो
वासंजगामवरुणालयम् ३७ हर्यश्वश्चमहातेजादिव्येगिरिवरोत्तमे निवेशयामासपुरंवासार्थममरोपमः ३८ आनर्तंनामतद्राष्ट्रंसु
राष्ट्रंगोधनायुतम् अचिरेणैवकालेनसमृद्धंप्रत्यपद्यत ३९ अनूपविषयेचैववेलावनविभूषितम् विचित्रंक्षेत्रसस्याढ्यंप्राकारग्राम
संकुलम् ४० शशासनृपतिःस्फीतंतद्राष्ट्रंराष्ट्रवर्द्धनः राजधर्मेणयशसाप्रजानानंदिवर्द्धनः ४१

रवद्युत्त्येवत्र्यंज्ञेयंतेनपृथायाः पांडवमातुः शूरोत्प-
न्नत्वंवसूत्पन्नत्वंचसंगच्छतेएवमन्यत्रापिवंशविरोधे प्यूह्यंयादवानांदेवतात्वेन एकस्याप्युभयसंबंधस्ययुगपत्संभवाच्चेतिदिक् अयमत्रसंग्रहः नामरूपे असंत्यज्य
यदुर्हर्यश्वतोभवत् स्वरूपेणवसुर्नामशूरोभूद्विश्वगर्भतः यदुद्युम्नद्याद्वौजातौवंशौबहुविधाततौ द्विनाम्निवसुदेवायपितृतीर्थेचसंगताविति अतएववैकुंठस्येंद्र-
स्यसमंगुनास्तूयमानस्यसंबोधनं वसूयवोवसुपतेवसूनामिति विश्वाहित्वागोपतिं शूरगोनामिति वसूनांवसुवंश्यानांवसुगोत्रेभवानांवसुपतेसुरस्यस्वामिन्नितिशू
रेतिशूरगोत्रत्वेनचपृथक्संबोधनद्वयंमंत्रवर्णः सूचयतितथाइंद्रवाक्यमपि अहंभुवंवसुनःपूर्वस्यतिरितिप्राच्याचवशवसातुर्वशंयदुमितिचस्वस्यहर्यश्वसंतानजवसुस
बंधित्वंतुवसुसहचरितयातस्ययदुसंबंधित्वंचदर्शयति एतेचमंत्रानागन्जित्याःसत्यायाः पाणिग्रहणप्रसंगेव्याख्यास्यते वसुनावसोःभुवं अभुवं ३४ विभवोमनोरथः तमेवा
इ तवेममिति ३५ ३६ ३७ ३८ ३९ ४० ४१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४२ ४३ यायातंवंशमित्यत्रसूचितमर्थंविवृणोतितस्यैवमिति तस्यपुत्रकामतामालक्ष्ययायातोयंयदुःस्वयमेवहर्यश्वस्यपुत्रोजज्ञेजातोयोगबलात्पररचित्ताभिज्ञत्वाच्च
४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९

तस्यसम्यक्प्रचारेणहर्यश्वस्यमहात्मनः व्यवर्द्धततदक्षोभ्यंराष्ट्रंराष्ट्रगुणैर्युतम् ४२ सहिराजास्थितोराज्येराजवृत्तेनशोभितः प्राप्तःकुं
लोचितालक्ष्मीवृत्तेनचनयेनच ४३ तस्यैवंचसुवृत्तस्यपुत्रकामस्यधीमतः मधुमत्यांसुतोजज्ञेयदुर्नाममहायशाः ४४ सोवर्द्धतमहातेजा
यदुर्दुंदुभिनिःस्वनः राजलक्षणसंपन्नःसपत्नैर्दुरतिक्रमः ४५ यदुर्नामाभवत्पुत्रोराजलक्षणपूजितः यथास्यपूर्वजोराजापूरुःसस्तुमहायशाः
४६ सएकएवतस्यासीत्पुत्रःपरमशोभनः ऊर्जितःपृथिवीभर्ताहर्यश्वस्यमहात्मनः ४७ दशवर्षसहस्राणिसकृत्वाराज्यमव्ययम् जगाम
त्रिदिवराजाधर्मेणाप्रतिमोभुवि ४८ ततोयदुरदीनात्माप्रजाभिस्त्वभ्यषिच्यत पितर्युपरतेश्रीमानक्रमेणार्कइवोदितः ४९ शशासचेमांव
सुधांप्रशांतभयतस्कराम् यदुरिंद्रप्रतीकाशोनृपोयेनस्मयादवः ५० सकदाचिन्नृपश्चक्रेजलक्रीडांमहोदधौ दारैःसहगुणोदारैःसतारइव
चंद्रमाः ५१ सतत्रसहसाक्षिप्तस्तितीर्षुःसागराम्भसि धूम्रवर्णेननृपतिःसर्पराजेनवीर्यवान् ५२ सोपकृष्यातवेगेनजलेसर्पपुरंमहत् म
णिस्तंभगृहद्वारंमुक्तादामविभूषितम् ५३ कीर्णंशंखकुलैःशुभ्रैरत्नराशिविभूषितम् प्रवालांकुरपत्राढ्यैःपादपैरुपशोभितम् ५४
कीर्णंपन्नगनारीणांघैःससुद्रोदरवासिभिः स्वर्णवर्णेनभास्वतस्वस्तिकेनदुवर्चसा ५५ सतंददर्शराजेंद्रोविमलेसागराम्भसि पन्नगेंद्रपुरं
तोयेजगत्यामिवनिर्मितम् ५६ स्वच्छंचैवपुरंतत्रप्रविवेशनृपोयदुः अगाधंतोयदाकारपूर्णंसर्पवधूगणैः ५७ तस्यदत्तंमणिमयंजलज
परमासनम् स्वास्तीर्णंपद्मपत्रैश्चपद्मसूत्रोत्तरच्छदम् ५८ तमासीनन्नृपंतत्रपरमेपन्नगासने द्विजिह्वपतिरव्ययोधूम्रवर्णोभ्यभा
षत ५९ पितातेस्वर्गतिंप्राप्तःकृत्वावंशमिमंमहत् भवंतंतेजसायुक्तंसुत्वाह्यवसुधाधिपम् ६० यादवानामयंवंशस्त्वन्नाम्नायदुपुंग
व पित्रातेमंगलार्थायस्थापितःपार्थिवाकरः ६१ वंशेचास्मिन्नृतवविभोदेवानांतनयाव्ययाः ऋषीणांसुरगणानांचउत्पत्स्यंतेनृयोनिजाः
६२ तन्ममेमाःसुताःपंचकुमार्योवृत्तसंमताः उत्पन्नायौवनाश्वस्यभगिन्यांनृपसत्तम ६३ प्रतीच्छेमाःस्वधर्मेणप्राजापत्येनकर्मणा वर
चतेप्रदास्यामिवराहस्त्वंमतोमम ६४

६० ६१ तनयाव्ययाइतिसंधिरार्षः ६२ तन्ममेतियौवनाश्वस्ययाभगिनीसातत्कनिष्ठस्यहर्यश्वस्यापिभगिनीति
यदोःसापितृष्वसातदीयाकुमारीयदुःकथंपरिणेतुंक्षमेतसापिंड्यस्यानिवृत्तेरितितथापिमातुलदुहितृपरिणयनसमत्वेनविगीतमपिवरलोभात्सर्पराजेन एत
त्कारितंयदुनाचात्यंतदोषाभावादभ्युपगतमितिमंतव्यं यद्वान्यएवसयौवनाश्वइतिकल्प्यम् ६३ स्पष्टार्थोध्यायशेषःप्राजापत्येनविधिनाविवाहविधिना ६४ ६५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६५ जलपूर्णेनयोगेनसंकल्पेन ६६ ६७ एतासुक्रमगसुतासुतेतवपंचसुताः उत्पत्स्यंतइत्यन्वयः ६८ अस्मत्समयबन्धाअस्मद्वरदानानुगृहीताः ६९ ७० ७१ ७२ सपदुःताःपत्नीःसमाश्वास्यपितृगृहवियोगदुःखमपनीय ७३ इतिहरिवंशेविष्णुपर्वणिटीकायांसप्तत्रिंशोऽध्यायः ३७ सतासुइति १ २ ३ तेजिताःप्रोत्साहि

भैमाश्चकुकुराश्चैवभोजाश्चांधकयादवाः दाशार्हावृष्णयश्चेतिख्यातियास्यंतिसप्तते ६५ सतस्मैधूम्रवर्णोवैकन्याःकन्याव्रतेस्थिताः जलपूर्णेनयोगेनददाविद्रसमाययै ६६ वरंचास्मैददौप्रीतःसर्वेपन्नगपुंगवः श्रावयन्कन्यकाःसर्वायथाक्रमसदीनवत् ६७ एतासुतेसुताःपंचसुतासुमममानद उत्पत्स्यंतेपितुस्तेजोमातुश्चैवसमाश्रिताः ६८ अस्मत्समयबन्धाश्चसलिलाभ्यंतरेचराः तववंशेभविष्यंतिपार्थिवाःकामरूपिणः ६९ सवरंकन्यकाश्चैवलब्ध्वायदुवरस्तदा उदतिष्ठतवेगेनसलिलाच्चंद्रमाइव ७० सपंचकन्यामध्यस्थोदद्दशेतत्रपार्थिवः पंचतारेणसंयुक्तोनक्षत्रेणेवचंद्रमाः ७१ सततःपुरसर्वंददर्शनृपसत्तमः वैवाहिकेनवेषेणदिव्यस्रगनुलेपनः ७२ समाश्वास्यचताःसर्वाःसपत्नीःपावकोपमाः जगामस्वपुरंराजाप्रीत्यापरमयायुतः ७३ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिविकद्रुवाक्यनामसप्तत्रिंशोऽध्यायः ३७ वैशंपायनउवाच सतासुनागकन्यासुकालेनमहतानृपः जनयामासविक्रांतान्पंचपुत्रान्कुलोद्वहान् १ मुचुकुंदमहाबाहुंपद्मवर्णंतथैवच माधवंसारसंचैवहरितंचैवपार्थिवम् २ एतान्पंचसुतान्राजापंचभूतोपमान्भुवि ईक्षमाणोनृपःप्रीतिंजगामातुलविक्रमः ३ तेप्राप्तवयसःसर्वेस्थिताःपंचयथाद्रयः तेजिताबलदर्पाभ्यामूचुःपितरमग्रतः ४ ततयुक्ताःस्मवयसाबलेमहतिसंस्थिताः क्षिप्रमाज्ञप्तुमिच्छामःकिंकुर्मस्तवशासनात् ५ सतान्नृपतिशार्दूलःशार्दूलानिववेगितान् प्रीत्यापरमयाप्राहसुतान्वीर्यकुतूहलात् ६ विंध्यर्क्षवंतावभितोद्वपुर्योपर्वताश्रये निवेशयतुयत्नेनमुचुकुंदःकृतोमम ७ सह्यस्यचोपरिष्टात्तुदक्षिणादिशमाश्रितः पद्मवर्णोपिमेपुत्रोनिवेशयतुमाचिरम् ८ तत्रैवपरतःकांतदेशेचंपकभूषिते सारसोमेपुरंरम्यंनिवेशयतुपुत्रकः ९ हरितोयंमहाबाहुःसागरेहरितोदके द्वीपंपन्नगराजस्यसुतोमेपालयिष्यति १० माधवोमेमहाबाहुर्ज्येष्ठपुत्रश्चधर्मवित् यौवराज्येनसंयुक्तःस्वपुरंपालयिष्यति ११ सर्वेनृपश्रियंप्राप्ताअभिषिक्ताःसचामराः पित्रानुशिष्टाश्चत्वारोलोकपालोपमानृपाः १२ स्वस्वंनिवेशनंसर्वेभेजिरेनृपसत्तमाः पुरस्थानानिरम्याणिमृगयंतोयथाक्रमम् १३ मुचुकुंदस्तुराजर्षिर्विंध्यमध्यमरोचयत् स्वस्थानंनर्मदातीरेदारुणोपलसंकटे १४

तां॰ ४ ५ ६ विंध्येतिविंध्यस्योत्तरतःऋक्षवतोदक्षिणतइत्यर्थः ७ ८ तत्रैव सह्यस्योपरिष्टादेवपरतःपश्चिमायांदिशि ९पन्नगराजस्यधूम्रवर्णाख्यस्य १०स्वपुरंरैवताचलसमीपस्थं ११ १२ मृगयंतोजिज्ञासमानाः १३ दारुणोपलसंकटेविषमाश्मदुर्गमे १४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१५ १६ १७ १८ महाश्मसंघातवतीतिमाहिष्मतीपदस्यावयवार्थो दर्शितः १९ २० २१ राजामुचुकुंदः २२ २३ २४ विषयस्येतिभूभागस्याल्पत्वेपि अतिनि विडयातत्रैवकृत्स्नस्यराष्ट्रस्यसमावेशंकृत्वातस्यैवमहांतंवप्रंमहाप्राकारोपसंचकारेत्यर्थः २५ प्राजापत्येनत्वष्टृसंबंधिनाकर्मणाशिल्पेन २६ क्रौंचपुरंवेणायाः द

सचतंशोधयामासविधिवत्तंचचकारह सेतुंचैवसमंचक्रे परिखाश्चामितोदकाः १५ स्थापयामासभागेषु देवतायतनान्यपि रथ्यावीथीर्नृणांमार्गांश्चचत्वराणिवनानिच १६ सतांपुरीधनवतीं पुरुहूतपुरीप्रभाम् नातिदीर्घेणकालेनचकारनृपसत्तमः १७ नामचास्याःशुभंचक्रे निर्मितस्येनतेजसा तस्याःपुर्यांनृपश्रेष्ठोदेवश्रेष्ठपराक्रमः १८ महाश्मसंघातवतीऋक्षवत्समुपाश्रिता माहिष्मतीनामपुरीप्रकाशमुपयास्यति १९ उभयोर्विंध्ययोःपादेनगयोस्तांमहापुरीम् मध्येनिवेशयामासश्रियापरमयावृताम् २० पुरिकांनामधर्मात्मापुरींदेवपुरीप्रभाम् उद्यानशतसंबाधांसमृद्धापणचत्वराम् २१ ऋक्षवत्समभितस्तीरेतत्रनिरामये निर्मितासापुरीराज्ञापुरिकानामनामतः २२ सतेद्वेविपुलेपुर्यौदेवभोग्योपमेशुभे पालयामासधर्मात्माराजाधर्मेव्यवस्थितः २३ पद्मवर्णोपिराजर्षिःसह्यपृष्ठेपुरोत्तमम् चकारनद्यावेणायास्तीरेतरुलताकुले २४ विषयस्याल्पतांज्ञात्वासंपूर्णराष्ट्रमेवच निवेशयामासनृपःसर्वमप्रायसुतमम् २५ पद्मावतंजनपदंकरवीरंचतत्पुरम् निर्मितंपद्मवर्णेनप्राजापत्येनकर्मणा २६ सारसेनापिविहितंरम्यंक्रौंचपुरंमहत् चंपकाशोकवकुलंविपुलताम्रमृत्तिकम् २७ धनवासीतिविख्यातःस्फीतोजनपदोमहान् पुरस्यतस्यतुश्रीमान्द्रुमैःसर्वर्तुकैर्वृतः २८ हरितोपिसमुद्रस्यद्वीपसमभिपालयत् रत्नसंचयसंपूर्णनारीजनमनोहरम् २९ तस्यदाशाजलेमग्नानामकुरानामविश्रुताः येहरंतिसदाशंखान्समुद्रोदरचारिणः ३० तस्यापरेदाशजनाःप्रवालांजनसंभवान् संचिन्वंतिसदायुक्ताजातरूपंचमौक्तिकम् ३१ जलजानिचरत्नानिनिषादास्तस्यमानवाः प्रचिन्वंतोर्णवेयुक्तानौभिःसंयानगामिनः ३२ मत्स्यमांसेनतेसर्वेवर्तंतेस्मसदानराः गृण्हतःसर्वरत्नानिरत्नद्वीपनिवासिनः ३३ तैःसंयात्रगतैर्द्रव्यैर्वणिजोदूरगामिनः हरितंतर्पयंत्येकंयथैवधनदंतथा ३४ एवमिक्ष्वाकुवंशात्तुयदुवंशोविनिःसृतः चतुर्धायदुपुत्रैस्तुचतुर्भिर्भिद्यतेपुनः ३५ सयदुर्माधवेराज्यंविसृज्ययदुपुंगवे त्रिविष्टपंगतोराजादेहंत्यक्त्वामहीतले ३६

क्षिणभागे २७ २८ २९ दाशाःधीवराः ३० संचिन्वंतिराशीन्कुर्वंतियुक्ताः सावधानाः जातरूपंदीप्तिमत् ३१ प्रचिन्वंतोन्वेषयंतः नौभिःमहानौकाभिःसंयानगामिनः क्षुद्रनौकाभिःसंयानगामिनः क्षुद्रनौकागामिनः क्षुद्रनौकाबलेनालोड्यएकत्रमहानौकायांप्रक्षिपंतीत्यर्थः ३२ ३३ ३४ यदुवंशस्यद्विशाखत्वमुपसंहरतिएवमिति चतुर्द्धेतिमाधवस्यमुख्यस्तंभरूपत्वात् शाखारूपेणैवचतुर्धात्वंवंशस्येत्यर्थः ३५ ३६ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अग्रंप्रतीतिप्रत्यग्रंराजभागार्थंरोधोयस्याः सेवयथाहिकर्षकग्रामंकरार्थेराजभटा अवरुंधंतितद्वत् ६० ६१ कार्मुकैरस्माभिः ६२ ६३ ६४ ६५ ६६
इतिहरिवंशेविष्णुपर्वणिटीकायांअष्टत्रिंशोऽध्यायः ३८ विकद्रोरिति १ २ ३ हेतुतस्तन्निमित्तंवैरमितिहेतुतः क्रमतः शत्रोः पराक्रमतोन्यायतः यन्निमित्तं
वैरंतस्यैवपरिहारेणारिष्टशांतिः कर्तव्येतियुक्तेः शास्त्रतः अशक्तस्यापसरणानुज्ञावशात् दैवं भाविकार्यं अनुपश्यताम् ४ ५ ६ तत्रक्रमतः शास्त्रतइत्येतौहेतूस्याच

सद्योनिपतितेकंसेराज्येस्माकंनवोदये पुरीप्रत्यग्ररोधेवनरोधंविसहिष्यति ६० बलंसंमर्दभग्नंचकृष्यमाणंपरेणह असंशयमिदं
राष्ट्रंजनैःसहविनंक्ष्यति ६१ यादवानांविरोधेनयेजिताराज्यकार्मुकैः तेसर्वेद्वैधमिच्छंतियत्क्षमंतद्विधीयताम् ६२ वंचनीयाभविष्या
मोनृपाणान्नृपकारणात् जरासंधभयार्त्तानांद्रवतांराज्यसंभ्रमे ६३ आर्तावक्ष्यंतिनःसर्वेरुध्यमानाःपुरेजनाः यादवानांविरोधेनविनष्टा
स्मेतिकेशव ६४ एतन्ममम्तंकृष्णविश्रंभात्समुदाहृतम् त्वंतुविज्ञापितः पूर्वंनपुनःसंप्रबोधितः ६५ त्वमस्यनेतासैन्यस्यवयंत्वच्छासने
स्थिताः त्वन्मूलश्चविरोधोयंरक्षास्मानात्मनासह ६६ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिकद्रुवाक्यंनाम अष्टत्रिंशोऽ
ध्यायः ३८ वैशंपायनउवाच विकद्रोस्तुवचःश्रुत्वावसुदेवोमहायशाः परितुष्टेनमनसावचनंचेदमब्रवीत् १ राजाषाड्गुण्ययु
क्तावैराजामंत्रार्थतत्त्ववित् सतत्त्वंचहितंचैवकृष्णोक्तंकिलधीमता २ भाषिताराजधर्माश्चसत्याश्चजगतोहिताः एतच्छ्रुत्वापितुर्वाक्यं
विकद्रोश्चमहात्मनः ३ वाक्यमुत्तममेकाग्रोबभाषेपुरुषोत्तमः ३ ब्रुवतोवःश्रुतंवाक्यंहेतुतःक्रमतस्तथा न्यायतःशास्त्रतश्चैवदैवंचै
वानुपश्यताम् ४ श्रूयतामुत्तरंवाक्यंश्रुत्वाचपरिगृह्यताम् नयेनव्यवहर्तव्यंपार्थिवेनयथाक्रमम् ५ संधिंचविग्रहंचैवयानमासनमे
वच द्वैधीभावंसंश्रयंचषाड्गुण्यंचिंतयेत्सदा ६ बलिनःसंनिकृष्टेषुनस्थेयंपंडितेनवै अपक्रमोहिकालज्ञःसमर्थोयुद्धमुद्वहेत् ७
अहंतावत्सहार्येणमुहूर्तेस्मिन्प्रकाशिते जीवितार्थंगमिष्यामिशक्तिमानप्यशक्तवत् ८ ततःसह्याचलसुतंसहार्येणाहमक्षयम्
आत्मद्वितीयःश्रीमंतप्रवेक्ष्येदक्षिणापथम् ९ करवीरपुरंचैवरम्यंक्रौंचपुरंतथा द्रक्ष्यावस्तत्रसहितौगोमंतंचनगोत्तमम् १० आ
वयोर्गमनंश्रुत्वाजितकाशीसपार्थिवः अप्रविश्यपुरींदर्पादनुसारंकरिष्यति ११ ततःसह्यवनेष्वेवराजायास्यतिसानुगः आवयोर्ग्रह
णेचैवनृपतिःप्रयतिष्यति १२ एषानःश्रेयसीयात्राभविष्यतिकुलस्यवै पौराणामथपुर्याश्चदेशस्यचसुखावहा १३ नचशत्रोःपरिभ्र
ष्टाराजानोविजिगीषवः परराष्ट्रेषुमृष्यंतिमृधेशत्रोःक्षयंविना १४

ऐबलिनइतिसन्निकृष्टेनिकटे ७ इतरयोर्हेत्वोरुत्तरमाह अहमित्यादिना ८ ९ १० अ
नुसारंपृष्ठतोधावनं ११ राजाजरासंधःप्रयतिष्यतिवेगेनागमिष्यति १२ १३ शत्रोःशत्रुंप्राप्यपरिभ्रष्टाःस्वराष्ट्रेस्थित्वापृष्ठतोशत्रोर्वधमेवकामयंतेनतुस्वराष्ट्ररक्षांतत्रसु-
स्थार्थिनःपरस्याभिनिवेशाभावादित्यर्थः १४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३७ ३८ तस्मिन् भीमे ३९ ४० पर्यये अवतारोपरमं सति भीमेन वैष्णवं स्थानं मथुराख्यं ग्राममित्युत्तरसहितस्यान्वयः ४१ राज्यसंबंधकारणात् मधोः पुत्रे लवणे न ष्टे मधुदौहित्राराज्यप्रार्थिनो भवंतीति शास्त्रीयसंबंधात्तद्दौहित्रजत्वात्स्वभीमस्येत्यर्थः ४२ राज्ये अयोध्यायामिति शेषः ४३ रैवताद्रैवतो रैवताद्विन्ध्यगर्भ इत्यर्थः ४४ ४५

बभूव माधवः सुतः सत्वतो नाम वीर्यवान् सत्ववृत्तिर्गुणोपेतो राजा राजगुणे स्थितः ३७ सत्वतस्य सुतो राजा भीमो नाम महानभूत् ये न भैमाः सुसंवृत्ताः सत्वतात्सात्वताः स्मृताः ३८ राज्ये स्थिते नृपे तस्मिन् रामे राज्यं प्रशासति शत्रुघ्नो लवणं हत्वा चिच्छेद स मधोर्वनम् ३९ तस्मिन् मधुवने स्थाने पुरीं च मथुरामिमाम् निवेशयामास विभुः सुमित्रानंदिवर्द्धनः ४० पर्यये चैव रामस्य भरतस्य तथैव च सुमित्रासुतयोश्चैव स्थानं प्राप्तं च वैष्णवम् ४१ भीमेनेयं पुरी तेन राज्यसंबंधकारणात् स्ववशे स्थापिता पूर्वं स्वयमध्यासिता तथा ४२ ततः कुशे स्थिते राज्ये लवे तु युवराजनि अंधको नाम भीमस्य सुतो राज्यमकारयत् ४३ अंधकस्य सुतो जज्ञे रैवतो नाम पार्थिवः ऋक्षोपि रैवताज्जज्ञे रम्ये पर्वतमूर्द्धनि ४४ ततो रैवत उत्पन्नः पर्वतः सागरांतिके नाम्ना रैवतको नाम भूमो भूमिधरः स्मृतः ४५ रैवतस्यात्मजो राजा विन्ध्यगर्भो महायशाः बभूव पृथिवीपालः पृथिव्यां प्रथितः प्रभुः ४६ तस्यातिसृषु भार्यासु दिव्यरूपासु केशव चत्वारो जज्ञिरे पुत्रा लोकपालोपमाः शुभाः ४७ वसुर्बभ्रुः सुषेणश्च सभाक्षश्चैव वीर्यवान् यदुप्रवीराः प्रख्याता लोकपाला इवापरे ४८ तैरयं यादवो वंशः पार्थिवैर्बहुलीकृतः यैः साकं कृष्ण लोकेस्मिन् प्रजावंतः प्रजेश्वराः ४९ वसोस्तु कुंतिविषये वसुदेवः सुतो विभुः ततः स जनयामास सुप्रभे द्वे च दारिके ५० कुंतीं च पांडोर्महिषीं देवतामिव भूचरीम् भार्यां च दमघोषस्य चेदिराजस्य सुप्रभाम् ५१ एष ते स्वस्य वंशस्य प्रभावः संप्रकीर्तितः श्रुतो मया पुरा कृष्ण कृष्णाद्द्वैपायनांतिकात् ५२ त्वमिदानीं प्रनष्टेस्मिन् वंशे वंशभृतां वर स्वयंभूरिव संप्राप्तो भवाय स्मज्जया यच ५३ न तु त्वा पौरमात्रेण शक्ता गूहयितुं वयम् देवगुह्येष्वपि भवान् सर्वज्ञः सर्वभावनः ५४ शक्तश्चापि जरासंधं नृपं योधयितुं विभो त्वद्बुद्धिवशगाः सर्वे वयं योद्धव्रते स्थिताः ५५ जरासंधस्तु बलवान् नृपाणां मूर्ध्नि तिष्ठति अप्रमेयबलश्चैव वयं च कृशसाधनाः ५६ न चायमेकाहमपि पुररोधं सहिष्यति कृशभक्तेंधनक्षामा दुर्गैरपरिवृंहिता ५७ असंस्कृताल्पपरिखा द्वारयंत्रविवर्जिता वप्रप्राकारनिचया कर्तव्या बहुविस्तरा ५८ संस्कर्तव्या सुधागारा योक्तव्या चेष्टकाचयैः कंसस्य नल्पभोग्यत्वान्नातिगुप्ता पुरा जनैः ५९

४६ ४७ ४८ ४९ वसोरिति वसोः शूरापरनाम्नः सूतो वसुदेवो भवत् ततो वसुदेवादनंतरं स वसुर्द्वे दारिके जनयामास ते च पृथाश्रुतश्रवाख्ये कुंतिविषये कुंतिभोजस्य राज्ञो विषये गोचरे दुहितृत्वेन दत्तत्वात्तदधीने इतियावत् ५० ५१ ५२ प्रनष्टे अभिभूते ५३ पौरमात्रेण पुरवासिलोकसाम्येन त्वां जरासंधाद्गूहयितुं वयं क्षमा न एतच्च सर्वज्ञत्वाद्व ४१

[illegible] ५४ ५५ ५६ ५७ ५८ ५९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दक्षिणौसमर्थौ १५ १६ १७ १८ १९ २० २१ न्यस्तंसमारोपितं अतएवसंकुचितं आधानंत्रेताग्निविस्तारोयस्यतम् अथापिकालेप्रादुष्कृतेष्वग्निषुहुतंहुताश
नम् २२ होमार्थंदुह्यतेसाहोमधुक् साचासौकामदोहनाचेतिसमासः २३ २४ सधिष्ण्यौसस्थानौ २५ २६ २७ समुद्रात्भूमिमिषुपातमात्रंप्राप्यतत्रसूर्पारकंनामन

एवमुक्त्वातुतौवीरौकृष्णसंकर्षणावुभौ प्रपेदतुरसंभ्रांतौदक्षिणौदक्षिणापथम् १५ तौतुराष्ट्राणिशतशश्चरंतौकामरूपिणौ दक्षि
णांदिशमास्थायचेरतुर्मार्गगौसुखम् १६ सह्यपृष्ठेषुरम्येषुमोदमानाशुभौतया दक्षिणापथगौवीरावध्वानंसंप्रपेदतुः १७ तौचस्वल्पेन
कालेनसह्याचलविभूषितम् करवीरपुरंप्राप्तौस्ववंशेनविभूषितम् १८ तौतत्रगत्वावेणायानद्यास्तीरांतमाश्रितम् आसेदतुःप्ररोहा-
ढ्यंन्यग्रोधतरुपुंगवम् १९ अधस्तात्तस्यवृक्षस्यमुनिदीप्ततपोनिधिम् अंसावसक्तपरशुंजटावल्कलधारिणम् २० गौरमग्निशिखाका
रंतेजसाभास्करोपमम् क्षत्रांतकरमक्षोभ्यंवपुष्मंतमिवार्णवम् २१ न्यस्तसंकुचिताधानंकालेहुतहुताशनम् क्लिन्नंत्रिषवणाम्भोभि-
राद्र्यंदेवगुरुंयथा २२ सवत्साधेनुकाश्चैताहोमधुक्कामदोहनाम् क्षीरारणिंकर्षमाणंमहेन्द्रगिरिगोचरम् २३ ददृशतुस्तौसहितावप
रिश्रांतमव्ययम् भार्गवंराममासीनमंदरस्थंयथारविम् २४ न्यायतस्तौतुतंदृष्ट्वापादमूलेकृतांजली वसुदेवसुतौवीरौसधिष्ण्याविव
पावकौ २५ कृष्णस्तमृषिशार्दूलमुवाचवदतांवरः श्लक्ष्णमधुरयावाचालोकवृत्तांतकोविदः २६ भगवन्जामदग्न्यत्वामवगच्छामिभा
र्गवम् रामंमुनीनांवृषभंक्षत्रियाणांकुलांतकम् २७ त्वयासायकवेगेनक्षिप्तोभार्गवसागरः इषुपातेननगरंकृतंसूर्पारकंत्वया २८ धनुः
पंचशतायाममिषुपंचशतोच्छ्रयम् सह्यस्यचानिकुंजेषुस्फीतोजनपदोमहान् २९ अतिक्रम्योदधेर्वेलामपरांतेनिवेशितः त्वयातत्का
र्तवीर्यस्यसहस्रंभुजकाननम् ३० छिन्नंपरशुनैकेनस्मरतानिधनंपितुः इयमद्यापिरुधिरैःक्षत्रियाणांहतात्विषाम् ३१ स्निग्धैस्त्वत्पर
शूत्सृष्टैरक्तपंकावसुंधरा रेणुकेयविजानेत्वांक्षितौक्षितिपरोषणम् ३२ परशुःप्रग्रहेयुक्तःयथैवहरणेतथा तदिच्छावस्त्वयाविप्रकिंचिद
र्थमुपश्रुतम् ३३ उत्तरंचश्रुतार्थेनमत्कृतमविशंकया आवयोर्मथुरानामयमुनातीरशोभिनी ३४ यादवोत्स्योग्रसेनस्तुयदितेश्रुतिमाग
तौ वसुदेवोयदुश्रेष्ठःपितानौहिधृतव्रतः ३५ जन्मप्रभृतिचैवावांव्रजेघोषेनियोजितौ तौस्वःकंसभयात्तत्रशंकितौपरिवर्द्धितौ ३६ व
यंचप्रथमसंप्राप्तौमथुरायांप्रवेशितौ तावावांसूत्थितंहत्वासमाजेकंसमोजसा ३७ पितरंतस्यतत्रैवस्थापयित्वाजनेश्वरम् स्वमेवकर्मचा
रब्धौगवांव्यापारकारकौ ३८ अथावयोःपुरंरोद्धुंजरासंधोऽभ्यवस्थितः संग्रामान्सुबहून्कृत्वालब्धलक्षावपित्वयम् ३९

गरंकृतंकृत्स्नायाःक्षितेःकाश्यपायदानंयातधनुश्चतुर्हस्तंइषुर्द्विहस्तः २८ २९ अपरांतेपश्चिमसमुद्रतीरे ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कर्तव्यं संपादनीयं बलं सैन्यं साधनं धनादिकं ययोस्तौ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० द्वेषानुशायिना द्वेषमेवानुशेतेऽनुरुध्य

ततः स्वपुररक्षार्थं प्रजानां च धृतव्रत अकृतार्थावनुद्योगौ कर्तव्यबलसाधनौ ४० अरण्योपपत्तिनौ युद्धे निस्तनुत्रौ निरायुधौ जरासंधो
द्यमभयात् पुरात् तूर्णावेव विनिःसृतौ ४१ उभावावामनुप्राप्तौ मुनिश्रेष्ठ तवान्तिकम् आवयोर्मन्त्रमात्रेण कर्तुमर्हसि सत्क्रियाम् ४२ श्रुत्वैत
द्भार्गवो रामस्तयोर्वाक्यमनिन्दितम् रैणुकेयः प्रतिवचो धर्मसंहितमब्रवीत् ४३ अपरान्तादहं कृष्ण संप्राप्तो ह्यागतः प्रभो एक एव विनाशिष्ये
युवयोर्मन्त्रकारणात् ४४ विदितो मे व्रजे वासस्तव पद्मनिभेक्षण दानवानां वधश्चापि कंसस्यापि दुरात्मनः ४५ विग्रहं च जरासंधे विदि-
त्वा पुरुषोत्तम तव सभ्रातृकस्येह संप्राप्तोऽस्मि वरानन ४६ जाने त्वां कृष्ण गोप्तारं जगतः प्रभुमव्ययम् देवकार्यार्थसिद्ध्यर्थं प्रबालं बालतां
गतम् ४७ न त्वयाविदितं किंचित् त्रिषु लोकेषु विद्यते तथापि भक्तिमात्रेण शृणु वक्ष्यामि ते वचः ४८ पूर्वजैस्तव गोविन्द पूर्वं पुरमिदं कृतम्
करवीरपुरं नाम राष्ट्रं चैव निवेशितम् ४९ पुरेऽस्मिन्नृपतिः कृष्ण वासुदेवो महायशाः शृगाल इति विख्यातो नित्यं परमकोपनः ५० नृपेण
तेन गोविन्द तव वंशभवा नृपाः यादवा निहताः सर्वे वीर द्वेषानुशायिना ५१ अहंकारपरो नित्यमजितात्मातिमत्सरी राज्यैश्वर्यमदाविष्टः
पुत्रेष्वपि च दारुणः ५२ तन्नेह भवतः स्थानं रोचते मे नरोत्तम करवीरपुरे घोरे नित्यं पार्थिवभूषिते ५३ श्रूयतां कथयिष्यामि यत्रो भौ शत्रु
बाधनौ जरासंधबलोदग्रं भवन्तौ योधयिष्यतः ५४ तीर्त्वा वेणामिमां पुण्यां नदीं मद्येव बाहुभिः विषयान्ते निवासाय गिरिं गच्छाम दुर्गमम्
५५ रम्यं यज्ञगिरिं नाम सह्यस्य प्ररुहं गिरिम् निवासं मांसभक्षाणां चोराणां घोरकर्मणाम् ५६ नानाद्रुमलतायुक्तं चित्रपुष्पितपादप
म् प्रोष्यैतत्र निशामेकां खट्वाङ्गा नाम निम्नगाम् ५७ भद्रं ते संतरिष्यामो निकषोपलभूषणाम् गंगाप्रपातप्रतिमा यत्र धारा च महतो गिरेः
५८ तस्याः प्रपातं द्रक्ष्यामस्तापसारण्यभूषणम् उपभुज्य त्विमान् कामान् गत्वा तान् धरणीधरान् ५९ द्रक्ष्यामस्तत्र तान् विप्रान् श्राम्य-
तो वै तपोधनान् रम्यं क्रौञ्चपुरं नाम गमिष्यामः पुरोत्तमम् ६० वंशजस्तत्र ते राजा कृष्ण धर्मरतः सदा महाकपिरिति ख्यातो वनवास्यज
नाधिपः ६१ तमदृष्ट्वैव राजानं निवासाय गतेऽहनि तीर्थमानुडुहं नाम तत्रस्थाः स्याम संगताः ६२ ततः श्वस्तु गमिष्यामः सह्यस्य विवरं गिरि
म् गोमन्तमिति विख्यातं नैकशृङ्गविभूषितम् ६३ खगतैकमहाशृङ्गं दुरारोहं खगैरपि विश्रामभूतं देवानां ज्योतिर्भिरभिसंवृतम् ६४
सोपानभूतं स्वर्गस्य गगनाद्रिमिवोच्छ्रितम् तं विमानावतरणं गिरिं मेरुमिवापरम् ६५

तेन तु धर्मतेन ५१ ५२ ५३ ५४ विषयान्ते देशसीम्नि
निवासाय रात्रिवासाय ५५ प्ररूढं उपगिरिम् ५६ ५७ ५८ ५९ श्राम्यतः श्रममाणान् वानप्रस्थानिति यावत् ६० वनमेव वास्यं वासार्हं यस्य स वनवास्यः स चासौ जनश्च
तस्याधिपतिः ६१ ६२ ६३ ६४ ६५ ६,

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६६ ६७ ६८ ६९ ७० ७१ ७२ दर्शयिष्यंति प्रकटीभविष्यंति ७३ ७४ ७५ भजस्व लभस्व ७६ ७७ ७८ व्यूहानां शत्रुसैन्यानाम् ७९ ८०

तस्योत्तमेमहाशृंगेभास्वंतौदेवरूपिणौ उदयास्तमयेसूर्यंसोमंचज्योतिषांपतिम् ६६ ऊर्मिमंतंसमुद्रंचअपारद्वीपभूषणम् प्रेक्ष्य
माणौसुखंतत्रनगाग्रेविचरिष्यथः ६७ शृंगस्थौतस्यशैलस्यगोमंतस्यवनेचरौ दुर्गयुद्धेनधावंतौजरासंधंविजेष्यथः ६८ तत्रशै
लगतौदृष्ट्वाभवंतौसुदुर्मदौ अशक्तःशैलयुद्धेवैजरासंधोभविष्यति ६९ भवद्भ्यामपियुद्धंतुप्रवृत्तंतत्रदारुणे आयुधैःसहसंयोगं
पश्यामिनचिरादिव ७० संग्रामश्चमहान्कृष्णनिर्दिष्टस्तत्रदैवतैः यदूनांपार्थिवानांचमांसशोणितकर्दमः ७१ तत्रचक्रंहलंचैवग-
दांकौमोदकींतथा सौनंदंमुशलंचैववैष्णवान्यायुधानिच ७२ दर्शयिष्यंतिसंग्रामेयास्यंतिचमहीक्षिताम् रुधिरंकालयुक्तानांवपु
र्भिःकालसंनिभैः ७३ सचक्रमुशलोनामसंग्रामःकृष्णविश्रुतः दैवतैरिहनिर्दिष्टःकालस्यादेशसंज्ञितः ७४ तत्रतेकृष्णसंग्रामेमुख्य
केवैष्णवंवपुः द्रक्ष्यंतिरिपवःसर्वेसुराश्चसुरभावन ७५ तांभजस्वगदांकृष्णचक्रंचचिरविस्मृतम् भजस्वस्वेनरूपेणसुराणांविज
यायवै ७६ बलश्चायंहलंघोरंमुशलंचारिमर्दनम् वधायसुरशत्रूणांभजतांलोकभावनः ७७ एषतेप्रथमःकृष्णसंग्रामोभुविपा-
र्थिवैः पृथिव्यर्थेसमारब्धोभारावतरणेसुरैः ७८ आयुधावाप्तिरत्रैववपुषोवैष्णवस्यच लक्ष्म्याश्चतेजसश्चैवव्यूहानांचविदार
णम् ७९ अतःप्रभृतिसंग्रामोधरण्यांशस्त्रमूर्छितः भविष्यतिमहान्कृष्णभारतंनामवैशसम् ८० तद्गच्छकृष्णशैलेंद्रंगोमंतंच
नगोत्तमम् जरासंधमृधेचापिविजयस्त्वामुपस्थितः ८१ इदंचैवामृतप्रख्यंहोमधेनोःपयोमृतम् पीत्वागच्छयथाभद्रंवामयोद्दिष्टेनक-
र्मणा ८२ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिरामवाक्यंनामएकोनचत्वारिंशोऽध्यायः ३९ वैशंपायनउवाच
तत्तुधेन्वाःपयःपीत्वाबलदर्पसमन्वितौ ततस्तौरामसहितौप्रस्थितौयदुपुंगवौ १ गोमंतंपर्वतंद्रष्टुंमत्तनागेंद्रगामिनौ जामदग्न्य
मुद्दिष्टेनमार्गेणवदतांवरौ २ जामदग्न्यस्तृतीयस्तेनयस्त्रयइवाग्नयः शोभयतिस्मपंथानंत्रिदिवंत्रिदशाइव ३ तेचाध्वविधिनास-
वृत्ततोघेदिवसक्रमात् गोमंतमचलंप्राप्ताःसदरंत्रिदशाइव ४ लताचारुविचित्रंचनानाद्रुमविभूषितम् नानागरुपिनद्धांगचित्रंचि
त्रैर्मनोहरैः ५ द्विरेफगणसंकीर्णशिलासंकटपादपम् मत्तबर्हिणनिर्घोषैर्नादितंमेघनादिभिः ६

८१ ८२ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांएकोनचत्वारिंशोऽध्यायः ३९ १ २ ३ अध्वविधिनामानुषगत्या ४ चित्रैःमयूरैः ५ ६ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७ ८ ९ १० प्रस्थानिसानूनि ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ दरीकंदरयोः कृत्रि

गगनालग्नशिखरंजलदासक्तपादपम् मत्तद्विपविषाणाग्रैः परिघृष्टोपलांकितम् ७ कूजद्भिश्चांडजगणैः समंतात्प्रतिनादितम् द्
रीभृतापांडुरैश्छन्नंशार्दूलपल्लवैः ८ नीलाश्मचयसंघातैर्बहुवर्णंयथाघनम् धातुविस्रावदिग्धाग्रसानुप्रस्रवभूषितम् ९ कीर्णं
सुरगणैःकांतंमैनाकमिवकामगम् उच्छ्रितस्कंधविशालाग्रसमूलांशुपरिस्रवम् १० सकाननदरीप्रस्थंश्वेताभ्रगणभूषितम् पनसा
म्रातकाम्रौघैर्वनस्पंदनचंदनैः ११ तमालैलालवंगस्तुतमरीचक्षुपसंकुलम् पिप्पलीवल्लिकलिलंचित्रामिंगुदिपादपैः १२ द्रुमैःसर्जु
रसानांचसर्वतःपरिशोभितम् प्रांशुशालवनैर्गुप्तंबहुचित्रवनैर्युतम् १३ सर्जनिंबार्जुनवनंकुटकीकुलसंकुलम् हिंतालैश्चैवसालै
श्चपुन्नागैश्चोपशोभितम् १४ जलेषुजलजैश्छन्नंस्थलेषुस्थलजैरपि पंकजैःकुमुदखंडैश्चसर्वतःप्रतिभूषितम् १५ जंबूजंबूलवृक्षा
ढ्यकदंबकदंबभूषितम् चंपकाशोकबहुलंबिल्वतिंदुकशोभितम् १६ कुंजैश्चनागपुष्पैश्चसमंतादुपशोभितम् नागयूथसमाकीर्णं
मृगसंघातशोभितम् १७ सिद्धचारणरक्षोभिःसेवितप्रस्तरांतरम् गंधर्वैश्चससाध्यैश्चगुह्यकैःपक्षिभिस्तथा १८ विद्याधरगणैर्नित्यं
मत्तकीर्णशिलातलम् सिंहशार्दूलसन्नादैःसततप्रतिनादितम् सेवितंवारिधाराभिश्चंद्रपादैश्चशोभितम् १९ स्तुतंत्रिदशगंधर्वैरप्स
रोभिरलंकृतम् वनस्पतीनांदिव्यानांपुष्पैरुच्चावचैश्चितम् २० शक्रवज्रप्रहाराणामनभिज्ञंकदाचन दवाग्निभयनिर्मुक्तंमहावातभ-
योज्झितम् २१ प्रपातप्रभवाभिश्चसरिद्भिरुपशोभितम् काननैराननाकारैर्विशेषद्भिरिवश्रियम् २२ जलशैवलशृंगाग्रैरुन्मिषंतमिव
श्रिया स्थलीभिर्मृगजुष्टाभिःकांताभिरुपशोभितम् २३ पार्श्वैरुपलकल्माषैर्मेघैरिवविभूषितम् पादपोच्छ्रितभूमीभिःसपुष्पाभिः
समंततः २४ मंडितंवनराजीभिःप्रमदाभिःपतिर्यथा सुदरीभिर्दरीभिश्चकंदराभिस्तथैवच २५ तेषुतेष्ववकाशेषुसदारमिवशोभित
म् ओषधीदीप्तशिखरंवानप्रस्थनिषेवितम् जातरूपैर्वनोद्देशैःकृत्रिमैरिवभूषितम् २६ मूलेनसुविशालेनशिरसाप्युच्छ्रितेनच पृ
थिवीमंतरिक्षंचगाहयंतमिवस्थितम् २७ तंतमासाद्यगोमंतंरम्यंभूमिधरोत्तमम् रुचिरंरुरुचुःसर्वेवासायामरसन्निभाः २८ रुरु
हुस्तंगिरिवरंखमूर्ध्वमिवपक्षिणः असज्जमानावेगेनवैनतेयपराक्रमाः २९ तेतुतस्योत्तरंशृंगमारूढास्त्रिदशाइव अगारसहस्राच्च-
न्द्रमनसानिर्मितोपमम् ३० निविष्टोयादवोदृष्ट्वाजामदग्न्योमहामतिः रामोऽभिमतमक्लिष्टमाप्रष्टुमुपचक्रमे ३१

माकृत्रिमत्वेनव्यवस्था २५ २६ गाहयंतंगाहमानम् २७ २८ २९ ३० ३१ छ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३२ ३३ सांपरायिकः परलोकहितः ३४ नैष्ठिकं तात्त्विकम् ३५ इदं भूभारहरणरूपं प्रस्तुतं आरब्धम् ३६ प्रथमो मुख्यः कल्पः प्रयोगः ३७ तत्रैव नित्यमेव तवायुधादिकं भाव्यम लौकिकेन सामर्थ्येन यदाहयास्कः आत्मैवैषां रथो भवत्यात्माश्वा आत्मायुधमात्मेषव आत्मा सर्वं देवस्येति ३८ चतुर्द्विगुणपीनांसं अष्टबाहुमित्यर्थः एतेन कृष्णास्य साक्षाद्विष्णुत्वमुक्तं न तु नंदशालविद्वद्दृश्यं कृष्णास्येदमेव रूपम् द्विभुजं लविदूद्दृश्यमिति ज्ञेयम् ३९ ४० ४१ ४२ वैधव्येन आगामिना अधिवासिता परिगृही-

कृष्णयास्यास्यहं तात पुरं शूर्पारकं विभो युवयोर्नास्ति वै मुख्यं संग्रामे दानवैरपि ३२ प्राप्तवानस्मि यां प्रीतिं मार्गानुगमनादपि सा मे कृष्णानुगृण्हाति शरीरमिदमव्ययम् ३३ इदं यत्स्थानमुद्दिष्टं यत्रायुधसमागमः युवयोर्विहितो देवैः समयः सांपरायिकः ३४ देवानां मुख्य वैकुंठ विष्णो देवैरभिष्टुत, कृष्ण सर्वस्य लोकस्य शृणु मे नैष्ठिकं वचः ३५ यदिदं प्रस्तुतं कर्म त्वयायोगाविदलौकिकम् मानुषाणां हितार्थाय लोके मानुषदेहिना ३६ तस्यायं प्रथमः कल्पः कालेन तु वियोजितः जरासंधेन वै सार्द्धं संग्रामे समुपस्थिते ३७ तत्रायुधबलं चैव रूपं चरणकर्कशम् स्वयमेवात्मना कृष्ण त्वयात्मानं विधत्स्वह ३८ चक्रोद्यतकरं दृष्ट्वा त्वां गदापाणिमाहवे चतुर्द्विगुणपीनांसं बिभ्येदपि शतक्रतुः ३९ अद्य प्रभृति ते यात्रा स्वर्गोक्ता समुपस्थिता पृथिव्यां पार्थिवेंद्राणां कृतास्त्वं लयिमानद ४० वैनतेयस्य चाह्वानं वाहनं ध्वजकर्मणः कुरु शीघ्रं महाबाहो गोविंद वदतां वर ४१ युद्धकामा नृपतयस्त्रिदिवाभिमुखोद्यताः धार्तराष्ट्रस्य वशगास्तिष्ठंति रणवृत्तयः ४२ राज्ञां निधनदृष्टार्था वैधव्येनाधिवासिता एकवेणीधरा चेयं वसुधा त्वां प्रतीक्षते ४३ सग्रहं कृष्ण नक्षत्रं संक्षिप्य अरिविमर्दन त्वयि मानुष्यमापन्ने युद्धे च समुपस्थिते ४४ त्वरस्व कृष्ण युद्धाय दानवानां वधाय च स्वर्गाय च नरेंद्राणां देवतानां सुखाय च ४५ सत्कृतोहं त्वया कृष्ण लोके त्वं सचराचरैः त्वया सत्कृतरूपेण येन सत्कृतवानहम् ४६ साधयामि महाबाहो भवतः कार्यसिद्धये स्मर्तव्यश्चास्मि युद्धेषु कांतारेषु महीक्षिताम् ४७ इत्युक्त्वा जामदग्न्यस्तु कृष्णामक्लिष्टकारिणम् जयाशिषा वर्द्धयित्वा जगामाभीप्सितां दिशम् ४८ इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि गोमंतारोहणं नाम चत्वारिंशोऽध्यायः ४० वैशंपायन उवाच जामदग्न्ये गते रामे तौ यादवकुलोद्वहौ गोमंतशिखरे रम्ये चेरतुः कामरूपिणौ १ वनमालाकुलोरस्कौ नीलपीतांबरावुभौ नीलश्वेतवपुष्मंतौ गगनस्थाविवांबुदौ २

ता अत एव एकवेणीधरा असंस्कृतकेशबंधा ४३ हे कृष्ण क्षत्रं संक्षिप्य न प्रतीक्षत इति पूर्वेण संबंधः क्षत्रियाः मरणभयात्संकोचं प्राप्य कालावधिं न प्रतीक्षंते अपि तु उत्कुच्छा भूत्वा शीघ्रमेव मरणं कामयंते यतः सग्रहं क्रूरैः ग्रहैराक्रांतं क्षत्रमस्तीत्यर्थः ४४ ४५ सत्कृतं सत्कारस्तद्वानहं त्वया विश्वात्मना यतोस्मि अतः सर्वत्र सत्कृतोस्मीत्यर्थः ४६ साधयामीति एतेन युद्धे जयार्थिभिः शूरैः परशुरामः स्मर्तव्य इति विधीयत इति ज्ञेयं ४७ ४८ इति हरिवंशे विष्णुपर्वणि टीकायां चत्वारिंशोऽध्यायः ४० जामदग्न्य इति १ २ ६ ७ ५२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३ उदयंतंउद्गच्छंतम् ४ ५ सुच्छाये शोभनायां छायायाम् ६ ७ ८ ९ १० ११ १२ रूपिणी मूर्तिमती अमृतारणी अमृतप्रसूः यथा वाजपेयसौत्रा
मण्यादिषु सुग्रहवत्सु क्रतुषु आस्वादितया पुरुषाः अमृतपानमपि प्राप्नुवंति तादृशी मे ध्येत्यर्थः १३ कादंबरीमदकलं सुरामदेनाव्यक्तवाचम् १४ १५ १६ १७
वडवामुखे वडवाग्निसन्निधौ पाताले शेषरूपेण नित्यं स्थितं त्वां इदानीमतर्हितं एतेन रामोपि पूर्ण एव शेषावतारो न तु शेषांश इति दर्शितं पर्येमि परिभ्रमामि त्वामन्वेष

तौ शैलधातुदिग्धांगौ सुधानौ शिखरे स्थितौ चेरतुस्तत्र कांतेषु वनेषु रतिलालसौ ३ उदयंतं निरीक्षंतौ शशिनं ज्योतिषां वरम् उदया
स्तमने चैव ग्रहाणां धरणीधरे ४ अथ संकर्षणः श्रीमान् विना कृष्णेन वीर्यवान् चचार तस्य शिखरे नगस्य नगसन्निभः ५ प्रफुल्लस्य
कदंबस्य सुच्छाये निषसाद ह वायुना मंदगंधेन वीज्यमानः सुखेन वै ६ तस्य तेनानिलेनाथ संसेव्यमानस्य तत्र वै मद्यसंस्पर्शजो गंधः स
स्पृशन् घ्राणमागतः ७ तृष्णा चैनं विवेशाशु वारुणीप्रभवा तदा शुशोष च मुखं तस्य मत्तस्येवापरे हनि ८ स्मारितः स पुरावृत्तममृत
प्राशनं विभुः तृषितो मदिरान्वेषी ततस्तं तरुमैक्षत ९ तस्य प्रावृषि फुल्लस्य यदंभो जलजोक्षितम् तत्कोटरस्थं मदिरा संजायत मनो
हरा १० तां तु तृष्णाभिभूतात्मा पिबन्नार्त इवासकृत् मोहाच्च चलिताकारः समजायत स प्रभुः ११ तस्य मत्तस्य वदनं किंचिच्चलितलो
चनम् घूर्णिताकारमभवत् शरत्कालेंदुसप्रभम् १२ कदंबकोटरे जाता नाम्ना कादंबरीति सा रूपिणी वारुणी तत्र देवानाममृतारणी
१३ कादंबरीमदकलं विदित्वा कृष्णपूर्वजम् तिस्रः स्त्रियो दशनार्यस्तमुपतस्थुः प्रियंवदाः १४ मदिरा रूपिणी मूला कांतिश्च शशिनः प्रि
या श्रीश्च देवी वरिष्ठा स्त्रीरूपमेवाबुजध्वजा १५ साञ्जलिप्रग्रहा देवी रौहिणेयमुपस्थिता वारुण्या सहितं वाक्यमुवाच मदविक्लवम्
१६ बलं जय स्व दैत्यानां बलदेव दिवीश्वर अहं ते दयिता कांता वारुणी समुपस्थिता १७ धामे यातर्हितं शुल्कांशा स्वतवडवामुखे क्षी
रार्णवे चैव वसुधां पर्येमि विमलानन १८ पुष्पचक्रानुलिप्तेषु केसरेषूषितमया अतिमुक्तेषु चाक्षोभ्य पुष्पस्तबकवत्सु च १९ अहं कद
बमालीना मेघकाले सुखप्रिया तृषितं मार्गमाणा त्वां स्वेन रूपेण छादिता २० सा स्मि पूर्णेन योगेन यथैवामृतमंथने सम्प्रेषिता पित्रा
वरुणेन तवानघ २१ सायथैवार्णवगतां तथैव वडवामुखे त्वयोपभोक्तुमिच्छामि संमतस्त्वं हि मे गुरुः २२ न त्वां नतपरित्यक्ष्ये भर्त्सितापि
त्वयानघ नाहं त्वया विना लोकानुत्सहे देव सेवितुम् २३ आदिपद्मं च पद्मां कादिव्यं श्रवणभूषणम् कौशेयानि च नीलानि समुद्राहाणि
बिभ्रती २४

यंतीति शेषः १८ पुष्पचक्रं विकसितसमुदायः केसरा यामेव तेनानुलिप्तेषु केसरवत्सु कुसुमादिषु अतिमुक्तेषु चासंतीलतासु १९ २० पूर्णे
नयोगेन सर्वांगसंपत्त्या युक्तासती २१ त्वयाकर्त्रा उपभोक्तुमात्मानं भोक्तुं गुरुः स्वामी पाताले गुरोः पितुः संमतः २२ २३ २४ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४६ ४७ ४८ ४९ अहिशयनात्गतेतिशेषः ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० एषांस्थानेसति ६१ ६२ इतिहरिवंशे

यथैवमेरुशिखरे भानुर्मध्यंदिनेयथा वैनतेयप्रयोगेणाविदित्वामौलिमागताम् ४६ कृष्णःप्रहृष्टवदनोरामंवचनमब्रवीत् त्वरतेरव
लुकार्यार्थेदेवतानांनसंशयः ४७ यथेयमावयोःशैलेसंग्रामेरचनाकृता वैरोचनेनकृतस्यममसौलिर्महोदधौ ४८ शक्रस्यसहृशरू
पंदिव्यमास्थायसागरात् ग्राहरूपेणयोनीत आनीतोसौगरुत्मता ४९ ममाहिशयनान्मौलिर्हृत्वाक्षिप्तोगरुत्मता सुव्यक्तंसन्निकृष्टःस
जरासंधोनराधिपः ५० लक्ष्यतेहिध्वजाग्राणिरथानांवातरंहसाम् एतानिविजिगीषूणांशशिकल्पानिभूभृताम् ५१ छत्राण्यार्यविरा
जंतेदर्शितानिसितानिच अहोनृपरथोदग्राविमलाश्छत्रपंक्तयः ५२ अभिवर्त्ततिनःशुभ्रायथाखेहंसपंक्तयः अहोद्योर्विमलाभाना-
शस्त्राणांविमलानना ५३ प्रभाभास्कराभामिश्राचरंतीवादिशोदश एतानिनूनंसमरेपार्थिवैरायुधानिच ५४ क्षिप्तानिविनशिष्यतिम
यिसर्वाणिसयुगे कालेखलुनृपःप्राप्तोजरासंधोमहीपतिः ५५ आवयोर्युद्धनिकषःप्रथमःसमरातिथिः आर्यतिष्ठावसहितौनखल्वना
गतेनृपे ५६ युद्धारंभःप्रयोक्तव्योबलतावद्विमृश्यताम् एवमुक्त्वाततःकृष्णःस्वस्थःसंग्राममलालसः ५७ जरासंधवधप्रेप्सुश्चकारबलद-
र्शनम् वीक्ष्यमाणश्चतान्सर्वान्नृपान्यदुवरोव्ययः ५८ आत्मानमात्मनोवाचयत्पूर्वंदिविमंत्रितम् इमेतेपृथिवीपालाःपार्थिववर्त्म
निस्थिताः ५९ येविनाशंगमिष्यंतिशास्त्रदृष्टेनकर्मणा प्रोक्षितान्खल्विमान्मन्येमृत्युनानृपसत्तमान् स्वर्गगामीनिचाप्येषांवपूंषिप्रच
काशिरे ६० स्थानेभारपरिश्रांतावसुधेयंदिवंगता एषानृपतिसिंहानांबलौघैरभिपीडिता ६१ अल्पेनखलुकालेनविविक्तपृथिवीतल
म् भविष्यतिनरेंद्रौघैराकीर्णंचनभस्तलम् ६२ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिजरासंधाभिगमनंनामएकचत्वारिं
शोऽध्यायः ४१ वैशंपायनउवाच जरासंधस्ततःप्राप्तोनृपःसर्वमहीक्षिताम् नराधिपैर्बलसुतैरनुयातोमहाद्युतिः १ व्यायतो
दग्रतुरगैर्विस्पष्टार्थसमाहितैः रथैःसांग्रामिकैर्युक्तैरसंगगतिभिःक्वचित् २ हेमकक्षैर्महाघंटैर्वारणैर्वारिदोपमैः महामात्रोत्तमारू
ढैःकल्पितैरणवल्गितैः ३ सारूढैःसादिभिर्युक्तैःप्रेरयमाणैःप्रवल्गितैः धाजिभिर्वायुसंकाशैःप्लवद्भिरिवपत्रिभिः ४ खड्गचर्मबलोदग्रैः
पत्तिभिर्वल्गितांबरैः सहस्रसंख्यैर्निर्मुक्तैरुत्पतद्भिरिवोरगैः ५ एवंचतुर्विधैःसैन्यैःप्रचलद्भिरिवांबुदैः नृपोभियातोबलवान्जरासं-
धोधृतव्रतः ६ सरथैर्नेमिघोषैश्चगजैश्चमदसिंजितैः हेषद्भिश्चापितुरगैःक्ष्वेडितोग्रैश्चपत्तिभिः ७

वि० टी० एकचत्वारिंशः ४१ जरासंधइति १ विस्पृष्टार्था
अश्वशास्त्रविदस्तैःसमाहिताःसुशिक्षिताःतैः २ ३ आरूढंसर्वत्रप्रसिद्धिस्तद्युक्तैःसारूढैःप्रख्यातैःसादिभिःयुक्ताःनियुक्ताःवाजिनस्तैः ४ ५ धृतव्रतइत्यलौकिकम-
पिसामर्थ्यंसूचितम् ६ ७ घ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२५ कांतिर्मूर्तिमती जयपूर्वेणयोगेन रामसंबोधनसंबंधेन जयरामेतिशब्देन अभिमुखी हृत्येत्यर्थः २६ २७ श्रीश्चवैष्णव्यपिराममेवानुमतेत्याह श्रीश्चेति २८ दर्शितावस्त्रभूषणादिभिः संपन्ना २९ ३० मौलिर्मुकुटः ३१ ३२ समुद्राहाणिसमुद्रः कामः कामंसमुद्रमाविशोनिमंत्रवर्णात् मनोरथानुरूपाणीत्यर्थः भावतः आदरेणप्रतिगृण्हीष्वेत्युत्तरेणान्वयः ३३ भूषणमेवलक्ष्यालंक्रियालंकरणंभवतिनतुतैस्तवतथापितवसमयोयमलंकारप्रतिग्रहस्येत्यर्थः ३४ ३५

मदिरानंतरंकांतिः संकर्षणमुपस्थिता मदेनागलितश्रोणी किंचिदाघूर्णितेक्षणा २५ प्रोवाचप्रणयात्कांतिर्बद्धांजलिपुटासती जयपूर्वेणयोगेनसस्मितंवाक्यमर्थवत् २६ अहंचंद्रादपिगुरुंसहस्रशिरसंप्रभुम् स्वैर्गुणैस्त्वरुक्ताभायथैवमदिरातथा २७ श्रीश्चपद्मालयादेवी विधेयावैष्णवोरसि रोहिणेयोरसिस्त्वभामालेवामलतागता २८ सामालामसलांगृह्यबलस्योरसिदर्शिता पद्मास्यापद्महस्तावैसंकर्षणमथाब्रवीत् २९ रामरामाभिरामस्त्ववारुण्यासमलंकृतः कांत्यामयाचुदेवेशसंगतश्चंद्रमायथा ३० इयंचमासयामौलिः प्रोत्सृतावरुणालयात् मूर्ध्निशीर्षसहस्रस्ययातेभानुरिवाबभौ ३१ जातरूपमयंचैककुंडलंवज्रभूषितम् आदिपद्मंचपद्माक्ष दिव्यश्रवणभूषणम् ३२ कौशेयानिचनीलानिसमुद्राहाणिभावन हारंचपीनतरलंसमुद्राभ्यंतरोषितम् ३३ देवसांप्रतिगृण्हीष्व पौराणीभूषणक्रियाम् समयस्तेमहाबाहोभूषणानामलंक्रिया ३४ संगृह्यतमलंकारंताश्चतिस्रःसुरस्त्रियः शुशुभेबलदेवोहि शारदेंदुसमप्रभः ३५ ससमागम्यकृष्णेनजलजांभोदवर्चसा मुदपरमिकालेभेग्रहयुक्तःशशीयथा ३६ ताभ्यांसुभाभ्यांसंलापेवर्तमानेगृहेयथा वैनतेयस्ततोध्यानमतिचक्राममवेगतः ३७ संग्रामसुक्तस्तेजस्वी दैत्यप्रहरणांकितः देवताभाजयश्लाघी दिव्यस्रगनुलेपनः ३८ सुप्तस्यशयनेदिव्येक्षीरोदेवरुणालये विष्णोःकिरीटंदैत्येनहृतंविरोचनेनवै ३९ तदर्थस्तेनसंग्रामः कृतोसुवर्णमोजसा किरीटार्थेसमुद्रस्यमध्येदैत्यगणैःसह ४० मोक्षयित्वाकिरीटंतुवैष्णवपततांवरः व्यत्यक्रमतवेगेनगगनंदेवतालयम् ४१ सददर्शगुरुशैले विष्णुंकार्यांतरागतम् तेनक्रोडावलंबेनकिरीटेनविराजता ४२ सदृक्षामानुषंविष्णुं शैलराजशिरोगतम् प्रकाशंचैवतन्निर्मुक्तंविमौलिमिवमानुषम् ४३ अभिज्ञस्तस्यभावानांगरुत्मान्पततांवरः चिक्षेपरवगतांमौलिंविष्णोः शिरसिरूढवत् ४४ उपेंद्रमूर्ध्निसामौलिरपिनद्धाइवापतत् शिरसःस्थाननिर्मुक्ताकृष्णाचैवान्वशोभयत् ४५

३६ ताभ्यांतयोः संलापेन्योन्यभाषणेअध्यानमतिचक्रामतत्राजगामेत्यर्थः ३७ ३८ ३९ ४० किरीटंमोक्षयित्वाक्षीरोदेविष्णुमदृक्षागगनंव्यत्यक्रमतेत्यर्थः ४१ ततोगगनादेवशैलेविष्णुंददर्शनतुवैकुंठेक्रोडावलंबेनस्वंधावसक्तेन ४२ विमौलिंविकिरीटंएतावतांग्रथेनकृष्णास्तुभगवानस्त्वयमित्येतद्दर्शितंवैकुंठक्षीरोदयोस्तदभावात्तत्रापिमूर्तेःसत्वेतु अंशावतारत्वमेवस्यादिति ४३ ४४ स्थानेनिर्मुक्तानिश्चयेनयोजिता ४५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३१ ३२ ३३ विमर्दंतोविमर्दयंतः ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ प्रतिबंधेनरोधमात्रेण अवस्कंदेनकर्मणा

पांचालाधिपतिश्चैवद्रुपदश्चनराधिपः विंदानुविंदावावंत्यौदंतवक्त्रश्चवीर्यवान् ३१ छागलिःपुरमित्रश्चदरदश्चमहीपतिः कौशांब्यो
मालवश्चैवशतधन्वाविदूरथः ३२ भूरिश्रवास्त्रिगर्तश्चबाणःपंचनदस्तथा उत्तरंपर्वतोद्देशमेतेदुर्गसहान्नृपाः ३३ आरोहंतुविमर्दंतो
वज्रप्रतिमगौरवाः उलूकःकैतवेयश्चवीरश्चांशुमतःसुतः ३४ एकलव्योदृढाश्वश्चक्षत्रधर्माजयद्रथः उत्तमौजास्तथाशाल्वःकेरलेयश्च
कैशिकः ३५ वैदिशोवामदेवश्चसुकेतुश्चापिवीर्यवान् पूर्वपर्वतनिर्व्यूहमेतेघ्नायतमस्तुनः ३६ विदारयंतोधावंतुवाताइवबलाहकान्
अहंचदरदश्चैवचेदिराजश्चवीर्यवान् ३७ दक्षिणंशैलनिचयंदारयिष्यामदंशिताः एवमेषगिरिःक्षिप्रंसमंताद्वेष्टितोबलैः ३८ वज्रप्रपा
तप्रतिमंप्राप्नोतुतुमुलंभयम् गदिनोवैगदाभिश्चपरिघैःपरिघायुधाः ३९ अपरेविविधैःशस्त्रैर्दारयंतुनगोत्तमम् एषभूमिधरोद्यैवविष-
मोच्चशिलान्वितः ४० कार्योभूमिसमःसर्वोभवद्भिर्वसुधाधिपैः जरासंधवचःश्रुत्वापार्थिवाराजशासनात् ४१ गोमंतंवेष्टयामासुःसागरःपृ
थिवीमिव उवाचराजाचेदीनांदेवानांमघवानिव ४२ किंतेयुद्धेनदुर्गेस्मिन्गोमंतेचनगोत्तमे दुरारोहश्चशिखरेप्रांशुपादपकंटके ४३
काष्ठैस्तृणैश्चबहुभिःपरिवार्यसमंततः अद्यैवदीप्यतांक्षिप्रमलमन्येनकर्मणा ४४ क्षत्रियाःसुकुमाराहिरणेसायकयोधिनः नियुक्ताः
पर्वतेदुर्गेनियोक्तुंपादयोधिनः ४५ ननामप्रतिबंधेननवावस्कंदकर्मणा शक्यएषगिरिस्तातदेवैरप्यवमर्दितुम् ४६ दुर्गयुद्धेक्रमःश्रेया
न्रोधयुद्धेनपार्थिवाः भक्तोदकेंधनैःक्षीणाःपात्यंतेगिरिसंश्रिताः ४७ वयंबहवइत्येवनाथेषुनिपुणोनयः यादवौनावमंतव्यौद्वावप्येतौ
रणस्थितौ ४८ अविज्ञातबलावेतौश्रूयतेदेवसंमितौ कर्मभिस्त्वमरैर्विप्रैर्बालावतिबलान्वितौ ४९ दुष्कराणीहकर्माणिकृतवंतौयदू
त्तमौ शुष्ककाष्ठैस्तृणैर्वृक्षैःसर्वतःपर्वतोह्ययम् ५० अग्निनादीपयिष्यामोदह्येतांगतचेतनौ यदिचेन्निःक्रमिष्येतेदह्यमानावितोतिके
५१ समेत्यपातयिष्यामस्त्यक्ष्यतोजीवितंततः वाक्यमेतत्तुरुरुचेसबलानांमहीक्षिताम् ५२ यदुक्तंचेदिराजेननृपाणांहितशंसिना त
तःकाष्ठैस्तृणैर्वंशैःशुष्कशाखैश्चपादपैः ५३ उपादीप्यतशैलेंद्रःसूर्यपादैरिवांबुदः ददुस्तेसर्वतस्तूर्णंपावकंतत्रपार्थिवाः ५४ यथोद्देशं
यथावातंशैलस्यलघुविक्रमाः सवायुदीपितोवन्हिरुत्पपातसमंततः ५५ सधूमज्वालमालाभिर्भाभिःखमिवशोभयन् सोनलःपव
नायस्तःकाष्ठसंचयमूलवान् ५६ ददाहशैलंश्रीमंतंगोमंतंकांतपादपम् सदह्यमानःशैलेंद्रोमुमोचविपुलाःशिलाः ५७

उपर्युत्प्लवनेन ४६ भक्तादिभिःरहिताएवपात्यंतेनलन्यथा ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ पवनायस्तःवायुनाउत्धूतः ५६ ५७ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

सन्नादयन्दिशः सर्वाः सर्वांश्चापिगुहाशयान् सराजासागराकारः सुसैन्यः प्रत्यदृश्यत ८ तद्बलंपृथिवीशानांदृश्यतोधर्जनाकुलम् क्ष्वे
डितास्फोटितरवंमेघसैन्यमिवाम्बरे ९ रथैः पवनसंपातैर्गजैश्चजलदोपमैः तुरगैश्चसिताभ्राभैः पत्तिभिश्चापि दर्शितैः १० व्योमिश्चतद्व
लंभातिपत्तिद्विपरथाकुलम् घर्मान्तेसागरगतंयथाभ्रपटलंतथा ११ सबलास्तेमहीपालाजरासंधपुरोगमाः परिवार्यगिरिंसर्वेनिवेशा
योपचक्रमुः १२ बभौतस्यनिविष्टस्यबलस्यश्रीःशिबिरस्यवै शुक्लपर्वणिपूर्णस्ययथारूपंमहोदधेः १३ वीतरात्रेततःकालेनृपास्तेकृतकौ
तुकाः आरोहणार्थंशैलस्यसमेतायुद्धलालसाः १४ समवायीकृताःसर्वेगिरिमस्थ्येषुतेनृपाः निविष्टामंत्रयामासुर्युद्धकालकुतूहलाः १५
एषांतुतुमुलःशब्दःशुश्रुवेपृथिवीक्षिताम् युगान्तेभिद्यमानानांसागराणांयथास्वनः १६ तेषांसकंचुकोष्णीषाःस्थविरावेत्रपाणयः चे
रुर्माशब्दइत्येवंब्रुवतोराजशासनात् १७ तस्यरूपंबलस्यासीन्निःशब्दस्तिमितस्यवै लीनमीनभुजंगस्यनिःशब्दस्यपयोदधेः १८ त
स्मिन्स्तिमितनिःशब्देयोगादिवमहार्णवे जरासंधोबृहद्वाक्यंबृहस्पतिरिवाददे १९ शीघ्रंसमभिवर्तंतांबलानीहमहीक्षिताम् सर्वतः
पर्वतश्चायंबलौघैःपरिवार्यताम् २० अश्मयन्त्राणियुज्यंतांक्षेपणीयाश्चमुद्गराः ऊर्ध्वंचापिप्रवाह्यंतांप्रासांश्चतोमराणिच २१ ऊर्ध्वंप्रक्षेपणा
र्थायदृढानिचलघूनिच शस्त्रपातविधानानिक्रियंतामाशुशिल्पिभिः २२ भूराणांयुद्ध्यमानानांप्रमत्तानांपरस्परम् यथान्नरपतिग्राहस्तथा
शीघ्रंविधीयताम् २३ दार्यतामेषटंकौघैःखनित्रैश्चनगोत्तमः नृपाश्चयुद्धदुर्गज्ञाविन्यस्यंतामदूरतः २४ अद्यप्रभृतिसैन्यैर्मेगिरिरोधः
प्रवर्त्यताम् यावदेतौपातयामोवसुदेवसुतावुभौ २५ अचलोयंशिलायोनिःक्रियतांनिस्थलाण्डजः आकाशमपिबाणौघैर्निःसंपातंवि
धीयताम् २६ मयानुसृष्टास्तिष्ठंतुगिरिभूमिषुभूमिपाः तेषुतेष्ववकाशेषुशीघ्रमारुह्यतांगिरिः २७ मद्रःकलिंगाधिपतिश्चेकितानश्च
बाह्लिकः काश्मीरराजोगोनर्दःकरूषाधिपतिस्तथा २८ द्रुमःकिंपुरुषश्चैवपार्वतीयाश्चमालवाः पर्वतस्यापरंपार्श्वंक्षिप्रमारोहयंत्वमी
२९ पौरवोवेणुदारिश्चवैदर्भःसोमकस्तथा रुक्मीचभोजाधिपतिःसूर्याक्षश्चैवमालवः ३०

लकरी शत्रोश्चापकर्षकरीसतामाप्रयत्नित्यर्थः यथा
पतंतिनोवाहाइतिपाठेतुतथागिरिप्रांतोविषमोसमःकर्तव्यः यथास्माकंचहयास्तत्रगच्छंतीत्यर्थः २३ युद्धदुर्गज्ञाः युद्धरहस्यज्ञाः २४ २५ निःसंपातंनिरव- ॥ ५५
काशं अतएवसंचारस्थानाभावान्निस्थलाण्डजत्वंयुज्यतेगिरेः २६ २७ २८ २९ ३०

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५८ ५९ ६० रीतीः धातुरसानांधाराः निर्वर्तयामासप्रवर्तितवान् ६१ ६२ प्रपातानांप्रस्रवैरुत्क्षिप्तउज्झितः शुष्कतांगतइत्यर्थः ६३ ६४ रेसुः आर्त्तनादंचक्रुः ६५

शतशः शतधाभूलामहोल्काकारदर्शनाः सचित्रभानुः शैलेंद्रो भाभिर्भानुरिवांबुदम् ५८ आलिंपतीवविधिवत्समंतादर्चिरुद्धतः
धातुभिः पच्यमानैश्चज्वलद्भिश्चैवपादपैः ५९ उद्भ्रांतश्वापदोरौतितुद्यमानइवाद्रिराट् भततोदह्यमानस्तुसशैलः कृष्णवर्त्मना ६० रीती
निर्वर्तयामासकांचनांजनराजतीः वह्निनाचापिदीप्तांगो गिरिर्नातिविराजते ६१ धूमांधकाराधतनुर्मज्जमानइवांबुदे ६१ विध्विद्धोपल
संघातः कर्कशांगारवर्षणः गिरिर्भात्यनलोद्गारैरुल्कावृष्टिरिवांबुदः ६२ प्रपातप्रस्रवोत्क्षिप्तो धूमसंवर्द्धितोदरः सगिरिर्भस्मतांयातोयु
गांताग्निहतोपमः ६३ विह्वलास्तस्यपार्श्वेभ्यः सर्पादग्धार्द्धदेहिनः श्वसंतः पृथुमूर्द्धानोनिश्चेरुरशिवेक्षणाः ६४ उत्पत्योत्पत्यगगनात्पुनः
पुनरवाङ्मुखाः रेसुश्चोद्वेजिताः सिंहाः शार्दूलाश्चानलाविलाः ६५ मुमुचुः पादपाश्चैवदाहनिर्यासजंजलम् वहत्यूर्ध्वगतिर्वातोभस्मा
गाराभिपिंगलः ६६ धूमच्छायाचगगनेदीप्ताभोददर्शना त्यज्यमानोमहासानुर्विहगैः श्वापदैरपि ६७ गिरिर्वैकल्यमायातिभागल्क्ष्या
त्कृष्णवर्त्मनः ससृजुश्चशिलाः शैलश्चलोदग्रशिलोच्चयः ६८ वज्रेणपुरुहूतस्ययथास्याद्दारितस्तथा आदीप्यतंतुशैलेंद्रंक्षत्रियाव्यूह
दर्शिताः ६९ अर्धक्रोशमपक्रांताः पावकेनाभिपातिताः दह्यमानेनगत्र्येष्ठेसीदमानेमहाद्रुमे ७० धूमभारैरनालक्ष्यमूलेशिथिलतांग
ते सरोषंहितुदाराभोवचनंकेशिसूदनम् ७१ बभाषेपद्मपत्राक्षःससाक्षान्मधुसूदनम् दह्यतेयंगिरिस्तातससानुशिखरद्रुमः ७२ आ
वयोः कृष्णवैरेणबलिभिर्वसुधाधिपैः पश्यकृष्णानलोष्णानांसधूमानांसमंततः वनानांविरसंतीवनगाश्चाशोहिद्विजोत्तमाः ७३ अयंय
द्यावयोरर्थेगोमंतस्तातदह्यते अयशश्चमिदंलोकेकौलीनंचभविष्यति ७४ नदस्यान्नृपयहेतोर्हिनगस्यनगसन्निभ क्षत्रियान्निहनि
ष्यामोद्यावामेवसुधावर ७५ एतेतेक्षत्रियाःसर्वेगिरिमादीप्यदर्शिताः रथिनस्तातदृश्यंतेयथादेशंयुयुत्सवः ७६ एवमुक्त्वागिरेःशृंगा
त्मेरुशृंगादिवोडुराट् निपपातबलःश्रीमान्वनमालाधरोयुवा ७७ कादंबरीमदक्षीबोनीलवासाःसिताननः सशारदेंदुसंकाशोवन
मालाचितोदरः ७८ कांतेककुंडलधरश्चारुमौलिरवाङ्मुखः निपपातनरेंद्राणांमध्येकेशवपूर्वजः ७९ अवप्लुतेततोरामेकृष्णःकृष्णा
बुदोपमः गोमंतशिखरात्श्रीमानाप्लुतोमितविक्रमः ८० ततःसंपीडयामासपद्भ्यांगिरिवरंहरिः संपीडितोगिरिस्तेननिर्ममज्जसमंततः
८१ जलाकुलोपलस्तत्रप्रस्रुतोद्विरदोयथा सतेनवारिणावन्हिस्तत्क्षणात्सशमयद्यो ८२

६६ ६७ ६८ ६९ ७० ७१ ७२ विरसंतीत्यक्रंदंतीव ७३ कौलिनंलोकापवादः ७४ ७५ ७६ ७७ ७८ ७९ ८० ८१ प्रस्रुतः प्रस्विन्नः ८२ छ. छ.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सिंहस्य आरसितंमहाध्वनिस्तद्वन्निर्घोषोयस्यसः ८३ ८४ ८५ ८६ इतिहरिवंशेविष्णुपर्वणिटीकायांद्विचत्वारिंशोऽध्यायः ४२ तौनगानृइति १ २ ३ पतंतिस्म
आयुधानीतिशेषः ४ ५ यानितत्रैवमथुरायांनिक्षिप्ययातौतानिप्राप्तौलब्धवंतौ ६ ७ स्रग्दाममालारूपाणिदामानिरज्जुविशेषः ८ ९ ताभ्यांतयोरर्थे १० लला

कल्पांतेवारिधाराभिर्मेघजालइवांशुमान् सिंहारसितनिर्घोषःपीतवासाघनाकृतिः ८३ किरीटमूर्द्धासौम्यास्यःपुंडरीकनिभेक्षणः
श्रीवत्सवक्षाःसुमुखःसहस्राक्षःसमद्युतिः ८४ रामादनंतरंकृष्णःप्लुतोवैवीर्यवांस्ततः ताभ्यामेवप्लुताभ्यांचचरणैःपीडितोगिरिः ८५
मुमोचसलिलोत्पीडान्तीव्रपावकशांतये सलिलोत्पीडनंदृष्ट्वापार्थिवाभयमाविशन् ८६ इतिश्रीमहाभारतेखिलेषुहरिवंशेवि
ष्णुपर्वणिगोमंतदाहोनामद्विचत्वारिंशोऽध्यायः ४२ वैशंपायनउवाच तौनगादाप्लुतौदृष्ट्वावसुदेवसुतावुभौ क्रुब्धंनरवरानीक
सर्वंसमूढवाहनम् १ बाहुप्रहरणौतौतुचेरतुस्तत्रयादवौ मकराविवसंरब्धौसमुद्रक्षोभणावुभौ २ ताभ्यामृधेप्रविष्टाभ्यांयादवाभ्यां
मतिस्त्वभूत् आयुधानांपुराणानामादानकृतलक्षणा ३ ततोंबरतलाद्भूयःपतंतिस्ममहात्मनोः मध्येराजसहस्रस्यसमरप्रतिकांक्षिणोः
४ यानिवैमाथुरेयुद्धेप्राप्तान्याहवशोभिनोः तान्यंबरात्पतंतिस्मदिव्यान्याहवसप्लुवे ५ लेलिहानानिदिव्यानिदीप्ताग्निसदृशानिवै
निक्षिप्ययानितत्रैवतानिप्राप्तौस्मयादवौ ६ क्रव्यादैरनुयातानिमूर्तिमंतिबृहंतिच तृषितान्याहवेभोक्तुंनृपमांसानिसर्वशः ७ दिव्य
स्रग्दामधारीणित्रासयंतिखेचरान् प्रभयाभासमानानिदर्शितानिदिशोदश ८ हलंसंवर्तकंनामसौनंदंमुसलंतथा चक्रंसुदर्शनंना
मगदांकौमोदकींतथा ९ चत्वार्येतानितेजांसिविष्णुप्रहरणानिवै ताभ्यांसमवतीर्णानियादवाभ्यांमहामृधे १० जग्राहप्रथमंरामोल
लामप्रतिमंरणे सर्पंतमिवसर्पेंद्रंदिव्यमालाकुलंहलम् ११ सव्येनसात्वतांश्रेष्ठोजग्राहमुशलोत्तमम् सौनंदंनामबलवान्विरान-
दकरंद्विषाम् १२ दर्शनीयंचलोकेषुचक्रमादित्यवर्चसम् नाम्नासुदर्शनंनामप्रीतोजग्राहकेशवः १३ दर्शनीयंचलोकेषुधनुर्जल
दनिःस्वनम् नाम्नाशार्ङ्गमितिख्यातंप्रीतोजग्राहवीर्यवान् १४ द्वेवेनिगदितार्थस्यगदातस्यापरेकरे निषिक्ताकुमुदाक्षस्यनाम्ना
कौमोदकीतिसा १५ तौस्वप्रहरणौवीरौसाक्षाद्विष्णुतनूपमौ समरेरामगोविंदौरिपूंस्तान्प्रत्ययुध्यताम् १६ सायुधप्रग्रहौवीरौ
तावन्योन्यमथाद्युभौ पूर्वजानुजसंज्ञौतुरामगोविंदलक्षणौ १७ समरेप्रतिरूपौतौविष्णुरेकोद्विधाकृतः द्विषत्सुप्रतिकुर्वाणौपरा
क्रांतौयथेश्वरौ १८ हलमुद्यम्यरामस्तुसर्पेंद्रमिवकोपनम् चचारसमरेवीरोद्विषतामंतकोपमः १९

मप्रतिमंध्वजतुल्यंललामंलांछनेध्वजेइतिमेदिनी ११ १२ वर्चसमितिसमासांतात्टच् १३ १४ १५ विष्णुतनुःब्रह्मातत्तुल्यौकर्तुमकर्तुमन्यथाकर्तुंशक्तावित्यर्थः १६
१७ अप्रतिरूपौअतुल्यौ १८ १९ ९५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

२० २१ २२ २३ पराक्रांतस्यशत्रुणावशीकृतस्य २४ पत्तिनः पदातेः २५ २६ २७ २८ २९ ३० ३१ ३२ प्रतीच्छंतौगृण्हंतौ ३३ ३४ ३५ ३६ ३७

विकर्षन्नथवृंदानिक्षत्रियाणांमहात्मनाम् चकाररोषंसफलंनागेषुचहयेषुच २० कुंजरान्लांगलोत्क्षिप्तान्मुशलाक्षेपताडितान्
रामोभिरामःसमरेनिममथाचलोपमः २१ तेवध्यमानारामेणसमरेक्षत्रियर्षभाः जरासंधांतिकंभीताविरथाःप्रतिजग्मिरे २२ तानुवाच
जरासंधःक्षत्रधर्मव्यवस्थितः धिगेतांक्षत्रवृत्तिंवःसमरेकातरात्मनाम् २३ पराक्रांतस्यसमरेविरथस्यपलायतः भ्रूणहत्यामिवासह्या
मवदंतिमनीषिणः २४ पत्तिनोऽकविच्चैकस्यगोपस्याल्पबलीयसः भीताःकिंविनिवर्तध्वंधिगेतांक्षत्रवृत्तिताम् २५ क्षिप्रंसमभिवर्तध्वं
ममवाक्येननोदिताः यावदेतौरणेगोपौप्रेषयामियमक्षयम् २६ ततस्तेक्षत्रियाःसर्वेजरासंधेननोदिताः क्षिपंतःशरजालानिहृष्टायोद्धु
मुपस्थिताः २७ तेहयैःकांचनापीडैरथैश्चेंदुसमप्रभैः नागैश्चांभोदसंकाशैर्महामात्रप्रणोदितैः २८ सतनुत्राणानिस्त्रिंशाःसायुधाम्बर
पाजराःस्वारोपितधनुष्मंतःसतूणीराःसुसायकाः २९ सच्छत्त्रोत्सेधिनःसर्वेचारुचामरवीजिताः रणायनिर्गताराजन्स्यंदनस्थामहीक्षितः
३० तौसुरूरगाप्रतितौविधावंतौमहाभुजौ वसुदेवसुतौवीरौयुयुत्सूप्रत्युदृश्यताम् ३१ तद्युद्धमभवत्तत्रतयोस्तेषांतुसंयुगे सायकोल्लाग
बहुलंगदानिर्घातदारुणम् ३२ ततःशरसहस्राणिप्रतीच्छंतौरणोषिणौ तस्थतुर्योधमुख्यौतावभिहृष्टौयथाचलौ ३३ गदाभिश्चैववगु-
र्वीभिःक्षेपणीयैश्चमुद्गरैः अभ्यमानौमहेष्वासौयादवौनचकंपतुः ३४ ततःकृष्णोंबुदाकारःशंखचक्रगदाधरः व्यवर्द्धतमहातेजावातयु
तइवानलः ३५ सचक्रेणार्कतुल्येनदीप्यमानेनतेजसा चिच्छेदसमरेवीरोनृगजाश्वमहारथान् ३६ गदानिपातनिहतालांगलेनचकर्षि
ताः नशेकुस्तेरणेस्थातुंपार्थिवानष्टचेतसः ३७ चक्रक्षुरनिकृत्तानिविचित्राणिमहीक्षिताम् रथयूथानिभग्नानिनशेकुश्चलितुंरणे ३८
मुशलाक्षेपभग्नाश्चकुंजराःषष्टिहायनाः घनाइवघनापायेभग्नदंताविचुक्रुशुः ३९ चक्रानलज्वालहताःसादिनःसपदातयः पेतुःपरासव
स्तत्रयथाचक्राहतास्तथा ४० चक्रलांगलनिर्दग्धंतत्सैन्यंविदलीकृतम् युगांतोपहृतप्रख्यंसर्पप्रतिमाबभौ ४१ आक्रीडभूमिर्दि-
व्यानामायुधानांवपुष्मताम् वैष्णवानांनृपास्तेतुदद्दृशुस्त्वबलीयसः ४२ केचिद्भयात्समुद्विग्नाःकेचिन्निहतपार्थिवाः चक्रैकभग्नास्त्वपरे
विकीर्णाधरणीतले ४३ तस्मिन्विशसनेघोरेचक्रलांगलसंप्लवे दारुणानिप्रवृत्तानिरक्षांस्यौत्पातिकानिच ४४ आर्त्तानांकूजमाना
नांपाटितानांचवेणुवत् अंतोनशक्यतेन्वेष्टुंनृनागरथवाजिनाम् ४५ आपातितनरेंद्राणारुधिरार्द्रारणक्षितिः योषेवचंदनार्द्रांगीमैरवा
प्रतिभातिमे ४६

चक्रक्षुरश्चक्रधारा ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ७. ७. ७.

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४७ ४८ ४९ ५० ५१ ५२ ५३ सपूर्वजःसभ्रातृकः ५४ ५५ सेवनीकर्षकः सेवनंसीवनंपास्योर्हल्लेशमस्यकर्षणेइतिमेदिनीमत्तोवृषः कर्षकस्येव

नरकेशास्थिमज्जान्त्रैः शातितानांचदंतिनाम् रुधिरौघप्लुवस्तत्रछादयामासमेदिनीम् ४७ तस्मिन्महाभीषणकेनरवाहनसंक्षये शि
वानामृशिवैःशब्दैर्नादितेघोरदर्शने ४८ आर्तस्तनितसंनादेरुधिरांबुकृदाकुले अंतकाक्रांतसद्दशेनागदेहैःसमावृते ४९ अपास्तैर्बा
हुभिर्योधैस्तुरगैश्चविदारितैः कंकैश्चबलगृध्रैश्चनादितैःप्रतिनादिते ५० निपातेपृथिवीशानांमृत्युसाधारणेरणे कृष्णाःशत्रुवधक
तुचचारांतकदर्शनः ५१ सुगातांकप्रभचक्रकालीचैवायसींगदाम् गृह्यसैन्यावनिर्गतोबभाषेकेशवोनृपान् ५२ किन्नयुद्ध्यतवैशूरा
हस्त्यश्वरथसंवृताः किमिदंगम्यतेशूराहृतास्त्वाहदृढनिश्चयाः ५३ अहंसपूर्वजःसंख्येपदातिःप्रमुखेस्थितः अदृष्टदोषेणरणेभवंतोये
नपालिताः ५४ सइदानींजरासंधःकिमर्थंनाभिवर्तते एवमुक्तेतुनृपतिदरदोनामवीर्यवान् ५५ रामंहलायुधोग्रभुजमत्ययात्सैन्यमध्य
गम् बभाषेसतुताम्राक्षमुक्ष्णाणामिवसेवनी ५६ एह्येहिराममुध्यस्वमयासार्द्धमरिंदम तद्युद्धमभवत्ताभ्यांरामस्यदरदस्यच ५७
मूर्धलोकवरिष्ठाभ्यांकुंजराभ्यामिवौजसा योजयित्वाततःस्कंधेरामोदरदमाहवे ५८ हलेनबलिनांश्रेष्ठोमुसलेनावपोथयत् स्वका
यगतमूर्द्धावैमुसलेनावपोथितः पपातदरदोभूमौदारितार्द्रइवाचलः ५९ रामेणनिहतेतस्मिन्दरदेराजसत्तमे जरासंधस्यराज्ञस्तुरामे
णासीत्समागमः ६० महेंद्रस्येववृत्रेणदारुणोलोमहर्षणः गदेगृहीत्वाविक्रांतावन्योन्यमभिधावतः ६१ कंपयंतौभुवंवीरौतावुद्यतम
हागदौ ददृशातेमहात्मानौगिरीसशिखराविव ६२ अपारमंतयुद्धानिप्रेक्ष्यतोपुरुषर्षभौ संरब्धाविवधावंतौगदायुद्धेषुविश्रुतौ ६३
तावुभौपरमाचार्यौलोकख्यातौमहाबलौ मत्ताविवमहानागावन्योन्यंसमधावताम् ६४ ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः य
क्षाश्चाप्सरसश्चैवसमाजग्मुःसहस्रशः ६५ तद्देवयक्षगंधर्वमहर्षिभिरलंकृतम् शुशुभेभ्यधिकंराजन्नभोज्योतिर्गणैरिव ६६ अभिदु
द्राववृरामंचजरासंधोनराधिपः सव्यंमंडलमाश्रित्यबलदेवस्तुदक्षिणम् ६७ तावन्योन्यंप्रजह्रातेगदायुद्धविशारदौ दंताभ्यामिवमा
तंगौनादयंतौदिशोदश ६८ गदानिपातोरामस्यसुश्रुवेशनिनिःस्वनः जरासंधस्यचरणेपर्वतस्येवदीर्यतः ६९ नस्मकंपयतेरामंजरा
संधकरच्युता गदागदाभृतांश्रेष्ठविंध्यंगिरिमिवानिलः ७० रामस्यतुगदावेगंराजासमगधेश्वरः सेहेधैर्येणमहताशिक्षयाचव्यपो
थयत् ७१ ततोंतरिक्षेवागासीत्सुस्वरालोकसाक्षिणी नत्वयारामवध्योयमलंखेदेनमानद ७२

तद्वचनमगणयंतमित्यर्थः ५६ ५७ ५८ ५९ ६० ६१ ददृशातेददृशाते ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७३ ७४ ७५ विविक्तंशून्यं ७६ ७७ चेदिराजोदमघोषः ७८ ७९ ८० ८१ ८२ किल्बिषमपकारम् ८३ ८४ ८५ रथवरेस्वपिउदग्रौश्वेतमौ

विहितोस्यमयामृत्युस्तस्मात्साधुव्युपारम अचिरेणैवकालेनप्राणांस्त्यक्ष्यतिमागधः ७३ जरासंधस्तुतच्छ्रुत्वाविमनाः समपद्यत न
प्राहरत्ततस्तस्मैपुनरेवहलायुधः ७४ दीर्घकालमहाराजनिजघ्नुरितरेतरम् पराजितेत्वपक्रांतेजरासंधेमहीपतौ ७५ विविक्तमभवत्सै
न्यंपरावृत्तमहारथम् तेनृपाश्चोदितेनागैःस्यंदनैस्तुरगैस्तथा ७६ दुद्रुवुर्भीतमनसोव्याघ्राघ्राता मृगाइव तंनरेंद्रैःपरित्यक्तंभग्नदर्पंम
हारथैः ७७ घोरंक्रव्यादबहुलंरौद्रमायोधनंबभौ द्रवत्सुरथमुख्येषुचेदिराजोमहाद्युतिः ७८स्मृत्वायादवसंबंधंकृष्णमेवान्ववर्तत ७८
वृतःकारूषसैन्येनचेदिसैन्येनचानघ संबंधकामोगोविंदमिदमाहसचेदिराट् ७९ अहंपितृष्वसुर्भर्तातवयादवनंदन सबलस्त्वामुपावृत्त
स्त्वंहिमेदयितःप्रभो ८० उक्तश्चैषमयाराजाजरासंधोल्पचेतनः कृष्णाद्विरमदुर्बुद्धेविग्रहाद्रणकर्मणि ८१ तदेषोद्यमयात्यक्तोममवाक्य
स्यदूषकः भग्नोयुद्धेजरासंधोभयाद्द्रवतिसानुगः ८२ निर्वैरोनैषसंयातिस्वपुरंपृथिवीपतिः त्वय्येवभूयोप्यपरंदर्शयिष्यतिकिल्बिषम् ८३
तदिमांसत्यजास्तुल्यमहीहतनराकुलाम् क्रव्यादगणसंकीर्णांसेवितव्याममानुषैः ८४ करवीरपुरंकृष्णगच्छामसबलानुगाः शृगालवासु
देवेद्रक्ष्यामस्तंनपार्थिवम् ८५ इमौरथवरोदग्रौयुवयोःकारितौमया योजितौशीघ्रतुरगैःस्वगचक्राक्षकूबरौ ८६ शीघ्रमारुह भद्रंतेबल
देवसहायवान् त्वरामःकरवीरस्थंद्रष्टुंतंवसुधाधिपम् ८७ वैशंपायनउवाच पितृष्वसृपतेर्वाक्यंश्रुत्वाचेदिपतेस्तदा वाक्य-
हृष्टमनाःकृष्णोजगादजगतोगुरुः ८८ अहोसुयुद्धाभिरतौदेशकालोचितौत्वया बांधवप्रतिरूपेणसंसिक्तौवचनांबुना ८९ देशकालवि
शिष्टस्यहितस्यमधुरस्यच वाक्यस्यदुर्लभालोकेवक्तारश्चेदिसत्तम ९० चेदिनाथसनाथौस्वःसंवृत्तौतवदर्शनात् नावयोःकिंचिदप्राप्यंय
योस्त्वंबंधुरीदृशः ९१ जरासंधस्यनिधनंयेचान्येतत्समानृपाः पर्याप्तोत्वंसनाथौस्वःकर्तुंचेदिकुलोद्वह ९२ यदूनांप्रथमोबंधुस्त्वंहिसर्वम
होक्षिताम् अतःप्रभृतिसंग्रामान्द्रक्ष्यसेचेदिसत्तम ९३ चक्रमौशलमित्येवंसंग्रामंरणवृत्तयः कथयिष्यंतिलोकेस्मिन्येधरिष्यंतिपा-
र्थिवाः ९४ राज्ञांपराजयंयुद्धेगोमंतेचलसत्तमे श्रवणाद्धारणाद्वापिस्वर्गलोकंव्रजंतिहि ९५ तद्गच्छाममहाराजकरवीरपुरोत्तमम् त्व
योद्दिष्टेनमार्गेणचेदिराजशिवायवै ९६ तेस्यंदनगताःसर्वेपवनोत्पातिभिर्हयैः भेजिरेदीर्घमध्वानंमूर्तिमंतइवाग्नयः ९७ तेत्रिरात्रो
षिताःप्राप्ताःकरवीरपुरोत्तमम् शिवायत्वशिवेदेशेनिविष्टास्त्रिदशोपमाः ९८

८६ ८७ ८८ ८९ ९० ९१ ९२ ९३ धरिष्यंतिजीविष्यंति ९४ ९५ ९६ ९७ ९८ छ. छ. छ. छ.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीमहाभारतेहरिवंशेविष्णुपर्वणिटीकायांत्रिचत्वारिंशोऽध्यायः ४३ तानागतानृइति १ २ ३ ४ शक्रस्यरथाद्रिणासमानइतिशेषः ५ ६ ७ ८ ९

इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिकरवीरपुराभिगमनंनामत्रिचत्वारिंशोऽध्यायः ४३ वैशंपायनउवाच तानाग
तान्विदित्वाथशृगालोयुद्धदुर्मदः पुरस्यधर्षणंमत्वानिर्जगामेंद्रविक्रमः १ रथेनादित्यवर्णेनभास्वतारणगामिना आयुधप्रतिपूर्णे-
ननेमिनिर्घोषहासिना २ मंदराचलकल्पेनचित्राभरणभूषिणा अक्षय्यसायकैस्तूणैः पूर्णेनार्णवघोषिणा ३ हयश्रेष्ठेनाशुगतिना
सक्तेनशिखरेष्वपि हेमकूबरगर्भेणदृढाक्षेणातिशोभिना ४ सुबंधुरेणदीप्तेनपतत्रिवरगामिना खगतेनेवशक्रस्यहर्यश्वेणरथाद्रि
णा ५ सावित्रेनियमंपूर्णेयददौसवितास्वयम् आदित्यरश्मिभिरिवरश्मिभिर्योनिगृह्यते ६ तेनस्यंदनमुख्येनद्विषत्स्यंदनघातिना
सशृगालोऽभ्ययात्कृष्णंशलभःपावकंयथा चापपाणिःसुतीक्ष्णेषुःकवचीहेममालिकः ७ सितप्रावरणोष्णीषःपावकाकारलोचनः मु
हुर्मुहुर्ज्याचपलंविक्षिपन्दुःसहधनुः ८ निर्वमन्रोषजंवायुसानलज्वालमंडलम् भाभिर्भूषणपंक्तीनांदीप्तोमेरुरिवाचलः ९ रथ
स्थइवशैलेंद्रःशृगालःप्रत्यदृश्यत तस्यारसितशब्देनरथनेमिस्वनेनच १० गुरुत्वेनचनाम्यंतीचचालोर्वीभयातुरा तमापतंतंश्रीमंतं
मूर्तिमंतमिवाचलम् ११ शृगालंलोकपालाभंदृष्ट्वाकृष्णोनविव्यथे शृगालश्चापिसंरब्धःस्यंदनेनाशुगामिना १२ समीपेवासुदेवस्य-
युयुत्सुःप्रत्यदृश्यत वासुदेवंस्थितंदृष्ट्वाशृगालोयुद्धलालसः १३ अभिदुद्राववेगेनमेघराशिरिवाचलम् वासुदेवःस्मितंकृत्वाप्रतियु
द्धायतस्थिवान् १४ तद्युद्धमभवत्ताभ्यांसमरेघोरदर्शनम् उभाभ्यामिवमत्ताभ्यांकुंजराभ्यांयथावने १५ शृगालस्त्वब्रवीत्कृष्णंसम
रेसमुपस्थितम् युद्धरागेणतेजस्वीमोहाच्चलितगौरवः १६ गोमंतेयुद्धमार्गेणयत्त्वयाकृष्णचेष्टितम् अनायकानांमूर्खाणांनृपाणां
दुर्बलंबले १७ समंसुविदितःकृष्णक्षत्रियाणांपराजयः कृपणानामसत्वानामयुद्धानांरणोत्सवे १८ तिष्ठेदानींयथाकामंस्थितोहं
पार्थिवेपदे क्वयास्यसिमयारुद्धोरणेषुपरिनिष्ठितः १९ नचाहंमेकंसबलोयुक्तस्त्वांयोद्धुमाहवे अहमेकस्त्वमप्येकोह्यौयुद्धावरणेस्थि
तौ २० किंजनेननिरस्तेनत्वंवाहंचरणेस्थितः धर्मयुद्धेननिधनंप्रजत्वेकतरोरणे २१ लोकेस्मिन्वासुदेवोहंभविष्यामिहतेत्वयि हते-
मयित्वमप्येकोवासुदेवोभविष्यसि २२ शृगालस्यवचःश्रुत्वावासुदेवःक्षमापरः ईर्ष्यंतंप्रहरस्वेतितमुक्त्वाचक्रमाददे २३ ततःसाय
कजालानिशृगालःक्रोधमूर्च्छितः चिक्षेपकृष्णोघोराणियुद्धायलघुविक्रमः २४ शस्त्राणियानिचान्यानिमुशलाद्यानिसंयुगे पातयामास
गोविंदेसशृगालःप्रतापवान् २५

आरसितशब्देनगर्जितध्वनिना १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२६ परिक्षिपन् परिक्षिपत् २७ प्रमाणस्थं चक्रभयादपलापितमित्यर्थः २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ आरुज्य-

शृगालप्रहितैरस्त्रैः पावकज्वालमालिभिः निर्दयाभिहतः कृष्णः स्थितो गिरिरिवाचलः २६ सोऽस्त्रप्रहाराभिहतः किंचिद्रोषसमन्वि-
तः चक्रमुद्भ्राम्य गोविंदः शृगालस्योपरिक्षिपन् २७ तं रथस्थं प्रमाणस्थं शृगालं युद्धदुर्मदम् जघान समरे चक्रं जातदर्पं महाबलम् २८
ततः सुदर्शनं चक्रं पुनरायाद्धरेः करे चक्रेणोरसि निर्भिन्नः सगतासुर्गतासवः पपात क्षतजस्रावी शृगालोऽद्रिरिवाहतः २९ निशाम्य तं
निपतितं वज्रपातादिवाचलम् तस्य सैन्यान्यपययुर्विमनांसि हते नृपे ३० केचित्प्रविश्य नगरं करभल्लाभिहता भृशम् रुरुदुर्दुःखसंतप्ता
भर्तृशोकाभिपीडिताः ३१ केचित्तमेव शोचंतः स्मरंतः सुकृतानि च पतितं भूपतिं भूमौ न त्यजंति स्म दुःखिताः ३२ ततो मेघनिनादेन स्वरे-
णारिविमर्दनः कृष्णः कमलपत्राक्षो जनानामभयं ददौ ३३ चक्रोचितेन हस्तेन राजतांगुलिपर्वणा न भेतव्यं न भेतव्यमिति तानभ्यभाष-
त ३४ नास्य पापस्य दोषेण निराबाधकरं जनम् घातयिष्यामि समरे नेदं शूरव्रतं मतम् ३५ अश्रुपूर्णमुखा दीनाः क्रंदमाना भृशं तदा प-
तिनो वै शृगालाख्यो भ्रष्टः सदीनमानसः ३६ तेऽस्य पश्यंति पतितं धरण्यां धरणीपतिम् चक्रनिर्दारितोरस्कं भिन्नं शृंगमिवाचलम् ३७
विलपंति स्म ते सर्वे सचिवाः सप्रजा भृशम् साश्रुपातेक्षणा दीनाः शोकस्य वशमागताः ३८ तेषां रुदितशब्देन पौराणां विस्वरैः स्वरैः महि-
ष्यस्तस्य निष्पेतुः सपुत्रा रुदिताननाः ३९ तास्तं निपतितं दृष्ट्वा श्लाघ्यं भूमिपतिं पतिम् स्तनानारुज्य करजैर्भृशार्ताः पर्यदेवयन् ४० उरां-
स्युरसिजांश्चैव शिरोजान्याकुलान्यपि निर्दयं ताडयंत्यस्ता विस्वरं रुरुदुः स्त्रियः ४१ तस्योरसि सुदुःखाता मूर्च्छिताः क्लिन्नलोचनाः पेतु-
रूर्ध्वभुजाः सर्वाश्छिन्नमूला लता इव ४२ तासां बाष्पाम्बुपूर्णानि नेत्राणि नृपयोषिताम् वारिविप्रहतानीव पंकजानि चकाशिरे ४३
ताः पतिं पतितं भूमौ रुदत्यो दुःखिताडिताः लालप्यमानाः करुणं योषितः पर्यदेवयन् ४४ पुत्रं चास्य पुरस्कृत्य बाल्यप्रस्रुतलोचनम् श-
क्रदेवं पितुः पार्श्वे द्विगुणं रुरुदुः स्त्रियः ४५ अपूतवीर्यविक्रांतं बालः पुत्रो न पंडितः त्वद्विहीनः कथमयं पदस्थास्यति पैतृके ४६ कथमे-
कपदे त्यक्त्वा गतोऽस्यतः पुरं परम् अनाथास्त्वत्सौख्यानां किं कुर्मो विधवा वयम् ४७ तस्य पद्मावती नाम समहिषी प्रमदोत्तमा रुदती पुत्रमा-
दाय वासुदेवमुपस्थिता ४८ यस्त्वया पातितो वीर रणमोक्षेण कर्मणा तस्य प्रेतगतस्यायं पुत्रस्त्वां शरणं गतः ४९ यदि त्वां प्रणमेतासौ कु-
र्याद्वा शासनं तव नायमेकप्रहारेण जनस्तत्प्राप्स्यते दारुणम् ५० यदि कुर्यादयं मूढस्त्वयि बाधकविधिम् नैव परीतः कृपणः सेवेत धरणी-
तलम् ५१

विदार्य ४० ४१ ४२ ४३ ४४ अस्य शृगालस्य ४५ ४६ ४७ महिषी पट्टराज्ञी ४८ ४९ ५० परीतः कृत्यादेरितिशेषः ५१ ७. ७.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ तेनरथेनशृगालायसवित्रादत्तेन ६० ६१ ६२ ६३ ६४ ६५ इतिहरिवंशेविष्णुपर्व-

अयमस्यविपन्नस्यबांधवस्यतवानघ संततीरक्ष्यतांवीर पुत्रःपुत्रइवात्मजः ५२ तस्यास्तद्वचनंश्रुत्वामहिष्यायदुनंदनः मृदुपूर्वमि
दंवाक्यमुवाचवदतांवरः ५३ राजपत्निगतोरोषःसहानेनदुरात्मना प्रकृतिस्थावयंजातादेविसैषोस्मिबांधवः ५४ रोषास्मेविगतःसाध्वि
तववाक्यैरकल्मषैः योयंपुत्रःशृगालस्यममाप्येषनसंशयः ५५ अभयंचाभिषेकंचददाम्यस्मैसुखायवै आहूयंतांप्रकृतयःपुरोधामं
त्रिणस्तथा ५६ पितृपैतामहेराज्येतवपुत्रोभिषिच्यताम् ततःप्रकृतयःसर्वाःपुरोधामंत्रिणस्तथा ५७ अभिषेकार्थमाजग्मुर्यत्रोवै
रामकेशवौ ततःसिंहासनस्थंतुराजपुत्रंजनार्दनः ५८ अभिषेकेणदिव्येनयोजयामाससवीर्यवान् अभिषिच्यशृगालस्यकरवीरपुरेसुत
म् कृष्णस्तदहरेवाशुप्रस्थानमभ्यरोचयत् ५९ रथेनहरियुक्तेनतेनयुद्धार्जितेनवै केशवःप्रस्थितोध्वानंवृत्रहात्रिदिवंयथा ६० राम
देवोपिधर्मात्मासहमात्रापरंतप सबालवृद्धयुवतीमुख्याःप्रकृतयस्तथा ६१ शिबिकायामथारोप्यशृगालंसुहृदुर्मदम् संहतादूरमार्गे
णपश्चिमाभिमुखाययुः ६२ नैधनस्यविधानेनचक्रुस्तेतस्यसत्क्रियाम् सत्कारंकारयामासुःपितॄणांपारलौकिकम् ६३ उद्दिश्योद्दिश्यरा
जानंश्राद्धंकृत्वासहस्रशः ततस्तेसलिलंदत्वानामगोत्रादिकीर्तनैः ६४ पितर्युपरतेघोरेशोकसंविग्नमानसः कृत्वोदकंतदाराजाप्रविवेश
पुरोत्तमम् ६५ इतिश्रीमन्महाभारतेखिलेषुहरिवंशेविष्णुपर्वणिशृगालवधोनामचतुश्चत्वारिंशोऽध्यायः ४४ वैशंपायनउ
वाच तौतुस्वल्पेनकालेनदमघोषेणसंगतौ अध्याध्वविधिनातौतुपंचरात्रोषितौपथि १ दमघोषेणसंगम्यएकरात्रोषितावथ जग्म
तुःसहितौवीरौमुदापरमयायुतौ २ नगरींमथुरांप्राप्तौवसुदेवसुतावुभौ ततःप्रत्युद्गताःसर्वेयादवायदुनंदनौ ३ सबलाहृष्टमनसउग्र
सेनपुरोगमाः श्रेण्यःप्रकृतयश्चैवमंत्रिणश्चयथोचिताः ४ सबालवृद्धासाचैवपुरीसमभिवर्तत नंदितूर्याण्यवाद्यंतस्तूयतांपुरुषर्षभौ
५ रथ्यापताकामालिन्योभासंतिस्मसमंततः हृष्टाप्रमुदितासर्वापुरीपरमशोभिता ६ प्रात्रोत्सुयोरागमनेयथेंद्रमहेतथा मुदिता
स्तत्रगायंतिराजमार्गेषुगायकाः ७ स्तुवाशीर्बहुलागाथायादवानांप्रियंकराः गोविंदरामौसंप्राप्तौभ्रातरौलोकविश्रुतौ ८ स्वेपुरेनिर्भ
याःसर्वेक्रीडध्वंयादवाःसुखम् नतत्रकश्चिद्दीनोवामलिनोवाविचेतनः मथुरायामभूत्कश्चित्तरामकृष्णसमागमे ९ वयांसिसाधुवा
क्यानिप्रहृष्टागोहयद्विपाः नरनारीगणाश्चैवभेजिरेमानसंसुखम् १० शिवाश्चप्रववुर्वाताविरजस्कादिशोदश दैवतान्यपिसर्वाणिहृष्टा
न्यायतनेष्वथ ११

णिटीकायांचतुश्चत्वारिंशोऽध्यायः ४४ तौतुइति १ २ ३ श्रेण्यःनानाजातीयाअप्येकशिल्पोपजीविनः ४ ५ ६ ७ ८ ९ १० देवतानिप्रतिमाः ११ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लिंगानिलक्षणानि १२ १३ १४ १५ १६ १७ इतिहरिवंशेविष्णुपर्वणिटीकायांपंचचत्वारिंशोऽध्यायः ४५ कस्येति १ २ ३ ४ ५ ६ निर्वृताःस्मसुखि

यानिलिंगानिलोकस्यवृत्तानीहकृतेयुगे तानिसर्वाण्यदृश्यंततयोरागमनेतदा १२ ततःकालेशिवेपुण्येस्यंदनेनारिमर्दनौ हरियुक्तेन
तौवीरौप्रविष्टौमथुरांपुरीम् १३ प्रविशंतपुरींरम्यांगोविंदराममेवच अनुजग्मुर्यदुगणाःशक्रदेवगणाइव १४ वसुदेवस्यभवनंपितु
स्तौयदुनंदनौ प्रविष्टौहृष्टवदनौचंद्रादित्याविवाचलम् १५ तत्रायुधानिसन्यस्यगृहेस्वेस्वैरचारिणौ मुमुदातेयदुवरौवसुदेवसुताबु-
भौ १६ एवंतावेकनिर्माणौमथुरायांशुभाननौ उग्रसेनानुगौभूत्वाकंचित्कालंसुमोदतुः १७ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णु
पर्वणिरामकृष्णयोर्मथुरायांप्रत्यागमनंनामपंचचत्वारिंशोऽध्यायः ४५ वैशंपायनउवाच कस्यचित्त्वथकालस्यस्मृत्वागोपेषुसौहृ
दम् जगामैकोव्रजंरामःकृष्णस्यानुमतेस्थितः १ सगतस्तत्ररम्याणिददर्शविपुलानिवै भुक्तपूर्वाण्यरण्यानिसरांसिसुरभीणिच २
सप्रविश्यतुवेगेनतंव्रजंकृष्णपूर्वजः वन्येनरमणीयेनवेषेणालंकृतःप्रभुः ३ सतानभाषतप्रीत्यायथापूर्वमरिंदमः गोपास्तेनैवविधि-
धिनाप्रत्यान्याययथावयः ४ तथैवप्राहतान्सर्वान्तथैवपरिहर्षयन् तथैवसहगोपीभिर्योजयन्मधुराःकथाः ५ तमूचुःस्थविरा
गोपाःप्रियमधुरभाषिणम् रामंरमयतांश्रेष्ठंप्रवासात्पुनरागतम् ६ स्वागतंतेमहाबाहोयदूनांकुलनंदन अद्यस्मनिर्वृतास्तातय
त्त्वांपश्यामहेवयम् ७ प्रीताश्चैववयंवीरयत्त्वंपुनरिहागतः विख्यातस्त्रिषुलोकेषुरामःशत्रुभयंकरः ८ ध्रुवंनीयावयंवीरत्वयायाद
वनंदन अथवाप्राणिनस्तातरमंतेजन्मभूमिषु ९ त्रिदशानांवयमान्याध्रुवमद्यामिलानन यस्मादृष्टास्त्वयातातकांक्षमाणास्तवा
गमम् १० दिष्ट्यातेनिहतामल्लाःकंसश्चापिनिपातितः उग्रसेनोभिषिक्तश्चमाहात्म्येनजनेनवै ११ समुद्रेचश्रुतोस्माभिस्तिमिनास
हविग्रहः गोमंतेचश्रुतोस्माभिःक्षत्रियैःसहविग्रहः १२ दरदस्यवधश्चैवजरासंधस्यचयामतिः तच्चायुधावतरणंश्रुतंनःपरमाहवे १३
वधश्चैवशृगालस्यकरवीरपुरोत्तमे तत्सुतस्याभिषेकश्चनागराणांचसांत्वनम् १४ मथुरायांप्रवेशश्चकीर्तनीयःसुरोत्तमैः प्रतिष्ठि
ताचवसुधापार्थिवाश्चवशीकृताः १५ तवचागमनंदृष्ट्वासंभाग्याःस्मयथापुरा तेनस्मपरितुष्टावैहर्षितश्चसबांधवाः १६ प्रत्युवा-
चततोरामःसर्वास्तानभितःस्थितान् यादवेष्वपिसर्वेषुभवंतोममबांधवाः १७ इहावयोगतंबाल्यमिहचैवावयोरतम् भवद्भिर्वर्द्धि
ताश्चैववयास्यामोविक्रियांकथम् १८ गृहेषुभवतांभक्तागावश्चपरिरक्षिताः अस्माकंबांधवाःसर्वेभवंतोबद्धसौहृदाः १९

नःस्म ७ ८ ९ १० ११ तिमिनातिमितुल्येनपंचजनेन १२ १३ १४ १५ १६ १७ रतंक्रीडनम् १८ १९ छ॰ छ॰ छ॰

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२० २१ २२ २३ २४ आवृत्तमौलिनावक्रीभूतकिरीटेन २५ २६ २७ २८ २९ स्नातुंस्नानपूर्वकंत्वांपरिणेतुंइच्छेइच्छामिरूपिणीमूर्तिम-
तीभूत्वेतिशेषः ३० मत्तोक्तांमत्तेनोक्तामितिहेतुनातांभारतींपरिभूयनाभ्यवर्तत ३१ कर्षणायअधोमुखंकर्षणाधोमुखं ३२ तस्यांहलाकृष्टायांयाःस्रजःपे

शुश्रुवस्त्वेवंयथात्त्वंगोपमध्येहलायुधे संहृष्टवदनाभूयोबभूवुर्व्रजयोषितः २०
ततोवनांतरगतोरेमेरामोमहाबलः एतस्मिन्नं
तरेप्राप्तेरामायविदितात्मने २१
गोपालैर्देशकालज्ञैरुपानीयतवारुणी सोपिबत्पांडुराभ्राभस्तत्कालज्ञातिभिर्वृतः २२
वनांतर
गतोरामःपानमदसमीरणम् उपनिन्युस्ततस्तस्मैवन्यानिविविधानिच २३
प्रत्यग्ररमणीयानिपुष्पाणिचफलानिच सेव्यांश्चविवि
धान्गंधान्भक्ष्यांश्चहृदयंगमान् २४
सद्योहृतानिपद्मानिविकचत्युत्पलानिच शिरसाचारुकेशेनकिंचिदावृतमौलिना श्रवणैका
वलंबेनकुंडलेनविराजता २५
चंदनार्द्रेणपीतेनवनमालावलंबिना विबभावुरसारामःकैलासेनेवमंदरः २६
नीलेवसानोवसनेप्रत्य
ग्रजलदप्रभे रराजवपुषाशुभ्रस्तिमिरौघेयथाशशी २७
लांगलेनावसिक्तेनभुजगाभोगवर्तिना तथाभुजाग्रश्लिष्टेनमुशलेनचभास्व
ता २८
समत्तोबलिनाश्रेष्ठोरराजाघूर्णिताननः शुशुभेशिशिरापाये यथारवेदालसःशशी २९
रामस्तुयमुनामाहस्नातुमिच्छेमहान
दि एहिमामभिगच्छत्वंरूपिणीसागरंगमे ३०
संकर्षणस्यमत्तोक्तांभारतीपरिभूयसा नाभ्यवर्ततदेशंस्त्रीस्वभावेनमोहिता ३१
तत
श्चुक्रोधबलवान्रामोमदसमीरितः चकारसहलंहस्तेकर्षणाधोमुखंबली ३२
तस्यामुपरिमेदिन्यापेतुस्तामरसस्रजः मुमुचुःपुष्पको
शैश्चवासरेणवरुणंजलम् ३३
सहलेननताग्रेणकूलेगृह्यमहानदीम् चकर्षयमुनांरामोव्युत्थितांवनितामिव ३४
साविह्वलजलस्रोता
ह्रदप्रस्थितसंचया व्यावर्ततनदीभीताहलमार्गानुसारिणी ३५
लांगलादिष्टवर्त्मासावेगगाचक्रगामिनी संकर्षणभयत्रस्तायोषेवाकु
लतांगता ३६
पुलिनश्रोणिबिंबोष्ठीमृदितैस्तोयताडितैः फेनमेखलसूत्रैश्चछिन्नैरंबुदगामिनी ३७
तरंगविषमापीडाचक्रवाकोन्मु
खस्तनी वेगगंभीरवक्रांगीत्रस्तमीनविभूषणा ३८
सितहंसेक्षणापांगीकासक्षौमोज्झितांबरा तीरजोत्थूतकेशांताजलस्खलितगा
मिनी ३९
लांगलोल्लिखितापांगीक्षुभितासागरंगमा मत्तेवकुटिलानारीराजमार्गेणगच्छती ४०
कृष्यतेसातिवेगेनस्रोतस्खलितगा
मिनी उन्मार्गानीतमार्गासायेनवृंदावनंवनम् ४१
वृंदावनस्यमध्येनसानीतायमुनानदी रोरूयमाणेवखगैरन्वितातोयवासिभिः ४२

तुःताः पुष्पकोशैः करणैः वासरेणवरुणंस्रग्गंधिपरागारुणंमदिरारूपंजलंमुमुचुःउद्देसुरित्यर्थः ३३ ३४ ह्रदप्रस्थितसंचयान्ह्रदात्प्रस्थिताःप्रचलिताःसंचयास
स्यादयोयस्याःसा ३५ ३६ पुलिनंश्रोणिरिवयस्याः बिंबंरक्तपद्ममंडलमेवओष्ठोयस्याः अंबुदगामिनीसागरगामिनी ३७ ३८ ३९ ४० ४१ ४२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० संदेशः आज्ञा ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० इतिहरिवंशेविष्णुपर्वणिटीका

सायदासमतिक्रांतानदीवृंदावनंवनम् तदास्त्रीरूपिणीमूलायमुनाराममब्रवीत् ४३ प्रसीदनाथभीतास्मिमातिलोमेनकर्मणा वि
परीतमिदंरूपंतोयंचममजायते ४४ असत्यहंनदीमध्येरौहिणेयत्वयाकृता सुप्रसन्नमनानित्यंभवत्सुरसत्तम ४५ कर्षणेनमहाबा
होस्वमार्गव्यभिचारिणी प्राप्तामासागरेपूर्वसपत्न्यावेगगर्विता: ४६ फेनहासैर्हसिष्यंतितोयस्त्यावृत्तगामिनीम् प्रसादंकुरुमेवीरया-
चेत्वांकृष्णपूर्वज ४७ कर्षणायुधकृष्टास्मिरोषायविनिवर्त्यताम् मूर्ध्नागच्छाम्यहंवरणौतवैषालांगलायुध ४८ मार्गमादिष्टमिच्छा
मिक्वगच्छामिमहाभुज वैशंपायनउवाच प्रणमावनतांदृष्ट्वायमुनांलांगलायुधः प्रत्युवाचार्णववधूंमदक्लांतइदंवचः ४९ लांग
लादिष्टमार्गात्वमिमंमेप्रियदर्शने देशमंबुप्रदानेनप्लावयस्वाखिलंशुभे ५० एषतेसुभ्रुसंदेशःकथितःसागरंगमे शांतिंव्रजमहाभागेग
म्यतांचयथासुखम् ५१ यावत्स्थास्यतिलोकोयंतावत्स्थास्यतिमेयशः यमुनाकर्षणंदृष्ट्वासर्वेतेव्रजवासिनः ५२ साधुसाध्वितिरामंतेप्र
णामंचक्रिरेतदा तांविसृज्यमहाभागांताश्चसर्वान्व्रजौकसः ५३ ततःसंचिंत्यमनसारामःप्रहरतांवरः पुनःप्रतिजगामाशुमथुरांरोहि
णीसुतः ५४ सगत्वामथुरांरामोभवनंमधुसूदनम् परिवर्तमानंददृशेपृथिव्यांसारमव्ययम् ५५ तथैवाध्वन्यवेषेणसोपसृत्यजना
र्दनम् प्रत्यग्रवनमालेनवक्षसाभिविराजता ५६ सदृष्ट्वातूर्णमायांतरामंलांगलधारिणम् सहसोत्थायगोविंदोददावासनमुत्तमम्
५७ उपविष्टंतदारामपप्रच्छकुशलंव्रजे बांधवेषुचसर्वेषुगोषुचैवजनार्दनः ५८ प्रत्युवाचततोरामोभ्रातरंसाधुभाषिणम् सर्वत्रकुश
लंकृष्णयेषांकुशलमिच्छसि ५९ ततस्तयोर्विचित्रार्थाःपौराण्यस्त्वाभवन्कथाः वसुदेवाग्रतःपुण्यारामकेशवयोस्तदा ६० इतिश्री
महाभारतेखिलेषुहरिवंशेविष्णुपर्वणियमुनाकर्षणंनामषट्चत्वारिंशोऽध्यायः ४६ वैशंपायनउवाच एतस्मिन्नंतरेप्राप्ता
लोकप्रावृत्तिकानराः चक्रायुधगृहंसर्वेलोकपालगृहोपमम् १ तेचात्ययिकशंसीषुलोकप्रावृत्तिकेष्विह कृतसंज्ञायदुश्रेष्ठाःसमेताः
कृष्णसंसदि २ समागतेषुसर्वेषुयदुमुख्येषुसंसदि प्रावृत्तिकानराःप्राहुःपार्थिवात्ययिकंवचः ३ जनार्दननरेंद्राणांपार्थिवानांस-
मागमः भविष्यतिक्षितीशानांसमूहानित्यनेकशः ४ त्वरितास्तत्रगच्छंतिनानाजनपदेश्वराः कुंडिनेपुंडरीकाक्षभोजपुत्रस्यशास
नात् ५ प्रकाशस्मकथास्तत्रश्रूयतेमनुजेरिताः रुक्मिणीकिलनामास्तिरुक्मिणःप्रथमास्वसा ६

यांपट्चत्वारिंशः ४६ एतस्मिन्प्रावृत्तिकाःप्रवृत्तिसू
चकाः १ आत्ययिकशंसीषुविरोधशंसिषुदैर्घ्यंछंदोनुरोधात् २ पार्थिवात्ययिकंराज्ञांविनाशकारणं ३ ४ भोजपुत्रस्यरुक्मिणःशासनात्निमंत्रणात् ५ प्रथमासुरत्या ६ ६०

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७ ८ ९ १० निरुद्धाः रुक्मिणीलिप्सयेतिशेषः तत्रवयंकिंभिक्षुवदेकांतचराः येननिरुत्साहाभविष्याम अपितु अतिप्रसिद्धास्तेनसोत्साहाएवतत्रगच्छा
मइतिसार्द्धश्लोकोवाक्यम् ११ १२ १३ १४ १५ १६ विकृतिप्रज्ञाः कपटबुद्धयः शास्त्रनिश्चितदर्शनाः राजनीतिविदः जघन्येममपृष्ठतः भूत्वेइत्यर्थः १७ अस्मा

भावीस्वयंवरस्तत्रतस्याःकिलजनार्दन इत्यर्थमेतेसबलागच्छंतिमनुजाधिपाः ७ तस्यास्त्रैलोक्यसुंदर्याःस्मृतोयेहनियादव रुक्मभूषण
भूषिण्याभविष्यतिस्वयंवरः ८ राज्ञातत्रसमेतानांहस्त्यश्वरथगामिनाम् द्रक्ष्यामःशतशस्तत्रशिबिराणिमहात्मनाम् ९ सिंहशार्दूलदृ
प्तानांमत्तद्विरदगामिनाम् सदायुद्धप्रियाणांहिपरस्परममर्षिणाम् १० जयायशीघ्रसहिताबलौघेनसमन्विताः निरुद्धाःपृथिवीपालाः
किमेकांतचरावयम् ११ निरुत्साहाभविष्यामोगच्छामोयदुनंदनम् श्रुत्वैतत्केशवोवाक्यंहृदिशल्यमिवार्पितम् १२ निर्जगामयदुश्रेष्ठो
यदूनांसहितोबलैः यादवास्तेबलोदग्राःसर्वेसंग्रामलालसाः १३ निर्ययुःस्यंदनवरैर्गर्वितास्त्रिदशाइव बलाग्रेणनियुक्तेनहरिरीशानसम
तः चक्रोद्यतकरःकृष्णोगदापाणिर्व्यरोचत १४ यादवाश्चापरेतत्रवासुदेवानुयायिनः रथैरादित्यसंकाशैःकिंकिणीप्रतिनादितैः १५ उग्र
सेनंतुगोविंदःप्राहनिश्चितदर्शनः तिष्ठत्वंनृपशार्दूलभ्रातृभिःसहितोनघ १६ क्षत्रियाविकृतिप्रज्ञाःशास्त्रनिश्चितदर्शनाः पुरीभूत्वाप्रि
मावीरजघन्येनाभिपालयन् १७ अस्माकंशंकिताःसर्वेजरासंधवशानुगाः मोदंतेसुखिनस्तत्रदेवलोकेयथामराः १८ वैशंपायनउवा
च तस्यतद्वचनंश्रुत्वाभोजराजोमहायशाः कृष्णस्नेहेनविक्लवबभाषेवचनामृतम् १९ कृष्णकृष्णमहाबाहोयदूनांनंदिवर्द्धन श्रूय
तांयदहंत्वद्यवक्ष्यामिरिपुसूदन २० त्वयाविहीनाःसर्वेस्मनशक्ताःसुखमासितुम् पुरेस्मिन्विप्रयातेवापतिहीनाइवस्त्रियः २१ त्व
त्सनाथावयंतातत्वद्बाहुबलमाश्रिताः बिभीमोननरेंद्राणांसेंद्राणामपिमानद २२ विजयाययदुश्रेष्ठयत्रयत्रगमिष्यसि तत्रत्वंसहितो
स्माभिर्गच्छेथायादवर्षभ २३ तस्यराज्ञोवचःश्रुत्वासस्मितंदेवकीसुतः यथेष्टंभवतामद्यतथाकर्तास्म्यसंशयम् २४ वैशंपाय
नउवाच एवमुक्त्वातुवैकृष्णोजगामासुरथेनवै भीष्मकस्यगृहंप्रातोलोहितायतिभास्करे २५ प्रासेराजसमाजेतुशिबिराकीर्ण
भूतले रंगंसुविपुलंदृष्ट्वाराजसीतनुमाविशत् २६ विन्यासनार्थंभूपानांप्रकाशार्थंपुरातनम् मनसाचिंतयामासवैनतेयंमहाबल
म् २७ ततश्चिंतितमात्रस्तुविदित्वाविनतात्मजः खगवल्लक्ष्यवपुःकृत्वानिलिल्येकेशवांतिके २८ तस्यपक्षनिपातेनपवनोद्धात
कारिणा कंपितामनुजाःसर्वेत्वधोमुखपतिताभुवि २९

कंअस्मत्कः १८ १९ २० २१ २२ २३ २४ २५ राजसींतनुंकामक्रोधप्रधानांप्रकृतिं २६ पुरातनं
शक्तसिद्धं २७ खगवलक्ष्यंसौम्यं २८ सौम्येनलाघवेनापिपक्षकृतंतदाहतस्येतिमनुजाः अधोमुखास्तथाचेदंतयोरगानोत्पातंशङ्कुरंतीत्यर्थः २९ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३० मेनेमनसापूजितवान् ३१ ३२ ३३ ३४ सचिवंबुद्धिसहायंसांपरायिकंआपदिहितं ३५ ३६ ३७ ३८ ३९ ४० कैशिकस्यभीष्मकपितुः

गरुडाभिहताःसर्वेप्रचेष्टंतोयथोरगाः तान्संनिपतितान्दृष्ट्वाकृष्णोगिरिरिवाचलः ३० सराजापक्षपातेनमेनेपतगसत्तमम्
ददर्शगरुडंप्राप्तंदिव्यस्रगनुलेपनम् ३१ पक्षेणतेनपृथिवींचालयंतमुहुर्मुहुः पृष्ठासक्तैःप्रहरणैर्लेलिह्यंतमिवोरगैः ३२ वेष्ण्यावं
हस्तसंश्लेषमान्यमानमवाङ्मुखम् चरणाभ्यामकर्षंतपांडुरंभोगिनांवरम् ३३ हेमपत्रैरुपचितंधातुमंतमिवाचलम् अमृताहरंभहर्ता
रंह्विजिव्हेंद्रविनाशनम् ३४ आसनंदैत्यसंघानांवाहनंध्वजलक्षणम् तंदृष्ट्वासध्वजंप्राप्तंसचिवंसांपरायिकम् ३५ धृतिमंतंगरुत्मंतंजगाद
मधुसूदनः दृष्ट्वापरमसंहृष्टःस्थितंदेवमिवापरम् ३६ तुल्यसमर्थयावाचागरुत्मंतमिवस्थितम् श्रीकृष्णउवाच स्वागतंखेचरश्रे
ष्ठसुरसेनारिमर्दन ३७ विनताहृदयानंदस्वागतंकेशवप्रिय ध्वजपत्ररथश्रेष्ठकैशिकस्यनिवेशनम् ३८ वयंतत्रैवगत्वाद्यप्रतीक्षामःस्व
यंवरम् राज्ञांतत्रसमेतानांहस्त्यश्वरथगामिनाम् ३९ द्रक्ष्यामशतशस्तत्रसमेतानांमहात्मनाम् ४० एवमुक्त्वामहाबाहुर्वैनतेयंमहा
बलम् जगामाथपुरींकृष्णःकैशिकस्यमहात्मनः ४१ वैनतेयसखःश्रीमान्यादवैश्चमहारथैः विदर्भनगरींप्राप्तेकृष्णेदेवकिनंदने
४२ हृष्टाःप्रमुदिताःसर्वेनिवासायोपचक्रमुः सर्वेशस्त्रायुधधराराजानोबलशालिनः ४३ वैशंपायनउवाच एतस्मिन्नेवका
लेतुराजानयविशारदः कैशिकस्ततउत्थायप्रहृष्टेनांतरात्मना ४४ अर्घ्यमाचमनंदत्वासराजाकैशिकःस्वयम् सत्कृत्यविधिवत्कृष्णं
स्वपुरंसंप्रवेशयत् ४५ पूर्वमेवतुकृष्णायकारितंदिव्यमंदिरम् विवेशसबलःश्रीमान्कैलासंशंकरोयथा खाद्यपानादिरत्नौघैरर्चि-
तोवासवानुजः ४६ सुखेनउषितःकृष्णस्तस्यराज्ञोनिवेशने पूजितोबहुमानेनस्नेहपूर्णेनचेतसा ४७ इतिश्रीमहाभारतेखिलेषुह-
रिवंशेविष्णुपर्वणिरुक्मिणिस्वयंवरेसप्तचत्वारिंशोऽध्यायः ४७ वैशंपायनउवाच तेकृष्णमागतंदृष्ट्वावैनतेयसहाच्युतम् ब-
भूवुर्ध्यितयाविष्टाःसर्वेनृपतिसत्तमाः १ तेसमेत्यसभांराजन्राजानोभीमविक्रमाः मंत्रायमंत्रकुशलानीतिशास्त्रार्थवित्तमाः २ भीष्म
कस्यसभागत्वारम्याहेमपरिष्कृताम् सिंहासनेषुचित्रेषुविचित्रास्तरणेषुच ३ निषेदुस्तेनृपवरादेवादेवसभामिव तेषांमध्येमहाबाहु
र्जरासंधोमहाबलः ४ बभाषेसमहातेजादेवान्देवेश्वरोयथा जरासंधउवाच श्रूयतांभोनृपश्रेष्ठाभीष्मकश्चमहामतिः कथ्यमा
नमयाबुद्ध्यावचनंवदतांवराः ५ योसौकृष्णइतिख्यातोवसुदेवसुतोबली वैनतेयसहायेनसंप्राप्तःकुंडिनंत्विह ६

४१ ४२ ४३ ४४ ४५ ४६ ४७ इतिहरिवंशेविष्णुपर्वणिटीकायांसप्तचत्वारिंशोऽध्यायः ४७ तेकृष्णमिति वैनतेयेत्यत्रतृतीयालोपआर्षः १ २ ३ ४ ५ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७ ऋद्धितंऋद्धिः संजायतेयेनतत् ८ ९ १० ११ यदेत्यारभ्यसुरैः सहेत्यंतोयंश्लोकः सर्वपुस्तकेषुनदृश्यते १२ १३ १४ १५ १६ १७ १८ १९

कन्याहेतोर्महातेजायादवैरभिसंवृतः अवश्यंकुरुतेयत्नंकन्यावाप्तिर्यथाभवेत् ७ यदत्रकारणंकार्यंस्तनयोपेतमृद्धितम् कुरुध्वंनृपशा
र्दूलाविनिश्चित्यबलाबलम् ८ यदाचतौमहावीर्यौवसुदेवसुतावुभौ वैनतेयविनातस्मिन्गोमंतेपर्वतोत्तमे ९ यत्कृतंसुमहद्वीरं भव
द्भिर्विदितंहितत् वृष्णिभिर्यादवैश्चैवभोजांधकमहारथैः १० समेत्ययुत्स्यमानस्यकीदृशोविग्रहोभवेत् कन्यार्थेयततानेनगरुडस्थेन
विष्णुना ११ कःस्थास्यतिरणेतस्मिन्अपिशक्रःसुरैःसह यदाचास्मिन्नपिकृताकदाचित्संप्रदीयते १२ ततोह्ययंबलाद्देनानेतुशक्तःसु
रैःसह पुराएकार्णवेघोरेश्रूयतेमेदिनीत्वियम् १३ पातालतलसमग्नाविष्णुनाप्रभविष्णुना वाराहरूपमास्थायउत्स्तृताजगदादिना १४
हिरण्याक्षश्चदैत्येंद्रोवराहेणनिपातितः १५ हिरण्यकशिपुश्चैवमहाबलपराक्रमः अवध्योमरदैत्यानामृषिगंधर्वकिन्नरैः १६ यक्षराक्ष
सनागानानाकाशेनावनिस्थले नचाभ्यंतरराज्यन्होर्नसुष्केणार्द्रकेणच १७ अवध्यस्त्रिषुलोकेषुदैत्येंद्रस्त्वपराजितः नारसिंहेणरूपेण
निहतोविष्णुनापुरा १८ वामनेनतुरूपेणकश्यपस्यात्मजोबली अदित्यागर्भसंभूतोबलिंबद्ध्वासुरोत्तमम् १९ सत्यरज्जुमयैःपाशैःकृतः
पातालसंश्रयः कार्तवीर्योमहावीर्यःसहस्रभुजविग्रहः २० दत्तात्रेयप्रसादेनसत्तोराज्यमदेनच जामदग्न्योमहातेजारेणुकागर्भसंभवः
२१ त्रेताद्वापरयोःसंधौरामःशस्त्रभृतांवरः पर्शुनावज्रकल्पेनसप्तद्वीपेश्वरोनृपः २२ विष्णुनानिहतोभूयश्छद्मरूपेणहैहयः २२ इक्ष्वा
कुकुलसंभूतोरामोदाशरथिःपुरा त्रिलोकविजयंवीरंरावणंसन्न्यपातयत् २३ पुराकृतयुगेविष्णुःसंग्रामेतारकामये षोडशार्द्धभुजोभूत्वा
गरुडस्थोहिवीर्यवान् २४ निजघानासुरान्युद्धेवरदानेनगर्वितान् कालनेमिश्चदैतेयोदेवानांचभयप्रदः २५ सहस्रकिरणाभेनचक्रे
णनिहतोयुधि महायोगबलेनाजोविश्वरूपेणविष्णुना २६ अनेनप्राप्तकालास्तेनिहताबहवोसुराः वनेवनचरादैत्यामहाबलपराक्रमाः
२७ निहताबालभावेनप्रलंबारिष्टधेनुकाः शकुनीकेशिनौचैवयमलार्जुनकावपि २८ नागंकुवलयापीडंचाणूरमुष्टिकंतथा कंसंच
बलिनांश्रेष्ठसगणंदेवकीसुतः २९ निहनन्गोपवेषेणक्रीडमानोहिकेशवः एवमादीनिदिव्यानिछद्मरूपाणिचक्रिणा ३० कृतानितत्र
तत्रैवमाययाप्रभविष्णुना तेनाहंवःप्रवक्ष्यामिभवताहितकाम्यया ३१ तमनन्यंकेशवंविष्णुंसुराद्यमसुरांतकम् नारायणंजगद्योनिंपुराणं
पुरुषंध्रुवम् ३२ स्रष्टारंसर्वभूतानांव्यक्ताव्यक्तसनातनम् अदृश्यंसर्वलोकानांसर्वलोकनमस्कृतम् ३३

योदित्यागर्भसंभूतोतेनैवविष्णुनाब
लिर्बद्ध्वापातालसंश्रयः कृतइतिपूर्वेणसंबंधः २० २१ पर्शुनापरशुना २२ २३ २४ २५ २६ २७ शकुनीपूतनां २८ २९ दिव्यानिकर्माणीतिशेषः ३० ३१ ३२ ३३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्षरं दृश्यरूपं अक्षरं कूटस्थम् ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ एष्यते काम्यते महापुरुषविग्रहं

अनादिमध्यनिधनं क्षरमक्षरशाश्वतम् स्वयंभुवमजंस्थाणुमजेयंसचराचरैः ३४ त्रिविक्रमंत्रिलोकेशंत्रिदशोद्धारिनाशनम् इतिमे
निश्चिताबुद्धिर्जातोयमथुरामधि ३५ कुलेमहतिवैराज्ञाविपुलेचक्रवर्तिनाम् कथमन्यस्यमर्त्यस्यगरुडोवाहनंभवेत् ३६ विशेषेणतु
कन्यार्थेविक्रमस्यजनार्दने कःस्थास्यतिपुमानद्यगरुडस्याग्रतोबली ३७ स्वयंवरकृतेनासौविष्णुःस्वयमिहागतः विष्णोरागमनेचैवसद्य
न्दोषःप्रकीर्तितः ३८ भवद्भिरस्तुचिंत्येदंक्रियतांयदनंतरम् वैशंपायनउवाच एवंविब्रुवमाणंतमगधानांजनेश्वरम् ३९ सुनीथो
थमहाप्राज्ञोवचनंचेदमब्रवीत् सुनीथउवाच सम्यगाहमहाबाहुर्मगधाधिपतिर्नृपः ४० समक्षंनरदेवानांयथावृत्तंमहाहवे गो
मंतेरामकृष्णाभ्यांकृतंकर्मसुदुष्करम् ४१ गजाश्वरथसंबाधापत्तिध्वजसमाकुला निदग्धामहतीसेनाचक्रलांगलवह्निना ४२ तेनायंमा
गधःश्रीमाननागतमचिंतयत् श्रुतेराजसेनायामनुस्मृत्यसुदारुणम् ४३ यदास्यांयुध्यतोस्तत्रबलकेशवयोर्युधि दुर्निवार्यतरोघोरो-
ऽप्यभवद्वाहिनीक्षयः ४४ विदितंवःसुपर्णस्यरूपागतस्यनृपोत्तमाः पक्षवेगानिलोत्पृताबभ्रुसुर्गगनेचराः ४५ समुद्राःक्षुभिताःसर्वे
चचालाद्रिर्महीसुहुः वयंसर्वेकृसंत्रस्ताःकिमुतान्येतिविक्लवाः ४६ यदासन्नस्ययुयुधेआरूढःकेशवःखगम् कथमस्माद्विधःशक्तः
प्रतिस्थातुंरणाजिरे ४७ राज्ञांस्वयंवरोनामसुमहान्हर्षवर्द्धनः कृतोनरवरैराद्यैर्यशोधर्मस्यवैविधिः ४८ इदंतुकुंडिनगरमासाद्य
मनुजेश्वराः पुनरेवैष्यतेक्षिप्रंमहापुरुषविग्रहम् ४९ यदिसावरयेदन्यराज्ञांमध्येनृपात्मजा कृष्णस्यभुजयोर्वीर्यंकःपुमान्प्रस-
हिष्यति ५० विज्ञापितमिदंदोषंस्वयंवरमहोत्सवम् तदर्थमागतःकृष्णोवयंचैवनराधिपाः ५१ कृष्णस्यागमनंचैवनृपाणांसातिग
हितम् कन्याहेतोर्नरेंद्राणांयथावदतिमागधः ५२ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिरुक्मिणीस्वयंवरेसुनीथवा
क्येअष्टचत्वारिंशोऽध्यायः ४८ वैशंपायनउवाच इत्येवमुक्तेवचनेसुनीथेनमहात्मना करूषाधिपतिर्वीरोदंतवक्त्रोऽभ्यभाषत
१ दंतवक्त्रउवाच यदुक्तंमागधेनात्रसुनीथेननराधिपाः युक्तपूर्वमहंमन्येयदस्माकंवचोहितम् २ नचविद्वेषणेनाहंनचाहंकार
वादिना नचात्मविजिगीषुत्वात्दूषयामिवचोमृतम् ३ वाक्यार्णवंमहागाधंनीतिशास्त्रार्थबृंहितम् कएषनिखिलंवक्तुंशक्तोवैराजसं
सदि ४ किंत्वनुस्मरणार्थेहंयद्ब्रवीमिश्रृणुध्वमे आगतोवासुदेवेतिकिमाश्चर्यंनराधिपाः ५

सुन्दम् ४९ ५० ५१ ५२ इतिहरिवंशेविष्णुपर्वणिटीकायांअष्टचत्वारिंशोऽध्यायः ४८ इत्येवमिति १ २ ३ ४ वासुदेवेतिसंधिरार्षः ५ ६ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गोप्यः गुणः ६ ७ ८ नागेनकुवलयापीडेनउद्दीपितौकोपितौ विवेशतुः रंगमितिशेषः ९ गतासुरिवेत्यसावधानत्वमस्योक्तम् १० येनकंसंनिघ्नतावयोधिकैरस्माभिः सहवैरंकृतंतस्यउपरोधपरायादिवयंतदाकिमत्रदोषोविहितः नकोपोस्त्यर्थः ११ १२ १३ रथ्यादिबलेनउपेतैरस्माभिः सहतेनविग्रहोयुद्धंनकृतं अथोपरोधश्चकृतस्तत्रदंडोदहनमेवयुक्तमित्याशयः १४ नचाप्ययमधर्मइत्याह दावाग्नीति तपस्विनोदावाग्निमरणंश्रेयइतिएतौचदुर्विनीततपस्विनौ अतएतयोर्मुख्यो-

यथागतावयंसर्वेकृष्णोपीहतथागतः किमत्रदोषोगोप्योवाकन्याहेतोःसमागताः ६ यदस्माभिःसमेत्यैवव्यात्कृतंगोसंतरोधनम् तत्रसुहृत्कृतंदोषकथंवैवक्तुमर्हथ ७ वनवासेस्थितौवीरौकंसव्यामोहहेतुना देवर्षिवचनाद्राजन्वृंदावनतटेस्थितौ ८ तावाहूयवधार्थेनउभौरामजनार्दनौ नागेनोद्दीपितौवीरौहत्वानागंविवेशतुः ९ ततःस्ववीर्यमाश्रित्यनिहतोरंगसागरे गतासुरिवचासीनोमथुरेशःसहानुगः १० किमत्रविहितोदोषोयेनास्माभिर्वयोधिकैः उपरोधपराराजन्वयंसर्वेसमागताः ११ सेनानिबलमालोक्यविस्तीर्णांरामकेशवौ पुरवलंससुत्सृज्यगोमंतंचगतावुभौ १२ तत्रापिगतमस्माभिर्हंतुंसमरयोधिभिः अमात्ययौवनाभ्यांचपदातिभ्यांरणाजिरे १३ रथाश्वनरनागैर्नास्माभिर्विग्रहःकृतः कृत्वोपरोधंशैलस्यक्षत्रधर्मेणदीपितः १४ दावाग्निमुखमाविश्यदुर्विनीततपस्विनौ विनीतइतिमन्यामःसर्वेक्षत्रियपुंगवाः १५ प्रतियुद्धेकृतेत्वेवंदूषयामजनार्दनम् यत्रयत्रप्रयास्यामोवयंतत्रभवेत्कलिः १६ प्रीत्यर्थंप्रयतिष्यामोकृष्णेनसहभूमिपाः इदंकुंडिपुरंकृष्णोनागतःकलिहेतुना कन्यानिमित्तागमनेकस्यसुहृत्प्रयच्छति १७ मर्त्येस्मिन्पुरुषेंद्रोसौनकश्चित्प्राकृतोनरः देवलोकेषुदेवेषुप्रवरःपुरुषोत्तमः १८ देवानामपिकर्तासौलोकानांचविशेषतः नचैवबालिशाबुद्धिर्नचेर्ष्यानापिमत्सरः १९ नस्तब्धोनकृशोनार्तःप्रणतार्तिहरःसदा एषविष्णुःप्रभुर्देवोदेवानामपिदैवतम् २० आगतोगरुडेनेहछद्मप्राकाश्यहेतुना नानास्त्रसहितोयातिकृष्णःशत्रुविनाशने २१ इमांयात्रांविजानीध्वंप्रीत्यर्थंह्यागतोहरिः सहितोयादवेंद्रैश्चभोजवृष्ण्यंधकैरिह २२ अर्घ्यमाचमनंदत्वाआतिथ्यंचनराधिपाः करिष्यामवयंसर्वेकेशवायमहात्मने २३ एवंसंधानतःकृत्वाकृष्णेनसहितावयम् वसामोविगतोद्वेगानिर्भयाविगतज्वराः २४ तस्यतद्वचनंश्रुत्वादंतवक्त्रस्यधीमतः शाल्वःप्रवदतांश्रेष्ठस्तानुवाचनराधिपान् २५

दुर्विनीततरः सएतेनमरणेनविनीतःसुशिक्षितःस्यादितिमन्यामेति

योजना अथयुद्धकरणंश्रेयोविमुखस्यदूषणमितितृतीयार्द्धार्थः सार्द्धश्लोकवाक्यं १५ एवंस्वस्थानपराधित्वमुक्त्वासंप्रतिविरोधेहेत्वंतरमाह यत्रयत्रेत्यादिना १६ १७ पूर्ववैरंस्मृत्वासुहृद्दास्यतीत्यपिनेत्याशयेनाहमर्त्यइतिमर्त्येमनुष्यलोके १८ ईर्ष्या अक्षमामत्सरःपरोत्कर्षासहनम् १९ २० छद्मप्राकाश्यहेतुनास्वयंवरागमनव्याजेनस्वरूपप्रकाशनीयमितिहेतोः २१ यादवेंद्राणांमुख्यैर्भोजादिभिः २२ २३ संधानतःसाम्नाविगतउद्वेगोयेषांतेविगतोद्वेगाः २४ २५ ६. ६.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किमितिअस्य अस्मात्नोस्माकंभयेसतिकिंन्यस्तशस्त्राः नभवामहे अपितु भवामहे एवभीतेन शस्त्रत्यागपूर्वकंसंधानमवश्यंकर्तव्यंनतुवयंभीताःस्मइत्यर्थः २६ २७ २८ २९ ३० ३१ ३२ यमसादनंमृत्योर्मृत्युंविष्णुमित्यर्थः ३३ ३४ ३५ ३६ चेष्टानिकर्माणि ३७ यस्यवंतस्यतनम् ३८ ३९ ४० कस्यचित्क

शाल्वउवाच किंभयेनास्यनःसर्वेन्यस्तशस्त्राभवामहे संधानकरणाद्धेतोः कृष्णास्यभयशंकिताः २६ परस्तवेनकिंकार्यंविनिंद्यबल मात्मनः नैषधर्मोनरेंद्राणांक्षात्रेधर्मेचतिष्ठतां २७ महत्सुराजवंशेषुसंभूताःकुलवर्द्धनाः तेषांकापुरुषाबुद्धिःकथंभवितुमर्हति २८ अहंजानामिवैकृष्णमादिदेवसनातनम् प्रभुंसर्वामरेंद्राणांनारायणपरायणम् २९ वैकुंठमजयंलोकेचराचरगुरुंहरिम् संभूतंदेवकी गर्भेविष्णुलोकनमस्कृतम् ३० कंसराजवधार्थायभारावतरणायच अस्माकंचविनाशायलोकसंरक्षणायच ३१ अंशावतरणंकृत्स्नं जानेविष्णोर्विचेष्टितम् संग्राममतुलंकृत्वाविष्णुनासहभूमिपाः ३२ चक्रानलविनिर्दग्धायास्यामोयमसादनम् तत्त्वंजानामिराजेंद्राः कालेनायुःक्षयोभवेत् ३३ नाकालेम्रियतेकश्चित्प्राप्तकालेनजीवति एवंविनिश्चयंकृत्वानकुर्यात्कस्यचिद्भयम् ३४ सएवभगवान् विष्णुरालोक्यतपसःक्षयम् निहतादितिजेंद्राणांयथाकालेनयोगवित् ३५ बलिर्वैरोचनिश्चैवबद्धोवध्यमहाबलम् कृतवान्देवदेवे शःपातालतलवासिनम् ३६ एवमादीनिविष्णोश्चेष्टानिचनराधिपाः तस्माद्युक्तंभवताविग्रहार्थविचारणम् ३७ नचसंग्रामहेतोर्हि कृष्णस्यागमनंत्विह यस्यवाकस्यवाकन्यावरयिष्यतितस्यसा ३८ किमत्रविग्रहोराज्ञांप्रीतिर्भवतिवैध्रुवम् वैशंपायनउवाच ए वंकथयमानानांनृपाणांबुद्धिशालिनाम् ३९ नकिंचिदब्रवीद्राजाभीष्मकःपुत्रकारणात् महावीर्यमदोत्सिक्तंभार्गवास्त्राभिरक्षितम् रणप्रचंडातिरथंविचिंत्यमनसासुतम् ४० भीष्मउवाच कृष्णनसहतेनित्यंपुत्रोमेबलदर्पितः नित्याभिमानीचरणेनबिभेति चकस्यचित् ४१ कृष्णस्यभुजवीर्येणह्रियतेनात्रसंशयः भविष्यतितत्तोयुद्धंमहापुरुषविग्रहम् ४२ द्वेषीचैवाभिमानीचकुतोजीव- तिमेसुतः जीवितंनात्रपश्यामिममपुत्रस्यकेशवात् ४३ कन्याहेतोःसुतंज्येष्ठंपितृणांनंदिवर्द्धनम् कारयिष्येकथंयुद्धंपुत्रेणसहकेशव ४४ सचनारायणोदेवोवरइष्टस्तुरुक्मवान् मूढभावोमदोन्मत्तःसंग्रामेष्वनिवर्तकः ४५ नियतंभस्मसाद्यातितूलराशिर्यथानलात् क रुधीरेश्वरःशूरःशृगालश्चित्रयोधिना ४६ क्षणेनभस्मसान्नीतःकेशवेनबलीयसा ४६ वृंदावनेवसन्श्रीमान्केशवोबालिनांवरः उत्प्ट त्यैकेनहस्तेनसप्ताहंधृतवान्गिरिम् ४७ दुष्करंकर्मसंस्मृत्यमनःसीदतिमेभृशम् नगेंद्रैसहसागम्यदैवतैःसहवृत्रहा ४८

स्याचित् ४१ ह्रियतेकन्येतिशेषः यद्वाऽयमेवह्रियतेकालेनेतिशेषः ४२ ४३ ज्येष्ठंसुतंकेशवेनसहकेशवंचपुत्रेणसहकथंयुद्धंकारयिष्येइतियोज्यम् ४४ रुक्मवान्रुक्मी ४५ ४६ ४७ ४८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ महावीर्यंश्रीकृष्णम् ५७ ५८ नरेंद्रोभीष्मकः ५९ ६० ६१ ६२ सेनान्नृपमंडली ६३

अभिषिच्याब्रवीत्कृष्णमुपेंद्रेतिशचीपतिः यथावेदमितोनागः कालियोयमुनाह्रदे ४९ विषाग्निज्वलितोघोरः कालांतकसमप्रभः
केशीचापिमहावीर्योदानवोहयविग्रहः ५० निहतोवासुदेवेनदेवैरपिदुरासदः सांदीपनिसुतश्चैवचिरनष्टोहिसागरे ५१ दैत्यंपंचजनंह
त्वाआनीतोयमसादनात् गोमंतेसमहद्युद्धंबहुभिर्वेष्टितावुभौ ५२ कृत्वाविश्वासजननंनागाश्वरथसंक्षयम् गजेनगजवृंदानिरथेनरथ
योधिनः ५३ सादिनश्चाश्वयोधेननरेणचपदातिनः जघ्नतुस्तौमहावीर्यौवसुदेवसुतावुभौ ५४ नदेवासुरगंधर्वानयक्षोरगराक्षसाः न
नागानचदैत्येंद्रानपिशाचानगुह्यकाः ५४ कृतवंतस्तथाघोरंगजाश्वरथसंक्षयम् नमनुस्मृत्यसंग्रामंमृशंसीदतिमेमनः ५५ नमयाश्रुतपू
र्वोवादृष्टपूर्वःकुतोपिवा तादृशोश्रुविमर्त्योन्योवासुदेवात्सुरोत्तमात् ५६ सम्यगाहमहाबाहुर्दंतवक्त्रोमहीपतिः सांत्वयित्वामहावीर्यंसंवि
धास्यामयत्क्षमम् ५७ वैशंपायनउवाच इतिसंचिंत्यमनसाबलाबलविनिश्चयम् गमनायमतिंचक्रेप्रसादयितुमच्युतम् ५८
चिंतयानोनरेंद्रस्तुबहुभिर्नयशालिभिः सूतमागधवंदिभ्योबोधितस्तुतिमंगलैः ५९ प्रभातायांरजन्यांतुकृतपूर्वाह्णिकक्रियाः उपविश्य
नृपाःसर्वेस्तेषुविश्रामवेश्मसु ६० येविसृष्टास्तुराजानोविदर्भायानराधिपैः तैरागम्यस्वभूपेषुरहोगत्वानिवेदितम् ६१ श्रुत्वाकृष्णाभिषे
कंतुकेचिद्धृष्टानराधिपाः केचिद्दीनतराभीताउदासीनास्तथापरे ६२ त्रिधाप्रभिन्नासासेनानरनागाश्वमालिनी महार्णवइवक्षुब्धाअ
भिषेकेणचालिता ६३ नृपाणांभेदमालोक्यभीष्मकोराजसत्तमः व्यतिक्रममचिंत्यंचकृतंनृपतिनास्वयम् ६४ विचिंत्यमनसाराजन्नुद
य्यमानेनचेतसा जगाममनरदेवानांसमाजेप्रतिबोधितुम् ६५ एतस्मिन्नंतरेदूताःसंप्राप्ताःक्रथकैशिकौ लेखवसुहृत्याशिरसावाविसुक्तेनृ
पार्णवम् ६६ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिरुक्मिणीस्वयंवरेएकोनपंचाशत्तमोऽध्यायः ४९ जनमेजयउवाच
हत्वाकंसंमहावीर्यंदेवैरपिदुरासदम् नाभिषिक्तःस्वयंराज्येनोपविष्टोनृपासने १ कन्यार्थेचागतःकृष्णस्तत्रापिनकृतातिथिः अमानम
तुलंप्राप्यक्षांतवान्केनहेतुना २ विनतायाःसुतश्चापिमहाबलपराक्रमः सचापिक्षमयायुक्तःकारणंकिमपेक्षितः ३ एतदाख्याहिभगवन्
परंकौतूहलंहिमे वैशंपायनउवाच विदर्भनगरींप्राप्तेवैनतेयसहाच्युते मनसाचिंतयामासवासुदेवायकैशिकः ४

व्यतिक्रमंराज्ञोऽनादृत्यसंकरं
६४ ६५ दूताःइंद्रस्येतिशेषः लेखंराजेंद्रत्वेसर्वैःकृष्णोभिषिच्यतामित्येवंरूपंउत्सृज्यक्रथकैशिकौसमर्पितवंतइतिशेषः ६६ इतिहरिवंशेवि०टीकायांएकोनपंचाशत्तमोध्या
यः ४९ हत्वेति १ अतिथिर्नकृतः आतिथ्येननार्चितः अमानंअपमानम् २ कारणंनिमित्तं अपेक्षितः आश्रितः ३ क्षमामूलंक्रथकैशिकयोः रूपेत्याह विदर्भेति ४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दृष्टेनेति आश्चर्यं कृष्णाभिषेकेनोस्माकं पापक्षयइति ५ सर्वान् विशुद्धभाव आविशोदितिचाध्याहृत्य योज्यं आवयोः कथकैशिकयोः दृष्टतनत्वतः दृष्टतनत्वात् कृष्णास्यन
त्वमावाभ्यां दृष्टमस्तीत्यर्थः ६ ७ ८ ९ आवां आवयोः १० सुहिता सुपुष्टा तव त्वदीयैवेत्यर्थः ११ अभिषिक्तं अभिषेकस्त्वद्वान् ददामि दद्वः १२ आवयोः आवाभ्यां
जरासंधोपि नान्यथाकर्तुं शक्नोतीति विपरिणामेन योज्यम् १३ १४ अनध्यास्यं अध्यासितुं योग्यं नास्ति १५ १६ आस्यति आसिष्यति उपवेक्ष्यतीति यावत् १७

दृष्टाश्चर्यं हि वः सर्वान् राजन्यान्यवदाम्यहम् वसुदेवसुते दृष्टे ध्रुवं पापक्षयो भवेत् ५ विशुद्धभावः कृष्णस्य आवयोर्दृष्टतनत्वतः अतः परतः
रः कोन्यास्मिन्पुण्यलोकेषु विद्यते ६ कृष्णात्कमलपत्राक्षात् देवदेवाज्जनार्दनात् तस्यावां किमदास्याव आतिथ्यकरणे नृप ७ पद्ममासाद्य वै
राजन् यथाधर्मो न लुप्यते एवमन्योन्यसंचिन्त्य भ्रातरौ कथकैशिकौ ८ स्वराज्यदातुकामौ तु जग्मतुः केशवान्तिकम् देवमासाद्य तौ वीरौ विदर्भ
नगराधिपौ ९ ऊचतुस्तौ महाभागौ प्रणम्य शिरसा हरिम् अद्यावासफलं जन्म अद्यावासफलं यशः अद्यावां पितरस्तृप्ताः देवाश्चावां गृहाग
ते १० चामरव्यजनछत्रध्वजसिंहासनबलम् स्फीतकोशा पुरी चेयमावाभ्यां सहिता तव ११ उपेन्द्रस्त्वं महाबाहो देवेन्द्रेणाभिषिक्तवान् आ
वाभ्यामिह हि राज्ये त्वामभिषिक्तं ददामि ते १२ आवयोर्यत्कृतं कार्यं बहुभिः पार्थिवैरपि न शक्यते ऽन्यथाकर्तुं जरासंधेन वा स्वयम् १३ शत्रुस्ते
मागधो राजा जरासंधो महाद्युतिः कथां ते ब्रुवते नित्यं नृपाणामभयप्रदः १४ सिंहासनमनध्यास्यं पुरश्चास्य न विद्यते कथं राजसमाजेऽस्मिन्ना
स्यते देवकीसुतः १५ कृष्णोपि सुमहावीर्यो ह्यभिमानी महाद्युतिः न चागमिष्यते वास्मिन् कन्यार्थे च स्वयंवरे १६ पार्थिवेषूपविष्टे
षु स्वेषु सिंहासनेषु वै कथमास्यति नीचेषु आसनेषु महाद्युतिः १७ इति संचिन्त्यमानस्तु स्वयं सौभीष्मको नृपः आवयोः सह संमन्त्र्य
विग्रहोपशमार्थिना १८ तवार्थे सुमहत्तोऽहि कारितं द्वृगृहोत्तमम् देवानामादिदेवोसि सर्वलोकनमस्कृतः १९ मानुष्यं मर्त्यलोकेस्मि-
न्राजेन्द्रत्वं समाचर समाजे मनुजेन्द्राणां माभूदासनसंकटम् २० विदर्भनगरे चैषां राजेन्द्रत्वं विचेष्टय आस्यतामासने शुभ्रे श्वः प्रभाते
महाद्युते २१ अधिवास्याद्य चात्मानं विधिदृष्टेन कर्मणा यथागमिष्यन्ति नृपाः करिष्ये देवशासनात् २२ एवमुक्त्वा सुरश्रेष्ठं प्रणिपत्य कृ
ताञ्जली प्रेषयामासतुर्वीरौ रंगमध्ये नृपैर्वृते २३ एवं दूतस्य वचनं यथोक्तं वज्रपाणिना लिखित्वा सुमहातेजाः कैशिकः प्राह शासनम्
२४ कैशिक उवाच विदितं वो नृपाः सर्वे वैनतेयसहाच्युतः आगतोतिथिरूपेण विदर्भनगरीं हरिः २५

१८ कारितं विभक्तिलोप आर्षः १९
न केवलं राजत्वमपि किंतु राजेन्द्रत्वं आसनसंकटं उपवेशने संशयः अराजा कथमुच्चैर्मम आसनमारोक्ष्यतीत्येवंरूपः २० एषां जरासंधादीनां विचेष्टय विचालय २१ अधिवास्य पूर्वा
गेण संस्कारेण संयोज्य देवशासनात् पूर्वाध्याये तेऽउक्तात् इन्द्राज्ञायत्नात् आगमिष्यन्ति अभिषेकार्थमिति शेषः २२ प्रेषयामासतुः देवशासनमिति विपरिणामेनानुषंगः २३ देव ६४
दूतस्य वचनं स्वयं पत्रे लिखित्वा लेखहारैर्वा आहत्य शासनमपि देवेन्द्राज्ञापत्रमपि प्राह २४ तदनुसारी स्वकृतं तान्नाय दाह विदितमिति २५ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न्नृपतिःकथः २६ २७ देवदूतस्यवाक्यमाह देवदूतउवाचेत्यादिना २८ २९ अभिषिंचंतुपट्टाभिषेकेणयोजयंतु ३० अस्यइंद्रस्य ३१ ३२ दिव्याभरणादिव्ययोनयोदि
व्यासनाः ३३ ३४ ३५ येसमागतास्तैर्भवद्भिः शक्रस्यदूतोरितंदुर्वार्यतरमित्यन्वयः ३६ अभिषिंचनंअभिषिच्यमानंकृष्णांयुष्माभिर्दर्शनेयुष्मत्कर्तृकेदर्शनेयुक्तंप्रे-

मासमालोक्यपात्रोयमितिसंचिंत्यभूपतिः प्रददौवासुदेवायस्वंराज्यंधर्महेतुना २६ इदमासनमास्तेतिभ्रात्रासेचोदितेततः वागुक्ता
चाशरीरेणकेनापिव्योमचारिणा २७ देवदूतउवाच नयुक्तमासनदातुंत्वयासौनेनराधिप इदमस्यासनंदिव्यंसर्वरत्नविभूषित
म् २८ जांबूनदमयंशुभ्रंरचितंविश्वकर्मणा प्रेषितंदेवराजेनसिंहलक्षणलक्षितम् २९ अत्रोपविष्टंदेवेशंत्वरात्वरनमस्कृतम् अभि-
षिंचंतुराजेंद्रबहुभिःपार्थिवैःसह ३० आगताःकुंडिनगरेकन्याहेतोर्नराधिपाः नागमिष्यंतियःकश्चित्सोऽस्यवध्योभविष्यति ३१ इ
मेचैवाष्टकलशाःनिधीनामृशसंभवाः अक्षयाराजराजस्यधनदस्यमहात्मनः ३२ दिव्याःकांचनरत्नाढ्यादिव्याभरणयोनयः राजेंद्रस्या-
भिषेकार्थमागच्छंतिनृपैर्वृताः ३३ एषशक्रस्यसंदेशःकथितोवोनराधिपाः लेखेनाहूयतान्सर्वानभिषिंचंतुकेशवम् ३४ वैशंपायनउवाच
इतिसंचोद्यखस्थोसौदेवदूतोगतोदिवम् दत्वासनंचकृष्णायबालार्कसदृशप्रभम् ३५ तेनाहंनोदयिष्यामिभवद्भिर्येसमागताः दुर्निवा
र्यतरंघोरंशक्रस्यस्वयमीरितम् ३६ युष्माभिर्दर्शनेयुक्तमद्भुतंसुविदुर्लभम् कलशैरभिषिंचंतंस्वयंसेवनभस्तलात् ३७ दृष्ट्वाश्चर्यमहिनः
सर्वान्भुवपापक्षयोभुवेत् स्नापनार्थंचकृष्णायदेवदेवायविष्णवे ३८ आगच्छध्वंनृपश्रेष्ठानभयंकर्तुमर्हथ आवयोःकृतसंधानोयुष्म
द्यंजनार्दनः ३९ सर्वेषामनुजेंद्राणामभयंकुरुतेहरिः विशुद्धभावःकृष्णास्तुआवयोर्दृष्टतत्वतः ४० मागधस्याविशेषेणवैरंह्यदिहृष्य
ते यदत्रकारणंकार्यंतद्भवद्भिर्विचिंत्यताम् ४१ वैशंपायनउवाच एवंसंचिंतयामासुर्नृपाःशापभयार्दिताः भूयःशुश्रुवुराजेंद्राके
शवायमहात्मने ४२ मेघगंभीरनादेनस्वरेणापूरयन्नभः वागुवाचाशरीरेणदेवराजस्यशासनात् ४३ चित्रांगदउवाच त्रैलोक्या
धिपतिःशक्रःप्रजापालनहेतुना आज्ञापयतियुष्माकंनृपाणांहितकाम्यया ४४ नयुक्तंवसतान्योन्यंकृष्णेनसहवैरिणा वसध्वंप्रीति
मुत्पाद्यस्वराष्ट्रेषुनृपोत्तमाः ४५ प्रणतार्तिहरःकृष्णःप्रतिसेनांतकोनलः अनेनसहसंप्रीत्यामोदध्वंविगतज्वराः ४६ मानुषाणांनृपादे
वानृपाणांदेवताःकराः सुराणांदेवताशक्रःशक्रस्यापिजनार्दनः ४७ एषविष्णुःप्रभुर्देवोदेवानामपिदेवतम् जातोयंमानुषेलोकेनररू
पेणकेशवः ४८ अजेयःसर्वलोकेषुदेवदानवमानवैः कार्तिकेयसहायस्य अपिशूलभृतःस्वयम् ४९

क्ष्यतमंमन्यामहेइतिशेषः ३७ दृष्ट्वेतिप्राग्व्या
ख्यातं ३८ ३९ ४० ४१ शुश्रुवुः अत्रविसर्गलोपआर्षः ४२ अशरीरेण अदृश्येनप्रयुक्तावैरिणाकृष्णेनसहयत्वसततत्वोऽन्योन्यंनयुक्तमितियोजना ४३ ४४ ४५ ४६
४७ ४८ कार्तिकेयेत्यत्रतृतीयालोप आर्षःस्वयंजेतुंनशक्तइतिशेषः ४९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अभिषेक्तुंइच्छेयमित्यपकृष्ययोज्यम् ५० ५१ वसूनामयंवासवोदेवानांदूतोस्मीत्यर्थः ५२ ५३ ५४ ५५ तिष्ठंतुचत्वारः कृष्णद्वेषिणइत्याशयः ५६ ५७ ५८
दह्यमानेनपुत्रदोषादित्याशयः ५९ ६० स्नानहेतोःपट्टाभिषेकार्थम् ६१ ६२ ६३ ६४ ६५ पंचयोनिसमुत्थानिमूलस्कन्धपत्रपुष्पफलानियोनयः कारणा

तस्मैदेवाधिदेवायकेशवायमहात्मने अभिषेक्तुंकरैःसार्द्धंकिमिच्छेय मतःपरम् नचाधिकारोदेवानांराजेंद्रस्याभिषेचने ५० तेनाहं-
नाभिषिंचामिसर्वलोकनमस्कृतम् नृपाणामधिकारोयंराजेंद्रस्यानिवेशने गत्वायूयंविदर्भायांक्रथकौशिकयोःसह ५१ संचिंत्यवि
धिदृष्टेनकुरुध्वंनृपसत्तमाः प्रीतिसंधानकालोयमितिसंचिंत्यवासवः ५२ बोधनार्थंविसृष्टोहंयुष्माकंमनुजेश्वराः विदर्भनगरेकृष्णःस्था
पितोस्याधिवासनम् ५३ राजेंद्रत्वाभिषेकार्थंराजानौक्रथकौशिकौ ताभ्यांसहनृपश्रेष्ठाः कृत्वाकुरुमहदुत्सवम् ५४ अभिषेकेणसत्कृ
त्यप्रतिगृह्यास्यदक्षिणाम् आगमिष्यथसंहृष्टाःपुनरेवस्वयंवरम् जरासंधःसुनीथश्चरुक्मीचैवमहारथः ५५ शाल्वःसौभपति
श्चैवचत्वारोराजसत्तमाः रंगस्याशून्यहेतोर्हितिष्ठंतुइहपार्थिवाः ५६ वैशंपायनउवाच एवमाज्ञांसुरेशस्यश्रुत्वाचित्रांगदेरि
ताम् गमनायमतिंचक्रुःसर्वएवनृपोत्तमाः ५७ अनुज्ञातानरेंद्रेणजरासंधेनधीमता भीष्मकंपुरतःकृत्वाप्रयाताःस्वबलैर्वृताः ५८
भीष्मकश्चमहाबाहुःस्वबलेनसमन्वितः जगामपार्थिवैःसार्द्धंदह्यमानेनचेतसा ५९ यत्रकृष्णोमहाबाहुःकौशिकस्यनिवेशने दूरादे
वप्रकाशंतीपताकाध्वजमालिनी ६० शुभादेवसभारम्यास्नानहेतोरिहागता दिव्यरत्नप्रभाकीर्णादिव्यध्वजसमाकुला ६१ दिव्यां
बरपताकाढ्यादिव्याभरणभूषिता दिव्यस्रग्दामकलिलादिव्यगंधाधिवासिता ६२ विमानयानैःश्रीमद्भिःसमंतात्परिवारिता दि
व्याप्सरोगणाश्चैवविद्याधरगणास्तथा ६३ गंधर्वामुनयश्चैवकिंनराश्चसमंततः उपगायंतिदेवेशमंबरांतरमाश्रिताः ६४ स्तुवंतिमुनय
श्चैवसिद्धाश्चपरमर्षयः देवदुंदुभयश्चैवस्वयमेवानदन्दिवि ६५ पंचयोनिसमुत्थानिगंधचूर्णान्यनेकशः समंतात्पात्यमानानिचाकाश
स्थैर्दिवौकसैः ६६ स्वयमागत्यदेवेंद्रोदेवैःसहशचीपतिः विमानवरमारुह्यसप्रकाशःस्थितोंबरे ६७ अष्टौयेलोकपालास्तेस्वासुदिक्षु
समास्थिताः उपगायंतिनृत्यंतिस्तुवंतिचसमंततः ६८ श्रुत्वासुतुमुलंनादंसर्वएवनराधिपाः विस्मयोत्फुल्लनयनाविविशुस्तेसभांशुभा
म् ६९ कौशिकश्चमहाबाहुरुपगम्यनराधिपान् प्रवेशयामासबलीप्रतिपूज्ययथाविधि ७० निवेदितेसुरश्रेष्ठेपार्थिवानांसमागमे नि
र्जगामहरिःश्रीमान्सर्वमंगलपूजितः ७१ ततोंबरस्थास्तेदिव्याःकलशाश्चैककाठिनः सहकारसमायुक्तावसुर्जलदाइव ७२

नितेभ्यः समुत्था ६५
निपंचमंदारपारिजातकसंतानकल्पवृक्षहरिचंदनाख्यादेवतरवएवयोनयस्तेभ्यःसमुत्थानि ६६ ६७ ६८ ६९ ७० सुरश्रेष्ठेकृष्णे ७१ ७२ ७३ ७४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७३ दर्शयित्वादर्शनीयंकृत्वालंकृत्येत्यर्थः ७४ राज्ञआगतान्सत्कृत्यमानयित्वातेषामाज्ञांगृहीत्वेत्यर्थः ७५ देवसभेसिंहासनेउपविष्टः ७६ ७७ ७८ ७९ ८० ८१

दिव्यकांचनरत्नौघैर्दिव्यपुष्पसमन्वितैः गंधचूर्णविमिश्रैश्चराजेंद्रस्याभिषेचने ७३ यथोक्तविधिपूर्वेण अभिषिच्यजनार्दनम् दर्शयित्वा
नरेंद्राणांदिव्यैराभरणैःशुभैः ७४ दिव्यांबरविचित्रैश्चदिव्यगंधानुलेपनैः सत्कृत्यविधिवद्राज्ञउपविशेजनार्दनः ७५ शुभेदेवसभेरम्येस्ना
नहेतोरिहागते उपास्यमानोयदुभिर्विदर्भैश्चनराधिपैः ७६ वैनतेयश्चबलवान् कामरूपीनराकृतिः दक्षिणंपार्श्वमाश्रित्यआसनस्थोमहा
बलः ७७ क्रथकैशिकौचवीरौतौवामपार्श्वेतथासने उपविष्टौमहात्मानौदेवस्यानुमतेनृपौ ७८ तथैववामपार्श्वेतुवृष्ण्यंधकमहारथाः सात्य
किप्रमुखावीराउपविष्टामहाबलाः ७९ भास्करप्रतिमे दिव्येदिव्यास्तरणविस्तृते सुखोपविष्टंश्रीमंतंदेवौरिवशचीपतिम् ८० सचिवैःश्रावि
ताःसर्वेप्रविष्टास्तेनराधिपाः यथार्हेणचसंपूज्यराजानःसर्वएवते ८१ सुखोपविष्टास्तेस्वेषुआसनेषुनराधिपाः कैशिकस्तुमहाप्राज्ञःसर्वशा-
स्त्रार्थवित्तमः ८२ पूजयित्वायथान्यायमुवाचवदतांवरः कैशिकउवाच अविज्ञातान्नृपाःसर्वेमानुषोयमितिप्रभो ८३ भवंतमुपरु
-द्धानांदेवत्वंक्षंतुमर्हसि श्रीकृष्णउवाच नमेवैरोप्रवसतिएकाहमपिकैशिक ८४ विशेषेणनरेंद्राणांक्षत्रधर्मेव्यवस्थिते योद्धव्यमितिध
र्मेणअधर्मेतुपराङ्मुखे ८५ तेषांकिंहेतुनाकोपःकर्त्तव्यस्त्ववनीश्वराः यद्गतंतदतिक्रांतंयेमृतास्तेदिवंगताः ८६ एषधर्मोनृलोकेस्मिन्जायते
चम्रियतेच तस्माद्शोच्यंभवतांमृतार्थेचनराधिपाः क्षंतव्यंरोचतेस्माकंवीतवैराभवंतुते ८७ वैशंपायनउवाच एवमुक्त्वानरेंद्रांस्ता
नाश्वास्यमधुसूदनः कैशिकस्यमुखंवीक्ष्यविररामहाद्युतिः ८८ एतस्मिन्नेवकालेतुभीष्मकोनयकोविदः पूजयित्वायथान्यायमुवाचवद-
तांवरः ८९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिरुक्मिणीस्वयंवरेपंचाशत्तमोऽध्यायः ५० भीष्मउवाच पुत्रोमेबा
लभावेनभगिनींदातुमिच्छति स्वयंवरेनरेंद्राणान्चाहंदातुमुत्सहे १ अतीवबालभावत्वाद्दातुमिच्छेन्मतिर्मम एकमेकांसमालोक्यवरयि
ष्यतिमेमतिः २ अतःप्रसादयिष्येत्वांपुत्रदुर्नयहेतुना प्रसादंकुरुदेवेशक्षंतुमर्हसिमेप्रभो ३ श्रीकृष्णउवाच बालभावेनपुत्रस्तेचा
लितोनृपमंडलम् यदाभवतिवैप्रौढःकीदृशोविनयोभवेत् ४ सूर्येंदुसदृशान्लोकांस्तपसोपार्जितश्रियः लोकेस्मिन्नरदेवानांमहाकुलस
मुद्भवान् ५

८२ अविज्ञाताःज्ञानहीनाः ८३ उपरुद्धानांअपराधवतांभवंतंउद्दिश्य ८४ ८५ ८६ ८७ ८८ ८९ इतिहरिवंशेविष्णुप॰टीकायांपंचाशत्तमो
ऽध्यायः ५० पुत्रोमइति १ ममतिस्तुस्वयंवरेदानमतीवबाल्यंएकाएकंवृणीतेतियुक्तमित्यर्थः २ अथापिममतंनप्रसिध्यतीत्याशयेनाह अतइति ३ चालि
तःचालितवान्कर्तरिक्तः अविनयइतिच्छेदः ४ योधितयंवदेतसस्वान्लोकान्दंडवन्हिनायमयातनाग्निनानिर्दहेदितिद्वयोःसंबंधः कीदृशान्लोकान्सूर्येंदुस

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 स्वकाशमानान् महाकुलोत्पन्नत्वेन विश्वजिदादिक्रतुर्भवान् यतो दहेदतस्तेषां लोकानां मध्ये ऽस्मिन्नेकस्मिन्नपि लोके न तिष्ठति सर्वेषां दग्धत्वादित्यर्थः ५ ६ ७
८ आस्तां तावत् पुत्रवार्त्तात्वमपि मिथ्यैव ब्रवीषीत्याह ताहशमिति ९ १० ११ १२ १३ १४ १५ न कृतातिथ्यमिति समस्तं पदं आतिथ्यहीनं तवालयं विदित्वेत्यर्थः
१६ हे नराधिप राजेंद्राणां पार्थिवोप्यहं क्रियाभिभूतोस्मि तत्र हेतुर्विदर्भेति यद्यत्र विश्रामो न कृतः स्यात्तदा नर्चानि निंदितो मम त्वाभिभवो न जातः स्यादिति भावः १७ एवम

एकस्यापि नृपस्याग्रे मोहाद्यो वितथं वदेत् न स तिष्ठति लोकेस्मिन् निर्दहेद्दंडवन्हिना ६ एष धर्मो नरेंद्राणामितीतं विदितं प्रभो लोकधर्मं पु
रस्कृत्य पुरा गीतस्स्वयंभुवा ७ कथं तव सुतस्तेषामग्रतो मनुजेश्वर वक्तुमर्हसि राजेंद्र वितथं राजसंसदि ८ तादृशं रंगमतुलं कारयंस्त्वं नयस्त
व कथं त्वयात्मविज्ञात इति मे संशयो महान् ९ आगतानां नरेंद्राणामनलार्केंदुवर्चसाम् यथार्हेण तु संपूज्य आतिथ्यं कृतवानसि १० र
थाश्वनरनागानां विमर्दमतुलं तथा कथं न ज्ञातवान् राजन् तव पुत्रस्य चेष्टितम् ११ विषादो न भवेदत्र चतुरंगबलागमे कथं न ज्ञायते रा
जन्निति मे बुद्धिसंशयः १२ ममागमनमेवेह प्रायेण न हितं तव अतो न कृतमातिथ्यमपात्राय नरेश्वर १३ पात्रेभ्यो दीयतां कन्या साम्
प्रत्यं नरेश्वर ममागमनदोषेण कथं कन्यां न दास्यसे १४ कन्याविघ्नं च कुर्वाणो नरके परिपच्यते इति धर्मविदैर्गीतं मन्वादिभिर्नरोत्तमैः
१५ अतोर्थं न प्रविशे हरंगमध्ये विशांपते विदित्वा न कृतातिथ्यं नरदेव तवालयम् १६ क्रियाभिभूतो राजेंद्र पार्थिवोहं नराधिप विद
र्भनगरे राजन् बलविश्रामहेतुना १७ आवाभ्यां कृतमातिथ्यं कैशिकस्तु प्रियातिथिः उषितौ च यथा स्वर्गे पुरा गरुडकेशवौ १८ वै
शंपायन उवाच एवमेवं ब्रुवाणं तं कृष्णवाग्वज्रचोदितम् श्लक्ष्णवाचांबुना सिच्य शमितोग्निरिवज्वलन् १९ भीष्मक उवा
च प्रसीद देव लोकेश पाहि मां लोकशासन अज्ञानतमसाविष्टज्ञानचक्षुःप्रदो भव २० मानुष्ये मांसचक्षुष्ट्वादसम्यग्विदितावयम्
न मे सिद्ध्यति कर्माणि क्रियतामविचारणात् २१ भवंतं शरणं प्राप्य देवानामपि दैवतम् सम्यक् भवतु मे दृष्टिः संपश्यतु च मे क्रियाः २२
अनिष्पन्नाम पि क्रिया नयोपेता विचक्षणाः फलदा हि प्रकुर्वंति महासेनापतिर्यथा २३ भवंतं शरणं प्राप्य नाति बाधति मे भयम् यन्म
या चिंतितं कार्यं तद्भवान् श्रोतुमर्हति २४ न दातुमिच्छे कन्यां वै पार्थिवेभ्यः स्वयंवरे प्रसादं कुरु देवेश न कोपं कर्तुमर्हसि २५

प्यावाभ्यां कृष्णगरुडाभ्यां कृतं पूर्णं आतिथ्यं लब्धमेवेति शेषः तत्र हेतुमाह कैशिकस्त्विति १८ वाग्वज्रं चोदितं येन तं कृष्णं आसिच्य स एव शमितः शांतिं नीतः १९
२० असम्यग्विदिताः विपरीतज्ञानाः क्रियतां कुर्वताम् २१ संपश्यतु संपन्नाः संतु २२ २३ बाधति बाधते मे मां २४ स्वयंवरणं यत्र क्रियायां तथा स्वयंवरं मे कन्यां दा
तुं न इच्छे सुत इति शेषः स्वयंवरे हि सति त्वामेव साधुगुणयादित्यभिप्रेत्य लब्ध्यागते पुत्रो मे स्वयंवरं न इच्छेदित्यर्थः २५ ☙ ☙ ☙ ☙

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नेतानियंता २६ मैंमयामादेहि अन्यस्मै ददस्वमह्यंइत्युभयमपिनाख्येयम् संबंधेस्वयंभाविनिक्षमैवास्माकंकारणंप्रधानमित्यर्थः २७ एतदेवाह मेरुकूटइत्या दिनाकृतंस्वीकृतम् निःसृष्टा आज्ञप्ताश्रीःपतिनाविष्णुना २८ प्रत्यवेक्ष्य अनुकंप्यवासवंइंद्रं २९ ३० ३१ एकायएकस्मै ३२ ३३ ३४ ३५ ३६ ३७

श्रीकृष्णउवाच वचनेनकिंमुक्तेनत्वयाराजन्महामते स्वकन्यांदास्यसेनेतिकोत्रनेतातवानघ २६ मादेहीतिनचाख्येयंददस्वेति नमेवचः रुक्मिण्यादिव्यमूर्तित्वसंबंधेकारणंमम २७ मेरुकूटेपुरादेवैःकृतमंशावतारणम् तदानिसृष्टासापूर्वंगच्छत्वंपतिनासह २८ मानुष्येकुंडिनगरे भीष्मकस्यागनोदरे जायस्वविपुलश्रोणिप्रत्यवेक्ष्यचवासवम् २९ तेनाहवःप्रवक्ष्यामिराजन्नेकृतकंवचः श्रुत्वास्वय विनिश्चित्ययद्युक्तंतत्करिष्यति ३० रुक्मिणीनामतेकन्यानसाप्राकृतमानुषी श्रीरेषाब्रह्मवाक्येनजाताकेनापिहेतुना ३१ नचसामनु जेंद्राणांस्वयंवरविधिक्षमा एकाएकायदातव्याइतिधर्मोव्यवस्थितः ३२ नचतांशक्ष्यसेराजन्लक्ष्मींदातुंस्वयंवरे सदृशंवरमालोक्य दातुमर्हसिधर्मतः ३३ अतोर्थंवैनतेयोयंविघ्नकारणहेतुना आगतःकुंडिनगरे देवराजेनचोदितः ३४ अहंचैवागतोराज्ञाद्रष्टुकामोम होत्सवम् तांचकन्यांवरारोहांपद्मेनरहितांश्रियम् ३५ क्षंतव्यमितियत्प्रोक्तंत्वयाराजन्ममाग्रतः युक्तिपूर्वमहंमन्येकलुषायनपार्थिव ३६ पूर्वमेवमयाख्यातयेनास्मिविषयेतव आगतःसौम्यरूपेणतेनैवक्षांतवान्विभो ३७ क्षांतेषुगुणबाहुल्यदोषापहरणक्षमा क- थमस्मद्विधेराजन्कलुषोवसतेहृदि ३८ कुलजेसत्वसंपन्नेधर्मज्ञेसत्यवादिनि भवादृशेकथंराजन्कलुषोप्युविवर्तते ३९ क्षांतोय- मितिमंतव्यममसेनासहागतम् नचाहंसेनयासार्द्धंयास्यामिरिपुवाहिनीम् ४० अक्षातश्चारिसेनायायास्यामिद्विजवाहने स्थितः सोमाकसकाशान्यायुधानिकरेवृतः ४१ मान्योस्माकंत्वयाराजन्वयसाचपितासमः पालयस्वपुरींसम्यक्क्षत्रेषुपितृवद्वस ४२ क लुषोनामराजेंद्रवसेत्कापुरुषेष्ववै शूरेषुशुद्धभावेषुकलुषोवसतेकथम् ४३ जानीध्वमेषामेवृत्तिःपुत्रेषुपितृवद्वयम् इमावपिचरा जानौविदर्भनगराधिपौ ४४ आतिथ्यकरणेस्माकंस्वराज्यदत्तवान्प्रभो तेनदानफलेनास्यदशपूर्वादिवंगताः ४५ भविष्याश्चैवरा जानःपुत्रपौत्रादशावराः तेपितत्रैवयास्यंतिदेवलोकंनराधिपाः ४६ अनयोःसुचिरंकालंभुक्त्वाराज्यमकंटकम् यदाभिलाषमोक्षस्य यास्यते निर्वृतिंसुखम् ४७ नरेंद्राश्चमहाभागायेभिषेचितुमागताः कालेनतेपियास्यंतिदेवलोकंत्रिविष्टपम् ४८ स्वस्तिवोस्तुगमि- ष्यामिवैनतेयसहायवान् नगरींमथुरांरम्यांभोजराजेनपालिताम् ४९

अस्मद्विधे अस्मद्विधस्यहृदि ३८ ३९ ४० ४१ अस्माकंपितासा- न्यः वयसाचत्वयासमः ४२ ४३ एषानिष्कलुषामेवृत्तिरितिजानीध्वम् ४४ ४५ ४६ ४७ ४८ ४९ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

राजाभीष्मकः २ स्वयंवरेकृष्णाविरोधाख्योदोषोविघ्नक्षयकरोभविष्यतीतिमत्वास्वयंवरार्थमाहूतान्नृपान्सांत्वयतिस्वयमितिशेषः ३ ४ ५ ६ ७ ८ ९

सभागतान्सोमरविप्रकाशान्सुखोपविष्टान्रुचिरासनेषु समीक्ष्यराजासुनयार्थवादीजगादवाक्यंनरराजसिंहः २ स्वयंवरंकृतंदो
षंविदित्वावोनराधिपाः क्षंतव्योममवृद्धस्यदुर्दग्धस्यफलोदयम् ३ वैशंपायनउवाच एवमाभाष्यतान्सर्वान्सत्कृत्यचयथा
विधि ततोविसर्जयामासनृपास्तान्मध्यदेशजान् ४ पूर्वपश्चिमजांश्चैवउत्तरापथिकानपि तेपिसर्वेमहेष्वासाःप्रहृष्टमनसोनराः ५ य-
थार्हेणचसंपूज्यजग्मुस्तेनरपुंगवाः जरासंधःसुनीथश्चदंतवक्त्रश्चवीर्यवान् ६ शाल्वःसौभपतिश्चैवमहाकूर्मश्चपार्थिवः क्रथकैशिकमुख्या
श्चनृपाःप्रवरवंशजाः ७ वेणुदारिश्चराजर्षिःकाश्मीराधिपतिस्तथा एतेचान्येचबहवोदक्षिणापथिकान्नृपाः ८ श्रोतुकामारहोवाक्यंस्थि
तावैभीष्मकांतिके तान्वैसमीक्ष्यराजेंद्रःसराजाभीष्मकोबली ९ स्नेहपूर्णेनमनसास्थितांस्तानवनीश्वरान् त्रिवर्गसहितंश्लक्ष्णंषड्गुणाल
कृतंशुभम् १० उवाचनयसंपन्नंस्निग्धगंभीरयागिरा भीष्मकउवाच भवतामवनीशानांसमालोक्यनयान्वितम् ११ वचनंव्याहृ
तंश्रुत्वाकृतवान्कार्यमीदृशम् क्षंतव्यंभवतासाद्धिर्वयंनित्यापराधिनः १२ वैशंपायनउवाच एवमुक्तातुराजासभीष्मकोनयकोवि
दः उवाचसुतमुद्दिश्यवचनंराजसंसदि १३ भीष्मकउवाच पुत्रस्यचेष्टामालोक्यत्रासाकुलितलोचनः मन्येबालानिमान्लो-
कान्सएषपुरुषःपरः १४ कीर्तिःकीर्तिमतांश्रेष्ठोयशश्चयशभाग्बली स्थापिताभुविमर्त्येस्मिन्स्वबाहुबलमूर्जितम् १५ धन्याखलुम
हाभागादेवकीयोषितांवरा पुत्रंत्रिभुवनश्रेष्ठंकृत्वागर्भेणकेशवम् १६ कृष्णंकमलपत्राक्षंश्रीपुंजममरार्चितम् नेत्राभ्यांस्नेहपूर्णाभ्यां
वीक्ष्यतेमुखपंकजम् १७ वैशंपायनउवाच एवंलालप्यमानंतुराजानंराजसंसदि उवाचश्लक्ष्णयावाचाशाल्वराजोमहाद्युतिः
१८ शाल्वउवाच अलंखेदेनराजेंद्रसुतायरिपुमर्दिने क्षत्रियस्यरणेराजन्ध्रुवंजयपराजयौ १९ नियतागतिसत्यानामेषधर्मः
सनातनः बलकेशवयोरन्यस्तृतीयःकःपुमानिह २० रणेयोधयितुंशक्तस्तवपुत्रंमहाबलम् रथातिरथवृंदानामेकएवरणाजिरे २१ रिपू
न्बाधयितुंशक्तोधनुर्गृह्यमहाभुजः भार्गवास्त्रंमहारौद्रंदेवैरपिदुरासदम् २२ सृजतोबाहुवीर्येणकःपुमान्प्रसहिष्यति अयंतुपुरुषःकृ
ष्णोह्यनादिनिधनोऽव्ययः २३ तंविजेतान्नलोकेस्मिन्नापिशूलधरःस्वयम् तवपुत्रोमहाराजसर्वशास्त्रार्थतत्ववित् २४ विदित्वादेवमी
शानंनयोधयतिकेशवम् अद्यतस्यरणेजेतायवनाधिपतिर्नृप २५

१० ११ व्याहृतंकृष्णस्तुतिरूपंकृतःकारितःकृतवान्वा १२ १३ इमानितिपुत्रं
प्रदर्श्याह एषःकृष्णः १४ यशभाक्यशोभोगीस्थापितास्थापयिष्यति १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वैदर्भाभ्यांक्रथकैशिकाभ्यांसह ५० सभातूसभास्थानात् ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३

वैशंपायनउवाच एवमुक्त्वातुराजानंभीष्मकंयदुनंदनः शङ्खश्चैवसुपामंत्र्यवैदर्भाभ्यांविशेषतः ५० सभान्निष्क्रम्यदेवेशोजगाम रथमतिकम् ततःप्रहृष्टोराजर्षिर्भीष्मकःकिलकेशवम् ५१ तेसर्वेचमहीपालाविषण्णवदनाभवन् आद्यंस्त्वायंभुवंरूपंसुरासुरनमस्कृतम् ५२ सहस्रपात्सहस्राक्षंसहस्रभुजविग्रहम् सहस्रशिरसंदेवंसहस्रमुकुटोज्ज्वलम् ५३ दिव्यमाल्यांबरधरंदिव्यगंधानुलेपनम् दिव्याभरणसंयुक्तंदिव्यानेकोद्यतायुधम् ५४ कृष्णारक्तारविंदाक्षंचंद्रसूर्याग्निलोचनम् दृष्ट्वासराजाराजेंद्रप्रणिपत्यकृतांजलिः ५५ वाङ्मनःकायसंयुक्तंस्तोतुमारब्धवांस्तदा भीष्मकउवाच देवदेवनमस्तुभ्यमनादिनिधनायवै ५६ शाश्वतायादिदेवायनारायणपरायण स्वयंभुवेचविश्वायस्थाणवेवेधसेहिच ५७ पद्मनाभायजटिनेदंडिनेजटिलायच हंसप्रभायहंसायचक्ररूपायवैनमः ५८ वैकुंठायनमस्तस्मैअजायपरमात्मने सदसद्भावयुक्तायपुराणपुरुषायच ५९ पुरुषोत्तमायमुक्तायनिर्गुणायनमोस्तुते वरदोभवमेनित्यंत्वद्भक्तायसुरोत्तम ६० लोकनाथोसिनाथस्त्वंविष्णुस्त्वंविदितात्मनाम् वैशंपायनउवाच एवंस्तुत्वामहादेवंनृपाणामग्रतोनृपः ६१ महार्हमणिमुक्ताभिर्वज्रवैडूर्यहासिनम् शातकुंभस्यनिचयंकृष्णायप्रददौनृपः ६२ पुनश्चकेनमस्कारंवैनतेयेमहाबले भीष्मकउवाच नमस्तस्मैखगेंद्रायनमोमारुतरंहसे ६३ कामरूपायदिव्यायकाश्यपायचवैनमः ६४ वैशंपायनउवाच इतिसंक्षेपतःस्तुत्वासत्कृत्यवरभूषणैः ततोविसर्जयामासकृष्णंकमललोचनम् ६५ अनुजग्मुर्नृपाश्चैवप्रस्थितंवासवानुजम् प्रतिगृह्यचसत्कारंनृपानामंत्र्यवीर्यवान् ६६ जगाममथुरांकृष्णोद्योतयानोदिशोदश वैनतेयंपुरस्कृत्यसौम्यरूपंखगोत्तमम् ६७ महतारथवृंदेनपरिवार्यसमंततः भेरीपटहनादेनशंखदुंदुभिनिःस्वनैः ६८ बृंहितेनचनागानांहयानांहेषितेनच सिंहनादेनशूराणांरथनेमिस्वनेनच ६९ तुमुलःसुमहानासीन्महामेघरवोपमः गतेकृष्णेमहावीर्येआदायवरमासनम् ७० सभामादायदेवाश्चप्रययुस्त्रिदशालयम् महताचतुरंगेणबलेनपरिवारिताः ७१ क्रोशमात्रमुपव्रज्यअनुज्ञातेजनार्दने प्रययुस्तेनृपाःसर्वेपुनरेवस्वयंवरम् ७२ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिकृष्णाभिषेकोनामएकपंचाशत्तमोऽध्यायः ५१ वैशंपायनउवाच ततःप्रयातेवसुदेवपुत्रेनराधिपाभूषणभूषितांगाः ततःसभांजग्मुसुरेंद्रकल्पाःप्रबोधनार्थंगमनोत्सवास्ते १

६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२

इतिश्रीहरिवंशेविष्णुपर्वणिटीकायांएकपंचाशत्तमोऽध्यायः ५१ ततःसभांभीष्मकस्यसभांजग्मुर्विसर्गलोपआर्षः १ छ. छ. छ. छ. छ.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ह॰टी॰ २६ अयोशनः लोहचूर्णाहारः मुनिनागार्ग्येण २७ २८ २९ ३० ३१ ३२ ब्रह्मणोवचनं अन्योस्यमृत्युरस्तीतिबलदेवंप्रत्यशरीरवाक्यम् ३३ पूर्वस्मि अ॰ ५॰
६८ न्काले ३४ यथाकन्यास्वपतिमपहायजारमाश्रयतेएवमहंस्वबलमनाश्रित्यपरमाश्रयामीत्यर्थः ३५ ३६ योगविहीनः उपायहीनः ३७ हंता अरमितिछेदः था ५२ २

सकालयवनोनाम अवध्यः केशवस्यह तस्मासुदारुणंघोरंतपः परमदुश्चरम् २६ रुद्रमाराधयामासद्वादशाब्दानयोशनः पुत्रकामेनमु
निनातोष्यरुद्रात्सुतंवृणोत् २७ माथुराणामवध्योयंभवेदितिचशंकरात् एवमस्त्वितिरुद्रोपिप्रददौमुनयेसुतम् २८ एवंगार्ग्यस्यत
नयः श्रीमान्रुद्रवरोद्भवः माथुराणामवध्योयमथुरायाविशेषतः २९ कृष्णोपिबलवानेषमाथुरेजातवानयम् सजेष्यतिरणेकृष्णंस
थुरायांसमागतः ३० मन्यध्वंयदिवायुक्तांनृपवाचमयेरिताम् तत्रदूतंविसृजध्वंयवनेंद्रपुरंप्रति ३१ वैशंपायनउवाच श्रुत्वासो
भपतेर्वाक्यंसर्वेतेनृपसत्तमाः कुर्मइत्यब्रुवन्हृष्टाजरासंधमहाबलम् ३२ सतेषांवचनंश्रुत्वाजरासंधोमहीपतिः बभूवविमनाराजन्
ब्रह्मणोवचनंस्मरन् ३३ जरासंधउवाच मासमाश्रित्यपूर्वस्मिन्नृपानृपभयार्दिताः प्राप्नुवंतुहृतराज्यंसभृत्यबलवाहनम् ३४
इदानींचोद्यतेभूपैः परसंश्रयहेतुना कन्येवस्वपतिद्वेषादन्यरतिपरायणा ३५ अहोसुबलवद्दैवमशक्यंविनिवर्तितुम् यदहंकृष्णभी-
तोन्यंसंश्रयामिबलाधिकम् ३६ नूनंयोगविहीनोहंकारयिष्येपराश्रयम् श्रेयोहिमरणंमह्यंनचान्यसंश्रयंनृपाः ३७ कृष्णोवाबलदे
वोवायोवासौवानराधिपाः हंतारंप्रतियोत्स्यामियथाब्रह्मणचोदितः ३८ एषामेनिश्चिताबुद्धिरेतत्सत्पुरुषव्रतम् अतोन्यथानशक्तोहं-
कर्तुंपरसमाश्रयम् ३९ भवतांसाधुवृत्तानामाबाधंनकरोमिसः तेनदूतंप्रदास्यामिनृपाणांरक्षणायवै ४० व्योममार्गेणयातव्यंयथाकृ-
ष्णोनबाधते गच्छतमनुचिंत्यैवंप्रेषयध्वंनृपोत्तमाः ४१ अयंसौभपतिः श्रीमाननलार्केंदुविक्रमः रथेनादित्यवर्णेनप्रयातिस्वपुरंबली
४२ यवनेंद्रोयथाभ्येतिनरेंद्राणांसमागमम् वचनंचतथास्माभिर्दूत्येनः कृष्णविग्रहे ४३ वैशंपायनउवाच पुनरेवाब्रवीद्रा
जासौभस्यपतिमूर्जितम् गच्छसर्वनरेंद्राणांसहाय्यंकुरुमानद ४४ यवनेंद्रोयथायातियथाकृष्णंविजेष्यति यथावयंचतुष्यामस्तथा
नीतिर्विधीयताम् ४५ एवंसंदिश्यसर्वांस्तान्भीष्मकंपूज्यधर्मतः प्रययौस्वपुरंराजास्वेनसैन्येनसंवृतः ४६ शाल्वोपिनृपतिश्रेष्ठस्तान्सर्वा
संपूज्यधर्मतः जगामाकाशमार्गेणरथेनानिलरंहसा ४७ तेपिसर्वेमहीपालादक्षिणापथवासिनः अनुव्रज्यजरासंधंगताः स्वनगरंप्र
ति ४८ भीष्मकः सहपुत्रेणतावुभौचिंत्यदुर्नयम् स्वगृहेन्यवसद्दीनः कृष्णमेवानुचिंतयन् ४९

ह्मणअ शरीरेणवचनेन ३८ ३९ ४० ४१ ६८
४२ दूत्येदूतकर्मणियथाऽस्माभिर्वचनंवक्तव्यंतथाऽयंवदत्वित्यर्थः नः अस्माकंकृष्णविग्रहेउपस्थितेसति ४३ राजाजरासंधः ४४ ४५ ४६ ४७ ४८ तावुभौरुक्मकैशि
कौदुर्नयंचपुत्रस्यानुचिंतयन् ४९ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

विदिताज्ञानवती ५० ५१ इतिहरिवंशेविष्णुपर्वणिटीकायांद्विपंचाशत्तमोऽध्यायः ५२ १ २ ३ ४ ५ ६ ७ ८ रंहसैर्वेगिभिः ९ वैय्याघ्रवरं
व्याघ्रवरंव्याघ्रचर्मवरंतेनभूषितंपरिवृतम् १० दक्षिणा दक्षिणतः दिशःसकाशात्उपयांतम् ११ अर्घपाद्यंचासत्कृत्उवाच विभक्तिलोपआर्षः १२ १३ १४

विदितारुक्मिणीसाध्वीस्वयंवरनिवर्तनम् कृष्णस्यागमनाद्धेतोर्नृपाणांदोषदर्शनम् ५० गत्वातुसासखीमध्येउवाचव्रीडितानना नचान्ये
षांनरेंद्राणांपत्नीभवितुमुत्सहे कृष्णात्कमलपत्राक्षात्सत्यमेतद्वचोमम ५१ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिरुक्मि
णीस्वयंवरोनामद्विपंचाशत्तमोऽध्यायः ५२ वैशंपायनउवाच यवनानांबलोदग्रःसकालयवनोनृपः बभूवराजाधर्मेणरक्षितापुरवा
सिनाम् १ त्रिवर्गविदितःप्राज्ञःषड्गुणानुपजीवकः सप्तव्यसनसंमूढोगुणेष्वभिरतःसदा २ श्रुतिमान्धर्मशीलश्चसत्यवादीजितेंद्रियः
सांग्रामिकविधिज्ञश्चदुर्गलाभानुसारणः ३ शूरोप्रतिबलश्चैवमंत्रिप्रवरसेवकः सुखासीनःसभांरम्यांसचिवैःपरिवारितः ४ उपास्यमा-
नोयवनैरात्मविद्भिर्विपश्चितैः विविधाश्चकथादिव्याःकथ्यमानाःपरस्परम् ५ एतस्मिन्नेवकालेतुदिव्यगंधवहोनिलः मन्दोसदनाद्बो
धंचकारसुखशीतलः ६ किंस्विदित्येकमनसःसभायायेसमागताः उत्फुल्लनयनाःसर्वेराजानेवावलोक्यसः ७ अपश्यंतरथंदिव्यमाचा
त्भास्करोपमम् शातकुंभमयैःशुभ्रैरथांगैरुपशोभितम् ८ दिव्यरत्नप्रभाकीर्णंदिव्यध्वजपताकिनम् वाहितंदिव्यतुरगैर्मनोमारुतरंह
सैः ९ चंद्रभास्करवियानिकुलाजांबूनदेनतम् विश्वकर्मणाविरचितवैयाघ्रवरभूषितम् १० रिपूणांत्रासजननंमित्राणांहर्षवर्द्धनम् दक्षिणा
दिशुपयांतरथपररथारुजम् ११ तत्रोपविष्टश्चामितसौभस्यपतिमूर्जितम् दृष्ट्वापरमसंहृष्टश्चार्घपाद्येतिचासकृत् १२ उवाचयवनेंद्रस्याम
त्रीमंत्रविदांवरः नत्वोत्थायमहाबाहुःस्वयमेवनृपासनात् १३ प्रत्युद्गम्यार्घ्यमादायरथावतरणेस्थितः शाल्वोपिचमहातेजादृष्ट्वाराजानमा
गतम् १४ मुदापरमयायुक्तंशक्रप्रतिमतेजसम् अवतीर्यसुविश्रब्धएकएवरथोत्तमात् १५ विवेशपरमप्रीतोमित्रदर्शनलालसः दृष्ट्वार्घमु
द्यतंराजा शाल्वोराजर्षिसत्तमः १६ उवाचश्लक्ष्णयावाचानार्घ्योहोस्मिमहाद्युते दूतोहमनुजेंद्राणांसकाशाद्भवतोतिकम् १७ प्रेषितोबहुभिः
सार्द्धंजरासंधेनधीमता तेनमन्येमहाराजनार्घार्होस्मीतिराजसु १८ कालयवनउवाच जानाम्यहंमहाबाहोदूत्येनत्वामिहागतं
साहित्येनरदेवानांप्रेषितोमागधेनवै १९ तेनत्वामर्चयेराजन्विशेषेणमहामते अर्घपाद्यादिसत्कारैरासनेनयथाविधि २० भवत्यभ्य-
र्चितेराज्ञांसर्वेषामर्चनंभवेत् आस्यतामासनेमुख्येमयासार्द्धंजनेश्वर २१ वैशंपायनउ० सहस्तालिंगनंकृत्वापृष्ट्वाचकुशलामयम् सु
खोपविष्टौसहितौशुभेसिंहासनेस्थितौ २२

१५ १६ १७ १८ १९ २० अर्चितंअर्चनम् २१ २२ ध ध ध ध ध

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यत्रयस्यजरासंधस्य २३ २४ २५ जगतांबाधाबाधकः २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८

कालयवनउवाच यद्बाहुबलमाश्रित्यवयंसर्वेनराधिपाः वसामोविगतोद्विग्नादेवाइवशचीपतिम् २३ किमसाध्यंभवेदस्ययेनासिप्रेषि
तोमयि वदसत्यवचस्तस्यकिमाज्ञापयतिप्रभुः करिष्येवचनंतस्यअपिकर्मसुदुष्करम् २४ शाल्वउवाच यथावदतिराजेंद्रमगधा
धिपतिस्तव तथाहसंप्रवक्ष्यामिश्रूयतांयवनाधिप २५ जरासंधउवाच जातोयंजगतांबाधीकृष्णःपरमदुर्जयः विदित्वातस्यदुर्वृत्त
महंहंतुंसमुद्यतः २६ पार्थिवैर्बहुभिःसार्द्धंसमग्रबलवाहनैः उपरुध्यमहासैन्यैर्गोमंतमचलोत्तमम् २७ चेदिराजस्यवचनमहार्थश्रुत
वानहम् यदानयोर्विनाशायहुताशनमयोजयम् २८ ज्वालाशतसहस्राढ्ययुगांताग्निसमप्रभम् दृष्ट्वारामोगिरेःकूटादाप्लुतोहेमतालधृ
क् २९ विनिष्पत्यमहासेनांमध्येसागरसन्निभाम् आजघानदुराधर्षोनराश्वरथदंतिनाम् ३० सर्पंतमिवसर्पेंद्रंविकृष्याकृष्यलांगलम् न
रनागाश्ववृंदानिमुशलेनव्यपोथयत् ३१ गजेनगजमास्फाल्यरथेनरथयोधिनम् हयेनचहयारोहंपदातेनपदातिनम् ३२ समरेसमहाते
जानृपार्कशतसंकुले विचरन्विविधान्मार्गान्निदाघेभास्करोयथा ३३ रामादनंतरंकृष्णःप्रगृह्यार्कसमप्रभम् चक्रंचक्रभृतांश्रेष्ठःसिंहः
क्षुद्रमृगंयथा ३४ प्रविचाल्यमहावीर्यःपादवेगेनतंगिरिम् शत्रुसैन्येपपातोच्चैर्यदुवीरःप्रतापवान् ३५ प्रनृत्यन्निवशैलेंद्रस्तोयधाराभिषे
चितः घूर्णमानोविवेशोर्वींविनिर्वाप्यहुताशनम् ३६ आदीप्यमानशिखराद्दवप्लुत्यजनार्दनः जघानवाहिनींराजंश्चक्रस्याग्रेणपाणिना ३७
विक्षिप्यविपुलंचक्रंगदापातादनंतरम् नरनागाश्ववृंदानिमुशलेनव्यचूर्णयत् ३८ क्रोधानिलसमुद्भूतचक्रलांगलवह्निना निर्दग्धासह-
तीसेनानरेंद्राकाभिपालिता ३९ नरनागाश्वकलिलंपत्तिध्वजसमाकुलम् रथानीकंपदाताभ्यांक्षणेनविदलीकृतम् ४० सेनांप्रभग्नामालोक्य
चक्रानलभयार्दिताम् महतारथवृंदेनपरिवार्यसमंततः ४१ तत्राहंयुध्यमानस्तुभ्रातास्यबलवान्बली स्थितोममाग्रतःशूरोगदापाणि-
र्हलायुधः ४२ क्षुद्रशाक्षौहिणीर्हत्वाप्रभिन्नइवकेसरी हलंसौनंदमुत्सृज्यगदयामामताडयत् ४३ वज्रपातनिभवेगंपातयित्वाममो
परि भूयःप्रहर्तुकामोमांवैशाखेनास्थितोमहीम् ४४ वैशाखस्थानमास्थायगुहःक्रौंचंयथापुरा तथामांदीर्घनेत्राभ्यांवीक्षतेनिर्दह
न्निव ४५ तादृग्रूपंसमालोक्यबलदेवंरणाजिरे जीवितार्थेनृलोकेस्मिन्कःपुमान्स्थातुमर्हति ४६

३९ ४० ४१ ४२ हलंसौनंदंमुस
लंचमुत्सृज्यत्यक्त्वागदयैवमामताडयत् अयोधयत ४३ वैशाखेनविशाखः कार्तिकेयः तस्येदंवैशाखंशक्तिप्रहरणंतेन ४४ स्थानंमर्मस्थानंआस्थायअ ६९
भिलक्ष्यवैशाखंप्रोक्तुंइच्छन्वीक्षतेस्मेत्यध्याहृत्ययोज्यम् ४५ ४६ ६९ ६९ ६९ ६९ ६९ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कुलांकुशेनकौपृथिव्यांलीयतेइतिकुलंहलंतदेवांकुशः तेन निर्धूतांकंपितांभ्रामितांवा कुत्वेतिशेषः ४७ वाक्वाचम् ४८ ४९ ५० ५१ देवदेवंदेवराजा नंप्रासवान्महासुनिरिरित्मग्रिमेणसंबंधः ५२ ५३ ५४ ५५ ५६ ५७ इतिहरिवंशेविष्णुपर्वणिटीकायांत्रिपंचाशत्तमोऽध्यायः ५३ १ २ ३

गृहीत्वासगदांभीमांकालदंडमिवोद्यताम् कुलांकुशेननिर्धूतांस्थितएवाग्रतोमम ४७ ततोजलदगंभीरस्वरेणापूरयन्नभः वाग्वाचा शरीरेणस्वयंलोकपितामहः ४८ प्रहर्तव्योनराजायमवध्योयतेवानघ कल्पितोस्यवधोन्यस्मात् विरमस्वहलायुध ४९ श्रुत्वाहंतेनवाक्ये नचिंताविशनिवर्तितः सर्वप्राणहरंघोरंब्रह्मणास्वयमीरितम् ५० तेनाहवःप्रवक्ष्यामिनृपाणांहितकाम्यया श्रुत्वात्वमेवराजेंद्रकर्तुम र्हसितद्वचः ५१ तपसोग्रेणमहतापुत्रार्थीतोष्यशंकरम् प्राप्तवान्नरदेवत्वामवध्यमायुरैर्जनैः ५२ महासुनिश्चायसचूर्णमश्नन्नुपस्थि तोह्वादशवार्षिकंव्रतम् सुरासुरैःसंस्तुतपादपंकजःसलब्धवानीप्सितकामसंपदम् ५३ तपोबलाद्गार्ग्यमुनेर्महात्मनोवरप्रभावाच्छकले दुमौलिनः भवंतमासाद्यजनार्दनोहिमंविलीयतेभास्कररश्मिनायथा ५४ यतःस्वराज्ञांवचनप्रचोदितोव्रजस्वयात्रांविजयायकेशवम् प्रविश्यराष्ट्रंमथुरांचसेनयानिहत्यकृष्णंप्रथयन्स्वकंयशः ५५ माथुरोवासुदेवोयंबलदेवःसबांधवः तौविजेष्यसिसंग्रामेगत्वातांमथु रांपुरीम् ५६ शाल्वउवाच इत्येवंनरपतिभास्करप्रगीतंवाक्यंतेकथितमिदंहितंनृपाणाम् तत्सर्वंसहसचिवैर्विमृश्यबुध्याय द्युक्तंकुरुमनुजेंद्रचात्मनिष्ठम् ५७ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिशाल्ववाक्यंनामत्रिपंचाशत्तमोऽध्यायः ५३

वैशंपायनउवाच एवंकथयमानंतंशाल्वराजंनृपाज्ञया उवाचपरमप्रीतोयवनाधिपतिर्नृपः १ कालयवनउवाच धन्यो स्म्यनुगृहीतोस्मिसफलंजीवितंमम कृष्णनिग्रहहेतोर्यन्नियुक्तोबहुभिर्नृपैः २ दुर्जयस्त्रिषुलोकेषुसुरासुरगणैरपि तस्यनिग्रहहे तोर्मामवधार्यजयाशिषम् ३ प्रहृष्टैराजसिंहैस्तैरवधार्योजयोमम तेषांवाचांबुवृष्ट्यैणविजयोमेभविष्यति ४ करिष्येवचनंतेषांनृपस त्तमचोदितम् पराजयोपिराजेंद्रजयेनसदृशोमम ५ अद्येवतिथिनक्षत्रमुहूर्तकरणंशुभम् यास्यामिमथुरांराजन्विजेतुंकेशवंरणे ६ वैशंपायनउवाच एवमाभाष्यराजानंसौभस्यपतिमूर्जितम् सत्कृत्यचययान्यायमहार्हमणिभूषणैः ७ ब्राह्मणेभ्योददौ- वित्तंसिद्धादेशाय्यवैनृपः पुरोहितायराजेंद्रप्रददौबहुशोधनम् ८ हुत्वाग्निंविधिवद्राजाकृतकौतुकमंगलः प्रस्थानंकृतवान्सम्यक् जेतुकामोजनार्दनम् ९ शाल्वोपिभरतश्रेष्ठकृतार्थोहृष्टमानसः यवनेंद्रंपरिष्वज्यजगामस्वपुरंनृपः १० इतिश्रीमहाभारतेखि लेषुहरिवंशेविष्णुपर्वणिकालयवनवाक्यंनामचतुःपंचाशत्तमोऽध्यायः ५४

४ ५ ६ ७ सिद्धादेशायअवितथाशिषे ८ ९ १० इतिहरिवंशेविष्णुपर्वणिटीकायांचतुःपंचाशत्तमोऽध्यायः ५४ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विदर्भनगराद्यातेमथुरापति १ २ ३ ४ ५ गमिष्यातिसंधिरार्थः ६ ७ ८ ९ १० ११ स्वैरिण्योनर्तक्यः १२ १३ कृतसंधानंकृताभिसंधिदूतं चचित्रांगदकृतेतिसंबंधः १४ नृपतेर्माडलिकस्यशतसहस्रंलक्षंदत्तंमांडलिकेशाय अर्बुदंमनुष्यमात्रेदशसहस्रम् १५ नरिक्ताः नअपूर्णाः शंखोनिधिःयादं

जनमेजयउवाच विदर्भनगराद्यातेशक्रतुल्यपराक्रमे किमर्थंगरुडोनीतः किंचकर्मचकारसः १ नचारुरोहभगवान्वैनतेयंम हाबलम् एतन्मेसंशयंब्रह्मन्ब्रूहितत्वंमहामुने २ वैशंपायनउवाच शृणुराजन्सुपर्णेनकृतंकर्मातिमानुषम् विदर्भनगरीं गत्वावैनतेयोमहाद्युतिः ३ असंप्राप्तेचनगरींमथुरांमधुसूदने मनसाचिंतयामासवैनतेयोमहाद्युतिः ४ यदुक्तंदेवदेवेननृपाणामग्र तःप्रभो यास्यामिमथुरांरम्यांभोजराजेनपालिताम् ५ इतितद्वचनस्यातेगमिष्येतिविचिंतयन् कृतांजलिपुटःश्रीमान्प्रणिपत्याब्र वीदिदम् ६ गरुडउवाच देवयास्यामिनगरींरैवतस्यकुशस्थलीम् रैवतंचगिरिंरम्यंनंदनप्रतिमंवनम् ७ रुक्मिणोह्यासितांरम्यां शैलोदधितटाश्रिताम् वृक्षगुल्मलताकीर्णांपुष्परेणुविभूषिताम् ८ गजेंद्रभुजगाकीर्णांऋक्षवानरसेविताम् वराहमहिषाक्रांताम् गयूथैरनेकशः ९ तांसमंतात्समालोक्यवासार्थंतक्षमाक्षमम् यदिस्यादिवतीरम्याप्रशस्तानगरीतिच कटकोद्धरणंकृत्वा आगमिष्ये तवांतिकम् १० वैशंपायनउवाच एवंविज्ञाप्यदेवेशंप्रणिपत्यजनार्दनम् जगामसपतगेंद्रोपिपश्चिमाभिमुखोबली ११ कृष्णो पियदुभिःसार्द्धंविवेशमथुरांपुरीम् स्वैरिण्यउग्रसेनश्चनागराश्चैवसर्वशः प्रत्युद्गम्यार्चयन्कृष्णंप्रहृष्टजनसंकुलम् १२ जनमे जयउवाच श्रुत्वाभिषिक्तंराजेंद्रबहुभिर्वसुधाधिपैः किंचकारमहाबाहुरुग्रसेनोमहीपतिः १३ वैशंपायनउवाच श्रुत्वा भिषिक्तंराजेंद्रंबहुभिःपार्थिवोत्तमैः इंद्रेणकृतसंधानंदूतंचित्रांगदंकृतम् १४ एकैकंनृपतेर्भागंशतसाहस्रसंमितम् राजेंद्रेत्वर्बुदं दत्तंमानवेषुचवैदश १५ येतत्रसमनुप्राप्तानरिक्तास्तेगृहंगताः शंखोयादवरूपेणप्रददौहरिचिंतितम् १६ एवंनिधिपतिःश्रीमान् देवतेरनुमोदितः इतिश्रुत्वात्मिकजनाल्लोकप्रावृत्तिकान्नरात् १७ चकारमहतींपूजांदेवतायतनेष्वपि वसुदेवस्यभवनेतोरणोभ यपार्श्वतः १८ नटानांनृत्यगेयानिवाद्यानिचसमंततः पताकाध्वजमालाढ्याकारयामासवैनृपः १९ कंसराजस्यचसभांविचित्रांव रसुप्रभाम् पताकाविविधाकारादापयामासभोजराट् २० तोरणंगोपुरंचैवसुधापंकानुलेपनम् कारयामासराजेंद्रोराजेंद्रस्यासना लयम् २१ नटानांनृत्यगेयानिवाद्यानिचसमंततः पताकावनमालाढ्याःपूर्णकुंभाःसमंततः राजमार्गेषुराजेंद्रचंदनोदकसेचितम् २२

वरूपेणधनंददौ १६ १७ चकारनृपइत्युत्तरेणान्वयः तोरणवंतौउभयपार्श्वौयस्यतत्तोरणोभयपार्श्वंपार्श्वतइतिप्रथमार्थेतसिः १८ १९ सभांसभायां २० २१ चंदनोदकस्यसे चितंसेकंकारयामासेतिपूर्वेणसंबंधः २२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२३ २४ पुरानंदंपुरस्यानंदकरं विधिमित्यर्थः २५ २६ मधुरंमधुपुरंतद्वासिनः २७ उग्रसेनेनसहइतिशेषः २८ २९ ३० ३१ अभिभूतंव्याप्तम् ३२ बलनिषूदनंशत्रुसैन्यहंतारम् ३३ त्वंस्यंदनेनगच्छेत्युक्त्वावतीर्णोभवत्इत्यर्थः ३४ गत्वाप्राप्य ३५ नृपार्णवेदेवेंद्रत्वंदर्शितमितिशेषः तंअनुप्र-

वस्त्राभरणकंराजादापयामासभूतले धूपंपार्श्वोभयेचैवचंदनागरुगुग्गुलैः २३ गुडंसर्जरसंचैवदह्यमानंततस्ततः वृद्धस्त्रीज
नसंघैश्चगायद्भिःस्तुतिमंगलम् अर्घंकृत्वाप्रतीक्षंतेस्वेषुस्थानेषुयोषितः २४ एवंकृत्वापुरानंदंसुग्रसेनोनराधिपः वसुदेवगृहंग
त्वाप्रियाख्यानंनिवेद्यच २५ रामेणसहसमभ्यनिर्गतोरथमंतिकम् तस्मिन्नेवांतरेराजन्शंखध्वनिरभून्महान् २६ पांचजन्यस्य
निनदंश्रुत्वामधुरवासिनः स्त्रियोवृद्धाश्चबालाश्चसूतमागधबंदिनः २७ विनिर्ययुर्महासेनारामंकृत्वाग्रतोनृप अर्घपाद्यपुरस्कृत्य
उग्रसेनेनधीमता २८ दृष्टिपथानमासाद्यउग्रसेनोमहीपतिः अवतीर्यरथाच्छुभ्रात्पादमार्गेणचाग्रतः २९ दृष्ट्वासीनंरथेरम्येदिव्य
रत्नविभूषितम् अंगेष्वाभरणंचैवदिव्यरत्नप्रभासुतम् ३० वनमालोरसंदिव्यंतपंतमिवभास्करम् चामरव्यजनंछत्रंखगेंद्रध्वजमु
च्छ्रितम् ३१ राजलक्षणसंपूर्णमासन्नार्कमिवोज्ज्वलम् श्रियाभिभूतदेवेशंदुर्निरीक्ष्यतरंहरिम् ३२ दृष्ट्वासराजाराजेंद्रहर्षगद्गदया
गिरा बभाषेपुंडरीकाक्षंरामंबलनिषूदनम् ३३ रथेननमयागंतुमुक्तपूर्वंतिचित्वंवै अवतीर्णोमहाभागगच्छत्वंस्यंदनेनच ३४ वि
ष्णुनाछद्मरूपेणगतेसामथुरापुरीम् ३५ अनुप्रकाशितात्मानंदेवेंद्रत्वंनृपार्णवे तमहंस्तोतुमिच्छामिसर्वभावेनकेशवम् ३६ प्रत्यु
वाचमहातेजाराजानंकृष्णपूर्वजः नयुक्तंनृपतेस्तोतुंव्रजतंदेवसत्तमम् ३७ विनास्तोत्रेणसंतुष्टस्त्वंराजन्जनार्दनः तुष्टस्यस्तुतिना
किंतेदर्शनेनतवस्तुतिः ३८ राजेंद्रत्वमनुप्राप्यआगतस्तववेश्मनि नत्वयास्तुतवान्राजन्दिव्यैःस्तोत्रैरमानुषैः ३९ एवमाब्रुवमाणौतौ
संप्राप्तौकेशवांतिकम् अर्घोद्यतभुजंदृष्ट्वास्थापयित्वारथोत्तमम् ४० उवाचवदतांश्रेष्ठउग्रसेनंनराधिपम् यन्मयाचाभिषिक्तस्त्वंमथुरे
शोभवत्विति ४१ नयुक्तमन्यथाकर्तुंमथुराधिपतेस्त्वयम् अर्घ्यमाचमनीयंचपाद्यंचास्मैनिवेदितम् ४२ नदातुमर्हसेराजन्एषमेमनसः
प्रियः तवाभिप्रायंविज्ञायब्रवीमिनृपतेवचः ४३ त्वमेवमाथुरोराजानान्यथाकर्तुमर्हसि स्थानभागंचनृपतेदास्यामितवदक्षिणाम्
४४ यथानृपाणांसर्वेषांतथातेस्थापितोयतः शतसाहस्रिकोभागोवस्त्राभरणवर्जितः आरुहस्वरथंसुभ्रंचामीकरविभूषितम् ४५ चा
मरंव्यजनंछत्रंध्वजंचमनुजेश्वर दिव्याभरणसंयुक्तंमुकुटंभास्करप्रभम् ४६

काशितात्मानंपश्चात्प्रदर्शितस्वरूपमहंस्तोतुमिच्छामीत्यन्वयः ३६ हेनृपतेत्वयानयुक्तंनयुज्यतइत्यर्थः ३७ स्तुतिनाकृत्यादर्शनमात्रेणस्तुति
र्जातैवेत्यर्थः ३८ ३९ ४० वदतांश्रेष्ठःकृष्णः ४१ ४२ ४३ स्थानभागंकृद्राजप्रदेयंराज्यधनांशम् ४४ तथाशतसाहस्रिकःलक्षसंमितःवस्त्रादिवर्जितः केवलकांचन
मयःत्वदर्थेस्थापितोस्तीतिसंबंधः ४५ ४६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७१ ७२ ७३ मथुराधिपतिंउग्रसेनम् ७४ मथुरेशस्यतव ७५ ७६ ७७ ७८ उवाचकृष्णः ७९ ८० ८१ ८२ ८३ ८४ ८५ ८६

प्राकारद्वारिसंप्राप्तावर्चयामासवैतदा अर्घ्यमाचमनंदत्वापाद्यंपाद्येतिचाब्रवीत् ७१ उग्रसेनस्ततोधीमान् केशवस्यरथाग्रतः प्रण
म्यशिरसाकृष्णंगजमारुह्यवीर्यवान् ७२ घनवत्तोयधारेणववर्षकनकांबुभिः धनौघैर्वर्षमाणैस्तुसंप्राप्तःपितृवेश्मनि ७३ मथुराधि
पतिंश्रीमानुवाचमधुसूदनम् राजेंद्रत्वमनुप्राप्ययुक्तमेनृपवेश्मनि ७४ स्थापितंदेवराजेनदत्तंसिंहासनंप्रभो नेष्यामिमथुरेशस्य
सभांभुजबलार्जिताम् ७५ प्रसादयिष्येभगवन्नकोपंकर्तुमर्हसि देवकीवसुदेवश्चरोहिणीचविशांपते ७६ नकिंचित्कारणंशक्ता
हर्षक्लमविमोहिता कंसमातातत्तोराजन्नर्चयामासकेशवम् ७७ नानादिग्देशजानीतकंसेनोपार्जितधनम् देशकालंसमालोक्य
पादयुग्मेन्यवेदयत् ७८ उग्रसेनंसमाहूयउवाचश्लक्ष्णयागिरा श्रीकृष्णउवाच नचाहंमथुराकांक्षीनमयावित्तकांक्षया ७९
घातितस्तवपुत्रोयंकालेननिधनंगतः यजस्वविविधान्यज्ञान्ददस्वविपुलधनम् ८० जयस्वरिपुसैन्यानिममबाहुबलाश्रयात्
त्यजस्वमनसस्तापंकंसनाशोद्भवंभयम् ८१ नयस्ववित्तनिचयमयादत्तंपुनस्तव इतिप्राश्वास्यराजानंकृष्णस्तुहलिनासह ८२ प्रवि
वेशततःश्रीमान्मातापित्रोरथातिकम् आनंदपरिपूर्णाभ्यांहृदयाभ्यांमहाबलौ ८३ पितृमात्रोस्तुपादान्वैनमश्चक्रतुरानतौ तस्मि
न्सुहृतेनगरीमथुरातुबभूवसा ८४ स्वर्गलोकपरित्यज्यावतीर्णवामरावती वसुदेवस्यभवनसमीक्ष्यपुरवासिनः ८५ मनसाचिंतया
मासुर्देवलोकंनभूतलम् विसृज्यमथुरेशंतुमहिषीसहितंतदा ८६ भवनंवसुदेवस्यप्रविश्यबलकेशवौ न्यस्तशस्त्रावुभौवीरौस्वगृहे
स्वैरचारिणौ ८७ ततःकृताह्निकौभूत्वासुखासीनौकथांतरे एतस्मिन्नेवकालेतुमहोत्पातोबभूवह ८८ बभ्रमुश्चघनाकाशेचेलुश्च
भुविपर्वताः समुद्राःक्षोभिताःसर्वेविभ्रांताभोगिनांवराः ८९ कंपितायादवाःसर्वेन्युब्जाश्चपतिताभुवि तौतान्निपतितान्दृष्ट्वारामकृ
ष्णौतुनिश्चलौ महतापक्षवातेनविज्ञातौपतगोत्तमम् ९० ददर्शसमनुप्राप्तंदिव्यस्रगनुलेपनम् प्रणम्यशिरसाताभ्यांसौम्यरूपीकृता
सनः ९१ तंदृष्ट्वासमनुप्राप्तंसचिवंसांपरायिकम् धृतिमंतंगरुत्मंतमुवाचबलिसूदनः ९२ स्वागतंखचरश्रेष्ठसुरसेनारिमर्दन विन
ताहृदयानंदस्वागतंकेशवप्रिय ९३ तमुवाचततःकृष्णःस्थितंदेवमिवापरम् तुल्यसामर्थ्ययावाचाआसीनंविनतात्मजम् ९४ श्री
कृष्णउवाच यास्यामःपतगश्रेष्ठभोजस्यातःपुरंमहत् तत्रगत्वासुखासीनामंत्रयामोमनोनुगम् ९५

८७ ८८ घनाआकाशेइत्यत्रसंधिरार्षः ८९ विज्ञातौज्ञातवंतौ ९० ९१ ९२ ९३ ९४ ९५ ९६ ९७ ९८ ९९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४७ देवायकांतायअनंतायशेषायशौरिणेभ्रूरपुत्रायसीरिणइतिपाठेहलिनेवज्रपाणिनाइंद्रेण ४८ दिव्याभरणमित्येकत्वंजात्यभिप्रायेणदीनारः स्वर्णसाहस्र-
मित्यभिधानोक्तेः ४९ ५० धात्राइंद्रेण ५१ मथुरांप्रविवेशइतिशेषः ५२ देवाइवासीतिशेषः ५३ ५४ ५५ ५६ पूर्वात् पूर्वत्वात् ५७ मथुरवासिन्यः मथु-

धारयस्वमहाभागपालयस्वपुरीमिमाम् पुत्रपौत्रैःप्रमुदितोमथुरांपरिपालय ४७ जित्वारिगणसंघांश्चभोजवंशांविवर्द्धय देवदेवाद्यनं-
तायशौरिणेवज्रपाणिना ४८ प्रेषितंदेवराजेनदिव्याभरणमंबरम् माथुराणांचसर्वेषांभागादीनारकादश ४९ सूतमागधवंदीनामेकैः
कस्यसहस्रिकम् दृष्टस्त्रीजनसंघानांगणिकानांशतंशतम् ५० नृपेणसहतिष्ठंतिविकद्रुप्रमुखाश्चये दशसाहस्रिकोभागस्तेषांधात्रा
प्रकल्पितः ५१ वैशंपायनउवाच एवंसंपूज्यराजानंमाथुराणांचमूमुखे कृत्वासमहदानंदांमथुरांमधुसूदनः ५२ दिव्याभरणमा
ल्यैश्चदिव्यांबरविलेपनैः दीप्यमानःसमंताच्चदेवाइवत्रिविष्टपे ५३ भेरीपटहनादेनशंखदुंदुभिनिःस्वनैः बृंहितेनचनागानांहयानांहेषि
तेनच ५४ सिंहनादेनशूराणांरथनेमिस्वनेनच तुमुलःसुमहानासीन्मेघनादइवांबरे ५५ वंदिभिस्तूयमानंचनमश्चक्रुरपिप्रजाः दत्वा-
दानमनंतंचनययौविस्मयंहरिः ५६ स्वभावोन्नतभावत्वात्दृष्टपूर्वात्ततोधिकम् अनहंकारभावाच्चविस्मयंनजगामह ५७ दीप्यमानंस्ववपुषा
आयांतंभास्करप्रभम् दृष्ट्वामथुरवासिन्योनमश्चक्रुःपदेपदे ५८ एषनारायणःश्रीमान्क्षीरार्णवनिकेतनः नागपर्यंकमुत्सृज्यप्रा-
प्तोयंमथुरापुरीम् ५९ बध्वाबलिंमहावीर्यंदुर्जयंत्रिदशैरपि शक्रायप्रददौराज्यंत्रैलोक्यंवज्रपाणये ६० हत्वादैत्यगणान्सर्वान्कंसंचब
लिनांवरम् भोजराजायमथुरांदत्वाकेशिनिषूदनः ६१ नाभिषिक्तःस्वयंराज्येनचासीनोनृपासने राजेंद्रत्वंचसंप्राप्यमथुरामाविशत्ततः ६२
एवमन्योन्यसंजल्पंश्रुत्वापुरनिवासिनाम् वंदिमागधसूतानामिदमूचुर्गणाधिपाः ६३ किंवाशक्यामहेवक्तुंगुणानांतेगुणोदधे मानुषे-
णैकजिह्वेनप्रभावोत्साहसंभवम् ६४ सहस्रभोगीनागेंद्रःकदाचिद्देवबुद्धिमान् द्विसाहस्रेणजिह्वेनवासुकिःकथयिष्यति ६५ किंत्व-
द्भुतमिदंलोकेमानवेंद्रेषुभूतले नभूतंनभविष्यंचशक्रादासनमागतम् ६६ सभावतरणंचैवकलशैरागतंस्वयम् नश्रुतंनचदृष्टंवाते
नेमन्यामहेद्भुतम् ६७ धन्यादेवीमहाभागादेवकीयोषितांवरा भवतात्रिदशश्रेष्ठधृत्वागर्भेणकेशवम् ६८ कृष्णांपद्मपलाशाक्षंश्री
पुंजममरार्चितम् नेत्राभ्यांस्नेहपूर्णाभ्यांवीक्ष्यतेसुखपंकजम् ६९ इतिसंजल्पमानानांशृण्वतोपृथगीरितम् उग्रसेनःपुरस्कृत्यप्रा
तरौरामकेशवौ ७०

रावासिन्यः ५८ ५९ ६० भोजराजायउग्रसेनाय ६१ ६२ ६३ गुणानांप्रभावःउत्साहः संभवश्चतान् ६४ जिह्वास्थेनवागिंद्रिये
णाद्विसाहस्रस्थानेष्वभिव्यक्तेनेत्यर्थः वासुकिरत्रशेषएव ६५ ६६ कलशैः कर्तृभिः ६७ धन्याभूदितिशेषः ६८ ६९ ७० छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९६ असौजरासंधः कालयवनोवा ९७ ९८ ९९ १०० १०१ १०२ १०३ १०४ १०५ १०६ १०७ १०८ १०९ सुरमण्योस्कतरांरमणीयः ११०

वैशंपायनउवाच प्रविष्टौतौमहावीर्यौबलदेवजनार्दनौ वैनतेयतृतीयौचगुह्यंमंत्रमथाब्रुवन् ९६ अवध्योसौकृतोस्माकंस्कमह
च्चरिपोर्बलम् कृतःसैन्यक्षयश्चापिमहानितिनराधिपः ९७ बहूलानिचसैन्यानिहंतुवर्षशतैरपि नशक्ष्यामःक्षयंकर्तुंजरासंधस्यवाहि
नीम् ९८ अतोर्थंवैनतेयत्वांब्रवीमिमथुरांपुरीम् वसतोरावयोःश्रेयोनभवेदितिमेमतिः ९९ गरुडउवाच देवदेवनमस्कृत्यग
तोहंभवतोंतिकात् वासार्थमीक्षितुंभूमितवदेवकुशस्थलीम् १०० गत्वाहंखेसमास्थायसमंतादवलोक्यताम् दृष्ट्वाहंविबुधश्रेष्ठपुरीं
लक्षणपूजिताम् १०१ सागरानूपविपुलांप्रागुदकूलवशीतलाम् सर्वतोदधिमध्यस्थामभेद्यांत्रिदशैरपि १०२ सर्वरत्नाकरवतींस
र्वकामफलद्रुमाम् सर्वर्तुकुसुमाकीर्णांसर्वतःसुमनोहराम् १०३ सर्वाश्रमाधिवासांचसर्वकामगुणैर्युताम् नरनारीसमाकीर्णांनित्या
मोदविवर्द्धिनीम् १०४ प्राकारपरिखोपेतांगोपुराट्टालमालिनीम् विचित्रचत्वरपथांविपुलद्वारतोरणाम् १०५ यंत्रार्गलविचित्राढ्यां
हेमप्राकारशोभिताम् नरनागाश्वकलिलांरथसैन्यसमाकुलाम् १०६ नानादिग्देशजाकीर्णांदिव्यपुष्पफलद्रुमाम् पताकाध्वजमाला
ढ्यांमहाभवनशालिनीम् १०७ भीषणींरिपुसंघानांमित्राणांहर्षवर्द्धनीम् मनुजेंद्राधिवासेस्यांविशिष्टांनगरोत्तमाम् १०८ रैवतंच
गिरिश्रेष्ठकुरुदेवसुरालयम् नंदनप्रतिमंदिव्यंपुरद्वारस्यभूषणम् १०९ कारयस्वाधिवासंचतत्रगत्वासुरोत्तम कुमाराणांप्रचार-
श्चसुरमण्योभविष्यति ११० नाम्नाद्वारवतीज्ञेयात्रिषुलोकेषुविश्रुता भविष्यतिपुरीरम्याशक्रस्येवामरावती १११ यदिस्यात्संवृता
भूमिप्रदास्यतिमहोदधिः यथेष्टंविविधंकर्मविश्वकर्माकरिष्यति ११२ मणिमुक्ताप्रवालाभिर्वज्रवैडूर्यसप्रभैः दिव्यैरभिप्रायसुतैर्दिव्य
रत्नैस्त्रिलोकजैः ११३ दिव्यस्तंभशताकीर्णान्स्वर्गेदेवसभोपमान् जांबूनदमयान्शुभ्रान्सर्वरत्नविभूषितान् ११४ दिव्यध्वजपता
काढ्यान्देवगंधर्वपालितान् चंद्रसूर्यप्रतीकाशान्प्रासादान्कारयप्रभो ११५ वैशंपायनउवाच एवंकृत्वातुसंकल्पंवैनते-
योथकेशवम् प्रणम्यशिरसाताभ्यांनिषसादकृतासनः ११६ कृष्णोपिरामसहितोविचिंत्यहितमीरितम् प्रकाशंकर्तुकामोतोविसृज्य-
विनतात्मजम् ११७ सत्कृत्यविधिवद्राजन्महार्हवरभूषणैः मोदतेसुखिनौतत्रसुरलोकेयथामरौ ११८ तस्यतद्वचनंश्रुत्वाभोज
राजोमहायशाः कृष्णंस्नेहेनविस्रब्धंबभाषेवचनामृतम् ११९ कृष्णकृष्णमहाबाहोयदूनांनंदिवर्द्धन श्रूयतांवचनंत्वाद्यवक्ष्यामिरि
पुसूदन १२०

१११ यदिमहोदधिर्भूमिंदास्यतितर्हिउक्तगुणापुरीस्यादितियोजना ११२ ११३ ११४ ११५ ११६ ११७ ११८ ११९ १२० ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१२१ १२२ १२३ १२४ इतिहरिवंशेविष्णुपर्वणिटीकायांपंचपंचाशत्तमोऽध्यायः ५५ कस्यचिदिति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

त्वयाविहीनाःसर्वेस्मनशक्ताःसुखमासितुम् पुरेस्मिन्विषयांतेवापतिहीनाइवस्त्रियः १२१ त्वत्सनाथावयंतातत्वद्बाहुबलमाश्रिताःवि
भीमोननरेंद्राणांसेंद्राणामपिमानद १२२ विजयाययदुश्रेष्ठयत्रयत्रगमिष्यसि तत्रत्वसहितोस्माभिर्गच्छेथायादवर्षभ १२३ तस्यरा-
ज्ञोवचःश्रुत्वासस्मितंदेवकीसुतः यथेष्टंभवतामद्यतथाकर्तास्म्यसंशयम् १२४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिमं
त्रोद्धाहरणेरुक्मिणीस्वयंवरेराजेंद्राभिषेचनसमाप्तिर्नामपंचपंचाशत्तमोऽध्यायः ५५ वैशंपायनउवाच कस्यचित्त्वथकालस्यस
भ्यांस्तान्यदुसंसदि बभाषेपुंडरीकाक्षोहेतुमद्वाक्यमुत्तमम् १ यादवानामियंभूमिर्मथुराराष्ट्रमालिनी वयंचैवेहसंभूताव्रजेचपरिव-
र्द्धिताः २ तदिदानींगतंदुःखंशत्रवश्चपराजिताः नृपेषुजनितंवैरंजरासंधेनविग्रहः ३ वाहनानिचनःसंतिपादातंचाप्यनंतकम् रत्नानि
चविचित्राणिमित्राणिचबहूनिच ४ इयंचमाथुरीभूमिरल्पाग्रस्यापरस्यतु वृद्धिश्चैवपरास्माकंबलतोमित्रतस्तथा ५ कुमारकोट्योया
श्चेमाःपदातीनांगणाश्चये एषामपीहवसतांसमर्दमुपलक्षये ६ अत्रनोरोचतेमह्यंनिवासोयदुपुंगवाः पुरींनिवेशयिष्यामिमंसमतःक्षंतु
मर्हथ ७ एतद्यदनुरूपंवोममाभिप्रायजंवचः भवायभवतांकालेयदुक्तंयदुसंसदि ८ तमूचुर्यादवाःसर्वेहृष्टेनमनसातदा साध्यतांय
दभिप्रेतंजनस्यास्यभवायवै ९ ततःसमंत्रयामासुर्वृष्ण्याद्योमंत्रमुत्तमम् अवध्योसौकृतोस्माकंसुमहच्चरिपोर्बलम् १० कृतःसैन्यक्षय
श्चापिसमहानिहनराधिपः बहुलानिचसैन्यानिहंतुंवर्षशतैरपि ११ नशक्ष्यामोद्यतस्तेषामपयानेभवन्मतिम् तस्मिंश्चैवांतरेराजासका
लयवनस्तदा १२ सैन्येनतादृशेनैवमथुरामभ्युपागमत् ततोजरासंधबलदुर्निवार्यमभूत्तदा १३ तेकालयवनंचैवश्रुत्वेदंप्रतिपेदिरे
केशवःपुनरेवाहयादवान्सत्यसंगरः १४ अद्यैवदिवसःपुण्योनिर्यामस्त्वबलानुगाः ततोनिश्चक्रमुःसर्वेयादवाःकृष्णशासनात् १५ओ
घाइवसमुद्रस्यबलौघप्रतिनादिताः संगृह्यतेकलत्राणिवसुदेवपुरोगमाः १६ सुसन्नद्धैर्गजैर्मत्तैरथैरश्वैश्चदंशितैः आहत्यदुंदुभीन्
सर्वेस्वजनज्ञातिबांधवाः १७ निर्ययुर्यादवाःसर्वेमथुरामपहायवै स्यंदनैःकांचनापीडैर्मत्तैश्चवरवारणैः सूतैःप्लुतैश्चतुरगैःकशापार्ष्णि
प्रणोदितैः १८ स्थानिस्थानिबलाग्र्याणिशोभयतःप्रकर्षिणः प्रत्यङ्मुखाययुर्हृष्टावृष्ण्याद्योभरतर्षभ १९ ततोसुखव्यतराःसर्वेयादवारण
कोविदाः अनीकाग्र्याणिकर्षंतोवासुदेवपुरोगमाः २०

राजाजरासंधःसकालयवनः कालयवनेनसहितः १२ १३ इदंअवध्योसावित्यादिपूर्वो-
क्तंअपयानंप्रतिपेदिरेशरणीचक्रुः १४ १५ १६ १७ सूतैःप्लुतैःआज्ञामात्रादुत्पतद्भिः १८ १९ २० छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२१ २२ २३ वास्तुस्थानम् २४ सिकतायुक्तानाम्रमृत्तिकायस्मिन् २५ २६ २७ २८ अष्टापदोपमाशारिकाफलतुल्यादीर्घचतुरस्रहूयसंबंधव तीत्यर्थः २९ मतिः इच्छा ३० ३१ ३२ वास्तूनिगृहाणिनिर्ममेविभक्तवान्मनसासंकल्पमात्रेण ३३ ३४ ३५ इतिहरिवंशेविष्णुपर्वणिटीकायांषट्पं

तेरम्यनानालताचित्रंनालिकेरवनायुतम् कीर्णंनागबलैः कांतंकेतकीखंडमंडितम् २१ तालपुन्नागबकुलद्राक्षावनघनंक्वचित् अनूपंसिंधुराजस्यप्रपेतुर्यदुपुंगवाः २२ तेतत्ररमणीयेषुविषयेषुसुखप्रियाः मुमुदुर्यादवाःसर्वेदेवाःस्वर्गगताइव २३ पुरवास्तुविचिन्वन्सःकृष्णास्तुपरवीरहा ददर्शविपुलंदेशंसागरेणोपशोभितम् २४ वाहनानांहितंचैवसिकताताम्रमृत्तिकम् पुरलक्षणसंपन्नंकृतास्पदमिवश्रिया २५ सागरानिलसंवीतंसागरांबुनिषेवितम् विषयंसिंधुराजस्यशोभितंपुरलक्षणैः २६ तत्ररैवतकोनामपर्वतोनातिदूरतः मंदरोदारशिखरःसर्वतोभिविराजते २७ तत्रैकलव्यसंवासोद्रोणेनाध्युषितश्चिरम् प्रभूतपुरुषोपेतःसर्वरत्नसमाकुलः २८ विहारभूमिस्तत्रैवतस्यराज्ञःसुनिर्मिता नाम्नाद्वारवतीनामस्वायताष्टापदोपमा २९ केशवेनमतिस्तत्रपुर्यर्थेसन्निवेशिता निवेशंतत्रसैन्यानांरोचयंतिस्मयादवाः ३० तेरक्तसूर्यदिवसेतत्रयादवपुंगवाः सेनापालाश्चसंचक्रुःस्कंधावारनिवेशनम् ३१ ध्रुवायतत्रन्यवसत्केशवःसहयादवैः देशेपुरनिवेशायसयदुप्रवरोविभुः ३२ तस्यास्तुविधिवन्नामवास्तूनिचगदाग्रजः निर्ममेपुरुषश्रेष्ठोमनसायादवोत्तमः ३३ एवंद्वारवतींचैवपुरींप्राप्यसबांधवाः सुखिनोन्यवसन्राजन्स्वर्गेदेवगणाइव ३४ कृष्णोपिकालयवनंज्ञात्वाकेशिनिषूदनः जरासंधभयाच्चैवपुरींद्वारवतींययौ ३५ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिद्वारवतीप्रयाणंनामषट्पंचाशत्तमोऽध्यायः ५६

जनमेजयउवाच भगवन्श्रोतुमिच्छामिविस्तरेणमहात्मनः चरितंवासुदेवस्ययदुश्रेष्ठस्यधीमतः १ किमर्थंचपरित्यज्यमथुरांमधुसूदनः मध्यदेशस्यककुदंधामलक्ष्म्याश्चकेवलम् २ शृंगंपृथिव्याःस्वालक्ष्यंप्रभूतधनधान्यवत् आर्याढ्यजनभूयिष्ठमधिष्ठानंवरोत्तमम् ३ अयुद्धेनैवदाशार्हस्त्यक्तवान्द्विजसत्तम सकालयवनश्चापिकृष्णोकिंप्रत्यपद्यत ४ द्वारकांचसमासाद्यवारिदुर्गांजनार्दनः किंचकारमहाबाहुर्महायोगीमहातपाः ५ किंवीर्यःकालयवनःकेनजातश्चवीर्यवान् यमसह्यंसमालक्ष्यव्यपयातोजनार्दनः ६ वैशंपायनउवाच वृष्णीनामंधकानांचगुरुर्गार्ग्योमहामनाः ब्रह्मचारीपुराभूत्वानस्मदारान्सविंदति ७ तथाहिवर्तमानंतमूर्ध्वरेतसमव्ययम् श्यालोभिशस्तवान्गार्ग्यमपुमानितिराजनि ८ सोभिशस्तस्तदाराजन्नगरेत्वजितंजये अलिप्संस्तुस्त्रियंचैवतपस्तेपेसुदारुणम् ९

चाशत्तमोऽध्यायः ५६ भगवन्निति १ परित्यज्यगतइत्यर्थः २ ३ ४ ५ ६ दारान्विद्यमानानपिनविंदतिनाभ्यगच्छत् ७ राजनिराजसभायां ८ अलिप्सन्अनिच्छन् श्यालकोपेन ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

१० ११ पुत्रस्यकामिताकामयिता १२ तंगार्ग्यमुपानाय्यस्वगृहमानाय्य १३ १४ मानुष्यांमानुषीरूपायामप्सरसिभार्यायांभार्यावद्वर्त्तमानायाम् १५ १६

ततोद्वादशवर्षाणिसोयश्चूर्णमभक्षयत् आराधयन्महादेवं अर्चयंशूलपाणिनम् १० रुद्रस्तस्मैवरंप्रादात्समर्थंयुधिनिग्रहे वृष्णी
नामंधकानांचसर्वतेजोमयंस्मृतम् ११ ततःश्रुत्वावरंराजायवनाधिपतिर्वरम् पुत्रप्रसवजंदैवादपुत्रःपुत्रकामिता १२ सनृपस्तमुपाना-
य्यसांत्वयित्वाद्विजोत्तमम् तंघोषमध्येयवनोगोपस्त्रीषुसमासृजत् १३ गोपालीत्वप्सरास्तत्रगोपस्त्रीवेषधारिणी धारयामासगार्ग्यस्य
गर्भंदुर्द्धरमच्युतम् १४ मानुष्यांगार्ग्यभार्यायांनियोगाच्छूलपाणिनः सकालयवनोनामजज्ञेशूरोमहाबलः १५ अपुत्रस्याथराज्ञस्तुव
वृधेतःपुरेशिशुः तस्मिन्नुपरतेराजन्सकालयवनोनृपः १६ युद्धाभिकामोनृपतिःपर्यपृच्छद्द्विजोत्तमान् वृष्ण्यंधककुलंतस्यनारदेन
निवेदितम् १७ ज्ञात्वातुवरदानंतन्नारदान्मधुसूदनः उपप्रैक्षततेजस्वीवर्द्धतंयवनेश्वरम् १८ समृद्धोहियदाराजायवनानांमहाबलः
ततएनंनृपाम्लेछाःसंश्रित्यानुययुस्तदा १९ शकास्तुषारादरदाःपारदाःशृंगलाःखसाः पल्हवाःशतशश्चान्येम्लेच्छाहैमवतास्तथा
२० सतैःपरिवृतोराजादस्युभिःशलभैरिव नानावेषायुधैर्भीमैर्मथुरामभ्यवर्तत २१ गजवाजिखरोष्ट्राणामयुतैरर्बुदैरपि पृथिवींकं
पयामाससैन्येनमहतातदा २२ रेणुनासूर्यमार्गंतुसमवच्छाद्यपार्थिवः मूत्रेणशकृताचैवसैन्येनसस्रुजेनदीम् २३ अश्वोष्ट्रशकृतां
राशेर्निःसृतेतिजनाधिप ततोश्वशकृदित्येवनामनद्याबभूवह २४ तत्सैन्यंमहदायातंश्रुत्वावृष्ण्यंधकाग्रणीः वासुदेवःसमाभाष्यवृ
ष्णीनिदमुवाचह २५ इदंसमुत्थितंघोरंवृष्ण्यंधकभयंमहत् अवध्यश्चापिनःशत्रुर्वरदानात्पिनाकिनः २६ सामादयोभ्युपायाश्चवि-
हितास्तेस्यसर्वशः मत्तोमदबलाभ्यांतुयुद्धमेवचिकीर्षति २७ एतावानिहवासश्चकथितोनारदेनमे एतावतिचवक्तव्यंसामेवपरमंम
तम् २८ जरासंधश्चनोराजानित्यमेवनमृष्यते तथान्येपृथिवीपालावृष्णिचक्रप्रतापिताः २९ केचित्कंसवधाच्चापिविरक्तास्तद्गतानृ
पाः समाश्रित्यजरासंधमस्मानिच्छतिबाधितुम् ३० बहवोज्ञातयश्चैवयदूनांनिहतानृपैः विवर्द्धितुंनशक्ष्यामपुरेस्मिन्नितिकेशवः ३१
अपयानेमतिंकृत्वादूतंतस्मैससर्जह ततःकुंभेमहासर्पंभिन्नांजनचयोपमम् ३२ घोरमाशीविषंकृष्णंकृष्णःप्राक्षेपयत्तदा तत-
स्तंमुद्रयित्वातुस्वेनदूतेनहारयत् ३३ निदर्शनार्थंगोविंदोभीषयामासतंनृपम् सदूतःकालयवनेदर्शयामासतंघटम् ३४ का
लसर्पोपमःकृष्णइत्युक्त्वाभरतर्षभ तत्कालयवनोबुध्वात्रासनंयादवैःकृतम् ३५

१७ १८ १९ २० शलभैरिवेतिबहुत्वेदृष्टांतः

२१ २२ २३ २४ २५ २६ २७ २८ राजानोऽस्मान् २९ ३० ३१ ३२ ३३ ३४ ३५ [illegible] [illegible] [illegible]

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४

पिपीलिकानांचंडानांपूरयामासतंघटम् ससर्पोबहुभिस्तीक्ष्णैः सर्वतस्तैःपिपीलिकैः ३६ भक्ष्यमाणःकिलांगेषु भस्मीभूतो भवत्तदा
तंमुद्रयित्वातुघटंतथैवयवनाधिपः प्रेषयामासकृष्णायबाहुल्यमुपवर्णयन् ३७ वासुदेवस्तुतंदृष्ट्वायोगंविहतमात्मनः उत्सृज्यमथु
रामाशुद्वारकामभिजग्मिवान् ३८ वैरस्यांतंविधित्सुस्तुवासुदेवोमहायशाः निवेश्यद्वारकाराजन्वृष्णीनाश्वास्यचैवह ३९ पदातिः
पुरुषव्याघ्रोबाहुप्रहरणस्तदा आजगाममहायोगीमथुरांमधुसूदनः ४० तंदृष्ट्वानिर्ययौहृष्टःसकालयवनोरुषा प्रेक्षापूर्वंचकृष्णोपि
निश्चकर्षमहाबलः ४१ अथान्वगच्छत्कृष्णोविंदजिघृक्षुर्यवनेश्वरः नचैनमशकद्राजागृहीतुंयोगधर्मिणम् ४२ मांधातुस्तुसुतोराजामु-
चुकुंदोमहायशाः पुरादेवासुरेयुद्धेकृतकर्मामहाबलः ४३ वरेणच्छादितोदेवैर्निद्रामेवगृहीतवान् श्रांतस्यतस्यवागेवंतदाप्रादुरभूत्कि
ल ४४ प्रसुप्तंबोधयेद्योमांतंदहेयमहंसुराः चक्षुषाक्रोधदीप्तेनएवमाहपुनःपुनः ४५ एवमस्त्वितितंशक्रउवाचत्रिदशैःसह ससुरैर-
भ्यनुज्ञातोलोकंमानुषमागमत् ४६ सपर्वतगुहांकांचित्प्रविश्यश्रमकर्शितः सुष्वापकालमेतंवैयावत्कृष्णस्यदर्शनम् ४७ तत्सर्वंवा
सुदेवस्यनारदेननिवेदितम् वरदानंचदेवेभ्यस्तेजस्तस्यचभूपतेः ४८ कृष्णोनुगम्यमानश्चतेनम्लेच्छेनशत्रुणा तांगुहांमुचुकुंदस्य-
प्रविवेशविनीतवत् ४९ शिरःस्थानेतुराजर्षेर्मुचुकुंदस्यकेशवः संदर्शनपथंत्यक्त्वातस्थौबुद्धिमतांवरः ५० अनुप्रविश्ययवनोददर्श
पृथिवीपतिम् संतंसुप्तंकृतांताभमाससादसुदुर्मतिः ५१ वासुदेवंतुतंमत्वाघट्टयामासपार्थिवम् पादेनात्मविनाशायशलभःपावकंय
था ५२ मुचुकुंदस्तुराजर्षिःपादस्पर्शप्रबोधितः निद्राछेदेनचुक्रोधपादस्पर्शेनतेनच ५३ संस्मृत्यसवरंशक्रादवैक्षततमग्रतः सदृ
ष्टमात्रःक्रोधेनसंप्रजज्वालसर्वशः ५४ ददाहपावकस्तंतुशुष्कंवृक्षमिवाशनिः क्षणेनकालयवनंनेत्रतेजोविनिर्गतम् ५५ तंवासुदेवः
श्रीमंतंचिरसुप्तंनराधिपम् कृतकार्योब्रवीद्धीमानिदंवचनमुत्तमम् ५६ राजन्चिरप्रसुप्तोसिकथितोनारदेनमे कृतंमेसुमहत्कार्यं
स्वस्तितेस्तुव्रजाम्यहम् ५७ वासुदेवमुपालक्ष्यराजाह्रस्वंप्रमाणतः परिक्रांतंयुगमनेकालेनमहतातदा ५८ उवाचराजागोविंदंकोभ
वान्किमिहागतः कश्चकालःप्रसुप्तस्ययदिजानासिकथ्यताम् ५९ श्रीकृष्णउवाच सोमवंशोद्भवोराजाययातिर्नामनाहुषः
तस्यपुत्रोयदुर्ज्येष्ठश्चत्वारोन्येयवीयसः ६० यदुवंशात्समुत्पन्नंवसुदेवात्मजंविभो वासुदेवंविजानीहिनृपतेत्वामिहागतम् ६१

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० इतिहरिवंशेविष्णुपर्वणिटीकायांसप्तपंचाशत्तमोऽध्यायः ५७ ततइति १ २ रोहिण्याम्
रोहिणीनक्षत्रेप्येष्टे अहनिमंदवासरे शनौ हिसुसमारंभंकृतवानीश्वरः स्वयंइतिवचनात् ३ ४ ५ ६ ७ ८ त्रिकंतिसृभिः अष्टपंक्तिभिः कल्पितंत्रि

त्रेतायुगेप्रसूतोसिविदितोमेसिनारदात् इदंकलियुगंविद्धिकिमन्यत्करवाणिते ६२ ममशत्रुस्त्वयादग्धोदेवदत्तवरोनृप अवध्योयो
मयासंख्येभवेद्वर्षशतैरपि ६३ वैशंपायनउवाच इत्युक्तःसतुकृष्णेननिर्जगामगुहामुखात् अन्वीयमानःकृष्णेनकृतकार्येण
धीमता ६४ ततोददृशपृथिवीमावृतांह्रस्वकैर्नरैः स्वल्पोत्साहैरल्पबलैरल्पवीर्यपराक्रमैः ६५ परेणाधिष्ठितंचैवराज्यंकेवलमात्मनः
प्रीत्याविसृज्यगोविंदंप्रविवेशमहावनम् ६६ हिमवंतमगाद्राजातपसेधृतमानसः ततःसतपआस्थायविनिर्मुच्यकलेवरम् ६७ आरु
रोहदिवंराजाकर्मभिःस्वैर्जिताशुभैः वासुदेवोपिधर्मात्माउपायेनमहामनाः ६८ घातयित्वात्मनःशत्रुंतत्सैन्यप्रत्यपद्यत प्रभूतरथहस्त्य
श्वंवर्मशस्त्रायुधध्वजम् ६९ आदायोपययौधीमान्ससैन्यंनिहतेश्वरम् निवेदयामासततोनराधिपेतदुग्रसेनेप्रतिपूर्णमानसः जना-
र्दनोद्वारवतींचतांपुरीमशोभयत्तेनधनेनभूरिणा ७० इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिकालयवनवधोनामसप्तपं
चाशत्तमोऽध्यायः ५७ वैशंपायनउवाच ततःप्रभातेविमलेभास्करेउदितेतदा कृतजाप्योहृषीकेशोवनांतेनिषसादह १ पश्चि
मामतंदेशंदुर्गस्थानदिदृक्षया उपतस्थुःकुलश्रेष्ठायादवायदुनंदनम् २ रोहिण्यामहनिश्रेष्ठेस्वस्तिवाच्यद्विजोत्तमान् पुण्याहघोषै
र्विपुलैर्दुर्गस्यारब्धवान्क्रियाम् ३ ततःपंकजपत्राक्षोयादवान्केशिसूदनः प्रोवाचवदतांश्रेष्ठोदेवान्वृत्रारिपुर्यथा ४ कल्पितेयंमया-
भूमिःपश्यध्वंदेवसद्मवत् नामचास्याःकृतंपुर्याःख्यातियदुपयास्यति ५ इयंद्वारवतीनामपृथिव्यांनिर्मितामया भविष्यतिपुरीरम्या
शक्रस्येवामरावती ६ तान्येवास्याःकारयिष्येचिन्हान्यायतनानिच चत्वरान्राजमार्गांश्चसमान्यंतःपुराणिच ७ द्वेवाइवात्रमोदध्वंभव
तोविगतज्वराः बाधमानारिपूंस्तुग्रानुग्रसेनपुरोगमाः ८ गृह्यंतांवेश्मवास्तूनिकल्प्यतांत्रिकचत्वराः मीयंतांराजमार्गाश्चप्रासादस्थानयोगतः ९ प्रेष्यंतांशिल्पिमुख्यानांयुक्तानांवेश्मकर्मसु निसुज्यतांचदेशेषुप्रेष्यकर्मकराजनाः १० एवमुक्तेतुयदवोगृहसंग्रहतत्पराः य-
थानिवेशंसंहृष्टाश्चक्रुर्वास्तुपरिग्रहम् ११ सूत्रहस्तास्ततोमानंचक्रुर्यादवसत्तमाः पुण्येहनिमहाराजद्विजातीनभिपूज्यच १२ वास्तु
देवतकर्माणिविधिनाकारयतिच स्थपतीनथगोविंदस्तत्रोवाचमहामतिः १३

कोणपण्यांगणंत्रिकंचत्वरंचतसृभिश्चतुरस्त्रंतदेवराजमार्गःद्व
योःपण्यपंक्तियोःकल्पितंदीर्घरथ्यारूपः ९ शिल्पिमुख्यानांआव्हायकाइतिशेषः १० ११ १२ स्थपतीन्वास्तुकर्मज्ञान्सूत्रधारान् १३ ७. ७.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१४ संस्कारान् कटकाद्युद्वासनावरोधादीन् १५ ब्रह्मादीनां द्वारे पितामहं विद्यादित्यादिशास्त्रोक्तानां गृहबलिदेवतानां १६ चतुर्द्वैवानीति पाठे देवाः शुन्ह्याक्षाद
यस्तद्दंति तांश्चतत्तत्स्थापनपूर्वकं पूजयेदित्यर्थः १७ १८ १९ २० २१ २२ २३ यथामे ब्रह्मादयो मान्यास्तथा त्वं देवमान्यो ब्रह्मादीनां मान्योसि वः युष्मत्तः पू

अस्मदर्थे सुकृविहितं क्रियतामत्र मंदिरम् विविक्तचत्वरपर्यंतं सुनिविष्टपृथुदैवतम् १४ तेतथेति महाबाहुमुक्त्वा स्थपतयस्तदा दुर्गकर्माणि
संस्कारानुपकल्प्य यथाविधि १५ यथान्यायं निर्मिमिरे दुर्गाण्यायतनानि च स्थानानि निदधुश्चात्र ब्रह्मादीनां यथाक्रमम् १६ अपामग्नेः सु
रेशस्य हषदोलूखलस्य च चातुर्द्वैवानि चत्वारि द्वाराणि निदधुश्च ते १७ शुन्हाक्षमैंद्रभल्लाटपुष्पदंतं तथैव च तेषु वेश्मसु युक्तेषु यादवेषु म
हात्मसु १८ पुर्याः क्षिप्रं निवेशार्थं चिंतयामास माधवः तस्य देवोत्थिता बुद्धिर्विमला क्षिप्रकारिणी १९ पुर्याः प्रियकरी सा वै यदूनामभिव
र्द्धिनी शिल्पिमुख्यस्तु देवानां प्रजापतिसुतः प्रभुः २० विश्वकर्मा स्वसामर्थ्यात् पुरीं संस्थापयिष्यति मनसा समनुध्याय तस्यागमनकारणा
त् त्रिदशाभिमुखः कृष्णो विविक्ते समपद्यत २१ तस्मिन्नेव ततः काले शिल्पाचार्यो महामतिः विश्वकर्मा सुरश्रेष्ठः कृष्णस्य प्रमुखे स्थितः
२२ विश्वकर्मोवाच शक्रेण प्रेषितः क्षिप्रं तव विष्णो धृतव्रत किंकरः समनुप्राप्तः शाधि मां किं करोमि ते २३ यथासौ देवदेवो मे श
करश्च यथाव्ययः तथा त्वं देवमान्यो मे विशेषो नास्ति वः प्रभो २४ त्रैलोक्यज्ञापिकां वाचमुत्सृज त्वं महाभुज एषोस्मि परिदृष्टार्थः किं करोमि प्र
शाधि माम् २५ श्रुत्वा विनीतवचनं केशवो विश्वकर्मणः प्रत्युवाच यदुश्रेष्ठः कंसारिस्तुल्यवचः २६ श्रुतार्थो देवगुह्यस्य भवान्यत्र वयं स्थिताः
अवश्यं त्विह कर्तव्यं सदनं मे सुरोत्तम २७ तदियं पूः प्रकाशार्थं निवेश्याम यि सुव्रत मत्प्रभावानुरूपैश्च गृहैश्चेयं समंततः २८ उत्तमा च पृथि
व्यां वै यथा स्वर्गेमरावती तथेयं हि त्वया कार्या शक्तोह्यसि महामते २९ मम स्थानमिदं कार्यं यथा वै त्रिदिवे तथा मर्त्याः पश्यंतु मे लक्ष्मीं पु
र्यां यदुकुलस्य च ३० एवमुक्तस्ततः प्राह विश्वकर्मा मतीश्वरः कृष्णमक्लिष्टकर्माणं देवामित्रविनाशनम् ३१ सर्वमेतत्करिष्यामि यत्त्वयाभि
हितं प्रभो पुरी त्वियं जनस्यास्य न पर्याप्ता भविष्यति ३२ भविष्यति च विस्तीर्णा वृद्धिरस्याः सुशोभना चत्वारः सागराह्यस्या विचरिष्यंति रू
पिणः ३३ यदीच्छेत्सागरः किंचिदुत्स्रष्टुमपि तोयराट् ततः स्यायतलक्षण्या पुरी स्यात्पुरुषोत्तम ३४ एवमुक्तस्ततः कृष्णः प्रागेव कृतनिश्च
यः सागरं सरितां नाथमुवाच वदतां वरः ३५ समुद्र दश च द्वे च योजनानि जलाशये प्रतिसंक्रियतामात्मा यद्यस्ति मयि मान्यता ३६ अवकाशे
त्वया दत्ते पुरीयं मामकं बलम् पर्याप्तविषया रस्या समग्रं विसहिष्यति ३७

जायां बहुत्वं विशेषो विशिष्टत्वं नास्ति २४ २५ २६ २७ प्रकाशार्थं स्वकोश
लस्य मयि मन्निमित्तम् २८ २९ मम स्थानं वैकुंठं इदं रहस्यं कार्यम् ३० मतीश्वरः मतिमतां प्रभुः ३१ पुरी पूर्ये र्याप्नूपिः ३२ ३३ ३४ ३५ ३६ ३७ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मारुतेनयोगेनवायुसंकोचनप्रधानेन ३८ ३९ ४० ४१ बाह्यतोरणाग्रेष्ववंदनमालिका ४२ परिचर्याक्षयंस्नानादिगृहम् ४३ ४४ ४५ गांपृथिवीम् ४६
४७ वेश्मोत्तमेषुउच्चवेश्मसुघनाचितामेघव्याप्ता अत्युच्चेत्यर्थः ४८ निचयशालिनीसमृद्धिमती ४९ सुक्षेत्रापुण्याधिवसतिः ५० ५१ ५२ ५३ उदयाग्रैरत्युच्चसौ

ततः कृष्णस्यवचनंश्रुत्वानदनदीपतिः समारुतेनयोगेनउत्ससर्जजलाशयम् ३८ विश्वकर्माततःप्रीतःपुर्याःसंलक्ष्यवास्तुतत् गोविं
देचैवसन्मानंकृतवान्सागरस्तदा ३९ विश्वकर्माततःकृष्णमुवाचयदुनंदनम् अद्यप्रभृतिगोविंदसर्वेसमधिरोहत ४० मनसानि
र्मिताचेयंमयापूःप्रवराविभो अचिरेणैवकालेनगृहसंबाधमालिनी ४१ भविष्यतिपुरीरम्यासुद्वाराबाह्यतोरणा चयाट्टालककेयू
रापृथिव्याःककुदोपमा ४२ अंतःपुरंचकृष्णस्यपरिचर्याक्षयंमहत् चकारतस्यापुर्यांवैदेशेत्रिदशपूजिते ४३ ततःसानिर्मिताकांता
पुरीद्वारवतीतदा मानसेनप्रयत्नेनवैष्णावीविश्वकर्मणा ४४ विधानविहितद्वाराप्राकारवरशोभिता परिखाचयसंगुप्ताप्रासादप्राकार
तोरणा ४५ कांतनारीनरगणावणिग्भिरुपशोभिता नानापण्यगणाकीर्णाखेचरीवचगांगता ४६ प्रपावापीप्रसन्नोदाउद्यानैरुपशो
भिता समंततःसंवृतांगीवनितेवायतेक्षणा ४७ समृद्धचत्वरवतीवेश्योत्तमघनाचिता रथ्याकोटिसहस्राढ्याशक्रस्यराजपथोत्तरा ४८
भूषयंतीससमुद्रांसास्वर्गमिंद्रपुरीयथा पृथिव्यांसर्वरत्नानामेकानिचयशालिनी ४९ सुराणामपिसुक्षेत्रासासंतक्षोभकारिणी अभ्र
काशंतदाकाशंप्रासादैरुपकुर्वती ५० पृथिव्यांपृथुसंघुष्टायाजनौघप्रतिनादिता औघैश्चवारिराजस्यशिशिरीकृतमारुता ५१ अनू
पोपवनैःकांतैःकांत्याजनमनोहरा सतारकाद्यौरिवसाद्वारकाप्रत्यराजत ५२ प्राकारेणार्कवर्णेनशातकौंभेनसंवृता हिरण्यप्रतिब
र्गैश्चगृहैर्गंभीरनिःस्वनैः ५३ शुभ्रमेघप्रतीकाशैर्द्वारैःसौधैश्चशोभिता क्वचित्क्वचिदुदयाग्रैरुपावृतमहापथा ५४ तामावसन्सुरीक्ष
घ्याःसर्वेयादवनंदनाः अभिप्रेतजनाकीर्णांसोमःखमिवभासयन् ५५ विश्वकर्माचतांकृत्वापुरींशक्रपुरीमिव जगामत्रिदिवंदेवोगोविं
देनाभिपूजितः ५६ भूयश्चबुद्धिरभवत्कृष्णस्यविदितात्मनः जनानिमान्धनौघैश्चतर्पयेयमहंयदि ५७ सवैश्रवणसंस्पृष्टंनिधीना
मुत्तमंनिधिम् शंखमाह्वयतोपेंद्रोनिशिस्वेभवनेप्रभुः ५८ सशंखःकेशवाह्वानंज्ञात्वाहिनिधिराट्स्वयम् आजगामसमीपंवैतस्य
द्वारवतीपतेः ५९ सशंखःप्रांजलिर्भूत्वाविनयादवनिंगतः कृष्णंविज्ञापयामासयथावैश्रवणंतथा ६० भगवन्किंमयाकार्यंसुराणांधि
तरक्षिणा नियोजयमहाबाहोयत्कार्यंयदुनंदन ६१ तमुवाचहृषीकेशःशंखंगुह्यकमुत्तमम् जनाःकृशधनायेस्मिंस्तान्धनेनाभिपूरय
६२

धैःउपावृतः छाययापिहितः महापथोयस्यांसा ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नेच्छाम्यनशितंद्रष्टुंकृशंमलिनमेवच देहीतिचैवयाचंतंनगर्यांनिर्द्धनंनरम् ६३ वैशंपायनउवाच गृहीत्वाशासनंमूर्ध्नानि
धिराट्केशवस्यह निधीनाज्ञापयामासद्वारवत्यांगृहेगृहे ६४ धनौघैरभिवर्षध्वमित्यूचुःसर्वतयाचते नाधनोविद्यतेतत्रक्षीणभाग्यो
पिवानरः ६५ कृशोवामलिनोवापिद्वारवत्यांकथंचन द्वारवत्यांपुरिपुराकेशवस्यमहात्मनः ६६ चकारवायोराह्वानंभूयश्चपुरुषोत्तमः
तमस्यएवभगवान्यादवानांप्रियंकरः ६७ प्राणयोनिस्तुभूतानांसुपतस्थेगदाधरम् एकमासीनमेकांतेदेवगुह्यधरंप्रभुम् ६८ किंम
यादेवकर्तव्यंसर्वगेनाशुगामिना यथैवदूतोदेवानांतथैवास्मितवानघ ६९ तमुवाचततःकृष्णोरहस्यंपुरुषोहरिः मारुतंअगतःप्राण
रूपिणंसमुपस्थितम् ७० गच्छमारुतदेवेशमनुमान्यसहामरैः सभांसुधर्मामादायदेवेभ्यस्त्वमिहानय ७१ यादवाधार्मिकाह्येतेविक्रां-
ताश्चसहस्रशः तस्यांविशेयुरेतेवैनत्वन्याकृत्रिमाभवेत् ७२ यात्व्यक्षयासभारम्याकामगाकामरूपिणी ७३ सायदून्धारयेत्सर्वान्यथैव-
त्रिदशांस्तथा ७३ संगृह्यवचनंतस्यकृष्णस्याक्लिष्टकर्मणः वायुरात्मोपमगतिर्जगामत्रिदिवालयम् ७४ सोऽनुमान्यसुरान्सर्वान्कृष्णवाक्यं
निवेद्यच सभांसुधर्मामादायपुनरायान्महीतलम् ७५ सुधर्मायस्तुधर्मांतांकृष्णायाक्लिष्टकारिणे देवोदेवसभांदत्वावायुरंतरधीयत ७६
द्वारवत्यांतुसामध्येकेशवेननिवेशिता सुधर्मायदुमुख्यानांदेवानांत्रिदिवेयथा ७७ एवंदिव्यैश्चभोगैश्चजलजैश्चाव्ययोहरिः द्युरे-
लंकरोतिस्मपुरींस्वांप्रमदामिव ७८ मर्यादाश्चैवसंचक्रेश्रेणीश्चप्रकृतीस्तथा बलाध्यक्षांश्चयुक्तांश्चप्रकृतीशास्तथैवच ७९ उग्रसेनं
नरपतिंकाश्यपंचापिपुरोहितम् सेनापतिमनाधृष्टिंविकद्रुमंत्रिपुंगवम् ८० यादवानांकुलकरान्स्थविरान्दशतत्रवै मतिमान्स्थाप
यामाससर्वकार्येष्वनंतरान् ८१ रथेष्वतिरथोयंतादारुकःकेशवस्यवै योधमुख्यश्चयोधानांप्रवरःसात्यकिःकृतः ८२ विधानमेवंकृत्वा
थकृष्णःपुर्यामनिंदितः मुमुदेयदुभिःसार्द्धंलोकस्रष्टामहीतले ८३ रैवतस्याथकन्यांचरेवतींशीलसंमताम् प्राप्तवान्बलदेवस्तुकृ-
ष्णस्यानुमतेतदा ८४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिद्वारवतीनिर्माणंनाम अष्टपंचाशत्तमोऽध्यायः ५८ छ
वैशंपायनउवाच एतस्मिन्नेवकालेतुजरासंधःप्रतापवान् नृपानुद्योजयामासचेदिराजप्रियेप्सया १ सुतायाभीष्मकस्याथरुक्मि
प्यारुक्मभूषणः शिशुपालस्यनृपतेर्विवाहोभविताकिल २

दीपनं ८० स्थविरान्दशेतिवक्ष्यमाणान्उद्धवोवसुदेवश्चकंकोविपृथुरेवच श्वफल्कश्चित्रकश्चैव ७६
गदःसत्यकएवच बलभद्रःपृथुश्चैवमंत्रेष्वभ्यंतरादशेति ८१ ८२ ८३ ८४ इतिहरि॰वि॰टी॰अष्टपंचाशत्तमोऽध्यायः ५८ एतस्मिन्निति चेदिराजोदमघोषः तस्यप्रिय
[illegible]प्सया १ तदेवाह सुतायाइति २ छ॰ छ॰

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३ ४ ५ ६ निवृत्ताः निष्प्रचाराः शत्रवोयस्यतंनिवृत्तशत्रुंकीलितशत्रुमित्यर्थः ७ ८ ९ १० ११ १२ १३ १४ १५ श्रवादाकर्णनात् १६ १७

दंतवक्रस्यतनयंसुवक्रममितौजसम् सहस्राक्षसमंयुद्धेमायाशतविशारदम् ३ पौंड्रस्यवासुदेवस्यतथापुत्रंमहाबलम् सुदेवं
वीर्यसंपन्नंपृथगक्षौहिणीपतिम् ४ एकलव्यस्यपुत्रंचवीर्यवंतमहाबलम् पुत्रंचपांड्यराजस्यकलिंगाधिपतिंतथा ५ कृताप्रियंच
कृष्णेनवेणुदारिंनराधिपम् अंशुमंतंतथाक्राथंश्रुतधर्माणमेवच ६ निवृत्तशत्रुंकालिंगंगांधाराधिपतिंतथा पसूह्यंचमहावीर्यंकौशा
ल्याधिपमेवच ७ भगदत्तोमहासेनःशलःशाल्वोमहाबलः भूरिश्रवामहासेनःकुंतिवीर्यश्चवीर्यवान् स्वयंवरार्थंसंप्राप्ताभोजराजनिवे
शने ८ जनमेजयउवाच कस्मिन्देशेनृपोजज्ञेरुक्मीवेदविदांवरः कस्यान्ववायेद्युतिमान्संभूतोद्विजसत्तम ९ वैशंपाय
नउवाच राजर्षेर्यदुवंश्यस्यासीत्विदर्भोनामवैसुतः विंध्यस्यदक्षिणेपार्श्वेविदर्भान्यान्यवेशयत् १० क्रथकैशिकमुख्यास्तुपुत्रास्तस्य
महाबलाः बभूवुर्वीर्यसंपन्नाःपृथग्वंशकरानृपाः ११ तस्यान्ववायेभीमस्यजज्ञिरेवृष्णयोनृपाः क्रथस्यत्वंशुमान्वंशोभीष्मकःकैशिक
स्यतु १२ हिरण्यरोमेत्याहुर्यंदाक्षिणात्येश्वरंनृपाः अगस्त्यगुप्तामाशांयःकुंडिनस्थोन्वशान्नृपः १३ रुक्मीतस्याभवत्पुत्रोरुक्मिणीचावि-
शांपते रुक्मीचास्त्राणिदिव्यानिद्रुमात्प्रापमहाबलः १४ जामदग्न्याच्चरामात्ब्राह्ममस्त्रमवाप्तवान् प्रास्पर्धतसकृष्णेननित्यमद्भुतक
र्मणा १५ रुक्मिणीत्वभवद्राजन्रूपेणासदृशीभुवि चकमेवासुदेवस्तांश्रवादेवमहाद्युतिः १६ सतयाचाभिलषितःश्रवादेवजनार्दनः
तेजोवीर्यबलोपेतःसमेभर्ताभवेदिति १७ तांददौनचकृष्णायद्वेषाद्रुक्मीमहाबलः कंसस्यवधसंतापात्कृष्णायामिततेजसे याच्यमानाय
कंसस्यद्वेष्योयमितिचिंतयन् १८ चैद्यस्यार्थेसुनीथस्यजरासंधस्तुभूमिपः वरयामासतांराजाभीष्मकंभीमविक्रमम् १९ चेदिराजस्य
तुवसोरासीत्पुत्रोबृहद्रथः मगधेषुपुरायेननिर्मितोसौगिरिव्रजः २० तस्यान्ववायेजज्ञेसौजरासंधोमहाबलः वसोरेवतदावंशेदमघोषो
पिचेदिराट् २१ दमघोषस्यपुत्रास्तुपंचभीमपराक्रमाः भगिन्यांवसुदेवस्यश्रुतश्रवसिजज्ञिरे २२ शिशुपालोदशग्रीवोरैभ्योथोपदि-
शोबली सर्वास्त्रकुशलावीरावीर्यवंतोमहाबलाः २३ ज्ञातेःसुमानवंशस्यसुनीथःप्रददौसुतम् जरासंधस्तुसुतवद्ददर्शैनंजुगोपच
२४ जरासंधंपुरस्कृत्यवृष्णिशत्रुंमहाबलम् कृतान्यागांसिचैद्येनवृष्णीनांचाप्रियैषिणा २५ जामातात्वभवत्तस्यकंसस्तस्मिन्हते
युधि कृष्णार्थंवैरमभवत्जरासंधस्यवृष्णिभिः २६

१८ सुनीथस्यसुनीथपुत्रस्यशिशुपालस्य १९ २० २१ २२ २३ सुनीथःसुतंशि
शुपालंददौ तवायंसहकारीभूयादिति २४ वृष्णीनांदुःखदानीतिशेषः २५ तत्रनिमित्तमाह जामातेति २६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वरयामासजरासंधः सुनीथार्थेशिशुपालार्थे २७ यायिनागच्छतासहसहायेनवा २८ २९ ३० ३१ अथकैशिकानांदेशानांभर्ताज्येष्ठदमघोषः ३२

चतुर्भुजाचतुरश्चवताऐंद्रेज्येष्ठानक्षत्रे ३३ ३४ ३५ ३६ ३७ ३८ ३९ प्रभासद्भिः प्रकर्षेणभासमानैः ४० ४१ ४२ प्रमाथेहरणेप्रणिधायनि

भीष्मकंवरयामाससुनीथार्थेचरुक्मिणीम् तांददौभीष्मकश्चापिशिशुपालायवीर्यवान् २७ ततश्चैद्यमुपादायजरासंधोनराधिपः
ययौविदर्भान्सहितोदंतवक्रेणयायिना २८ अनुज्ञातश्चपौंड्रेणवासुदेवेनधीमता अंगवंगकलिंगानामीश्वरः समहाबलः २९ मानयि
ष्यंश्चतान्रुक्मीप्रत्युद्गम्यनराधिपान् वरयापूजयोपेतांस्तान्निनायपुरींप्रति ३० पितृष्वसुः प्रियार्थंचरामकृष्णावुभावपि प्रययुर्वृष्णय
श्चान्येरथैस्तत्रबलान्विताः ३१ अथकैशिकभर्तातान्प्रतिगृह्ययथाविधि पूजयामासपूजार्हान्बहिश्चैवन्यवेशयत् ३२ श्वोभाविनिवि
वाहेचरुक्मिणीनिर्ययौबहिः चतुर्युजारथेनैंद्रेदेवतायतनेशुभे ३३ इंद्राणीमर्चयिष्यंतीकृतकौतुकमंगला दीप्यमानेनवपुषाबलेन
महतावृता ३४ तांददर्शतदाकृष्णोलक्ष्मींसाक्षादिवस्थिताम् रूपेणाग्र्येणसंपन्नांदेवतायतनांतिके ३५ वन्हेरिवशिखांदीप्तांमायांभू
मिगतामिव पृथिवीमिवगंभीरामुत्थितांपृथ्वीतलात् ३६ मरीचिमिवसोमस्यसौम्यांस्त्रीविग्रहांभुवि श्रीमिवाश्रयविनापद्मंभविष्यां
श्रीसहायिनीम् कृष्णोनमनसादृष्टांदुर्निरीक्ष्यांसुरैरपि ३७ श्यामावदातासाह्यासीत्पृथुचार्वायतेक्षणा ताम्रोष्ठनयनापांगीपीनो
रुजघनस्तनी ३८ बृहतीचारुसर्वांगीतन्वीशशिसिताननी ताम्रतुंगनखीसुभ्रूर्नीलकुंचितमूर्धजा ३९ अत्यर्थरूपतःकांतापीन
श्रोणिपयोधरा तीक्ष्णशुक्लैःसमैर्दंतैःप्रभासद्भिरलंकृता ४० अनन्याप्रमदालोकेरूपेणयशसाश्रिया रुक्मिणीरूपिणीदेवीपांडुर
क्षौमवासिनी ४१ तांदृष्ट्वावबृधेकामःकृष्णस्यप्रियदर्शनाम् हविषेवानलस्यार्चिर्मनस्तस्यांसमादधत् ४२ रामेणसहनिश्चित्यकेशे
वस्तुमहाबलः तत्प्रमाथेकरोद्बुद्धिंवृष्णिभिःप्रणिधायच ४३ कृतेतुदेवताकार्येनिष्क्रामंतींसुरालयात् उन्मथ्यसहसाकृष्णःस्वंनि-
नायरथोत्तमम् ४४ वृक्षमुत्पाट्यरामोपिजघानापततःपरान् समनह्यंतदाशार्हास्तदाज्ञप्ताश्चसर्वशः ४५ तैरथैर्विविधाकारैःसमु
च्छ्रितमहाध्वजैः वाजिभिर्वारणैश्चैवपरिवव्रुर्हलायुधम् ४६ आदायरुक्मिणींकृष्णोजगामाशुपुरींप्रति रामेभारंतमासज्ययुयुधा
नेचवीर्यवान् ४७ अक्रूरेविपृथौचैवगदेचकृतवर्मणि चक्रदेवेसुदेवेचसारणेचमहाबले ४८ निर्वृत्तशत्रौविक्रांतेभंगकारेविदूर
थे उग्रसेनात्मजेकंकेशतद्युम्नेचकेशवः ४९ राजाधिदेवेमृदरेप्रसेनेचित्रकेतथा अतिदांतेबृहद्दुर्गेश्वफल्केसत्यकेपृथौ ५०

बेद्य ४३ ४४ ४५ ४६ युयुधानेसात्यकौ ४७ ४८ ४९ ५० ७२ ७२ ७२ ७२ ७२ ७२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५१ ५२ ५३ ५४ ५५ कारूषोदंतवक्रः ५६ ५७ ५८ ५९ ६० ६१ ६२ कलापिनः बाणहस्ताः ६३ ६४ बलीशिशुपालभ्राता

वृष्ण्यंधकेषुचान्येषुमुख्येषुमधुसूदनः गुरुमासज्यतंभारंययौद्वारवतींप्रति ५१ दंतवक्त्रोजरासंधःशिशुपालश्चवीर्यवान् सन्नद्धा
निर्ययुःक्रुद्धाजिघांसंतोजनार्दनम् ५२ अंगवंगकलिंगैश्चसार्द्धंपौंड्रैश्चवीर्यवान् निर्ययौचेदिराजस्तुभ्रातृभिःसमहारथैः ५३ तान्
प्रत्यगृण्हन्संरब्धान्वृष्णिवीरामहारथाः संकर्षणपुरस्कृत्यवासवमरुतोयथा ५४ आपतंतंहिवेगेनजरासंधंमहाबलम् षड्भिर्विव्या
धनाराचैर्युयुधानोमहामृधे ५५ अक्रूरोदंतवक्त्रंतुविव्याधनवभिःशरैः तंप्रत्यविध्यत्कारूषोबाणैर्दशभिराशुगैः ५६ विपृथुःशिशुपा
लंतुशरैर्विव्याधसप्तभिः अष्टभिःप्रत्यविध्यत्तंशिशुपालःप्रतापवान् ५७ गवेषणस्तुचैद्यंतुषड्भिर्विव्याधमार्गणैः अतिदांतस्तथाष्टाभि
र्बृहद्दुर्गश्चपंचभिः ५८ प्रतिविव्याधतांश्चैद्यःपंचभिःपंचभिःशरैः जघानाश्वांश्चचतुरश्चतुर्भिर्विपृथोःशरैः ५९ बृहद्दुर्गस्यभल्लेनशिर
श्चिच्छेदचारिहा गवेषणस्यसूतंतुप्राहिणोद्यमसादनम् ६० हताश्वंतुरथंत्यक्त्वाविपृथुस्तुमहाबलः आरुरोहरथंशीघ्रंबृहद्दुर्गस्यवीर्य
वान् ६१ विपृथोःसारथिश्चापिगवेषणरथंद्रुतम् आरुह्यजवनानश्वान्नियंतुमुपचक्रमे ६२ तेक्रुद्धाःशरवर्षेणसुनीथसमवाकिरन्
नृत्यतरथमार्गेषुचापहस्ताःकलापिनः ६३ चक्रदेवोदंतवक्त्रंबिभेदोरसिपत्रिणा षड्भ्यपंचभिश्चैवविव्याधयुधिमार्गणैः ६४ ताभ्यांसवि
द्धोदशभिर्बाणैर्मर्मातिगैःशितैः ततोबलीचक्रदेवंबिभेददशभिःशरैः ६५ पंचभिश्चापिविव्याधसोपिदूराद्विदूरथम् विदूरथोपितंषड्भि
र्विव्याधाजौशितैःशरैः ६६ त्रिंशताप्रत्यविध्यत्तंबलीबाणैर्महाबलम् कृतवर्माबिभेदाजौराजपुत्रंत्रिभिःशरैः ६७ न्यहनत्सारथिंचास्यध्व
जंचिच्छेदसोच्छ्रितम् प्रतिविव्याधतंक्रुद्धःपौंड्रःषड्भिःशिलीमुखैः ६८ धनुश्चिच्छेदचाप्यस्यभल्लेनकृतवर्मणः निवृत्तशत्रुःकालिंगंबिभे
दनिशितैःशरैः तोमरेणांसदेशेतंनिर्बिभेदकलिंगराट् ६९ गजेनासाद्यकंकस्तुगजसंगस्यवीर्यवान् तोमरेणाबिभेदाङ्गंबिभेदाङ्गश्चतं
शरैः ७० चित्रकश्चश्वफल्कश्चसात्यकश्चमहारथः कलिंगस्यतथानीकंनाराचैर्बिभिदुःशतैः ७१ तंनिसृष्टद्रुमेणाजौवंगराजस्यकुंजरम्
जघाननरामःसंक्रुद्धोवंगराजंचसंयुगे ७२ तंहत्वारथमारुह्यधनुरादायवीर्यवान् संकर्षणोजघानोग्रैर्नाराचैःकेशिकान्बहून् ७३ ष
ड्भिर्निहत्यकारूषान्महेष्वासान्सवीर्यवान् शतंजघानसंक्रुद्धोमागधानांमहाबले ७४ निहत्यतान्महाबाहुर्जरासंधंततोभ्ययात् तमा
पतंतंविव्याधनाराचैर्मागधस्त्रिभिः ७५ तंविभेदाष्टभिःक्रुद्धोनाराचैर्मुशलायुधः चिच्छेदचास्यभल्लेनध्वजंहेमपरिष्कृतम् ७६

६५ ६६ राजपुत्रंपौंड्रकंवासुदेवसुतम् ६७ ६८ ६९ ७० ७१ निसृष्टेनप्रक्षिप्तेनद्रुमेणनिष्पत्रवृक्षेण ७२ ७३ ७४ ७५ ७६ ७७ ७८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७७ ७८ ७९ ८० जुगूहघोषःसमाद्गणोत् ८१ इतिश्रीहरिवंशेविष्णुपर्वणिटीकायामेकोनषष्टितमोऽध्यायः ५९ कृष्णेनेति १ २ ३ ४ ५ ६ ७ ८

तद्युद्धमभवद्घोरंतेषांदेवासुरोपम् सृजतांशरवर्षाणिनिघ्नतामितरेतरम् ७७ गजैर्गजाहिसंक्रुद्धाःसंनिपेतुःसहस्रशः रथैरथाश्चसं
रब्धाःसादिनश्चापिसादिभिः ७८ पदातयःपदातीश्चशक्तिचर्मासिपाणयः छिंदंतश्चोत्तमांगानिविचेरुर्युधितेपृथक् ७९ असीनांपा
त्यमानानांकवचेषुमहास्वनः शराणांपततांशब्दःपक्षिणामिवसुस्रुवे ८० भेरीशंखमृदंगानांवेणूनांचमृधेध्वनिम् जुगूहघोषःशस्त्रा
णांयोधानांचमहात्मनाम् ८१ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांरुक्मिणीहरणनामएकोनषष्टितमोऽ
ध्यायः ५९ वैशंपायनउवाच कृष्णेनह्रियमाणांतारुक्मीश्रुत्वातुरुक्मिणीम् प्रतिज्ञामकरोत्क्रुद्धःसमक्षंभीष्मकस्यह १
अहत्वायुधिगोविंदमनानीयचरुक्मिणीम् कुंडिनंनप्रवेक्ष्यामिसत्यमेतद्ब्रवीम्यहम् २ आस्थायसरथंवीरःसमुद्यतायुधध्वजम् जवेन
प्रययौक्रुद्धोबलेनमहतावृतः ३ तमन्वयुर्नृपाश्चैवदक्षिणापथवर्तिनः क्राथोंऽशुमान्श्रुतर्वाचवेणुदारिश्चवीर्यवान् ४ भीष्मकस्यसु
ताश्चान्येरथेनरथिनांवराः क्रथकैशिकमुख्याश्चसर्वएवमहारथाः ५ तेगत्वादूरमध्वानंसरितंनर्मदामनु गोविंददहृशुःक्रुद्धाःसहैव
प्रिययास्थितम् ६ अवस्थाप्यचतत्सैन्यंरुक्मीमदबलान्वितः चिकीर्षुर्द्वैरथंयुद्धमभ्ययान्मधुसूदनम् ७ सविव्याधचतुःषष्ट्यागोविंदं
निशितैःशरैः तंप्रत्यविध्यत्सप्तत्याबाणैर्युधिजनार्दनः ८ यतमानस्यचिच्छेदध्वजंचास्यमहाबलः जहारचशिरःकायात्सारथेस्तस्यवीर्य
वान् ९ तंकृच्छ्रगतमाज्ञायपरिवव्रुर्जनार्दनम् दाक्षिणात्याजिघांसंतोराजानःसर्वएवहि १० तमंशुमान्महाबाहुर्विव्याधदशभिःशरैः
श्रुतर्वापंचभिःक्रुद्धोवेणुदारिश्चसप्तभिः ११ ततोंऽशुमंतंगोविंदोबिभेदोरसिवीर्यवान् निषसादरथोपस्थेव्यथितःसनराधिपः १२ श्रु
तर्वाणंजघानाश्वांश्चतुर्भिश्चतुरःशरैः वेणुदारेर्ध्वजंछित्वाभुजंविव्याधदक्षिणम् १३ तथैवचश्रुतर्वाणंशरैर्विव्याधपंचभिः शिथिलःस
ध्वजंश्रित्वान्यषीदत्सव्यथान्वितः १४ मुंचंतःशरवर्षाणिवासुदेवंततोऽभ्ययुः क्रथकैशिकमुख्याश्चसर्वएवमहारथाः १५ बाणैर्बाणांश्च
चिच्छेदतेषांयुधिजनार्दनः जघानचैषांसंरब्धःपतमानांश्चतान्शरान् १६ पुनरन्यांश्चतुःषष्ट्याजघाननिशितैःशरैः क्रुद्धोनापततोवी
रानाद्रवत्समहाबलः १७ विद्रुतंस्वबलंदृष्ट्वारुक्मीक्रोधवशंगतः पंचभिर्निशितैर्बाणैर्विव्याधोरसिकेशवम् १८ सारथिंचास्यविव्याध
सायकैर्निशितैस्त्रिभिः आजघानशरेणास्यध्वजंचनतपर्वणा १९ केशवस्त्वरितंदृष्ट्वाक्रुद्धोविव्याधमार्गणैः धनुश्चिच्छेदचाप्यस्ययत
मानस्यरुक्मिणः २०

९ तंरुक्मिणंजनार्दनंजिघांसंतः १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अथान्यद्धनुरादाय रुक्मी कृष्णजिघांसया प्रादुश्चकार चान्यानि दिव्यान्यस्त्राणि वीर्यवान् २१ अस्त्रैरस्त्राणि संवार्य तस्य कृष्णो महाब
लः पुनश्चिच्छेद तच्चापं रथं चास्य त्रिभिः शरैः २२ सच्छिन्नधन्वा विरथः खड्गमादाय चर्म च उत्पपात रथाद्वीरो गरुत्मानिव वीर्यवान् २३ तस्या
भिपततः खड्गं चिच्छेद युधि केशवः नाराचैश्च त्रिभिः क्रुद्धो बिभेदैनमथोरसि २४ स पपात महाबाहुर्वसुधामनुनादयन् विसंज्ञो मूर्च्छितो
राजा वज्रेणेव महासुरः २५ तांश्च राज्ञः शरैः सर्वान्पुनर्विव्याध माधवः रुक्मिणं पतितं दृष्ट्वा व्यद्रवन्त नराधिपाः २६ विचेष्टमानं तं भूमौ भ्रा
तरं वीक्ष्य रुक्मिणी पादयोर्न्यपतद्विष्णोर्भ्रातुर्जीवितकाङ्क्षिणी २७ तामुत्थाप्य परिष्वज्य सान्त्वयामास केशवः अभयं रुक्मिणे दत्त्वा प्रययौ स्व
पुरीं ततः २८ वृष्णयोपि जरासंधं भङ्क्त्वा तांश्चैव पार्थिवान् प्रययुर्द्वारकां हृष्टाः पुरस्कृत्य हलायुधम् २९ प्रयाते पुण्डरीकाक्षे श्रुतवाभ्येत्य सङ्ग
रे रुक्मिणं रथमारोप्य प्रययौ स्वां पुरीं प्रति ३० अनानीय स्वसारं तु रुक्मी मानमदान्वितः हीनप्रतिज्ञो नैच्छत्स प्रवेष्टुं कुण्डिनं पुरम् ३१ विद-
र्भेषु निवासार्थं निर्ममेन्यत्पुरं महत् तद्भोजकटमित्येव बभूव भुवि विश्रुतम् ३२ तत्रौजसा महातेजा दक्षिणां दिशमन्वशात् भीष्मकः कु
ण्डिने चैव राजा वास महाभुजः ३३ द्वारकां चापि संप्राप्ते रामे वृष्णिबलान्विते रुक्मिण्याः केशवः पाणिं जग्राह विधिवत्प्रभुः ३४ ततः सह तया
रेमे प्रियया प्रीयमाणया सीतयेव पुरा रामः पौलोम्येव पुरंदरः ३५ सा हि तस्याभवज्ज्येष्ठा पत्नी कृष्णस्य भामिनी पतिव्रता गुणोपेता रूपशी
लगुणान्विता ३६ तस्यामुत्पादयामास पुत्रान्दश महारथान् चारुदेष्णं सुदेष्णं च प्रद्युम्नं च महाबलम् ३७ सुषेणं चारुगुप्तं च चारुबा
हुं च वीर्यवान् चारुविन्दं सुचारुं च भद्रचारुं तथैव च ३८ चारुं च बलिनां श्रेष्ठं सुतां चारुमतीं तथा धर्मार्थकुशलास्ते तु कृतास्त्रा युद्धदुर्मदाः
३९ महिषीः सप्त कल्याणीस्ततोन्या मधुसूदनः उपयेमे महाबाहुर्गुणोपेताः कुलोद्भवाः ४० कालिन्दीं मित्रविन्दां च सत्यां नाग्नजितीं त
थापि सुतां जाम्बवतश्चापि रोहिणीं कामरूपिणीम् ४१ मद्रराजसुतां चापि सुशीलां शुभलोचनाम् सात्राजितीं सत्यभामां लक्ष्मणां जाल
हासिनीम् ४२ शैब्यस्य च सुतां तन्वीं रूपेणाप्सरसोपमाम् स्त्रीसहस्राणि चान्यानि षोडशातुलविक्रमः उपयेमे हृषीकेशः सर्वा भेजे
सताः समम् ४३

३९ ४० कालिन्दीं सूर्यस्य पुत्रीं यमुनां प्रथमां मित्रविन्दां राजाधिदेव्यां पितृष्वसरि आवन्त्याज्जातां द्वितीयां सत्यां अयोध्यापतेर्नग्नजितः पुत्रीं
नाग्नजितीं तृतीयां जाम्बवतः सुतां जाम्बवतीं चतुर्थीं रोहिणीं श्रुतकीर्तौ पितृष्वसरि कैकेयाज्जातां भद्रापरनाम्नीं पञ्चमीं ४१ मद्रराजसुतां लक्ष्मणामिति व्यवहितेनान्व
यस्तां षष्ठीं सात्राजितीं सत्यभामां सप्तमीं ४२ शैब्यस्य सुतां तन्वीनामतः गान्धार्यभिधाष्टमीं एताः पट्टनायिकाः रुक्मिणी तु साक्षात् श्रीरेवेत्यासु न गणिता समं एकसमयावच्छे
देन न तु पर्यायेण भेजे उपयेमे च मूर्तिभेदेन योगेश्वरत्वात् ४३ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४४ ४५ इतिहरिवंशेविष्णुपर्वणिटीकायांषष्टितमोऽध्यायः ६० ततइतिकालेमहति १ २ साकन्याचक्रमेकामितवती ३ ४ ५ सिंहसंहननः सिंहवद्-
तिदृढांगः स्मरांगरूपोपेतोयः सिंहसंहननोहिसइत्युक्तोवा ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८

परार्ध्यवस्त्राभरणाः कामैः सर्वैः सुखोचिताः जज्ञिरेतासुपुत्राश्चतस्यवीराः सहस्रशः ४४ शास्त्रार्थकुशलाः सर्वेबलवंतोमहारथाः य
ज्वानः पुण्यकर्माणोमहाभागामहाबलाः ४५ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिरुक्मिणीहरणनामषष्टितमोऽध्यायः
६० वैशंपायनउवाच ततःकालेव्यतीतेतुरुक्मीमहतिवीर्यवान् दुहितुःकारयामासस्वयंवरमरिंदम १ तत्राहूताहिराजानोराज
पुत्राश्चरुक्मिणा समाजग्मुर्महावीर्यानानादिग्भ्यः श्रियान्विताः २ तत्राजगामप्रद्युम्नः कुमारैरपरैर्वृतः साहितंचकमेकन्यासचतांसुभ
लोचनाम् ३ शुभांगीनामवैदर्भीकांतिद्युतिसमन्विता पृथिव्यामभवत्ख्यातारुक्मिणस्तनयातदा ४ उपविष्टेषुसर्वेषुपार्थिवेषुमहात्म
सु वैदर्भीवरयामासप्रद्युम्नमरिसूदनम् ५ सहिसर्वास्त्रकुशलः सिंहसंहननोयुवा रूपेणाप्रतिमोलोकेकेशवस्यात्मजोभवत् ६ वयोरू
पगुणोपेताराजपुत्रीचसाभवत् नारायणीचंद्रसेनाजातकामाचतंप्रति ७ वृत्तेस्वयंवरेजग्मूराजानःस्वपुराणिते उपादायचवैदर्भीप्रद्यु
म्नोद्वारकांययौ ८ रेमेसहतयावीरोदमयंत्यानलोयथा सतस्यांजनयामासदेवगर्भोपमंसुतम् ९ अनिरुद्धमितिख्यातंकर्मणाप्रतिमं
भुवि धनुर्वेदेचवेदेचनीतिशास्त्रेचपारगम् १० अभवत्सयदाराजन्ननिरुद्धोवयोन्वितः तदास्यरुक्मिणःपौत्रीश्रीमतीरुक्मसन्निभा
म् पत्न्यर्थंवरयामासनाम्नारुक्मवतीतिसा ११ अनिरुद्धायुवोदातुंकृतबुद्धिर्नृपस्ततः प्रीत्याहिरौक्मिणेयस्यरुक्मिण्याश्चाप्युपग्रहात्
१२ विस्पर्धन्नपिकृष्णेनवैरंत्यक्त्वामहायशाः ददामीत्यब्रवीद्राजाप्रीतिमान्जनमेजय १३ केशवःसहरुक्मिण्यापुत्रैःसंकर्षणेनच अ
न्यैश्चवृष्णिभिःसार्द्धंविदर्भान्सबलोययौ १४ संयुक्ताज्ञातयश्चैवरुक्मिणःसुहृदश्चये आहूतारुक्मिणातेपितत्राजग्मुर्नराधिपाः १५
शुभेतिथौमहाराजनक्षत्रेचाभिपूजिते विवाहःसोनिरुद्धस्यबभूवपरमोत्सवः १६ पाणौगृहीतेवैदर्भ्यास्त्वनिरुद्धेनतत्रवै वैदर्भयादवा-
नांचबभूवपरमोत्सवः १७ रेमिरेवृष्णयस्तत्रपूज्यमानायथामराः अथाश्मकानामधिपोवेणुदारिरुदारधीः १८ अक्षःश्रुतवांश्चापूरःक्रा
थश्चैवांशुमानपि जयत्सेनःकलिंगानामधिपश्चमहाबलः १९ पांड्यश्चनृपतिःश्रीमान्नृषीकाधिपतिस्तथा एतेसमेत्यराजानोदाक्षिणा
त्यामहर्द्धयः २० अभिगम्याब्रुवन्सर्वेरुक्मिणंरहसिप्रभुम् भवानक्षेषुकुशलोवयंचापिरिरंसवः प्रियद्यूतश्चरामोसावक्षेष्वनिपुणोपि
च २१ तेभवंतंपुरस्कृत्यजेतुमिच्छामतंवयम् इत्युक्तोरोचयामासरुक्मीद्यूतमहारथः २२ तेसुभांकांचनस्तंभांकुसुमैर्भूषिताजिराम्
सभामाविविशुर्हृष्टाःसिक्तांचंदनवारिणा २३ १९ २० २१ २२ २३ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२४ कितवैःद्यूतवेदिभिः २५ निकृत्याकपटेन २६ २७ २८ २९ ३० आव्हृतिः अत्यंतकुटिलः व्हृकौटिल्येइत्यस्यरूपंविक्षेपनिनिंद ३१ ३२ ३३
३४ ३५ ३६ अधिपांसुकेअधिकसरजस्केक्रोधकालेद्यूतदेशेचेत्यर्थः ३७ ३८ चातुरक्षेचतुरंकांकितेऽक्षेनिर्वृत्तेनिपतितेसतिउभयोर्धनेप्रत्येकंदशधाकृ-

तांप्रविश्यततःसर्वेसुभ्रस्रगनुलेपनाः सौवर्णेष्वासनेष्वासांचक्रिरेविजिगीषवः २४ आहूतोबलदेवस्तुकितवैरक्षकोविदैः बाढमित्य
ब्रवीत्तुहृष्टःसहदीव्यामपण्यताम् २५ निकृत्याविजिगीषंतोदाक्षिणात्यानराधिपाः मणिमुक्ताःसुवर्णंचतत्रानिन्युःसहस्रशः २६ त
तःप्रावर्ततद्यूतंतेषांरतिविनाशनम् कलहस्यास्पदंघोरंदुर्मतीनांक्षयावहम् २७ निष्काणांचसहस्राणिसुवर्णस्यदशादितः रुक्मिणा
सहसंपातेबलदेवोग्लहंददौ २८ तंजिगायततोरुक्मीयतमानंमहाबलम् तावद्वापरंभूयोबलदेवंजिगायसः २९ असकृज्जीयमान
स्तुरुक्मिणाकेशवाग्रजः सुवर्णकोटीर्जग्राहग्लहंतस्यमहात्मनः ३० जितमित्येवहृष्टोथतमाव्हृतिरभाषत श्लाघ्यमानश्चविक्षेपप्रहस
न्सुशल्यायुधम् ३१ अविद्योदुर्बलःश्रीमान्हिरण्यममितंमया अजेयोबलदेवोयमक्षद्यूतेपराजितः ३२ कलिंगराजस्तच्छ्रुत्वाप्रजहास-
भृशंतदा दंतान्संदर्शयन्हृष्टस्तच्चाक्रुत्स्थहलायुधः ३३ रुक्मिणस्तद्वचःश्रुत्वापराजयनिमित्तजम् निगृह्यमाणस्तीक्ष्णाभिर्वाग्भिर्भी-
ष्मकसूनुना ३४ रोषमाहारयामासजितरोषोपिधर्मवित् संक्रुद्धोधर्षणांप्राप्यरोहिणेयोमहाबलः ३५ धैर्यान्मनःसन्निधायततोवचनम
ब्रवीत् दशकोटिसहस्राणिग्लहएकोममापरः ३६ एनंसंपरिगृण्हीष्व पातयाक्षान्नराधिप कृष्णाक्षान्लोहिताक्षांश्चदेशेस्मिंस्त्वधिपां
सुके ३७ इत्येवमाव्हयामासरुक्मिणंरोहिणीसुतः अनुक्त्वावचनंकिंचिन्बाढमित्यब्रवीत्पुनः ३८ अक्षान्रुक्मीततोहृष्टःपातयामास
पार्थिवः चातुरक्षेतुनिर्वृत्तेनिर्जितःसनराधिपः ३९ बलदेवेनधर्मेणनेत्युवाचततोबलम् धैर्यान्मनःसमाधायसनकिंचिदुवाचह ४० ब-
लदेवंततोरुक्मीमयाजितमितिस्मयन् बलदेवस्तुतच्छ्रुत्वाजिह्मंवाक्यंनराधिप ४१ भूयःक्रोधसमाविष्टोनोत्तरंव्याजहारह ततोगंभीर
निर्घोषावागुवाचाशरीरिणी ४२ बलदेवस्यतंक्रोधंवर्धयंतीमहात्मनः सत्यमाहबलःश्रीमान्धर्मेणैषपराजितः ४३ अनुक्त्वावचनंकिंचि
त्प्राप्तोभवतिकर्मणा मनसासमनुज्ञातंतत्स्यादित्यवगम्यताम् ४४ इतिश्रुत्वावचस्तथ्यमंतरिक्षात्सुभाषितम् संकर्षणस्तथोत्थाय-
सौवर्णेनोरुणाबली ४५

नेयदिवादीएकांकंपातयेत्तदाएकमंशंधनात्संहरेत्द्व्यंकपातेपूर्वेणसहत्रीनंशान्त्र्यंकपातेपूर्वैस्त्रिभिःसहषडंशान्चतुरंकपाते-
पूर्वैःषड्भिःसहदशाप्यंशान्हरेदितिद्यूतविदांमर्यादयासर्वधनंजितमित्यर्थः ३९ ४० ४१ ४२ ४३ अनुक्त्वापिजयंप्राप्तोभवतिरामइत्यध्याहृत्ययोज्यं मनसाप्र
तिवादिनामितिशेषः मनसाऽनुज्ञातमपिवाचानाभ्यनुज्ञायतइतिदौरात्म्यंतेषामितिभावः ४४ उरुणामहताअष्टापदेनेतिवक्ष्यमाणत्वात् ४५ छ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मा॰ह॰टी॰ ४६ कलिंगाधिपतेर्जयसेनस्य ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ कृतोसक्रियायांकुशलेइत्येकदेशेनसंबंधः नित्ययाजिनिनित्यकर्मपरे ५६ अ॰ ६
८० ५७ ५८ ५९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांएकषष्टितमोऽध्यायः ६१ भूयइति १ २ ३ ४ ५ ६ भीमोभीमसेनः ७ न्य ६१ २

रुक्मिण्याभ्रातरंज्येष्ठंनिजघानमहीतले विवादेकुपितोरामः क्षेप्तारंकिलरुक्मिणम् ४६ जघानाष्टापदेनैवप्रमथ्ययदुनंदनः ततोपसृत्य सुसंक्रुद्धः कलिंगाधिपतेरपि ४७ दंतान्बभंजसंरंभाद्दुन्मनादंचसिंहवत् खड्गमुद्यम्यतान्सर्वांस्त्रासयामासपार्थिवान् स्तंभंसभायाः सौवर्णमुत्पाट्यबलिनांवरः ४८ गजेंद्रइवतस्तंभंकर्षन्संकर्षणस्ततः निर्जगामसभाद्वारात्त्रासयामासकैशिकान् ४९ रुक्मिणंनिकृतिप्रज्ञंसहत्वायादवर्षभः विद्रास्यतांश्चनृपान्सर्वान् सिंहःक्षुद्रमृगानिव ५० जगामशिबिरंरामःस्वयमेकजनावृतः न्यवेदयत्सकृष्णायतच्चसर्वं यथाभवत् ५१ नोवाचसतदाकृष्णः किंचिद्रामंमहाद्युतिः निगृह्यचतदात्मानंकृच्छ्रादश्रूण्यवर्तयत् ५२ नहतोवासुदेवेनयःपूर्वंपरवीरहा ज्येष्ठोभ्राताथरुक्मिण्यारुक्मिणीस्नेहकारणात् ५३ सरामकरमुक्तेननिहतोद्यूतमंडले अष्टापदेनबलवान्राजावज्रधरोपमः ५४ तस्मिन्हतेमहावीर्येनृपतौभीष्मकात्मजे द्रुमभार्गवतुल्येवैद्रुमभार्गवशिक्षिते ५५ कृतोचयुद्धकुशलेनित्ययाजिनिपातिते वृष्ण्यंधकास्तेवसर्वेविमनसोभवन् ५६ वैशंपायनउवाच रुक्मिणीचमहाभागाविलपंत्यार्तयागिरा विलपंतींतथादृष्ट्वासांत्वयामासकेशवः ५७ एतत्तेसर्वमाख्यातंरुक्मिणोनिधनंयथा वैरस्यचसमुत्थानंवृष्णिभिर्भरतर्षभ ५८ वृष्णयोपिमहाराजधनान्यादायसर्वशः रामकृष्णौसमाश्रित्यययुर्द्वारवतींप्रति ५९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिरुक्मिवधोनामएकषष्टितमोऽध्यायः ६१ राजोवाच भूयएवतुविप्रर्षेबलदेवस्यधीमतः माहात्म्यंश्रोतुमिच्छामिशेषस्यधरणीभृतः १ अतीवबलदेवंततेजोराशिमनिर्जितम् कथयंतिमहात्मानंयेपुराणविदोजनाः २ तस्यकर्माण्यहंविप्रश्रोतुमिच्छामितत्त्वतः अनंतंयंविदुर्नागमादिदेवंजनेश्वरम् ३ वैशंपायनउवाच पुराणेनागराजोसौपठ्यतेधरणीधरः शेषस्तेजोनिधिःश्रीमानकंप्यःपुरुषोत्तमः ४ योगाचार्योमहावीर्योदेवस्यमुखोबली जरासंधंगदायुद्धेजितवान्योनचावधीत् ५ बहवश्चैवराजानःप्रथिताःपृथिवीतले अन्वयुर्मागधंसर्वेतेचापिविजितारणे ६ नागायुतबलप्राणोभीमोभीमपराक्रमः असकृद्बलदेवेनबाहुयुद्धेपराजितः ७ दुर्योधनस्यकन्यांतुहरमाणोन्यगृह्यत सांबोजांबवतीपुत्रो नगरेनागसाह्वये ८ राजभिःसर्वतोरुध्योहरमाणोबलात्किल तदुपश्रुत्यसंरुद्धआजगाममहाबलः ९ रामस्तस्यतुमोक्षार्थमागतोनालभत्तम् ततश्चुक्रोधबलवानद्भुतंचाकरोन्महत् १०

गृह्यतनिगृहीतः कौरवैरितिशेषः ८ ९ १० छ॰ छ॰ छ॰ छ॰ छ॰

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

११ १२ १३ १४ १५ १६ १७ १८ १९ २० इतिहरिवंशेविष्णुपर्वणिटीकायांद्विषष्टितमोऽध्यायः ६२ प्रत्येत्येति १ तैःयदुभिः २ यानिर-
त्नानिप्रत्यपद्यततानिनैर्ऋतान्प्रत्यवारयत्राक्षसैःस्वगृहेआनाय्यस्थापितवानित्यर्थः ३ ४ ५ मूर्तिलिंगस्थः दृश्यज्ञापकंसत्वंमूर्तिलिंगंतत्स्थः प्राग्ज्योतिषपुर

अनिवार्यमभेद्यंचदिव्यमप्रतिमंबले लांगलास्त्रंससुग्रस्यब्रह्ममंत्राभिमंत्रितम् ११ प्राकारवप्रेविन्यस्यपुरस्यचमहाकृतिः प्रक्षेप्तुमै-
च्छद्गंगायांनगरंकौरवस्यतत् १२ तद्विघूर्णितमालक्ष्यपुरंदुर्योधनोनृपः सांबंनिर्यातयामाससभार्यंतस्यधीमतः १३ द्रोणशिष्यंतदात्मा
नंरामस्यसुमहात्मनः गदायुद्धेकुरुपतिःशिष्यंजग्राहतंवसुः १४ ततःप्रभृतिराजेंद्रपुरमेतद्विघूर्णितम् आवर्जितमिवाभातिगंगामभि
मुखंनृप १५ इदमत्यद्भुतंकर्मरामस्यकथितंमया भांडीरेकथितंराजन्यत्कृतंशौरिणापुरा १६ प्रलंबंमुष्टिनैकेनयज्जघानहलायु
धः धेनुकंतुमहावीर्यंचिक्षेपनगमूर्द्धनि सगतायुःपपातोर्व्यांदैत्योगर्दभरूपधृक् १७ लवणजलगमामहानदीद्रुतजलवेगतरंगमालि
नी नगरमभिमुखंयदाहृताहलविधृतायमुनायमस्वसा १८ बलदेवस्यमाहात्म्यमेतत्तेकथितंमया अनंतस्याप्रमेयस्यशेषस्यधरणी-
भृतः १९ इतिपुरुषवरस्यलांगलैर्बहुविधमुत्तममन्यदेवच यदिकथितमिहाद्यकर्मतेतदुपलभस्वपुराणविस्तरात् २० इतिश्रीम
हाभारतेखिलेषुहरिवंशेविष्णुपर्वणिबलदेवमाहात्म्यंनामद्विषष्टितमोऽध्यायः ६२ जनमेजयउवाच प्रत्येत्यद्वारकांविष्णुर्हतेरु-
क्मिणिवीर्यवान् अकरोद्यन्महाबाहुस्तन्मेवदमहामुने १ वैशंपायनउवाच सतैःपरिवृतःश्रीमान्पुरीयादवनंदनः द्वारकांभग
वान्विष्णुःप्रत्यवैक्षतवीर्यवान् २ प्रत्यपद्यतरत्नानिविविधानिवसूनिच यथार्हंपुंडरीकाक्षोनैर्ऋतान्प्रत्यवारयत् ३ तत्रविघ्नंचरंतिस्म
दैतेयाःसहदानवैः तान्जघानमहाबाहुर्वरदत्तान्महासुरान् ४ विघ्नंचास्याकरोत्तत्रनरकोनामदानवः त्रासनःसर्वदेवानांदेवराजरि
पुर्महान् ५ सवभौमोमूर्तिलिंगस्थःसर्वदेवाधिबाधिता देवतानामृषीणांचप्रतीपमकरोत्तदा ६ त्वष्टुर्दुहितरंभौमः कशेरुमगमत्तदा
गजरूपेणजग्राहरुचिरांगींचतुर्दशीम् ७ प्रमथ्यतांवरारोहांनरकोवाक्यमब्रवीत् नष्टशोकभयोमोहात्प्राग्ज्योतिषपतिस्तदा ८
यानिदेवमनुष्येषुरत्नानिविविधानिच बिभर्तिचमहीकृत्स्नासागरेषुचयद्वसु ९ अद्यप्रभृतितानीहसहिताःसर्वनैर्ऋताः ममेवोपा
हरिष्यंतिदैत्याश्चसहदानवैः १० एवमुत्तमरत्नानिवस्त्राणिविविधानिच संजहारतदाभौमस्तत्रचनाधिचकारसः ११

स्थोवा बाधितावाधकः ६ कशेरुंस्थानविशेषं अगमत् चतुर्दशींसर्वदाचतुर्थ्यादशयायुक्तांसाचगर्भकौमारपौगंडसंधियौवनमितिदशाभ्यऊर्ध्वंपंचदशाभ्योर्वाक्-
चतुर्दशवार्षिकीमित्यर्थः ७ ८ ९ १० तत्ररत्नजातंआहृतमपिनाधिचकारनबुभुजे ११ ५ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३८ सत्यभामासहायवान्भूइतिअस्याः सत्यभामायाः पृथिव्यंशत्वात्पृथिव्याज्ञयैवतस्यमृत्युर्विहितोक्तीतिसत्यभामाज्ञयैवतंहनिष्यामीत्याशयः ३९ समस्कंधान्
आवहप्रवहादीन्वायुमार्गान् ४० ४१ ४२ ४३ ४४ ४५ मौरवान्मुरुविहितान् क्षुरांतवदतिसूक्ष्मान् दृढतरावयवसंयोगंपाषाणादिकमपिप्रविशयच्छे

इत्युक्तःपुंडरीकाक्षोदेवराजेनकेशवः प्रतिजज्ञेमहाबाहुर्नरकस्यनिबर्हणे ३८ ततःसहैवशक्रेणशंखचक्रगदासिभृत् प्रतस्थेगरुडे
नाथसत्यभामासहायवान् ३९ क्रमेणसप्तस्कंधान्समरुतांसहवासवः पश्यतांयदुसिंहानामूर्ध्वमाचक्रमेबली ४० वारणेंद्रगतःश-
क्रोगरुडस्थोजनार्दनः विदूरत्वात्प्रकाशेतेसूर्याचंद्रमसाविव ४१ अंतरिक्षेचगंधर्वैरप्सरोभिश्चकेशवः स्तूयमानोथशक्रश्चक्रमेणांतर
धीयत ४२ समाधायेतिकर्तव्यंवासवोविबुधाधिपः स्वमेवभवनंप्रायात्कृष्णःप्राग्ज्योतिषंप्रति ४३ पक्षानिलहतोवायुःप्रतिलोमंववौत
दा ततोभीमरवैर्मेघैर्बभ्रमुर्गगनेचराः ४४ क्षणेनसमनुप्राप्तोहिजेनाकाशगेनवै दूरादेवचतान्दृष्ट्वाप्रययौयत्रतेस्थिताः ४५ अपश्यत्
द्रारितत्रस्थांहस्त्यश्वरथवाहिनीम् क्षुरांतान्मौरवान्पाशान्षट्सहस्रान्ददर्शह ४६ वैशंपायनउवाच गरुडस्योपरिश्रीमान्
शंखचक्रगदाधरः बिभ्रन्नीलांबुदाकारपीतवासाश्चतुर्भुजः ४७ वनमालाकुलोरस्कःश्रीवत्सांकितभूषणः किरीटमूर्ध्नासूर्याभःस
विद्युदिवचंद्रमाः ४८ ज्यांविकूजन्महाशब्दःश्रूयतेशनिनिःस्वनः ज्ञात्वाचदानवःसर्वस्वयंविष्णुरिहागतः ४९ क्रोधाद्द्विगुणरक्ताक्षोमु
रुःकालांतकोपमः अभ्यधावत्वेगेनशक्तिंगृह्यमहासुरः ५० चिक्षेपसमहाशक्तिंवज्रकांचनभूषिताम् तामापतंतीशक्तिंतुमहोल्कां
ज्वलितामिव ५१ समाधत्तशरंचैकंरुक्मपुंखंजनार्दनः द्विधाच्छिनत्क्षुरप्रेणवासुदेवःसवीर्यवान् ५२ शक्तिंचिच्छेदतत्रासौविद्युत्पु
ञ्जइवज्वलन् पुनश्चक्रोधरक्ताक्षोमुरुर्गृह्यमहागदाम् ५३ इंद्राशनिरिवेंद्रेणविकृष्टइवनिःस्वनः आकर्णमुक्तविक्षेपअर्धचंद्रंस्करो
त्तमः ५४ मध्यदेशेतुचिच्छेदगदांतांरुक्मभूषिताम् पुनश्चिच्छेदभल्लेनदानवस्यशिरोरणे ५५ संछिद्यपाशान्सर्वांस्तान्मुरुंहत्वा
सबांधवम् सोश्मान्रक्षोगणान्हत्वानरकस्यमहाबलान् ५६ शिलासंधानतिक्रम्यभगवान्देवकीसुतः अपश्यद्दानवसैन्यंनि-
सुंदंचमहाबलम् ५७ हयग्रीवंचदितिजंतथान्यांश्चिनयोधिनः रोधयामासतन्मार्गंस्वसैन्येनमहाबलः ५८ निसुंदोबलिनांश्रेष्ठो
रथमारुह्यसत्वरम् जग्राहकार्मुकंदिव्यंहेमपृष्ठंदुरासदम् ५९ विव्याधदशभिर्बाणैर्निसुंदोमधुसूदनम् केशवश्चापिसतत्याविं
व्याधनिशितैःशरैः ६० अप्राप्तांस्त्वांतरिक्षेतान्शरांश्चिच्छेदमाधवः तेसर्वेसैनिकाःकृष्णंसमंतात्पर्यवारयन् ६१

त्तुमर्हानित्यर्थः ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१२ एकविंशतिशताधिकेद्वेचतुर्दशचेतिषोडशसहस्राणिशतंच एकवेणिधराःकुमारिकाः १३ मुरोर्दैत्यस्य १४ ताःप्राग्ज्योतिषपतिंचेत्यन्वयः सएषनरकःतमसः
नीलवर्णस्यसमुद्रस्यपारेतीरे १५ १६ १७ १८ १९ २० २१ वासवक्षयात्इंद्रालयात् २२ २३ २४ २५ २६ २७ २८

गंधर्वीणांचयाः कन्याजहारनरकोबली याश्चदेवमनुष्याणांसप्तचाप्सरसांगणाः १२ चतुर्दशसहस्राणिएकविंशच्छतानिच एकवे
णीधराःसर्वाःसतीमार्गमनुव्रताः १३ वैशंपायनउवाच तासांपुरवरंभौमोकारयन्मणिपर्वतम् अलकायामदीनात्मामुरोःस्ववि
षयंप्रति ताश्चप्राग्ज्योतिषपतिंमुरोश्चैवदशात्मजाः १४ नैर्ऋताश्चयथासुरत्याः पालयंतउपासते सएषतमसःपारेवरदृप्तोमहासुरः
१५ नचासुरगणैःसर्वैःसहितैःकर्मतत्पुरा कृतपूर्वंतदाघोरंयदकार्षीन्महासुरः १६ अदितिंधर्षयामासकुंडलार्थेमहासुरः यंमही-
सुषुवेदेवीयस्यप्राग्ज्योतिषंपुरम् १७ द्वारपालाश्चचत्वारस्तस्यासन्सुदुर्मदाः हयग्रीवोनिसुंदश्चवीरःपंचनदस्तथा १८ मुरुःपुत्र
सहस्रैश्चवरदत्तोसुरोमहान् आदेवयानमावृत्यपंथानंसमुपस्थितः १९ वित्रासनःसुकृतिनांविरूपैराक्षसैःसह तद्वधार्थंमहाबाहुःश
ङ्खचक्रगदासिभृत् २० जातोवृष्णिषुदेवक्यांवसुदेवाज्जनार्दनः तस्याथपुरुषेंद्रस्यलोकप्रथिततेजसः २१ निवासोद्वारकादेवैरुपाश्राद्दु
पपादिता अतीवाहिपुरीरम्याद्वारकावासवक्षयात् २२ महार्णवपरिक्षिप्ते पंचपर्वतशोभिता तस्यांदेवपुराभायांसभाकाञ्चनतोरणा
२३ सादाशार्हीतिविख्यातायोजनायामविस्तृता तत्रवृष्ण्यंधकाःसर्वेरामकृष्णपुरोगमाः २४ लोकयात्रामिमांकृत्स्नांपरिरक्षंतआसते
तत्रासीनेषुसर्वेषुकदाचिद्भरतर्षभ २५ दिव्यगंधोववौवायुःपुष्पवर्षंपपातह ततःकिलकिलाशब्दःप्रभाजालाभिसंवृतः २६ मुहूर्त
मंतरिक्षेभूत्वाभूमौप्रतिष्ठितः मध्येतुतेजसस्तस्यपांडुरंगजमास्थितः २७ वृतोदेवगणैःसर्वैर्वासवःसमदृश्यत रामकृष्णौचराजा
सवृष्ण्यंधकगणैःसह २८ प्रत्युद्ययुर्महात्मानंपूजयंतःसुरेश्वरम् सोवतीर्यगजात्तूर्णंपरिष्वज्यजनार्दनम् २९ सस्वजेबलदेवंचतंच
राजानमाहुकम् वृष्णीनन्यान्सस्वजेचयथाकालंयथावयः पूजितोरामकृष्णाभ्यामाविवेशसतांसभाम् ३० तत्रासीनोप्यलंकृत्वासभा
तामसुरेश्वरः अर्घादिसमुदाचारंप्रत्यगृण्हद्यथाविधि ३१ वैशंपायनउवाच अथोवाचमहातेजावासवोवासवानुजः सांत्वपू-
र्वंकरेणास्यसंस्पृश्यवदनंशुभम् ३२ देवकीनंदनवचःशृणुमेमधुसूदन येनत्वाभिगतोस्म्यद्यकार्येणामित्रकर्शन ३३ नैर्ऋतोनरको-
नामब्रह्मणोवरदर्पितः अदित्याःकुंडलेमोहात्जहारदितिनंदनः ३४ देवानांविप्रियंनित्यमृषीणांचसवर्तते तंचदेवांतरंप्रेक्ष्यजहित्वंपा
पपूरुषम् ३५ अयंत्वांगरुडस्तत्रप्रापयिष्यतिकामगः कामवीर्योतितेजस्वीवैनतेयोंतरिक्षगः ३६ अवध्यःसर्वभूतानांभौमःसनरका ८१
सुरः निषूदयित्वातंपापंक्षिप्रमागंतुमर्हसि ३७ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ६३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लोहितगंगस्यसिंधोःप्रदेशविशेषस्यमध्येऔदकायांउदकपरिखायांपुर्याम् ८७ ८८ ८९ ९० ९१ ९२ ९३ ९४ रथंआरुरोहेतिशेषः ९५ ९६ ९७ ९८

मध्येलोहितगंगस्यभगवान्देवकीसुतः औदकायांविरूपाक्षंपाप्मानंपुरुषोत्तमः ८७ अष्टौशतसहस्राणिदानवानांपरंतप निहत्य
पुरुषव्याघ्रःप्राग्ज्योतिषमुपाद्रवत् ८८ हत्वापंचजनंनामनरकस्यमहासुरम् ततःप्राग्ज्योतिषंनामदीप्यमानमिवश्रिया ८९ पुरमा
सादयामासयुद्धंतत्राभवन्महत् ततःप्राध्मापयच्छंखंपांचजन्यंमहाबलः ९० शुश्रुवेसुमहाशब्दःसंवर्तनिनदोयथा श्रूयतेत्रिषुलोके
षुभीमगंभीरनिःस्वनः तच्छ्रुत्वानरकस्त्वासीत्क्रोधसंरक्तलोचनः ९१ लोहचक्राष्टसंयुक्तंनिनल्वप्रतिमंरथम् रत्नकांचनचित्राढ्यं
वेदिकाभोगविस्तरम् ९२ वज्रध्वजेनमहताकांचनेनविराजितम् हेमदंडपताकाढ्यंवैडूर्यमणिकूबरम् ९३ युक्तमश्वसहस्रेणरथंप
ररथारुजम् लोहजालैश्चसंछन्नंचित्रभक्तिविराजितम् ९४ रथमध्यगतोवीरस्ससंध्यइवभास्करः नानाप्रहरणाकीर्णंरथंहेमपरिष्कृ
तम् ९५ वज्रस्थोरश्छदमिंदुवर्णंव्यानद्धमुक्तानलतुल्यतेजाः किरीटमूर्ध्नार्कहुताशनाभःकर्णौतथाकुंडलयोर्ज्वलंतौ ९६ धूम्रवर्णा
महाकायारक्ताक्षाविकृताननाः नानाकवचिनःसर्वेदैत्यदानवराक्षसाः ९७ खड्गचर्मधराःकेचित्केचित्तूणधनुर्भृतः शक्तिहस्तास्तथाकेचि
च्छूलहस्तास्तथापरे ९८ गजवाजिरथौघैश्चकालयंतश्चमेदिनीम् निर्ययुर्नगरात्सर्वेसुसन्नद्धाःप्रहारिणः ९९ वृतोदैत्यगणैःसार्द्धंनरकः
कालसंनिभः भेरीशंखमृदंगानांपणवानांसहस्रशः १०० वाद्यमानानिशुश्रावजीमूतनिनदोपमः यतःकृष्णस्ततोगत्वासर्वेतेविकृता
ननाः १ परिवार्यगरुत्मंतंसर्वेयुध्यंतसंगताः महताछादयामासुःशरवर्षेणसैनिकाः २ शक्तिशूलगदाप्रासास्तोमरांस्तायकान्बहून्
आकाशंछादयामासुर्विमुंचंतःसहस्रशः ३ कृष्णःकृष्णांबुदाकारःशार्ङ्गंगृह्यधनुस्ततः विस्फार्यसुमहच्चापंधनुर्जलदनिःस्वनम् ४
व्यसृजच्छरवर्षाणिदानवानांजनार्दनः शरवर्षेणतत्सैन्यंव्यद्रवत्तुमहाहवात् ५ तद्युद्धमभवद्घोरंघोररूपेणरक्षसा भग्नव्यूहाश्च
तेसर्वेकृष्णबाणप्रपीडिताः ६ केचिच्छिन्नभुजाश्चैवछिन्नग्रीवाशिराननाः केचिच्चक्रद्विधाच्छिन्नाःकेचिद्बाणार्दितोरसः ७ केचिद्द्वि
धाकृताःशक्त्यागजाश्वरथवाहनाः केचित्कौमोदकीभिन्नाःकेचिच्चक्रविदारिताः ८ एवंविमथिताःसर्वानराश्वरथवाहिनीः तत्रासीन्नर
केणास्ययुद्धंपरमदारुणम् ९ यत्समासेनवक्ष्यामितन्मेनिगदतःशृणु भासनःसुरसंघानांनरकःपुरुषोत्तमम् १० योधयामासतेजस्वीम-
धुवन्मधुसूदनम् क्रोधरक्तांतनयनोनरकोघनसंनिभः ११ जग्राहकार्मुकंवीरःशक्रचापमिवोच्छ्रितम् तथार्ककिरणप्रख्यंबाणंजग्राह
केशवः १२

९९ १०० १ २ ३ ४ ५ ६ ७ ८ ९ १० मधुःकैटभस्तातानहत् ११ १२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शरजालेनमहताछाद्यमानःसुरोत्तमः दृष्ट्वातान्दानवान्सर्वान्सक्रोधोमधुसूदनः ६२ ततोदिव्येनचास्त्रेणपार्जन्येनजनार्दनः मु
हताशरवर्षेणवारयामासतद्बलम् ६३ पंचपंचशरैस्तेषुएकैकेनचतान्बहून् पार्जन्यस्यप्रभावेनसर्वान्मर्मस्वताडयत् ६४ दुद्रुवुर्भ
यसंत्रस्ताभग्नास्तेदानवारणे स्वसैन्यंविद्रुतंदृष्ट्वानिश्चक्रामपुनर्मृधे ६५ विसृजंच्छरवर्षाणिछादयामासकेशवम् नविभातिरणेसू
र्योनापिव्योमदिशोदश ६६ शरैःसंछादयामासनिरुंदोगरुडध्वजम् सावित्रनामदिव्यास्त्रजग्राहपुरुषोत्तमः ६७ तेनबाणेनतान्बा
णान्विच्छेदसमरेहरिः बाणैर्बाणांश्चसंछिद्यतस्यकृष्णोमहाबलः ६८ छत्रमेकेनबाणेनरथेषांत्रिभिःशरैः पुनश्चिच्छेदतानश्वां
श्चतुर्भिश्चतुरःशरैः ६९ सारथिंपंचभिर्बाणैर्ध्वजमेकेनचिच्छिदे शरेणैकेनपुनःकृष्णःसुतीक्ष्णेनशितेनवै ७० शिरश्चिच्छेदभल्लेननि
सुंदस्यसुरोत्तमः यःसहस्रसमास्त्वेकःसर्वान्देवानयोधयत् ७१ निसुंदंपतितंदृष्ट्वाहयग्रीवःप्रतापवान् शिलांप्रगृह्यमहतींतोलया-
मासदानवः ७२ आविध्यसहसासुचच्छिलांशैलसमप्रभः गृहीत्वादिव्यपार्जन्यमस्त्रमस्त्रविदांवरः ७३ दिव्यास्त्रेणशिलांविष्णुः
सप्तधाकृततेजसा तद्विदार्यमहच्चाश्मपातयामासभूतले ७४ ततस्तैःशार्ङ्गनिर्मुक्तैर्नानावर्णैर्महाशरैः यथादेवासुरंयुद्धमभवद्भरत
र्षभ ७५ नानाप्रहरणाकीर्णंतथाघोरमवर्तत ततःशार्ङ्गविनिर्मुक्तैर्नानावर्णैर्महाशरैः ७६ गरुडस्थोमहाबाहुर्निजघानमहासुरान्
महालांगलनिर्भिन्नाःशरवशक्तिनिपातिताः ७७ चिनेसुर्दानवाःसर्वेसमासाद्यजनार्दनम् केचिच्चक्राग्निनिर्दग्धादानवाःपेतुरर्वरात्
७८ संनिकर्षगताःकेचित्गतासुर्विकृताननाः असृजंच्छरवर्षाणिवृष्टिमतइवांबुदाः ७९ विकृतागास्त्रराःसर्वेकृष्णबाणप्रपीडिताः शो-
णिताक्ताःस्महश्यंतेपुष्पिताइवकिंशुकाः व्यद्रवंतसुवित्रस्ताभग्नास्त्वाश्चित्रयोधिनः ८० पुनश्चक्रोधरक्ताक्षोवायुवेगेनदानवः दश-
व्यामोच्छ्रितंवृक्षंसमारुह्यवनस्पतिम् ८१ वृक्षमुत्पाट्यवेगेनप्रतिगृह्याभ्यधावत चिक्षेपसुमहावृक्षंशिक्षयास्त्रघनाकृतिः ८२ वृक्ष
वेगानिलोत्सृतःशुश्रुवेसुमहास्वनः ततःशरसहस्रेणयतमानोजनार्दनः ८३ नैकधातंप्रचिच्छेदचित्रभक्तिनिभाकृतिम् पुनश्चैकेन
बाणेनहयग्रीवस्यचोरसि ८४ विव्याधस्तनयोर्मध्येसायकोज्वलनप्रभः विवेशासोतिवेगेनहृदिभित्त्वाविनिर्गतः ८५ तंजघानमहाघो
रंहयग्रीवंमहाबलम् अपारतेजादुर्द्धर्षःसर्वयादवनंदनः ८६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

१३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ इतिहरिवंशेविष्णुपर्वणिटीकायांत्रिषष्टितमोऽध्यायः ६३

दिव्येनास्त्रेणसमरेपूरयामासतंरथम् उत्तमास्त्रंमहापातंमुमोचनरकोबली १३ वज्रविस्फूर्जिताकारमायांतंवीक्ष्यकेशवः चिच्छे
दास्त्रंमहाभागश्चक्रेणमधुसूदनः १४ व्यहनत्सरथंचास्यशरैकेणजनार्दनः सरथंसध्वजंसाश्वंजघानदशभिःशरैः १५ तनुत्रंचैवचिच्छेद
शरेणमधुसूदनः ततोविमुक्तकवचःसपस्पंदतनुर्यथा १६ हताश्वोविरथोवीरोविततनुत्रश्चदानवः जग्राहविमलज्ज्वालंलोहभारा
र्पितंदृढम् १७ आविध्यसहसामुक्तंशूलमिंद्राशनिप्रभम् तदापतत्ससंप्रेक्ष्यशूलंहेमपरिष्कृतम् १८ द्विधाच्छिन्नंक्षुरप्रेणकृष्णोनाद्भु
तकर्मणा तद्युद्धमभवद्घोरंघोररूपेणरक्षसा १९ शस्त्रपातमहाघातनरकेणमहात्मना मुहूर्तंयोधयामासनरकंमधुसूदनः २० अथाग्र्य
चक्रंचक्रेणप्रदीप्तेनाकरोद्द्विधा चक्रद्विधाकृतंतस्यशरीरमपतद्भुवि २१ विभक्तंकुलिशेनेवगिरेःशृंगंद्विधाकृतम् क्ष्मांप्रासादयद्देवंशज
गामास्तमिवांशुमान् २२ चक्रोत्क्रांतितगात्रोसौदानवःपतितोरणे वज्रप्रहारनिर्भिन्नंयथागैरिकपर्वतम् २३ भूमिस्तुपतितंपुत्रंनिरीक्ष्या
दायकुंडले उपातिष्ठतगोविंदंवचनंचेदमब्रवीत् २४ दत्तस्त्वयैवगोविंदत्वयैवविनिपातितः यथेच्छसितथाक्रीडबालःक्रीडनकैरिव २५
उपानिन्युस्ततस्तानिरत्नान्यंतःपुराणिच इमेतेकुंडलेदेवप्रजास्तस्यानुपालय २६ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणि
नरकवधेत्रिषष्टितमोऽध्यायः ६३ वैशंपायनउवाच निहत्यनरकंभौमंवासवोपमविक्रमम् वासवावरजोविष्णुर्ददर्शनरकाल
यम् १ अथार्थगृहमासाद्यनरकस्यजनार्दनः ददर्शधनमक्षय्यंरत्नानिविविधानिच २ मणिमुक्ताप्रवालानिवैडूर्यस्यचसंचयान् मसा
रगल्वकूटानितथावज्रस्यसंचयान् ३ जांबूनदमयान्यस्यशातकुंभमयानिच प्रदीप्तज्वलनाभानिशीतरश्मिनिभानिच ४ शयनानिम
हार्हाणितथासिंहासनानिच हिरण्यदंडरुचिरंशीतरश्मिसमप्रभम् ५ ददर्शतन्महच्छत्रंवर्षमाणमिवांबुदम् जातरूपस्यशुभ्रस्यधाराः
शतसहस्रशः ६ वरुणादाहृतंपूर्वंनरकेणेतिनःश्रुतम् यावद्रत्नंगृहेदृष्टंनरकस्यधनंबहु ७ नैवराज्ञःकुबेरस्यनशक्रस्ययमस्यच रत्नसं
निचयस्तादृग्दृष्टपूर्वोनचश्रुतः ८ हतेभौमेनिसुंदेचहयग्रीवेचदानवे उपानिन्युस्ततस्तानिरत्नान्यंतःपुराणिच ९ दानवाहतशिष्टाये
कोशसंचयरक्षिणः केशवायमहार्हाणियान्यर्हतिजनार्दनः १० दैत्याऊचुः इमानिमणिरत्नानिविविधानिबहूनिच भौमरू
पाश्चमातंगाःप्रवालविकृतांकुशाः ११ हेमसूत्रामहाकक्षाश्चापतोमरशालिनः रुचिराभिःपताकाभिःशबलारुचिरांकुशाः १२

निहत्येति १ २ मसारंमरकतंगल्वश्चंद्रकांतः वज्रंहीरः ३ ४ ५ ६ ७ ८ अंतःपुराणिकन्यारत्नानि ९ १० ११ शबलानानावर्णाः १२ छ छ

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१३ १४ १५ कालीयकानिकालागरुकाष्ठानि १६ १७ १८ १९ मणिपर्वतंकन्यावरोधपुरम् २० २१ २२ २३ २४ २५ २६ महाबाहुंह

तेचविंशतिसाहस्राहस्तिन्यस्तावत्यःकरेणवः अष्टादशसहस्राणिदेशजाश्चोत्तमाहयाः १३ गोषुचापिभवेत्कामोयावत्तत्कजनार्दन तावतीः
प्रापयिष्यामोवृष्ण्यंधकनिवेशनम् १४ आविकानिचसूक्ष्माणिशयनान्यासनानिच कामव्याहारिणश्चैवपक्षिणःप्रियदर्शनाः १५
चंदनागरुकाष्ठानितथाकालीयकान्यपि वस्तुयत्त्रिषुलोकेषुधर्मेणाधिगतंतव १६ प्रापयिष्यामतत्सर्ववृष्ण्यंधकनिवेशनम् देवगंध
र्वरत्नानिपन्नगानाचयद्वसु तानिसर्वाणिसंतोहनरकस्यनिवेशने १७ वैशंपायनउवाच तत्सर्वंचहृषीकेशःपरिगृह्यपरीक्ष्य
च सर्वमाहारयामासदानवेंद्रारकापुरीं १८ ततस्तद्वारुणंछत्रंस्वयमुत्क्षिप्यमाधवः हिरण्यवर्षवर्षंतमारुरोहविहंगमम् १९ गरुडंपतग
श्रेष्ठंमूर्तिमंतमिवांबुदम् ततोऽभ्ययाद्गिरिश्रेष्ठमभितोमणिपर्वतम् २० तत्रपुण्यावववुर्वाताद्द्युभवंश्चामलाःप्रभाः मणीनांहेमवर्णानाम
भिभूयदिवाकरम् २१ तत्रवैडूर्यरत्नानिददर्शमधुसूदनः सतोरणपताकानिद्वाराणिशिखराणिच २२ विद्युद्ग्रथितमेघाभःप्रबभौमणिप
र्वतः हेमचित्रवितानैश्चप्रासादैरुपशोभितः २३ तत्रतावरहेमाभाददर्शमधुसूदनः गंधर्वसुरमुख्यानांप्रियादुहितरस्तथा २४ ददर्शपृथुल
श्रोणीःसंरुद्धागिरिकंदरे नरकेणसमानीतारक्षमाणाःसमततः २५ त्रिविष्टपसमेदेशेतिष्ठतीरपराजिताः निविशत्योयथादेव्यःस्त्रिय
न्यःकामवर्जिताः २६ परिवव्रुर्महाबाहुमेकवेणीधराःस्त्रियः सर्वाःकाषायवासिन्यःसर्वाश्चनियतेंद्रियाः २७ व्रतोपवासतन्वंग्यःकांक्षंत्यः
कृष्णादर्शनम् समेत्ययदुसिंहस्यसर्वाश्चक्रुःस्त्रियोंजलीन् २८ नरकंनिहतंज्ञात्वामुरंचैवमहासुरम् हयग्रीवंनिसुंदंचताःकृष्णंपर्यवा
रयन् २९ येचास्यारक्षिणोवृद्धादानवायदुनंदनम् कृतांजलिपुटाःसर्वेप्रणिपेतुर्वयोधिकाः ३० तासांपरमनारीणामृषभाक्षंनिरीक्ष्यता
म् सर्वासामेवसंकल्पःपतित्वेनाभवत्ततः ३१ तस्यचंद्रोपमंवक्त्रंनिरीक्ष्यमुदितेंद्रियाः संप्रहृष्टामहाबाहुमिदंवचनमब्रुवन् ३२ सत्यंव
हन्पुरावायुरिहास्मान्वाक्यमब्रवीत् सर्वभूतमतिज्ञश्चदेवर्षिरपिनारदः ३३ विष्णुर्नारायणोदेवःशंखचक्रगदासिभृत् सभौमंनरकं
हत्वाभर्तावोभवितासर्वः ३४ सप्रियंबतपश्यामश्चिरश्रुतमरिंदमम् दर्शनेनकृतार्थाहिवयमद्यमहात्मनः ३५ ततस्ताःसांत्वयामास
प्रमदावासवानुजः सर्वाःकमलपत्राक्षीर्दृष्ट्वाचोवाचमाधवः ३६ यथार्हतःपूजयित्वासमाभाष्यचकेशवः यानैःकिंकरसंयुक्तैरुवाह
मधुसूदनः ३७ किंकराणांसहस्राणिरक्षसांवातरंहसाम् शिबिकावहतांतत्रनिर्घोषःसुमहानभूत् ३८

वाम् २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ उवाहद्वारकांप्रापयामास ३७ ३८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तस्यपर्वतराजस्यशृंगंयत्परमार्चितम् विमलार्केंदुसंकाशंमणिकांचनतोरणम् ३९ सपक्षिगणमातंगंसमृगव्यालपादपम् शाखा
मृगगणाकीर्णंसुप्रस्तरशिलातलम् ४० न्यंकुभिश्चवराहैश्चरुरुभिश्चनिषेवितम् सप्रपातंमहासानुविचित्रशिखरद्रुमम् ४१ अत्यद्भु
तमचिंत्यंचमृगवृंदावलोडितम् जीवंजीवकसंघैश्चबर्हिभिश्चनिनादितम् ४२ तदप्यतिबलोविष्णुर्दोर्भ्यामुत्पाट्यभासुरम् आरोप-
यामासवलीगरुडेपक्षिणांवरे ४३ मणिपर्वतशृंगंचसभार्यंचजनार्दनम् उवाहलीलयापक्षीगरुडःपततांवरः ४४ सपक्षबलविक्षेपै-
र्हिमाद्रिशिखरोपमम् दिक्षुसर्वासुसंह्रादजनयामासपक्षिराट् ४५ आरुजन्पर्वताग्राणिपादपांश्चसमुत्क्षिपन् संजहारमहाभ्राणि
विजहारचकानिचित् ४६ विषयंसमतिक्रम्यदेवयोश्चंद्रसूर्ययोः ययौवातजवःपक्षीजनार्दनवशेस्थितः ४७ समेरुगिरिमासाद्यदेवगंध
र्वसेवितम् देवसद्मानिसर्वाणिददर्शमधुसूदनः ४८ विश्वेषांमरुतांचैवसाध्यानांचनराधिप भ्राजमानान्यतिक्रामदश्विनोश्चपरंत-
प ४९ प्राप्यपुण्यतमाल्लोकान्देवलोकमरिंदम शक्रसद्मसमासाद्यप्रविवेशजनार्दनः ५० अवतीर्यसुतार्क्ष्यात्तुददर्शविबुधाधिपम्
प्रीतश्चैवाभ्यनंदत्तदेवराजःशतक्रतुः ५१ प्रादायकुंडलेदिव्येववंदेततदाच्युतः सभार्योविबुधश्रेष्ठंनरश्रेष्ठोजनार्दनः ५२ अर्चितोदेव-
राजेनरत्नैश्चप्रतिपूजितः सत्यभामाचपौलोम्यायथावदभिनंदिता ५३ प्रासवोवासुदेवश्चजग्मतुःसहितौतदा आदित्याभवनंदिव्यं
देवमातुर्महर्द्धिमत् ५४ तत्रादितिमुपास्यंतीमप्सरोभिःसमंततः ददर्शातेमहाभागामहाभागातपान्विताम् ५५ अर्चितेकुंडलेदिव्ये
प्रदाददितिनंदनः ववंदेताशचीभर्तामातरंचासुरद्रुः ५६ जनार्दनपुरस्कृत्यकर्मचैवशशासतत् अदितिस्तौकृतौप्रीत्यापरिष्वज्याभि
नंद्यच ५७ आशीर्भिरनुकूलाभिरुभावप्यवदत्तदा पौलोमीसत्यभामाचप्रीत्यापरमयायुते ५८ अगृह्णीतांवराह्रीयादेव्यास्तेचरु-
णौसुभ्रौ तेचाप्यभ्यवदत्सम्यग्देवमातायशस्विनी ५९ यथावदब्रवीच्चैवजनार्दनमिदंवचः अधृष्यःसर्वभूतानामवध्यश्चभविष्यसि
६० यथैवदेवराजोयमजितोलोकपूजितः भवत्वियंवरारोहानित्यंचप्रियदर्शना ६१ सर्वलोकेषुविख्यातादिव्यगंधामनोरमा सत्यभा
मोत्तमास्त्रीणांसुभगास्थिरयौवना ६२ जरांनयास्यतिवधूर्यावत्त्वंकृष्णमानुषः एवमभ्यर्चितःकृष्णोदेवमात्रामहाबलः ६३ देवराजा
भ्यनुज्ञातोरत्नैश्चप्रतिपूजितः वैनतेयंसमारुह्यसहितःसत्यभामया ६४ देवाक्रीडंपरिक्रामन्पूज्यमानःसुरर्षिभिः सददर्शमहाबाहुरा-
क्रीडंवासवस्यह ६५ ८५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६६ ६७ सः कृष्णः सत्यभामांचापश्यत् ६८ ६९ ७० ७१ ७२ ७३ इतिहरिवंशेविष्णुपर्वणिटीकायांचतुःषष्टितमोऽध्यायः ६४ प्रादुर्भावइति १ षड्गुणंऐश्व
र्यस्यसमग्रस्यज्ञानस्ययशसःश्रियः वैराग्यस्यचधर्मस्यषण्णांभगइतींगनेतिषड्विधेश्वर्यसुक्तंयद्वाषड्गुणंषडंगंतानिचसर्वज्ञतातृप्तिरनादिबोधःस्वतंत्रतानित्यमलुप्तश

दिव्यमभ्यर्चितंदेवैःपारिजातंमहाद्रुमम् नित्यपुष्पधरंदिव्यंपुण्यगंधमनुत्तमम् ६६ यमासाद्यजनःसर्वोजातिंस्मरातिपौर्विकीम् संर
क्ष्यमाणंदेवैस्तंप्रसह्यामितविक्रमः ६७ उत्पाट्यारोपयामासविष्णुस्तंगरुडोपरि सोपश्यत्सत्यभामांचदिव्यमप्सरसांगणम् ६८ पृष्ठतःस
त्यभामांचदिव्यायोषाश्चवीक्षिताम् यायांतंतांद्वारवतीवासुजुष्टेनवेतथा ६९ श्रुत्वातंदेवराजस्तुकर्मकृष्णस्यतत्तदा अनुमेनेमहाबाहुःकृ
तकर्मेतिचाब्रवीत् ७० सपूज्यमानस्त्रिदशैःसप्तर्षिगणसंस्तुतः प्रतस्थेद्वारकांकृष्णोदेवलोकादरिंदम ७१ सोभिपत्यमहाबाहुर्दीर्घमध्वा
नमल्पवत् पूजितोदेवराजेनददर्शयादवीपुरीम् ७२ तथाकर्ममहत्कृत्वाभगवान्वासवानुजः उपायाद्द्वारकांकृष्णःश्रीमान्गरुडवाह
नः ७३ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिपारिजातहरणद्वारकाप्रवेशोनामचतुःषष्टितमोऽध्यायः ६४ जनमेजयउवाच
प्रादुर्भावेष्वनिर्दिष्टमाथुरंचरितंशुभम् शृण्वन्नैवाधिगच्छामितृप्तिंकृष्णस्यधीमतः १ द्वारकायांनिवसतःकृतदारस्यषड्गुणम् चरितंब्रूहिकृ
ष्णस्यसर्वंहिविदितंतव २ वैशंपायनउवाच जनमेजयकृष्णस्यकृतदारस्यभारत निबोधचरितंचित्रंतस्यैवचरितंप्रभो ३ प्राप्त
दारोमहातेजावासुदेवःप्रतापवान् रुक्मिण्यासहितोदेव्याययौरैवतकंनृप ४ उपवासावसानेहिरुक्मिण्याःप्रतिपूजयत् तर्पयिष्यन्नृस्वय
विप्रान्जगाममधुसूदनः ५ कुमाराःप्रययुस्तत्रपुत्राभ्रातरएवच प्रेषितावासुदेवेननारदस्याभ्यनुज्ञया ६ षोडशस्त्रीसहस्राणिजग्मुरेवच
धीमतः कृष्णापरमयाराजन्विष्णोरेवानुरूपया ७ ततस्तत्रद्विजातीनांकामान्प्रादादधोक्षजः अर्थिनांधर्मनित्यानांवंदिनामिष्टवादिनाम्
८ कल्याणनामगोत्राणांमहतांपुण्यकर्मणाम् यौनैःश्रौतैश्चमौखैश्चसुल्यानांकुरुनंदन ९ तर्पयित्वाद्विजान्कामैरिष्टैरिष्टःसतांगतिः
ज्ञातीन्संतर्पयामासयथार्हंभक्तवत्सलः १० उपवासावसानेसभगवान्सविशेषतः बहुमेनेप्रियांभार्यांरुक्मिणींभीष्मकात्मजाम् ११
वसतस्तस्यकृष्णस्यसदारस्यामितौजसः सहासीनस्यरुक्मिण्यानारदोभ्याययौमुनिः १२ आगतंचाप्रमेयात्मासुनिमिंद्रानुजस्तदा शा
स्त्रदृष्टेनविधिनाअर्चयामासकेशवः १३ सोर्चितोवासुदेवेनमुनिरर्च्यतमःसताम् पारिजाततरोःपुष्पंददौकृष्णायभारत १४ तद्दृक्षरा
जकुसुमंरुक्मिण्याःप्रददौहरिः पार्श्वस्थासाहिकृष्णस्यभोज्यानरवराभवत् १५

भिः अनंतशक्तिस्याविभोर्विभुज्ञाः षडाहुरंगानिमहेश्वरस्येतिवायुपु
राणोक्तानि २ ३ ४ अवसानंव्रतपारणम् ५ ६ ७ ८ यौनैः योनिसंबंधैः श्रौतैः अध्ययनसंबंधैःमौखैः आर्त्विज्यसंबंधैः ९ १० ११ १२ १३ १४ हेनरवर १५ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१६ १७ औपयिकंयोग्यम् १८ १९ २० २१ २२ २३ २४ भगाधानंऐश्वर्याधायकम् २५ २६ २७ २८ २९ स्ववादित्रानितिपुंस्त्वंआर्षम् ३०

प्रतिगृह्यतुतत्पुष्पंकामारणिरनिंदिता शिरस्यमलपत्राक्षीददौकृष्णोंगितानुगा १६ त्रैलोक्यरूपसर्वस्वंनारायणमनोहरा शुशुभे देवपुष्पेणद्विगुणंभैष्मकीतदा १७ तांनारदस्तथोवाचमुनिर्ब्रह्मसुतस्तदा तवैवौपयिकंपुष्पमेकंदेविपतिव्रते १८ अलंकृतंपुष्पमेतत्संसर्गात्तवसर्वथा अत्यर्हाचमतामेत्वमेतत्पुष्पधृतव्रते १९ कल्याणगुणसंपन्नेसततंभर्तृवत्सले अम्लानमेतत्सततंपुष्पंभवतिकामिनि २० संवत्सरपरंकालंकालज्ञेगुणसंमते ईप्सितानपिगंधांश्चददातिवदतांवरे २१ शीतोष्णेचेप्सितेदेविपुष्पमेतत्प्रयच्छति स्ववत्यपिरसान्देविमनसाकांक्षितान्वरान् २२ सेव्यमानंचसौभाग्यंददातिवरवर्णिनि स्रवत्यपितथागंधानीप्सितान्प्रीतिवर्द्धनान् २३ यानियानिचपुष्पाणिलंदेव्यभिलाषिष्यसि कुसुमंवृक्षराजस्यतानितानिप्रदास्यति २४ एतद्देवभगाधानंधर्मिष्ठेपुत्रदंतथा प्रतिचनाशुभेधत्तेधार्यमाणंसदाशुभे २५ यद्यदिच्छातिवर्णंचतत्सर्वंधारयिष्यति स्वल्पंवायदिवास्थूलंछदतस्तेभविष्यति २६ अनिष्टगंधहरणंतत्समंगधवर्द्धनम् प्रदीपकर्मरात्रौचकरोतिकमलेक्षणे २७ संतानकस्रजोमाल्यपुष्पवस्त्रादिवाच्युतम् पुष्पमंडपमुरव्यानिचिंतितेनप्रदास्यति २८ क्षुत्क्षामावापिपासावाग्लानिर्वाप्यथवाजरा देववन्द्यारयत्यास्तेस्वच्छदेनभविष्यति २९ अनुगीतानिगीतानिदास्यत्यपिचचिंतिते सुवादित्रान्समधुरानततथैवततवसंमतान् ३० पूर्णेसंवत्सरेदेविपुष्पमेतत्तवांतिकात् निर्वर्त्स्यतेतरुवरंसमयेनप्रयास्यति ३१ कृतिरेषाहिभद्रंतेपारिजातस्यसुप्रभे निसर्गतःसर्गकृतासत्कारार्थंसुरद्विषाम् ३२ उमादेववरस्येष्टाहिमालयसुतासती धारयंतीन्द्रशीनित्यंपुष्पाण्येतानिसुप्रभे ३३ अदितिश्चसपौलोमीमहेंद्रसुरतारणी सावित्रीदेवमाताचश्रीश्चसर्वगुणोचिता ३४ देवपत्न्यस्तथैवान्यादेवाश्चवसुदेवताः संवत्सरपरःकालःसर्वेषांनतुसंशयः ३५ षोडशस्त्रीसहस्राणांमध्येत्वंखलुवर्तसे अद्यैष्टावासुदेवस्यवैषिखाभोजनंदिनि ३६ सपत्न्यस्तेगुणोपेतेसर्वाःसर्वेश्वरप्रिये अवमानावसेकेनत्वयासिक्ताद्यभामिनि ३७ प्रकाशमद्यसौभाग्यमनिवार्यंयशश्चते मंदारकुसुमंदत्तंयत्तेमधुनिघातिना ३८ अद्यसात्राजितीदेवीज्ञास्यतेवरवर्णिनी सौभाग्याढ्यंसदात्वेत्त्रियात्मानंसुभगंसती ३९ सांबमाताचगांधारीभार्याश्चान्यामहात्मनः सौभाग्यार्थोद्यताकांक्षामद्यमोक्ष्यंतिनिःस्पृहाः ४० सौभाग्येकरयोजेत्रःतवदेव्यद्यनिःसृतः मनोरथरथानांयःसहस्रैरपिदुर्जयः ४१

३१ कृतिःस्वभावःसामर्थ्यमित्यर्थः सर्गकृताब्रह्मणाकृतेतिशेषः ३२ ३३ महेंद्रस्यसुरताचअरणिश्चेतिसुरतारणीस्त्रीचमाताचेत्यर्थः ३४ वसुदेवताःवसुसुख्याः तेषांकालोब्रह्ममानेनसंवत्सरःपरउत्कृष्टेनततोधिकोप्यस्तीत्यर्थः ३५ भोजनंदिनिहेरुक्मिणि ३६ सिक्ताः अद्येतिछेदःसंधिरार्षः ३७ ३८ ३९ सांबमाताजांबवती ४० निःसृतःप्रसृतः ४१ ८५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हे भोजे भोजकन्ये ४२ ४३ ४४ ४५ ४६ कौलीनंकुलगर्ह्यंदेव्यः कृष्णपत्न्यः ४७ ४८ ४९ ५० सकुंकुमंकुंकुमरक्तं शक्लुतमंचतदेकंच शक्लुतमेकं अंशुकंवस्त्रं
इदंरोषचिन्हम् ५१ क्रोधगृहं असंस्कृतंशून्यगृहम् ५२ पर्यंतदेशंललाटप्रांतदेशम् ५३ ५४ कुशेशयंमुखकमलं ५५ इतिश्रीमहा० खिलेषु हरिवंशेविष्णुपर्व०

अथाहमवगच्छामिसर्वथासर्वशोभने आत्माद्वितीयः कृष्णस्य भोजेत्वमितिभामिनि ४२ त्रैलोक्यरत्नसर्वस्वमददाद्यत्तवाच्युतः जी
वितातिशयस्तेनत्वयाप्राप्तोहरिप्रिये ४३ नारदेनैवमुक्तेतुतथ्यवाक्यनराधिप तत्रस्थाःशुश्रुवुःप्रेष्याःप्रेषिताःसत्यभामया ४४ देवी
नांचतथान्यासांपत्नीनांचविशांपते दृष्टाताःसविशेषंचनारदेनाभ्युदाहृतम् ४५ तच्चश्रुत्वाकृतंनिखिलंप्रेष्याभिःस्त्रीस्वभावतः प्रकाशी
कृतमेवासीद्विष्णोरंतःपुरेतदा ४६ कर्णाकर्णिततोदेव्यःकौलीनमिवसंघशः मंत्रयांचक्रिरेदृष्टारुक्मिण्यातिगुणोदयम् ४७ अर्हतिपुत्र
मातेतिज्येष्ठेतिचसमागताः प्रायेणप्रवदंतिस्मदृष्टादासोदरस्त्रियः ४८ ममृषेनसपत्न्यास्तुतत्सौभाग्यगुणोदयम् सत्यभामाप्रियानित्यं
विष्णोरतुलतेजसः ४९ रूपयौवनसंपन्नास्वसौभाग्येनगर्विता अभिमानवतीदेवीश्रुत्वैवेर्ष्यावशंगता ५० समुत्सृजंतीवसनंसकुंकुमंसु
विस्मिताशुक्लुतमेकमंशुकम् जग्राहरोषाकुलितेनचेतसावन्हेस्तदाश्रीरिववर्द्धितेंधना ५१ ददह्यमानाज्वलनेनवर्द्धताईर्ष्यासमुत्थेनग
तप्रभेव क्रोधान्विताक्रोधगृहंविविक्तंविवेशतारेवघनंसतोयम् ५२ बध्वाललाटेहिमचंद्रशुक्लंदुकूलपट्टंप्रियरोषचिन्हम् पर्यंतदेशंस
रसेनदेवीविलिप्यसालोहितचंदनेन ५३ संस्मृत्यसंस्मृत्यशिरःसरोषंप्रकंपमानासमुपोपविष्टा दीर्घोपधानेशयनेपनीयविभूषणान्येव
निबद्धवेणी ५४ अकारणार्थेनविकृष्यमाणाप्रेष्याजनस्याभिजनान्वितापि विचूर्णयामासकुशेशयंसानिःश्वस्यनिःश्वस्यनखैर्नतभ्रूः ५५
इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिपारिजातहरणेपंचषष्टितमोऽध्यायः ६५ वैशंपायनउवाच उपविष्टेमुनौज्ञात्वारु
क्मिण्यासहकेशवः निश्चक्रामाप्रमेयात्माव्यपदेशेनसर्ववित् १ जगामत्वरितश्चैवसत्यभामागृहंमहत् रम्यंरैवतकोद्देशेनिर्मितंविश्व-
कर्मणा २ अभिमानवतीमिष्टांप्राणैरपिगरीयसीम् जानन्सत्राजितींविष्णुर्विवेशाशनकैरिव ३ कुपितामिवतांदेवींस्नेहात्संकल्पय
न्निव भीतभीतःसशनकैर्विवेशमधुसूदनः ४ सेवकंद्वारदेशेतुतिष्ठेत्युक्त्वाविवेशह नारदस्योपचारार्थंप्रद्युम्नंविनियुज्यसः ५ सददर्श
प्रियांदूरात्क्रोधागारगतांतदा प्रेष्याभिरवस्थितांकोपात्निःश्वसंतींमुहुर्मुहुः ६ करजाग्रावलीढंतुपंकजंमुखपंकजे संश्लेषयित्वानिःश्व
स्यविहसंतींपुनःपुनः ७

टीकायांपंचषष्टितमोऽध्यायः ६५ उपविष्टमिति व्यपदेशेनव्याजांतरेणसर्ववित्सत्यभामाभाववित् १ २ विवेशआससा
द ३ ४ ५ ६ पंकजंक्रीडाकमलंहसंतींसपत्नीमत्तोपिसौभाग्याधिक्यंप्राप्तवतीत्याश्चर्येणेतिभावः ७ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 वसुंधरांलिखंतीतिशेषः पृष्ठेइतितिर्यक्त्वस्योपलक्षणम् ८ ९ मल्हादयित्वाचंदनकृत्यापेष्यास्तुलापिपिक्षिपंतींनिंदंतींतेनभ्रांतत्वमस्याः व्यक्तम् १० ११
अवगुंठ्यवस्त्रेणाच्छाद्यउपधानेउच्छीर्षके अंतरं अवकाशम् १२ संज्ञायसंकेत्यतांसोन्वगमत् १३ ग्रहायगृहीत्वा १४ १५ १६ १७ १८ गंधाय्यमहद्धयामेदि
न्येवगंधंमुंचंतीतितर्कयतिकथमितिएकतरोतिशायिततरः १९ विवेक्षंतीव्यवेक्षमाणा भाशुरिमतेनाकारलोपः अनुदात्तेत्वलक्षणस्यात्मनेपदस्यानित्यत्वात्परस्मैपदं

करपद्मेपुनःसव्येमुखपद्मंनिवेश्यच वनितांचारुसर्वांगींध्यायंतींकमलेक्षणाम् ९ सरसंचंदनंगृह्यप्रेष्याहस्तादनिंदिताम् मल्हादयि
त्वाहृदयंक्षिपंतींनिर्दयंपुनः १० पुनरुत्थायशयनात्पतंतींचपुनःपुनः तांस्तांश्चेष्टाःप्रियायाश्चतथान्यादद्दशेहरिः ११ अवगुंठ्ययदाव
स्त्रमुपधानेन्यवेशयत् इदमंतरमित्येवंतदागत्वाजनार्दनः १२ प्रेष्याजनंससंज्ञायअनाख्येयोस्मिसंज्ञया सशंकितप्रचारश्चत्वरितोन्वगम
त्सताम् १३ ग्रहायव्यजनंचैवस्थित्वासपरिपार्श्वतः शनैरिवासृजद्वातंजहासशनकैरिव १४ सपारिजातपुष्पस्यसंसर्गादनुवासितः बभा
रभगवान्गंधंदिव्यमानुषदुर्लभम् १५ अत्यद्भुतंसगंधंचजिघ्रित्वाविस्मयान्विता अपावृणोन्मुखंसत्याकिमेतदितिचाब्रवीत् १६ सो-
स्थितःपृष्ठतोदेवमपश्यतीसुचिस्मिता पर्यपृच्छद्यथाप्रेष्यागंधस्यप्रभवंतदा १७ ताःपृष्टास्त्वप्रभाषंत्योजानुभ्यांधरणींगताः अधोमुख्य
स्तनस्तस्थुःकृतांजलिपुटास्तदा १८ तदपूर्वमहद्ध्येवगंधंमुंचतिमेदिनी कथमेकतरस्तस्यागंधोयमितितत्वल्लु १९ किंस्विदस्यादितिच
सावविक्षंतीसमंततः ददर्शकेशवंदेवीसहसालोकभावनम् २० मुह्यंतीचतदोवाचसहसास्याविलेक्षणा अवतिक्तेवरोषेणवपूवम-
णयान्विता २१ सामस्फुरितचार्वोष्ठीनिःश्वस्याधोमुखीतदा सुहृतमसितापांगीतस्थावन्यमुखीशुभा २२ निबध्यभृकुटीवासास्य
ग्विक्षिप्यलोचने निवेश्यवदनंहस्तेशोभसीत्यब्रवीद्धरिम् २३ तस्याःस्रस्तावनेत्राभ्यांवारिप्रणयकोपजम् कुशेशयपलाशाभ्यामव
श्यायजलंयथा २४ ससमुत्पत्यजलतत्रपतितंवदनांबुजात् प्रतिजग्राहपद्माक्षःकराभ्यामतिसत्वरः २५ अथोरसिपतत्तोयंश्रीवत्सांको
बुजेक्षणः प्रियानयनजंदेवःपरिमृज्येदमब्रवीत् २६ स्रवत्यसितपद्माक्षिकिमर्थंतवभामिनि तोयंसुंदरिनेत्राभ्यांपुष्कराभ्यामिवोदक
म् २७ प्रभातेपूर्णचंद्रस्यमध्यान्हेपंकजस्यच बिभर्तितवकिंवक्त्रंवपुस्तवमनोहरे २८ किमर्थंकौंकुमंवासोमहारजतमेवच नानुगृ
ण्हासिसुश्रोणिशुक्लंवासोनुगृह्यते २९

२० मुह्यंतीतिउवाच सद्योस्याविलेक्षणाभूत्नतुअन्यत्वक्तुमशकत् २१ अन्यमुखीकृष्णामनवे
क्ष्यमाणा २२ शोभसीत्युपलंभार्थंनतुरंजनार्थम् २३ २४ २५ उरसिपरिमृज्येतिस्नेहातिशयसूचनम् २६ २७ वपुःस्वरूपम् २८ कुंकुमेनरक्तं-
कौंकुमंपीतारुणमित्यर्थः महारजतेनरक्तद्रव्यविशेषेणरक्तंमहारजतंरक्तकौसुंभमित्यर्थः २९ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

देवेतिदेवपूजायामेव शक्लमिष्टंनान्यदेत्यर्थः ३० चित्रकस्थानंपत्रलेखास्थानम् आक्रांतमस्रुलिप्तमित्यर्थः अवरोधूसरोवर्णः देहकांतिस्तद्वतिहे अवरवर्णिनि ३१
३२ ३३ ३४ रत्नैश्चरत्नजातसंबंधिभिः ३५ स्मेरेणउत्फुल्लेन ३६ माद्यमामद्य ३७ तोयमस्रुअंजनेनदुर्दिनंमलिनम् द्विषमित्यदंतत्वंकप्रत्ययांतत्वात् ३८ ३९

वासस्येतेतवाभीष्टे महारजतकौंकुमे देव्याभिगमनादूर्ध्वंशुक्लंनेष्टंहितास्त्रियाः ३० किंचानाभरणंगात्रंसुगात्रितवकथ्यताम् चित्र
कस्थानमाक्रांतकस्मादवरवर्णिनि ३१ श्वेतेनतवपादेनवाससाप्रियदर्शने ललाटंसेव्यतेकस्माच्चंदनेनसुगंधिना ३२ सरसेनायता
पांगिकांतेनहृदयप्रिये प्रभोपमर्दकेनापिकारणेनाननस्यच ३३ करोषिममवात्यर्थंमनोग्लापयसिप्रिये प्रसृतश्चंदनरसः कपोलप्रण
यीतव ३४ पत्रलेखासपत्नत्वंप्राप्तोनातिविराजते रत्नैश्चाभरणैर्मुक्तातवग्रीवानशोभते ३५ ग्रहनक्षत्ररहिताद्यौरिवाव्यक्तशारदी
पूर्णचंद्रसपत्नेनस्मेरेणाबहुभाषिणा ३६ किमुनाभाषसेमाद्यसुखेनोत्पलगंधिना अर्द्धाक्ष्णापिहितावन्माकिमर्थंननिरीक्ष्यसे ३७
सुचस्येवसनिःश्वासतोयमंजनदुर्दिनम् अलमिंदीवरश्यामेरुदितेनमनस्विनि जलमंजनकल्माषंमामोक्षीराननद्विषम् ३८ त्वदीयो
हंयदादेविख्यातोजगतिकिंकरः नाज्ञापयसिकिंमांत्वंपुरेववरवर्णिनि ३९ किंमृकार्षमहंदेविविप्रियंतवभामिनि येनातिमात्रमात्मान
मायासयसिसुंदरि ४० मनसाकर्मणावाचावानत्वामतिचराम्यहम् सर्वथासर्वचार्वंगिसत्यमेतद्ब्रवीम्यहम् ४१ बहुमानोपयान्यासुस्त्रीषु-
सर्वासुशोभने स्नेहश्चबहुमानश्चत्वामृतेऽन्यासुनास्तिमे ४२ नैवत्वांमदनोजह्यात्त्वन्मृतेपिमयिमामकः इतिमेनिश्चितंविद्धिचेतःसुरसु
तोपमे ४३ क्षमादयश्चमेदिव्याशब्दाद्याश्चाबरेगुणाः ध्रुवंपंकजगर्भाभेत्वयिस्नेहस्तथामम ४४ रुचिरग्नौयथादिव्याप्रभाचैवदिवा-
करे कांतिश्चशाश्वतीचंद्रेस्नेहस्त्वयितथामम ४५ एवंवादिनमात्मेष्टंसत्यभामाजनार्दनम् शनैरुवाचनेत्राभ्यांप्रमृज्यसुभगाजलम्
४६ मदीयस्त्वंप्रियोह्यासीन्ममनित्यंमनःप्रभो अद्यसाधारणस्नेहंलपितावकृतास्म्यहम् ४७ नाज्ञासिषमहंपूर्वमनित्यंकालपर्ययम्
अधःलोकगतिंकृत्स्नामवगच्छामिनध्रुवम् ४८ अमृतायाद्वितीयोपिजन्मोहिममसर्वथा किमत्रबहुनोक्तेनहृदयंवेत्सितेऽच्युत ४९ वा
ङ्मात्रमेवपश्यामिमाधुर्यंसंप्रयुज्यसे मयिस्नेहश्चकृतकस्तवान्यत्रनकृत्रिमः ५० ऋजुस्वभावाभक्ताचसर्वथापुरुषोत्तम अवजाना
सिजानन्मांकैतवींवृत्तिमास्थितः ५१ एतावत्खलुपर्याप्तंदृष्टंद्रष्टव्यमव्ययम् श्रुतंचाप्यथयच्छ्राव्यंदृष्टःस्नेहफलोदयः ५२

४० ४१ ४२म
दनोनैवजह्यादित्यरतिरयौवनंवातवमास्त्वित्यर्थः ४३ ४४ ४५ ४६ ४७ ४८ अमृतायाःजीवंत्याः ममद्वितीयस्त्वमिति अपिशब्दात्तवाप्यहमेवद्वितीयेतिम
यास्त्वजन्म ओंहि ध्रुतर्किं यथाहंत्वदन्यंनजाने एवंत्वमपिमदन्यांनजानासीत्येवमहंनित्यंतर्कितवतीत्यर्थःजन्मेति पुंस्त्वमार्षमितिमांत्वः ४९ ५० ५१ ५२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

परपुष्टस्वनोन्मिश्रंकोकिलध्वनिनादितम् हृष्यातवेतिशेषः २० २१ कःस्मरिष्यति मयिमृतायामितिभावः २२ २३ २४ नाहमितिहेतत्पक्ष मत्सपत्नीपक्षपातिन् पक्षेहेऽरिंदमसंसारशत्रुनाशन इतःपूर्वंत्वांकितवंधूर्तइत्यादिरूपंतवसार्वात्म्यंब्रह्मदाशाब्रह्मदासाब्रह्मेमेकितवाउतेत्याद्यागमादपिनाज्ञासिषं अद्यतु हेअजन जन्मादिहीन त्वंतत्पक्षचंचलइतिज्ञातोसि तस्याःमत्सपत्न्याःमायायाःपक्षेएवचंचलोमायाविशिष्टचिद्रूपस्यतवमायांशेनैवचांचल्यंवंचकत्वंच नतुचिदंशेनेत्यद्यै वज्ञातमित्यर्थः तत्पक्षेति समासैकदेशोपिवंचकशब्देनसंबद्धुंआवर्तते २५ वाङ्मनसागोचरोहंकथंत्वयाज्ञातइत्यत आह स्वरेति हेदेव त्वंस्वरश्चवर्णश्चइंगितंच

परपुष्टस्वनोन्मिश्रंपुष्पगंधवहंशुचिम् कथंनामानिलंहृष्यासेवेयंदुर्भगासती २० जलक्रीडांतवांकस्थादेवकल्लामहोदधौ कथंदौर्भाग्यमापन्नापश्येयमपिसागरम् २१ सात्राजितिप्रियानान्यात्वत्तोमस्तीतिविद्धिमाम् यदवोचःकृतद्यातमथचाकःस्मरिष्यति २२ यदद्यास्त्रीहृिमांश्वश्रूर्बहुमानेननंदिनी अवज्ञातांत्वयाराज्ञीनूनंदौर्भाग्यकर्शिताम् २३ किंनुगूढेनमेप्रेम्णासुस्निग्धेनापिमानद यत्समानाजनैर्देवीमांनपश्यतिनित्यदा २४ नाहंत्वांकितवधूर्तमज्ञासिषमरिंदम अद्यज्ञातोसितत्पक्षचंचलोजनवंचकः २५ स्वरवर्णेंगिताकारान्निगूढोदेवयत्नतः चौरज्ञातोसितत्पक्षवाङ्मात्रमधुरःशठः २६ एवमीर्ष्यावशंप्राप्तांदेवींसात्राजितींहरिः अभिमानवतींदेवःसांत्वपूर्वमथाब्रवीत् २७ मैवंपद्मपलाशाक्षिप्राणेश्वरिवदाप्रिये किमत्रबहुनोक्तेनत्वदीयमवगच्छमाम् २८ तत्पारिजातकुसुमतस्यादेविमसायतः नारदोमत्प्रियंकुर्वन्सुनिरक्लिष्टकर्मकृत् २९ दाक्षिण्यादनुरोधाच्चदत्तवान्नात्रसंशयः प्रसीदैकापराधंमेमर्षयस्वसुचिस्मिते ३० पारिजातकपुष्पाणियदीच्छस्यतिकोपने तदादातास्मिसुश्रोणिसत्यमेतद्ब्रवीमिते ३१ स्वर्गास्पदादानयित्वापारिजातंद्रुमेश्वरम् गृहेतेस्थापयिष्यामियावत्कालंत्वमिच्छसि ३२ एवमुक्तातुहरिणाप्रोवाचहरिवल्लभा यद्येवंसद्रुमःशक्यस्त्विहानयितुमच्युत ३३

आकारश्चतैःलिंगैःकृत्वात्वंअतिगूढोनिःप्रकटोपियत्नतः शठोमध्यस्थउदासीनइतिज्ञातोसि अयंभावः वागाद्युद्बोधकतयासंघातविशिष्टरूपेणप्रत्यगात्मत्वान्नित्यंज्ञातोपिसाक्षिवदसंगत्वेनइदानीमेवज्ञातइत्यर्थः अतएवचौरवत्सच्छन्नत्वाच्चौरेतिसंबोधयति तत्पक्षेति मायापक्षेब्राह्मलौकिकांतैश्वर्यविषयेरत्याशाः जरामरणवर्जितः कायःसंकल्पमात्रोपनताभोगाइत्यादिवाङ्मात्रेणमधुरःमधुरभाषीवदकर्तृत्वात् असि नत्वर्थतस्तत्रमाधुर्यमस्तीतिभावः यतः शठउदासीन अभोक्तृत्वात् शठोमध्यस्थपुरुषेधूर्तधत्तूरयोरपीतिविश्वः कृष्णपक्षेतुद्वयोरपिश्लोकयोःस्पष्टएवार्थः २६ २७ त्वदीयमात्मानमितिशेषःपक्षेस्पष्टम् २८ तस्यादत्तवानित्यग्रिमस्थेनसंबंधः २९ ३० ३१ स्वर्गास्पदात्स्वर्गस्थानात् ३२ ३३ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५३ ५४ गृहाय आदाय हरिवाससः पटांतं अंचलम् ५५ इतिश्रीनीलकंठीये भारतभावदीपे खिलेषु हरिवंशे विष्णुपर्वणि टीकायां षट्षष्टितमोऽध्यायः ६६
१ २ शापितासि शपथेनाभियुक्तासि अनत्ययः अविनाशः ३ ४ ५ शिरः प्रौढिम् ६ ७ इष्टजने इति रोषात् रुक्मिण्या अभिधानम् ८ ९ १० ११ १२
यदहं स्वप्नेन योगमयेन दृष्टापि न श्रद्दध्यां तव अन्यत्र प्रेमास्तीति तदेव निर्वृत्तम् अश्रौषं इति योज्यम् १३ मुनेः कामो रुक्मिणीस्तुताव स्तु परं तु नवतत्स्तोत्रश्रवणम्

यदि त्वहमनुग्राह्या मामनुज्ञातुमर्हसि तपस्येऽहं परं कृत्वा निश्चयं पुरुषोत्तम ५३ भर्तुश्छंदेन नारीणां तपो वा व्रतकानि च निष्फलं खलु यज्ञस्तु रच्छंदेन क्रियेत हि ५४ इतीदमुक्त्वा पुनरेव शोभना सुमोच तोयं नयनोद्भवं सती गृहाय पीतं हरिवाससः शुभा पटांतमाधाय मुखे सुविस्मिता ५५ इतिश्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि पारिजातहरणे षट्षष्टितमोऽध्यायः ६६ वैशंपायन उवाच
नारायणः सत्यभामां पुनरेवैष भारत प्रोवाच प्रणयात्क्रुद्धामभिमानवतीं सतीम् १ श्रीभगवानुवाच इहतो वस मा गा निशोकः
कमललोचने किमु तत्कारणं येन त्वमेवमतिविक्लवा २ शापितासि मम प्राणैरा च क्ष्वानत्ययो यदि श्रोतव्यं यदि भक्तेन भर्त्रा सर्वांग शोभने ३
ततः प्रोवाच भर्तारं सत्या सत्यव्रते स्थितम् बाष्पगद्गदया वाचा तथैवाधोमुखी स्थिता ४ त्वयैव स्थापितं पूर्वं सौभाग्यं मम मानद जगत्यस्मि
लपत्राक्ष यत्त्व्यातं केशिनाशन ५ शिरो वहामि चैष्ट्वा त्वं वाहं देवगर्विता सर्वसीमंतिनीमध्ये स्पृहणीयास्मि सर्वथा ६ साहमद्याव हा
स्यास्मि सपत्नीनां जनस्य च इति प्रेष्याभिराख्यातं श्रुत्वा तथ्यं ततस्ततः ७ यत्पारिजातकुसुमं दत्तवान्नारदस्तव तत्किलेष्टजने दत्तं त्वया
हं परिवर्जिता ८ रत्नातिशयदानेन तस्याः सम्यधिकः किल स्नेहश्च बहुमानश्च प्रकाशं गमितस्त्वया ९ तां मस्तौषीस्त्वं समक्षं ते प्रियां स
किल नारदः तमश्रौषीश्च दृष्टस्त्वं प्रियायाः संस्तवं किल १० श्रोतव्यो यदि ता वत्स नारदेन तु वा यतः दुर्भगोयं जनस्तत्र किमर्थमनुशाब्दितः
११ प्रणयस्तु रसं दत्वा पश्चात्तापः प्रभो यदि अनुज्ञां मे प्रयच्छ स्वतपः कर्तुं प्रसीद मे १२ स्वप्नेनापि न दृष्टाहं श्रद्दध्यां पुष्करेक्षण यदन्यदे
व निर्वृत्तमश्रौषं पश्यतस्तव १३ कामं कामोऽस्तु तस्यैव मुनेरतुलतेजसः अन्नमन्युस्तु मे देव सा निध्यं तव तत्र यत् १४ मानार्थं जीव्यते लोके
सद्भिरित्युक्तवानसि तदेवं सति नेच्छामि जीवितुं मानवर्जिता १५ ममाभवद्यतो रक्षा भयमद्य ततो मम सर्वतो रक्ष ते यो मा समानाद्या भिर
क्षति १६ हा गतिं का गमिष्यामि त्यक्ता देवत्वया विभो कुमुद्वतीं गतां नूनं गतिं यास्याम्यसंगता १७ किमकार्षमहं मोहाद्दीश्वराणां प्रिया
प्रियम् प्रिया भूत्वा प्रिया भूता यद्यहं तव मानद १८ वसंतकुसुमैश्चित्रं सदा रैवतकं गिरिम् प्रिया भूत्वाऽप्रिया भूता कथं द्रक्ष्याम्यहं पुनः १९

शुक्तमिति भावः १४ १५ १६ कुमुद्वतीगतां चंद्रकरस्पर्शादुल्लसनां असंस्पर्शे मुकुली भावरूपां गतिं कुमुद्वत्या अजभार्यायागतिर्भर्तुरग्रे मरणं तां वा १७ १८ १९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६० ६१ ६२ ६३ पुष्पाणीतितज्जातीयसुगंधद्रव्यमात्रस्योपलक्षणम् बहूनिचनानिरूपाणिचेतिविग्रहः रूपाणिइतिशब्दात्तुगांधर्वमित्यर्थः रूपंस्वभावेसौंदर्येनालो-
केपशुशब्दयोरितिमेदिनी पद्मानीतिनिधिमात्रस्योपलक्षणम् ६४ अतएवमंदारात्कल्पवृक्षाच्चायंसारभूतइत्यर्थः ६५ ततस्तत्रनिबध्येत्यादिनापरकृतौसरूपार्थवा
देनसौभाग्यकामनयाभर्तृसहितस्यपारिजातस्यदानंकर्तव्यम् निष्क्रयेणपुनर्भर्तात्वमोक्तव्यइतिविधिरुन्नेयः ६६ ६७ ६८ ६९ विष्णुपद्याः गंगायाःपरिउपरिजात
इतिपरिजातःस्वार्थेऽण् संयोगेमंतुंमानयितुंवियोगेदारयितुंचयोग्यानिमंदराणिचतानिपुष्पाणिचतैः ७० कोविदारइत्यपिकारात् ७१ ७२ इतिश्रीमहाभारतेखि

ईप्सितंगीतनृत्यंचभवेन्ममतपोधन कुमारीनित्यदाचैवभवेयंतपसोनिधे ६० विरजाःशोकरहिताभवेयमितिनित्यदा पतिभक्तिमती
चैवधर्मशीलातथैवच ६१ पारिजातंततोस्याक्षीददित्याःप्रियकाम्यया सर्वकामप्रदैःपुष्पैरावृतंनित्यगंधदैः ६२ त्रिशास्वंसर्वदादृश्यंस
र्वभूतमनोहरम् सर्वपुष्पाणिदृश्यंतेतस्मिन्नेवमहाद्रुमे ६३ ईदृशान्यपिपुष्पाणिबिभर्त्येकापिरूपिणी बहुरूपाणिचाप्यन्यापद्मान्विचित
तोपरा ६४ मंदारादपिवृक्षाच्चसारस्तुस्यकश्यपः तस्मादेषतरुश्रेष्ठःसर्वेषांश्रेष्ठतांगतः ६५ ततस्तत्रनिबध्याथकश्यपप्रददौशुभे अदि
तिर्ममपुण्यार्थंसौभाग्यार्थंतथैवच ६६ अदित्याकश्यपोदत्तःपुण्यार्थंचतथामम पुष्पदाम्नावेष्टयित्वाकंठेपुण्यार्थमात्मवान् ६७ निष्क्र-
येणमयामुक्तःकश्यपस्तुतपोधनः इंद्रोदत्तस्तथेंद्राण्यासौभाग्यार्थंततोमम ६८ सोमश्चाप्ययरोहिण्याकृत्स्याचधनदस्तथा एवंसौभा
ग्यदोवृक्षःपारिजातोनसंशयः ६९ पारिजातोविष्णुपद्याःपारिजातेतिशब्दितः मंदारपुष्पैर्यद्युक्तोमंदारस्तेनकथ्यते ७० कोप्ययंदारुरि
त्याहुरज्ञानतोयतोजनाः कोविदारइतिख्यातस्ततःसतुमहातरुः ७१ मंदारःकोविदारश्चपारिजातश्चनामभिः सवृक्षोज्ञायतेदिव्योयस्यै
तत्कुसुमोत्तमम् ७२ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिपारिजातहरणेसप्तषष्टितमोऽध्यायः ६७ वैशंपायनउवाच
ततोजिगमिषुंतत्रनारदंमुनिसत्तमम् प्रोवाचभगवान्विष्णुरप्रमेयपराक्रमः १ महर्षेधर्मतत्त्वज्ञस्वर्गंगत्वात्वयानघ दृष्टासदस्यानुदेव
स्यत्रिपुरघ्नस्यधीमतः २ अनाज्ञयामद्वचनाद्विज्ञाप्यःपाकशासनः संभावयित्वाभ्रातृत्वंपौराणंवेत्सियत्मुने ३ यमस्त्वासीन्मुनिश्रेष्ठो
भगवान्काश्यपस्तरुम् पारिजातंपुरादित्याःकृत्वार्थंधर्मसत्तमः ४

लेषुहरिवंशेविष्णुपर्वणिटीकायांसप्तषष्टितमोऽध्यायः ६७ एवंतावत्पूर्वा
ध्यायेनिमंत्रितोहम् पुष्पंदत्वामहामतेइतिनारदवचः श्रुत्वातस्यचस्वकार्योपयोगित्वाद्भगवान्नारदंउवाचेत्याह ततोजिगमिषुमिति १ अत्रनारदेनपूर्वंस्वप्र-
योजनमुक्तंनिमंत्रितोहंपूर्वंद्युःपुष्पंदत्वामहामनइतितत्कुर्वन्नेवममापिकार्यंकुर्विति भगवान्नारदमाह महर्षेइति २ अनाज्ञयाप्रेष्यस्यभृत्यंप्रतियत्प्रेरणंतत्संव
चनंतदाज्ञातयाविनेत्यर्थः विज्ञापनात्तुउत्तमस्यनिकृष्टेनप्रार्थनेतिभेदः पौराणंवामनावतारीयम् ३ ४ ५ ६ ७ ८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भस्तृष्टस्सक्तः बहुगुणंसुखमितिशेषः ३४ प्रथमोमुख्यः कल्पःसांत्वनोपायः ३५ ३६ ३७ ३८ ३९ भृंगारेणकनकपात्रेण भृंगारीझिल्लिकायांचकनकालौ-
पुनः पुमानितिमेदिनी ४० परमान्नंपायसम् ४१ ४२ ४३ ४४ ४५ ४६ विघसंदेवब्राह्मणशेषम् ४७ ४८ ४९ ५० ५१ ५२ सोमःउ

मन्युरेषप्रसृष्टोहिभवेद्बहुगुणंमम सीमंतिनीनांसर्वासामधिकास्यामधोक्षज ३४ तथास्तुप्रथमःकल्पइतितांमधुसूदनः प्रोवाचाप्रति
मोदेवोजगतःप्रभवाप्ययः ३५ तथेत्युक्तेतिकृष्णोनतुतोषसमितिंजय सत्यभामासतामिशाकंसनाशनवल्लभा ३६ ततःस्नातोजगन्ना
थःसर्वेशःसर्वभावनः चकारावश्यकंसर्वंसर्वकामप्रदःसताम् ३७ दध्यौचनारदंदेवःस्नातोदेवमुनिर्नृप अभ्याजगामस्नानोतेमुनिश्रेष्ठो
महोदधौ ३८ तमागतंनरपतेसत्रागतिरधोक्षजः सत्ययासहधर्मात्मायथाविधिअपूजयत् ३९ पादौप्रक्षालयांचक्रेमुनेःसात्राजितीस्वय
म् जलंदेवःस्वयंकृष्णोभृंगारेणददौतदा ४० अथोपकल्पयामाससुखासीनायकेशवः परमान्नंसमुनयेप्रयतात्माजगद्गुरुः ४१ तल्लोक
कर्त्रासत्कृत्यदत्तंमुनिरुदारधीः बुभुजेवदतांश्रेष्ठःश्रद्धयापरयायुतः ४२ उपस्पृश्यततस्तृप्तःप्रददौचाशिषःप्रभोः ताश्चप्रीतेनमनसाप्रति
जग्राहकेशवः ४३ ततःसात्राजितीदेवीप्रणतानारदोब्रवीत् प्रसार्यदक्षिणहस्तंसजलंजलजेक्षणाम् ४४ यथेदानींतथैवत्वंभवदेवि
पतिव्रता सविशेषंचसुभगाभवमत्तपसोबलात् ४५ इत्युक्तामुनिमुख्येनसत्यभामाहरिप्रिया उत्तस्थौमहतायुक्ताहर्षेणतुनराधिप ४६
सकृष्णोप्यभ्यनुज्ञातुलब्ध्वामुनिवरात्तदा बुभुजेविघसंधीमानप्रमेयपराक्रमः ४७ ततस्त्वावश्यकंकृत्वासत्यभामापिभारत अनुज्ञया
तदाभर्तुर्विवेशातगृहंमुदा ४८ ततोविनिर्गतादेवीकृष्णस्यैवाप्यनुज्ञया स्थितापार्श्वेचकृष्णस्यनमस्कृत्वामहात्मने ४९ ततोमुहूर्तं
मासित्वानारदःकृष्णमब्रवीत् आपृच्छेत्वागमिष्यामिशक्रलोकमधोक्षज ५० तत्राद्यदेवमीशाननमस्कृत्यमहेश्वरम् गास्यंतिदेवगं
धर्वास्तथैवाप्सरसागणाः ५१ मासिमास्युचितंह्येतन्महेंद्रसदनेप्रभो पूजार्थंदेवदेवस्यगांधर्वंनृत्यमेवच ५२ अंतर्हितोदेवदेवःसोमः
सप्रवरोविभुः पश्यत्यमरमुख्येनकृतंभक्त्याद्रिघातिना ५३ निमंत्रितोहपूर्वेद्युःपुष्पंदत्तंमहाद्युते पारिजातस्यभद्रंतेतरुराज्ञोमहात्म
नः ५४ यदेतदाहृतंस्वर्गात्त्वदर्थंतुमयाविभो देवोपभोग्यमेतद्धितरुराजसमुद्भवम् ५५ इष्टःसवृक्षःसततंशच्याःपुष्करलोचन सौ
भाग्यमावहत्येवपूज्यमानोपिनित्यशः ५६ पुण्यंकर्तुंतदासृष्टःपारिजातोमहाद्रुमः अदित्याधर्मनित्येनकश्यपेनमहात्मना ५७ पुरादि
त्यामहातेजास्तोषितःकिलकश्यपः वरेणच्छंदयामासमारीचस्तपसोनिधिः ५८ सोवाचसुभगायेनभवेयंमुनिसत्तम स्वलंकृताकासतश्च
सर्वैरेवविभूषणैः ५९

सयासहवर्तमानः सप्रवरः प्रमथगणयुतः ५३ ५४ ५५ ५६ पुण्यंपुण्यकारत्वंव्रतविशेषम् ५७ ५८ ५९ ६० ६१ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सहितौहितेनेष्टसुखदानेनयुक्तःसहितः ३० ३१ पारावर्यस्यलोकमर्यादायाः ३२ ३३ ३४ ३५ ३६ विप्लवोभवेत् सर्वेप्यनृतवादिनो भविष्यंतीत्यर्थः कारणानु
सारित्वात्कार्यस्य ३७ ३८ ३९ ४० इतिहरिवंशेविष्णुपर्वणिटीकायां अष्टषष्टितमोऽध्यायः ६८ नारदोऽथेति १ २ ३ ४ ५ ६ नावलेपाधाः गर्वहीन

सततंसहितौदेव्याशच्यासहिवरद्रुमः सर्वकामप्रदःकृष्णात्तथेंद्रायमहौजसे ३० श्रीभगवानुवाच मुनेतत्सुज्यतेसाधुमहादे
वेनधीमता यच्छचीकारणकृतानुनीतःसतरुःपुरा ३१ सज्येष्ठःसर्वभूतानांलोककृत्प्रभवोव्ययः पारावर्यस्यसदृशंकृतवानितिमेमतिः
३२ अहंयवीयान्देवस्यसर्वथाबलघातिनः लालनीयश्चभगवन्जयंतइवसत्तम ३३ सर्वथाभगवांस्तावदुपायैर्बहुविस्तरैः करोतुयत्नं
शल्यर्थंशक्तोह्यसितपोधन ३४ मयासुनेप्रतिज्ञातंपुण्यार्थंसत्यभामया स्वर्गादिहानयिष्यामिपारिजातमितिप्रभो ३५ मयातदनृतंक
र्तुंकथंशक्यंतपोधन नानृतंहिवचोविप्रप्रोक्तपूर्वंमयानघ ३६ मयिप्रभग्नप्रतिज्ञेवैलोकानांविप्लवोभवेत् यन्मयाहिमुनिश्रेष्ठलोकेधर्मागु
णान्विताः परिवार्याःस्थितौसर्वेसकथंह्यनृतंवदेत् ३७ नदेवगंधर्वगणानराक्षसानचासुरानैवचयक्षपन्नगाः ममप्रतिज्ञामपहंतुमुद्यता
सुनेसमर्थाःखलुभद्रमस्तुते ३८ सपारिजाततयदिनप्रदास्यतिप्रयाच्यमानोभवतामरेश्वरः ततःशचीव्याममृदितानुलेपनेगदांविमोक्ष्यामि
पुरंदरोरसि ३९ इतिप्रवाच्योयदिसामपूर्वकंप्रयाच्यमानोनतरुंप्रयच्छति सुनिश्चयंमद्गमनायसर्वथात्वयाऽपिकार्यःखलुतत्रनिश्चयः ४०
इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिपारिजातहरणेनारदकृष्णभाषणंनामअष्टषष्टितमोऽध्यायः ६८ वैशंपायनउवाच
नारदोऽथमुनिर्गत्वामहेंद्रसदनंप्रति तांरात्रिमवसत्तत्रददर्शचमहोत्सवं १ तत्रादित्यामहात्मानोवसवश्चसुरोत्तमाः राजर्षयश्चविद्वांसःस्व
र्गताःकर्मभिःशुभैः २ नागायक्षाश्चसिद्धाश्चचारणाश्चतपोधनाः ब्रह्मर्षयश्चशतशोदेवर्षिमनवस्तथा ३ सुपर्णाश्चमहात्मानोमरुत-
श्चमहाबलाः दिवौकसांनिकायाश्चशतशोऽन्येसमागताः ४ उपर्युपरिसर्वेषांसोमदेवोमहेश्वरः तस्थावमितविक्रांतःस्वैर्गणैःपरिवारितः
५ देवर्षिभिर्मुनिश्रेष्ठैःसंवृतःसर्वभावनः कल्पांतरसहस्रेषुक्षयोयेषांनविद्यते ६ यानर्चयंतिसततंदेवादेवेश्वरोपमाः आत्मज्ञानाव-
लेपाधायेचधर्मपथिस्थिताः ७ रुद्राश्चकाश्यपादेवमध्युपासंतभारत स्कंदश्चभगवानग्निर्गंगाचसरितांवरा ८ अर्विंषाश्चतुंबरुश्चैवभा
रिश्चवदतांवरः नेतारोदेवदेवानामृतेहितपसान्विताः ९ एताननुविधीयंतेसर्वदेवगणान्नृप धर्मनित्यास्तपोनित्याःसतांमार्गमुपाश्रिताः १०
येत्विमंमानुषादेवा अर्चयंतिशुभार्थिनः तानर्चयंतिह्यमरास्तथाराजन्शुभार्थिनः ११ पितृकृत्येषुदेवानांसंन्यासंयेत्वनुष्ठिताः स्वाध्यायवंतः
कौरव्यसदानियमचारिणः १२

नाः ७ ८ भारिगंधर्वविशेषः ९ अनुविधीयंते अनुसरंति १० तान्मानुषान् अर्चयंतिइष्टफलप्रदानेनपूजयंति ११ देवानांकृत्येषुचयेवर्ततइतियज्ञेयं अनुष्ठिताः
अनुष्ठितवंतः १२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ हृ॰ टी॰ सदत्तः सन्निति शेषः नचइदस्यसंबंधिनंतरुंदेवीभिः पूर्वोक्ताभिरित्यादिभिर्नारदायदत्तं नारदेमचधुनस्तुभ्यं दत्तमितिहृदयस्यसंबंधः ५ ६ आनाययन्नृष्णाः ७ अ॰ ष॰
८९ पूर्वोक्तमर्थंस्पष्टीकरोति दत्तेदानइति अस्माकंदानफलंभविष्यतितवतुकाधिहानिर्नास्तीत्यर्थः ८ ९ १० ११ १२ १३ १४ १५ १६ शच्याःक्रीडा- ६८ २

सपुण्यमतिसौभाग्यंददातितरुसत्तमः नचदत्तंपुरादानंव्रतेनतरुमुत्तमम् ५ देवीभिर्धर्मनित्याभिर्धर्मार्थममरोत्तम दत्तंपुत्राभि
कांक्षतिदातुंपत्न्योममप्रभो ६ पुण्यार्थंदानधर्मार्थंममप्रीत्यर्थमेवच आनाययद्वारवतींपारिजातंमहाद्रुमम् ७ दत्तेदानेपुनःस्वर्गंतरु
त्वंनेतुमर्हसि सवाच्यएवंभगवान्बलभिद्गवरस्त्वया ८ तथातथाप्रयत्नश्चकार्योस्मिन्मुनिसत्तम यथातरुवरंदद्यात्पारिजातंसुरेश्व
रः ९ तन्नदूतगुणंतावत्पश्यामस्तेतपोधन संभाव्यासर्वकृत्यानांसंपद्धिलथिमेमता १० एवंनारायणेनोक्तोनारदोभगवानृषिः प्रह
स्योवाचकेशिघ्नमिदंवाक्यंतपोधनः ११ वाढमेवंप्रवक्ष्यामियदुमुख्यसुरेश्वरम् नतुदास्यतिदेवेंद्रःपारिजातंकथंचन १२ मंदरपर्वतश्रे
ष्ठदानवैस्त्रिदशैस्तथा निक्षिप्यतोयधौपूर्वंपारिजातःसमाहृतः १३ मंदरात्पर्वतश्रेष्ठान्नायितुंप्रेषितःपुरा पारिजातंहरेणापिलोककर्त्रा
जनार्दन १४ स्वयंधिज्ञापितोगत्वाततःशक्रेणशंकरः आक्रीडद्रुमउद्यानेशच्याःस्यादितियाचितः १५ तथास्त्वितिवरोदत्तोमहादेवेनचा
नघ नचनीतःपारिजातोमंदरंचित्रकंदरम् १६ क्रीडावृक्षःसशच्येतिव्यपदेशेनमोक्षितः महेंद्रेणमहाबाहोपारिजातस्ततःपुरा १७ प्रि
यार्थंसुमयास्याक्षीत्पारिजातवनंहरः गव्यूतिशतविस्तीर्णंमंदरस्यैवकंदरम् १८ नतत्रसूर्यभाःकृष्णाप्रविशंतिनगोत्तमे नचचंद्रप्रभाःशी
तानैवकृष्णासदागतिः १९ शीतोष्णेछिदतस्तत्रशैलपुत्र्याभवतिहि स्वयंप्रभवनंतद्धिमहादेवस्यतेजसा २० वर्जयित्वामहादेवंसगणंय
दुनंदन मांचान्यस्तद्वनंदिव्यंनप्रयातिकथंचन २१ स्रवंतितत्रवार्ष्णेयपारिजाताःसमंततः सर्वरत्नानिमुख्यानिमनसाकांक्षितानिवै २२
गणास्तान्युपभुंजंतिप्रवराणांमहात्मनाम् आज्ञयादेवदेवस्यलोकनाथस्यकेशव २३ पारिजाताद्बहुगुणफलंतेषांतथावनम् अभिमानं
प्रभाश्चैवगुणाभूरिगुणास्तथा २४ मूर्तिमंतश्चतेवृक्षाःसोमंदेवंवृषध्वजम् उपतिष्ठंतिसततंप्रवरैःसहकेशव २५ रौद्रेणतेजसाजुष्टादुःखै
र्हीनाःसुखान्विताः तरवोमंदरेतेहिदयिताःशैलकन्यया २६ प्रविवेशांधकोनामघोरस्तत्रमहाबलः दैतेयोवरदानेनदर्पितःपापनिश्चयः
२७ सहतोदेवदेवेनहरेणामित्रघातिना अवध्यःसर्वभूतानांवृत्राद्दशगुणंबली २८ एवंदुःखंनसेदेवपारिजातंप्रदास्यति पुष्कराक्षसहस्रा
क्षःसत्यमेतद्ब्रवीमिते २९

वृक्षइतिमिषेणमोक्षितः मोचितः शच्याः इतिछेदः संधिरार्षः ततोरुद्रात् १७ उमयाउमायाः १८ १९ २० देवोदेवीदेवश्चेतिद्वंद्वैकशेषः तौ ८९
मांचवर्जयित्वेतिसंबंधः २१ २२ गणाःसंघाःप्रवराणांप्रमथानां २३ २४ सोमंउमासहितं २५ कन्ययाकन्यायाः २६ वरदानेनसर्वत्रनवगतिरकुंठिताऽस्त्वित्येवंरूपेण २७
२८ दुःखंदुःखलभ्यम् २९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१३ षड्गुणान्वक्रिमस्निग्धमधुरत्वास्यविभक्तावयवत्वाख्यान् १४ १५ जुजोषप्रीत्याजग्राह उपस्थानंनृत्यादिरूपांपरिचर्याम् १६ १७ १८ १९ २० तस्यैवार्तिहर-

गंधर्वाधिपतिःश्रीमांस्तत्रचित्ररथोनृप सपुत्रोवादयामासदेववाद्यानिहृष्टवत् १३ ऊर्णायुश्चित्रसेनश्चहाहाहूहूस्तथैवच तुंबरस्तुंबरुश्चैवजगुरन्येचषड्गुणान् १४ उर्वशीविप्रचित्तिश्चहेमारंभाचभारत हेमदंताघृताचीचसहजन्यातथैवच १५ जुजोषभगवान्देवस्तदुपस्थानमात्मवान् दत्तेनतुष्टःशक्रस्यजगामजगतोगतिः १६ गतेभूतपतौसर्वेनृपाजग्मुर्यथागतम् महेंद्रेणार्चितादेवाःस्थानेचनिलयानुगताः १७ ततःसर्वेषुयातेषुसुखासीनंपुरंदरम् सदस्यैःस्वैःसहासीनंनारदोभिययौमुनिः १८ तमिंद्रःपूजयामाससमुत्थायतपोधनम् दिदेशकुशगर्भंचपीठमात्मासनोपमम् १९ नारदोथमहातेजामहेंद्रमिदमब्रवीत् दूतोहममरश्रेष्ठविष्णोरतुलतेजसः २० किंचित्कार्यंपुरस्कृत्यप्रेषितोस्मिमहात्मना आनर्तादार्तिहरणंतस्यैवानघतेजसः २१ प्रीतिवाक्यानिहृद्यानिप्रयुज्यमुनयेतदा ततःप्रहृष्टोभगवानब्रवीत्पाकशासनः २२ किमाहपुरुषश्रेष्ठशीघ्रमाचक्ष्वमेमुने चिरस्यखलुकृष्णेनसंस्मृतोस्मिमहात्मना २३ नारदउवाच महेंद्रद्वारकांजंद्रप्रगतोहंश्वातरंतव कथंचित्सुद्धारकातत्रकाश्यपानायशस्करम् २४ तंतुरैवतकेद्राक्षंतदासीनमरिंदमम् रुक्मिण्यासहितंवीरस्तुवतंवृषभध्वजम् २५ पारिजाततरोःपुष्पंतस्यदत्तंमयानघ विस्मापनार्थंदेवेशपत्नीनांसुरुतेजसः २६ तद्दृष्ट्वातस्यपत्न्यस्तुविस्मयंपरमंययुः बहुकाममदंपुष्पंवृक्षराजसमुद्भवम् २७ गुणास्तासांमयाख्यातास्तस्यपुष्पस्यमानद सृष्टिश्चपारिजातस्यकश्यपेनमहात्मना २८ अदित्याकश्यपोदत्तःपुण्यार्थंचयथासम पुष्पदाम्नावेष्टयित्वाकंठेपुण्यार्थमात्मवान् २९ त्वंचदत्तोयथाशच्यादेवाश्चान्येसुरेश्वर निष्क्रयश्चयथादत्तःकश्यपाद्यैर्महर्षिभिः ३० तच्छ्रुत्वातस्यपत्न्येकासत्यभामेतिविश्रुता पुण्यकार्थमनश्चक्रेदयितातेयवीयसः ३१ तयाचाभ्यर्थितोभर्तादेवदेव्यागणेश्वरः प्रतिजज्ञेसधर्मार्थंयवीयास्तवमानद ३२ ततोमामुक्तवान्वीरोविष्णुर्बलवतांवरः यथावत्कुरसुश्रेष्ठप्रवृत्तःप्रभुभावतः ३३ लालनीयोयवीयास्तुप्रणिपत्याच्युतोब्रवीत् आनयेयकुरश्रेष्ठपारिजातवरद्रुमम् ३४ मनोरथोस्तुसफलोवध्वास्तेकुरसूदन धर्मकृत्येविशेषेणवध्वास्तेकुरसत्तम ३५ अयंदर्शितकल्याणोलोकोलोकगणेश्वर पथ्यत्वमरकल्याणमत्प्रभावाच्चमानवाः ३६
वैशंपायनउवाच वासुदेववचःश्रुत्वामहेंद्रःकुलनंदन नारदंवदतांश्रेष्ठमिदंवाक्यमथाब्रवीत् ३७ भजासनंद्विजश्रेष्ठयुक्तमुक्तत्वयाद्विज संदेशंप्रतिदास्यामिविष्णोरतुलतेजसः ३८

णांकार्यम् २१ २२ चिरस्यचिरेण २३ २४ २५ २६ २७ तासांकृष्णपत्नीनांपुरः ९१
२८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ भजासनमित्यनेनदूतत्वात्तिष्ठन्नेवैतावद्वचनंनारदउक्तवानितिगम्यते ३८ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३९ ४० ४१ ४२ ४३ ४४ ४५ प्रवर्त्तामिप्रवृत्तो ४६ ४७ ४८ ४९ ५० ५१ त्रिदिवस्थःसन् तमपीतिसंबंधः नत्वत्रनिस्थइत्यर्थः ५२ आमि

आसीनेनारदेशक्रोलब्धानुज्ञोथनारदात् स्वमासनंततोभेजेतस्यैवसदृशंप्रभो ३९ उपविष्टःसुरपतिरथोवाचतपोधनम् निरीक्ष्य
स्वबलंवीर्यंहर्षदंवृत्रनाशनः ४० शक्रउवाच महर्षेकुशलंपृष्टावक्तव्यस्तेजनार्दनः वचनान्ममधर्मज्ञसर्वभूतसुखावहः ४१
मदनंतरमीशस्त्वंजगतोनात्रसंशयः त्वदीयःपारिजातश्चरत्नान्यन्यानिचाच्युत ४२ त्वंतुभारावतरणंकर्तुंदेवमहीगतः मानुष्यंसर्व
वृत्तानांस्थितःकार्यस्यसिद्धये ४३ त्वयितीर्णप्रतिज्ञेहिपुनःप्राप्तेत्रिविष्टपम् पूरयिष्यामिवध्यास्तेइष्टान्कामानधोक्षज ४४ स्वर्गीया
न्त्रिरत्नानिननेतव्यानिकेशव स्वल्पार्थेमानुषंलोकमितिपूर्वंकृतास्थितिः ४५ उत्क्रम्यहिस्थितिंदेवीप्रवर्तामिमहाबल यद्यहंकिंप्रव-
क्ष्यतिप्रजापतिगणाःप्रभो ४६ ब्रह्मणासहपुत्रेणसपौत्रेणमहात्मना नियमाःसर्वकृत्यानांस्थापिताजगतोध्रुवाः ४७ प्रजापतिकृतंमा
र्गमपास्यव्रजतोमम श्रुत्वाप्रजापतिर्धीमान् शापमप्युत्सृजेत्प्रभुः ४८ अस्माभिर्भिद्यमानंहिमर्यादासेतुबंधनम् भेत्स्यंत्यशंकितादैत्या
दैत्यपक्षास्तथापरे ४९ स्त्रीनिमित्तमितोनीतेपारिजातेद्रुमेश्वरे स्वर्गौकसोभविष्यंतिविमनस्काश्चमानद ५० उपभोगासनुष्याणांविहि
तायेस्वयंभुवा तैस्तुतुष्यंतुमेभ्रातासंपश्यन्कालपर्ययम् ५१ इहापितातत्रिदिवेममयःस्यात्परिग्रहः त्रिदिवस्थोपितंकृष्णःसर्वंभोक्तु
मिहार्हति ५२ दृष्टोह्यामिषभोज्यानामभिमानाज्जनार्दनः ततोधर्मंसमुत्सृज्यपापमेवानुवर्तते ५३ स्त्रीवश्यतास्त्वाप्यमानात्कृष्णास्यांहि
महात्मनः जगत्ययशसायोगंजनयेदितिमेमतिः ५४ मानुष्यंमानुषेप्राप्तोयदेतन्मधुसूदनः कुर्यान्निर्बंधनीयंयत् भ्रात्राज्येष्ठेननारद
५५ स्वर्ग्यरत्नविलोपेनधर्षणास्यान्ममानघ ज्ञातितोधर्षणाच्चैवविशेषेणैवगर्हिता ५६ धर्ममर्थंचकामंचक्रमेणमधुसूदनः सेवत्वेष
सतांधर्मान्स्थापितान्पद्मयोनिना ५७ महीतलंपारिजातमर्पयिष्याम्यहंयदि पौलोमीमादितःकृत्वाकोनुमाबहुमंस्यते ५८ पारिजातंम
हीपृष्ठेदृष्ट्वापृष्ट्वाचमानुषाः स्वर्गार्थिनोद्यमिष्यंतिदृष्ट्वास्वर्गफलंक्षितौ ५९ पारिजातगुणान्मर्त्याञ्जुषंतियदिनारद देवतानांमनुष्याणा
नविशेषोभविष्यति ६० तत्रयत्क्रियतेकर्मइहतद्भुज्यतेनरैः स्वर्गार्थंनयतिष्यंतिपारिजातगुणान्विताः ६१ सर्वरत्नवरःस्वर्गेपारिजातस्तपो
धन तुल्यंदेवसमैर्मर्त्यैःसर्वंदेवजगद्भवेत् ६२ यज्ञैर्मर्त्यानयक्ष्यंतिलब्धस्वर्गफलाभुवि नपूर्तानिप्रदास्यंतितुल्यत्वममरैर्गताः ६३ यज्ञेर्जे
प्यान्हिकेश्चैवनित्यमाप्याययंतिनः मानुषाःस्वर्गमिच्छंतःश्रद्दधानास्तपोधन ६४

षभोज्यानांमांसभक्षैः दृष्टःपुष्टः अतएवदृप्तत्वाद्धर्ममति-
क्रामति यथाहापस्तंबःदृष्टोदृप्यतिदृप्तोधर्ममतिक्रामतीति ५३ ५४ मानुषेलोके ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ६५ ६६ ६७ ईतयः अतिवृष्ट्यादयः ६८ नक्षमंनयोग्यम् ६९ कार्यंकर्मकार्यंकर्तव्यम् ७० ७१ ७२ ७३ इतिहरिवंशेविष्णुपर्वणिटीकायांऊनसप्ततितमो
 ऽध्यायः ६९ देवराजेति १ २ ३ हेतवःमहीतलंपारिजातमित्यादिनापूर्वोक्ताः नचावगतवान् नांगीकृतवान् ४ ५ ६ ७ ८ ९ १० ११

नत्सर्वेनकरिष्यंतिपारिजातगुणान्विताः निस्तेजसोभविष्यामतेगतास्तद्विहीनताम् ६५ इतःसुदृश्यासस्थैस्तेजीवंतिपुरुषाभुवि आ
प्यायमतस्तेप्यस्मान्दानैर्यज्ञैस्तथैवच ६६ नबुभुक्षापिपासावाबाधतेयदिमानुषान् रोगोजरावामृत्युर्वाधर्मसंज्ञरतिरेवच ६७ दौर्गंध्य
वासुघोरावाईतयःकर्मसंभवाः किमुद्योगंकरिष्यंतिपारिजातगुणान्विताः ६८ सर्वथानयनंतत्रपारिजातस्यनक्षमम् इतिवाच्यस्त्वया
विभुर्विष्णुरक्लिष्टकर्मकृत् ६९ यथायथाचमेभ्रातातुष्यत्येतद्विचारयन् तथातथात्वयाकार्यंकार्यमत्रीतिमिच्छता ७० हाराश्चमण
यश्चैवचंदनान्यगुरूणिच वस्त्राणिचविचित्राणिवध्वास्त्वद्वारकानय ७१ योग्यानियानिमर्त्यानांयावदिच्छतिकेशवः नस्वर्गपरिमोष
तुकर्तुमर्हतिसांप्रतम् ७२ ददामिरत्नानियथेप्सितान्यहंबहूनिचित्राणिविभूषणान्यहम् नपारिजातंचकथंचनद्रुमंसुनेप्रदास्यामिदि
वौकसांप्रियम् ७३ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिपारिजातहरणेइंद्रवाक्यनामऊनसप्ततितमोऽध्यायः ६९ छ
वैशंपायनउवाच देवराजवचःश्रुत्वानारदःकुरुनंदन प्रोवाचवाक्यंवाक्यज्ञोधर्मात्माधर्मवित्तमः १ अवश्यमेववक्तव्यंहितंबल
निषूदन मयातवमहाबाहोबहुमानोस्तिमेत्वयि २ उक्तोमयावासुदेवोजानताभवतोमतम् नदत्तःपारिजातोयंहरस्यापित्वयापुरा ३
हेतवश्चमयातस्यदर्शितास्तेसमासतः नचावगतवान्देवःसत्यमेतद्ब्रवीमिते ४ उपेंद्रोहमहेंद्रेणलालनीयःसदेतिमाम् उवाचपुंडरीका
क्षोदत्तमुत्तरमेवच ५ पुनःपुनर्मयावास्यहेतवोदेवदर्शिताः नतोनबुद्धिर्व्यावृत्तावृत्रनाशनतस्यवै ६ अपिचाप्युक्तवान्देवोवाक्यांते
मधुसूदनः प्रत्याहपुरुषश्रेष्ठःसरोषमिववासव ७ नदेवगंधर्वगणानराक्षसानचासुरानैवचपन्नगोत्तमाः ममप्रतिज्ञामपहंतुमुद्य-
तासुनेसमर्थाःखलुभद्रमस्तुते ८ सपारिजातंयदिनप्रदास्यतिप्रयाच्यमानोभवतापुरंदरः ततःशचीस्याम्मृदितानुलेपनंगदाविमो
क्ष्यामिपुरंदरोरसि ९ उपेंद्रस्यमहेंद्रायंभ्रातुस्तेनिश्चयःपरः यदत्रमन्यसेन्याय्यंसंप्रधार्यकुरुष्वतत् १० तत्वहितंचदेवेशश्रूयतांव
दतोमम नयनंपारिजातस्यद्वारकामममरोचते ११ नारदेनैवमुक्तस्तुसंव्यक्तंबलदेहभित् रोषाविष्टःसहस्राक्षोब्रवीदेतन्नराधिप
१२ अनागसिमयिज्येष्ठेसोदरेयदिकेशवः एवंप्रवृत्तःकिंशक्यंकर्तुमद्यतपोधन १३ बहूनिप्रतिलोमानिपुरासकृतवान्मयि कृष्णो
नारदसोढानिभ्रातेतिस्ममयासदा १४ खांडवेचार्जुनरथंपुरावाहयतासता मदीयावारितामेघाःशमयंतोग्निमुद्धतम् १५ ९१
१२ १३ १४ १५ छ छ छ छ छ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१६ १७ १८ ज्ञातिभेदः भ्रातृकलहः नीस्माभिः १९ २० २१ २२ २३ व्यपदेश्यंवाच्यम् २४ २५ २६ आहार्यः संभोज्यः संपाद्योवा २७ २८ २९ ध

गोवर्द्धनंधारयताविप्रियंचकृतंमम तथारत्नवधेमासेसाहाय्यार्थंवृतोमया १६ समोहमितिसर्वेषांभूतानामितिचोक्तवान् स्वबाहु
बलमाश्रित्यरत्नश्चनिहतोमया १७ देवासुरेषुभ्रातेषुसंग्रामेषुचनारद युध्यत्यात्मेच्छयाकृष्णोमुनेकोविदितंतव १८ बहुनात्रकिं
मुक्तेनतस्माद्दिश्याप्रवर्तताम् ज्ञातिभेदोननःकार्यःसाक्षीत्वममनारद १९ ममोरसिगदांमुक्तुमुद्यतोयदिकेशवः अनुशब्दोत्रयोलो
केगुणःकइहदृश्यते २० उदवासगतोधीमान् पितानःकश्यपःप्रभुः अदित्यासहमेमात्रातयोर्वाक्यमिदंभवेत् २१ अजितात्मामसभ्राता
रजसातमसावृतः कामेनचस्त्रियोवाक्यादेवमासुक्तवान्गुरुम् २२ सर्वथाविप्रधिग्राज्यंधिगृक्रियःसयथातथा यत्राधिक्षिप्तवान्विष्णु
रेवंमांस्त्रीजितोद्विज २३ नहृष्टकश्यपकुलेव्यपदेश्यमहामुने नैवदक्षकुलेदृष्टमातुर्मेयत्रसंभवः २४ नज्येष्ठतानराजत्वंदेवानामप्रतिमा-
नितम् कामरागाभिभूतेनकृष्णेनखलुनारद २५ पुत्रदारसहस्रैर्हिभ्रातानव्यविशिष्यते सहृतोज्ञानसंपन्नइतिब्रह्मापुराब्रवीत् २६
नास्तिभ्रातृसमोबंधुराहार्यइतरोजनः इतिमामब्रवीन्माता पिताचैवप्रजापतिः २७ सोदरेतुविशेषतुपितामेकश्यपोब्रवीत् हृत्सूस्रयावि
रुध्यंतेदानवाःपापनिश्चयाः २८ काममेतन्नवक्तव्यंस्वयमात्मस्तवान्वितम् भ्रातस्त्ववसरोविप्रयदिहाद्योच्यतेमया २९ धनुर्ज्यायांमुनि
श्रेष्ठछिन्नायांहिपुरानघ धन्वीभिरमराणांचवरदानान्महामुने ३० उत्कृत्तशिरसोविष्णोःपुरादेहोधृतोमया संधितेचशिरोयत्नाच्छिन्नंरौ
द्रेणतेजसा ३१ अहंविशिष्टोदेवानामित्युक्त्वापुनरच्युतः धनुरारोप्यदर्पेणस्थितोनारदकेशवः ३२ किंमापितावामातावावक्ष्यतीतिस-
यामुने स्नेहेनचास्थितंविष्णोःशरीरंमुनिसत्तम ३३ ऐंद्रंवैष्णवमस्यैवमुनेभागमहंददौ यवीयांसमहंप्रेम्णाकृष्णंपश्यामिनारद ३४ सं-
ग्रामेषुमहर्तव्यंतेनपूर्वंतपोधन राजाकिलाहंसमरेप्रहराम्यग्रतोध्रुवम् ३५ प्रादुर्भावेषुसर्वेषुस्वशरीरमिवानघ यतोरक्ष्याम्यधर्मज्ञके-
शवंभक्तिमाश्रितम् ३६ इदंभक्त्वामदीयंचभवनंविष्णुनाकृतम् उपर्युपरिलोकानामधिकंभवनंमुने ३७ अवमानःसचमयापृष्ठतःकि
यतेमुने लालनीयोमयाबालइत्येवंभ्रातृगौरवात् ३८ बालोयंममपुत्रेतियवीयानितिनारद पित्रामात्राचगोविंदोमानीचपरिभाषितः
३९ इष्टस्तत्रजनानांचकेशवःसुविशेषतः धयद्दृष्यानसंदेहस्तत्रस्नेहोतिरिच्यते ४० सर्वज्ञोबलवान्शूरःपात्रमानयितातथा केशवे
त्वेवचध्यानयत्तद्धितयतागतम् ४१

नुर्ज्यायामितिशतपथोक्तइतिहासोवगमितः ३० ३१ ३२ ३३ ऐंद्रमेवाधिपत्यंश्रावणभाद्रपदपूज्यत्वंवैष्णवं
कृत्वाहंददौदत्तवान्वैविष्णवेनात्रपरोक्षता ३४ अन्यत्रसमरेऽहमग्रतः प्रहरामियतोराजामघ्रक्षः ३५ ३६ ३७ ३८ परिभाषितः आकृष्टः ३९ ४० केशवेत्वेवेतिसंधिरार्षः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४२ सह्यंसोढव्यम् ४३ रथांगेनचक्रेणनंदकेनखड्गेन ४४ ४५ ४६ ४७ ४८ पलाशपत्रार्धमितित्वयाअजितःपारिजातस्यपलाशंपत्रमात्रंपत्रार्धंवानप्रदा
स्यतिवृक्षस्यकावार्त्तेत्यर्थः ४९ जिह्मतांकुटिलतामाम् ५० इतिहरिवंशेविष्णुपर्वणिटीकायांसप्ततितमोऽध्यायः ७० महेंद्रेति १ २ अनियुक्तःपुरोभागः अनाज्ञप्तः
सन्पुरोवर्त्तीनभवेत् तथापिसकृष्णोपिकार्याकार्येमांपृच्छति अतोहंअननुपृष्टोपितुभ्यंहितंवदामीत्यर्थः ३ ४ ५ अप्रियंश्रुतिकटुकमपिहितंपरिणामसुखं

गच्छनारदवक्तव्यःकेशवोवचनान्मम आहूतोननिवर्तेयंसमरंप्रतिशत्रुभिः ४२ यदीच्छसितदागच्छसह्यंतेयत्त्वमिच्छसि प्रहरस्व
चपूर्वत्वंभार्याजितयथेच्छसि ४३ रथांगेनाथशार्ङ्गेणगदयानंदकेनच प्रहरारुह्यगरुडंइंद्रोभूत्वाजनार्दन ४४ प्रहृते प्रहरिष्यामियथा
शक्त्याचकेशव अहोधिकृयदिमास्नेहोविकुर्वनकरिष्यति ४५ यावन्नसंग्रामगतोजितोहंचक्रपाणिना पारिजातंनदास्यामितावद्ब्रह्मोमुनि
सत्तम ४६ मासमाह्वयतेज्येष्ठंयवीयान्सतपोधन अहंतमर्षयिष्यामिकिमर्थंस्त्रीजितहरिम् ४७ अद्यैवगच्छभगवन्द्वारकांकृष्णपालि
ताम् विवादेसंस्थितःसोज्ञइतिवाच्यस्त्वयाच्युतः ४८ पलाशपत्रार्द्धमपित्वयाजितोनपारिजातस्यतवप्रदास्यति इतिप्रवाच्योमधुसूदन
स्त्वयावचोमदीयंस्मरतातपोधन ४९ पुनःप्रवाच्योभगवंस्त्वयाच्युतोममप्रियार्थंखलुनिर्विशंकितम् नमायथाहर्त्तुमिहार्हसिद्रुमंस्फुरत्कुमे
धास्तुधिगस्तुजिह्मताम् ५० इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिपारिजातहरणेइंद्रवाक्यनामसप्ततितमोऽध्यायः ७०
वैशंपायनउवाच महेंद्रवचनंश्रुत्वानारदोवदतांवरः विविक्तेदेवराजानमिदंवचनमब्रवीत् १ कामंप्रियाणिराजानोवक्तव्यानात्रसंशयः
प्राप्तकालंतुवक्तव्यंहितमप्रियमप्युत २ अनियुक्तःपुरोभागोनस्यादितिवदंतिहि सुश्लोकगतितत्त्वज्ञोनयविज्ञानकोविदः ३ कार्याकार्ये
समुत्पन्नेपरिपृच्छतिमांभवान् यतस्ततःप्रवक्ष्यामिगृह्यतांयदिरोचते ४ अनुक्तेनापिसुहृदावक्तव्यंजानताहितम् न्याय्यंचप्राप्तकालं
चपराभवमनिच्छता ५ वक्तव्यंसर्वथासद्भिरप्रियंचापियद्धितम् आनृण्यमेतत्स्नेहस्यसद्भिरेवाहृतंपुरा ६ अनृतेधर्मभग्नेचनश्रुश्रूष
तिचाप्रिये नप्रियंनहितंवाच्यंसद्भिरेवेतिनिंदिताः ७ सर्वथादेववक्तव्यंश्रूयतांशृण्वतांवर श्रुत्वाचकुरुसर्वज्ञप्रसमीक्ष्ययत्क्षरवचः ८ अ
न्योन्यभेदोभ्रातॄणांसुहृदांवाबलांतक भवत्यानंदकृद्वेधाद्विषतांनात्रसंशयः ९ हितानुबंधसहितंकार्यंज्ञेयंसुरेश्वर विपरीतंचतद्धुध्वानि
त्यंबुद्धिमतांवर १० यस्यान्तापकरंपश्चादारब्धंकार्यमीदृशम् आरम्भेनैवतद्विद्वान्नेष्टंबुद्धिमतांनयः ११ विपाकमस्यकार्यस्यनानुपश्या
मिशोभनम् यदत्रकारणंदेवनिबोधविबुधाधिप १२ यएकोविश्वमध्यास्तेप्रधानंजगतोहरिः प्रकृत्यायंपरंसर्वंक्षेत्रज्ञंवैविदुर्बुधाः १३

६ अनृतइतिलय्यनृतत्वाद्यभावात्तांप्रतिवदामीत्यर्थः ७ ८ ९ १० ११ विपाकंफलम् १२ विश्वंकार्यप्रधानंकारणंच अध्यास्ते अधितिष्ठतिरथमिवयंताप्रकृत्यास्वभावेनयातःक्षेत्रं ९२
सूक्ष्मस्थूलकारणदेहारख्यंप्रकाशयतीतिक्षेत्रज्ञत्वम् १३ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अव्यक्तस्य अव्याकृतस्यव्यक्तोभागः कार्यहिरण्यगर्भादिः यःसर्वभवोद्भवः सर्वसंसारबीजं तस्यात्माअंतर्यामीचेतयितानकेवलंतस्यैव अपितुसर्वस्य धीमतः चेतनावतः
जंतुमात्रस्येत्यर्थः १४ रुद्रादव्ययमनन्यइत्याह प्रकृत्यादितिप्रकृत्याः विच्छेदकः प्रथमोगुणस्तस्योंशः व्यक्तः स्वरूपमात्राकारः विश्वरूपीसंज्ञः कृत्स्नभोग्यवस्तुसंज्ञइत्यर्थः
अतएवलोकश्चेतनस्तस्यभावनः संतर्पयिता १५ तस्याःप्रकृतेःप्रथमोगुणउमावत्गुणीउमयारुक्मिण्यावाउपहितोगुणीमहेश्वरः रुद्रोविष्णुर्वा १६ तदेवाहनेति
अन्द्वैन्गुणिनोमायाविनोरुद्रस्यविष्णोर्वाविशेषोभेदकोगुणोनास्ति अतोविष्णुनाद्राविर्तत्वांरुद्रोपिनरक्षिष्यतीतिभावः गुणिनइतिसार्द्धश्लोकद्वयंवाक्यं किं चतस्य
गुणिनोपियःशास्ता अव्ययोऽपरिणामीप्रथमोऽध्यस्तात्पूर्वत्वादधिष्ठानस्ययतः अगुणोयःसएवनारायणः एतेनतुर्यमूर्तिर्नारायणइतिदर्शितंसाचब्रह्मविष्णुरुद्रेभ्य
एकैकगुणोपाधिभ्योऽन्यासर्वगुणोपाधिरयातेनैवयोभोक्तारुद्रः कर्ताविष्णुः ब्रह्माचबुद्ध्यभिमानीदेवाश्चइंद्रियाभिमानिनस्तेसर्वेसृष्टाइतियोजना १७ १८ १९

तस्याव्यक्तस्ययोव्यक्तोभागःसर्वभवोद्भवः तस्यात्मापरमोदेवोविष्णुःसर्वस्यधीमतः १४ प्रकृत्याःप्रथमोभागउमादेवीयशस्विनी व्य
क्तःसर्वमयोविश्वरूपीसंज्ञोलोकभावनः १५ रुक्मिण्याद्याःस्त्रियस्तस्याव्यक्तस्यप्रथमोगुणः अव्ययाप्रकृतिर्देवीगुणीदेवोमहेश्वरः १६
नविशेषोस्यरुद्रस्यविष्णोश्चामरसत्तम गुणिनश्चाव्ययःशास्तासदाचप्रथमोगुणः १७ नारायणोमहातेजाःसर्वकृल्लोकभावनः भोक्ता
महेश्वरोदेवःकर्ताविष्णुरधोक्षजः १८ ब्रह्मादेवगणाश्चान्येपश्चात्सृष्टामहात्मना महादेवेनदेवेशप्रजापतिगणास्तथा १९ एवंपुराण
पुरुषोविष्णुर्वेदेषुपठ्यते अचिंत्यश्चाप्रमेयश्चगुणेभ्यश्चपरस्तथा २० अदित्यातपसाविष्णुर्महात्माराधितःपुरा वरेणच्छंदितातेनपरि
तुष्टेनचादितिः २१ तयोक्तस्त्वत्समंपुत्रमिच्छामीतिसुरोत्तम प्रणिपत्यचविज्ञायनारायणमधोक्षजम् २२ तेनोक्तंभुवनेनास्तिमत्समःपु
रुषोपरः अंशेनतुभविष्यामिपुत्रःखल्वहमेवते २३ सजातःसर्वकृद्देवोभ्रातानवृषुरेश्वर नारायणोमहातेजायमुपेंद्रंप्रचक्षते २४ इच्छन्ने
वहरिर्देवकाश्यपत्वमुपागतः तैस्तैर्भावैर्विकुरुतेभूतभव्यभवाप्ययः २५ प्रादुर्भावंगतोदेवोजगतोहितकाम्यया भावुर्जगतोनाथःकर्ताह
र्ताचकेशवः २६ यथापललपिंडस्याद्व्याप्तःस्नेहेनमानद तथाजगदिदंव्याप्तंविष्णुनाप्रभविष्णुना २७ ब्रह्मण्यदेवःसर्वात्मातैस्तैर्भावैर्विकु
र्वति जगत्यतिगुणोदेवोवैकुंठःसर्वभावनः २८

२० छंदिता अनुगृहीता २१ तयेति पंचानांतासर्यत्वङ्ग्रातृत्वाभ्रतवायंसाधारणोऽपितु अकर्मजानितोदेवभावोऽस्यास्ति त्वंतुकर्मदेवत्वात्ततोनिकृष्टोसीत्यर्थः २२ २३
२४ भूतस्यभव्यस्यच भवाप्ययउत्पत्तिप्रलयस्थानंसर्वजगदुपादानभूतइत्यर्थः २५ यएवंभूतःसएवसाक्षात्कृष्णइत्याह प्रादुर्भावमिति २६ पललपिंडः मांसपिंडः २७ स
र्वात्माव्यष्टिसमष्टिदेहेंद्रियाद्याकारस्तैस्तैर्भावैस्तत्तद्धर्मैर्विकुर्वंति विकारंप्राप्नोति सर्वज्ञोहंदुःख्यहमित्याद्यभिमानवान् भवतीत्यर्थः वस्तुतस्त्वतिगुणोगुणातीतः २८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५१ ५२ पुरातनेवामनावतारेकिंनारब्धंनांगीकृतमपित्वारब्धमेव ५३ ५४ इतिहरिवंशेविष्णुपर्वणिटीकायांएकसप्ततितमोऽध्यायः ७१ अथैत्येति
१ २ योजयंतंभाविनींसत्यभामाम् ३ ४ ५ ६ ७ ८ ९ १० ११ १२ अहोएतदारब्धकृत्यंधिगितिकृत्यनिंदयाकृत्यवंतमेवधिक्करोतीतिद्वयोः

यथैवममभ्रातुःसवरंप्रादाददधोक्षजः तथैवतस्याःपुत्राणांज्येष्ठतांसोढुमर्हति ५१ यथैवोपेंद्रतांयातःस्वयमिच्छन्जनार्दनः तथैवभ्रा
तुरिंद्रस्यसन्मानंकर्तुमर्हति ५२ ज्यैष्ठ्यमेतेनदेवेननारब्धंकिंपुरातने अथेदानीमपीच्छेत्सज्येष्ठोस्तुमधुसूदनः ५३ कृतनिश्चितंबलारिपु
मोक्ष्यनारदोविसर्जितस्त्रिदशवरेणधर्मभृत् ययौपुरीयदुवृषभाभिरक्षितांकुशस्थलींधृतिमतिमांस्तपोधनः ५४ इतिश्रीमहाभा
रतेखिलेषुहरिवंशेविष्णुपर्वणिपारिजातहरणेनारदस्यस्वर्गात्पुनरागमननामएकसप्ततितमोऽध्यायः ७१ वैशंपायनउवाच
अथैत्यद्वारकारम्यांनारदोमुनिसत्तमः ददर्शपुरुषश्रेष्ठंनारायणमरिंदमम् १ स्ववेश्मनिसुखासीनंसहितंसत्यभामया विराजमानंव
पुषासर्वतेजोतिगामिना २ तमेवार्थंमहात्मानंचिंतयंतंदृढव्रतम् केवलंयोजयंतंचवाक्यमात्रेणभाविनीम् ३ दृष्ट्वैवनारदंदेवःप्रत्युत्था
यअधोक्षजः पूजयामासचतथाविधिदृष्टेनकर्मणा ४ सुखोपविष्टंविश्रांतंप्रहस्यमधुसूदनः वृत्तांतंपरिपप्रच्छपारिजाततरुंप्रति ५ अथा
चष्टमुनिःसर्वंविस्तरेणतपोधनः इंद्रानुजायेंद्रवाक्यंनिखिलंजनमेजय ६ श्रुत्वाकृष्णस्तुतत्सर्वंनारदवाक्यमब्रवीत् अमरावतींपुरींया
स्येसोहंधर्मभृतांवर ७ इत्युक्त्वानारदेनैवसहितःसागरंययौ संदिदेशततस्तत्रविविक्तेनारदंहरिः ८ महेंद्रभवनंगत्वाअद्यब्रूहितपोध
न अभिवाद्यमहात्मानंमद्वाक्यममरोत्तमम् ९ नयुद्धंप्रभुरेशक्रस्यातुमर्हसिमेप्रभो पारिजातस्यनयनेनिश्चितंत्वमवेहिमाम् १० एव-
मुक्तस्तुकृष्णेननारदस्त्रिदिवंगतः आचचक्षेथकृष्णोक्तंदेवेंद्रस्यामितौजसः ११ ततोबृहस्पतेःशक्रःशशंसबलनाशनः श्रुत्वाबृहस्पति
र्देवमुवाचकुरुनंदन १२ अहोधिक्ब्रह्मसदनमयियातेशतक्रतो दुर्नीतमिदमारब्धमत्रभेदोहिदारुणः १३ अनाख्यात्वाकथंनामभव
ताभुवनेश्वर ममैतत्कृत्यमारब्धंदैवकेनापिहेतुना १४ अथवाभावितव्येनकर्मजेनप्रयुज्यते जगद्दृत्रघ्नविविधंनशक्यंसंनिवर्तितुम् १५
सहसैवतुकार्याणामारंभोनप्रशस्यते तदेतत्सहसारब्धंकार्यंदास्यतिलाघवम् १६ बृहस्पतिंमहात्मानंमहेंद्रस्त्वब्रवीद्वचः एवंगतेद्ययत्का
र्यंतद्भवान्वक्तुमर्हति १७ तमुवाचाथधर्मात्मागतानागततत्त्ववित् अधोमुखश्चिंतयित्वाबृहस्पतिरुदारधीः १८ यतस्वसहपुत्रेणयोधय
स्वजनार्दनम् तथाशक्रकरिष्यामियथान्याय्यंभविष्यति १९ बृहस्पतिस्त्वेवमुक्त्वाक्षीरोदसागरंगतः आचष्टमुनयेसर्वंकश्यपायमहात्मने
२०

संबंधः १३ अनाख्यात्वा अपृष्ट्वा आर्षोत्वबभावः ममसांप्रति १४ १५ लाघवंपराजयम् १६ १७ १८ १९ २० ७२ ७२ ७२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ ह॰ टी॰ ९३ २९ अनंतः शेषः धारणार्थंभुवइतिशेषः ३० श्वेतइति अत्रकलिः शयानोभवतिसंजिहानस्तुद्वापरः उत्तिष्ठंस्त्रेता भवति कृतंसंपद्यतेचरन्निति श्रुतेर्योऽ विद्यानि अ॰ ११
द्रायांशेतेतिमूढः सपुमान्कलिः तदनुग्रहार्थं अस्मिन्नीश्वरः कृष्णः कृष्णावताररूपी भवतियः किंचित् श्रेयोदर्शी अर्द्धप्रबुद्धः सद्वापरः तंप्रतिपीतवर्णः हिरण्य
वन्मनोहरो भवतिसकिंचिद्बहुस्युन्मुखो भवतीत्यर्थः यस्तुश्रेयोर्थं यततेसत्रेतातदनुग्रहार्थंरक्तोऽनुरक्तो मातृवद्भवति यस्तुयुधिष्ठिरादिवदत्यंतं भक्तस्तंप्रतिशुक्लः

अतः समस्तदेवानांपूज्यएवचकेशवः पद्मनाभश्चभगवान्प्रजासर्गकरोविभुः २९ अनंतोधारणार्थंचबिभर्तिचमहद्यशः यज्ञइत्यपि
सद्भिश्चकथ्यतेवेदवादिभिः ३० श्वेतः कृतयुगेदेवोरक्तस्त्रेतायुगेतथा द्वापरेचतथापीतः कृष्णः कलियुगेविभुः ३१ अवधीत्सहिरण्या
क्षंदिव्यरूपधरोहरिः दंष्ट्राग्रेणमुनिमज्जंतीमेषदेवोवसुंधराम् ३२ वाराहंवपुराश्रित्यजगतोहितकाम्यया जघ्नेहिरण्यकशिपुंनारसिंहव-
पुर्हरिः ३३ जिगायजगतींचैवविष्णुर्वामनरूपधृक् बबंधचबलिंदेवः श्रीमान्पन्नगबंधनैः ३४ देवदानवसंभूतामाक्रामयदपिश्रियम्
धन्यानंतः पुराविष्णुरुदारोमिततविक्रमः ३५ सावशेषंतपोयस्यतन्निहंतिजनार्दनः अलोकेष्वपिवर्ततंबलमेतन्महात्मनः ३६ जघ्नेचदा
नवान्मुख्यान्देवानांयेचशत्रवः तवप्रियार्थंगोविंदोधर्मनित्यः सतांगतिः ३७ रामत्वमपिचावाप्यजघ्नेरावणमात्मवान् भूत्वाकामगुणा-
श्चैवजघानहिरदंहरिः ३८ हितायजगतोद्यापिलोकेवसतिमानुषे उपेंद्रोजगतांनाथः सर्वभूतोत्तमोत्तमः ३९ जटीकृष्णाजिनीदंडीदृष्ट
पूर्वोमयाहरिः देतेयेषुचरन्देवस्तृणेष्वग्निरिवोद्धतः ४० अद्राक्षमपिगोविंददानवैकार्णवंजगत् कुर्वाणंदानवैर्हीनंजगतोहितका-
म्यया ४१ अवश्यंपारिजातंतेनयिष्यतिजनार्दनः हरकाममरश्रेष्ठनानृतंचब्रवीम्यहम् ४२ भ्रातृस्नेहाभिभूतस्त्वंनकृष्णोप्रहरिष्यति
नापिकृष्णस्त्वयिज्येष्ठेप्रहरिष्यतिवासव ४३ नैवचेच्छोष्यतिप्रोक्तमयादेवकथंचन पृच्छत्वंनयधर्मज्ञान्येहितास्तवमंत्रिणः ४४ वै
शंपायनउवाच नारदेनैवमुक्तस्तुमहेंद्रोजनमेजय इदमुत्तरमीशोयप्रत्युवाचजगद्गुरुम् ४५ एवंविधप्रभावंत्वंकृष्णंवदसियद्द्विज
एवमेतत्तुबहुशः श्रुतंखलुमयामुने ४६ यतश्चैवंविधः कृष्णस्ततोहंतस्यवैतरुम् नप्रदास्यामिदातव्यंसतांधर्ममनुस्मरन् ४७ महाप्र-
भावोनाल्पार्थंरुष्येदितिविचिंतयन् व्यवस्थितोहंभद्रंतेमुनेसर्वगुणादिति ४८ महाप्रभावाः सततंभवंतिहिसहिष्णवः श्रोतारश्चैवस
ततंवृद्धानांज्ञानचक्षुषां ४९ महात्माकारणेनाल्पेकृष्णोधर्मभृतांवरः भ्रात्राज्येष्ठेनसर्वज्ञोविरोधंगंतुमर्हति ५०

स्त्रीयंशत्यमेवरूपंप्रकाशयतीतियथा
श्रुतव्याख्यानंतुसर्वेषुयुगेषुसर्वेषांरूपाणांसत्वान्नयुज्यतइतिदिक् ३१ ३२ ३३ ३४ देवानांदानवानांचयत्नसंभूतांसाधारणीमपिश्रियंत्वयित्वन्निमित्तं आक्रामयत् ९३
आक्रांतवान् ३५ अलोकेषुमायासुवर्तमानमपिहंत्येवेत्यर्थः ३६ ३७ भूत्वा आविर्भूयतेषुनेषुवतारेषु कामगुणान्ययेष्टं शौर्यादिगुणयुक्तानसुरान् हरिर्हरिदंसिंहोगजानि

CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

वजघानहिरदमित्यर्थः सर्वमपिस्पष्टमा ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ धर्मज्ञानांकृष्णस्य ४९ ५०

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२१ सदृशीं आत्मवच्छुद्धां देवशर्मणो गौतमगोत्रस्य भार्यां अहल्यां इच्छतः अन्यायेन कामयानस्य शतक्रतोरुपरि एष दोषः पराभवरूपः मुनेः अपध्यानजः मानुषं-
भावमगणयतस्तव मानुषाद्भयं महद्भविष्यतीति मुनेरपध्यानं तज्जः २२ यद्यप्यारब्धः तथापि प्राप्त एवैतस्याध्याहृत्य योज्यम् २३ अस्य विरोधस्य मध्ये गमिष्यामि म
ध्यस्थो भूत्वा वारयिष्यामीत्यर्थः २४ २५ २६ २७ वेदोक्तैः स्वकृतैः स्वकृतिमिश्रैः २८ तानेवाह उरुक्रममित्यादिना द्वात्रिंशद्भिः श्लोकैः उरुक्रममिति विष्णो
र्विशेषणं उरुर्महान् त्रैलोक्याक्रमणसमर्थः क्रमः पादविक्षेपो यस्य स इति योगात् न चैतद्वामनस्यैव रूढं विष्ण्वभेदमंतरेण संगच्छते अभेदश्चानयोः बिंबप्रतिबिंबभा
वेन वा शास्त्रदृष्ट्या चेत्यन्यदेतत् एकस्यैव विश्वेश्वरस्य सर्वाणि नामानीत्येवं तत्त्वं विश्वंकर्म कृतिसाध्यं यस्येति कुलालवन्निमित्तत्वमुक्तं जगत्स्रष्टारमिति कालादिसाधार
णकारणरूपत्वम् धर्मदृश्यं पुण्यप्राप्यं वरेशं अनुग्राहकं कर्मकर्तॄणां समित्युपसर्गस्य नमस्ये इत्यनेन संबंधः संनमस्येत्यर्थः वेदव्यवहितात्श्चेति धातूपसर्गयोर्व्यवहि-

तच्छ्रुत्वा कश्यपः क्रुद्धो बृहस्पतिमभाषत अवश्यं भाव्यमेतद्धि सर्वथा नात्र संशयः २१ इच्छतः सदृशीं भार्यां महर्षेर्देवशर्मणः अपध्यानकृ
तो दोषः पतत्येष शतक्रतोः २२ अस्य दोषस्य शान्त्यर्थमारब्धश्च मुनेर्मया उद्वासः स दोषश्च प्राप्त एव सुदारुणः २३ तद्गमिष्यामि मध्येऽस्य स
हादित्या तपोधन उभौ तौ वारयिष्यामि देवं संवदते यदि २४ बृहस्पतिस्तु धर्मात्मा मारीचमिदमब्रवीत् प्राप्तकालं त्वया तत्र भवितव्यं तपोध
न २५ तथेति कश्यपश्चोक्त्वा संप्रस्थाप्य बृहस्पतिम् जगामार्चयितुं देवं रुद्रं भूतगणेश्वरम् २६ तत्र सौम्यं महात्मानमानर्च वृषभध्वजम्
वरार्थी कश्यपो धीमानदित्या सहितः प्रभुः २७ तुष्टाव च तमीशानं मारीचः कश्यपस्तदा वेदोक्तैः स्वकृतैश्चैव स्तवैः स्तुत्यं जगद्गुरुम् २८ क
श्यप उवाच उरुक्रमं विश्वकर्माणमीशं जगत्स्रष्टारं धर्मदृश्यं वरेशम् संसर्वत्वां धृतिमद्धाम दिव्यं विश्वेश्वरं भगवंतं नमस्ये २९ यो देवानाम
धिपः पापहर्ता तं तं विश्वं येन जगन्मयत्वात् आपो गर्भो यस्य शुभाधरित्र्यो विश्वेश्वरं तं शरणं प्रपद्ये ३० शालावृकान्यो यतिरूपो निजघ्ने दत्तानि
द्रेण प्रणुदो हितानाम् विरूपाक्षः स्कंदर्शनपुण्ययोनिर्विश्वेश्वरं शरणं यामि मूर्ध्ना ३१

तत्त्वस्मरणात् सर्वं सर्वात्मकम् धृतिमद्धाम धृतिः सात्त्विकी धृत्या यया धारय
ते मनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकीत्येवं लक्षणा तद्वतां धाम स्वप्रकाशं चैतन्यरूपमधिष्ठानं योगिनां निलयमित्यर्थः २९ आपः पु-
रुषवचसो भवंतीति श्रुतेरपां कार्यं शरीरं आपः उपाधिः स सर्वो यस्य गर्भं प्रतिबिंबं चैतन्यरूपं धारयिन्यः दधति आपो गर्भं इति पाठेऽपि धारयित्र्य आपो यस्य गर्भः सं
कल्पोत्थस्तरंग इत्यर्थः ३० शालेति अरुन्मुखान्यतीन् शालावृकेभ्यः प्रयच्छमिति श्रुतेर्वेदांतविचारहीनानजितेंद्रियं यतिमिंद्रः शालावृकैर्भक्षयति तानिंद्रियशा-
लावृकान्यः यतिरूपो जितेंद्रियः सन्निजघ्ने हतवान् हितानां शमदमादिरूपाणां मित्राणां प्रणुदः प्रणोदनपरान् अभिभावकान् यामि शरणं मूर्ध्ना च प्रपद्ये नमस्करोमि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यएकोजगतोविभुः स्वामी अग्र्यंज्येष्ठंविश्वंशुद्धान्जनान् भुंक्ते भुनक्तिपालयति अग्र्यंसूक्ष्ममपिविश्वंभुंक्तेसंहरतिवा धाम्नांचक्षुः सूर्यादीनां धामप्रकाशकं स्फुरितित्वात् तस्मात्तस्सुकृतमुच्यतइतिश्रुतेः सुकृतशब्दितंब्रह्मरूपत्वात् नधृष्यः अभयरूपइत्यर्थः पुष्यात्पोषयेत् सोमपानां कर्मठानांमरीचिपानांचंद्ररश्मिपानमात्रेणवर्तयतांमहामुनीनांवरिष्ठः स्वर्गब्रह्मलोकादिस्थानप्रदइत्यर्थः ३२ अथर्वाणं अथर्ववेदप्रतिपाद्यंसुशिरंसंशिरः पंचकोशोति भूतयोनिंजगत्कारणं बाधंबाधकं ३३ यत्राधिष्ठानेजगज्जालंजगदिंद्रजालंविततंविश्वंकृत्स्नंगतानांशरणंप्राप्तानांप्रतिदेवंसुखप्रकाशकं यत्यःऊर्ध्वगं अंतरिक्षचरंरथंवाहनं आस्थाययातिसंचरतिसुमनाःसुखकरः ३४ रोचनंचिन्मयंचारुशाश्वरमणीयाः शाखावेदमयायस्मात्जातास्तं शतवर्त्मानंशतपथविहितकर्मफलप्रदम् ३५ शुचिंअसंगंयोगंयोगप्राप्यंशंसनंवेदप्रशस्यंशर्वंश्रृणोतिहिनस्तीतिसंहर्तारं शंभुंसुखहेतुंशंकरंसुखकरं धुरंधरंजगतामितिशेषः चंद्रचिन्हंचंद्रमौलिं रिषीका णांहिंस्राणांकालादीनांअयनंआश्रयम् ३६ आशुः आशुशीघ्रफलप्रदंशिशानंरागादिदोषाणांतनूकरणंवृषभं शमादिगुणानांवर्षकंशेरुवाणंप्रातःसवनादिक्रमेणगर्जंतंकृतं अनुष्ठितंधर्मं

भुंक्तेयएकोविभुर्जगतोविश्वमग्र्यंधाम्नांधामस्फुरितित्वान्नधृष्यः पुष्यात्ससोमहसाशाश्वतेनसोमपानांमरीचिपानांवरिष्ठः ३२ अथर्वाणंसुशिरसंभूतयोनिंकृतिनंवीरंदानवानांचबाधम् यज्ञेहुतंयज्ञियसंस्कृतंवैविश्वेश्वरंशरणंयामिदेवम् ३३ जगज्जालंविततंयत्रविश्वंविश्वात्मानंप्रीतिदंदेवगतानाम् यऊर्ध्वगंरथमास्थाययातिविश्वेश्वरःसुमनामेस्तुनित्यम् ३४ अंतश्चरंरोचनंचारुशाखंमहाबलंधर्मनेतारमीड्यम् सहस्रनेत्रंशतवर्त्मानमुग्रंमहादेवंविश्वसृजंनमस्ये ३५ शुचिंयोगंशंसनंशांतपापंसर्वंशंभुंशंकरंभूतनाथम् धुरंधरंगोपतिंचंद्रचिन्हंरिषीकाणामयनंयामिमूर्ध्ना ३६ आशुःशिशानंवृषभंरोरुवाणंकृतंधर्मंवितथंचाप्यशेषम् वसुंधरंसमृजीकंसमंत्वांधृतव्रतंमूलधरंप्रपद्ये ३७ अनंतवीर्यंधृतकर्माणमाद्यंयज्ञस्येशंयजतांचाभियाज्यम् हविर्भुजंभुवनानांसदेवंज्येष्ठंद्विजंधर्मभृतांप्रपद्ये ३८ परंगुणेभ्यःपृश्निगर्भस्वरूपंयशःशृंगंव्यूहनंकांतरूपम् शुद्धात्मानंपुरुषंसत्यधामसंमोहनंदुष्कृतीनांनमस्ये ३९

यज्ञादिरूपंशिष्यतइतिशेषोपूर्वधर्मजंपुण्यंआशुः फलभोगेनशीघ्रनाशशीलः शेषोयस्यतंअतएवचाल्पफलत्वाद्वितथंनिष्फलप्रायंएवंसतिनाद्युष्येयोधर्मइत्यत आह वसुंधरंसमृजीकं मृजीकासत्वशुद्धिस्तदुद्देशेननयासहक्रियमाणंसमृजीकंअतएव वसुंधरंकर्मजंपुण्यंवसुतस्यधारकं आफलोदयंशुध्यर्थंकृतोधर्मोननश्यतीत्यर्थः समंबुध्यवधिभूतंसर्वस्वरूपमित्यर्थः ३७ धृतकर्मफलमतिप्रभुवंयज्ञशेषंदेवतांतरवत्यज्ञांगभावहीनंज्ञातंसतंस्वतःपुरुषार्थभूतमित्यर्थः एवमपियजतांअभियाज्यइज्यारंभविषयंयतोहविर्भुजं भुवनानांजगतीस्थानांजगतांवाज्येष्ठंद्विजंब्राह्मणरूपंधर्मभृतांमध्ये ३८ गुणेभ्यइंद्रियादिभ्यः परंतुरीयंपृश्निगर्भः विष्णुस्तत्स्वरूपं यशःअच्युतेइतिव्यापकंशृंगंप्रपंचंव्याप्यापिशृंगवत्ततोरिक्तंव्यूहनंरमणीयतयाजगत्क्षोभकंसत्यधामअबाधितचैतन्यस्वरूपंसंमोहनंमायाविनम् ३९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

युक्तानांयोगिनां ओंकारंसर्वप्रपंचरूपंस्वशिरसं ओंकारस्यापिशिरोर्द्धमात्रातद्रूपंचारुकर्महिंसाशून्यधर्मस्वरूपं आजं क्षेपणक्रियारूपंशूरं धनुषोवेत्तारंअत्याति रेकंसर्वास्त्रेभ्योधिकंपशूनांजीवानांशमनंसंहर्तारं ४० एकोद्वितीयःरात्रिर्मित्रं सर्वातिथिरग्निःजुषतिहविर्भुंक्ते अरिघ्नः कामादिदोषघ्नः अरिंतुदः रक्षोघ्नः संविभा गीविभागभाक्विभाजकश्च ४१ जगतांईशएकोपिविश्वंजलचंद्रवत् यातिप्राविशातिमरुतांप्राणसदात्प्राणस्यप्राणमित्यर्थः आनृशंस्यात्दयालुत्वात्सामम्मैत्रीजु ष्टंसेवितंजुष्यान्नूनयतु ४२ ब्रह्माचतुर्मुखः भुवनोत्तमोत्तमंसत्यलोकंअसृजत् यतः ब्राह्मणः ब्रह्मवित् अतएवषड्गुणस्यषड्भिर्गुणैः ऐश्वर्यज्ञानयशः श्रीवैराग्यध- र्मैःस्मृतः पूर्णः पूर्णत्वादेवव्याहृतिस्थंरसंप्रणवंतदर्थभूतंकृत्स्नप्रपंचंसृष्ट्वाइहप्रपंचे आयात्प्रविष्टः अरिहाकामादिदोषघ्नः अंगैःसर्वज्ञतातृप्तिरनादिबोधःस्वतंत्र- तानित्यमलुप्तशक्तिः अनंतशक्तिश्चविभोर्विधुज्ञाः षडाहुरंगानिमहेश्वरस्येतिपुराणोक्तैर्बहुरूपः ४३ व्यंजनः अतींद्रियाणामपींद्रियादीनामर्थानांज्ञापकः अ- जनोअजन्मा प्रमयःहृद्गस्यात्मास्पृशिःविषयस्पृक्शंभुः तत्स्पर्शजसुखभोक्ताप्राणदःजीवनकृत्ध्रुवोरसः परमानंदः पवमानस्यवायोर्भर्ताप्राणपतिःसपत्नीशःप

युक्तोंकारंस्वशिरसंचारुकर्महृढधृतंहृढधन्वानमाजं शूरंवेत्तारंधनुषोस्त्यातिरेकंपतिंपशूनांशमनंनमस्ये ४० एकोरातिश्चैवभूतंभविष्यं सर्वातिथिर्योहिजुषत्यरिघ्नः अरिंतुदोजुत्तमःसंविभागी विभाजकोसौभगवान्पातुदेवः ४१ यएकोयातिजगतांविश्वमीशोय एकोदान्मरुतां प्राणमस्यम् येनानृशंस्याच्छाश्वतसामजुष्टंसमांजुष्यात्सकृतीश्रेयसेद्य ४२ ब्रह्मासृजद्योभुवनोत्तमोत्तमंत्वृत्तोविद्वान्ब्राह्मणःषड्गुण स्य स्रष्टारंसव्याहृतिस्थंसमग्रंसमायादिहबहुरूपोरिहांगैः ४३ व्यंजनोजनोयविद्वान्प्रमयःस्पृशिःशंभुःप्राणदःकृत्तिवासाः रसोध्रुवःपव- मानस्यभर्तासपत्नीशःशंकरःसारधाता ४४ त्र्यंबकंपुष्टिदंवोब्रुवाणधर्मंविप्राणांवरदंयज्वनांच वराहररणजेतारमीशंदेवंदेवानांशरण्या मिरुद्रम् ४५ आस्यंदेवानामंतकंदुष्कृतीनांत्रिवृत्सोमंवृक्षहंकर्मसाक्ष्यम् भूतायनंभूतपतिंगुणज्ञंगुणाकारंशरण्यामिरुद्रम् ४६ अनु हूतंयज्ञकर्तारमंतमध्यंचाद्यंयज्ञकृतांसाम्यरूपम् वेदव्रतेषुबहुधागीतमीशमभित्रिविष्टपंशरण्यामिरुद्रम् ४७ महाजिनव्रतिनंमेखला लंकृतोषणंक्रोधधवंविपापम् भूतंक्षेत्रज्ञंगुणिनंवाक्पर्दिनंनतोस्मीशंवंदनंवंद्यानाम् ४८

त्नीशाभ्यांसहितः यज्ञादिकृत् शंकरस्तत्फलकरः सारस्यबो- धस्यचधाताजनयिता ४४ त्र्यंबकंत्रिनेत्रंवोयुष्माकंविप्राणांज्ञानिनां ४५ आस्यंअग्निरूपेणत्रिवृत्स्तोमंत्रिवृदादयःस्तोमास्तोत्राणियस्मिन्तंसोमयागं वृक्षहंसं सारवृक्षघ्नंकर्मसाक्ष्यंकर्मसाक्षिणंभूतायनंभूतानांलयस्थानं ४६ साम्यंप्रकृत्यवस्थावेदव्रतेषुवेदोक्तयज्ञेषुबहुधानानादेवतारूपेण अभित्रिविष्टपंस्वर्गंव्याप्य ईशंनियंतारं ४७ महाजिनंगजाजिनवंतंमेखलालंमेखलयाअलंकृतंसुतोषणंअल्पायासप्रसन्नंभूतंनित्यसिद्धंअतएवक्षेत्रज्ञंदेहेंद्रियाहंकारादिप्रकाशकंवंदनं ९५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri वंदनीयंवंदनानांवंदनीयानां ४८ छ छ

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्रतिं क्रतीनां यज्ञानां यज्ञं यज्ञियानामपि यष्टव्यमित्यर्थः शतात्मानं अनंतमूर्तिं गोपतीनां इंद्रियाधिष्ठातृदेवतानां संस्तुतं अधिष्ठातृत्वेन च क्षुश्चक्षुरित्यादिश्रुतेः
४९ प्रभास्वंतं स्वप्रकाशं विप्रदीपं ज्योतिरपि सूर्यादिकं ज्योतिरंतरेण च क्षुरादिना भास्यं भवति इदं तु न तथा विगतप्रदीपत्वात् अक्षरस्य जीवाख्य प्रतिबिंबस्य हेतुं-
बिंबभूतं ५० उभयोः जगज्जीवयोः प्रसूतिर्योनिः न प्रसूतश्च योनिरपि न कारणातीतत्वात् अत एव सूक्ष्मो दुर्ग्राह्यः भूतेभ्यः पृथक् न पृथक् एकभूतश्च पृथगिति त
दधिष्ठानत्वात् एकभूत इति तदभेदाग्रहात् स्वयंभूतः सर्वजगदाकारेण निष्पन्नः सर्वं सीदति लीयते स्मिन्निति सर्वसादः प्रदः प्रकृष्टो दाता स्वादः रुचिः आस्वादिषु साधु
र्यरूपेणायमेवास्तीत्यर्थः संमदो हर्षः रत्नं रमणीयम् ५१ आसन्नः अंतर्यामित्वेन निकटगः साधनानां तद्वतां तु सन्नतरः अनावृतः श्राद्धवृत्तिः श्रद्धागृहीत महावा
क्यजा वृत्तिरहं ब्रह्मास्मीति ज्ञानं तस्य प्रदाता मां मां ईषः इष्यमाणस्यार्थस्य पूरणः षड्गुणानां च सर्वज्ञत्वादीनां पूरणः ५२ अंतर्बहिर्वृजिनानां आधिव्याध्यादीनां काम

देवं देवानां पावनं पावनानां क्रतिं क्रतीनां महतो महांतम् शतात्मानं संस्तुतं गोपतीनां पतिं देवं शरणं यामि रुद्रम् ४९ अंतश्चरं पुरुषं गुह्य
संज्ञं प्रभास्वंतं प्रणवं विप्रदीपम् हेतुं परं परमस्याक्षरस्य शुभं देवं गुणिनं सन्नतोस्मि ५० प्रसूतिरुभयोर्न प्रसूतश्च सूक्ष्मः पृथग्भूतेभ्यो न पृ
थक् चैकभूतः स्वयंभूतः पातु मां सर्वसादः प्रदः स्वादः संमदः पातु रत्नम् ५१ आसन्नः सन्नतरः साधनानां श्रद्धावतां श्राद्धवृत्तिप्रणेता पति
र्गणानां महतां सत्क्रतीनां पायान्मेशः पूरणः षड्गुणानाम् ५२ अंतर्बहिर्वृजिनानां निहंता स्वयंकर्ता भूतभावी विकुर्वन् धृतायुधः सत्क्रतीना
मुत्तमौजाः प्रणुद्यान्मे वृजिनं देवदेवः ५३ येनो धृतास्त्रैः पुरमायिनो वै दग्धा घोरेण वितथांताः शरेण महत्कुर्वतो वृजिनं देवतानां ज्यायानी
शः पातु विश्वोदधाता ५४ भागीयसां भागमतो तमिच्छन् मखो दाक्षो येन क्रतोन्वधावत् विद्वान्यज्ञस्यादिरथांतः स देवः पायादीशो मां द
क्षयज्ञांतहेतुः ५५ अन्योधन्यः संस्कृतश्चोत्तमश्च जगत्सृष्ट्वा योत्ति सर्वातिगुह्यः समासुखप्रसुखे पातु नित्यं विचिन्वानः प्रथमः षड्गुणानाम्
५६

क्लेशादीनां वा स्वयं कर्तेति निमित्तकारणत्वं भूताकारेण भवितुं शीलमस्येति भूतभावी उपादानं विकुर्वन् विकारं प्राप्नुवन् क्रोधादीन् आविष्कुर्वन् सत्क्र
तीनां साधूनां मे मम च वृजिनं प्रणुद्यात् ५३ उद्धृताः कंटकवत् नाशिताः शरेण यतो दग्धा अतो वितथांताः विफलमरणाः अप्राप्तपूतत्वात् पुरदाहेन दग्धत्वादित्यर्थः
शापादीश इति पाठे इंद्रस्य गौतमशापात् विश्वस्य सर्वस्य उदस्य उदकस्य सर्वकारणस्य प्रधानस्येत्यर्थः धाता धारकः सर्वाश्रयत्वात् ५४ भागीयसां अतिशयेन भाग
भाजां देवानां भागं अंतं अपमानेन वधं च इच्छन् दाक्षो यज्ञरूद्रक्ष इति वक्तव्ये उपचारात् दुक्तं येन क्रत्तो ऽवच्छिन्नः सन् अन्वधावत् यज्ञेशं शरणं आजगामेत्यर्थः तत्र
यज्ञवाक्यमुदाहरति विद्वानिति ५५ यो जगत्सृष्ट्वा ऽत्ति अतिगुह्यो गोप्यो ब्रह्मरूपी ईश्वरस्ततोन्यो विष्णुः पालनकर्ता स च धन्यः महाभागः यतः संस्कृतः शमादिसंस्का

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रस्युक्तो॰ नएवउत्तमोयः समौदार्यः समांसुरवप्रभवस्तांसुखादिंद्रस्याग्निश्चोतिश्रुतौइंद्राग्नीतौप्रसुरवेआदौयस्यतंक्षिनृयज्ञोनित्यंविश्वानईश्वरःस्वाभेदेनसर्वत्रप-
श्यन् नारायणः समांपातुमत्संततिमिंद्ररक्षतु यतःषड्गुणानामैश्वर्यादीनांप्रथमोमुख्यआश्रयइत्यर्थः मखप्रमुखेइतिपाठे ऽग्निविष्णू ५६ गुणत्रैकाल्यंकार्योत्पत्तिस्थि-
तिसंहारसमयवत्त्वंयस्यनित्यंप्रवाहनित्यतयाउत्पत्त्यादयोयतोभवंतीत्यर्थः एतेनब्रह्मकर्मोक्तःसत्वोद्रेकःसत्वाधिक्यंचयस्यविष्णुरूपस्यनित्यंयस्यचविष्णोर्भावात्स्व-
रूपात्प्रसूतः आविर्भूतः कृष्णोगोप्तृणामिंद्रादीनांगोप्तासत्वप्रधानत्वात् यश्चसन्नदः सन्नवसानोनाशस्तत्प्रदः कालरुद्ररूपेणेत्यर्थः विश्वस्याद्योमातृपितृवत्पालको-
पिबाधमानस्यजगत्पीडकस्यक्रुद्धः सन्नृसन्नदइत्यनुवर्तते ५७ यस्यधाम्नः तेजोजालस्य हरिर्विष्णुरग्र्यः अग्रभिवाग्रः सूक्ष्मोंऽशोथविश्वोविराट्ब्रह्माहिरण्यगर्भः पुत्रैः
सनकाद्यैःसहितोन्येचद्विजाः मरीच्यादयःसंभूताइतिशेषः तेचयस्यसोमस्यउमासहितस्यभवनेद्वारप्रवेशेपराभूताःसंतः प्रवेशंनलभंतइत्यर्थः एषदेवःसोमः जुषतु
अस्मास्वप्रीयतां ५८ यस्माद्भूतानांवियदादीनांभूतिःसंभवः अंतोनाशः मध्यंस्थितिश्चभवति अतोयस्यकस्यापिपराभूतस्यनरस्यमृडवेद्यस्यमृडएववेद्योन्वेष्योयस्य

गुणत्रैकाल्यंयस्यदेवस्यनित्यंसत्वोद्रेकोयस्यभावात्प्रसूतः गोप्तागोप्तृणांसन्नदोदुष्कृतीनामाद्योविश्वस्यबाधमानस्यक्रुद्धः ५७ धाम्नोयस्य
हरिरग्र्योऽथविश्वोब्रह्मापुत्रैःसहितश्चद्विजाश्च पराभूताभवनेयस्यसोमोजुषत्वेषःश्रेयसेसाधुगोप्ता ५८ यस्माद्भूतानांभूतिरंतोथमध्यंधृति
भूतिर्यश्चगुहास्मृतिश्च गुहाभिभूतस्यपुरुषेश्वरस्यमहात्मनःसमृडवेद्यस्तस्य ५९ यल्लिंगांकंत्र्यंबकःसर्वमीशोभगलिंगांकंयच्चमासर्वधा
मी नान्यत्तृतीयंजगतीहास्तिकिंचिन्महादेवात्सर्वसर्वेश्वरोसौ ६० इतिसंस्तूयमानस्तुभगवान्वृषभध्वजः दर्शयामासधर्मात्माकश्यपंधर्म
धृग्वरम् ६१ उवाचचैनंदेवेशःप्रसन्नेनांतरात्मना येनसंस्तोषिकार्येणत्वंतज्ज्ञानेप्रजापते ६२ इंद्रोपेंद्रौमहात्मानौदेवौप्रकृतिमेष्यतः पा
रिजातंतुधर्मात्मानयिष्यतिजनार्दनः ६३ अपध्यातोमहेंद्रोहिमुनिनादेवशर्मणा अस्याकांक्षत्सुराभार्यांतपोदीप्तस्यकश्यप ६४ गम्यतां
तत्रधर्मज्ञदाक्षायिण्यासहत्वया अदित्याशक्रसदनंश्रेयस्तेपुत्रयोर्ध्रुवम् ६५

शिवैकशरणस्यततएवधृत्यादिरूपोनुग्राहोगुहास्मृतिर्गुह्यवस्तुश्रवणंचभवति अतएवतस्यपुरुषेश्वरस्येतिमहात्मनइतिचविशेषणंयुज्यते व्यसनागमेशरणीकृ-
तोविश्वकर्तात्व्यसनभंगंकरिष्यत्येवेतिभावः ५९ यदितियथाकार्यंसर्वंस्त्रीपुंसरूपंभगलिंगांकंएवंकारणमपितस्यलदनुरूपंभगलिंगांकंभगलिंगसंयोगरूपप्रति-
मात्मकंअवगंतव्यंतेनयदिदंदृश्यतेलोकेशिवंलिंगंतदभिमानिचेतनोद्भवमिदंब्रह्मांडमित्यर्थः अतएवासौसर्वसर्वेश्वरःसर्वअविशेषात्कृत्स्नःप्रपंचःसर्वसमाप्नो-
षिततोसिसर्वइतिनिर्वचनात्तदुपादानभूतोविष्णुरपिसर्वशब्दार्थः तयोरीश्वरस्तुरीयब्रह्मरूपइत्यर्थः ६० धर्मधृग्वरंधर्मभृतांश्रेष्ठं ६१ येनकार्येणयदर्थंसंस्तोषित- ९६
ज्ज्ञानेप्रजापतेहेकश्यप ६२ प्रकृतिस्वास्थ्यंतत्रापिधर्मात्माहरिर्जेष्यतीत्याहपारिजातंत्विति ६३ इंद्रस्तुअधर्मदोषादभिभवंप्राप्स्यतीत्याशयेनाह अपध्यातइति ६४
६५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कमलभवात्मजस्य मरीचेः सूनुः सुमनौकसंक्रमनसां देवानां ओकां सियत्र तं देवलोकं संधिरार्षः ६६ इतिश्रीमहाभारते हरिवंशे विष्णुपर्वणि टीकायां द्विसप्ततितमोऽध्यायः ७२ अथ विष्णुः मृगयाव्यपदेशेन मृगयाछलेन १ २ यहायगृहीत्वा ३ प्रतिपालयप्रतीक्षस्व हरीन् अश्वान् प्रवेक्ष्यामि ४ ५ ६ ७ ८ पारिजातं संपश्यतां पश्यतस्तानना दृत्येत्यर्थः पारिजातं आरोपयामासेति पृथगन्वयान्न पौनरुक्त्यं ९ १० ११ १२ क्रियतिक्रियते १३ १४ पूर्वद्वारं इंद्रपुर्याएव

इति हरवचनं निशम्य विद्वान् कमलभवात्मजसूनुरप्रमेयः त्रिदशगणगुरुं प्रणम्य रुद्रं मुदितमनाः क्रमनौकसं जगाम ६६ इतिश्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि पारिजातहरणे कश्यपकृतरुद्रस्तोत्रं नाम द्विसप्ततितमोऽध्यायः ७२ वैशंपायन उवाच अथ विष्णुर्महातेजा मुहूर्ताभ्युदिते रवौ मृगयाव्यपदेशेन ययौ रैवतकं गिरिम् १ आरोप्यैकरथे देवः सात्यकिं नरपुंगवम् प्रद्युम्नमनुगच्छेति प्रोक्त्वा कुरुकुलोद्वह २ रैवतं च गिरिं देवो गत्वा दारुकमब्रवीत् मदीयं रथमेनं त्वं गृहाय हैव दारुक ३ प्रतिपालय मां सौम्य दिनार्द्धं वारयन् हरीन् रथेनैव प्रवेष्टाहं द्वारकां सूतसत्तम ४ इति संदिश्य भगवानारुरोह जयोद्यतः तार्क्ष्यं स सात्यकिर्धीमानप्रमेयपराक्रमः ५ पृथग्रथेन कौरव्य प्रद्युम्नः शत्रुसूदनः आकाशगामिना राजन् पृष्ठतः कृष्णमन्वयात् ६ निमेषांतरमात्रेण नंदनं कानानं हरिः देवोद्यानं ययौ धीमान् पारिजातजिहीर्षया ७ ददर्श तत्र भगवान् देवयोधान् दुरासदान् नानायुधधरान् वीरान् नंदनस्थानधोक्षजः ८ तेषां संपश्यतामेव पारिजातं महाबलः उत्पाट्यारोपयामास पारिजातं सतांगतिः ९ गरुडं पक्षिराजानं प्रयत्नेनैव भारत उपस्थितो विग्रहवान् पारिजातः स केशवम् १० सांत्वितो वासुदेवेन पारिजातश्च भारत उक्तश्च वृक्ष मा भैस्त्वं केशवेन महात्मना ११ तं प्रस्थितं तरुं दृष्ट्वा पारिजातमधोक्षजः अमरावतीं पुरीं श्रेष्ठां ततश्चक्रे प्रदक्षिणाम् १२ ते तु नंदनगोप्तारः पारिजातं द्रुमोत्तमः क्रियतीति महेंद्राय गत्वा नृप शशंसिरे १३ अथैरावतमारुह्य निर्ययौ पाकशासनः जयंते नरथस्थेन पृष्ठतोऽनुगतः प्रभुः १४ पूर्वमभ्यागतं द्वारं केशवं शत्रुनाशनम् दृष्ट्वोवाच प्रवृत्तं भोः किमिदं मधुसूदन १५ प्रणम्य गरुडस्थोऽथ केशवः शक्रमब्रवीत् वध्वास्तु पुण्यकार्याय नीयते यं वरद्रुमः १६ तमुवाच ततः शक्रो मा मैवं पुष्करेक्षण अयोध्य त्वा नु तत्कर्त्तव्यस्त्वयाच्युत १७ प्रहरस्व महाबाहो प्रथमं मयि केशव प्रतिज्ञा सफलास्तु ते तस्तु सुक्त्वा कौमोदकीं मयि १८ ततः कृष्णः शरैस्तीक्ष्णैर्देवराजगजोत्तमम् बिभेदाशनिसंकाशैः प्रहसन्निव भारत १९ विव्याध गरुडं वज्री दिव्यैः शरवरैस्तथा बाणांश्चिच्छेद सहसा केशवस्य तरस्विनः २० यान्यान्मुमोच देवेंद्रस्तांस्तांश्चिच्छेद माधवः माधवेन प्रमुक्तांश्च चिच्छेद बलवृत्रहा २१ महेंद्रस्य च शब्देन धनुषः कुरुनंदन शार्ङ्गस्य च निनादेन मुमुहुः स्वर्गवासिनः २२ तयोर्वर्तति संग्रामे गरुडस्थो महाबलः पारिजातं जयतोऽथ हंतुमभ्युद्यतो बली २३

१५ १६ १७ १८ १९ २० २१ २२ वर्त्ततिवर्त्तमाने २३ ७. ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४९ ५० ५१ ५२ तवत्वत्तः युद्धेदृष्टंरिपोर्बलंयेनसः अबलंअल्पबलं ५३ खलुयस्मात् ५४ ५५ ५६ सजयंतः अपराणिततोप्यधिकानि ५७ पंचमं
पश्चात्तसुक्तम् ५८ ५९ ६० ६१ हस्तावापंहस्तपात्रंच ६२ ६३ ६४ ६५ ६६ मांसान्युच्चकर्त्ततुः ६७ अथाष्टधारेत्यत्रास्त्रवरबाणेनेतिपाठः ऽस्माद-

दहत्यग्निंनखल्वग्निरुद्धतोपिविशांपते दग्धाद्यात्महाबाहूरौक्मिणेयःप्रचक्रमे ४९ अथनारायणकृतोविरथोरथिनांवरः
स्थितोधनुष्मानाकाशेजयंतमिदमब्रवीत् ५० महेंद्रपुत्रादिव्यंत्वयदस्त्रमुक्तवानसि नाहमीदृशरूपाणांशक्योहंतुंशतैरपि ५१ प्र
यत्नंकुरुशिक्षाणांयत्नमेद्यप्रदर्शय नास्तिमेनिश्चयःकर्त्तासंग्रामेमरनंदन ५२ आसीन्मेसाध्वसंदृष्ट्वारथस्थंत्वांधृतायुधम् बिभेमि
तवनेदानींयुद्धेदृष्टबलोबलम् ५३ मनसास्मर्यतामेषपारिजातस्त्वयातरुः शक्यनखलुहस्ताभ्यांस्प्रष्टुंव्योमस्त्वयात्वसौ ५४ रथो-
मायामयोदग्धस्त्वयायोह्यस्त्रतेजसा ईदृशानांसहस्राणिस्रष्टुंशक्तोस्मिमायया ५५ एवमुक्तोजयंतश्चमुमोचास्त्रंमहाबलः तपसोप-
चिततेनस्वयमेवातितेजसा ५६ तमप्रद्युम्नोमहावेगंशरजालैरवारयत् चत्वार्यस्त्राणिदिव्यानिमुमुचेचापराणिसः ५७ दिक्षुसर्वासुरु
रुधुस्तान्यस्त्राण्यथभारत रौक्मिणेयंमहात्मानमंतरिक्षेचपंचमम् ५८ महोल्कासदृशान्बाणानस्त्राण्यमरसत्तमः मुमोचयानिघो
राणिप्रद्युम्नंप्रतिसर्वतः ५९ तानिसर्वाणिबाणौघैःकार्ष्णिरस्त्राण्यवारयत् जयंतंचापरैर्बाणैर्विव्याधनिशितैस्तदा ६० ततोनादः
समुत्तस्थौत्रयमरैःपुण्यकर्मभिः दृष्ट्वास्थैर्यंचशौर्यंचप्रद्युम्नस्यमहात्मनः ६१ प्रवरस्यापिबाणेनशितेनशिनिपुंगवः चिच्छेदचासनं
वीरोहस्तावापंचभारत ६२ ततोन्यत्सतुजग्राहमहत्तद्धनुरुत्तमम् महेंद्रदत्तंप्रवरोमहाशनिसमस्वनम् ६३ सतेनवीरोमहताधनुषा
विप्रसत्तमः शरान्मुमोचविविधानकरश्मिनिभास्तदा ६४ चकर्तचधनुश्छित्वाशैनेयस्यामितौजसः विव्याधसर्वगात्रेषुबाणैरपिचमा
त्यकिम् ६५ धनुरादायशैनेयस्ततोन्यत्कुरुनंदन दृढभारसहंधीमान्विव्याधप्रवरंरणे ६६ उच्चकर्ततुरन्योन्यवर्मणीतौशितैःशरैः गा
त्रेभ्यश्चैवमांसानिमर्मभिद्भिःशरोद्यमैः ६७ अथाष्टधारबाणेनपुनरिष्वासनंद्विधा चिच्छेदप्रवरोवीरस्त्रिभिश्चैनमताडयत् ६८
अन्यदिष्वासनंतंतुग्रहीतुमनसंद्विजः गदयाताडयामासक्षेप्ययालघुहस्तवान् ६९ सोसिंचचर्मचजग्राहसात्यकिःप्रहसन्निव नज
ग्राहधनुर्धीमान्गदयाभिहतोभृशम् ततःशरशतान्येवमुमोचप्रवरस्तदा ७० विहस्तमिवविज्ञायसात्यकिंयदुनंदनम् प्रद्युम्नो
स्यदद्दोखड्गंनिर्मलाकाशसन्निभम् ७१ तस्यचिच्छेदभल्लेननिस्त्रिंशंप्रवरस्तदा त्सरुदेशेपातयच्चप्रवरःप्रहसन्निव ७२

पिवरोयोबाणस्तेन ६८ तंसात्यकिं ६९ ७० विहस्तमिवेतिविकलहस्तमिव ७१ त्सरुदेशेमुष्टिप्रदेशेशरशतेन नाशितेखड्गेरिक्तहस्तमित्यर्थः ७२ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

२४ २५ २६ २७ कृतप्रतिकृतं अन्योन्यंशस्त्रास्त्रपरिहारं २८ २९ ३० ३१ ३२ ३३ ब्राह्मणचापल्यं ब्राह्मणत्वाच्चापल्यमित्यर्थः ३४
३५ शिनेर्नप्तासात्यकिः ३६ ३७ ३८ ३९ मन्यंतोमानयंतः ४० ४१ ४२ कार्ष्णिर्नातिशिष्यइत्यनुकृष्यते ४३ हंतेतिसंबोधनम् गृण्हगृहाण

प्रद्युम्नमथकंसघ्नोवारयेतितदाब्रवीत् ततस्तंवारयामाससरौक्मिणेयःप्रतापवान् २४ जयंतोजयतांश्रेष्ठोरौक्मिणेयमथेषुभिः सर्वगात्रेषुविहसन्नाजघानरथेस्थितः २५ रथस्थएवरथिनंकामस्तुकमलेक्षणः ऐंद्रिमभ्यर्दयामासबाणैराशीविषोपमैः २६ ससन्निपातस्तुमुलोबभूवकुरुनंदन जयंतस्यचवीरस्यरौक्मिणेयस्यचोभयोः २७ कृतप्रतिकृतंयुद्धेचक्रतुस्तौमहाबलौ महेंद्रोपेंद्रतनयौजगत्यस्त्रभृतांवरौ २८ देवाश्चमुनयश्चैवददृशुर्विस्मयान्विताः तंसंग्राममहाघोरंसिद्धाश्चैवसचारणाः २९ ततस्तुप्रवरोनामदेवदूतोमहाबलः पारिजातंपुनर्हर्तुमियेषकुरुनंदन ३० सखासदेवराजस्यमहास्त्रविदरिंदमः अवध्योवरदानेनब्रह्मणःकुरुनंदन ३१ ब्राह्मणस्तपसासिद्धोजंबुद्वीपाद्दिवंगतः स्वशक्त्यानृपसंयातःसखिलबलघातिना ३२ तमापतंतंसंप्रेक्ष्यकृष्णःसात्यकिमब्रवीत् अत्रस्यएषप्रवरःशरैर्वारयसात्यके ३३ नत्वत्रनिदयबाणामोक्तव्याःसात्यकेत्वया अस्यब्राह्मणचापल्यंसोढव्यंखलुसर्वथा ३४ ततःपक्षारथेषूणांगरुडस्थंद्विजस्तदा आजघानमहाबाहोसात्यकिंप्रवरोभृशम् ३५ शिनेर्नप्ताधनुस्तस्याक्षिपतःसायकान्नृप चिच्छेदपुरुषव्याघ्रोवचनंचेदमब्रवीत् ३६ ब्राह्मणोनाभिहंतव्यस्तिष्ठतिष्ठस्ववर्त्मनि अवध्यायादवानांहिस्त्वापराधेपिहिद्विजाः ३७ प्रवरस्तुप्रहस्यैनमुवाचकुरुनंदन अलंक्षांत्यानृणांशूरयुध्यस्वसर्वात्मनारणे ३८ जामदग्न्यस्यरामस्यशिष्योहमपियादव नामतःप्रवरोनामसखाशक्रस्यधीमतः ३९ नदेवायोद्धुमिच्छंतिमन्यंतोमधुसूदनम् आनृण्यंसौहृदस्याहमधिगंतास्मिमाधव ४० ततस्तयोस्तदाघोरंदुःसह्यासीवत्यधेनृप अस्त्रैर्दिव्यैर्नरव्याघ्रशैनेयद्विजमुख्ययोः ४१ द्योश्चचालतदाराजन्नुल्काश्चसहस्रशः तस्मिन्वर्तितिसंग्रामेतेषामतिमहात्मनाम् ४२ नातिशिष्येरणेकार्ष्णिरैंद्रिरस्त्रभृतांवर ऐंद्रिःकार्ष्णिमहात्मानमायिनंशूरसत्तमम् ४३ हंतगृण्हप्रतीच्छेतिताबुभौयोधसत्तमौ युयुधातेनरश्रेष्ठपरस्परजयैषिणौ ४४ अथशार्ङ्गायुधसुतःशचीपुत्रःप्रतापवान् विव्याधाभ्यहनद्राजन्दिव्येनास्त्रेणसत्वरः ४५ सोस्त्रंतदभिदीप्यंतमापतंतंशितैःशरैः नस्त्रभेद्बाणजालेनतदद्भुतमिवाभवत् ४६ ततस्तद्दीप्यमानंतुपपातरणमूर्द्धनि रौक्मिणेयस्यकोरव्यघोरंदानवमर्दनम् ४७ तेनास्त्रेणरथाद्दग्धःप्रद्युम्नस्यमहात्मनः नादहत्तत्सुघोरतरोक्मिणेयनराधिप ४८

प्रतीच्छदेहिप्रहारमितिशेषः ४४ ४५ दीप्यंतंदीप्यमानंपुंस्त्वंआर्षंशरैरुपेतंबाणजालम् ४६ रौक्मिणेयस्यापिघोरंदुःसहंकिमुतान्यस्य ४७ तेनपतितेनापि ४८

७३ ७४ ७५ ७६ ७७ विरुजः पीडाहीनः ७८ ७९ ८० ८१ ८२ ८३ ८४ शक्रनागमैरावतंप्रति ८५ प्रयुद्धौप्रकर्षेणयुध्यमानौ

व्यभमुञ्चतथाचर्मशितैर्बाणैरजिह्मगैः आजघानचशक्त्यैनंहृदिविप्रोननादच ७३ तंविकुर्वमिवज्ञात्वापारिजातजिहीर्षया
तार्क्ष्याप्यासेरथेनैवसतस्थौप्रवरस्तदा ७४ तंपक्षपुटवेगेनचिक्षेपगरुडस्तथा गव्यूतिमेकांसरथःसपपातसुमोहच ७५ तंजयंतो
नियत्याथपतितंब्राह्मणान्नृप समाश्वास्यरथंशीघ्रंसमारोपितवांस्तदा ७६ शैनेयमपिसुश्यांतंपततंचमुहुर्मुहुः आश्वासयानःप्रद्युम्नः
पितृव्यपरिषध्वजे ७७ तंहिपस्पर्शहस्तेनसव्येनमधुसूदनः विरुजःस्पर्शमात्रेणसात्यकिःसमपद्यत ७८ प्रद्युम्नोदक्षिणेपार्श्वेवामेतु
शिनिपुंगवः तस्थतुःपारिजातस्यसुहृष्टौडतरावुभौ ७९ जयंतःप्रवरश्चैवरथेनैकेनभारत संवृतंतौमहेंद्रेणप्रहस्योक्तौमहात्मना ८०
नासन्नमभिगंतव्यंगरुडस्यकथंचन बलवानेषपततांराजाचविनतासुतः ८१ दक्षिणेचैवसव्येचपार्श्वेसमधृतायुधौ उभौस्थितौयुध्य
मानंमासेवहिमपश्यतम् ८२ एवमुक्तौस्थितौवीरौततःशक्रस्यपार्श्वयोः ददृशातेयुध्यमानौदेवराजजनार्दनौ ८३ अथेंद्रोगरुडंबाणै
र्महाशनिसमस्वनैः विव्याधसर्वगात्रेषुमहास्त्रप्रवरस्तथा ८४ सतान्बाणानगणयन्वैनतेयःप्रतापवान् सुसाराभिमुखोवीरःशक्रना
गमरिंदमः ८५ उभौतौसहसाराजन्बलिनौगजपक्षिणौ प्रयुद्धौवीर्यसंपन्नौमहाप्राणौदुरासदौ ८६ रदनैःपन्नगरिपुंकरेणाशिरसा
तदा ऐरावतोगजपतिराजघानरदंस्तथा ८७ तथानखांकुशैस्तीक्ष्णैर्वैनतयोबलोत्कटः तथापक्षनिपातैश्चशक्रनागजधानह ८८
मुहूर्तंसुमहानासीत्संपातोगजपक्षिणोः विस्मापनीयोजगतःप्रेक्षितॄणांभयावहः ८९ मूर्ध्न्यैरावतंतार्क्ष्यस्ताडयामासभारत नखांकु
शकशलेनचरणेनमहाबलः ९० संप्रहाराभिसंतप्तोनिपपातत्रिविष्टपात् परियात्रेगिरिश्रेष्ठेद्वीपेस्मिन्जनमेजय ९१ पततमपितंश
क्रोनमुमोचमहाबलः कारुण्यादथसौहार्दात्पूर्वाभ्युपगमादपि ९२ कृष्णोप्यन्वगमच्चैनंपृष्ठतःप्रभवाव्ययः पारिजातवताधीमानुग
रुडेनमहाबलः ९३ सतस्थौपर्वतश्रेष्ठेपारियात्रेतुवृत्रहा ऐरावतेसमाश्वस्तेसंग्रामोववृधेपुनः ९४ शरैराशीविषप्रख्यैरत्नयुक्तैःसुते
जितैः अन्योन्यंकुरुशार्दूलशक्रकेशवयोर्महान् ९५ ततोवज्रायुधोवज्रमशनिंचपुनःपुनः मुमोचगरुडेराजन्नैरावतरिपोर्नृप ९६ व
ज्राशनिनिपातांस्तान्सेहेशक्रस्यपक्षिराट् अवध्योबलिनांश्रेष्ठोनिसर्गेणततोबलात् ९७

८६ रदनैः दंतैः करेणशुंडादंडेन ८७ ८८ ८९ ९० अस्मिन्जंबुप्रहितेद्वीपे ९१ पूर्वाभ्युपगमात् ९२ ९३ ९४ ९५ ९६ निसर्गेणस्वभावेनतपोबलाच्च ९७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९८ ९९ १०० १ २ ३ ४ नाडिकाघटिका १०५ इतिश्रीमहाभारतेहरिवंशेविष्णुपर्वणिटीकायांसप्ततितमोऽध्यायः ७३ तमारुह्येति १
शाणपादाः माषाः माषराशिवत्सशिथिलोभवदित्यर्थः चंदनघर्षणपाषाणोमहाराष्ट्रेषुसहाणइतिप्रसिद्धः तस्यपादइवक्षुद्रोवाऽधोग्रावाशाणोमाषचतुष्टयेलो
हादीनांचनिकषइतिमेदिनी २ प्रियार्थरथगतेरप्रतिबंधार्थंप्रीतोभूदितिशेषः ३ ४ ५ ६ नातिकल्पंईषदसमर्थम् ७ समुपोह्यतेसमानीयतेकालेनेति

मुमोचपक्षमेकैकंमानयन्नशनिंसदा वज्रंचदेवराजोथभ्रातुःकश्यपसंभवः ९८ आक्रम्यमाणस्तार्क्ष्येणन्यमज्जन्नृपतेगिरिः
विवेशाधरणींराजन्शीर्यमाणःसमंततः ९९ चुकूजबहुमानेनकृष्णास्यसतुपर्वतः तंचाद्राक्षीत्ततःकृष्णःकिंचिच्छेषमधोक्षजः १००
तमुत्क्षिप्यगरुडेनाथतस्थौदेवोविहायसि प्रद्युम्नश्चतदोवाचसर्वकृल्लोकभावनः १०१ इतोद्वारवतींगत्वारथमानयमाचिरम् स-
दारुकंमहाबाहोसत्तेजोबलमाश्रितः १०२ वक्तव्योबलभद्रश्चराजाचकुकुराधिपः श्वोजित्वेंद्रंमागमिष्येद्वारकामितिमानद ३
तथेत्युक्त्वातुधर्मात्माप्रद्युम्नःपितरंविभुः गत्वायथोक्तमुक्त्वाचयादवेंद्रबलानुभौ १०४ नाडिकांतरमात्रेणपुनस्तंदेशमाययौ दा
रुकेणसमायुक्तंरथमास्थायभारत १०५ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिपारिजातहरणेकृष्णेंद्रयुद्धेत्रिसप्तति
तमोऽध्यायः ७३ वैशंपायनउवाच तमारुह्यरथंकृष्णःपारियात्रंगिरिंययौ यत्रैरावतमास्थायस्थितःसुरपतिःप्रभुः १ पा
रियात्रोगिरिश्रेष्ठोदृष्ट्वायांतंजनार्दनम् शाणपादसमोभूत्वाप्रविवेशवसुंधराम् २ प्रियार्थंवासुदेवस्यप्रभावज्ञोमहात्मनः तस्य-
प्रीतोहृषीकेशःपर्वतस्यजनाधिप ३ ततःप्रयातंप्रत्यायमच्युतंकुरुनंदन सपारिजातोगरुडःपृष्ठतोनुययौतदा ४ प्रद्युम्नःसात्य
किश्चापिगरुडस्थौमहाबलौ गुप्तावुभौरक्षणार्थंपारिजातमरिंदमौ ५ ततस्त्वस्तंगतःसूर्यःप्रवृत्तारजनीनृप उपस्थितंपुनर्युद्धंश
क्रकेशवयोरिह ६ सुमहाराहतंदृष्ट्वाविष्णुरैरावतंगजम् नातिकल्पंमहातेजादेवराजानमब्रवीत् ७ गरुडाभिहतःपूर्वंनातिकल्पो
गजोत्तमः ऐरावतोमहाबाहोरात्रिश्चसमुपोह्यते ८ श्वःप्रभातेयथाकामप्रवर्तस्वयथेच्छसि एवमस्त्वितिकृष्णंतुदेवराजोब्रवीत्प्रभुः
९ उवासपुष्कराभ्यासेदेवराजःपुरंदरः व्रजंगिरिमयंकृत्वाधर्मात्मानृपसत्तम १० ब्रह्मात्ततोजगामाथकश्यपश्चमहानृषिः अदिति
श्चैवसर्वेचदेवामुनयएवच ११ साध्याविश्वेचकौरव्यनासत्यावश्विनौतथा आदित्याश्चैवरुद्राश्चवसवश्चजनेश्वर १२ नारायणश्च
पुत्रेणसत्यकेनचभारत सहोवासगिरौरम्येपारियात्रेप्रहृष्टवत् १३

शेषः ८ ९ व्रजंगिरिमयंपर्वतवृंदमयम् आवरणंकृत्वेत्यर्थः व्रजोगोष्ठेथवृंदेध्वनीतिमेदिनी १० ११ नारायणःकृष्णः १२ १३ ७३ ७३ ७३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शास्त्रार्थमेवाह भूतमिति अव्यक्तात्जीववदप्रसिद्धात् अक्षरात् त्वत्त एकजगद्भूतं हे अत्यंत अंतमतिक्रांत एतेनातोन्यदार्त्तमिति श्रुतेरितरस्यां तत्प्रयुक्तं धीरधीप्रव
र्तक अक्षराणां जीवानां ईशानियंतः अक्षरेश भवत्यस्मादिति भवः ईश्वराणां कारणं स्वतस्तु भूतं नित्यसिद्धं अत्युदारं अक्लेशेपि महावरप्रदं २५ योहं विदर्भनग
रे सर्वैः राजभिश्च निर्जितैरभिषिक्तोस्मि सोपि त्वमेवेति प्रत्यगभेदेन स्तौति यस्माज्जितैरिति आसि अस्मि त्वां मदभिन्नम् २६ पूज्य इत्यस्याद्यः पाद एकादशाक्षरो द्विती
यश्चतुर्दशाक्षरः सर्वभूतात्मभावी सर्वाणि भूतानि आत्मनि भावयितुं शीलमस्य स तथा २७ भूमित्रयाणां भूमिप्रभृतीनि त्रयाणि त्रिकाणि भूमिरंतरिक्षं द्यौरिति
प्राणोपानो व्यान इति अग्निर्वायुः सूर्य इति भूतं भविष्यद्वर्तमान इत्येवमादि तेषां प्रतिष्ठा लयस्थानं भावन हे उत्पत्तिकारण पुनरित्यनेन लयोदयधारायां अनादित्वं
दर्शितं तेन त्रिकाणां लयोदयकरत्वेन हेतुना त्र्यंबकेति त्रीणि सर्गस्थित्यंतादीनि अंबयति गमयति प्रकाशयतीति योगात् त्र्यंबक इति तव नाम प्रथमं सुख्यं हे अप्रमेय
हे त्रिदशेशानां ब्रह्मादीनां नाथ २८ शृणोति हिनस्तीति शर्वपदयोगमाह शर्व इति अप्रमेयः शत्रुभिरक्षोभ्यः अप्रमेयः भूय इत्यंतर्यामित्वेन शासतो पि पुनरीश्वरेण राजा

भूतं यस्माज्जगदत्यंतधीर त्वत्तोव्यक्तादक्षरादक्षरेश तस्मात्त्वामाहुर्भव इत्येव भूतं सर्वेश्वराणां महतामत्युदारम् २५ यस्माज्जितैरभिषि
क्तोस्मि सर्वैर्देवासुरैः सर्वभूतेश्च देव महेश्वरं विश्वकर्माणमाहुस्त्वां वै सर्वे तेन देवातिदेवम् २६ पूज्यो देवैः पूज्यसे नित्यदा वै शम्भुश्चत्वं येयः कां
क्षिभिर्वरदामोघवीर्यः तस्माद्विख्यातो भगवान् देवदेवः सतामिष्टः सर्वभूतात्मभावी २७ भूमित्रयाणां देव यस्मात्प्रतिष्ठा पुनर्लोकानां
भावना मेयकीर्तिः त्र्यंबकेति प्रथमं तेन नाम तवाप्रमेय त्रिदशेशान्नाथ २८ शर्वः शत्रूणां शासनादप्रमेयस्तथा भूयः शासनाच्चेश्वरेण स
र्वव्यापित्वाच्छंकरत्वाच्च सद्भिः शब्दस्येशानः श्रीकरार्काग्र्यतेजाः २९ संसक्तानां नित्यदा यत्करोषि शंशंस्मान्नृव्यान्यद्धनैषीः समस्तान् त
स्माद्देवः शंकरोस्यप्रमेयः सद्भिर्धर्मज्ञैः कथ्यसे सर्वनाथः ३० दत्तः प्रहारः कुलिशेन पूर्वं तवेशान सुरराज्ञातिवीर्य कंठेनेत्यं तेन ते यत्प्रवृत्तं-
तस्मात्ख्यातस्त्वं नीलकंठेति कल्पः ३१

दिभावेन इत्थं भावे तृतीया तेनापि रूपेण शासनात् सर्वव्यापी अंतर्बहिश्च व्यापकत्वात् शंकरः सुखकरः सद्भिः सतां हेतोरित्यर्थः न तु दुष्टानां शंकरः शब्दस्येशानः सर्वश
ब्दप्रमेयत्वेनावच्छेदकः हे श्रीकर ऋचः सामानि यजूंषि सा हि श्रीरमृता सतामिति एषास्य परमा संपदिति च श्रुतिभ्यां श्रीशब्दोदितापरविद्या च तयोः कर्ता अर्कादप्यग्र्यं अधिकं
तस्यापि प्रकाशकं तेजो यस्य सोर्काग्र्यतेजास्त्वमसीति शेषः २९ संसक्तानां भक्तानां शं संस्रवं स्मान्नृव्यान् अक्रूरान्व्यनैषीः शिक्षितवानसि तेषां हितायैवेति अतः सर्वेषां क
ल्याणकारित्वात् शंकरोसि ३० कल्पः समर्थोपि वात्सल्यात् कृतापकारमपि न बाधसे इत्याह दत्त इति सुरराज्ञा इंद्रेण विष्णुना वा प्रहारो दत्तः तेन वज्रचक्रयोरपमानो मा भूदि
तिहेतुना कंठे नैल्यं धत्से प्रत्युत प्रहर्तुर्यश एव तनोषि न तु शासमिति महाकारुणिकत्वान्मां पाहीत्यर्थः ३१ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शाणप्रमाणः शाणबीजप्रमाणइतिवा १४ शाणपादः शणुदानेशाणनिददत्यस्याभितिशाणाभारतभूमिःसापादमात्रंयस्यशाणपादइत्यवयवार्थःसर्वदेवा
पुण्येनेति अर्धेनउपरिभागेन १५ १६ १७ १८ १९ २० इशोशांईशानांब्रह्मादीनामपिईश्वरंव्यापकं अशूङ्व्याप्तावित्यस्यरूपम् २१ हेदेवक्रीडाप
रहेद्योतमानत्वंत्वमेवरुद्रोसि सोरोदीद्यदरोदीत्तद्रुद्रस्यरुद्रत्वमितिश्रुतेः शोकास्पदभूतोजीवः एतेहीदंसर्वंऐदयंतितस्माद्रुद्राइतिश्रुतेश्चप्रकारांतरेणावयवार्था
वगमात्रोदनादेः कारयिताभयंकरोभीषास्माद्वातःपवतइत्यादिशास्त्रप्रसिद्धोमहेश्वरस्त्वमेवासिनान्योतोस्तिद्रष्टेत्यादिश्रुतेस्त्वदन्यश्चेतनोनास्तीत्यर्थः एवं
रुद्रपदस्यसमुदायार्थमुक्त्वावयवार्थमाहरुदनाद्द्रावणाच्चेति रुदनात्मायापंजरेणजीवपक्षिणोनिरोधनात् इमेलिंङ्गिंद्रोदसीमाययाएहिकायेइतिधकारस्था
नेदकारनिपातनस्यदर्शितत्वात् तस्मिंश्चान्योमाययासन्निरुद्धइतिश्रुतेश्चरुणद्धीतिरुद्रः द्रावणात्मायायाहिंसनाच्चतस्याभिध्यानाद्योवजानाच्चतत्वभावात् भू

यत्सशाणप्रमाणोस्यभक्त्यासमभवन्नृप वरंप्रादात्ततस्तस्यपर्वतस्यमहाद्युतिः १४ शाणपादइतिख्यातोभविष्यसिमहागिरे पु
ण्येनार्द्धेनतुल्योहिपुण्योहिमवतःशुभः १५ एवमेवचभूयिष्ठोभवपर्वतसत्तम मेरुणास्पर्द्धमानोहिबहुचित्रमृगैर्युतः १६ तथाद
त्वावरंतस्यपर्वतस्यतुकेशवः दृष्ट्वोगंगांसरिच्छ्रेष्ठांनमस्कृत्वावृषध्वजम् १७ अथापयोविष्णुपदीस्मृताकृष्णेनभारत संपूज्यतांत
तः कृष्णः कृत्वास्नानमधोक्षजः १८ उदकंचगुहायाथबिल्वंचहरिरव्ययः देवमावाहयामासरुद्रंसर्वेश्वरेश्वरम् १९ ततःप्रासोमहा
देवःसोमःसप्रवरोविभुः तस्याबुपरिबिल्वस्यतथागंगोदकस्यच २० तंपारिजातकुसुमैरर्चयामासकेशवः तुष्टावचगीर्भिरीशेशंस
र्वेकर्त्तारमीश्वरम् २१ श्रीकृष्णउवाच रुद्रोदेवस्त्वरुदनाद्द्रावणाच्चरोरूपमाणोद्रावणाच्चातिदेवः भक्तेभक्तानांवत्सलंवत्स
लानांकीर्त्याजुष्टंत्वांप्रपद्येशरण्यम् २२ ग्राम्यारण्यानांत्वंपतिस्त्वपशूनांख्यातोदेवःपशुपतिःसर्वकर्मा नान्यस्त्वत्तःपरमोदेवदेव
जगत्पतिःस्वरवीरारिहिता २३ यस्मादीशोमहतामीश्वराणांभवानाद्यःप्रीतिदःप्राणदश्च तस्माद्दित्वामीश्वरंप्राहुरीशंसंतोविद्वांसःसर्व
शास्त्रार्थतत्त्वज्ञाः २४

यश्चांतेविश्वमायानिवृत्तिरितिध्यानात्मायाविनिवर्तकश्रुतेः त्वमेवसंसारदोमोक्षप्रदश्चातोरुद्रइत्युच्यतेप्रकारांतरेणनिर्वक्तिरोरूपमाणोद्रावणाच्चेतिरोरूपयतेप्रशंसा
द्भुतेवाउच्यतेवागालंबनीभूतःप्रपंचोरुःतस्यद्रावणात्लवणोदकन्यायेनप्रविलापनाद्वारुद्रःयद्वारोरूपमाणःशब्देनप्रतिपाद्यमानएवज्ञातमात्रःसन्संसारस्य
द्रावणात्रुद्रइत्युच्यतेजीवईशश्चजीवानांरोधकोरोधनाशकः वाच्यमात्रलयस्थानंरुद्रोवागेकगोचरइति अतिदेवःदेवंप्रकाशकमतिक्रांतःस्वप्रकाशइत्यर्थः
मुक्षमामितिशेषः २२ग्राम्यारण्यानांभोगसक्ताविरक्तानांपशूनांजीवानां २३ईशंवरंइतीश्वरपदंनिर्वक्तियस्मादिति शास्त्रार्थभूतश्चासोसर्वशास्त्रार्थतत्त्वजानंतीति ९९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अधिष्ठायनियम्यघोरान् अस्करान् ४९ मूर्ध्नितव ५० त्वत्तःत्वत्संबंधिभिः ५१ ५२ ५३ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांचतुःसप्तति
तमोऽध्यायः ७४ ७ ततोरथेनि १ २ ३ ४ ५ ६ ७ शैब्यादीन् शैब्यसुग्रीवबलाहकमेघपुष्पाख्यान् कृष्णाश्वान् सेन्यादीनितिपाठेसेनाख्यांसूर सू-

त्वयिसन्निहितश्चाहंभविष्यामिमहागिरे अधिष्ठायमहाघोरान्निवत्स्यामिचपर्वत ४९ आरुह्यमूर्ध्निमद्रूपंदृष्ट्वापर्वतसत्तम गोस
हस्रप्रदानस्यफलंप्राप्स्यतिशाश्वतम् ५० त्वत्तोऽप्रमभिश्चप्रतिमांकारयित्वाहिभक्तितः शुश्रूषिष्यंतियेनित्यंमयास्यंतितेगतिम्
५१ इतितंपर्वतंकृष्णोवरदोनुगृहीतवान् तदाप्रभृतिदेवेशस्तत्रसन्निहितोच्युतः ५२ पाषाणैःप्रतिमांतातकारयित्वाचकेचरव शु
श्रूषंतिकृतात्मानोविष्णुलोकाभिकांक्षिणः ५३ इतिश्रीमहाभारतेखि॰ह॰विष्णुपर्वणिपारिजातहरणेकृष्णकृतशिवस्तुति
र्नामचतुःसप्ततितमोऽध्यायः ७४ ७ वैशंपायनउवाच ततोरथवरंकृष्णःसमारुह्यमहामनाः बिल्वोदकेश्वरंदेवंनमस्कृ
त्ययौनृप १ महेंद्रमाव्हयामासरथस्थोमधुसूदनः सत्कृतंपुष्कराख्यासेसर्वेर्देवगणैःसह २ ततःशक्रोजयंतोथहरिभिर्युक्तमुत्त
मम् आरुरोहरथंदेवःसर्वकामप्रदःसताम् ३ ततोरथस्थयोर्युद्धमभवत्कुरुनंदन देवयोर्दैवयोगेनपारिजातकृतेतदा ४ ततो-
हनद्रणेविष्णुर्बाणैःशत्रुबलार्दनः सैन्यानिदेवराजस्यबाणजालैरजिह्मगैः ५ उपेंद्रंनमहेंद्रोथनैवविष्णुःसुरेश्वरम् ताडयामा
सतुर्वीरौशस्त्रैःशक्रावपिप्रभो ६ एकैकमष्टदशभिर्महेंद्रस्यजनार्दनः विव्याधविशिखैस्तीक्ष्णैरस्त्रयुक्तैर्जनेश्वर ७ शैब्याद्यानपि
देवेंद्रःशरैरमरसत्तमः छादयामासराजेंद्रघोरैरस्त्राभिमंत्रितैः ८ सचबाणसहस्रैश्चकृष्णोगजमवाकिरत् गरुडंचमहातेजाबलभि
द्धरिवाहनम् ९ न्ययिष्ठाप्यारथाभ्यांतौतदहःशत्रुदारुणौ युयुधातेमहात्मानौनारायणसुराधिपौ १० चकंपेवसुधाकृत्स्नानौर्जल-
स्थेवभारत दिशादाहेनदिग्देशाःसंवृताश्चसमंततः ११ चेलुर्गिरिवराश्चैवपेतुश्चशतशोद्रुमाः पेतुश्चधरणीपृष्ठेमत्स्याश्चमृगान्वि
ताः १२ निर्घाताःशतशश्चान्येपेतुस्तत्रनराधिप ऊहुश्चसरितःसर्वाःप्रतिस्रोतोविशांपते १३ विपर्यवातावपुश्चैवपेतुरुल्काश्चनिष्प्रभाः
मुहुर्मुहुश्चेतसंधारयनादेनमोहिताः १४ प्रजज्वालजलेचैववह्निर्जलपदेश्वर युयुधुश्चग्रहैःसार्द्धंग्रहानभसिसर्वतः १५ ज्योतींषिशत-
शःपेतुःस्वर्गाच्चधरणीतलम् दिशागजाःप्रकुपितानागाश्चधरणीतले १६ गर्दभारुणसंस्थानेश्छिन्नाभ्रैश्चावृतंनभः विनदद्भिर्महा
रावान्रूक्षशोणितवर्षिभिः १७ नभूर्नद्यौर्नगगनंनरेंद्रवृषभाभवन् स्वस्थानिस्थिरवीरौतुदृष्ट्वायुद्धगतौतदा १८

तान्वादीन् ८ ९ १० ११ १२ १३ १४ १५ ज्योतींषितारा: १६ गर्दभवत्धूसराणि अरुणानिचसंस्थानानियेषांतैःछिन्नाभ्रैः १७ १८ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गुणिनंगुणवंतंअंबिकांचगुणत्रयरूपामितिशेषः ३२ वेदैः अजामेकांलोहितशुक्लामित्यादिनागीतासाहिमायातत्त्वंमहांतंप्रसूताजनितवतीसचमहान् क्रियाशक्ति-
मान्ज्ञानशक्तिमान्तत्राद्येनरूपेणयतोसिलोकप्रसिद्धः दीक्षायांदीक्षावतांद्वितीयेनयोगिनांयज्ञोजीवशयोः परमात्माग्नौप्रक्षेपरूपोसि हे देवत्वत्सम अत्यद्भुतंभूतं
नास्ति अथयतः भूतंवाभव्यंवाभवद्वर्तमानंवानास्तियत्तूद्दृश्यंतत्सर्वंकालत्रयेपिनास्ति अतस्त्वदंतर्गतं अद्भुतंयत्किंचित्तत्त्वसाम्यंकथंलभेतेत्यर्थः ३३ अतिवीराः आभ्यं-
तरशत्रुजयिनः सनकाद्याइंद्राद्यावासर्वशत्रुजयिनः त्वत्तस्त्वदंशात्कारणस्यापि आत्माअधिष्ठानंयत्रईश्वरोपिकल्पितइत्यर्थः अतएवईड्यः स्तुत्यः ३४ गोवृषः महो-

यल्लिंगांकंयच्चलोकेभगांकंसर्वंसोमत्वंस्थावरंजंगमंच प्राहुर्विप्रास्त्वांगुणिनंतत्त्वविज्ञास्तथाध्येयामंबिकांलोकधात्रीम् ३२ वे-
दैर्गीतासाहितत्त्वंप्रसूतायज्ञोदीक्षाणांयोगिनांचातिरूपः नात्यद्भुतंत्वत्समंदेवभूतंभूतंभव्यंभवदेवाथनास्ति ३३ अहंब्रह्माकपि-
लोयोप्यनंतःपुत्राःसर्वेब्रह्मणश्चातिवीराः त्वत्तःसर्वेदेवदेवप्रसूताएवंसर्वेशःकारणात्मात्वमीड्यः ३४ इतिसंस्तूयमानस्तुभग-
वान्गोवृषध्वजः प्रसार्यदक्षिणंहस्तंनारायणमथाब्रवीत् ३५ मनीषितानामर्थानांप्राप्तिस्तेऽस्तुसुरसत्तम पारिजातंचहर्तासिमाभू-
तेमनसोव्यथा ३६ यश्चासौनाकमाश्रित्यतपस्त्वमकरोःप्रभो तथासमवरंकृष्णासंस्मृत्यस्थैर्यमाप्नुहि ३७ अवध्यस्त्वमजेयश्चमत्तः
शूरतरस्तथा भवितासीत्यथोचयत्तत्तथाननतदन्यथा ३८ यश्चस्तवेनमांभक्त्यास्तोष्यतेऽमरसत्तम त्वयाकृतेनधर्मज्ञधर्मभाक्सभ-
विष्यति समरेचजयंविष्णोप्राप्स्यपूजांतथोत्तमाम् ३९ बिल्वोदकेश्वरोनामभविताहमिहानघ देवेश्वरत्वयास्थापिदेवसिद्धोपया-
चनः ४० इहस्थोपोषितोविद्वान्भक्तिमान्ममकेशव चिराच्चमीप्सितांल्लोकानागमिष्यतिजनार्दन ४१ अविंध्यानामदेशेस्मिन्-
गंगाचैवभविष्यति गंगास्नानसमंस्नानंमंत्रतोभवितातथा ४२ षट्पुरंनामनगरंदानवानांजनार्दन अंतर्धरणीदेशेपराक्रम्य
महाबलाः ४३ एतेदैत्यादुरात्मानोजगतोदेवकंटकाः छन्नावसंतिगोविंदसानावस्यमहागिरेः ४४ अवध्यादेवदेवानांवरेणब्रह्म-
णोनघ मानुषांतरितस्तस्मात्त्वमेताञ्जहिकेशव ४५ ततोयातेमहादेवेप्रभातायांनराधिप तस्यांनिशायांगोविंदस्तूयपर्वतमब्रवी-
त् ४६ तवाधःपर्वतश्रेष्ठनिवसंतिमहासुराः अवध्यादेवदेवानांवरेणब्रह्मणःपुरा ४७ निर्गमिष्यंतितेनैवमयारुद्धामहाबलाः द्वा-
रेनिरुद्धेतत्रैवविनंक्ष्यंतिममाज्ञया ४८

क्षः ध्वजेयस्यसगोवृषध्वजः ३५ ३६ ३७ मत्तः शूरतरइत्यस्याभिव्यक्तिर्बाणयुद्धेव्यक्तीभविष्यति ३८ पूजांप्राप्यधर्म-
भाक्भविष्यतीतिसंबंधः ३९ अस्यापिस्थापितःहेदेवसिद्धंउपयानंप्रार्थनायस्मादित्यर्थः ४० ४१ मंत्रतः गंगास्मारकमंत्रपाठात् ४२ अंतर्धरणीदेशेभुविवरप्रदे- १००
शेगुप्तंपराक्रम्यपराक्रमेणवसंतीत्युत्तरेणसंबंधः ४३ सानौअवच्छन्नावसंति अपायेबिलंचविशंतीत्यर्थः ४४ मानुषभावेन अंतरितःप्रच्छन्नः ४५ स्तूयस्तुत्वा ४६ ४७
४८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४३ ४४ ४५ ४६ भैमानांभीमवंशोद्भवानाम् यादवानाम् ४७ ४८ ४९ ५० ५१ ५२ ५३ पश्यमानाःपश्यंतः ५४ मदनकेळिकलाःक्रीडा
पराः अंडजायत्रतं ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ सत्यभामयासत्यभामायाःग्रहाय ६३ ६४ ६५ ६६ ६७

दिव्यानांसर्वरत्नानांवाससांचमनस्विनी नानारागविरक्तानांसदैवारजसामपि ४३ भार्याणांचसहस्राणियानिषोडशमाधवे प्रति
गृह्यमहातेजाःप्रययौद्वारकांप्रति ४४ संपूज्यमानोद्युतिमान्खेचरैःपुण्यकर्मभिः ससात्यकिःसपुत्रश्चप्राप्तोरैवतकंगिरिम् ४५ स
तत्रस्थापयित्वाचपारिजातंवरद्रुमम् सत्यकंप्रेषयामासद्वारकांद्वारशालिनीम् ४६ श्रीकृष्णउवाच पारिजातमिहानीतंम
हेंद्रसदनान्मया निवेदयमहाबाहोभैमानांभैमवर्द्धन ४७ अद्यद्वारवतींचैवपारिजातमहाद्रुमम् प्रवेशयिष्येनगरेशोभाप्रक्रिय-
तांशुभा ४८ इत्युक्तःसत्यकोगत्वातथोक्त्वापुनरागतः कुमारैर्नागरैःसार्द्धंसांबप्रभृतिभिःप्रभो ४९ ततोथतःपारिजातमारोप्यगरुडे
तदा प्रद्युम्नोद्वारकांरम्यांविवेशरथिनांवरः ५० शैब्यादिहययुक्तेनरथेनानुययौहरिः तस्याथरथमुख्येनसात्यकिःसाबएवच ५१ ये
त्वन्येनृपवार्ष्णेयायानैर्बहुविधैस्तथा ययुःप्रहृष्टास्तत्कर्मपूजयंतोमहात्मनः ५२ सत्यकाद्धि श्रुत्वायादवानागरास्तथा विस्मयं
परमंजग्मुरप्रमेयस्यकर्मणा ५३ तंदिव्यकुसुमंवृक्षंददृशुरानर्तनिवासिनः राजन्नतनृपुहृष्टाःपश्यमानामहोदयम् ५४ तमद्भुतम-
चिंत्यंचमदकेळिकलाडजम् वृक्षोत्तमपश्यंतोवृद्धानामगमज्जरा ५५ येत्वंधाश्चक्षुषःसर्वेतेभवन्दिव्यचक्षुषः विरोगारोगिणश्चासं
स्तुघ्रात्वागंधंवनस्पतेः ५६ लपंतःकोकिलांश्चैतान्श्रुत्वानर्तनिवासिनः बभूवुर्हृष्टमनसोववंदुश्चजनार्दनम् ५७ नानाविधानितू
र्याणिगेयानिमधुराणिच शुश्रुवुस्तस्यवृक्षस्यनातिदूरंगतानराः ५८ योयंसंकल्पयामासगंधंहृद्यनरस्तथा सतंदैवतमाजघ्रेपारि
जातसमुद्भवम् ५९ ततःप्रविश्यरम्यांतुद्वारकांयदुनंदनः वसुदेवंमहात्मानंददृशेदेवकींतथा ६० कुकुराधिपतिंचैवबलंभ्रातरमेव
च स्त्रीश्चयादवानांयेमानार्हानमरोपमान् ६१ विसृज्यतान्वैभगवाननादिनिधनोच्युतः संपूज्यचयथान्यायंस्वमेवभवनंगतः ६२
ससत्यभामयावासंविवेशमधुसूदनः पारिजाततरुश्रेष्ठंग्रहायगदपूर्वजः ६३ सादेवीपूजयामासप्रहृष्टावासवानुजम् प्रतिजग्राहृतं
चापिपारिजातंमहाद्रुमम् ६४ मनीषितेनसतरुरूपोभवतिभारत महांश्चवासुदेवस्यतदद्भुतमभून्महत् ६५ कदाचित्हारकांस-
र्वांप्रच्छादयतिभारत कदाचिद्धस्तधार्यस्तुभवत्यंगुष्ठसन्निभः ६६ ननंदसत्याकौरव्यदेवीप्राप्यमनोरथम् पुण्यकस्यतुसंभारान्संभ
तुंसुपचक्रमे ६७

७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ अभयंदत्वादत्तवान्कृष्णाइतिशेषः ददातेः आतोमनि

जेपुर्मुनिगणाश्मंत्रान्जगतोहितकाम्यया ब्राह्मणाश्चमहात्मानोह्यातिष्ठन्नतेपुसत्वराः १९ ततोब्रह्मामहातेजाः कश्यपंवाक्यम
ब्रवीत् गच्छवध्यासहादित्यापुत्रोवारयस्कव्रत २० सतथेतितदादेवमुक्त्वापद्मभवंमुनिः जगामरथमास्थायतस्थौनरधरांतिके
२१ स्थितंतुकश्यपंदृष्ट्वासहादित्यातदातरा उभौरथाश्याधरणीमवतीर्णौमहाबलौ २२ न्यस्तशस्त्रौचतौवीरौवदतुररिंदमौ
पितरौधर्मतत्वज्ञौसर्वभूतहितेरतौ २३ उभौगृहीत्वाहस्ताभ्यामदितिस्त्वब्रवीद्वचः असोदराविवैवकिमन्योन्यंहंतुमिच्छतः २४
स्वल्पमर्थंपुरस्कृत्यप्रवृत्तमतिदारुणम् सुहृदर्शनेतिपश्यामिसर्वथाममपुत्रयोः २५ श्रोतव्यंयदिमातुश्चपितुश्चैवप्रजापतेः न्यस्तश
स्त्रौस्थितौभूत्वाकुरुतंवचनंमम २६ तथेत्युक्त्वाचतौदेवौस्नातुकामौमहाबलौ गंगांजग्मतुरेवाथप्रजल्पंतौपरस्परम् २७ श
क्रउवाच त्वंप्रभुर्लोककृत्कृत्स्नराज्येहस्थापितस्त्वया स्थापयित्वाकथंनासपुनर्मामवमन्यसे २८ भ्रातृत्वमुपगम्यैवज्येष्ठ
त्वंचाप्यपोह्यच कथंकमलपत्राक्षनिर्वाणंकर्तुमिच्छसि २९ स्नातौतुजान्हवीतोयेपुनरभ्यागतौनृप यत्रादितिःकश्यपश्चमहा
त्मानौदृढव्रतौ ३० प्रियसंगमनंनामतद्देशंमुनयोवदन् यत्रतौसंगतौह्युभौपितृभ्यांकमलेक्षणौ ३१ ततःशक्रस्यकौरव्यदत्वा
वाचाभयंतदा यत्रदेवगणाःसर्वेसमेताधर्मचारिणः ३२ ततोययुर्विमानेस्तेदेवाःसर्वेत्रिविष्टपम् रूप्यापरमयायुक्तास्तेषामेवा
नुरूपया ३३ कश्यपश्चादितिश्चैवतथाशक्रजनार्दनौ विमानमेकमारुह्यगताराजंत्रिविष्टपम् ३४ तेशक्रसदनंप्राप्तारम्यंसर्व
गुणान्वितम् ऊषुरेकत्रकौरव्यमुदिताधर्मचारिणः ३५ शचीतुकश्यपपत्न्यासहितंधर्मवत्सला उपाचरन्महात्मानंसर्वभूतहित
रतम् ३६ ततस्तस्यांप्रभातायांरजन्यामब्रवीद्धरिम् अदितिर्धर्मतत्वज्ञासर्वभूतहितंवचः ३७ उपेंद्रद्वारकांगच्छपारिजातंनयस्व
च वध्वासंप्रापयस्वेशपुण्यकंहृदयेस्थितम् ३८ पुण्यकेसत्ययाप्राप्तेपुनरेषवरयातरुः नंदनेपुरुषव्याघ्रस्थाप्यःस्थानेयथास्थिते ३९
एवमस्त्वितिकृष्णोनदेवमातायशस्विनी उक्ताधर्मगुणैर्युक्तानारदेनमहात्मना ४० ततोभिवाद्यपितरंमातरंचजनार्दनः महेंद्रंसह
शच्याथप्रतस्थेद्वारकांप्रति ४१ ददौकृष्णायपौलोमीनियोगान्कुरुनंदन सर्वासामेवकृष्णस्यभार्याणांधर्मचारिणी ४२

न्यूकनिब्वनिपश्चेतिक्वनिप् ३२ ३३ ३४ ३५ ३६ ३७ पुण्यकंव्रतोत्सवम् ३८ ३९ ४० ४१ नियोगान्प्रीतिदेयान् ४२ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ६८ व्रतकस्यव्रतेपदेयस्यदानस्य ६९ इतिश्रीमहाभारतेहरिवंशेविष्णुपर्वणिटीकायांपंचसप्ततितमोऽध्यायः ७५ अथेति १ २ काले्दानोचिते ३ ४
 भाविनीसद्भावती ५ देवीकेशवमनुप्राप्य अङ्गिर्नारदाय ददावित्यन्वयः ६ कांचनस्येतिविशेष्यंषष्ठ्यंतानांमणीनांरत्नानांचप्रभायस्मिन्तस्य ७ ८ ९ प्रथ

यानिद्रव्याणिकौरव्यजंबूद्वीपेतुकानिचेत् योग्यानितानिकृष्णेनसंभृतानिमहात्मना ६८ मुनिंतदासंस्मृतवान्सनारदंजनार्दनः सर्वगुणोन्वितं वशी प्रतिग्रहार्थंव्रतकस्यसत्ययापयोपादिष्टस्यपुरंदरानुजः ६९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिपारिजातानयनपंचसप्ततितमोऽध्यायः ७५ वैशंपायनउवाच अथकृष्णस्यकौरव्यस्मृतमात्रस्तपोधनः आजगाममुनिश्रेष्ठोनारदोवदतांवरः १ संपूजयित्वाविधिवद्वासुदेवोविशांपते प्रतिग्रहार्थंविधिवच्छ्रीमान्भक्त्यान्यमन्त्रयत् २ ततःकालेचसंप्राप्तेस्नातंदेवोमहामुनिम् संपूज्यमाल्यैर्गंधैश्चभोजयामासभारत ३ सार्वकामिकमन्नाद्यंसर्वभूतहृदन्वयः सत्ययाप्रिययासार्द्धंप्रहृष्टेनांतरात्मना ४ पुष्पदामवसज्यायकंठेकृष्णस्यभाविनी बबंधकृष्णांसुभगापारिजातेवनस्पतौ ५ अङ्गिर्ददौनारदायततोनुज्ञाप्यकेशवम् देवीधेनुसहस्रंचकांचनस्यचपर्वतम् ६ हिरण्यरूप्यमिश्रंचमणिरत्नप्रभस्यच तिलमिश्रस्यचतथाधान्यैरन्यैर्युतस्यच ७ प्रतिगृह्यतुतत्सर्वंनारदोमुनिसत्तमः ससंप्रहृष्टोमुस्कायभूयःकेशवमब्रवीत् ८ भोःकेशवमदीयस्त्वमद्भिर्दत्तोसिसत्यया सत्वमामनुगच्छस्वकुरुयद्वक्ष्यहम् ९ प्रथमःपक्षइत्येवसब्रवीन्मधुसूदनः व्रजंतमनुवव्राजनारदंचजनार्दनः १० परिहासंबहुविधंकृत्वामुनिवरस्तदा तिष्ठस्वगच्छामीत्युक्त्वापरिहासविचक्षणः ११ अपनीयततःकंठात्पुष्पदामैनमब्रवीत् कपिलागांसवत्सांप्रोनिष्क्रयार्थंप्रयच्छमे १२ कृष्णाजिनंतिलैःपूर्णंप्रयच्छचसकांचनम् एषोत्रनिष्क्रयःकृष्णाविहितोवृषकेतुना १३ तथेत्युक्त्वाहृषीकेशस्तथाचक्रेजनाधिप सउवाचमुनिश्रेष्ठंहसितामधुसूदनः १४ वरंवरयधर्मज्ञयस्तेनारदकांक्षितः तत्तेदातास्मिधर्मज्ञपराप्रीतिर्हिमेत्वयि १५ नारदउवाच नित्यमेवास्तुमेप्रीतोभवान्विष्णोसनातन त्वत्प्रसादात्तुसालोक्यंव्रजेयंतेमहामते १६ अयोनिजोभवयत्तेनारायणसतांगते भवेयंब्राह्मणश्चैवपुनर्जात्यंतरेष्वपि १७ एवमस्त्वितितंदेवोविष्णुःप्रोवाचभारत तुतोषचततोधीमान्नारदोमुनिसत्तमः १८ षोडशस्त्रीसहस्राणिविष्णोरतुलतेजसः निमंत्रितानिकौरव्यसत्याहरिकांतया १९ तासांददौसंनियोगमेकैकंहरिवल्लभा शच्यायोवासुदेवस्यपुरादत्तोनराधिपः २० पारिजातोवसंस्तत्रचततःप्रववृतेतदा आज्ञयावासुदेवस्यनारदेनमहात्मना २१

भोमुख्यः पक्षोयद्दासेनस्वामिकार्यंकर्तव्यमित्यर्थः १० परिहासंपादुकानयनाद्याज्ञापनैः ११ १२ वृषकेतुनारुद्रेण
१३ १४ १५ १६ १७ १८ १९ सन्नियोगंदिव्यवस्त्राभरणादिकंइंद्राणीप्रेषितंविभज्यददौ २० प्रवृत्तेसगुणान्ख्यापयामास २१ ७ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गणाः सुहृत्संबंधिसमूहाः २२ तानेवाह पांडवानिति २३ श्रुतश्रवापितृस्वसाशिशुपालमाता २४ २५ २६ २७ २८ २९ ३० ३१ ३२
मानुषोमानुषरूपीदेवः ३३ ३४ ३५ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांषट्सप्ततितमोऽध्यायः ७६ छ पुण्येति १ २ ३ वधेक्

निमंत्रितागणाःसर्वेकेशवेनमहात्मना विभूतिंपारिजातस्यददृशुःकुरुनंदन २२ पांडवांश्चानयामाससहैवपृथयाहरिः द्रौपद्या
चमहातेजास्तथैवचसुभद्रया २३ श्रुतश्रवाचससुताभीष्मकंससुतंतदा अन्यानपिचकौरव्यमित्रसंबंधिबांधवान् २४ रेमेचसह
पार्थेनफाल्गुनेनजनार्दनः सांतःपुरोमहातेजाःपरसत्थ्यावसन्नृप २५ संवत्सरेततोयातेकेशिहामरसत्तमः पारिजातंपुनःस्वर्गमान
यत्सर्वभावनः २६ तत्रादितिंकश्यपंचदृष्ट्वास्वजननींप्रभुः शक्रेणसहितोधीमानप्रमेयपराक्रमः २७ तमुवाचादितिर्माताप्रणतंमधु-
सूदनम् सोभ्रात्रमस्त्रुवामेवनित्यंचामरसत्तम २८ मनोरथममत्वंचपूरयस्वजनार्दन तथेत्युवाचाब्रवीत्कृष्णस्ततोमातरमात्मवान्
२९ आमंत्र्यपित्तापितरौदेवराजानमब्रवीत् वासुदेवोमहातेजाःकालप्राप्तमिदंवचः ३० महादेवेनदेवेशसंदिष्टोस्मिमहात्मना अं-
तर्भूमितलेवध्यानसुरान्प्रतिमानद ३१ तद्दितोदशरात्रेणहंताहमसुरोत्तमान् तत्रोपविष्टानुस्थातव्यंप्रवरेणमहात्मना ३२ जयंतेनच
वीरेणदानवान्जिघांसया एकोत्रमानुषोदेवोदेवपुत्रस्तथापरः ३३ अवध्याःकिलतेदेवब्रह्मणोवरदर्पिताः अस्माभिःकिलहंत-
व्यामानुषत्वमुपागतैः ३४ तथेतिकृष्णसहरिःप्रीतरूपस्तथाब्रवीत् सस्वजातेततोदेवावन्योन्यंजनमेजय ३५ इतिश्रीम० खिले०
हरिवंशेविष्णुप० पारिजातहरणेस्वर्गेपारिजातस्थापननामषट्सप्ततितमोऽध्यायः ७६ जनमेजयउवाच पुण्यकानामथोत्पत्तिं
कथयस्वद्विजोत्तम द्वैपायनप्रसादेनसर्वंहिविदितंतव १ वैशंपायनउवाच उमयापुण्यकविधिर्नरेंद्रेस्यादितःपुरा शृणुयेनवि
धानेनलोकेधर्मभृतांवर २ स्वर्गान्नीतेपारिजातेकृष्णेनाक्लिष्टकर्मणा ययौद्वारवतींधीमान्नारदोमुनिसत्तमः ३ देवासुरेनृपश्रेष्ठसंग्रा
मेसमुपस्थिते षट्पुरस्यवधेघोरेमहादेवाज्ञयानघ ४ कृष्णेनसहितंविप्रंनारदंधर्मवित्तमम् आसीनंपरिपप्रच्छरुक्मिणीभैष्मिकी
नृप ५ तत्रजांबवतीदेवीसत्यभामाचभामिनी गांधारराजपुत्रीचयोगयुक्तानराधिप ६ देव्यश्चनृपकृष्णस्यबह्व्योन्यावैसमागताः कु-
लशीलगुणोपेताधर्मशीलाःपतिव्रताः ७ रुक्मिण्युवाच मुनेधर्मभृतांश्रेष्ठधर्मज्ञानभृतांवर उत्पत्तिंपुण्यकानांत्वंवक्तुमर्हस्यशे
षतः ८ विधिंचफलयोगंचदानकालंतथैवच कौतूहलंनस्तत्सर्वंवदस्ववदतांवर ९

नेसति ४ ५ तत्रजांबवत्यादयोपिसमागताः ६ ७ ८ ९ छ छ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१० ११ १२ १३ १४ गंगाद्यानद्याभिमानिन्योदेवताः १५ १६ १७ १८ १९ २० २१ २२ भर्तृदेवतेपतिव्रतासमुदाये २३ सोमनंदिनीअ

नारदउवाच शृणुवैदर्भिधर्मज्ञेसपत्नीभिःसहानघे पुण्यकानांविधिःप्रोक्तोयथादेविपुरोमया १० चचारोमाव्रतंदेवी पुण्यकानांसुचिव्रता
व्रतावसानेचतयासख्योदेविनिमंत्रिताः ११ आदित्याद्याःसुताःसर्वाःदक्षस्याक्लिष्टकर्मणः पौलोमीचशचीदेवीख्यातालोकेपतिव्रता
१२ रोहिणीचमहाभागासोमस्यदयितासती फाल्गुनीचतथापूर्वारेवतीचविशांपते १३ तथाशतभिषाचैवमघाचकुरुनंदन एता-
भिर्हिमहादेवी पूर्वमाराधितासती १४ गंगासरस्वतीचैववेणीगोदाचनिम्नगा तथावैतरणीचैवगंडकीयाचभारत १५ अन्याश्चसरितोरम्या
लोपामुद्राचभारत सत्यश्चान्याजगद्देविधारयंतिहिताःशुभाः १६ शुभाश्चगिरिनद्योवह्निकन्याश्चसुव्रताः स्वाहावह्निप्रियादेवीसा
विन्नीचयशस्विनी १७ ऋद्धिःकुबेरकांताचजलेचमहिषीतथा भार्यापितृपतेश्चैववसुपत्न्यस्तथाचयाः १८ ह्रीःश्रीर्धृतिस्तथाकीर्तिरा-
शामेधाचसुव्रताः प्रीतिर्मतिश्चख्यातिश्चसन्नीतिश्चतपोधनाः १९ देव्यःसत्यस्तथैवान्याःसर्वभूतहितेरताः तासांव्रतावसानेचपूजांचक्रे
बिकातदा २० तिलरत्नमयंदत्वापर्वतंसर्वधान्यवत् वासोभिर्भूषणैर्मुख्यैर्नानारागैःसुमध्यमे २१ प्रतिगृह्यतुतांपूजांदत्तांदेव्यातपोध-
नाः उपविष्टाःकथाश्चित्राःकुर्वंत्योभर्तृदेवताः २२ पुण्यकार्थकथास्तासामासन्देवीशशंसयाः विधिंचपुण्यकस्याथसतीनांभर्तृदेवते २३
तासांमतेनसाध्वीनांसर्वासांसोमनंदिनी पर्यपृच्छदुमांदेवीपुण्यकानांविधिंवरा २४ उमातासांप्रियार्थंतुपुण्यकान्यब्रवीत्तदा समक्षम
मवैदर्भिसर्वभूतहितेरता २५ ममैवचमयादत्तःसतदारत्नपर्वतः प्रतिगृह्यमयाचैवदत्तोब्राह्मणसाच्छुभे २६ उमात्वरुंधतींसाध्वीमा
मंत्र्ययदभाषत शृणुकल्याणिवक्ष्यामिसर्वाभिःसहितासुभे २७ पुण्यकानांविधिंकृत्स्नंयथावदनुपूर्वशः यथाचैवमयादृष्टस्ततएष
विधिःशुभे २८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णु॰पुण्यकविधिकथननामसप्तसप्ततितमोऽध्यायः ७७ उमोवाच
सर्वज्ञाहंयदाभर्तुःप्रसादेनशुचिस्मिते तदापुरामयादिष्टोदृष्टःपुण्यविधिःशुभः १ सनातनःपुण्यविधिरितिबुध्यावगम्यताम् महादेव
प्रसादेनमयादृष्टस्त्वरुंधति २ पुण्यकानिचसर्वाणिचीर्णवत्यस्म्यनिंदिते अनुज्ञयाभगवतोभर्तुःशर्वस्यधीमतः ३ सतीत्वधर्मचरणाय
स्यानित्यमखंडितम् पुण्यकानांविधिस्तस्याःपुराणैःपरिकीर्तितः ४ दानोपवासपुण्यानिसुहुतान्यप्यरुंधति निष्फलान्यसतीनांहि-
पुण्यकानितथाशुभे ५ यावच्चयांतिभर्तारंयोनिदुष्टाश्चयाःस्त्रियः योनिदोषात्पुण्यफलंनाश्नंतिनिरयंगमाः ६

रुंधती २४ २५ २६
२७ २८ इतिश्रीमहाभारतेखि॰ह॰वि॰सप्तसप्ततितमोऽध्यायः ७७ सर्वज्ञेति आदिष्टेउपदिष्टोभवेदित्यर्थात् दृष्टोज्ञातश्च १ २ ३ अखंडितंईप्सितंभवेत्

४ ५ ६ ६१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७ ८ ९ १० पुरातनेवेदे ११ हेसत्येअरुंधति १२ १३ असतीभूत्वासतीविद्यमाना १४ १५ कौतूहलंआश्चर्यंप्रोक्तं १६ १७ १८ १९ औदुंबरंताम्रमयं २० सिच्यसिक्त्वा २१ २२ २३ व्रतांगनियमानाह अशल्येत्यादिना २४ २५ २६ पादुकार्थंतृणैर्वेत्राभिः पादत्राणंकर्तव्यंनतुचर्ममय

साध्व्योजगद्धारयंतिस्वशीलाःपतिदेवताः अनन्याधर्मनित्याश्चसतीपंथानमाश्रिताः ७ अवाग्दुष्टाःशौचयुक्ताधृतिमत्यःशुभव्रताः सततंसाधुवादिन्योधारयंतिजगत्खलु ८ व्याधितःपतितोवापिदीनोवापिकथंचन नत्यक्तव्यःस्त्रियाभर्ताधर्मएषःसनातनः ९ अकार्यकरणंवापिपतितंवापिनिर्गुणम् स्त्रीपतिंतारयत्येवतथात्मानंशुभानने १० योनिदुष्टास्त्रियोनास्तिप्रायश्चित्तंहतेवसा वाग्दुष्टेविहितंसद्भिः प्रायश्चित्तंपुरातने ११ भर्तुःश्छंदेनकर्तव्यंव्रतकंसर्वदास्त्रिया उपवासोपिवासत्येकांक्षंत्यासुहृतांगतिम् १२ कल्पांतरसहस्रेषुनस्त्रीसालभतेगतिम् तिर्यग्योनिसहस्रेषुपच्यतेयोनिविप्लवात् १३ यदिसानाममानुष्यंस्त्रीलभेदसतीसती चंडालयोनौदुर्मेधाजायतेकुक्कुराशना १४ भर्तादेवःसदास्त्रीणांसद्भिर्दृष्टस्तपोधने यस्याहितुष्यतेभर्तासासतीधर्मचारिणी १५ कौतूहलहतानांतुस्त्रीणांलोकेनशोभनः भर्तैवंमनोयासांसाद्भावेनव्यवस्थितम् १६ कर्मणामनसावाचापुंतिनातिचरंतियाः तासांपुण्यफलंसौम्येपुण्यकैःसमुदाहृतम् १७ पुण्यकानांविधिंकृत्स्नंस्वर्लोकप्रतिशोभने निबोधसहसर्वाभिर्दृष्टंयस्तपसामया १८ स्नात्वास्त्रीप्रातरुत्थायपतिंविज्ञापयेत्सती उपवासार्थमथवाव्रतकार्यंधृतव्रते १९ श्वशुराभ्यांचचरणौसततंसत्तमस्यच ग्रहायौदुंबरपात्रंसकुशंसाक्षतंतथा २० गोशृंगंदक्षिणंसिच्यप्रतिगृण्हीततज्जलम् ततोभर्तुःसतीदद्यात्स्नातस्यप्रयतस्यच २१ आत्मनोपिनिषेक्तव्यंततःशिरसितज्जलम् त्रैलोक्यसर्वतीर्थेषुस्नानमेतदुदाहृतम् २२ उपवासेषुकर्तव्यमेतद्धिव्रतकेषुच स्नानमेतद्धिसामान्यंस्त्रीणांपुंसांचभाविनि २३ अरुंधतीमयादृष्टंतपसाहरतेजसा अशल्यविद्धंशयनमासनंचतथाविधम् २४ स्वयंप्रक्षालनंचापिपादयोरनुशब्दितम् अश्रुप्रपातोरोषश्चकलहश्चकृतःसती उपवासाद्धृताह्यापिसद्योभ्रंशयतिस्त्रियः २५ शुक्लमेववसदावासःप्रशस्तंचंद्रसंभवे अंतर्वासोपरंचैवउपवासेव्रतेतथा २६ पादुकार्थंतृणैःकार्यंसर्वदाव्रतकेसति उपवासेपिचविधिरेषएवप्रवर्तितः २७ अंजनंरोचनंचापिगंधान्सुमनसस्तथा व्रतकेचोपवासेचानित्यमेवविवर्जयेत् २८ दंतकाष्ठंशिरःस्नानमुद्वर्तनमथापिवा विवर्जितंमृदासर्वंशौचार्थंतुविधीयते २९ बिल्वामृतफलैर्नित्यंश्रीफलैश्चसमाचरेत् प्रक्षालनंचशिरसःसदामृन्मिश्रितैर्जलैः ३० शिरसोभ्यंजनंसौम्येनैवतावत्प्रशस्यते नपादयोर्नगात्रस्यस्नेहेनेनिस्थितिःस्मृता ३१

मित्यर्थः २७ २८ २९ अमृताहरीतकीआमलकीवाश्रीफलैःपक्वबिल्वफलैःअमृन्मिश्रितैरितिच्छेदः ३० अभ्यंजनंकल्कस्नानं ३१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३२ ३३ ३४ ३५ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायां अष्टसप्ततितमोऽध्यायः ७८ विधिनेति चरेद्व्रतमितिशेषः १ २ यानिमं
व्रिताएकादश स्त्रियः ताःसर्वाअद्भिःसाकं आचार्यायदद्यात् संनिहितत्वात् निष्क्रयोदेयः पूर्वंभर्तृभ्यः क्रीत्वा आचार्यायदेयास्तेन आचार्यान्निष्क्रयेणगृहीतास्तद्भ
र्तृभ्यः प्रदद्यादित्यर्थः ३ अपवर्जनंसमापनं ४ ५ अन्तकंउद्दिश्येतिशेषः आत्मनश्चकेशवर्जनंस्वमात्रनिकृंतनंसर्वान्केशान्समुत्सृत्यछेदयेदंगुलद्वयं एवमेव-
हिनारीणांवपनंसर्वदास्मृतमितिस्मृत्युक्तप्रकारेणवाक्षुरकर्म ६ ७ इमंवक्ष्यमाणं ८ ऋषीणांदेव्यःजनपित्र्यःयासुजातः कश्यपइतिलिंगात् दिविभवाः आ

गोयानमुष्ट्रयानंचखरयानंचवर्जितम् नग्नस्नानंचसततंव्रतेचाप्युपवासके ३२ नदीजलंप्रस्रवजंप्रशस्तंसोमनंदिनि शुभेतडागेवा
प्यादौविस्तीर्णेजलजायुते ३३ गत्वास्नानंप्रशस्तंतुसदैवखलुसर्वथा अलाभेत्ववरुद्धास्त्रीघटस्नानंसमाचरेत् ३४ नवैश्चकुंभैःस्नात
व्यंविधिरेषपुरातनः स्नानंचकार्यंशिरसातपःफलमवाप्नुयात् ३५ इतिश्रीमहाभारतेखि० हरिवंशेविष्णुप० पारिजातहरणे अष्टस-
प्ततितमोऽध्यायः ७८ उमोवाच विधिनेतेनकृत्स्नेनस्त्रीसदाभर्तृदेवता चरेत्संवत्सरंदांताषण्मासान्मासमेवच १ स्त्रियोद्वादश
येत्साध्वीरेकादशसमाधिना स्वयंचैवविधिर्दृष्टोव्रतकानांमयाशुभः २ अद्भिर्दद्यात्सतीःसर्वायामूलव्रतिनीभवेत् तासांतुनिष्क्रयोदेयः
कालदेशानुरूपतः ३ ततोमासांतशुक्लस्यतिथौचनवमीतथा आराधयित्वाकर्तव्यंव्रजकस्यापवर्जनम् ४ उपवासमहोरात्रंव्रतकंचापि
निश्चितम् आदौचांतेचकुर्वीतव्रतकस्यापिसिद्धये ५ क्षुरकर्मततोभर्तुरात्मनश्चैवकारयेत् उत्सादनंचस्नानंचतस्मिन्नहनिसंस्मृतम्
६ ततोविवाहवत्स्नानंविहितंपुण्यकेशकृमे मंडनंचैवविहितंमाल्यधारणमेवच ७ कुंभैस्तुस्नाप्यमानेनसाध्वीमंत्रमुदीरयेत् भर्तुःपा
दौनमस्कृत्यमनसावाथवागिरा ८ आपोदेव्यऋषीणांहिविश्वधात्र्योदिव्यामदंत्यायाःशंकराधर्मधात्र्यः हिरण्यवर्णाःपावकाशिवतमे
नरसेनश्रेयसोमांजुषंतु ९ अपामेषस्मृतोमंत्रःसर्वत्रान्यत्रमेशृणु मंत्राःपुराणविहिताःस्त्रीणांसर्वांगशोभने १० शुभाव्रत्यागुणिनी
युक्तधर्माभर्त्रासाकंममदास्त्वावरेण माकर्मणामनसावापिवाचाभर्तुर्भवेयंरुषतीस्त्ववशंगा ११ सपत्नीनामधिनित्यंभवेयंसपुत्रास्यांसु
भगाचारुरूपा संपन्नहस्तागुणवादिनीचसर्वासनास्यामदरिद्राभवेयम् १२

दिव्यलोकावस्थानात् मदंत्योयज्ञेमदंतीसंज्ञाः शंकराःसुखक
राः यतोधर्मस्याधात्र्यः पोषकाः हिरण्यवर्णाः निर्मलाः पावकारसेननिजगुणंजुषंतुप्रीणयंतु ९ १० पौराणान्मंत्रानाह शुभेतिशुभाकल्याणकरीभर्तुर्भ
वेयमितिसर्वत्रसंबंधनीयं अव्यया अक्षीणाधनादिभिः यदाहयाज्ञवल्क्यःसंयतोपस्करा दक्षा हृष्टाव्ययपराङ्मुखीतिवरेणवरहेतोर्दास्यातुल्येतिनीचकर्मापिक १०४
र्तुंयोग्याभवेयंयथोक्तंकार्येषुदासीशयनेषुरंभेत्यादि अन्यत्रऋषतीक्रुद्धाभर्तुर्वशंगाभास्त्वंनभवेयं ११ अधिउपरिसंपन्नहस्ताअन्नदानादौमुक्तहस्ता १२ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मनोविरागः अन्योन्यमनुरक्तता १३ विश्वस्यरूपंस्वरूपंविश्वमित्यर्थः १४ भूमिरितिभूम्याद्यभिमानिन्योदेवताः व्रतंचनिश्चयंभक्तिंचस्मरेयुः १५ विधिर्विध्यर्हो
देहः यैरारब्धोभूतयुक्तैर्जरायुजादिसंबंधैः सत्वाद्यभिमानिदेवतैः सबीजैस्तत्प्राणिकर्मप्रयोजितैः १६ आत्मामनः १७ व्रतचर्यात्व्रतारंभात् प्रभृतिप्रत्यहमेवकार्य
मित्यर्थः १८ कर्तकर्तनादिनासंपाद्य सुभ्रेहेअरुंधति १९ २० २१ महातपेतपस्विनि २२ २३ सतिसंभवेहस्त्यश्वादीनां अवचयः समूहोदातव्यः अन्यथा-

पतिश्चमेस्यात्सुखोमत्सती क्षोनित्यंमङ्क्तः स्यान्मन्मतिर्मद्गतिश्च प्रीतिश्चनौस्यात्त्वक्रयाकानुरूपा मनोविरागोनभवेत्साधुवत्स्या
त् १३ लोकान्साध्वीनासुत्तमानांव्रजेयंयाभिः सर्वधार्यतेविश्वरूपम् उभेकुलेयाः पावयंतिपितुर्भर्तुश्चपतिभक्त्योर्जिताश्च १४ भूमिर्वा
युर्जलमाकाशमग्निरंतः क्षेत्रज्ञः प्रकृतिर्योमहांश्च अहंकारश्चममसाक्ष्येनियुक्ताः स्मरेयुर्निश्चयंचव्रतंच १५ यैरारब्धोदेहिनांभौतिको
यविधिः सत्वाद्यैर्भूतयुक्तैः सबीजैः सत्वेतेमेसाक्षिणः सर्वसंस्थाव्रतेचास्मिन्निश्चयेचापिनित्यं १६ चंद्रादित्यौपुण्यसाक्षीयमश्चदिशःस
र्वादशचात्माचमेयम् सत्वेतेवैसाक्षिणः सर्वसंस्थाव्रतेचास्मिन्निश्चयेचापिनित्ये १७ मंत्रैरेतैः पुराणोक्तैः सर्वद्रव्याभिमंत्रिणम् व्रतच
र्यात्प्रभृतिवैपुराणेसमुदाहृतम् १८ स्नात्वाथवाससीदद्याद्भर्तुः कर्त्यस्वयंशुभे अथात्मकर्तितंनस्याच्छुभेविघ्नेनकेनचित् १९ वासोन्य
देवदद्याच्चश्वेतसुरत्यनवसुभि स्वकर्तितंचसूत्रंतुवाससातेनमिश्रयेत् २० ततोद्विजंशुचिंदांतंज्ञानविज्ञानकोविदम् भोजयेच्चयथाशक्त्या
सहभर्त्रासुमध्यम २१ ब्राह्मणस्यापिदातव्यंवासोयुग्मंमहातपे शय्यासनंगृहंधान्यंदासंदासींतथैवच २२ अलंकारः शक्तितश्चरत्नप
र्वतएवच सर्वधान्यसमुन्मिश्रस्तिलैश्चसविशेषतः २३ धासोभिश्चप्रतिच्छन्नोनानावर्णैररुंधति हस्त्यश्वावचयश्चैवदेयागौरेवचध्रुव
म् २४ लवणप्रतिमांदद्यान्नवनीतस्यचापराम् गुडस्यमधुनश्चैवस्वर्णस्यचशोभनाम् २५ तथैवसर्वगंधानांरसानांपृथगेवच तथा
सुमनसांदद्याद्रूप्यस्योदुंबरस्यच २६ फलानांचैवसर्वेषांवाससामपिनंदिनि चित्रप्रतिकृतिंचैवकाष्ठस्यप्रतिमांतथा २७ शिलाप्रतिकृ
तिंचैवदध्नोथपयसस्तथा सर्पिषादूर्वयाचैवयाचान्यामप्यभीप्सति २८ कालदेशानुरूपंचदेयंविभवतःसती अल्पंवाबहुलंवापिभर्तु
श्छंदेनसर्वदा २९ तिलपात्रंप्रदातव्यंनदेयंनतुशोभने गौस्त्ववश्यंप्रदातव्याकपिलाकांस्यमेवच ३० कृष्णाजिनंचसुभगेसतिलंवाससा
न्वितम् आदर्शश्चैवकूर्चश्चतथाजिनमनिंदिते ३१ एतद्दत्त्वासर्वकामानाप्नोतिवरवर्णिनि पुरोधिकापुत्रवतीसुभगारूपभागिनी ३२

गौरेवदेयादेयैवेत्यन्वयः २४ प्रतिमांउमामहेश्वरयोः २५ २६ २७ शिलांशिलामयींप्रतिमांदध्यादिभिः पंचामृतस्नानादिनापूजयेदित्यर्थः २८ २९ नदेयंभर्तुःछंदे
नविना ३० कूर्चमयूरपुच्छमुष्टिः कुशमुष्टिरित्यासनमित्यर्थः अजिनं आसनार्थंकूर्चसाहचर्यात् कृष्णाजिनंतुप्रावरणार्थं ३१ पुरोधिका अग्रगण्या ३२ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५५ ५६ वार्ताकानिवृंताकानि ५७ मरणमल्पायुष्ट्वंपतिदेवतांपातिव्रत्यं ५८ अलाबुंतुंबीफलंउत्पादिकांउपोदकींपोईइतिप्रसिद्धाम् ५९ ६० प्रक्षालयाना
प्रक्षालयंती ६१ व्रतांतरमाह दिवेतिदिनैकभोजिनी ६२ सपत्न्यःसपत्नीः अधितिष्ठतिआक्रम्यतिष्ठति ६३ ६४ ६५ व्रतांतरमाहयातथेति ६६ ६७ ६८
६९ पावकंसगुडघृतंगोधूमान्नम् ७० व्रतांतरमाह अहस्येति ७१ ७२ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायाऊनाशीतितमः ७९ छ

एकभक्तेनधर्मज्ञेपुण्यकंकर्तुमर्हति ब्राह्मणायतथादेयंभर्तुश्चतदनंतरम् ५५ एवंसंवत्सरंकृत्वासुभगारूपशालिनी भवत्यवि-
धवाचैवस्त्रीधनस्यतथेश्वरी ५६ वार्ताकानिनखादेद्यास्त्रीपूर्णपरिवत्सरम् नसापुत्रविनाशंहिपश्यतीत्यवगम्यताम् ५७ शशकं
मृगमांसंवानित्यमेवविवर्जयेत् नाप्नोतिमरणंनारीप्राप्नोतिपतिदेवताम् ५८ अलाबुवर्जयेन्नारीतथैवोत्पादिकामपि अलाबुकांच
नींदद्याद्याभर्तुःसुखमिच्छति ५९ पूर्णेसंवत्सरेदद्यादेकैकंशाकमाहृता सदक्षिणंपुत्रवतीभवत्येकापुरोधिका ६० स्वयंप्रक्षालयाना
स्त्रीस्वपादावेवमादितः प्रतिष्ठांलभतेनित्यंसुहृद्गणनाधिगच्छति ६१ दिवायासूर्यपूतेनवर्तयेत्स्त्रीपतिव्रता एकंसंवत्सरंपूर्णंरात्रावन्नंविव-
र्जयेत् ६२ साजीवपुत्रासुभगाभवत्यमरवर्णिनि अधितिष्ठतिसर्वांश्चसपत्न्योनात्रसंशयः ६३ पूर्णेसंवत्सरेदद्यात्सौवर्णंसूर्यमुत्तमम् ब्रा
ह्मणायाभिरूपायदरिद्राययशस्विने ६४ फलानिवाथपुष्पाणिभक्ष्याण्यपिचसुव्रता दद्यादनस्तमितकेचरितव्रतकातथा ६५ यातथा
स्तमितेसूर्येभुंक्तेस्त्रीनियतासती चंद्रनक्षत्रपूतानिभोज्यानिवरवर्णिनि ६६ सादद्यात्कांचनंचंद्रंनक्षत्राणिग्रहानपि अभिरूपायवि-
प्रायवासश्चलवणान्वितम् ६७ चंद्रशीतलगात्रीसाभवत्यमरवर्णिनी सुभगादर्शनीयाचपुत्रवत्यपिभाविनी ६८ पौर्णमास्यांतुसततंप्राप्ते
सोमोदयेंगना अर्घंदद्यात्सुमनसांसाक्षतंसकुशंतथा ६९ पावकंचबलिंदद्याद्द्भाचसहस्रयुतम् एवंयाकुरुतेनित्यंसर्वान्कामानवाप्नुया
त् ७० अहस्थायातुनाश्नातिसूर्येनारीपतिव्रता दुर्दिनेवाथवाप्यभ्रेसेष्टान्कामानवाप्नुयात् ७१ कांचनंशक्तितोदद्यात्साविप्रायमनस्वि
नी सुभगादर्शनीयाचभवत्यमरवर्णिनी ७२ इतिश्रीमहाभारतेखि०हरिवंशेविष्णुप०पारिजातहरणेव्रतकथननामऊनाशीतितमो
ऽध्यायः ७९ भगवत्युवाच निर्वेष्टव्यंशरीरंयैर्व्रतकैःपुण्यकैरपि अरुंधतिप्रवक्ष्यामिसहैताभिर्वरेणतु १ कृष्णाष्टमींयाक्षिपति
स्याह्यामूलफलाशिनी ब्राह्मणायैकमशनंस्वदत्वाभर्तृदेवता २ शुक्लवस्त्राशुभाचारागुरुदैवतपूजका एवंसंवत्सरंकृत्वाततोदद्याद्द्विजा
तये ३ गोवालरज्जुसुकृतंचामरंचध्वजंतथा दक्षिणापूर्णमिष्टान्नंशक्त्यावापिशुचिव्रते ४ ऊर्मिवतःस्वरालाग्राःश्रोणिदेशावलंबिनः तस्या
भवंतिकेशास्तुभक्तिमत्याहिभर्तरि ५

निर्वेष्टव्यमिति परसुखप्राप्तियोग्यंकर्तव्यं १ क्षिपतिउपोषणेननयति २ ३ ४ स्वरालाग्राः सुतरांकुटिलाग्राः ५ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३३ ३४ ३५ ३६ एतद्व्रतकरः व्रतेनक्रियतइतिव्रतप्रसाद्यः प्रियार्थंपट्टमहिषीत्वार्थं ३७ ३८ व्रतकंव्रतोपकरणंद्रव्यंविभज्यदेयमित्यर्थः ३९ ४० ४१ अन्विष्यतीपुत्रकामनांकरकान्नासिकान्वितान् अल्पघटात्सपुत्रेतिविशेषणांतदर्थिनीभिर्देयान् ४२ दानकालमाह ज्येष्ठेतिपुरोक्तंगोशृंगेसेचनादि ४३ फाणितंशार्करोदकंपानकाख्यं ४४ सर्पिषइत्यादीनांपृथग्ग्रहणात् ४५ ४६ ४७ ४८ व्रतांतरमाह यज्ञेति ४९ आपत्याख्यानयोगेनयत्पूर्वंदानमुक्तंतत्पुत्रापत्य

सृष्टहस्ताधनाढ्याचस्त्रीभवत्यमलेक्षणा इच्छयालभतेचैवकन्यारूपगुणान्विताः ३३ भवंतिसुभगाश्चार्यास्तथैवचपुरोधिकाः पुत्रवत्योधनाढ्याश्चशीलवत्यश्चनित्यदा ३४ अरुंधतीकृतंह्येतन्मयैवप्रथमंयतः उमाव्रतकमित्येवख्यातमत्रमहीतले ३५ एतदेवोत्तमंस्त्रीणांव्रतंतस्मात्समाचरेत् सर्वकामानवाप्नोतिदत्त्वैवेतदनिंदिते ३६ एतद्व्रतकरोह्येवदेवदेवोवृषध्वजः पुराभिषिक्तवान्सोम्यैप्रियार्थंमसर्वकृत् ३७ व्रतकस्यावसानेथदेयंभोज्यंचनित्यदा स्त्रीणांकामाःप्रदेयाश्चसदृशाःकालदेशयोः ३८ एकैकस्यप्रदातव्यंव्रतकंवरवर्णिनि छंदतोब्राह्मणानांतुदेयमन्नंसदक्षिणम् ३९ पायसंतत्प्रदातव्यंव्रतकेनान्यदिष्यते नात्रप्राणिवधःकार्यःपुराणेनियताश्रुतिः ४० अथद्वितीयंवक्ष्यामिव्रतंसोमसमुद्भवे महादेवप्रसादेनहृ ष्टवत्यस्मियच्छुभे ४१ सर्वाःपुत्रफलानार्यःसद्भिरेतदुदाहृतम् तस्मादन्विष्यतीदद्यात्सपुत्रकरकान्शुभे ४२ ज्येष्ठाषाढौसुभौमासौपुरोक्तंविधिमाचरेत् अथवाज्येष्ठमेवैकमाषाढंवासमाचरेत् ४३ ततोमासद्वयेपूर्णेमासेवावरवर्णिनि सपुत्रकरकानदद्यात्फाणितप्रतिपूरितान् ४४ सर्पिषःपयसश्चैवदध्नोथमधुनोनघे जलस्यचतथादद्यात्पूरयित्वाशशिप्रभे ४५ एकस्मैज्ञानवृद्धायसुव्रतायजितात्मने सपुत्रकरकान्दद्याद्यावतोमनसःप्रियाः ४६ इच्छेतस्त्रीदुहितस्त्रीणांकामकरंततः किंचित्द्रव्यंसुताकामात्सुतांप्राप्नोत्यसंशयः ४७ गौर्वाथकांचनंवापिदक्षिणाचैवशस्यते विप्रस्याच्छादनंदेयमवश्यंतुशुचिस्मिते ४८ यज्ञोपवीतंव्रतकेदद्यान्नारीशुचिव्रता सुपुत्रकरकाणांतुविधिरुक्तोविपश्चिता ४९ अपत्याख्यानयोगेनब्राह्मणेभ्यःशुचिव्रताः संवत्सरंसुसंपूर्णंव्रतधर्मानुपालिनी ५० करकानपिदद्याच्चपूर्णेसंवत्सरेशुभे अनुज्ञयासदाभर्तुःसत्यवादिन्यरुंधति ५१ सुवर्णसूत्रविप्रायकौसुद्यादातुमर्हति यज्ञोपवीतंविसृज्यव्रतसंस्थाप्यकामिकम् ५२ यज्ञोपवीतंकरकंदक्षिणांचस्वशक्तितः प्रयच्छतीसतीस्त्रीभ्यःसर्वान्कामान्समश्नुते ५३ नचनभक्षयेत्किंचिन्नारीधान्यमथोफलम् पुष्पाणिनोपयुंजीतयावदेवसमाचरेत् ५४

कामापुंनक्षत्रस्यपुष्यादेर्योगेनदद्यात् एवंकन्याकामास्त्रीनक्षत्रैरोहिण्यादेर्योगेकरकादिदद्यात् ५० ५१ कौसुद्यांकार्तिक्यांपौर्णमास्यांसंस्थाप्यसमाप्य ५२ ५३ नारीधान्यंद्विदलंतथाफलंचद्विदलमेवेत्यर्थः ५४ छ छ छ १०५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३१ ३२ शांतोदरत्वं कृशोदरत्वम् ३३ ३४ ३५ ३६ ३७ प्रजापतेश्चतुर्वक्त्रस्य मुखाकारं राशीश्चतुर्दिक्कमुखाकारं कृत्वेत्यर्थः ३८ तदाकारस्य प्रजाप
तिमुखाकारस्य सदृशाकारं ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० माश्वतिलन्वयः ५१ पर्यश्ना

संवत्सरे ततः पूर्णे दद्याद्बिल्वे कांचने शुभे सदक्षिणे ब्राह्मणाय प्रयच्छति धृतात्मने ३१ सौभाग्यं परमाप्नोति बहुपुत्रा सदैव च सदोन्न
तौ स्तनौ सा स्त्री बिभर्त्यमरवर्णिनि ३२ शांतोदरत्वमिच्छंती क्षिपेदेकान्तभोजनी पंचम्यां तत्र भोक्तव्यमन्नं तोयेन नित्यदा ३३ ततः
संवत्सरे पूर्णे दद्यात्कृत्स्नां तिलतां शुभे कुड्ये सदक्षिणां धन्ये ब्राह्मणाय धृतात्मने ३४ इच्छंती या नारी सूक्ष्मगुल्फौ कमध्यमे द्वादशीं
सा क्षिपत्येव शाकैः सर्वैरनिंदितैः ३५ संवत्सरे ततः प्राप्ते रौक्मे पद्मे द्विदातु सा ब्राह्मणायाभिरूपाय तथा पद्मद्वयं शुभे ३६ श्रोणी विशाला
मन्विच्छेत्स्त्री क्षिपल्लवस्फुरते त्रयोदशीमेकभक्तं समाप्नोत्येवमयान्वितम् ३७ ततः संवत्सरे पूर्णे लवणं संप्रयच्छतु प्रजापतिमुखाकारं कृत्वा
तन्वरानने ३८ कांचनं चैव दातव्यं तदाकारस्य सर्वदा अंजनेन च धर्मज्ञा शनकैरवचूर्णयेत् ३९ रत्नानि चैव पूर्णानि वासोरक्तं च दापयेत्
तेन श्रोणीमभिमतां स्त्री सौम्य प्रतिपद्यते ४० मधुरं वाचमिच्छंती वर्ज्ययेल्लवणं सती संवत्सरं वा मासं वा प्रयच्छेल्लवणं ततः ४१ सदक्षिणं
ब्राह्मणाय परं प्रासुर्यमिच्छती शुकवाक्यात्तद्गुणं भवत्यमरवर्णिनि ४२ गूढगुल्फशिरोपादाविच्छंत्या सोमनंदिनि षष्ठ्यां चैवावरो
रोहे भोक्तव्यं सालिजौदनम् ४३ अग्निर्वा ब्राह्मणो वापि न स्पृष्टव्यः पदा सदा यदा पदा स्पृशेत्तच्च वदेत्तत्तपसान्विते ४४ पादेन चैव पादौ
तु प्रक्षालयितुमर्हति एतैर्नित्यव्रतैर्युक्ता धर्मज्ञा पतिदेवता ४५ कूर्मौ रूप्यमयौ दद्यात् ब्राह्मणाय पतिव्रते तौ चरायु ब्राह्मणाय स्था
पयित्वा घृतेन घे ४६ पद्मेचाधो सुरवं कृत्वा दद्याद्विप्राय नंदिनि रक्ते द्वे स्त्री मिश्रसिला कांचनेनाप्यलंकृतौ ४७ सर्वमेव तु या गात्रमि
च्छत्यतिमनोहरम् चिरात्रपुष्पकाले सा करोतु पतिदेवता ४८ कौसुंभ्यामथ वा षष्ठ्यां साध्या चाप्युजेत्तथा मातरं पितरं चैव मन्यते
तिथिदैवतम् ४९ घृतं च नित्यं विप्रेभ्यो ददातु लवणं तथा संमार्जनं गृहे चैव करोतु पतिदेवता ५० उपलेपनं च धर्मज्ञे बलिकर्म च मानि
नि वाग्दुष्टा चैव मासु फले भवत्यात्मार्थपंडिता ५१ पर्यश्नातु च सा किंचिद् पिदा सयशास्विनी बलिं सृजल्लतथ्यं च परित्यजतु भामिनि
५२ इति श्रीमहा॰ खि॰ ह॰ विष्णुपर्वणि पारिजातहरणे व्रतकविधाने अशीतितमोऽध्यायः ८० उमोवाच बांधवान्सगुणानि
च्छेदेकभक्तेन नित्यदा सप्तमीं सप्तमीं नित्यं क्षपेत्स्त्री पतिदेवता १ ततः संवत्सरे पूर्णे वृक्षं दद्याद्धिरण्मयम् सदक्षिणं ब्राह्मणाय शुभ
बंधुमती भवेत् २

तु अतथ्यमनृतं ५२ इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि टीकायां अशीतितमोऽध्यायः ८० ७ बांधवानिति १ २ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

धाञ्या आमलक्या बिल्वेन श्रीफलेन समं कृत्वा तेन शिरः प्रक्षालयेत् ६ ७ ८ ९ पयसा सहाश्नीयात् दोदनं पटं रूप्याभिः शिरोदेशे बंधनीयं रूप्यमयं स्वर्णमयम् १० ११ १२ माषाणां कृवर्ण माषाणाम् १३ १४ १५ तिलगुल्मं तिलस्तोमं अनंतरे स्यव्यवहितपूर्वदिने उपोष्य इत्यर्थः एवं यावद्वान्योत्पत्तिकर्तव्यम् १६ १७

शिरोनिर्वृष्टुकामातु गोमयेन शिरः सती प्रक्षालयेन्मलं धाञ्या बिल्वेन श्रीफलेन च ६ गोमूत्रं च सदा प्राश्य येच्छिरः स्नानं च मिश्रयेत् कृ
ष्णा च तुर्दशी लिंतत्कर्तव्यं वरवर्णिनि ७ भवत्य विधवा चैव सुभगा विज्वरा तथा शिरोरोगै न वैचास्याः शरीरमभितप्यते ८ दर्शनीयं
ललाटं याकांक्षति स्त्री सुचिस्मिते तिथिं प्रतिपदं नित्यं सा क्षिपेदेकभोजना ९ पयसा च तथाश्नीयाद्यावत्संवत्सरोगतः ब्राह्मणस्य त
तो दद्यात् पटं रूप्यमयं शुभम् १० ललाटरूपसंपन्नमाप्नोति स्त्री सुमध्यमा सततं स्त्री द्वितीयायां भ्रुवोरिच्छेत्सुरूपताम् ११ अनंतरो
पवासेन शाकभक्ताशना सती ततः संवत्सरे पूर्णे ब्राह्मणस्वस्ति वाचयेत् १२ फलैः परिणतैः सौम्य माषाणां दक्षिणान्वितैः लवणेन च सं
कृते घृतपात्रेण चानघे १३ आत्मनः शोभनौ कर्णाविच्छती स्त्री सुमध्यमा नक्षत्रे श्रवणे प्राप्ते ध्रुवं भुंजीत पायसम् १४ ततः संवत्सरे पूर्णे
कर्णौ दद्याद्धिरण्मयौ घृतं प्रक्षिप्य विप्राय पयसा सहितं शुभे १५ नासामिच्छेत्स्वललाटातामव्यंगां व्याधिवर्जिताम् तिलगुल्मं सदा सिंच्ये
द्यावत्पुष्पैर्हिरक्षितः १६ अनंतरोपवासेन सक्तव्यः सलिलैः सदा तस्माद्धाप्य पुष्पाणि घृते प्रक्षिप्य दापयेत् १७ स्वक्षी भवेयमितिया
स्त्री कांक्षत्यमृतोद्भवे अनंतरं वै भुंजाना पयसा थ घृतेन वा १८ ततः संवत्सरे पूर्णे पद्मपत्राणि पंडिता तथैवोत्पलपत्राणि न्यसेत्स्त्री रे सुचि
स्मिते १९ प्लवमानानि विप्राय ततो दद्यात्सती सति कृष्णासारसमानाक्षी तद्दत्त्वा भवति स्पवे २० इच्छेदोष्ठौ चारुरूपौ या स्त्री धर्मगुणा-
न्विता साम्नृम्नयेन तु पिबेदुदकं वत्सरं सती २१ अयाचितेन भुंजीत न वस्या धर्मभागिनी ततः संवत्सरे पूर्णे विद्रुमं दातुमर्हति २२ तेन बिंब
फलाभौष्ठी स्त्री भवत्येव शोभने सुभगा यवपुः पुत्रधनाढ्या गोमती तथा २३ या चारुरूपानिच्छेत दंतान्मरवर्णिनि शुक्लाष्टम्यां न साश्नी
याद्भक्तद्वयम निंदिता २४ ततः संवत्सरे पूर्णे दद्याद्रौप्यमयान्सती दंतान्प्रक्षिप्य धर्मज्ञे पयस्यतिगुणोदिते २५ तेन सा जातिपुष्पाभान्दंता
न्प्राप्नोति सा सती सौभाग्यमपि चाप्नोति सपुत्रत्वं तथानघे २६ सर्वमेव सुखं कांतमिच्छेद्या रुचिरानने सा पूर्णमास्यां स्नात्वा तु प्राप्य चंद्रो
दये शुभे २७ यावकं पयसा सिद्धं दत्त्वा विप्राय भामिनी ततः संवत्सरे पूर्णे चंद्रं रूप्यमयं शुभम् २८ पद्मे फुल्ले तु विन्यस्य ब्राह्मणानृ स्वस्ति
वाचयेत् पूर्णचंद्रमुखी तेन दानेन स्त्री शुभा भवेत् २९ स्तनाविच्छति या नारी तृणराजफलोपमौ अयाचितं दशम्यां सा नित्यमश्नीत वाग्य
ता ३०

१८ १९ २० २१ २२ २३ भक्तद्वयमपि नाश्नीयादुपवसेदित्यर्थः २४ २५ २६ २७ २८ २९ तृणराजस्तालः ३० छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३ ४ व्यशनाअन्नवर्जितासौम्येबुधवासरे ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० सुक्तैःउचितसाधनैः २१ २२ २३

करंजेदीपकंदद्यात्सदायाप्रमदावरे पूर्णेसंवत्सरेदद्यात्सौवर्णदीपकंततः ३ रूपयासास्त्रीभवेद्भर्तुरिष्टाशुभवतीतथा सपत्नीना मधितथादीपवज्ज्वलतेशुभे ४ याशेषभोजनीनित्यंनवचस्यादरुचुदा नचस्यादभ्यशनासौम्येनित्यंचपतिदेवता ५ शौचान्विताच सततंनचरूक्षाभिभाषिणी श्वश्रूश्वशुरयोर्नित्यंशुश्रूषाभिरतासती ६ कितस्याव्रतकैःकार्यंकिंवास्याउपवासकैः याभर्तृदेवतानि त्यंसत्यधर्मगुणान्विता ७ विधवास्त्रीतुयाहिस्याद्दैवयोगात्सतीसति तस्यावक्ष्यामियोधर्मःपुराणोक्तःक्रमध्यमे ८ पतिसंकल्पयित्वा सानित्यंस्थवाथमृन्मयम् तस्यपूजासदाकुर्यात्सतांधर्ममनुस्मरन् ९ ततएवाभ्यनुज्ञासानित्यंयाचेतसुव्रता व्रतकेचोपवासेच भोजने चविशेषतः १० भर्तृलोकान्व्रजत्येवनचेद्युच्चरतेपतिम् शांडिलीसूर्यवृद्धातिसततंपतिदेवता ११ अद्यप्रभृतिसर्वेषांदेवानांचयथावि तः दृक्ष्यंतिपुण्यकंविधिंपौराणायुःसनातनः १२ मुनिश्चनारदःकृत्स्नंपौराणंज्ञास्यतेविधिम् उपवासस्यधर्मांश्चव्रतकानांतथैवच १३ अदितिस्तपसेंद्राणीत्वंचसोमसुतावरे प्रवर्तनेपुण्यकानांव्रतकानांचसर्वदा १४ कीर्तनीयाःसतीनांहिभविष्यथगुणान्विताः उपवा सव्रतविधियथावदिहकृत्स्नशः १५ प्रादुर्भावेषुसर्वेषुभार्याविष्णोर्महात्मनः ज्ञास्यंतिपुण्यकंविधिंनित्यमेवसनातनम् १६ सविशेषंच धर्माणांस्त्रीधर्मेषुप्रशस्यते पतिभक्तिरदुष्टत्वमवाग्दुष्टत्वमेवच १७ नारदउवाच एवमुक्तास्ततःसाध्व्योमहादेव्यातपोध नाः जग्मुर्हृष्टामहादेवींप्रणिपत्यहरप्रियाम् १८ अदितिर्व्रतकंचक्रेशृणुयन्द्ब्रह्मचारिणी उमाव्रतविधिःसर्वःपूर्वोद्दिष्टस्तयाकृतः १९ पारिजातेनिबध्याथसमदत्तस्तुकश्यपः अदितिव्रतकंनामतद्वृत्तंसत्यभामया २० तदेवव्रतकंदत्त्वासावित्र्याधर्मनित्यया तैरेवयुक्तैःसं युक्तःमिदंत्वभ्यधिकंकृतम् २१ संध्याकालेतुसंप्राप्तेस्थानेस्थानेतथैवच पूजनंवानमस्कारोजपश्चद्विगुणःस्मृतः २२ सावित्रीव्रतकं कृत्वातथादित्याव्रतंसती भर्तुःकुलंपितृकुलमात्मानंचैवतारयेत् २३ इंद्राणीव्रतकंचक्रेतदेवोमयथाविधि रक्तमभ्यधिकंवासो भोजनंचैवसामिषम् २४ चतुर्थेदिवसेवापिपुण्यकार्थंविधिःपुनः अहोरात्रोपवासश्चदेयंकुंभशतंतथा २५ गंगयाव्रतकंदत्तंतदे वौसंयशस्करि स्नानमभ्यधिकंत्वत्रप्रत्यूषस्यात्मनोजले २६ अन्यस्मिन्वाजलेमाघशुक्लपक्षेहरिप्रिये एतद्गंगाव्रतंनामसर्वकामप्र दंस्मृतम् २७ सप्तसप्तचसप्ताथकुलानिहरिवल्लभे स्त्रीतारयतिधर्मज्ञागंगाव्रतकचारिणी २८ देयंकुंभसहस्रंतुगंगायाव्रतकेशुभे तारणंपारणंचैवतद्व्रतंसार्वकामिकम् २९

२४ २५ आत्मनोगंगायाःजलेस्वयमाहृतेस्वयमुपगतेवा २६ २७ २८ तारणंदुःखानांपारणंमनोरथानाम् २९ छ॰

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यामरथंनामतः आकाशेअनाच्छादितेदेशे ३० ३१ धारयेधारयंती ३२ ३३ मृष्टहस्ताविशुद्धकरा ३४ मधुनामधुरसेन ३५ ३६ तपसाअत्तपोबलेना
तींद्रियमपिपुण्यफलंद्रक्ष्यथ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ इतिश्रीमहाभारतेखि० हरिवंशेविष्णुप० टीकायांपारिजातहरणेए

यमभार्याचकाराथव्रतंयामरथंशुभम् हेमंतेतत्तुकर्त्तव्यमाकाशेहरिवल्लभे ३० इमानिचैववाक्यानिब्रूयादाकाशमास्थिता स्ना
त्वाशुचिसमाचारानमस्कृत्यपतिंशुभे ३१ वरास्म्यहंयामरथेहिमंपृष्ठेनधारये पतिव्रताजीवपुत्राभवेयन्नपुरोधिका ३२ सपत्नीरधि
तिष्ठेयंपश्येयंचैवमायमम् सभर्तृपुत्राजीवेयंचिरंचस्फुरवमेवच ३३ पतिलोकंचगच्छेयंभवेयनंदिनीतथा स्नचैलामृष्टहस्ताचस्व
जनेष्टागुणान्विता ३४ एवंकृत्वाततोधिप्रंमधुनास्वस्तिवाचयेत् तिलैरपितथाकृष्णैःपायसेनतुभोजयेत् ३५ एवंव्रतानिदेवीभिःकृ
तान्यमरवर्णिनि महादेव्यापुरोक्तानिरुद्रपत्न्याहरिप्रिये ३६ अहंब्रवीमितपसामदीयेनसमन्विताः सर्वाद्रक्ष्यथपुण्यानिव्रतकानित
थैवच ३७ पौराणान्युमयादेव्यायानिदृष्टानिवैपुरा कल्याणगुणयुक्तानिपावनानिशुभानिच ३८ वैशंपायनउवाच रुक्मिणी
व्रतकंचक्रेदृष्ट्वाव्रतकविस्तरम् उमायावरदानेनदृष्ट्वादिव्येनचक्षुषा ३९ उमाव्रतेषुसर्वेषुवृषदानंतथाधिकम् रत्नमुक्ताप्रदानंचतथा
न्नंसार्वकामिकम् ४० तथाजांबवतीचक्रेपुरोमाव्रतकंयथा ददावभ्यधिकंसातुरत्नवृक्षमनोहरम् ४१ सत्याददौतथैवाथपुरोमाव्र
तकंयथा पीतमभ्यधिकंवासस्तयादत्तमुमाव्रते ४२ रोहिण्याथचफल्गुन्यामघयाचपुरातने व्रतानिखलुदत्तानिबहूनिकुलनंदने
४३ ददौशतभिषाचैवव्रतकंपुण्यलक्षणम् येननक्षत्रमुख्यत्वंजगामकुरुनंदन ४४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुप०
पारिजातहरणेउमाव्रतकथनसमाप्तिः पारिजातकथनसमाप्तिर्नामचएकाशीतितमोऽध्यायः ८१ जनमेजयउवाच वैशंपायन
धर्मज्ञव्यासशिष्यतपोधन पारिजातस्यहरणेषट्पुरंपरिकीर्तितम् १ निवासोऽसुरमुख्यानांदारुणानांतपोधन तेषांवधंमुनिश्रेष्ठकीर्त
यस्वाधकस्यच २ वैशंपायनउवाच त्रिपुरेनिहतेवीरेरुद्रेणाक्लिष्टकर्मणा तत्रप्रधानावहवोबभूवुरसुरोत्तमाः ३ शराग्निना
नदग्धास्तेरुद्रेणत्रिपुरालयाः षष्टिःशतसहस्राणिनन्यूनान्यधिकानिच ४ तेज्ञातिवधसंतप्ताश्चक्रुर्वीराःपुरातपः जंबूमार्गेसतामिष्टेम
हर्षिगणसेविते ५ आदित्याभिमुखावीराःसहस्राणांशतंसमाः वायुभक्षान्नृपश्रेष्ठस्कंदतःपद्मसंभवम् ६ तेषामुदुंबरराजन्नग्रणएकः
संभावितः वृक्षंतत्रावसन्वीरास्तेकुर्वंतोमहत्तपः ७ कपित्थवृक्षमाश्रित्यकेचित्तत्रोषिवाःपुरा मृगालवादीस्त्वपरेचेरुरुग्रंतपस्तपः ८

काशीतितमोऽध्यायः ८१ समासंचेदंहरिवंशस्यपूर्वार्द्धं अथउत्तरार्धं अथउत्तरार्द्धेकथानिरूप्यते वैशंपायनोक्ति १ २ ३ ४ ५ ६ ७ मृगालोपिवृक्षविशेषःसाहचर्यात् ८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

९ १० तेनअस्कराः नेषुः नांगीकृतवंतः ११ १२ १३ उपचितिंरुद्रद्रोहेण आनृण्यं १३ असूयपानिर्जित्वा १४ नेषुः ब्रह्मोक्तं भव्यभावनाः दीर्घंद
र्शिनाः भवमहिमाभिज्ञावा १५ रुद्रक्रोधं रुद्रक्रोधनं कृतेविना १६ १७ १८ १९ २० २१ २२ भाव्यभावनाइतियदुक्तंतदेवस्पष्टयन्निर्देप- अ॰ प॰ ८२ २

वटमूलेतथान्येरुक्तपः कौरवनंदन अधीयंतोपरेब्रह्मवटंगत्वास्कराःप्रजाः ९ तेषांतु स्रष्टाप्रजाकर्तानरद्देवपितामहः वरंदातुंसुरश्रे
ष्ठः प्रासोधर्मभृतांवरः १० वरंवरयतेत्युक्तास्तेराजन्ब्रह्मयोनिना नेषुस्तद्वरदानंतुहृष्टमनसोब्रवन्विभुम् ११ इच्छंतोपचितिंगतुंजा
नीनांकुरुनंदन तानुवाचततोब्रह्मासर्वज्ञःकुरुनंदन १२ विश्वस्यजगतः कर्तुःसंहर्तुश्चमहात्मनः कःशक्तोपचितिंगंतुमस्तुवोऽस्यु
धाश्रमः १३ अनादिमध्यनिधनःसोमोदेवोमहेश्वरः तमस्तूयसुरवस्थंगेवस्कसिच्छंतियेस्कराः १४ तेनेषुस्तान्केचित्तुदुरात्मानोमहा
स्कराः अथेषुरपरेराजन्नस्कराभव्यभावनाः १५ नेषुर्येषुदुरात्मानस्तानुवाचपितामहः वरयध्वंवरंवीरारुद्रक्रोधाःसुरा सुराः १६ तऊ
चुः सर्वदेवानामवध्यास्यामहेविभो पुराणिसद्वचनोदेव भवत्वतमहीतले १७ सर्वकामसमृद्धार्थमद्रपुरंचास्तुनःप्रभो वयंचषद्पुरं
गत्वावसेमचसुखंविभो १८ रुद्रादुग्रंभयंनस्याद्येननोज्ञातमोहताः निहतंत्रिपुरंदृष्ट्वाभीतास्तपसानिधे १९ पितामहउ
असुराभवतावध्यादेवानांशंकरस्यच नबाधिष्यथनेदिगान्सत्पथस्थान्सतांप्रियान् २० विप्रोपघातंमोहान्वैकरिष्यथकथंचन भ
शयास्यथविप्राहिजगतः परमागतिः २१ नारायणाद्धिभेतव्यंकुर्वद्भिर्ब्राह्मणाहितम् सर्वभूतेषुभगवान्महितेधत्तेजनार्दनः २२ तेगता
असुराराजन्ब्राह्मणायेविसर्जिताः येपिभक्तामहादेवमस्कराधर्मचारिणः २३ स्वयंहिदर्शनंतेषांददौत्रिपुरनाशनः श्वेतवृषभमा
रुह्यसोमःसप्रवरःप्रभुः उवाचेदंचभगवानस्करान्प्रसतांगतिम् २४ वैरमुत्सृज्यदत्तंचहिंसांचास्करसत्तमाः मामेवचाश्रितास्तस्मा
द्वरंसाधुददामिवः २५ येद्वीक्षिताःस्थमुनिभिःसत्क्रियापरमैर्द्विजैः सहतेगंस्यतास्वर्गंप्रीतोहंवःस्वकर्मणा २६ इहयेचैववत्स्यंति
तापसाब्रह्मवादिनः अपिकापित्थिकास्तेतेपालोकायथासम २७ इहमासांतपक्षांतोयःकरिष्यतिमानवः दानमस्येनविधिनाद्
द्विगुणंतद्भविष्यति नविदेशेनभद्रंवोवरमेतद्ददाम्यहम् ३० श्वेतवाहननामानंयश्चमांपूजयिष्यति सर्वतोभयचित्तोपिगतिंसम
प्स्यास्यति ३१ औदुंबरान्वाटमूलांश्चद्विजान्कापित्थकानपि तथासृगालवाटीयान्धर्मात्मानोहदध्मतान् ३२

भक्ताइति अपिशब्दस्तुशब्दार्थे
२३ २४ २५ २६ कापित्थिका कपित्थंतस्मरक्षे २७ मासांतपक्षांतौ अमापूर्णिमे २८ २९ नचविदेशेविदूरेदेशेवानिवसतः ३० ३१ औदुंबरानित्यादितत्तत्स्थानंनिवा १०८
सिनांजाः धर्मात्मनः ३२

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३३ तैरसुरैः ३४ ३५ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांद्व्यशीतितमोऽध्यायः ८२ एतस्मिन्निति १ ब्रह्मदत्तेत्यत्रसंधिरार्षः कृ
तःकारितःसंपादितइत्यर्थः २ ३ क्षीरहोताऽध्वर्युः ४ ५ उपासंतिसेवंते ६ ७ ददौसमागतेभ्यः ८ ९ १० ११ १२ पुराणशब्देनात्रवेदोभिधीय

मुनींश्चब्रह्मवादीयान्सविशेषेणयेनराः पूजयिष्यंतिसततंतेयास्यंतीप्सितांगतिम् ३३ इत्युक्त्वाथमहादेवोभगवान्श्वेतवाहनः
तैरेवसहितःसर्वैरुद्रलोकंजगामवै ३४ जंबूमार्गंगमिष्यामिजंबूमार्गेवसाम्यहम् एवंसंकल्पमानोपिरुद्रलोकेमहीयते ३५ इतिश्री
महाभारतेखिलेषुहरिवंशेविष्णुपर्वणिषट्पुरवधेद्व्यशीतितमोऽध्यायः ८२ ॥ वैशंपायनउवाच एतस्मिन्नेवकालेतुचतुर्वे
दषडंगवित् ब्राह्मणोयाज्ञवल्क्यस्यशिष्योधर्मगुणान्वितः १ ब्रह्मदत्तेतिविख्यातोविप्रोवाजसनेयिवान् अश्वमेधःकृतस्तेनवसुदे
वस्यधीमतः २ ससंवत्सरदीक्षायांदीक्षितःषट्पुरालयः आवर्तायाःशुभेतीरेरुनद्यांसुनिर्जुष्टया ३ सखाचवसुदेवस्यसहाध्यायी-
द्विजोत्तमः उपाध्यायश्चकौरव्यक्षीरहोतामहात्मनः ४ वसुदेवस्तत्रयातोदेवक्यासहितःप्रभो यजमानषट्पुरस्थंयथाशक्रोबृहस्पति
म् ५ तस्मिंस्तंब्रह्मदत्तस्यवह्न्यन्नंबहुदक्षिणम् उपासंतिमुनिश्रेष्ठामहात्मानोदृढव्रताः ६ व्यासोहंयाज्ञवल्क्यश्चसुमंतुर्जैमिनिस्तथा
धृतिमान्जाबालिश्चैवदेवलाद्याश्चभारत ७ रुक्मिण्यानुरूपयायुक्तोवसुदेवस्यधीमतः यत्रेप्सितान्ददौकामान्देवकीधर्मचारिणी ८
वासुदेवप्रभावेनजगत्प्रभुर्महीतले तस्मिन्सत्रेवर्तमानेदैत्याःषट्पुरवासिनः ९ निकुंभाद्याःसमागम्यतमूचुर्वरदर्पिताः कार्यतायज्ञ
भागोनःसोमंयास्यामहेवयम् कन्याश्चब्रह्मदत्तोनोयजमानःप्रयच्छतु १० वध्याःसंत्यस्यकन्याश्चरूपवत्योमहात्मनः आहूयताःप्रदात
व्याःसर्वथैवाहिनःश्रुतम् ११ रत्नानिचब्रह्मदत्तोविशिष्टानिददातुनः अन्यथातुनयष्टव्यंवयमाज्ञापयामहे १२ एतच्छ्रुत्वाब्रह्मदत्तस्ता
नुवाचमहासुरान् यज्ञभागोनविहितःपुराणेसुरसत्तमाः १३ कथंसत्रेसोमपानंशक्यंदातुंमयाहिवः पृच्छतेहमुनिश्रेष्ठान्वेदभाष्यार्थ
कोविदान् १४ कन्याहिममयादेयास्ताश्चसंकल्पितामया अतोवेद्याप्रदातव्याःसदृशानामसंशयम् १५ रत्नानितुप्रयच्छामिसान्त्वेना
हंविचिन्त्यताम् बलान्नैवप्रदास्यामिदेवकीपुत्रमाश्रितः १६ निकुंभाद्यास्ततःकुपिताःपापाःषट्पुरवासिनः यज्ञवाटंविलुलुपुर्जह्रुःकन्या
श्चतास्तथा १७ तदृष्ट्वासंप्रवृत्तान्तुदध्यावानकदुंदुभिः वासुदेवंमहात्मानंबलभद्रंगदंतथा १८ विदितार्थस्ततःकृष्णःप्रद्युम्नमिद
मब्रवीत् गच्छकन्यापरित्राणंकुरुपुत्रासुमायया १९ यावद्यादवसैन्येनषट्पुरंयाम्यहंप्रभो सयथोषट्पुरवीरःपितुराज्ञाकरस्तदा २०

यतेतस्मिन् १३ १४ १५ १६ १७ तत्रयज्ञवाटलुंठनं १८ १९ प्रभोइतिसंबोधयन् कन्यागोप्तृत्वंसंभावयति २० ॥ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ तंस्कंधावारंदत्तगुल्मप्रतिसरंदत्तैर्रक्षार्थंस्थापितैर्गुल्मैर्नप्रतिसरःअनिष्टमार्गोयस्मिंस्तंअ-
टनेरक्षार्थंपरिक्रमणे ५६ इतिश्रीम०खि०ह०विष्णुपर्वणिटीकायांत्र्यशीतितमोऽध्यायः ८३ मुहूर्तेति १ २ तृतीयाषष्ठ्यर्थे ३ वियतिउपरिभागे ४ ५ ६

तुष्टैस्तैरसुराःस्वक्ताराजन्भूमिपसत्तमैः सर्वकामसमृद्धार्थैर्भवद्भिःखगमैःस्वयम् ४७ अर्चितास्मयथान्यायंक्षत्रंकिंवःप्रयच्छतु क्ष
त्रेचार्चितपूर्वाहिदिव्यैर्वीरैर्भवद्विधैः ४८ निकुंभोयाब्रवीद्धृष्टःक्षत्रक्रूररिपुस्तदा अनुवर्णयित्वाक्षत्रस्यमाहात्म्यसत्यमेवच ४९ युद्धंनो
रिपुभिःसार्द्धंभविष्यतिनृपोत्तमाः साहाय्यंदत्तमिच्छामोभवद्भिस्तत्रसर्वथा ५० एवमस्त्वितितान्नूचुःक्षत्रियाःक्षीणकिल्बिषाः पांडवे-
यान्नृतेवीरान्श्रुतार्थान्नारदाद्विभो ५१ क्षत्रियाःसन्निविष्टास्तेयुद्धार्थंकुरुनंदन पल्यस्कौब्रह्मदत्तस्ययज्ञवाटंगताअपि ५२ कृष्णोपि-
सेनयासार्द्धंप्रययौषट्पुरंविभुःमहादेवस्यवचनमुद्वहन्मनसानृप ५३ स्थापयित्वाद्वारवत्यामाहुकंपार्थिवंतदा सतयासेनयासार्द्धंपौरा
णांहितकाम्यया ५४ यज्ञवाटस्याविदूरेदेवोनिविविशेविभुः देशेप्रवरकल्याणेवसुदेवप्रचोदितः ५५ दत्तगुल्मप्रतिसरःकृत्वातंविधि
वत्प्रभुः प्रद्युम्नमटनेश्रीमान्रक्षार्थंविनियुज्यच ५६ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिषट्पुरवधेकृष्णस्यषट्पुर
गमनेत्र्यशीतितमोऽध्यायः ८३ वैशंपायनउवाच मुहूर्ताभ्युदितेसूर्येजनेचक्षपिनिर्मले बलःकृष्णःसात्यकिश्चताक्ष्यमारु
रुहुस्तदा १ बद्धगोधांगुलित्राणादर्शितासुरकांक्षिणः विल्वोदकेश्वरंदेवंनमस्कृत्यस्मरोत्तमम् २ आवर्तायाजलेस्नात्वारुद्रेणवरद
त्तया गंगायाःकुरुशार्दूलरुद्रवाक्येनपुण्यया ३ प्रद्युम्नमग्रेसैन्यस्यवियतिस्थाप्यसानदः रक्षार्थंयज्ञवाटस्यपांडवान्विनियुज्यच ४
शेषासेनांगुहाद्वारिभगवान्विनियुज्यच जपंतमग्र्यसस्मारप्रवरंचसतांगतिः ५ तावापेततुरेवाथस्वयंचापश्यतांतथा वियत्येवनियुक्तौ
तौप्रद्युम्नइवभारत ६ ततःकृष्णस्यवचनादाहतोरणदुंदुभिः जलजाश्चमुरजाश्चैववाद्यान्येवापराणिच ७ मकरोरचितोव्यूहःसांबेन
चगदेनच सारणश्चोद्धवश्चैवभोजोवैतरणस्तथा ८ अनाधृष्टिश्चधर्मात्माप्रथुर्विपृथुरेवच कृतवर्माचदंष्ट्रश्चनिचक्रःशरिमर्दनः ९
सनत्कुमारोधर्मात्माचारुदेष्णश्चभारत अनिरुद्धसहायौतौपृष्ठानीकंररक्षतुः १० शेषायादवसेनातुव्यूहमध्येव्यवस्थिता रथैरश्वै
र्नागैराकुलाकुलवर्द्धन ११ षट्पुरादपिनिष्क्रांतादानवासुरदुर्मदाः आरुह्यमेघनादांश्चगर्दभानपिहस्तिनः १२ मकरान्शिशुमारांश्च
द्रुतानपिचभारत महिषानपिखड्गांश्चउष्ट्रानपिचकच्छपान् १३ एतैरेवरथैर्युक्ताविविधायुधपाणयः किरीटापीडमुकुटैरंगदैरपिमंडि
तौः १४

७ ८ निचक्रर्यादवः ९ सनत्कुमारोपियादवः १० ११ मेघानामिवनादोयेषांतान् १२ द्रुतान्जविनः १३ १४ ७ ७ ९ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२१ २२ सुताब्रह्मदत्तस्यपारंपर्यंतोदुरासदाः २३ कर्मसत्राख्यं आसार्यतेप्रसार्यतेविधीयतइत्यर्थः २४ २५ २६ २७ २८ २९ ३० ३१
विभुःस्वामीसखाभित्रंचपितुःसखाइतिपाठांतरम् ३२ आनीतेतिडाजंतंआनीताइत्यर्थः प्रियकाम्ययातदाराधनेननिमित्तभूतेन ३३ ३४ ३५ ३६ कन्याः

निमेषांतरमात्रेणगत्वाकामोमहाबलः कन्यास्तामाययाधीमानपजह्रेमहाबलः २१ मायामयीश्चकृत्वान्यास्तत्रवानूरुक्मिणीसुतः
माभैरितिचधर्मात्मादेवकीसुक्तवांस्तदा २२ मायामयीस्ततोहृत्वासुताह्यस्यदुरासदाः षट्पुरंविविशुर्दैत्याः परितुष्टनराधिप २३ कु
र्मचासार्यतेतत्रविधिदृष्टेनकर्मणा यद्विशिष्टंबहुगुणंतदद्भुचनराधिप २४ एतस्मिन्नतरेप्राप्ताराजानस्तत्रभारत सर्वेनिमंत्रिताःपूर्वं
ब्रह्मदत्तेनधीमता २५ जरासंधोदंतवक्रःशिशुपालस्तथैवच पांडवाधार्तराष्ट्राश्चमालवास्सगणास्तथा २६ रुक्मीचैवाहृतिश्चैवनी-
लोवाधर्मएवच विंदानुविंदावावंत्यौशल्यःशकुनिरेवच २७ राजानश्चापरेवीरामहात्मानोदृढायुधाः आवासितानातिदूरेषट्पुरस्यत्र
भारत २८ तान्दृष्ट्वानारदःश्रीमानचिंतयदनिंदितः क्षत्रस्ययादवानांचभविष्यतिसमागमः २९ अत्रहेतुरहंयुद्धेतस्मात्त्वयतास्यह
एवंसचिंतयित्वासनिकुंभभवनंगतः ३० पूजितःसनिकुंभेनदानवैश्चतथापरैः उपविष्टःसधर्मात्मानिकुंभमिदमब्रवीत् ३१ कथंविरोधंय
दुभिःकृत्वास्वस्थाविहास्यते योब्रह्मदत्तःसहृद्भिःसहितस्याविभुःसखा ३२ शतानिपंचभार्याणांब्रह्मदत्तस्यधीमतः आनीतावसुदेवस्य
सुतस्यप्रियकाम्यया ३३ शतद्वयंब्राह्मणीनांराजन्यानांशतंतथा वैश्यानांशतमेकंचशूद्राणांशतमेवच ३४ ताभिःशुश्रूषितोधीमान्दु
र्वासाधर्मवित्तमः तेनतासांवरोदत्तोमुनिनापुण्यकर्मणा ३५ एकैकस्तनयाराजन्नेकैकादुहितातथा रूपेणानुपमाःसर्वावरदानेनधीमतः
३६ कन्याभवंतितनयास्तस्यासुरपुनःपुनः संगमेसंगमेवीरभर्तृभिःशयनेसह ३७ सर्वपुष्पमयंगंधप्रस्रवंतिवरांगनाः सर्वदायौवनेन्य
स्ताःसर्वाश्चैवपतिव्रताः ३८ सर्वाःगुणैरप्सरसांगीतनृत्यगुणोदयम् जानंतिसर्वादैत्येयवरदानेनधीमतः ३९ पुत्राश्चरूपसंपन्नाःशास्त्रार्थ
कुशलास्तथा स्वेस्वेस्थितावर्णधर्मेयथावदनुपूर्वशः ४० ताःकन्याभैमसुख्यानांदत्ताःप्रायेणधीमता अवशेषशतलेकंसदानीतंकिलत्व
या ४१ तदर्थंयादवान्वीरसाधयिष्यसिसर्वथा सहायार्थंतुराजानोव्रियंताहेतुपूर्वकम् ४२ ब्रह्मदत्तस्तुतार्थंचरत्नानिविविधानिच दीय-
तांभूमिपालानांसहायार्थंमहात्मनाम् ४३ आतिथ्यंक्रियतांचैवयेसमेष्यंतिवैनृपाः एवमुक्तेतयाचक्रुरसुरास्तेऽनिहृष्टवत् ४४ लब्ध्वा
पंचशतंकन्यारत्नानिविविधानिच यथार्हेणनरेंद्रेस्ताविभक्ताभक्तिवत्सलाः ४५ कृतेपांडुसुतान्वीरान्यारितानारदेनते निमेषांतरमात्रेण
तत्रगत्वामहात्मना ४६

कमनीयाःकुमार्यःसंगमेसंगमेप्रतिसंगमं ३७ सर्वाअप्सरसांगणैर्युक्ताः अतएवसर्वांगीतादिजानंतीतिवाक्यभेदः ३८ ३९ ४० ४१ ४२ ४३
४४ ४५ ४६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४१ ४२ शिखराद्ग्रात् तरोस्तृणराजस्य ४३ ४४ ४५ ४६ ४७ ४८ नदीस्रुतंभीष्मं ४९ वसंतिः क्रराष्ट्रावंत्योरंतरंतत्र भवावासंस्थाः
५० ५१ ५२ ५३ ५४ ५५ ५६ गृहायगृहीत्वाप्रवराणांरुद्रपार्षदानांमध्येउत्तमः शैलादिर्नंदी ५७ ५८ ५९ ६०

तेवध्यमानाःकृष्णेनद्विषमाचक्रमुस्तदा जीविताशांविहंतस्तनारायणभयार्दिताः ४१ नानाकाशगतानैर्द्विजयंतःप्रवरस्तथा नि
जघ्नतुः शरैर्घोरैर्ज्वलितार्चिःसमैःप्रभो ४२ निपेतुरसुराणांतुशिरांसिधरणीतले तृणराजफलानीवमुक्तानिशिखरान्तरोः ४३ नि
पेतुर्बाहवश्छिन्नादैत्यानांवसुधातले कालेनोपहतावीराःपंचवक्त्राइवोरगाः ४४ रौक्मिणेयस्ततःसृष्ट्वाघोरांमायामयींगुहाम्
अदृश्यनिष्क्रमंवीरःक्षत्रंप्रसेतुमुद्यतः ४५ गदेनसहधर्मात्मासारणेनसुतेनच सांबेनचापरैश्चापिपूर्वंयेनप्रवेशिताः ४६ प्रसह्य
तरसाकर्णपतंतंरणमूर्द्धनि जग्राहबलवान्काष्णिःप्रस्फुरंतंततस्ततः ४७ विनद्यचगुहांवीरोघोरांमायामयींनृप दुर्योधनंचराजानं
विराटद्रुपदावपि ४८ शकुनिंचैवशल्यंचनीलंचापिनदीसुतम् विंदानुविंदौराजानौजरासंधंचभारत ४९ त्रिगर्तान्मालवांश्चैवबासं
त्यांश्चमहाबलान् धृष्टकेत्वादिकांश्चैवपांचाल्यानस्त्रकोविदान् ५० तथाहूतिसुवाचेदंमातुलंरुक्मिमेवच शिशुपालंचराजानंभगदत्तं
चभारत ५१ संबंधंचगुरुत्वंचमानयामिनराधिपाः गुहामिमांघोररूपांयत्रप्रक्षेपयामिवः ५२ बिल्वोदकेश्वरेणाहमाज्ञप्तःशूलपाणि
ना प्रक्षेप्तव्यानरेंद्रास्तेगुहायामितिधीमता ५३ आश्रित्यशांबरींमायांनिकुंभेनमहात्मना प्रक्षिप्तान्यादवांश्चैवमोक्षयिष्यामिसर्वथा
५४ इत्युक्तोशिशुपालस्तुराजासेनापतिस्तथा शरैस्ततर्दतान्भैमानुप्रद्युम्नंचविशेषतः ५५ बिल्वोदकेश्वरंदेवंरौक्मिणेयोनमस्य
च आरभन्नृपतिंबध्दुंशिशुपालंमहाबलम् ५६ ततःपाशसहस्राणिगृहायप्रवरोत्तमः शैलादिरब्रवीद्वीरंरौक्मिणेयंमहाबलम् ५७
बिल्वोदकेश्वरोदेवःप्राहत्वांयदुनंदन सर्वंकुरुतथाराज्यांचोक्तस्त्वंप्रीतथामया ५८ कन्यार्थेरत्नलुब्धास्तुबध्याश्चेमान्नराधिपान्
पाशैस्त्वमेवमोक्तुंचप्रमाणंयदुनंदन ५९ असुरास्तुमहाबाहोनिःशेषान्कर्तुमर्हसि एवमेतुचयुक्तव्यस्त्वयावीरजनार्दनः ६० ततःसभ
गदत्तंचशिशुपालंचभूमिप आहूतिंचैवरुक्मिंचशेषांश्चान्यान्नराधिपान् ६१ बबंधहरदत्तैस्तैःपाशैरुत्तमवीर्यधृक् मायामयींगुहां
चैवनानयत्कुरुनंदन ६२ बध्वाचरौक्मिणेयोथनिःश्वसंतइवोरगान् अनिरुद्धंचकाराथरक्षितारंस्वमात्मजम् ६३ तेषांनिरवशेषेण
बबंधयदुनंदनः सेनापतीन्क्षत्रियांश्चकोशाध्यक्षांश्चभारत ६४ हस्त्यश्वरथवृंदांश्चचकारचतथात्मसात् अव्यग्रस्तुततोहंतुमसु
रानुद्यतःप्रभो ६५

६१ ६२ निःश्वसंतःकर्मणिप्रथमाछांदसी ६३ ६४ ६५ [illegible]

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१५ १६ भूमिं द्यांच पूरयिलेतिशेषः १७ १८ चेदिराजः शिशुपालस्तदनुजेभ्योग्रगम् १९ २० २१ निकुंभ आद्यः प्रधानः येषांते २२ भैमानांयदूनां २३

नानर्दमानैर्विविधैस्तूर्यैर्नेमिस्वनाकुलैः प्रध्मायमानैः शंखैश्चमहांबुदसमस्वनैः १५ तासामस्कन्दसेनायामुद्यतीनांजनेश्वर निकुंभो
निर्ययावग्रेदेवाना मिव वासवः १६ भूमिं द्यांचववृधिरे दानवास्तेबलोत्कटाः नर्दंतो विविधान्नादान् क्ष्वेडतश्चपुनः पुनः १७ राजसे
नापिसंयत्ताचेदिराजपुरोगमा असुराणांसहायार्थंनिश्चिताजनमेजय १८ दुर्योधनश्चात्मशतंचेदिराजानुजाग्रगम् स्थितंरथैर्नर
व्याघ्रगंधर्वनगरोपमैः १९ कठिनानादिनोवीराद्रुपदस्यंदनास्तथा रुक्मीचैवाभ्दुतिश्चैवतस्थतुर्निश्चितोरणे तालवृक्षप्रतीकाशौद्यु
म्नानौधनुषी शुभे २० शल्यश्चशकुनिश्चोभौभगदत्तश्चपार्थिवः जरासंधस्त्रिगर्तश्चविराटश्चसहोत्तरः २१ युद्धार्थंमुद्यतावीरानिकुंभा
द्याजयैषिणः युयुत्समानायदुभिर्देवैरिवमहासुराः २२ ततोनिकुंभः समरे शरैराशीविषोपमैः ममर्दसमरेसेनां भैमानांभीमदर्शनाम्
२३ सेनापतिरनाधृष्टिर्ममृषेतन्नयादवः ममर्दघोरैर्बाणौघैश्छिन्नपुरवैः शिलाशितैः २४ नरथाःस्कंदसुरस्यास्य ददृशेनचवाजिनः नध्वजो
ननिकुंभस्तु सर्वेबाणाभिसंवृताः २५ सपरीत्यततोवीरोनिकुंभोमायिनांवरः अस्तंभयदनाधृष्टिंमायया भीमसत्तमम् २६ संभयित्वा
नयद्वीरंगुहांषट्पुरसंज्ञिताम् रुध्वाचाप्यगमद्वीरोमायाबलमुपाश्रितः २७ पुनरेवनिकुंभस्तु क्रुतवर्माणमाहवे अनयच्चारुदेष्णंच
भोजंवैतरणंतथा २८ सनत्कुमारमृक्षंचतथैवनिशठोल्मुकौ बहूंश्चैवापरान्भोजान्मायाबलसमाश्रितः २९ नतस्यददृशेदेहोमा
याच्छन्नोजनेश्वर नयतोयादवान्घोरान्गुहांषट्पुरसंज्ञिताम् ३० तदृष्ट्वाकदनंघोरंभैमानांभयवर्द्धनः चुकोपभगवान्कृष्णो-
बलःसात्यकएवच ३१ सविशेषंतथाकामःसांबश्चपरवीरहा अनिरुद्धश्चदुर्धर्षोभैमाश्चबहवोपरे ३२ ततःशार्ङ्गायुधःशार्ङ्गंकृत्वा
सज्यंनरेश्वर दानवेषुप्रवृत्तेषुस्तृणेष्विवहुताशनः ३३ तदृष्ट्वादानवादेवमभिदुद्रुवुरीश्वरम् शूलप्रासाःकालपाशान्तोःप्रदीप्तामिवपाव
कम् ३४ समुत्सृज्यशतघ्नीश्चपरिघांश्चसहस्रशः शूलानिचाग्नितुल्यानिप्रदीप्तांश्चपरश्वधान् ३५ पर्वताग्र्याणिवृक्षांश्चघोराश्चवि
पुलाःशिलाः उत्क्षिप्यचगजान्मत्तान्रथानपिहयानपि ३६ नारायणाग्निस्तान्सर्वान्ददाहप्रहसन्निव बाणार्चिषामहातेजाजगद्धि
तकरोहरिः ३७ शारदंवर्षणंयद्वत्सेहेधीरोगवांपतिः तद्वद्युद्धदुरुषःसेहेबाणवर्षमरिंदमः ३८ नसेहिरेस्कन्दबाणान्नारायणधनुश्च्यु
तान् वर्षपर्जन्यविहितंवालुकासेतवोयथा ३९ नशेकुःप्रमुखेस्थातुंकृष्णस्यास्कंदसत्तमाः व्यादितास्यस्य सिंहस्यवृषभाइवभारत ४०

२४ २५ २६ २७ २८ सनत्कुमारंयादवविशेषंऋक्षंजांबवतीपुत्रंनिशठोल्मुकौबलभद्रपुत्रौ २९ ३० ३१ ३२ प्रवृत्ताःप्रक्षिप्ताःइत्यध्याहारेणान्वयः ३३ ३४ ३५ ३६ ३७ ३८
३९ ४०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६६ ६७ निहितानिधानवद्धक्षिता ६८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांचतुरशीतितमोऽध्यायः ८४ ७. रुद्धेषिति १ २

सन्नद्ध एवचोद्यावब्रह्मदत्तंद्विजोत्तमम् विस्रब्धंवर्ततांकर्ममाभैःपश्यधनंजयम् ६६ नदेवेभ्योनासुरेभ्योनागेभ्योद्विजसत्तम भयं-
द्विविद्यतेतस्यगोप्तारोयस्यपांडवाः ६७ नचासुरैस्तवसुताःस्पृष्टाःस्वल्पपिचेतसाम् यज्ञवाटेनिरीक्ष्येतामाययानिहतामया ६८ इति
श्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिषट्पुरवधेचतुरशीतितमोऽध्यायः ८४ वैशंपायनउवाच रुद्धेषुभूमिपालेषुसानु
गेषुविशांपते आविवेशासुरांश्चापिकश्मलंजनमेजय १ दिशःप्रतस्थुस्तेवीराबध्यमानाःसमंततः कृष्णानंतप्रभृतिभिर्यदुभिर्युद्ध-
दुर्मदैः २ निकुंभस्तानथोवाचरुषितोदानवोत्तमः भित्वाप्रतिज्ञांकिंमोहाद्यातायातविह्वलाः ३ हीनप्रतिज्ञाःकांल्लोकान्प्रयास्य
थपलायिताः अगत्वापचितिंयुद्धेज्ञातीनांकृतनिश्चयाः ४ फल्गजित्वैवप्रोक्तव्यंरिपून्समरकर्कशान् हतेनचापिशूरेणवस्तव्यंत्रिदिवे
सुखम् ५ पलायित्वागृहंगत्वाकस्यद्रक्ष्यथहेसुखम् दारान्द्रक्ष्यथकिंचापिधिग्धिक्किंकिंनलज्जथ ६ एवमुक्तानिवृत्तास्तेलज्ज
मानानृपासुराः द्विगुणेनचवेगेनयुयुधुर्यदुभिःसह ७ उत्सवेयुद्धशौंडानांनानाप्रहरणेनृप ययातियज्ञवाटंतंनिहतिधनंजयः
८ यमौभीमश्चराजाचधर्मपुत्रोयुधिष्ठिरः द्योप्रयातानुजघानैद्भिःप्रवरश्चद्विजोत्तमः ९ अथासुरासृक्तोयाढ्याकेशशैवलशाड्वला
चक्रकूर्मरथावर्त्तागजशैलानुशोभिनी १० ध्वजकुंततरुच्छन्नास्तनितोत्कृष्टनादिनी गोविंदशैलप्रभवाभीरुचित्तप्रमाथिनी ११
असृग्बुद्बुदफेनाढ्या असिमत्स्यतरंगिणी सुस्रावशोणितनदीनदीवजलदागमे १२ तान्दृष्ट्वैवनिकुंभस्तुवध्यमानांश्चशात्रवान्
हतान्सर्वान्सहायांश्चवीर्यादेवोत्पपातह १३ सवारितोजयंतेनप्रवरेणचभारत शरैःकुलिशसंकाशैर्निकुंभोरणकर्कशः १४ सन्नि
वृत्याथदैत्योऽथःपरिघेणदुरासदः प्रवरंताडयामाससपपातमहीतले १५ ऐंद्रिस्तपतितंभूमौबाहुभ्यांपरिषस्वजे विदित्वाचैवस
प्राणंहित्वासुरसभिद्रुतः १६ अभिद्रुत्यनिकुंभंचनिस्त्रिंशेनजघानह परिघेणापिदैतेयोजयंतंसमताडयत् १७ ततस्तंबहुलंगात्र
निकुंभस्यैंद्रिराहवे संचिंतयामासतदावध्यमानोमहासुरः १८ कृष्णेनसहयोद्धव्यंवैरिणाज्ञातिघातिना श्रावयामिकिमात्मानमा
हवेशक्रसूनुना १९ एवंसनिश्चयंकृत्वातत्रैवांतरधीयत जगामचैवयुद्धार्थंयत्रकृष्णोमहाबलः २० तंदृष्ट्वैरावणस्कंधमास्थितो
बलनाशनः दृष्टुमभ्यागतोयुद्धंजहर्षसहदैवतैः २१

३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२२ २३ २४ क्रमहानुक्रमहांतम् २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ महद्भूतंलोकोत्तरविक्रमः ३५ ३६

साधुसाध्वितिपुत्रंचपरितुष्टःससस्वजे प्रवरंचापिधर्मात्मासस्वजेमोहवर्जितम् २२ देवदुंदुभयश्चापिप्रणेदुर्वासवाज्ञया जय
मानंरणेदृष्ट्वाजयंतंरणदुर्जयम् २३ ददर्शाथनिकुंभस्तंकेशवंरणदुर्जयम् अर्जुनेनस्थितंसार्द्धंयज्ञवाटाविदूरतः २४ सनादंस
महान्कृत्वापक्षिराजमताडयत् परिघेणसघोरेणबलसत्यकमेवच २५ नारायणंचार्जुनंचभीमंचाथयुधिष्ठिरं यमौचवासुदेवंच
सांबकामंचवीर्यवान् २६ युयुधेमाययादैत्यःशीघ्रकारीचभारत नचैनंददृशुःसर्वेसर्वशस्त्रविशारदाः २७ यदातुनैवापश्यंस्तंतदाबि
ल्वोदकेश्वरम् दध्यौदेवंहृषीकेशप्रमथानांगणेश्वरम् २८ ततस्तेददृशुःसर्वेप्रभावादतितेजसः बिल्वोदकेश्वरस्याशुनिकुंभमायि
नांवरम् २९ कैलासशिखराकारंग्रसंतमिवधिष्ठितम् आह्वयंतंरणेकृष्णंवैरिणंज्ञातिनाशनम् ३० सज्यगांडीवमेवाथपार्थस्तस्य
रथेषुभिः परिघंचैवगात्रेषुविव्याधैनमथासकृत् ३१ तेबाणास्तस्यगात्रेषुपरिघेचजनाधिप भग्नाःशिलाशिताःसर्वेनिपेतुःकुंचिताः
क्षितौ ३२ विफलानस्त्रयुक्तांस्तान्दृष्ट्वाबाणान्धनंजयः पप्रच्छकेशववीरःकिमेतदितिभारत ३३ पर्वतानपिभिंदंतिममवज्रोप
माःशराः किमिदंदेवकीपुत्रविस्मयोत्रमहान्मम ३४ तमुवाचततःकृष्णःप्रहसन्निवभारत महद्भूतंनिकुंभोयंकौंतेयशृणुविस्तरात्
३५ पुरागत्वोत्तरकुरूंस्तपश्चक्रेमहासुरः शतंवर्षसहस्राणांदेवशत्रुर्दुरासदः ३६ अथैनंछंदयामासवरेणभगवान्हरः सवव्रेत्रीणि
रूपाणिनवध्यानिसुरासुरैः ३७ तमुवाचमहादेवोभगवान्वृषभध्वजः ममवाब्राह्मणानांवाविष्णोर्वाप्रियमाचरन् ३८ भविष्यसि
हरेर्वध्योनत्वन्यस्यमहासुर ब्रह्मण्योहंचविष्णुश्चविप्राणांपरमागतिः ३९ सएषसर्वशस्त्राणामवध्यःपांडुनंदन त्रिदेहोतिप्रमाथी
चेवरदत्तश्चदानवः ४० भानुमत्यापहरणेदेहोस्यैकोहतोमया अवध्यंषट्पुरंदेहमिदमस्यदुरात्मनः ४१ दितिंसुश्रूषतित्वेकोदेहो
स्यतपसान्वितः अन्यस्तुदेहोघोरोस्ययेनावसतिषट्पुरम् ४२ एतत्तुसर्वमाख्यातंनिकुंभचरितंमया त्वरयास्यवधेवीरकथापू
श्चाद्भविष्यति ४३ तयोःकथयतोरेवंकृष्णयोरसुरस्तदा गुहांषट्पुरसंज्ञातांविवेशरणदुर्जयः ४४ अन्विष्यतस्यभगवान्विवेश
मधुसूदनः तांषट्पुरगुहांघोरांदुर्द्धर्षांकुरुनंदन ४५ चंद्रसूर्यप्रभाहीनांज्वलंतीस्वेनतेजसा सुखदुःखोष्णशीतानिप्रयच्छतीय
थेप्सितम् ४६ तत्रप्रविश्यभगवानपश्यतजनाधिपान् युयुधेसहघोरेणनिकुंभेनजनाधिप ४७

३७ ३८ ब्रह्मण्यःब्राह्मणकुलहितःगतिराश्र
यः ३९ ४० ४१ ४२ ४३ ४४ अन्विष्यतद्गमनमार्गमितिशेषः ४५ सुखदुःखेतिस्वीयानांसुखंपरेषांदुःखमितिवक्तव्यं ४६ जनाधिपान्निकुंभनिगृहीतान्यदून् ४७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ददौतेभ्यइतिशेषः ७३ ७४ ७५ ७६ ७७ ७८ ७९ ८० इतिश्रीम० खि० हरिवंशेविष्णुप० टीकायांपंचाशीतितमोऽध्यायः ८५ श्रुतोयमिति
१ निकुंभस्यत्रिदेहस्यवधंभानुमत्याह रणेभगवताप्रोक्तम् २ ३ कालयुक्तेनबहुकालीनेन ४ ५ ६ ७ ८ ९ १० ११ १२

नियुद्धकुशलान्मल्लान्देवोमल्लप्रियस्तदा योधयित्वाददौभूरिवित्तंवस्त्राणिचात्मवान् ७३ मातापितृभ्यांसहितोयदुभिश्चमहाबलः
अभिवाद्यब्रह्मदत्तंययौद्वारवतींपुरीम् ७४ सविवेशपुरींरम्यांहृष्टपुष्टजनाकुलाम् पुष्पाचितपथांवीरोवंद्यमानोनरैःपथि ७५ इमंयः
षट्पुरवधंविजयंचक्रपाणिनः शृणुयाद्वापठेद्वापियुद्धेजयमवाप्नुयात् ७६ अपुत्रोलभतेपुत्रमधनोलभतेधनम् व्याधितोमुच्यतेरो-
गीबद्धश्चाप्यथबंधनात् ७७ इदंपुंसवनंप्रोक्तंगर्भाधानंचभारत श्राद्धेषुपठितंसम्यगक्षय्यकरणंस्मृतम् ७८ इदमसरवरस्यभा
रतेप्रथितबलस्यजयंमहात्मनः सततमिदंहियःपठेन्नरःसुगतिमितोव्रजतेगतज्वरः ७९ मणिकनकविचित्रपाणिपादोनिरतिशया-
र्कगुणोरिहादिनाथः चतुरुदधिशयश्चतुर्विधात्माजयतिजगत्पुरुषःसहस्रनामा ८० इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुप
र्वणिषट्पुरवधोनामपंचाशीतितमोऽध्यायः ८५ ६. जनमेजयउवाच श्रुतोयंषट्पुरवधोरम्योमुनिवरोत्तम पुरोक्तमंधकवधं
वैशंपायनकीर्तय १ भानुमत्याश्चहरणंनिकुंभस्यवधंतथा प्रब्रूहिवदतांश्रेष्ठपरंकौतूहलंहिमे २ वैशंपायनउवाच दितिर्हते
षुपुत्रेषुविष्णुनाप्रभविष्णुना तपसाराधयामासमारीचंकश्यपंपुरा ३ तपसाकालयुक्तेनतथाशुश्रूषयामुनेः आनुकूल्येनचतथामा
धुर्येणचभारत ४ परितुष्टःकश्यपस्तुतामुवाचतपोधनः परितुष्टोस्मितेभद्रेवरंवरयसुव्रते ५ दितिरुवाच हतपुत्रास्मिभग
वन्देवैर्धर्मभृतांवर अवध्यंपुत्रमिच्छामिदेवैरमितविक्रमम् ६ कश्यपउवाच अवध्यस्तेसुतोदेविदाक्षायणिभवेदिति देवा
नांसशयोनात्रकश्चित्कमललोचने ७ देवदेवमृतेरुद्रंतस्यनप्रभवाम्यहम् आत्मातस्तेपुत्रेणरक्षितव्योहिसर्वथा ८ अन्वालभत
तांदेवींकश्यपःसत्यवागथ अंगुल्योदरदेशेतुसापुत्रंसुषुवेततः ९ सहस्रबाहुंकौरव्यसहस्रशिरसंतथा द्विसहस्रेक्षणंचैवतावच्चर-
णमेवच १० सव्रजत्यंधवद्यस्मादनंधोपिहिभारत तमंधकोयंनाम्नेतिप्रोचुस्तत्रनिवासिनः ११ अवध्योस्मीतिलोकान्ससर्वान्बाधतिभा
रत हरत्यपिचरत्नानिसर्वाण्यात्मबलाश्रयात् १२ वासयत्यात्मवीर्येणनिगृह्याप्सरसांगणान् सुवेषमन्यूर्जितोत्यर्थंसर्वलोकभयंकरः १३
परदारापहरणंपररत्नविलोपनम् चकारसततंमोहादंधकःपापनिश्चयः १४ त्रैलोक्यविजयंकर्तुमुद्यतःसतुभारत सहायैरसुरैःसार्द्धंब
हुभिःसर्वधर्षिभिः १५ तच्छ्रुत्वाभगवांश्छक्रःकश्यपंपितरंब्रवीत् अंधकेनेदमारब्धंमीदृशंमुनिसत्तम १६

१३ १४ १५ ब्रवीत् अब्रवीत १६ ८६ ८६ ८६ ८६ ८६ ८६ ८६ ८६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ४८ कृष्णेनेतितत्रनेनायमर्थः सनिकुंभः कृष्णेनसहयुयुधेरौक्मिणेयस्तुकृष्णेनैवप्रचोदितः मनसाप्रेरितोयादवाननयदित्युत्तरेणसंबंधः ४९ ५०
५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ सूर्यमंडलवर्चसमितिकृद-

कृष्णस्यानुप्रविष्टास्तुबलाद्यायादवास्तदा प्रविष्टाश्चतथासर्वेपांडवास्तेमहात्मनः ४८ समेतास्तुप्रविष्टास्तेकृष्णस्यानुमतेनवै
युयुधेसतुकृष्णेनरौक्मिणेयःप्रचोदितः ४९ अनयद्यादवान्सर्वान्यानयत्कृष्णान्पुरा ५० तेसुत्कारौक्मिणेयेनप्रातायत्रजनार्दनः
प्रहृष्टमनसःसर्वेनिकुंभवधकांक्षिणः ५१ राजानोवीरमुंचेतिपुनःकाम्ययाब्रवीत् मुमोचचाथतान्वीरान्रौक्मिणेयःप्रतापवान् ५२
अधोमुखमुखाःसर्वेबद्धमोनानराधिपाः लज्जयाभिप्लुतावीरास्तस्थुर्नष्टश्रियस्तदा ५३ निकुंभमपिगोविंदःप्रयतंतंजयंप्रति योध
यामासभगवान्घोरमात्मरिपुंहरिः ५४ परिघेणाहतःकृष्णोनिकुंभेनभृशंविभो गदयाचापिकृष्णेननिकुंभस्ताडितोभृशम् ५५ ता
वुभौमोहमापन्नौरूपप्रहारहतौतदा ततःप्रव्यथितान्दृष्ट्वापांडवांश्चाथयादवान् ५६ जेपुर्मुनिगणास्तत्रकृष्णस्यहितकाम्यया तुष्टुवु
श्चमहात्मानंवेदप्रोक्तैस्तथास्तवैः ५७ ततःप्रत्यागतप्राणोभगवान्केशवस्तदा दानवश्चपुनर्वीराबुद्ध्यतोसमरंप्रति ५८ वृषभाविव-
नर्दंतौगजाविवचभारत शालावृकाविवक्रुद्धौप्रहरंतौरणोत्कटौ ५९ अथकृष्णंतदोवाचनृपवागशरीरिणी चक्रेणाशमयस्वैनंदेव-
ब्राह्मणकंटकम् ६० इतिहोवाचभगवान्देवोबिल्वोदकेश्वरः धर्मयशश्चविपुलमायुर्हितंमहाबल ६१ तथेत्युक्त्वानमस्कृत्वालोक-
नाथःसतांगतिः सुदर्शनंमुमोचाथचक्रंदैत्यकुलांतकम् ६२ तन्निकुंभस्यचिच्छेदशिरःप्रवरकुंडलम् नारायणभुजोत्सृष्टंसूर्यमंडल
वर्चसम् ६३ उत्पपातशिरस्तस्यभूमौज्वलितकुंडलम् मेधमत्तोगिरेःशृंगान्मयूरइवभूतले ६४ निकुंभेनिहतेतस्मिन्देवोबिल्वोदके
श्वरः तुतोषचनरव्याघ्रजगत्त्रासकरोविभुः ६५ पपातपुष्पवृष्टिश्चशक्रसृष्टानभस्तलात् देवदुंदुभयश्चैवप्रणेदुररिनाशने ६६ ननं
दचजगत्कृत्स्नंमुनयश्चविशेषतः दैत्यकन्याश्चभगवान्यदुभ्यःशतशोददौ ६७ क्षत्रियाणांचभगवान्सांत्वयित्वापुनःपुनः रत्नानिच
विचित्राणिवासांसिप्रवराणिच ६८ रथानांवाजियुक्तानांषट्सहस्राणिकेशवः अददत्पांडवेभ्यश्चप्रीत्यात्मागदपूर्वजः ६९ तदेवचाथप्र
वरंषट्पुरंपुरवर्द्धनः द्विजायब्रह्मदत्तायददौतार्क्ष्यवरध्वजः ७० सत्रेसमाप्तेचतदाशंखचक्रगदाधरः विसर्जयित्वातत्क्षत्रंपांडवांश्चम-
हाबलः ७१ बिल्वोदकेश्वरस्याथसमाजमकरोत्प्रभुः मांसरूपसमाकीर्णंबहुन्नव्यंजनाकुलम् ७२

र्शनविशेषणत्वात्सुंदरत्वम् ६३ ६४ ६५ ६६ ६७ ६८ ६९ प्रवरंश्रेष्ठम् ७० ७१ ७२ ६२ ६२ ६२ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४२ ४३ मंदारःकल्पतरुस्तत्पुष्पैः ४४ संतानोपिदेवद्रुमएव ४५ ४६ स्रज्मालांपुष्पदाम ४७ ४८ इयमितिवक्तव्येऽयमितिउक्तिर्गंधत्वात्संतान-
कुसुमानि अतिवर्त्तंतिअभिभवंति ४९ ५० ५१ महात्मनोमहादेवस्यप्रवरोत्तमाःगणोत्तमाः ५२ ५३ ५४ ५५ ५६ ५७ नीराणि

सदेवदेवंभगवान्द्रष्टुंमुनिरथाययौ मंदारवनमध्यस्थोयत्रनित्योवृषध्वजः ४२ सतत्ररजनीमेकामुषित्वामुनिसत्तमः मंदारा-
णांवनेरम्येदयितःशूलपाणिनः ४३ आजगामपुनःस्वर्गंलब्ध्वानुज्ञांवृषध्वजात् मंदारपुष्पैःकृतामालामाबध्यभारत ४४
ग्रथितांसविशेषांतांसर्वगंधोत्तमोत्तमाम् संतानमाल्यदामंचतैरेवकुसुमैःकृतम् ४५ तच्चकंठेसमासज्यमहागंधंनराधिप आ
ययावंधकोयत्रदुरात्मावलदर्पितः ४६ अंधकस्त्वथतंदृष्ट्वागंधमाघ्रायचोत्तमम् संतानकानांस्रज्मालामहागंधांमहामुने ४७
कुत्रेयंपुष्पजातिर्वाकमनीयातपोधन गंधान्वर्णान्सुभास्तान्हिभोःपुष्यतिमुहुर्मुहुः ४८ स्वर्गेसंतानकुसुमान्यतिवर्त्तंतिसर्व-
था कःप्रभुस्तस्यवृक्षस्यशक्यवानयितुंमुने आचक्ष्वयद्यनुग्राह्यावयंतेदेवतातिथे ४९ तमुवाचमुनिश्रेष्ठःप्रहसन्निवभारत
अदायदक्षिणेहस्तेमहतस्तपसोनिधिः ५० मंदरेपर्वतश्रेष्ठेवीरकामगमंवनम् तत्रचैवंविधंपुष्पंभोःसृष्टिःशूलपाणिनः ५१ न
तुतत्रवनंकश्चिदच्छिदेनमहात्मनः प्रवेष्टुंलभतेतद्धिरक्षंतिप्रवरोत्तमाः ५२ नानाप्रहरणाघोरानानावेषादुरासदाः अवध्याःस
र्वभूतानांमहादेवाभिरक्षिताः ५३ नित्यंप्रक्रीडतेतत्रसोमःसप्रवरोहरः मंदारद्रुमखंडेषुसर्वात्मासर्वभावनः ५४ तपोविशेषैरा-
राध्यहरंत्रिभुवनेश्वरम् शक्यंमंदारपुष्पाणिप्राप्तुंकश्यपवंशज ५५ स्त्रीरत्नमणिरत्नानियानिचान्यानिचाप्यथ कांक्षितानिफ
लंतिस्मतेद्रुमाहरवल्लभाः ५६ नतत्रसूर्यःसोमोथतपत्यतुलविक्रमः स्वयंप्रभंतरुवनंतन्द्रीदुःखविवर्जितम् ५७ तत्रगंधानृत्व
र्त्यन्येनीराण्यन्येमहाद्रुमाः वासांसिविविधान्यन्येस्रग्गंधीनिमहाबल ५८ भक्ष्यभोज्यंचपेयंचचोष्यंलेह्यंतथैवच तरुभ्यःस्र
वतेतथ्यंविविधंमनसेप्सितम् ५९ पिपासावाबुभुक्षावाग्लानिश्चिंतापिवानघ नमंदारवनेवीरभवतीत्युपधार्यताम् ६० नतेव
र्णयितुंशक्यागुणावर्षशतैरपि गुणायेतत्रवर्ततेस्वर्गात्बहुगुणोत्तराः ६१ अतीवहिजयेल्लोकान्समहेंद्रान्नसंशयः एकाहमपि
यस्तत्रवसेच्चादितिजोत्तम ६२ स्वर्गस्यापिहितत्स्वर्गंस्वस्थानामपितत्सुखम् बभूवजगतःसर्वमितिमेधीयतेमनः ६३ इतिश्रीमहा
भारतेखि०ह०वि० अंधकवधेषडशीतितमोऽध्यायः ८६ वैशंपायनउ० अंधकोनारदवचःश्रुत्वातत्वेनभारत मंदरपर्वतंगंतुंमनोदं
धेमहासुरः १

रसान् ५८ ५९ ६० वर्द्धंतेप्रसरंति ६१ ६२ ६३ इतिश्रीम०खि०ह०वि०टी०षडशीतितमोऽध्यायः ८६ ७ अंधकइति १ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 सोढव्यंदुर्दत्तत्वमितिशेषः १७ अत्रभवतीपूज्यादितिः तस्याः इष्टपुत्रेमयाहतेसतिसामयिमन्युंकुर्यात् १८ १९ कृच्छ्रकृच्छ्रेण अतिकृच्छ्रेण २० २१ २२
 २३ २४ नेजुःयज्ञंनचक्रुः २५ २६ अंधकस्यभयादितिशेषः २७ २८ २९ ३० ३१ ३२ ३३ ३४ अश्रुप्रमार्जनंशो

आज्ञापयविभोकार्यमस्माकंसमनंतरम् यवीयसःकथंनामसोढव्यंस्यान्मुनेमया १७ इष्टपुत्रेप्रहर्तव्यंकथंनाममयाविभो इहात्रभ
वतीकुर्यान्मन्युंमयिहतेसुते १८ देवेंद्रवचनंश्रुत्वाकश्यपोथाब्रवीन्मुनिः वारयिष्यामिदेवेंद्रसर्वथाभद्रमस्तुते १९ अंधकंवारया
मासदित्यासहतुकश्यपः त्रैलोक्यविजयार्थीरंकृच्छ्रकृच्छ्रेणभारत २० वारितोपिसदुष्टात्माबाधत्येवदिवौकसः नैस्तैरुपायैर्दुष्टा
त्माप्रमथ्यचतथामरान् २१ बभंजकाननेवृक्षानुद्यानानिचदुर्मतिः उच्चैःश्रवःसुतानश्वान्बलादप्यानयद्दिवः २२ नागान्दिशागजेस्कं
तान्दिव्यानपिचभारत बलाद्धरतिदेवानांपश्यतांवरदर्पितः २३ देवानाप्याययंतेतुयेयज्ञैस्तपसातथा तेषांचकारविध्वंसदुष्टात्मादेव
कंटकः २४ नेजुर्यज्ञैस्त्रयोवर्णास्तेपुश्चनतपांस्यपि अंधकस्यभयाद्राजन्यज्ञविघ्नानिकुर्वतः २५ तस्येच्छयावातिवायुरादित्यश्चतपत्यु
त चंद्रमावासनक्षत्रोदृश्यतेनैववापुनः २६ नध्रजंतिविमानानिविहायसिभयात्प्रभो अंधकस्यातिघोरस्यबलदृप्तस्यदुर्मतेः २७
निरोंकारवषट्कारंजगद्घोरंतथाभवत् अंधकस्यातिघोरस्यभयात्कुरुकुलोद्वह २८ कुरूंस्तथोत्तरान्पापोद्रावयामासभारत
भद्राश्वान्केतुमालांश्चजंबुद्वीपांस्तथैवच २९ मानयंतिचतंदेवादानवाश्चदुरासदाः भूतानिचतथान्यानिसमस्तान्यपिसर्वथा ३०
ऋषयोवध्यमानास्तेसमेताब्रह्मवादिनः अचिंतयन्नंधकस्यवधंधर्मभृतांवर ३१ तेषांबृहस्पतिर्मध्येधीमानिदमथाब्रवीत् ना
स्यरुद्राद्दृतेमृत्युर्विद्यतेचकथंचन ३२ तथावरेदीयमानेकश्यपेनापिशब्दितः नाहंरुद्रात्परित्रातुंशक्तइत्येवधीमतः ३३ तमुपायं
चिंतयामःशर्वोयेनसनातनः जानीयात्सर्वभूतानिपीड्यमानानिशंकरः ३४ विदितार्थोहिभगवानवश्यंजगतःप्रभुः अश्रुप्रमार्जनं
देवःकरिष्यतिसतांगतिः ३५ व्रतंहिदेवदेवस्यभवस्यजगतोगुरोः संतास्त्वारक्षितव्याब्राह्मणास्तुविशेषतः ३६ तेवयंनारदंसर्वे
प्रयामःशरणंद्विजम् उपायंवेत्स्यतेतत्रवयस्योहिभवस्यसः ३७ बृहस्पतिवचःश्रुत्वासर्वेप्यथतपोधनाः तावद्ददृशुराकाशेप्याप्तं
देवर्षिसत्तमम् ३८ पूजयित्वायथान्यायंसत्कृत्यविधिवन्मुनिम् देवाऊचुः देवर्षेभगवन्साधोकैलासंव्रजसत्वरम् ३९
विज्ञप्तुंमहसेदेवमंधकस्यवधेहरम् प्रार्थनात्थंनारदंप्रोचुस्तास्तथेतिसचोक्तवान् ४० ऋषिष्वथप्रयातेषुतत्कार्यंनारदोमुनिः विचार्य
मनसाविद्वानितिकार्यंसदृष्टवान् ४१

कापनयनम् ३५ ३६ ३७ ३८ ३९ ४० इतिवक्ष्यमाणंकार्यंकर्तव्यम् ४१ छ२ छ२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२ ३ ४ ५ शुचिषदैः सदः सभा शुचिस्थानेसीदंतितिष्ठंतीतिशुचिषदास्तैः शुद्धसदोभिः शुचिपदैरित्यपिपाठः ६ ७ ८ ९ रत्नमुत्तमंदिव्यंश्रेष्ठम् १० ११ १२ १३ १४ १५ प्रच्छन्नानिनदीनांजालानिसमूहायत्रतम् १६ सविशेषतरं सविशेषतरैः पारिजातादिभिःसहितं

सोसुरान्सुमहातेजाःसमानीयमहाबलः जगाममंदरंक्रुद्धोमहादेवालयंतदा २ तंमहाद्रुमप्रतिच्छन्नंमहौषधिसमाकुलम् नानासिद्धसमाकीर्णंमहर्षिगणसेवितम् ३ चंदनागरुवृक्षाढ्यंसरलद्रुमसंकुलम् किन्नरोद्गीतरम्यंच बहुनागकुलाकुलम् ४ वातोद्धूतैर्वनैःफुल्लैर्नृत्यंतमिवचक्वचित् प्रस्रुतैर्धातुभिश्चित्रैर्विलिप्तमिवचक्वचित् ५ पक्षिसंघैःसुमधुरैर्नदंतमिवच क्वचित् हंसैःशुचिषदैःकीर्णंसंपतद्भिरितस्ततः ६ महाबलैश्चमहिषैश्चराद्भिर्दैत्यनाशनैः व्याघ्रैःशुचिमलैःसिंहैर्भूषितंहंससंचयम् ७ मृगराजसमाकीर्णंमृगवृंदनिषेवितम् समंदरंगिरिंप्राहरूपिणंबलदर्पितः ८ वसिलंहियथावध्योवरदानाद्धरःपितुः ममत्वेवंवशेसर्वंत्रैलोक्यंसचराचरम् ९ प्रतियोद्धुंनमांकश्चिदिच्छत्यपिगिरेभयात् पारिजातवनंचास्तितवसानौमहागिरे सर्वकामप्रदैःपुष्पैर्भूषितरत्नमुत्तमम् १० तदाचक्ष्वापभोक्ष्यामितद्वनंतवसानुजम् किंकरिष्यसिक्रुद्धस्त्वमनोहिल्वरतेमम ११ आतारंनानुपश्यामिमयारवत्वर्दितस्यते इत्युक्तोमंदरस्तेनतत्रैवांतरधीयत १२ ततोंधकोतिरुषितोवरदानेनदर्पितः सुमोचनादंसुमहद्दिदवचनमब्रवीत् १३ मयावैलंयाच्यमानोयस्मान्नवक्षुमन्यसे अहंचूर्णीकरोमित्वांबलपर्वतपश्यमे १४ एवमुक्त्वागिरेःशृंगमुत्पाट्यबहुयोजनम् निश्चिक्षेपगिरेस्तस्यशृंगमन्यत्रवीर्यवान् १५ सहतैरसुरैःसर्वैर्वरदानेनदर्पितः तंप्रच्छन्ननदीजालभज्यमानमहागिरिम् १६ विदित्वाभगवान्रुद्रश्चकारानुग्रहंगिरेः सविशेषतरंवीरमत्तद्विपमृगायुतम् १७ नदीजालैर्बहुतरैःशोभितंचित्रकाननं नभश्च्युतैःपुरायद्वत्तद्वदेवविराजते १८ अथरुद्रप्रभावेनशृंगाण्युत्पादितानितु क्षिप्तानिचासुरानेवघ्नंतिघोराणिभारत १९ क्षिप्तायेनपलायंतेशृंगाणितुमहासुराः शृंगैस्तैस्तेसमवध्यंतिपर्वतस्यजनाधिप २० येचस्थास्त्वसुरास्तत्रतिष्ठंतिगिरिसानुषु शृंगैस्तेनस्यवध्यंतेमंदरस्यमहागिरेः २१ ततोंधकस्तदादृष्ट्वासेनांतामर्दितांतथा रुषितःसुमहानादंनदित्वैवंतदाब्रवीत् २२ आह्वयेतवनंयस्यसुहृदर्थमुपतिष्ठतु किंत्वयाचलयुद्धेनहतास्मच्छक्लनारणे २३ एवमुक्तेत्वंधकेनवृषभेणमहेश्वरः समासेःशूलमुद्यम्यदैत्योधकजिघांसया २४ प्रमथानांगणेधीमान्वृतोवैबहुलोचनः तथाभूतगणैश्चैवधीमान्भूतगणेश्वरः २५

१७ नभश्च्युतैः स्वर्गादागतैर्नदीजालैःपुरा अंधकक्षोभात्पूर्वं १८ १९ वध्यंतिवध्यंते २० २१ २२ २३ २४ बहुलोचनः त्रिनेत्रः २५ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सिंधवोनद्यः २६ सर्वेतेसर्वास्ताः विपरीतावक्रीभूताः २७ सधूमांगाराः वृष्टयोयेषुतेगिरयः २८ २९ ३० ३१ ३२ ३३ ३४ ३५
३६ नजज्वालजलेवन्हिः और्वाग्निनासमुद्रेसत्वानांपाकऔत्पातिकोनाभूदित्यर्थः ३७ ३८ सोमः उमासहितः ३९ इतिश्रीमहाभारतेखिलेषुहरिवं

प्रचकंपेततःकृत्स्नंत्रैलोक्यंरुषितेहरे सिंधवश्चप्रतिस्रोतंमुहुःप्रज्वलितोदकाः २६ जग्मुर्दिशोग्निदाहाश्चसर्वेतेहरतेजसा मुमु
धुश्चग्रहाःसर्वेविपरीताजनाधिप २७ चेलुश्चगिरयस्तत्रकालेकुरुकुलोद्वह प्रववर्षाथपर्जन्यःसधूमांगारवृष्टयः २८ उष्णाभाश्च
द्रमाश्चासीत्सूर्यःशीतप्रभःस्तथा नब्रह्मविविदुस्तत्रमुनयोब्रह्मवादिनः २९ वडवाःसुषुवुर्गाश्चगावोश्वाननपिचानघ पेतुर्वृक्षाश्चमे
दिन्यामच्छिन्नाभस्मसात्कृताः ३० बाधंतेवृषभागाश्चगावश्चारुरुहुर्वृषान् राक्षसायातुधानाश्चपिशाचाश्चापिसर्वशः ३१ विप
रीतंजगत्दृष्ट्वामहादेवस्तथागतम् मुमोचभगवाञ्छूलंप्रदीप्ताग्निसमप्रभम् ३२ तत्सपातहरोत्सृष्टमंधकोरसिदुर्धरम् भस्मसाच्चा
करोद्द्रोद्रमंधकंसाधुकंटकम् ३३ ततोदेवगणाःसर्वेमुनयश्चतपोधनाः शंकरंतुष्टुवुश्चैवजगच्छत्रौनिबर्हिते ३४ देवदुंदुभयोनेदुः
पुष्पवृष्टिःपपातह त्रैलोक्यंनिर्वृतंचासीन्नरेंद्रविगतज्वरम् ३५ प्रजगुर्देवगंधर्वानिनृतुश्चाप्सरोगणाः जेपुश्चब्राह्मणावेदान्तिजु-
श्चक्रतुभिस्तदा ३६ ग्रहाःप्रकृतिमापेदुरूहुर्नद्योयथापुरा नजज्वालजलेवन्हिराशाःसर्वाःप्रसेदिरे ३७ मंदरःपर्वतश्रेष्ठःपुनरेवररा
जह श्रियापरमयाजुष्टःसर्वतेजसमुच्छ्रयात् ३८ रेमेसोमश्चभगवान्पारिजातवनेहरः स्वप्रचारान्सुरान्कृत्वाशक्रादीन्धर्मतःप्रभुः
३९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिअंधकवधेसप्ताशीतितमोऽध्यायः ८७ जनमेजयउवाच मुनेंधकव
धःश्राव्यःश्रुतोयंखलुभोमया शांतिश्चयाणांलोकानांकृतादेवेनधीमता १ निकुंभस्यहतंदेहंद्वितीयंचक्रपाणिना यदर्थंच
यथाचैवतद्भवाननुवक्तुमर्हति २ वैशंपायनउवाच श्रद्दधानस्यराजेंद्रवक्तव्यंभवतोनघ चरितंलोकनाथस्यहरेरमिततेजसः
३ द्वारवत्यांनिवसतोविष्णोरतुलतेजसः समुद्रयात्रासंप्राप्तातीर्थेपिंडारकेनृप ४ उग्रसेनोनरपतिर्वसुदेवश्चभारत निक्षिप्तौ
नगराध्यक्षौशेषाःसर्वेविनिर्गताः ५ पृथग्बलःपृथग्धीमान्लोकनाथोजनार्दनः गोष्ठ्यःपृथक्कुमाराणांनृदेवामिततेजसाम् ६ गणि
कानांसहस्राणिनिःसृतानिनराधिप कुमारैःसहवार्ष्णेयैरूपवद्भिःस्वलंकृतैः ७ दैत्याधिवासंनिर्जित्ययदुभिर्दृढविक्रमैः वेश्यानि
वेशितावीरद्वारवत्यांसहस्रशः ८ सामान्यास्ताकुमाराणांक्रीडानार्योमहात्मनाम् इच्छाभोग्यागुणैरेवराजन्यावेषयोषितः ९

शोविं०टी० सप्ताशीतितमोऽध्यायः ८७ मुनेंधकेति श्राव्यः अवश्यंश्रोतव्यः १ निकुंभस्यत्रिदेहस्य २ ३ ४ बलोबलरामः ५ ६ ७ दैत्याधिवासंसमुद्रंनिर्जित्यसस्थाना
दयसार्यतत्रनिवेशिताः ८ वेषयोषितः वरांगनाः ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

भा॰ ह॰ टी॰ १० चक्रवाकयोरिवययोः अन्योन्यं अनुरागस्तेन ११ कादंबरीसुरायस्याः पानेनकलः विकलः १२ विश्वरूपेणसर्वरूपात्मनायावंत्यस्स्त्रियस्तावद्रूपैरित्य अ॰ प॰
११५ र्थः १३ १४ तदेवाहाहमितिचिन्हानिनखक्षतानि १५ शश्लाघिरेआत्मानंप्रशंसिरे १६ करजाः नखाः द्विजाः दंताः तज्जचिन्हानि १७ गोत्रंनामजगिरेगी ९८ २

स्थितिरेषाहिभैमानांकृताकृष्णेनधीमता स्त्रीनिमित्तंभवेद्वैरंमायदूनामितिप्रभो १० रेवत्याचैकयासार्द्धंबलोरैमेनुकूलया चक्रवा
कानुरागेणयदुश्रेष्ठःप्रतापवान् ११ कादंबरीपानकलोभूषितोवनमालया चिक्रीडसागरजलेरेवत्यासहितोबलः १२ षोडशस्त्रीस
हस्त्राणिजलेजलजलोचनः रमयामासगोविंदोविश्वरूपेणसर्वदृक् १३ अहमिष्टामयासार्द्धंजलेवसतिकेशवः इतितामेनिरेसर्वारा
त्रौनारायणस्त्रियः १४ सर्वाःसुरतचिन्हांग्यःसर्वाःसुरततर्पिताः मानमूहुश्चताःसर्वागोविंदेबहुमानजम् १५ अहमिष्टाहमिष्टेतिस्त्रि
ग्धेपरिजनेतदा नारायणस्त्रियःसर्वासुदाशश्लाघिरेशुभाः १६ करजद्विजचिन्हानिकुचाधरगतानिताः दृक्षादृक्षाजहृषिरेदर्पणेकम
लेक्षणाः १७ गोत्रमुद्दिश्यकृष्णस्यजगिरेकृष्णयोषितः पिबंत्यइवकृष्णस्यनयनैर्वदनांबुजम् १८ कृष्णार्पितमनोदृष्यःकांताना
रायणस्त्रियः मनोहरतराराजन्नभवन्नेकनिश्चयाः १९ एकार्पितमनोदृष्ट्योनेर्ष्यंताश्चक्रिरेंगनाः नारायणेनदेवेनतर्प्यमानमनोरथाः
२० शिरांसिगर्वितान्यूहुःसर्वानिरवशेषतः वाल्लभ्यंकेशवमयंवहंत्यश्चारुदर्शनाः २१ ताभिस्तुसहचिक्रीडसर्वाभिर्हरिरात्मवान् वि
श्वरूपेणविधिनासमुद्रेविमलेजले २२ उवाहसर्वगंधाढ्यस्वच्छंवारिमहोदधिः तोयंचालावणंमृष्टंवासुदेवस्यशासनात् २३ गुल्फद
घ्नजानुदघ्नमूरुदघ्नमथापिवा नार्यस्ताःस्तनदघ्नंवाजलसमभिकांक्षितम् २४ सिषिचुःकेशवंपत्न्योधीराइवमहोदधिम् सिषेचता
श्चगोविंदोमेघःफुल्ललताइव २५ अवलंब्यापराःकंठेहरिंहरिणलोचनाः उपगूहस्वमावीरपतामीत्यब्रुवंस्त्रियः २६ काश्चित्काष्ठम
येस्तेरुःप्लवैःसर्वांगशोभनाः क्रौंचबर्हिणनागानामाकारसदृशैःस्त्रियः २७ मकराकृतिभिश्चान्यामीनाभैरपिचापराः बहुरूपाकृति
धरैःसुस्नुवुश्चापराःस्त्रियः २८ स्तनकुंभैस्तथातेरुःकुंभैरिवतथापराः समुद्रसलिलेरम्येहर्षयंत्योजनार्दनम् २९ रराम्सहरुक्मिण्या
जलेतस्मिन्मुदायुतः यूनेवकार्ययोगेनरमतेऽमरसत्तमः ३० तत्तदेवाहिताश्चक्रुर्मुदानारायणस्त्रियः तनुवस्त्रावृतास्तन्व्योलीलयंत्यस्त
थापराः ३१ चिक्रीडवासुदेवस्यजलेजलजलोचनाः यस्यायस्यास्तुयोभावस्तांस्तांस्तेनैवकेशवः ३२ अनुप्रविश्यभावज्ञोनिनायात्म
वशंवशी हृषीकेशोपिभगवान्हृषीकेशःसनातनः बभूवदेशकालेनकांतावशगतःप्रभुः ३३

तंकृतवत्यः १८ १९ २० २१ ११५
२२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ हृषीकेशःइंद्रीयाणामीश्वरोपिकांतावशगतोभवदित्यन्वयः ३३ ६७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वंशरूपेणकुलानुरूपेणवंशोवेणौकुलेवर्गेइतिविश्वः ३४ ३५ ३६ तेकुमाराः ३७ स्वभिनयानिशोभनः अभिनयःपदार्थस्यवाक्यार्थस्यचप्रदर्शनंयत्र तानि ३८ पंचचूडांअप्सरसंकौबेर्यः कौबेरीःवराप्सराः श्रेष्ठा अप्सरसः विश्वरूपेणजीवन्नियंतृत्वेनहेतुनानिमित्तेन ३९ ४० प्रविशध्वंमनोहारिण्योभवंत्यः ४१ ४२ ४३ भैमानांभीमजानांयादवानांसमीपमितिशेषः वरोप्सराः अप्सरोवराः ४४ ४५ जलवाद्यान्यवादयन्नित्यपिपाठः ४६ ४७ ४८ तान्भैमान्बहून्वातस्कंधान् बहुषुवातस्कंधेषु आवहप्रवहादिषुउर्ध्वोर्ध्वेषुपातमार्गेषुउत्तरोत्तररमणीयेषुउक्षिप्यनीत्वातत्रविजह्रुरितिपूर्वेणान्वयः ततश्चस्तेभैमा-

कुलशीलसमोस्माकंयोग्योयमितिमेनिरे वंशरूपेणवर्ततमंगनास्ताजनार्दनम् ३४ तदादाक्षिण्ययुक्तंतंस्मितपूर्वाभिभाषणम् कृष्णंभार्याश्चकमिरेभक्त्याचबहुमेनिरे ३५ पृथग्गोष्ठ्यःकुमाराणांप्रकाशस्त्रीगणैःसह अलंचक्रुजलंवीराःसागरस्यगुणाकराः ३६ गीतनृत्यविधिज्ञानांतासांस्त्रीणांजनेश्वर तेजसाप्याहृतानांतेदाक्षिण्यात्तस्थिरेवशे ३७ शृण्वंतश्चारुगीतानितथास्वभिनयान्यपि तूर्याण्युत्तमनारीणांसुसुहुर्यदुपुंगवाः ३८ पंचचूडांततःकृष्णः कौबेर्यश्चवराप्सराः माहेंद्रीश्चानयामासविश्वरूपेणहेतुना ३९ ताःप्रोवाचप्रमेयात्मासांत्वयित्वाजगत्प्रभुः उत्थापयित्वाप्रणताःकृतांजलिपुटास्तथा ४० क्रीडायुवत्योभैमानांप्रविशध्वमशंकिताः मत्प्रियार्थंवरारोहारमयध्वंचयादवान् ४१ दर्शयध्वंगुणान्सर्वान्नृत्यगीतेरहस्सुच तथाभिनययोगेषुवाद्येषुविविधेषुच ४२ एवंकृतेविधास्यामिश्रेयोवामनसेप्सितम् मच्छरीरसमाह्येतेसर्वेनिरवशेषतः ४३ शिरसाज्ञांतुताःसर्वाःप्रतिगृह्यहरेस्तदा क्रीडायुवत्योविविशुर्भैमानामप्सरोवराः ४४ ताभिःप्रविष्टमात्राभिर्द्योतितःसमहार्णवः सौदामिनीभिर्नभसिघनवृंदमिवानघ ४५ ताजलेस्थलवत्स्थित्वाजगुश्चाप्यथवादयन् चक्रुश्चाभिनयसम्यक्स्वर्गावासइवांगनाः ४६ गंधैर्माल्यैश्चताद्दिव्यैर्वस्त्रैश्चायतलोचनाः हेलाभिर्हास्यभावैश्चजह्रुर्भैममनांसिताः ४७ कटाक्षेरिंगितैर्हास्यैःकेलिरोषैःप्रसादितैः मनोनुकूलैर्भैमानांसमाजह्रुर्मनांसिताः ४८ उक्षिप्योत्क्षिप्यचाकाशंवातस्कंधान्बहूंश्चतान् मदिरावशगान्भैमानानयंतिवराप्सराः ४९ कृष्णोपितेषांप्रीत्यर्थंविजह्रेवियतिप्रभुः सर्वैःषोडशभिःसार्द्धंस्त्रीसहस्रैर्मुदान्वितः ५० प्रभावज्ञास्तुतेवीराःकृष्णस्यामिततेजसः नजग्मुर्विस्मयंभैमागांभीर्यपरमास्थिताः ५१ केचिद्रैवतकंगत्वापुनरायांतिभारत गृहाण्यन्येवनान्यन्येकांक्षितान्परिमर्दनः ५२ अपेयःपेयसलिलःसागरश्चाभवत्तदा आज्ञयालोकनाथस्यविष्णोरतुलतेजसः ५३ अधावन्स्थलवच्चापिजलेजलजलोचनाः गृह्यहस्तेतथानार्योयुक्तामज्जंस्तथापिच ५४

स्ताःनारीमानयंति ४९ एतांदिव्यतिक्रीडांकृष्णोपिचकारेत्याह कृष्णोपिसर्वैरिति अष्टोत्तरशताधिकंयाह्यं ५० विस्मयंदिविक्रीडाकृतं ५१ ५२ ५३ इच्छयास्थलवज्जलेप्यधावन् इच्छयानिमज्जंत्यःमज्जंश्चेत्यर्थः ५४ ७९ ७९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७५ ७६ ७७ परिच्छदस्यषोडशस्त्रीसहस्रपरिवारस्यानुरूपं ७८ ७९ ८० ८१ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायां अष्टाशीतितमोऽध्यायः ८८ अथजलक्रीडावर्णनं रेमेबलइति कादंबरीपानकलः कदंबप्रसूतमदिरापानेनमनोहरः रेवतिमितिङस्वलसार्वछंदोनुरोधात् १ २ ३ वेलालयंसागरम् ४ ताअप्सरसः तासुचकाश्चनवाद्यानुरूपंननृतुः अन्याः सम्यक्सर्वभावेनजगुः ५ अभिनयेनहस्तादिचालनेनलब्धं-

नक्षुत्पिपासानग्लानिर्नचिंताशोकएवच आविवेशतदाभैमान्प्रभावाच्चक्रपाणिनः ७५ अप्रशांतमहातूर्यागीतनृत्योपशोभिताः बभूवुःसागरक्रीडा भैमानाममिततेजसाम् ७६ बहुयोजनविस्तीर्णंसमुद्रसलिलाशयम् रुध्वाचिक्रीडुरिंद्राभा भैमाः कृष्णाभिरक्षिताः ७७ परिच्छदस्यानुरूपंयानपात्रमहात्मनः नारायणस्यदेवस्यविहितंविश्वकर्मणा ७८ रत्नानियानित्रैलोक्येविशिष्टानिविशांपते कृष्णस्यतानिसर्वाणियानपात्रेमितौजसः ७९ पृथक्पृथङ्निवासाश्चस्त्रीणांकृष्णस्यभारत मणिवैडूर्यचित्रास्ताः कार्तस्वरविभूषिताः ८० सर्वर्तुकुसुमाकीर्णाःसर्वगंधाधिवासिताः यदुसिंहैःशुभैर्जुष्टाःशकुनैःस्वर्गवासिभिः ८१ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुप० भानुमतीहरणेअष्टाशीतितमोऽध्यायः ८८ वैशंपायनउवाच रेमेबलश्चंदनपंकदिग्धःकादंबरीपानकलःपृथुश्रीः रक्तेक्षणोरेवतिमाश्रयित्वाप्रलंबबाहुःस्खलितःप्रयातः १ नीलांबुदाभेवसनेवसानश्चंद्रांशुगौरोमदिराविलाक्षः रराजरामोंबुदमध्यमेत्यसंपूर्णबिंबोभगवानिवेंदुः २ वामैककर्णामलकुंडलश्रीःस्मेरन्मनोज्ञाब्जकृतावतंसः निरीक्ष्यकटाक्षप्रियसासुमोदरामोमुखंचाविभिवीक्ष्यमाणः ३ अथाज्ञयाकंसनिकुंभशत्रोरुदाररूपोप्सरसांगणःसः द्रष्टुंमुदारेवतिमाजगामवेलालयंस्वर्गसमानमृत्या ४ तारेवतीचाप्यथवापिरामंसर्वाननमस्कृत्यवरांगयष्ट्यः वाद्यानुरूपंननृतुःस्वगाग्र्यःसमंततोन्याजगिरेचसम्यक् ५ चतुर्स्तथैवाभिनयेनलब्धंयथावदेषांप्रियमर्थयुक्तम् हृद्यानुकूलंचबलस्यतस्यतथाज्ञयारैवतराजपुत्र्याः ६ चक्रुर्हसत्यश्चतथैवरासंतद्देशभाषाकृतिवेषयुक्ताः सहस्ततालंललितंसलीलंवरांगनामंगलसंभृतांग्यः ७ संकर्षणाधोक्षजनंदनानिसंकीर्तयंत्योयुचमंगलानि कंसप्रलंबादिवधंचरम्यंचाणूरघातंचतथैवरंगे ८ यशोदयाचप्रथितंयशोयदामोदरत्वंचजनार्दनस्य वधंतथारिष्टकधेनुकाभ्यांव्रजेचवासंशकुनीवधंच ९ तथाचभग्नौयमलार्जुनौतौसृष्टिंवृकाणामपिकालयुक्ताम् सकालियोनागपतिर्ह्रदेचकृष्णेनदांतश्चयथादुरात्मा १० शंखकदादुन्हरणंचवीरप्रख्यातपल्लानांमधुसूदनेन गोवर्द्धनोर्थेचगवांधृतोभूद्यथाचकृष्णेनजनार्दनेन ११

शिक्षितंयत्वाद्यादिएषांयदूनां
अर्थयुक्तंप्रयोजनवत् हृद्यंचतदनुकूलंच ६ रासंगानं ७ कंसप्रलंबादिवधंतदनुकारिनृत्यंचक्रुरित्यर्थः ८ अरिष्टधेनुकाभ्यांअरिष्टधेनुकयोः ९ १० शंखकदात् शंखादिनिधियुक्तात्तस्माद्देवहृदात् ११

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५५ ५६ ५७ स्वस्तिकाः शारीफलकाकाराः ५८ कैलासादियत्तुल्छंदोययेष्टरूपित्वंययेष्टकारित्वंचयेषांते ५९ मसारोमरकतः गलुश्चंद्रकांतअर्कः सूर्य-
कांतः तैर्व्यस्तैर्समस्तैर्वाचित्ररागैरंचितैरित्यर्थः चित्रभक्तिशतैः नानारूपास्तरणशतैः ६० आक्रीडगरुडः लीलागरुडसदृशाः कनकरीनिभिः कनकधाराभिः
६१ ६२ पोतैर्जलावखेटयोग्यैः क्षुद्रनौकारूपैः यानपात्रैः सर्वसंभारसंभृताभिः सामग्रीनौकाभिः अतिवेगवतीभिर्दीर्घनौकाभिः झिल्लिकाभिः प्रासादाद्यंकि

भक्ष्यभोज्यानिपेयानिचोष्यंलेह्यंतथैवच बहुप्रकारंमनसाध्यातेतेषांभवत्सुत ५५ अम्लानमाल्यधारिण्यस्ताःस्त्रियस्तानिंदिता
न् रहःसुरमयांचक्रुःस्वर्गेदेवरतानुगाः ५६ नौभिर्गृहप्रकाराभिश्चिक्रीडुरपराजिताः तास्तानुलिप्तमुदिताःसायान्हेधककृष्णयः
५७ आपताश्चतुरस्त्राश्चवृत्ताश्चस्वस्तिकास्तथा प्रासादानौषुकौरव्यविहिताविश्वकर्मणा ५८ कैलासमंदरच्छंदामेरुच्छंदास्तथै
वच तथानानावयश्छदातथेहामृगरूपिणः ५९ वैडूर्यतोरणाश्चित्राश्चित्राभिर्मणिभक्तिभिः मसारगल्वर्कमयैश्चित्रभक्तिशतैरपि
६० आक्रीडगरुडच्छंदाश्चित्राः कनकरीतिभिः क्रौंचच्छदाःशुकच्छदागजच्छदास्तथापरे ६१ कर्णधारैर्गृहीतास्तानावःकार्तस्वरो
ज्ज्वलाः सलिलंशोभयामासुःसागरस्यमहोर्मिमत् ६२ समुच्छ्रितैःसितैःपोतैःयानपात्रैस्तथैवच नौभिश्चाझिल्लिकाभिश्चशुशु
भेवरुणालयः ६३ पुराण्याकाशगामीवगंधर्वाणामितस्ततः प्रभमुःसागरजलेभैमयानानिसर्वतः ६४ नंदनच्छंदयुक्तेषुयानपा
त्रेषुभारत नंदनप्रतिमंसर्वंविहितंविश्वकर्मणा ६५ उद्यानानिसभावृक्षादीर्घिकाःस्यंदनानिच निवेशितानिशिल्पानितावृशान्ये
वसर्वथा ६६ स्वर्गच्छंदेषुचान्येषुसमासातस्वर्गसन्निभाः नारायणाज्ञयावीरविहिताविश्वकर्मणा ६७ वनेषुरुरुवुर्हृद्यंमधुरंचै
वपक्षिणः मनोहरतरंचैवभैमानाममिततेजसाम् ६८ देवलोकोद्भवाःश्वेताविलेपुःकोकिलास्तदा मधुराणिविचित्राणियदूनांकांक्षि
तानिच ६९ चंद्रांशुसमरूपेषुहर्म्यपृष्ठेषुबर्हिणः ननृतुर्मधुरारावाःशिखंडिगणसंवृताः ७० पताकापानपात्राणांसर्वाःपक्षिगणा
युताः भ्रमरैरुपगीताश्चस्त्रग्दामासक्तवासिभिः ७१ नारायणाज्ञयावृक्षाःपुष्पाणिमुमुचुर्भृशम् ऋतवश्चारुरूपाणिविहायसिग
तास्तदा ७२ ववौमनोहरोवातोरतिखेदहरःसुखः रजोभिःसर्वपुष्पाणांपृक्तश्चंदनशीतभृत् ७३ शीतोष्णमिच्छतांतत्रबभूव
वसुधापते वासुदेवप्रसादेनभैमानांक्रीडतांतदा ७४

ताभिर्नृत्यगीतादिलीलायोग्याभिरायताभिर्नौभिरितिभेदः तत्रपोताः विमानवत्संच
रंतियानपात्राणिनंदनसमृद्धिमंतिनावोरथदीर्घिकादियुक्ताः झिल्लिकाःसर्वस्वर्ग्यपदार्थवत्यः ६३ इतिक्रमात्श्लोकचतुष्टयेनाहपुराणीत्यादिना ६४
६५ ६६ ६७ वनेषुनौस्थेष्वेव ६८ ६९ ७० ७१ ७२ ७३ इच्छतांइच्छयाबभूव ७४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१२ १३ बाल्हाहकजंबुमालिभ्यांसहयत्तेयुद्धेतच्चपाद्मेप्रसिद्धम् १४ १५ कुर्दधातुरत्रगानार्थःचुकूर्दजगौ १६ १७ १८ १९ २० यानपात्रं
नौः २१ २२ २३ हेराजपुत्रमुनिरत्रदीर्घाभावःछांदसः हेलाविकारैः लीलानुकारैः रासप्रणेतामुनिराजपुत्रेस्यापिपातः २४ २५ २६ २७

कुब्जांयथागंधकपीषिकांचकुब्जलहीनांकृतवांश्चकृष्णः अवामनंवामनकंचचक्रेकृष्णोयथात्मानमजोप्यनिंद्यः १२ सौभप्रमा
थश्चहलायुधश्चवधःसुरस्याप्यथदेवशत्रोः गांधारकन्यावहनेनृपाणांरथेतथायोजनमूर्जितानाम् १३ ततःसुभद्राहरणेजयश्च
दृष्टश्चबाल्हाहकजंबुमाले रत्नप्रवेकश्चयुधार्जितैर्यत्समाहृतंशक्रसमक्षमासीत् १४ एतानिचान्यानिचचारुरूपाजगुःस्त्रियःप्रीति
कराणिराजन् संकर्षणाधोक्षजहर्षणानिचित्राणिचानेककथाश्रयाणि १५ कादंबरीपानमदोत्कटास्तुबलःपृथुश्रीःसुचुकूर्दरा
मः सहस्ततालंमधुरंसमंचसभार्ययारेवतराजपुत्र्या १६ तंकूर्दमानंमधुसूदनश्चदृष्ट्वासमहात्माचमुदान्वितोभूत् चुकूर्दसत्यासहि
तोमहात्माहर्षागसार्थंचबलस्यधीमान् १७ ससुद्भ्रात्रार्थसूथागतश्चचुकूर्दपार्थोनरलोकवीरः कृष्णेनसार्द्धंमुदितश्चुकूर्दसुभद्र
याचैववरांगयष्ट्या १८ गदश्चधीमानथसारणश्चप्रद्युम्नसांबौनृपसात्यकिश्च सात्राजितीसूनुरुदारवीर्यःसुचारुदेष्णश्चसुचारुरू
पः १९ वीरौकुमारौनिशठोल्मुकौचरामात्मजौवीरतमौचुकूर्दतुः अक्रूरसेनापतिशंकरश्चतथापरेभैमकुलप्रधानाः २० नद्यानपात्र
ववृधेतदानींकृष्णप्रभावेनजनेंद्रपुत्र आपूर्णमापूर्णमुदारकीर्तेश्चुकूर्दयद्धिनृपभैममुख्यैः २१ तेरासमस्तेरतिकूर्दमानेयदुप्रवीरैरम
रप्रकाशैः हर्षान्वितंवीरजगत्तथाभूच्छुभमप्रपापानिजनंदसूनौ २२ देवोतिथिस्तत्रचनारदोथविप्रप्रियार्थंसुरकेशिशत्रोः चुकूर्द
मध्येयदुसत्तमानांजटाकलापागलितैकदेशः २३ रासप्रणेतामुनिराजपुत्रःसएवतत्राभवदप्रमेयः मध्येचगत्वासचुकूर्दभूयोहेला
विकारैःसविडंबितांगः २४ ससत्यभामामथकेशवंचपार्थंसुभद्रांचबलंचदेवम् देवींतथारेवतराजपुत्रींसुहृत्सुसहस्यजहासधी
मान् २५ ताहासयामाससकृष्णधैर्ययुक्तास्तैस्तैरुपायैःपरिहासशीलः चेष्टानुकारैर्हसितानुकारैर्लीलानुकारैरपरैश्चधीमान् २६
आभाषितंकिंचिदिवोपलक्ष्यनादातिनादान्भगवान्मुमोच हसन्विहासाश्चजहासहर्षाद्धास्यात्प्रमेकृष्णविनोदनार्थम् २७ कृ
ष्णाज्ञयासातिशयानितत्रयथानुरूपाणिददुर्बुवल्यः रत्नानिवस्त्राणिचरूपवंतिजगत्प्रधानानिनृदेवसूनोः २८ माल्यानिचस्वर्गस
मुद्भवानिसंतानदामान्यतिमुक्तकानि सर्वर्तुकान्यप्यन्यस्तदानींददुर्हरेरिंगितकालतज्ञाः २९ रासावसानेत्वथगृह्यहस्तेमहामु
निनारदमप्रमेयः पपातकृष्णोभगवान्ससुद्रेसात्राजितीचार्जुनमेवचाथ ३० ११७

२८ २९ ३० ध० ध० ध०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३१ सहार्द्धभैमाः अर्धभैमैः सहवर्तमानाः पुत्रयोर्व्यत्यासः समलद्योतनार्थः ३२ ३३ वेलिकातीरसंबंधिनीयत्कुरवापादयोः सुखस्पर्शायदूरुखंतरमिती
ति ३४ ३५ बिभृत्स्वबिभृहिधारयेत्यर्थः किलालमत्ररक्तं ३६ मैरेयाद्योमद्यभेदाः मैरयमत्रगौडीसुरापौष्ययानिषेधात् माध्वीकसुरामधुवृपुष्पसंभ
वाः आसवस्तालादिसंभवाः स्वतोयेस्वजलोपरिस्थापयेत्यत्रकुस्वखमार्षपपुःपिबेयुः ३७ व्यलीकमन्याय्यं ३८ ३९ साकारं आकारः कामगीतंतेनसह

उवाचचामेयपराक्रमोथशैनेयमीषत्प्रहसन्पृथुश्रीः द्विधाकृतास्मिन्पततात्रभूत्वाक्रीडाजलेनोस्तुसहांगनाभिः ३१ सरेवतीको
रक्तबलोद्धनेतापुत्रामदीयाश्चसहार्द्धभैमाः भैमार्द्धमेवाथबलात्मजाश्चसत्यक्षिणःसंतुसमुद्रतोये ३२ आज्ञापयामासततःसमु-
द्रंकृष्णः स्थितप्राञ्जलिनप्रतीतः सुगंधतोयोभवमृष्टतोयस्तथाभवग्राहविवर्जितश्च ३३ दृश्याश्चतेरत्नविभूषिता तुसावेलिका
भूरथयत्सुखाच मनोनुकूलंचजनस्ययत्तत्त्वयच्छविज्ञास्यसिमत्प्रभावात् ३४ भवस्वपेयोप्यथचेष्टपेयोजनस्यसर्वस्यमनोनुकू
लः वैडूर्यमुक्तामणिहेमचित्राभवंतुमत्स्यास्त्वयिसौम्यरूपाः ३५ बिभृत्स्वचलंकमलोत्पलानिसुगंधसुस्पर्शरसक्षमाणि षट्पा
दजुष्टानिमनोहराणिकीलालवर्णैश्चसमन्वितानि ३६ मैरेयमाध्वीकसुरासवानांकुंभांश्चपूर्णान्स्थपयस्वतोये जांबूनदं पानंनि
मित्तमेषापात्रंपपुर्येषुददस्वभैमाः ३७ पुष्पोच्चयैर्वासितशीततोयोभवाप्रमत्तःखलुतोयराशे यथाव्यलीकंनभवेद्यदूनांसस्त्रीज
नानांकुरुतत्प्रयत्नम् ३८ इतीदमुक्त्वाभगवान्समुद्रंततःप्रचिक्रीडसहार्जुनेन सिषेचपूर्वंनृपनारदंतुसात्राजितीकृष्णसुरेंगित
ज्ञा ३९ ततोमदावर्जितचारुदेहःपपातरामःसलिलेसलीलम् साकारमालंब्यकरंकरेणमनोहरांरेवतराजपुत्रीम् ४० कृष्णात्म-
जायेत्वथभैमसुख्याराभस्यपश्चात्पतिताःसमुद्रे विरागवस्त्राभरणाःप्रहृष्टाःक्रीडाभिरामामदिराविलाक्षाः ४१ शेषास्तुभैमाह
रिमश्रुपेताःक्रीडाभिरामानिशठोल्मुकाद्याः विचित्रवस्त्राभरणाश्चमत्ताःसंतानमाल्यावृतकंठदेशाः ४२ वीर्योपपन्नाःकृतचारु
चिन्हाविलिप्तगात्राजलपत्रहस्ताः गीतानितद्देशमनोहराणिस्वरोपपन्नान्यथगायमानाः ४३ ततःप्रचक्रुर्जलवादितानिनानास्व
राणिप्रियवाद्यघोषाः सहाप्सरोभिस्त्रिदिवालयाभिः कृष्णाज्ञयावेशवधूशतानि ४४ आकाशगंगाजलवादनज्ञाःसदासुवृत्तो-
मदनैकचित्ताः अवादयंस्ताजलदर्दुरांश्चवाद्यानुरूपंजगिरेचहृष्टाः ४५ कुशेशयाकोशविशालनेत्राःकुशेशयापीडविभूषिता
श्च कुशेशयानांरविबोधितानांजहुःश्रियंताःसुरवारमुख्याः ४६

यथास्यात्तथा ४० ४१ ४२ ४३ ४४ जलदर्दुरान्
जलवाद्यविशेषान् ४५ कुशेशयाकोशाःकमलकलिकाआपीडोमुकुटं सुराणामिवचारूणिदौर्गंध्यादिरहितानिसुखानियासांताः ४६ ६९ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४७ ४८ पक्षेएकत्रास्थितोबलंसिषेचेत्यन्वयः सचबलः ४९ ५० तेभ्रेमानोपरेमुः क्रीडांनतत्यजुः ५१ ५२ ५३ ५४ विविक्तगात्राः शुद्धवपु
षः विभक्तगात्राइतिपाठेचंदनाद्यनुलिप्तावयवाः ५५ यत्सन्नियोगाः यदनुशिष्टाःप्रतीताः प्रख्याताः यथानुकूलंयथाहितं ५६ फलप्रभावा अम्लिका अम्ल
तायेषुतानि चुक्रोत्तरेणचुक्रतोधिकेनसूदाः सूपकाराः सूयाइतिवापाठः निष्टप्तशूलान्शूलंसमारोप्यनिष्टप्तानित्यर्थः निष्टप्तशूल्यानितिवा निष्टप्तशूल्यानुअ

स्त्रीवक्त्रचंद्रैः सकलेंदुकल्पैःरराजराजंच्छतशःससुद्रः यदृच्छयादेवविधानतोवानभोयथाचंद्रसहस्रकीर्णम् ४७ ससुद्रमेघःस
रराजराजंच्छतह्रदास्त्रीप्रभयाभिरामः सौदामिनीभिन्नइवांबुनाथोदेदीप्यमानोनभसीवमेघः ४८ नारायणश्चैवसनारदश्चासि
षेचपक्षेकृतचारुचिन्हः बलःसपक्षंकृतचारुचिन्हःसचैवपक्षंमधुसूदनस्य ४९ हस्तप्रमुक्तैर्जलयंत्रकैश्चप्रहृष्टरूपाः सिषिचुस्तदा
नीम् रागोद्धताधारुणिपानमत्ताःसंकर्षणाधोक्षजदेवपत्न्यः ५० आरक्तनेत्राजलमुक्तिसक्ताःस्त्रीणांसमक्षांपुरुषायमाणाः तेनोप
रेमुः सुचिरंचभैमामानंवहंतोमदनंमदंच ५१ अतिप्रसंगंतुविचिंत्यकृष्णस्तान्वारयामासरथांगपाणिः स्वयंनिवृत्तोजलवाद्यशब्दैः
सनारदःपार्थसहायवांश्च ५२ कृष्णेंगितज्ञाजलयुद्धसंगाद्भैमानिवृत्ताहृढमानिनोपि नित्यंतथानंदकराःप्रियाणांप्रियाश्चतेषांननृ
तुःप्रतीताः ५३ नृत्यावसानेभगवानुपेंद्रस्तत्याजधीमानथतोयसंगान् उत्तीर्यतोयादनुकूलंलेपजग्राहृद्धत्वासुनिसत्तमाय ५४ उ-
पेंद्रमुत्तीर्णमथासुहृद्याभैमाहितेतत्यजुरेवतोयम् विभक्तगात्रास्तथयानुभूमिंकृष्णाज्ञयातेयदुपुरप्रमेयाः ५५ यथानुपूर्व्यान्वय-
थावयश्चयत्सन्नियोगाश्चतदोपविष्टाः अन्नानिवीराबुभुजःप्रतीताःपपुश्चपेयानियथानुकूलम् ५६ मांसानिपक्वानिफलाम्लिका
निचुक्रोत्तरेणाथचदाडिमेन निष्टप्तशूलान्शकलानुपस्मृश्चतत्रोपजह्रुः शुचयोथसूदाः ५७ सुस्विन्नशूलानुसहिषांश्चबालान्शू
लानुसविष्टप्तघृतावसिक्तान् वृक्षाम्लसौवर्चलचुक्रपूर्णान्पौरोगवोक्त्याउपजह्रुरेषाम् ५८ पौरोगवोक्त्याविधिनामृगाणांमांसा
निसिद्धानिचपीवराणि नानाप्रकाराण्युपजह्रुरेषांमृष्टानिपक्वानिचचुक्रचूतैः ५९ पार्श्वानिचान्येशकलानितत्रददुःपशूनांघृतमृ
क्षितानि सामुद्रचूर्णैरवचूर्णितानिचूर्णेनमृष्टेनससमारिचेन ६० समूलकैर्दाडिममातुलिंगैःपर्णासहिंग्वार्द्रकभूस्तृणैश्च तदोपदंशैः
रुक्मुखोत्तरैस्तेपानानिहृष्टाःपपुरप्रमेयाः ६१

तितसपक्वान्शकलान्खंडितान्पशूनुहरिणसूकरादीन् ५७ सुस्विन्नशूलमारोप्यस्विन्ना
नित्यर्थः वृक्षाम्लंवेअम्लवेतसादिपौरोगवोक्त्यासूदोक्तक्रमेणउपजह्रुः परिवेषणंचक्रुः ५८ पीवराणिपुष्टानि ५९ ६० मातुलिंगानिरुद्धकानि प-
र्णासः कुठेरकंभूस्तृणंशाकभेदःउपदंशैःपानपात्रैः ६१ ६२ ६२ ६२ ६२ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कट्वांकः कटुरसः तद्युक्तकाष्ठमूलानियेषुतैः ६२ आर्द्रादीन्स्वाद्यविशेषान् किलाटान्महिषीदुग्धसिक्तान् ६३ अपानपाः त्यक्तमद्यादिपानाः पानमित्यपल क्षणं मांसादेः ६४ आरनालान् कांजिकानिरसालानितिपाठेतु रसालान् अपरिमित घृतशार्करादिसंस्कृतान् पालवीषु कपर्दनिर्मितपात्रेषु वा स्वच्छरावेषु स्वाद नु अरवादन् ६५ ६६ ६७ षड्ग्रामाः स्थानानियेषां रागाणां तैर्यः समाधिः चित्तैकाग्र्यं तत्प्रयस्यां तां तेच मध्यमशुद्धभिन्नगौडमिश्रगीतरूपाः हल्लीसकं बह्वीभिः स्त्रीभिः सह नृत्यं ऋल्लीसकमितिपाठे ऋर्झस्य वाद्यविशेषं झल्लीसकमितिपाठे निषादर्षभादिसस्वरयुतं झल्लीसकं वाद्यविशेषं जग्राहेति विपरिणमय्य क्रियासंबं

कट्वांकमूलैः पिप्पलीक्षिभिः घृताम्लसौवर्चलतैलसिक्तैः मैरेयमाध्वीकसुरासवांस्ते पपुः प्रियाभिः परिवार्यमाणाः ६२ श्वेतेनयुक्ता नपशोणितेन भक्ष्यान्सुगंधान्लवणान्वितांश्च आर्द्रान्किलाटान्घृतपूर्णकांश्च नानाप्रकारानपिखंडखाद्यान् ६३ अपानपाश्चो द्धवभोजसिंहाः शाकैश्च सूपैश्च बहुप्रकारैः पेयैश्च दध्नापयसा च वीराः स्विन्नानिय जनान्बुभुजः प्रहृष्टाः ६४ तथारनालांश्च बहुप्रकारा न्पपुः सुगंधानपि पालवीषु भृतं पयः शर्करया च युक्तं फलप्रकारांश्च बहूनखादन् ६५ तृप्ताः प्रवृत्ताः पुनरेव वीरास्ते भैमसुख्या वनि तासहायाः गीतानि रम्याणि जगुः प्रहृष्टाः कान्ताभिनीतानि मनोहराणि ६६ आज्ञापयामास ततः समस्यां निशि प्रहृष्टो भगवानुपेंद्रः छा लिक्यगेयं बहुसन्निधानं यद्देवगांधर्वमुदाहरंति ६७ जग्राह वीणामथ नारदस्तु षड्ग्रामरागादिसमाधियुक्ताम् हल्लीसकं तु स्वयमेव कृ ष्णः सवंशघोषं नरदेवपार्थः ६८ मृदंगवाद्यानपरांश्च वाद्यान्वराप्सरास्ता जगृहुः प्रतीताः आसारितांते च ततः प्रतीता रंभोत्थिता साभिन यार्थतज्ज्ञा ६९ तयाभिनीते वरगात्रयष्ट्या तुतोष रामश्च जनार्दनश्च अथोर्वशी चारुविशालनेत्रा हेमा च राजन्नथ मिश्रकेशी ७० ति- लोत्तमा चाप्यथ मेनका च एतास्तथान्याश्च हरिप्रियार्थम् जगुस्तथैवाभिनयं च चक्रुरिष्टैश्च कामैर्मनसोनुकूलैः ७१ तावासुदेवेप्यनु रक्तचित्ताः स्वगीतनृत्याभिनयैरुदारैः नरेंद्रसूनो परितोषितेन तांबूलयोगाश्च वराप्सरोभिः ७२ तदागताभिर्नृवराहृतास्तु कृष्णोप स्यासानमयास्तथैव फलानि गंधोत्तमवंति वीराश्छालिक्यगांधर्वमथाहृतं च ७३

धः वंशघोषेण सह यथास्यात्तथा ६८ पार्थस्तु मृदंगाद्यान्जग्राहेत्यनुषंगः अ परांश्च वाद्यान्वराप्सरसो जगृहुरितिसंबंधः आसारितांत इति भरतो मुनिश्चतुर्विधमासारितं नृत्यविधावुपदिदेशेति प्रथमं नर्तकीप्रवेशः ततश्चासारितार्थाभिनय नाट्येन नः ताल्लानुगस्यांगाहरणं ततो देवताचिन्हरूपेण नृत्यं एवं चतुर्ष्वप्यासारेषूक्तं एवमेष नर्तकीप्रवेशो भरतस्यानुमतः तदंते रंभा नर्तकी उत्थिता प्रविशायतः सा अ भिनयचतुरा ६९ अभिनीते अभिनये कृते द्वितीयासारे उर्वशी उत्थिता इत्यनुषंगः ७० ७१ ताः रंभाद्याः परितोषितेन परितोषणेन तोषयामासे तिशेषः तांबूलयोगाश्चेतिपद त्रयं वाक्यं ७२ तदा जलक्रीडायामागताभिः पंचचूडाकौबेरी माहेंद्रीभिश्च तांबूलयोगाः गर्वांकुरा आहृताः वयमेताभ्योधिका इति स्वगुणा अविष्कृता इत्यर्थः तदेवाह फ लानीत्येकश्लोको वाक्यं ७३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कृष्णोच्छयामानुषाणामनुग्रहाय त्रिदिवात्तानभिछालिक्यंफ्रवि आहृतंफलानिचदेवयोग्यानि आहृतानिततः किमतआह स्थितमितिप्रद्युम्नादौ ७४ पंचभिः कृष्णरामप्रद्युम्नानिरुद्धसांबैः ७५ ७६ दुःस्वप्नप्रणाशंकरोतितथापापंचविहंतीत्यन्वयः ७७ यच्छालिक्यगांधर्वंसुरावासगतोरेवतः शृण्वन् चतुर्युगानां सहस्रंएकंदिवसंमेने ततएवकुमारजातिप्रमुखागांधर्वभेदाः प्रवृत्ताइतिवाक्यार्थः ७८ ७९ ८० स्थानेतद्युक्तंनालंइतिपाठःक्रमः ८१ लेशाभिधानांसु

कृष्णेच्छयाचत्रिदिवान्नृदेव अनुग्रहार्थंभुविमानुषाणाम् स्थितंचरम्यंहरितेजसैवप्रयोजयामाससरौक्मिणेयः ७४ छालिक्यगांधर्वसुदारबुद्धिस्तेनैवतांबूलमथप्रयुक्तम् प्रयोजितंपंचभिरिंद्रतुल्यैश्छालिक्यमिष्टंसततंनराणाम् ७५ शुभावहंवृद्धिकरंप्रशस्तमंगल्यमेवाथतथायशस्यम् पुण्यंचपुष्ट्यभ्युदयावहंचनारायणस्येष्टमुदारकीर्तेः ७६ भरापहंधर्मभरावहंचदुःस्वप्ननाशंपरिकीर्त्यमानम् करोतिपापंचतथाविहंतिशृण्वन्सुरावासगतोनरेंद्रः ७७ छालिक्यगांधर्वमुदारकीर्तिर्मेनेकिलैकंदिवससहस्रम् चतुर्युगानांनृपरेवतोऽथततःप्रवृत्ताचकुमारजातिः ७८ गांधर्वजातिश्चतथापरापिदीपाद्यथाद्वीपशतानिराजन् विबुद्धकृष्णाश्चसनारदश्चप्रद्युम्नमुख्यैर्नृपभैमसुख्यैः ७९ विज्ञानमेतद्विपरेयथावदुद्देशमात्रांश्चजनास्तुलोके जानंतिछालिक्यगुणोदयानांतोयंनदीनामथवासमुद्रे ८० ज्ञातुंसमर्थोहिमवान्गिरिर्वाफलाग्रतोवागुणतोऽथवापि शक्यंनछालिक्यमृतेतपोभिःस्थानेविधानान्यथमूर्च्छनाश्च ८१ षड्ग्रामरागेषुचतत्रकार्यंतस्यैकदेशावयवेनराजन् लेशाभिधानांश्चकुमारजातिंनिष्ठांसुदुःखेननराःप्रयाति ८२ छालिक्यगंधर्वगुणोदयेषुयेदेवगंधर्वमहर्षिसंघाः निष्ठांप्रयातीत्यवगच्छबुद्ध्याछालिक्यमेवंमधुसूदनेन ८३ भैमोत्तमानांनरदेवदत्तंलोकस्यचानुग्रहकाम्ययैव गतप्रतिष्ठाममरोपगेयंबालासुवानश्चतथैववृन्दाः ८४ क्रीडंतिभैमाःप्रसवोत्सवेषुपूर्वंतुबालाःसमुदावहंति धन्याश्चपश्चात्प्रतिमानयंतिस्थानेषुनित्यंप्रतिमानयंति ८५ मर्त्येषुमर्त्यान्यदवोतिवीराःस्ववंशधर्मंसमनुस्मरंतः पुरातनंधर्मविधानतज्ज्ञाःप्रीतिःप्रमाणंनवयःप्रमाणम् ८६ प्रीतिप्रमाणानिहिसौहृदानिप्रीतिपुरस्कृत्यहितेदशार्हाः वृष्ण्यंधकाःपुत्रसखाबभूवुर्विसर्जिताःकेशिविनाशनेन ८७ स्वर्गंगतश्चाप्सरसांसमूहाःकृत्वाप्रणामंमधुकसशत्रोः प्रहृष्टरूपस्यसुहृष्टरूपोबभूवहृष्टःसुरलोकसंघः ८८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिभानुमतीहरणेछालिक्यक्रीडावर्णनंनामएकोननवतितमोऽध्यायः ८९

कुमारजातिंगायंतोनिष्ठांसमाप्तिंनरादुःखेनगच्छंतिछालिक्यस्यकावार्तेत्यर्थः ८२ ८३ ८४ ८५ ८६ ८७

प्रहृष्टरूपस्यसुहृष्टरूपाविनोदिताःकेशिनिषूदनेनेत्यपिपाठः ८८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांएकोननवतितमोऽध्यायः ८९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तेषांक्रीडेति १ भानोर्यादवविशेषस्य २ ३ पूर्ववैरंप्रपंचयतिभ्रातुर्हीति ४ प्रस्तुतमाह भानोरेवेति भानोरेवकन्यापुरेमहानाद आर्तरावः सहसा आक
स्मिकः समुपस्थितः अभ्युत्थितः कथंभूतेअंतःपुरेदुराधर्षेप्यस्वाधीनेनिरीश्वरेरक्षकाभावात् यदूनांक्रीडासक्तत्वात् तत्पुनातिचित्रमित्याह छिद्रज्ञइति अव
सरेणेत्येनप्रभृत्ययांतं अवसरेदानवाधमोनिकुंभः छिद्रान्वेषीमाययावंचनरतोवसतितिष्ठत्येव क्व अरण्येद्वारकोपवनेइतिसार्द्धश्लोकोवाक्यं ५ क्रियंत्यांक्रिय

वैशंपायनउवाच तेषांक्रीडाप्रसक्तानांयदूनांपुण्यकर्मणाम् छिद्रमासाद्यदुर्बुद्धिर्दैत्यशत्रुर्दुरासदः १ कन्यांभानुमतींनामभा
नोर्दुहितरंनृप जहारात्मवधाकांक्षीनिकुंभोनामदानवः २ अंतर्हितोमोहयित्वायदूनांप्रमदाजनम् मायावीमाययाराजन्पूर्ववैर
मनुस्मरन् ३ भ्रातुर्हिवज्रनाभस्यतस्यकन्याप्रभावती प्रद्युम्नेनहृतावीरवज्रनाभस्तथाहतः ४ भानोरेवतथारण्येवसत्यव
सरेणाहि अस्वाधीनेदुराधर्षेछिद्रज्ञोदानवाधमः ५ कन्यापुरेमहानादःसहसासमुपस्थितः तस्यान्हियंत्याकन्यायारुदत्यासमिति
जयः ६ वसुदेवाहुकौवीरौदंशितौनिर्गतावुभौ आर्तनादमुपश्रुत्य भानोःकन्यापुरेतदा ७ नदृष्टिगोचरेतौतुददृशातेपकारिणम् त
थैवदंशितौयातौयत्रकृष्णोमहाबलः ८ श्रुतार्थःस्वंविमानंतदारुरोहजनार्दनः पार्थेनसहितस्ताक्ष्र्यंनागशत्रुमरिंदमः ९ त्वयेत
मनुगच्छेतिसंदिश्यमकरध्वजम् त्वरेतिगरुडंवीरःसंदिदेशच काश्यपम् १० वज्रनगरमायातनिकुंभरणदुर्जयम् पार्थकृष्णौम
हात्मानावासेदतुररिंदमौ ११ प्रद्युम्नश्चमहातेजामायिनाप्रवरोनृप निकुंभश्चापितान्दृष्ट्वात्रिधात्मानमथाकरोत् १२ तान्सर्वान्यो
धयामासनिकुंभःप्रहसन्निव बहुकंटकगुर्वीभिर्गदाभिरमरोपमः १३ सव्येनालंब्यहस्तेनकन्यांभानुमतींनृप दक्षिणेनाग्रहस्तेन
गदयाप्राहरत्पुनः १४ कन्यार्थेनचकृष्णोवाकामोवानृपसत्तमः निर्दयंप्रहरंतिस्मनिकुंभेचमहासुरे १५ समर्थास्तेमहात्मानःशत्रुं
हंतुंदुरासदाः निशश्वसुर्नरपतेदयाभारावपीडिताः १६ श्रेष्ठोधनुष्मतापार्थःसर्वथाकुशलोयुधि नागोष्ठविधिनादैत्यशरीरंत्याज
यानह १७ तेतुचैतस्तिकेबाणैर्विविधान्दानवान्युधि नकन्याकल्ययायुक्त्याशिक्षयाचमहीपते १८ ततःसकन्ययासार्द्धंतत्रैवांतर
धीयत आसुरीमाश्रितोमायांनचतांवेत्तिकश्चन १९ तंकृष्णौरौक्मिणेयश्चपृष्ठतोनुययुस्तदा हारितःशकुनोभूत्वातस्थावथमहा
सुरः २० तंबाणैःपुनरेवाथवीरोभूयोधनंजयः चैतस्तिकेर्मर्मभिद्भिःकन्यारक्षन्नताडयत् २१

माणायां ६ ७ ८ विमानंवाहनंतर्हिकिंसामान्यंनेत्या
क्ष्र्यमित्यादि ९ १० ११ तान्दानवान् १२ तान्कृष्णादीन् १३ भानुमतींचर्मस्थानीयां १४ १५ निशश्वसुः निश्वासंमुमुचुः १६ नागोष्ठविधिनेतियथाकश्चित्कुर्दूरोत्स्य
लाघवंदर्शयन् अजगरवेष्टितमुष्ट्रंदृष्ट्वा अस्त्रप्रयोगविशेषादजगरमेवहंतिनतुक्रमेलकंतद्वत् १७ तेकृष्णप्रमुखाजघ्नुरितिक्रियाविपरिणामेनानुषंगः १८ १९ पृष्ठ
तोव्यवहितावेवानुययुरित्यर्थः २० २१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 अरिमर्दनोऽपि २२ २३ २४ भैमः प्रद्युम्नः २५ २६ २७ २८ २९ ३० ३१ ३२ अभिसृत्य अभिमुखं आगत्य ३३ ३४ ३५

सद्द्वां पृथिवीं कृत्स्नां ससद्वीपां महासुरः बभ्रामानुगतश्चैव तैर्वीरैररिमर्दनः २२ गोकर्णस्योपरि शृङ्गे पर्वतस्य महासुरः प्रपात
वेलां गंगायाः पुलिने सह कन्यया २३ न देवा नासुराश्चापि लंघयन्ति तपोधनाः गोकर्णं तेजसा गुप्तं महादेवस्य भारत २४ एतद्भुतमा
साद्य प्रद्युम्नः शीघ्रविक्रमः कन्यां भानुमतीं भैमो जग्राह रणदुर्जयः २५ अक्रूरः सोर्दितो राजन् कृष्णाभ्यां निशितैः शरैः त्यक्त्वाथोत्तर-
गोकर्णं निकुम्भो दक्षिणां दिशम् २६ जगाम पृष्ठतो यातौ कृष्णौ तार्क्ष्यगतौ तदा विवेश षट्पुरं चैव ज्ञातीनामालयं तदा २७ तत्र वीरौ तु
हाद्दौ हरिकृष्णौ राजेन्द्र दोषतः रौक्मिणेयोपि कृष्णेन संदिष्टो द्वारकां पुरीं २८ अनयज्जामातुतनयां भद्रहृष्टेनान्तरात्मना नयिलाचार्ययौ
वीरः षट्पुरं दानवाकुलम् २९ ददर्श च गुहाद्वारि कृष्णो भीमपराक्रमौ उषतु द्वारमाक्रम्य षट्पुरस्य महाबलौ ३० कृष्णौ प्रद्युम्नसहि
तौ निकुम्भवधकांक्षिणौ ततोनंतरमेतस्माद्धिल्लादतिबलस्तदा निर्जगाम बलीयांस्तु निकुम्भो भीमविक्रमः ३१ तस्य निर्गच्छतस्तस्मा
द्धिल्लात्सार्यो विशांपते रुरोध सर्वतो मार्गं शरैर्गाण्डीवनिःसृतैः ३२ सोभिसृत्य गदां घोरां समुद्यम्य बहुकण्टकाम् शिरस्यताडयत्पार्थं निकु
म्भो बलिनां वरः ३३ अदृष्टेनाहतो वीरः शिरस्यथ सुमोहसः गदयाभिहतः पार्थो रक्तं वमति सुस्त्यानि हसित्वा सोसुरो हत्वा रौक्मिणेयं मता
डयत् ३४ तमाजघ्नुस्समुत्सं वीरं मायावी मायिनां वरम् अदृष्टेनाहतो वीरः शिरस्यथ सुमोहसः ३५ तथागतौ तु हत्वा तौ सुसमानौ स्क
ताडितौ अभिदुद्राव गोविंदो निकुम्भं क्रोधमूर्छितः ३६ कौमोदकीं समुद्यम्य गदपूर्वाङ्गवो गदाम् तावन्योन्यं दुराधर्षौ गजन्ताविभौ
तनुः ३७ ऐरावतगतः शक्रः सर्वैर्देवगणैः सह ददर्श तन्महायुद्धं घोरं देवासुरं तदा ३८ हत्वादेवान् हृषीकेशाश्विनौ सुरैरविदमः इ-
येष दानवं हंतुं देवानां हितकाम्यया ३९ समण्डलानि चित्राणि दर्शयामास केशवः कौमोदकीं महाबाहुर्लल्यस्तु युद्धकोविदः ४० तथै
वक्रूरसुरश्चापि गदां तां बहुकण्टकाम् शिक्षयाभ्रामयानो थमण्डलानि चचार ह ४१ वृषभाविव गर्जन्तौ सुहृतौ विव कुञ्जरौ इषितान्तर-
मासाद्य जघ्नतुः शालारकाविव ४२ आजघान निकुम्भस्तु गदया गदपूर्वजम् सघंटा सूक्ष्मधंटया वीरस्तं दुर्मुक्तानि दारुणाम् ४३ तत्कालं वै
वक्रृष्णोपि भ्रामयित्वा महागदाम् निकुम्भमूर्ध्नि तदा पातयामास भारत ४४ अवष्टभ्य मुहूर्तं तु हरिः कौमोदकीं गदाम् तस्थौ
जगद्गुरुर्धीमान्समुमोह पतितः क्षितौ ४५ हाहाभूतं जगत्सर्वं तत्कालमभवत्तदा तथागते चास्कंदवनेनर देव महात्मनि ४६

३६ ३७ ३८ इयेष इच्छांचकार ३९ ४० ४१ इषितावासितापुष्पवतीतियावत् ४२ ४३ ४४ अवष्टभ्योत्तरि पूलकं सर्वव्यापयितुं आलोच्छ्येति वक्ष्यमाणत्वात्
४५ ४६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४७ ४८ ४९ तंशरीरंपरित्यज्यतं ५० वीरव्रतंरररक्षपतितंनहतवान् ५१ ५२ विदितःकर्तरिक्तःवेत्तीत्यर्थः ५३ ननाशअदृश्यमभूत् ५४ ५५

आकाशगंगातोयेनशीतेनचसुगंधिना सिषेचामृतमिश्रेणकृष्णंदेवेश्वरःस्वयम् ४७ नूनमात्मेच्छयाकृष्णास्तथाचक्रेसुरोत्तमः
कोहिशक्तोमहात्मानंमुग्धंमोहयितुंहरिम् ४८ कृष्णःप्रत्यागतप्राणश्चक्रमुद्यम्यभारत प्रतीच्छेतिदुरात्मानमुवाचरिपुनाशनः ४९
निकुंभोप्यतिमायावीउत्पपातदुरासदः शरीरंतत्परित्यज्यनतुतंवेत्तिकेशवः ५० मुमूर्षतिमृतोवायमितिसत्वाजनार्दनः ररक्षस्मरमाणो
थवीरोवीरव्रतंविभो ५१ अथप्रद्युम्नकौंतेयावागतौलब्धचेतनौ स्थितौनारायणाभ्याशेनिकुंभवधनिश्चितौ ५२ प्रद्युम्नोप्यथमा-
यावीविदितःकृष्णमब्रवीत् निकुंभस्तातनास्त्यत्रगतःक्वापिसुदुर्मतिः ५३ प्रद्युम्नेनैवमुक्तेतुतन्ननाशकलेवरम् प्रजहासाथभगवा
नर्जुनेनसहप्रभुः ५४ तदायुतसहस्राणिनिकुंभानांजनाधिप ददृशुस्तेततोवीराक्षितौदिविचसर्वतः ५५ सहस्राण्येवकृष्णस्तुतथापा
र्थमरिंदम रौक्मिणेयस्तथावीरस्तदद्भुतमिवाभवत् ५६ पांडवस्यधनुःकेचित्केचिदस्यमहाशरान् अन्येस्यजगृहुर्हस्तावन्येपादौमहा
सुराः ५७ एवंग्राहयतंवीरमगमंस्तेविहायसि पार्थानामपिकोट्यस्तुगृहीतानातदाभवन् ५८ नातंददर्शकृष्णश्चकार्ष्णिश्चरिपुनाश
नौ विच्छिद्यतौशरैर्वीरौनिकुंभंपार्थवर्जितौ एकैकस्तुद्विधाच्छिन्नोद्विधाभवतिभारत ५९ दिव्यज्ञानस्तदाकृष्णोभगवाननुदृष्टवा
न् निकुंभंतत्त्वतश्चापिददर्शमधुसूदनः ६० स्रष्टारंसर्वमायानांहर्त्तारंफाल्गुनस्यच सचक्रेणशिरस्तस्यचकर्त्तासुरसूदनः ६१ प-
श्यतांसर्वभूतानांभूतभव्यभवोहरिः ससुत्काफाल्गुनराजंश्छिन्नेशिरसिभारत ६२ पपातासुरमुख्योयंछिन्नमूलइवद्रुमः अथा
काशगंतंपार्थंपतमानंविहायसः ६३ कृष्णवाक्येनजग्राहकार्ष्णिर्वियतिमानद निकुंभेपतितेभूमौसमाश्वास्यधनंजयम् ६४ जगाम
द्वारकांदेवःपार्थकामसमन्वितः समियायमुदाशौरिर्द्वारकांमुदितोविभुः ६५ नारदंचमहात्मानंववंदेयदुनंदनः नारदोथमहातेजा
भानुंयादवमब्रवीत् ६६ भानोमाकार्षीर्मन्युंत्वंश्रूयतांभैमनंदन क्रीडंत्यारैवतोद्यानाद्दुर्वासाःकोपितोनया ६७ सशशापततोरोषान्
मुनिर्दुहितरंतव अतिदुर्ललितैःकन्याशत्रुहस्तंगमिष्यति ६८ सुतार्थेतेमयासार्द्धंमुनिभिःसंप्रसादितः बाल्यावृतवतीकन्यामना
गसमिमांमुने ६९ शप्तवानसिधर्मज्ञकथंधर्मभृतांवर अनुग्रहंविधत्स्वात्रवयंविज्ञापयामहे ७० अस्माभिरेवमुक्तस्तुदुर्वासाभैम
नंदन उवाचाधोमुखोभूत्वामुहूर्त्तंकृपयान्वितः ७१

५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ मन्युंकन्यापहारजंदैन्यम् ६७ ६८ ६९ ७० ७१ ७२ ७३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यदवोचमहंवाक्यंतत्तथानतदन्यथा रिपुहस्तमवश्यंहिगमिष्यतिनसंशयः ७२ अदूषितानुधर्मेणभर्तारमुपलप्स्यति बहुपुत्रा
बहुधनासुभगाचभविष्यति ७३ सुगंधगंधाचसदाकुमारीचपुनःपुनः नचशोकमिमंघोरंतन्वंगीधारयिष्यति ७४ एवंभानुमतीवी
रसहदेवायदीयताम् श्रद्दधानःसशूरश्चधर्मशीलश्चपांडवः ७५ ततोभानुमतींभानुर्ददौमाद्रीसुतायवै सहदेवायधर्मात्मानारदस्य
वचःस्मरन् ७६ आनीतःसहदेवश्चप्रेषितश्चक्रपाणिना विवाहेचतदावृत्तेसभार्यःस्वपुरींगतः ७७ इमंकृष्णस्यविजयंयःपठेच्छृणु
यादथ विजयंसर्वकृत्येषुश्रद्दधानोलभेन्नरः ७८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिभानुमतीहरणेनिकुंभवधो
नामनवतितमोऽध्यायः ९० जनमेजयउवाच भानुमत्यापहरणंविजयंकेशवस्यच छालिक्यानयनंचैवदेवलोकान्महामुने
१ क्रीडांचसागरेदिव्यांवृष्णीनाममितौजसाम् अथोषंपरमाश्चर्यंमुनेधर्मभृतांवर २ वज्रनाभवधंब्रह्मन्निकुंभवधकीर्तनं तन्मे
कौतूहलंश्रोतुंप्रसादाद्भवतोमुने ३ वैशंपायनउवाच हंततेवर्तयिष्यामिवज्रनाभवधंनृप विजयंचैवकृष्णस्यसांबस्यैवच
भारत ४ मेरोःसानौनरपतेतपश्चक्रेमहासुरः वज्रनाभइतिख्यातोनिश्चितःसमितिंजयः ५ तस्यतुष्टोमहातेजाब्रह्मालोकपिता-
महः वरेणच्छंदयामासतपसापरितोषितः ६ अवध्यतांसर्वदेवेभ्योवव्रेदानवसत्तमः पुरंवज्रपुरंचापिसर्वरत्नमयंशुभम् ७ स्व-
च्छंदेनप्रवेशश्चनवायोरपिभारत अचिंतितेनकामानामुपपत्तिर्नराधिप ८ शाखानगरमुख्यानांसंवाहानांशतानिच नगरस्या
प्रमेयस्यसमंताज्जनमेजय ९ तथालब्धवरस्तत्रवरदानेनभारत उवासवज्रनगरेवज्रनाभोमहासुरः १० कोटिशोवरलब्धंत
मसुराःपरिवार्यते ऊषुर्वज्रपुरेराजन्संवाहेषुतथैवच ११ शाखानगरमुख्येषुरम्येषुचनराधिप हृष्टपुष्टप्रमुदितानृपदेवस्यश
त्रवः १२ वज्रनाभोथदुष्टात्मावरदानेनदर्पितः पुरस्थश्चात्मनश्चैवजगद्बाधितुमुद्यत १३ महेंद्रमब्रवीद्गत्वादेवलोकंविशांपते
अहमीशितुमिच्छामित्रैलोक्यंपाकशासन १४ अथवामेप्रयच्छस्वयुद्धंदेवगणेश्वर सामान्यंहिजगत्कृत्स्नंकाश्यपानांमहात्म-
नाम् १५ सबृहस्पतिनासार्धंमंत्रयित्वामहेश्वरः वज्रनाभंसुरश्रेष्ठःप्रोवाचकुरुवंशज १६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

न्याय्यंन्यायादनपेतम् १७ १८ १९ २० २१ शौरेः वसुदेवस्य २२ सतांगतेः ब्रह्मकृतमर्यादाया असंगः सतांमार्गः अतोऽस्करेच्छयैवतत्रप्रवेशोलभ्य
तेनबलादित्यर्थः २३ २४ २५ तत्रयस्कृदेवयज्ञे नाट्येननृत्येन २६ २७ देवेंद्रादिभिरंतस्थैःप्रेरितइत्यर्थः २८ २९ प्रकर्षेणसिद्धं आकाशगमनंय-

सत्रेषुदीक्षितःसौम्यःकश्यपोनःपितामुनिः तस्मिन्वृत्तेयथान्याय्यंतथासहिकरिष्यति १७ ततःसपितरंगत्वाकश्यपंदानवोऽब्र
वीत् यथोक्तंदेवराजेनतमुवाचाथकश्यपः १८ सत्रेवृत्तेकरिष्यामियथान्याय्यंभविष्यति त्वंतुवज्रपुरेपुत्रवसगच्छसमाश्रितः १९
एवमुक्तेवज्रनाभःस्वमेवनगरंगतः महेंद्रोपिययौदेवोद्वारकांद्वारशालिनीम् २० गत्वाचांतर्हितोदेवोवासुदेवमथाब्रवीत् वज्र
नाभस्यवृत्तांतंतमुवाचजनार्दनः २१ शौरेरुपस्थितोदेववाजिमेधोमहाक्रतुः तस्मिन्वृत्तेवज्रनाभंपातयिष्यामिवासव २२ तत्रो-
पायप्रवेशेतुचिंतयावःसतांगतेः नानिच्छयाप्रवेशोऽस्तितत्रवायोरपिप्रभो २३ ततोगतोदेवराजोवासुदेवेनसत्कृतः वाजिमेधेचसं
प्राप्तेवसुदेवस्यभारत २४ तस्मिन्यज्ञेवर्तमानेप्रवेशार्थंसुरोत्तमौ चिंतयामासतुर्वीरौदेवराजाच्युतावुभौ २५ तत्रयज्ञेवर्तमानेस्म
नाट्येननटस्तदा महर्षींस्तोषयामासभद्रनामेतिनामतः २६ तंवरेणमुनिश्रेष्ठाश्छंदयामासुरात्मवत् सववेतुनटोभद्रोवरंदेवस्य
रोपमः २७ देवेंद्रकृष्णाच्छदेनसरस्वत्याप्रचोदितः प्रणिपत्यमुनिश्रेष्ठानश्वमेधेसमागतान् २८ नटउवाच भोज्योद्विजा-
नांसर्वेषांभवेयंमुनिसत्तमाः सप्तद्वीपांचपृथिवीविचरेयमिमामहम् २९ प्रसिद्धाकाशगमनःशक्तश्चविशेषतः अवध्यःसर्वभू
तानांस्थावरायेचजंगमाः ३० यस्ययस्यचवेषेणप्रविशेयमहंखलु मृतस्यजीवतोवापिभाव्येनोत्पादितस्यवा ३१ सतूर्यस्तादृशःस्यांवै
जरारोगविवर्जितः तुष्येयुर्मुनयोनित्यमन्येचममसर्वदा ३२ एवमस्त्वितिसंप्रोक्तोब्राह्मणैर्नृपतेनटः सप्तद्वीपांवसुमतींपर्यटत्यमरोपमः
३३ पुराणिदानवेंद्राणामुत्तरांश्चकुरूंस्तथा भद्राश्वान्केतुमालांश्चकालाम्रद्वीपमेवच ३४ पर्वणीषुवसर्वासुद्वारकायदुमंडिताम् आ
यातिवरदत्तःसलोकवीरोमहानटः ३५ ततोहंसान्धार्तराष्ट्रान् देवलोकनिवासिनः उवाचभगवान्शक्रःसांत्वयित्वासुरेश्वरः ३६ भवं
तोभ्रातरोस्माकंकाश्यपादेवपक्षिणः विमानवाहादेवानांसुकृतोनांतथैवच ३७ देवानामस्तिकर्तव्यंकार्यंशत्रुवधान्वितम् तत्कर्तव्यं
नमंत्रश्चभेत्तव्योवःकथंचन ३८ नकुर्वतांदेवताज्ञामुग्रोदंडःपतेदपि सर्वत्राप्रतिसिद्धंवोगमनंहंससत्तमाः ३९ गत्वाऽप्रवेश्यमन्येषां
वज्रनाभपुरोत्तमम् इतोतःपुरवापीषुचरध्वमुचितंहिवः ४०

स्यसः तादृशःभवेयमितिशेषः शक्नुवन् शक्तिमान् ३० भाव्येनभविष्येणरूपेणमयाउ
त्पाद्यएवोत्पादितस्यवेषेणप्रवेष्टुंशक्नुयामित्यर्थः ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ अप्रवेश्यमितिछेदः ४० ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१३ १४ १५ रतिः स्मरं १६ १७ रूपंस्वभावेसौंदर्येइतिमेदिनी कुलंजनपदेगृहेइतिविश्वः १८ किमर्थमेष्यति तस्यात्रागमनंप्रसक्तमेवनास्तीत्यर्थः १९
२० २१ २२ २३ अनंगंनामदेवंसांगंकृत्वापुत्रोविहितइत्यन्वयः निबर्हितःहतः २४ २५ २६ तेजसाप्रभावेन २७ २८ २९ ३० यमुद्दिश्य

सातांकदाचित्प्रपच्छवज्रनाभसुतांतदा विस्रंभितांपृथक्सूक्तैःराख्यानकशतैर्वशाम् १३ त्रैलोक्यसुंदरीवेद्मित्वामहंहिप्रभावति
रूपशीलगुणैर्देवि किंचित्वांवक्तुमुत्सहे १४ व्यतिक्रामतितेभीरुयौवनंचारुहासिनि यदतीतंपुनर्नेतिगतंस्रोतइवांभसः १५ कामोप
भोगतुल्याहिरतिर्देविनविद्यते स्त्रीणांजगतिकल्याणिसत्यमेतद्ब्रवीमिते १६ स्वयंवरेचन्यस्तात्वंपित्रासर्वांगशोभने नचकांश्चिद्वृणुय
सेदेवासुरकुलोद्भवान् १७ व्रीडितायांतुसुश्रोणिमत्याख्यातास्त्वयाशुभे रूपशौर्यगुणैर्युक्तान्सदृशांस्त्वकुलस्यहि आगतान्नेच्छसे
देविसदृशान्कुलरूपयोः १८ इहैष्यतिकिमर्थंत्वांप्रद्युम्नोरुक्मिणीसुतः त्रैलोक्येयस्यरूपेणसदृशोनकुलेनवा १९ गुणैर्वाचारुस
र्वांगिशौर्येणाप्यस्तिवाशुभे देवेषुदेवःसुश्रोणिदानवेषुचदानवः २० मानुषेष्वपिधर्मात्मामनुष्यःसमहाबलः यंसदादेविदृष्ट्वाहिस्र
वंतिजघनानिहि २१ आपीनानीवधेनूनांस्रोतांसिसरितामिव नपूर्णचंद्रेणमुखंनयनेवाकुशेशयैः २२ उत्सहेनोपमातुंहिसुरेंद्रे
णाथवागतिम् जगतःसारमुद्धृत्यपुत्रःसंविहितःशुभे २३ कृत्वानंगंवरेसांगंविष्णुनाप्रभविष्णुना अतेनशंबरोबाल्येयेनपापोनि
बर्हितः २४ मायाश्चसर्वाःसंप्राप्तानचशीलंविनाशितम् यान्यान्गुणान्पृथुश्रोणिमनसाकल्पयिष्यसि २५ एष्टव्यांस्त्रिषुलोके
षुप्रद्युम्नेसर्वएवते रुच्यावन्हिप्रतीकाशःक्षमयापृथिवीसमः २६ तेजसासूर्यसदृशोगांभीर्येणह्रदोपमः प्रभावतीकथंचित्सुखीत्वि
तिहोवाचभामिनी २७ प्रभावत्युवाच विष्णुर्मानुषलोकस्थःश्रुतःसुबहुशोमया पितुःकथयतःसौम्यनारदस्यचधी
मतः २८ शत्रुःकिलसदैत्यानांवर्जनीयःसदानघे कुलानिकिलदैत्यानांतेनदग्धानिमानिनि २९ प्रदीप्तेनरथांगेनशार्ङ्गेणगदया
तथा शाखानगरदेशेषुवसंतिकिलयेसुराः ३० इत्येतेदानवेंद्रेणसंदिश्यंतेहितंप्रति मनोरथोहिसर्वासांस्त्रीणामेवशुचिस्मिते ३१
भर्ताहिमेपतिकुलंश्रेष्ठंपितृकुलादिति यदिनाम्युपायःस्यात्तस्येहागमनंप्रति ३२ महाननुग्रहोमेस्यात्कुलस्यात्पावितंचमे स
मर्थनांमेपृष्टात्वंप्रयच्छशुचिलापिनि ३३ प्रद्युम्नःस्याद्यथाभर्त्तासमेवृष्णिकुलोद्भवः अत्यंतवैरीदैत्यानांसुहृज्जनकरोहरिः ३४
असुराणांस्त्रियोवृद्धाःकथयंत्योमयाश्रुताः प्रद्युम्नस्यतथाजन्मपुरस्तादपिमेश्रुतम् ३५

दानवेंद्रेणअसुराःसंदिश्यतेतंबलवंतंप्रति
स्त्रीणांमनोरथःभवत्येवकाममूढत्वात्वैरिकुलेप्यनुरागोभवतीतिभावः ३१ ३२ समर्थनांकार्यघटनोपायम् ३३ ३४ ३५ ६९ ६९ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तस्यास्तिकन्यारत्नंहि त्रैलोक्यातिशयंशुभम् नाम्नाप्रभावतीनाम चंद्राभेवप्रभावती ४१ वरदानेनसालब्धा मात्राकिलवरानना हैमवत्यामहादेव्याः सकाशादितिनःश्रुतम् ४२ स्वयंवराचसाकन्या बंधुभिःस्थापितासती आत्मेच्छयापतिंहंसावरयिष्यतिशोभना ४३ तद्भवद्भिर्गुणावाच्याः प्रद्युम्नस्यमहात्मनः सद्भूताःकुलरूपस्य शीलस्यवयसस्तथा ४४ यदासारक्तभावाचवज्रनाभसुतासती तस्याःसकाशात्संदेशानायितव्यःसमाधिना ४५ प्रद्युम्नस्यपुनस्तस्मादानयध्वंतथैवच स्वबुध्याप्राप्तकालंचसंविधेयंहितंमम ४६ तेनवज्रप्रसादश्चकर्तव्यस्तत्रसर्वथा तथातथागुणावाच्याः प्रद्युम्नस्यमहात्मनः ४७ यथायथाप्रभावत्यामनस्तत्रभवेत्स्थितम् वृत्तांतश्चानुदिवसंप्रदेयोममसर्वथा द्वारवत्यांचकृष्णस्य भ्रातुर्ममयवीयसः ४८ तावद्यत्नश्चकर्तव्यः प्रद्युम्नोयादवाधिप यावद्वृतेद्वरारोहावज्रनाभसुताविभुः ४९ अवध्यास्तेतुदेवानांब्रह्मणावरदर्पिताः देवपुत्रैर्हिहंतव्याः प्रद्युम्नप्रमुखैर्युधि ५० नदोदत्तवरस्तस्यवधप्रास्था ययादेवाः प्रद्युम्नाद्यागमिष्यंतिवज्रनाभविनाशनाः ५१ एतच्चसर्वंकर्तव्यमन्यच्चसर्वमेवहि प्राप्तकालंविधातव्यमस्माकंप्रियकाम्यया ५२ प्रवेशस्तत्रदेवानांनास्तिहंसाःकथंचन वज्रनाभेप्सितेतत्रप्रवेशःखलुसर्वथा ५३ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिवज्रनाभप्रद्युम्नोत्तरेएकनवतितमोऽध्यायः ९१

वैशंपायनउवाच तेवासववचःश्रुत्वाहंसाःक्रमपुरस्सराः पूर्वोचितंहिगमनंतेषांतत्रजनाधिप १ तेदीर्घिकासुरम्यासुनिपेतुर्वीरपक्षिणः पद्मोत्पलैरावृतासुकांचनःस्पर्शनक्षमैः २ तेनवदंतोमधुरंसंस्कृतापूर्वभाषिणः पूर्वमप्यागतास्तेतुविस्मयंजनयंतिहि ३ अंतःपुरोपभोग्यास्तुचेरुर्वापीषुतेनृप इष्टास्तेवज्रनाभस्यत्रिविष्टपनिवासिनः ४ आलपंतःशुभमधुरंधार्तराष्ट्राजनेश्वर सतानुवाचदैतेयोधार्तराष्ट्रानिदंवचः ५ त्रिविष्टपेनित्यरताभवंतश्चारुभाषिणः यदेवहीसर्वोस्माकंभवद्भिरवगम्यते ६ आगंतव्यंजालपादाःस्वमिदंभवतांगृहम् विस्रब्धंचप्रवेष्टव्यंत्रिविष्टपनिवासिभिः ७ तेनतथोक्ताःशकुनयोवज्रनाभेनभारत तथेत्युक्त्वाहिविविशुर्दानवेंद्रनिवेशनम् ८ चक्रुःपरिचयंतेचदेवकार्यव्यपेक्षया मानुषालापिनस्तेतुकथाश्चक्रुःपृथग्विधाः ९ वंशोत्कृष्टाःकाश्यपानांसर्वकल्याणभागिनाम् स्त्रियास्तुविशेषेणश्रृण्वत्यःसंगताःकथाः १० विचरंतस्ततोहंसादद्दृशुश्चारुहासिनीम् प्रभावतींवरारोहांवज्रनाभसुतांतदा ११ हंसाःपरिचितांचक्रुस्तांततश्चारुहासिनीम् सखींसुचिसुखींचक्रेहंसीराजसुतांतदा १२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वारमुख्यावेश्याः तन्नूर्यसदृशाः तदीयनृत्यगीतवादित्रसादृश्याः ६० ६१ ६२ ६३ इतिश्रीमहाभारतेखि० हरिवंशे विष्णुपर्वणिटीकायांद्विनवतितमो
ऽध्यायः ९२ ततः पूर्वंश्रुतो भद्रनामा नरएवात्रप्राप्तइतितेषांबुद्धिरभूदित्यर्थः १ २ ३ पर्यायार्थंवेषधारणार्थं ४ वासीनांदैर्घ्यमार्षम् ५ ६ ७ ८
अच्युतहेराजन् ९ संस्कारः वेषधारणंअभिनयः क्रियादर्शनंप्रस्तावः क्रियाणांप्रसंजनंप्रवेशंपात्राणांप्रथमदर्शनम् १० विस्मयंसविस्मयंसाश्चर्यम् ११

वारमुख्यानटीः कृत्वातत्तूर्यसदृशास्तदा तथैवभद्रंभद्रस्यसहायांश्चतथाविधान् ६० प्रद्युम्नविहितंरम्यंविमानंतेमहारथाः ज
ग्मुरारुह्यकार्यार्थंदेवानाममितौजसाम् ६१ एकैकस्यसमारूपेपुरुषाःपुरुषस्यते स्त्रीणांचसदृशाः सर्वेतस्यरूपेर्नराधिपाः ६२ ते-
वज्रनगरस्याथशाखानगरमुत्तमम् जग्मुर्दानवसंकीर्णंस्वपुरंनाममनामतः ६३ इतिश्रीमहाभारतेखिलेषुहरिवंशे विष्णुपर्वणिवज्रना
भप्रद्युम्नोत्तरेप्रद्युम्नादिगमनेद्विनवतितमोऽध्यायः ९२ वैशंपायनउवाच ततः स्वपुरवासीनामसुराणांनराधिप ददावाज्ञांवज्र
नाभोदीयतांगृहमुत्तमम् १ आतिथ्यंक्रियतामेषांबहुरत्नमुपायनम् वासांसिसविचित्राणिस्वस्वायजनरंजनम् २ भर्तुराज्ञांसमालभ्य
तथाचक्रुश्चसर्वशः पूर्वंश्रुतोनटः प्राप्तः कौतूहलमजीजनत् ३ नटस्याथददुर्दैत्याः सत्कारंपरयामुदा पर्यायार्थंददुश्चापिरत्नानिस्वबहू
न्यथ ४ ततः सननृतेतत्रवरदत्तोनटस्तथा स्वपुरेपुरवासीनांपरंहर्षसमादधत् ५ रामायणंमहाकाव्यमुद्दिश्यनाटकीकृतम् जन्मवि
ष्णोरमेयस्यराक्षसेंद्रवधेप्सया ६ लोमपादोदशरथऋष्यशृंगंमहामुनिम् शांतामप्यानयामासगणिकाभिः सहानघ ७ रामलक्ष्मण
शत्रुघ्ना भरतश्चैवभारत ऋष्यशृंगश्चशांताचतथारूपैर्नटैः कृताः ८ तत्कालजीविनोवृद्धादानवाविस्मयंगताः आचचक्षुश्चतेषांवैरूप
तुल्यत्वमच्युत ९ संस्काराभिनयौतेषांप्रस्तावानांचधारणम् दृष्ट्वासर्वेप्रवेशंचदानवाविस्मयंगताः १० तरस्वाविस्मयंतेदुरसुराः पर-
यामुदा उत्थायोत्थायनाट्यस्यविषयेषुपुनः पुनः ११ ददुर्वस्त्राणितुष्टाश्चग्रैवेयवलयानिच हारान्मनोहरांश्चैवहेमवैडूर्यभूषितान् १२
पृथगर्त्तेषुदत्तेषुस्थानकैस्तेतुष्टुवुर्नटाः असुरांश्चमुनींश्चैवगात्रैरभिजनैरपि १३ प्रेषितंवज्रनाभस्यशाखानगरवासिभिः नटस्यदिव्य
रूपस्यनरेंद्रागमनंतदा १४ पुराश्रुतार्थोदैत्येंद्रः प्रेषयामासभारत आनीयतांवज्रपुरंनटोसावितिहर्षितः १५ दानवेंद्रवचः श्रुत्वाशाखा
नगरवासिभिः नीतावज्रपुरंरम्यंनटवेषेणयादवाः १६ आवासश्चततोदत्तः सुकृतोविश्वकर्मणा एष्टव्यंयच्चतत्सर्वंदत्तंशतगुणोत्तरम्
१७ अथकालोत्सवंचक्रेवज्रनाभोमहासुरः कारयामासरम्यंचचमूवाटंप्रहृष्टवान् १८ ततस्तान्परिविश्रांतान्प्रेक्षार्थायप्रचोदयत् द
त्वारत्नानिभूरीणिवज्रनाभोमहाबलः १९

१२ १३ १४ १५ १६ १७ कालोत्सवंमहाकालरुद्रस्योत्सवंचक्रेनटद्वारा चमूवाटंसैनिकाह्वानंप्रेक्षणार्थम् १८ १९ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ संस्तवः मदीयास्तुतिर्नविद्यतेनटनिक

यथाचतेननिहतोबलवान्कालशंबरः हृदिमेवर्ततेनित्यंप्रद्युम्नःखलुसत्तमे ३६ हेतुःसनास्तिस्यात्तेनयथाममसमागमः दासीत-
वाहंसख्याहेंदूत्येत्वांचविसर्जये ३७ पंडितासिवदोपायंममतस्यचसंगमे ततस्तांसात्वयित्वासाप्रहसंतीदमब्रवीत् ३८ शुचि
मुख्युवाच तत्रदूतीगमिष्यामितवाहंचारुहासिनी इमांभक्तितवोदाराप्रवक्ष्यामिशुचिस्मिते ३९ तथाचैवकरिष्यामियथैष्यतित
वांतिकम् साक्षात्कामेनरूपेणभविष्यतिसकामिनि ४० इतिमेभाषितंनित्यंस्मरेथाःशुचिलोचने कथाकुशलतांपित्रेकथयस्वायते
क्षणे ४१ ममत्वंतत्रमेदेविहितंसम्यक्प्रपत्स्यसे इत्युक्त्वासातथाचक्रेयत्तस्यातामथाब्रवीत् ४२ दानवेंद्रश्चतांहंसीपप्रच्छांतःपुरेत
दा प्रभावत्याःसमाख्याताकथाकुशलतातव ४३ तत्वंशुचिमुखिब्रूहिकथायोग्यतयावरे किंत्वयादृष्टमाश्चर्यंजगत्युत्तमपक्षिणि ४४
अदृष्टपूर्वमन्यैर्वायोग्यायोग्यमनिंदिते सोवाचवज्रनाभंतुहंसीवरनरोत्तम ४५ श्रूयतामित्यथामंत्र्यदानवेंद्रंमहाद्युतिम् दृष्टामेशांडि
लीनामसाध्वीदानवसत्तम आश्चर्यंकर्मकुर्वंतिमेरुपार्श्वेमनस्विनी ४६ रूपमनाश्चैवकौशल्यासर्वभूतहितेरता कथंचिद्वरशांडिल्याः
शैलपुत्र्याःशुभासखी ४७ नटश्चैवमयादृष्टोमुनिदत्तवरःशुभः कामरूपीचभोज्यश्चत्रैलोक्येनित्यसंमतः ४८ कुरूनुत्तरान्वीर
कालाम्रद्वीपमेवच भद्राश्वान्केतुमालांश्चद्वीपानन्यांस्तथानघ ४९ देवगंधर्वगेयानिनृत्यानिविविधानिच सर्वेत्तिदेवान्नृत्येनवि-
स्मापयतिसर्वथा ५० वज्रनाभउवाच श्रुतमेतन्मयाहंसिनचिरादिवविस्तरम् चारणानांकथयतांसिद्धानांचमहात्मनाम् ५१
कुतूहलंसमाप्यस्तिसर्वथापक्षिनंदिनि नटेदत्तवरेतस्मिन्संस्तवस्तुनविद्यते ५२ हंस्युवाच सप्तद्वीपान्विचरतिनटःसद्विति
जोत्तम गुणवंतंजनंश्रुत्वागुणकार्यःससर्वथा ५३ तच्चेच्छृणुयाद्वीरसद्भूतंगुणविस्तरम् नटंतदागतंविद्धिपुरंतवमहासुर ५४
वज्रनाभउवाच उपायःसृज्यतांहंसियेनेहसनटःशुभे आगच्छेन्ममभद्रेतेविषयंपक्षिनंदिनि ५५ तेहंसावज्रनाभेनकार्यहे-
तोर्विसर्जिताः देवेंद्रायाथकृष्णायशशंसुःसर्वमेवतत् ५६ अधोक्षजेनप्रद्युम्नोनियुक्तस्तत्रकर्मणि प्रभावत्याश्चसंसर्गेवज्रनाभ
वधेतथा ५७ देवींमायांसमाश्रित्यसंविधायहरिर्नटम् नटवेषेणभैमानांप्रेषयामासभारत ५८ प्रद्युम्नंनायकंकृत्वासांबंकृत्वावि
दूषकम् पारिपार्श्वेगदंवीरमन्यान्भैमांस्तथैवच ५९

टेयेनश्रुतगुणोमामसोउपेयादित्यर्थःपरिचयोवा ५२ ५३ ५४ ५५ ५६ ५७ नटं-

भद्राख्यस्यनटस्य ५८ विदूषकंउपहासकंपारिपार्श्वेइत्यनेनश्रुतिधरत्वंलक्ष्यंगदंश्रुतिधरंकृत्वेत्यर्थः ५९ ६९ ६९ ६९ ६९ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

आ॰ ह॰ टी॰ १२८ छन्नेजालजवनिकापिहितस्थाने अतएवचक्षुर्दृश्येचक्षुःसंनिहितंदृश्यंनाट्यंयत्रतत्तथाभूते २० भैमाअपीतिसंधिरार्षः २१ घनंकांस्यतालादिकंसुषिरं छिद्रंवेणुप्रभृतिकंमुरजाभर्दलाः आनकःपटहः तंत्रीतिरुद्रवीणादिकानामुपलक्षणं एवमादीन्आतोद्यान्वाद्यविशेषान् २२ भैमस्त्रियःभैमेरनीता अ॰ प॰ ९२ २
वारनार्यः २३ आगांधारमितिनिषादर्षभगांधारषड्जमध्यमधैवताख्यान्सप्तस्वरान्व्याप्यग्रामःकतिपयस्वरसंघःतेचत्रयःरागोवसंतादिःसाकल्येनगांधा-
रादयोयत्रतत्तुगंगावतरणंनामगीतविशेषविहूंरागांतरमिश्रं आसारितंमूर्च्छितंजगिरेगीतंकृतवंत्यः २४ २५ नांदिंनंदिकेश्वरमुरसंचर्मकोशमयंवाद्यविशेषम्

उपनिविष्टश्चतान्द्रष्टुंसहज्ञातिभिरात्मवान् छन्नेचांतःपुरंस्थाप्यचक्षुर्दृश्येनराधिपः २० भैमाअपिबहूनेपथ्यानटवेषधरास्तथा कार्या-
र्थंभीमकर्माणोनृत्यार्थंसमुपक्रमुः २१ ततोघनंससुषिरं मुरजानकभूषितम् तंत्रीस्वरगणैर्विद्वान्आतोद्यानन्ववादयन् २२ ततस्तुदेव
गांधारछालिक्यंश्रवणामृतम् भैमस्त्रियःप्रजगिरेमनःश्रोत्रसुखावहम् २३ आगांधारग्रामरागंगंगावतरणंतथा विहूमासारितंर
म्यंजगिरेस्वरसंपदा २४ लयतालसमंमुख्यागंगावतरणंशुभम् अस्फूरंस्तोषयामासउत्थायोत्थायभारत २५ नांदिंचवादयामासप्र-
द्युम्नोगदएवच सांबश्चवीर्यसंपन्नःकार्यार्थंनटतांगतः २६ नांद्यंतेचतदाश्लोकंगंगावतरणाश्रितम् रौक्मिणेयस्तदोवाचसम्यक्स्वाभि
नयान्वितम् २७ रंभाभिसारंकौबेरंनाटकंननृतुस्ततः शूरोरावणरूपेणरंभावेषमनोवती २८ नलकूबरस्तुप्रद्युम्नःसांबस्तस्यविदूष
कः कैलासःकल्पितश्चापिमाययायदुनंदनैः २९ शापश्चदत्तःकुद्धेनरावणस्यदुरात्मनः नलकूबरेणचयथारंभाचाप्यथसांत्विता ३०
एतत्प्रकरणंवीराःननृतुर्यदुनंदनाः नारदस्यमुनेःकीर्तिंसर्वज्ञस्यमहात्मनः ३१ पादोद्धारेणनृत्येनतथैवाभिनयेनच तुष्टुवुर्दानवा
वीराभैमानाममितौजसाम् ३२ ददुर्वस्त्राण्यमुख्यानिरत्नान्याभरणानिच हारांस्तरलविद्धांश्चवैडूर्यमणिभूषितान् ३३ विमानानिवि
चित्राणिरथांश्चाकाशगामिनः गजानाकाशगांश्चैवदिव्यनागकुलोद्भवान् ३४ चंदनानिचदिव्यानिशीतानिरसवंतिच गुरूण्यगुरु
मुख्यानिगंधाढ्यानिचभारत ३५ चिंतामणींस्तुदाराश्चचिंतितेसर्वकामदान् प्रेक्षास्कृतासुबह्वीषुददतोदानवास्तथा ३६ धनरत्नै
र्विरहिताःकृताःपुरुषसत्तम स्त्रियोदानवमुख्यानांतथैवचजनेश्वर ३७ ततोहंसीप्रभावत्याःसखीमाहप्रभावतीम् गतास्मिद्वार-
कांरम्यांभैमगुप्तामनिंदिते ३८ प्रद्युम्नश्चमयादृष्टोविविक्तेचारुलोचने भक्तिश्चकथितातस्यमयातवशुचिस्मिते ३९

द्वादशपटहशब्दोनंदिरित्यन्येनांदीमितिपाठेनांदीदेवद्विजादीनांशुभशंसिनींअष्टभिर्दशभिर्वाअवांतरवाक्ययुक्तांपूर्वरंगप्रधानांवाक्यावलींवादयामासपपाठेतिकेचित् १२८
मासपपाठेतिकेचित् २६ नांद्यंतेमंगलपद्यपाठांते २७ कूबरोनलकूबरः तत्संबंधिनंकौबेरंमनोवतीनामकाचिद्वारांगना २८ रूपितःकल्पितः २९ ३० ३१
नृत्येनरावणशापजाल्हादप्रवृत्तेन ३२ तरलोवर्तुलोमणिः ३३ ३४ ३५ ३६ ३७ ३८ ३९

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

समागमे कालः कृतइतिसंबंधः ४० आत्मवति आत्मभक्ते ४१ ४२ ४३ ४४ संविधानंसंकेतम् ४५ कामंप्रद्युम्नं गतोगत्यां ४६ ४७ ४८ ४९ आश्वे
तिछेदः प्रभवत्याप्रभावत्यर्थनीयमानेमाल्ये ५० ५१ ५२ ५३ ५४ ५५ प्रियोपिसख्यंहरति अप्रियवद्भवतीत्यर्थः ५६ ५७ कुमुद्वती·

तेनदृष्टेनकालश्चकृतःकमललोचने अद्यप्रदोषसमयेत्वयासहसमागमे ४० तदद्यरुचिरश्रोणितवप्रियसमागमः नत्वात्मवतिभाष्टं
तिमिथ्याभैमकुलोद्भवाः ४१ ततःप्रभावतीहृष्टाहंसीतामिदमब्रवीत् उषितास्मिमयावासेस्वसुमर्हसिसुंदरि ४२ त्वयाहंसहितावासे
द्रष्टुमिच्छामिकेशवम् निःसाध्वसाभविष्यामित्वयासहविहंगमे ४३ हंसीतथेतिचोवाचसखींकमललोचनाम् आरुरोहचतद्धर्म्यंप्र
भावत्याविहंगमा ४४ विश्वकर्मकृतेतत्रहर्म्यपृष्ठेप्रभावती संविधानंचकाराशुप्रद्युम्नागमनक्षमम् ४५ तस्मिन्कृतेसंविधानेकाम
मानयितुंययौ प्रभावतीमनुज्ञाप्यहंसीवायुसमागतौ ४६ नटवेषधरंकामंगत्वोवाचशुचिस्मिता अद्यानुकूलःसभगवन्समयोवर्तते
निशि ४७ तथेतिप्राहतांकामःसानिवृत्ताथपक्षिणी अभ्यागताचसाहंसीप्रभावतिमथाब्रवीत् अभ्येतिरौक्मिणेयोसावाश्वसायत-
लोचने ४८ प्रद्युम्नोनीयमानंतुददर्शमाल्यमात्मवान् भ्रमरैरावृतंवीरःसुगंधमरिमर्दनः ४९ निलिल्येतत्रमाल्येतुभूत्वामधुकरस्त
दा प्रभावत्यानीयमानेविदितार्थःप्रतापवान् ५० प्रवेशितंचतन्माल्यंस्त्रीभिर्मधुकरायुतम् उपनीतंप्रभावत्यैस्त्रीभिस्तद्भ्रमरावृतम्
५१ अविदूरेचविन्यस्तंप्रभावत्याजनाधिप भ्रमरास्तेययुःसौम्यसंध्याकालेह्युपस्थिते ५२ सभैमप्रवरोवीरस्तैःसहायैर्विहीनतः क
र्णोत्पलेप्रभावत्यानिलिल्येशनकैरिव ५३ ततःप्रभावतीहंसीमुवाचवदतांवरा उद्यंतंपूर्णचंद्रंसासमीक्ष्यातिमनोहरम् ५४ सखिदं
ह्यतिमेगात्रिसुखंचपरिशुष्यति औत्सुक्यंहृदिचातीवकोयंव्याधिरनौषधः ५५ दधाद्विगुणमौत्सुक्यमसौपूर्णनिशाकरः नवोदितःशी
तरश्मिःसख्यंहरतिचप्रियः ५६ नहदृष्टपूर्वोहिमयाश्रुतमात्रेणकांक्षितः अहोधूमयतेगात्रिस्त्रीस्वभावस्यधिक्खलु ५७ कल्पयामिप्रि
याबुध्यायदिनाभ्येतिमेप्रियः कुमुद्वतीगतंमार्गंहागमिष्याम्यकिंचन मदनाशीविषेणास्मिह्याहादृष्टामनस्विनी ५८ शीतवीर्याःप्रकृ
त्यैवजगतोल्हादनाःसखाः दहंतिममगात्राणिकिंतुचंद्रगभस्तयः ५९ प्रकृत्याशीतलोवायुर्नानापुष्परजोवहः दावाग्निसदृशोमेद्यद
दहीतिसुभ्रांतन्तुम् ६० ततःसंकल्पयत्येतत्स्थैर्यंकार्यमिवात्मनः नावतिष्ठतिनिर्वीर्यंमनःसंकल्पधर्षितम् ६१ विमनस्कास्मिसुह्या
मिवपश्यमेमहान्हृदि बध्नमीतिचमेदृष्टिर्हाहायामिध्रुवंक्षयम् ६२ इतिश्रीमहाभा० खि० ह० वि० वज्रनाभपुरेप्रद्युम्नागमनेत्रिनव-
तितमोऽध्यायः ९३

गतंमार्गंजीवत्येवभर्तरियौवनेमरणं ५८ ५९ ६० कल्पयेएवकल्पयाम्येव आत्मनोमनसःस्थैर्यंकार्यमित्येवमर्थंकल्पयेनतुसिध्यतीत्यर्थः ६१ ६२ इतिश्रीम० खि० ह० वि०
टीकायांत्रिनवतितमोऽध्यायः ९३ ६.

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आविष्टेयमिति १ अवगच्छस्वज्ञापय माल्येनिलीयप्रासंसाम् २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ आवांदपती १५ १६ १७ १८

वैशंपायनउवाच आविष्टेयंमयाबालासर्वथैत्यवगम्यतु कार्ष्णिर्हृष्टेनमनसाहंसीमिदमुवाचह १ दैत्येंद्रतनयांप्रासमवगच्छस्व
मामिह षट्पदैःसहषट्पादोभूत्वामाल्येनिलीयहि २ विधेयोस्मिप्रभावत्यायथेष्टमयिवर्ततास् इत्युक्त्वादर्शयामाससरूपोरूपमा
त्मनः ३ तदस्यरूपंप्रभयाद्योतिततस्यधीमतः अभिभूताप्रभाचैवराजश्चंद्रोडुवाशभा ४ प्रभावत्यास्ततद्दृष्ट्वावव्रधेकामसागरः चं
द्रस्येवोदयेप्राप्तेपर्वण्यांसरितांपतिः ५ सलज्जाधोमुखीकिंचित्किंचित्तिर्यगवेक्षिणी प्रभावतीतदातस्थौनिश्चलंकमलेक्षणा ६ करे
णाधःप्रदेशेतांचारुभूषणभूषितास् स्पृष्ट्वोवाचवरारोहांरोमांचिततनुस्ततः ७ मनोरथशतैर्लब्धंकिंपूर्णेंदुसमप्रभम् अधोमुखंसुख
कुत्वानमांकिंचित्प्रभाषसे ८ प्रभोपसद्माकार्षीर्वदनस्यवरानने साध्वसंत्यज्यताभीरुदासःसाध्वनुगृह्यताम् ९ नकालमिवपश्या
मिभीरुभीरुत्वमुत्सृज याचाम्येषोंजलिंकृत्वाप्रासकालंनिबोधमे १० गांधर्वेणविवाहेनकुरुष्वानुग्रहंमम देशकालानुरूपेणरूपेणा
प्रतिमासती ११ उपस्पृश्यततोमेमोमणिस्थंजातवेदसम् जुहावसमयेवीरःपुष्पैर्मंत्राननुदीरयन् १२ जग्राहाथकरंतस्यावराभरणभू
षितम् चक्रेप्रदक्षिणंचैवतंमणिस्थंहुताशनम् १३ प्रजज्वालसतेजस्वीमानयन्नच्युतात्मजम् भगवान्जगतःसाक्षीशुभस्याशुभ
स्यच १४ उद्दिश्यदक्षिणांवीरोविप्राणांयदुनंदनः उवाचहंसींद्वारस्थांतिष्ठवारक्षपक्षिणि १५ तस्यांप्रणम्ययातायांकामस्तांचारुलोच
नाम् गृहीत्वादक्षिणेहस्तेनिनायशयनोत्तमम् १६ ऊरावेलोपवेश्यैनांसांत्वयित्वापुनःपुनः चुचुंबशनकैर्गंडंवासयन्मुखमारुतैः १७ त
तोस्याश्चपूर्णेवस्त्रंपद्मंप्रमधुकरोयथा आलिलिंगेचसश्रोणींक्रमेणरतिकोविदः १८ अरमयत्सहंसेनानन्चोद्गेजितबाहस्तदा अपह्नु
ष्टचरत्यर्थंरतिकार्यविशारदः उवाससतयासार्द्धंरमनूकृष्णासुतःप्रभुः १९ अरुणोदयकालेचशयनोयंसनगदालयः अकामयाप्रभावत्या
कथंचित्सविसर्जितः २० तामेवमनसाकांतांकांतरूपांसमुद्वहन् तऊषुर्नटवेषेणकार्यार्थंमेसवृशाजाः २१ प्रतीक्षंतस्तदावाक्यमिंद्र
केशवयोस्तदा उद्योगंवज्रनाभस्यत्रैलोक्यविजयंप्रति २२ प्रतीक्षंतोमहात्मानोगुह्यसरक्षणेरताः कश्यपस्यमुनेःसत्रंयावत्तावन्न
राधिप २३ देवासुराणांसर्वेषामविरोधोमहात्मनाम् त्रैलोक्यविजयार्थायप्रयततांधर्मचारिणाम् २४ एवंकालंप्रतीक्षाणावसतां
तत्रधीमताम् समासःप्राप्तघोरस्यःसर्वभूतमनोहरः २५ अहर्निशंचवृत्तांतंप्रपच्छातिमनोजवाः शक्रकेशवयोर्हंसाःकुमाराणांमहा
त्मनाम् २६

अपह्नुष्टं अर्थंचरतिनिबोढत्वादितिभावः १९ २० २१ २२ २३ २४ २५ २६ छ॰ छ॰ छ॰ छ॰

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२७ २८ २९ ३० महात्मनांनटानाम् ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ भैमंप्रद्युम्नंकार्यंकर्तव्यंक-

रेमेसहप्रभावत्याप्रद्युम्नस्त्वानुरूपया रात्रौरात्रौमहातेजाधार्तराष्ट्राभिरक्षितः २७ तौहिवज्रपुरंहंसैर्वसद्भिर्वासवाज्ञया व्याप्तं
नृपनटांस्तांस्तुनविदुःकालमोहिताः २८ दिवापिरौक्मिणेयस्तुप्रभावत्यानृपालये निवसत्यंतर्हितोवीरोहंससंघाभिरक्षितः २९
माययास्यप्रतिच्छायादृश्यतेहिनटालये देहार्धेनतुकौरव्यआसिषेवेसौप्रभावतीम् ३० सन्नतिंविनयंशीलंलक्ष्मींलीलांदाक्ष्यमथार्जवम्
स्पृहयन्त्यसुरादृष्ट्वाविवृत्तांश्चमहात्मनाम् ३१ रूपंविलासंगंधंचमंजुभाषामथार्यताम् तासांयादेवनारीणांस्पृहयंत्यसुरस्त्रियः
३२ वज्रनाभस्यतुभ्रातासुनाभोनामविश्रुतः दुहितृद्वयंचनृपतेस्तस्यरूपगुणान्वितम् ३३ एकाचंद्रवतीनाम्नागुणवत्यथचापरा
प्रभावत्यालयंतेतुव्रजतःखलुनित्यदा ३४ ददृशातेतुतत्ररतिसक्तांप्रभावतीम् परिपप्रच्छतुश्चैवविस्रंभोपगतांसतीम् ३५ सोवाच
ममविद्यास्तियाधीताकांक्षितंपतिम् स्वयमानयत्याशुसौभाग्यंचप्रयच्छति ३६ देवंवादानवंवापिविवशंसद्यएवहि साहंसासिक्तातेनदे-
वपुत्रेणधीमता ३७ दृश्यतांमत्प्रभावेणप्रद्युम्नःसुप्रियोमम तेदृष्ट्वाविस्मयंयातेरूपयौवनसंपदम् ३८ पुनरेवाब्रवीत्ततुभगिन्यौचारुहा-
सिनी प्रभावतीवरारोहाकालप्राप्तमिदंवचः ३९ देवाधर्मरतानित्यंदमशीलामहासुराः देवास्तपसिरक्ताहिसुखेरक्तामहासुराः ४० देवाः
सत्येरतानित्यमनृतेतुमहासुराः धर्मस्तपश्चसत्यंचयत्रतत्रजयोध्रुवम् ४१ देवपुत्रौवरयतांपतीविद्यांददाम्यहम् उचितौमत्प्रभावेणसद्य
एवोपलप्स्यथः ४२ तांतथोचतुर्हृष्टेभगिन्यौचारुलोचनाम् परिपप्रच्छभैमंचकार्यंतत्पतिमानिनी ४३ सापितृव्यंगदंवीरंसांबंचाथब्र-
वीत्तदा रूपान्वितौसुशीलौचशूरौचरणकर्मणि ४४ प्रभावत्युवाच परितुष्टेनदत्तामेविद्यादुर्वाससापुरा परितुष्टेनसौभाग्यसं-
दाकन्यात्वमेवच ४५ देवदानवयक्षाणांयस्याध्यास्यसिसतेपतिः भवितेतिसयाचैववीरोयमभिकांक्षितः ४६ गृह्णीतंतदिमांविद्यांसद्योवां
प्रियसंगमः ततोजगृहतुर्हृष्टेतांविद्यांभगिनीमुखात् ४७ दध्यतुर्गदसांबौचविद्यामभ्यस्यतेशुभे तौप्रद्युम्नेनसहितौप्रविष्टौभैमनन्दि-
नौ ४८ प्रच्छन्नौमाययावीरौकार्ष्णिनामायिनानृप गांधर्वेणविवाहेनतावप्यरिबलार्दनौ ४९ पाणिंजगृहतुर्वीरौमंत्रपूर्वंसतांप्रियौ
चंद्रवत्यांगदःसांबोगुणवत्यांचकेशविः ५० रेमिरेसुरकन्याभिर्वीरास्तेयदुपुंगवाः मार्गमाणास्त्वनुज्ञांतेशक्रकेशवयोस्तदा ५१

स्यानयनंकर्तव्यमित्येवंरूपं तत्पतिमानिनीतंपतिंमन्यतेतया ४३ ४४ ४५ ४६ ४७ दध्यतुःध्यानवंतौ ४८ कार्ष्णिनाप्रद्युम्नोक्तयामायया
प्रच्छन्नंयथास्यात्तथाप्रविष्टौ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीमहाभारतेखि॰ ह॰ विष्णुपर्वणिटीकायांचतुर्नवतितमोऽध्यायः ९४ नभोनभस्यइति १ २ सदृशाःधाराः ३ ४ ५ ६ शिखीन्शिखिनःमयूरान्समाहृतान्नृत्येएवादरयुक्तान् ७ ८ आशंकमानाः शाद्वलभूमौसारूप्यादननिसादृश्यत्वात्संतिनसंतीतिशंकमानाइत्यर्थः ९ पंकइवशीतःपुष्पेभ्योभूतं १० ११ १२ गताःश्रमंमानसेवासार्थंश्राम्यतोहंसायत्रदृष्टाःतेनमानसादप्यस्यस्थानस्याधिक्यमुक्तंईक्ष्यवीक्ष्य १३ हतत्विषीवहतशोभेइवउप

इतिश्रीमहाभारतेखि॰ ह॰ विष्णुपर्वणिप्रभावतिपाणिग्रहणेचतुर्नवतितमोऽध्यायः ९४ वैशंपायनउवाच नभोनभस्येथनिरीक्ष्यमासिकामस्तदातोयदवृंदकीर्णाम् प्रभावतीचारुविशालनेत्रामुवाचपूर्णेंदुचिकाशवक्त्रः १ तवाननाभोवरगात्रिचंद्रोनदृश्यतेसुंदरिचारुबिंबः त्वत्केशपाशप्रतिमैर्निरुद्धोवलाहकैश्चारुनिरंतरोरु २ सदृश्यतेस्फुरत्तडिद्घनस्थात्वहेमचार्वाभरणान्वितेव सुंचतिधाराश्चघनानदंतस्त्वद्धारयष्टेःसदृशावरांगि ३ घनप्रदेशेषुवलाकपंक्त्यस्त्वद्दंतपंक्तिप्रतिमाविभाति निमग्नपद्मानिसरित्सुनूनंभातितोयानिरयाकुलानि ४ अमीघनावायुवशोपयातावलाकमालामलचारुदंताः अन्योन्यमभ्याहनितुंप्रवृत्तावनेषुनागाइवशुक्लदंताः ५ धनुस्त्रिवर्णंवरगात्रिपश्यकृतंतवापांगमिवाननस्थम् विभूषयत्गगनंघनाश्चप्रहर्षणंकामिजनस्यकांते ६ घनान्नदतःप्रतिनर्दमानान्निरीक्ष्यरंभोणिशिखीन्प्रहृष्टान् समाहृताःसुन्दतपिच्छभारान्प्रियाभिरामानुपनृत्यमानान् ७ हर्म्येषुचान्येशशिपांडुरेषुराजंतिरंभोणिमयूरसंघाः मुहूर्तशोभामतिचारुरूपादुत्पापतंतोवलभीपुटेषु ८ प्रक्लिन्नपक्षास्तरुमस्तकेषुमुहूर्तचूडामणितांविधाय प्रयांतिभूमिनवशाद्वलानामाशंकमानाधृतचारुदेहाः ९ प्रवातिधारांतरनिःसृतश्चस्फटिकानिलश्चंदनपंकशीतः कदंबसर्जार्जुनपुष्पभूतस्समावहन्गंधमनंगबंधुम् १० रतिश्रमस्वेदविनाशहेतुर्नवोदभारानयनेचहेतुः नमारुतःस्याद्यदिचारुगात्रिनमेघकालोसमवल्लभस्यात् ११ एवंविधेषुप्रियसंगमेषुरतावसानेयदुपैतिवायुः रतिश्रमस्वेदहरःस्फगंधीततःपरंकिंसुखमस्तिलोके १२ जलाप्लुतानीक्ष्यमहानदीनांसुगात्रिहंसाःपुलिनानिहृष्टाः गताःश्रमंमानसवासलुब्धाःससारसाःक्रौंचगणानुविद्धाः १३ नभातिनद्योनसरांसिचैवहततत्विषीवायतचारुनेत्रे गतेषुहंसेष्वथसारसेषुरथांगतुल्यास्वयनेषुचैव १४ भोगैकदेशेनमहाभुजंगशयानंध्रुवंजगन्नाथमुपेंद्रमीशम् निद्राभ्युपेतावरकालतज्ज्ञाश्रियंप्रणम्योत्तरचारुरूपाम् १५ निद्रायमाणेभगवत्युपेंद्रेमेघावराक्रांतनिशाकरोद्यपद्मामलाभःकमलायताक्षिकृष्णास्यवक्त्रानुकृतिंकरोति १६

लक्षणमेततूनद्यादीनांनद्योपिहततत्विषइत्यर्थः १४ भोगैकदेशेनसर्पैकपार्श्वेनउपलक्षितंसप्तम्यर्थेवातृतीयानिद्राश्रियंप्रणम्यईशंउपेताभगवतिनिद्रातिश्रीर्जागर्तीत्यर्थः वरकालतज्ज्ञाप्राप्रृषहरिंचजनानाम् १५ १६ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ध्रुवंसर्वदास्त्रवंतिऋतवःसर्वेइतिशेषः १७ नागाइति भ्रमरैःपेपीयमानान् वृक्षादीन् सुकुमारतरान् विषवल्काः स्पृशंतोपिग्लानिंनयंतीत्याश्चर्यमितिभावः १८
तवचारुसुखस्तनोरुकर्तृन भःवीक्ष्यअभिन्नवृष्टंकामोद्रेकात् स्विन्नमभूदितिशेषः पतिष्यंतमितिपुंस्त्वमार्षम् १९ बलाकानांमालेव आकुलंनिबिडंमाल्य
दामेवतेन २० प्रवृत्तचक्रः चक्रंआज्ञा २१ पूतंनिर्मलं अतएवपवित्रंशोधकम् २२ प्लवंगमोभेकः गृहारंभासमर्थः वार्षिकेषु अष्टसुपक्षेषुगोष्ठोगोव्रजस्तद्गत
वृष्ट्यार्तःसन्विरौतिरावेदृष्टांतः ऋचोद्विजातिरिति २३ प्रियाणांकाममितिशेषः २४ मांप्रतिभातीतिशेषः २५ २६ इतरेषांनेत्रोत्सवोपिप्रोषितकामुकानां

कदंबनीपार्जुनकेतकानांरजोध्रुवंप्रुष्यासुपानयंति पुष्पाणिचान्यान्यृतवःसमस्ताः प्रुष्यात्समादानभिकांक्षमाणाः १७ नागाश्चरंतो
विषदिग्धवल्काःस्पृशंतिपुष्पाण्यपिपादपान्यान् पेपीयमानान्भ्रमरैर्जनानांकौतूहलंतेजनयंत्यतीव १८ तोयातिभारांबुदवृंदनद्धं नभः
पतिष्यतमिवाभिवीक्ष्य निपानगंभीरमभिप्रविष्टंमनोहरंचारुसुखस्तनोरु १९ बलाकमालाकुलमाल्यदाम्नानिरीक्ष्यरम्यंघनवृंदमे
तत् सस्यानिभूमावभिवर्षमाणंजगद्धितार्थंविमलांगयष्टेः २० जलावलंबांबुदवृंदकर्षीघनैर्घनान्योधयतीववायुः प्रवृत्तचक्रोनृपतिर्व
नस्थान्गजान्गजैःस्वैरिववीर्यदृप्तान् २१ अंभोमसंभोविसृजंतिमेघाःपूतंपवित्रंपवनैःसुगंधि हर्षावहंचातकबर्हिणानांवराङजाना
जलदप्रियाणाम् २२ प्लवंगमःषोडशपक्षशायीविरौतिगोष्ठःसहकामिनीभिः ऋचोद्विजातिःप्रियसत्यधर्मायथासुशिष्यैःपरिवार्यमा
णः २३ गुणोमहांस्तोयदकालजोयंप्रबुद्धमेघस्तनभीषितायत् परिष्वजंतःपरिवर्द्धयंतिविनापिशय्यासमयंप्रियाणाम् २४ दोषोयमेकः
सलिलागमस्यमांप्रत्युदारान्वयवर्णशीले नदृश्यतेयत्तववक्त्रतुल्योघनव्यवस्थस्तनुःशशांकः २५ नदृश्यतेभीरुयदाशशांकोघनांतर
स्थोजगतःप्रदीपः तदानुपश्यंतिजनाःप्रहृष्टाबंधुप्रवासादिवसंनिवृत्तम् २६ विलापसाक्षीप्रियहीनितानांसंदृश्यतेभीरुयदाशशांकःने
त्रोत्सवःप्रोषितकामुकानांदृष्ट्वेवकांतंभवतीत्यवैमि २७ नेत्रोत्सवःकांतसमागतानांदावाग्नितुल्यःप्रियहीनितानाम् तेनैवदेहेनवराग
नानांचद्रोपितावत्प्रियविप्रियश्च २८ विनापिचंद्रेणपुरेपितुस्तेयतःप्रभाःचंद्रगभस्तिगौरी गुणागुणाश्चंद्रमसोनवेद्मियतस्ततोहंप्रश
शंसयिष्ये २९ अवापयोब्राह्मणराज्यमीड्योदुरापमन्यैःसुकृतैस्तपोभिः गायंतिविप्राःपवमानसंज्ञंसमागताःपर्वणिचाप्युदारम् ३० पि
ताबुधस्योत्तरवीर्यकर्मापुरूरवायस्यसुतोनृदेवः प्राणाग्निरीड्योग्निमजीजनद्योनदृशामीगर्भभवंभवाप्सा ३१

दृष्ट्वैवकांतंकस्यसुखस्य अंतंअवसा
नंभवतीति यद्वाप्रोषितकामुकानांकांतंदृष्ट्वेवनेत्रोत्सवोभवतीत्यवैमिनान्यथा २७ प्रियश्चासौविप्रियश्चेतिसमासः २८ विनापीत्यनेनवज्रपुरेगृहांतःचंद्रदर्शनं
नासीदितिगम्यते प्रशशंसयिष्ये अतिशयेनकथयिष्येस्वार्थेणिच् २९ पर्वणियज्ञे ३० यस्यबुधस्यपुरूरवाःसुतस्तस्य पितायश्चईड्यस्तुत्यःप्रायाग्निःब्रह्मणो

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भागायजुष्टंनिर्वपामीतिमंत्रलिंगात्ब्रह्मौदनिकोग्निः गंधर्वलोकात्पुरूरवसा आनीयमानोमध्येमार्गेनिहितःसन्नष्टः तमेवचन्विष्यन्नग्निमन्विष्यन्तत्स्थानेश
मीगर्भमश्वत्थमपश्यत् ततोश्वत्थादरणीआहृत्याग्नित्रयंसाध्यंत्रेताकर्मप्रावर्तयत्पुरूरवाइति तच्चौषधिवनस्पतीनामीशश्चंद्रोश्वत्थोत्पादनद्वारानस्य
ग्निमजीजनदित्युच्यते भवात्मारुद्रेणशिरसाधृतत्वात्तस्यात्मैवात्माभवात्मा ३१ यश्चंद्रः उर्वशीपौत्रात्मनाव्ययंवाचकमेकामितवान् अमृतेतिपीतस्याप्या
पूरणंसूचितंघोरैरितिदेहस्यैवपानंनतुचकोरवदित्युक्तं ३२ यस्यवंशेआयुर्नृपः कुशाग्रैरेवकुशाग्रोपलक्षितक्रतुपरंपरयादिविगतोग्निः अग्निसायुज्यंप्राप्तः

तथैवपश्चाच्चकमेमहात्मापुरोर्वशीमप्सरसांवरिष्ठाम् पीतःपुरायोमृतसर्वदेहोमुनिप्रवीरैर्वरगात्रिघोरैः ३२ नृपःकुशाग्रैःपुनरेव
यश्चधीमानतोग्निर्दिविपूज्यतेच आयुश्चवंशेनहुषश्चयस्ययोदेवराजत्वमवापवीरः ३३ देवातिदेवोभगवान्प्रसूतोवंशेहरिर्यत्र
जगत्प्रणेता भीमःप्रवीरःसुरकार्यहेतोर्यःकृष्णुदक्षस्यहृतःसुताभिः ३४ बभूवराजाथवसुश्चयस्यवंशेमहात्माशशिविन्दुदीपः य-
श्चक्रवर्तित्वमवापवीरःस्वैःकर्मभिःशक्रसमप्रभावः ३५ यदुश्चराजाशशिवंशमुख्योयोवापमुख्यामधिराजभावम् भोजाःकुलेय
स्यनराधिपस्यवीराःप्रसूताःसुरराजतुल्याः ३६ नकूटकृद्यस्यनृपोस्तिवंशेननास्तिकोनैकृतिकोपिदाथ अथर्द्धधानोप्ययवाकद-
र्यःशौर्येणवावारिरुहाक्षिहीनः ३७ वंशेवधूस्त्वकमलायताक्षिश्लाघ्यागुणानामतिपात्रभूता कुरुप्रणामंशिखराग्रदंतितस्यत्वसौ
शस्यसतांप्रियस्य ३८ नारायणायात्मभवायनायलोकायनायत्रिदशायनाय खगेंद्रकेतोःपुरुषोत्तमायकुरुप्रणामंप्रभुरायदेवि
३९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिप्रद्युम्नभाषणेपंचनवतितमोऽध्यायः ९५ वैशंपायनउवाच सत्रावसा
नेचमुनेःकश्यपस्यातितेजसः जग्मुर्देवासुराःस्वानिस्थानान्यमितविक्रमाः १ वज्रनाभोपिनिर्वृत्तेसत्रेकश्यपमभ्यगात् त्रैलोक्य
विजयाकांक्षीतमुवाचाथकश्यपः २ वज्रनाभनिबोधत्वंश्रोतव्यंयदिचेन्मम वसवज्रपुरेपुत्रस्वजनेनसमावृतः ३ तपसाभ्यधिकः
शक्रःशक्रश्चैवस्वभावतः ब्रह्मण्यश्चकृतज्ञश्चज्येष्ठश्चोत्तमोगुणैः ४ राजाकृष्णस्यजगतःपात्रभूतःसतांगतिः संप्राप्तोलोकराज्यं
ससर्वभूतहितेरतः ५ नैवशक्यस्त्वयाजेतुंवज्रनाभविहन्यसे अहिंपदाक्सुत्कमनुवेनचिराह्निनशिष्यसि ६ वज्रनाभस्तुतद्वा
क्यनाभिनंदतिभारत कालपाशपरीतांगोमर्तुकामइवौषधम् अभिवाद्यस दुर्बुद्धिःकश्यपंलोकभावनम् ७ त्रैलोक्यविजयार्
भेमतिंचक्रेदुरासदः ज्ञातियोधान्समानीयमित्राणिसुबहूनिच ८

ज्यतेचेतिपूर्वार्द्धार्थः यस्यवंशेनहुषश्चदिविगतः योदेवराजत्वमवापेत्यन्वयः १२७
३३ यश्चंद्रः ३४ ३५ ३६ ३७ शिखराग्रदंतिशिखरंलोहितमणिविशेषः ३८ ३९ इ॰म॰खि॰ह॰वि॰टी॰पंचनवतितमः ९५ सत्रावसानेइति १ २ ३ ४ ५ विह
न्यसेम्रियसे ६ ७ ८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७

प्रतस्थेस्वर्गमेवाग्रेविजिगीषन्विशांपते एतस्मिन्नंतरेदेवौकृष्णौद्वौचमहाबलौ ९ प्रेषयामासतुर्हंसान्वज्रनाभवधंप्रति
समागतास्ततच्छ्रुत्वायदुमुख्यामहाबलाः १० मंत्रयित्वामहात्मानश्चिंतामापेदिरेतथा वज्रनाभोहिहंतव्यःप्रद्युम्नेनेत्यसंशयम्
११ तयोर्दुहितरोभार्यामत्त्यानाःसर्वभावनाः सर्वाःसगर्भास्ताश्चैवकिंतुकार्यमनंतरम् १२ प्राप्तःप्रसवकालश्चतासांनातिचिरादि
व संमंत्रयित्वैतदर्थंहंसानूचुर्महाबलाः १३ आरब्धमर्थंवृष्णीनांशक्रकेशवयोस्तदा हंसैर्गत्वातदाख्यातंदेवयोस्तद्यथातथम्
१४ ताभ्यांहंसास्तुसंदिष्टानभेतव्यमितिप्रभो उत्पत्स्यंतिगुणैःश्लाघ्याःपुत्रावःकामरूपिणः १५ गर्भस्थाःसर्ववेदांश्चसांगान्वेत्स्यं
त्यनिंदिताः तथाचानागतसर्वमस्त्राणिविविधानिच १६ सद्यएवयुवानश्चभविष्यंतिसुपंडिताः एवमुक्त्वागताहंसाःपुनर्वज्रपुरंवि-
भो १७ शशंसुश्चैवभैमानांशक्रकेशवभाषितम् प्रभावतीतदापुत्रंसुषुवेसदृशंपितुः १८ सद्योयौवनसंप्राप्तंसर्वज्ञत्वंचभारत मा
समात्रेणसुषुवेदेवीचंद्रवतीनृप १९ चंद्रप्रभमितिख्यातंतनयंसदृशंपितुः सद्यश्चयौवनप्राप्तंसर्वज्ञत्वंचभारत २० गुणवत्यपिपु
त्रंचगुणवंतमनिंदिता युवानावथसद्यस्तौसर्वशास्त्रार्थकोविदौ २१ इंद्रोपेंद्रप्रसादेनसंवृत्तौसुहृद्वर्धनौ हर्म्यपृष्ठेचहंसानांहृष्टा
स्तेयदुनंदनाः २२ इंद्रोपेंद्रेच्छयावीरानान्यथेत्यवधार्यताम् निवेदिताश्चसंभ्रांतेदैत्यैराकाशरक्षिभिः २३ वज्रनाभायवीरायत्रिवि
ष्टपजयैषिणे वध्यायसर्वेगृह्यंतामभीतेगृहधर्षकाः इत्युवाचासुरपतिःवज्रनाभोमहासुरः २४ ततःसैन्यंसमाज्ञप्तमसुरेंद्रेणधीम
ता आवारयामासदिशःसर्वाःकुरुकुलोद्वह २५ गृह्यंतामाशुबध्यंतामितिवाचस्ततस्ततः उच्चेरुरसुरेंद्रस्यशासनादरिशासिनः
२६ तच्छ्रुत्वाव्यथितास्तेषांमातरःपुत्रवत्सलाः रुरुदुस्तारुदत्यश्चप्रद्युम्नःप्रहसन्नब्रवीत् माभैष्टजीवमानेषुस्थितेष्वस्मासुसर्वथा २७
किंनोदैत्याःकरिष्यंतिसर्वथाभद्रमस्तुवः प्रभावतीमथोवाचप्रद्युम्नोविप्लुवास्थिताम् २८ पितातवगदापाणिःपितृव्याश्चस्थितास्त
व भ्रातरश्चैवतेदेविज्ञातयश्चतथापरे २९ एतेपूज्याश्चमान्याश्चतवार्थेखलुसर्वथा भगिन्यौपृच्छभद्रंतेकालोयंखलुदारुणः ३०
मरणंसहमानानांयुध्यतांविजयोध्रुवम् दानवेंद्रादयोह्येतेयोत्स्यंतेस्मद्वधैषिणः ३१ किमत्रकार्यमस्माभिःसर्वैश्चक्रांतरस्थितैः प्र
भावतीरुदतीतुप्रद्युम्नमिदमब्रवीत् ३२ शिरस्यंजलिमाधायजानुभ्यांपतिताक्षितौ गृहाणशस्त्रमात्मानंरक्षशत्रुनिबर्हण ३३

२८ २९ ३० ३१ चक्रांतरस्थितैः त्वदाज्ञावर्तिभिः ३२ ३३ छ. छ. छ. छ. छ. छ. छ. छ. छ.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३४ एतत् एतस्मात् ३५ ३६ सूपस्पृष्टासम्यक्संमार्ज्य ३७ ३८ ३९ ४० चक्रेनिर्ममे ४१ ४२ ४३ भेदनैः सूक्ष्माग्रैः शरैः शरीरप्रवेशेनविदार

जीवन्पुत्रांश्चदारांश्चद्रष्टासियदुनंदन आर्यान्नृपवरवैदर्भिमानिरुद्धंचमानद ३४ स्मृत्वैतन्मोक्षयात्मानंव्यसनादरिमर्दन दुर्वास
सावरोदत्तोमुनिनाममधीमता ३५ वैधव्यरहिताहृष्टाजीवपुत्राभविष्यसि एषसंदृष्टआश्वासोभवितानतदन्यथा सूर्याग्नितेजसो
वाक्यंमुनेरिंद्रानुजात्मज ३६ इत्युक्त्वाथासिमादायसूपस्पृष्टामनस्विनी प्रददौरौक्मिणेयायजयस्वेतिवरवरा ३७ सुतंजग्राहधर्मात्मा
प्रहृष्टेनांतरात्मना प्रणम्यशिरसादत्तंप्रियायाभक्तियुक्तया ३८ चक्रवत्स्यपिनिस्त्रिंशंगदायप्रददौमुदा तदाशुणवतीचैवसातयासिम
हात्मने ३९ हंसकेतुमथोवाचप्रद्युम्नःप्रणतप्रभुः इहैवसाबसहितोयुध्यस्वसहयादवैः ४० आकाशोदिक्षुसर्वासुयोत्स्याम्यहमारिं
दम इत्युक्त्वाथरथंचक्रेमाययामायिनांवरः ४१ सहस्रशिरसंनागंकृत्वासारथिमात्मवान् अनंतभोगकोरव्यसवनागोत्तमोत्तमम्
४२ सतेनरथमुख्येनहर्षयन्वैप्रभावतीम् चचारासुरसैन्येषुतृणेष्विवहुताशनः ४३ शरैराशीविषप्रख्यैरर्कचंद्रानुकांतिभिः भेद
नैर्गाधनैश्चैवततर्ददितिसंभवान् ४४ असुराश्चरणेमत्ताःकार्ष्णिशरप्रपीडिताः ततःजघ्नुःकमलपत्राक्षपरं निश्चयमास्थिताः ४५ चि
च्छेदबाहून्केषांचित्तुकेयूरवलयोज्ज्वलान् सकुंडलानिकेषांचित्शिरांस्यपिचचिच्छिदे ४६ क्रूरैश्छिन्नैःशिरोभिश्चकायैश्चबशक
लैरपि असुराणांमहीकीर्णाप्रद्युम्नेनातितेजसा ४७ देवेश्वरोदेवगणैःसहितःसमितिंजयः ददर्शमुदितोयुद्धंभीमासानांदितिजैःसह
४८ येगदंचैवसांबंचदैत्याःसमभिदुद्रुवुः तेषामुनिर्धनंसर्वेयादासीवमहोदधौ ४९ विषमंतुतदायुद्धंदृष्ट्वादेवपतिर्हरिः गदायप्रेष
यामासस्वरथंहरिवाहनः ५० दिदेशमातलिंसूतंयंतारंचसुवर्चसम् सांबायैरावणंनागंप्रेषयामासुचेश्वरः ५१ जयंतंरौक्मिणेय
स्यसहायमददद्विभुः ऐरावणमधिष्ठातुंप्रवरंसंनियुक्तवान् ५२ देवपुत्रद्विजोवीरावप्रमेयपराक्रमौ अनुज्ञाप्यसुराध्यक्षंब्रह्माणं
लोकभावनम् ५३ नमातलिसुतंचैवगजमैरावणंतदा देवःप्रेषितवान्शक्रोविधिज्ञोवरकर्मसु ५४ क्षीणसस्यतपोवृष्ण्यांयदू
नामृषदुमतिः प्रविशांतितुभूतानिसर्वंमंतुयथेप्सितम् ५५ प्रद्युम्नश्चजयंतश्चभातोहस्म्यसहाबलौ असुराच्छरजालौघैर्विक्रा
म्यतोप्रणश्यतुः ५६ गदःकार्ष्णिस्तदोवाचदुर्वारोरणदुर्जयः उपेंद्रानुजशक्रेणरथोयंप्रेषितस्तव ५७ हरियुग्मातलिसुतोयंता
चायमहाबलः प्रवराधिष्ठितश्चायंसांबस्यैरावणोगजः ५८

णैः गाधनैः स्थूलाग्रैः अनुकांतिभिर्बाणैर्दृढप्रहारमात्रैः ततर्दपीडयामास ४४ ४५ ४६

४७ ४८ ४९ हरिवाहनइंद्रः ५० ५१ प्रवरंइंद्रस्यसखायंब्राह्मणं ५२ ५३ ५४ ५५ ५६ ५७ ५८ ६२ ६२ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उपहारोमहापूजा ५९ अभ्युत्थानंकृतंउपक्रमकर्तारम् ६० ६१ ६२ कोट्यःकोटीः ६३ ६४ ६५ ६६ ६७ ६८ इतिश्रीमहाभारतेखिले
षुहरिवंशेविष्णुपर्वणिटीकायांषण्णवतितमोऽध्यायः ९६ ॥ जगतइति १ २ ३ ४ ५ महादैत्यस्यमहाभ्युत्क्रमणस्यदुरंतस्येत्यर्थः ६ ७

अद्योपहारोरुद्रस्यद्वारकायांमहाबलः श्वएष्यतिहृषीकेशस्तस्मिन्वृत्तेऽच्युतानुज ५९ तस्याज्ञयावधिष्यामोवज्रनाभंसबां
धवम् अभ्युत्थानंकृतंपापंत्रिविष्टपजयंप्रति ६० करिष्यामिविधानंचनैषशक्रसुतान्वितम् विजेष्यत्यप्रमादस्तुकर्तव्यइतिमेम
तिः ६१ कलत्ररक्षणंकार्यंसर्वोपायैर्नरैर्बुधैः कलत्रधर्षणंलोकेमरणादतिरिच्यते ६२ एवंसंदिश्यभैमःसगदसाम्बौमहाबलः प्रद्यु
म्नकोट्यःससृजेमाययादिव्यरूपया ६३ तमप्यनाशयामासदैत्यःसृष्टंदुरासदम् जहर्षदेवराजश्चतंदृष्ट्वारिपुमर्दनम् ६४ ददृशुःस
र्वभूतानिकार्ष्णिंसर्वेषुशत्रुषु अंतरात्मनिवर्ततंक्षेत्रज्ञमिवतंविदुः ६५ एवंव्यतीतारजनीरौक्मिणेयस्ययुध्यतः असुराणांत्रिभाग
श्चनिहतश्चातितेजसा ६६ यावद्वियोधयामासकार्ष्णिर्दैत्यान्रणाजिरे संध्योपास्ताजयंतेनतावद्विष्णुपदीजले ६७ अयोधयज्जयं
तश्चयावद्दैत्यान्महाबलः तावदाकाशगंगायांभैमःसंध्यामुपास्तवान् ६८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिप्रद्युम्नदै
त्ययुद्धेषण्णवतितमोऽध्यायः ९६ वैशंपायनउवाच जगतश्चक्षुषिततोमुहूर्ताभ्युदितेरवौ प्रादुरासीद्धरिर्देवस्तार्क्ष्येणोरगशत्रु
णा १ हंसवायुमनोभिश्चसुशीघ्रतरगःखगः तस्थौवियतिशक्रस्यसमीपेकुरुनंदन २ समेत्यचयथान्यायंकृष्णोवासवसन्निधौ पां
चजन्यंहरिर्दध्मौदैत्यानांभयवर्द्धनम् ३ तंश्रुत्वाभ्यागतस्तत्रप्रद्युम्नःपरवीरहा वज्रनाभंजहीत्युक्तःकेशवेनलरेतिच ४ तार्क्ष्यमा
रुह्यगच्छेतिपुनरेवंप्रणोदितः चकारसतथावीरःप्रणिपत्यसुरोत्तमौ ५ समनोरंहसावीरस्तार्क्ष्येणाशुययौनृप अभ्यासंवज्रनाभ
स्यमहादैत्यस्यभारत ६ ततस्तार्क्ष्यगतोवीरस्तंतदारणमूर्द्धनि वज्रनाभंस्थिरोभूत्वासर्वास्त्रविदनिंदितः ७ तेनतार्क्ष्यगतेनैवगदया
कृष्णसूनुना उरस्यभ्याहतोवीरोवज्रनाभोमहात्मना ८ सतेनाभिहतोवीरोदैत्योमोहवशंगतः चक्षारचभृशंरक्तंवक्त्रान्मेघगता
सुवत् ९ आश्वसेत्सचततःकार्ष्णिंरुवाचरणदुर्जयः लब्धसंज्ञःसवीरस्तुप्रद्युम्नमिदमब्रवीत् १० साधुयादववीर्येणश्लाघ्योममरि
पुर्भवान् प्रतिप्रहारकालोऽयंस्थिरोभवमहाबल ११ एवमुक्त्वामहानादमुक्त्वामेघशतोपमम् गदांमुमोचवेगेनसघंटांबहुकंटकाम्
१२ तयाललाटेऽभिहतःप्रद्युम्नोगदयानृप उद्वमन्रुधिरंभूरिमुमोहयदुनंदनः १३ तंदृष्ट्वाभगवान्कृष्णःपांचजन्यंजलोद्भवम् दध्मा
वाश्वासनकरंपुत्रस्यरिपुनाशनः १४

८ चक्षारमुखेनउद्गीर्णवान् ९ १० ११ १२ १३ १४ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३९ ४० ४१ ४२ प्रद्युम्नोत्तरंप्रद्युम्नस्यउत्कर्षः ४३ ४४ इतिश्रीम०खि० हरिवंशेविष्णुपर्वणिटीकायांसप्तनवतितमोऽध्यायः ९७ ददर्शेति १ २
३ ४ ५ ६ ७ ८ ९ खंडान्समूहान् १० ११ चयमूर्ध्निअट्टालोपरि १२ १३ मणिकांचनमयानितोरणानिबहिर्द्वाराणि

षण्मासानुषितस्तत्रगदःप्रद्युम्नएवच सांबश्चद्वारकांयातारुद्रेराज्येमहाबलाः ३९ अद्यापितानिराज्यानिमेरोःपार्श्वेतथोत्तरे तिष्ठ-
न्तिचजगद्यावस्थास्यत्यमरसंनिभ ४० निवृत्तेमौशलेयुद्धेस्वर्गंयातेषुवृष्णिषु गदप्रद्युम्नसांबास्तेगतावज्रपुरंविभो ४१ ततःप्रोष्यपु
नर्यातिस्वर्गंस्वैःकर्मभिःशुभैः प्रसादेनचकृष्णस्यलोककर्तुर्जनेश्वर ४२ प्रद्युम्नोत्तरमेतत्तेनृदेवकथितंमया धन्यंयशस्यमायुष्यंश
त्रुनाशनमेवच ४३ पुत्रपौत्राविवर्द्धंतेआरोग्यधनसंपदः यशोविपुलमाप्नोतिद्वैपायनवचोयथा ४४ इतिश्रीमहाभारतेखिलेषु
हरिवंशेविष्णुपर्वणिवज्रनाभवधोनामसप्तनवतितमोऽध्यायः ९७ वैशंपायनउवाच ददर्शाथपुरींकृष्णोद्वारकांगरुडेस्थि
तः देवसद्मप्रतीकाशांसमंतात्प्रतिनादिताम् १ मणिपर्वतयंत्राणितथाक्रीडागृहाणिच उद्यानवनमुख्यानिवलभीचत्वराणिच २ सं
प्राप्तेतुतदाकृष्णेपुरींदेवकिनंदने विश्वकर्माणमाहूयदेवराजोब्रवीदिदम् ३ प्रियमिच्छसिचेत्कर्तुंमह्यंशिल्पमतांवर कृष्णप्रि
यार्थंभूयस्त्वंप्रकुरुष्वमनोहराम् ४ उद्यानशतसंबाधांद्वारकांस्वर्गसंमिताम् कुरुष्वविबुधश्रेष्ठयथाममपुरीतथा ५ यत्किंचित्त्रि
षुलोकेषुरत्नभूतंप्रपश्यसि तेनसंयुज्यतांक्षिप्रंपुरींद्वारवतींत्वया ६ कृष्णोहिसुरकार्येषुसर्वेषुसततोत्थितः संग्रामान्घोररूपां
श्चविगाहतिमहाबलः तामिंद्रवचनाज्ज्ञात्वाविश्वकर्मापुरींततः ७ अलंचक्रेसमंताद्वैयथेंद्रस्यामरावती तांददर्शदशार्हाणामीश्वरः
पक्षिवाहनः विश्वकर्मकृतैर्दिव्यैरभिप्रायैरलंकृताम् ८ तांतदाद्वारकांदृष्ट्वाप्रभुर्नारायणोविभुः हृष्टःसर्वार्थसंपन्नःप्रवेष्टुमुपच
क्रमे ९ सोपश्यद्वृक्षखंडांश्चरम्यान्दृष्टिमनोहरान् द्वारकांप्रतिदाशार्हश्चित्रितान्विश्वकर्मणा १० पद्मखंडाकुलाभिश्चहंससेवित
वारिभिः गंगासिंधुप्रकाशाभिःपरिखाभिर्वृतांपुरीम् ११ प्राकारेणार्कवर्णेनशातकौंभेनराजता चयमूर्ध्निनिविष्टेनद्यामिवाभ्र
मालया १२ काननैर्नंदनप्रख्यैस्तथाचैत्ररथोपमैः बभौचारुपरिक्षिप्ताद्वारकाद्यौरिवांबुदैः १३ बभौरैवतकःशैलोरम्यसानुगुहाजि
रः पूर्वस्यांदिशिलक्ष्मीवान्मणिकांचनतोरणः १४ दक्षिणस्यांलतावेष्टःपंचवर्णोविराजते इंद्रकेतुप्रतीकाशःपश्चिमायांतथाक्षयः
१५ उत्तरांदिशमत्यर्थंविभूषयतिवेणुमान् मंदराद्रिप्रतीकाशःपांडुरःपार्थिवर्षभ १६ चित्रकंपंचवर्णंचपांचजन्यंवनंमहत् सर्वर्तुक
वनंचैवभातिरैवतकंप्रति १७

यस्य १४ १५ १६ चित्रकादीनिचतुर्दशवनानि १७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१५ तस्यप्रद्युम्नस्य १६ १७ १८ १९ २० २१ लब्धस्यशत्रुपराजयस्यप्रशमनंदुःखापनोदनम् २२ २३ २४ विजयस्यइंद्रपौत्रस्य २५
प्रद्युम्नस्यप्रद्युम्नपुत्रस्यरौक्मिणेयोऽत्रसांबस्तत्कृतस्यपरिशेषाच्चंद्रप्रभस्यगदपुत्रस्य २६ २७ २८ २९ ऋषिवंशोऋषिसंघसमीपे अभिषिक्ता

तंपांचजन्यशब्देनप्रत्याश्वस्तंमहाबलम् हृष्टाःप्रमुदितालोकाविशेषेणेंद्रकेशवौ १५ तस्याचक्रंकरेयातंकृष्णाछंदेनभारत क्षुर
नेमिसहस्रारंदैत्यसंघकुलांतकम् १६ तत्प्रमोचाच्युतःकृतस्तस्यनाशायभारत नमस्कृत्वाःस्कंद्राय कृष्णायचमहात्मने १७ वज्र
नाभस्यतत्कायाच्चक्रतशिरस्तदा नारायणःकृतोन्मुक्तदैत्यानामनुपश्यताम् १८ गदःसुनाभमवधीद्यतमानंरणाजिरे हर्म्यपृष्ठेजि
घांसंतस्यगृहंप्रभयांतकम् १९ सांबःसमरमध्यस्थानसुरानरिमर्दनः निनायनिशितैर्बाणैःप्रेताधिपपरिग्रहम् २० निकुंभोपिहतेवी
रेवज्रनाभेमहासुरे जगामषट्पुरंवीरोनारायणभयार्दितः २१ निर्बर्हितेदेवरिपौवज्रनाभेमहासुरे अवतीर्णौमहात्मानौहरीव
त्पुरंतदा २२ लब्धप्रशमनंचैवचक्रतुःसुरसत्तमौ सांत्वयामासतुश्चैवबालवृद्धभयार्दितम् २३ इंद्रोपेंद्रौमहात्मानौसत्रयिलाम
हाबलौ आयत्यान्वतदालूचन्द्रहस्पातिमतानुगौ २४ वज्रनाभस्यतद्राज्यंचतुर्द्धाचक्रतुर्नृप विजयस्यचतुर्भागंजयंततनयस्यवै २५
प्रद्युम्नस्यचतुर्भागंरौक्मिणेयसुतस्यच चंद्रप्रभस्यददतुश्चतुर्भागंजनेश्वर २६ कोट्यश्चतस्त्रोग्रामाणामधिकास्ताविशांपते शा
खापुरसहस्रंचस्फीतंवज्रपुरोपमम् चतुर्द्धाचक्रतुस्तत्रसहृष्टौशक्रकेशवौ २७ कंबलाजिनवासांसिरत्नानिविविधानिच चतुर्द्धाच
क्रतुर्वीरौवीरवासवकेशवौ २८ ततोभिषिक्तास्तेवीराराजानोवासवाज्ञया देवदुंदुभिवाद्येननृपविष्णुपदीजलैः २९ स्वयंशक्रेण
देवेनकेशवेनचधीमता ऋषिवंशेमहात्मानःशक्रमाधवनंदनाः ३० विजयस्यप्रसिद्धैवगतिर्विधिनिर्मितः मातृजेनगुणेनापिमा
धवानामहात्मनाम् ३१ अभिषिच्यजयंतंतुवासवोभगवानब्रवीत् त्वयैतेवीरसंरक्ष्याराजानःसमितिंजयः ३२ ममवंशकरोऽत्रैकः
केशवस्यत्रयोऽनघ अवध्याःसर्वभूतानांभविष्यंतिमदाज्ञया ३३ गमनागमनंचैवदिविसिद्धंभविष्यति त्रिविष्टपद्वारकांचरम्यांप्रे
माभिरक्षिताम् ३४ दिशागजसुतान्नागान्हयाश्चोच्चैःश्रवोन्वयान् इच्छयैषांप्रयच्छस्वरथांस्त्वष्टृकृतानपि ३५ गजावैरावणसु
तौशत्रुंजयरिपुंजयौ प्रयच्छाकाशगौवीरौसांबस्यचगदस्यच ३६ आकाशेनपुरीयातुद्वारकांप्रेमरक्षिताम् आयातौचसुतोद्भवयथे
ष्टंभीमनंदनौ ३७ इतिसंदिश्यभगवान्देवराजःपुरंदरः जगामभगवान्स्वर्गंद्वारकामपिकेशवः ३८

इतिपूर्वस्यैनान्वयः ३० गतिःविभज्यराज्यप्राप्तिः
मित्यर्थः मातृजेनगुणेन अक्रूरदौहित्रत्वेनमाधवानांपुत्रत्रयंममचपुत्रइत्येवंचतुर्द्धाविभागः ३१ ब्रवीत्अब्रवीत् ३२ ३३ ३४ प्रयच्छस्वेतिजयंतंप्रतिउक्तिः ३५ ३६
३७ ३८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१८ १९ २० २१ २२ महानदीमंदाकिनीपंचाशद्भिर्विश्वसृजांसहस्रसंवत्सरेसत्रेपंचपंचाशतस्त्रिवृत्तःसंवत्सराःपंचपंचाशतःपंचदशाःपंचपंचा
शतःसप्तदशाःपंचपंचाशतएकविंशतिसंख्याकाभिःपंचाशद्भिःसहस्रैःसंपत्तिभिरुक्तातावत्सांख्यैःतत्फलभूतैरुद्यानादिभिरितियावत् भावयंतीहर्षयंतीज
नानितिशेषः २३ २४ २५ किंकिणीकिनांक्षुद्रघंटिकावतांनर्तकानां २६ द्वादशायतांद्वादशयोजनदीर्घांउपनिवेशाःशाखानगराणितेषांराजिद्विगुणायत्तां
द्विगुणदीर्घांच २७ अष्टेतिपंचभिर्गृहपंक्तिभिश्चतस्रोरथ्याभवंतितास्चतस्रऊर्ध्वाश्चतस्रःतिस्रश्चतासांसंधयःषोडशतेषांमध्येषोडशचत्वराणिएकेनैवमार्गेण

लतावेष्टितपर्यंतंमेरुप्रभवनंमहत् भातिभानुवनंचैवपुष्पकंचमहद्वनम् १८ अर्कैर्केर्वीजकैश्चैवमंदारैश्चोपशोभितम् शतावर्तव
नंचैवकरवीराकरंतथा १९ भातिचैत्ररथंचैवनंदनंचवनंमहत् रमणंभावनंचैववेणुमद्वैसमंततः २० वैडूर्यपत्रैर्जलजैस्तादामंदाकि
नीनदी भातिपुष्करणीरम्यापूर्वस्यांदिशिभारत २१ सानवोभूषितास्तत्रकेशवस्यप्रियैषिभिः बहुभिर्देवगंधर्वैश्चोदितैर्विश्वकर्मणा
२२ महानदीद्वारवतीपंचाशद्भिर्महासुखैः प्रविष्टापुण्यसलिलाभावयंतीसमंततः २३ अप्रमेयांमहोत्सेधामगाधपरिखायुताम् प्राका
रवरसंपन्नांसुधापांडुरलेपनाम् २४ तीक्ष्णयंत्रशतघ्नीभिर्हेमजालैश्चभूषिताम् आयसैश्चमहाचक्रैर्ददर्शद्वारकांपुरीम् २५ अष्टौरथ
सहस्राणिनगरेकिंकिणीकिनाम् समुच्छ्रितपताकानियथादेवपुरेतथा २६ अष्टयोजनविस्तीर्णामचलांद्वादशायताम् द्विगुणोपनि
वेशांचददर्शद्वारकांपुरीम् २७ अष्टमार्गमहारथ्यामहाषोडशचत्वराम् एकमार्गपरिक्षिप्तांसाक्षादुशनसाकृताम् २८ स्त्रियोपिय
स्यांयुध्येरन्किमुवृष्णिमहारथाः व्यूहानामुत्तमामार्गाःसप्तचैवमहापथाः २९ तत्रदेवैर्विहिताःसाक्षाद्विविधाविश्वकर्मणा तस्मिंस्तु
रवरश्रेष्ठदाशार्हाणांयशस्विनाम् ३० वेश्मानिजहृषेदृष्ट्वाततोदेवकिनंदनः कांचनैर्मणिसोपानैरुपेतानिमहर्षणैः ३१ भीमघोष
महाघोषैःप्रासादवरचत्वरैः समुच्छ्रितपताकानिपारिप्लववनानिच ३२ कांचनाग्र्याणिभास्वंतिप्रासादशिखराणिच गृहाणिरमणी
यानिमेरुकूटनिभानिच ३३ पांडुपांडुरशृंगैश्चशातकुंभपरिष्कृतैः रम्यसानुगुहाशृंगैर्विचित्रैरिवपर्वतैः ३४ पंचवर्णैःसुवर्णैश्चपुष्प
वृष्टिसमप्रभैः पर्जन्यतुल्यनिर्घोषैर्नानारूपैरिवाद्रिभिः ३५ दावाग्निज्वलितप्रख्यैर्निर्मितैर्विश्वकर्मणा आश्लिषद्भिरिवाकाशमतिचं
द्रार्कभास्वरैः ३६

स्यक्तायतःपरिक्षिप्तांपरिवृत्तांसागरेणेत्यर्थात् एकमार्गाचासौपरिक्षिप्ताचेतिसमासःउशनसापुरनिर्माणविदाशुक्रेण
२८ व्यूहानांसेनानिवेशविशेषाणांचक्रक्रौंचाकाराणाम् २९ ३० ३१ ३२ ३३ पांडुपांडुराणिश्वेतादपिश्वेतानिअतिश्वेतैरूपे
तानिगृहाणीत्यर्थः शातकुंभपरिष्कृतैःसुवर्णधाराविचित्रितैः ३४ ३५ ३६ ६२ ६२ ६२ ६२ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तैरितिसार्द्धश्लोकः तद्धनद्रुमैः तानिचित्रकादीनिचतानिवनानितद्वनानितत्संबंधिभिर्द्रुमैः बभासेपुरीतिशेषः अत्रसहस्राक्षत्वपुष्पितत्वयोर्दृष्टिकर्तृत्वद्रुमधर्व
त्वयोश्चसामान्यादिंद्ररक्षाणामिंद्रपर्जन्यसमत्वंदाशार्हाणांकृष्णादीनांवासुदेवस्यविष्णोःसगणस्यचसमत्वमितियोग्यतयाज्ञेयम् ३७ ३८ ३९ ज
गतिपर्वतैः कृत्रिमैः क्रीडापर्वतैः ४० कांचननामप्रासादंरुक्मिण्याः ४१ ४२ भोगवन्नामपांडुःसत्यभामायाः ४३ व्यक्तसंजवनः व्यक्तंस्पष्टंसंजवनंप्रति-
क्षणमभिनवरूपत्वंयस्यसतथाविधः ४४ ४५ ४६ मेरुर्नामप्रासादोनाग्नजित्याःसत्यायाः ४७ पद्मकूटाख्यंश्रीमायाः ४८ सूर्यप्रभोनाम

तैर्दाशार्हैर्महाभागैर्बभासेतद्वनंद्रुमैः वासुदेवेंद्रपर्जन्यैर्गृहमेधैरलंकृता ३७ ददृशेद्वारकात्यारुमेधैर्द्यौरिवसंवृता साक्षाद्भगवतो
वेश्मविहितंविश्वकर्मणा ३८ ददृशेवासुदेवस्यचतुर्योजनमायतम् तावदेवचविस्तीर्णमप्रमेयमहाधनम् ३९ प्रासादवरसंपन्नंयु
क्तंजगतिपर्वतैः यच्चकारमहाभागस्त्वष्टावासवनोदितः ४० प्रासादंचैवहेमाभंसर्वभूतमनोहरम् मेरोरिवगिरेःशृंगमुच्छ्रितंकांच
नमहत् ४१ रुक्मिण्याःप्रवरंवासंविहितंविश्वकर्मणा सत्यभामापुनर्वेश्मयदावसत्पांडुरम् ४२ विचित्रमणिसोपानंतद्विदुर्भोग
वानिति विमलादित्यवर्णाभिःपताकाभिरलंकृतम् ४३ व्यक्तःसंजवनोद्देशायश्चतुर्दिग्महाध्वजः सचप्रासादमुख्योयजांबवत्यावि
भूषितः ४४ प्रभयाप्यभवत्सर्वांस्तानन्यान्भास्करोयथा उद्भाद्भास्करवर्णाभस्तयोरंतरमाश्रितः ४५ विश्वकर्मकृतोदिव्यःकैलासशि
खरोपमः जांबूनदइवादीप्तःप्रदीप्तज्वलनोयथा ४६ सागरप्रतिमोतिष्ठन्मेरुरित्यभिविश्रुतः तस्मिन्गांधारराजस्यदुहिताकुलशा
लिनी ४७ गांधारीभरतश्रेष्ठकेशवेननिवेशिता पद्मकूटइतिख्यातपद्मवर्णमहाप्रभम् ४८ सुभीमायामहाकूटवासंसुरुचिरप्रभम्
सूर्यप्रभस्तुप्रासादःसर्वकामगुणैर्युतः ४९ लक्ष्मणायानृपश्रेष्ठनिर्दिष्टःशार्ङ्गधन्वना वैदूर्यमणिवर्णाभःप्रासादोहरितप्रभः ५० यंवि
दुःसर्वभूतानिपरमित्येवभारत वासंतंमित्रविंदायादेवर्षिगणपूजितम् ५१ महिष्यावासुदेवस्यभूषणंतेषुवेश्मसु तत्रप्रासादमु-
ख्योयंविहितोविश्वकर्मणा ५२ अतीवरम्यरम्योसोधिष्ठितःपर्वतोयथा सुवार्तायानिवासंतंप्रशस्तंसर्वदैवतैः ५३ महिष्यावासुदेव
स्यकेतुमानितिविश्रुतः तत्रप्रासादमुख्योवैयस्त्वष्टाविदधेस्वयम् ५४ योजनायतविष्कंभःसर्वरत्नमयःशुभः सप्रीमान्विरजानामस्य
राजत्तत्रसुप्रभः ५५ उपस्थानगृहंयत्रकेशवस्यमहात्मनः तस्मिन्सुविहिताःसर्वेरुक्मदंडाःपताकिनः ५६ सदनेवासुदेवस्यमार्गसं
जवनध्वजाः रत्नजालानिदिव्यानितत्रैवचनिवेशिताः ५७

लक्ष्मणायाः ४९ परमित्येवतंनामकंगृहंमित्रविंदायाः ५० ५१ ५२ सुवार्तायाःप्रासादःकेतुमान्ना
म ५३ ५४ यत्रभगवान्देवान्द्विजांश्चोपतिष्ठतेसविरजानामप्रासादः विजयोनामइतिपाठः ५५ मार्गसंजवनध्वजासंगमकाध्वजाःयेर्ध्वजैश्चिन्हभूतैर्भगवद्गृहमार्गो
वगम्यतइत्यर्थः ५६ वैजयंतइंद्रध्वजःइंद्रप्रासादोवा ५७ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५ परमोपेता अनुज्ञयायुक्तासंकल्पितरूपधारिण्यइत्यर्थः परमंस्यादनुज्ञायामितिमेदिनी शैलः शिलामयः ६ ७ ८ ररासप्रतिशब्दंचकार ९ १० ११
१२ १३ १४ १५ ईश्वराः इंद्रादयः अनुचराः यस्यईश्वरानुचरः १६ १७ १८ १९ २० २१ २२ २३ संहृताः दूषणंविना

मणिहेमनिभाश्चित्रारत्नसोपानभूषिताः मत्तबर्हिगणुष्टाश्चकोकिलैश्चसदामदैः ५ बभूवुःपरमोपेतावाप्यश्चविकचोत्पलाः वि
श्वकर्मकृतःशैलः प्राकारस्तस्यवेश्मनः ६ व्यक्तकिष्कुशतोत्सेधः परिखापरिवेष्टितः तद्गृहंवृष्णिसिंहस्यनिर्मितंविश्वकर्मणा ७
महेंद्रसदृशंवेश्मसमंतादर्धयोजनम् तत्रस्थंपांडुरंशौरिर्मूर्ध्नितिष्ठद्गरुत्मतः ८ प्रीतःशंखमुपाध्मासीद्द्विषतारोमहर्षणम् तस्यशं
खस्यशब्देनसागरःक्षुभ्नभेभृशम् ररासचनभःकृत्स्नंतच्चित्रमभवत्तदा ९ पांचजन्यस्यनिर्घोषंसंश्रुत्यकुकुराधकाः विशोकाःसम
पद्यंतगरुडस्यचदर्शनात् १० शंखचक्रगदापाणिगरुडस्योपरिस्थितम् दृष्ट्वाजहर्षिरेपौराभास्करापमतेजसम् ११ ततस्तूर्यप्रणाद
श्चभेरीणांचमहास्वनाः जज्ञिरेसिंहनादाश्चसर्वेषांपुरवासिनाम् १२ ततस्तेसर्वदाशार्हाःसर्वेचकुकुरांधकाः प्रीयमाणाःसमाजग्मुरालो
क्यमधुसूदनम् १३ वासुदेवंपुरस्कृत्यशंखतूर्यरवैःसह उग्रसेनोययौराजावसुदेवनिवेशनम् १४ आनंदिनीपर्यचरन्स्वेषुवेश्मसु
देवकीरोहिणीचयशोदाच आहुकस्यचयाःस्त्रियः १५ ततःकृष्णःसुपर्णेनस्वंनिवेशनमभ्यगात् चचारचयथोद्देशमीश्वरानुचरोहरिः
१६ अवतीर्यगृहद्वारिकृष्णस्तुयदुनंदनः यथार्हंपूजयामासयादवान्यादवर्षभः १७ रामाहुकगदाक्रूरप्रद्युम्नादिभिरर्चितः प्रविवेश
गृहंशौरिःशादायमणिपर्वतम् १८ तचशक्रस्यदयितंपारिजातंमहाद्रुमम् प्रवेशयामासगृहंप्रद्युम्नोरुक्मिणीसुतः १९ तेन्योन्यंददृशु
र्वीरादेहबंधानमानुषान् पारिजातप्रभावेनततोसुसुदिरेजनाः २० तःस्तूयमानोगोविंदःप्रहृष्टैर्यादवर्षभैः प्रविवेशगृहंश्रीमान्विहितं
विश्वकर्मणा २१ ततोंतःपुरमध्येतंसशृंगमणिपर्वतम् न्यवेशयदमेयात्मावृष्णिभिःसहितोच्युतः २२ तंचदिव्यंद्रुमश्रेष्ठंपारिजातममि
त्रजित् अर्च्यमर्चितमत्युग्रमिष्टेदेशेन्यवेशयत् २३ अनुज्ञाप्यततोज्ञातीन्केशवःपरवीरहा ताःस्त्रियःपूजयामाससंहृतानरकेण
याः २४ वस्त्रैराभरणैर्दिव्यैर्दासीभिर्धनसंचयैः हारैश्चंद्रांशुसंकाशैर्मणिभिश्चमहाप्रभैः २५ पूर्वमभ्यर्चिताश्चैववसुदेवेनताःस्त्रि
यः देवक्यासहरोहिण्यारेवत्याचाहुकेनच २६ सत्यभामोत्तमास्त्रीणांसौभाग्येनाभवत्तदा कुटुंबस्येश्वरीत्वासीद्रुक्मिणीभीष्मका-
त्मजा २७ तासांयथार्हंहर्म्याणिप्रासादशिखराणिच आदिदेशगृहान्कृष्णःपारिबर्हांश्चपुष्कलान् २८ इतिश्री म० खि० ह० वि० हर
काप्रवेशनंनामएकोनशतोऽध्यायः ९९

आनीताः २४ २५ २६ २७ २८ इतिश्रीमहाभारतेखि० ह० विष्णुपर्वणिटीकायांएकोनशतोऽध्यायः ९९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हंसकूटस्यपर्वतविशेषस्य ५८ आनीतंविश्वकर्मणेत्युत्तरशत् ५९ ६० ६१ ६२ येऽप्सरक्षंस्तैःसहेतिशेषः ६३ जुष्टंपादपमितिपूर्वेणान्वयि ६४
६५ ६६ विहिताआज्ञाकारिणःकृताः ६७ ६८ ६९ ७० ७१ ७२ किष्कुशतंहस्तशतं ७३ भौमेनविश्वकर्मणा ७४ इतिश्रीम-

आहृत्ययदुसिंहेनवैजयंतोचलोमहान् हंसकूटस्ययच्छृंगमिंद्रद्युम्नसरःप्रति ५८ षष्टितालसमुत्सेधमर्धयोजनमायतम्
सकिंनरमहानागतदप्यमिततेजसा ५९ पश्यतांसर्वभूतानामानीतंलोकविश्रुतम् आदित्यपथगंयत्तुमेरोःशिखरमुत्तमम् ६०
पुंडरीकशतैर्जुष्टंविमानैश्चहिरण्मयैः जांबूनदमयंदिव्यंत्रिषुलोकेषुविश्रुतम् ६१ तदप्युत्पाट्यकृष्णार्थमानीतंविश्वकर्मणा भ्रा
जमानमतीवाग्र्यंसर्वौषधिसमन्वितम् ६२ तदिंद्रवचनात्त्वष्टाकार्यहेतोःसमानयत् पारिजातश्चतत्रैवकेशवेनाहृतःस्वयं ६३
नीयमानेतुतत्रासीद्युद्धमद्भुतकर्मणः कृष्णस्ययेप्सरक्षंतदेवाःपादपमुत्तमम् ६४ पुंडरीकशतैर्जुष्टंविमानैश्चहिरण्मयैः विहिता
वासुदेवार्थरत्नपुष्पफलद्रुमाः ६५ पद्मखंडजलोपेतारक्तसौगंधिकोत्पलाः मणिहेमप्रवाकीर्णाःपुष्करिण्यःसरांसिच ६६ ता
सांपरमकूलानिशोभयंतिमहाद्रुमाः शालास्तालाःकदंबाश्चशतशाखाश्चरोहिणाः ६७ येचहैमवतावृक्षायेचमेरुरुहास्तथा आ
हृत्ययदुसिंहार्थंविहितांविश्वकर्मणा ६८ रक्तपीतारुणश्यामाःश्वेतपुष्पाश्चपादपाः सर्वर्तुफलसंपन्नास्तेषुकाननसंधिषु ६९ स
मकूलजलोपेताःशातशर्करवालुकाः तस्मिन्पुरवरेनद्यःप्रसन्नसलिलाह्रदाः ७० पुष्पाकुलजलोपेतानानाद्रुमलताकुलाः अप
राश्चाभवन्नद्योहेमशर्करवालुकाः ७१ मत्तबर्हिणसंघैश्चकोकिलैश्चसदामदैः बभूवुःपरमोपेतास्तस्यांपुर्यांचपादपाः तत्रैवगजयू
थानिपुरेगोमहिषास्तथा ७२ निवासश्चकृतस्तत्रवराहमृगपक्षिणाम् पुर्यांतस्यांतुरम्यायांप्राकारोवैहिरण्मयः व्यक्तंकिष्कुशतोत्से
धोविहितोविश्वकर्मणा ७३ अतीवसौम्यःसोथासीद्धैरितःपर्वतोयथा तत्रतत्रमहाशैलाःसरितश्चसरांसिच परिक्षिप्तानिभौमे
नवनान्युपवनानिच ७४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिद्वारकाविशेषनिर्माणंनामाष्टनवतितमोऽध्यायः ९८
वैशंपायनउवाच एवमालोकयानःसद्वारकांवृषभेक्षणः अपश्यत्स्वगृहंकृष्णःप्रासादशतशोभितम् १ मणिस्तंभसहस्राणायाम
युतैर्विवृतंशतैः तोरणैर्ज्वलनप्रख्यैर्मणिविद्रुमराजतैः २ तत्रतत्रप्रभासद्भिश्चित्रकांचनवेदिकैः प्रासादस्तत्रकृष्णस्यमहान् कृष्णोपस्था
निकोऽभवत् ३ स्फाटिकस्तंभविवृतोविस्तीर्णःसर्वकांचनः पद्माकुलजलोपेतारक्तसौगंधिकोत्पलाः ४

हाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांअष्टनवतितमोऽध्यायः ९८ एवमिति १ विवृतंस्पष्टीकृतंस्तंभप्रभयैवयस्तांधकारमित्यर्थः २ कांचनवेदिकैस्तोरणैः
३ ४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ततइति १ २ ३ ४ ५ रत्नप्रवेकैः रत्नोत्तमैः ६ ७ चाक्रिकोराजाज्ञाघोषकः ८ ९ १० ११ विविशुः अभिनिविविशुः आसनेषुउपविष्टाः १२ १३

वैशंपायनउवाच ततःसंपूज्यगरुडंवासुदेवोऽनुमान्यच सखिवच्चोपगृह्यैनमनुजज्ञेगृहंप्रति १ सोऽनुज्ञातोहिसत्कृत्यप्रणम्यचजनार्दनम् ऊर्ध्वमाचक्रमेपक्षीयथेष्टंगगनेचरः २ सपक्षवातसंक्षुब्धंसमुद्रंमकरालयम् कृत्वावेगेनमहताययौपूर्वंमहोदधिम् ३ कृत्यकाले उपस्थास्यइत्युक्त्वागरुडेगते कृष्णोददर्शपितरंस्तूयमानकदुंदुभिम् ४ उग्रसेनंचराजानंबलदेवंचसात्यकिम् काश्यसांदीपनिंचैवब्राह्मणाग्र्यंतथैवच ५ अन्यांश्चमुख्यान्वृष्णीनांतांश्चभोजांधकांस्तथा रत्नप्रवेकैर्दाशार्हान्वीर्यलब्धैस्तथार्चयत् ६ हताब्रह्मद्विषःसर्वेजयलक्षकसूण्यायः रथात्सातृनिवृत्तोयमक्षतोमधुसूदनः ७ इतिचत्वरस्थ्यासुद्वारवत्यांसुपूजितः चाक्रिकोघोषयामासपुरुषोमृष्टकुंडलः ८ ततःसांदीपनिंपूर्वमभिगम्यजनार्दनः ववंदेवृष्णिनृपतिमाहुकंविनयान्वितः ९ तथाहिपरिपूर्णाक्षमानंदागतचेतसम् ववंदेसहरामेणपितरंवासवानुजः १० उपगम्यतथाशेषान्सत्कृत्यचयथार्हतः सर्वेषांनामजग्राहदाशार्हाणामधोक्षजः ११ ततःसर्वाणिदिव्यानिसर्वरत्नमयानिच आसनाग्र्याणिविविशुरुपेंद्रप्रमुखास्तदा १२ ततस्तद्धनमक्षय्यंकिंकरैर्यत्समाहृतम् तत्सभामानयामासुः पुरुषाःकृष्णशासनात् १३ ततःसमानयामासदाशार्हाश्चयदूत्तमः सर्वान्दुंदुभिशब्देनपूजयिष्यन्जनार्दनः १४ तांसभामनवतींरम्यांमणिविद्रुमतोरणाम् सभांसर्वदशार्हास्तेविविशुःकृष्णशासनात् १५ ततःपुरुषसिंहैःसायदुभिःसर्वतोवृता सर्वार्थगुणसंपन्नासासभाभरतर्षभ १६ शुशुभेऽभ्यधिकंसुप्तासिंहैर्गिरिगुहायथा रामेणसहगोविंदःकांचनंमहदासनम् १७ उग्रसेनंपुरस्कृत्यभोजवृष्णिपुरस्कृतः तत्रोपविष्टस्तान्वीरान्यथाप्रीतियथावयः समाभाष्ययदुश्रेष्ठानुवाचपुरुषोत्तमः १८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिसभाप्रवेशनंनामशततमोऽध्यायः १०० ॥ श्रीकृष्णउवाच भवतांपुण्यकीर्तीनांतपोबलसमाधिभिः अपध्यानाच्चपापात्माभौमःसनरकोहतः १ मोक्षितंबंधनात्कन्यांतःपुरमुत्तमम् मणिपर्वतमुत्पाट्यशिखरंचैतदाहृतम् २ अयंधनौघःसुमहान्किंकरैराहृतोमम ईशाभवंतोद्रव्यस्यतानुक्त्वाविररामह ३ तच्छ्रुत्वावासुदेवस्यभोजवृष्ण्यंधकान्वयाः जहृषुर्हृष्टरोमाणः पूजयंतोजनार्दनम् ४ ऊचुश्चैनंनृवीराःकृतांजलिपुटास्ततः नैतच्चित्रंमहाबाहोत्वयिदेवकिनंदने ५ यत्कृत्वादुष्करंकर्मदेवैरपिदुरासदं लालयेःस्वजनान्भोगैरत्नैश्चस्वयमर्जितैः ६ ततःसर्वदशार्हाणामाहुकस्यचयाःस्त्रियः प्रीयमाणाःसमाजग्मुर्वासुदेवदिदृक्षया ७

समानयामासधनानिविभज्यददावित्यर्थः १४ १५ १६ १७ १८ इतिश्रीम०खि०ह०वि०टी०शततमोऽध्यायः १०० भवतामिति १ २ ३ ४ ५ ६ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८ ९ १० नराद्यौप्राप्ति एकानंशासायोगमाया दुहितातस्याः यशोदायाः ११ क्षणःउक्तविधःसंकेतः मुहूर्तःउक्तः कालश्चताभ्यांजज्ञे आविर्बभूव १२
१३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ अत्र मन्यतते

देवकीसतमादेव्योरोहिणीचशुभानना ददृशुःकृष्णमासीनंरामंचैवमहाभुजम् ८ तौतुपूर्वमतिक्रम्यरोहिणीमभिवाद्यच अभिवा
द्यतांदेवीं देवकींरामकेशवौ ९ साताभ्यामृषभाक्षाभ्यांपुत्राभ्यांशुशुभेंबिका अदितिर्देवमातेवमित्रेणवरुणेनच १० ततःप्राप्तो
नराध्यौतुतस्याःसादुहितातदा एकानंशेतियामाहुर्नरावेकामरूपिणीम् ११ तथाक्षणमुहूर्ताभ्यांययाजज्ञेसुरेश्वरः यत्कृतेसगणं
कंसंजघानपुरुषोत्तमः १२ साकन्यावर्वृधेतत्रवृष्णिसद्मनिपूजिता पुत्रवत्पाल्यमानावैवासुदेवाज्ञयातदा १३ एकानंशेतियामाहुरु
त्पन्नामानवाभुवि योगकन्यादुराधर्षारक्षार्थंकेशवस्यह १४ तांवैसर्वेसुमनसःपूजयंतिस्मयादवाः देववद्दिव्यपुरुषाः कृष्णःसंरक्षि
तोयया १५ तांचतत्रोपसंगम्यप्रियामिवसखींस्वसाम् दक्षिणेनकराग्रेणपरिजग्राहमाधवः १६ तथैवरामोतिबलःसंपरिष्वज्यभावि-
नीम् मूर्ध्न्युपाघ्रायसव्येनप्रतिजग्राहपाणिना १७ ददृशुस्ताःस्त्रियोमध्येभगिनींरामकृष्णयोः रुक्मपद्मव्यग्रकरांश्रियंपद्मालयामि
व १८ तथाक्षतमहावृष्ट्यापुष्पैश्चविविधैःशुभैः अवकीर्यचलाजैस्ताःस्त्रियोजग्मुर्यथालयम् १९ ततस्तेयादवाःसर्वेपूजयंतोजना
र्दनम् उपोपविविशुःप्रीताःप्रशंसंतोद्भुतंकृतम् २० पूज्यमानोमहाबाहुःपौराणांरतिवर्द्धनः विरराजमहाकीर्तिर्देवैरिवसतैःसह २१ स
मासीनेषुसर्वेषुयादवेषुजनार्दनम् नियोगात्त्रिदशेंद्रस्यनारदोभ्यागमत्सभाम् २२ सोथसंपूजितःपूज्यःशूरैस्तैर्यदुपुंगवैः करंसंस्पृश्य
सहरेर्विवेशपरमासने २३ सुखोपविष्टस्तान्वृष्णीनुपविष्टानुवाचह संप्राप्तशक्रवचनात्जानीध्वंमानवर्षभाः २४ शृणुध्वंराजशार्दूलाः
कृष्णस्यास्यपराक्रमम् यानिकर्माणिकृतवान्बाल्यात्प्रभृतिकेशवः २५ उग्रसेनसुतःकंसःसर्वान्निर्भर्त्स्ययादवान् राज्यंजग्राहदुर्बु
द्धिर्बध्वापितरमाहुकम् २६ समाश्रित्यजरासंधंश्वशुरंकुलपांसनः भोजवृष्ण्यंधकान्सर्वानवमन्यतदुर्मतिः २७ ज्ञातिकार्यंचिकीर्षुस्तु
वासुदेवःप्रतापवान् उग्रसेनस्यरक्षार्थंस्वपुत्रपर्यरक्षत २८ सगोपैःसहधर्मात्मामथुरोपवनेस्थितः अत्यद्भुतानिकर्माणिकृतवान्म-
धुसूदनः २९ प्रत्यक्षंशूरसेनानांश्रूयतेमहदद्भुतम् उत्तानेनशयानेनशकटांतरचारिणा ३० राक्षसीनिहतारौद्राशकुनीवेषधारिणी
पूतनानामघोरासामहाकायामहाबला ३१ विषदिग्धंस्तनंरौद्राप्रयच्छंतीजनार्दने ददृशुर्निहतांतांतेराक्षसींवनगोचराः ३२

यां अवमानमकरोत् २७ २८ २९ शकटांतरचारिणाशकटनाशार्थंचेष्टमानेन ३० ३१ ३२ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सुरासुरमनुष्येषुनासीन्नभविताक्वचित् यइमामावसेत्कश्चिदन्योवैमधुसूदनात् ३५ एवमेषदशार्हाणांविधायविधिमुत्तमम् वि
ष्णुर्नारायणःसोमःसूर्यश्चभवितास्वयम् ३६ अप्रमेयस्त्वनिर्देश्यःयथाकामचरोवशी मोदतेएषसदाभूतैर्बालःक्रीडनकैरिव ३७ नयमा
तुंमहाबाहुःशक्योयंमधुसूदनः परंह्यपरमेतस्माद्विश्वरूपान्नविद्यते ३८ श्रुतोयमेवंशतशस्तथाशतसहस्रशः अंतोहिकर्मणामस्यदृष्ट
पूर्वोनकेनचित् ३९ एवमेतानिकर्माणिशिशुत्वमभ्यागतस्तदा कृतवान्पुंडरीकाक्षःसंकर्षणसहायवान् ४० इत्युवाचपुराव्यासस्तपोवी
र्येणचक्षुषा महायोगीमहाबुद्धिःसर्वप्रत्यक्षदर्शिवान् ४१ वैशंपायनउवाच इतिसंस्तूयगोविंदमर्हद्भिर्वचनैर्मुनिः यदुभिःपू
जितःसर्वैर्नारदस्त्रिदिवंययौ ४२ तत्कृत्स्नंगोविंदोददेशांधकवृष्णिषु यथाहपुंडरीकाक्षोविधिवन्मधुसूदनः ४३ यादवाश्चधनंप्राप्य
विधिवद्भूरिदक्षिणैः यज्ञैरिष्ट्वामहात्मानोद्वारकामावसन्पुरीम् ४४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिनारदवाक्य-
नामशततोपरिद्वितीयोऽध्यायः १०२ जनमेजयउवाच बहूनांस्त्रीसहस्राणामष्टौभार्याःप्रकीर्तिताः तासामपत्यान्यष्टानांभगवा
न्प्रब्रवीतुमे १ वैशंपायनउवाच अष्टौमहिष्यःपुत्रिण्यइतिप्राधान्यतःस्मृताः सर्वावीरप्रजाश्चैवतास्त्वपत्यानिमेशृणु २ रुक्मि
णीसत्यभामाचदेवीनाग्नजितीतथा सुदत्ताचतथाशैब्यालक्ष्मणाचारुहासिनी ३ मित्रविंदाचकालिंदीजांबुवत्यथपौरवी सुभीमा
चतथामाद्रीरुक्मिणीतनयान्शृणु ४ प्रद्युम्नःप्रथमजज्ञेशंबरांतकरःप्रभुः द्वितीयश्चारुदेष्णश्चवृष्णीसिंहोमहारथः ५ चारुभद्र-
श्चारुगर्भःसुदंष्ट्रोद्रुमएवच सुषेणश्चारुदेष्णश्चचारुविंदश्चवीर्यवान् ६ चारुबाहुःकनीयांश्चकन्याचारुमतीतथा जज्ञिरेसत्य-
भामायांभानुर्भीमरथस्तथा ७ रोहितोदीप्तिमांश्चैवताम्रजाक्षोजलांतकः भानुर्भौमनिकाचैवताम्रपर्णीजलंधमा ८ चतस्रोज
ज्ञिरेतेषांस्वसारोगरुडध्वजात् जांबवत्याःसुतोजज्ञेसांबःसमितिशोभनः ९ मित्रवान्मित्रविंदश्चमित्रवत्यपिचांगना मित्रबाहुःसु
नीथश्चनाग्नजित्याःप्रजाःशृणु १० भद्रकारोभद्रविंदःकन्याभद्रवतीतथा सुदत्तायांतुशैब्यायांसंग्रामजिदजायत ११ सत्यजित्सेनजि
च्चैवतथाशूरःसपत्नजित् सुभीमायाःसुतोमाद्र्यांवृकाश्वोवृकनिर्वृतिः १२ कुमारोवृकदीप्तिश्चलक्ष्मणायाःप्रजाःशृणु गात्रवान्गा
त्रगुप्तश्चगात्रविंदश्चवीर्यवान् १३ जज्ञिरेगात्रवत्याचभगिन्यानुजयासह अश्रुतश्चसुतोजज्ञेकालिंद्याःश्रुतसंमतः १४ अश्रुतःश्रुत
सेनायैप्रददौमधुसूदनः तमदायत्हृषीकेशस्ताभार्यासुदितोब्रवीत् १५

तोपरिद्वितीयोऽध्यायः १०२ बहूनामिति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३
१४ १५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

अक्षप्रपातनेचक्रविक्षेपमात्रेनिमित्तेप्रतिस्थानविशेषेवा १० ११ १२ १३ १४ १५ १६ जिगायजयवंतमकरोत् अंतर्भावितण्यंतोयंशब्दः
१७ चक्रानुयानेः रथैः प्रन्हवणेसंग्रामेइत्यर्थः अक्षराधिक्यमार्षं जिगायजितवान् अर्जुनद्वारेतिभावः १८ १९ २० २१ २२ २३ २४

गोपतिस्तालकेतुश्चनिहतौशार्ङ्गधन्वना अक्षप्रपातनेचैवडिंभोहंसश्चदानवौ उभौतावपिकृष्णेनसानुगौविनिपातितौ १० द-
ग्ध्वावाराणसींचैवकेशवेनमहात्मना सराष्ट्रःसानुबंधश्चकाशीनामधिपोहतः ११ विजित्यवरुणंसंख्येशरैःसन्नतपर्वभिः अथेंद्रसेनि
रानीतःकृष्णेनाद्भुतकर्मणा १२ सहितःसर्वयादोभिःसमरेषुमहाबलः प्राप्यलोहितकूटंचकृष्णेनवरुणोजितः १३ महेंद्रभवनेयातो
देवैर्गुप्तोमहात्मभिः अचिंतयित्वादेवेंद्रंपारिजातद्रुमोहृतः १४ पांड्यपौंड्रकलिंगंचमात्स्यंचैवजनार्दनः जघानसहितान्सर्वान्वंगरा
जंतथैवच १५ एषचैकशतंहत्वारणेराज्ञांमहात्मनाम् गांधारीमावहद्वीरोमहिषींप्रियदर्शनाम् १६ तथागांडीवधन्वानंक्रीडतंमधुसू
दनः जिगायभरतश्रेष्ठकुंत्याःप्रमुखतोविभुः १७ द्रोणंद्रौणिंकृपंकर्णंभीमंचैवसुयोधनम् चक्रानुयानेःप्रन्हवणेजिगायपुरुषोत्तमः
१८ बभ्रोश्चप्रियमन्विच्छन्शंखचक्रगदासिभृत् सौवीरराजस्यसुतांप्रसह्यहृतवान्प्रभुः १९ पर्यस्तांपृथिवींकृत्स्नांसाश्वांसरथकुंज
राम् वेणुदारिकृतेयत्नाज्जिगायपुरुषोत्तमः २० अवाप्यतपसावीर्यंबलमोजश्चमाधवः पूर्वदेहेजहारायंबलेस्त्रिभुवनंहरिः २१ क-
न्याशानिगदारवड्गैस्त्रासयद्भिश्चदानवैः यस्यनाधिगतोमृत्युःपुरप्राग्ज्योतिषप्रति २२ अभिभूतश्चकृष्णेनसगणःसुमहाबलः बलेः
पुत्रोमहावीर्योबाणोद्रविणवत्तरः २३ पीठंतथामहाबाहुःकंसामात्यंजनार्दनः पैठिकंचासिलोमानंनिजघानमहाबलः २४ जंभमैराव-
णंचापिविरूपंचमहायशाः जघानपुरुषव्याघ्रोदैत्यंमानुषरूपिणम् २५ तथानागपतिंतोयेकालीयंचमहौजसम् निर्जित्यपुंडरीकाक्षः
प्रेषयामाससागरम् २६ संजीवयामासमृतंपुत्रंसांदीपिनेस्तथा निर्जित्यपुरुषव्याघ्रोयमंवैवस्वतंहरिः २७ एवमेषमहाबाहुःशास्ताते
षांदुरात्मनाम् देवाश्चब्राह्मणाश्चैवयैर्हिंसंतिसदानृप २८ निहत्यनरकंभौमंसमाहृत्यमणिकुंडले देवमातुर्ददौचैवप्रीत्यर्थंवज्रपाणि-
नः २९ एवंचदेवदैत्यानांकारणाच्चमहायशाः भयाभयकरःकृष्णःसर्वलोककरोविभुः ३० संस्थाप्यधर्मांचार्येषुयज्ञैरिष्ट्वासदक्षिणैः
कृत्वादेवार्थममितंस्वस्थानंप्रतिपत्स्यते ३१ कृष्णोभोगवतींरम्यामृषिकांतांमहायशाः द्वारकामात्मसात्कृत्वासमुद्रंगमयिष्यति ३२
बहुरत्नसमाकीर्णांचैत्ययूपशतांकिताम् द्वारकांवरुणावासंप्रवेक्ष्यतिसकाननाम् ३३ तांसूर्यसदनप्रख्यांमतज्ञःशार्ङ्गधन्वनः विसृष्टां
वासुदेवेनसागरःप्लावयिष्यति ३४

२५ २६ २७ २८ २९ ३० देवार्थंदेवानांप्रयोजनंसंस्थानंवैकुंठं ३१ ३२ ३३ ३४ [illegible] [illegible] [illegible]

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६

हर्षेणमहतायुक्तापुनःपुनरुदैक्षत अथतस्यानिरीक्षंत्याःस्मृतिःप्रादुर्बभूवह अयंसममकांतोभूत्स्मृत्वैवंचान्वचिंतयत् ९ अयं
सनाथोभर्तामेयस्यार्थेहंदिवानिशम् चिंताशोकार्णवेमग्नानविंदामिरतिंक्वचित् १० अयंभगवतापूर्वंदेवदेवेनशूलिना खेदितेन
कृतोनंगोदृशोज्वाल्यंतरेमया ११ कथमस्यस्तनंदास्येमातृभावेनजानती भर्तुर्भार्यात्वहंभूत्वावक्ष्येवापुत्रइत्युत १२ एवंसंचिंत्यमनसा
धात्र्यास्तंसासमर्पयत् रसायनप्रयोगैश्चशीघ्रमेवव्यवर्द्धयत् १३ धात्र्याःसकाशात्सचतांशृण्वन्रुक्मिणिनंदनः मायावतींसविज्ञाना
न्मेनेस्वामेवमातरम् १४ साचतंवर्द्धयामासकार्ष्णिंकमललोचनम् मायाश्चास्मैददौसर्वादानवीःकाममोहिता १५ सयदायौवनस्थ
स्तुप्रद्युम्नःकामदर्शनः चिकीर्षितज्ञोनारीणांसर्वास्त्रविधिपारगः १६ तंसामायावतीकांतंकामयामासकामिनी इंगितैश्चापिवीक्षती
मल्लोभयतसस्मिता १७ प्रसज्जंतीतुतांदेवींबभाषेचारुहासिनीम् प्रद्युम्नउवाच मातृभावंव्यतिक्रम्यकिमेवंवर्तसेन्यथा अ
होदुष्टस्वभावासिस्त्रीत्वेचपलमानसा १८ यापुत्रभावमुत्सृज्यमयिलोभात्प्रवर्तसे नतुतेहंसुतःसौम्येकोयंशीलविपर्ययः १९ तत्वमि
च्छाम्यहंदेविकथितंकोन्वयंविधिः विद्युत्संपातचपलःस्वभावःखलुयोषिताम् २० यानरेषुप्रसज्जंतेनगाग्रेषुघनाइव यदितेहंसुतः
सौम्येयदिवानात्मजःशुभे २१ कथितंतत्वमिच्छामिकिमिदंतेचिकीर्षितम् एवमुक्तातुसाभीरुःकामेनव्यथितेंद्रिया २२ प्रियंप्रोवाचव
चनंविविक्तेकेशवात्मजम् नत्वंममसुतःकांतनापितेशंबरःपिता २३ रूपवानसिविक्रांतस्त्वंजात्यावृष्णिनंदनः पुत्रस्त्वंवासुदेवस्यरु
क्मिण्यानंदवर्धनः २४ दिवसेसप्तमेबालोजातमात्रोपवाहितः सूतिकागारमध्यात्त्वंशिशुरुत्तानशायितः २५ ममभर्त्राहृतोसित्वंबल
वीर्यप्रवर्तिना पितुस्तेवासुदेवस्यधर्षयित्वागृहंमहत् २६ पाकशासनकल्पस्यहृतस्त्वंशंबरेणह साचतेकरुणंमातात्वांबालमनुशोच
ती २७ अत्यर्थंतप्यतेवीरविवत्सासौरभीयथा सोपिशक्रादपिमहान्पितातेगरुडध्वजः २८ इहत्वांनाभिजानातिबालमेवाप्यवाहितं
कांतवृष्णिकुमारस्त्वंनहित्वंशंबरात्मजः २९ वीरनैवंविधान्पुत्रान्दानवाजनयंतिहि अतोहंकामयामित्वांनहित्वंजनितोमया ३० रूपं
तेसौम्यपश्यंतीसीदामिहृदिदुर्बला यन्मेव्यवसितंकांतयत्तुमेहृदिवर्तते ३१ तन्मेमनसिवार्ष्णेयप्रतिसंधातुमर्हसि एषतेकथितःसर्वः
सद्भावस्त्वयियोमम ३२ यथानममपुत्रस्त्वंनपुत्रःशंबरस्यच श्रुत्वैवमखिलंसर्वंमायावत्याप्रभाषितम् ३३ चक्रायुधात्मजःक्रुद्धःशंबरंस
समाह्वयत् सर्वमायास्त्वभिज्ञोसौनामविद्याव्यचात्मनः ३४

२७ २८ २९ ३० ३१ ३२ ३३ ३४ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वांआवयोः कृष्णसुतसेनयोः १६ १७ १८ १९ २० दशायुतंलक्षं २१ अष्टौअयुतानीत्यशीतिसहस्रंचपुत्राः २२ अरुद्धइतिच्छेदः २३ २४ २५ २६

एषवासुभयोरस्तुदायादःशाश्वतीःसमाः बृहत्यांतुगदस्याहुः शैब्यायामंगदंसुतम् १६ उत्पन्नंकुमुदंचैवश्वेतंश्वेतातथांगना अ गावहःसुमित्रश्चसुचित्रश्चित्ररथस्तथा १७ चित्रसेनःसुदत्ताश्चित्राचित्रवतीतथा वनस्तंबश्चजज्ञातेसुतस्तंबवनश्चह १८ निवास नोवनस्तंबः कन्यास्तंबवतीतथा उपसन्नश्चशंकुश्चकन्यासुः क्षिप्रएवच १९ कौशिक्यांश्रुतसोमायांयोधिष्ठिर्यांयुधिष्ठिरः कापालीग रुडश्चैवजज्ञातेचित्रयोधिनौ २० एवमादीनिपुत्राणांसहस्राणिनिबोधमे दशायुतसमाख्याता वासुदेवस्यतेसुताः २१ अयुतानित थान्याष्टौशूरारणविशारदाः जनार्दनस्यप्रसवः कीर्तितोयंतथामया २२ प्रद्युम्नस्यसुतोजज्ञेवैदर्भ्यांराजसत्तम अनिरुद्धोरणेऽरुद्धो जज्ञेसमृगकेतनः २३ रेवत्यांबलदेवस्यजज्ञातेनिशठोल्मुकौ भ्रातरौदेवसंकाशावुभौपुरुषसत्तमौ २४ सुतनुश्चसुताराचशौरेरा स्तांपरिग्रहः पौंड्रकःकपिलश्चैववसुदेवस्यतौसुतौ २५ तारायांकपिलोजज्ञेपौंड्रश्चसुतनोःसुतः तयोर्नृपोभवत्पौंड्रःकपिलश्चवनं ययौ २६ तुर्यांसमभवद्वीरोवसुदेवान्महाबलः जरानामनिषादानांप्रथमःसर्वधनुष्मताम् २७ काश्यांसुपार्श्वतनयंलेभेसांबान्तरस्वि नम् सानुर्जज्ञेनिरुद्धस्यवज्रःसानोरजायत २८ वज्राज्जज्ञेप्रतिरथःसुचारुस्तस्यचात्मजः अनमित्राच्छिनिर्जज्ञेकनिष्ठाद्वृष्णिनंद नात् २९ शिनेःसुतःसत्यवाक्जज्ञेसत्यकश्चमहारथः सत्यकस्यात्मजःशूरोयुयुधानस्त्वजायत ३० असंगोयुयुधानस्यमणिस्तस्याभव त्सुतः मणेर्युगंधरःपुत्रइतिवंशःसमाप्यते ३१ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिवृष्णिवंशानुकीर्तनेशततमोपरित्रि तीयोऽध्यायः १०३ ७ जनमेजयउवाच यएषभवतापूर्वंशंबरघ्नेत्युदाहृतः प्रद्युम्नःसकथंजज्ञेशंबरंतद्ब्रवीहिमे १ वैशंपा यनउवाच रुक्मिण्यांवासुदेवस्यलक्ष्म्यांकामोधृतव्रतः शंबरांतकरोजज्ञेप्रद्युम्नःकामदर्शनः २ सनत्कुमारइतियःपुराणेपरिगीय ते तंसप्तरात्रेसंपूर्णेनिशीथेसूतिकागृहात् ३ जहारकृष्णस्यसुतंशिशुंवैकालशंबरः विदितंतस्यकृष्णस्यदेवमायानुवर्तिनः ४ त तोननिगृहीतःसदानवोसुदुर्मदः समृत्युनापरीतासुर्मायायाप्रजहारतम् ५ दोर्भ्यामुत्क्षिप्यनगरंस्वंनिनायमहासुरः अनपत्यातु तस्यासीद्भार्यारूपगुणान्विता ६ नाम्नामायावतीनामसमायेवशुभदर्शना ददौतंवासुदेवस्यपुत्रंपुत्रमिवात्मजम् ७ तस्यामहिष्यामा यिन्यादानवःकालचोदितः मायावतीतुतंदृष्ट्वासंप्रहृष्टतनूरुहा ८

तुर्यांचतुर्थ्यांशूद्रायामित्यर्थः २७ २८ २९ ३० ३१ इतिश्रीम॰खि॰हरिवं शेविष्णुपर्वणिटीकायांशततोपरित्रितीयोऽध्यायः १०३ यएषइति १ २ ३ ४ ५ रतिप्रतिच्छायामायावतीनामभार्यात्वमापन्नानतुरतिरित्यग्रेव्यक्तीकरिष्यति ६ ७ ८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६२ ६३ ६४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांशतोपरिचतुर्थोऽध्यायः १०४ ततइति १ २ सर्वमस्यतेक्षिप्यतेनेनेतिसर्वास्त्रंतच्च तद्धनुश्चतस्मात् ३ ४ अनंगःप्रद्युम्नः ५ ६ समयुध्यतएकत्वमार्षंयुद्धंकृतवंतः ७ ८ ९ १० ११ ऋष्याःमृगविशेषास्तेषांसहस्रेण १२ चित्रभक्ति

रमिष्यतित्वयासार्द्धंशैलपुत्र्यायथाह्यहम् एवमादिश्यदेवेशोजगामपुरुषोत्तमः ६२ कैलासंमेरुसंकाशंसिद्धचारणसेवितम् कामप
त्नीप्रणम्याथदेवदेवमुमापतिम् ६३ जगामशंबरगृहंकालस्यांतंप्रतीक्षती एवमेषमहाबाहुःशंबरंनिहनिष्यति सहपुत्रेणप्रद्युम्नोहं-
तातस्यदुरात्मनः ६४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिशंबरवधेशतोपरिचतुर्थोऽध्यायः १०४ वैशंपायनउवाच त
तःप्रववृतेयुद्धंतुमुलंलोमहर्षणम् शंबरस्यतुपुत्राणांरुक्मिण्यानंदनस्यच १ ततःक्रुद्धामहादैत्याःशरशक्तिपरश्वधान् चक्रतोमरकुंता
न्भुसुंडीर्मुशलानिच २ युगपत्पातयंतिस्मप्रद्युम्नोपरिवेगिताः कार्ष्णायनेस्तुसंक्रुद्धाःसर्वास्त्रैर्धनुषश्च्युतैः ३ एकैकंपंचभिःक्रुद्धश्चि
च्छेदरणमूर्द्धनि पुनरेवासुराःक्रुद्धाःसर्वेतेकृतनिश्चयाः ४ ववृषुःशरजालानिप्रद्युम्नवधकांक्षया ततःप्रकुपितोनंगोधनुरादायसत्वरः
५ शंबरस्यजघानाशुदशपुत्रान्महौजसः ततोपरेणभल्लेनकुपितःकेशवात्मजः ६ चिच्छेदाशुशिरस्तस्यचित्रसेनस्यवीर्यवान् ततस्तेहतशे
षास्तुसमेत्यसमयुध्यत ७ शरवर्षंविमुंचंतोह्यभ्यधावन्जिघांसया ततःसंधायबाणांस्तुविमुंचतोरणोत्सुकाः ८ क्रीडन्निवमहातेजाःशिरां
स्येषान्यपातयत् निहत्यसमरेसर्वान्शतमुत्तमधन्विनाम् ९ प्रद्युम्नःसमराकांक्षीतस्थौसंग्राममूर्द्धनि हतंपुत्रशतंश्रुत्वाशंबरःक्रोधमादधे
१० सूतंसंनोदयामासरथंमेसंप्रयोजय राज्ञोवाक्यंनिशम्याथप्रणम्यशिरसाभुवि ११ ससैन्यंनोदयामासरथंसस्कसमाहितम् युक्तमृष्यस
हस्रेणऋक्षपराजसकेतनम् १२ शार्दूलचर्मसंवेष्टंकिंकिणीजालमालिनम् ईहामृगगणाकीर्णंचित्रभक्तिविराजितम् १३ ताराचित्रपिनद्धां
गस्वर्णकूबरभूषितम् सपताकंमहोच्छ्रायंमृगराजोग्रकेतनम् १४ सुविभक्तवरूथंचलोहेषावज्रकूबरम् मंदराद्रिशिखरंचारुचामरभू
षितम् १५ नक्षत्रमालापिहितंहेमदंडसमाहितम् विराजमानंश्रीमंतमारोहच्छंबरोरथम् १६ कांचनंचित्रसन्नाहधनुर्गृह्यशरांस्तथा प्र
स्थितःसमराकांक्षीमृत्युनापरिचोदितः १७ चतुर्भिःसचिवैःसार्द्धंसैन्येनमहतावृतः दुर्धरःकेतुमालीचशत्रुहंताप्रमर्दनः १८ एतैःपरिवृ
तोमात्यैर्युयुत्सुःप्रस्थितोरणे दशनागसहस्राणिरथानांद्वेशतेतथा १९ हयानांचाष्टसाहस्रैःप्रयुतैश्चपदातिनाम् एतैःपरिवृतोयोधैःशं
बरःप्रययौतदा २० प्रयातस्यतुसंग्रामेउत्पातान्युत्थितानिच गृध्रचक्रकुलंव्योम्निस ाकाराभ्रनादिताः २१

भिः दशाभिर्भागैः उपर्युपरिकोष्ठकैर्विराजितशोभमानम् १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अहोदानवदुष्टात्माकेशवस्यात्मजंशिशुम् हरनेनिर्भयश्चैवभयमद्यकरोम्यहम् ३५ कथंवैक्रोधमागच्छेहूयतेवाकथंमया प्रथमंकिं
करिष्यामियेनकुप्यतिमंदधीः ३६ अस्तिचास्यध्वजंचिन्नंसिंहकेतुविभूषितम् तोरणंगृहमासाद्यउच्छ्रितमेरुशृंगवत् ३७ एतदुन्मथ्य
पातिष्येभल्लेननिशितेनवै ध्वजच्छेदंविदित्वाथशंबरोनिष्क्रमिष्यति ३८ ततोयुद्धेनहत्वाजौगंतास्मिद्वारकांप्रति इत्युक्त्वासज्जमाचक्रे
सशरंचापमोजसा ३९ चिच्छेदध्वजरत्नंतुशंबरस्यमहाभुजः तच्छ्रुत्वातुध्वजच्छेदंप्रद्युम्नेनमहात्मना ४० क्रुद्धस्त्वाज्ञापयामासपुत्रान्वै
कालशंबरः जिघांसध्वंमहावीरारौक्मिणेयंत्वरान्विताः ४१ नैनंवैद्रष्टुमिच्छामिममविप्रियकारकम् श्रुत्वातुशंबराद्वाक्यंसूतास्तेशंबर-
स्यह ४२ संनद्धानिर्ययुर्हृष्टाःप्रद्युम्नवधकांक्षया चित्रसेनोतिसेनश्चविधक्सेनोगदस्तथा ४३ श्रुतसेनःसुषेणस्तुसोमसेनोमनस्तथा
सेनानीःसैन्यहंताचसेनाहासेनिकस्तथा ४४ सेनस्कंधोतिसेनश्चसेनकोजनकःसुतः सकाल्मोविकूलःशांतःसशांतांतकरोविभुः ४५
कुंभकेतुःसुदंष्ट्रश्चकेशिरित्येवमादयः चक्रतोमरशूलानिपट्टिशानिपरश्वधान् ४६ गृहीत्वानिर्ययुर्हृष्टामन्युनापरमाप्लुताः आह्वयं
तममित्रंवैतस्थुःसंग्राममूर्द्धनि ४७ प्रद्युम्नस्तुमहाबाहूरथमारुह्यसत्वरम् निर्ययौचापमादायसंग्रामाभिमुखस्तदा ४८ ततः
प्रवृत्तंयुद्धंतुतुमुलंलोमहर्षणम् शंबरस्यतुपुत्राणांकेशवस्यचसूनुना ४९ ततोदेवाःसगंधर्वाःसमहोरगचारणाः देवराजंपुरस्कृत्य
विमानाग्रेष्वधिष्ठिताः ५० नारदस्तुंबरुश्चैवहाहाहूहूश्चगायनाः अप्सरोभिःपरिवृताःसर्वेतत्रावतस्थिरे ५१ देवराजप्रतीहारोगंधर्वश्चि
त्रसद्भुतम् शशासदेवराजायवज्रिणेतद्विचेष्टितम् ५२ शंबरस्यशतंपुत्राएकःकृष्णस्यचात्मजः बहूनांयुध्यतामेषःकथंविजयमाप्नुयात्
५३ तच्छ्रुत्वाभाषितंतस्यप्रहस्यबलसूदनः उवाचवचनंत्वेदंशृणुयोस्यपराक्रमः ५४ कामोयंपूर्वदेहेतुहरक्रोधाग्निनाहतः रत्याप्रसादि
तोदेवःकामपत्न्यात्रिलोचनः ५५ परितुष्टेनदेवेनवरमस्याःप्रदीयत विष्णुर्मानुषदेहस्तुद्वारकायांभविष्यति ५६ तस्यपुत्रत्वमस्यैवभ
विष्यतिनसंशयः अनंगइतिविख्यातस्त्रैलोक्येतुमहायशाः ५७ तत्रोत्पन्नोमहातेजाशंबरंघातयिष्यति ससाहेजातमात्रेतुरुक्मिण्याः
क्रोडसंस्थितम् ५८ आस्थायशंबरोमायांप्रद्युम्नमपनेष्यति तद्गच्छशंबरगृहंभार्यामायावतीभव ५९ मायारूपप्रतिच्छन्नाशंबरंमोह
यिष्यसि तत्रत्वमात्मनःकांतंबालरूपंविवर्द्धय ६० प्राप्तयौवनदेहस्तुशंबरंनिहनिष्यति ततस्त्वयासहानंगोद्वारकांवैगमिष्यति ६१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

निर्घातः अशनिः पततसंकालयन्क्षपयन् २२ गृध्रः दानवासृजंदानवरक्तम् २३ वासंतिपक्षिणइतिशेषः २४ २५ सुरारिणः देवशत्रोः २६ २७ २८ २९

गर्जंतिपरुषंमेघाः सनिर्घातास्तदानृप शिवाविनेदुरशिवंसैन्यंसंकालयन्महत् २२ ध्वजाशीर्षेपतद्गृध्रः कांक्षन्वैदानवासृजम् रथाग्रेप
तितश्चास्यकबंधोभुविदृश्यते २३ चीचीकूचीतिवासंतिशंबरस्यरथोपरि स्वर्भानुग्रस्तआदित्यः परिघैःपरिवेष्टितः २४ स्फुरतेनयनंचा-
स्यसव्यंभयनिवेदनम् बाहुःप्रकंपतेसव्यःप्रस्खलन्रथवाजिनः २५ ध्वांक्षोमूर्ध्निनिपतितः शंबरस्यसुरारिणः ववर्षरुधिरंदेवःशर्करोष्णा
रमिश्रितम् २६ उल्कापातसहस्राणिनिपेतूरणमूर्द्धनि प्रतोदोन्यपतद्धस्तात्सारथेर्हययायिनः २७ एतानचिंतयित्वातुउत्पातान्समुप
स्थितान् प्रययौशंबरःक्रुद्धःप्रद्युम्नवधकांक्षया २८ भेरीमृदंगशंखानांपणवानकदुंदुभेः युगपन्नाद्यमानानांपृथिवीसमकंपत २९ तेन-
शब्देनमहतासंत्रस्तामृगपक्षिणः समंताद्दुद्रुवुस्तस्माद्भयविक्लवचेतसः ३० रणमध्येस्थितःकार्ष्णिश्चिंतयन्निधनंरिपोः सैन्यैःपरिवृतो
संख्यैर्युद्धायकृतनिश्चयः ३१ क्रुद्धःशरसहस्रेणप्रद्युम्नंसमताडयत् समासाद्यैवतान्बाणान्चिच्छेदकृतहस्तवत् ३२ प्रद्युम्नोधनुरादाय
शरवर्षमुमोचह तस्मिन्सैन्येनसोप्यस्तियोनविद्धःशरेणवै ३३ प्रद्युम्नशरपातेनतत्सैन्यंविमुखीकृतम् शंबरस्यतथाप्यासेस्थितंसंत्य
ज्यभीतवत् ३४ स्वबलंविद्रुतंदृष्ट्वाशंबरःक्रोधमूर्च्छितः आज्ञापयामासतदासचिवान्दानवेश्वरः ३५ गच्छध्वंसन्नियोगेनप्रहरध्वं-
रिपोःसुतम् नोपेक्षणीयःशत्रुर्वैवध्यताक्षिप्रमेवचै ३६ उपेक्षितइवव्याधिःशरीरनाशयेद्ध्रुवम् तद्वेषदुर्मतिःपापोवध्यतामस्मिये
प्सया ३७ ततस्तेसचिवाःक्रुद्धाःशिरसागृह्यशासनम् शरवर्षंविमुंचतस्त्वरितानोदयन्रथान् ३८ तान्दृष्ट्वाधावतःसंख्येक्रुद्धोमकरके
तनः चापमुद्यम्यसंभ्रांतस्तस्थौप्रमुखतोबली ३९ दुर्द्धरंपंचविंशत्याशरैःसन्नतपर्वभिः बिभेदसुमहातेजाःकेतुमालिंत्रिषष्टिभिः ४०
समूत्याशत्रुहतारंद्व्यशीत्यातुप्रमर्दनम् बिभेदपरमासर्षीरुक्मिण्यानंदिवर्धनम् ४१ ततस्तेसचिवाःक्रुद्धाःप्रद्युम्नंशरवृष्टिभिः एकैकशो
बिभिदाजौषष्टिभिःषष्टिभिःशरैः ४२ तानप्राप्तान्शरान्बाणैश्चिच्छेदमकरध्वजः ततोर्द्धचंद्रमादायदुर्द्धरस्यससारथिम् ४३ जघानप
श्यतांराज्ञांसर्वेषांसैनिकस्यवै चतुर्भिरथनाराचैःसुपर्वैःकंकतेजितैः ४४ जघानचतुरःसोश्वान्दुर्द्धरस्यरथंप्रति एकेनयोक्त्रंछत्रंच
ध्वजमेकेनबंधुरम् ४५ षष्ट्याचयुगचक्राक्षंचिच्छेदमकरध्वजः अथापरंशरंगृह्यकंकपत्रंसुतेजितम् ४६ मुमोचहृदयेतस्यदुर्द्धर-
स्याल्पजीविनः सगतासुर्गतश्रीकोगतसत्वोगतप्रभः ४७

३० असंख्यैःसंख्यातुमयोग्यैः अतिप्रसिद्धनामभिरित्यर्थः ३१ ३२ ३३ ३४ ३५

३६ ३७ ३८ ३९ ४० बिभेदबिभिदुः ४१ ४२ ४३ पर्वैरित्यदंतत्वमार्षम् ४४ ४५ ४६ ४७ ७२ ७२ ७२ ७२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३

निपपातरथोपस्थात्क्षीणपुण्यइवग्रहः दुर्द्धरेनिहतेशूरेदानवेदानवेश्वरः ४८ केतुमालीशरव्रातैरभिदुद्रावकृष्णजम् प्रद्युम्न
मथसंक्रुद्धोभृकुटीभीषणाननम् ४९ कृत्वाभ्यधावत्सहसा तिष्ठतिष्ठेतिचाब्रवीत् संक्रुद्धःकृष्णसूनुस्तुशरवर्षैरवाकिरत् ५०
पर्वतंवारिधाराभिःप्रावृषीवयथाघनः सच्छिन्नोदानवामात्यःप्रद्युम्नेनधनुष्मता ५१ चक्रमादायचिक्षेपप्रद्युम्नवधकांक्षया तमप्रात
सहस्रारंकृष्णचक्रसमद्युतिम् ५२ निपत्योत्पत्यसहसासर्वेषामेवपश्यताम् तेनैवतस्यचिच्छेदकेतुमालेःशिरस्तदा ५३ तद्दृष्ट्वा
कर्मविपुलंरौक्मिणेयस्यदेवराट् विस्मयंपरमंप्राप्तःसर्वैर्देवगणैःसह ५४ गंधर्वाप्सरसश्चैवपुष्पवर्षैरवाकिरन् केतुमालिहतंदृष्ट्वा
शत्रुहंताप्रमर्दनः महाबलसमूहेनप्रद्युम्नमथदुद्रुवे ५५ तेगदामुशलंचक्रंप्रासतोमरसायकान् भिंडिपालांकुठारांश्चभास्वरान्कूट
मुद्गरान् ५६ युगपत्संक्षिपतिस्मवधार्थंकृष्णनंदने सोपितान्यस्त्रजालानिशस्त्रजालैरनेकधा ५७ चिच्छेदबहुधावीरोदर्शयन्पाणि
लाघवम् गजान्सोभ्यहनत्क्रुद्धोगजारोहान्सहस्रशः ५८ रथान्सारथिभिःसार्द्धंहयांश्चैवममर्दह पातयंस्तान्शरव्रातैर्नाच्छिद्रःक
श्चिदीक्ष्यते ५९ एवंसर्वाणिसैन्यानिममंथमकरध्वजः नदींप्रावर्तयद्घोरांशोणितोघतरंगिणीम् ६० मुक्ताहारोर्मिबहुलांवसामेदो
स्थिपंकिनीम् छत्रद्वीपशरावर्तांरथैःपुलिनमंडिताम् ६१ केयूरकुंडलाकीर्णांध्वजमत्स्यविभूषिताम् नागग्राहवतींरौद्रींमत्स्यकूर्म-
विभूषिताम् ६२ केशशैवलसंछन्नांपाणिसूत्रमृणालिकाम् वराननकृतपद्मांचहंसचामरवीजिताम् ६३ शिरस्तिमिसमाकीर्णांशोणि
तौघप्रवर्तिनीम् नदीदुस्तारिणीभीमामनंगेनप्रवर्तिताम् ६४ दुःप्रेक्ष्यादुर्गमारौद्राहीनतेजःसुदुस्तराम् शस्त्रग्राहवतीघोरांयमराष्ट्र
विवर्द्धनीम् ६५ तत्ररुक्मिसुतःश्रीमान्विलोडयतिधन्विनः शत्रुहंतारमाश्रित्यनरानभ्यकिरन्बहून् ६६ शत्रुहंतापुनःक्रुद्धोमुमो-
चशरमुत्तमम् प्रद्युम्नस्यसमासाद्यहृदयेनिपपातह ६७ सविद्धस्तेनबाणेनप्रद्युम्नोनव्यकंपत शक्तिंजग्राहबलवान्शत्रुहंत्रेमुमू-
र्षवे ६८ साक्षिप्तारौक्मिणेयेनशक्तिर्ज्वालाकुलारणे पपातहृदयंभित्वाशक्राशनिसमस्वना ६९ सभिन्नहृच्छस्त्रस्तांगोमुक्तमार्गास्थि
बंधनः पपातरुधिरोद्गारीशत्रुहंतामहाबलः ७० पातितंशत्रुहंतारंदृष्ट्वातस्थौप्रमर्दनः जग्राहमुशलंसोथवचनंचेदमाददे ७१ तिष्ठ-
किंप्राकृतैरेभिःकरिष्यसिरणप्रिय मायोधयस्वदुर्बुद्धेततस्त्वंनभविष्यसि ७२ वृष्णिवंशकुलेजातःशत्रुरस्माकंपितातव पुत्रंहंतास्य
हंतस्यततोसौनिहतोभवेत् ७३

६४ ६५ तत्रध्वनिनः धनुर्दशन्विलोडयतिसङ्घाति ६६ ६७ ६८ ६९ ७० ७१ ७२ अस्मत् अस्माकं ७३ ७४ ७५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७४ ७५ भीष्मकसुतारुक्मिणी ७६ ७७ ताडयत् अताडयत् ७८ रथमेवोक्षिप्यचूर्णयत् ७९ तामसिद्धांतयेवरिपुप्रयुक्तयेव ८० ८१ अवीतिच्छेदः ८२
विशोभनास्रक्चंदनपत्रलेखादिरहितासमवगूहते देहं संकोचयति ८३ साध्वसैः निर्दयकार्मुकैः रतिमिवसमरं रतिसमरं पक्षे रतिसमरइवे निविग्रहः ८४ इति

मृतेनतेनदुर्बुद्धेसर्वदेवक्षयोभवेत् दैतेयादानवाःसर्वेमोदंतांहतशत्रवः ७४ हतेत्वयिममास्त्रेणत्वत्समुत्थैश्चशोणितैः शंबरस्य
सुपुत्राणांकरोम्युदकसत्क्रियाम् ७५ अद्यसाभीष्मकसुताकरुणंविलपिष्यति निहतंत्वांचसुलेवयौवनस्थंगतायुषम् ७६ सतेपिता
चक्रधरोनिष्फलाशोभविष्यति हतंत्वांसविदित्वाथप्राणांस्त्यक्ष्यतिमंदधीः ७७ इत्युक्त्वापरिघेणाशुताडयद्रुक्मिणीसुतम् ताडितोहि
महातेजारौक्मिणेयःप्रतापवान् ७८ दोर्भ्यामुत्क्षिप्यतस्यैवरथमस्त्राव्यचूर्णयत् सोवप्लुत्यरथात्तस्मात्पदातिरवतस्थिवान् ७९ तांग
दांगृह्यसहसारौक्मिणेयमुपाद्रवत् तयैवगदयाकामःप्रमर्दनमपोथयत् ८० हतेप्रमर्दनेदैत्यहृष्ट्वासर्वेप्रदुद्रुवुः नशक्ताःप्रमुखेस्था
तुंसिंहस्यासृग्गजाइव ८१ सारमेयायथाहृष्ट्वाउविगणावेपलायते तथासेनाविषीदंतीप्रद्युम्नस्यभयार्दिता ८२ क्षतजादिग्धवस्त्रावेसु
क्तकेशाविशोभना रजस्वलेवयुवतिःसेनासमवगूहते ८३ मदनशरविभिन्नासैनिकानष्यपायाद्युवतिसदृशवेषासाध्वसैःपीड्यमाना
रतिसमरमशक्तावीक्षितुंसोच्छ्वसंतीस्वगृहगमनकामानेच्छतेस्थातुमत्र ८४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिशंब
रसैन्यभंगोनामशततोपरिपंचमोऽध्यायः १०५ वैशंपायनउवाच शंबरस्तुततःक्रुद्धःसूतमाहविशांपते शत्रुप्रमुखनोवीररथमेवाह
यद्रुतम् १ यावदेनंशरैर्हन्मिममविप्रियकारकम् ततोभर्तुर्वचःश्रुत्वासूतस्तत्प्रियकारकः २ रथंसंचोदयामासचामीकरविभूषितम् तंह
ष्ट्वारथमायांतंप्रद्युम्नःफुल्ललोचनः ३ संदधेचापमादायशरंकनकभूषितम् तेनाहनत्सुसंक्रुद्धःकोपयन्शंबरंरणे ४ हृदयेताडितस्तेन
देवशत्रुःसुविक्लवः रथशक्तिंसमाश्रित्यतस्थौसोथविचेतनः ५ सचेतनांपुनःप्राप्यधनुरादायशंबरः विव्याधकार्ष्णिंकुपितःसप्तभिर्निशि
तैःशरैः ६ तानप्राप्तान्शरान्घोरान्सप्तभिःसप्तधाच्छिनत् शंबरश्चजघानाथसप्तत्यानिशितैःशरैः ७ पुनःशरसहस्रेणकंकबर्हिणवा
ससा अहनच्छंबरःक्रोधाद्धाराभिरिवपर्वतम् ८ प्रदिशोविदिशश्चैवशरधारासमावृताः सदिशोविदिशश्चैवशरधारासमावृणोत् ९
अंधकारीकृतंव्योमदिनकर्तानदृश्यते ततोंधकारमुत्सार्यवैद्युतास्त्रेणशंबरः १० प्रद्युम्नस्यरथोपस्थेशरवर्षंमुमोचह तदस्त्रजालंप्रद्यु
म्नःशरेणानतपर्वणा ११ चिच्छेदबहुधाराजन्दर्शयन्पाणिलाघवम् हतेतस्मिन्महावर्षेशराणांकार्ष्णिनातदा १२

पर्वणिटीकायांशततोपरिपंचमोऽध्यायः १०५ शंबरइति १ २ ३ ४ रथशक्तिःरथस्योत्साहहेतुंध्वजंशक्तिरस्यांतरेसौर्यामुत्साहादौबलेस्त्रियामितिमेदिनी ५ ६ ७
८ ९ १० ११ १२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१३ १४ १५ वारिदप्रख्यान्मेघवत्सृज्यमानान्प्रख्यातव्हत्सेक्षणेबुद्धाविति विघ्नः १६ १७ १८ १९ २० २१ २२ २३ २४ २५

द्रुमवर्षंमुमोचाथमायया कालशंबरः द्रुमवर्षोच्छ्रितं दृष्ट्वा प्रद्युम्नः क्रोधमूर्च्छितः १३ आग्नेयास्त्रंमुमोचाथ तेन वृक्षाननाशयत्
भस्मीभूते वृक्षवर्षे शिलासंघातमुत्सृजत् १४ प्रद्युम्नस्तु वायव्यैः प्रोत्सारयत संयुगे ततो मायां पराचक्रे देवशत्रुः प्रतापवान् १५
सिंहान्व्याघ्रान्वराहांश्च तरक्षून्ऋक्षवानरान् वारणान्वारिदप्रख्यान्हयानुष्ट्रान्विशांपते १६ मुमोच धनुरायम्य प्रद्युम्नस्य रथोप
रि गंधर्वास्त्रेण चिच्छेद सर्वास्तान् खडशस्तदा १७ प्रद्युम्नेन तु सा माया हता तां वीक्ष्य शंबरः अन्यां मायां मुमोचाथ शंबरः क्रोधमूर्च्छि
तः १८ गजेंद्रान्भिन्नवदनान् षष्टिहायनयौवनान् सहामात्रोत्तमारूढान्कल्पितान्रणकोविदान् १९ तां मायां तत्र मायां तु कार्ष्णिः
कमललोचनः सैंहीं मायां ससर्जोग्रां चक्रबुद्धिर्महामनाः २० सा सृष्टा सिंहमाया तु रौक्मिणेयेन धीमता मायां नागवृतां नष्टा आदित्ये
नेव शर्वरी २१ निहतां हस्तिमायां तु तां स मीक्ष्य महासुरः अन्यां सम्मोहिनीं मायां सोऽसृजद्दानवोत्तमः २२ तां दृष्ट्वा मोहिनीं नाम मायां म
यविनिर्मितां संज्ञास्त्रेण तु प्रद्युम्नो नाशयामास वीर्यवान् २३ शंबरस्तु ततः क्रुद्धो हतया मायया तदा सैंहीं मायां महातेजाः सोऽसृजद्दा-
नवेश्वरः २४ सिंहान्निपततो दृष्ट्वा रौक्मिणेयः प्रतापवान् अस्त्रं गांधर्वमादाय शरभानसृजत्तदा ते शापदा बलोद्यानरवदंष्ट्रायुधा रणे
२५ सिंहान्विद्रावयामासुः वायुर्जलधरानिव सिंहान्विद्रवतो दृष्ट्वा मायया ष्टापदेन वै २६ शंबरश्चिंतयामास कथमेनं निहन्मि वै अहो
मूर्खस्वभावो हयनेन न हतः शिशुः २७ प्राप्तयौवनदेहस्तु कृतास्त्रश्चापि दुर्मतिः तत्कथं निहनिष्यामि शत्रुं रणशिरःस्थितम् २८ माया
सा तिष्ठते तीव्रा पन्नगी नाम भीषणा दत्ता मे देवदेवेन हरेणासुरघातिना २९ तां सृजामि महामायामाशीविषसमाकुलाम् तयादद्योत
दुष्टात्मा द्विषमायामयो बली ३० सा सृष्टा पन्नगी माया विषज्वालासमाकुला तया पन्नगमय्या तु सरथः सह वाजिनम् ३१ सस्तूतः सप्रद्
युम्नबबंध शरबंधनैः बध्यमानं तदा दृष्ट्वा आत्मानं वृष्णिवंशजः ३२ मायां संचिंतयामास सौपर्णीं सर्पनाशिनीम् सा चिंतिता महामाया-
प्रद्युम्नेन महात्मना ३३ सुपर्णा विचरंति स्म सर्पा नष्टा महाविषाः भग्नायां सार्पमायायां प्रशशंसति सुरासुराः ३४ साधु वीर महाबाहो रुक्मि
ण्यानंदिवर्धन यत्त्वया धर्षिता माया तेन स्म परितोषिताः ३५ हतायां सर्पमायायां शंबरश्चिंतयत्पुनः अस्ति मे कालदंडाभो मुद्गरो हेमभू
षितः ३६ तमप्रतिहतं युद्धे देवदानवमानवैः पुरा यो मम पार्वत्या दत्तः परमतुष्टया ३७ गृहाण शंबरेसं त्वं मुद्गरं हेमभूषितम् मया सृष्ट-
स्य देहे वै तपः परमदुश्चरम् ३८

२६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ७२ ७२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३९ ४० ४१ ४२ ४३ ४४ देवगंधर्वप्रियोनारदोदेवगंधर्वनारदस्तं ४५ ४६ ४७ ४८ ४९ ५० तवेतिरतिरेवमायामयशरीरांतरंस्वसदृशंकृत्वामा
यावतीसंज्ञां कृत्वादैत्यंरमयतीत्यर्थः ५१ रतेः प्रीतेः एतेनरतेः पातिव्रत्यभंगोनास्तीतिदर्शितम् ५२ ५३ ५४ ५५ ५६ ५७ ५८ इतिश्री

मायांतकरणंनामसर्वासुरविनाशनम् अनेनदानवौरौद्रौबलिनौकामरूपिणौ ३९ शुंभश्चैवनिशुंभश्चसगणौसूदितौमया प्राण
संशयमापन्नेत्वयामोक्ष्यःसशात्रवे ४० इत्युक्त्वापार्वतीदेवीतत्रैवांतरधीयत तदहंसुदुरंमोक्षमोचयिष्यामिशात्रवे ४१ तस्यविज्ञायचि
त्तंतुदेवराजोऽभ्यभाषत गच्छनारदशीघ्रंत्वंप्रद्युम्नस्यरथंप्रति ४२ संबोधयमहाबाहुंपूर्वजातिंचमोक्षय वैष्णवास्त्रंप्रयच्छास्मैवधा
र्थंशंबरस्यच ४३ अभेद्यंकवचंचास्यप्रयच्छासुरसूदने एवमुक्तोमघवतानारदःप्रययौत्वरन् ४४ आकाशेधिष्ठितोवाचनंसकरध्व
जकेतनम् कुमारपश्यमांप्राप्तंदेवगंधर्वनारदम् प्रेषितंदेवराजेनतवसंबोधनायवै ४५ स्मरत्वंपूर्वकंभावंकामदेवोसिमानद हरकोपा
नलादग्धस्तेनानंगइहोच्यते ४६ वृष्णिवंशजातोसिरुक्मिण्यागर्भसंभवः जातोसिकेशवेनत्वंप्रद्युम्नइतिकीर्त्यते ४७ आहृत्यशंब
रेणत्वंसिहानीतोसिमानद सप्तरात्रेत्वसंपूर्णेसूतिकागारमध्यतः ४८ वधार्थंशंबरस्यत्वंक्रियमाणोह्युपेक्षितः केशवेनमहाबाहोदेवका
र्यार्थसिद्धये ४९ येषामायावतीनामभार्याविशंबरस्यतु रतिंतांविद्धिकल्याणींतवभार्यांपुरातनीम् ५० तवसारक्षणार्थायशंबरस्यगृ
हेवसत् मायांशरीरजांतस्यमोहनार्थंदुरात्मनः ५१ रतेःसंपादनार्थायमेषयत्यनिशंतदा एवंप्रद्युम्नबुध्यावैतत्रभार्याप्रतिष्ठिता ५२
हत्वात्वंशंबरंवीरवैष्णवास्त्रेणसंयुगे गृह्यमायावतींभार्यांद्वारकांगंतुमर्हसि ५३ गृहाणवैष्णवंचास्त्रंकवचंचमहाप्रभम् शक्रेणत
वसंगृह्यप्रेषितंशत्रुसूदन ५४ शृणुमेह्यपरंवाक्यंक्रियतामविशंकया अस्यदैत्यरिपोस्तातमुद्गरोनित्यमूर्जितः ५५ पार्वत्यापरितुष्ट
यादत्तःशत्रुनिबर्हणः अमोघश्चैवसंग्रामेदेवदानवमानवैः ५६ तदस्त्रप्रतिघातार्थंदेवीत्वंस्मर्तुमर्हसि स्तव्याचैवनमस्याचमहादेवीर
णोत्सुके: ५७ तत्रवैक्रियतांयत्नःसंग्रामेरिपुणासह इत्युक्त्वानारदोवाक्यंप्रययौयत्रवासवः ५८ इतिश्रीम॰ खि॰ ह॰ विष्णुपर्वणि
नारदवाक्यंनामशतोपरिषष्ठोऽध्यायः १०६ वैशंपायनउवाच शंबरस्ततःक्रुद्धोमुद्गरंतंसमाददे मुद्गरंगृह्यमाणेतुद्वादशा-
र्काःसमुत्थिताः १ पर्वताश्चलिताःसर्वेतथैववसुधातलम् उन्मार्गाःसागरायाताःसंक्षुब्धाश्चापिदेवताः २ गृध्रचक्राकुलंव्योमउल्का
पातोबभूवह ववर्षरुधिरंदेवःपरुषपवनोववौ ३ एवंदृष्ट्वामहोत्पातान्प्रद्युम्नःसत्वरान्वितः अवतीर्यरथाद्वीरःकृताञ्जलिपुटःस्थितः
४

महाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांशतोपरिषष्ठोऽध्यायः १०६ ६७ ६७ शंबरस्त्विति १ २ ३ ४ ६७ ६७ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

देवींसस्मारमनसापार्वतींशंकरप्रियाम् प्रणम्यशिरसादेवींस्तोतुंसमुपचक्रमे ५ प्रद्युम्नउवाच ओंनमःकात्यायन्यैगिरिशायै
नमोनमः नमस्त्रैलोक्यमायायैकात्यायन्यैनमोनमः ६ नमःशत्रुविनाशिन्यैनमोगौर्यैशिवप्रिये नमस्येशुंभमथनींनिशुंभमथनी
मपि ७ कालरात्रिनमस्तुभ्यंकौमार्यैचनमोनमः कांतारवासिनीदेवींनमस्यामिकृतांजलिः ८ विंध्यवासिनींदुर्गांवारणदुर्गारणप्रिया
म् नमस्यामिमहादेवींजयांचविजयांतथा ९ अपराजितांनमस्येहमजिताशत्रुनाशिनीम् घंटाहस्तांनमस्यामिघंटामालाकुलांतथा
१० त्रिशूलिनींनमस्यामिमहिषासुरघातिनीम् सिंहासनांनमस्यामिसिंहप्रवरकेतनाम् ११ एकानंशांनमस्यामिगायत्रींयज्ञसत्कृता
म् सावित्रींचापिविप्राणांनमस्येहंकृतांजलिः १२ रक्षमांदेविसततंसंग्रामेविजयंकुरु इतिकामवचस्तुष्टादुर्गासंप्रीतमानसा १३ उवा
चवचनंदेविस्फीतेनांतरात्मना पश्यपश्यमहाबाहोरुक्मिण्यानंदिवर्द्धन १४ वरंवरयवत्सत्वममोघंदर्शनंमम देव्यास्तुवचनंश्रुत्वारोमा
चोद्भतमानसाः १५ प्रणम्यशिरसादेवींविज्ञप्तुमुपचक्रमे यदित्वंदेवितुष्टासिदीयतांमेयदीप्सितम् १६ वरंचवरदेयाचेसर्वामित्रेषुमेज
यः यस्त्वयामुद्गरोदत्तःशंबरस्यात्मसंभवः १७ एषमेगात्रमासाद्यमालापद्मवतीभवेत् तथास्त्वितिचसाप्युक्त्वातत्रैवांतरधीयत १८ प्र
द्युम्नस्तुमहातेजास्तुघोरंरथमथारुहत् मुद्गरंतंगृहीत्वाचशंबरःक्रोधमूर्छितः १९ भ्रामयित्वासचिक्षेपप्रद्युम्नोरसिवीर्यवान् मुद्गला
मङ्नाभ्यासंमालाभूत्वातुपौष्करी २० प्रद्युम्नस्यचकंठेतुससमासक्ताव्यराजत नक्षत्राणांतुमालायांयथापरिवृतोविधुः २१ ततोदेवाः
सगंधर्वासिद्धाश्चपरमर्षयः साधुसाध्वितिवाचोभिःपूजयन्केशवात्मजम् २२ मुद्गरंपुष्पभूतंतुदृष्ट्वाप्रद्युम्नसन्निधौ वैष्णवंपरमास्त्रं
तुनारदेनयथाहृतम् २३ संदधेचापमानम्यइदंवचनमब्रवीत् यद्यहंरुक्मिणीपुत्रःकेशवस्यात्मजोप्यहम् २४ तेनसत्येनबाणेनज-
हित्वंशंबरंरणे इत्युक्त्वाचापमाकृष्यसंधायचमहामनाः २५ चिक्षेपशंबरस्याथदहन्लोकत्रयंयथा सक्षिप्तोवृष्णिसिंहेनशरःक्रव्या
दमोदनः २६ हृदयंशंबरस्याथभित्वाधरणिमागतः नचास्यमांसंनस्नायुर्नास्थिनत्वङ्नशोणितम् २७ सर्वंतद्भस्मसाद्भूतंवैष्णवास्त्र-
स्यतेजसा हतेदैत्येमहाकायेदानवेशंबरेधमे २८ जहृषुर्देवगंधर्वाननृतुश्चाप्सरोगणाः उर्वशीमेनकारंभाविप्रचित्तिस्तिलोत्तमा २९
ननृतुर्हृष्टमनसोजगत्स्थावरजंगमम् देवराजस्तुसुप्रीतःसर्वदेवगणैःसह प्रद्युम्नंपुष्पवर्षेणतमभ्यर्च्यप्रहृष्टवत् ३० अथसमरहते
तुदैत्यराजेमधुमथनस्यसुतेनवैष्णवास्त्रैः विगतरिपुभयाःसुराश्चजग्मुर्मकरविभूषणकेतनंस्तुवंतः ३१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटी०

कामपत्नीनकांतैषाशंबरस्यरतिप्रिया मायारूपेणतंदैत्यंमोहयत्यसकृच्छुभा २६ नचैषातस्यकौमारेवशेतिष्ठतिशोभना आ
त्ममायामयंकृत्वारूपंशंबरमाविशत् २७ पत्न्येषाममपुत्रस्यस्नुषातववरांगना लोककांतस्यसाहाय्यंकरिष्यतिमनोमयम् २८ प्रवेश
यैनांभवतंपूज्यांज्येष्ठांस्नुषांमम चिरप्रनष्टंचसुतंभजस्वपुनरागतम् २९ वैशंपायनउवाच श्रुत्वातुवचनंदेवीकृष्णेनोदाहृतंतदा
प्रहर्षमतुलंलब्ध्वारुक्मिणीवाक्यमब्रवीत् ३० अहोधन्यतरास्म्यनेनवीरपुत्रसमागमात् अद्यमेसफलःकामःपूर्णोमेद्यमनोरथः ३१
चिरप्रणष्टपुत्रस्यदर्शनंप्रिययासह आगच्छपुत्रभवनंसभार्यःप्रविवेशह ३२ ततोऽभिवाद्यचरणौगोविंदमातरंचताम् प्रद्युम्नःपूजया-
मासहलिनंचमहाबलम् ३३ उत्थाप्यतंपरिष्वज्यमूर्ध्न्युपाघ्रायवीर्यवान् प्रद्युम्नंबलिनांश्रेष्ठंकेशवःपरवीरहा ३४ स्नुषांचोत्थाप्यतांदे-
वीरुक्मिणीरुक्मभूषणा पर्यष्वज्योपसंगृह्यस्नेहाद्गद्गदभाषिणी ३५ समेत्यभुवनपत्न्याशचीदृष्ट्वादितिर्यथा प्रवेशयामासतदारुक्मिणी
सुतमागतम् ३६ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिशतोपरिअष्टमोऽध्यायः १०८ वैशंपायनउवाच अत्रात्म
यात्मिकंस्तोत्रमाह्निकंयजतांवर प्रद्युम्नेहारकामेहत्वातंकालशंबरम् बलदेवेनरक्षार्थंप्रोक्तमाह्निकमुच्यते १ यज्ज्ञात्वातुनृपश्रेष्ठ
सायंप्रातस्तथाव्रजेत् कीर्तितंबलदेवेनविष्णुनाचैवकीर्तितम् धर्मकामैश्चमुनिभिर्ऋषिभिश्चापिकीर्तितम् २ कर्हिचिद्रुक्मिणीसुतो
हलिनासंयुतोगृहे उपविष्टःप्रणम्याथतमुवाचकृतांजलिः प्रद्युम्नउवाच कृष्णानुजमहाभागरोहिणीतनयप्रभो ३ किंचित्स्तोत्रं
ममब्रूहियज्ज्ञात्वानिर्भयोभवम् श्रीबलदेवउवाच सुरासुरगुरुर्ब्रह्मापातुमांजगतःपतिः अथोंकारवषट्कारौसावित्रीविधयस्त्र-
यः ४ ऋचोयजूंषिसामानिछंदांस्याथर्वणानिच चत्वारस्त्वखिलावेदाःसरहस्याःसविस्तराः ५ पुराणमितिहासंचखिलान्युपखिलानि
च अंगान्युपांगानितथाव्याख्यातानिचपांतुमाम् ६ पृथिवीवायुराकाशमापोज्योतिश्चपंचमम् इंद्रियाणिमनोबुद्धिस्तथासत्वंरजस्त
मः ७ व्यानोदानःसमानश्चप्राणोपानश्चपंचमः वायवःसप्तचैवान्येयेष्वायत्तमिदंजगत् ८ मरीचिरंगिरात्रिश्चपुलस्त्यःपुलहःक्रतुः भृ
गुर्वसिष्ठोभगवान्पांतुतेमांमहर्षयः ९ कश्यपाद्याश्चमुनयश्चतुर्दशदिशोदश नरनारायणौदेवौसगणौपांतुमांसदा १० रुद्राश्चैकादश
प्रोक्ताआदित्याद्वादशैवतु अष्टौचवसवोदेवाअश्विनौद्वौप्रकीर्तितौ ११

शतोपरिअष्टमः १०८ अत्रात्मयेति १ २ ३ विधयस्त्रयः अपूर्वविधिर्नियमविधिःपरिसंख्याविधिश्चे-
तिमीमांसकप्रसिद्धाः ४ ऋचइत्यृगाद्यभिमानिनीदेवतालक्ष्यते ५ ६ ७ सप्तवायवः आवहःप्रवहश्चैवउद्वहःसंवहस्तथा विवहःप्रवहश्चैवतथापरिवहोनिलइत्यन्यत्रप्रोक्ताः

८ ९ १० ११

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३२ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांशततोपरिसप्तमोऽध्यायः १०७ समाप्तेति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

सचसमरपरिश्रमंवहन्वैनगरसुखंप्रविवेशरौक्मिणेयः प्रियतमइवकांतयाप्रहृष्टस्त्वरितपदंरतिदर्शनंचकार ३२ इतिश्रीमहाभार-
तेखिलेषुहरिवंशेविष्णुपर्वणिशंबरवधोनामशततोपरिसप्तमोऽध्यायः १०७ वैशंपायनउवाच समाप्तमायोमायज्ञोविक्रांतःसमरे
ऽव्ययः अष्टम्यांनिहतोयुद्धेमायावीकालशंबरः १ तस्मिन्प्रवर्तनगरेनिहत्यासुरसत्तमम् गृह्यमायावतींदेवीमागच्छन्नगरंपितुः २
सोंतरिक्षगतोविद्वान्मायावीशीघ्रविक्रमः आजगामपुरींरम्यांरक्षितांतेजसापितुः ३ सोंऽतरिक्षान्निपतितःकेशवांतःपुरेशिशुः मा
यावत्यासहतयारूपवानिवमन्मथः ४ तस्मिंस्तत्रावपतितमहिष्यःकेशवस्ययाः विस्मिताश्चैवहृष्टाश्चभीताश्चैवाभवंस्ततः ५ ततस्तंका
मसंकाशंकांतयासहसंगतम् प्रेक्ष्यंत्योहृष्टवदनाःपिबंत्योनयनोत्सवम् ६ तंक्रीडितसुखंहृष्ट्वासज्जमानंपदेपदे अभवन्स्निग्धसंक
ल्पाःसर्वास्ताःकृष्णयोषितः ७ रुक्मिणीचैवतंहृष्ट्वाशोकार्तापुत्रगृद्धिनी सपत्नीशतसंकीर्णासबाष्पावाक्यमब्रवीत् ८ याहृक्स्यमेऽस्म
याहृष्टोनिशायांयौवनेगते कंसारिणासमानीयदत्तसाहारपल्लवम् ९ शशिरश्मिप्रतीकाशंमुक्तादामविभूषितम् केशवेनांकमारोप्य
ममकंठेन्यबध्यत १० श्यामाप्रकचारुकेशास्त्रीशुक्लांबरविभूषिता पद्महस्तानिरीक्ष्यंतीप्रविष्टाममवेश्मनि ११ तयापुनरहंगृह्यस्नापिता
रुचिरांबुना कुशेशयमयींमालांस्त्रीसंगृह्यायपाणिना १२ ममसूर्ध्न्युपाघ्रायदत्तास्वच्छातयाप्रभ एवमुक्तान्कीर्तयंतीरुक्मिणीहृ
ष्टमानसा १३ सर्वांजनहृतादेवींकुमारंवीक्ष्यतमुहुः धन्यायाःखल्वयंपुत्रोदीर्घायुःप्रियदर्शनः १४ ईदृशःकामसंकाशोयौवनेप्रथमेस्थि
तः जीवपुत्रत्वयापुत्रकासौभाग्यसमन्विता १५ किमर्थंचांबुदश्यामःसभार्यस्त्वमिहागतः अस्मिन्नुवयसिस्पष्टव्यक्तंप्रद्युम्नोममपुत्रकः
१६ भवेद्यदिनुनीतःस्यात्कृतांतेनबलीयसा व्यक्तंकृष्णकुमारस्त्वंनमिथ्यामतर्कितम् १७ विज्ञातोसिमयाचिन्हैर्विनाचक्रंजनार्दनः
मुखनारायणस्येवकेशाःकेशांतएवच १८ ऊरूवक्षोभुजौतुल्यौहलिनःश्वशुरस्यमे कस्त्वंवृष्णिकुलंसर्वंद्योतयन्वपुषास्थितः १९ अ
होनारायणस्येवदिव्यातेपरमातनुः एतस्मिन्नंतरेकृष्णःसहसाप्रविवेशह नारदस्यवचःश्रुत्वाशंबरस्यवधंप्रति २० सोपश्यत्तंकृतज्येष्ठ
सिद्धमन्मथलक्षणोः स्नुषामायावतींचैवहृष्टचेताजनार्दनः २१ कृष्णोवाच सोऽब्रवीत्सहसादेवींरुक्मिणींदेवतामिव अयंस
देविसप्राप्तःकृतश्चापधरस्तव २२ अनेनशंबरंहत्वामायायुद्धविशारदम् हतामायाकृताःसर्वायाभिर्देवानबाधयत् २३ सतीचेयंशु
भासाध्वीभार्यावितनयस्यते मायावतीतिविख्याताशंबरस्यगृहोषिता २४ माचतेशंबरस्येयंपत्नीतिभवतुव्यथा मन्मथेतुगतेनाशंगत १४०
चानंगतापुरा २५ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ह्रीःश्रीर्लक्ष्मीःस्वधामेधातुष्टिःपुष्टिःस्मृतिर्धृतिः आदितिर्दितिर्दनुश्चैवसिंहिकादैत्यमातरः १२ हिमवान्हेमकूटश्चनिषधःश्वेतपर्वतः
ऋषभःपारियात्रश्चविंध्यावैडूर्यपर्वतः १३ सह्योदयश्चमलयोमेरुमंदरदर्दुरः क्रौंचकैलासमैनाकाःपातुमांधरणीधराः १४ शेषश्च
वासुकिश्चैवविशालाक्षश्चतक्षकः एलापत्रःशुक्लवर्णःकंबलाश्वतरावुभौ १५ हस्तिभद्रःपिटरकःकर्कोटकधनंजयौ तथापूरणक
श्चैवनागश्चकरवीरकः १६ सुमनास्योदधिमुखस्तथाशृंगारपिंडकः मणिनागश्चभगवान्स्त्रिषुलोकेषुविश्रुतः १७ नागराडधिकर्णश्च
तथाह्यहारिद्रकोपरः एतेचान्येचबहवोयेचान्येनानुकीर्तिताः १८ भूधराःसत्यधर्माणःपांतुमांभुजगेश्वराः समुद्राःपांतुचत्वारोगंगाच
सरितांवरा १९ सरस्वतीचंद्रभागाशतद्रुर्देविकाशिवा इरावतीविपाशाचसरयूर्यमुनातथा २० कल्माषीचरथोष्माचबाहुदाचहिर
ण्यदा प्लक्षाचेक्षुमतीचैववस्त्रवन्तीचदृषद्वथा २१ ख्यातावर्मण्वतीचैवपुण्याचैववधूसरा एताश्चान्याश्चसरितोयाश्चान्यानानुकीर्ति
ताः २२ उत्तरापथगामिन्यःसलिलैःस्नपयंतुमाम् वेणीगोदावरीसीताकावेरीकोंकणावती २३ कृष्णावेणासुक्तिमतीतमसापुष्पवाहि
नी ताम्रपर्णीज्योतिरथाउत्पलोदुंबरावती २४ नदीवैतरणीपुण्याविदर्भानर्मदाशुभा वितस्ताभीमरथ्याचऐलाचैवमहानदी २५ का
लिंदीगोमतीपुण्यानदःशोणश्चविश्रुतः एताश्चान्याश्चवैनद्योयाश्चान्यानानुकीर्तिताः २६ दक्षिणापथवाहिन्यःसलिलैःस्नपयंतुमाम्
क्षिप्राचर्मण्वतीपुण्यामहीशङ्खवतीतथा २७ सिंधुर्वेत्रवतीचैवभोजातावनमालिका पूर्वभद्रापराभद्राऊर्मिलाचवरद्रुमा २८ ख्याता
वेत्रवतीचैवचापदासीतिविश्रुता प्रस्थावतीकुंडनदीनदीपुण्यासरस्वती २९ चित्रघ्नीचेंदुमालाचतथामधुमतीनदी उमागुरुनदीचैव
तापीचविमलोदका ३० विमलाविमलोदाचमत्तगंगापयस्विनी एताश्चान्याश्चवैनद्योयाश्चान्यानानुकीर्तिताः ३१ तासांसमभिषिंचंतु
पश्चिमामाश्रितादिशम् भागीरथीपुण्यजलाप्राच्यांदिशिसमाश्रिता ३२ सातुदहतुमेपापंकीर्तिताशंभुनाधृता प्रभासंचप्रयागंचनैमि
षंपुष्कराणिच गंगातीर्थंकुरुक्षेत्रंश्रीकंठंगौतमाश्रमम् ३३ रामह्रदंविनशनंरामतीर्थंतथैवच गंगाद्वारंकनखलंसोमोवैयत्रचोत्थितः
३४ कपालमोचनंतीर्थंजंबूमार्गंचविश्रुतम् सुवर्णबिंदुविख्यातंतथाकनकपिंगलम् ३५ दशाश्वमेधिकंचैवपुण्याश्रमविभूषितम् ब
दरीचैवविख्यातानरनारायणाश्रमः ३६ विख्यातफल्गुतीर्थंचतीर्थंचद्रवटंतथा कोकामुखंपुण्यतमंगंगासागरमेवच ३७ मगधेषुतपो
दश्चगंगोद्भेदश्चविश्रुतः तीर्थान्येतानिपुण्यानिसेवितानिमहर्षिभिः ३८ १४१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४

सूकरंसोगसागंर्च श्वेतद्वीपंतथैवच ब्रह्मतीर्थंरामतीर्थंवाजिमेधशतोपमम् ३९ धारासंपातसंयुक्तागंगाकिल्बिषनाशिनी गंगावैकुंठ
केदारंसूकरोद्भेदनपरम् ४० तथापमोचनंतीर्थंपुनंतेतानिकिल्बिषात् धर्मार्थकामविषयोयशःप्राप्तिःशमोदमः ४१ वरुणेशोथधन
दोयमोनियमएवच कालोनयःसंततिश्चक्रोधोमोहःक्षमाधृतिः विद्युतोभाष्यथौषध्यःप्रमदोन्मादविग्रहः ४२ यक्षाःपिशाचगंधर्वाः
किन्नराःसिद्धचारणाः नक्तंचराःखेचारिणोदंष्ट्रिणःप्रियविग्रहाः ४३ लंबोदराश्चबलिनःपिंगाक्षाविघ्नरूपिणः मरुतःसहपर्जन्याःकला
त्रुटिलवाःक्षणाः ४४ नक्षत्राणिग्रहाश्चैवऋतवःशिशिरादयः मासाहोरात्रयश्चैवसूर्याचंद्रमसौतथा ४५ आमोदश्चप्रमोदश्चप्रहर्षःशो
कएवच रजस्तमःतपःसत्यंशुद्धिर्बुद्धिर्धृतिःश्रुतिः ४६ रुद्राणीभद्रकालीचभद्राज्येष्ठातुवारुणी भासोचकालिकाचैवशांडिलीचेतिवि
श्रुता ४७ आर्याकुहूःसिनीवालीभीमाचित्ररथीरतिः एकानंशाचकूष्मांडीदेवीकात्यायनीचया ४८ लोहित्याजनमाताचदेवकन्यातुयाः
स्मृताः गोनंदादेवपत्नीचमारक्षंतुसबांधवम् ४९ नानाभरणवेषाश्चनानारूपांकिताननाः नानादेशविचारिण्योनानाशस्त्रोपशोभिताः ५०
मेदोमज्जाप्रियाश्चैवमद्यमांसवसाप्रियाः मार्जारद्वीपिवक्त्राश्चगजसिंहनिभाननाः ५१ कंकवायसगृध्राणांक्रौंचतुल्याननास्तथा व्यालय
ज्ञोपवीताश्चचर्मप्रावरणास्तथा ५२ क्षतजोक्षितवक्त्राश्चखरभेरीसमस्वनाः मत्सराःक्रोधनाश्चैवप्रासादारुचिरालयाः ५३ मत्तोन्मत्तप्र
मत्ताश्चप्रहरत्यश्चाधिष्ठिताः पिंगाक्षापिंगकेशाश्चततोन्याल्लूनमूर्धजाः ५४ ऊर्ध्वकेश्यःकृष्णकेश्यःश्वेतकेश्यस्तथावराः नागायुतबलाश्चै
ववायुवेगास्तथापराः ५५ एकहस्ताएकपादाएकाक्षाःपिंगलासताः बहुपुत्राल्पपुत्राश्चहिपुत्राःपुत्रमंडिकाः ५६ सुखमंडीबिडालीचपूतना
गंधपूतनाः शीतवातोष्णवेतालीरेवतीग्रहसंज्ञिताः ५७ प्रियहास्याःप्रियक्रोधाःप्रियावासाःप्रियंवदाः सुखप्रदाश्चासुखदाःसदाद्विजजन
प्रियाः ५८ नक्तंचराःसुखोदर्काःसदापर्वणिदारुणाः मातरोमातृवत्पुत्रंरक्षंतुममनित्यशः ५९ पितामहसुखोद्भूतारौद्रारुद्रांगसंभवाःकुमा
रस्वेदजाश्चैवज्वरावैवैष्णवादयः ६० महाभीमामहावीर्यादर्पोत्भूतामहाबलाः क्रोधनाऽक्रोधनाःक्रूराःसुरविग्रहकारिणः ६१ नक्तंचराः
केसरिणोदंष्ट्रिणःप्रियविग्रहाः लंबोदराजघनिनःपिंगाक्षाविघ्नरूपिणः ६२ शक्त्यृष्टिशूलपरिघप्रासचर्मासिपाणयः पिनाकवज्रमु
शलब्रह्मदंडायुधप्रियाः ६३ दंडिनःकुंडिनःप्रांशुजटामुकुटधारिणः वेदवेदांगकुशलानित्ययज्ञोपवीतिनः ६४ व्यालापीडाःकुंडलिनो
वीराःकेयूरधारिणः नानावसनसंवीताश्चित्रमाल्यानुलेपनाः ६५

५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९२ ९३ ९४ ९५ ९६ ९७ ९८ ९९ १०० १०१ १०२ १०३ १०४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णु

ऋतवः श्लाघिनः शांताः शांतिंकुर्वंतुमेसदा त्रयोग्नयस्त्रयोवेदास्त्रैविद्याकौस्तुभोमणिः ९२ उच्चैःश्रवाहयःश्रीमान्वैद्योधन्वंतरिर्हरिः
अमृतंगौःसुपर्णश्चदधिगोरोचनासर्षपाः ९३ शुक्लाःसुमनसःकन्याःश्वेतच्छत्रंयवाक्षताः दूर्वाहिरण्यंगंधाश्चव्यालव्यजनमेवच ९४
तथाप्रतिहतंचक्रंमहोक्षश्चंदनंविषम् श्वेतोवृषःकरीमत्तःसिंहोव्याघ्रोहयोगिरिः ९५ पृथिवीचोद्धृतालाजाब्राह्मणामधुपायसम् स्व
स्तिकोवर्द्धमानश्चनंद्यावर्तःप्रियंगवः श्रीफलंगोमयंमत्स्योदुंदुभिःपटहस्वनः ९६ ऋषिपत्न्यश्चकन्याश्चश्रीमद्भद्रासनंधनुः रोचनारुच
कश्चैवनदीनांसंगमोदकम् ९७ सुपर्णाःशतपत्राश्चचकोराजीवजीवकाः नंदीमुखोमयूरश्चवज्रामुक्तामणिर्ध्वजाः ९८ आयुधानिप्रश
स्तानिकार्यसिद्धिकराणिच पुण्यंवैविगतक्लेशंश्रीमद्भैमंगलान्वितम् ९९ रामेणोदाहृतंपूर्वमायुःश्रीजयकांक्षिणा यइदंश्रावयेद्विद्वान्
तथैवशृणुयान्नरः १०० मंगलाष्टशतंस्नातोजपन्पर्वणिपर्वणि वधबंधपरिक्लेशंव्याधिशोकपराभवम् १०१ नचप्राप्नोतिवैकल्यंपरत्रे
हचशर्मदम् धन्यंयशस्यमायुष्यंपवित्रंवेदसंमितम् १०२ श्रीमत्स्वर्ग्यंसदापुण्यमपत्यजननंशिवम् शुभंक्षेमकरंनृणांमधोजननमु
त्तमम् १०३ सर्वरोगप्रशमनंस्फकीर्तिकुलवर्द्धनम् श्रद्दधानोदयोपेतोयःपठेदात्मवान्नरः सर्वपापविशुद्धात्मालभतेचशुभांगतिम् १०४
इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिबलदेवान्हिकंनामशतोपरिनवमोऽध्यायः १०९ वैशंपायनउवाच हृतोयदेवप्रद्यु
म्नःशंबरेणात्मघातिना मासेस्मिन्नेवसांबस्तुजांबवत्यामजायत १ बाल्यात्प्रभृतिरामेणशस्त्रेषुविनियोजितः रामादनंतरंचैवमानितः
सर्ववृष्णिभिः २ जातमात्रेततःकृष्णःशुभांतामवसत्पुरीम् निहतामित्रसामंतःशक्रोद्यानंयथामराः ३ यादवीचश्रियंदृष्ट्वास्वांश्रियंद्वेष्टि
वासवः जनार्दनभयाच्चैवनशांतिंलेभिरेनृपाः ४ कस्यचित्त्वथकालस्यपुरेवारणसाह्वये दुर्योधनस्ययज्ञेवैसमीयुःसर्वपार्थिवाः ५ तांस्तु
त्यामाधवींलक्ष्मींसपुत्रंचजनार्दनम् पुरींद्वारवतींचैवनिविष्टांसागरांतरे ६ दूतैस्तैःकृतसंधानाःपृथिव्यांसर्वपार्थिवाः श्रियंद्रष्टुंहृषीके
शमाजग्मुःकृष्णमंदिरम् ७ दुर्योधनमुखाःसर्वेधृतराष्ट्रवशानुगाः पांडवप्रमुखाश्चैवधृष्टद्युम्नादयोनृपाः ८ पांड्याश्चोलकलिंगेशा
बाल्हीकाद्राविडाःखशाः अक्षौहिणीःप्रकर्षंतोदशचाष्टौचभूमिपाः ९ आजग्मुर्यादवपुरींगोविंदभुजपालिताम् तेपर्वतंरैवतकंपरिवा
र्यावनीश्वराः १० विविशुर्योजनाख्यासुस्थासुस्थासुचभूमिषु ततःश्रीमान्हृषीकेशःसहयादवपुंगवैः ११

पर्वणिटीकायांशतोपरिनवमोऽध्यायः १०९ छ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गजाश्वोष्ट्रर्क्षमार्जारसिंहव्याघ्रनिभाननाः वराहोलूकगोमायुमृगाखुमहिषाननाः ६६ वामनाविकटाःकुब्जाः करालालूनमूर्धजाः
सहस्रशतशश्चान्येसहस्रजटधारिणः ६७ श्वेताःकैलाससंकाशाःकेचिद्दिनकरप्रभाः केचिज्जलदवर्णाभानीलांजनचयोपमाः ६८
एकपादाद्विपादाश्चतथाद्विशिरसोपरे निर्मांसाःस्थूलजंघाश्चव्यादितास्याभयंकराः ६९ वापीतडागकूपेषुसमुद्रेषुसरित्सुच श्मशा
नशैलवृक्षेषुशून्यागारनिवासिनः ७० एतेग्रहाश्चसततंरक्षंतुममसर्वतः महागणपतिर्नंदीमहाकालोमहाबलः माहेश्वरोवैष्णवश्च
ज्वरोलोकभयावहो ७१ ग्रामणीश्चैवगोपालोभृंगरीटिर्गणेश्वरः देवश्चवामदेवश्चघंटाकर्णःकरंधमः ७२ श्वेतमौदःकपालीच
जंभकःशत्रुतापनः मज्जनोन्मज्जनौचोभौसंतापनविलापनौ ७३ निजघासोघसश्चैवस्थूणाकर्णःप्रशोषणः उल्कामालीधम-
धमोज्वालामालीप्रमर्दनः ७४ संघट्टनःसंकुटनःकाष्ठभूतःशिवंकरः कूष्मांडःकुंभमूर्धाचरोचनोवैकृतोग्रहः ७५ अनिकेतःसुरा
रिघ्नःशिवश्चाशिवएवच क्षेमकःपिशिताशीचसुरारिर्हरिलोचनः ७६ भीमकोग्राहकश्चैवतथैवायमयोग्रहः उपग्रहोर्यकश्चैवत
थास्कंदग्रहोपरः ७७ चपलोसमवेतालस्तामसःसुमहाकपिः हृदयोद्वर्तनश्चेडःकुंडाशीकंकणप्रियः ७८ हरिश्मश्रुर्गरुत्मतोमनो
मारुतरंहसः पार्वत्यारोषसंभूताःसहस्राणिशतानिच ७९ शक्तिमंतोद्युतिमंतोब्रह्मण्याःसत्यसंगराः सर्वकामापहर्तारोद्विषतांचमृधे
मृधे ८० रक्षावहंतिदुर्गेषुकीर्तिताःसकलैर्गुणैः तेषांगणानांपतयःसगणाःपांतुमांसदा ८१ नारदःपर्वतश्चैवगंधर्वाप्सरसागणाः पि
तरःकारणंकार्यमाधयोव्याधयस्तदा ८२ अगस्त्योगालवोगार्ग्यःशक्तिर्धौम्यःपराशरः कृष्णात्रेयश्चभगवानसितोदेवलोबलः ८३
बृहस्पतिरुतथ्यश्चमार्कंडेयःश्रुतश्रवाः द्वैपायनोविदर्भश्चजैमिनिर्माठरःकठः ८४ विश्वामित्रोवसिष्ठश्चलोमशश्चमहामुनिः उत्तंक
श्चैवरैभ्यश्चपौलोमश्चाहितास्थितः ८५ ऋषिर्वैकालवृक्षीयोमुनिर्मेधातिथिस्तथा सारस्वतोयवक्रीतिःकुशिकोगौतमस्तथा ८६ संवर्त
ऋष्यशृंगश्चस्वस्त्यात्रेयोविभांडकः ऋचीकोजमदग्निश्चतथौर्वस्तपसांनिधिः ८७ भरद्वाजःस्थूलशिराःकश्यपःपुलहःक्रतुः बृहदग्नि
हरिश्मश्रुर्विजयःकण्वएवच ८८ वैतंडीदीर्घतापाश्चवेदगाथोसुमांछिवः अष्टावक्रोदधीचिश्चश्वेतकेतुस्तथैवच ८९ उद्दालकःक्षारपा
णिःशृंगीगौरमुखस्तथा अग्निवेश्यःशमीकश्चप्रमुचुमुमुचुस्तथा ९० एतेचान्येचऋषयोबहवःशंसितव्रताः मुनयःशंसितात्मानोयेचा
न्येनानुकीर्तिताः ९१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ तेजिताक्षोभिता ५२ ५३ पारक्या

समासुवाचांबुचरः कूर्मोमानुषवत्स्वयम् किमाश्चर्यमयिमुनेधन्यश्चाहंकथंविभो ३७ गंगेयंनिम्नगाधन्याकिमाश्चर्यमतःपरं
यत्राहमिवसत्वानिचुरत्त्यसुतशोद्विज ३८ सोहंकुतूहलाविष्टोनदींगंगामुपस्थितः धन्यासित्वंसरिच्छ्रेष्ठेनित्यमाश्चर्यभूषिता
३९ यात्वमेवंमहाह्रदैःश्वापदैरुपशोभिता ह्रदिनींसागरंयासिरक्षंतीतापसालयान् ४० एवमुक्तातदागंगारूपिणीप्रत्यभाष
त नारददेवगंधर्वशक्रस्यदयितंद्विजम् ४१ मामेवंदेवगंधर्वसंग्रामकलहप्रिय नाहंधन्याद्विजश्रेष्ठनेवाश्चर्योपशोभिता ४२ तवस
त्येनिविष्टस्यवाक्यंसांप्रतिबोधते सर्वाश्चर्यकरोलोकेधन्यश्चैवार्णवोद्विज ४३ यत्राहमिवविस्तीर्णाःशतशोयांतिनिम्नगाः सोहंनि
पथगावाक्यंश्रुत्वार्णवमुपस्थितः ४४ आश्चर्यरवल्ललोकानांधन्यश्चासिमहार्णव येनखल्वसियोनिस्त्वमंभसांसलिलेश्वरः ४५
स्थानेत्वांवारिवाहिन्यःसरितोलोकपावनाः इमाःसमभिगच्छंतिपत्न्योलोकनमस्कृताः ४६ समुद्रस्त्वेवमुक्तस्तुततोमामवदद्वचः स्वं
जलोधंतलंभित्वाव्युत्थितःसवनेरितः ४७ मामेवंदेवगंधर्वनास्म्याश्चर्योद्विजर्षभ वसुंधेयंमुनेधन्यायत्राहमुपरिस्थितः ४८ कृतेतु
पृथिवीलोकेकिमाश्चर्यमतःपरम् सोहंसागरवाक्येनक्षितिंक्षितितलेस्थितः ४९ कौतूहलसमाविष्टोह्यब्रुवजगतोगतिम् धरित्रि
देहिनायोनेधन्यारवल्वसिशोभने ५० आश्चर्यचापिभूतेषुमहत्याक्षमयायुते तेनरवल्वसिभूतानांधरणीमनुजारणि ५१ क्षमात्वत्तः
प्रभूताचकर्मचावरगामिनाम् ततोभूःस्तुतिवाक्येनसामयोक्तेनतेजिता ५२ विहायसहजंधैर्यप्रत्यक्षामामभाषत देवगंधर्वमामेवं
संग्रामकलहप्रिय ५३ नास्मिधन्यानचाश्चर्यंपारक्येयंधृतिर्मम एतेधन्याद्विजश्रेष्ठपर्वताधारयंतिमाम् ५४ आश्चर्याणिचदृश्यंतेए
तेलोकस्यहेतवः सोहंधरणिवाक्येनपर्वतान्समुपस्थितः ५५ धन्याभवंतोदृश्यंतेबह्वाश्चर्याश्चभूधराः कांचनस्याग्ररत्नस्यधातूनां
चविशेषतः ५६ तेनरवल्वाकराःसर्वेभवंतोभुविशाश्वताः तेममैतद्वचःश्रुत्वापर्वतास्तस्थुषांवराः ५७ ऊचुर्मांसांत्वयुक्तानिवचांसिवन
शोभिताः ब्रह्मर्षेनवयंधन्यानाप्याश्चर्याणिसंतिनः ब्रह्माप्रजापतिर्धन्यःसर्वाश्चर्यःसुरेष्वपि ५८ सोहंप्रजापतिंगत्वासर्वप्रभवमव्यय
तस्यवाक्यपरस्यपर्यायपर्याप्तमिवलक्षये ५९ सोहंपितामहंदेवलोकयोनिंचतुर्मुखम् स्तोतुपश्चादुपगतःप्रणतोवनताननः ६० सोहंवा
क्यसमाप्त्यर्थमिवयंपद्मयोनिजम् आश्चर्यंभगवानेकोधन्योसिजगतोगुरुः ६१ नकिंचिदन्यत्पश्यामिभूतंयद्भवतासमं त्वत्तःसर्वमिदं
जातंजगत्स्थावरजंगमम् ६२

परकीया ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ अत्रकूर्मादिक्रमेण आश्चर्यत्वधन्यत्व

समीपंमानवेंद्राणांनिर्ययौकमलेक्षणः सतेषांनरदेवानांमध्यस्थोमधुसूदनः १२ व्यराजतयदुश्रेष्ठःशरदीवदिवाकरः सतत्रसमुदा
चारंयथास्थानंयथावयः १३ कृत्वासिंहासनेकृष्णःकांचनेनिषसादह राजानोपियथास्थानंनिषेदुर्विविधेष्वथ १४ सिंहासनेषुचित्रेषु
पीठेषुचनराधिपाः सयादवनरेंद्राणांसमाजःशुशुभेतदा १५ सुराणामसुराणांचसदसिब्रह्मणोयथा तेषांचित्राःकथास्तत्रप्रवृत्तास्त
त्समागमे यदूनांपार्थिवानांचकेशवस्योपशृण्वतः १६ एतस्मिन्नंतरेवायुर्ववौसघरवोपमः तुमुलंदुर्दिनंचासीत्सविद्युत्स्तनयित्नुमत् १७
तद्दुर्दिनतलंभित्वानारदःप्रत्यदृश्यत संवेष्टितजटाभारोवीणासक्तेनबाहुना १८ सपपातनरेंद्राणांमध्येसागरसंनिभः नारदोग्निशिखा
कारःश्रीमान्शक्रसखोमुनिः १९ तस्मिन्निपतितेभूमौनारदेमुनिपुंगवे तदद्भुतंमहामेघंव्यपाकृष्यतदुर्दिनम् २० सोवगाह्यनरेंद्राणां
मध्येसागरसंनिभः आसनस्थंयदुश्रेष्ठमुवाचमुनिरव्ययम् २१ आश्चर्यंखलुदेवानामेकस्त्वंपुरुषोत्तमः धन्यश्चासिमहाबाहोलोकेना
न्योस्तिकश्चन २२ एवमुक्तःस्मितंकृत्वाप्रत्युवाचमुनिंप्रभुः आश्चर्यश्चैवधन्यश्चदक्षिणाभिःसहेत्यहम् २३ एवमुक्तोमुनिश्रेष्ठःप्राहमध्ये
महीभृताम् कृष्णपर्याप्तवाक्योस्मिगमिष्यामियथागतम् २४ तंप्रस्थितमभिप्रेक्ष्यपार्थिवाःप्राहुरीश्वरम् गुह्यमत्रमजानंतोवचनंना
रदेरितम् २५ आश्चर्यमित्यभिहितंधन्योसीतिचमाधव दक्षिणाभिःसहेत्येवंप्रत्युक्तोपिचनारदे २६ किमेतन्नाभिजानीमोदिव्यमत्र
पदमहत् यदिश्राव्यमिदंकृष्णश्रोतुमिच्छामतत्त्वतः २७ तानुवाचततःकृष्णःसर्वान्पार्थिवपुंगवान् श्रोतव्यंनारदस्त्वेवद्विजोवःकथ
यिष्यति २८ ब्रूहिनारदतत्त्वार्थंश्रोतुकामामहीभुजः यत्त्वयाभिहितंवाक्यंमयानुप्रतिभाषितम् २९ सपीठेकांचनेशुभ्रेसूपविष्टःस्व
लंकृतः प्रभावंतस्यवक्ष्यमाणस्यप्रवक्तुमुपचक्रमे ३० नारदउवाच श्रूयतांभोनृपश्रेष्ठायावंतस्थसमागताः अस्यकृष्णस्यमहतो-
यथापारमहंगतः ३१ अहंकदाचिद्गंगायास्तीरेत्रिषवणातिथिः चराम्येकःक्षपापायेदृश्यमानेदिवाकरे ३२ अपश्यंगिरिकूटाभंकपा
लंद्व्यर्धहिनम् क्रोशमंडलविस्तारंतावद्द्विगुणमायतम् ३३ चतुश्चरणमस्पिष्टंक्लिन्नंचैवसपंकिलम् समवीणाकृतिंकूर्मंगजचर्म
चयोपमम् ३४ सोहंतंपाणिनास्पृष्ट्वाप्रोक्तवान्जलचारिणम् त्वमाश्चर्यशरीरोसिकूर्मधन्योसिमेमतः ३५ यस्त्वमेवमभेद्याभ्यांकपा
लाभ्यांसमावृतः तोयेचरसिनिःशंकःकिंचिदन्यमचिंतयन् ३६

योःपराकाष्ठाकृष्णइतिनारदमुखात्तस्यज्ञानंदक्षिणाभिःसहेतिवासुदेवस्यप्रत्युत्त-
रंयेविपुलंदक्षिणैर्यज्ञेश्वरंसायजंतेतएवमप्याश्चर्यत्वधन्यत्वयोःविश्रांतिंजानंतीति २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांशतोपरिदशमोऽध्यायः ११० भूयएवेतिपूर्वंधन्योपाख्यानेयज्ञानामाश्चर्यभूतः कृष्णाइत्युक्तंइदानीं यज्ञभोक्तुः श्वेतद्वीपपतेरपिकृष्णआश्चर्यभूतइत्युच्यत आख्यायिकामुखेनतेनकृष्णस्तुभगवान्स्वयमित्येतदुपपादितंभवति १ अनुसंधानंअनुक्रमम् २

जनार्दनोपिसहितोयदुभिःपावकोपमैः स्वमेवभवनंवीरोविवेशयदुनंदनः ८९ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिधन्योपाख्याननामशतोपरिदशमोऽध्यायः ११० जनमेजयउवाच भूयएवमहाबाहोःकृष्णस्यजगतांपतेः माहात्म्यंश्रोतुमिच्छामिपरमंद्विजसत्तम १ नहिमेतृप्तिरस्तीहशृण्वतस्तस्यधीमतः कर्मणामनुसंधानंपुराणस्यमहात्मनः २ वैशंपायनउवाच नांतःशक्यःप्रभावस्यवक्तुंवर्षशतैरपि गोविंदस्यमहाराजश्रूयतामिदमद्भुतम् ३ शरतल्पेशयानेनभीष्मेणपरिचोदितः गांडीवधन्वाबीभत्सुर्माहात्म्यंकेशवस्यतत् ४ राज्ञांमध्येमहाराजज्येष्ठंभ्रातरमब्रवीत् युधिष्ठिरजितामित्रमितितच्छृणुकौरव ५ अर्जुनउवाच पुराहद्वारकायातःसंबंधीनवलोककः न्यवसंपूजितस्तत्रभोजवृष्ण्यंधकोत्तमैः ६ ततःकदाचिद्धर्मात्मादीक्षितोमधुसूदनः एकाहेनमहाबाहुःशास्त्रदृष्टेनकर्मणा ७ ततोदीक्षितमासीनमभिगम्यद्विजोत्तमः कृष्णंविज्ञापयामासत्राहित्राहीतिचाब्रवीत् ८ ब्राह्मणउवाच रक्षाधिकारोभवतःपरित्रायस्वमांविभो चतुर्थांशंहिधर्मस्यरक्षितालभतेफलम् ९ वसुदेवउवाच नभेतव्यंद्विजश्रेष्ठरक्षामिखांकुतोभयम् ब्रूहितत्वेनभद्रंतेयद्यपिस्यात्सुदुष्करम् १० ब्राह्मणउवाच जातोजातोमहाबाहोपुत्रोमेह्रियतेनघ त्रयोहृतास्तुर्थंत्वंकृष्णरक्षितुमर्हसि ११ ब्राह्मण्याःसूतिकालोद्यतत्ररक्षाविधीयताम् यथाध्रियेदपत्यंमेतथाकुरुजनार्दन १२ अर्जुनउवाच ततोमामाहगोविंदोदीक्षितोहंकृताविति रक्षाचब्राह्मणेकार्यासर्वावस्थागतैरपि १३ श्रुत्वाहमेवंकृष्णस्यवचोवोचंनराधिप मांनियोजयगोविंदरक्षिष्येहंद्विजभयात् १४ इत्युक्तःसस्मितंकृत्वामामुवाचजनार्दनः शक्ष्यसीत्येवमुक्तस्तुव्रीडितोस्मिनराधिप १५ ततोमांव्रीडितंमत्वापुनराहजनार्दनः गम्यतांकौरवश्रेष्ठशक्यतेयदिरक्षितुम् १६ त्वत्पुरोगाश्चरक्षंतुवृष्ण्यंधकमहारथाः कृतेरामंसमहाबाहुंप्रद्युम्नंचमहाबलम् १७ ततोहंवृष्णिसैन्येनमहतापरिवारितः तमभ्यगांद्विजंकृत्वाप्रयातःसहसेनया १८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिवासुदेवमाहात्म्येशतोपरिएकादशोऽध्यायः १११ अर्जुनउवाच मुहूर्तेनवयंग्रामंतंप्राप्यभरतर्षभ विश्रांतवाहनाःसर्वेनिवासायोपसंस्थिताः १

३ ४ ५ संबंधीनूसंबंधिनः अवलोककःअवलोकयितुं ६ एकाहेनएकसूत्त्याअवतासोमयागेन ७ ८ ९ १० ११ ध्रियेतजीवेत् १२ १३ १४ शक्ष्यसीतिकाकूक्त्यानशक्ष्यसीत्यभिप्रायउन्नेयः १५ १६ १७ १८ इ॰म॰खि॰ह॰वि॰टी॰शतोपरिएकादशोऽध्यायः १११ मुहूर्तेनेति १

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सदेवदानवासर्वालोकमूर्तेंद्रियात्मकाः भवंतिसर्वदेवेशात्त्वत्तःसर्वमिदंजगत् ६३ तेनखल्वसिदेवानांदेवदेवःसनातनः तेषामेवासि
यस्त्रष्टालोकानामादिसंभवः ६४ ततोमामाहभगवान्ब्रह्मालोकपितामहः धन्याश्चर्याश्चितेवाक्येःकिंमांनारदभाषसे ६५ आश्चर्यं
परमंवेदाधन्याश्चवेदाश्चनारद येलोकान्धारयंतिस्मवेदास्तत्वार्थदर्शिनः ६६ ऋक्सामयजुषांसत्यमथर्वणश्चयन्मतम् तन्मयंविहिता
विप्रश्रुतोहंतैर्मयाच्यते ६७ पारमेष्ठ्येनवाक्येननोदितोहंस्वयंभुवा वेदोपस्थानिकाचक्रेमतिसंस्थानविस्तरात् ६८ सोहंस्वयंभुवचनाद्वे-
दान्वैसमुपस्थितः उवाचचेतांश्चतुरोमंत्रप्रवचनान्वितान् ६९ धन्याभवंतःपुण्याश्चनित्यमाश्चर्यभूषिताः आधाराश्चैवविप्राणामेवमाह
प्रजापतिः ७० स्वयंभुवोपीहपरंभवत्सुप्रश्नमागतम् सुश्चात्परतरंनास्तिसुत्यावातपसापिवा ७१ प्रत्यूचुस्तेततोवाक्यंवेदामामभितःस्थि
ताः आश्चर्याश्चैवधन्याश्चयज्ञाश्चात्मपरायणाः ७२ यज्ञार्थेन्ववयंसृष्टाधात्रायेनस्मनारद तदस्माकंपरोयज्ञोनवयंस्ववशेस्थिताः ७३
स्वयंभुवःपरंवेदावेदानांक्रतवःपराः ततोहमब्रुवंयज्ञान्बृहद्भाभिःपुरस्कृतान् ७४ भोयज्ञाःपरमंतेजोयुष्मासुखलुलक्ष्यते ब्रह्मणाभि
हितंवाक्यंयच्चवेदैरुदीरितम् ७५ आश्चर्यमन्यत्तुलोकेस्मिन्भवद्भ्योनाभिगम्यते धन्याःखलुभवंतोयेद्विजातीनांस्ववंशजाः ७६ तेपि
खल्वग्नयस्तृप्तिंयुष्माभिर्यांतितर्पिताः भागेश्चत्रिदशाःसर्वेमंत्रैश्चैवमहर्षयः ७७ अग्निष्टोमादयोयज्ञाममवाक्यादनंतरम् प्रत्यूचुर्मां
ततोवाक्यंसर्वेयूपध्वजाःस्थिताः ७८ आश्चर्यशब्दोनास्मासुधन्यशब्दोपिवामुने आश्चर्यंपरमोविष्णुःसह्यस्माकंपरागतिः ७९ येदाज्यं
वयमश्नीमोहुतमग्निषुपावनम् तत्सर्वंपुंडरीकाक्षोलोकमूर्तिःप्रयच्छति ८० सोहंविष्णोर्गतिंप्रेप्सुरिहसंपतितोभुवि द्रष्टुञ्चायंमयाकृ
ष्णोभवद्भिरिहसंवृतः ८१ यन्मयाभिहितोह्येषत्वमाश्चर्यंजनार्दन धन्यश्चासीतिभवतामध्यस्थोह्यत्रपार्थिवाः ८२ प्रत्युक्तोहमनेनाद्य
वाक्यस्यास्ययदुत्तरम् दक्षिणाभिःसहेत्येवंपर्याप्तंवचनंमम ८३ यज्ञानांहिगतिर्विष्णुःसर्वेषांसहदक्षिणः दक्षिणाभिःसहेत्येवंप्र-
श्नोममसमाप्तवान् ८४ कूर्मेणाभिहितंपूर्वंपारंपर्यादिहागतम् सदक्षिणेस्मिन्पुरुषेतद्वाक्यंप्रतिपादितम् ८५ दक्षिणाभिःसहे
त्येवंपर्याप्तंवचनंमम यज्ञानांचगतिर्विष्णुःसर्वेषांचसदक्षिणः ८६ यन्माभवंतःपृच्छंतिवाक्यस्यास्यविनिर्णयम् तदेतत्सर्वमाख्यातं
साधयामियथागतम् ८७ नारदेतुगतेस्वर्गंसर्वेतेपृथिवीभुजः विस्मिताःस्थानिराष्ट्राणिजग्मुःसबलवाहनाः ८८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२८ आरोप्यरथइतिशेषः २९ ३० इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांशतोपरिद्वादशोऽध्यायः ११२ ततइति १ २ ३ ४ ५ ६
७ ८ ९ १० ११ १२ १३ १४ वर्णरूपाणिवेषवंतिरूपाणि १५ प्रतिजग्राहकुशलप्रश्नादिनासमानयामास १६ विवरंगूढ-

सांत्वयित्वातुतंविप्रमिदंवचनमब्रवीत् सुग्रीवंचैवसैन्यंचमेघपुष्पबलाहकौ २८ योजयाश्चानिर्गितदादारुकंप्रत्यभाषत आरोप्य
ब्राह्मणंकृष्णोह्यवरोप्यचदारुकम् २९ मासुवाचततःशौरिःसारथ्यंक्रियतामिति ततःसमास्थायरथंकृष्णोऽहंब्राह्मणःसच प्रयातास्म
दिशंसोऽस्यासुदीचींकौरवर्षभ ३० इतिश्रीम०खि०ह०वि०वासुदेवमाहात्म्येकृष्णस्यउदीचीगमनेशतोपरिद्वादशोऽध्यायः ११२ ७
अर्जुनउवाच ततःपर्वतजालानिसरितश्चवनानिच अपश्यंसमतिक्रम्यसागरंवरुणालयं १ ततोथसुदधिःसाक्षादुपनीयजनार्दन
म् सप्राञ्जलिःसमुत्थायकिंकरोमीतिचाब्रवीत् २ प्रतिगृह्यसतांपूजातमुवाचजनार्दनः रथपंथानमिच्छामित्वयादत्तंनदीपते ३ अथा
ब्रवीत्ससुद्रस्तुप्राञ्जलिर्गरुडध्वजम् प्रसीदभगवन्नैवमन्योप्येवंगमिष्यति ४ त्वयैवस्थापितःपूर्वमगाधोस्मिजनार्दन त्वयाप्रवर्तितेमार्गे
यास्यामिगमनीयताम् ५ अन्येप्येवंगमिष्यतिराजानोदर्पमोहिताः एवंसंचिंत्यगोविंदयत्क्षमंतत्समाचर ६ वासुदेवउवाच ब्राह्मणा
र्थमदर्थंचकुरुसागरसद्वचः मद्दतेनपुमान्कश्चिदन्यस्त्वांधर्षयिष्यति ७ अथाब्रवीत्ससुद्रस्तुपुनरेवजनार्दनम् अभिशापभयाद्भीतोब्रा
ढमेवंभविष्यति ८ शोषयास्येषमार्गंतयेनत्वंकृष्णयास्यसि रथेनसहसूतेनसध्वजेनतुकेशव ९ वासुदेवउवाच मयादत्तोवरःपूर्वं
नशोषंयास्यसीतिह मानुषास्तेनजानीयुर्विविधान्रत्नसंचयान् १० जलस्तंभयसाधोत्वंततोयास्याम्यहंरथी नचकश्चित्प्रमाणंतेरत्नानां
वेत्स्यतेनरः ११ सागरेणतथेत्युक्तेप्रस्थितास्मोजलेनवै स्तंभितेनपथाभूमौमणिवर्णेनभास्वता १२ ततोर्णवंसमुत्तीर्यकुरून्सुत्तरान्वय
क्षणेनसमतिक्रांतागंधमादनमेवच १३ ततस्तपर्वताःसप्तकेशवंसमुपस्थिताः जयंतोवैजयंतश्चनीलोरजतपर्वतः १४ महामेरुःसकै-
लासइंद्रकूटश्चनामतः बिभ्राणावर्णरूपाणिविविधान्यद्भुतानिच १५ उपस्थायचगोविंदंकिंकुर्मेत्यब्रुवंस्तदा तांश्चैवप्रतिजग्राहविधि
वन्मधुसूदनः १६ तानुवाचहृषीकेशःप्रणामावनतान्स्थितान् विवरंगच्छतोमेद्यरथमार्गःप्रदीयताम् १७ तेकृष्णस्यवचःश्रुत्वाप्रति
गृह्यचपर्वताः प्रददुःकामतोमार्गंगच्छतोभरतर्षभ १८ तत्रैवांतर्हिताःसर्वेतदाश्चर्यतरंमम असक्तंचरथोयातिमेघजालेष्विवांशुमान्
१९ सप्तद्वीपान्ससिंधूंश्चसप्तसप्तगिरीनथ लोकालोकंतथातीत्यविवेशसुमहत्तमः २० ततःकदाचिद्दुःखेनरथमूहुस्तुरगमाः पंकभूतं
हितिमिरंस्पर्शाद्विज्ञायतेनृप २१

स्थानम् १७ १८ १९ २० २१ ७ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२ ३ जपावर्णः ओड्रपुष्पेजपासतेतिविश्वः धूसरांकुरकुसुमवत्पीतवर्णइत्यर्थः ४ योगंसेनायाःसन्नाहं ५ ६ ७ ८ ह्रियतेशिशुः अह्रियतहृतइति ९ १०

ततोग्रामस्यमध्येहंनिविष्टःकुरुनंदन समंताद्वृष्णिसैन्येनमहतापरिवारितः २ ततःशकुनयोदीप्तामृगाश्चक्रूरभाषिणः दीप्तायांदि
शिवासतोभयमावेदयंतिमे ३ संध्यारागोजपावर्णोभानुमांश्चैवनिःप्रभः पपातमहतीचोल्कापृथिवीचाप्यकंपत ४ तान्समीक्ष्यम
होत्पातान्दारुणान्लोमहर्षणान् योगमाज्ञापयंतश्चजनस्योत्सुकचेतसः ५ युयुधानपुरोगाश्चवृष्ण्यंधकमहारथाः सर्वेयुक्तरथाः
सज्जाःस्वयंचाहंतथाभवम् ६ गतेऽर्धरात्रसमयेब्राह्मणोभयविक्लवः उपागम्यभयादस्मान्निदंवचनमब्रवीत् ७ कालोयंसमनुप्राप्तोब्रा
ह्मण्याःप्रसवस्यमे तथाभवंतस्तिष्ठंतुनभवेद्वंचनंयथा ८ मुहूर्तादेवचाश्रौषंकृपणंरुदितस्वनम् तस्यविप्रस्यभवनेह्रियतेऽह्रियतेतिच
९ अथाकाशेपुनर्वाचमश्रौषंबालकस्यवै उहेतिक्रियमाणस्यनचपश्यामिराक्षसम् १० ततोस्माभिस्तदातातशरवर्षैःसमंततः विष्टभि
तादिशःसर्वाहृतएवसबालकः ११ ब्राह्मणार्तिस्वरंकृत्वाहृतेतस्मिन्कुमारके वाचःसपरुषास्तीव्राःश्रावयामासमांतदा १२ वृष्णयोह
तसंकल्पास्तथाहंनष्टचेतनः मामेवंहिविशेषेणब्राह्मणःप्रत्यभाषत १३ रक्षिष्यामीतिचोक्तंतेनचरक्षितवानसि शृणुवाक्यमिदंशेषंय
त्वमर्हसिदुर्मते १४ यथात्वस्पर्द्धसेनित्यंकृष्णेनामितबुद्धिना यदिस्यादिहगोविंदोनैतदत्याहितंभवेत् १५ यथाचतुर्थंधर्मस्यरक्षिता
लभतेफलम् पापस्यापितथामूढभागंप्राप्नोत्यरक्षिता १६ रक्षिष्यामीतिचोक्तंतेनचशक्तोसिरक्षितुम् मोघंगांडीवमेतत्तेमोघंवीर्यंय
शश्चते १७ अकिंचिदुक्त्वातंविप्रंततोहंप्रस्थितस्तथा सहवृष्ण्यंधकसुतैर्यत्रकृष्णोमहाद्युतिः १८ ततोद्वारवतींगत्वादृष्ट्वामधुनिघा
तिनम् व्रीडितःशोकसंतप्तोगोविंदेनोपलक्षितः १९ सतुमांव्रीडितंदृष्ट्वाविनिंदन्कृष्णसन्निधौ मौढ्यंपश्यतमेयोहंश्रद्दधेक्लीबकत्थ
नम् २० नप्रद्युम्नोनानिरुद्धोनरामोनचकेशवः यत्रशक्ताःपरित्रातुंकोन्यस्तदवनेश्वरः २१ धिगर्जुनंवृथावादंधिगात्मश्लाघिनो
धनुः दैवोपसृष्टोयोमोहादागच्छतिचदुर्मतिः २२ एवंशपतिविप्रर्षौविद्यामास्थायवैष्णवीम् ययौसंयमिनींवीरोयत्रास्तेभगवा
न्यमः २३ विप्रापत्यमचक्षाणस्ततऐंद्रीमगात्पुरीम् आग्नेयींनैर्ऋतींसौम्यामुदीचींवारुणींतथा २४ रसातलंनाकपृष्ठंधिष्ण्या-
न्यन्यान्युदायुधः ततोलब्ध्वाद्विजसुतमनिस्तीर्णप्रतिश्रवः २५ अग्निंविविक्षुःकृष्णेनप्रद्युम्नेननिषेधितः दर्शयेद्विजसूनुंतेमावज्ञा
त्मानमात्मना २६ कीर्तिंतएतेविपुलांस्थापयिष्यंतिमानवाः इतिसंभाष्यमांस्नेहात्समाश्वास्यचमाधवः २७

११ अर्तीतिच्छेदः संधिरार्षः १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा·ह·टी· २२ २३ भविष्यामिजीविष्यामीतिसंज्ञाज्ञानमभूत् ततःप्राक्स्मृतोहमित्येवबुद्धिरासीदितिभावः २४ २५ तंप्रसिद्धंईश्वरं २६ २७ २८ २९ ३० ३१ अ· ५·
१४६ ३२ इतिश्रीम०खि०हरिवंशेविष्णुपर्वणिटीकायांशततोपरित्रयोदशोऽध्यायः ११३ ततःकृष्णाइति १ २ ३ ४ तच्चेतितत्प्रसिद्धंतत्तुजगत्कर्तृतेजः तदितिपाए ११३
तस्यमहतोभूतस्यनामभवतीतिश्रुतेस्तादित्येवाभिधम् ५ आगमनकाले ६ ७ महत्जगद्वृक्षांकुरभूतंतेजः तदभिमानिचेतनेनममफलोपमस्यदर्शनार्थंतेवा-

अथपर्वतभूतंतंतिमिरंसमपद्यत तदासाद्यमहाराजनिश्चयत्नाहयास्थिताः २२ ततश्चक्रेणगोविंदःपाटयित्वातमस्तदा आकाशंदर्शयामासरथपंथानमुत्तमम् २३ निष्क्रम्यतमसस्तस्मादाकाशेदर्शितेतदा भविष्यामीतिसंज्ञामेभयंचविगतंमम २४ ततस्तेजःप्रज्वलितमपश्यन्तदांबरे सर्वलोकंसमाविश्यस्थितंपुरुषविग्रहम् २५ तंप्रविष्टोहृषीकेशोदीप्तंतेजोनिधितदा रथएवस्थितश्चाहंसचब्राह्मणसत्तमः २६ समुहूर्तात्ततःकृष्णोनिश्चक्रामतदाप्रभुः चतुरोबालकान्गृह्यब्राह्मणस्यात्मजांस्तदा २७ प्रददौब्राह्मणायाथपुत्रान्सर्वान्जनार्दनः त्रयःपूर्वंहृतायेचसद्योजातश्चबालकः २८ प्रहृष्टोब्राह्मणस्तत्रपुत्रान्दृष्ट्वापुनःप्रभो अहंचपरमप्रीतोविस्मितश्चाभवंतदा २९ ततोवयंपुनःसर्वेब्राह्मणस्यचतेसुताः यथागतानिवृत्ताःस्मतथैवभरतर्षभ ३० ततःस्मद्वारकांप्राप्ताःक्षणेनन्नृपसत्तम असंप्राप्तेऽर्द्धदिवसेविस्मितोहंपुनःपुनः ३१ सपुत्रंभोजयित्वातुद्विजंकृष्णोमहायशाः धनेनवर्षयित्वाचगृहंप्रास्थापयत्तदा ३२ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिवासुदेवमाहात्म्येब्राह्मणपुत्रानयनेशततोपरित्रयोदशोऽध्यायः ११३ ७ अर्जुनउवाच ततःकृष्णोभोजयित्वाशतानिसुबहूनिच विप्राणामृषिकल्पानांकृतकृत्योभवत्तदा १ ततःसहमयाभुक्त्वावृष्णिभोजैश्चसर्वदा विचित्राश्चकथादिव्याःकथयामासभारत २ ततःकथांतेतत्राहमभिगम्यजनार्दन अपृच्छंतद्यथावृत्तंकृष्णायदृष्टवानहम् ३ कथंससुद्रःस्तब्धोदःकृतस्तुकमलेक्षण पर्वतानांचविवरंकृतंतत्कथमच्युत ४ तमस्तच्चकथंघोरंधनंचक्रेणपाटितम् तच्चयत्परमंतेजःप्रविष्टोसिकथंचतत् ५ किमर्थंतेनतेबालास्तदाचापहृताःप्रभो यच्चतदीर्घमध्वानंसंक्षिप्तंतत्कथंपुनः ६ कथंचाल्पेनकालेनकृतंतत्तुगतागतम् एतत्सर्वंयथावृत्तमाचक्ष्वममकेशव ७ वासुदेवउवाच मद्दर्शनार्थंतेबालाहृतास्तेनमहात्मना विप्रार्थमेष्यतेकृष्णोनागच्छेदन्यथेतिह ब्रह्मतेजोमयंदिव्यंमहद्यत्तद्दृष्टवानसि ८ अहंसभरतश्रेष्ठमत्तेजस्तत्सनातनम् प्रकृतिःसाममपराव्यक्ताव्यक्तासनातनी ९

ल्लाहृताः समहानहमेवयच्चमहत्तेजस्तन्ममैवतेजः एतेनमहतोंकुरस्यकारणंबीजोपमईश्वरः तादृशानामनेकेषामीश्वराणामाश्रयोहंफलमिवानेकेषांबीजानामित्यर्थः ८ सामहत्तत्वाख्याप्रकृतिःपरा अहंकारादिभ्यःश्रेष्ठाज्येष्ठत्वात्साचव्यक्ताद्दृश्यांशेनव्यक्ता अव्यक्तादृगंशेन ९ ७ ७ ७ ७ १५६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तांप्रविश्येतितत्रैवगत्वाचिज्जडयोर्विवेकः सत्वपुरुषान्यताख्यातिर्नामभवति अतस्तत्साक्षात्कारणएवमुक्तिसाधनं १० विभजतेजगत् चिदंशाज्जडांशंपृथक्करो- तीत्यर्थः यथातन्ममरूपंतथान्यदपिदृश्यमित्याहमामेवेत्यादिना ११ १२ १३ चंद्रेतितेजः पृथिवीजलाकाशात्मनाचतुर्विधः एतच्चवायोरप्युपलक्षणंपंचापि भूतानिअहमेवेत्यर्थः १४ १५ तेषां १६ १७ उग्रंउत्सरणंनानाक्लेशकरत्वात् बृहत्तमंवैकल्यंअखंडानंदरूपत्वात्मत्तउद्भूतंब्रह्मादिमत्तःप्राप्यंरुद्रादि १८

तांप्रविश्यभवंतीहमुक्तायोगविदुत्तमाः सासांख्यानांगतिःपार्थयोगिनांचतपस्विनाम् १० तत्पदंपरमंब्रह्मसर्वंविभजतेजगत् मामेवतद्घनंतेजोज्ञातुमर्हसिभारत ११ समुद्रःस्तब्धतोयोहमहंस्तंभयिताजलम् अहंतेपर्वताःसप्तयेदृष्टाविविधास्त्वया १२ पंकभूतहिति मिरंदृष्टवानसियद्धितत् अहंतमोघनीभूतमहमेवचपातकः १३ अहंचकालोभूतानांधर्मश्चाहंसनातनः चंद्रादित्यौमहाशैलाःसरितश्चसरांसिच १४ चतस्रश्चदिशःसर्वाममेवात्माचतुर्विधः चातुर्वर्ण्यंमत्प्रसूतंचातुराश्रम्यमेवच १५ चातुर्विध्यस्यकर्ताहमितिबुध्यस्व भारत अर्जुनउवाच भगवन्सर्वभूतेशवेत्तुमिच्छामितेप्रभो १६ पृच्छामित्वांप्रपन्नोहंनमस्तेपुरुषोत्तम वासुदेवउवाच ब्रह्मचब्राह्मणाश्चैवतपःसत्यंचभारत १७ उग्रंबृहत्तमंचैवमत्तस्तद्विद्धिपांडव प्रियस्तेहमहाबाहोप्रियोमेसिधनंजय १८ तेनतेकथयिष्यामिनान्यथावक्तुमुत्सहे अहंयजूंषिसामानिऋचश्चाथर्वणानिच १९ ऋषयोदेवतायज्ञामत्तेजोभरतर्षभ पृथिवीवायुराकाशमापोज्योतिश्चपंचमम् २० चंद्रादित्यावहोरात्रंपक्षामासास्तथर्तवः मुहूर्ताश्चकलाश्चैवक्षणाःसंवत्सरास्तथा २१ मंत्राश्चविविधाःपार्थयानिशास्त्राणिकानिचित् विद्याश्चवेदितव्यंचमत्तःप्रादुर्भवंतिहि २२ मन्मयंविद्धिकौंतेयक्षयंसृष्टिंचभारत सच्चासच्चममेवात्मासदसच्चैवयत्परम् २३ अर्जुनउवाच एवमुक्तोस्मिकृष्णेनप्रीयमाणेनवैतदा तथैवचमनोनित्यमभवन्मेजनार्दने २४ एतच्छ्रुतंचदृष्टंचमाहात्म्यंकेशवस्यमे यन्मापृच्छसिराजेंद्रभूयाश्चातोजनार्दने २५ वैशंपायनउवाच एतच्छ्रुत्वाकुरुश्रेष्ठोधर्मराजोयुधिष्ठिरः पूजयामासधर्मात्मागोविंदंपुरुषोत्तमम् २६ विस्मितश्चाभवद्राजासहसर्वैःसहोदरैः राजभिश्चससासीनैर्येतत्रासन्समागताः २७ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिवासुदेवमाहात्म्येकृष्णार्जुनभाषणेशतोपरिचतुर्दशोऽध्यायः ११४ जनमेजयउवाच भूयएवद्विजश्रेष्ठयदुसिंहस्यधीमतः कर्माण्यपरिमेयानिश्रोतुमिच्छामितत्वतः १ श्रूयंतेविविधानिस्मअद्भुतानिमहाद्युतेः असंख्येयानिदिव्यानिप्रकृतान्यपिसर्वशः २

१९ २० २१ २२ सत्कार्यंअसत्कारणंसदसच्चेत्युभयविशेषणंकार्यकारणगंसत् चिदंशेनअसत्दृश्यांशेनताभ्यां परंतुसदेवतत्परंशुद्धंब्रह्माहमेव २३ २४ २५ २६ २७ इतिश्रीम०खि०ह०वि० टी० शतोपरिचतुर्दशोऽध्यायः ११४ भूयएवेति १ २ ३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

तातेतिवात्सल्योत्पादनायसंबोधयति ३ ४ ५ ६ ७ ८ ९ १० ११ १२ गिरिमध्येमेरुमध्ये १३ १४ १५ १६ १७ १८ १९

यान्यहं विविधान्यस्यश्रुत्वाप्रीयेमहामुने प्रब्रूयाःसर्वशस्तातताानिमेशृण्वतोनघ ३ वैशंपायनउवाच बहून्याश्चर्यभूतानिकेश
वस्यमहात्मनः कथितानिमहाबाहोनातंशक्यंहिकर्मणाम् ४ गंतुंहिभरतश्रेष्ठविस्तरेणसमंततः अवश्यंहिमयावाच्यलेशमा
त्रेणभारत ५ विष्णोरमितवीर्यस्यप्रथितोदारकर्मणः आनुपूर्व्यांप्रवक्ष्यामिशृणुष्वैकमनानृप ६ द्वारवत्यांनिवसतायदुसिंहेन
धीमता राष्ट्राणिनृपमुख्यानांक्षोभितानिमहात्मनाम् ७ यदूनामंतरप्रेप्सुर्विचक्रोदानवोहतः पुरंप्राग्ज्योतिषंगत्वापुनस्तेनम-
हात्मना ८ समुद्रमध्येदुष्टात्मानरकोदानवोहतः वासवंचरणेजित्वापारिजातोहृतोबलात् ९ वरुणश्चैवभगवान्निर्जितोलोहिते
ह्रदे दंतवक्त्रश्चकारूषोनिहतोदक्षिणापथे १० शिशुपालश्चसंपूर्णेकिल्बिषेकशतेहतः गत्वाचशोणितपुरंशंकरेणाभिरक्षितः ११
बलेःसुतोमहावीर्योबाणोबाहुसहस्रभृत् महामृधेमहाराजजित्वाजीवन्विसर्जितः १२ निर्जितःपावकश्चैवगिरिमध्येमहात्मना शा
ल्वश्चविजितःसंख्येसौभश्चविनिपातितः १३ विक्षोभ्यसागरंचैवपांचजन्योवशीकृतः हयग्रीवश्चनिहतोनृपाश्चान्येमहाबलाः १४
जरासंधस्यनिधनेमोक्षिताःसर्वपार्थिवाः रथेनजित्वानृपतीन्गांधारतनयाहृता १५ भ्रष्टराज्याश्चशोकार्ताःपांडवाःपरिरक्षिताःदा
हितंचवनंघोरंपुरुहूतस्यखांडवम् १६ गांडीवंचाग्निनादत्तमर्जुनायोपपादितम् दूत्यंचतत्कृतंघोरेविग्रहेजनमेजय १७ अनेनयदुमु
ख्येनयदुवंशोविवर्धितः कुंत्याश्चसमुखेप्रोक्ताप्रतिज्ञापांडवान्प्रति १८ निवृत्तेभारतेयुद्धेप्रतिदास्यामितत्कृतान् मोक्षितश्चमहात्
मान्नृगःशापात्सुदारुणात् १९ यवनश्चहतःसंख्येकालइत्यभिविश्रुतः वानरोचमहावीर्योमैंदोद्विविदएवच २० विजितोयुधिदुर्धर्षो
जांबवांश्चपराजितः सांदीपिनेस्तथापुत्रस्तवचैवपितातथा २१ गतोवैवस्वतवशाज्जीवितोतस्यतेजसा संग्रामाबहवःप्राप्ताघोरानरवर
क्षयाः २२ निहतास्चनृपाःसर्वेकृत्वातज्जयमद्भुतम् जनमेजयस्ययुद्धेषुयथातेवर्णितामया २३ इतिश्रीमहाभारतेखिलेषुह-
रिवंशेविष्णुपर्वणिवासुदेवमाहात्म्येशतोपरिपंचदशोऽध्यायः ११५ जनमेजयउवाच भूयएवमहाबाहोयदुसिंहस्यधीम
तः कर्माण्यपरिमेयानिश्रुतानिद्विजसत्तम १ त्वत्तःश्रुतवतांश्रेष्ठवासुदेवस्यधीमतः यत्त्वयाकथितंपूर्वंबाणंप्रतिमहासुरम् २ तदहं
श्रोतुमिच्छामिविस्तरेणतपोधन कथंचदेवदेवस्यपुत्रत्वमसुरोगतः ३ योभिगुप्तःस्वयंब्रह्मन्शंकरेणमहात्मना सहवासंगतेनैवस
गणेनगुहेनतु ४

२० २१ २२ २३ इतिश्रीम० खि० ह० विं० टी० शतोपरिपंचदशोऽध्यायः ११५ भूयइति १ २ ३ ४ ७ ७ ७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५ ६ ७ ८ ९ १० देवदेवस्यरुद्रस्यपुत्रत्वंगणमुख्यत्वं ११ कुमारस्यकार्तिकेयस्यक्रीडतः रुद्राराधनात्मिकांक्रीडांहृष्टेतियोज्यं १२ १३ श्लाघ

बलेर्बलवतःपुत्रोज्येष्ठोभ्रातृशतस्ययः वृतोबाहुसहस्रेणदिव्यास्त्रशतधारिणा ५ असंख्येयैश्चमहाकायैर्महाबलशतैर्वृतः वासु
देवेनसकथंबाणःसंख्येपराजितः ६ संरब्धश्चैवयुद्धार्थीजीवन्मुक्तःकथंचसः वैशंपायनउवाच शृणुष्वावहितोराजन्कृष्ण
स्यामिततेजसः ७ मनुष्यलोकेबाणेनयथाभूद्विग्रहोमहान् वासुदेवेनयत्रासौरुद्रस्कंदसहायवान् ८ बलिपुत्रोरणश्लाघीजिता
जीवन्विसर्जितः यथाचास्यवरोदत्तःशंकरेणमहात्मना ९ नित्यसांनिध्यताचैवगाणपत्यंतथाक्षयम् यथाबाणस्यतद्युद्धंजीवन्मु
क्तोयथाचसः १० यथाचदेवदेवस्यपुत्रत्वंसोसुरोगतः यदर्थंचमहद्युद्धंतत्सर्वमखिलंशृणु ११ दृष्ट्वावपुःकुमारस्यक्रीडतश्चमहात्म
नः बलिपुत्रोमहावीर्योविस्मयपरमंगतः १२ तस्यबुद्धिःसमुत्पन्नातपश्चर्तुंसुदुष्करम् रुद्रस्याराधनार्थायदेवस्यास्यायथासुतः १३ त
तोग्लपयदात्मानंतपसाश्लाघतेचसः देवश्चपरमंतोषंजगामचमहोमया १४ नीलकंठःपराप्रीतिंगत्वाचासुरमब्रवीत् वरंवरयभद्रंते-
यत्तेमनसिवर्त्तते १५ अथबाणोब्रवीद्वाक्यंदेवदेवंमहेश्वरम् देव्याःपुत्रत्वमिच्छामित्वयादत्तंत्रिलोचन १६ शंकरस्तथेत्युक्त्वारु
द्राणीमिदमब्रवीत् कनीयान्कार्तिकेयस्यपुत्रोयंप्रतिगृह्यताम् १७ यत्रोत्थितोमहासेनःसोग्निजोरुधिरेपुरे तत्रोद्देशेपुरंचास्यभवि
ष्यतिनसंशयः १८ नाम्नातच्छोणितपुरंभविष्यतिपुरोत्तमम् मयाभिगुप्तंश्रीमत्तन्नकश्चित्प्रसहिष्यति १९ ततःसनिवसन्बाणःपुरेशो
णितसाह्वये राज्यंप्रशासतेनित्यंक्षोभयन्सर्वदेवताः २० अवतीर्यमदोत्सिक्तोबाणोबाहुसहस्रवान् अचिंतयन्देवगणान्युद्धमाकां
क्षतेसदा २१ ध्वजंचास्यददौप्रीतःकुमारोह्यमिततेजसम् वाहनंचैवबाणस्यमयूरंदीप्ततेजसम् २२ नदेवानचगंधर्वानयक्षानापिपन्न
गाः तस्ययुद्धेव्यतिष्ठंतदेवदेवस्यतेजसा २३ त्र्यंबकेनाभिगुप्तश्चदर्पोत्सिक्तोमहासुरः भूयोमृगयतेयुद्धंशूलिनंसोभ्यगच्छत २४ स
रुद्रमभिगम्याथप्रणिपत्याभिवाद्यच बलिसूनुरिदंवाक्यंपप्रच्छवृषभध्वजम् २५ असकृन्निर्जितादेवाःससाध्याःसमरुद्गणाः मया
मदबलोत्सेकात्ससैन्येनतवाश्रयात् २६ इमंदेशंसमागम्यवसंतिस्मपुरेसुखम् तेपराजयसंत्रस्तानिराशामत्पराजये २७ नाकपृष्ठ
मुपागम्यनिवसंतियथासुखम् सोहंनिराशोयुद्धस्यजीवितंनाद्यकामये २८ अयुध्यतोवृथाह्येषांबाहूनांधारणंमम तद्ब्रूहिममयु
द्धस्यकच्चिदागमनंभवेत् २९ नमेयुद्धंविनादेवरतिरस्तिप्रसीदमे ततःप्रहस्यभगवानब्रवीद्वृषभध्वजः ३०

तेअहमेवमहान्तपस्वीतिगम्यते

१४ १५ १६ १७ महासेनःकार्तिकेयः १८ श्रीमंतंबाणं १९ प्रशासतेप्रशास्ति २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ७१ ७१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

३१ ३२ ३३ ३४ ३५ ३६ कुंभांडस्त्वस्य अमात्यं ३७ ३८ ३९ स्कंदगोपायनेनस्कंदकृतेनत्राणेन ४० ४१ ४२ ४३ ४४ ४५

भविताबाणयुद्धंवैयथात्वच्छृणुदानव ध्वजस्यास्ययदाभंगस्तवतातभविष्यति स्वस्थानेस्थापितस्याथतदायुद्धंभविष्यति ३१ इ-
त्येवमुक्तःप्रहसन्बाणस्तुबहुशोमुदा प्रसन्नवदनोभूत्वापादयोःपतितोऽब्रवीत् दिष्ट्याबाहुसहस्रस्यनवृथाधारणंमम ३२ दिष्ट्या
सहस्राक्षमहंविजेतापुनराहवे आनंदेनाश्रुपूर्णाभ्यांनेत्राभ्यामरिसूदनः प्रांजलिशतैर्देवंपूजयन्पतितोभुवि ३३ ईश्वरउवा
च उत्तिष्ठोत्तिष्ठबाहूनामात्मनःस्वकुलस्यतु सदृशंप्राप्स्यसेवीरयुद्धमप्रतिमंमहत् ३४ वैशंपायनउवाच एवमुक्तस्ततोबा
णस्त्र्यंबकेणमहात्मना हर्षेणात्युच्छ्रितंशीघ्रंनत्वासवृषभध्वजम् ३५ शितिकंठविसृष्टस्तुबाणःपरपुरंजयः ययौस्वभवनंतत्रयत्रध्व
जगृहंमहत् ३६ तत्रोपविष्टःप्रहसन्कुंभांडमिदमब्रवीत् प्रियमावेदयिष्यामिभवतायन्मनोगतम् ३७ इत्येवमुक्तःप्रहसन्बाणम
प्रतिमंरणे प्रोवाचराजन्किंत्वेतद्वक्तुकामोस्मिमत्प्रियम् ३८ विस्मयोत्फुल्लनयनःप्रहर्षाद्विप्रभाषसे वयःश्रोतुमिहेच्छामिवरंकिं
लब्धवानसि ३९ शितिकंठप्रसादेनस्कंदगोपायनेनच कच्चित्त्रैलोक्यराज्यंतेव्यादिष्टंशूलपाणिना ४० अस्यत्वत्कभयत्रस्तानिवसं
तिजलाशये कच्चिच्छार्ङ्गगदापाणेःस्थितस्यपरमाहवे ४१ कच्चिदिंद्रस्तवभयात्पातालमुपयास्यति कच्चिद्विष्णुपरित्रासंविमोक्ष्यं
तिदितेःसुताः ४२ पातालवासमुत्सृज्यकच्चित्त्वद्बलाश्रयात् विबुधावासनिरताभविष्यंतिमहासुराः ४३ बलिर्विष्णुपराक्रांतोब
द्धस्त्वपितानृप सलिलौघाद्विनिष्क्रम्यकच्चिद्राज्यमवाप्स्यति ४४ दिव्यमाल्यांबरधरंदिव्यस्रग्गंधलेपनम् कच्चिद्वैरोचनिंतातद्र
क्ष्यामःपितरंतव ४५ कच्चित्त्रिभिःक्रमैःपूर्वंहृतांल्लोकानिमान्प्रभो पुनःप्रत्यानयिष्यामोजित्वासर्वान्दिवौकसः ४६ स्निग्धगंभीर
निर्घोषंशंखस्वनपुरोजवम् कच्चिन्नारायणंदेवंजेष्यामःसमितिंजयम् ४७ कच्चिद्वृषध्वजस्तातप्रसादसुमुखस्तव यथातेहृदयोत्कंपः
सान्वबिंदुःप्रवर्तते ४८ कच्चिदीश्वरतोषेणकार्तिकेयमतेनच प्राप्तवानसिसर्वेषामस्माकंराज्यसंपदम् ४९ इतिकुंभांडवचनेश्चोदितः
सोसुरोत्तमः बाणोवाणीमसंसक्तांप्रोवाचवदतांवरः ५० बाणउवाच चिरात्प्रभृतिकुंभांडनयुद्धंप्राप्यतेमया ततोमयामुदापृष्टः
शितिकंठःप्रतापवान् ५१ युद्धाभिलाषःसुमहान्देवसंजायतेमम अपिप्राप्स्याम्यहंयुद्धंमनसस्तुष्टिवर्धनम् ५२ ततोहंदेवदेवेनह-
रेणामित्रघातिना प्रहस्यसुचिरंकालमुक्तोस्मिवचनंप्रियम् ५३ प्राप्स्यसेसुमहद्युद्धंत्वंबाणाप्रतिमंमहत् मयूरध्वजभंगस्तेभविष्य
तियदासुर ५४ १४८

४६ ४७ ४८ ४९ असंसक्तांअस्खलितां ५० ५१ ५२ ५३ ५४ ६१ ६२ ६३ ६३

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५५ ५६ ५७ ५८ ५९ वृषदंशोबिडालः अगर्जेत्यमंगलशब्दकरणंलक्ष्यते ६० ६१ स्वपक्षेचेति देवनक्षत्रेषुउदितः कृत्तिकांप्रविष्टइत्यर्थः तेनरोहि-
णीबाणस्यजन्मनक्षत्रंषड्विंशंभरणींचतस्याभिषेचनिकंनक्षत्रंविद्धंतेनदेहस्यपीडा पदातच्युतिश्चेतिदर्शितंचोदितःसूर्योभरणींसमपीडयत् ६२ राहुरिति नदे
वनित्यंससंगतिरपिराहुर्विषमगत्यासूर्यनक्षत्रमाक्रांतवानित्यर्थः आदित्यमग्रसदितितत्रैवचंद्रयोगोपिगम्यतेततश्चजन्मतःसप्तविंशेनक्षत्रेसूर्यग्रहणंचेद्वाणवत्

तदालंभाप्स्यसेयुद्धंसुमहद्धितिनंदन ततोहंपरमप्रीतोभगवंतंवृषध्वजम् ५५ प्रणम्यशिरसादेवंतवांतिकमुपागतः इत्येवमुक्तः
कुंभांडःप्रोवाचनृपतिंतदा ५६ अहोनशोभनराजन्यदेवभाषसेवचः एवंकथयतोस्तत्रतयोरन्योन्यमुन्छ्रितः ५७ ध्वजःपपा
तवेगेनशक्राशनिसमाहतः तंतथापतितंदृष्ट्वासोसुरोध्वजमुत्तमम् ५८ प्रहर्षमतुलंलेभेमेनेचाहवमागतम् ततश्चकंपेवसुधाश
क्राशनिसमाहता ५९ ननादांतर्हितोभूमौवृषदंशोजगर्जच देवानामपियोदेवःसोप्यवर्षतवासवः ६० शोणितंशोणितपुरेसर्वतः
परमंततः सूर्यंभित्वामहोल्काचपपातधरणीतले ६१ स्वपक्षेचोदितःसूर्योभरणींसमपीडयत् चैत्यवृक्षेषुसहसाधाराःशतसह
स्रशः शोणितस्यास्रवन्घोरानिपेतुस्तारकाभृशम् ६२ राहुरग्रसदादित्यमपर्वणिविशांपते लोकक्षयकरेकालेनिर्घातश्चापतन्म
हान् ६३ दक्षिणांदिशमास्थायधूमकेतुःस्थितोभवत् अनिशंचाप्यविच्छिन्नाववुर्वाताःसुदारुणाः ६४ श्वेतलोहितपर्यंतःकृष्ण-
ग्रीवस्तडिद्युतिः त्रिवर्णपरिघोभानुःसंध्यारागमथावृणोत् ६५ वक्रमंगारकश्चक्रेकृत्तिकासुभयंकरः बाणस्यजन्मनक्षत्रंभर्त्सय
न्निवसर्वशः ६६ अनेकशाखश्चैत्यश्चनिपपातमहीतले अर्चितःसर्वकन्याभिर्दानवानांमहात्मनाम् ६७ एवंविविधरूपाणिनिमि-
त्तानिनिशामयन् बाणोबलमदोन्मत्तोनिश्चयंनाधिगच्छति ६८ विचेतास्त्वभवत्प्राज्ञःकुंभांडस्तत्वदर्शिवान् बाणस्यसचिवस्तत्र-
कीर्तयन्बहुकिल्बिषम् ६९ उत्पातास्त्वत्रदृश्यंतेकथयतोनशोभनम् तवराज्यविनाशायभविष्यतिनसंशयः ७० वयंचान्येचसचिवा
भृत्यायेचतवानुगाः क्षयंयास्यंतिनचिरात्सर्वेपार्थिवदुर्नयात् ७१ यथाशक्रध्वजतरोःस्वदर्पात्पतनंभवेत् बलस्याकांक्षतोमोहात्तत
थाबाणस्यनर्दतः ७२ देवदेवप्रसादात्तुत्रैलोक्यविजयंगतं उत्सेकात्दृश्यतेनाशोयुद्धाकांक्षीननर्दह ७३ बाणःप्रीतमनास्त्वेवंपपौ-
पानमनुत्तमम् दैत्यदानवनारीभिःसार्द्धमुत्तमविक्रमः ७४

फलंद्रष्टव्यं ६३ ६४ परिघःपरिवेषः ६५ वक्रमितितत्रैवदुर्योगांतरमाहजन्मनक्षत्रं
रोहिणी ६६ चैत्यश्चलरवान्नगरसूचकोवृक्षः ६७ निश्चयंममपराभवोभविष्यतीत्येवंरूपं ६८ ६९ नशोभनंअशोभनं ७० ७१ शक्रध्वजतरोःयत्रशक्र-
ध्वजअसज्यतेसतरुःपूर्वोक्तःचैत्यवृक्षःतस्यतथापतनंजातंतथातवपतनंभविष्यतीत्यर्थः ७२ देवेतिईश्वरानुगृहीतोपिदर्पान्नश्यतीतिभावः ७३ ७४ ६१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७५ ७६ ७७ ७८ उत्पन्नोदोषोदर्शाख्यस्ततःप्रभवोयस्यसतथा ७९ ८० ८१ ८२ ८३ ८४ ८५ ८६ स्वस्तिप्रणिहितांकल्याणाभिनिवेशा-
नीं ८७ ८८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांशतोपरिषोडशोऽध्यायः ११६ क्रीडेति १ २ ३ ४ ५ प्रसादयामासेत्युक्तेरिदंसू-
च्यतेमद्भार्यारूपग्रहणेनमामपिसर्वांतर्यामिणमियंमोहयितुंप्रवृत्तेतिमहादेवस्यतस्याउपरिकियानपिकोपोजातआसीदितितएवापराधात् चित्रलेखयास्यांशो

कुंभांडश्चिंतयाविष्टोराजवेश्माश्रयात्तदा अचिंतयच्चतत्रार्थंतैस्तैरुत्पातदर्शनैः ७५ राजाप्रमादीदुर्बुद्धिर्जितकाशीमहास्करः युद्धमेवा-
भिलषतेनदोषान्मन्यतेमदात् ७६ महोत्पातभयंचैवनतन्मिथ्याभविष्यति अपीदानींभवेन्मिथ्यासर्वमुत्पातदर्शनम् ७७ इहत्वास्ते
त्रिनयनःकार्तिकेयश्चवीर्यवान् तेनोत्पन्नोपिदोषोनःकच्चिद्गच्छेत्पराभवम् ७८ उत्पन्नदोषप्रभवःक्षयायप्रभवितामहान् दोषाणांनप्रभ-
न्नाशइतिमेधीयतेमतिः ७९ नियतंदोषएवायंभविष्यतिनसंशयः दौरात्म्यान्नृपतेरस्यदोषभूताहिदानवाः ८० देवदानवसंघानांयः
कर्ताभुवनप्रभुः भगवन्कार्तिकेयश्चकृतवान्लोहितेपुरे ८१ प्राणैःप्रियतरोनित्यंभविष्यतिगुहःसदा तद्धिशिष्टश्चबाणोपिशिवस्य
सन्ततंप्रियः ८२ दर्पोत्सेकात्तुनाशायवरंयाचितवान्भवम् युद्धहेतोःसलुब्धस्तुसर्वथानभविष्यति ८३ यदिविष्णुपुरोगानामिंद्रादीनां
दिवौकसाम् भविन्नोह्यप्रभवत्यापिभवहस्तोकृतभवेत् ८४ एतयोश्चहिकयुद्धकुमारभवयोरिह शक्तोदातुंसमागस्यबाणसाहाय्य-
काङ्क्षिणोः ८५ नचदेववचोमिथ्याभविष्यतिकदाचन भविष्यतिमहद्युद्धंसर्वदैत्यविनाशनम् ८६ सएवंचिंतयाविष्टःकुंभांडस्तत्वद-
र्शिवान् स्वस्तिप्रणिहितांबुद्धिंचकारसमहास्करः ८७ येहिदेवैर्विरुध्यंतेपुण्यकर्मभिराहवे यथाबलिर्नियमितस्तथातेयांतिसंक्षयम्
८८ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिबाणयुद्धेशतोपरिषोडशोऽध्यायः ११६ वैशंपायनउवाच क्रीडाविहा-
रोपगतःकदाचिदभवद्भवः देव्यासहनदीतीरेरम्येश्रीमतिसप्रभुः १ शतानितत्राप्सरसांचिक्रीडुश्चसमंततः सर्वर्तुकवनेरम्येगंधर्वपत-
यस्तथा २ कुसुमैःपारिजातस्यपुष्पैःसंतानकस्यच गंधोद्दामिवाकाशंनदीतीरंतुसर्वशः ३ वेणुवीणामृदंगैश्चपणवैश्चसहस्रशः
वाद्यमानैःसस्तुश्चावगीतमप्सरसांतदा ४ सूतमागधकल्पैश्चस्तुवन्त्यप्सरसांगणाः देवदेवंकवपुषंस्रग्विणंरक्तवाससम् ५ श्रीमहेश-
देवदेवमर्चयंतिमनोरमम् ततस्तुदेव्यारूपेणचित्रलेखावराप्सराः ६ भवप्रसादयामासदेवीञ्चप्राहसत्तदा प्रसादयंतीमीशानंप्रहसं-
त्यप्सरोगणाः ७ भवस्यपार्षदादिव्यानानारूपामहौजसः देव्याह्यनुज्ञयासर्वेक्रीडंतेतत्रतत्रह ८

नकुंभांडस्यबाणामात्यस्यकन्याजातेतिअ-
ग्रिमग्रंथाद्गम्यते ६ प्रसादयंतीतांअप्सरोगणाःप्रहसंतिईशोपिकापट्यमियंकरोतीत्याशयेन ७ क्रीडंतेमहादेवस्यरूपेणेतिद्वयोःसंबंधः ८ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तच्चिन्हं वृषभध्वजादिचिन्हरूपं देव्यारूपेणयुक्ताः अप्सरसोपिक्रीडंतइत्यनुषज्जते ९ ततश्चदेवीप्रहासंसुमुचेतत्रहेतुः चित्रलेखायामानभंगार्थंसर्वाअप्सर
सोदेवीरूपंजगृहुः तस्याश्चक्षांतिमुत्पादयितुंसर्वेपार्षदाः महादेवरूपंजगृहुरितिप्रघट्टकार्थः १० ११ संक्रीडितंक्रीडितम् १२ नानारूपंवपुः कृत्वासंक्रीडितमिति
पूर्वेणसंबंधः १३ भाषितंसखीजनेइतिशेषः १४ १५ १६ १७ १८ १९ २० हास्यंतीपरिहास्यमाना २१ २२ २३ २४ यत्तवमनोरथंमनोरथ

अथतेपार्षदास्तत्ररहस्येरूविपश्चितः महादेवस्यरूपेणतच्चिन्हंरूपमास्थिताः ९ ततोदेव्यासुरूपेणलीलयावदनेनच देवीप्रहासं-
सुमुचेताश्चैवाप्सरसस्तदा ततःकिलकिलाशब्दःप्रादुर्भूतःसमंततः १० प्रहर्षमतुलंलेभेभवः प्रीतमनास्तदा बाणस्यदुहिताकन्या
तत्रोषानामभामिनी ११ दृष्ट्वासंक्रीडितंदेव्यासहनंदीगतम् दीप्यमानंमहादेवद्वादशादित्यतेजसम् १२ नानारूपंवपुःकृत्वादे
व्याप्रियचिकीर्षया उषामनोरथंचक्रेपार्वत्याःसन्निधौतथा १३ धन्याहिभर्तृसहितारमत्येवंसमागता मनसालक्ष्यसंकल्पमुषयाभा
षितंतथा १४ विज्ञायतमभिप्रायमुषायाःपर्वतात्मजा माहदेवीततोवाक्यमुषांहर्षयतीशनैः १५ उषेत्वंशीघ्रमप्येवं भर्त्रासहरमिष्य
सि यथादेवोमयासार्द्धंशंकरःशत्रुनाशनः १६ एवमुक्तेतदादेव्यावाक्येचिंताविलक्षणा उषाभावंतदाचक्रेभर्तारस्यकदासह १७ त
दाहभवतीवाक्यंसमूहस्येदमब्रवीत् उषेशृणुष्ववाक्यंमेयदासंयोगमेष्यसि १८ वैशाखेमासिहस्यस्याद्वादश्यांत्वांदिनक्षये स्वप्ने
ध्यतियःस्त्वंमंसतेभर्ताभविष्यति १९ एवमुक्तादेव्यस्कृताकन्यागणसमावृता अपाक्रामतहर्षेणरममाणायथासुखम् २० ततःस-
खीभिहास्यतीहर्षेणोत्फुल्ललोचना तालिकासन्निपातेश्चह्यन्योन्यमभ्यवर्तत २१ किंनरीयक्षकन्याश्चनानादैत्यकन्यकाः अप्सरो
गणकन्याश्चउषायाःसखितांगताः २२ उक्ताचतत्रताभिश्चभर्तातववरानने भविष्यत्यचिरेणैवदेव्यावचनकल्पितः २३ नहिदे-
व्यावचोमिथ्याभविष्यतिकदाचन रूपाभिजनसंपन्नःपतिस्तेकल्पितस्तया २४ उषासखीनातद्वाक्यंप्रतिपूज्ययथाविधि य
त्तन्मनोरथंदेव्याभावयतीव्यवस्थिता २५ ततःक्रीडाविहारंतमनुभूयसहोमया गतेहनिततःसर्वानार्यस्ताःपरमाद्भुताः २६ य
युःस्वानालयान्सर्वादेवीचादर्शनंगता काश्चिदश्वैस्तथायानैर्गजैरन्यास्तथारथैः २७ पुरंप्रविविशुर्हृष्टाः काश्चिदाकाशमास्थि-
ताः ततःप्रभृतिसादेवीकामसमोहंगताविभो २८ देव्यास्तुवचनंस्मृत्वासस्मरतीपतिंतदा निद्रांनभजतेरात्रौनदिवाभोजनंत
था २९ स्मरतीपतिभावंसाविललापनृपात्मजा निंदतीशशिननाकेसेवतीनचचंदनम् ३०

गोचरंप्रार्थितंयत्त्वंतत्देव्यातवदत्तमितिसखीनांवाक्यंप्रतिपूज्यउषाप्रतीक्षतेइतिशेषः २५ २६ २७ २८ २९ ३० ध्र ध्र ध्र ध्र

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मा॰ इन्दौ॰ ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ अ॰ प॰
१५० ११७ २

साबालामोहिताराजनुकामेनपरिपीडिता उपचर्यंतितांसख्यो विज्वरामपिसंज्वराम् ३१ तप्यतेहृदयंतस्यालेपितंचंदनेनच कर्पू
लेपाडिमाचिन्हंनेत्रेजलसमन्विते ३२ जृंभणंचतथास्यापोदेहेतस्याव्यवर्धत पद्मिनीकंदचूर्णानिशीतलानिमुहुर्मुहुः ३३ क्षिपंति
सख्योहृदयेपीडितेमन्मथाग्निना व्यजनानिप्रकुर्वंतिपृच्छंतिचपुनःपुनः ३४ कास्यथाकिंशरीरंतेकिमिदंतवभामिनि किंतुस्वरोन्न
तेदेवितदाख्याहिवरानने ३५ कस्मादिदंसमुत्पन्नंदुःखसाध्यमनोरमे त्वन्मनोनुगतंवाक्यंवदंत्योतास्तुसारिकाः ३६ शुकानीलतमाः
स्वभुपदंतिहिपुमानिव प्रल्हादजननंवाक्यंकिमर्थंनाद्यभाषसे ३७ तवतातोमहावीरोदेवानामपिदुर्जयः तस्याग्रेतिष्ठतेकोपिनभूसो
वरवर्णिनि ३८ बलेःपुत्रोमहावीरोबाणोहिदुरतिक्रमः जित्वामरावतींचनगरंशोणिताह्वयम् ३९ यत्रसंतिष्ठते देवःशूलहस्तो-
महेश्वरः पुत्रोयमितिजानीहिगिरिजांयोब्रवीद्धरः ४० बाणंप्रतिमहादेवस्तवतातसुखेशृणु कास्यथेतिसुखेचेदंनासाग्रेचविराजते ४१
नीहारबिंदवःपद्मेराजंतेशरदागमे संपूर्णचंद्रप्रतिमंमुखचंद्रोयथाघने ४२ नशोभतेतुविच्छायंकिमर्थंकारणंवद श्वासान्मुंचसिबा
लेखनरतियातिभावतः ४३ गृहाणभोजनंदिव्यंयत्तेमनसिवर्तते तांबूलंरोचतेपूर्वंतत्किमर्थंनगृह्यते ४४ मिष्टान्नियानिवस्तूनिदु
र्लभानीतरैर्जनैः गृहाणदेविउत्तिष्ठवदपीडांशरीरजाम् ४५ इतिकोलाहलंश्रुत्वाउषावेश्मसमुद्भवम् दासीभिःकीर्तितंतत्रमातुरग्रे
पृथक्पृथक् ४६ राजपुत्रीयदादेवीसमायातागृहेसती जलक्रीडाविहाराच्चमूकेवपरिलक्ष्यते ४७ अतोदासीजनादेविवदामस्त्वा-
वयंजनाः कोमोहःकिमिदंमौनंकःस्वापोम्लानताकथम् ४८ विचार्यभिषजोदेविदिशंतांकष्टशांतये शिरीषपुष्पसदृशंयच्छरीर
स्तुकोमलम् ४९ तत्कथंसहतेदेविव्याधिभारंवरानने इतिश्रुत्वातदादेवीसत्वराहंसगामिनी ५० प्राप्यदेशंसुषायत्रकिमिदंकष्टल
क्षणम् पल्लवाकृतिहस्तेनकोमलेनकरतदा ५१ स्पृष्ट्वांगुलीरनायासंस्फोटयामासभाविनी किमस्तितवकल्याणिकास्यथातववर्त
ते एतेवैद्याःसमागत्यपृच्छंतिभवतींहितम् ५२ वैद्याऊचुः जलक्रीडागतातत्रराजपुत्रीसखीगणैः पार्वत्याःक्रीडितंतत्रजानी
मःश्रमसंभवम् ५३ श्रमात्ग्लानिःसमुत्पन्नाजृंभणंचपुनःपुनः स्वापश्चजायतेतेनमाभयंकर्तुमर्हसि ५४ देव्युवाच हृदये-
निहितंवैद्याश्चंदनंहिमसंयुतम् अमात्याःकिमिदंशीघ्रंकिमिदंबुद्बुदायते ५५ अतिदाहोमहान्स्वेदःपिपासानबुभुक्षते प्रलापएव
किंतस्याःशास्त्रतोब्रूतनिश्चितम् ५६ १५०

४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ६२ ६२ ६२ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ इतिश्रीम० खि० ह० बि० टीकायांशतोपरिसप्तदशोऽध्यायः ११७ छ. १ २ ३ ४ ५

वैद्याऊचुः क्रीडाविहारेमिलिताःस्त्रीजनादेवसन्निधौ रूपेणाप्रतिमादेवीराजपुत्रीचभाविनी ५७ दृष्टिपातःकृतस्ताभिस्तेनपु
त्र्याव्यथाभवत् रक्षामंत्रैस्तथापीतैःसर्षपैस्ताकुमारिकाम् ५८ पानीयैरभिषेकेणपराशांविर्भविष्यति इत्युक्त्वाभिषजःसर्वेनिवृ
त्तान्नृपवेश्मतः ५९ सूच्यतःपुनःसर्वकामाभिप्रायजाव्यथास्मे मावृष्टश्चावरारोहाचिरकालसुवाचसा ६० लज्जावतीमहाभागासा
तररुदतीभृशम् मातन्नरोचतेनित्यंभाषणंनचभोजनम् ६१ नचाप्युत्सवकमातःसदाहहृदयंशृणु इत्युक्त्वाविररामाथह्युषानारी
वरानना ६२ सर्वाभिःस्त्रीभिरारब्धमन्योन्यंसुखवीक्षणम् लतानुकारिनारीणायौवनंहिभवेदिति ६३ इयंचराजकन्याहिभर्तृयो
ग्याकिमुच्यते पितुःप्रसादान्मातुश्चप्राप्नुयात्सदृशंवरम् ६४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिबाणयुद्धेउषाविर-
होनामशतोपरिसप्तदशोऽध्यायः ११७ वैशंपायनउवाच तत्रस्याःपरमानार्यश्चित्रेणपरमाद्भुताः ततोहर्म्येशयानांतुवेशा-
खमासिभाविनीम् १ द्वादश्यांशुक्लपक्षस्यसखीगणवृतांतदा यथोक्तःपुरुषःस्वप्नेरमयामासतांशुभाम् २ विचेष्टमानारुदतीदेव्या
वचनचोदिता सास्वप्नेरमितातेनस्त्रीभावंचापिलंभिता ३ शोणिताक्तामरुदतीसहसैवोत्थितानिशि तांतथारुदतीदृष्ट्वासखीप्र
यससमन्विताम् ४ चित्रलेखावचःस्निग्धमुवाचपरमाद्भुतम् उषेमाभैःकिमेवंत्वंरुदतीपरितप्यसे ५ बलेःसुतसुताचत्वंप्रख्याताकिं
भयान्विता नभयंविद्यतेलोकेतवसुभ्रुविशेषतः ६ अभयंतववामोरुपितादवांतकारणे उत्तिष्ठोत्तिष्ठभद्रंतेविषादंसाकृथाःशुभे ७
नैवंविधेषुवासेषुभयमस्तिवरानने असकृद्देवसहितःशचीभर्तापुरेश्वरः ८ अप्राप्तएवनगरंपित्रातेमृदितोरणे अयंदेवसमूहस्य
भयदस्त्वपितातव ९ महासुरवरःश्रीमान्बलेःपुत्रोमहाबलः एवंसाभिहितासख्याबाणपुत्रीयशस्विनी १० स्वप्नरूपंयथादृष्टंन्यवे-
दयदनिंदिता ११ उषोवाच एवंसदूषितासाध्वीकथंजीवितुमुत्सहे पितरंकिंनुवक्ष्यामिदेवशत्रुंसरिंदमम् १२ एवंसंदूषया
करीवंशस्यास्यमहौजसः श्रेयोहिमरणंमह्यंनमेश्रेयोद्यजीवितम् १३ ईप्सितोवायथाकोपिपुरुषोविगतोहिमे जायतीवयथाचाह
मवस्थयंकृतासम १४ कथमेवंकृतानामकन्याजीवितुमुत्सहे कुलोपक्रोशनकरीकुलांगारानिराश्रया जीवितुंनस्पृहेन्नारीसाध्वी-
नामग्रतःस्थिता १५ इत्येवंबाष्पपूर्णाक्षीसखीजनवृतातदा विललापचिरंकालमुषाकमललोचना १६ अनाथवत्तांरुदतींसख्यःस
र्वाविचेतसः ऊचुरश्रुपरीताक्षीमुषांसर्वाःसमागताः १७

६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ छ.

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

दुष्टेनकामवताममनसायत्तुविक्रियतेतद्देव अशुभंवापापंपुण्यंवानत्वनिच्छाप्राप्तमित्यर्थः १८ १९ २० २१ प्रजविर्तकामवेगवशीकृतं २२ कथंत्वंदोषसं-
दुष्टनकथमपीत्यर्थः २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५

दुष्टेनमनसादेवीस्वप्नेवायुद्विशाक्षमम् क्रियतेनचतेस्वप्ने किंचितुदुष्टमनःशुभे १८ प्रसभंदैवसंयोगात्यदिक्रान्तासिभामिनि
स्वप्नयोगेनकल्याणिव्रतलोपोनविद्यते १९ व्यभिचारेणतेदेविनास्तिकश्चिद्व्यतिक्रमः नचस्वप्नकृतोदोषोमर्त्यलोकेस्तिसुंदरि
२० एवंविप्रषयोदेविधर्मज्ञाःकथयंतिवै मनसाचैववाचाचकर्मणाचविशेषतः २१ दुष्टायात्रिभिरेतैस्तुपापासाप्रोच्यतेबुधैः न
चतेहश्यतेभीरुमनःप्रचलितंसदा २२ कथंत्वंदोषसंदुष्टानियताब्रह्मचारिणी यदिकश्चित्सतीसाध्वीशुद्धभावामनस्विनी २३ इमा
मवस्थांप्राप्तात्वंनैवधर्मोविलुप्यते यस्यादुष्टमनःपूर्वंकर्मणात्वोपपादितम् २४ तामाहुरसतीनामसतीत्वमसिभाविनि कुलजारूप
संपन्नानियताब्रह्मचारिणी २५ इमामवस्थांनीतासिकालोहिदुरतिक्रमः इत्येवमुक्तारुदतीबाष्पेणावृतलोचनाम् २६ कुंभांडदुहि
तावाक्यंपरमंत्विदमब्रवीत् त्यजशोकंविशालाक्षि अपापात्ववरानने २७ श्रुतंमयाद्विदेवाक्ययायातस्थेनतच्छृणु उषेयदुक्तादेव्या
सिभर्तारंध्यायतीतदा २८ समीपेदेवदेवस्यस्मरभामिनितद्वचः द्वादश्यांशुक्लपक्षस्यवैशाखेमासियोनिशि २९ हर्म्येशयानांरुदती-
स्त्रीत्वंसमुपनेष्यति भवितासहितेभर्ताशूरःशत्रुनिबर्हणः ३० इत्युवाचवचोहृष्टादेवीतवमनोगतम् नहितद्वचनंमिथ्यापार्वत्यायदु
दाहृतम् ३१ सात्वंकिमिदमत्यर्थरोदिषीदुनिभानने एवमुक्ततयाबालास्मृत्वादेव्यावचस्ततः ३२ अभवन्नष्टशोकासाबाणपुत्री-
शुभेक्षणा उषोवाच स्मरामिभामिनिवचोदेव्याःक्रीडागतेभवे ३३ यथोक्तंसर्वमखिलंप्राप्तहर्म्यतलेमया भर्तातुसमयद्येष-
लोकनाथस्यभार्यया ३४ व्यादिष्टःसकथंज्ञेयस्तत्रकार्यंविधीयताम् इत्येवमुक्तेवचनेकुंभांडदुहितापुनः ३५ व्याजहारयथान्याय
मर्थतत्वविशारदा नहितस्यकुलंदेविनकीर्तिर्नापिपौरुषम् ३६ कश्चिज्जानातितत्वेनकिमिदंत्वंविमुह्यसे अदृष्टश्चाश्रुतश्चैवदृष्टः
स्वप्नेचयःशुभे ३७ कथंज्ञेयोभवेद्भीरुसोस्माभिरतितस्करः येनत्वमसितापांगिमत्तकाशिनिविक्रमात् ३८ रुदतीप्रसभंभुक्तामवि
श्यातःपुरसखि नह्यसौप्राकृतःकश्चित्तुयःप्रविष्टःप्रसह्यते ३९ नगरंलोकविख्यातमेकःशत्रुनिबर्हणः आदित्यावसवोरुद्राअश्विनौ
चमहौजसौ नशक्ताःशोणितपुरंप्रवेष्टुंभीमविक्रमाः ४० सोयमेतैःशतगुणैर्विशिष्टश्चारिसूदनः प्रविष्टःशोणितपुरंबाणस्याक्रम्यमू
र्द्धनि यस्यानेवंविधोभर्ताभवेद्युद्धविशारदः ४१

३६ ३७ ३८ ३९ ४० ४१ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४२ ४३ ४४ ४५ शमाइतिकुंभांडदुहितुर्नामरामाचित्रलेखांशलात् चित्रलेखायाः सामर्थ्यंस्वयंजानंतीउषाया अपिनिवेदयति ४६ कुशलेति ४७ ४८
४९ ५० ५१ चित्रंलिखतियोगादर्थसंज्ञांअप्सरसां ५२ ५३ ५४ ५५ ५६ ५७ ५८ पादस्थंचित्रफलकस्थंपट्टस्थमित्य

कस्तस्याजीवितेनार्थोभोगैर्वास्त्वंबुजेक्षणे धन्यास्यनुग्रहीतासियस्यास्तेपतिरीदृशः ४२ प्राप्तोदेव्याःप्रसादेनकंदर्पसमविक्रमः
इदंतुयत्कार्यंतमंशृणुत्वंतन्ममेरितम् ४३ विज्ञेयोयस्यपुत्रोवैयन्नामायत्कुलश्चसः इत्येवमुक्तेवचनेतत्रोषाकाममोहिता ४४उ
वाचकुंभांडसुताकथंज्ञास्यास्यहंसखि त्वमेवचिंतयसखिनोत्तरंप्रतिभातिमे ४५ स्वकार्येमुह्यतेलोकोयथाजीवल्लभास्यहम् उ
षायावचनंश्रुत्वारामावाक्यमिदंपुनः ४६ उवाचरुदतींचोषांकुंभांडदुहितासखी कुशलातेविशालाक्षिसर्वथासाधिविग्रहे ४७
अप्सराश्चित्रलेखावैक्षिप्रंविज्ञाप्यतांसखि अस्याःसर्वमशेषेणत्रैलोक्यंविदितंसदा ४८ एवमुक्तातदैवोषाहर्षेणागतविस्मया
तामप्सरसमानाय्यचित्रलेखांसखींप्रियाम् ४९ कृतांजलिपुटादीनाउषावचनमब्रवीत् सातच्छ्रुत्वातुवचनमुषायाःपरिकीर्तितम्
५० आश्वासयामाससखींबाणपुत्रींयशस्विनीम् ततःसाविस्मयाविष्टावचनंप्राहदुर्वचम् ५१ चित्रलेखामप्सरसंप्रणयात्तांसखी
मिदम् परमंशृणुमेवाक्यंयत्त्वावक्ष्यामिभाविनि भर्तारंयदिमेद्यत्वंनानयिष्यसिमेप्रियम् ५२ कांतंपद्मपलाशाक्षंमत्तमातंगगा
मिनम् त्यक्ष्याम्यहंततःप्राणानचिरात्तनुमध्यमे ५३ चित्रलेखाब्रवीद्वाक्यमुषांहर्षयतीशनैः नैषोर्थःशक्यतेस्माभिर्वेत्तुंभामिनि
कथंते ५४ नकुलेननवर्णेनमनशीलेननरूपतः नदेशतश्चविज्ञातःसहिचारोमयासखि ५५ किंतुकर्तुंयथाशक्यंबुद्धिपूर्वंमयासखि
प्रासंचंशृणुमेवाक्यंयथाकामंसवाप्स्यसि ५६ देवदानवयक्षाणांगंधर्वोरगरक्षसाम् येविशिष्टाःप्रभावेणरूपेणाभिजनेनच ५७य
थाप्रभावंतान्सर्वांनालिखिष्याम्यहंसखि मनुष्यलोकेयेचापिप्रवरालोकविश्रुताः ५८ सप्तरात्रेणतेभीरुदर्शयिष्यामितानहम् त
तोविज्ञायपादस्थंभर्तारंप्रतिपत्स्यसे ५९ साचित्रलेखयाप्रोक्ताउषाहितचिकीर्षया क्रियतामेवमित्याहचित्रलेखांसखींप्रियाम् ६०
ततःकुशलहस्तत्वाद्यथालेख्यंसमंततः इत्युक्त्वासप्तरात्रेणकृत्वालेख्यगतांस्ततान् ६१ चित्रपट्टगतान्मुख्यानानयामासशोभना
ततःप्रस्तीर्यपट्टंसाचित्रलेखास्वयंकृतम् ६२ उषायैदर्शयामाससखीनांतुविशेषतः एतेदेवेषुमुख्यास्तुयादानववंशजाः ६३ किंनरो
रगयक्षाणांराक्षसानांसमंततः गंधर्वाप्सरदैत्यानांयेचान्येभोगिनःस्मृताः ६४ मनुष्याणांचसर्वेषांयेविशिष्टतमानराः तदेतान्पश्यस-
र्वांस्त्वंयथैवलिखितान्मया ६५

पिपा० ५९ ६० ६१ ६२ ६३ ६४ ६५ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ६६ ६७ ६८ ६९ ७० ७१ ७२ सज्जनः उत्तमाभिजनः ७३ योगिनीदंपत्योःसंबंधंकर्तुमर्हायोग्या ७४ ७५ ७६ ७७ ७८ ७९ अयस्मयैः क

यस्तेभर्तायथारूपोमयाभिलिखितःसखि तंत्वंमस्त्वभिजानीहिस्वप्नेयंदृष्टवत्यसि ६६ ततःक्रमेणसर्वांस्तान्दृष्ट्वासामत्तकाशिनी देव
दानवगंधर्वविद्याधरगणानथ अतीत्यत्र्यदूनुसर्वान्ददर्शयदुनंदनम् ६७ तत्रानिरुद्धंदृष्ट्वासाविस्मयोत्फुल्ललोचना उवाचचित्रलेखां
तामयंचोरःसवैसखि ६८ येनाहंदूषितापूर्वंस्वप्नेहर्म्यगतासती सोयविज्ञातरूपोमेकुतोयंरतितस्करः ६९ चित्रलेखेवृदस्वैनंतत्त्वतोम
मशोभने कुलशीलाभिजनतोनामकिंचास्यभामिनि ततःपश्चाद्विधास्यामिकार्यस्यास्यविनिश्चयम् ७० चित्रलेखाउवाच
अयंत्रैलोक्यनाथस्यनप्ताकृष्णस्यधीमतः भर्तातवविशालाक्षिशाक्रम्भिर्भीमविक्रमः नह्यस्तित्रिषुलोकेषुसदृशोस्यपराक्रमे ७१ उत्पा
ट्यपर्वतानेषपर्वतैरेवशातयेत् धन्यास्यनुगृहीतासियस्यास्तेयदुपुंगवः ७२ यक्षपत्न्यासमादिष्टःसदृशःसज्जनःपतिः उषाउवाच
त्वमेवात्रविशालाक्षियोग्याभववरानने ७३ नशक्याहिगतिश्चान्या अगत्यामेगतिर्भव अंतरिक्षचराचत्वंयोगिनीकामरूपिणी ७४
उपायस्यास्यकुशलाक्षिप्रमानयमेप्रियम् उपायश्चिंत्यतांभीरुसंमतर्थप्रियेस्फुरवम् ७५ सिद्धार्थासिनिवर्तस्वयेनोपायेनसुंदरि भ
वेदापत्सुयन्मित्रंतन्मित्रंशस्यतेबुधैः ७६ कामार्ताचास्मिसुश्रोणिभवमेप्राणधारिणी यद्येनमेविशालाक्षिभर्तारंसमरोपमम् ७७ अ
द्यनानयसिक्षिप्रंप्राणांस्त्यक्ष्याम्यहंशुभे उषायावचनंश्रुत्वा चित्रलेखाब्रवीद्वचः ७८ श्रोतुमर्हसिकल्याणिवचनंमेशुचिस्मिते यथावा
पस्यनगरीरक्ष्यतेदिवसवंशः द्वारकापितथाभीरुदुराधर्षासुरैरपि ७९ अयस्मयप्रतिच्छिन्नागुप्तद्वाराचसापुरी गुप्तावृष्णिकुमारै
श्चतथाद्वारकवासिभिः ८० प्रांतेसलिलसंयुक्ताविहिताविश्वकर्मणा रक्ष्यतेपुरुषैर्घोरैःप्रद्युम्नस्यशासनात् ८१ शैलप्राकारपरि
खादुर्गमागप्रवेशिनी सप्तप्राकाररचितापर्वतैर्धातुमंडितैः ८२ नचशक्यमविज्ञातैःप्रवेष्टुंद्वारकापुरीम् आत्मानंसाचरक्षस्वपितस्त्व
विशेषतः ८३ उषाउवाच तवयोगप्रभावेनशक्यतत्रप्रवेशनम् किमेबहुविलापेनश्रूयतांसखिकारणम् ८४ अनिरुद्धस्यव
दनंपूर्णचंद्रसमप्रभम् यद्यहंतंनपश्यामियास्यामियमसादनम् ८५ दूतमासाद्यकार्याणांसिद्धिर्भवतिभामिनि तस्माद्धौत्येनमेगच्छ
जीवंतींमांयदीच्छसि ८६ यदित्वंमेविजानासिसख्यंप्रेम्णाचभाषितम् क्षिप्रमानयमेकांतंतवास्मिशरणागता ८७ जीवितस्यहिसं
देहःक्षयंचैवकुलस्यच कामार्ताहिनपश्यंतिकामिन्योमदविक्लवाः ८८

पाठेः प्रतिच्छन्ना ८० प्रांतेसलिलसंयुक्तासमुद्रपरिखावती ८१ ८२
निर्बंधाकरणेन अन्यथात्रयाणामपिक्लेशःप्रसज्जेतइत्यर्थः ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९० ९१ ९२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८९ ९० ९१ ९२ ९३ ९४ ९५ तारामिवेतिकृत्स्ननगरप्रभायाएकीभावउक्तः ९६ इतिश्रीमहाभारतेखिलेषुहरिवंशे
विष्णुपर्वणिटीकायांशतोपरिअष्टादशोऽध्यायः ११८ अथेतिप्रवृत्तिः बाणपुरेनिरुद्धोनीतइतिवार्तातस्याः हरणंकृष्णेप्रापणंतदर्थंचिंतयंतीबाणगर्वश
मनार्थिनीचित्रलेखापिचिंतयत् १ बुद्धिबुध्यर्थनिश्चयंबुध्यायोबुध्यर्थनिश्चयस्तं २ ३ ४ ५ ६ ७ ८ ९ १० ११

प्रयत्नोयुज्यतेकार्येष्वितिशास्त्रनिदर्शनम् त्वंचशक्ताविशालाक्षिद्वारकायाःप्रवेशने ८९ संस्कृतासिमयाभीरुकुरुमेप्रियदर्शनम्
चित्रलेखाउवाच सर्वथासंस्तुतातेहवाक्यैरमृतसोदरैः ९० कारिताचसमुद्योगंप्रियैःकांतेश्चभाषितैः एषागच्छाम्यहंभीरु-
क्षिप्रंवैद्वारकापुरीम् ९१ भर्तारमानयाम्यद्यतववृष्णिकुलोद्भवम् अनिरुद्धंमहाबाहुंप्रविश्यद्वारकापुरीम् ९२ सावचस्त्वथ्यस-
शिवंदानवानांभयावहम् उक्त्वाचांतर्हिताक्षिप्रंचित्रलेखामनोजवा ९३ सखीभिःसहितात्वूषाचिंतयंतीतुसास्थिता तृतीयेतुमुहू
र्तेसानष्टाबाणपुरात्तदा ९४ सखीप्रियंचिकीर्षंतीपूजयंतीतपोधनान् क्षणेनसमनुप्राप्ताद्वारकांकृष्णपालिताम् ९५ कैलासशिखरा
कारैःप्रासादैरुपशोभिताम् ददर्शद्वारकांरम्यांदिवितारामिवस्थिताम् ९६ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिउषाह
रणेचित्रलेखायाःद्वारकागमनंनामशतोपरिअष्टादशोऽध्यायः ११८ वैशंपायनउवाच अथद्वारवतींप्राप्यस्थितासाभवनांतिके
प्रवृत्तिहरणार्थायचित्रलेखाव्यचिंतयत् १ अथचिंतयतीसातुबुद्धिबुध्यर्थनिश्चयम् अपश्यन्नारदंतत्रध्यायंतमुदकेमुनिम् २ तं
दृष्ट्वाचित्रलेखातुहर्षेणोत्फुल्ललोचना उपसृत्याभिवाद्याथतत्रैवाग्रेसुखीस्थिता ३ नारदस्त्वाशिषंदत्वाचित्रलेखामथाब्रवीत् किम
र्थमिहसंप्राप्ताश्रोतुमिच्छामितत्वतः ४ देवर्षिमथतंदिव्यंनारदंलोकपूजितम् कृत्वांजलिपुटाभूत्वाचित्रलेखाल्पथाब्रवीत् ५ भगवन्
श्रूयतांवाक्यंदौत्येनाहमिहागता अनिरुद्धंमुनेनेतुंयदर्थंचशृणुष्वमे ६ नगरेशोणितपुरेबाणोनामममहासुरः तस्यकन्यावरारोहानाम्ना
षेतिचविश्रुता ७ भगवन्सातुरक्ताचप्राद्युम्निंपुरुषोत्तमम् देव्यावरविसर्गेणतस्याभर्ताविनिर्मितः ८ तंचनेतुंसमायातातत्रसिद्धि
विधत्स्वमे मयानीतेनिरुद्धेतुनगरंशोणिताह्वयम् ९ प्रवृत्तिःपुंडरीकाक्षेत्वयाख्येयामहामुने अवश्यंभविताचैवकृष्णेनसहविग्रहः॥
बाणस्यसुमहान्संख्येदिव्योहिसमहासुरः १० नचशक्तोनिरुद्धस्तंयुद्धेजेतुंमहासुरम् सहस्रबाहुमायांतंजयेकृष्णोमहाभुजः ११ भग
वन्सन्निकर्षंतेयदर्थमिहमागता कथंहिपुंडरीकाक्षोज्ञापितस्तादिदंभवेत् १२

ज्ञापितःकथंभवेत्इदंचकृष्णबाणयोर्युद्धंचकथंभवेदितियोजना १२ ७ ७ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सकृष्णस्तत्वार्थरत्निरितिममभयंनास्तिपरंतु अनिरुद्धः कथंक्रियेत् कथंहरणंप्राप्नुयात्तद्वदेतिभावः १३ १४ अभयंभयनिवर्तकंवचनं १५ १६ १७
प्रवृत्तिः युद्धंकारयितुमितिशेषः १८ कृतकृत्यः विद्याविषयेयत्कृत्यंपुरश्चरणादितत्सर्वंमयाकृतमस्तितेनप्राप्तमात्रैवसिद्धिकरीयंविद्येत्यर्थः १९ २० २१ २२
२३ बर्हिकंठनिभाग्रीवमित्यपरिप्रदेशस्थः कंठभागोजन्हइतिप्रसिद्धोयस्यतंप्रसादैरेकसंचयैः एकएवसंचयोदीर्घकाष्ठपाषाणोवायेषुमध्येस्तंभरहितैरित्य

त्वत्प्रसादाच्च भगवन्ननमेकृष्णाद्भयंभवेत् सहितत्वार्थदृष्टिस्तु अनिरुद्धः कथंक्रियेत् १३ क्रुद्धोहिसमहाबाहुस्त्रैलोक्यमपिनिर्दहेत् पौ
त्रशोकाभिसंतप्तः शापेनसदहेतमाम् १४ तत्रोपायंच भगवन् चिंतितुंवैत्वमर्हसि यथाह्यप्राप्नुयाल्लभेत्कांतंममचैवाभयंभवेत् १५ इत्येव
मुक्तोभगवांश्चित्रलेखांसनारदः उवाचसुश्रोभवाक्यंमाभैस्त्वमभयंशृणु १६ त्वयानीतेनिरुद्धेतुकन्यावेश्मप्रवेशिते यदियुद्धंभवेत्तत्रस्यां
तव्याहंसुचिस्मिते १७ ममैषपरमः कामोयुद्धद्रष्टुंमनोरमे तद्दृष्ट्वाचमहाप्रीतिः प्रवृत्तिश्चहढाभवेत् १८ गृह्यतांतामसीविद्यासर्वलो
कप्रमोहिनी कृतकृत्यस्कृतेदेविएषाविद्याददाम्यहम् १९ एवमुक्तेतुवचनेनारदेनमहर्षिणा तथेतिवचनंप्राहचित्रलेखामनोजवा २०
अभिवाद्यमहात्मानमृषीणांनारदंवरम् साजगामानिरुद्धस्यगृहंचैवांतरिक्षगा २१ ततोद्वारवतीमध्येकामस्यभवनंशुभम् तत्समी
पेनिरुद्धस्यभवनंसाविवेशह २२ सौवर्णवेदिकास्तंभरुक्मवैडूर्यतोरणम् माल्यदामावसक्तंचपूर्णकुंभोपशोभितम् २३ बर्हिकंठ-
निभग्रीवप्रासादैरेकशोभितैः मणिप्रवालविस्तीर्णंदेवगंधर्वनादितम् २४ ददर्शभवनंयत्रप्राद्युम्निरवसत्स्वयम् ततः प्रविश्यसहसा
भवनंतस्यतन्महत् २५ तत्रानिरुद्धंसापश्यच्चित्रलेखावराप्सराः मध्येपरमनारीणांताराप्रतिमिवोदितम् २६ क्रीडाविहारैर्नारीभिः से
व्यमानमितस्ततः पिबंतंमधुमाध्वीकंश्रियापरमयायुतम् २७ वरासनगतंतत्रयथाचैलविलंतथा वाद्यंतेसमतालंचगीयतेमधुरंतथा
२८ नचतस्यमनस्तत्रतमेवार्थमचिंतयत् स्त्रियः सर्वगुणोपेतानृत्यंतेतत्रतत्रवै २९ नचास्यमनसस्तुष्टिंचित्रलेखाप्रपश्यति नचाभि
रमतेभोगैर्नचापिमधुसेवते ३० व्यक्तमस्यहिसत्वमोत्हृदयेपरिवर्तते इतितत्रैवबुद्ध्वाचनिश्चितागतसाध्वसा ३१ साहृष्ट्वापरमस्त्री
णांमध्येशक्रध्वजोपमम् चिंतयाविष्टहृदयाचित्रलेखामनस्विनी ३२ कथंकार्यमिदंकार्यंकथंस्वास्तिभवेदिति सांतर्हितांचिंतयि-
त्वाचित्रलेखायशस्विनी ३३ तामस्याच्छादयामासविद्ययासुभलोचना ततोंतरिक्षादेवासुप्रासादोपरिधिष्ठिता ३४

र्थः मणिभिः प्रवालैश्चविस्तीर्णंविशेषणास्तरणरूपेणारचितम् २४ २५ २६ २७ ऐलविलंकुबेरं २८ नमनस्तत्ररेमेइतिशेषः यतोसौतमेवउषासंभोग
मेवाचिंतयत् एतेनयथाउषास्वप्नेऽनिरुद्धमपश्यदेवमितरोपितामपश्यदितिज्ञेयं २९ ३० निश्चितानिश्चयवतीगतसाध्वसानिर्भया ३१ ३२ ३३ छादयामास अनिरुद्धस्य
तिरस्कान् ३४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३५ ३६ ३७ ३८ बिभर्तियाइत्यनुषज्यते ३९ ४० ४१ वरोत्सर्गेवरप्रदानकालेदत्तोवरत्वेनेतिशेषः ४२ त्वच्चिन्हंत्वत्प्रतिमांकिते ४३ ४४

प्राद्युम्निंवचनंप्राहश्लक्ष्णंमधुरयागिरा चक्रुर्दत्वातुसातस्मैकृत्वाचात्मनिदर्शनम् ३५ विविक्तेसाचवैदेशेतंवाक्यमिदमब्रवीत्
अपितेकुशलंवीरसर्वत्रयदुनंदन ३६ अहस्तावत्प्रदोषोवाकश्चिद्गच्छतितेसुखम् शृणुषत्वंमहाबाहोविज्ञप्तिंमेरतीसुत ३७ उषाया
ममसख्यास्तुवाक्यंवक्ष्यामितत्वतः स्वप्नेतुयात्वयादृष्टास्त्रीभावचापिभाविता ३८ बिभर्तिहृदयेयात्वांउषयाप्रेषिताह्यहम् रुदतीजृं
भतीचैवनिःश्वसतीमुहुर्मुहुः ३९ त्वद्दर्शनपरासौम्यकामिनीपरितप्यते यदित्वयासुसंवीरधारयिष्यतिजीवितम् ४० अदर्शनेनम
रणंतस्यानास्त्यत्रसंशयः यदिनारीसहस्रंतेहृदिस्थंयदुनंदन ४१ स्त्रियाःकामयमानायाःकर्तव्याहस्तधारणा त्वंचतस्यावरोत्सर्गेद
त्तोदेव्यामनोरथः ४२ चित्रपट्टेमयादत्तत्वच्चिन्हंहृदयजीवति सानुक्रोशोयदुश्रेष्ठभवतस्यामनोरथे ४३ उषातेपततेमूर्ध्नावयंचयदुनंद
न श्रूयतांचोद्भवस्तस्याःकुलशीलंचयादृशम् ४४ संस्थानंप्रकृतिंचास्याःपितरंचब्रवीमिते वैरोचनिसुतोवीरोबाणोनाममहासुरः ४५
सराजाशोणितपुरेतस्यत्वामिच्छतेसुता त्वद्भावगतचित्तासात्वन्मयंचापिजीवितम् ४६ मनोरथकृतोभर्तादेव्यादत्तोनसंशयः त्वत्संग
मात्सासुश्रोणीप्राणान्धारयतेशुभा ४७ चित्रलेखावचःश्रुत्वासोनिरुद्धोब्रवीदिदम् दृष्टास्वप्नेमयासाहितन्मत्तःशृणुशोभने ४८ रू-
पंकांतिमतिंचैवसंयोगरुदितंतथा एवंसर्वमहोरात्रमुह्यामिपरिचिंतयन् ४९ यद्यहंसमनुग्राह्योयदिसख्यंत्वमिच्छसि नयस्वचित्रले
खेमांद्रष्टुमिच्छाम्यहंप्रियाम् ५० कामसंतापसंतप्तःप्रियासंगमकामतः एषोंजलिर्मयाबद्धःसत्यंस्वप्नंकुरुष्वमे ५१ तस्यतद्वचनंश्रुत्वा
चित्रलेखावराप्सराःसफलोद्यमसंक्लेशःसख्यामेयत्मयाचितम् ५२ वैशंपायनउवाच ईप्सितंतस्यविज्ञायअनिरुद्धस्यभामि
नी चित्रलेखाततस्तुष्टातथेतिचतमब्रवीत् ५३ हर्म्यस्त्रीगणमध्यस्थंकृत्वाचांतर्हितंतदा उत्पपातगृहीत्वासाप्राद्युम्निंयुद्धदुर्मदम्
५४ सातमध्वानमागम्यसिद्धचारणसेवितम् सहसाशोणितपुरंप्रविवेशमनोजवा ५५ अदर्शनंतमानीयमाययाकामरूपिणी अ
निरुद्धंमहाभागायत्रोषातत्रगच्छति ५६ उषायादर्शयच्चैनंचित्राभरणभूषितम् चित्रांबरधरंवीररहस्यममररूपिणम् ५७ तत्रोषांवि
स्मितांदृष्ट्वाहर्म्यस्थांसखिसन्निधौ प्रवेशयामासचतंतदासास्वगृहंततः ५८ प्रहर्षोत्फुल्लनयनाप्रियाहस्त्यार्थकोविदा साहर्म्यस्था-
तमर्घेणयादवंसमपूजयत् ५९ चित्रलेखापरिष्वज्यप्रियाख्यानेषयोजयत् त्वरिताकामिनीप्राहचित्रलेखांभयातुरा ६०

४५ ४६
४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ अदर्शनंअन्यैरदर्शनम् ५६ दर्शयत् अदर्शयत् ५७ ५८ ५९ ६० ६१ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

कथंकेनोपायेनगुह्यंगोपनीयंतद्वदेतिभावः गुह्येगुप्ते ६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२

सर्वीदंवैकथंकार्यंगुह्यंकार्यविशारदे गुह्येकृतेभवेत्स्वस्तिप्रकाशेजीवितक्षयः ६१ इत्युक्त्वात्वरमाणासागुह्यदेशेस्वलंकृता कांतेन
सहसंयुक्तास्थितावैभीतभीतवत् ६२ चित्रलेखाब्रवीद्वाक्यंशृणुत्वंनिश्चयंसखि कृतंपुरुषकारेणदैवंनाशयतेसखि ६३ यदिदेव्याः
प्रसादस्तेत्वय्यनुकूलोभविष्यति अद्यमायाकृतंगुह्यंनकश्चित्तुज्ञास्यतेनरः ६४ सख्यावैएवमुक्तासापर्यवस्थितचेतना एवमेतदितिप्राह
सानिरुद्धमिदंवचः ६५ दिष्ट्यास्यमगतश्चौरोहृष्यतेसुभगःपतिः यत्कृतेतुवयंखिन्नादुर्लभप्रियकांक्षया ६६ कच्चित्तवमहाबाहोकुशलं
सर्वतोगतम् हृदयंहिमृदुस्त्रीणांतेनपृच्छाम्यहंतव ६७ तस्यास्तद्वचनंश्रुत्वाउषायाःश्लक्ष्णमर्थवत् सोप्याहयदुशार्दूलःशुभाक्षरतरंव
चः हर्षविपुलनेत्रायाःपाणिनाश्रुप्रमृज्यच ६८ प्रहस्यसस्मितंप्राहहृदयग्राहकंवचः कुशलंमेवरारोहेसर्वत्रमितभाषिणि ६९ त्वत्प्रसादे
नमेदेविप्रियमावेदयामिते अहंदृष्टपूर्वश्चमयादेशोयंशुभदर्शने ७० निशिस्वप्नेयथादृष्टःसक्तःकन्यापुरेतथा एवमेवमहंभीरुत्वत्प्रसा
दादिहागतः ७१ नचतद्रुद्रपत्न्यावैमिथ्यावाक्यंभविष्यति देव्यास्तेप्रीतिमाज्ञायत्वत्प्रियार्थंचभामिनि ७२ अनुप्राप्तोस्मिवामोरुप्रसीद
शरणंगतः इत्युक्त्वात्वरमाणासागुह्यदेशेस्वलंकृता ७३ कांतेनसहसंयुक्तास्थितावैभीतभीतवत् ततश्चोद्वाहधर्मेणगांधर्वेणसमीय
तुः ७४ अन्योन्यंरमतुस्तौतुचक्रवाकौयथादिवा पतिनासानिरुद्धेनमुमुदेतुवरांगना ७५ कांतेनसहसंयुक्तादिव्यवस्त्रानुलेपना रम
माणानिरुद्धेनअविज्ञातास्वतातदा ७६ तस्मिन्नेवक्षणेप्राप्तेयदूनामृषभोहिसः दिव्यमाल्यांबरधरोदिव्यस्रगनुलेपनः ७७ उषया
सहसंयुक्तोविज्ञातोबाणरक्षिभिः ततस्तेचारपुरुषैर्बाणस्यावेदितंद्रुतम् ७८ यथादृष्टमशेषेणकन्यायास्तद्गतिक्रमम् ततःकिंकरसै
न्यंतुव्यादिष्टंभीमकर्मणा ७९ बलेःपुत्रेणवीरेणबाणेनामित्रघातिना गच्छध्वंसहिताःसर्वेहन्यतामेषदुर्मतिः ८० येननःकुलचारि
त्रंदूषितंदूषितात्मना उषायांधर्षितायांहिकुलंनोधर्षितंमहत् ८१ असंप्रदत्तांयोस्माभिःस्वयंग्राहमधर्षयत् अहोवीर्यमहोधैर्यमहो
धार्ष्ट्यंचदुर्मतेः ८२ यःपुरंभवनंचेदंप्रविष्टोनःसबालिशः एवमुक्त्वापुनस्तांस्तुकिंकरांश्चोदयन्भृशम् ८३ ततस्त्वाज्ञामथोगृह्यसुसं
नद्धाविनिर्ययुः यत्रानिरुद्धोह्यभवत्तत्रागच्छन्महाबलाः ८४ नानाशस्त्रोद्यतकरानानारूपाभयंकराः दानवाःसमभिक्रुद्धाःप्राद्यु
म्निवधकांक्षिणः ८५ रुरोदतद्बलंदृष्ट्वाबाष्पेणावृतलोचना प्राद्युम्निवधभीतासाबाणपुत्रीयशस्विनी ८६

७३ ७४ ७५ ७६ ७७ ७८ ७९ ८० ८१ ८२ ८३ ८४ ८५ ८६ ८७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८७ ८८ ८९ ९० ९१ ९२ योद्धुमपोढानांयुद्धंकर्तुंबहिर्निर्गतानांबाणेयानांबाणभटानांषष्ठीहितीयार्थेतान् निशाम्यदृस्वाअस्मरतस्मृतवती ९३

ततस्तूरुदतींदृस्वातांसुतांमृगलोचनाम् हाहाकांतेतिवेपंतीमनिरुद्धोऽभ्यभाषत ८७ अभयंतेस्तुसुश्रोणिमाभैस्त्वंहिमयिस्थिते॥
संप्राप्तोहर्षकालस्तेनेहास्तिभयकारणम् ८८ कस्त्वोऽयंयदिबाणस्यभृत्यवर्गोयशस्विनि आगच्छतिनमेचिंताभीरुपश्याद्यविक्र
मम् ८९ तस्यसैन्यस्यनिनदंश्रुत्वाभ्यागच्छतस्ततः सहसैवोत्थितःश्रीमान्प्राद्युम्निःकिमितिब्रुवन् ९० अथसोपश्यतबलंनानाप्रहर
णोद्यतम् स्थितंसमंततस्तत्रपरिवार्यगृहंमहत् ९१ ततोभ्यगच्छत्त्वरितोयत्रतद्वेष्टितंबलम् क्रुद्धःस्वबलमास्थायअदशद्दशनच्छदम्
९२ ततोयुद्धमपोढानांबाणेयानांनिशम्यतु साचित्रलेखास्मरतनारदंदेवदर्शनम् ९३ ततोनिमेषमात्रेणसंप्राप्तोमुनिपुंगवः स्मृतोथ
चित्रलेखायाःपुरंशोणितसाह्वयम् ९४ अंतरिक्षेस्थितस्तत्रसोनिरुद्धमथाब्रवीत् माभयंस्वस्तितेवीरप्राप्तोऽस्म्यद्यपुरतव ९५ ततश्च
नारदंदृस्वासोऽभिवाद्यमहाबलः प्रहृष्टमानसोभूत्वायुद्धार्थमभिवर्तत ९६ ततस्तेषांस्वनंश्रुत्वासर्वेषामेवगर्जताम् सहसैवोत्थितःशूर
स्तोत्रार्दितइवद्विपः ९७ तमापतंतंसंप्रेक्ष्यसंदष्टोष्ठंमहाभुजम् प्रासादाच्चावरोहंतंभयार्ताविप्रदुद्रुवुः ९८ अंतःपुरद्वारगतंपरिघंगृह्यचा
तुलम् वधायतेषांविक्षेपनानायुद्धविशारदः ९९ तेसर्वेबाणवर्षैश्चगदाभिर्मुसलैस्तथा असिभिःशक्तिभिःशूलैर्निजघ्नूरणगोचरे १००
सहन्यमानोनाराचैःपरिघैश्चसमंततः दानवैःसमितिक्रुद्धैःप्राद्युम्निःशस्त्रकोविदैः १ नाक्षुभ्यत्सर्वभूतात्मानदन्मेघइवोष्णगे आविध्यप
रिघंघोरंतेषांमध्येव्यतिष्ठत २ सूर्योदिविचरन्मध्येमेघानामिवसर्वशः दंडकृष्णाजिनधरोनारदोहृष्टमानसः ३ साधुसाध्वितिवैतत्रसोनि
रुद्धमभाषत तेहन्यमानारौद्रेणपरिघेणामितौजसा ४ प्राद्रवंतभयात्सर्वेमेघावातेरितायथा विद्राव्यदानवान्वीरःपरिघेणाक्रविक्रमः ५
अनिरुद्धोरणेहृष्टःसिंहनादंननादच धमंतितोयदोव्योम्निनदन्निवमहास्वनः निशम्यमितिचुक्रोशदानवान्सुदुर्मदान् ६ प्राद्युम्निर्व्य
हनच्चापिसर्वान्शत्रुनिबर्हणः तेनतेसमरेसर्वेहन्यमानामहात्मना ७ यतोबाणस्ततोभीतायसुर्युद्धपराङ्मुखाः ततोबाणसमीपस्थाःश्व
सतोरुधिरोक्षिताः ८ नशर्मलेभिरेदैत्याभयविक्लवचेतसः माभैष्टमाभैष्टइतिराज्ञातेतेनचोदिताः ९ त्रासमुत्सृज्यचैकस्थायुध्यध्वंदानवर्ष
भाः तानुवाचपुनर्बाणोभयविस्रस्तलोचनान् ११० किमिदंलोकविख्यातयशउत्सृज्यदूरतः भवंतोयातिवैक्लव्यंक्लीबाइवविचेतसः ११
कोऽयंयस्यभयत्रस्ताभवंतोयात्यनेकशः कुलापदेशिनःसर्वेनानायुद्धविशारदाः १२

९४ ९५ ९६ ९७ ९८ ९९ १०० १०१ स
र्वभूतात्मा अनिरुद्धाख्यःसमष्ट्यहंकाररूपत्वेनेत्यर्थः २ ३ ४ ५ ६ ७ ८ ९ १० ११ कुलापदेशिनःप्रख्यातकुलाः ११२ ध ध ध

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ क्षुद्रकाणांबाणविशेषाणांषष्ठीतृतीयार्थे ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६

तमापतंतंदद्दृशेदानवंयदुपुंगवः संप्रहृष्टस्ततोयुद्धेतेजसाचाप्यपूर्यत ४० असिचर्मधरोवीरःस्वस्थःसंग्रामलालसः नरसिंहोय-
थापूर्वमादिदैत्यवधोद्यतः ४१ आपतंतंददर्शाथखड्गचर्मधरंतदा खड्गचर्मधरंतंतुदृष्ट्वाबाणःपदातिनम् ४२ प्रहर्षमतुलंलेभेप्रा
द्युम्निवधकांक्षया तत्तुरेणविहीनश्चखड्गपाणिश्चयादवः ४३ अजेयइतितंमत्वायुद्धायाभिमुखःस्थितः अनिरुद्धरणेबाणोजित-
काशीमहाबलः ४४ वाचंचोवाचसंक्रुद्धोगृह्यताहन्यतामिति वाचंचब्रुवतस्तस्यश्रुत्वाप्राद्युम्निराहवे ४५ बाणस्यब्रुवतःक्रोधाद्द-
समानोभ्युदैक्षत उषाभयपरित्रस्तांरुदतींतंचभामिनीम् ४६ अनिरुद्धःप्रहस्याथसमाश्वास्यचतांस्थितः अथबाणःशरौघाणांक्षु
द्रकाणांसमंततः ४७ चिक्षेपसमरेक्रुद्धोह्यनिरुद्धवधेप्सया अनिरुद्धस्तुचिच्छेदकांक्षंस्तस्यपराजयम् ४८ ववर्षशरजालानिक्षु-
द्रकाणांसमंततः बाणोनिरुद्धशिरसिकांक्षंस्तस्यरणेवधम् ४९ ततोबाणसहस्राणिचर्मणाव्यवधूयसः बभौप्रमुखतस्तस्यस्थितः
सूर्यइवोदये ५० सोभिभूयरणेबाणमास्थितोयदुनंदनः सिंहःप्रमुखतोदृष्ट्वागजमेकंयथावने ५१ ततोबाणःसबाणौघैर्मर्मभेदिभि
राशुगैः विव्याधनिशितैस्तीक्ष्णैःप्राद्युम्निमपराजितम् ५२ समाहतस्ततोबाणैःखड्गचर्मधरोपतत् तमापतंतंनिशितैरभ्यघ्नन्सायं
कैस्तथा ५३ सोतिविद्धोमहाबाहुर्बाणैःसन्नतपर्वभिः क्रोधेनाभिप्रजज्वालचिकीर्षुःकर्मदुष्करम् ५४ रुधिरोद्यप्लुतगात्रेबाणवर्षैः
समाहितः अभिभूतःससंक्रुद्धोययौबाणरथंप्रति ५५ असिभिर्मुशलैःशूलैःपट्टिशैस्तोमरैस्तथा सोतिविद्धःशरौघैश्चप्राद्युम्नि-
र्नव्यकंपत ५६ आप्लुत्यसहसाक्रुद्धोरथेशांतस्यसोऽच्छिनत् जघानचाश्वान्खड्गेनबाणस्यरणमूर्द्धनि ५७ तंपुनःशरवर्षेणपट्टिशै-
स्तोमरैरपि चकारांतर्हितंबाणोयुद्धमार्गविशारदः ५८ हतोयमितिविज्ञायप्रणादन्नेदुस्तागणाः ततोवप्लुत्यसहसारथपार्श्वेव्यवस्थि
तः ५९ शक्तिंबाणस्ततःक्रुद्धोघोररूपांभयानकाम् जग्राहज्वलितांघोरांघंटामालाकुलांरणे ६० ज्वलनादित्यसंकाशांयमदंडोग्र
दर्शनाम् प्राहिणोत्तामसंगेनमहोल्कांज्वलितामिव ६१ तामापतंतींसंप्रेक्ष्यजीवितांतकरींतदा सोभिप्लुत्यतदाशक्तिंजग्राहपुरुषोत्त
मः ६२ निर्बिभेदततोबाणंतयाशक्त्यामहाबलः साभित्वातस्यदेहंवैप्राविशद्धरणीतलम् ६३ सगाढविद्धोव्यथितोध्वजयष्टिंसमा
श्रितः ततोमूर्च्छाभिभूतंतंकुंभांडोवाक्यमब्रवीत् ६४ अपेक्षसेदानवेंद्रकिमेवंशत्रुमुद्यतं लब्धलक्षोह्ययंवीरोनिर्विकारोद्यदृश्यते ६५

५७ ५८ ५९ ६० असंगेनउषासंबंधस्यापिवधेनएतस्मिन्मतेममदुहिताविधवाभविष्यतीत्यपिअविगणय्येत्यर्थः ६१ ६२ ६३ ६४ ६५ ६६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भवद्भिर्मेसाहाय्यंनकार्यंइतिध्वंसतेतिचाब्रवीदितिसंबंधः १३ १४ प्रमाथगणाःप्रमथगणाः १५ १६ १७ १८ १९ २० २१ २२ २३

भवद्भिर्नहिमेकार्यंयुद्धसाहाय्यमद्यवै अब्रवीत्प्रध्वंसतेत्येवंमत्समीपाच्चनश्यत १३ अथतान्वाग्भिरुग्राभिस्त्रासयन्बहुधाबली
व्यादिदेशरणेशूरानन्यानयुतशःपुनः १४ प्रमाथगणभूयिष्ठंव्यादिष्टंतस्यनिग्रहे अनीकंसुमहारौद्रंनानाप्रहरणोद्यतम् १५ अथां
तरिक्षेबहुधाविद्युद्भिरिवाम्बुदैः बाणानीकैःसमभवद्व्याप्तंसंदीप्तलोचनैः १६ केचित्क्षितिस्थाःप्राक्रोशन्गजाइवसमन्ततः अंतरि
क्षेव्यराजंतघर्मान्तइवतोयदाः १७ ततस्तत्सुमहत्सैन्यंसमन्तमभवत्पुनः तिष्ठतिष्ठेतिचतदावाचोऽभूयन्तसर्वशः १८ अनिरुद्धोरणेवीरः
सचतानभ्यवर्तत तदाश्चर्यंसमभवद्यदेकस्तसमागतः १९ अयुध्यतमहावीर्यैर्दानवैःसहसंयुगे तेषामेवचजग्राहपरिघंसोऽसुरानपि
१२० तैरेवचतदायुद्धेतान्जघानमहाबलः पुनःपरिघमुत्सृज्यप्रगृह्यरणमूर्द्धनि २१ सतेनविचरन्मार्गानेकःशत्रुनिबर्हणः भ्रांतमु
द्भ्रांतमाविद्धमाप्लुतंविप्लुतंप्लुतम् २२ इतिप्रकारान्द्वात्रिंशद्विचरन्नाप्यदृश्यत एकसहस्रशश्चाग्रदैत्यान्रणमूर्द्धनि २३ क्रीडतंबहु
धायुद्धेव्यादितास्यमिवांतकम् ततस्तेनाभिसंतप्तारुधिरौघपरिप्लुताः २४ पुनर्भग्नाःप्राद्रवंतयत्रबाणोव्यवस्थितः गजवाजिरथौघैस्ते
चोद्यमानाःसमंततः २५ कृत्वाचार्तस्वरंघोरंदिशोजग्मुर्हतौजसः एकैकस्योपरितदातेन्योन्यभयपीडिताः २६ वमंतःशोणितंजग्मु
र्विषादाद्धिसुखारणे नबभूवपुरादेवेयुध्यतांताद्दृशंभयम् २७ यादृशंयुध्यमानानामनिरुद्धेनसंयुगे केचिद्वमंतोरुधिरंन्यपतन्वसु
धातले २८ दानवागिरिशृंगाभागदाशूलासिपाणयः तेबाणमुत्सृज्यरणेजग्मुर्भयसमाकुलाः २९ विशालमाकाशतलंदानवान्निर्जिता
स्तदा निःशेषभग्नामहतीदृश्याताबाहिनीतदा १३० बाणःक्रोधात्प्रजज्वालसमिद्धोग्निरिवाध्वरे अंतरिक्षचरोभूत्वासाधुवादीसमंत
तः ३१ नारदोनृत्यतिप्रीतोह्यनिरुद्धस्यसंयुगे एतस्मिन्नंतरेचैवबाणःपरमकोपनः ३२ कुंभांडसंगृहीतंतुरथमास्थायवीर्यवान् य
योयत्रानिरुद्धोवैउद्यतासीरथेस्थितः ३३ पट्टिशासिगदाशूलमुद्यम्यचपरश्वधान् बभौबाहुसहस्रेणशक्रध्वजशतैरिव ३४ बद्धगो
धांगुलित्रैश्चबाहुभिःसमहाभुजः नानाप्रहरणोपेतःशुशुभेदानवोत्तमः ३५ सिंहनादंनदन्क्रुद्धोविस्फारितमहाधनुः अब्रवीत्तिष्ठ
तिष्ठेतिक्रोधसंरक्तलोचनः ३६ वचनंतस्यसंश्रुत्यप्राद्युम्निरपराजितः बाणस्यवदनंसंख्येसमुद्वीक्ष्यततोहसत् ३७ किंकिणीशतनि
र्घोषंरक्तध्वजपताकिनम् ऋष्यचर्मावनद्धांगंदशनल्वंमहारथम् ३८ तस्यवाजिसहस्रंतुरथेयुक्तंमहात्मनः पुरादेवासुरेयुद्धेहिरण्य
कशिपोरिव ३९

२४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ऋष्योमृगविशेषःनल्वोहस्तचतुःशतं ३८ ३९ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मायामाश्रित्ययुध्यस्वनायंवध्योन्यथाभवेत् आत्मानंमांचरक्षस्वप्रमादात्किमुपेक्षसे ६६ वध्यतामयमद्यैवननःसर्वान्विनाशयेत्
अन्यांश्चप्रमातश्चैहत्वाउषांनीत्वाव्रजिष्यति ६७ कुंभांडवचनैरेवंदानवेंद्रःप्रणोदितः वाचंरूक्षामभिक्रुद्धःप्रोवाचवदतांवरः ६८ एषोहम
स्यविदधेमृत्युःप्राणहरंरणे आदास्याम्यहमेतंवेगरुत्मानिवपन्नगम् ६९ इत्येवमुक्त्वासरथःसध्वजःसाश्वसारथिः गंधर्वनगराकारस्त
त्रैवांतरधीयत ७० मुमोचनिशितान्बाणान्छन्नोमायाधरोबली विज्ञायांतर्हितंबाणंप्राद्युम्निरपराजितः ७१ पौरुषेणासमायुक्तःसंप्रे
क्षतदिशोदश आस्थायतामसींविद्यांतदाक्रुद्धोमहाबलः ७२ मुमोचविशिखांस्तीक्ष्णांश्छन्नोमायाधरोबली प्राद्युम्निर्विशिखैर्बद्धःस
र्पभूतैःसमंततः ७३ वेष्टितोबहुधातस्यदेहःपन्नगराशिभिः सतुवेष्टितसर्वांगोबद्धःप्राद्युम्निराहवे ७४ निःप्रयत्नकृतस्तस्थौमैनाक
इवपर्वतः ज्वालावलीढवदनैःसर्पभोगैर्विचेष्टितः ७५ अभीतपर्वताकारःप्राद्युम्निरभवद्रणे निःप्रयत्नगतिश्चापिसर्पवल्कमयैःश
रैः ७६ नविव्यथेसंभूतात्मासर्वतःपरिवेष्टितः ततस्तंवाग्भिरुग्राभिःसंरब्धस्तमतर्जयत् ७७ बाणोध्वजंसमाश्रित्यप्रोवाचामर्षितोव
चः कुंभांडवध्यतांशीघ्रमयंदेकुलपांसनः ७८ चारित्र्यंयेनमेलोकेदूषितंदूषितात्मना इत्येवमुक्तेवचनेकुंभांडोवाक्यमब्रवीत् ७९ राज
न्वक्ष्याम्यहंकिंचित्तन्मेशृणुयदीच्छसि अयंविज्ञायतांकस्यकुतोवायमिहागतः ८० केनवायमिहानीतःशक्रतुल्यपराक्रमः मयायंबहु
शोराजन्दृष्टोयुध्यन्महारणे ८१ क्रीडन्निवचयुद्धेषुदृश्यतेदेवसूनुवत् बलवान्सत्वसंपन्नःसर्वशास्त्रविशारदः ८२ नायंवधकृतंदो
षमर्हतिदैत्यसत्तम गांधर्वेणविवाहेनकन्ययातवसंगता ८३ अदेयाह्यप्रतिग्राह्या अतश्चिंत्यवधंकुरु विज्ञायचवधंचास्यपूजांवा
स्यकरिष्यसि ८४ वधेह्यस्यमहान्दोषोरक्षणेस्यमहान्गुणः अयंहिपुरुषोत्कृष्टःसर्वथामानमर्हति ८५ सर्वतोवेष्टिततनुर्नव्यथ
त्येवभोगिभिः कुलशौंडीर्यवीर्यैश्चसत्वेनचसमन्वितः ८६ पश्यराजन्महावीर्यैरन्वितःपुरुषोत्तमम् ननोगणयतेसर्वान्वधमात्मोप्यय
बली ८७ यदिमायाप्रभावेननानवद्धोभवेदयम् सर्वान्सगणान्सरव्येयोधयन्नात्रसंशयः ८८ सर्वसंग्रामार्गज्ञोभवद्वीर्याधिकस्त
व शोणितोघप्लुतैर्गात्रैर्नागभोगैश्चवेष्टितः ८९ त्रिशिखांभ्रुकुटींकृत्वानचिंतयतिनःस्थितान् इमामवस्थांनीतोपिस्वबाहुबलमाश्रितः ९०
नचिंतयतिराजंस्त्वांवीर्यवान्कोप्यसौयुवा सहस्रबाहोःसमरेहिबाहुःसमवस्थितः नचिंतयतितेवीर्यमयंवीर्यमदान्वितः ९१ उचिंतयदितेरा
जन्ज्ञेयोवीर्यबलान्वितः कन्याचेयंनचान्यस्यनिर्याल्येतेनसंगता ९२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९३ ९४ ९५ ९६ ९७ ९८ ९९ २०० २०१ २०२ २०३ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांप्राद्युम्निशरबंधोना
मशतोपरिएकोनविंशोऽध्यायः ११९ ७ ७ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२

यदिचेष्टतमःकश्चिदयंवंशेमहात्मनाम् ततःपूजामयंवीरःप्राप्स्यतेचासुरोत्तम ९३ रक्ष्यतामितिचोक्त्वैवतथास्त्वितिचतास्थिवान् एवमु
क्तेतुवचनेकुंभांडेनमहात्मना ९४ तथेत्याहचकुंभांडंबाणःशत्रुनिषूदनः संरक्षिणस्ततोदत्वाअनिरुद्धस्यधीमतः ९५ ययोस्वमेवभव
नंबलेःपुत्रोमहायशाः संयतंमाययाहृष्ट्वाअनिरुद्धमहाबलम् ९६ ऋषीणांनारदःश्रेष्ठोऽव्रजत्द्वारवतींप्रति ततोह्याकाशमार्गेणमुनि
र्द्वारवतींततः ९७ गतेऋषीणांप्रवरेसोनिरुद्धोव्यचिंतयत् नष्टोयंदानवःक्रूरोयुद्धप्राप्स्यनसंशयः ९८ सगत्वानारदस्तत्रशंखचक्रगदाधर
म् ज्ञापयिष्यतितत्वेनइममर्थनसंशयः ९९ नागैर्विचेष्टितंदृष्ट्वाउषाप्राद्युम्निमातुरम् रुरोदबाष्परुद्धाक्षीतामाहरुदतीपुनः २०० किंसि
द्रुद्धतेभीरुमाभैस्त्वंमृगलोचने पश्यकृष्णाणिसंप्राप्तमस्त्कृतेमधुसूदनम् २०१ यस्यशंखध्वनिंश्रुत्वाबाहुशब्दबलस्यच दानवानांशस्त्रैष्य
तिगर्भाश्चासुरयोषिताम् २०२ वैशंपायनउवाच एवमुक्त्वानिरुद्धेनउषाविश्रंभमागता नृशंसपितरंचैवशोचतेसासुमध्यमा २०३ इ
तिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिबाणानिरुद्धयुद्धेशतोपरिएकोनविंशोऽध्यायः ११९ वैशंपायनउवाच यदाबाणपुरेवीरः
सोनिरुद्धःसहोषया सनिरुद्धोनरेंद्रेणबाणेनबलिसूनुना १ तदादेवींकोटवतींरक्षार्थंशरणंगतः यद्गीतमनिरुद्धेनदेव्याःस्तोत्रमिदंशृणु
२ अनंतमक्षयंदिव्यमादिदेवंसनातनम् नारायणंनमस्कृत्यप्रवरंजगतांप्रभुम् ३ चंडींकात्यायनींदेवींमार्यालोकनमस्कृताम् वरदांकी
र्तयिष्यामिनामभिर्हरिसंस्तुतैः ४ ऋषिभिर्दैवतैश्चैववाक्पुष्पैरर्चितांशुभाम् तांदेवींसर्वदेहस्थांसर्वदेवनमस्कृताम् ५ अनिरुद्धउ०
महेंद्रविष्णुभगिनींनमस्यामिहितायवै मनसाभावशुद्धेनशुचिःस्तोष्येकृतांजलिः ६ गौतमींकंसभयदांयशोदानंदिवर्द्धिनीम् मेघ्यांगो
कुलसंभूतांनंदगोपस्यनंदिनीम् ७ प्रज्ञांदक्षांशिवांसौम्यांदनुपुत्रविमर्दनीम् तांदेवींसर्वदेहस्थांसर्वभूतनमस्कृताम् ८ दर्शनींपूरणीं
मायांवन्हिसूर्यशशिप्रभाम् शांतिश्चवाचजननींमोहनींशोषणींतथा ९ सेव्यांदेवैःसर्षिगणैःसर्वदेवनमस्कृताम् कालींकात्यायनींदे
वींभयदांभयनाशिनीम् १० कालरात्रिंकामगमांत्रिनेत्रांब्रह्मचारिणीम् ११ सौदामिनींमेघरवांवेतालींविपुलाननाम् यूथस्थांद्यांमहाभा
गांशकुनींरेवतींतथा १२ तिथीनांपंचमींषष्ठींपूर्णमासींचतुर्दशीम् सप्तविंशतिऋक्षाणिनद्यःसर्वादिशोदश १३ नगरोपवनोद्यानद्वारा
ट्टालकवासिनीम् ह्रींश्रींगंगांचगंधर्वांयोगिनींयोगदांसताम् १४

१३ १४ ७ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१५ १६ १७ १८ १९ २० सिद्धसेनस्यकार्तिकेयस्य देवकन्यानामितितत्प्रभृतिनारीषु असिसांनिध्यंकुरुष्वेत्यर्थश्चतुर्थेनान्वयः २१ २२ २३
२४ २५ २६ २७ २८ २९ देव्यानामानुकीर्तनात् ब्रह्मादिकंसर्वंजगत्कीर्तितमितिवदतादेव्याएवसर्वोपादानत्वरूपजगत्कारणत्वमुक्तंभवति ३०

कीर्तिमाशांदिशांस्पर्शांनमस्यामिसरस्वतीम् वेदानांमातरंचैवसावित्रींभक्तवत्सलाम् १५ तपस्विनींशांतिकरीमेकानंशांसनातनीं
कोटिर्यामांदिशाचंडामिलामलयवासिनीम् १६ भूतधात्रींभयकरींकुष्मांडींकुसुमप्रियाम् दारुणींमदिरावासांविंध्यकैलासवासि-
नीम् १७ वरांगनांसिंहरथींबहुरूपांवृषध्वजाम् दुर्लभांदुर्जयांदुर्गांनिशुंभभयदर्शिनीम् १८ सुरप्रियांसुरांदेवींवज्रपाण्यनुजांशि
वाम् किरातींचीरवसनांचोरसेनानमस्कृताम् १९ आज्यपांसोमपांसौम्यांसर्वपर्वतवासिनीम् निशुंभशुंभमथनींगजकुंभोपमस्तनीं
म् २० जननींसिद्धसेनस्यसिद्धचारणसेविताम् चरांकुमारप्रभवांपार्वतींपर्वतात्मजाम् पंचाशद्देवकन्यानांपत्न्योदेवगणस्यच २१ रुद्र
पुत्रसहस्रस्यपुत्रपौत्रवरस्त्रियः मातापिताजगन्मान्यादिविदेवाप्सरोगणैः २२ ऋषिपत्नीगणानांचयक्षगंधर्वयोषिताम् विद्याधराणां
नारीषुसाध्वीषुमनुजासुच २३ एवमेतासुनारीषुसर्वभूताश्रयाह्यसि नमस्कृतासित्रैलोक्येकिंनरोद्गीतसेविते २४ अचिंत्याह्यप्रमेयासि
शूलिसिंहासिनमोस्तुते एभिर्नामभिरन्यैश्चकीर्तिताह्यसिगौतमि २५ त्वत्प्रसादाद्विमुक्तोहंक्षिप्रमुच्येयबंधनात् अवेक्षस्वविशालाक्षिपा
दौतेशरणंव्रजे २६ सर्वेषामेवबंधानांमोक्षणंकर्तुमर्हसि ब्रह्माविष्णुश्चरुद्रश्चचंद्रसूर्याग्निमारुताः २७ अश्विनौवसवश्चैवधाताभूमिर्दि
शोदश मरुतासहपर्जन्योधाताभूमिर्दिशोदश २८ गावोनक्षत्रवंशाश्चग्रहानद्योह्रदास्तथा सरितःसागराश्चैवनानाविद्याधरोरगाः २९
तथानागाःसुपर्णाश्चगंधर्वाप्सरसांगणाः कृत्स्नंजगदिदंप्रोक्तंदेव्यानामानुकीर्तनात् ३० देव्यास्तवमिदंपुण्यंयःपठेत्सुसमाहितः सातस्मै
सप्तमेमासिवरमग्र्यंप्रयच्छति ३१ अष्टादशभुजादेविदिव्याभरणभूषिता हारशोभितसर्वांगीमुकुटोज्ज्वलभूषणा ३२ कात्यायनीस्तूय
सेत्वंवरमग्र्यंप्रयच्छसि अतस्त्वांमितांदेवींवरदांवामलोचने ३३ नमोस्तुतेमहादेविसुप्रीतामेसदाभव प्रयच्छत्वंवरंह्यायुःपुष्टिंचैवक्षमां
धृतिम् ३४ बंधनस्थोविमुच्येयंसत्यमेतद्भवेदिति वैशंपायनउवाच एवंस्तुतामहादेवीदुर्गादुर्गपराक्रमा ३५ सांनिध्यंकल्पयामा
सअनिरुद्धस्यबंधने अनिरुद्धहितार्थायदेवीशरणवत्सला ३६ बद्धबाणपुरेवीरमनिरुद्धंव्यमोक्षयत् सांत्वयामासतंवीरमनिरुद्धमरिं
दमम् ३७ पूजयामासतांवीरःसोनिरुद्धःप्रतापवान् प्रसाददर्शयामासअनिरुद्धस्यबंधने ३८ नागपाशेनबद्धस्यतस्याशात्तचेतसः स्फो
टयित्वाकराग्रेणपंजरंवज्रसंनिभम् ३९

३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४० चक्रायुध एव मोचको न त्वस्मदादय इत्याशयेनाह चक्रेति ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ इति श्रीमहाभारते खिलेषु हरिवंशे वि

बद्धं बाणपुरे वीरं सानिरुद्धमभाषत सांत्वयंती वचो देवी प्रसादाभिमुखी तदा ४० श्रीदेव्युवाच चक्रायुधो मोक्षयिता ऽनिरु
द्धत्वां बंधनादाशु सहस्रकालम् छित्वा स बाणस्य सहस्रबाहून् पुरीं निजां नेष्यति दैत्यसूदनः ४१ ततो निरुद्धः पुनरेव देवीं तुष्टाव हृष्टः शशि
कांतवक्त्रः अनिरुद्ध उवाच नमोस्तु ते देवि वरप्रदे शिवे नमोस्तु ते देवि सुरारिनाशिनि ४२ नमोस्तु ते कामचरे सदा शिवे नमो-
स्तु ते सर्वहितैषिणि प्रिये नमोस्तु ते भयकरि विद्विषां सदा नमोस्तु ते बंधनमोक्षकारिणि ४३ ब्रह्माणी द्राणि रुद्राणि भूतभव्यभवे शिवे त्रा
हि मां सर्वभीतिभ्यो नारायणि नमोस्तु ते ४४ नमोस्तु ते जगन्नाथे प्रियेदांते महाव्रते भक्तिप्रिये जगन्मातः शैलपुत्रि वसुंधरे ४५ त्राहि मां
त्वं विशालाक्षि नारायणि नमोस्तु ते त्रायस्व सर्वदुःखेभ्यो दानवानां भयंकरि ४६ रुद्रप्रिये महाभागे भक्तानामार्तिनाशिनि नमामि शिर
सा देवीं बंधनस्थो विमोक्षितः ४७ वैशंपायन उवाच आर्यास्तवमिदं पुण्यं यः पठेत्सुसमाहितः सर्वपापविनिर्मुक्तो विष्णुलोकं स ग
च्छति बंधनस्थो विमुच्येत सत्यं व्यासवचो यथा ४८ इति श्रीमहाभारते खिलेषु हरिवंशे विष्णुपर्वणि अनिरुद्धकृत आर्यास्तवो नाम
शतोपरि विंशोऽध्यायः १२० वैशंपायन उवाच ततो निरुद्धस्य गृहे रुरुदुः सर्वयोषितः प्रियनाथमपश्यंत्यः कुरर्य इव संघशः १
अहो धिक्किमिदं नाथ नाथे कृष्णेऽप्यवस्थिते अनाथा इव संत्रस्ता रुदिमो भयपीडिताः २ यस्येंद्रप्रमुखा देवाः सादित्याः समरुद्गणाः बाहु-
च्छायामुपाश्रित्य वसंति दिवि देवताः ३ तस्योत्पन्नमिदं लोके भयदस्य महाभयम् तस्यानिरुद्धः पौत्रस्तु वीरः केनापि नोऽहृतः ४ अहो ना-
स्ति भयं नूनं तस्य लोके सुदुर्मतेः वासुदेवस्य यः क्रोधमुत्पादयति दुःसहम् ५ व्यादितास्यस्य यो मृत्योर्दंष्ट्राग्रे परिवर्तते स वासुदेवं समरे
मोहादभ्युधियाद्रिपुः ६ इदमेवंविधं कृत्वा विप्रियं यदुपुंगवे कथं जीवन् विमुच्येत साक्षादपि शचीपतिः ७ हृतनाथाः स्म शोच्याः स्म वय-
नाथ विनाकृताः विप्रयोगेन नाथस्य कृतांतवशगाः कृताः ८ इत्येवं तावदत्यर्थं रुदत्यश्च पुनः पुनः नेत्रजं वारि सुसुचुरशिवं परमांगनाः ९ ता
सां बाष्पांबुपूर्णानि नयनानि चकाशिरे सलिलेनाप्लुतानीव पंकजानि जलागमे १० तासां मरालपक्ष्माणि राजयंति शुभानि च रुधिरेणाप्लुता
नीव नयनानि चकाशिरे ११ तासां हर्म्यतलस्थानां रुदतीनां महास्वनः कुररीणामिवाकाशे रुदतीनां सहस्रशः १२ तं श्रुत्वा निनदं घोरमपूर्वं
भयमागतम् उत्पेतुः सहसा तेभ्यो गृहेभ्यः पुरुषर्षभाः १३ कस्मादेषो निरुद्धस्य श्रूयते सुमहास्वनः गृहे कृष्णाभिगुप्तानां कुतो नो भयमागतं १४

ष्णुप० टीकायां शतोपरि विंशोऽध्यायः १२० ततइति १ २ ३ ४ ५ ६ ७ ८ ९ १० मरालाहंसाः तेषां रुधिरेणार्द्राणि पक्ष्माणि रक्तानि नयनानि चकाशिरे ११ १२ १३
१४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

इत्येवमुक्तास्तेऽन्योन्यं स्नेहविक्लवगद्गदाः अधर्षितायथासिंहागुहाभ्यइवनिःसृताः १५ सन्नाहभेरीकृष्णस्य आहतामहतीतदा यस्याः
शब्दान्तसर्वेसभागस्थचधिष्ठिताः १६ किमेतदितितेऽन्योन्यंसमपृच्छतयादवाः अन्योन्यस्याहितेसर्वेयथावृत्तमवेदयन् १७ ततस्तेबा
ष्पपूर्णाक्षाः क्रोधसंरक्तलोचनाः निःश्वसंतोव्यतिष्ठंतयादवायुद्धदुर्मदाः १८ तूष्णींभूतेषुसर्वेषु विप्रथुर्वाक्यमब्रवीत् कृष्णंप्रहरतांश्रेष्ठं
निःश्वसंतंमुहुर्मुहुः १९ किमिदंचिंतयाविष्टःपुरुषेंद्रभवानिह तवबाहुबलप्राणामाश्रिताःसर्वयादवाः २० भवंतमाश्रिताःकृष्णसंविभक्ता
श्चसर्वशः तथैवबलवान्शक्रस्त्वय्यावेश्यजयाजयौ २१ स्वस्थपतिर्निःशंकः कथंत्वंचिंतयान्वितः शोकसागरमक्षोभ्यं सर्वेतेज्ञातयोगताः २२
तान्मज्जमानानेकस्त्वंसमुद्धरमहाभुज किमेवंचिंतयाविष्टोनकिंचिदपिभाषसे २३ चिंतांकर्तुंनयादवेंद्र त्वमर्हसिमाधव इत्येवमुक्तःकृष्णा-
स्तुनिःश्वस्यसुचिरंबहु २४ प्राहवाक्यंसवाक्यज्ञोविहस्यातिरिवस्वयम् श्रीकृष्णउवाच विप्रथोचिंतयाविष्टोह्येतत्कार्यमचिंतयत् २५
विचिंतयन्स्वहचास्यकार्यस्यनलभेगतिम् तथाहभवताप्युक्तोनान्तरंविद्यतेक्वचित् २६ दाशार्हगणमध्येहंवदाम्यर्थवतींगिरम् शृणुध्वंया
दवाःसर्वेयथाचिंतान्वितोह्यहम् २७ अनिरुद्धेहृतेवीरेपृथिव्यांसर्वपार्थिवाः अशक्ताइतिमन्यंतेसर्वानस्मान्सबांधवान् २८ आहुकश्चै
वनोराजाहृतःशाल्वेनवैपुरा प्रत्यानीतःसचास्माभिर्युद्धंकृत्वासुदारुणम् २९ प्रद्युम्नश्चापिनोबालःशंबरेणाहृतोह्यभूत् सतंनिहत्यसमरे-
प्राप्तोरुक्मिणिनंदनः ३० इदंतुसुमहत्कष्टंप्राद्युम्निःक्वप्रवासितः नैवंविधंमहद्दोषं नस्मरेमनुजर्षभाः ३१ भस्मनागुंठितःपादायेनमेसम्
द्धिपातितः तस्याहंसानुबंधस्यहरिष्येजीवितरणे ३२ इत्येवमुक्तेकृष्णेनसात्यकिर्वाक्यमब्रवीत् चाराःकृष्णप्रणीयंतामनिरुद्धस्यमा
र्गणे सपर्वतवनोद्देशामार्गंतुवसुधामिमाम् ३३ आहुकंप्राहकृष्णस्तुस्मितंकृत्वावचस्तदा आभ्यंतराश्चबाह्याश्चव्यादिश्यंतांचरान्नृप
३४ वैशंपायनउवाच केशवस्यवचःश्रुत्वा आहुकस्त्वरितोऽब्रवीत् अन्वेषणेनिरुद्धस्यसंचरान् दिदेशवैतदा ३५ ततश्चरा-
स्तुव्यादिष्टाःपार्थिवेनयशस्विना हयारूढाश्चव्यादिष्टाःपार्थिवेनमहात्मना अभ्यंतरंचसार्गध्वंबाह्यतश्चसमंततः ३६ वेणुमंतंलता
वेष्टंतथारैवतकंगिरिम् ऋक्षवंतंगिरिंचैवमार्गध्वंत्वरिताहयैः ३७ एकैकतत्रचोद्यानंमार्गध्वंकाननानिच यातव्यंचापिनिःशंकस्थ
ानानिसमंततः ३८ हयानांचसहस्राणिरथानांचाप्यनेकशः आरुह्यत्वरिताःसर्वेमार्गध्वंयदुनंदनम् ३९ सेनापतिरनाधृष्टिरि
दंवचनमब्रवीत् कृष्णमक्लिष्टकर्माणमच्युतंभीतभीतवत् ४०

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५

शृणुकृष्णवचोमह्यंरोचतेयदितेप्रभो चिरात्प्रभृतिमेवक्तुंभवंतंजायतेमतिः ४१ असिलोमापुलोमाचनिसुंदनरकौहतौ सौभः
शाल्वश्चनिहतोमैंदोद्विविदएवच ४२ हयग्रीवश्चसुमहान्सानुबंधस्त्वयाहतः तादृशोविग्रहेवृत्तेदेवहेतोःसुदारुणे ४३ सर्वाण्येता
निकर्माणिनिःशेषाणिरणेरणे कृतवानसिगोविंदपार्ष्णिग्राहश्चनास्तिते ४४ इदंकर्मत्वयाकृष्णसानुबंधमहत्कृतम् पारिजातस्य
हरणेयत्कृतंकर्मदुष्करम् ४५ तत्रशक्रस्त्वयाकृष्णऐरावतशिरोगतः निर्जितोबाहुवीर्येणत्वयायुद्धविशारदः ४६ तेनवैरंत्वयासार्द्धं-
कर्त्तव्यंनात्रसंशयः वैरानुबंधश्चमहान्तेनकार्यस्त्वयासह ४७ तत्रानिरुद्धहरणंकृतंमधवतास्वयम् नह्यन्यस्यप्रभवेच्छक्तिर्वैरनि-
र्यातनंप्रति ४८ इत्येवमुक्तेवचनेकृष्णोनागइवश्वसन् उवाचवचनंधीमाननाधृष्टिंमहाबलम् ४९ सेनानीस्तातसामैवंनदेवाःक्षुद्र
कर्माणः नाकृतज्ञानचक्लीबानावलिप्तानबालिशाः ५० देवतार्थंचमेयत्नोमहान्दानवसंक्षये तेषांप्रियार्थंचरणेहन्मिदृप्तान्महाब
लान् ५१ तत्परस्तन्मनाश्चास्मितद्भक्तस्तत्प्रियेरतः कथंपापंकरिष्यंतिविज्ञायैवविधंहिमाम् ५२ अक्षुद्राःसत्यवन्तश्चनित्यंभक्तानु-
कंपिनः तेष्वानविद्यतेपापंबालिशत्वात्प्रभाषसे ५३ कदाचिदिहपुंश्चल्याअनिरुद्धोहृतोभवेत् देवेषुसमहेंद्रेषुनैतत्कसंविधीयते
५४ वैशंपायनउवाच एवंचिंतयमानस्यकृष्णस्याद्भुतकर्मणः कृष्णस्यवचनंश्रुत्वाततोऽक्रूरोऽब्रवीद्वचः ५५ मधुरंश्लक्ष्णयावा
चाअर्थवाक्यविशारदः यच्छक्रस्यप्रभोकार्यंतदस्माकंविनिश्चितम् ५६ अस्माकंचापियत्कार्यंतद्धिकार्यंशचीपतेः संरक्ष्याश्चवयंदेवैर-
स्माभिश्चापिदेवताः देवतार्थंवयंचापिमानुषत्वमुपागताः ५७ एवमक्रूरवचनैश्चोदितोमधुसूदनः स्निग्धगंभीरयावाचापुनःकृष्णोभ्य
भाषत ५८ नायंदेवैर्नगंधर्वैर्नयक्षैर्नचराक्षसैः प्रद्युम्नपुत्रोपहृतःपुंश्चल्यातुमहायशाः ५९ मायाविदग्धाःपुंश्चल्योदैत्यदानवयोषि
तः ताभिर्हृतोनसंदेहोनान्यतोविद्यतेभयम् ६० वैशंपायनउवाच इत्येवमुक्तेवचनेकृष्णेनतुमहात्मना अथावगम्यतत्त्वेन
यद्वृत्तंयदुमंडले ६१ हर्षयन्सततुसर्वेषांसूतमागधबंदिनाम् मधुरःश्रूयतेघोषोमाधवस्यनिवेशने ६२ तेचराःसर्वतःसर्वेसभाद्वारमुपा
गताः शनैर्गद्गदयावाचाइदंवचनमब्रुवन् ६३ उद्यानानिगुहाःशैलाःसप्तानद्यःसरांसिच एकैकंशतशोराजन्मार्गितंनचदृश्यते ६४
अन्येकृष्णचराराजन्नुपागम्यतदाब्रुवन् सर्वेनोविदितादेशाःप्राद्युम्निर्नचदृश्यते ६५ यदन्यत्संविधातव्यंविधानंयदुनंदन तदाज्ञापयनः
क्षिप्रमनिरुद्धस्यमार्गणे ६६

५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

९२ ९३ ९४ ९५ ९६ ९७ ९८ ९९ १०० १०१ १०२ १०३ १०४ वैदर्भीरुक्मिणःदुहितातेतवसदीयभ्रातुःसु

आकर्णयतमध्वानंगंतव्यमतिदुर्जयम् एकादशसहस्राणियोजनानांजनार्दन ९२ तदितःशोणितपुरंप्राद्युम्निर्यत्रसांप्रतम् म
नोजवोमहावीर्योवैनतेयःप्रतापवान् ९३ समाह्वयस्वगोविंदसहितात्रनेष्यति एकेनसमुहूर्तेनबाणंसंदर्शयिष्यति ९४ वैशं
पायनउवाच तस्यतद्वचनंश्रुत्वासस्मारगरुडंतदा सकृष्णपार्श्वमागम्यप्रांजलिर्गरुडःस्थितः ९५ प्रणम्याथवचःप्राहवैनतेयो
महाबलः वासुदेवंमहात्मानंश्लक्ष्णमधुरयागिरा ९६ गरुडउवाच पद्मनाभमहाबाहोकिमर्थंसंस्मृतोह्यहम् कृत्यंतेयदि
ह्यस्तिश्रोतुमिच्छामितत्त्वतः ९७ कस्यपक्षपरिक्षेपैर्नाशयामिपुरींप्रभो प्रभावात्तवगोविंदकोनविद्याद्बलंमम ९८ गदावेगंचते
वीरचक्राग्निंचमहाभुज नावबुध्यतिमूढात्माकोदर्पान्नाशमेष्यति ९९ हलंसिंहमुखंकस्यवनमालींनियोक्ष्यति कस्यदेहस्तुनिर्भि
न्नोमेदिनींयास्यतिप्रभो १०० कस्यशरखरवैःप्राणान्मोहयिष्यसिमाधव कोयंसपरिवाराद्यायास्यतेयमसादनम् १०१ एवमुक्तेतु
वचनेवैनतेयेनधीमता वासुदेवोवचःप्राहशृणुत्वंवदतांवर २ बलेःपुत्रेणबाणेनप्राद्युम्निरपराजितः उषायाःकारणेबद्धोनगरेशो
णिताह्वये अनिरुद्धस्तुकामार्तोबद्धोनागैर्विषोल्बणैः ३ तस्यमोक्षार्थमाहूतोमयात्वंपतगेश्वर तववेगसमोनास्तिपक्षिणांप्रवरोभवा
न् अशक्यंचतदध्वानंगंतुमन्येनकाश्यप ४ तत्रप्रापयमांशीघ्रंयत्रप्राद्युम्निरावसत् वैदर्भीतेस्नुषावीररुदतीपुत्रगृद्धिनी ५ त्वत्प्रसा
दाद्भवत्येषापुत्रेणसहभामिनी अमृतंतुहृतंपूर्वंत्वयापन्नगनाशन ६ मयासहसमागम्यतस्मिन्कालेमहाभुज अभवन्मेध्वजस्त्वंवैत्व
द्भक्ताःसर्ववृष्णयः सखित्वमानयस्वाद्यभक्तिंचपतगेश्वर ७ तववेगसमोनास्तिपक्षिणोनचतेसमाः सुपर्णसुकृतेनत्वांशपेपन्नगनाश
न ८ दासीभावंगतामातामोक्षितैकाकिनापुरा क्षेपविक्षेपमाश्रित्यहृतावाधात्वयापुरा ९ भवान्सुरगणान्सर्वान्पृष्ठमारोप्यविक्र
मात् गच्छमेद्यागमान्देशान्विजयस्वतवाश्रयात् ११० गुरुत्वान्मेरुतुल्यस्त्वंलघुत्वात्पवनोपमः भूतेभव्येभविष्येचनतेतुल्योस्तिवि
क्रमे ११ सत्यसंधमहाभागवैनतेयमहाद्युते अनिरुद्धेक्षणेनाद्यसाहाय्यमुपकल्पताम् १२ गरुडउवाच अत्यद्भुतसि
द्धावृत्तंतवकृष्णमहाभुज त्वत्प्रसादाच्चविजयःसर्वत्रैवमहाभुज १३ धन्योस्म्यनुगृहीतोस्मिसंस्तुतस्त्वान्मधुसूदन श्रोतव्यस्त्वंमयाकृ
ष्णस्तोषिमात्वंमहाभुज १४ वेदाध्यक्षःसुराध्यक्षःसर्वकामप्रदोभवान् अमोघदर्शनस्त्वंहिवरार्थीनांवरप्रदः १५

प्रद्युम्नभार्यात्वात् १०५ १०६ १०७ १०८ १०९ ११० १११ ११२ ११३ ११४ ११५

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ततस्तेदीनमनसःसर्वेबाष्पाकुलेक्षणाः अन्योन्यमभ्यभाषंतकिमतःकार्यमुत्तरम् ६७ संदष्टौष्ठपुटाःकेचित् केचिद्बाष्पाकुलेक्षणाः
केचित्भृकुटिमास्थायाचिंतयंत्यर्थसिद्धये ६८ एवंचिंतयतांतेषांबुद्ध्यर्थमभिभाषिताम् अनिरुद्धःकुतश्चेतिसाध्वसःसुमहानभूत् ६९
अन्योन्यमभिवीक्षंतेयादवाजातमन्यवः तांनिशांविमनस्कांतगमयंसुःकथंचन अनिरुद्धोद्दृतश्चेतिपुनःपुनररिंदम ७० एवंचब्रुवतांतेषां
प्रभातारजनीतदा ततस्तूर्यनिनादैश्चशंखानांचमहास्वनैः प्रबोधनंमहाबाहोःकृष्णस्याक्रियतालये ७१ ततःप्रभातेविमलेप्रादुर्भूतेदि
वाकरे प्रविवेशसभामेकोनारदःप्रहसन्निव ७२ दृष्ट्वातुयादवान्सर्वान्कृष्णेनसहसंगतान् ततःसजयशब्देनमाधवंप्रत्यपूजयत् ७३
अथाभ्युत्थायविमनाःकृष्णःसमितिदुर्जयः मधुपर्कंचगांचैवनारदायददौप्रभुः ७४ सोपविश्यासनेशुभ्रेसर्वास्तरणसंवृते सुखासीनो
यथान्यायमुवाचेदंवचोऽर्थवत् ७५ नारदउवाच किमेवंचिंतयाविष्टानिःसंगागतमानसाः उत्साहहीनाःसर्वेवैकृपाबाढवसमा
सते ७६ इत्येवमुक्तेवचनेकेशवेनमहात्मना वासुदेवोऽब्रवीद्वाक्यंश्रूयतांभगवन्निदम् ७७ अनिरुद्धोहृतोब्रह्मन्केनापिनिशिसु
व्रत तस्यार्थेसर्वएवास्मचिंतयाविष्टचेतसः ७८ एषतेयादवृत्तांतःश्रुतोदृष्टोपिवासुने भगवन्कथ्यतांसाधुप्रियमेतन्महानघ ७९
इत्येवमुक्तेवचनेकेशवेनमहात्मना प्रहस्यैतद्वचःप्राहश्रूयतांमधुसूदन ८० निवृत्तंकमहद्युद्धंदेवासुरसमंमहत् अनिरुद्धस्यचैक
स्यबाणस्यापिमहामृधे ८१ उषानामसुतातस्यबाणस्याप्रतिमौजसः तस्यार्थेचित्रलेखावैजहारासुतमप्सराः ८२ उभयोरपितत्रासी
न्महायुद्धंसुदारुणम् प्राद्युम्निबाणयोःसंख्येबलिवासवयोरिव ८३ अस्माभिश्चापितद्युद्धंदृष्टंसुमहदद्भुतम् अनिरुद्धोश्रयात्तेन
संयुगेष्वनिवर्तिना ८४ बाणेनमायामास्थायबद्धोनागैर्महाबलः व्यादिष्टस्तुवधस्तस्यबाणेनगरुडध्वज ८५ तंनिवारितवान्मंत्री
कुंभांडोनामतस्यह कुमारस्यानिरुद्धस्यतेनासक्तेनसंयुगे ८६ बाणेनमायामास्थायसर्पैर्नियमनंकृतम् उत्तिष्ठतुभवान्शीघ्रय
शसेविजयायच ८७ नायंसंरक्षितुकालःप्राणास्तातजयैषिणाम् प्राणैःकिंचिद्धृतेवीरोधैर्यमालम्ब्यतिष्ठति ८८ वैशंपायनउ०
इत्येवमुक्तेवचनेवासुदेवःप्रतापवान् प्रायात्रिकान्वैसंभारानाज्ञापयतवीर्यवान् ८९ ततश्चंदनपूर्णैश्चलाजैश्चैवसमंततः निर्ययौ-
समहाबाहुःकीर्यमाणोजनार्दनः ९० नारदउवाच स्मरणंवैनतेयस्यकर्तुमर्हसिमाधव नह्यन्येनतदध्वानंशक्यंगंतुम १५९
हाभुज ९१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चतुर्मूर्तिः वासुदेवः संकर्षणः प्रद्युम्नानिरुद्धाख्याश्चतस्रः मूर्तयोयस्यसतथा चतुर्होत्रंयज्ञियंकर्मचातुराश्रम्योहोमकर्तात्रयाणामग्नौहोमः स्पष्टःसंन्या
सिनोपिपरमात्मनिजीवस्यहोमोस्तीतिसोपिहोतेत्यर्थः चतुर्णांपुरुषार्थानांनेताप्रापकः १६ १७ १८ १९ २० २१ समुद्रोदरसंभवः धन्वंतरिः

चतुर्भुजश्चतुर्मूर्तिश्चतुर्होत्रप्रवर्तकः चातुराश्रम्यहोताचचतुर्नेताप्रज्ञाकविः १६ धनुर्धरश्चक्रधरोभवान्शंखधरोमहान् भवान्पूर्वेषु
देहेषुख्यातोभूमिधरःप्रभो १७ लांगलीमुशलीचक्रीदेवकीतनयोभवान् चाणूरमथनश्चैवगोप्रियःकंसहाभवान् १८ गोवर्धनधर
श्चैवमल्लारिर्मल्लभावनः मल्लप्रियोमहामल्लोमहापुरुषइत्यपि १९ विप्रप्रियोविप्रहितोविप्रज्ञोविप्रभावनः ब्रह्मण्यश्चवरेण्यश्चभवान्
दामोदरःस्मृतः प्रलंबमथनश्चैवकेशिहादानवांतकः १२० असिलोम्नश्चहंताचतथारावणनाशनः बिभीषणस्यभगवान्राज्यदोवालि
नाशनः २१ सुग्रीवराज्यदातात्वंबलिराज्यापहारकः रत्नहर्तामहारत्नसमुद्रोदरसंभवः २२ वरुणश्चभवान्ख्यातोभवांश्चसरिदुद्भवः
भवान्खड्गधरोधन्वीधनुर्धरधरोमहान् २३ दाशार्हइतिविख्यातोमहाधन्वाधनुःप्रियः गोविंदइतिविख्यातउदधिस्त्वंचसुव्रत २४
आकाशश्चैतपश्चैवसमुद्रमथनोभवान् भवान्स्वर्गोबहुफलोभवान्स्वर्गचरोमहान् २५ संवर्तश्चसहासेघोबोजनिष्पत्तिरेवच त्वं
लोक्यगमनस्त्वंचक्रोधलोभमनोरथः २६ भवान्कामप्रदश्चैवकामःसर्वधनुर्धरः सर्वतोवर्तनश्चैवप्रलयोनिलयोमहान् २७ हिरण्य
गर्भोरूपज्ञोरूपवान्मधुसूदनः ईशस्त्वंचमहादेव असंख्येयगुणान्वितः २८ स्तोतुमिच्छसिमांदेवस्तोतव्यस्त्वंयदुत्तम चक्षुषायेत्वया
घोराःप्राणिनोहिनिरीक्षिताः २९ हतास्तेयमदंडेनतिर्यक्निरयगामिनः येत्वयापरमप्रीत्याप्राणिनोवैनिरीक्षिताः ३० इहचप्रेत्यतेप्र
वैसर्वथास्वर्गगामिनः एषतेहंमहाबाहोवशगःशासनेस्थितः ३१ जयस्थानंततःकृत्वागरुडःप्राहकेशवम् अयमस्मिस्थितोवीरआरुह
स्वमहाबल ३२ ततःकंठेपरिष्वज्यमाधवोगरुडंततः सर्वशत्रुविनाशाय अर्घोयंप्रतिगृह्यताम् ३३ दत्वाघंपरयाप्रीत्याशंखचक्रग
दासिभृत् आरुरोहमहाबाहुःसुपर्णंपुरुषोत्तमः ३४ कृष्णस्यपार्श्वभागस्थहर्षादेवास्थितोभवत् कृष्णकेशःप्रबलयोजिष्णुःकृष्ण
श्चवर्णतः ३५ चतुर्दंष्ट्रश्चतुर्बाहुश्चतुर्वेदषडंगवित् श्रीवत्सांकोरविंदाक्षऊर्ध्वरोमामृदुत्वचः ३६ समांगुलिःसमनखोरक्तांगुलिनखां
तरः स्निग्धगंभीरनिर्घोषोवृत्तबाहुर्महाभुजः ३७ आजानुबाहुस्ताम्रास्यःसिंहविस्पष्टविक्रमः सहस्रमिवसूर्याणांदीप्यमानःप्रकाश
ते ३८

२२ २३ २४ २५ २६ संवर्तःसंव्रणवानः प्रलयः वर्तनिः आविष्कुर्वाणोनिलयःस्थितिकालश्चत्वमेव २७ २८ २९ ३० उभावपि
लोकेप्राप्यतेसर्वथास्वर्गगामिनःसुखभाजः ३१ जयस्थानंप्रस्थानमुद्रां ३२ ३३ ३४ कृष्णकेशोबलरामःप्रबलयइत्यादिस्तुतिःकृष्णस्यैव ३५ ३६ ३७ ३८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रजापतिः कश्यपः यस्यवामनरूपेणतत्पुत्रस्य ३९ ४० संविधानंपुररक्षणं ४१ ४२ जयबाणमित्याद्यावाचःशृण्वन्नुभययोरितितृतीयेनान्वयः ४३ ४४
१४५ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांशतोपरिएकविंशोऽध्यायः १२१ ततइति १ सः खस्थः अतएवउन्मुखैरूर्ध्वमुखैः २ ३ ४ ५

यः प्रभुर्भातिविश्वात्मा भूतानांभावनोविभुः यस्याष्टगुणमैश्वर्यंददौप्रीतःप्रजापतिः ३९ प्रजापतीनांसाध्यानांत्रिदशानांचशाश्वतः
स्तूयमानस्तवैर्दिव्यैःसूतमागधबंदिभिः ४० ऋषिभिश्चमहाभागैर्वेदवेदांगपारगैः संविधानमथाज्ञाप्यद्वारकायांमहाबलः ४१ ग
मनायमतिंचक्रेवासुदेवःप्रतापवान् आस्थितोगरुडंदेवस्तस्यचानुहलायुधः ४२ पृष्ठतोनबलस्यापिप्रद्युम्नःशत्रुकर्षणः जयबाणं
महाबाहोयेचास्यानुगतारणे १४३ नहितेप्रमुखेस्यातुकश्चिच्छक्तोमहामृधे प्रसादेतेध्रुवालक्ष्मीर्विजयश्चपराक्रमः ४४ विजेष्यसि
रणेशत्रुंदैत्येंद्रंसहसैनिकम् सिद्धचारणसंघानामहर्षीणांचसर्वशः शृण्वन्वाचोंतरिक्षेवैप्रययौकेशवोरणे १४५ इतिश्रीमहाभा
रतेखिलेषुहरिवंशेविष्णुपर्वणिकृष्णप्रयाणंनामशतोपरिएकविंशोऽध्यायः १२१ वैशंपायनउवाच ततस्तूर्यनिनादेनशंखानां
चमहास्वनैः बंदिमागधसूतानांस्तवैश्चापिसहस्रशः १ सतून्मुखैर्जयाशीर्भिःस्तूयमानोहिमानवैः बभारस्वरूपंसोमार्कशुक्राणांप्रतिमां
तदा २ अतीवसुशुभेरूपंव्योमतस्योत्पतिष्यतः वैनतेयस्यभद्रंतेबृंहितहरितेजसा ३ अथाष्टबाहुःकृष्णस्तुपर्वताकारसंनिभः बिभ्रो
पुंडरीकाक्षोविकांक्षन्बाणसंयुगम् ४ असिचक्रगदाबाणादक्षिणंपार्श्वमास्थिताः वर्मशार्ङ्गंतथाचापंशंखंचैवास्यवामतः ५ शीर्षाणां
वैसहस्रंतुविहितंशार्ङ्गधन्वना सहस्रंचैवकायानांवहन्संकर्षणस्तदा ६ श्वेतप्रहरणोधृष्यःकैलासइवशृंगवान् प्रस्थितोगरुडेनाथउ
द्यन्निवदिवाकरः ७ सनत्कुमारस्यवपुःप्रादुरासीन्महात्मनः प्रद्युम्नस्यमहाबाहोःसंग्रामेविक्रमिष्यतः ८ सपक्षबलविक्षेपैर्विधुन्वन्
पर्वतान्बहून् जगाममार्गंबलवान्वातस्यप्रतिषेधयन् ९ अथवायोरतिगतिमास्थायगरुडस्तदा सिद्धचारणसंघानांशुभंमार्गमवा
तरत् १० अथरामोब्रवीद्वाक्यंकृष्णमप्रतिमंरणे स्वाभिःप्रभाभिर्हीनाःस्मकृष्णकस्मादपूर्ववत् ११ सर्वेकनकवर्णाभाःसंवृताःस्मन
संशयः किमिदंब्रूहिनस्तत्त्वंकिंमेरोःपार्श्वगावयम् १२ श्रीभगवानुवाच मन्येबाणस्यनगरमभ्यासस्थमरिंदम रक्षार्थंतस्य
निर्यातोवन्हिरेषःस्थितोज्वलन् १३ अग्नेराहवनीयस्यप्रभयास्मसमाहताः तेननोवर्णवैरूप्यमिदंजातंहलायुध १४ रामउवाच
यदिस्मसन्निकर्षस्थायदिनिःप्रभतांगताः तद्विधत्स्वस्वयंबुध्यायदत्रानंतरंहितम् १५ श्रीभगवानुवाच कुरुष्ववैनतेयत्वंयच्चका
र्यमनंतरम् त्वयाविधानेविहितेकरिष्याम्यहमुत्तमम् १६
सहस्रंअनंतंशीर्ष्णा ६ ७ ८ पक्षयोर्बलेनयेविक्षेपास्तैः ९ १० ११ १२ १३ १४ १५ १६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

१७ १८ १९ २० २१ २२ २३ विस्मयंमापुरितिशेषः २४ २५ २६ २७ २८ २९ ३० ३१ ३२

वैशंपायनउवाच एतच्छ्रुत्वातुगरुडोवासुदेवस्यभाषितम् चक्रेमुखसहस्राणिकामरूपीमहाबलः १७ गंगामुपागमत्तूर्णंवैन
तेयोमहाबलः आप्लुत्याकाशगंगायामापीयसलिलंबहु १८ प्रववर्षोपरिगतोवैनतेयःप्रतापवान् तेनाग्निंशमयामासबुद्धिमान्वि
नतात्मजः १९ अग्निराहवनीयस्तुततःशांतिमुपागमत् तंदृष्ट्वाहवनीयंतुशांतमाकाशगंगया २० परंविस्मयमागत्यासुपर्णोवाक्य
मब्रवीत् अथोवीर्यमथाग्नेस्तुयोदहेद्युगसंक्षये २१ त्रयस्त्रयाणांलोकानांपर्याप्ताइतिमेमतिः कृष्णःसंकर्षणश्चैवप्रद्युम्नश्चमहाब
लः २२ ततःप्रशांतेदहनेसंप्रतस्थेसपक्षिराट् स्वपक्षबलविक्षेपंकुर्वन्घोरंमहास्वनम् २३ तांदृष्ट्वाविस्मयंतत्ररुद्रस्यानुचराग्नयः
आस्थितागरुडस्तेनानारूपाभयावहाः २४ किमर्थमिहसंप्राप्ताःकेवापीमेजनास्त्रयः निश्चयंनाधिगच्छंतितेगिरिव्रजवह्नयः २५
प्रावर्तयंश्चसंग्रामंतेत्रिभिःसहयादवैः तेषांयुद्धप्रसक्तानांसनादःसुमहानभूत् २६ तंचश्रुत्वामहानादंसिंहानामिवगर्जताम् अ
थांगिराःस्वपुरुषंप्रेषयामासबुद्धिमान् २७ यत्रतद्वर्ततेयुद्धंतत्रगच्छस्वमाचिरम् दृष्ट्वातत्सर्वमागच्छइत्युक्तःप्रहितस्त्वरन् २८ तथे
त्युक्त्वासतद्युद्धंवर्तमानमवेक्षत अग्नीनांवासुदेवेनसंसक्तानांमहामृधे २९ तेजातवेदसःसर्वेकल्माषःकुसुमस्तथा दहनःशोषण
श्चैवतपनश्चमहाबलः ३० स्वाहाकारस्यविषयेप्रख्याताःपंचवह्नयः अथापरेमहाभागाःस्वेस्वेनीकेव्यवस्थिताः ३१ पिठरःपतगःस्वर्णः
स्वागाधोभ्राजएवच स्वधाकाराश्रयाःपंचअयुध्यंस्तेपिचाग्नयः ३२ ज्योतिष्टोमविभागौचवषट्काराश्रयौपुनः द्वावग्नीसंप्रयुध्येतेमहा
त्मानौमहाद्युती ३३ आग्नेयंरथमास्थायशरमुद्यम्यभास्वरम् तयोर्मध्येगिराश्चैवमहर्षिर्विबभौरणे ३४ स्थितमंगिरसंदृष्ट्वाविमुंच
तंशितान्शरान् कृष्णःप्रोवाचसंक्रुद्धःस्मयन्निवपुनःपुनः ३५ तिष्ठध्वमग्नयःसर्वेएषवोविदधेभयम् ममास्त्रतेजसादग्धादिशोयास्य
थविद्रुताः अथांगिराःस्त्रिशूलेनदीप्तेनसमधावत ३६ आददानइवक्रोधात्कृष्णप्राणान्महामृधे त्रिशूलंतस्यदीप्तंतुचिच्छेदपरमेषुभिः
अर्धचंद्रैस्तथातीक्ष्णैर्यमार्कदहनप्रभैः ३७ स्थूणाकर्णेनबाणेनदीप्तेनसमहात्मनाः विव्याधातकतुल्येनवक्षस्यांगिरसंततः ३८ रुधि
रौघप्लुतेगात्रेरंगिराविह्वलन्निव विष्टब्धगात्रःसहसापपातधरणीतले ३९ शेषास्ततोग्नयःसर्वेचत्वारोब्रह्मणःसुताः आधावंस्तदाशी
घ्रंबाणस्यपुरसंनिकात् ४० अथागमत्ततःकृष्णोयत्रबाणपुरंततः अथबाणपुरंदृष्ट्वादूरात्सोवाचनारदः ४१

३३ अंगिराः मुख्योग्निः ३४ ३५ ३६ ३७ ३८ स्थूणातुल्योकर्णोतिर्यक्फलकेयस्यतेनस्थूणाकर्णेन ३९ ४० ४१ ६२ ६२

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७

एतत्तच्छोणितपुरंकृष्णपश्यमहाभुज अत्ररुद्रोमहातेजारुद्राण्यासहितोवसत् ४२ गुहश्चबाणगुप्त्यर्थंसततंक्षेमकारणात् नारद
स्यवचःश्रुत्वाकृष्णःस्त्विदमथाब्रवीत् ४३ क्षणंचिंतयतामत्रश्रूयतांचमहामुने यदिवावतरेद्रुद्रोबाणसंरक्षणंप्रति ४४ शक्तितोव
यमप्यत्रसहयोत्स्यामतेनवै एवंविवदतोस्तत्रकृष्णनारदयोस्तदा ४५ प्राप्तानिमेषमात्रेणशीघ्रगागरुडेनते ततःशंखंसमाधायवद
नेपुष्करेक्षणः ४६ वायुवेगसमुद्भूतोमेघश्चंद्रमिवोद्गिरन् ततःप्रध्माप्यतंशंखंभयमुत्पाद्यवीर्यवान् ४७ प्रविवेशपुरंकृष्णोबाणस्याद्भुत
कर्मणः ततःशंखप्रणादेश्चभेरीणांचमहास्वनैः ४८ बाणानीकानिसहस्रासंनह्यतसमंततः ततःकिंकरसैन्यंतुव्यादिष्टंसमरेभयात्
४९ कोटिशश्चापिबहुशोदीप्तप्रहरणास्तदा तदसंख्येयमेकस्थंमहाभ्रघनसंनिभम् ५० नीलांजनचयप्रख्यमप्रमेयमथाक्षयम् दी
प्तप्रहरणाःसर्वेदैत्यदानवराक्षसाः ५१ प्रमाथगणमुख्याश्च अयुध्यन्कृष्णमव्ययम् सर्वतस्तैःप्रदीप्तास्यैःसार्चिष्मद्भिरिवाग्निभिः ५२
अभ्युपेत्यतदात्युग्रैर्यक्षराक्षसकिन्नरैः पीयतेरुधिरंतेषांचतुर्णामपिसंयुगे ५३ तद्बलंतुसमासाद्यबलभद्रोमहाबलः प्रोवाचवचनं
तत्रपश्यस्वबलनाशनम् ५४ कृष्णकृष्णमहाबाहोविधत्स्वैषांमहद्भयम् इतिसंचोदितःकृष्णोबलभद्रेणधीमता ५५ तेषांवधार्थं
माग्नेयंजग्राहपुरुषोत्तमः अस्त्रमस्त्रविदांश्रेष्ठोयमांतकसमप्रभः प्रविधूयास्त्रगणान्क्रव्यादानस्त्रतेजसा ५६ प्रययौत्वरयायुक्तो
यत्रहस्यंतत्तद्बलम् शूलपट्टिशशक्त्यृष्टिपिनाकपरिघायुधम् ५७ प्रमाथगणभूयिष्ठंबलंतदभ्युपक्षितौ शैलमेघप्रतीकाशैर्नानारू
पैर्भयानकैः वाहनैःसुघोराःसर्वेयोधास्तत्रावतस्थिरे ५८ वातोद्भूतैरिवघनैर्विप्रकीर्णैरिवाचलैः शुशुभेतत्रबहुलैरनीकैर्दृढधन्वि
भिः मुसलैरसिभिःशूलैर्गदाभिःपरिघैस्तथा ५९ अबाधंतदसंख्येयंशक्रकुंभेसर्वतोबलम् ततःसंकर्षणोदेवमुवाचमधुसूदनम् ६०
कृष्णकृष्णमहाबाहोयदेतद्दृश्यतेफलम् एतैःसहरणेयोद्धुमिच्छामिपुरुषोत्तम ६१ श्रीकृष्णउवाच ममाप्येवंसंजाताबु
द्धिरित्यब्रवीच्चतम् एभिःसहरणेयोद्धुमिच्छेयंयोधसत्तमैः ६२ युध्यतमाश्चमुखस्यास्त्वक्रपणौविभ्रमायतः सव्यपक्षेस्थात्मनस्तथा
मेदक्षिणेभवान् रक्षितव्यमथान्योन्यमस्मिन्घोरेमहामृधे ६३ वैशंपायनउवाच एवंब्रुवंतस्तेन्योन्यमधिरूढाःखगेश्वरम्
गिरिशृंगनिभैःसुदृढैर्गदामुसललांगलैः ६४ युध्यतोरौहिणेयस्यरौद्ररूपमभूत्तदा युगांतेसर्वभूतानांकालस्येवदिधक्षतः ६५ आकृष्यलां
गलाग्रेणमुसलेनावपोथयत् चचारातिबलोरामोयुद्धमार्गविशारदः ६६

५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रद्युम्नःशरजालैस्तान्समंतात्पर्यवारयत् दानवान्पुरुषव्याघ्रोयुध्यमानान्महाबलः ६७ स्निग्धांजनचयप्रख्यःशंखचक्रगदाधरः आ
ध्मापयन्बहुशःशंखमयुध्यतजनार्दनः ६८ पक्षप्रहारनिहतानखतुंडाग्रदारिताः नीताविवस्वतपुरंवैनतेयेनधीमता ६९ तद्दृष्ट्वासुमहद्दैत्या
नामनीकंभीमविक्रमम् अभज्यततदासंख्येबाणवर्षसमाहतम् ७० भज्यमानेस्वनीकेषुभ्रातुकामःसमभ्ययात् ज्वरस्त्रिपात्त्रिशिराः
षड्भुजोनवलोचनः ७१ भस्मप्रहरणोरौद्रःकालांतकयमोपमः नदन्मेघसहस्रेणतुल्योनिर्घातनिःस्वनः ७२ निःश्वसन्जृंभमाणश्चनि
द्रान्विततनुभृशम् नेत्राभ्यामाकुलंवक्रमुहुःकुर्वन्भ्रमन्मुहुः ७३ संहृष्टरोमाग्लानाक्षोभग्नचित्तइवश्वसन् हलायुधमभिक्रुद्धः
साक्षेपमिदमब्रवीत् ७४ किमेवंबलमत्तोसिनमांपश्यसिसंयुगे तिष्ठतिष्ठनमेजीवन्मोक्ष्यसेरणमूर्द्धनि ७५ इत्येवमुक्त्वामहसन्हला
युधमुपाद्रवत् युगांताग्निनिभैर्घोरैर्मुष्टिभिर्जनयन्भयम् ७६ चरतस्तत्रसंग्रामेमंडलानिसहस्रशः रौहिणेयस्यशीघ्रेणनावस्थानम
दृश्यत ७७ तस्यभस्मतदाक्षिप्तंज्वरेणाप्रतिमौजसा शीघ्राद्वक्षोनिपतितंशरीरेपर्वतोपमे ७८ तद्भस्मवक्षसस्तस्यमेरोःशिखरमाग
मत् प्रदीप्तंपतितंतत्रगिरिशृंगंव्यदारयत् ७९ शेषेणवापिजज्वालभस्मनाकृष्णपूर्वजः निःश्वसन्जृंभमाणश्चनिद्रान्विततनुभृशम्
८० नेत्रयोराकुलत्वंचमुहुःकुर्वन्भ्रमंस्तथा संहृष्टरोमाग्लानाक्षःक्षिप्तचित्तइवश्वसन् ८१ ततोहलधरोभग्नःकृष्णमाहविचेतनः
कृष्णकृष्णमहाबाहोप्रतीपोस्यभयंकुरु ८२ दह्यामिसर्वतस्तातकथंशांतिर्भवेन्मम इत्येवमुक्तेवचनेबलेनामिततेजसा ८३ प्रहस्य
वचनंप्राहकृष्णःप्रहरतांवरः नभेतव्यमितीत्युक्त्वापरिष्वक्तोहलायुधः ८४ कृष्णेनपरमस्नेहात्ततोदाहात्प्रमुच्यत मोक्षयित्वाबलं
तत्रदाहात्तुमधुसूदनः ८५ प्रोवाचपरमक्रुद्धोवासुदेवोज्वरंतदा श्रीभगवानुवाच एह्येहिज्वरयुध्यस्वयातेशक्तिर्महामृधे ८६
यच्चतेपौरुषंसर्वंतद्दर्शयतुनोभवान् सव्येतराभ्यांबाहुभ्यामेवमुक्तोज्वरस्तदा ८७ चिक्षेपैनंसहद्भस्मज्वालागर्भंमहाबलः ततःप्रदी
प्तगात्रस्तुमुहूर्त्तमभवत्प्रभुः ८८ कृष्णःप्रहरतांश्रेष्ठःशमंचाग्निर्गतस्ततः ततस्तैर्भुजगाकारैर्बाहुभिस्तत्रिभिस्तदा ८९ जघानकृ-
ष्णग्रीवायांमुष्टिनैकेनचोरसि समंप्रहारस्तुमुलस्तयोःपुरुषसिंहयोः ९० ज्वरस्यतुमहायुद्धेकृष्णस्यतुमहौजसः पर्वतेषुपततांनाम
शनीनामिवस्वनः ९१ कृष्णज्वरभुजाघातैर्युद्धमासीत्सुदारुणम् नैवमेवंप्रहर्त्तव्यमितितत्रमहात्मनः मुहूर्त्तमभवद्युद्धमन्योन्यंतुमहा
त्मनोः ९२ ७६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९३ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांशतोपरिद्वाविंशोऽध्यायः १२२ मृतमिति १ २ ३ ४ ५ ६ ७ ८ ९ १०

ततोज्वरंकनकविचित्रभूषणन्यपीडयद्भुजबलयेनसंयुगे जगत्क्षयंसमुपनयन्जगत्पतिःशरीरधृक्गगनचरंमहामृधे ९३ इतिश्री
महाभारतेखिलेषुहरिवंशेविष्णुपर्वणिकृष्णज्वरयुद्धेशतोपरिद्वाविंशोऽध्यायः १२२ वैशंपायनउवाच मृतमित्यभिविज्ञायज्व
रशत्रुनिषूदनः कृष्णोभुजबलाभ्यातुचिक्षेपाथमहीतले १ मुक्तगात्रःसबाहुभ्यांकृष्णदेहंविवेशह असुक्तविग्रहतस्यकृष्ण-
स्यामितौजसः २ सह्याविष्टस्तदातेनज्वरेणाप्रतिमौजसा कृष्णःस्खलन्निवमुहुःक्षितौगाढव्यवर्त्तत ३ जृंभतेश्वसतेचैववल्गते
चपुनःपुनः रोमांचोत्थितगात्रश्चनिद्रयाचाभिभूयते ४ ततस्थैर्यंसमालंब्यकृष्णःपुरपुरंजयः विकुर्वतिमहायोगीजृंभमाणःपुनःपु
नः ५ ज्वराभिभूतमात्मानंविज्ञायपुरुषोत्तमः सोसृजज्ज्वरमन्यंतुपूर्वज्वरविनाशनम् ६ घोरंवैष्णवमत्युग्रंसर्वप्राणिभयंकरम् संसृ
ष्टवान्सतेजस्वीतज्ज्वरंभीमविक्रमम् ७ ज्वरःकृष्णविसृष्टस्तुगृहीत्वातंज्वरंबलात् कृष्णायहृष्टःप्रायच्छत्तंजग्राहततोहरिः ८
ततस्तंपरमक्रुद्धोवासुदेवोमहाबलः स्वगात्रात्स्वजरेणैवनिष्क्रामयतवीर्यवान् ९ आविध्यभूतलेचैनंशतधाकर्त्तुमुद्यतः व्याघोषत
ज्वरस्तत्रभोःपरित्रातुमर्हसि १० आविध्यमानेतस्मिंस्तुकृष्णेनामिततेजसा अशरीराततोवाणीह्यंतरिक्षादभाषत ११ कृष्णकृष्ण
महाबाहोयदूनानंदिवर्धन मावधीर्ज्वरमेनंतुरक्षणीयस्त्वयानघ १२ इत्येवमुक्तेवचनेतंमुमोचहरिःस्वयम् भूतभव्यभविष्यस्यजग
तःपरमोगुरुः १३ कृष्णस्यपादयोर्मूर्ध्नाशरणंसोगमज्ज्वरः एवमुक्तोहृषीकेशंज्वरोवाक्यमथाऽब्रवीत् १४ शृणुष्वममगोविंदविज्ञाप्य
यदुनंदन योमेमनोरथोदेवतंत्वंकुरुमहाभुज १५ अहमेकोज्वरस्तातनान्योलोकेज्वरोभवेत् त्वत्प्रसादाद्धिदेवेशवरमेनंवृणोम्यहम्
१६ देवउवाच एवंभवतुभद्रंतेयथात्वंज्वरकांक्षसे वरार्थिनावरोदेयोभवांश्चशरणंगतः १७ एकएवज्वरोलोकेभवानस्तुय-
थापुरा योमयाज्वरःसृष्टोमय्येवैषःप्रलीयताम् १८ वैशंपायनउवाच एवमुक्तेतुवचनेज्वरंप्रतिमहायशाः कृष्णःप्रहृ
ष्टःपुनर्वाक्यमुवाचह १९ वासुदेवउवाच शृणुष्वज्वरसंदेशंयथालोकेचरिष्यसि सर्वजातिषुविस्रब्धंयथास्थावरजंगमे
२० त्रिधाविभज्यचात्मानंमत्प्रियंयदिकांक्षसे चतुष्पदान्भजेकेनद्वितीयेनचस्थावरात् २१ तृतीयोयश्चतेभागोमानुषेषूपपत्स्यते
त्रिधाभूतंवपुःकृत्वापक्षिषुत्वंभवज्वर २२

११ १२ १३ १४ १५ १६ १७ १८ १९ २० त्रिधेति त्वंत्रिधाभूतंवपुःकृत्वाचतुष्प
दादिषुभवेद्यथाहत्वयोज्यंतथादृतीयस्यभागस्यचतुर्थांशः सपक्षिषुभुवोभविष्यतीतियोजना २१ २२ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२३ २४ आतूर्यएकप्रदेशेजालकेनसंकोचः २५ २६ अपस्मारकः भूत्वावेशः खोरकश्चरणरोगः २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५

चतुर्थोयस्तृतीयस्यभविष्यतिसतेऽनवम् एकांतरस्तृतीयस्तुसर्वेचातुर्थिकोज्वरः २३ मानुषेष्वभिभेदेनवसत्वंप्रविभज्यवै जाति
ष्वथावशेषास्त्वंनिवसत्वंशृणुश्वमे २४ वृक्षेषुकीटरूपेणतथासंकोचपत्रकः पांडुपत्रश्चविख्यातः फलेचातूर्यमेवच २५ अपां-
तुनीलिकांविद्यात्शिखोद्भेदनबर्हिणाम् मध्विन्यांदोहिमोभूत्वापृथिव्यामपिचोषरः २६ गैरिकःपर्वतेष्वेवमत्प्रसादाद्भविष्यसि
गोष्वपस्मारकोभूत्वाखोरकश्चभविष्यसि २७ एवंत्वंबहुरूपेणभविष्यसिमहीतले दर्शनात्स्पर्शनाच्चापिप्राणिनांवधमेष्यसि २८
ऋतेदेवमनुष्याख्यानान्यस्तुविसहिष्यति वैशंपायनउवाच कृष्णस्यवचनंश्रुत्वाज्वरोहृष्टमनाह्यभूत् २९ प्रोवाचवचनंकिंचि
त्प्रणामित्वाकृतांजलिः ज्वरउवाच सर्वजातिप्रभुत्वेनकृतोधन्योस्मिमाधव ३० भूयश्चतेवचःकर्तुमिच्छामिपुरुषर्षभ तदाज्ञा
पयगोविंदकिंकरोमिमहाभुज ३१ अहमसुरकुलप्रमाथिनात्रिपुरहरेणहरेणनिर्मितः रणशिरसिविनिर्जितस्त्वयाप्रभुरसिदेव
तवास्मिकिंकरः ३२ धन्योस्म्यनुग्रहीतोस्मियत्त्वयामत्प्रियंकृतम् आज्ञापयप्रियंकिंतेचक्रायुधकरोम्यहम् ३३ वैशंपायनउवाच
ज्वरस्यवचनंश्रुत्वावासुदेवोब्रवीद्वचः अभिसंधिंशृणुष्वाद्ययन्त्वांवक्ष्यामिनिश्चयात् ३४ श्रीभगवानुवाच महाहवेत्वमस
न्नहयोरिसपराक्रमभुजबलकेवलास्त्रयोः प्रणम्यमामेकमनाःपठेत्तुयःसवैभवेत्स्वरविगतज्वरोनरः ३५ त्रिपाद्भस्मप्रहरणस्त्रि
शिरानवलोचनः समेप्रीतःसुखंदद्यात्सर्वामयपतिर्ज्वरः ३६ आद्यंतवंतःकवयःपुराणाःसूक्ष्मात्महांतोप्यनुशासितारः सर्वान्ज्वरान्
घ्नंतुममानिरुद्धप्रद्युम्नसंकर्षणवासुदेवाः ३७ वैशंपायनउवाच एवमुक्तस्तुकृष्णेनज्वरःसाक्षान्महात्मना प्रोवाचयदुशा
र्दूलसेवमेतद्भविष्यति ३८ वरंलब्ध्वाज्वरोहृष्टःकृष्णाच्चसमयंपुनः प्रणम्यशिरसाकृष्णमपक्रांतस्ततोरणात् ३९ इतिश्रीमहा-
भारतेखिलेषुहरिवंशेविष्णुपर्वणिज्वरकृष्णसंवादोनामशतोपरित्रयोविंशोऽध्यायः १२३ वैशंपायनउवाच ततस्तेत्वरिताः
सर्वेत्रयस्त्रयइवाग्नयः वैनतेयसमारुह्ययुध्यंतरणमूर्द्धनि १ ततःसर्वाण्यनीकानिबाणवर्षैरवाकिरन् अर्दयन्वैनतेयस्थानदतीति
बलादृणे २ चक्रलांगलवातैश्चबाणवर्षैश्चपीडितम् सत्तुकोपमहानीकंदानवानांदुरासदम् ३ कक्षेग्निरिवसंवृद्धःशुष्केंधनसमीरि
तः कृष्णबाणाग्निरुत्सृतोविवृद्धिंपरमागतः ४ दानवानांसहस्राणितस्मिन्समरमूर्द्धनि युगांताग्निरिवार्चिष्मान्दहमानोव्यराजत ५

३६ ३७ ३८ ३९ इतिश्रीम॰खि॰ह॰वि॰टी॰ शतोपरित्रयोविंशोऽध्यायः १२३ ततइति१ अर्दयन् अपीडयन् अडभावआर्षः २ ३ ४ दहमानःदहन् ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६ ७ ८ ९ अचिंतयन् अचिंतयंतः १० ११ १२ १३ १४ १५ १६ १७ १८ देवस्यरथः शोभयन् दिशइतिशेषः १९ २०

तांदीप्यमानांमहतींनानाप्रहरणार्दिताम् सेनांबाणःसमासाद्यवारयन्वाक्यमब्रवीत् ६ लाघवंसमुपागम्यकिमर्थंभयविक्लवाः
दैत्यवंशाःसमुत्पन्नाःपलायध्वंमहाहवात् ७ कवचासिगदाप्रासखड्गचर्मपरश्वधान् उत्सृज्योत्सृज्यगच्छंतिकिंभवंतोंतरिक्षगाः ८
स्वजातिंचैववासंचहरसंसर्गमेवच मानयद्भिर्नगंतव्यमेषोप्यहमवस्थितः ९ एवमुच्चरितवाक्यंशृण्वतस्तदचिंतयन् अपक्रामं
ततःसर्वेदानवाभयमोहिताः १० प्रमाथगणशेषंतुतदनीकमतिष्ठत भग्नावशेषंयुद्धायपुनश्चक्रेमनस्तदा ११ कुंभाडोनामबाण
स्यसखामात्यश्चवीर्यवान् भग्नंस्वबलमालोक्यइदंवचनमब्रवीत् १२ एषबाणःस्थितोयुद्धेशंकरोयंगुहस्तथा किमर्थंबलमुत्सृज्य
भवंतोयांतिमोहिताः १३ एवंकुंभाडवाक्यंतेशृण्वंतोभयविह्वलाः एकांतेभयवित्रस्ताःसर्वेयांतिदिशोदश १४ भग्नबलंततोदृष्ट्वा
कृष्णोनामिततेजसा संरक्तनयनःस्थाणुर्युद्धायपर्यवर्तत १५ बाणसंरक्षणंकर्तुंरथमास्थायरुक्मभम् देवःकुमारश्चतथारथेना
ग्निसमेनवै १६ नंदीश्वरसमायुक्तंरथमास्थायवीर्यवान् संदष्टोष्ठपुटोरुद्रःप्राधावतयतोहरिः १७ पिबन्निवयथाकाशंसिंहसु-
क्तोमहास्वनः रथोभातिघनोन्मुक्तःपौर्णमास्यांयथाशशी १८ ततोगणसहस्रैस्तैर्नानारूपैर्भयावहैः नदद्भिर्विविधान्नादान्रथो
देवस्यशोभयन् १९ केचित्सिंहमुखास्तत्रतथाव्याघ्रमुखाःपरे नागाश्चोष्ट्रमुखास्तत्रप्रवेपुरतिपीडिताः २० व्यालयज्ञोपवीताश्च
केचित्तत्रमहाबलाः खरोष्ट्रगजवक्त्राश्चअश्वग्रीवाश्चसंस्थिताः २१ छागमार्जारवक्त्राश्चमेषवक्त्रास्तथापरे चीरिणःशिखि
नश्चान्येजटिलोर्ध्वशिरोरुहाः २२ लग्नाःपरिपतंतिस्मशंखदुंदुभिनिःस्वनैः केचित्सौम्यमुखास्तत्रदिव्यैःशस्त्रैरलंकृताः २३ना
नापुष्पकृतापीडानानाप्रहरणायुधाः वामनाविकटाश्चैवसिंहव्याघ्रपरिच्छदाः २४ रुधिरार्द्रेमहावक्त्रेमहादंष्ट्राबलिप्रियाः दे-
वंसंपरिवार्यायंमहाशत्रुप्रमर्दनम् २५ लीलायमानास्तिष्ठंतिसर्वाःसाभिमुखोन्मुखाः ततोदिव्यंरथंदृष्ट्वारुद्रस्याक्लिष्टकर्मणः
२६ कृष्णोगरुडमास्थायययोरुद्रायसंयुगे वैनतेयस्थमस्यंतमायांतमप्रणीहरिम् २७ विव्याधकुपितोबाणैर्नाराचानांशतेन
सः सशरैरर्दितस्तेनहरेणाक्लिष्टकर्मणा २८ हरिर्जग्राहकुपितोथशंखंपांचजन्यमुत्तमम् प्रचचालततोभूमिर्विष्णुरुद्रप्रपीडिता
२९ नागाश्चोर्ध्वमुखास्तत्रविचेलुरभिपीडिताः पर्वताःपतितास्तत्रजलधाराभिराप्लुताः ३०

२१ जटिलाश्चऊर्ध्वशिरोरुहाश्चेतिद्वंद्वः २२ लग्नाः
अन्योन्यसंसक्ताःभूमाविति शेषः २३ २४ २५ अभिमुखाःसादराःउन्मुखाः शत्रोरंतरिक्षस्थत्वात् अभिमुखाश्चतेउन्मुखाश्चेतिविग्रहः २६ २७ २८ २९ ३०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५६ विनिःसृतोबाणः सागरतोयवासात् समुद्रनिकटस्थानात् स्वस्थानात् ५७ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांशतोपरिचतुर्विंशि
तितमोऽध्यायः १२४ अंधकारीति १ चतुर्मुखः ब्रह्मणासहितः चतुर्मुखमितिपाठेबाणविशेषणंचतुर्धाशल्योपेतमित्यर्थः २ ३ ४ ५ मूर्तात्माकृष्णः ६
७ ८ ९ १० ११ १२ एकार्णवाभविष्येसंधिरार्षः १३ १४ १५ १६ १७ ततःब्रह्मोपदेशानंतरंभगवान्रुद्रः शरीरेंतर्योगः प्रणिधानंतस्मात् ध्यानेने

वातप्रवृद्धस्तुतरंगसंकुलोयथार्णवोलोकविनाशनाय भीमानिसंत्रासकरैर्वपुर्भिस्तान्यग्रतोभांतिबलानितस्य ५६ महारथान्युच्छ्रि
तकार्मुकाणिसपर्वतान्नीववनानिराजन् विनिस्सृतः सागरतोयवासादत्यद्भुतश्चाहवदृष्टकामः ५७ इतिश्रीम० खि० ह० वि० रुद्रकृ-
ष्णयुद्धशतोपरिचतुर्विंशोऽध्यायः १२४ वैशंपायनउवाच अंधकारिकृतेलोकेप्रदीप्तेत्र्यंबकेतथा ननंदीनापिचरथोनरुद्रःप्रत्य
दृश्यत १ द्विगुणंदेहदीप्तस्तुरोषेणचबलेनच त्रिपुरांतकरोबाणंजग्राहसचतुर्मुखः २ संदधत्कार्मुकेचैव क्षेप्तुकामस्त्रिलोचनः विज्ञा
तोवासुदेवेनचित्रज्ञेनमहात्मना ३ जृंभणंनामसोप्यास्त्रजग्राहपुरुषोत्तमः हरंसंजृंभयामासक्षिप्रकारीमहाबलः ४ सशरः सधनुश्चैव
हरस्तेनास्त्रजृंभितः संज्ञानलेभेभगवान्विजेतासुररक्षसाम् ५ बलोन्मत्तोथबाणोसौशर्वंचोदयतोसकृत् ततोननादमूर्तात्मास्निग्ध
गंभीरयागिरा ६ प्रध्मापयामासतदाकृष्णः शंखंमहाबलः पाञ्चजन्यस्यघोषेणशार्ङ्गविस्फूर्जितेनच ७ देवविजृंभितंदृष्ट्वासर्वभूतानि
तत्रसुः एतस्मिन्नंतरेतत्ररुद्रस्यपार्षदारणे ८ मायायुद्धंसमाश्रित्यप्रद्युम्नपर्यवारयन् सर्वांस्तुनिद्रावशगान्कृत्वामकरकेतुमान् ९
दानवान्नाशयत्तत्रशरजालेनवीर्यवान् प्रमाथगणभूयिष्ठांस्तत्रतत्रमहाबलान् १० ततस्तुजृंभमाणस्यदेवस्याक्लिष्टकर्मणः ज्वालामा
लुरभूद्वक्त्राद्दहतीवदिशोदश ११ ततस्तुधरणीदेवीपीड्यमानामहात्मभिः ब्रह्माणंविश्वधातारंवेपमानाभ्युपागमत् १२ पृथिव्युवा०
देवदेवमहाबाहोपीड्यामिपरमौजसा कृष्णारुद्रभराक्रांताभविष्येकार्णवापुनः १३ अविषह्यमिमंभारंचितयस्वपितामह लघ्वीभूता
यथादेवधारयेयंचराचरम् १४ ततस्तुकाश्यपीदेवीमित्युवाचपितामहः मुहूर्तंधारयात्मानमास्तुलघ्वीभविष्यसि १५ वैशंपायनउवाच
दृष्ट्वातुभगवान्ब्रह्मारुद्रंवचनमब्रवीत् सृष्टोमहासुरवधः किंभूयः परिरक्ष्यसे १६ नचयुद्धंमहाबाहोतवकृष्णेनरोचते नचबुध्यसि
कृष्णात्वमात्मानंतुद्विधाकृतम् १७ ततः शरीरयोगाद्धिभगवानव्ययः प्रभुः प्रविश्यपश्यतेकृत्स्नांस्त्रीन्लोकान्सचराचरान् १८ प्रवि-
श्ययोगंयोगात्मावराख्यानमनुचिंतयन् द्वारवत्यांयदुक्तंचतदनुस्मृत्यसर्वशः जगादनोत्तरंकिंचिन्निवृत्तोसौभवत्तदा १९ आत्मानंकृष्ण-
योनिस्थंपश्यतेह्येकयोनिजम् ततोनिःसृत्यरुद्रस्तुन्यस्तवादोभवन्मृधे २० त्यर्थः प्रविश्यहार्दंब्रह्मेतिशेषः १८ १९ कृष्णयोनिस्थंकृष्णस्यफलोपमस्य
योनिः कारणंभूमिस्थानीयंशुद्धंपरंब्रह्म कृष्णंआत्मानंचशुद्धब्रह्मैकतांगतंयुगपत् पश्यन्उभयोरेकयोनित्वमपश्यत् ततःस्वप्रत्यगात्मनासहस्वस्यविरोधासंभवात्-
रुद्रोमृधेयुद्धविषयेन्यस्तवादोऽपास्तप्रतिज्ञोबभूव २० ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

केचिन्मुमुचिरेतत्र शिखराणिसमंततः दिशश्चप्रदिशश्चैव भूमिराकाशमेवच ३१ प्रदीप्तानीवदृश्यंतेस्थाणुकृष्णसमागमे समं
ततश्चनिर्घाताः पतंतिधरणीतले ३२ शिवाश्चैवाशिवान्नादान्नदंतेभीमदर्शनाः वासवश्चानदन्घोरंरुधिरंचाप्यवर्षत ३३ उ-
ल्काचबाणसैन्यस्यपुच्छेनावृत्यतिष्ठति प्रववौमारुतश्चापिज्योतींष्याकुलतामियुः ३४ प्रभाहीनास्तथौषध्योनचरंत्यंतरिक्षगाः
एतस्मिन्नंतरेब्रह्मासर्वदेवगणैर्वृतः ३५ त्रिपुरांतकमुद्यंतंज्ञात्वारुद्रमुपागमत् गंधर्वाप्सरसश्चैवयक्षाविद्याधरास्तथा ३६ सिद्ध
चारणसंघाश्चपश्यंतोथदिविस्थिताः ततःपार्जन्यमस्त्रंतत्क्षिप्तंरुद्रायविष्णुना ३७ ययौज्वलन्नथतदायतोरुद्रोरथस्थितः
ततःशतसहस्राणिशराणानतपर्वणाम् ३८ निपेतुःसर्वतोदिग्भ्योयतोहररथस्थितः अथाग्नेयंमहारौद्रमस्त्रमस्त्रविदांवरः ३९
मुमोचरुषितोरुद्रस्तदद्भुतमिवाभवत् ततोविशीर्णदेहास्तेचत्वारोपिसमंततः ४० नादृश्यंतशरैश्छिन्नादह्यमानाश्चवह्निना सिं
हनादंततश्चक्रुःसर्वएवासुरोत्तमाः ४१ हतोयमितिविज्ञाय आग्नेयास्त्रेणवैतदा ततस्तंहिसहितंवाजोद्यस्त्रमस्त्रविदांवरः ४२
जग्राहवारुणंसोस्त्रंवासुदेवःप्रतापवान् प्रयुक्तेवासुदेवेन वारुणास्त्रेतितेजसि ४३ आग्नेयंप्रशमंयातमस्त्रंवारुणतेजसा तस्मिन्
प्रतिहतेत्वस्त्रेवासुदेवेनसंयुगे ४४ पैशाचंराक्षसंरौद्रंतथैवांगिरसंभवः मुमोचास्त्राणिचत्वारियुगांताग्निनिभानिवै ४५ वायव्य
मथसावित्रंवासवंमोहनंतथा अस्त्राणांवारणार्थायवासुदेवोप्यमुंचत् ४६ अस्त्रैश्चतुर्भिश्चत्वारिवारयित्वामुमाधवः मुमोचवै-
ष्णवंसोस्त्रंव्यादितास्यांतकोपमम् ४७ वैष्णवास्त्रेप्रयुक्तेतुसर्वएवासुरोत्तमाः भूतयक्षगणाश्चैवबाणानीकंचसर्वशः ४८ दिशः
सर्वाःप्राद्रवंतभयमोहेनविक्लवाः प्रमथगणभूयिष्ठंदीर्णंसैन्यंमहासुरः ४९ निर्जगामततोबाणायुद्धायाभिमुखस्त्वरन् भीमप्रह
रणेघोरेदैत्यश्चासुरमहाबलैः ५० वृतोमहारथैर्वीरैर्वज्रीवसुरसत्तमैः ५१ वैशंपायनउवाच जपैश्चहोमैश्चतथौषधीभिर्म
हात्मनःस्वस्त्ययनंप्रचक्रुः सतत्रवस्त्राणिशुभांश्चगावःफलानिपुष्पाणितथैवनिष्कान् ५२ बलेःसुतोब्राह्मणेभ्यःप्रयच्छन्विराज
तेतेनतथाधनेशः सहस्रसूर्योबहुकिंकिणीकःपरार्ध्यजांबूनदरत्नचित्रः ५३ सहस्रचंद्रायुततारकश्चरथोमहानग्निरिवावभाति
तमास्थितोदानवसंगृहीतमहाध्वजकार्मुकधृक्सबाणः ५४ उद्धृत्तयिष्यन्यदुपुंगवानामतीवरौद्रंसबिभर्तिरूपम् समन्युमान्
वीररथौघसंकुलोविनिर्ययौतान्प्रतिदैत्यसागरः ५५ १६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तदेवाह ब्रह्माणंचेति २१ २२ तथारुद्रकृष्णायोर्योगंसंपाद्यपश्यन्नवतस्थेइतिशेषः २३ एतत्वक्ष्यमाणंहरिरुद्रयोरभेदंउवाच २४ मंदरस्येति अत्रद्वयोः
सर्वोत्तमत्वायोगादन्यतरोजीवः इतरईश्वरस्तयोश्चाभेदःप्रतिपाद्यते अन्योन्यलक्षणयोगित्वेनेतिकेचित् तत्रापिहरिणाजितोहरोजीवइत्येके हराद्युद्धवरोह
रिर्हरंजितवान् स्वैश्वर्यादित्यन्येमानुषनाट्यानुकारित्वेनहरमाराधयन्नपिऐश्वर्यात्तंजेतुंसमर्थएवकृष्णइत्यपिकश्चित् एतेषांपाखंडापसदानांमुखभंगायेयं

ब्रह्माणंचाब्रवीद्रुद्रोनयोत्स्येभगवन्निति कृष्णेनसहसंग्रामेलघ्वीभवतुमेदिनी २१ ततःकृष्णोथरुद्रश्चपरिष्वज्यपरस्परम् परां
प्रीतिमुपागम्यसंग्रामादपजग्मतुः २२ नचतौपश्यतेकेचित्योगिनौयोगमागतौ एकोब्रह्मातथाकृत्स्नापश्यन्लोकान्पितामहः २३
उवाचैतत्समुद्दिश्यमार्कंडेयसनारदम् पार्श्वस्थंपरिपप्रच्छज्ञात्वावैदीर्घदर्शिनम् २४ पितामहउवाच मंदरस्यगिरेःपार्श्वे
नलिन्यांभवकेशवौ रात्रौस्वप्नांतरेब्रह्मन्मयादृष्टौहराच्युतौ २५ हरंचहरिरूपेणहरिंचहररूपिणम् शंखचक्रगदापाणिंपीतांबर
धरंहरिम् २६ त्रिशूलपट्टिशधरंव्याघ्रचर्मधरंहरिम् गरुडस्थंचापिहरंहरिंचवृषभध्वजम् २७ विस्मयोमेमहान्ब्रह्मन्दृष्ट्वातत्पर
माद्भुतम् एतदाचक्ष्वभगवन्याथातथ्येनसुव्रत २८ मार्कंडेयउवाच शिवायविष्णुरूपायविष्णवेशिवरूपिणे यथांतरं
नपश्यामितेनतौदिशतःशिवम् २९ अनादिमध्यनिधनमेतदक्षरमव्ययम् तदेवतेप्रवक्ष्यामिरूपंहरिहरात्मकम् ३० योविष्णुःस
तुवैरुद्रोयोरुद्रःसपितामहः एकामूर्तिस्त्रयोदेवारुद्रविष्णुपितामहाः वरदालोककर्त्तारोलोकनाथाःस्वयंभुवः ३१ अर्धनारीश्वरा
स्तेतुव्रतंतीव्रंसमास्थिताः यथाजलेजलंक्षिप्तंजलमेवतुतद्भवेत् रुद्रंविष्णुःप्रविष्टस्तुतथारुद्रमयोभवेत् ३२ अग्निमग्निःप्रविष्ट
स्तुअग्निरेवयथाभवेत् तथाविष्णुंप्रविष्टस्तुरुद्रोविष्णुमयोभवेत् ३३ रुद्रमग्निमयंविद्याद्विष्णुःसोमात्मकःस्मृतः अग्नीषोमात्म
कंचैवजगत्स्थावरजंगमम् कर्त्तारौचापहर्त्तारौस्थावरस्यचरस्यतु ३४ जगतःशुभकर्त्तारौप्रभविष्णुमहेश्वरौ कर्तृकारणकर्त्तारौक
र्तृकारणकारकौ ३५ भूतभव्यभवौदेवौनारायणमहेश्वरौ एतेचैवप्रवर्षंतिभांतिवांतिसृजंतिच ३६

कथाप्रवृत्ताब्रह्मन्नितिमार्कंडेयस्यनारदस्यवासं
बोधनं २५ हरंचेति अत्रहरिहरयोस्तात्विकेभेदेसत्यपिनटमिवहरंहरिरूपेणापश्यदितियोजनायांब्रह्मणः भ्रांतत्वमायाति अतःकायव्यूहयोगिशरीरयोर्व्यव
हारतोहरिहरसंज्ञयोर्देहयोर्भेदेपितदभिमानिनिभेदोनास्तिसर्वोत्तमत्वायोगादित्यर्थः व्यावहारिकभेदवतोस्तद्देहयोरपिभेदंनापश्यमित्याह शंखेतियएव
हरित्वेनप्रागभवत् सएवसद्योहरत्वेनदृष्टएवंपक्षांतरेपीत्यर्थः २६ २७ एतत्वहरिहरयोरभेदं आचक्ष्वलोकेप्रकाशय २८ दिशतःदिशानां २९ ३० ३१ ३२ ३३ १६५
अग्नीषोमात्मकंभोक्तृभोज्यात्मकं ३४ कर्त्ताहिरण्यगर्भः कारणानिमहाभूतानितेषांकर्त्तारौतेषांकारकौच ३५ एतेब्रह्मविष्णुरुद्राः प्रवर्षंतिपर्जन्यरूपेण वांति
वायुरूपेण भांतिसूर्यरूपेणएतद्देवतात्रयात्मकं ३६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१

एतत्परतरंगुह्यंकथितंतेपितामह यश्चैनंपठतेनित्यंयश्चैनंशृणुयान्नरः ३७ प्राप्नोतिपरमंस्थानंविष्णुरुद्रप्रसादजम् देवौहरि
हरौस्तोष्ये ब्रह्मणासहसंगतौ ३८ एतौचपरमौदेवौजगतःप्रभवाप्ययौ रुद्रस्यपरमोविष्णुर्विष्णोश्चपरमःशिवः ३९ एकएवद्विधा
भूतोलोकेचरतिनित्यशः नविनाशंकरंविष्णुर्नविनाकेशवंशिवः ४० तस्मादेकत्वमायातौरुद्रोपेंद्रौतुतौपुरा नमोरुद्रायकृष्णाय
नमःसंहतचारिणे ४१ नमःषडर्द्धनेत्रायसह्निनेत्रायवैनमः नमःपिंगलनेत्रायपद्मनेत्रायवैनमः ४२ नमःकुमारगुरवेप्रद्युम्नगुरवेन
मः नमोधरणीधरायगंगाधरायवैनमः ४३ नमोमयूरपिच्छायनमःकेयूरधारिणे नमःकपालमालायवनमालायवैनमः ४४ नमस्त्रि
शूलहस्तायचक्रहस्तायवैनमः नमःकनकदंडायनमस्तेब्रह्मदंडिने ४५ नमश्चर्मनिवासायनमस्तेपीतवाससे नमोस्तुलक्ष्मीपतयेउ-
मायाःपतयेनमः ४६ नमःखट्वांगधारायनमोमुशलधारिणे नमोभस्मांगरागायनमःकृष्णांगधारिणे ४७ नमःश्मशानवासायनमःसा
गरवासिने नमोवृषभवाहायनमोगरुडवाहिने ४८ नमस्त्वनेकरूपायबहुरूपायवैनमः नमःप्रलयकर्त्रेचनमस्त्रैलोक्यधारिणे ४९
नमोस्तुसौम्यरूपायनमोभैरवरूपिणे विरूपाक्षायदेवायनमःसौम्येक्षणायच ५० दक्षयज्ञविनाशायबलेर्नियमनायच॥ नमःपर्व
तवासायनमःसागरवासिने ५१ नमःसुररिपुघ्नायत्रिपुरघ्नायवैनमः नमोस्तुनरकघ्नायनमःकामांगनाशिने ५२ नमस्त्वंधकनाशाय
नमःकैटभनाशिने नमःसहस्रहस्तायनमोसंख्येयबाहवे ५३ नमःसहस्रशीर्षायबहुशीर्षायवैनमः दामोदरायदेवायमुंजमेखलिने
नमः ५४ नमस्तेभगवन्विष्णोनमस्तेभगवन्शिव नमस्तेभवतेदेवनमस्तेदेवपूजित ५५ नमस्तेकर्मणाकर्मनमोमितपराक्रम हृषी
केशनमस्तेस्तुस्वर्णकेशनमोस्तुते ५६ इमंस्तवंयोरुद्रस्यविष्णोश्चैवमहात्मनः समेत्यऋषिभिःसर्वैःस्तुतोस्तोतिमहर्षिभिः ५७ व्या
सेनवेदविदुषानारदेनचधीमता भारद्वाजेनगर्गेणविश्वामित्रेणवैतथा ५८ अगस्त्येनपुलस्त्येनधौम्येनतुमहात्मना यइदंपठते-
नित्यंस्तोत्रंहरिहरात्मकम् ५९ अरोगोबलवांश्चैवजायतेनात्रसंशयः श्रियंचलभतेनित्यंनचस्वर्गान्निवर्त्तते ६० अपुत्रोलभते-
पुत्रंकन्याविंदतिसत्पतिम् गुर्विणीशृणुतेयातुवरंपुत्रंप्रसूयते ६१ राक्षसाश्चपिशाचाश्चविघ्नानिचविनायकाः भयंतत्रनकुर्वंतिय
त्रायंपठ्यतेस्तवः ६२ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिहरिहरात्मकस्तवोनामशतोपरिपंचविंशोऽध्यायः १२५

५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ इतिश्रीम०खि० ह० वि० टी० शतोपरिपंचविंशोऽध्यायः १२५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जनमेजयउवाच अपयातेततोदेवेकृष्णेचैवमहात्मनि पुनश्चासीत्कथंयुद्धंपरेषांलोमहर्षणम् १ वैशंपायनउवाच कुं
भांडसंगृहीतेतुरथेतिष्ठन्गुहस्तदा अभिदुद्रावकृष्णंचबलंप्रद्युम्नमेवच २ ततःशरशतैरुग्रैस्तान्विव्याधरणेगुहः असमर्षरोष
संक्रुद्धःकुमारःप्रवरोनदन् ३ शरसंवृतगात्रास्तेत्रयस्त्रयइवाग्नयः शोणितौघप्लुतैर्गात्रैःशाशुभ्यंतगुहंततः ४ ततस्तेयुद्धमार्गज्ञा
स्त्रयस्त्रिभिरनुत्तमैः वायव्याग्नेयपार्जन्यैर्बिभिदुर्दीप्ततेजसः ४ शैलवारुणसावित्रैस्तान्सविव्याधकोपवान् तस्यदीप्तशरौघस्य
दीप्तचापधरस्यच ६ शरौघानस्त्रमायाभिर्ग्रसंतिस्ममहात्मनः यदातदागुहःक्रुद्धःप्रज्वलन्निवतेजसा ७ अस्त्रंब्रह्मशिरोनामकाल
कल्पंदुरासदम् संदधेऽक्षपुटःसंख्येजगृहेपावकिःप्रभुः ८ प्रयुक्तेब्रह्मशिरसिसहस्रांशुसमप्रभे उग्रेपरमदुर्धर्षेलोकक्षयकरेतथा
९ हाहाभूतेषुसर्वेषुप्रधावत्सुसमंततः केशवःकेशिमथनश्चक्रंजग्राहवीर्यवान् १० सर्वेषामस्त्रवीर्याणांवारणंघातनंतथा चक्र
मप्रतिचक्रस्यलोकेख्यातमहात्मनः ११ अस्त्रंब्रह्मशिरस्तेननिःप्रभंकृतमोजसा घनैरिवातपापायेसवितुर्मंडलंयथा १२ ततोनिः
प्रभतांयातेनष्टवीर्येमहौजसि तस्मिन्ब्रह्मशिरस्यस्त्रेक्रोधसंरक्तलोचनः १३ गुहःप्रजज्वालरणेहविषेवाग्निरुल्बणः शत्रुघ्नींज्वलि
तांदिव्यांशक्तिंजग्राहकांचनीम् १४ तांप्रदीप्तांमहोल्काभांयुगांताग्निसमप्रभाम् घंटामालाकुलांदिव्यांचिक्षेपरुषितोगुहः १५ नना
दबलवच्चापिनादशत्रुभयंकरम् साचक्षिप्तातदातेनब्रह्मण्येनमहात्मना १६ जृंभमाणेवगगनेसंप्रदीप्तमुखीतदा आधावतमहा
शक्तिःकृष्णस्यवधकांक्षिणी १७ भृशंविषण्णःशक्रोपिसर्वामरगणैर्वृतः शक्तिंप्रज्वलितांदृष्ट्वादग्धःकृष्णोतिचाब्रवीत् १८ तांसमी
पमनुप्राप्तांमहाशक्तिंमहामृधे हुंकारेणैवनिर्भर्त्स्यपातयामासभूतले १९ पातितायांमहाशक्त्यांसाधुसाध्वितिसर्वशः सिंहनादंतत
श्चक्रुःसर्वदेवाःसवासवाः २० ततोदेवेषुनर्दत्सुवासुदेवःप्रतापवान् पुनश्चक्रंसजग्राहदैत्यांतकरणंरणे २१ व्याविध्यमानेचक्रेतुकृ
ष्णेनाप्रतिमौजसा कुमाररक्षणार्थायबिभ्रतीकृत्तनुंतदा २२ दिग्वासादेववचनात्प्रविष्टातत्रकोटवी लंबमानामहाभागाभागोद
व्यास्तदाष्टमः २३ चित्राकनकशक्तिस्तुसाचनग्नास्थितांतरे अथांतराकुमारस्यदेवीदृष्ट्वामहाभुजः पराङ्मुखस्ततोवाक्यमुवाच
मधुसूदनः २४ श्रीभगवानुवाच अपगच्छापगच्छत्वंधिक्त्वामितिवचोब्रवीत् किमेवंकुरुषेविघ्ननिश्चितस्यवधंप्रति २५

१६ १७ १८ १९ १६६
२० २१ २२ लंबतेपार्वत्याएवाष्टमांशाज्जाताबाणस्यमाताजीवपुत्रीत्वमेवइतिवक्ष्यमाणत्वात् २३ २४ २५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रक्षणार्थरक्षणार्थम् २६ मयासहयोत्स्यतोयुध्यतः एवंस्वस्तिभवेत् २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८

वैशंपायनउवाच श्रुत्वैवंवचनंतस्यकौटवीतुतदाविभो नैववासःसमाधत्तकुमारपरिरक्षणात् २६ श्रीभगवानुवाच अ
पवाह्यगुहंशीघ्रमपयाहिरणाजिरात् स्वस्तित्वेवंभवेदद्ययोत्स्यतोयोत्स्यतामया २७ तांचदृष्ट्वास्थितांदेवोहरिःसंग्राममूर्द्धनि संज
हारततश्चक्रंभगवान्वासुवानुजः २८ एवंकृतेतुकृष्णेनदेवदेवेनधीमता अपवाह्यगुहंदेविहरसान्निध्यमागता २९ एतस्मिन्नंतरेचै
ववर्तमानेमहाभये कुमाररक्षितेदेव्याबाणस्तंदेशमाययौ ३० अपयातगृहंदृष्ट्वामुक्तंकृष्णेनसंयुगात् बाणश्चिंतयतेतत्रस्वयंयोत्स्या
मिमाधवम् ३१ वैशंपायनउवाच भूतयक्षगणाश्चैवबाणानीकंचसर्वशः दिशःप्रदुद्रुवुःसर्वेभयमोहितलोचनाः ३२ प्रमाथ
गणभूयिष्ठेसैन्येदीर्णेमहासुरः निर्जगामततोबाणोयुद्धायाभिमुखस्त्वरन् ३३ भीमप्रहरणैर्घोरैर्दैत्येंद्रैःसुमहारथैः महाबलैर्महा
वीरैर्वज्रीवसुरसत्तमैः ३४ पुरोहिताःशत्रुवधंवदंतस्तथैवचान्येश्रुतशीलवृद्धाः जपैश्चमंत्रैश्चतथौषधीभिर्महात्मनःस्वस्त्ययनंप्रचक्रुः
३५ ततस्तूर्यप्रणादैश्चभेरीणांतुमहास्वनैः सिंहनादैश्चदैत्यानांबाणःकृष्णमभिद्रवत् ३६ दृष्ट्वाबाणंतुनिर्यातंयुद्धायैवव्यवस्थित
म् आरुह्यगरुडंकृष्णोबाणायाभिमुखोययौ ३७ आयांतमथतंदृष्ट्वायदूनामृषभंरणे वैनतेयमथारूढंकृष्णमप्रतिमौजसम् ३८
अथबाणस्तुतंदृष्ट्वाप्रमुखेमत्स्यपस्थितम् उवाचवचनंक्रुद्धोवासुदेवंतरस्विनम् ३९ बाणउवाच तिष्ठतिष्ठनमेद्यत्वंजीवन्प्र
तिगमिष्यसि द्वारकांद्वारकास्थांश्चसुहृदोद्रक्ष्यसेनच ४० सुवर्णवर्णान्वृक्षाग्रानद्यद्रक्ष्यसिमाधव मयाभिभूतःसमरेमुमूर्षुः
कालनोदितः ४१ अद्यबाहुसहस्रेणकथंमप्रभुजोरणे मयासहसमागम्ययोत्स्यसेगरुडध्वज ४२ अद्यत्वंवैमयायुद्धेनिर्जितःसहबा
धवः द्वारकांशोणितपुरेनिहतःसंस्मरिष्यसि ४३ नानाप्रहरणोपेतंनानागदविभूषितम् अद्यबाहुसहस्रंमेकोटिभूतंनिशामय
४४ गर्जतस्तस्यवाक्योघाजलौघाइवसिंधुतः निश्चरंतिमहाघोरावातोद्धूताइवोर्मयः ४५ रोषपर्याकुलेचैवनेत्रेतस्यबभूवतुः
जगद्दिधक्षन्निवखेमहासूर्यइवोदितः ४६ तच्छ्रुत्वानारदस्तस्यबाणस्यात्मूर्जितंवचः जहाससुमहाहासंभिंदन्निवनभस्तलम् ४७
योगपट्टमुपाश्रित्यतस्थौयुद्धदिदृक्षया कौतूहलोत्फुल्लदृशःकुर्वन्पर्यटतेमुनिः ४८ कृष्णउवाच बाणकिंगर्जसेमोहाच्छू
राणांनास्तिगर्जितम् एह्येहियुध्यस्वरणेकिंवृथागर्जितेनते ४९ यदियुद्धानिवचनैःसिद्धेयुर्दितिनंदन भवानवजयेनित्यंबह्वबद्धं
प्रजल्पसि ५०

३९ ४० ४१ ४२ ४३ कोटिभूतंकोटिसंख्याव्याप्तम् ४४ ४५ ४६ ४७ ४८ ४९ ५० ६१ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७७ ७८ ७९ ८० ८१ ८२ ८३ ८४ ८५ ८६ ८७ ८८ ८९

मसुध्येतांध्वजौतत्रतावन्योन्यमभिद्रुतौ युद्धंत्वभूद्वाहनयोरुभयोर्हैवदैत्ययोः ७७ गरुडस्यचसंग्रामोमयूरस्यचधीमतः पक्षतुंड
प्रहारैस्तुचरणास्यनखैस्तथा ७८ अन्योन्यंजघ्नतुःक्रुद्धौमयूरगरुडावुभौ वैनतेयस्ततःक्रुद्धोमयूरंदीप्ततेजसम् ७९ जग्राहशिरसि
क्षिप्रंतुंडेनाभिपतंस्तदा उत्क्षिप्यचैवपक्षाभ्यांनिजघानमहाबलः ८० पद्भ्यांपार्श्वाभिघाताभ्यांकृत्वाघातान्यनेकशः आकृष्यचैनंतर
सा विकृष्यचमहाबलः ८१ निःसंज्ञंपातयामासगगनादिवभास्करम् मयूरेपतितेतस्मिन्पपातातिबलोभुवि ८२ बाणःसमरसंविग्न
श्चिंतयन्कार्यमात्मनः ममातिबलमत्तेनानकृतंसुहृदांवचः ८३ पश्यतांदेवदैत्यानां प्राप्तोस्म्यापदमुत्तमाम् तदीनमनसंज्ञात्वारणे-
बाणंसुविक्लवम् ८४ चिंतयत्तुभगवान्रुद्रोबाणरक्षणमातुरः ततोनंदिंमहादेवःप्राहगंभीरयागिरा ८५ नंदिकेश्वरयाहित्वंयतोबा
णोरणेस्थितः रथेनानेनदिव्येनसिंहयुक्तेनभास्वता ८६ बाणंसंयोजयाशुत्वमत्यसुरायुधनम प्रमथगणमध्येहस्थास्यामिनहिमेमनः
८७ योत्स्येवितरतेयुद्धंबाणासुरस्यगम्यताम् तथेत्युक्त्वाततोनंदीरथेनरथिनांवरः ८८ ययौबाणस्ततोगत्वाबाणमाहशनैरिदम् दैत्या
सुरस्थमातिष्ठशीघ्रमेहिमहाबल ८९ ततोसुर [illegible] रणे आरुरोहरथंबाणोमहादेवस्यधीमतः ९० आरूढस्तुबाण
श्चतंरथंब्रह्मनिर्मितम् [illegible] ९१ [illegible] दीप्तब्रह्मशिरोनामबाणः
क्रुद्धोतिवीर्यवान् ९२ [illegible] ९३ तच्चक्रेणनिहत्यास्त्रंमा
हकृष्णस्तरस्विनम् [illegible] ९४ [illegible] अयमास्मिस्थितोयुद्धमस्य
सपुरुषोत्तम [illegible] ९५ [illegible] बाहुवीर्यस
भवः ९६ [illegible] ९७ [illegible] अयतः
[illegible] ९८ [illegible] ९९ निक्षिप्तवाद्वयुद्ध
स्यदेवदेवगताः [illegible] १०० [illegible]
[illegible] १०१ [illegible]
वस्थितम् [illegible]

[illegible] ९७ ९८ ९९ १०० १०१ २ ३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एह्येहिजयमांबाणजितोवावसुधातले चिरायावाश्रुवोदीनःपतितःशोष्यसेस्फुरैः ५१ इत्येवमुक्त्वाबाणंतुमर्मभेदिभिराशुगैः नि
र्बिभेदतदाकृष्णस्तुसमाधेर्महाशरैः ५२ विनिर्भिन्नस्तुकृष्णेनमार्गणैर्मर्मभेदिभिः स्मयन्बाणस्ततःकृष्णंशरवर्षैरवाकिरत्
५३ ज्वलद्भिरिवसंयुक्तंतस्मिन्युद्धेसुदारुणे ततःपरिघनिस्त्रिंशैर्गदातोमरशक्तिभिः ५४ मुशलैःपट्टिशैश्चैवछादयामासके
शवम् सतुबाहुसहस्रेणगर्वितोदैत्यसत्तमः ५५ योधयामाससमरेद्विबाहुमथलीलया लाघवात्तस्यकृष्णस्यबलिसूनूरुबान्वि
तः ५६ ततोऽस्त्रंपरमंदिव्यंतपसानिर्मितंमहत् यदप्रतिहतंयुद्धेसर्वामित्रविनाशनम् ५७ ब्रह्मणाविहितंदिव्यंतन्मुमोचादितेःसुतः त
स्मिन्मुक्तेदिशःसर्वास्तमःपिहितमंडलाः ५८ प्रादुरासन्सहस्राणिसुघोराणिचसर्वशः तमसासंवृतेलोकेनप्राज्ञायतकिंचन ५९ सा
धुसाध्वितिबाणंतुपूजयंतिस्मदानवाः हाहाधिगितिदेवानांश्रूयतेवागुदीरिता ६० ततोऽस्त्रबलवेगेनसार्चिष्मत्यःसुदारुणाः घोररूपा
महाघोरानिपेतुर्बाणवृष्टयः ६१ नैववाताःप्रवायंतिनमेघाःसंचरंतिच अस्त्रेविसृष्टेबाणेनदह्यमानेनकेशवे ६२ ततोऽस्त्रंसुमहावेगं
जग्राहमधुसूदनः पार्जन्यंनामभगवान्कालांतकनिभंरणे ६३ ततोवितिमिरेलोकेशराग्निःप्रशमंगतः दानवाःसौधसंकल्पाःसर्वेभू
वंस्तदाभृशम् ६४ दानवास्त्रेप्रशांतेतुपर्जन्यास्त्रेभिमंत्रिते ततोदेवगणाःसर्वेनदंतिचहसंतिच ६५ हतेशस्त्रेमहाराजदैतेयःक्रोध
मूर्च्छितः भूयःसंछादयामासकेशवंगरुडेस्थितम् ६६ मुशलैःपट्टिशैश्चैवछादयामासकेशवम् तस्यतांतरसासर्वांबाणवृष्टिंसमुद्यतां
६७ प्रहसन्वारयामासकेशवःशत्रुसूदनः केशवस्यतुबाणेनवर्त्तमानेमहाहवे ६८ तस्यशार्ङ्गविनिर्मुक्तैःशरैरशनिसंनिभैः तिलश
स्तद्रथंचक्रेसाश्वध्वजपताकिनम् ६९ चिच्छेदकवचंकायात्मुकुटंचमहाप्रभम् कार्मुकंचमहातेजाहस्तच्चापंचकेशवः ७० विव्याध
चैनमुरसिनाराचेनस्मयन्निव ससमोभिहितःसंख्येप्रमुमोहाल्पचेतनः ७१ तंदृष्ट्वामूर्च्छितंबाणंप्रहारपरिपीडितम् प्रासादवरशृं
गस्थोनारदोमुनिपुंगवः ७२ उत्थायापश्यततदाकक्ष्यास्फोटनतत्परः वादयानोनखांश्चैवदिष्ट्यादिष्ट्येतिचाब्रवीत् ७३ अहोमे
सफलंजन्मजीवितंचसुजीवितम् दृष्टंमेयदिदंचित्रंदामोदरपराक्रमम् ७४ जयबाणमहाबाहोदैतेयदेवकिल्बिषम् यदर्थमव
तीर्णोसितत्कर्मसफलीकुरु ७५ एवमुक्त्वातदादेवबाणैःखद्योतयन्निशितैः इतस्ततःसपदद्भिर्नारदोव्यचरद्रणे ७६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ यत्कार्यंबाणवधारव्यंतन्नक्रियतेइत्यन्वयः ४० ४१ ४२

कृत्वाद्विबाहुंतंबाणंछिन्नशाखमिवद्रुमम् पुनःकराग्रंकृष्णस्यचक्रंप्राप्तंस्फुदर्शनम् ३१ वैशंपायनउवाच कृतकृत्येतुसंप्राप्ते
चक्रेदैत्यनिपातने स्रवतातेनकायेनशोणितौघपरिप्लुतम् ३२ अभवत्पर्वताकारश्छिन्नबाहुर्महासुरः असृग्मत्तश्चविविधान्नुना
दान्मुंचन्नघनोयथा ३३ तस्यनादेनमहताकेशवोरिपुसूदनः चक्रंभूयःक्षेप्तुकामोबाणनाशार्थमुद्यतः तमुपेत्यमहादेवःकुमारसहि
तोऽब्रवीत् ३४ ईश्वरउवाच कृष्णकृष्णमहाबाहोजानेत्वापुरुषोत्तमम् मधुकैटभहंतारंदेवदेवसनातनम् ३५ लोकानांत्वंग
तिर्देवत्वत्प्रसूतमिदंजगत् अजेयस्त्वंत्रिभिर्लोकैःससुरासुरपन्नगैः ३६ तस्मात्संहरदिव्यंत्वमिदंचक्रसमुद्यतम् अनिवार्यमसंहार्यं
रणेशत्रुभयंकरम् बाणस्यास्याभयंदत्तंमयाकेशिनिषूदन ३७ तन्मेनस्याद्वृथावाक्यमतस्त्वांक्षामयाम्यहम् ३८ श्रीकृष्णउवा०
जीवतांदेवबाणोयमेतच्चक्रंनिवर्त्तितम् मान्यस्त्वंदेवदेवानामसुराणांचसर्वशः ३९ नमस्तेस्तुगमिष्यामियत्कार्यंतेमहेश्वर नताव
त्क्रियतेतस्मात्मामनुज्ञातुमर्हसि ४० एवमुक्त्वामहादेवंकृष्णस्तूर्णमहामनाः जगामतत्रयत्रास्तेप्राद्युम्निःसायकैश्चितः ४१ गतेकृ
ष्णेततोनंदीबाणमाहवचःशुभम् गच्छबाणप्रपन्नस्यदेवदेवस्यचाग्रतः ४२ तच्छ्रुत्वानंदिवाक्यंतुबाणोगच्छत्शीघ्रगः छिन्नबाहु-
ततोबाणंदृष्ट्वानंदीप्रतापवान् ४३ अपवाह्यरथेनैनंयतोदेवस्ततोययौ ततोनंदीपुनर्बाणंप्रागुवाचोत्तरंवचः ४४ बाणबाणप्रनृत्य
स्वश्रेयस्तवभविष्यति एषदेवोमहादेवःप्रसादसुमुखस्तव ४५ शोणितौघप्लुतैर्गात्रैर्नंदिवाक्यप्रचोदितः जीवितार्थीततोबाणःप्रमु
खेशंकरस्यवै ४६ अनृत्यद्भयसंविग्नोदानवःसविचेतनः तंदृष्ट्वाचप्रनृत्यंतंभयोद्विग्नपुनःपुनः ४७ नंदिवाक्यप्रजवितंभक्तानुग्रह
कृद्भवः करुणावशमापन्नोमहादेवोब्रवीद्वचः ४८ ईश्वरउवाच वरंवृणीष्वबाणत्वंमनसायदभीप्ससि प्रसादसुमुखस्तेहमस्मि
योसिममदानव ४९ बाणउवाच अजरश्चामरश्चैवभवेयंसततंविभो एषमेप्रथमोदेववरोस्तुयदिमन्यसे ५० देवउवाच
तुल्योसिदैवतैर्बाणनमृत्युस्तवविद्यते अथापरंवृणीष्वाद्यअनुग्राह्योसिमेसदा ५१ बाणउवाच यथाहंशोणितैर्दिग्धोभृशार्तो
व्रणपीडितः भक्तानांनृत्यतांदेवपुत्रजन्मभवेद्भव ५२ श्रीहरउवा० निराहाराःक्षमावंतःसत्यार्जवसमाहिताः मद्भक्तायेपिनृ
त्यंतितेषामेवंभविष्यति ५३ तृतीयंत्वमथोबाणवरंवृणुमनोगतम् तद्विधास्यामितेपुत्रसफलोस्तुभवानिह ५४

४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ पुत्रजन्मेतिएवंनृत्यंतःपुत्रंलभंतामित्यर्थः ५२ ५३ ५४ ६ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यस्त्वचक्रधरेद्यस्मितच्चक्रेसंनिवेशितम् नागराक्षसयक्षाणांगंधर्वाप्सरसामपि ४ त्रैलोक्यस्यचयत्प्राणंसर्वंचक्रेव्यवस्थितम् तेज
सातेनसंयुक्तंज्वलन्निवचभास्करः ५ वपुषातेजआदत्तेबाणस्यप्रमुखेस्थितम् ज्ञात्वातितेजसाचक्रंकृष्णेनाभ्युदितंरणे ६ अप्रमेयं
त्वविहतंरुद्राणीचाब्रवीच्छिवम् अजेयमेतत्त्रैलोक्येचक्रंकृष्णेनधार्यते ७ बाणंत्रायस्वदेवत्वंयावच्चक्रंनमुंचति ततस्त्र्यक्षवचःश्रुत्वा
देवीलंबामथाब्रवीत् ८ गच्छेहिलंबेशीघ्रंत्वंबाणसंरक्षणंप्रति ततोयोगंसमाधाय अदृश्याहिमवत्सुता ९ कृष्णस्यैकस्यतद्रूपंदर्शय
त्यार्थंसमागता चक्रोद्यतकरंदृष्ट्वाभगवंतंरणाजिरे १० अंतर्धानमुपागम्यत्यज्यसावाससीपुनः परित्राणायबाणस्यविजयाधिष्ठिताततः
११ प्रमुखेवासुदेवस्यदिग्वासाकोटवीस्थिता तांदृष्ट्वाथपुनःसाक्षाद्देवीरुद्रस्यसंमताम् १२ लंबांद्वितीयांतिष्ठंतींकृष्णोवचनमब्रवी
त् भूयःसामर्षताम्राक्षीदिग्वस्त्रावस्थितारणे १३ बाणसंरक्षणपराहन्मिबाणंनसंशयः एवमुक्तातुकृष्णेनभूयोदेव्यब्रवीदिदम्
१४ जानेत्वांसर्वभूतानांस्रष्टारंपुरुषोत्तमम् महाभागंमहादेवमनंतंनित्यमव्ययम् १५ पद्मनाभंहृषीकेशंलोकानामादिसंभवम् ना
र्हसेदेवहंतुंवैबाणमप्रतिमंरणे १६ प्रयच्छस्वाभयंबाणेजीवपुत्रीत्वमेवच मयादत्तवरोह्येषभूयश्चपरिरक्ष्यते १७ नमेमिथ्यासमु
द्योगंकर्तुमर्हसिमाधव एवमुक्तेतुवचनेदेव्यापरपुरंजयः १८ कृष्णःप्रभाषतेवाक्यंशृणुसत्यंतुभामिनि बाणोबाहुसहस्रेणनदंते
दर्पमाश्रितः १९ एतेषांच्छेदनंत्वद्यकर्तव्यंनात्रसंशयः द्विबाहुनाचबाणेनजीवपुत्रीभविष्यसि २० आसुरंदर्पमाश्रित्यनचमासं
श्रयिष्यति एवमुक्तेतुवचनेकृष्णेनाक्लिष्टकर्मणा २१ सोवाचदेवीबाणोयंदेवदत्तोभवेदिति अथतांकार्तिकेयस्यमातरंसोभि
प्राप्यवै २२ सोवाचबाणंसमरेवदतांप्रवरःप्रभुः युध्यतांयुध्यतांसंख्येभवतांकोटवीस्थिता २३ अशक्तानामिवरणेधिक्बाणतव
पौरुषम् एवमुक्त्वाततःकृष्णस्तच्चक्रंपरमात्मवान् २४ निमीलिताक्षोव्यसृजत्बाणंप्रतिमहाबलः क्षेपणाद्यस्यमुह्यंतिलोकाःस-
स्थाणुजंगमाः २५ क्रव्यादानिचभूतानितृप्तिंयांतिमहामृधे तमप्रतिमकर्माणंसमानंसूर्यवर्चसा २६ चक्रमुद्यम्यसमरेकोपदीप्तो
गदाधरः समुद्यंदानवंतेजःसमरेस्वेनतेजसा २७ चिच्छेदबाहूंश्चक्रेणश्रीधरःपरमौजसा अलातचक्रवत्तूर्णंभ्राममाणंरणाजिरे २८
क्षिप्तंतुवासुदेवेनबाणस्यरणमूर्द्धनि विष्णुचक्रंप्रमत्याशुशोभ्याद्रूपंनदृश्यते २९ तस्यबाहुसहस्रस्यपर्यायेणपुनःपुनः बाणस्य
छेदनंचक्रेतच्चक्रंरणमूर्द्धनि ३०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५५ ५६ ५७ ५८ ५९ १६० १६१ १६२ १६३ · १६४ इतिश्रीमं॰खि॰ह॰वि॰टीकायांशतोपरिषड्विंशोऽध्यायः १२६ एवमिति १

बाणउवाच चक्रताडनजाघोरारुजातीव्राहिसेनध वरेणासौतृतीयेनशांतिंगच्छतुमेभव १५५ अनिरुद्धउवाच एवंभवतु
भद्रंतेनुरुजाप्रभविष्यति अक्षतंतवगात्रंतुस्वस्थावस्थंभविष्यति ५६ चतुर्थंतेवरंदद्मिवृणीष्वयदिकांक्षसि नतेहंविसुखस्तातप्रसा
दसुसुखाद्यहम् ५७ बाणउवाच प्रमाथगणवंश्यस्यप्रथमःस्यामहंविभो महाकालइतिख्यातिंगच्छेयंशाश्वतीःसमाः ५८
वैशंपायनउवाच एवंभविष्यतीत्याहबाणंदेवोमहेश्वरः दिव्यरूपोक्षतोगात्रैर्नीरुजस्तत्समाश्रयात् ५९ समातिसर्गाद्बाणत्वंभव-
तैवाकुतोभवः भूयस्तेपंचमंदद्मिप्रख्यातबलपौरुषम् पुनर्वरयभद्रंतेयत्तेमनसिवर्त्तते १६० बाणउवाच वैरूप्यंसगजंयन्मेमा
भूद्देवकदाचन द्विबाहुरपिमेदेहोनविरूपोभवेद्भव १६१ श्रीहरउवाच भवितासर्वमेतत्तेयथेच्छसिमहासुर भवत्त्वेनचादे
यभक्तानाविद्यतेसम १६२ वैशंपायनउवाच ततोब्रवीन्महादेवोबाणंस्थितमथांतिके एवंभविष्यतेसर्वंयत्त्वयासमुदाहृतम् ६३
एतावदुक्त्वाभगवान्त्रिनेत्रोगणसंवृतः पश्यतांसर्वभूतानांतत्रैवांतरधीयत १६४ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणि
उषाहरणेबाणासुरवरप्रदानंनामशतोपरिषड्विंशतितमोऽध्यायः १२६ वैशंपायनउवाच एववरान्बहून्प्राप्यबाणःप्रीतमनाभव
त् जगामसहरुद्रेणमहाकालत्वमागतः १ वासुदेवोपिबहुधानारदंपर्यपृच्छत क्वानिरुद्धोस्तिभगवन्संयतोनागबंधनैः २ श्रोतुमिच्छा
मितत्वेनस्नेहक्लिन्नंहिमेमनः अनिरुद्धहतेवीरक्षुभिताद्वारकापुरी ३ शीघ्रंतंमोक्षयिष्यामोयदर्थंवयमागताः अद्यतंनष्टशत्रुंवेद्रष्टु
मिच्छामहेवयम् ४ सप्रदेशस्तुभगवन्विदितस्तवसुव्रत एवमुक्तस्तुकृष्णेननारदःप्रत्यभाषत ५ कन्यापुरेकुमारोसौबद्धोनागैस्त्वमा-
धवः एतस्मिन्नंतरेशीघ्रंचित्रलेखाप्युपस्थिता ६ बाणस्योत्तमसर्वस्यदैत्येंद्रस्यमहात्मनः इदमंतःपुरंदेवप्रविशास्त्वयथासुखम् ७ ततः
प्रविष्टास्तेसर्वेह्यनिरुद्धस्यमोक्षणे बलःसुपर्णःकृष्णस्तुप्रद्युम्नोनारदस्तथा ८ ततोदृष्ट्वैवगरुडंयेनिरुद्धशरीरगाः शररूपामहास
र्पविष्टयित्वातनुस्थिताः ९ तेसर्वेसहसादेहात्तस्यनिःसृत्यभोगिनः क्षितिसमभिवर्त्तित्वाप्रकृत्यावस्थिताःशराः १० दृष्टःस्पृष्टश्चकृष्णे
नसोनिरुद्धोमहायशाः स्थितःप्रीतमनाभूत्वाप्रांजलिर्वाक्यमब्रवीत् ११ देवदेवसदायुद्धेजेतात्वमसिकेशव नशक्तःप्रमुखेस्थातुंसाक्षा-
दपिशतक्रतुः १२ ततोमहाबलंदेवंबलभद्रंयशस्विनम् अभिवादयतेहृष्टःसोनिरुद्धोमहामनाः १३ माधवंचमहात्मानमभिवाद्यकृतांज
लिः खगोत्तमंमहावीर्यंसुपर्णमभिवाद्यच १४

२ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ छ.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१५ १६ १७ १८ १९ २० वीर्यनिर्जितायाः विवाहो वीर्याख्यः जंबूलमालिकां जंबूलं वरपक्षीयस्त्रीणां वचनं तस्य मालिकां परंपरां
द्रष्टुम् २१ २२ २३ २४ यच्छते ददाति प्रागेव २५ इह भूमौ राष्ट्रिको राष्ट्राधिपतिः बाणः शिवगणेषु गतत्वात् २६ २७ २८ भवत् अभवत्

ततो मकरकेतुं च चित्रबाणधरं प्रभुम् पितरं सोप्युपागम्य प्रद्युम्नमभिवादयत् १५ सखीगणवृता चैव सा चोषा भवने स्थिता बलं चा
तिबलं चैव वासुदेवं स दुर्जयम् १६ असंख्यातगतिं चैव सुपर्णमभिवाद्य च पुष्पबाणधरं चैव लज्जमानाभ्यवादयत् १७ ततः शक्रस्य
वचनान्नारदः परमद्युतिः वासुदेवसमीपं स प्रहसन्पुनरागतः १८ वर्द्धापयति तं देवं गोविंदं शत्रुसूदनम् दिष्ट्या वर्द्धसि गोविंद अनिरुद्ध
समागमात् १९ ततोऽनिरुद्धसहिता नारदप्रणताः स्थिताः आशीर्भिर्वर्द्धयित्वा च देवर्षिः कृष्णमब्रवीत् २० अनिरुद्धस्य वीर्याख्यो वि
वाहः क्रियतां विभो जंबूलमालिकां द्रष्टुं श्रद्धा हि मम जायते २१ ततः प्रहसिताः सर्वे नारदस्य वचः श्रवात् कृष्णः प्रोवाच भगवन् क्रियतामा
शु माचिरम् २२ एतस्मिन्नंतरे तात कुंभांडः समुपस्थितः वैवाहिकांस्तु संभारान् गृह्य कृष्णं नमस्यतु २३ कुंभांड उवाच कृष्ण कृ
ष्ण महाबाहो भव त्वमभयप्रदः शरणागतोस्मि देवेश प्रसीदेषोंजलिस्तव २४ नारदस्य वचः श्रुत्वा सर्वं प्रागेव चाच्युतः अभयं यच्छते तस्मै
कुंभांडाय महात्मने २५ कुंभांड मंत्रिणां श्रेष्ठ प्रीतोस्मि तव सुव्रत स कृतं ते विजानामि राष्ट्रिकस्त्वं भवानिह सुज्ञातिपक्षः सस्त्वखी निवृत्तो
स्तु भवानिह २६ राज्यं च ते मया दत्तं चिरंजीव ममाश्रयात् एवं दत्वा राज्यमस्मै कुंभांडाय महात्मने २७ विवाहमकरोत्तस्या निरुद्धस्य जना
र्दनः ततस्तु भगवान्वन्हिस्तत्र स्वयमुपस्थितः २८ स विवाहो निरुद्धस्य नक्षत्रे च शुभे भवत् ततोप्सरोगणश्चैव कौतुकं कर्तुमुद्यतः २९
स्नातस्त्वलंकृतस्तत्र सोनिरुद्धः सभार्यया ततः स्निग्धैः शुभैर्वाक्यैर्गंधर्वाश्च जगुस्तदा ३० नृत्यंत्यप्सरसश्चैव विवाहमुपशोभयन् ततो नि
र्वर्त्तयित्वा तु विवाहं शत्रुसूदनः ३१ अनिरुद्धस्य सप्रज्ञः सर्वैर्देवगणैर्वृतः आसंश्च वरदं तत्र रुद्रं देवनमस्कृतम् ३२ चकार गमने बुद्धिं कृ
ष्णः परपुरंजयः द्वारकाभिमुखं कृष्णं ज्ञात्वा शत्रुनिषूदनम् ३३ कुंभांडो वचनं प्राह प्रांजलिर्मधुसूदनम् बाणस्य गावस्तिष्ठंति हस्ता तु व
रुणस्य वै ३४ यासाममृतकल्पं वै क्षीरं क्षरति माधव तत्पीत्वा तिबलश्चैव नरो भवति दुर्जयः ३५ कुंभांडेनैवमाख्याते हरिः प्रीतमनास्त
दा गमनाय मतिं चक्रे गंतव्यमिति निश्चयम् ३६ ततस्तु भगवान् ब्रह्मा वर्धाप्य स तु केशवम् जगाम ब्रह्मलोकं स वृतः स्वभवनालयैः ३७
इंद्रो मरुद्गणयुतो द्वारकाभिमुखो ययौ यतः कृष्णस्ततः सर्वे गच्छंति जयकांक्षिणः ३८ वाहनेन मयूरेण सखीभिः परिवारिता द्वारका-
भिमुखी ह्यूषा देव्या प्रस्थापिता ययौ ततो बलश्च कृष्णश्च प्रद्युम्नश्च महाबलः ३९

२९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आरूढवंतोगरुडसंनिरुद्धश्चवीर्यवान् प्रस्थितश्चससतेजस्वीगरुडःपततांवरः ५० उन्मूलयंस्तरुगणान्कंपयश्चापिमेदिनीम् आ
कुलाश्चदिशःसर्वारेणुध्वस्तमिवांबरम् ५१ गरुडेसंप्रयातेभूत्मंदरश्मिर्दिवाकरः ततस्तेदीर्घमध्वानंप्रययुःपुरुषर्षभाः ५२ आ
रुह्यगरुडंसर्वेजित्वाबाणंमहौजसम् ततोंबरतलस्थास्तेवारुणींदिशमास्थिताः ५३ अपश्यंतमहात्मानोगावोदिव्यपयःप्रदाः वेला
वनविचारिण्योनानावर्णाःसहस्रशः ५४ अवज्ञायतदारूपंकुंभांडवचनाश्रयात् कृष्णःप्रहरतांश्रेष्ठस्तुल्यतोर्थविशारदः ५५ निशम्य
बाणगावस्तुतास्तुचक्रेमनस्तदा आस्थितोगरुडंप्राहसतुलोकादिरव्ययः ५६ श्रीकृष्णउवाच वैनतेययथाहित्वंयत्रबाणस्यगो
धनम् यासांपीत्वाकिलक्षीरममृतत्वमवाप्नुयात् ५७ आहमांसत्यभामाच बाणगावोममानय यासांपीत्वाकिलक्षीरंनजीर्यंतिसुहा
सुराः ५८ विजराश्चजरात्यक्ताभवंतिकिलमानवाः ताआनयस्वभद्रंतेयदिधर्मोनलुप्यते ५९ अथवाकार्यलोपोवैमैवतास्तुमनःकृथाः इति
मामब्रवीत्सत्यातास्त्वेताविदितास्तव ५० गरुडउवाच दृश्यंतेगावएतास्ताहृष्ट्वामांवरुणालयम् विशंतिसहसासर्वाःकार्यमत्रवि
धीयताम् ५१ इत्युक्त्वाचैवगरुडःपक्षवातेनसागरम् सहसाक्षोभयित्वाच विवेशवरुणालयम् ५२ दृष्ट्वाजवेनगरुडंप्राप्तंवैवरुणालय
म् वारुणाश्चगणाःसर्वेविभ्रांताःप्राचलंस्तदा ततस्तुवारुणंसैन्यमभिज्ञातुसुदुर्जयम् ५३ प्रमुखेवासुदेवस्यनानाप्रहरणोद्यतम् तद्यु
द्धमभवत्घोरंवारुणैःपन्नगारिणा ५४ तेषामापततांसंख्येवारुणानांसहस्रशः भग्नंबलमनाधृष्यंकेशवेनमहात्मना ५५ ततस्तेप्रद्रु
ताःयांतितमेववरुणालयम् षष्टिरथसहस्राणिषष्टिरश्वशतानिच ५६ वारुणानिचयुद्धानिदीप्तशस्त्राणिसंयुगे तद्बलंबलिभिःशूरैर्ब
लदेवजनार्दनैः ५७ प्रद्युम्नेनानिरुद्धेनगरुडेनचसर्वशः शरौघैर्विविधैस्तीक्ष्णैर्वध्यमानसमंततः ५८ ततोभग्नबलंदृष्ट्वाकृष्णेनाक्लि
ष्टकर्मणा वरुणःस्वयमसंक्रुद्धोनिर्ययौयत्रकेशवः ऋषिभिर्देवगंधर्वैस्तथैवाप्सरसांगणैः ५९ संस्तूयमानोबहुधावरुणःप्रत्यदृश्यत छ
त्रेणाध्रियमाणेनपांडुरेणवपुष्मता सलिलस्राविणाश्रेष्ठंचापमुद्यम्याधिष्ठितः ६० अपांपतिरतिक्रुद्धःपुत्रपौत्रबलान्वितः आह्वयन्नि
वयुद्धाय विस्फारितमहाधनुः ६१ सतुप्राध्मापयच्छंखंवरुणःसमधावत हरंहरइवक्रुद्धोबाणजालैःसमावृणोत् ६२ ततःप्रध्मायजलजं
पांचजन्यंजनार्दनः बाणजालैर्दिशःसर्वास्ततश्चक्रेमहाबलः ६३ १७०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४ प्रकृतिर्मायाविकृतंमहदादिकार्यंतदात्मिका धर्मिणीप-
रिणामिनीपूर्वधर्मंजायतइत्येवंरूपंत्वत्तोजन्मलभमानेत्यर्थः बीजभावेनजगत्कारणत्वेनचउपेतेतिशेषः ७५ ७६ ७७ ७८ त्वयैवस्वात्मनैवबहुलीकृतंइ-
दंदृश्यमितिशेषः प्रकृतिःकारणंतत्वांद्वेष्टीतितादृशःप्रकृतिद्वेषीअहंन ७९ विकारेषुअहंकारादिषुयाप्रकृतिः पूर्ववासनालोभद्वेषादिरूपातस्याःविकारःसोपि

ततःशरौघैर्विसृष्टैर्वरुणःपीडितोरणे स्मयन्निवततःकृष्णंवरुणःप्रत्ययुध्यत ६४ ततोस्त्रंवैष्णवंघोरमभिसंध्याहवेस्थितः वासुदेवो
ब्रवीद्वाक्यंप्रमुखेतस्यधीमतः ६५ इदमस्त्रंमहाघोरंवैष्णवंशत्रुसूदनम् मयोद्यतंवधार्थंतेतिष्ठेदानींस्थिरोभव ६६ ततोस्त्रंवरुणो
देवोह्यस्त्रंवैष्णवमुद्यतः वारुणास्त्रेणसंयोज्यविननादमहाबलः ६७ तस्यास्त्रेवितताह्यापोवरुणस्यविनिःसृताः वैष्णवास्त्रस्यशम-
नेवर्त्ततेसमितिंजय ६८ आपस्तुवारुणास्तत्रक्षिताक्षिप्ताज्वलतिवै दह्यंतेवारुणास्तत्रततोऽस्त्रेज्वलितेपुनः ६९ वैष्णवेतुमहावीर्येदि
शोभीताविदुद्रुवुः तत्रतज्ज्वलितंदृष्ट्वावरुणःकृष्णमब्रवीत् ७० स्मरस्वप्रकृतिंपूर्वामव्यक्तांव्यक्तलक्षणाम् तमोजहिमहाभागतम-
सामुह्यसेकथम् ७१ सत्वस्थोनित्यमासीस्त्वंयोगीश्वरमहामते पंचभूताश्रयान्दोषानहंकारंचवर्जय ७२ येयेतेवैष्णवीमूर्तिस्तस्या
ज्येष्ठोस्म्यहंतव ज्येष्ठभावेनमान्यंतुकिंमांत्वंदग्धुमिच्छसि ७३ नाग्निर्विक्रमतेह्यग्नौत्यजकोपंयुधांवर त्वयिनप्रभविष्यामिजगतःप्रभवो
ह्यसि ७४ पूर्वंहियात्वयासृष्टाप्रकृतिर्विकृतात्मिका धर्मिणीबीजभावेनपूर्वधर्मसमाश्रिता ७५ आग्नेयंवैष्णवंसौम्यंप्रकृत्यैवंदसादि
तः त्वयासृष्टंजगदिदंसकथंमयिवर्त्तसे ७६ अजेयःशाश्वतोदेहःस्वयंभूर्भूतभावनः अक्षरंचक्षरंचैवभावाभावौमहाद्युते ७७ रक्ष
मारक्षणीयोहंत्वयानघनमोस्तुते आदिकर्त्तासिलोकानांत्वयेतद्बहुलीकृतम् ७८ विक्रीडसिमहादेवबालक्रीडनकैरिव नह्यहंप्र-
कृतिद्वेषीनाहंप्रकृतिदूषकः ७९ प्रकृतिर्याविकारेषुवर्त्ततेपुरुषर्षभ तस्याविकारशमनेवर्त्तसेत्वंमहाद्युते ८० विकारोवाविकाराणां
विकारायनतेऽनघ तानधर्मविदोसदानुभवान्विकुरुतेसदा ८१ इदंप्रकृतिजैर्दोषैस्तमसामुह्यतेयदा रजसावापिसंस्पृष्टस्तदा-
मोहःप्रवर्त्तते ८२ परावरज्ञःसर्वज्ञऐश्वर्यंविधिमास्थितः किंमोहयसिनःसर्वान्प्रजापतिरिवस्वयम् ८३ वरुणेनैवमुक्तस्तुकृष्णो
लोकपरायणः भावज्ञःसर्वकृद्वीरस्ततःप्रीतमनाह्यभूत् ८४

हिंसादिरूपस्तस्यशमनार्थंत्वंवर्त्तसेदुष्टनिग्रहार्थंतववक्रताइत्यर्थः ८० तेतेवि
काराः क्रोधादयःविकाराणांदुष्टानांविकारायविनाशाय नतुमंदानपेक्ष्यभवान्विकुरुतेसर्वात्मनस्तवयद्यपिक्वचिदपिक्रोधोनास्तितथापिक्रोधिनएवस्वदो
षात्त्वांक्रोधवंतंपश्यंतीत्यर्थः ८१ इदंजगत्तमसादेहात्मबुध्यामोहोवैयग्र्यंइदंभूयादिदंमेमाभूयादित्येवंरूपः ८२ ८३ ८४ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८५ ८६ समयोहंजीवन्नहमन्यस्मैतवगाः नप्रदास्यामित्येवंरूपोनिश्चयः ८७ भेदकःनप्रशस्यते चारित्रंचास्यदुष्यतइत्यन्वयः ८८ ८९ ९० ९१ ९२
मांहत्वागावःनयस्व ९३ न्यस्तवादस्त्यक्तप्रतिज्ञः ९४ ९५ नोऽस्माकंसंबंधीभवान् ९६ ९७ ९८ ९९ १०० १०१ यशसाकीर्त्यमानेनविजयेन-

इत्येवमुक्तःकृष्णस्तुप्रहसन्वाक्यमब्रवीत् श्रीकृष्णउवाच गावःप्रयच्छमेवीरशांत्यर्थंभीमविक्रमः ८५ इत्येवमुक्तेकृष्णेन-
वाक्यंवाक्यविशारदः वरुणोप्यब्रवीद्भूयःशृणुमेमधुसूदन ८६ वरुणउवाच बाणेनसार्द्धंसमयोमयादेवकृतःपुरा कथंच
समयंकृत्वाकुर्यांविफलमन्यथा ८७ त्वमेववेदसर्वस्ययथासमयभेदकः चारित्रंदुष्यतेतेननचसद्भिःप्रशस्यते ८८ धर्मभागैर्नरोनित्यं
वर्ज्यतेमधुसूदन नचलोकानवाप्नोतिपापःसमयभेदकः ८९ प्रसीदधर्मलोपश्चमाभून्मेमधुसूदन नमांसमयभेदेनयोक्तुमर्हसिमाध
व ९० जीवन्नाहंप्रदास्यामिगावोवैवृषभेक्षण हत्वानयस्वमांगावएषमेसमयःपुरा ९१ एतच्चमेसमाख्यातंसमयंमधुसूदन सत्यमे
वमहाबाहोनमिथ्यातुसुरेश्वर ९२ यद्येवाहमनुग्राह्योरक्षमांमधुसूदन अथवागोषुनिर्बंधोहत्वानयमहाभुज ९३ वैशंपायन
उवाच वरुणेनैवमुक्तस्तुयदूनांवंशवर्द्धनः अभेद्यंसमयंमत्वान्यस्तवादोगवांप्रति ९४ संप्रहस्यततोवाक्यंव्याजहारार्थकोविदः
तस्मान्मुक्तोसियद्येवंबाणेनसमयःकृतः ९५ प्रसृतैर्मधुरैर्वाक्यैस्तत्त्वार्थंमधुभाषितैः कथंपापंकरिष्यामिवरुणत्वय्यहंप्रभो गच्छमु
क्तोसिवरुणसत्यसंधोसिनोभवान् ९६ श्रुतिप्रियार्थंमयामुक्ताबाणगावोनसंशयः ततस्तूर्यनिनादैश्चभेरीणांचमहास्वनैः ९७ अ-
र्घमादायवरुणःकेशवंप्रत्यपूजयत् केशवोर्घंतदागृह्यवरुणाद्यदुनंदनः ९८ बलंचापूजयद्देवःकुशलीचसमाहितः वरुणायाभयं
दत्वावासुदेवःप्रतापवान् ९९ द्वारकांप्रस्थितःशौरिःशचीपतिसहायवान् तत्रदेवाःसमरुतःससाध्याःसिद्धचारणाः १०० गंधर्वाप्स
रसश्चैवकिंनराश्चांतरिक्षगाः अनुगच्छंतिभूतेशंसर्वभूतादिमव्ययम् १०१ आदित्यावसवोरुद्राअश्विनौयक्षराक्षसाः विद्याधरग
णाश्चैवयेचान्येसिद्धचारणाः गच्छंतमनुगच्छंतियशसाविजयेनच १०२ नारदश्चमहाभागःप्रस्थितोद्वारकांप्रति तुष्टोबाणजयंदृष्ट्वा-
वरुणस्यचकलिप्रियः १०३ कैलासशिखरप्रख्यैःप्रासादैःकंदरैःशुभैः दूरान्निशम्यमधुहाद्वारकांद्वारमालिनीम् १०४ पांचजन्यस्यनि
र्घोषंचक्रेचक्रगदाधरः संज्ञांप्रयच्छन्तेदेवोद्वारकापुरवासिनाम् १०५ देवानुयाननिर्घोषंपांचजन्यस्यनिःस्वनम् श्रुत्वाद्वारवतीसर्वं
प्रहर्षमतुलंगताः १०६ पूर्णकुंभैश्चलाजैश्चबहुविन्यस्तविस्तरैः द्वारोपशोभितांकृत्वासर्वांद्वारवतींपुरीम् १०७

आशास्यमानेन १०२ १०३ शुभैःप्रासादैर्युक्तामितिशेषः निशम्यआलोच्य १०४ संज्ञांस्वागमनज्ञापनं १०५ १०६ १०७ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१०८ १०९ ११० १११ ११२ ११३ ११४ गत्वाचदूरमित्यादिजनवाक्यं ११५ ११६ ११७

सुश्लिष्टरथ्यांसश्रीकांबहुरत्नोपशोभिताम् विप्राश्चार्घसमादाययथैवकुलनैगमाः १०८ जयशब्दैश्चविविधैःपूजयंतिस्ममाधव
मु वैनतेयेतमासीनंनीलांजनचयोपमम् १०९ ववंदिरेतदाकृष्णंश्रियापरमयायुतम् तमानुपूर्व्यापूर्णाश्चपूजयंतिमहाबलं ११०
अनंतकेशिहंतारंश्रेष्ठिपूर्वाश्चश्रेणयः ऋषिभिर्देवगंधर्वैश्चारणैश्चसमंततः १११ स्तूयतेपुंडरीकाक्षोद्वारकोपवनेस्थितः तदाश्चर्यम
पश्यतदाशार्हगणसत्तमाः ११२ प्रहर्षमतुलंप्राप्ताहृष्ट्वाकृष्णंमहाभुजम् बाणंजित्वामहादेवंमायांतंपुरुषोत्तमम् ११३ द्वारकावासि
नांवाचश्चरंतिबहुधातदा प्राप्तेकृष्णेमहाभागेयादवानांमहारथे ११४ गत्वाचदूरमध्वानंसुपर्णोद्भुतमागतः धन्याःस्मोनुगृहीताः
स्मोयेषांवैजगतःपिता ११५ रक्षिताचैवगोप्ताचदीर्घबाहुर्महाभुजः वैनतेयंसमारुह्य जित्वाबाणंसुदुर्जयम् ११६ प्राप्तोयंपुंडरीका-
क्षोमनांस्याल्हादयन्निव एवंकथयतामेवद्वारकावासिनांतदा ११७ वासुदेवगृहंदेवाविविशुस्तेमहारथाः अवतीर्यसुपर्णात्तुवासुदेवो
बलस्तदा ११८ प्रद्युम्नश्चानिरुद्धश्चगृहान्प्रविविशुस्तदा ततोदेवविमानानिसंचरंतितदादिवम् ११९ अवस्थितानिदृश्यंतनानारू
पाणिसर्वशः हंसर्षभमृगैर्नागैर्वाजिसारसबर्हिणैः भास्वंतितानिदृश्यंतेविमानानिसहस्रशः १२० अथकृष्णोब्रवीद्वाक्यंकुमारांस्तान्
सहस्रशः प्रद्युम्नादीन्समस्तांस्तुश्लक्ष्णमधुरयागिरा १२१ एतेरुद्रास्तथादित्यावसवोथाश्विनावपि साध्यादेवास्तथान्येचवंदध्वं
चयथाक्रमम् १२२

११८ ११९ हंसादिभिर्युक्तानि १२० १२१ १२२ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१४० विरसंसखुखंयथास्यात्तथा काल्लोयास्यत्यविरतमितिवा १४१ १४२ १४३ १४४ १४५ सहस्रशः युगपत् निर्वमंतः सुखान्निःसारयंतःकि

तदप्यवसितंकार्यंनष्टशोकावयंकृताः पिबतांमधुमाध्वीकंभवतांप्रीतिपूर्वकम् १४० काल्लोयास्यत्यविरसंविषयेष्वेवत्यज्यताम् बा
हूनांसंश्रयात्सर्वेवयमस्यमहात्मनः १४१ प्रणष्टशोकारंस्यामःसर्वएवयथासुखम् एवंकृत्वासहस्राक्षः केशवंदानवांतकम् १४२
आपृच्छ्यतंमहाभागःसर्वदेवगणैर्वृतः ततःपुनःपरिष्वज्यकृष्णंलोकनमस्कृतम् पुरंदरोदिवंयातः सहदेवमरुद्गणैः १४३ ऋषयश्च
महात्मानोजयाशीर्भिर्महौजसम् यथागतंपुनर्यातायक्षराक्षसकिन्नराः १४४ पुरंदरेदिवंयातेपद्मनाभोमहाबलः अपृच्छतमहाभा
गःसर्वान्कुशलमव्ययम् १४५ ततःकिल्किलाशब्दंनिर्वमंतःसहस्रशः गच्छंतिकौमुदीदृष्टुसोऽनघःप्रीयतेसदा १४६ द्वारकांप्राप्य
कृष्णस्तु रेमेयदुगणैःसह विविधान्सर्वकामार्थान्श्रियापरमयायुतः १४७ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणि
द्वारकायांगमनेशततोपरिसप्तविंशोऽध्यायः १२७ वैशंपायनउवाच अथाहुकोमहाबाहुःकृष्णंप्राहमहाद्युतिः हर्षादुत्फुल्ल
नयनःश्रूयतांयदुनंदन १ एवंगतेनिरुद्धस्यक्रियतांमहदुत्सवः क्षेमात्मत्यागतंदृष्ट्वासेव्यमानाःसहासते २ उषापिचमहाभागासखी
भिःपरिवारिता रमतेपरयाप्रीत्याचानिरुद्धेनसंगता ३ कुंभांडदुहितारामाउषायाःसखिमंडले प्रवेश्यतांमहाभागावैदर्भीविद्धय
त्युत ४ सांबायदीयतांरामाकुंभांडदुहिताशुभा शेषाश्चकन्यान्यस्यतांकुमाराणांयथाक्रमम् ५ वर्ततेसोत्सवस्तत्र अनिरुद्धस्यवे
श्मनि गृहेश्रीधनचनश्चैवशुभस्तत्रप्रवर्त्तते ६ वादयंतिपुरेतत्रनार्योमदवशंगताः नृत्यंतेचापरास्तत्र गायंतिचतथापराः ७

ल्किलाशब्दं आश्चर्यंआश्चर्यमितिवदंतइत्यर्थः कौमुदीमिवकौमुदींकृष्णमुखचंद्रप्रभांसकृष्णः अनघः शुद्धः प्रीयतेतेषांभक्त्येतिभावः १४६ १४७ इतिश्रीम०
खि० ह० वि० टी० शततोपरिसप्तविंशोऽध्यायः १२७ अथाहुकइति १ यतोस्मदीयाःसर्वेसेव्यमानाः अप्सरःप्रभृतिभिःसह आसतेऽतोऽनिरुद्धस्यमहदुत्सवःक्रियतामितियो
ज्यम् २ ३ ४ ५ ६ ७ ८ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१२३ १२४ १२५ १२६ १२७ १२८ १२९ १३० प्राप्यतेदेवानामपिदर्शनमितिशेषः १३१ १३२ १३३

सहस्राक्षंमहाभागंदानवानांभयंकरम् वंदध्वंसहिताःशक्रंसगणंनागवाहनम् १२३ सप्तर्षयोमहाभागाभृग्वांगिरससमाश्रिताः ऋ-
षयश्चमहात्मानोवंदध्वंचयथासुखम् १२४ एतेचक्रधराश्चैवतानवंदतसर्वशः सागराश्चह्रदाश्चैवसान्निध्यार्थमिहागताः१२५ दिशश्च
विदिशश्चैववंदध्वंचयथाक्रमम् वासुकिप्रमुखाश्चैवनागावैसुमहाबलाः १२६ गावश्चसान्निध्यार्थंवैवंदध्वंचयथाक्रमम् ज्योतींषिसह
नक्षत्रैर्यक्षराक्षसकिन्नरैः १२७ आगतासान्निध्यार्थंवैवंदध्वंचयथाक्रमम् वासुदेववचःश्रुत्वाकुमाराःप्रणताःस्थिताः १२८ यथाक्रमेण
सर्वेषांदेवतानांमहात्मनाम् सर्वान्दिवौकसोदृष्ट्वापौराविस्मयमागताः १२९ पूजार्थमर्थसंभारान्प्रगृह्यद्रुतमागताः अहोस्मसहदा-
श्चर्यंवासुदेवस्यसंश्रयात् १३० प्राप्यतेयदिहास्माभिरितिवाचश्चरंस्तुत ततश्चंदनचूर्णैश्चगंधपुष्पैश्चसर्वशः १३१ किरंतिपौराःसर्वा
स्तान्पूजयंतोदिवौकसः लाजैःप्रणामैर्धूपैश्चवाद्यध्वनियमैस्तथा १३२ द्वारकावासिनःसर्वेपूजयंतिदिवौकसः आहुकंवासुदेवंचसा
बंचयदुनंदनम् १३३ सात्यकिंचोल्मुकंचैवविपृथुंचमहाबलम् अक्रूरंचमहाभागंतथानिशठमेवच १३४ एतान्परिष्वज्यतदामू-
र्ध्निचाघ्रायवासवः अथशक्रोमहाभागःसमक्षंयदुमंडले १३५ स्तुवंतकेशिहंतारंतत्रोवाचोत्तरंवचः सात्वतःसात्वतामेषसर्वेषांयदु-
नंदनम् १३६ मोक्षयित्वारणेचैवयशसापौरुषेणच महादेवस्यमिषतोगुहस्यचमहात्मनः १३७ एषबाणंरणेजित्वाद्वारकांपुनराग
तः सहस्रबाहोर्बाहूनांकृत्वाद्वयमनुत्तमम् १३८ स्थापयित्वाद्विबाहुत्वेमासौयंस्वपुरंहरिः यदर्थंजन्मकृष्णस्यमानुषेषुमहात्मनः३९

१३४ १३५ सात्वतांसात्वतानांएषमुख्यःसात्वतइत्यर्थः यदुनंदनंअनिरुद्धम् १३६ १३७ १३८ १३९ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

काश्चित्प्रमुदितास्तत्र काश्चिदन्योन्यमब्रुवन् नानावर्णांबरधराः क्रीडमानास्ततस्ततः ८ अभियांति ततोन्योन्यं काश्चिन्मदवशात्स्वयं क्रीडंति
काश्चिदक्षैस्तु हर्षादुत्फुल्ललोचनाः ९ मायूरं रथमारुह्य सखीभिः परिवारिता उषा संप्रेषिता देव्या रुक्मिण्या प्रतिगृह्यतां १० इयं चैव कुलश्लाघ्या-
घ्यानास्त्रोषासुंदरीवरा बाणपुत्री तव वधूः प्रतिगृण्हीष्व भामिनि ११ ततः प्रतिगृहीता सा स्त्रीभिराचारमंगलैः प्रवेशिता च सा वेश्म अनिरुद्ध-
स्य शोभना १२ देवकी रोहिणी चैव रुक्मिण्यथ विदर्भजा दृष्ट्वानिरुद्धं रोदत्यः स्नेहहर्षसमन्विताः १३ रेवती रुक्मिणी चैव गृहं सुरम्यं प्रवेशयत्
वधूर्वर्द्धसि दिष्ट्या त्वमनिरुद्धस्य दर्शनात् १४ ततस्तूर्यप्रणादैस्तावरनार्यः शुभाननाः क्रियासारैभिरेकत्तु सुषा च गृहसंस्थिता १५ ततो हर्म्य-
तलस्था सा वृष्णिपुंगवसंस्थिता रमते सर्वसंदृशैरुपभोगैर्वरानना १६ चित्रलेखा च सुश्रोणी अप्सरारूपधारिणी आपृच्छ्य सखीवर्गमुषां
च त्रिदिवं गता १७ गतासु तासु सर्वासु सखीष्वस्य सुंदरी मायावत्या गृहं नीता प्रथमं सा निमंत्रिता १८ सा तु प्रद्युम्नगृहिणी स्नुषां दृष्ट्वा सुम-
ध्यमा वासोभीरन्नपानैश्च पूजयामास सुंदरीम् १९ ततः क्रमेण सर्वास्तां वधूं सूषायदुस्त्रियः आचारमनुपश्यंत्यः स्वधर्मं सुपचक्रिरे २० वैशं-
पायन उवाच एतत्ते सर्वमाख्यातं मया कुरुकुलोद्वह यथा बाणो जितः संख्ये जीवन्मुक्तश्च विष्णुना २१ द्वारकायां ततः कृष्णो रेमे यदुगणैर्वृ-
तः अन्वशासं महीं कृत्स्नां परया संयुतो मुदा २२ एवमेषोवतीर्णो वै पृथिवीं पृथिवीपते विष्णुर्यदुकुलश्रेष्ठो वासुदेव इति विश्रुतः २३ एतैश्च-
कारणैः श्रीमान्वसुदेवकुले प्रभुः जातो वृष्णिषु देवस्यायन्मां त्वं परिपृच्छसि २४ निवृत्ते नारदप्रश्ने यन्मयोक्तं समासतः श्रुतास्ते विस्तराः
सर्वे ये पूर्वं जनमेजय २५

१७३

२० २१ २२ २३ एतैः शकटभंगादिवरुणजयांतैः २४ निवृत्ते दत्तोत्तरत्वेन समाहिते नारदप्रश्ने आश्चर्यं को धन्य इत्येवंरूपे पूर्वं उक्ते इति शेषः २५ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यत्रकः सर्वोत्तमइत्येवरूपेविषयेतेतवसंशयोभूत् सोर्थोमाथुरेकल्पेयदुषुभवतोऽवतारेरुद्रजपेननिर्णीतइत्यर्थः वासुदेवात्मिकागतिः परायणंवासुदेवगतिः साप्र
सिद्धातद्विष्णोःपरमंपदंसाकाष्ठासापरागतिरित्याद्यागमेषुइत्यर्थः २६ सर्वेष्विति अन्यत्राप्याश्चर्यदर्शनंविष्वनुप्रवेशादेवेत्यर्थः २७ एषविष्णुःधनिनांधन्य-

विष्णोस्तुमाथुरेकल्पेयत्रतेसंशयोमहान् वासुदेवगतिश्चैवसामयासमुदाहृता: २६ आश्चर्यंचैवनान्यद्धिकृष्णश्चाश्चर्यसंनिधिः स-
र्वेष्वाश्चर्यकल्पेषुनास्त्याश्चर्यमवैष्णवम् २७ एषधन्योहिधन्यानांधन्यकृद्धन्यभावनः देवेषुतुसदैत्येषुनास्तिधन्यतरोच्युतात् २८ आ
दित्यावसवोरुद्राअश्विनोमरुतस्तथा गगनंभूर्दिशश्चैवसलिलंज्योतिरेवच २९ एषधाताविधाताचसंहर्ताचैवनित्यशः सत्यंधर्मस्त
पश्चैवब्रह्माचैवपितामहः ३० अनंतश्चैवनागानांरुद्राणांशंकरस्मृतः जंगमाजंगमश्चैवजगन्नारायणोद्भवम् ३१ एतस्माच्चजग
त्सर्वंप्रसूयेतजनार्दनात् जगच्चसर्वंदेवेशंतंनमस्कुरुभारत ३२ पूज्यश्चसततंसर्वैर्देवैरेषसनातनः इत्युक्तंबाणयुद्धंतेमाहात्म्यं
केशवस्यतु ३३ वंशप्रतिष्ठामतुलांश्रवणादेवलप्स्यसे येचेदंधारयिष्यंतिबाणयुद्धमनुत्तमम् ३४ केशवस्यचमाहात्म्यंनाधर्मस्ता
न्भजिष्यति एषातेवैष्णवीचर्यामयाकार्त्स्न्येनकीर्त्तिता ३५ पृच्छतस्तातयज्ञेस्मिन्निवृत्तेजनमेजय आश्चर्यपर्वनिखिलंयोहीदं
धारयेन्नृप ३६ सर्वपापविनिर्मुक्तोविष्णुलोकेसगच्छति कल्पमुत्थाययोनित्यंकीर्त्तयेत्ससमाहितः. ३७ नतस्यदुर्लभंकिंचिदि-
हलोकेपरत्रच ब्राह्मणःसर्ववेदीस्यात्क्षत्रियोविजयीभवेत् ३८ वैश्योधनसमृद्धस्याच्छूद्रःकामानवाप्नुयात् नाशुभंप्राप्नुयात्किं-
चित्दीर्घमायुर्लभेतसः ३९ सौतिरुवाच इतिपारीक्षितोराजावैशंपायनभाषितम् श्रुतवानचलोभूत्वाहरिवंशंद्विजोत्त
माः ४० एवंशौनकसंक्षेपात्विस्तरेणतथैवच प्रोक्तावैसर्ववंशास्तेकिंभूयःश्रोतुमिच्छसि ४१ इतिश्रीमहाभारतेखिलेषुह
रिवंशेविष्णुपर्वणिउषाहरणसमाप्तिर्नामशतोपरिअष्टाविंशतितमोऽध्यायः १२८ समाप्तमिदंविष्णुपर्व श्रीकृष्णार्पणमस्तु छ

कृत्स्वयंधन्यइत्यन्यंकरोतिएषह्येवानंदयतीतिश्रुतेः धन्यानांमानुषनंदादिहिरण्यगर्भांतानामानंदिनांआनंदभावनः २८ २९ ३० ३१ ३२ ३३ ३४ ३५
३६ हरिवंशंश्रुतवान्यतःअतोनिर्मलोनिःपापोऽभूत् ३७ ३८ ३९ ४० ४१ इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वणिटीकायांशतोपरिअष्टाविंशतितमोऽध्यायः१२८
छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अथश्रीहरिवंशांतर्गतभविष्यपर्वप्रारभ्यते श्रीरस्तु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीमहाभारतेखिलेषुहरिवंशेविष्णुपर्वसमाप्तम्॰

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३ ४ ५ ६ ७ वेदसंहिताः वेदनिबद्धाः ८ ९ मेमयनिमेषमात्रमपि संवत्सरोपिनेमिषमात्रमिवगतः अपिरिवार्थे १० ११ १२ १३ दुःसहानां
अजेयानां १४ १५ १६ आडीजलचरः पक्षिविशेषः तद्रूपेणवसिष्ठः बकरूपेणविश्वामित्रश्च ऋषित्वाल्लज्जयाप्राकट्येनयुद्धं कर्तुमशक्तोतयोर्युद्धमाडीब

मुखश्चाव्यतयाधीरमनोल्हादयतीवनः जनमेजयस्तुनृपतिःश्रुत्वाचाख्यानमुत्तमम् सौतेकिमकरोत्पश्चात्सर्पसत्रादनंतरम् ३
सौतिरुवाच जनमेजयस्तुसन्नृपःश्रुत्वाचाख्यानमुत्तमं यदारभ्ततदाख्यास्यसर्पसत्रादनंतरम् तस्मिन्सत्रेसमाप्तेथराजापा
रीक्षितस्तदा ४ यष्टुंसवाजिमेधेनसंभारानुपचक्रमे ऋत्विक्पुरोहिताचार्यानाहूयेदमुवाचह यक्ष्येहंवाजिमेधेनहयउत्सृज्यता
मपि ५ ततोस्यविज्ञायचिकीर्षितंतद्वाकृष्णामहात्मासहसाजगाम पारीक्षितंद्रष्टुमदीनसत्वंद्वैपायनःसर्वपरावरज्ञः ६ पारीक्षि
तस्तुनृपतिर्दृष्ट्वातमृषिमागतम् अर्घ्यपाद्यासनंकृत्वापूजयामासशास्त्रतः ७ तौचोपविष्टावभितःसदस्यास्तस्यशौनक कथाबहु
विधाश्चित्राश्चक्रुर्वेदसंहिताः ८ ततःकथांतेनृपतिर्नोदयामासतंमुनिम् पितामहंपांडवानांआत्मनःप्रपितामहम् ९ महाभारत
माख्यानंलक्ष्यश्रुतिविस्तरम् निमेषमात्रमपिमेमुखश्चव्यतयागतम् १० विभूतिविस्तरकरंसर्वेषांवेयशस्करम् त्वयास्तुविहितं
ब्रह्मन्दशांरवेक्षीरमिवाहितम् ११ अमृतेनतुतृप्तिःस्याद्यथास्वर्गसुखेनच तथातृप्तिंनगच्छामिश्रुत्वेमांभारतींकथाम् १२ अनुमा
न्यतुसर्वज्ञंपृच्छामिभगवन्नहम् हेतुःकुरूणांनाशस्यराजसूयोमतोमम १३ दुःसहानांयथाध्वंसोराजन्यानामुपप्लवे राजसूयंत
थामन्येयुद्धार्थमुपकल्पितम् १४ राजसूयस्तुसोमेनश्रूयतेपूर्वमाहृतः तस्यांतेसुमहद्युद्धमभवत्तारकामयम् १५ आहृतोवरुणेना
थतस्यांतेसुमहाक्रतोः देवासुरंमहायुद्धंसर्वभूतक्षयावहम् १६ हरिश्चंद्रस्यराजर्षेःक्रतुमेनमुपाहरत् तत्राप्याडीबकंनामयुद्धंक्ष
त्रियनाशनम् १७ ततोनंतरमार्गेणपांडवेनातिदुस्तरः महाभारतआरंभःसंभृतोग्निरिवक्रतुः १८ तदस्यमूलंयुद्धस्यलोकक्षयक
रस्यतु राजसूयोमहायज्ञःकिमर्थंननिवारितः १९ राजसूयोह्यसंहार्योयज्ञांगैश्चदुरत्ययैः मिथ्याप्रणीतेयज्ञांगेप्रजानांसंक्षयोध्रु
वः २० भवानपिचसर्वेषांपूर्वेषांनःपितामहः अतीतानागतज्ञश्चनाथश्चादिकरश्चनः २१ तेकथंभवतानेत्राबुद्धिमंतश्चुतानयात्
अनाथाह्यपराध्यंतेकुनेतारश्चमानवाः २२

कंनामतन्निमित्तम् उभयपक्षपातिनांक्षत्रियाणांनाशो वृत्तइत्यर्थः १७ महाभारतेभारतयु
द्धनिमित्तआरभ्यतइत्यारंभः १८ १९ असंहार्यःसर्वांगोपेतःकर्तुमशक्यः २० २१ नेत्रागुरुणा २२ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीगणेशायनमः जनमेजयस्य १ २ ३ ४ ५ ६ ७ अन्वगच्छत् गर्भिण्येवेत्यर्थः ८ ९ १० ११ निघृष्टौक्षतचिह्नौ १२ ५
अजः छागः तद्वत् श्यामौ समारूढौ तथैवकृष्णरूपवंतावेववृद्धिंप्राप्तौ १३ १४ वेमकोनामस्वर्गस्थः कश्चिदृषिः तस्यशालायांगृहेद्विजाभ्यांकौशिकपिप्प ३

श्रीगोपालकृष्णायनमः शौनकउवाच जनमेजयस्यके पुत्राः पठ्यंतेलोमहर्षणे कस्मिन्प्रतिष्ठितोवंशः पांडवानांमहा
त्मनाम् १ एतदिच्छाम्यहंश्रोतुंपरंकौतूहलंहिमे त्वत्तःकथयतःसर्वंव्यासप्रहतसारिस्फुटम् २ सौतिरुवाच पारीक्षितस्य-
काश्यायांद्वौपुत्रौसंबभूवतुः चंद्रापीडश्चनृपतिःसूर्यापीडश्चमोक्षवित् ३ चंद्रापीडस्यपुत्राणांशतमुत्तमधन्विनाम् जानमेज
यइत्येवंक्षात्रंभुविपरिश्रुतम् ४ तेषांश्रेष्ठस्तुराजासीत्पुरेवारणसाह्वये सत्यकर्णोमहाबाहुर्यज्वाविपुलदक्षिणः ५ सत्यकर्ण-
स्यदायादः श्वेतकर्णःप्रतापवान् अपुत्रःसतुधर्मात्माप्रविवेशतपोवनम् ६ तस्माद्वनगताद्गर्भंयादवीप्रत्यपद्यत सुचारोर्दुहितासु
भ्रूर्मालिनीमालिनी ७ सतुजन्मनिगर्भस्यश्वेतकर्णःप्रजेश्वरम् अन्वगच्छत्पूर्वंमहाप्रस्थानमच्युतम् ८ साहृष्ट्वासंप्रया
तंमालिनीपृष्ठतोऽन्वयात् पथिसासुषुवेसुभ्रूर्वनेराजीवलोचनम् ९ कुमारंतंपरित्यज्यभर्तारंचान्वगच्छत पतिव्रतामहाभागा
द्रौपदीवपुरापतीन् १० सतुराजकुमारोसौगिरिकुंजेरुरोदह छायार्थंतस्यमेघास्तुप्रादुरासन्समंततः ११ श्रविष्ठायाश्चपुत्रौद्वौ
पिप्पलादिश्चकौशिकः दृष्ट्वाकृपान्वितौगृह्यतंप्रक्षालयतांजले निघृष्टौतस्यतौपार्श्वौशिलायांरुधिरस्रुतौ अजश्यामौतुपा
र्श्वौतावुभावपिसमाहितौ तथैवतुसमारूढौअजपार्श्वस्ततोऽभवत् १३ ततोजपार्श्वइतितौचक्रातेतस्यनामह सतुवेमकशा
लायांद्विजाभ्यामभिवर्धितः १४ वेमकस्यतुभार्यातंसुदूहपुत्रकारणात् वेमक्याःसतुपुत्रोऽभूद्ब्राह्मणौसचिवौचतौ १५ तेषांपु
त्राश्चपौत्राश्चयुगपत्तुल्यजीविनः सएषपौरवोवंशःपांडवानांप्रतिष्ठितः १६ श्लोकोपिचात्रगीतोयंनाहुषेणययातिना जरासंक्र
मणेपूर्वंप्रहृष्टेनधीमता १७ आचंद्रार्कग्रहाभूमिर्भवेदपिनसंशयः अपौरवानतुमहीभविष्यतिकदाचन १८ इतिश्रीम
न्महाभारतेखिलेषुहरिवंशेभविष्यपर्वणिप्रथमोऽध्यायः १ शौनकउवाच उक्तोयंहरिवंशस्ते पर्वाणिनिखिलानिच
यथापुरोक्तानितथाव्यासशिष्येणधीमता १ तत्कथ्यमानममितमितिहाससमन्वितं प्रीणात्यस्मान्मृतवत्सर्वपापविनाशनम् २

लादाभ्याम् १५ तेषांअजपार्श्वपिप्पलादकौशिकानाम् १६ १७ १८ इतिहरिवंशेभविष्यपर्वणिटीकायांप्रथमोऽध्यायः १ १ २ ७ १

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तदाप्रभृति युगांतमारभ्य प्राणाइंद्रियाणि पुराकृतीः शिष्टाचारान्वर्तनेषु आचारेषु वृत्तांतः पूर्ववृत्तं न निवर्तिष्यते ४२ सूक्ष्मोल्पोपिधर्मः महोदर्को महाफलः दुस्तरोविघ्नबाहुल्यात् ४३ ४४ इतिश्रीमन्महाभारतेहरिवंशेभविष्यपर्वणिटीकायांद्वितीयोऽध्यायः २ आसन्नं यदियस्मात् कालं- मोक्षस्यनविद्महे तस्माद्द्वापरः धर्माधर्मसाम्यवान् संविद्धोअधर्माधिक्यात् दूषितोयेन तंयुगांतंयुगानांअंतेभवंकलिंश्रोतुंस्पृहयामि १ तत्रस्पृहाहेतुमा-

तदाप्रभृतिह्रास्यंतिनृणांप्राणाःपुराकृतीः ननिवर्तिष्यतेलोकेवृत्तांतावर्तनेष्विह ४२ तदासूक्ष्मोमहोदर्कोदुस्तरोदानमूलवान् चा तुराश्रम्यशिथिलोधर्मःप्रविचलिष्यति ४३ तदाह्यल्पेनतपसासिद्धिंप्राप्स्यंतिमानवाः धन्याधर्मंचरिष्यंतियुगांतेजनमेजय ४४ इतिश्रीमन्महाभारतेखिलेषुहरिवंशेभविष्यपर्वणिद्वितीयोऽध्यायः २ जनमेजयउवाच आसन्नंविप्रकृष्टंवायदिकालंनवि द्महे तस्माद्द्वापरसंविद्धंयुगांतंस्पृहयाम्यहम् १ प्राप्तावयंतुतत्कालमनयाधर्मतृष्णया आदद्यात्परमंधर्मंसुखमल्पेनकर्मणा २ शौनकउवाच त्रासमुद्वेगकरणंयुगांतंसमुपस्थितम् प्रनष्टधर्मंधर्मज्ञनिमित्तैर्वक्तुमर्हसि ३ सौतिरुवाच एष्टएवंभवि ष्यस्यगतिंतत्वेनचिंतयन् युगांतेसर्वभूतानांभगवानब्रवीत्तदा ४ व्यासउवाच अरक्षितारोहर्तारोबलिभागस्यपार्थिवाः युगांतेप्रभविष्यंतिस्वरक्षणपरायणाः ५ अक्षत्रियाश्वराजानोविप्राःशूद्रोपजीविनः शूद्राश्वब्राह्मणाचाराभविष्यंतियुगक्षये ६ कांडस्पृष्टाःश्रोत्रियाश्वनिष्क्रियाणिहवींषिच एकपंक्त्यामशिष्यंतियुगांतेजनमेजय ७ शिल्पवंतोनृतपरानरामद्यामिषप्रियाः मि त्रभार्याभविष्यंतियुगांतेजनमेजय ८ राजवृत्तिस्थिताश्वौराराजानश्चौरशीलिनः भृत्याश्वानिर्दिष्टभुजोभविष्यंतियुगक्षये ९ धनानिश्लाघनीयानिसतांवृत्तमपूजितम् अकुत्सनाचपतितेभविष्यतियुगक्षये १० प्रनष्टचेतनामर्त्यामुक्तकेशाविचूलिनः ऊनषो डशवर्षाश्वप्रजास्यंतिनराःसदा ११ अट्टशूलाजनपदाःशिवशूलाश्चतुष्पथाः प्रमदाःकेशशूलाश्वभविष्यंतियुगक्षये १२ सर्वेब्रह्मवदि ष्यंतिसर्वेवाजसनेयिनः शूद्राभोवादिनश्चैवभविष्यंतियुगक्षये १३

ह प्राप्ताइति अल्पायासेनमहत्फलंभवतीतिलोभादस्माभिःकलौजन्मप्रार्थितमित्यर्थः २ ३ ४ ५ ६ कांडस्पृष्टाःबाणधराःक्षत्रवृत्तयोब्राह्मणाइत्यर्थः निष्क्रियाणिपं चयज्ञहीनानि ७ ८ ९ अकुत्सनाअनिंदा १० चेतनाधर्माधर्मस्वरूपबोधः मुक्तकेशाःविधवाः विचूलिनःसंन्यासिनः प्रजास्यंति अन्योन्यंमिथुनीभूयप्रजांजनयिष्यंति ११ अट्टशूलाःअन्नविक्रयिणःशिवशूलाःवेदविक्रयिणःकेशशूलाभगविक्रयिण्यः १२ सर्वेब्रह्मवादच्छलेनकर्मभ्रष्टाभविष्यंतीत्यर्थः सर्वेवाजसनेयिनः शाखांतरलो- पात् तेनवेदत्रयसाध्योयज्ञउत्सन्नोभविष्यतीतिभावः इदानीमेवपश्चिमदेशेतथादर्शनात् भोइतिपूज्यवादोयेषुतेभोवादिनः १३ ६५ ६५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२३ विहितागतिः विहितांगतिम् २४ २५ संरंभात् भयात् आरंभात् उत्साहात् पौरुषे पुरुषवंशे २६ तेनभावेनमहत्वकारणेनबुद्धिपूर्वकद्वेषादित्यर्थः २७ २८
२९ तस्यक्रतोः संस्थासमाप्तिस्तदर्थंकृतमिदंभाविकालस्यम् कालस्यइच्छयेतिशेषः ३० तत्प्रणेयंकालाधीनम् ३१ ३२ ३३ ३४ ३५ द्विजःपक्षी ३६ ३७

व्यासउवाच कालेनविपरीतास्तेतवपूर्वपितामहाः नमांभविष्यंपृच्छंतिनचापृष्टोब्रवीम्यहम् २३ सामर्थ्यंचनपश्यामि भविष्यस्यनिवर्तने परिहर्तुंनशक्याहिकालेनविहितागतिः २४ त्वयात्विदमहंपृष्टोवक्ष्याम्यागंतुभावियत् अवश्यंबलवान्कालःश्रुत्वापिनकरिष्यसि २५ नसंरंभान्नचारंभान्नवैस्थास्यसिपौरुषे लेखाहिकाललिखितासर्वथादुरतिक्रमा २६ अश्वमेधःक्रतुःश्रेष्ठःक्षत्रियाणांपरिश्रुतः तेनभावेनतेयज्ञंवासवोधर्षयिष्यति २७ यदितच्छक्यतेराजन्परिहर्तुंकथंचन दैवंपुरुषकारेणमायजेथास्त्वंक्रतुम् २८ नचापराधःशक्रस्यनोपाध्यायगणस्यते नचवायजमानस्यकालेनदुरतिक्रमः २९ तस्यसंस्थाकृतमिदंकालस्यपरमेष्ठिनः यथाहृष्टंप्रजासर्गंगमिष्यंतियुगक्षये ३० तथायज्ञफलानांचविक्रेतारोद्विजातयः तत्प्रणेयंनिबोधस्वत्रैलोक्यंसचराचरम् ३१ जनमेजयउवाच निवृत्तावश्वमेधस्यकिंनिमित्तंभविष्यति श्रुत्वापरिहरिष्यामिभगवन्यदिमन्यसे ३२ व्यासउवाच निमित्तंभवितातत्रब्रह्मकोपकृतंप्रभो यतेथाःपरिहर्तुंत्वमित्यतश्चमस्तुते ३३ त्वयाहृतंक्रतुंचैववाजिमेधंपरंतप क्षत्रियानाहरिष्यंतियावद्भूमिर्धरिष्यति ३४ जनमेजयउवाच निवृत्तावश्वमेधस्यब्रह्मशापाग्नितेजसा अहंनिमित्तमितिमेभयंतीव्रंतुजायते ३५ कथंह्यकीर्त्यासुज्योतस्कृतीमद्विधोजनः लोकानुत्सहतेगंतुरवंसपाशइवद्विजः ३६ यथाह्यनागतमिदंदृष्टमंत्रःप्रणाशनम् यद्यस्तिपुनरावृत्तिर्यज्ञस्याश्वासयस्वमाम् ३७ व्यासउवाच उपात्तयज्ञोदेवेषुब्राह्मणेषूपपत्स्यते तेजसाव्याहृतंतेजस्तेजस्येवावतिष्ठते ३८ औद्भिज्जोभविताकश्चित्सेनानीःकाश्यपोद्विजः अश्वमेधंकलियुगेपुनःप्रत्याहरिष्यति ३९ तद्युगेतत्कुलीनश्चराजसूयमपिक्रतुम् आहरिष्यतिराजेंद्रश्वेतग्रहमिवांतकः ४० यथाबलंमनुष्याणांकर्तॄणांदास्यतेफलम् युगांतद्वारमृषिभिःसंवृतंविचरिष्यति ४१

उपात्तउपसंहृतोयज्ञोश्वमेधः देवादिषुज्ञानरूपेणावस्थास्यति ३८ उद्भिद्यजायतइत्योद्भिज्जःभूबिलस्थोयोगीरवन्यमानायांभूविप्रकटीभविष्यतीत्यर्थः ३९ श्वेतग्रहमुत्पातविशेषः अंतकः प्रलयकालः ४० बलंश्रद्धादिरूपंफलंदास्यतेक्रतुरितिशेषः संवृतंगोपितंविचरिष्यतिजनः ४१ श्रीमद्वेदव्यासायनमः ६५ ६५ ६५ ६५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१४शुक्लदंताः मांसाशनत्यागात् अन्यथारक्तदंतत्वंस्यात् अंजिताक्षाः सूक्ष्मदृष्टयः शाक्यमतंबुद्धमतंचोपजीवंति तेवेददूषकानास्तिकाइत्यर्थः १५ श्वापदाः हिंस्राः वृकव्याघ्रादयः स्वादूनांउत्तमरसादीनां १६ अंत्याः म्लेंछाः मध्याः कुरुपंचालाः तत्रस्थाश्चम्लेछदेशेवासंकरिष्यंतीत्यर्थः यथेतिनीचमार्गानुसारिण्यइत्यर्थः १७ दम्याः हलशकटादिवहनयोग्याः चिन्नवर्षीहलेयोजितस्यबलीवर्दस्य एकंशृंगमार्द्रंएकंशुष्कमित्येवंवर्षिष्यतीत्यर्थः १८ चोरयानाः मुष्णंतः यत्किंचिद्धासनदुर्गताः दरिद्राः १९ ऊषार्कबहुलाक्षारमृत्तिकयाप्ररवेदभूयिष्ठाबीजनाशिनीत्यर्थः नगरांतराइतिवनांतरेषुचोरभयात् वक्रमार्गेपिनगराग्रयोपयोगैः पां

तपोयज्ञफलानांचविक्रेतारोद्विजातयः ऋतवश्चभविष्यंतिविपरीतायुगक्षये १४ शुक्लदंतांजिताक्षाश्चमुंडाःकाषायवाससः शूद्राधर्मंचरिष्यंतिशाक्यबुद्धोपजीविनः १५ श्वापदप्रचुरत्वंचगवांचैवपरिक्षयः स्वादूनांविनिवृत्तिश्चविद्यादंतगतेयुगे १६ अंत्यामध्येनिवत्स्यंतिमध्याश्चांतनिवासिनः यथानिम्नंप्रजाःसर्वागमिष्यंतियुगक्षये १७ तथाद्विहायनादम्यास्तथापल्वलकर्षकाः चिन्नवर्षीचपर्जन्योयुगेक्षीणेभविष्यति १८ सर्वेचोरकुलेजाताश्चोरयानापरस्परम् स्वल्पेनाढ्याभविष्यंतियत्किंचित्प्राप्यदुर्गताः १९ नतेधर्मंकरिष्यंतिमानवानिर्गतेयुगे ऊषार्कबहुलाभूमिःपंथानस्तस्करावृताः २० सर्वेवाणिजकाश्चैवभविष्यंतिकलौयुगे पितृदत्तानिदेयानिविभजंतेऽकृतास्तदा २१ हरणायप्रयतस्यंतेलोभानृतविरोधिताः २२ सौकुमार्येतथारूपेरत्नेचोपक्षयंगते भविष्यंतियुगांतेचनार्यःकेशैरलंकृताः २३ निर्विहारस्वभीतस्यगृहस्थस्यभविष्यति युगांतेसमनुप्राप्तेनान्याभार्यासमागतिः २४ कुशीलानार्यभूयिष्ठंवृथारूपसमन्वितम् पुरुषाल्पंबहुस्त्रीकंतद्युगांतस्यलक्षणम् २५ बहुयाचनकोलोकोनदास्यंतिपरस्परम् अविचार्यगृहीष्यंतिदानंवर्णांतरात्तथा २६ राजचौराग्निदंडार्तोजनःक्षयमुपेष्यति सस्यानिष्पत्तिरफलातरुणावृद्धशीलिनः ईहयास्फरिवनोलोकाभविष्यंतियुगक्षये २७ वर्षाकृवाताःपुरुषानीचाःशर्करवर्षिणः संदिग्धःपरलोकश्चभविष्यतियुगक्षये २८ आत्मानश्चदुराचाराब्रह्मदूषणतत्पराः आत्मानंबहुमन्यंतेमन्युरेवाभ्ययाद्द्विजान् २९ वैश्याचाराश्चराजन्याधनधान्योपजीविनः युगापक्रमणेपूर्वेभविष्यंतिद्विजातयः ३० अप्रवृत्ताःप्रपत्स्यंतेसमयाःशपथास्तथा ऋणंसविनयभ्रंशंयुगेक्षीणेभविष्यति ३१

धैर्गंतव्यमित्यर्थः २० देयानिअलंकारादीनि शास्त्रतः अविभाज्यान्यपिविभजंते २१ लोभानृताभ्यांविरोधिनाःसविरोधाः २२ सौकुमार्येलावण्येरत्नेअलंकारादौ २३ निर्विहारस्यस्रक्चंदनदिव्यास्तरणादिभोगसामग्रीविहारस्तद्रहितस्यभूतस्यरूपमात्रेणस्थितस्य २४ २५ २६ ईहयातृष्णायाअस्फरिवनः २७ २८ २९ युगापक्रमणेधर्ममर्यादाभंगेभविष्यंतिप्रवर्तयिष्यंति ३० समयाःसांकेतिकाः धर्माः सविनयभ्रंशंउत्तमेभ्योविभ्रंशोयस्यतथाभविष्यतिक्रिमुतनीचेभ्यः ३१ ६९ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्वभावतः स्वेच्छयाशास्त्रार्थंवदिष्यंति ३३ ३४ द्विजातयः क्षत्राणिननियोक्ष्यंतिधर्मइतिशेषः तत्रहेतुः चौरेति ३५ कुंडायांअमृतेजीवतिपत्यौजारजाता यांद्वषाः रेतः सेक्तारः कुंडाद्वषाः नैष्कृतिकाः अनधिकारिणावपिजायापतीयज्ञंकरिष्यतइत्यर्थः अभक्षस्येतिच्छेदः ३६ ३७ गवेधुकः कुसुंभबीजाकारस्तृणधा

भविष्यत्यफलोहर्षः क्रोधश्चसफलोनृणाम् अजाश्चैवोपरोत्स्यंतेपयसोर्थेयुगक्षये ३२ अशास्त्रविदुषांपुंसामेवमेवस्वभावतः अप्रमाणंवदिष्यंति नीतिंपंडितमानिनः ३३ शास्त्रोक्तस्याप्रवक्तारोभविष्यंतियुगक्षये सर्वंसर्वेद्विजानंतिवृद्धाननुपसेव्यवै ३४ नकश्चिदकविर्नामयुगांतेसमुपस्थिते नक्षत्राणिनियोक्ष्यंतिविकर्मस्थाद्विजातयः चौरप्रायाश्चराजानोयुगांतेपर्युपस्थिते ३५ कुंडाद्वषानैष्कृतिकाः सुरापाब्रह्मवादिनः अश्वमेधेनयक्ष्यंतियुगांतेजनमेजय अयाज्यान्याजयिष्यंतितथाभक्षस्यभक्षिणः ३६ ब्राह्मणाधनतृष्णार्तायुगांतेसमुपस्थिते भोशब्दमभिधास्यंतिनचकश्चित्पठिष्यति ३७ एकशंखास्तथानार्योगवेधुकपिनद्धिकाः नक्षत्राणिवियोगीनिविपरीतादिशस्तथा ३८ संध्यारागोथदिग्दाहोभविष्यत्यवरेयुगे पितॄन्पुत्रानियोक्ष्यंतिवध्वःश्वश्रूश्चकर्मसु ३९ वियोनिषुचरिष्यंतिप्रमदासुनरास्तदा वाक्शरैस्तर्जयिष्यंतिगुरून्शिष्यास्तथैवच गुरवेषुचप्रयोक्ष्यंतिप्रमत्ताश्चनरास्तदा ४० अकृताग्राणिभोक्ष्यंतिनराश्चैवाग्निहोत्रिणः भिक्षांबलिमदत्वाचभोक्ष्यंतिपुरुषाःस्वयम् ४१ पतीन्सुप्तान्वंचयित्वागमिष्यंतिस्त्रियोन्यतः पुरुषाश्चप्रसुप्तासुभार्यासुचपरस्त्रियम् ४२ नाव्याधितोनाप्यरुजोजनःसर्वोभ्यसूयकः नकृतंप्रतिकर्तांचकालेक्षीणंभविष्यति ४३ इतिश्रीमन्महाभारतेखिलेषुहरिवंशेभविष्यपर्वणितृतीयोऽध्यायः ३ जनमेजय उवाच एवंविलुलितेलोकेमनुष्याःकेनपालिताः निवत्स्यंतिकिमाचाराःकिमाहारविहारिणः १ किंकर्माणःकिमीहंतःकिंप्रमाणाःकिमायुषः कांचकाष्ठांसमासाद्यप्रपत्स्यंतिकृतंयुगम् २ व्यासउवाच अतऊर्ध्वंच्युतेधर्मेगुणहीनाःप्रजास्ततः शीलव्यसनमासाद्यप्राप्स्यंतेह्रासमायुषः ३ आयुर्हान्याबलग्लानिर्बलग्लान्याविवर्णता वैवर्ण्याद्व्याधिसंपीडानिर्वेदोव्याधिपीडनात् ४ निर्वेदादात्मसंबोधःसंबोधाद्धर्मशीलता एवंगत्वापरांकाष्ठांप्रपत्स्यंतिकृतंयुगम् ५

न्यविशेषस्तन्मयाः पिनद्धकाअलंकाराः येषांतेएतच्चगुंजादेरप्युपलक्षणं वियोगीनियथाशास्त्रंतत्तद्ग्रहसंयोगहीनानि ३८ ३९ वियोनिषुपशुषुविभिन्नवर्णेषुवा ४० अग्रंग्रासचतुष्टयं अकृतंअदत्तंअग्रंयेषांतानिअन्नानिआकृताग्राणि ४१४२ अरुजोमनःपीडारहितः ४३ इतिह० तृतीयोध्यायः ३ एवंविलुलितेकलुषीकृते १२ शीलव्यसनंधर्मनाशं ३ निर्वेदः देहादौवैराग्यं ४आत्मसंबोधःविवेकोदयः एवंगत्वाधर्मशीलत्वान्चित्तशुद्धिज्ञानोत्पत्तिद्वारापरांकाष्ठांमोक्षदं-ज्ञानंतदेवसर्वपापनाशात्कृतयुगम् ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ ह॰ टी॰ उद्देशतः लेशतः विमर्षः विवेकः हेतुवादएव ननुक्रियायांकौतूहलंयेषांते हेतुवादकुतूहलाः वृथापंडिताः ६ निश्चिताः सौगतावैशेषिकाश्चवेदस्यपरतोपिप्रामा प॰
४ ण्यंनेच्छंति पूर्वंसतः प्रामाण्यमपरे प्रमाणैकंएकमेवप्रत्यक्षमेवप्रमाणमिति चार्वाकाः नेतीत्यस्यनान्यत्प्रमाणमित्यर्थः ७ ८ ९ तदात्व मात्रेवर्तमानकालिके ३
दृष्टार्थमात्रेश्रद्धेयाःश्रद्धावंतः वादेशीलेचकुतूहलं आश्चर्यंयेषांतेधर्मवादोपिदुर्लभः किमुततदाचरणमित्यर्थः १० शेषधर्मपुरस्कृताः अवशिष्टोविष्णुस्मरणादि
र्योधर्मस्तदनुसारिणः क्षमानिदयादीनि ११ असंगुप्तोजितेंद्रियः कषायस्यकलुषस्य १२ शाश्वतींवृत्तिंभिक्षाम् अवराःक्षत्रियादिः १३ ज्ञानंशास्त्रीयोबोधः

उद्देशतोधर्मशीलाःकेचिन्मध्यस्थतांगताः विमर्षशीलाःकेचित्तु हेतुवादकुतूहलाः ६ प्रत्यक्षमनुमानंच प्रमाणंनेतिनिश्चिताः
प्रमाणैकंकरिष्यंतिनेतिपंडितमानिनः ७ अप्रमाणंकरिष्यंति वेदोक्तमपरेजनाः तदासुखभगाश्चैवभविष्यंतिस्त्रियोपराः ८ ना
स्तिक्यपरमाश्चापिकेचिद्धर्मविलोपकाः भविष्यंतिनरामूढामंदाःपंडितमानिनः ९ तदात्व मात्रश्रद्धेयाःशास्त्रज्ञानबहिष्कृताः दां
भिकास्तेभविष्यंतिवादशीलकुतूहलाः १० तदाविचलितेधर्मेजनाःशेषपुरस्कृताः शुभान्येवाचरिष्यंति दानसत्यसमन्विताः ११
सर्वभक्षोह्यसंगुप्तोनिर्गुणोनिरपत्रपः भविष्यतितदालोकस्तत्कषायस्यलक्षणम् १२ विप्राणांशाश्वतींवृत्तिंयदावर्णावराजनाः
प्रतिपत्स्यंतिकृत्स्नार्थंतत्कषायस्यलक्षणम् १३ कषायोपप्लवेलोकेज्ञानविद्याप्रणाशने सिद्धिंस्वल्पेनकालेनयास्यंतिनिरुपस्कृताः १४
महायुद्धंमहानादंमहावर्षंमहाभयम् भविष्यतियुगेक्षीणेतत्कषायस्यलक्षणम् १५ विप्ररूपाणिरक्षांसिराजानःकर्णवेदिनः पृथिवीमु
पभोक्ष्यंतियुगांतेसमुपस्थिते १६ निःस्वाध्यायवषट्काराअनेयाश्चाभिमानिनः विप्राःक्रव्यादरूपेणसर्वभक्षावृथाव्रताः १७ मूर्खाः
स्वार्थपरालुब्धाःक्षुद्राःक्षुद्रपरिच्छदाः व्यवहारोपवृत्ताश्च च्युताधर्माच्चशाश्वतात् १८ हर्तारःपररत्नानांपरदारापहारकाः कामात्म
नोदुरात्मानःसोपधाःप्रियसाहसाः १९ तेषुप्रभवमानेषुतुल्यशीलेषुसर्वतः अभाविनोभविष्यंतिमुनयोबहुरूपिणः २० उत्पन्नायेक्र
तयुगेप्रधानपुरुषाश्रयाः कथायोगेनतान्सर्वान्पूजयिष्यंतिमानवाः २१ तस्यचौराभविष्यंतितथाचैलापहारिणः भक्ष्यभोज्यापहाराश्च
करंडानांचहारिणः २२

विद्याआत्मदर्शनंतयोर्नाशने निरुपस्कृताः निष्परिग्रहाः त्यागमात्रेणस्वल्पेनापिकालेनसिद्धिंमोक्षंयास्यंतीतिकलेर्गुणः १४
१५ कर्णवेदिनः पिशुनवाक्यतत्पराः १६ अनेयाअशास्याः अनयाइतिपाठेनीतिहीनाः १७ व्यवहारंभोजनाच्छादनादावेवउपवृत्तास्तत्पराः १८ सोपधा
छलवंतः १९ तेषुदुष्टेषुप्रभवमानेषु ऐश्वर्यवत्सु अभाविनः विनाशभाजः बहुरूपिणः चतुराश्रम्यभाजः २० प्रधानपुरुष ईश्वरस्तदाश्रयास्तद्भक्ताः कथा ४
योगेनैवनतुतादृशाचारेण २१ करंडानांकरीषाणामितिसमांचः स्नानसामग्रीभाजनानांवंशमयानामितिवा २२ ७ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२३ २४ २५ २६ उद्देशतःस्वल्पतः २७ मंडलैःसैन्यैः २८ २९ ३० ३१ ३२ ३३ ३४ ३५ निम्नेषुगिरिदर्यादिषुस्थित्वाबीजानां आकृतिंग्राम्यारण्यधान्या
नांस्वरूपंज्ञातुंभोक्तुंचईहंतइच्छंतः तत्रतत्स्थापणक्षमंअजेडकंपालयिष्यंति गंधारकाश्मीरादौस्थितास्तुखरोष्ट्रमितिभेदः ३६ पक्वेति अद्यप्रस्थौदनंगृहीत्वाश्वःप्र

चौराश्चौरस्यहर्तारोहंताहर्तुर्भविष्यति चौरैश्चौरक्षयेचापिकृतेक्षेमंभविष्यति २३ निःसारेक्षुभितेलोकेनिष्क्रियेन्यंतरेस्थिते नराः
श्रयिष्यंतिवनंकरभारप्रपीडिताः २४ पितृनाज्ञापयिष्यंतिपुत्राःकर्मणिसर्वशः स्नुषाश्वश्रूस्तथाचैवयुगांतेप्रत्युपस्थिते २५ वाक्
शरैर्दर्शयिष्यंतिगुरूञ्शिष्याःसमंततः यज्ञकर्मण्युपरतेरक्षांसिश्वापदानिच २६ कीटमूषकसर्पाश्चधर्षयिष्यंतिमानवान् क्षेमंसु
भिक्षमारोग्यंसामर्थ्यंवापिबंधुषु उद्देशतोनरश्रेष्ठभविष्यंतियुगक्षये २७ स्वयंपालाःस्वयंचोराःयुगसंभारसंभृताः मंडलैःप्रचलि
ष्यंतिदेशेदेशेपृथक्पृथक् २८ स्वदेशेभ्यःपरिभ्रष्टानिःसाराःसहबंधुभिः नराःसर्वेभविष्यंतितदाकालपरिक्षयात् २९ तदास्कंधे
समाधायकुमारान्विद्रुताभयात् कौशिकींप्रतरिष्यंतिनराःक्षुद्भयपीडिताः ३० अंगान्वंगान्कलिंगांश्चकाश्मीरानथमेकलान् ऋ
षिकांतगिरिद्रोणीःसंश्रयिष्यंतिमानवाः ३१ कृत्स्नंवाहिमवत्पार्श्वंकूलंचलवणांभसः अरण्येषुचवत्स्यंतिनराम्लेच्छगणैःसह ३२ नै
वशून्यानचाशून्याभविष्यतिवसुंधरा गोप्तारश्चाप्यगोप्तारःप्रभविष्यंतिशस्त्रिणः ३३ मृगैर्मत्स्यैर्विहंगैश्चश्वापदैःसर्पकीटकैः म
धुशाकफलैर्मूलैर्वर्तयिष्यंतिमानवाः ३४ चीरंपर्णंचबहुलंवल्कलान्यजिनानिच स्वयंकृतानिवत्स्यंतियथामुनिजनास्तथा ३५
बीजानामाकृतिंनिम्नेष्वीहंतःकाष्ठशंकुभिः अजेडकंखरोष्ट्रंचपालयिष्यंतियत्नतः ३६ नदीस्रोतांसिरोत्स्यंतितोयार्थेकूलमाश्रि
ताः पक्वान्नव्यवहारेणविपणंतःपरस्परम् ३७ तनूरुहैर्यथाजातैःसमूलांतरसंवृतैः बह्वपत्याःप्रजाहीनाःकुललक्षणवर्जिताः
३८ एवंभविष्यंतितदामनुष्याःकालकारिताः हीनाद्धीनंतदाधर्मंप्रजासमनुवत्स्यति ३९ आयुस्तत्रचमर्त्यानांपरंत्रिंशद्भविष्यति
दुर्बलाविषयग्लानारजसासमभिप्लुताः ४० भविष्यंतितदातेषांरोगैरिंद्रियसंक्षयः आयुःप्रक्षयसंरोधाद्विषादःप्रभविष्यति शु
श्रूषवोभविष्यंतिसाधूनांदर्शनेरताः सत्यंचप्रतिपत्स्यंतिव्यवहारोपसंक्षयात् ४२ भविष्यंतिचकामानामलाभाद्धर्मशीलिनः करि
ष्यंतिचसंकोचंस्वपक्षक्षयपीडिताः ४३

पादगुणंदेहीतिव्यवहरंतइत्यर्थः ३७ समूलांतरसंवृतैः मूलधनेनसहितस्यअंतरस्यकलाद्रव्य
स्यसंवृतानिसंवरणानिअपलापास्तैः निमित्तभूतैः यथाकांतैस्तनूरुहैः कलहायमानाव्यवहरंतितथोत्तमवर्णाधर्मेणापणंतआसतइतिपूर्वेणान्वयः ३८
३९ ४० ४१ ४२ संकोचंदुराचारस्येतिशेषः ४३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एवंशुश्रूषादिपादचतुष्टये प्रवृत्तः धर्मः यतः प्रशक्तोतरं अहिंसादिधर्मं प्रपत्स्यते ४४ तेषां श्रेयः प्रपन्नानां लब्धानुमानानां अन्वयव्यतिरेकाभ्यां निर्ज्ञातधर्माध
र्मफलानां मध्ये गुणेषु शब्दादिविषयेषु वा परिवर्तनं रमणं स्वादु किमुत धर्मे इति संदिह्य विज्ञाय तत्त्वं निश्चित्य एवं वक्ष्यमाणं जनो वदिष्यति ४५ तदेवाह यथे
ति यतः उक्तनिश्चयात् ४६ ४७ यथाशशीति दृष्टांतं विवृणोति छन्न इति तथा काल इत्यनुकृष्यते ४८ सकलशास्त्ररहस्यं संगृह्णाति अर्थेति द्वाभ्यां
परं ब्रह्म यत् तत् अर्थवादः सत्यस्यैवार्थस्य कथनं तत्त्वभूतस्य कीटभृंगन्यायेन ध्यानक्रियया भवनं तदेव च वेदार्थ इत्युक्तं तमिति विधेयापेक्षं पुंस्त्वं सिद्धस्यैवाज्ञा
भेदृष्टांतमाह अनिर्णिक्तमिति मलिनं पित्र्यं स्वर्णपिंडं स्वर्णत्वेनाविज्ञाय दरिद्रोस्मीति मन्यते तस्य मलापगमे तु धनवानहमिति निश्चिनोत्येवं ब्रह्मापि प्रत्यगनन्य

एवं शुश्रूषवो दाने सत्ये प्राणाभिरक्षणे चतुष्पादः प्रवृत्तश्च धर्मः श्रेयोभिपत्स्यसे ४४ तेषां लब्धानुमानानां गुणेषु परिवर्तताम् स्वादु किं
न्विति विज्ञाय धर्म एवं वदिष्यति ४५ यथा हानिः क्रमात्प्राप्ता तथा वृद्धिः क्रमागता प्रगृहीते यतो धर्मे प्रपत्स्यंति कृतं युगम् ४६ साधुवृत्तं
कृतयुगे कषाये हानिरुच्यते एक एव तु कालः स हीनवर्णो यथा शशी ४७ छन्नो हि तमसा सोमो यथा कलियुगं तथा पूर्णश्च तमसा हीनो
यथा कृतयुगं तथा ४८ अर्थवादः परं ब्रह्म वेदार्थ इति तं विदुः अनिर्णिक्तमविज्ञानं दायाद्यमिव धार्यते ४९ इष्टवादस्तपो नाम तपो हिंस्था
वरं कृतम् गुणैः कर्माभिनिर्वृत्तिर्गुणास्तथ्येन कर्मणा ५० आशीस्तु पुरुषं दृष्ट्वा देशकालानुवर्तिनी युगे युगे यथाकालमृषिभिः समुदाहृता ५१
इह धर्मार्थकामानां देवतानां प्रतिक्रिया आशिषश्च शुभाः पुण्यास्तथैवायुर्युगे युगे ५२ यथा युगानां परिवर्तनानि चिरं प्रवृत्तानि विधिः
स्वभावात् क्षणं न संतिष्ठति जीवलोकः क्षयोदयाभ्यां परिवर्त्तमानः ५३ इति श्रीमन्महाभारते खिलेषु हरिवंशे भविष्यपर्वणि चतु-
र्थोऽध्यायः ४ सूत उवाच इत्येवमाश्वासयतो राजानं जनमेजयम् अतीतानागतं वाक्यमृषेः परिषदास्तुतम् १ अमृतस्येव
संवाहः प्रभा चंद्रमसो यथा अत ऊर्ध्वं ततच्छ्रोत्रं महर्षेर्वाङ्मयो रसः २

त्वेनावधार्यते ४९ इष्टेति तपो धर्मः वर्णाश्रमयोग्यः स च इष्टवादः स्व
र्गाद्यभीष्टकथनं यतस्तपः स्थावरं अनादि अव्यभिचारिफलं कृतं शास्त्रेण निश्चितम् ततश्च गुणैः देहादिभिः कर्माभिनिर्वृत्तिः कर्मसिद्धिर्भवति कर्मणा च तथ्येन
सत्येन गुणाः देहादय इह कर्मभ्यो मुक्तिर्नास्ति अतो शरीरं ब्रह्मार्थं श्रयेदित्यर्थः द्वावेतौ पुष्करप्रादुर्भावस्य सूत्रभूतौ श्लोकौ ५० आशीः एकस्मादेव कर्मणः फलप्रा
प्तिस्तत्तद्युगीयपुरुषाणां श्रद्धादितारतम्यात्तारतम्येण भवतीत्यर्थः ५१ इह भूमौ प्रतिक्रियाफलम् तथैव तारतम्येनेत्यर्थः ५२ यथेति उत्तरार्धे तथेति पूरणीय ५
म् ५३ इति श्रीहरिवंशटीकायां चतुर्थोऽध्यायः ४ इत्येवम् १ संवाहः प्रवाहः २ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आख्यानंभारतं ३ दध्युःध्यानंक्तनवंतः ४ ५ ६ ७ ८ होत्राणांसंबंधिनोधिष्ण्याग्नयस्तैर्दीप्तशिरसम् ९ १० ११ संज्ञप्तंमारितंसंविवेशतत्समीपेउपविष्टा १२ मि
श्रीबभूवमिथुनीबभूव १३ असंज्ञप्तःमरणप्राप्तःअब्रवीद्राजा १४ १५ १६ १७ १८ १९ अन्वशासत् प्राज्ञप्तवान् २० आज्ञामेवाह असतीमिति २१ शौंडीर्यंमहात्म्यम् २२ २३

धर्मकामार्थसंयुक्तंकरुणंवीरहर्षणं रमणीयंतदाख्यानंकृत्स्नंपरिषदाश्रुतम् ३ केचिदश्रूणिमुमुचुःश्रुत्वादध्युस्तथापरे इतिहासंतमृ
षिणापाणाविवनिदर्शितम् ४ सदस्यान्सोभ्यनुज्ञाय कृत्वाचापिप्रदक्षिणम् पुनर्द्रक्ष्यामइत्युक्त्वाजगामभगवानृषिः ५ अनुजग्मुस्त
दासर्वेप्रयांतमृषिसत्तमम् श्लोकेप्रवदतांश्रेष्ठंयेविशिष्टास्तपोधनाः ६ यातेभगवतिव्यासेनदाब्रह्मर्षिभिःसह ऋत्विजःपार्थिवाश्चैवप्र
तिजग्मुर्यथागतम् ७ पन्नगानांसुघोराणांकृतानांवैरयातनाम् जगामरोषमुत्सृज्यराजाविषमिवोरगः ८ होत्राग्निर्दीप्तशिरसंपरि
त्राय्यवतक्षकम् आस्तीकोथाश्रमपदंजगामसमहामुनिः ९ राजापिहास्तिनपुरंजगामस्वजनावृतः अन्वशासच्चमुदितस्तदाप्रमु
दिताःप्रजाः १० कस्यचित्त्वथकालस्यसराजाजनमेजयः दीक्षितोवाजिमेधेनविधिवद्भूरिदक्षिणः ११ संज्ञप्तमश्वंतत्रास्यदेवीकाश्याव
पुष्टमा संविवेशोपगम्याथविधिदृष्टेनकर्मणा १२ तांतुसर्वानवद्यांगींचकमेवासवस्तदा संज्ञप्तमश्वमाविश्यतयामिश्रीबभूवसः १३
तस्मिन्विकारेजनितेविदित्वातत्त्वतश्चतत् असंज्ञप्तोयमश्वस्तेध्वंसेत्यध्वर्युमब्रवीत् १४ अध्वर्युर्ज्ञानसंपन्नस्तादिंद्रस्यविचेष्टितम्
कथयामासराजर्षेशशापसपुरंदरम् १५ जनमेजयउवाच यद्यस्तिमेयज्ञफलंतपोवारक्षतःप्रजाः फलेनानेनसर्वेणब्रवी
मिश्रूयतामिदम् १६ अद्यप्रभृतिदेवेंद्रमजितेंद्रियमस्थिरम् क्षत्रियावाजिमेधेननयक्ष्यंतीतिशौनक १७ ऋत्विजश्चाब्रवीत्क्रुद्धःस
राजाजनमेजयः दौर्बल्यंभवतामेतद्यदयंधर्षितःक्रतुः १८ विषयेमेनवस्तव्यंगच्छध्वंसहबांधवैः इत्युक्तास्तत्यजुर्विप्रास्तंनृपंजात
मन्यवः १९ अमर्षादन्वशासच्चपत्नीशालागताःस्त्रियः राजापरमधर्मज्ञस्तामसोजनमेजयः २० असतीवपुष्टमामेतांनिर्यातयतमे
गृहात् ययामेचरणौमूर्ध्निपातितौरेणुगुंठितौ २१ शौंडीर्यमेययाभग्नंयशोमानश्चदूषितः नचैनांद्रष्टुमिच्छामिपरिक्लिष्टामिवस्र
जम् २२ नस्वादुसोऽश्नातिनरःसुखंवास्वपितिवापहः अन्वास्तेयःप्रियांभार्यांपरेणामृदितामिह २३ पुनर्नैवोपभुंजंतिश्ववल्लीढंहविर्यथा
एवमुच्चैःप्रभाषंतंक्रुद्धमाशिक्षितंनृपम् गंधर्वराजःप्रोवाचविश्वावसुरिदंवचः २४ विश्वावसुरुवाच त्रियज्ञशतय
ज्वानंवासवस्त्वांनमृष्यते अप्सरास्तेनपत्नीतेविहितेयंवपुष्टमा २५ रंभानामाप्सरादेवीकाशिराजसुतामता सेषायोषिद्वराराजन्
रत्नभूतानुभूयताम् २६

२४ २५ २६ श्रीमद्वेदव्यासायनमः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वटादुत्पन्नंफलंवटांतरं वर्धयति व्यासादुत्पन्नोयंग्रंथस्तु व्यासमेववर्धयतीत्याश्चर्यमितिभावः ७ बंधनंसंसारक्रमेणमुच्यतइत्यर्थः ८ ९ १० ११ १२
इच्छसि श्रोतुमितिशेषः १३ इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोर्नीलकंठस्यकृतौभारतभावदीपेहरिवंशांतर्ग-

यथाहिपुष्पप्रभवंफलंद्रुमाः फलात्प्रजायंतिपुनश्चपादपाः तथामहर्षिप्रभवाइमागिरः प्रवर्द्धयंतेतमृषिंप्रवर्द्धिताः ७ पु
त्रानपुत्रोलभतेसुवर्चसश्च्युतःपुनर्विंदतिचात्मनःस्थितिम् व्याधिंनचाप्नोतिचिरंसबंधनंक्रियांचपुण्यांलभतेगुणान्वितः
८ पतिमभिलभतेचसत्सुकन्याश्रवणमुपेत्यशुभामुनेस्तुवाचः जनयतिचसुतान्गुणरूपतान्स्वजनहितंद्विषतांप्रमर्दनंच ९
विजयतिवसुधांचराजवृत्तिर्धनमतुलंलभतेहिषज्जयंच विपुलमपिधनंलभेच्चवैश्यःसुगतिमियाच्छ्रवणाच्चशूद्रजातिः १० पुरा
णमेतच्चरितंमहात्मनामधीत्यबुद्धिंलभतेचनैष्ठिकीम् विहायदुःखानिविमुक्तसंगःसवीतरागोविचरेद्वसुंधराम् ११ इत्येन
दाख्यानमुदाहृतंयप्रतिस्मरंतोद्विजमंडलेषु स्थैर्येणधैर्येणपुनःस्मरंतःसुखंभवंतोऽनुचरंतुलोकम् १२ इतिचरितमिदंमहात्म
नामृषिकृतमद्भुतवीर्यकर्मणाम् कथितमिदंहिसमासविस्तरैःकिमपरमिच्छसिकिंब्रवीमिते १३ इतिश्रीमन्महाभारतेखिले
षुहरिवंशेभविष्यपर्वणिभविष्यांतग्रंथार्थप्रकाशोनामषष्ठोऽध्यायः ६ ५ ५ ५

तभविष्यांतग्रंथार्थप्रकाशटीकायांषष्ठोऽध्यायः ६ श्रीगोपालायश्रीकृष्णायनमः ५ श्रीर्जयति ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२७ आवर्तितः विघ्नितः २८ २९ तेलया ३० ३१ ३२ नमुः पौत्रस्य अभिक्रमेदित्यत्राविरित्युपसर्गः अइतिनिपातोवा ३३ ३४ ३५ ३६ ३७ ३८ अदुष्टा

यज्ञोविवरमासाद्य विघ्नमिंद्रेणाते कृतम् यज्वाद्यसिकुरुश्रेष्ठसमृत्व्यावासवोपमः २७ विभेत्यभिभवाच्छक्रस्तवक्रतुफलैर्नृप त
स्मादावर्तितश्चैवक्रतुरिंद्रेणतेविभो २८ मायैषावासवेनेह प्रयुक्ताविघ्नमिच्छता कृतोविवरमासाद्यसंज्ञाप्तहृश्यवाजिनम् २९ र
तमिंद्रेणाभार्यामन्यसेयांवपुष्टमाम् अथतेगुरवः शप्तास्त्रियज्ञशतयाजिनः ३० त्वंशितस्त्वंचविप्राश्च फलादिंद्रसमादिह त्वत्तश्चैव
क्रतुर्धर्षास्त्रियज्ञशतयाजिनः ३१ बिभेतिहिसदात्वत्तोब्राह्मणेभ्योपिवासवः एकेनवैतदुभयंतीर्णंशक्रेणमायया ३२ सएषसुमहा
तेजाविजिगीषुःपुरंदरः कथमन्यैरनाचीर्णंनमुदारानतिक्रमेत् ३३ विश्वावसुरुवाच यथैवाहिपराबुद्धिः पराधर्मः परो
दमः यथैव परमैश्वर्यं कीर्तिं तंहरिवाहने ३४ तथैवत्वयिदुर्धर्षेस्त्रियज्ञशतयाजिनि ३५ मावासवंमाचगुरूनात्मानंमावपुष्टमाम्
गच्छदोषेणकालोहिसर्वथादुरतिक्रमः ३६ ऐश्वर्येणाश्वमाविश्यदेवेंद्रेणारिसरोषितः आनुकूल्येनदेवस्यवर्तितव्यंसुरवार्थिना ३७
दुस्तरंप्रतिकूलंहिप्रतिस्रोतइवांभसः स्त्रीरत्नमुपभुंक्ष्वेमामपापांविगतज्वरः ३८ अपापास्त्यज्यमानावैत्यज्येयुरपियोषितः अदुष्टा
स्त्रियोराजन्दिव्यास्तुसविशेषतः ३९ भानोःप्रभाशिखावह्नेर्वेदीहोत्रेतथाहुतिः परामृष्टाप्यसंसक्तानोपदुष्यंतियोषितः ४० ग्रा
ह्यालालयितव्याश्चपूज्याश्चसततंबुधैः शीलवत्योनमस्कार्याः पूज्याःश्रियइवस्त्रियः ४१ इतिश्रीमन्महाभारतेखिलेषुहरिवंशे
भविष्यपर्वणिपंचमोऽध्यायः ५ सौतिरुवाच एवंसविश्वावसुनानुनीतःप्रसादमागम्यवपुष्टमायाः चकारमिथ्याव्यतिशंकि
तात्माशांतिंपरांमानवधर्महृष्टाम् १ श्रमंमभिविनिवर्तमानसंसःसमभिलषज्जनमेजयोयशःस्वम् विषयमनुशशासधर्मबुद्धिर्मु
दितमनारमयत्वपुष्टमांताम् २ नहिविरमतिविप्रपूजनान्नचविनिवर्ततियज्ञदानशीलात् नविषयपरिरक्षणात्च्युतोभूत्नच
परिगर्हतितांवपुष्टमांच ३ विधिविहितमशक्यमन्यथाहिकर्तुंयदृषिरचिंत्यतयापुराब्रवीत्सः इतिसनृपतिरात्मवांस्तदासौस्तद
नुविचिंत्यबभूववीतमन्युः ४ इदंमहाकाव्यमृषेर्महात्मनःपठन्नृणांपूज्यतमोभवेन्नरः प्रकृष्टमायुःसमवाप्यदुर्लभंलभेच्चसर्वक्र
फलंचकेशवं ५ शतक्रतोःकल्मषविप्रमोक्षणंपठन्निदंमुच्यतिकल्मषान्नरः तथैवकामान्विविधान्समश्नुतेह्यवाप्तकामश्चचि
रायनंदति ६

अल्पदोषाइत्यर्थः ३९ परामृष्टाप्यसंसक्तादुषिताप्यदूषितेत्यर्थः ४० ४१ इतिहरिवंशेभविष्यपर्वणिटीकायांपंचमोऽध्यायः ६
५ मिथ्याव्यतिशंकितात्मानिर्निमित्तंदूषितचित्तः १ २ ३ विधिविहितमितिपादेऽक्षरत्रयाधिक्यमार्षम् ४ ५ ६ ६९ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

धिरीश्वरः तस्यप्रभावंसृष्ट्यादिसामर्थ्यंकथयेत्यर्थः किंभूतस्यसागरांभसिस्वपतः सागरवदनंतंअपारंचअंभइवांभः एकंरसं॰ महद्भूतमनंतमपारं॰ सलिलएकोद्रष्टाद्वैतोभवतीत्यादिश्रुतिप्रसिद्धंब्रह्मनतुप्राकृतसमुद्रांभः नष्टानलानिलेलोकेनष्टाकाशमहीतलेइतिवाक्यशेषेतत्कारणस्याब्ध्यादेरपिनाशेतदवस्थानायोगात् तस्मिन्सागरांभसिशुद्धेब्रह्मणि स्वपतः स्वपीतोभवति तस्मादेनं स्वपीतीत्याचक्षतइतिस्वपितिनामनिर्वचनात् ईश्वरग्रासस्तुरीयतुरीयः अव्यक्तंपुरुषेब्रह्मनिष्कलेसंप्रलीयतइतिश्रुतिस्मृत्योरीश्वराव्यक्तशब्दितस्यमायाविनःउद्दालयोपलंभात्स्वनिजंमायातीतंरूपंपततिगच्छतीतिस्वपन्तस्यस्वपत इतियोगेननिष्कलेब्रह्मणिकैवल्येसमाधौवालीयमानस्यमायाविनःप्रभावंब्रूहीतिमुख्यःप्रश्नःपुष्करेब्रह्मांडेवाऋषयश्चकथमुत्पन्नाइतिवाव्योमपुष्करमंबरमितिपुष्करशब्दस्यव्योमवाचित्वेनव्योमपर्यायाणांचप्रायेणखंब्रह्मअमृतंदिविपरमेव्योमन्नित्युपनिषत्स्वव्याकृताकाशेप्रसिद्धेः पुष्कराख्येतस्मिन्देवर्षयः इंद्रियप्राणाः सूत्रात्मेतियावत्कथमुत्पन्नाइतिद्वितीयप्रश्नः १ योगंसूत्रेणशुद्धानामधिगमोपायंआख्याहीतितृतीयःप्रश्नः २ नोव्योमापरोयत् तस्मादव्यक्तमुत्पन्नंत्रिगुणंद्विजसत्तमेति

एतदाख्याहि निखिलंयोगंयोगविदांपते शृण्वतस्तस्यमेकीर्तिंनतृप्तिरभिजायते २ कियंतंचैवकालंवैशयितापुरुषोत्तमः किमर्थंशयतेकालंतस्यकालस्यसंभवः ३ कियताचैवकालेनप्रबुध्यतिसुराधिपः कथमुत्थायभगवानसृजन्निखिलंजगत् ४ केप्रजापतयस्तातआसन्पूर्वंमहामुने कथंनिर्मितवांश्चैतच्चित्रंलोकंसनातनः ५ एवमेकार्णवेलोकेनष्टेस्थावरजंगमे नष्टेदेवासुरगणेप्रनष्टोरगराक्षसे ६

श्रुतिस्मृत्योर्विशेषणीभूतमायातिरोधानप्रादुर्भावाभ्यांसृष्टेःप्रागूर्ध्वंचतद्धेतोर्मायाविनःस्थितिकालावधिंपृच्छति कियंतमितिस्थित्वेतिशेषः शयितेतितृंडंतंशयनंकरिष्यतीत्यर्थः कियताचैवकालेनसशेतेइतिपाठेतुमहानपिकालोभोगलुब्धानांअल्पएवेत्यभिप्रेत्य वर्तमानसामीप्येवर्तमानवद्वेतिशेतेइतिलट्प्रयुक्तः तृतीयंपृष्ट्वाचतुर्थंपृच्छतिकिमर्थमिति कालस्यसंभवोयोनिःसन् कालेकिमर्थंशेतेपरिमितकालावेवसृष्टिप्रलयौकुतःकरोतिप्रवाहनित्यांवासृष्टिंकुतोनकरोतीत्यर्थः कालमितिद्वितीयाऽत्यंतसंयोगे शयतइतिशयोलुगार्षः श्रयतइतिपाठः स्वच्छःस्वपतइतिपाठेस्वपीतीत्यर्थः आत्मनेपदंचार्षम् ३ लयकालावधिंपृच्छतिकियतेति एवंकियंतमित्यादिनासार्धश्लोकेनस्वतपइतिप्रथमश्लोकपदार्थंविविच्यपृष्ट्वा यथोद्भूताइत्यपितथैवपृच्छतिसार्धेनकथमिति कूटस्थस्याद्वितीयस्यकथमुपादानत्वंयुज्यतेत्यर्थः ४ एतदेवाह सनातनः सर्वदैकरूपः कूटस्थइत्यर्थः ५अद्वितीयत्वमाह एवमितिद्वाभ्याम् एकार्णवेशुद्धचिन्मात्रेलोकेआत्मानमेवलोकमुपासीतेत्यात्मनिलोकशब्दस्यश्रौतप्रसिद्धेः लोकेनष्टेइतिव्यधिकरणेसप्तम्यौचिदात्मनिस्थावरादावदर्शनंगतेसतीत्यर्थः ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

श्रीः श्रीमद्गोपालमानम्यव्याकुर्वेपुष्करोद्भवम् ख्यातश्चतुर्धरःशिक्षानयप्रणयसंयमैः १ उत्तालेषुनकोशविग्रहवलं पद्मेषुयत्राश्रितंगंभीरेषुन
संतवोनविहिताःकूटाननस्फोटिताः नच्छिन्नानतमश्वरानततिभिःक्काननाल्हादितानोदीनाश्चविभीषणाननिहिताश्रीलक्ष्मणार्यश्रितेः २ करुध्वंबक
भूतकालकूटाभपुष्करोद्भवम् कंठेकर्तुंक्षमोलोकेकोमाजिपुरुषोत्तमः ३ तत्रतावदिहवक्तुमर्हसिधर्मज्ञयशोनारायणात्मकमिति नतस्येशेकश्चनतस्य
नाममहद्यशः तस्मिन्यशोनिहितंविश्वरूपमितिश्रुतिप्रसिद्धस्यनारायणात्मकस्ययशःशब्दितस्यवक्तव्यत्वेनोपक्रमात् अधीत्यसर्वमध्यात्मंदेवलोके
महीयतइत्युपसंहारेणचास्यकृत्स्नस्यवाक्यसंदर्भस्यषड्विंशत्यध्यायसंमितस्यब्रह्मपरत्वंनिश्चीयते यत्त्विहजगदुद्भवादिकमुक्तंतत्फलवत्संनिधावफलं
तदंगमितिन्यायेनमहावाक्यंप्रतिपाद्यब्रह्माद्वैतप्रतिपत्त्यर्थमेव येचात्रएकार्णवदेवासुरादिशब्दास्तेपियथाअजामेकांलोहितशुक्लकृष्णां द्वासुपर्णासयु
जासखाया इत्यादिश्रुतिषुमेषीशकुन्यादिवृत्तांतकथनमुखेनब्रह्मतत्त्वंनिरूपितं तथानिर्विशेषचिन्मात्रशमकामादिचेतोवृत्तिविशेषपरतयाव्याख्ये
याःसलिलएकोद्रष्टाद्वैतोभवति इयाहप्राजापत्यादेवाश्चासुराश्चेत्यादिश्रुतिष्वपिअनयैवभंग्याब्रह्मतत्त्वनिरूपणदर्शनात् एवंचैकार्णवादिशब्दानांसलि

जनमेजयउवाच प्रभावंपद्मनाभस्यस्वपतःसागरांभसि पुष्करेवैयथोद्भूतादेवाःसर्षिगणाःपुरा १

लादिश्रुतिसमानार्थत्वेनतयोर्मूलमूलिभावेसंभवति खंडप्रलयपरतयातद्व्याख्यानमसत्स्वप्याकाशादिषु जलधातुमात्रस्यसद्भावासंभवात्तत्पौर्वापर्यविरोधा
दुपेक्ष्यम् एवंचात्रएकार्णवंविशुद्धाचित्तविष्णुरव्याकृतंनभः पुष्करंद्विविधंकार्यंशमकामौसुरासुरौ अनयैवदिशाध्यात्माधिदैविकरूपकैः निरूपि
तंपुराणेषुपूर्वेष्वपिनसंशयः पुष्करंपुष्करप्रादुर्भावेतदिहदृश्यते अतस्तद्व्याख्ययासर्वंपुराणंव्याकृतंभवेत् विद्याधिकारावगताश्वमेधादिकेष्विह इंद्रवृत्राद
यःशब्दाआत्ममोहपराःकृताः अत्रापिब्रह्मणस्तद्वत्पारोक्ष्येणनिरूपणंचक्रेदुर्जनचोरेभ्यस्तत्त्वरत्नंसुरक्षितुम् १ अनयैवदिशावेदज्ञेयंवृत्रवधादिकम्
इत्याशयेनभगवान्व्याख्यत्पारोक्ष्यतत्परम् २ पुष्करप्रादुर्भावेध्यात्मविद्यांस्वरूपेणाधिदैविकादिरूपकेणचदर्शितांयथामतिव्याकुर्मः तत्रपूर्वंभविष्येसंसा
रिणामत्युल्बणांगतिंश्रुत्वाअत्यंतमुद्विग्नस्तरतिशोकमात्मविदितिश्रुतेर्नान्यःपंथाविद्यतेऽयनायेतिश्रुतेश्चात्मज्ञानादन्यःश्रेयःसाधनमपश्यन् तदेवसविस्त
रंजिज्ञासमानोजनमेजयउवाच प्रभावंपद्मनाभस्येत्यादि पद्मनाभस्यप्रभावमाख्याहीतिसंबंधः पद्मंकृत्स्नकार्यप्रपंचः सनाभौगर्भेयस्यसः मायोपा

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नन्नेहं यद्देवतादिभ्यः श्रुतं यच्च द्वैपायनेनोक्तं तद्बाहुल्यात् सर्वं वक्तुमशक्यमित्याशयेनाह यथाशक्तीति यथाश्रुतं नविज्ञातुं विशेषेण ज्ञातुं मया न शक्यं ऋषिर्मंत्रद्रष्टा तन्मात्रेण सोऽहं भगवो मंत्रविदेवास्मि नात्मविदिति छांदोग्ये सनत्कुमारं प्रति वदता नारदेनेवेत्यर्थः १४ परं पुरुषं नारायणात्मकं शुद्धचिदात्मकं यं पुरुषं ब्रह्मापि वेदो पि विश्वात्मनः साकल्यात् सर्वात्मना सुरव्यहृत्येति यावत् न वेद ते यतो वाचो निवर्तंत इति श्रुतेः कार्त्स्न्येन न वेदयते किंतु भागलक्षणया तु वेदयत इवेत्यर्थः १५ श्रुतं मे मया विश्वेषां देवानां महर्षीणां च ऋ स्त्वमार्ष यद्रहस्यं गोप्यं तत् इदं इदमेव यत्त्वया पृष्टं नारायणात्मकं यशः कीदृशानां विश्वेदेवानां तत्त्वतः अनारोपितरूपेण सर्वं देव आत्मैव येषां ते सर्वदेवास्तेषां सर्वं खल्विदं ब्रह्म इदं सर्वं यदयमात्मेति श्रुतेः अत एव ऋक्रूपयाशिष्यान्प्रति तत्त्ववादिनां तत्त्वमेव वक्तुं शीलं येषां तेषां १६ कारणं प्रवर्तकं यत्तद्दैवं देवानां विदुषामिदं दैवं अधि अधिकम् दैवं महाभाग्यं ज्ञानाख्यं यद्देवानां दैवं तदश्ववेतदा सवानीति एषास्य परमा संपदि

तन्नेहं संप्रवक्ष्यामि यथाशक्ति यथाश्रुतम् न विज्ञातुं मया शक्यमृषिमात्रेण भारत १४ कः समुत्सहते ज्ञातुं परं नारायणात्मकम्
विश्वात्मनो यं ब्रह्मापि न वेद यतितत्त्वतः १५ श्रुतं मे विश्वदेवानां यद्रहस्यं महर्षिणाम् तादिदं सर्वदेवानां तत्त्वतस्तत्त्ववादिनां १६
तदध्यात्मविदां चिंत्यं कारणं चैव कर्मिणाम् अधिदैवं च यद्दैवं तद्दैवमिति संज्ञितम् १७ यद्भूतमधिभूतं च यत्परं च महर्षिणाम् यत्स्त
त्यं देवदृष्टं च यत्तद्वेदविदो विदुः १८ यः कर्ता कारको बुद्धिर्मनः क्षेत्रज्ञ एव च प्रधानं पुरुषः शास्ता एकस्तदभिशब्द्यते १९

तिश्रुतेः तदुक्तं दैवमदृष्टमिति संज्ञितम् सर्वेषां सुखकरं भाग्यम् एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः १७ अध्यायशेषेणा अत्तुवादसुखेन प्रश्नानां क्रमेण संक्षिप्योत्तराण्याह यद्भूतमित्यादिना भूतं अनादि अनादित्वं व्यवहारे मायायामप्यस्तीत्यत उक्तं अधिभूतं सर्वेषु तेषु सद्रूपेणानुस्यूतम् अनंतमित्यर्थः जाड्यरूपेण मायापि सर्वत्रानुस्यूतेत्यत उक्तं परमिति महर्षीणां महार्षिणां ज्ञेयतयेति शेषः परं उत्कृष्टं जडस्य परत्वायोगात् परत्वं मायोपाधिकेप्यस्तीत्यत उक्तं सत्यमिति मायाया बाधितत्वेन तस्यापि बाधितत्वादसत्यत्वं सत्यमप्यचिद्रूपं चेत्तत्राह देवदृष्टं देवश्चक्षुरादि प्रत्यक्षं तस्यापि दृष्टं प्रत्यक्षं न दृष्टेर्द्रष्टारं पश्ये प्राणस्य प्राणमुत चक्षुषश्चक्षुरित्यादिश्रुतेः ज्ञानमात्रस्वरूपमित्यर्थः वेदं सत्यं ज्ञानमनंतं ब्रह्मेत्यादि विदंतीति वेदविदो विदुः एतेन सागराभो रूपस्युद्रसुक्तम् १८ अस्य तटस्थलक्षणमाह यइति कर्ता वियदादेः कारको हिरण्यगर्भद्वारा भौतिकस्य बुद्धिर्मन इति महदहंकाररूपत्वमुक्तम् क्षेत्रज्ञ इति साक्षिमात्रेणाद्रष्टृत्वं एतेन पद्मनाभप्रभाव उक्तः उक्तेर्थे भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म एतदिति श्रुतिं प्रमाणयन्योगमाह प्रधानमिति प्रधानं जडम् पुरुषो जीवः शास्ता ईशः एतत्त्रितयं एक एव परमात्मेति १९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतेनयोगमारव्याहीतितृतीयप्रश्नेयोगशब्दार्थोविवृतः एतदेवोपसंहरति केवलमिति गव्हरंनेष्टंदुकं प्रसिद्ध्याआकाशः नशून्यमितितेनलक्ष्यते गव्हरमि
तित्रिविधभेदशून्यत्वाद्ब्रह्मभूतेइत्यर्थः ततश्चार्थस्यचेष्टः प्रयोगः शून्यतुलादधनइत्युक्तं श्रीभागवतेवेदस्तुतौमहाभूतानिवियदादीनितेषांविपर्ययः प्रलयोयस्मिन्
तस्मिन्नेकार्णवेसतीत्यर्थः ७ प्रभुरिति प्रभुश्चिदात्माकांविधिंनियतिम् भाग्यंस्त्रीनियतिर्विधिरिति साहचर्याद्विधिप्राधान्यस्यकश्चील्लम् प्रभुः किमहष्टरूपंसहा
यमादायआश्रित्यमहाभूतपतिर्वियदादिस्रष्टाईशः महातेजाइतिसमष्टिस्तैजसः सूत्रात्मामहानितिरितिअत्यंतविस्तृतोविराट्चभूत्वाआस्ते स्रष्टा महदाद्याः
तेषांगुरुः ईशः तस्यापिश्रेष्ठइतिविभोर्विशेषणम् ८ अध्यारोपापवादाभ्यांनिष्प्रपंचंप्रपंच्यतइतिन्यायमाश्रित्यहिब्रह्माद्वैतंप्रसाध्यम् तच्चाध्यारोपस्यैवदु
र्वचनत्वादनुपपन्नंत्वयाचअसकृत्तदेवोपपादितमतः संशयाविषयस्यमेनिः संशयंज्ञानंयथास्यात्तथाव क्तुमर्हसीत्याह तन्मेत्वमिति उपपन्नायर्योग्या
य यशोनारायणात्मकंनरोविद्यावच्छिन्नंब्रह्मतेनस्वात्मनिकल्पितंईशस्त्रूत्रविराडंतंनारंतस्यसमूलस्य अयनंस्थानंनारायणः शुद्धंवस्तु तदात्मकंयशः तेभव

नष्टानलानिलेलोकेनष्टाकाशमहीतले केवलंगव्हरीभूतेमहाभूतविपर्यये ७ प्रभुर्महाभूतपतिर्महातेजामहाततिः आस्तेस्रष्ट
गुरुश्रेष्ठोविधिमादायकांमुने ८ तन्मेत्वमुपपन्नायब्रह्मन्नेतदसंशयम् वक्तुमर्हसिधर्मिष्ठयशोनारायणात्मकम् ९ प्रादुर्भावंपुर
स्कृत्यभूतंभव्यंमहात्मनः श्रोतॄणामुपविष्टानांभगवान्वक्तुमर्हसि १० वैशंपायनउवाच नारायणयशोज्ञानेयाभवेद्भवतः स्पृ
हा त्वद्दृशानघपूतस्यकार्यंकुरुकुलर्षभ ११ शृणुष्वादिपुराणेभ्योदेवताभ्योयथाश्रुति ब्राह्मणानांचवदतांश्रुतोस्माभिर्महात्मनाम् १२ त
थाचतपसाहृष्टोबृहस्पतिसमद्युतिः पाराशर्यस्ततः श्रीमान्गुरुर्द्वैपायनोब्रवीत् १३

विलासः ईशादिघटांतः तंवक्तुमर्हसीतिसंबंधः अशेषेर्द्वच
नेसुद्धेतिअशोरसकन्मत्ययेसुट् एतेनअनंतरोबाह्यः कृत्स्नः प्रज्ञानघनइतिश्रुतिप्रसिद्धंसबाह्याभ्यंतरंशुद्धंचिन्मात्रंनारायणरूपमितिसर्वत्रश्रुतंतदुपपत्तिपूर्व
कंप्रत्युत्पादयेतिसूचितम् ९ भूतंविद्वद्दृष्ट्यानित्यसिद्धंप्रादुर्भावंअधिष्ठानानतिरेकात्मूढदृष्ट्याभव्यंउत्पद्यमानम् श्रद्धाविद्यतेयेषांतेश्राद्धाः प्रज्ञाश्रद्धार्चाभ्यो
णइतिमत्वार्थीयोणः १० प्रष्टारंप्रोत्साहयन्वैशंपायनउवाच नारायणायेति हेअनघ हेकुरुकुलर्षभ नारायणात्मकयशोज्ञानेयाभवतः स्पृहाप्रवेत्सात्वदृशा
त्वद्वंशेउचिता विभक्तधनेषुभ्रातृषुविभक्ताइतिवदुत्तरपदलोपः सास्पृहापूतस्ययज्ञाद्यनुष्ठानस्यकार्यफलं तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदा
नेनतपसानाशकेनेतिश्रुतेः भूतस्येतिपाठेलब्धजन्मनइदमेवकार्यंकरणीयंयद्भगवद्विचारोऽन्यथानिष्फलंजन्मेत्यर्थः ११ श्रुतिंउपनिषद्वाक्यंअनतिक्रम्येति ८
यथाश्रुति श्रुतः पद्मनाभस्यप्रभावइतिपृष्टस्यविशेष्यस्यानुकर्षः १२ तपसापुण्येनहृष्टोमयेतिशेषः हृष्वेतिपाठेतपसाध्यानेनदृष्टापद्मनाभस्यप्रभावमि
तिपूर्ववत्पृष्टानुकर्षः १३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्रेति धर्मपादाः तपः शौचं दयासत्यं तैर्विग्रहो विरोधोऽस्य यः संगमः दानृतपादवतो यस्य सपादविग्रहोऽधर्मः धर्मेण निरुद्धपाद इत्यर्थः यद्वा सर्वं युगं चतुष्पादम पि संध्यांशे उत्तरयुगमर्धसंक्रमात्संच पादं भवतीति स्थितेयं तेनाधर्मः पादविग्रहः द्वाभ्यामधर्मपादाभ्यां त्रिभिर्धर्मो व्यवस्थित इत्यादिग्रंथो ऋज्वर्थ एव एवमपि सं- ध्यायां पादार्धस्यैव संक्रमात्सर्वं युगं सार्धचतुष्पादं स्यात् इदमपि युगतत्संध्ययोः कालबहुत्वाल्पत्वाभ्यां न युक्तं पादाधिक्योक्तेः पुराणांतरविरोधादध्यात्मप्र करणाच्चैवमिह प्रतीमः फलाभिसंधिना रहितो हिंसाशून्यो धर्मः कृतम् तत्सहितस्त्रेता दंभेन कृतो द्वापरम् धर्मलोपः कलिः तत्राद्ये फलेच्छाभावेपि कृतो ध र्मो यथा आम्रफलार्थं निर्मिते च्छायागंध इत्यनूत्पद्येते एवं धर्मे चर्यमाणमर्था अनूत्पद्यंत इत्यापस्तंबोक्तेः फलं ददात्येव तत्र च हीनसंपत्पुरुषो बहुसंपदमन्यं दृष्ट्वा स्वस्याने

तत्र धर्मश्चतुष्पादो ह्यधर्मः पादविग्रहः स्वधर्मनिरताः संतो यजंते चैव मानवाः २ स्थिता धर्मपरा विप्रा राजवृत्तेः स्थिता नृपाः कृष्याम भिरता वैश्याः शूद्राः शुश्रूषवस्तथा ३ सदा सत्यं तपश्चैव धर्मश्चैव विवर्धते सद्भिराचरितं यच्च क्रियते ख्यायते च यत् ४ एतत्कृत युगे वृत्तं सर्वेषामेव भारत प्राणिनां धर्मबुद्धीनामपि चेन्नीचयोनिनाम् ५ त्रीणि वर्षसहस्राणि त्रेतायुगमिहोच्यते तस्य तावच्छती संध्या द्विगुणा परिकीर्तिता ६ द्वाभ्यामधर्मः पादाभ्यां त्रिभिर्धर्मो व्यवस्थितः तत्र सत्यं च सत्त्वं च कृते सर्वं प्रवर्तते ७ त्रेतायां विकृतिं यां तिवर्णा लौल्येन संयुताः चातुर्वर्ण्यस्य वैकृत्याद्यांति दौर्बल्यमाश्रिताः ८ एष त्रेतायुगविधिर्विहितो देवनिर्मितः द्वापरस्यापि या चेष्टा तामपि श्रोतुमर्हसि ९ द्वापरं द्वे सहस्रे तु वर्षाणां कुरुसत्तम तस्य तावच्छती संध्या द्विगुणा परिकीर्तिता १० तत्राप्यर्थपरा विप्रा अज्ञाननिर्नार जसावृताः शठा नैष्कृतिकाः क्षुद्रा जायंते कुरुपुंगवाः ११ द्वाभ्यां धर्मः स्थितः पद्भ्यामधर्मस्त्रिभिरुत्थितः विपर्ययं शनैर्यांति कृते ये धर्म ते तवः १२ ब्राह्मण्यभावान्नश्यंति तथास्तिक्यं विशीर्यते व्रतोपवासास्त्यज्यंते द्वापरे युगपर्यये १३ तथा वर्षसहस्रं तु वर्षाणां द्वे शते तथा सं ध्यया सह संख्यातं क्रूरं कलियुगं स्मृतम् १४ तत्राधर्मश्चतुष्पादः स्याद्धर्मः पादविग्रहः कामिनि शास्त्रमथ्छन्ना जायंते तत्र मानवाः १५ नै वोपवासकृत्कश्चिन्न च साधुर्न सत्यवाक् आस्तिको ब्रह्मवक्ता वा नरो भवति वै तदा १६ अहंकारगृहीताश्च प्रक्षीणस्नेहबांधवाः विप्राः शूद्रसमाचाराः शूद्रास्त्वाचारलक्षणाः १७

श्चर्यमप्त्वा नो दुःखभाग्भवतीति कृतेप्यधर्मरूपं दुःखमस्तीत्युक्तं कृतेप्यधर्मः पादविग्रह इति कृत्स्नधर्माध र्मनिर्मूलनक्षमं तत्त्वज्ञानमेव संपादनीयमित्याशयेन २ ३ ख्यायते उपदिश्यतेऽन्येभ्यः ४ ५ त्रीणीति षट्शताधिकत्रिसहस्री त्रेतायुगमानम् एवमुत्तरत्रापि ज्ञेयम् ६ ७ धर्मलौल्येन धर्मफलस्पृहया अत एव चातुर्वर्ण्यस्य चतुर्वर्णधर्मस्य वैकृत्यात् वैकल्यात् ८ ९ १० ११ १२ द्वापरे युगपर्यये द्वापरांते कलि- सांकर्याद्व्रतादि त्यज्यते इत्यर्थः १३ १४ १५ १६ १७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तृतीयंप्रश्नोत्तरंकियंतमित्यादिनासार्धश्लोकेन ईश्वरस्यकालाधीनत्वंचोदितन्निराचष्टेऽर्धेन कालइति कालंस्वयति स्वापयति कालस्यापिकालइत्यर्थः अतए
व स्वाधीनोनतुकालाधीनः कथमुत्थापयेत्यादिनासार्धेनकार्यसृष्टिः पृष्टा तत्रोत्तरमाह प्राणइत्यादिनासार्धद्वयेन २० हेअनघ यत् ध्रुवं अविनाशि अतएवअक्ष-
यः ह्रासशून्यःसएवप्राणः वृत्तिभेदेनपंचविधः ततरैः प्राणोपास्तिपरैः विविधैर्भावैः प्राणनादिकार्यभेदैर्हेतुभिरुच्यते सएवचसर्वंवियदादिकरोत्युत्पादयति
किमुपादानांतरमपेक्ष्यनेत्याह विकरोतिचमायायैवात्मानंपरिणमयतीत्यर्थः २१ योस्मान्कर्मकारयतेए षह्येवसाधुकर्मकारयतीत्यादिश्रुतेः तेनैवचवयंव्या
कुलीकृताः विधिनिषेधगहनेप तिताःसंतः आस्मआस्महे अनुदात्तेत्वलक्षणमात्मनेपदमनित्यंचक्षिङोङित् कारणात्ज्ञापकात् तेनआसउपवेशनेअ
स्मात्परस्मैपदेपिआस्मेतिसाधुयतस्तेनव्याकुलीकृताः अतस्तमेवयजामहे यज्ञैःइच्छाम प्रार्थनायांलोङुत्तमबहुवचनं निर्वृताःशांताःसंतः २२ सर्वंचि
न्मात्रमेवेत्याहद्वाभ्यां योवक्तेति वक्तावाचःप्रवर्तकः वक्तव्योऽर्थः अहंवक्तृत्वाभिमानीजीवः यतइदंशृणुतश्रवणक्रिया यत् श्रेयोमोक्षः यच्चान्यत्स्वर्गादिप्र

कालःकालंस्वपयतिद्विजस्वाधीनएवच प्राणःपंचविधश्चैवध्रुवमक्षयएवच २० उच्यतेविविधैर्भावैस्तस्यैवानघतत्परैः स-
एवभगवान्सर्वंकरोतिविकरोतिच २१ योऽस्मान्कारयतेकर्मतेनास्मव्याकुलीकृताः यजामहेतमेवेशंतमेवेच्छामनिर्वृताः २२ योव-
क्तायश्चवक्तव्योयश्चाहंतद्ब्रवीमिवः इदंशृणुतयच्छ्रेयोयच्चान्यत्परिजल्प्यते २३ याःकथाश्चैववर्तंतेश्रुतयोवाथगह्वराः विश्वंविश्वपतिर्दे
वाःसर्वंनारायणात्मकम् २४ यत्सत्यंयदनृतमादिमक्षरंवेयद्भूतंभवतिभविष्यच्चयद्भविष्यम् यत्किंचिच्चरमचराल्ययंत्रिलोकेतत्सर्वंपु
रुषवरःप्रभुर्वरिष्ठः २५ इतिश्रीमन्महाभारतेखिलेषुहरिवंशेपुष्करप्रादुर्भावेसप्तमोऽध्यायः ७ वैशंपायनउवाच
चत्वार्याहुःसहस्राणिवर्षाणांतुकृतंयुगम् तस्यतावच्छतीसंध्याद्विगुणाजनमेजय १

प्रपंचनानाविकल्परूपं २३ कथाःभूतार्थवादाःगह्वराःरहस्यप्रतिपादकाः विश्वंपाल्यंविश्वपतिःपालकः देवाःकरणानिसर्वंतत् नारायणात्मकमितिवःयुष्मा
न्प्रतिब्रवीमीतिसंबंधः २४ एतदेवोपसंहरति यत्सत्यमिति सत्यानृतेलौकिके आदिमंआदौभवंकारणं क्षरंकार्यंचतदुभयात्मकं भूतंअतीतंभविष्यच्चभ-
वति परस्परजनकंबीजांकुरादिभविष्यमनागतं चरंपरिणामि अचरंकूटस्थंवरिष्ठः नारायणः वरीयान्पुरुषवरःसमष्टिजीवःअवरोव्यष्टिजीवःकल्पितानेतानपेक्ष्यव
रिष्ठत्वंशक्तृत्वस्यप्रभोरितिभावः २५ इतिश्रीहरिवंशेटीकायांपुष्करप्रादुर्भावप्रकाशेसप्तमोऽध्यायः७ ज्ञानसाधनवैराग्यसिद्ध्येपुत्रिकादि
वत् ब्रह्मादेःक्षयितांवक्तुंयुगमानमिहोच्यते १ चत्वारीति तावच्छती चतुःशतीद्विगुणाअष्टौशतानियुगसंध्यातस्यांपूर्वोत्तरयुगयोर्धर्मामिश्रीभवंती
त्यर्थः एतानिदेवमानेनअष्टशताधिकानिचत्वारिसहस्राणिसौरमानेनसाष्टाविंशतिसहस्रीसप्तदशलक्षीवत्सराणांभवति सावनमानेनतुप्रत्यब्दंपंच
दिनानिपंचदशघटिकाएकत्रिंशत्पलानित्रिंशदक्षराणिचवर्धंते तान्यपिएकराशीभूतसंवत्सरत्रयस्याशिरोलुप्तसंवत्सरेहीयंते १

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एवंमहींस्थूलसूक्ष्मशरीरद्वयरूपांसहस्रशोभित्वासर्वथाविलाप्यरसायास्तस्याएवतलमधिष्ठानंकारणंब्रह्मतद्गतितांनीत्वातत्रत्यमपिजलंअपहतपाप्म
त्वादिसत्यसंकल्पांतंगुणजातंउत्तमंमानुषानंदादिभ्यउत्कृष्टतमंविषयानंदंपिबतेसंशोषयति ३ अप्सुकारणेब्रह्मणिस्थितंक्लेदंमनसोमृदूकरणंआनंदंअ
न्यत्कार्यंसृजन्स्रक्ष्यन्प्राणिषुध्रुवंददाति यत्सुखंकार्योपाधिषुनिदधातिजीवनायतदपि वृत्तिरूपत्वात्संहरतीत्यर्थः तदेवस्पष्टीकरोतितत्सर्वमि
ति ४ एवमुत्तमाधिकारिणांमनोमात्रसाधनंयोगमभिधायमध्यमानांवायुनिरोधपूर्वकंतमेवाह वायुश्चेति सयोगीबलवान्मूलाधारादिसर्वचक्रभेद
नसमर्थोभूत्वाअखिलंजगत्पादादिजानुपर्यंतंभूस्थानमित्यादिनातंत्रोक्तदिशाभावनयास्वशरीरमात्रीकृतंविधूयअधोधस्तनस्य उपर्युपरितनेप्रवि
लापनप्रकारेणनिरस्यप्राणोदयंप्राणानांपंचानांस्फुरणामिंद्रियाणांचउदयंउत्ऊर्ध्वंसहस्रारेभ्रूमध्येवाअयनंगमनंहरिर्योगीवायुनाविजितेनकुरुते एत
देवविस्तरेणाह ततइत्यादिनादेवगणानांचसंघर्षजः पावकः निखिलान्लोकान्अदहदितिषष्ठेनान्वयः ततोयोगप्रवृत्त्यनंतरंदेवानामग्न्यादीनांचदेहि

भित्वासहस्रशश्चैवमहींनीत्वारसातलम् रसातलजलंकृत्स्नंपिबतेरसमुत्तमम् ३ अप्सुसृजन्क्लेदमन्यद्ददातिप्राणिनांध्रुवम्
तत्सर्वमरविंदाक्षआदत्तेपुरुषोत्तमः ४ वायुश्चबलवान्भूत्वासविधूयाखिलंजगत् प्राणोदयंस्फुरणांचवायुनाकुरुतेहरिः ततोदेव
गणानांचसर्वेषामेवदेहिनाम् ५ येचेंद्रियगणाःसर्वेयेचान्येचयतोद्भवाः धूपंघ्राणंशरीरंचपृथिवीमाश्रितागुणाः ६ जिह्वारसश्चक्ले
दश्चसंश्रिताःसलिलंगुणाः रूपंचक्षुर्विपाकश्चज्योतिरेवाश्रितागुणाः ७ स्पर्शःप्राणश्चचेष्टाचपवनंसंश्रितागुणाः परमेष्ठिनंवरेण्यं
चहृषीकेशंसमाश्रिताः ८ ततोभगवतातत्ररश्मिभिःपरिवारिताः वायुनाकृष्यमाणश्चरूपान्योन्यसमाश्रयात् ९ तेषांसंघर्षजो
भूतःपावकःशतधाज्वलन् अदहन्निखिलान्लोकान्युगःसंवर्तकोनलः १०

नांजीवांतराणां एतेनमदन्योमुमुक्षुर्नास्तीत्यपियोगिनाचिंतनीयंअ
न्यथाभेदस्याविलयान्मुक्त्यसिध्यापत्तिःस्यात् ५ येचान्येचेतियतोद्भवाः यतइंद्रियाद्येषांविषयाणामुद्भवस्तेयतोद्भवाःसंधिरार्षः तान्येवेंद्रियाणितदुद्भूतांश्चाह
धूपमिति धूपंगंधाख्योविषयःरसादिसाहचर्यात् घ्राणमिंद्रियंशरीरंस्थूलंच एतेगुणाः गुणकार्यभूताः पृथिवींआश्रिताः ६ रसःचाद्यः सनेंद्रियम् क्लेदः
पृथिव्यवयवांतः प्रवेशेनतस्याः शिथिलीकरणम् विपाकोविक्लितिःओदनादिरूपा ७ शब्दः श्रोत्रंछिद्रदानंचाकाशंसंश्रितागुणाइत्यपिद्रष्टव्यम् तएतेसर्वे
पिपरमेष्ठिनंसूत्रात्मानंवरेण्यंअवश्यंउपास्यतयावरणीयंहृषीकेशंहृषीकाणामिंद्रियाणांईशितारंसम्यगाश्रिताः ८ ततस्तंसंप्राप्यभगवतांतर्यामिणाकर्त्रात
त्रसूत्रेमिलिताःसंतःरश्मिभिःसूक्ष्माभिर्वृत्तिभिः परिवारिताश्चैतेदेवगणेंद्रियगणादयः वायुनाकरणेनकृष्यमाणाः रूपेतिलुप्तशेषंपदंरूपादयः अन्योऽन्यस्यएकी
भावेनाश्रयात् ९ तेषांरूपादीनांसंघर्षज श्चासौउद्भूतश्चयःपावकोजगत्कारणाद्वैतवस्तुप्रकाशाग्निर्निखिलाल्लोकान्तत्तत्कर्मफलभूतानदहत् कर्मणामेवदाहान्

१०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१८ मन्वंतरमिति एतावताकालेनैकोमनुर्नपश्यतीत्यर्थः १९ अनुमानमाह त्र्यामिति तद्यथेहकर्मचितोलोकः क्षीयतएवमेवामुत्रपुण्यचितोलोकः क्षीय
तइत्यादौवेदेपिजनस्यस्थावरादिब्रह्मांतस्यक्षयित्वंदृश्यतइत्यर्थः नसंदेहः यत्कृतकंतदनित्यमितिव्याप्तेरित्यर्थः २० शरीरस्करवासक्तिं २१ ब्रह्मणोवेदस्यवेध
सोवा ब्राह्मणानांमहीपतेइतिपाठः ब्रह्मलोकस्थानांदहराद्युपास्यब्रह्मविदाम् २२ २३ २४ भौतिकसंहारमुक्त्वा भूतसंहारमपिनिश्चाययति महाभूत
पतिरिति पंचभूतानिवियदादीनि जगद्भौतिकंच संहरणार्थायैवकुरुते नपुरुषार्थाय मशकादिवत्सर्ववस्तुनाशायैवजायते नक्कचित्किंचित्कस्यचित्करमस्तीत्य
र्थः अतएवमहद्वैशसंबीभत्समेतदितिशेषः २५ वैशसत्वमेवाह भूत्वेति दिनावसानेहिभगवान्सूर्योभूत्वालोकानांचक्षुरादीनिमुष्णाति ततोवायुर्भूत्वाप्राणा

इषकास्त्वाश्रमाणांचवर्णानांचैवसंकराः अगम्येष्वभिरंस्यंतेवर्त्तत्येवंकलौयुगे १८ एवंद्वादशसाहस्रंतदेकंयुगमुच्यते तदेकं
सैकसप्ततिगुणंमन्वंतरमिहोच्यते १९ त्र्यांचैवनसंदेहो युगांतेजनमेजय दिव्यंद्वादशसाहस्रंयुगंतुकवयोविदुः एतत्सहस्रपर्यंतं
तदहर्ब्राह्ममुच्यते २० ततोहनिगतेतस्मिन्सर्वेषामेवदेहिनाम् शरीरनिर्वृत्तिंदृष्ट्वालोकसंहारबुद्धिमान् २१ देवतानांचसर्वेषांब्राह्म
णानांमहीपते दैत्यानांदानवानांचयक्षगंधर्वरक्षसाम् २२ देवर्षीणांब्रह्मर्षीणांतथाराजर्षिणामपि किन्नराणामप्सरसांभुजं
गानांतथैवच २३ पर्वतानांनदीनांचपशूनांचैवभारत तिर्यग्योनिगतानांचसत्वानांमृगपक्षिणाम् २४ महाभूतपतिर्देवःपंचभू
तानिभूतकृत् जगत्संहरणार्थायकुरुतेवैशसंमहत् २५ भूत्वासूर्यश्चक्षुषीचाददानोभूत्वावायुःसंहरन्प्राणिजातम् भूत्वावह्निर्द-
ह्यतेसर्वलोकान्मेघोभूत्वाभूयएवाप्यवर्षत् २६ इतिश्रीमन्महाभारतेखिलेषुपुष्करप्रादुर्भावेभ्यान्तरंअष्टमोऽध्यायः ८
वैशंपायनउवाच भूत्वानारायणोयोगीसप्तमूर्तिर्विभावसुः गभस्तिभिःप्रदीप्ताभिःसंशोषयतिसागरान् १ पीत्वार्णवांश्च
सर्वान्सनदीकूपांश्चसर्वशः पर्वतानांचसलिलंसर्वंपीत्वाचरश्मिभिः २

मुष्णाति ततोवह्निर्भूत्वाशुष्ककर्पूरकल्पांस्तान्निःशेषीकरोति ततोमे
घोभूत्वावृष्ट्याचैकार्णवंसंपद्यते एवंभूतलयेसतिजलादीन्यपिब्राह्मलयेस्वस्वयोनौलीयंतइतिबोध्यम् नष्टाकाशइत्याकाशांतनाशस्योपक्रांतत्वात् २६
इतिहरिवंशेटीकायामष्टमोऽध्यायः ८ सर्वंदृश्यंविनाशीतिज्ञात्वानाशविवर्जितंपदंनेतुंविनेयाक्नृतीयोयोगउच्यते भूत्वेतियोगीनारायणःशुद्ध-
चिन्मात्रएवसन्विभावसुः वह्निरिवासंयोगोपिसप्तमूर्तिः महदहंकारपंचतन्मात्राशरीरोभूत्वाप्रदीप्ताभिःचैतन्योद्दीपिताभिः गभस्तिभिःरश्मिरूपाभि
स्तत्तदाकारवृत्तिभिःप्रकाशितान्सागरान्समुद्रवदनंतान्रूपादीन्विषयान्संशोषयतिस्वस्मिन्प्रविलापयति १ विराट्प्रविलापनमुक्त्वासूत्रात्मनस्तदाहपीत्वे १०
ति नदीकूपसदृशान्मानसान्कामान्संशोषयतीत्यनुषज्यते तद्वत्पर्वतानांपर्वततुल्यानांकामक्रोधादीनांसलिलंसामर्थ्यंरश्मिभिःप्रत्यक्प्रवणैश्चेतःपरिणामैःपी
त्वाविलाप्य २

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तदेवाह एकार्ण वेति योगं दुःखसंयोगवियोगं उपागतः प्राप्तः अयुतानां अपृथक्भूतानां रज्वादिष्विव सर्पादीनां आत्मन्यध्यस्तानां वियदादीनां सहस्राणि वृत्तिभेदादनंतानि एकार्णवेंऽभसि शुद्धे ब्रह्मणि गतानि प्राप्तानि विलीनानीत्यर्थः नायं मृदि घटस्येव निवृत्तिरूपो लयः किंतु रज्वामहेरिवेति भावः न चैनमिति व्यक्तमिति क्रियाविशेषणम् बुद्धिवृत्तेरपि लीनत्वादेनं प्रत्यंचं न कश्चिज्जानातीत्यर्थः १९ संक्षेपेण श्रुतं योगं विस्तरेण श्रोतुमिच्छुर्जनमेजय उवाच एकार्णवविधिरिति विधिरवधिः देनंदिनादिप्रलयवदात्यंतिकप्रलयस्यापि कश्चित्कालावधिरस्तीति प्रश्नः सति तस्मिन् स्वत एव कैवल्यं संत्स्यति किं साधनानुष्ठानैः संशोषदाहपानादिभिरिति भावः य एष इति पूर्वोक्तं ज्ञानसाध्यं प्रलयं परामृशति नमाहूतं देनंदिनं वा एक एव पुरुष एकार्णवो नाम किं योगः किंरूपोऽयं योगो जतुकाष्ठवत्सलिलसैंधववद्रज्जूरगवद्वा कश्च योगवान् जीवः संबंधिनोः संबंधस्य च योगाख्यस्य किं स्वरूपमिति प्रश्नत्रयं पूर्वेण सह चतुष्टयं २० क्रमेणोत्तराणि वैशंपायन उवाच एतावंतमिति इमां एकार्णवविधिं एकार्णवनियतिं एतावंतं कालं प्रति प्रतीक्ष्य करिष्यति भगवानिति कश्चिद्बुध्यते इतः एतज्ज्ञानैकसाध्यस्य महाप्रलयस्य कालावधिर्नास्त्यतः साधनमनुष्ठे

एकार्णवजलेऽध्यासी योगी योगमुपागतः अयुतानां सहस्राणि गतान्येकार्णवेंऽभसि न चैनं कश्चिदव्यक्तं व्यक्तं वेदितुमर्हति १९ जनमेजय उवाच एकार्णवविधिः कोऽयं यश्चैव परिकीर्तितः क एष पुरुषो नाम किं योगः कश्च योगवान् २० वैशंपायन उवाच एतावंतमसौ कालमेकार्णवविधिं प्रति करिष्यतीमां भगवानिति कश्चिन्न बुध्यते २१ न वै माता न च द्रष्टा न ज्ञाता नैव पार्श्वगः ततो वै ज्ञायते कश्चिद्वृत्ते तं देवमीश्वरम् २२ नभः क्षितिं पवनमथ प्रकाशयन् प्रजापतिं भुवनचरं सुरेश्वरम् पितामहं श्रुतिनिलयं महामुनिं शशास भूः शयनमरोचयत्प्रभुः २३ इति श्रीमन्महाभारते हरिवंशे पुष्करप्रादुर्भावे नवमोऽध्यायः ९

यमेवेत्यर्थः २१ एक एव पुरुषो नामेत्यस्योत्तरमाह न माता प्रमाता अहंकारशून्यत्वात् साक्ष्यभावाच्च न द्रष्टा साक्षी वृत्तेरपि विलयान्न ज्ञाता चरमांतःकरणवृत्त्या ब्रह्मविद्याख्यया प्रत्यंचं विषयीकुर्वन् अत एव न पार्श्वगो न तटस्थः प्रत्यगात्मरूपत्वात् किंरूपो योग इत्यस्योत्तरमाह तत इति ततस्तस्यामवस्थायां यथा जतुकाष्ठसंयोगेषु त्रयमपि पृथग्दृश्यते यथा वा जलसैंधवरसो एकलोलीभूतो पृथक्त्वेनानुमीयेते तथा न तत्र न तमृते ऽन्यत् ज्ञायते रज्वामिव सर्पबाधे तदतिरिक्तमित्यर्थः २२ कश्च योगवानित्यस्योत्तरमाह नभ इति यः प्रभुर्महामुनिं शशास प्रकाशयत् च शशास स शयनमरोचयदिति यत्तदोरध्याहारेण योज्यम् नभ आदिरूपं देहेंद्रियादिसंघातं प्रकाशयन् स्वचैतन्येन व्याप्नुवन् तत एव व्यापनाद्धेतोः प्रजापतिं प्रजायत इति प्रजा उपाधिस्तस्याः पतिं अध्यक्षत्वाभिमानिनं भुवनचरं चक्षुरादिद्वारा सुरेश्वरं इंद्रियाणां प्रवृत्तिनिवृत्त्योः स्वतंत्रं एवंविधं जीवं संतं वस्तुवृत्तेन पितामहं कार्यस्य पिता कारणं तस्य पिता शुद्धचैतन्यं अत एव श्रुतिनिलयं श्रुत्येकगम्यमपि महामुनिं मुमुक्षुजीवरूपेण महांतं मननशीलं शशास

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्वरूपेणापिलोकदाहमाह सपर्वतानित्यादिना ११ आश्रयणीयानिदहराद्युपास्यरूपाणिसर्वेषांमनोमात्रत्वात्तद्दाहेनदाहइतिभावः असतोधिमनोसृज्यतामनःप्रजा
पतिमसृजत प्रजापतिःप्रजाअसृजत तद्वाइदंमनस्येवपरमंप्रतिष्ठितंयदिदंकिंचेतिश्रुतेः १२ एवंसमाधौसकारणस्यकार्यस्यप्रलयमुक्त्वाव्युत्थानेतदुत्पत्तिमाह
चतुर्भिः भस्मीभूतानित्यादिभिः हरिर्योगी निर्वापयामास भोक्तृभोग्यंकल्पितवान् केनकर्मणा भोगायारब्धेन संचितक्रियमाणयोर्दाहाश्लेषस्यतदधिगम
उत्तरपूर्वाघयोरश्लेषविनाशावितिन्यायसिद्धत्वात् जलयुक्तेन कारणीभूताविद्यासंस्कारशेषेण भूयश्चांतेविश्वमायानिवृत्तिरितिज्ञानेपिप्रारब्धदेहपातंमाया
लेशानुवृत्तेर्दर्शनात् १३ विषयभेदात्सहस्रंदृष्टयोयस्यससहस्रदृक् महातेजाः परज्योतिरूपःकृष्णः कर्षकः संहर्ताभूत्वा महाघनइवजगदंकुरस्रष्टापिभवति
तदेवाह दिव्येनतोयेनचित्तंइमंडलात्प्रसृतेनभावनामृतेनहविषाविशुद्धेनतर्पयामासमेदिनींशरीरम् व्युत्थानेआदौशरीरंचेतनयाव्याप्तमित्यर्थः १४ क्षीरंसत्त्वं

सपर्वतांस्तरून्गुल्मान्लतावल्लीस्तृणानिच विमानानिचदिव्यानिपुराणिविविधानिच ११ आश्रमांश्चतथापुण्यान्दिव्यान्याय
तनानिच यानिचाश्रयणीयानितानिसर्वाणिसोदहत् १२ भस्मीभूतांस्ततःसर्वान्लोकान्लोकगुरुर्हरिः भूयोनिर्वापयामाससजल
युक्तेनकर्मणा १३ सहस्रदृक्महातेजाभूत्वाकृष्णोमहाघनः दिव्यतोयेनहविषातर्पयामासमेदिनीम् १४ ततःक्षीरनिकाशेनस्वादुना
परमांभसा शिवेनपुण्येनमहीनिर्वाणमगमत्परम् १५ तेनगाजलसंछन्नापयसःसर्वतोधराः एकार्णवजलाभूत्वासर्वसत्त्वविवर्जि
ताः १६ महाभूतान्यपिचतंप्रविष्टान्यमितौजसम् नष्टार्कपवनाकाशेसूक्ष्मेजनविवर्जिते १७ संशोषयित्वापीत्वाचवसत्येकःसना
तनः पौराणंरूपमास्थायकिमप्यमितबुद्धिमान् १८

स्वच्छत्वात् तन्निकाशेनचित्तसत्त्वाकारेणपरमांभसाचैतन्यामृतेन महीशरीरद्वयंनिर्वाणं
शांतिंअगमत् योगिनोहि स्थूलशरीरंनिर्वाति नतस्यरोगोनजरानमृत्युःप्राप्तस्ययोगाग्निमयंशरीरमितिश्रुतेः सूक्ष्ममपिनिर्वाति तत्रकोमोहःकःशोकएकत्व
मनुपश्यतइतिश्रुतेश्च १५ अस्यदृश्यबाह्यमपिसर्वंचिन्मात्रमेवेत्याह तेनगाइति येपूर्वंपरमार्थत्वेनगृहीतास्तेनगाः पर्वतवृक्षादयः जलसंछन्नाश्छिताववगुंठिताः
किंच सर्वतोंतर्बहिश्चपयसाश्छितएवधराःधर्तारःसैंधवघनवच्चिदनाएवेत्यर्थः तदेवाह एकार्णवजलाभूत्वेति अतएवसर्वसत्त्वविवर्जिताःसर्वस्यवियदादेःसत्त्वंस
त्तानद्भिन्नाः ब्रह्मसत्तैवसर्वत्रानुस्यूतानवियदादिषुपृथक्सत्तास्तीत्यर्थः जगत्पश्यन्नपिद्वितंइद्वहाधितत्वेनैवपश्यतीतिभावः १६ योगस्यमुख्यंफलंशुद्धात्मदर्शन
माहत्रिभिः महाभूतानीतितंयोगिनंसूक्ष्मेशुद्धेवस्तुनिस्थितमितिशेषः कीदृशेसूक्ष्मेनष्टाअदर्शनंगताअर्कादयोयस्मिन्नष्टार्कपवनाकाशे अतएवमहाभूतानितं ११
प्रविष्टानितत्रैवलीनानीत्यर्थः १७ एवमुक्तप्रकारेणसंशोषयित्वाविषयेषुप्रविभक्तंप्रज्ञानंप्रत्याहृत्यपीत्वानिर्विशेषंप्रविलाप्य किमपीति वाङ्मनसातीतत्वंसूचितं
१८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शंसः हिंसायांस्वस्वरूपेप्रविलापितवान् यःसप्रभुः भवत्यस्मादिति प्रभुःईशः शयनं ईशतानिरोधंअरोचयत् शब्द एवोपाध्यभिमानाद्द्रष्टुः सान्योगवान्योगाधिका
री भवतीत्यर्थः २३ इतिहरिवंशटीकायांनवमोऽध्यायः ९ तंयज्ञरूपतोयोगमुक्त्वातुयेंनिगद्यते मार्कंडेयसमाधिश्चतद्विभेशुनिदर्शनम् एवमिति
लोकेशुद्धेचिदात्मनिमहाद्युतिर्महायशाः ईशःसलिलं कार्यंजगत्प्रच्छाद्यउपसंहृत्यशेतेशब्दश्चिन्मात्ररूपेणावतिष्ठतेइत्यर्थः १ एतदुपपादयितुं ब्रह्मणएवबंध
प्रसक्तिमाह महतइत्यादिना रजसः रजोगुणकार्यकर्मफलभूतस्यदेहेंद्रियादेर्मध्येदुर्लंघ्यत्वान्महार्णवसमस्य विरजस्कोदेहादिधर्मास्पर्शी महांतौबाहुइव
बाहूअक्षरब्रह्माख्यौप्रणवतत्त्वमसिवाक्यरूपौउपास्तिक्रियाप्रत्यक्फलसाक्षात्काराभ्यांजगदुद्धारक्षमौविद्येतेयस्यतथा २ आत्मेति यंपरंब्रह्मविदुः सःस
द्रूपः परमात्मासुष्वाप स्वरूपंविस्मृतवान् इतिसंबंधः तत्रहेतुः तपसाआलोचनेनमनोरथात्मकेनसंवृतः तिरोहितासंगरूपः कीदृशेनतपसाआत्मरूपप्रका
शेनचैतन्यभास्येन अतएवत्रिकंभूतभविष्यवर्तमानरूपेणत्रिविधंकालंआस्थायअधिष्ठायसुष्वाप ३ एवंप्रभोरेवबंधप्रसक्तिंप्रदर्श्य तन्निवृत्त्युपायंयोगं

वैशंपायनउवाच एवमेकार्णवीभूतेशेतेलोकेमहाद्युतिः प्रच्छाद्यसलिलंसर्वंहरिर्नारायणःप्रभुः १ महतोरजसोमध्येमहार्णव
समस्यवै विरजस्कोमहाबाहुरक्षरंब्रह्मयंविदुः २ आत्मरूपप्रकाशेनतपसासंवृतःप्रभुः त्रिकमास्थायकालंतुततःसुष्वापसोऽव्ययः
३ पुरुषोयज्ञइत्येवंयत्परंपरिकीर्तितम् यच्चान्यत्पुरुषाख्यंस्यात्सर्वंतत्पुरुषोत्तमः ४ येचयज्ञपराविप्राऋत्विजाइतिसंज्ञिताः आत्मदे
हात्पुराभूतायज्ञेभ्यःश्रूयतांतदा ५ ब्रह्माणंपरमंवक्त्रादुद्गातारंचसामगम् होतारमथचाध्वर्युंबाहुभ्यामसृजत्प्रभुः ६

यज्ञरूपकेणविधित्सुस्तत्प्राप्युपायंवक्तुमाह पुरुषोयज्ञइतिपुरुषइवपुरुषः शिरः पाण्यादिरूपकः यज्ञोयोगयज्ञप्राप्यः यत्पुरुषाख्यंपरंकीर्तितंसउत्तमः पुरुषइ
इत्यादिश्रुतिषु यच्चान्यद्धियदादिपुरुषेणचिदात्मनैवख्यायतेप्रकाश्यते तत्सर्वंपुरुषोत्तमः चिन्मात्रमेवतत्राध्यस्तस्यान्यस्यतदनन्यत्वादित्यर्थः ४ एवंप्रा-
प्युमुक्त्वाप्रापकमाह येचेति यज्ञपराब्रह्मनिष्ठाः विप्राइवविप्राः रागादिशून्याः ऋत्विजः ऋतौकालेआत्मनिपरस्मिन् यजंतेसंगतिंकुर्वते ऋत्विजास्तपआदयः
यजेःसंगतिकरणार्थात् आत्मदेहात् चित्पुरुषात् पुराभूताः अनादौसंसारेपूर्वसिद्धाः यज्ञेभ्यः यज्ञार्थमेवभूताः नपश्वादि साधारणविषयभोगार्थंयद्वैते
तथाश्रूयतांमत्तइतिशेषः ५ योगयज्ञाहान्नृत्विजः प्रस्तौतिब्राह्मणमिति अत्रकादकेविश्वसृजांसत्रेब्रह्मब्रह्माभवत्स्वयंअमृतमेभ्यउदगायदिति ब्रह्मा-
मृतशब्दाभ्यांवेदतदर्थौउच्येतेतत्रपरमसितिविशेषणादुपनिषदेवब्रह्मतत्साध्यावृत्तिरमृतसाधनत्वादमृतम् तेउभेब्रह्मोद्गातृशब्दाभ्यामि होक्ते वक्त्रप्रभ ११
त्वेनचतयोरंतरंगत्वमुक्तम् होत्राध्वर्युसत्यंहहोतैषामासीत्प्राणोअध्वर्युरभवदितिश्रुत्युक्तौसत्यप्राणौताभ्यांसत्योक्तिप्राणजयौवक्त्रजावपितदुपकारकत
यार्किंचिद्बहिरंगौएवमुत्तरत्रअक्षरयोजनास्पष्टाब्रह्मादि [illegible] बाहुभ्यामसृजदित्याह बाहुभ्यामित्यादिसपादश्लोकएकंवाक्यं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ब्राह्मणत्वाद्ब्रह्मवेदस्तदध्येतृत्वात् ब्राह्मणोब्राह्मणाच्छंदसीनामसंप्रस्तारंप्रस्तोतारंतान्मित्रंवरुणंमैत्रावरुणसंज्ञंप्रस्तारं प्रतिष्ठातारंप्रतिप्रस्थातारं एतैः अंशः२ सब्रह्मण स्तेजःभूतः२ हप्रस्तोतेषामासीत् ऋतमेषांप्रशास्तासीत् अपानेविद्वानावृत्तःप्रतिष्ठानिष्ठदध्वरइतिश्रुत्युक्तास्तेतेजोभूतऋतापानाख्योधीबलपूर्वस्मृतिस्वधर्माचरण जयानुकूलापानाख्यमूलबंधाविहिताज्ञेयाः ७ उदरादितिप्रतिहर्तृपोतृछावाकेनेष्टृशब्दैः भविष्यस्नातिचाहरत् अपचितिःपोत्रियामजयत् अच्छावाकोभवद्य शःनेष्ट्रीयामयजत्त्विषिरितिश्रुत्युक्तेषुभविष्यत्भाव्यनुसंधानं अपचितिर्देवतातिथिपूजनंयशःयशस्करमितिवदान्यत्वादित्विषिस्तपस्तेजः ८ तथाअग्नी ध्रसुब्रह्मण्याग्रावशब्दोक्तग्रावास्तदुनेतृशब्दैः आग्नीध्राद्विदुषासत्यंश्रद्धाहैवायजत्स्वयंवागेषांसुब्रह्मण्यासीत् ओजोग्यश्रेष्ठक्रुवुणःऊजानमुदवहदितिश्रु त्युक्तेषुविदुषाशास्त्रार्थेपरिहंहिकाऊहापोहकौशलवतीश्रद्धावाक्स्वाध्यायप्रवचने ओजइंद्रियजयेशौर्यऊर्कयोगांगानामूर्जितिरित्येतेग्राह्याःयज्ञेहिब्रह्मा १ उद्गाता २ होता ३ अध्वर्युः ४ ब्राह्मणाच्छंसी ५ प्रस्तोता ६ मैत्रावरुणः ७ प्रतिप्रस्थाता ८ प्रतिहर्ता ९ पोता १० अच्छावाकः ११ नेष्टा १२ आग्नीध्रः १३ सुब्रह्मण्या १४ ग्रावस्तो-

ब्राह्मणोब्राह्मणत्वाच्चसंप्रस्तारंचसर्वशः तान्मित्रंवरुणंसृष्ट्वाप्रतिष्ठातारमेवच ७ उदरात्प्रतिहर्तारंपोतारंचैवभारत अच्छावाकमनोरूभ्यां नेष्टारंचैवभारत ८ पाणिभ्यामथचाग्नीध्रंसुब्रह्मण्यंचयाज्ञियम् ग्रावाणमथबाहुभ्यामुन्नेतारंचयाज्ञिकम् ९ एवमेवैषभगवान्षोडशैता न्जगत्पतिः प्रवक्तॄन्सर्वयज्ञानामृत्विजोसृजदुत्तमान् १० तदेषवैवेदमयःपुरुषोयज्ञसंमिताः वेदाश्चतन्मयाःसर्वेसांगोपनिषदक्रियाः ११ स्वपित्येकार्णवेचैवयदाश्चर्यमभूत्पुरा श्रूयतेतद्यथावृत्तंमार्कंडेयोयदन्वभूत् १२ जीर्णोभगवतस्तस्यकुक्षावेवमहामुनिः बहुवर्षसहस्रा- युस्तस्यैववरतेजसा १३

ता १५ उन्नेता १६ एतेऋत्विजः एतेयोगेयथाक्रमंप्रणवः १ तदर्थभावनं २ सत्योक्तिः ३ प्राणजयः ४ धी तैक्ष्ण्यं ५ पूर्वस्मृतिः ६ आचारः ७ अपानजयः ८ भाविदुःखचिंता ९ ईशपूजा १० दानं ११ योगोत्साहः १२ सात्विकीश्रद्धा १३ वेदांतश्रवणं १४ इंद्रिये शौर्यं १५ योगांगानामूर्जिती १६ श्चलक्ष्यते ९ एवमिति एतान् उपनिषदादीन् सर्वयज्ञानांचत्वारः सबीजयोगः पंचमोनिर्बीजश्चवक्ष्यमाणास्तेषांसर्वेषां योगयज्ञानांप्रवक्तॄन्प्रापकान्वजगतावित्यस्मात्तृच् १० तदेषइतिसएषऋत्विक्स्रष्टाभगवान्वेदमयोवेदप्रधानोवेदैकगम्यः नावेदविन्मनुतेतंबृहंतमितिश्रु तेः पुरुषःपरमात्मायज्ञेनयोगेनसम्यक्मितःप्रमितोपरोक्षीकृतःयज्ञसंमितःवेदाश्चतन्मयाःतस्यैवप्रतिपादकाःक्रियाश्चतन्मयातत्प्रापकाइत्यनुषज्ययोज्यं ११ एवमुक्तसाधनकलापविशिष्टोयोगीयदाएकार्णवेचिन्मात्रेस्वपितिप्रविष्टुंयततेतदाश्चर्यंअभूत्भवति ततविश्वरूपदर्शनातीतानागतादिदर्शनंचेत्यादिश्रूय तेवेदसर्वंहिपश्यःपश्यतियच्चान्यदिच्छन्नलभतेतदत्रगत्वाविंदतइत्यादौ अत्राख्यायिकामाह तद्यथावृत्तमित्यादिना १२ जीर्णःसर्वोपाधिप्रहाणेनप्र- विलीनः मार्कंडेयंस्तोतिसार्द्धद्वयेनवाह्निति १३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

देवकुक्षिस्थान् हार्दाकाशस्थान् ईक्षते सह इति शेषः २७ २८ २९ तत्त्वनिश्चयस्य दुःसंपादत्वं वक्तुं पुनर्मार्कंडेयस्य मोहमाह ततः कदाचिदिति वक्त्रान्निसृतः स
माधेर्व्युत्थितः न्यग्रोधशाखायां न्यक् नीचैः रोहतीति न्यग्रोधः स्थूलः संसारवृक्षः ऊर्ध्वमूलमधःशाखमित्युक्ते तस्यां शाखायां एकदेशे सुप्तं अनाविष्कृतैश्वर्य-
शांतं बालं स्वाराध्यमीशं चिंतयते कस्मिन्सति ३० यथा चेति स्पष्टाचेत्यर्थः एकार्णवि बले भुद्रज्ञानसामर्थ्ये नीराहारेणाज्ञानेन पूर्ववत्तिरोहिते सानि नथा लोके
पि भूतविवर्जिते चतुर्विधे भूतग्रामशून्ये अत एवाव्यक्ते भीषणे च द्वितीयाभावात् तस्मादेकाकी बिभेतीत्यविद्यावस्थायामेकाकिनं प्रतिभयजनके सति भगवान्-

क्रतुभिर्यजमानांश्च समाप्तवरदक्षिणैः पश्यते देवकुक्षिस्थान् यज्ञियान् शतशो द्विजान् २७ सद्वृत्तमाश्रिताः सर्वे वर्णा ब्राह्मणपूर्वकाः चत्वार
श्चाश्रमास्तस्य सम्यग्यथोद्दिष्टपदानुगाः २८ वर्षाणां शतसाहस्रं मार्कंडेयो महामुनिः विचरन् पृथिवीं कृत्स्नां न चकुक्ष्यन्तमैक्षत २९ ततः कदा-
चिदथ वै पुनर्वक्त्राद्विनिसृतः सुप्तं न्यग्रोधशाखायां बालमेकं निरीक्षते ३० यथा चैकार्णवजले नीहारेणावृतांतरे अव्यक्ते भीषणे लोके सर्वभूत
विवर्जिते ३१ स भूयो विस्मयाविष्टः कौतूहलसमन्वितः बालमादित्यसंकाशं न शक्नोत्युपसर्पितुम् ३२ सो चिंतयदथैकांते स्थित्वा सलिलसन्निधौ
पूर्वं दृष्टमिदं नेति शंकितो देवमायया ३३ अगाधे सलिले तस्थ्ये मार्कंडेयः प्लुवन्मुनिः न शांतिं लभते तत्र श्रमात् संत्रस्तविक्लवः ३४ तथैव भगवा
न् हंसो गतो योगेन बालताम् बभाषे मेघतुल्येन स्वरेण पुरुषोत्तमः ३५ श्रीभगवानुवाच माभैर्वत्स न भेतव्यमिहैवायाहि चांतिकम् मा
र्कंडेय मुने धीर बालस्त्वं श्रमपीडितः ३६ मार्कंडेय उवाच को मां नाम्ना कीर्तयते तपः परिभवन्मम बहुवर्षसहस्राख्यं धर्षयंश्चैव मे वपुः
३७ न ह्येषु समुदाचारो देवेष्वपि समाहितः मां ब्रह्मापि स विश्वेशो दीर्घायुरिति भाषते ३८ कस्तपो घोरशिरसो ममाद्य त्यक्तजीवितः मार्कंडेये
ति मां प्रोक्ता मृत्युमीक्षितुमिच्छति ३९ वैशंपायन उवाच एवमाभाष्य तं क्रोधात् मार्कंडेयो महामुनिः अथैनं भगवान् भूयो बभाषे तत्प
रायणम् ४० श्रीभगवानुवाच अहं ते जनको वत्स हृषीकेशः पिता गुरुः आयुःप्रदाता पौराणः किमर्थं नोपसर्पसि ४१ मां पुत्रका
मः प्रथमं पिता तेऽङ्गिरा मुनिः पूर्वमाराधयामास तपस्तीव्रमुपाश्रितः ४२ ततस्त्वां घोरशिरसं दहनोपमतेजसम् दत्तवानहमात्मेष्टं महर्षि
ममितायुषम् ४३

गुर्वादिरूपेणाविर्भूय भक्ताननुगृह्णातीत्याह स भूय इत्यादिना ३१ विस्मयाविष्टः समाधौ कृत्स्नस्य व्यावहारिकस्य तीर्थसेवादेर्दर्शनं व्युत्थाने च त-
द्दर्शनमिति विस्मयाविष्टः दिव्यैकाकी बालदर्शनाच्च कौतूहलसमन्वितः ३२ सो चिंतयदित्यादिः स्पष्टार्थो ग्रंथः ३३ ३४ ३५ ३६ ३७ ३८ क इति त
त्तपः परिभवन्निति शेषः ३९ ४० एवं वयस्तपोभ्यां दृढमन्यं ऐक्यात्मं बुबोधयिषया तस्य गर्वं तावदपनेष्यन् श्रीभगवानुवाच अहं ते जनक इत्यादि नोपसर्पसि भवान्
मामिति शेषः ४१ अंगिराः हिरण्यगर्भः एतं नुरवागिरसं मन्यं तेगानाहिरसस्तेनेति श्रुत्या विश्वपितरि तैजसे अंगिरःशब्दवृत्तेर्दर्शितत्वात् ४२ घोरशिरसं नाम्ना मार्कंडेय इति तु मृ
कंडोरपत्यत्वान्नाम ४३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिवक्ष्यमाणप्रकारेणतीर्थनिमित्तमेवसर्वतीर्थदर्शिनिदक्षिणाद्यर्थमित्यर्थः आश्रमानित्यादीनांसमाश्रितइत्यनेनसंबंधः १४ १५ एवंचिन्मात्रेलीनोपिमार्कंडे
यः पुनर्विनाव्युत्थानसंकल्पंसुप्तवत्समाधेर्व्युदतिष्ठदित्याह मार्कंडेयइति वक्त्रात्स्वलयस्थानात् १६ एवंव्युत्थितोपिअथोपुनःएकार्णवंचिन्मात्रंगतः प्रवेष्टुंयत्नं
कृतवान् तंचतमसा अज्ञानेनावरणविक्षेपशक्तिमता आच्छन्नंनिरीक्ष्यते अयंभावः चित्तसत्वतत्वेप्रणिधित्सदपितत्वस्यतमसापिहितत्वात्तत्वंविक्षेपरूपमेश्व
र्यमेवावेक्षितवान् रज्वामिवसर्पमिति १७ भयंद्वैतदर्शनजंद्वितीयाद्वैभयंभवतीतिश्रुतेः आत्मजीवितेस्वरूपस्थैर्येकिंनिर्विशेषमेवस्वरूपंनित्यमुतसविशेष
मितिसंशयश्चोत्पन्नः संशयोच्छेदं विवेकबलेनैवकृतवानित्याहदेवेति देवदर्शनंशुद्धसाक्षात्कारः तेनसंहृष्टः प्राप्तानंदः विस्मयपरंचागमत् कारणाभावेप्याक-
स्मिकीमतः सृष्टिंदृष्ट्वेतिभावः १८ विवेकमेवाह संचिंतयतीति मध्यस्थः निर्विशेषसविशेषान्यतरनिर्णयहीनः चिंतामनोरथः मोहइंद्रजालादिजोभ्रमः
स्वप्नः प्रसिद्धः १९ एतेषामन्यतमोयंभावोमनोविकारोनवस्तुतत्वमित्यर्थः तस्यैवासंभवमाहनहीतिसत्यंपारमार्थिकंअयुक्तंअसंगिअसंक्लिष्टंअविद्यादि-

इतितीर्थप्रसंगेनपृथिवीतीर्थगोचरः आश्रमानपिपुण्यांश्चतीर्थान्यायतनानिच १४ देशान्राष्ट्राणिचित्राणिपुराणिविविधानिच जपहोमर
तः क्षांतस्तपोघोरंसमाश्रितः १५ मार्कंडेयस्ततस्तस्यशनैर्वक्त्राद्विनिःसृतः निष्क्रामंतंनचात्मानंजानीतेदेवमायया १६ निष्क्रांतस्तस्यवदना
देकार्णवमथोगतः सर्वतस्तमसाच्छन्नमार्कंडेयोनिरीक्ष्यते १७ तस्योत्पन्नंभयंतीव्रंसंशयश्चात्मजीविते देवदर्शनसंहृष्टोविस्मयंचागम
त्परम् १८ संचिंतयतिमध्यस्थोमार्कंडेयोतिशंकितः किंस्विद्भवेदियंचिंतामोहःस्वप्नोनुभूयते १९ व्यक्तमन्यतमोभावोह्येतेषांभवितामम
म नहीदृशमसंक्लिष्टमयुक्तंसत्यमर्हति २० नष्टचंद्रार्कपवने छन्नपर्वतभूतले कतमस्यादयंलोकइतिचिंताव्यवस्थितः २१ अपश्य
च्चापिपुरुषंशयानंपर्वतोपमं तोयाढ्यमिवजीमूतंमध्येमग्नंमहार्णवे २२ तपंतमिवतेजोभिर्भास्वंतमिववर्चसा जाग्रंतमिवगांभीर्याच्छ्व
संतमिवपन्नगम् २३ सदेवंप्रष्टुमायातिकोभवानितिविस्मयात् तथैवचशनैर्भूयोमुनिःकुक्षिंप्रवेशितः २४ सप्रविष्टःपुनःकुक्षौमार्कंडेयः
सुनिश्चितः तथैवचरतेभूयोविजानन्स्वप्नदर्शनम् २५ सतथैवयथापूर्वंपृथिवीमटनेपुनः पुण्यतीर्थानिपूतानिनिरीक्षन्द्विविभूतले २६

संक्लेशशून्यंसत् इदृशंमनोरथादिरूपंभवितुमर्हति २० तत्रहेतुमाह नष्टेतिमहाभूतानांनाशेपिभासमानस्याचिंतादिष्वन्यतमत्वस्यैवसंभवात्कुतमोल्लोकोयमिति
चिंतितवान् २१ सएवंतत्वनिश्चयाभावात्संदेहनिवृत्तिंकामयमानाः स्वाराध्यांकारणोपाध्यभिमानिनींदेवतामपश्यत् तयाचप्रतिबोधितः कृतकृत्योबभूवेत्या-
ह अपश्यदित्यादिनातोयाढ्यमितिकृष्णत्वंसूचितंमहार्णवेपरमानंदे २२ जाग्रंतमित्यार्षेत्तिम् २३ पुनःपूर्ववच्चिन्मात्रत्वंप्राप्तइत्याह सदेवमिति २४ सएवंभू १३
ताश्चिन्मात्रत्वमेवात्मतत्वंद्वैतंतुस्वप्नमात्रमितिसंप्रज्ञातमेवनिश्चितवानित्याह सप्रविष्ट इति २५ सततथैवेतियथाव्युत्थानेतथैवसंप्रज्ञानेघटनादिकंकृतवानित्यर्थः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६२ ६३ ममधर्मेप्सुः ऐश्वर्येप्सुः कुक्षौचरनिर्विकल्पंसमाधिमनुतिष्ठस्रुखीसंसारदुःखशून्यः ६४ ब्रह्मादीन्प्रतिस्वस्यतटस्थकारणत्वंमाभूत् किंतुअभिन्न
निमित्तोपादानत्वरूपंकारणत्वमेवेत्याह ममब्रह्माशरीरस्थइतिकनकेकुंडलवत्सर्वइदंमय्येवोतंप्रोतंचेतिभावः ६५ एकाक्षरोअकारः अकारोवैसर्वावागि-
तिश्रुतेः अक्षरः प्रणवः त्रिपदागायत्री ६६ सर्ववेदांतप्रसिद्धंमहामुनिर्व्यासोबबंधेत्याह वैशंपायनः एवमिति आहृतवान् आनीतवान् मार्कंडेयंसुखंप्रक्षे
प्तुमितिशेषः ६७ हंसंपरमात्मानंशुश्रूषुः निर्विकल्पकेनसमाधिनाआराधयितुमिच्छुः ६८ अध्यायार्थमुपसंहरतितदक्षरमिति हंससंज्ञिनस्तदक्षरं-
अविनाशीब्रह्मकीदृशः विविधंवपुराश्रितः सन्नपिमहार्णवेचिन्मात्रावस्थायांचंद्रभास्करशब्दिततत्कारणमनश्चक्षुर्वर्जिते कार्यकारणप्रपंचशून्येइत्यर्थः
शनैः भूमिजयक्रमेणचरन्कालपर्यये अविद्यालेशवशात्समाधिसुखविच्छेदकालेजगदसृजत् महाभूतमयंविसृजतिविविधभौतिकंसृजाति ६९ इतिह

यत्किंचित्स्पृश्यसेचैवयच्छृणोषिचकिंचन यच्चानुभवसेलोकेतत्सर्वंमामकंस्मृतम् ६२ विश्वंसृष्टंमयापूर्वंसृजेयंचाद्यपश्यमाम् युगेयुगेच
स्रक्ष्यामिमार्कंडेयाऽखिलंजगत् ६३ तदेतदखिलंसर्वंमार्कंडेयावधारय शुश्रूषुर्ममधर्मेप्सुः कुक्षौचरसुखीभव ६४ ममब्रह्माशरीरस्थो
देवाश्चऋषिभिःसह व्यक्तमव्यक्तयोगंमामवगच्छापराजितम् ६५ अहमेवाक्षरोमंत्रस्त्र्यक्षरश्चैवसर्वशः त्रिपदश्चैवपरमस्त्रिवर्गार्थनिद-
र्शनः ६६ वैशंपायनउवाच एवमेतत्पुराणेषुवेदांतेचमहामुनिः वक्त्रेण्याहृतवानाशुमार्कंडेयंमहामुनिम् प्रवेशयामासततोजठरं
विश्वरूपधृक् ६७ ततोभगवतः कुक्षिंप्रविष्टोमुनिसत्तमः ररामसुखमासाद्यशुश्रूषुर्हंसमव्ययम् ६८ तदक्षरंविविधमथाश्रितोवपुर्म-
हार्णवेव्यपगतचंद्रभास्करे शनैश्चरन्प्रभुरपिहंससंज्ञितोसृजज्जगद्धिसृजतिकालपर्यये ६९ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणि
दशमोऽध्यायः १० ॥ ॥ वैशंपायनउवाच आपवः सविभुर्भूत्वाकारयामासवैतपः छादयित्वात्मनोदेहमात्मनाकुंभसं
भवः १ ततोमहात्मातिबलोमतिंलोकस्यसर्जने महतांपंचभूतानांविश्वभूतोव्यचिंतयत् २

रिवंशेटीकायांभविष्यपर्वणिदशमोऽध्यायः १० ॥ ॥ ब्रह्मैवब्रह्मविदितिविस्पष्टयितुमापवात् पंचमेयापवादीनांजन्मसंक्षिप्यवर्ण्यते १
आपवइति सविभुर्हंसाख्य आपवोवसिष्ठाख्योब्रह्मर्षिर्भूत्वातपोयोगाख्यंकारयामासकृतवान् रामोराज्यमचीकरदितिवत्स्वार्थेणिच् आत्मनः स्वस्यकुंभसंभ
वंदेहं आत्मनासमष्ट्यभिमानिनाच्छादयित्वास्थूलदेहतादात्म्यंत्यक्त्वेत्यर्थः वसिष्ठस्यहिकुंभाज्जन्मस्मर्यतेमित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसंदृष्ट्वावास
तीवरेकुंभेरेतोपतत्ततोगस्त्यवसिष्ठौजायेतामिति १ ततोदेहच्छादनान्महात्माईश्वरः सन् अतएवातिबलोऽनंतशक्तिः लोकस्यभौतिकस्यतदुपादानभूतानाम
पिपंचसंख्यानांवियदादीनांचसर्जनेमतिंव्यचिंतयत् विश्वभूतोविश्वात्मा एतेनसईक्षत्लोकान्नुसृजाइतिश्रुतेरर्थोदर्शितः २ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्र आवयोर्जन्यजनकभावे संबंधे सति योममात्मको मदभिन्नो न भूतः सोन्यो चेतनत्वात् एकार्णवगतं योगधर्मिणं मां द्रष्टुं नोत्सहत इति योजना अयं भावः जडाजडौ द्वौ पदार्थौ तत्र जडो नाजडं द्रष्टुमिष्टे नाप्यजडो जडादन्यं तस्यापि दृश्यत्वेन जडत्वापत्तेरत आवयोरैकात्म्यं निश्चितमिति ४४ अहमेव एकात्म्यं विस्तरेण वक्तुं प्रश्नमवतारयति तत इत्यादि ४५ ४६ ४७ ४८ मायायास्तत्वं श्रीभगवानुवाच अहं नारायण इति योयमस्मत्प्रत्ययविषयः नारायणे नाराख्ये कृत्स्नप्रपंचलयाधिष्ठानमुपाधिस्पर्शशून्यं तदेव मायया अन्यथा भाति न त्वं तज्ज्ञानान्मायानिवृत्तिस्तदज्ञाताद्रज्जूरगवद्ब्रह्मादिरूपेण मायैव भातीत्यर्थः ४९ ऐकात्म्यग्रहणा

तुमनोत्सहते चान्यो यो न भूत्यो ममात्मकः द्रष्टुमेकार्णवगतं क्रीडंतं योगधर्मिणम् ४४ वैशंपायन उवाच ततः प्रसन्नवदनो विस्मयोत्फुल्ललोचनः मूर्ध्नि बद्धांजलिपुटो मार्कंडेयो महातपाः ४५ नामगोत्रे ततः श्रुत्वा दीर्घायुर्लोकपूजितः अथाकरोन्नमस्कारं प्रणतः शिरसा प्रभुम् ४६ मार्कंडेय उवाच इच्छेहं तत्त्वतो मायामिमां ज्ञातुं तवानघ यदेकार्णवमध्यस्थः शेषे त्वं बालरूपवान् ४७ किंसंज्ञः कश्च भगवान्लोके विज्ञायसेनघ तर्कये त्वां महाभूतं न भूतमिह तिष्ठति ४८ श्रीभगवानुवाच अहं नारायणो ब्रह्मा संभवः सर्वदेहिनाम् सर्वभूतोद्भवकरः सर्वभूतविनाशनः ४९ अहमेंद्रे पदे शक्र ऋतूनामपि वत्सरः अहं युगे युगाक्षश्च युगस्यावर्त्त एव च ५० अहं सर्वाणि सत्वानि दैवतान्यखिलानि च भुजगानामहं शेषस्तार्क्ष्योहं सर्वपक्षिणाम् ५१ अहं सहस्रशीर्षाद्यो यः पदैरभिसंवृतः आदित्यो यज्ञपुरुषो देवो यज्ञमयो मखः अहमग्निर्हव्यवाहो यादसां पतिरव्ययः ५२ यत्पृथिव्यां द्विजेंद्राणां तपसा भावितात्मनाम् बहुजन्मनिरुद्धात्मा ब्राह्मणो यतिरुच्यते ५३ ज्ञानवान् हृष्टविश्वात्मा योगिनां योगवित्तमः कृतांतः सर्वभूतानां विशेषां कालसंज्ञितः ५४ अहं कर्म क्रिया जीवः सर्वेषां धर्मदर्शनः निष्क्रियः सर्वभूतेषु स्वात्मज्योतिः सनातनः ५५ प्रधानपुरुषो देवोऽहमाद्यस्त्वक्षयोव्ययः अहं धर्मस्तपश्चाहं सर्वाश्रमनिवासिनाम् ५६ अहं हयशिरो देवः क्षीरोदो यो महार्णवे ऋतं सत्यं च परममहमेकः प्रजापतिः ५७ अहं सांख्यमहं योगमहं तत्परमं पदम् अहमिज्यो भवश्चाहमहं विद्याधिपः स्मृतः ५८ अहं ज्योतिरहं वायुरहं भूमिरहं नभः अहमापः समुद्राश्च नक्षत्राणि दिशो दश अहं वर्षमहं सोमः पर्जन्योहमहं रविः ५९ क्षीरोदः सागरश्चाहं समुद्रो वडवामुखः वन्हिः संवर्त्तको भूत्वा पिबंस्तोयमहं रविः ६० अहं पुराणं परमं तथैवेह परायणम् अहं भूतस्य भव्यस्य वर्त्तमानस्य संभवः ६१

समर्थानां उपास्यर्थं विभूतीराह अहमैंद्रे पद इत्यादिना सार्द्धत्रयेण ५० ५१ ५२ यदिति तपसा स्वधर्मानुष्ठानेन भावितात्मनां शुद्धचेतसां मध्ये बहुषु जन्मसु निरुद्धात्मा निरुद्धचेता ब्राह्मणो ब्रह्मवित् यतिः संन्यासी यदुच्यते ब्रह्मविद्ब्रह्मैव भवतीति शास्त्रे यद्रूपत्वेनोच्यते तद्ब्रह्माहं मायाया अनारोपितं रूपमहमिति पूर्वेण संबंधः ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ १४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तस्यैवंचिंतयतस्तत्रतदानिराकाशेतोयमयेचिन्मयेसूक्ष्मेदुर्लक्ष्येगव्हरेदुरधिगमेवस्तुनिजगतिलीनेसतितपसाईक्षणबलेनभावितःसंपादितः आत्माऽहंकारोयेन सभावितात्मातस्य ३ ईषादितिसःभावित आत्मासलिलेचिदात्मनिअधिष्ठानेस्थितः सन्नर्णवपरतत्वंईषत्संक्षोभयामासअशुद्धापचितिः समष्टिरहंकारेणईश्व रोस्मीतिभावितमतीत्यर्थः ईश्वरोनंतरेणद्वितीयेनऊर्मिणासंकल्पेनसूक्ष्मंइंद्रियाग्राह्यंछिद्रमाकाशाख्यंस्वयमभूत्तदा ४ तत्रेति तत्रछिद्रेसोनंतरोर्मिणा शब्दगतिरभूदित्यनुषज्ययोज्यं सईश्वरः पुनःसंकल्पांतरेणतस्मिन्नाकाशेशब्दरूपेणगतिःपरिस्पंदःतत्प्रदत्वेअभूदित्यर्थः किंकृत्वामारुतद्भवसंभवोभूत्वा वायुवेगेनैवशब्दगतिरूपेणसंभवःप्रादुर्भावोयस्यसः वायोःअनुग्रहादेवसंयोगविभागहेतुगतिर्जायतेतावेवचशब्दाविर्भावेकारणमित्यर्थः ननुकृतदावायु- रित्यतआह सइतिईश्वरःअंतरंछिद्रंलब्ध्वालब्ध्वैवअक्षोभ्योपिसन्समीरणोभूत्वाव्यवर्द्धत आकाशानंतरमेवउत्पन्नोवायुःशब्दगत्योर्निमित्तत्वमापेत्यर्थः ५ विवर्द्धतेति आर्षस्तङ्भावः अर्णवाख्यिदात्मातेनवायुनाकथंसंक्षोभितइत्यतआहान्योन्येति इदानींहिचिदहंकाराकाशवायवःसंति तत्रचित्ताहंकार-

तस्यचिंतयतस्तत्रतपसाभावितात्मनः निराकाशेतोयमयेसूक्ष्मेजगतिगव्हरे ३ इषत्संक्षोभयामाससोर्णवंसलिलेस्थितः सोनंतरोर्मिणासू क्ष्ममथच्छिद्रमभूत्तदा ४ तत्रशब्दगतिर्भूत्वामारुतद्भवसंभवः सलब्ध्वांतरमक्षोभ्योव्यवर्द्धतसमीरणः ५ विवर्द्धताबलवतातेनसंक्षो- भितोर्णवः अन्योन्यवेगाभिहतामममंथुश्चोर्मयोभृशम् ६ महार्णवस्यक्षुब्धस्यतस्मिन्नंभसिमथ्यति कृष्णवर्त्मासमभवत्प्रभुर्वैश्वानरो र्चिमान् ७ तत्रसंशोषयामासपावकःसलिलंबहु क्षयाज्जलनिधेश्छिद्रमभवंनिःसृतंनभः ८ आत्मतेजोद्भवाःपुण्याःआपोमृत रसोपमाः आकाशांछिद्रसंभूतंवायुराकाशसंभवः ९

स्यजाड्यंअभिहितंइतरेणतस्याःशुद्धत्वंहतं एवमहंकारव्यंजनेसवायोर्निःस्पंदत्वंहतंवायुनाप्य हंकारतरोर्निःस्पंदत्वंहतमित्यन्योन्याभिघातात्तेऊर्मयःसंकल्पभेदाःममंथुर्व्याकुलीचक्रुरर्णवमितिप्रकरणात् विपरिणामेनानुषज्ययोज्यं ६ मथ्यति- मथ्यमाने अर्चिमान्अर्चिष्मान् ७ रूपवतातेजसानिरूपस्याचिदात्मनोरूपत्वमपादनेनअत्यंतकालुष्यंसंपादितमित्याह तत्रेति तेजःशुद्धंवस्तुनास्तीत्येवा करोदित्यर्थः क्षयादितिउक्तक्रमेणजलनिधेःपरमेश्वरस्यक्षयादैश्वर्यत्वेयच्छिद्रमभवत्पूर्वोक्तंतदेवनभोनिःसृतमिति ८ आत्मनआकाशःसंभूतइत्या- दिश्रौतवादःवस्तुतस्तुसएवाकाशइत्यर्थः जलसृष्टिमाह आत्मेति तेजोद्भवाइतिसाधिरार्षः आत्मतेजोद्भवाइतिश्लोकार्द्धंक्षयाज्जलनिधेरित्यस्मात्पूर्वंबोध्यं- तेजोजलयोर्मध्येनभःसृष्टेरन्वयात् आकाशमिति आकाशंईश्वरःछिद्रसंभूतंछिद्रभूताकाशेवायुरूपेणसंभूतंआविर्भूतमेववायुःतथापिआकाशाद्वायुरि तिवेदवादऔपचारिकःमूलकारणमेवआनंत्यात्कार्यान्तटइवतत्तद्रूपेणभातिनात्रसृष्टिक्रमविवक्षारितगगनकुसुमेइमेइवांकुरादीनामितिभावः ९ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आज्येति आज्यमिवद्रवत्वादाज्यंजलंतस्यसंघर्षणंदृढतरश्लेषः पृथिवीतियावत् तद्यदपांशआसत्समहत्यसोपृथिव्यभवदितिश्रुतेः करकादिवदृढत्वंप्राप्ताआ-
पएवपृथिवी आज्यसंघर्षणंतस्यासमुद्भूतंआविर्भूतंजाठरंपावकंआज्यसंभवंपरंपरयाजलोद्भूतंपार्थिवमग्निंभोक्तारमितियावत् शब्दादिगुणवंतिमहाभूता-
निभोग्यानिभोक्तारंचजीवंदृष्ट्वामहाभूतानांआदिभूतंअहंकारंमहाभूतादीन्भावयति आत्मत्वेनकल्पयतीतिमहाभूतादिभावनोहंकारादिस्रष्टादेवःईश्व-
रःप्रीतियुतोभवत् अतःभौतिकान्हिरण्यगर्भादीन्स्रक्ष्यामीति १० तदेवाह दृष्ट्वेति लोकस्यसृष्टिःतस्याअर्थःप्रयोजनंतत्त्वंचलोकादेर्वेत्तीतिलोकसृष्ट्य-
र्थतत्त्ववित् सईश्वरःब्रह्मणोजन्मविचिन्वतिविचिंतयतिविचिन्वतीतिवर्तमानापदेशेनप्रवाहनित्योयमर्थइतिसूचितंप्रविकल्पसंकल्पमात्रेणब्रह्माणंसृजती-
त्यर्थः कीदृशंजन्महितंभौतिकसृष्ट्वाब्रह्मणस्तज्जन्मईश्वरस्यहिसृष्टिबाहुल्यमिच्छतोहितकरंकीदृशःबहुरूपःजीवेशःशुद्धरूपः ११ ब्रह्मणोजन्मकाल-
माहचतुर्युगेति अनेनदिनप्रमाणेनवर्षशतमुन्नेयम् १२ उत्पादितस्यब्रह्मणःपूर्वरूपमाहद्वाभ्यांयत्पृथिव्यामिति यत्यःपृथिव्यांपूर्वस्मिन्कल्पेभूमौयः

आज्यसंघर्षणोद्भूतंपावकंचाज्यसंभवम् दृष्ट्वाप्रीतियुतोदेवोमहाभूतादिभावनः १० दृष्ट्वाभूतानिभगवान्लोकसृष्ट्यर्थतत्त्ववित् ब्रह्मणो
जन्मसहितंबहुरूपोविचिन्वति ११ चतुर्युगादिसंख्यातेसहस्रयुगपर्यये यत्पृथिव्यांद्विजेंद्राणांतपसाभावितात्मनाम् १२ बहुजन्मनि
रुद्धात्माब्राह्मणोयतिरुत्तमः ज्ञानवान्दृष्टविश्वात्मायोगिनांयोगवित्तमः १३ तंयोगवंतंविज्ञेयंसंपूर्णैश्वर्यविक्रमम् देवोब्रह्माणिविश्वे-
चनियोजयतियोगवित् १४ ततस्तस्मिन्महातोयेहविषोहरिरच्युतः स्वपन्क्रीडंश्चविविधंमोदतेचैषपावकिः १५ पद्मंनाभ्युद्भवंचैकं-
समुत्पादितवांस्तदा सहस्रपत्रंविरजोभास्कराभंहिरण्मयम् १६

द्विजेंद्राणांमध्येउत्तमःनिरतिशयभावनावान्ब्रह्मणोविश्वरूप-
स्यउपासकोब्राह्मणः १३ अतएवदृष्टविश्वात्मासाक्षात्कृतसूत्रात्मभावः तंविज्ञेयंसर्वैरुपास्यंयतःसंपूर्णैश्वर्यविक्रमंदेवोविश्वेशः ब्रह्माणिविश्वेचवेद
जगतिसंतत्यविच्छेदविषयेनियोजयतिसूत्रोपासकानांमध्येयत्रभावनोत्कर्षविश्रांतिःसोग्रिमकल्पेब्रह्माभवतीत्यर्थः १४ ततइति ततोब्रह्मणोनि-
योगानंतरंमहातोयेस्वस्वरूपेनिर्विशेषेहरिरच्युतोभवतिसृष्टिविक्षेपराहित्यात् एषपावकिश्चनियुक्तस्तेजसोब्रह्माहविषःप्राणिकर्मवशाद्धेतोःस्वयंकर्मो-
परमेविविधंक्रीडंश्चसर्वप्राणिकर्मोद्भवेएवंप्रकारेणब्रह्मांडाधिपतिर्भूत्वामोदतइत्यर्थः १५ ब्रह्मणःसदनभूतंब्रह्मांडरूपंपद्ममुपाक्षिपत्सिंहावलोकने-
नहरिंविशिनष्टि पद्ममिति तदाब्रह्मजन्मकालेपद्ममेवस्तोतिनाभ्युद्भवमिति अधोनिष्ठ्यावितस्त्यांतेनाभ्यामुपरितिष्ठति ज्वालमालाकुलंभातिविश्वस्या-
यतनंमहदितिश्रुतिप्रसिद्धेर्वाचनाभिग्रस्थिाआपवारय्यवसिष्ठसमाधेःप्रस्तुतत्वात् सहस्रेतिसहस्रंअनंतानिपात्राणिभोगभूमयःप्राणिभ्रमरायस्मिन्
तत्विरजःरजोरेणुःपार्थिवाप्यादिरेणुस्तद्रहितंभास्कराभंसर्वतःप्रद्योतमानंहिरण्मयंमनोहरणशीलंदिव्यत्वादिरत्नोघमयम् १६ ६७ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

११ १२ १३ पद्मस्यमेरुकर्णिकावतो भूपद्मस्य अंतेसमंततः प्रांतेकुशंकुः पृथिवीशेतेस्मिन्निति कुशंजलं १४ ऋषेरिति व्यावहारिकत्वादयंमहापुष्करसंभवः
योयंयोगिहृदयदर्पणे प्रादुर्भावः सतस्मादेवसंस्काररूपेणहृदयेस्थितात्स्थूलाद्भूतोऽनाम्नापुष्करसंभवइत्युच्यते प्रतिबिंबचैत्रेपिचैत्रोयमितिव्यवहारस्य बाधा-
दर्शनादेकनामत्वंद्वयोर्युक्तमितिभावः १५ व्यवहारमुक्त्वावस्तुतत्त्वमाह एतस्मादितिएतस्मात् अव्यवहितात् प्रकरणवतः योगिकल्पितात्तत्पुष्करसंभवात्म
हापुष्करसंभवस्यबीजभूतात् याज्ञियैः कर्मयोगयज्ञार्हैः पद्मचिती पद्मरूपकेणचितंचयनं इष्टकाभिरितिवदस्यास्तीतिपद्मचितास्थूलः पुष्करप्रादुर्भावः कृतोविहि
तः यतोवेददृष्टार्थैरतः कृताः वेदेलोकेचसूक्ष्मस्यैवस्थूलत्वंदृष्टंनस्थूलस्यसूक्ष्मत्वंनहिबीजंवटोभवतीतिवटोपिसमासहस्रेण बीजीकर्त्तुंशक्योतोमानसादेवपुष्क
रात्स्थूलस्योत्पत्तिर्युक्तेतिभावः १६ एवमिति परमोव्यावहारिकः १७ विभुरितितथैवपरमस्तथैवशयनेस्थूलदेहविस्मरणेपद्मानांनिधिंअनंतानिपद्मानी-

यानिपद्मस्यपत्राणिभूरीण्यूर्ध्वंनराधिप तेदुर्गमाः शैलचिताः म्लेच्छदेशाविकल्पिताः ११ यान्यधः पद्मपत्राणिवासार्थंतानिभागशः दैत्याना
मुरगाणांचपातालंतन्महात्मनाम् १२ तेषामधोगतंयत्तदुदकेत्यभिसंज्ञितम् महापातककर्माणोमज्जंतेयत्रमानवाः १३ पद्मस्यांतेकुशंय-
त्तदेकार्णवजलंमहत् प्रोक्तास्तेदिक्षुसंघाताश्चत्वारोजलसागराः १४ ऋषेर्नारायणस्यायंमहापुष्करसंभवः प्रादुर्भावोप्ययंतस्मान्नाम्नापु
ष्करसंभवः १५ एतस्मात्कारणात्तज्ज्ञैः पुराणैः परमर्षिभिः याज्ञियैर्वेददृष्टार्थैर्यज्ञेपद्मचितीकृतः १६ एवंभगवतापद्मोविश्वस्यपरमोविधिः
पर्वतानांनदीनांचदेवतानांचनिर्मितः १७ विभूस्तथैवाप्रतिमप्रभावः प्रभाकरोवैभगवान्महात्मा स्वयंस्वयंभूः शयनेसृजत्तदाजगन्मयंप
द्मनिधिंमहार्णवे १८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिनामद्वादशोऽध्यायः १२ वैशंपायनउवाच चतु
र्युगादिसंभूतौसहस्रयुगपर्यये विघ्नस्तमसिसंभूतामधुर्नाममहासुरः १ तस्यैवचसहायोन्योभूतारजसिकैटभः तौरजस्तमसाविष्टौसंभू
तौकामरूपिणौ २ एकार्णवजलंसर्वंक्षोभयंतौमहासुरौ कृष्णरक्तांबरधरौश्वेतदीप्तोग्रदंष्ट्रिणौ ३ उभौमदकटोदग्रौकेयूरवलयोज्वलौ म
हाविकृतताम्राक्षौपीनोरस्कौमहाभुजौ ४

स्यर्थः महार्णवेपरमात्मनि १८ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांद्वादशोऽध्यायः १२ ७
सत्तमेलयविक्षेपौविघ्नौतामसराजसौ सत्वेनविष्णुनाक्षेप्यौमधुकैटभरूपकौ चतुर्युगादि कृतंसात्विकोयोगधर्मः तत्रापिसंभूतौ अधर्मपादस्यसत्वोक्तेः सहस्रयु
गपर्यये अमिताविद्याराात्रिक्षयसमये चित्तसत्वंहितत्वे प्रणिधीयमानंदैनंदिनलयाभ्यासात्तमसः प्राबल्येसतिलीयतेसलयोत्रमधुनामा १ तथारजःप्राब
ल्येसतिक्ष णिकसत्वोत्कर्षात्सत्यपिक्षणंतत्वेलाभेपुनः संसार प्रवणंभवतिसविक्षेपोनामविघ्नोत्रकैटभोनामयोयंसत्वादविविक्तश्चिद्धातुः सजीवोब्रह्मानाम
तस्यहिंसांसंसारसंकटेपातनंविष्णुःसत्वंतच्छरीरेसत्वेएवतयोर्नाशः अग्रिमकल्पेप्युत्थानंतत्रमधुकैटभयोः विष्णुपुत्रत्वंरजस्तमसोः सत्वंप्रत्युपसर्जनत्वं २ ३ ४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हुतेति वन्हिज्वालावाद्दिप्यमानाःशिखाइवशिखाःउज्वलास्तेषांप्रभायास्मिन् तदासमाधिकालेसुगंधिनंरम्यविषयास्वादयुक्तंपुंस्त्वमार्षम् कमलंकस्य-
ब्रह्मणोमलंआविद्यकंरूपंविराजते यद्वाकंब्रह्मैवअलंअत्यर्थंविविधरूपेणराजते आत्मनआपवस्यतनुरुहंतन्वांहार्दाकाशेनाभावेवारोहतीत्येवंरूपंत
नुरुहंचतच्चारुदर्शनंचेतिसमासः १७ इतिश्रीमहाभारतेभाविष्यपर्वणिटीकायाएकादशोऽध्यायः ११ ॐ लेशतोपिनभेदोस्तिबाह्याभ्यंत
रविश्वयोः इतिवक्तुंमुनिःप्राहषष्ठेनाभ्यंबुसंपदम् १ अथेति ब्रह्माणंतस्मिन्पद्मेआपस्योयोजयतीतिव्यवहितकर्तृक्रियानुषंगेणश्लोकद्वयंसंबंधनीयं
सर्वभूतमनोमयंजलाकाशवत्सतिव्याप्तिपरिसमासंसूत्रात्मानमित्यर्थःसर्वतोमुखमितिसर्वतःपाणिपादंतत्वादेरुपलक्षणम् १ तेजांसिसूर्यादीनिगुणाःगंधादयःपा
र्थिवे मनोमयेपिसर्वस्थूलभूमयलक्षणैर्युक्ते २ पृथिवीरुहंच यच्छरीरंसापृथिवीतिश्रुतेःपृथिवीशरीरंतस्यांरोहतीतिदेहांतस्थमित्यर्थः अत्रहेतुः नारायणांगसं
भूतंअंतर्याम्यंगोद्भूतमंतरेवास्तीतिभावः ३ पार्थिवैर्लक्षणैर्युतेइतियदुक्तंतत्रकापृथिवीकानिचतल्लक्षणानीत्यतआह यात्विति पद्मशब्देनतत्स्थानशरीरस्

हुताशनंज्वलितशिखोज्वलत्प्रभंसुगंधिनंशारदमल्लार्कतेजसम् विराजतेकमलमुदारवर्चसंमहात्मनस्तनुरुहचारुदर्शनम् १७ इतिश्रीमहा
भारतेखिलेषुहरिवंशेभविष्यपर्वणिनामएकादशोऽध्यायः ११ वैशंपायनउवाच अथयोगविदांश्रेष्ठसर्वभूतमनोमयम् स्रष्टारंसर्वभूता
नांब्रह्माणंसर्वतोमुखम् १ तस्मिन्हिरण्मयेपद्मेबहुयोजनविस्तृते सर्वतेजोगुणमयेपार्थिवैर्लक्षणैर्युते २ तच्चपद्मंपुराणज्ञाःपृथिवीरुहमु
त्तमम् नारायणांगसंभूतंप्रवदंतिमहर्षयः ३ यातुपद्मासनादेवीपृथिवीतांप्रचक्षते येगर्भसाराङ्कुरतस्तान्दिव्यान्पर्वतान्विदुः ४ हिमवंतं
चमेरुंचनीलंनिषधमेवच कैलासंमुंजवंतंचतथाद्रिंगंधमादनम् ५ पुण्यंत्रिशिखरंचैवकांतंमंदरमेवच उदयंदर्दुरंचैवविंध्यमस्तंचपर्वत
म् ६ एतेदेवगणानांचसिद्धानांचमहात्मनाम् आश्रमाःपुण्यशीलानांसर्वकामयुताद्रयः ७ एतेषामितरोदेशोजंबुद्वीपइतिस्मृतः जंबु
द्वीपस्यसंख्यानंयाज्ञियायत्रचक्रिरे ८ गर्भाद्यत्स्रवतेतोयंदिव्यामृतरसोपमम् दीव्यंत्तीर्थशतापांग्यस्तादिव्याःसरितःस्मृताः ९ यान्येता
नितुपद्मस्यकेसराणिसमंततः असंख्याताःपृथिव्यांतुविश्वेतेधातुपर्वताः १०

स्यासनंयत्रसापृथिवीप्रसिद्धैवयेगर्भेपाषाणमयत्वात्साराद्दृढाःसंतःअंकुरवदुच्छूनास्तान्प्रथमार्थेसतिविशेषणंतुपिंडब्रह्मांडयोरैक्यविवक्षयापिंडेपिक-
ठिनांशोऽस्थ्यादिःपर्वतत्वेनज्ञेयइत्येवमर्थः ४ ५ ६ युताश्चतेअद्रयश्चेतिसमासः ७ यज्ञियंदेशमिच्छंतितेयाज्ञियाः यत्रचक्रिरेयज्ञंजंबूद्वीपमेव
कर्मभूमिरित्यर्थः ८ यज्ञस्येत्युपस्थितंसंबध्यतेतथाहिआग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतियज्ञोद्भवत्वं
तोयस्यस्मरंतितीर्थशतान्यपांगोभ्रूभंगोयासांताःदिव्यानद्योगंगाद्याःब्रह्मांडंभित्वामेरूपरिपतित्वाचतुर्दिक्षुप्रस्थिताः ९ १० ॐ ॐ ॐ १६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४

महद्भिरःसंहननौजंगमाविवपर्वतौ नीलमेघाभ्रसंकाशावादित्यप्रतिमाननौ ५ विद्युदंभोदताम्राक्षौकराभ्यामितिभीषणौ पादसंचारवेगाभ्या
मुत्क्षिपंताविवार्णवम् ६ कंपयंताविवहरिंशयानमरिसूदनम् तौतत्रविहरंतोस्मपुष्करेविश्वतोमुखम् ७ पश्यतांदीप्तवपुषयोगिनांश्रेष्ठमुत्तमम्
नारायणसमाज्ञप्तंसृजंतमखिलाःप्रजाः देवतानिचविश्वानिमानसांश्चसुतानृषीन् ८ ततस्तावूचतुस्तत्रब्रह्माणमसुरोत्तमौ दृप्तौयुयुत्सकौक्रुद्धौ
रोषसंरक्तलोचनौ ९ कस्त्वंपुरुषमध्यस्थःसितोष्णीषश्चतुर्मुखः आवानगणयन्मोहादासेत्वंविगतज्वरः १० एह्यावयोर्बाहुयुद्धंप्रयच्छकमलो
द्भव आवाभ्यामतिवीराभ्यांनशक्यंस्थातुमाहवे ११ कस्त्वंकस्योद्भवस्तुभ्यंकेनवासीहचोदितः कःस्रष्टाकश्चवेगोप्ताकेननाम्नाभिधीयते १२
ब्रह्मोवाच यःकइत्युच्यतेलोकेह्यविज्ञातःसहस्रशः तत्संभवंयोगवंतंकिमानाभ्यवगच्छथः १३ मधुकैटभौऊचतुः ना
वयोःपरंलोकेकिंचिदस्तिमहामते आवांछादयतोविश्वंतमसारजसातथा १४ रजस्तमोमयावावांयतीनांदुःखलक्षणौ छलकौधर्म-
शीलानांदुस्तरौसर्वदेहिनाम् १५आवाभ्यामुह्यतेलोकउच्छृताभ्यांयुगेयुगे आवामर्थश्चकामश्चयज्ञाःसर्वपरिग्रहाः १६ सुखंयत्रमुदोयत्र
यत्रश्रीःसन्निवृत्तयः एषांयत्कांक्षितंचैवतत्तदावांविचिंतय १७ ब्रह्मोवाच यत्तद्योगवतांश्रेष्ठयत्तत्सर्वंमयार्जितम् तत्समाधा-
यगुणवान्सत्वेचास्मिप्रतिष्ठितः १८ यत्परंयोगयुक्तानामक्षरंसत्वमेवच रजसस्तमसश्चैवयत्स्रष्टाजीवसंभवः १९ यतोभूतानिजायं-
तेसात्विकानीतराणिच सएवयुक्तःसमरेवशीवांशमयिष्यति २० वैशंपायनउवाच ततःशयानंश्रीमंतंबहुयोजनविस्तृतम् पद्मनाभं
हृषीकेशंप्रणिपत्यायतावुभौ २१ जानीवस्त्वांविश्वयोनिमेकंपुरुषसत्तमम् तवोपासनहेत्वर्थमिदंनोबुद्धिकारणम् २२ अमोघदर्शनं
सत्यंयतस्त्वाविदुरीश्वरम् ततस्त्वामभितोदेवकांक्षावःप्रतिवीक्षितुम् २३ तदिच्छावोवरंदत्त्वयात्वावामरिंदम अमोघदर्शनंदेवनमस्ते
त्वजितंजय २४ श्रीभगवानुवाच कानिच्छतोद्भुतब्रूतवरानसुरसत्तमौ दत्तायुषौमयाभूयस्त्वहोजीवितुमिच्छथः २५ तस्मा-
द्यदेषवांयत्नस्तत्प्राप्नुतमहाबलौ वध्यौभवंतौतुस्यातांतावित्येवाब्रवीद्धरिः उभावपिमहात्मानावूर्जितौक्षतवर्जितौ २६ मधुकैटभावू
चतुः यस्मिन्नकश्चिन्मृतवांस्तस्मिन्देशेविभोवधम् इच्छावःपुत्रतांयातुंतवचैवसुराधिप २७ श्रीभगवानुवाच बाढंसुतौमेप्रवरौभ
विष्यकल्पसंभवे भविष्यथोनसंदेहःसत्यमेतद्ब्रवीमिवाम् २८ वैशंपायनउवाच वरंप्रदायाथमहासुराभ्यांसनातनोविश्वधरोत्तमो-
विभुः रजस्तमोभ्यांभवभावनोपमौममंथतावूरुतलेसुरारी २९

२५ २६ २७ २८ २९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीहरिवंशेभविष्यपर्वणिटीकायांत्रयोदशोऽध्यायः १३ ७ ७ श्वादिसंज्ञंविराडादित्रयंयुक्त्यनुभूतितः विमुच्यसुस्थिताद्भूम्नोव्युत्थानेसृष्टिरष्टमे स्थि
तेति अत्रयथास्फटिकेजपाकुसुमसान्निध्याद्रक्तत्वाध्यासः तत्रैवस्फटिकांशप्रमोषेपद्मरागत्वाध्यासः तत्रैवनिशिचंद्रिकायामिंद्रनीलत्वाध्यासः एवंशुद्धायांचि
तिमायोपाधिसान्निध्यादीश्वरत्वाध्यासः तत्रैवमायाबलतारतम्यात्सूत्रात्मविराटत्वाध्यासोस्तः अतएवशास्त्रेप्रणवमात्राणामकारोकारमकारार्द्धमात्राणांप्राति-
लोम्येनार्थअविद्योपाधिनाजीवेनस्थूलदेहासंगेनक्रमात्पूर्वस्योत्तरोत्तरत्रप्रविलापनेनसाक्षात्कर्तव्याः अर्धमात्रायांस्वरूपमात्रप्रतिष्ठआत्मानभवतिद्वैतादर्शना
त् सोयमात्माआवरणविक्षेपशक्तिमत्याअविद्याया आश्रयस्तत्रावरणांशेनशुद्धरूपतिरोधानंविक्षेपांशेनईशादिस्थूलेदेहांतानांप्रतिभासस्तत्रापिईशादिषु
उत्तरस्यपूर्वपूर्वमात्रवृत्तिरितिवस्तुस्थितिः तत्रावरणांशस्यसांख्यनामाविचारोविरोधीविक्षेपांशस्यतुयोगेनैवनिवृत्तिः सोपाधिकभ्रमस्यउपाधिनिवृत्तिमंतरेण
परोक्षज्ञानमात्रेणनाशायोगात् एवंचयोगिनःस्थूलदेहासंगेविराड्भावः स्फटिकेइंद्रनीलत्वाध्यासस्थानीयोभूतामात्रि ध्रुंधिरूपतयाब्रह्मसंज्ञस्यमनःकल्पि

इतिश्रीमहाभारतेखिलेषुहरिवंशेभवि० मधुकैटभवरप्रदानंनामत्रयोदशोऽध्यायः १३ वैशंपायनउवाच स्थितात स्मिंस्तुकमलेब्रह्मा
ब्रह्मविदांवरः ऊर्ध्वबाहुर्महाबाहुस्तपोघोरंसमाश्रितः १ ज्वलन्निवचतेजस्वीभाभिःस्वाभिस्तमोनुदः बभासेसर्वधर्मस्थःसहस्रांशुरिवांशुमान्
२ अथान्यत्रूपमास्थायशंभुर्नारायणोव्ययः द्विधाकृत्वात्मनात्मानमचिंत्यात्मासनातनः ३ आजगाममहातेजायोगाचार्योमहायशाः सांख्या
चार्यश्चमतिमान्कपिलोब्राह्मणोवरः ४ देवर्षिभिस्तुतावेतौब्रह्मब्रह्मविदांवरौ उभावपिमहात्मानावूर्जितौक्षेत्रतत्परौ ५

तःपुत्रःसांख्ययोगाभ्यांप्रतिबोधितःसन्नि
वर्त्तते ततःचंद्रिकानिवृत्तौस्फटिकेपद्मरागत्वाध्यासोपमः सूत्रात्मातस्यैवब्रह्मणोमानसःपुत्रोभुवोनामातथैवसांख्ययोगाभ्यांप्रतिबोधितःसन्निवर्त्ततेतद्वत्स्फटिके-
लौहित्याध्यासोपमोब्रह्मणोमानसःपुत्रईशोपिभूर्भुवनामापूर्ववत्प्रतिबोधान्निवर्त्तते ततःशुद्धाचितिरेवावशिष्यते सोयमर्थोत्रब्रह्मनारायणकपिलभूर्भुवा
द्यादिदैविकवृत्तांतरूपकेणनिरूप्यतेएकविंशत्याश्लोकैःततःपरंनरराम ततोब्रह्मेत्यादिनाऽध्यायशेषेणचिदात्मैवसन्योगीचिदात्मकमेवसर्वंजगत्सृष्टिसमये
सृजतीत्युच्यते अक्षरयोजनातुएवंज्ञेयाकमलेमानसेब्रह्मांडे ऊर्ध्वंप्रणवाख्यंब्रह्मबाहुरिवबाहुरालंबनंयस्यसऊर्ध्वबाहुः तपोयोगंघोरंसर्वप्रविलयरूपत्वा
त् १ भाभिश्च दीप्तिभिःतमोनुदःअज्ञानध्वंसी सर्वधर्मस्थोयोगधर्मस्थः २ ३ नारायणकपिलौयोगसांख्यशास्त्रयोराधिष्ठातारौदेवतेवतयोःसां
ख्याचार्योमतिमान् उपपत्तिप्रधानः ४ देवर्षिभिरिति ब्रह्मविदांवरौब्रह्मब्रह्माणंप्रतिऊचतुरित्युत्तरेणान्वयः विचारश्चित्तनिग्रहश्चक्षेत्रतत्परौपुरु-
षैकत्वानेकत्वप्रकृतिमिथ्यात्वामिथ्यात्ववादितयापरस्परविरोधिनावपियोगमहात्म्यादेवयोगिनमुपतिष्ठतइतिभावः ५ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वदतेअभिमंत्रयते भासनोपरांभाषेत्यादिनातङ् ११ समानसोभूः मनः प्रधानात् प्रसितुरप्यन्यः कोमहानस्तीतिसंशयंसमुपस्थितः प्राप्तः कुर्वेकिंरोमि १२ यदिति सत्यंत्रैकालिकबाधरहितं अक्षरंअपरिणामि अष्टादशनिधंअष्टचदशचनिधाः पाशामतभेदेनयस्यतत् अष्टादशनिधंविधमितिपाठेअष्टादशबंधप्रकारंविधिमितिपाठेतेविधीयतेनियोज्यतेइत्यर्थः निधाः पाशाः पाशावैनिधाइतिश्रुतेः सांख्यमतेअष्टौनिधाः कर्मेंद्रियाणिपंच १ ज्ञानेंद्रियाणिपंच २ मनआदिचतुष्कम् ३ प्राणपंचकम् ४ वियदादिपंचकम् ५ कामः ६ कर्म ७ अविद्याचनैः पुर्यष्टकम् एतदेवाविद्यातिरिक्तप्रकृतिपुरुषाधिकेश्वरसहितंदशकंयोगानांबधकं यद्यप्येतेषांप्राणादिपंचकसामान्याकरणवृत्तिस्तथापिसामान्यविशेषभेदेनैवतस्य पृथक्त्वंज्ञेयम् स्वंस्वंमतमुपन्यस्य परमार्थमाहतुः यदिति सत्मूर्ततेजोन्नरूपं यत्वाय्वाकाशाद्यव्याकृतं अमृतं प्रविल्प्रपनीयतयामृतयोरधिष्ठानंचयत्सरवस्तुसर्वविशेषशून्यंचिदेकरसंस्मरचिंतयाहमस्मीतिविद्धीत्यर्थः १३ उत्तरांदिशंपरांकाष्ठांचिदेकरसाख्यां १४ ततइति भूवंसूत्रात्मानं महामनाः महांतिसर्वसृष्टिसमर्थानिमनांसिअवांतरोपाधिभूतानियस्यसमहामनाः अविद्यो

ब्रह्मोवाच यएषकपिलोनामब्रह्मानारायणस्तथा वदतेवरदत्वांतुतत्कुरुष्वमहामते ११ वैशंपायनउवाच ब्रह्मणोक्तोतदासोथसंशयंसमुपस्थितः शुश्रूषुरस्मितुवयोः किंकुर्वेतिकृतांजलिः १२ परमेश्वरौऊचतुः यत्सत्यमक्षरंब्रह्मत्वष्टादशनिधंस्मृतम् यत्सत्यममृतंचैवपरंतत्समनुस्मर १३ वैशंपायनउवाच एतद्वचोनिशम्याथसययौदिशमुत्तराम् गत्वाचतत्रब्रह्मत्वमगमत्ज्ञानचक्षुषा १४ ततोब्रह्माभुवंनामद्वितीयमसृजत्प्रभुः तंकल्पयित्वामनसामनसैवमहामनाः १५ ततः सोप्यब्रवीद्वाक्यंकिंकुर्वेतिपितामहम् पितामहसमाज्ञप्तोब्रह्माणंसमुपस्थितः १६ ब्रह्म भ्यांसहितः सोथभूयोभागवतींगतः प्राप्तश्चपरमंस्थानंसतयोःपार्श्वमागतः १७ तस्मिन्नपिगतेपुत्रंतृतीयमसृजत्प्रभुः मोक्षोपायेतिकुशलंभूर्भुवंनामतंविभुः १८ आससादसतद्धर्मंतयोरेवागमद्गतिम् एवंपुत्रस्त्रयोप्येतेउक्ताः शंभोर्महात्मनः १९

पाधिरीश्वरः मनसामनसैवेतिवीप्सायांद्विवचनंसर्वमनः भुवनमानंस्रष्टुंसमर्थमित्यर्थः १५ ततः सः मनसः सुतः पितामहंमनसः पितरंमहांतंजीवंब्रह्माणंब्रह्माणोसांख्ययोगाचार्यौ १६ ब्रह्माभ्यामिति सतयोःपार्श्वमुपागतः सन्ब्रह्म भ्यांसहितोभागवतींपूर्वोक्तांपरांकाष्टांगतः योगविचारयोरपितस्यांकाष्टायांलयोभवतीतिभावः १७ तस्मिन्निति विराट्सूत्रयोरपिजनकत्वान्मोक्षोपायेतिकुशलंभूर्भुवंनामईश्वरंशकृद्दसत्वोपाधिं १८ तद्धर्मंतयोः पूर्वयोर्द्धर्मंपरकाष्ठानुसारित्वंईशोपिसांख्ययोगसंपन्नापरस्यांकाष्ठायांपुरुषान्नपरंकिंचित् साकाष्टासापरागतिरितिश्रुतिप्रसिद्धायांप्रलयंगतइत्यर्थः ईश्वरग्रासस्तुरीयतुरीयइतितापनीयेईश्वरग्रासस्यापिस्पष्टश्रवणात् एवमुक्तेनप्रकारेणत्रयोप्येतेमनसः पुत्रा भूरादयः शंभोर्महात्मनः शंभुनामहात्मनासांख्ययोगाचार्यरूपिणाउक्ताः उपदिष्टाः एकंसांख्यंचयोगंचयः पश्यतिसपश्यतीतितयोर्वस्तुतत्वापेक्षयाएकत्वादेकवचनशब्दत्वम् १९ ७ ५ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्वावपिस्वस्वमतेविरुद्धांशमपहायाविरुद्धांशेएकमतंतांगतौतंत्रेणऊचतुः ६ बहुत्वादिति तत्रयोगाचार्यवाक्यबहुत्वाद्दृढपादश्चेति लोकगुरुः अविद्यादिभि
परामृष्टानांलोकानांगुरुरतत्वात् वरःश्रेष्ठइतितटस्थेश्वरोपन्यासःसचबहुत्वात् लोकानामितिसमासांतर्गतमपिबुध्यानिष्कृष्यते बंधमोक्षव्यवस्थायाआ
वश्यकत्वेनजीवानांबहुत्वान्ननियंतासेनापतिवत्तटस्थोवश्यमेष्टव्यइत्यर्थः दृढपादश्चपद्यंतेगम्यंतेभोगार्थैस्तेपादाविषयेंद्रियबुद्धयःदृढाःरज्जूरगादिव
द्बुधायोग्याःकिंतुवृत्तिनिरोधेनहेयाएवव्यवहारानंत्यात् सत्याःपादायस्यसदृढपादःतेनविषयादेःसत्यत्वेनप्रकृतेरपिसत्यत्वमुक्तं सांख्याचार्यवचनंतु-
विश्वात्माजगतःस्थितिरिति लोकगुरुर्विश्वात्मेतिसंबंधः विश्वंचेतनंसर्वंआत्मास्वरूपंयस्यसतथा ब्रह्मसमुद्रेजगज्जीवेश्वरतरंगाःकोटिशउत्पद्यंतइति
भावःकथंतर्हिबंधमोक्षादिर्व्यवहारःएकात्म्येएकमुक्त्यापत्तेरित्यतआह जगतःस्थितिरितिजलचंद्रवदौपाधिकभेदानपिबंधमोक्षव्यवस्थोपपत्तेःपरस्यापि
निर्विशेषचिन्मात्ररूपाणांलक्षणभेदाभावेनभेदस्यवक्तुमशक्यत्वादेकएवात्मेतिवक्तुंयुक्तंतथाबहूनामलुप्तदृशांविभूतापुंसांसन्निहितंजगत्कथंकस्यचि-

तौभाषमाणावूचतुस्तत्रब्रह्माणममितौजसम् परावरविशेषज्ञौपूजितौपरमर्षिभिः ६ बहुत्वाद्दृढपादश्चविश्वात्माजगतःस्थितिः ग्राम
णीःसर्वभूतानांब्रह्मालोकगुरुर्वरः ७ तयोस्तद्वचनंश्रुत्वातिस्रोव्याहृतयोजपन् त्रीनिमान्कृतवान्लोकान्यथाहब्राह्मणीश्रुतिः ८
तत्रभूसंज्ञकंचैवससृष्टवादितवान्प्रभुः ततोग्रेतद्गतस्तस्थेहोब्रह्मामानसमव्ययम् ९ सोत्पन्नस्त्वग्रेब्रह्माणमुवाचमानसःसुतः करोमि
किंतेसाहाय्यंब्रवीतुभगवानिति १०

द्दृश्यमदृश्यंचरज्जूरगतुल्यतामंतरेणस्यादितिप्रकृतिसत्यत्वमप्ययुक्तंस्व
प्नादिवदसत्यादपिचरमधातुविसर्गातिव्यवहारोपपत्तेरितिभावः उभयंसमंतंवाक्यंग्रामणीःसर्वलोकानामिति आस्तांमतभेदः समुक्तोशिष्यमाणस्तेक
लएवकेवलोनिर्विशेषःसएवमुख्यइत्यर्थः ब्रह्माब्रह्मवित्वरोवरणीयोन्यत्सर्वंबुध्याधिकंहेयमित्यर्थः ७ सर्वलोकानामित्युक्तंतत्रलोकस्वरूपमा
ह तयोरितिव्याहृतयोव्याहृतीःइमान्प्रत्यक्षान्विश्वतैजसप्राज्ञान्अत्रप्रमाणमाहयथेति ब्राह्मणीब्रह्मप्रतिपादिकाभूरित्येवऋग्वेदादजायतेत्यु
पक्रम्यतेभ्योभितप्तेभ्यस्त्रयोवर्णाअजायंताकारोकारमकाराइतिश्रुतेर्व्याहृतिसारस्यप्रणवस्यविश्वाद्यात्मकत्वात् भूरादिशब्दैर्विश्वाद्याएवज्ञेया अत्रसांख्यशब्दे
नौपनिषदएवग्राह्योनतुनिरीश्वरः ततश्चतस्यवाचकःप्रणवइतिवदतोयोगाचार्यस्यापिओमित्येतदक्षरमिदंसर्वमितिश्रौतःप्रणवोत्थएकात्मरूपोऽभिम-
तइतितयोरविरोधइतिभावः ८ तत्रतेषुलोकेषुस्त्रष्टव्येषुततोभूसंज्ञात्वैश्वानरात्पूर्वंवागतःसूक्ष्मकारणंवापश्चादागतःस्थूलव्याष्टिशरीरंप्रतीतिःततोग १८
तागतःतत्रभूसंज्ञकेस्थितःमानसामेतिकल्पितत्वमुक्तं अतएवअव्ययंरज्जूरगवदनुत्पन्नत्वादेवनाशरहितं ९ सोत्पन्नइतिपादपूरणार्थःसुलोपःअग्रेस्थितः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

धर्माल्लक्ष्म्युद्भवः कामः साध्यासाध्यान्व्यजायत भवंच प्रभवंचैवमीशानंसुरभीतथा ४४ अरुंधत्यारुणीचैवविश्वावसूवल्धुवौ महिषंचत
नूजंचविज्ञानमनसावपि ४५ मत्सरंचाविभूतिंचसर्वाःसुरभिसूनवाः सुपर्वतंविषंनागंसाध्यालोकनमस्कृता ४६ वासवानुगतादेवीजनया
मासवैसुतान् धरंवैप्रथमंदेवंद्वितीयंध्रुवमव्ययम् ४७ विश्वावसुंतृतीयंचचतुर्थंसोममीश्वरम् पंचमंपर्वतंचैवयोगेंद्रंतदनंतरम् ४८
सप्तमंचततोवायुमष्टमंनिर्ऋतिंवसुम् धर्मस्यापत्यमित्येवसुरभ्यासमजायत ४९ विश्वेदेवास्तुविश्वायाधर्माज्जाताइतिश्रुतिः दक्षयज्ञो
महाबाहुर्वसुश्वसुतएवच सुधर्मांचमहाबाहुःशंखपाच्चमहाबलः ५० उक्तश्चैवमहाबाहुर्वपुषांश्चतथैवच चाक्षुषस्यमनोरेतेतथानं
तमहीरणौ ५१ विश्वावसुसुपर्वाणोविष्टरश्चमहायशाः रुरुश्चऋषिपुत्रोवैभास्करप्रतिमद्युतिः ५२ विश्वेदेवान्देवमाताविश्वेशान्जनयत्
सुतान् मरुत्वतीमरुत्वत्तोदेवानजनयच्छुभान् ५३ अग्निश्चक्षुर्हविर्ज्योतिःसावित्रंमित्रएवच अमरंशरवृष्टिंचसंक्षयंचमहाभुजम् ५४
विरजंचैवशक्रंचविश्वावसूविभावसू अश्मंतंचित्ररश्मिंचतथानिष्कुपितंनृपम् ५५ नहुषंचाहुतिंचैवचारित्रंबहुपन्नगम् बृहंतंचबृहद्रू
पंतथैवपरतापनम् मरुत्वत्यांपुराधर्माज्जज्ञेपुत्रद्वयंशुभम् ५६ आदित्याजज्ञिरेराजन्नादित्याःकश्यपाद्य इंद्रोविष्णुर्भगस्त्वष्टावरुणोंशो
र्यमारविः ५७ पूषामित्रश्चवरदोमनुःपर्जन्यएवच इत्येतेद्वादशादित्यावरिष्ठास्त्रिदिवौकसः ५८ आदित्यस्यसरस्वत्यांजज्ञेपुत्रद्वयंशुभम्
रूपश्रेष्ठंबलश्रेष्ठंचदिविरूपिणावरम् ५९ दनुस्तुदानवान्जज्ञेदितिर्दैत्यान्व्यजायत कालानुकालकेयांश्चह्यसुरान्राक्षसांस्तथा ६०
अनायुषायास्तनयाव्याधयश्चाधयस्तथा सिंहिकाग्रहमाताचगंधर्वजननीमुनिः ६१ प्रवोधाप्सरसःश्रेष्ठासुरसायाःसरीसृपाः क्रोधायाः
सर्वभूतानिपिशाचाश्चैवभारत ६२ तथायक्षगणाश्चैवगुह्यकाश्चविशांपते चतुष्पदानिसर्वाणिऋतेगावस्तुसौरसाः ६३ अरुणोगरुडश्चै
वविनतायाव्यजायत महीधरान्सर्पनागान्देवीकद्रूर्व्यजायत ६४ एवंविष्टद्रुमगमन्विश्वेलोकाःपरस्परम् तदापौष्करकेराजन्प्रादुर्भा
वेमहात्मनः ६५ पुराणंपौष्करेचैवमयाद्वैपायनाच्छ्रुतम् कथितंतेनपूर्वेणयत्कृतंपरमर्षिभिः ६६ यश्चेदमग्र्यंप्रथमंपुराणंसदाप्रमत्तःपठते
महात्मा अवाप्यकामानिहवीतशोकःपरत्रसःस्वर्गफलानिभुंक्ते ६७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिनामचतुर्दशोऽ
ध्यायः १४ ७ ६ जनमेजयउवाच श्रुतंनःपरमंब्रह्मन्स्ववंशाचरितंमहत् दिव्यमन्योन्यसंभूतंमानितंबहुभिर्गुणैः १

६७ इतिश्रीहरिवंशेभविष्यपर्वणिटीकायांचतुर्दशोऽध्यायः १४ ६ यत्सूचितंप्राक्श्लोकाभ्यांरहस्यंसांख्ययोगयोः तद्विस्तारयेनवमेनृपतेःप्रश्नईर्यते १ १

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ततःकिमतआह तानिति यथादाह्यंदग्ध्वावह्निःस्वयोनोउपशाम्यति एवंसांख्यज्ञानंप्रविलाप्यंभूरादिप्रपंचंप्रविलाप्यस्वयमपिब्रह्मणिलीनमित्यर्थः २० वेद्य
लयात् घोरंहृत्तिलयात्घोरतरं तयोनिर्विकल्पंसमाधिंप्राप्तमित्यर्थः २१ ततोव्युत्थानमाह नररामेति शरीरार्द्धमिति शुद्धेचिदात्मन्येवभोक्तृयोग्यस्वप्रपंचं

तान्गृहीत्वासुतांस्तस्यप्रययौस्वांगतिंतथा नारायणोथभगवान्कपिलश्चयतीश्वरः २० यंकालंतौगतौमुक्तौब्रह्मातत्कालमेवतु तेपेघो
रतरंभूयःसतपःसंशितव्रतः २१ नररामततोब्रह्माप्रभुरेकस्तपश्चरन् शरीरार्द्धमयोभार्यांसमुत्पादितवांछुभाम् २२ तपसातेज-
साचैववर्चसानियमेनच सदृशीमात्मनोभार्यांसमर्थांलोकसर्जने २३ तयासहततस्तत्रचरेमेब्रह्मातपोमयः सृजत्प्रजापतीन्सर्वान्सागरान्सरित
स्तथा २४ ततोसृजद्वैत्रिपदांगायत्रींवेदमातरम् अकरोच्चैवचत्वारोवेदान्गायत्रिसंभवान् २५ आत्मार्थेचासृजत्पुत्रांल्लोककर्तॄन्पितामहः वि
श्वेप्रजानांपतयोयेभ्योलोकाविनिसृताः २६ विश्वेशंप्रथमंनामहातपसमात्मजम् सर्वाश्रमतमंपुण्यंनाम्नाधर्मंससृष्टवान् २७ दक्षंमरीचिं
मित्रंचपुलस्त्यंपुलहंक्रतुम् वसिष्ठगौतमंचैवभृगुमंगिरसंमनुम् २८ अथर्वभूताइत्येतेख्याताब्रह्ममहर्षयः त्रयोदशसुतानांतुयेवशावैम
हर्षिणाम् २९ अदितिर्दितिर्दनुःकालाह्यनायुःसिंहिकामुनिः प्रबोधासुरसाक्रोधाविनताकद्रुरेवच ३० दक्षस्यैताद्दुहितरःकन्याद्वादशभारत
नक्षत्राणिचभद्रंतेसप्तविंशतिरूर्जिताः ३१ मरीचेःकश्यपःपुत्रस्तपसानिर्मितःप्रभुः तस्मैकन्याद्वादशेमादक्षस्ताअन्वमन्यत ३२ नक्षत्रा
ख्यानिसोमायवस्त्रवेदत्तवान्नृषिः रोहिण्यादीनिसर्वाणिपुण्यानिजनमेजय ३३ लक्ष्मीःकीर्त्तिस्तथासाध्याविश्वाकामानुगासुभा देवीमरुत्व
तीचैवब्रह्मणानिर्मितापुरा ३४ एताःपंचवरिष्ठावैसुरश्रेष्ठायभारत दत्ताधर्मायभद्रंतेब्रह्मणादृष्टधर्मणा ३५ यारूपार्द्धमयीपत्नीब्रह्मणः
कामरूपिणी सुरभिःसातुगौर्भूत्वाब्रह्माणंसमुपस्थिता ३६ ततस्तामगमद्ब्रह्मामैथुनंलोकपूजितः लोकसर्जनहेतुज्ञोगवामर्थायभारत ३७
जज्ञेचैकादशसुतान्विपुलान्धर्मसंहितान् रक्तसंध्याभ्रसदृशान्दहनोपमतेजसः ३८ तेरुदंतोद्रवंतश्चभगवतंपितामहम् रोदनाद्द्रावणा
च्चैवततोरुद्राइतिस्मृताः ३९ निर्ऋतिश्चैवसर्पश्चतृतीयोह्यजएकपात् मृगव्याधःपिनाकीचदहनोऽथेश्वरश्चवै ४० अहिर्बुध्न्यश्चभगवा
न्कपालीचापराजितः सेनानीश्चमहातेजारुद्राएकादशस्मृताः ४१ तस्यामेवसुरभ्यांतुजज्ञेगोवृषभस्तथा आज्यंचाथतथामाषाःसिकताःप्र
भयोऽमृताः ४२ अजाश्चैवैकवंशाश्चतथैवामृतमुत्तमम् औषध्यःप्रवरायाश्चसुरभ्याताःसमुत्थिताः ४३

कल्पितवानित्यर्थः २२ अस्ययोगैश्वर्यमाह तपसेति सएकधाभवतिप्रदीपवदावेशइतिश्रुतिंन्यायाभ्यांसोभर्यादिवत्तुल्यप्रभावाएवयोगिनांकल्पितादेहाइति- ११
भार्यायास्तुल्यप्रभावत्वंपत्यायुक्तमितिभावः २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अचिंत्यत्वं विभुत्वं च विवृणोति अभूतः कालत्रयेपि न सिद्धः यस्मात् अजातः अनुत्पन्नः एवंभूतोपि सर्वत्र समतां गतः सन् सद्रूपो नाप्यसद्रूप इति चेत् किंरूप इत्य त आह यत् अव्यक्तात् परं नारायणविदो विदुस्तदेव स इति योजना समुद्रतरंगवत् अहंकारश्चिन्मात्ररूप एवेत्यर्थः ५ अस्य विश्वरूपत्वमाह सर्वत इति लिंग व्यत्यय आर्षः ६ ननु समुद्रेपि वाय्वाद्यभिघातं विना तरंगो नोत्पद्यते कथं चिन्मात्रेऽद्वितीये द्वितीयमज्ञानं संबध्यते येन अहंकारोत्पत्तिरित्याशंक्याह असत इति तत्राहंकारे असतः कारणस्य सतः कार्यस्य च कारणं कल्पकं अविद्यास्ति अहंकारे स्थित्वैव चिदात्मन्यविद्या कल्प्यते न तु चिदात्मनि तत्संबंधो युज्यत इत्य र्थः यदाहुर्वृद्धाः अस्याविद्येत्यविद्यायामेवासित्वा प्रकल्प्यते ब्रह्मदृष्ट्या त्वविद्येयं न कथंचन युज्यत इति कुतश्चिदात्मन्यविद्या नास्तीत्यत आह अव्यक्त इति निर्विकल्पत्वात्तस्येत्यर्थः तर्हि तत्सत्त्वे किं मानमत आह व्यक्तरूपस्थश्चरन्निति मातृमानप्रमेयेषु चिदात्मत्वेन दृश्येष्वनुस्यूततया चरन्नपि न दृश्यते न चा दृश्यत्वादेव तदासिद्धिः मात्रादिः स्वेतरभावोऽदृश्यन्संमतवदिति न्यायेन तत्सिद्धेरिति भावः ७ एतदेवाह विकारेति विकारपुरुषो मात्रादिर्व्यक्तः तद्रूपं रूप

अभूतश्चाप्यजातश्च सर्वत्र समतां गतः अव्यक्तात्परमं यत्तन्नारायणविदो विदुः ५ सर्वतः पाणिपादं तं सर्वतोक्षिशिरोमुखम् सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ६ असतश्च सतश्चैव विज्ञेयं तत्र कारणम् अव्यक्तोव्यक्तरूपस्थश्चरन्नपि न दृश्यते ७ विकारपु रुषो व्यक्तो ह्यरूपी रूपमाश्रितः चरत्यचिंत्यः सर्वेषु गूढोग्निरिव दारुषु ८ भूतभव्योद्भवो नाथः परमेष्ठी प्रजापतिः प्रभुः सर्वस्य लोक- स्य नाम चास्येति तत्त्वतः ९ अपदात्तु पदो जातस्तस्मान्नारायणोभवत् अव्यक्तो व्यक्तिमापन्नो ब्रह्मयोगेन कामतः १०

वं तं दृश्यं अरूपी चिदात्मा आश्रितः सन् चरति दृश्यं प्रकाशयति शेषं स्पष्टं दारुष्वग्निरिव मात्रादिषु पृथग्दृष्टो प्यात्माध्याननिर्मथनात्त्वाश्रयग्रासादाविर्भ वतीति भावः ८ प्रासंगिकं आत्मतत्त्वनिरूपं समाप्य अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यत इति न्यायेन तत्प्रतिपत्त्युपायभूतं तस्मात्त्वं भूतात्मयोनि ज इति प्रक्रांतमध्यारोपमनुसरति भूतेति नाम चास्यास्तीति शेषः सोहमित्यग्रे व्याहरत्ततोऽहंनामाऽभवदिति श्रुतिप्रसिद्धं वक्ष्यमाणं इति तत्त्वतः ईदृग्रूपस्य षष्ठ्यर्थे तसिः ९ ईदृग्रूपत्वमेव विशदयति अपदादिति अपद्यते प्रमाणतो गम्यत इत्यपदमज्ञानं तस्मात्पदः पद्यत इति पदोहंकारो जातः न हि शुक्तौ रजतस्ये व तत्कारणस्याज्ञानस्य ग्रहोस्ति नारायणे उद्भवो यस्य तस्मात् सुषुप्त्यनादिकालमारभ्याद्यस्तादित्यर्थः अन्यथा मुक्तानामपि पुनर्बंधापत्तिः स्यात् ननु सतः पदस्य कथमसतोऽपदाज्जनिः कथमसतः सज्जायेतेति तदसंभवश्रुतेरित्यत आह अहंकारोप्यपद एव सन् ब्रह्मयोगेन अधिष्ठानसत्तानुवेधेन व्यक्तिं पदत्वं प्राप्तः अत्र हेतुः कामतः अनादिरागादिवासनावशात् क्रमः तत्संस्कारधारानुवृत्तिरिति भावः १० छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२ ३ ४ ५ ६ ७ ८ ९ १० ११ ब्रह्मणोन्हइति अहःशब्दः क्रतुवाचीब्रह्मसंबंधीक्रतुर्ज्ञानयज्ञइतियावत् सम्यक्क्षिप्यतेक्षेप्यं
येनतंसंक्षेपंसुसंग्रहंचविस्तारं १२ इतिश्रीमहाभा॰हरिवंशेभविष्यपर्वणिटीकायांपंचदशोध्यायः १५ ७ सांख्ययोगात्मकोब्रह्मयज्ञोथदशमेसु
निः सांख्यंब्रह्मविचाराख्यंप्रस्तौतिक्षिप्रसिद्धिदम् १ शृणुष्वेति १ ब्रह्मसंबंधसंबद्धंवेदमूलकत्वेनसंबद्धंतादृशंप्रपिकर्मव्यावृत्यमित्याह बद्धमितिब्रह्मैकवि
षयइत्यर्थः यत्ब्रह्मणोब्रह्मविदःपुरस्तादेवसंपन्नंप्राक्सिद्धंप्रत्यग्रूपत्वात् अदक्षिणंनकर्मप्राप्यंनतत्रदक्षिणायंतीतिश्रुतेः तत्शृणुइत्यनुषज्यते २ तदेवाह

छंदोभिर्वृत्तसंजातैःसमासैश्चसविस्तरैः लघुभिर्मधुराभाषैर्ग्रथितंपदविग्रहैः २ त्रिवर्गेणाभिसंपन्नंधर्मेणार्थेनभोगिनाम् कामेनबहुरूपे-
णशारीरांतर्गतेनच ३ ब्राह्मणानांप्रभावैश्चयोधानांचपराक्रमैः वैरनिर्यातनैश्चैवप्रतिज्ञानांचपारगैः ४ रिपुस्तवसुसंपन्नैर्नानुबंधःप्रचोदि
तः वंशयोर्निर्विनाशायनृपेणाद्विजविग्रहात् ५ येचतस्मिन्महारौद्रेसंग्रामेनिहतानृपाः तेषांसर्वापिराष्ट्राणिपुत्राःसर्वेप्रपेदिरे कौरवःप्रथि
तोराजाभगवच्छासनानुगः ६ धर्मश्चबहुधाप्रोक्तःक्षत्रियाणांवर्णसंपदा शूराणामपिविख्यातःस्वर्गहेतुर्द्विजर्षभ ७ अनुग्रहार्थंभूतानांनोत्से
कायकथंचन चतुर्णांवर्णसंज्ञानांपृथक्पृथगनेकधा ८ गर्भवासंपतंतश्चभूतानांसप्रबोधितः पृच्छतांदेवसंचारोक्षीणेपुण्येचकर्मणि
९ दानेयश्चापिसंयोगःसचापिबहुधाकृतः द्वाभ्यांसंयोगविहितामधुवाग्वचनंतयोः १० नैतच्छक्यंमयाख्यातुंभारताध्ययनंमहत् एकाहे
नमहान्ब्रह्मन्नपिदिव्येनचक्षुषा ११ ब्रह्मणोन्हस्तुविस्तारसंक्षेपंचसुसंग्रहम् श्रोतुमिच्छामिभगवन्महत्कौतूहलंहिमे १२ इति
श्रीमहाभारतेहरिवंशेभविष्यपर्वणिनामपंचदशोऽध्यायः १५ वैशंपायनउवाच शृणुष्वैकमनाराजन्पंचेंद्रियसमाहितः क
थांकथ्यतोराजन्निर्विकारेणचेतसा १ ब्रह्मसंबंधसंबद्धमबद्धंकर्मभिर्नृप पुरस्ताद्ब्रह्मसंपन्नंब्रह्मणोयददक्षिणम् २ अव्यक्तंकारणंय
त्तन्नित्यंसदसदात्मकम् निष्कलःपुरुषस्तस्मात्संबभूवात्मयोनिजः ३ दिव्योदिव्येनवपुषासर्वभूतपतिर्विभुः अचिंत्यश्चाव्ययश्चैवयुगानां-
प्रभवोव्ययः ४

अव्यक्तंयत्नामतोऽर्थश्चकारणंजगद्धेतुःसदसदात्मकंमूर्त्तामूर्त्तरूपंनित्यंअ
विनाशिसांख्यप्रसिद्धंतत् निष्कलःपुरुषःनिर्विशेषचिन्मात्रात्मनोनातिरिच्यतेतत्रैषाध्यस्तमित्यर्थःतस्मात्पुरुषात् आत्मयोनिजः आत्मैवयोनिर्ज्ञापकोय
स्यनाहंजानामीत्यनुभूतिसिद्धंअज्ञानंतस्माज्जातोहंकारः अहमिति प्रथमोध्यासःसंबभूव ३ दिव्यःशुद्धसत्वमयत्वात् सर्वेषांभूतानांवियदादीनांप
तिःजन्मनाशयोःस्वतंत्रःविभुर्व्यापकः अचिंत्यःसत्वेनाऽसत्वेनवाऽलोचयितुमशक्यः अतएवअव्ययःरज्जूरगवदनुत्पन्नत्वान्नव्येतीति युगानांतत्तत्युगधर्मा-
णांशमकामदंभाचाराणांप्रभवअहंकारादेवैतेउत्पन्नाइत्यर्थः अव्ययोनित्योमूढानाम् ४ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ऊर्ध्वइति गंभीरेतोयविवरेमूर्तेःकाठिन्यात् विक्षोभितमंतरंयथास्यात्तथासंसीदामीतिसंबंधः लोष्टपिंडवद्विशीर्णाभिवामीत्यर्थः २१ ततोमूर्त्तिर्धरामूर्तिमती पृथ्वी विषयेषिणीस्थानैषिणीसर्वत्रसंभूताजातायथायोगेनयथोक्तेनयोगेन विशीर्यमाणत्वेनहेतुनास्थैर्यार्थिनीसतीसर्वदिगभिमुखंमामुद्धरस्वेत्याक्रोशंकृतवतीत्यर्थः २२ श्रुत्वाचेति हरिरितिशेषः २३ उद्धृत्येति हरिरवतारकार्यंकृत्वातिरोभूतइत्यर्थः २४ येनभूरुद्धृतातस्यरूपमाह यत्तदिति २५ धात्रातेनैवईश्वरेणाद्यापिपृथिवीधार्यतेशेषकूर्मादिरूपेणेत्याह अद्यापीति मनसामनोमयेन २६ एवंधृतापिधराशुष्कतटाकतलवद्विदीर्णाभूदित्याह भित्वेति समुद्भवंभूमिजनकंतोयंइदमेवविवरंमेरुमूलप्रवेशस्थानमितिवक्ष्यति २७ एवमतितापात्सूर्यमंडलाज्जलमयंसोममंडलमभूदित्याह तस्येतिसःसोममंडलाभिमानीसनातनःपरमात्माब्रह्माब्राह्मणवर्णःब्रह्मब्राह्मणआत्मनेतिश्रुतेः आद्यत्वाच्चब्राह्मणानांराजासोमोस्माकंब्राह्मणानां९राजेतिश्रुतेःसोमत्वंउमाब्रह्मविद्यातयासहितःसोमःतस्यभावःसौम्यंसउत्पन्नमात्रोब्रह्मवित्त्वंअन्वगादित्यर्थः २८ सोमेतिसोमस्योक्तरूपस्यमंडलपर्यंतान्मु

ऊर्ध्वोहंस्थातुमिच्छामिसंसीदाम्युद्धरस्वमाम् गंभीरेतोयविवरेमूर्तिविक्षोभितांतरम् २१ ततोमूर्त्तिर्धरादेवीसर्वभूतप्ररोहिणी यथायोगेनसंभूतासर्वत्रविषयेषिणी २२ श्रुत्वाचगदितंतस्यागिरंतांचसुभाषिताम् वराहरूपमास्थायनिपपातमहार्णवे २३ उद्धृत्यसोवनिंतोयात्कृत्वाकर्मसुदुष्करम् समाधौप्रलयंगत्वाप्रलीनोनचदृश्यते २४ यत्तत्ब्रह्ममयज्योतिराकाशमितिसंज्ञितम् तच्चब्रह्मासमुद्भूतः सर्वभूतपितामहः २५ अद्यापिमनसाधात्राधार्यतेसर्वयोगिना ज्ञानयोगेनसूक्ष्मेणप्रजानांहितकाम्यया २६ भित्वातुपृथिवींमध्यमुपयातिसमुद्भवम् तपनस्तूर्ध्वमातिष्ठन्रश्मिभिःसहसन्निव २७ तस्यमंडलमध्यात्तुनिःसृतंसोममंडलम् ससनातनजोब्रह्मासौम्यंसोमत्व मन्वगात् २८ सोममंडलपर्यंतात्पवनःसमजायत तदक्षरमयंज्योतिस्तेजोभिरभिवर्द्धयन् २९ सतुयोगमयज्ञानात्स्वभावाद्ब्रह्मसंभवात् सृजतेपुरुषंदिव्यंब्रह्मयोनिंसनातनम् ३० द्रवंयत्सलिलंतस्यघनंयत्पृथिवीभवत् छिद्रंयच्चतदाकाशंज्योतिर्यच्चक्षुरेवतत् ३१

खप्रदेशात्पवनोनिश्वासःसमजायततत्सनिश्वासःअक्षरमयंवर्णात्मकंवेदरूपंज्योतिःसर्वार्थप्रकाशकंजातमितिशेषःनिःश्वसितमेतद्यदृग्वेदइत्यादिश्रुतेः २९ सतुसूर्यमंडलांतानामाधिदैविकानामर्थानांस्रष्टासोमाख्यादीश्वराद्धेदंप्राप्ययोगमयात्ज्ञानात्जन्मांतरीययोगप्रभावोद्भुतप्रकाशात् वेदंतेजोभिःस्वबुद्धिबलेवर्द्धयन्नुपबृंहयन्वेदार्थालोचनपूर्वकंस्वभावात्पूर्ववासनारूपात्ब्रह्मसंभवात्ब्रह्मसत्तयोद्बोधितात्दिव्यंद्योतमानंअतएवब्रह्मयोनिंवेदस्यास्पदभूतंसनातनंपूर्वकल्पकृतसंस्थानंपुरुषंशिरःपाण्यादिमंतंआध्यात्मिकंसृजतेइतिश्लोकद्वयसंबंधः ३० अस्यशरीरस्यपंचभूतमयत्वंअथयल्लोहितंश्लेष्मारेतस्ताआपइत्यादिश्रुत्युदितंदर्शयतिद्वाभ्यांभवत्अडभावआर्षःअभवदित्यर्थः ३१ ५ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ब्रह्मेति तंपदाख्यमहंनामपुरुषंब्रह्मभावोस्थितंविद्धि ज्ञानमप्रतिपद्यंयत्वैराग्यंचजगत्पतेः ऐश्वर्यंचैवधर्मश्चसहसिद्धंचतुष्टयमितिस्मृतेः ब्रह्मेदं जानीहि अतएवसः ब्रह्मेतिशब्दंलब्धवान्प्रभुत्वादीमांश्च ११ अहंत्विति सहोवाचात्मनोनामेतिशेषःहेतुःउदाहृतःश्रुतिप्रसिद्धेः सोहंनामाभवदि त्यर्थः सहोवाचप्रजाःस्रक्ष्यामीतिपूर्वानुषंगेणपूरणीयम् सर्वेनैवरेमेतस्मादेकाकीनरमेइत्यादिश्रुतेरात्मज्ञोपिसोऽधिकारपरतंत्रतयासृष्ट्यादिपरोबभू वेत्यर्थः १२ एतदेवाहस्वभावादिति स्वस्मिन्नहमर्थेभवतीतिस्वभावःपूर्ववासना अहमितिवासनापिस्वभावादेवेत्याहाहंकारइति १३ सर्वव्यापीसम ष्ट्यभिमानित्वात् निरालंबःअसंगत्वज्ञानात् अतएवाग्राह्यः अनभिभाव्यो ज्ञानेनजयोजयवान् ध्रुवःध्रुवज्योतिरिवालिप्तः १४ सब्रह्मशब्दितःस्वरू- पेणाव्यक्तोपिपंचभिर्भूतैःसूक्ष्मैःक्रतुलक्षणैःसंकल्पमात्रभावैःउपाधिभिर्व्यक्तिंपुरुषाकृतिंआपन्नःब्रह्मणोवेदात्व्यक्तंसर्वंभौतिकंविविधंचिंतितंसं

ब्रह्मभावेचतंविद्धिसशब्दंलब्धवान्प्रभुः प्रभुःसर्वस्यलोकस्यस्थावरस्येतरस्यच ११ अहंत्वितिसहोवाचप्रजाःस्रक्ष्यामिभारत प्रभवः सर्वभूतानायस्यततुरिमाःप्रजाः १२ स्वभावाज्जायतेसर्वस्वभावाच्चतथाभवत् अहंकारस्वभावाच्चतथासर्वमिदंजगत् १३ सर्वव्यापीनि रालंबोह्यग्राह्योयजयोध्रुवः एवंब्रह्ममयोज्योतिर्ब्रह्मशब्देनशब्दितः १४ अव्यक्तोव्यक्तिमापन्नःपंचभिःक्रतुलक्षणैः धारयन्ब्रह्मणोव्य क्तंविविधंचिंतितंस्वरन् १५ अथमूर्तिंसमाधायस्वभावाद्ब्रह्मचोदितः ससर्जसलिलंब्रह्मायेनसर्वमिदंततम् १६ वायुपूर्वमथोद्दृष्टा योधातुर्धातृसत्तमः धारणाद्धातृशब्दंचलभतेलोकसंज्ञितम् १७ तदेतद्वायुसंभूतंकृत्स्नंजगदभूत्पुरा एतद्देवैरतिक्रांतंपूर्वमेवसरस्व ति १८ पृथक्त्वंगमितंतोयंपृथिवीशब्दमिच्छता घनत्वाच्चद्रवत्वाच्चनिखिलेनोपलभ्यते १९ फलत्वात्सीदमानानसलिलेसलिलो- द्भवः व्याजहारशुभांवाणींसमंतात्पूरयन्निव २०

कल्पमात्रोत्थंस्वरन्धारयन् पोषयितुंसमनसावाचंमिथुनंसमभवदितिश्रुतेर्वेदोक्तप्रकारेणसर्वस्रष्टुमूर्तिमादायसलिलंस्थूलंजलंससर्जेतिसंबंधः १५ अथेति येनसर्वमिदंततंतेनब्रह्मणास्वभावेनचचोदितः १६ वायुमिति पूर्वंसलिलसृष्टेःप्राक् धातुरीश्वरस्यवशगानांधातॄणांमरीच्यादीनांमध्येसत्तमः लोकसंज्ञितंलोकैःसंकेतितंप्रसिद्धमित्यर्थः १७ तदेतदिति वायोःस्थूलादग्न्यादिक्रमेणसंभूतम् एतज्जगत्पार्थिवमाप्यंचतेजसैर्देवैःशमादिमद्भिरि तिक्रांतं उत्तरोत्तरमुत्कृष्टमेवपदंतेधिरोहंतिनमनुष्यत्वंयांतीत्यर्थः सरस्वतिसमुद्रेस्थितामितिशेषः १८ पृथिवीशब्दंपृथिवीशब्दार्थंभुवर्लोकावस्था नार्थमिच्छतातोयंसासमुद्रंपृथक्त्वंघनत्वाच्चधर्मभेदात् गमितंप्रापितं तदेतन्निखिलेलोकेनोपलभ्यतेभूजलयोःपृथक्त्वम् १९ फलत्वात्कार्यत्वा- त्सलिलेस्वकारणेसीदमानाविशीर्यमाणासलिलोद्भवोजलोद्भूतभूदेवताख्यःपुरुषःव्याजहार वचनव्यत्ययआर्षः २० ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

आत्मनइतिगतयोऽमुक्त्युपायास्तान्जानीते तथाविषयगोचरे अतीतानागतादिविषयंपुरस्तात्कर्मनिर्वृत्तेर्त्तंभावीनिकर्मफलानि पदेपरस्यांकाष्ठायांब्रह्म
ब्रह्मवित् ४१ चित्तग्रंथीन्चित्तंबध्नतःकामादीन् यातनाःसुखदुःखसाक्षात्काराःतत्स्मरणानि प्रलोभेन प्रबलेनलोभेनभिद्यमानाःअनेकशाखाःवास-
नावलीर्निरुंध्यात् वायुभिन्नमर्णवमिवयाःपुरुषंक्षोभयन्तीत्यर्थः ४२ पच्यतइति एवंवासनादिरोधंकुर्वतःपरेभ्यःकामादिभ्यः नीलंमलिनंहृदय-
बुद्धिःपच्यतेविशुद्धाभवति इंगालइवाग्निनासितभस्मशेषः केचनपच्यते ज्ञानचक्षुषा चष्टेनेनेतिचक्षुस्तेजः ज्ञानाग्निनेत्यर्थः किंतज्ज्ञानमतआह
ब्रह्मप्रोक्तंवेदप्रोक्तंयेनज्ञानेनइहजीवत्येवदेहे आत्माजीवःतद्यथाहिनिल्वयिनि वल्मीकेमृतापत्यस्ताशयीतेवमेवायमशरीरःसचक्षुरचक्षुरिवसमाना
अमानाइवेत्यादिश्रुतिभ्यःसर्वबंधनिर्मुक्तोभवतीत्यर्थः ४३ किंच सृजेदिति परंहार्द्राकाशस्थ परिपक्वयोगीतुतेजोमूर्त्तिःसूक्ष्मभूतमयशरीरःस्वप्ना-
भिमानीवइहलोकंव्यावहारिकमपिलोकमविद्धमच्छिद्रंसाकल्येनविश्वामित्रादिवत्सम्यक्सृजेत् भूतानामुत्पन्नत्वाद्भौतिकसर्गविषयमेवयोगिनःसाम

आत्मनोगतयश्चैवतथाविषयगोचरम् पुरस्तात्कर्मनिर्वृत्तेःपदेब्रह्माप्रतिष्ठितम् ४१ चित्तग्रंथींश्चमनसारुंध्यात्पूर्वाश्चयातनाः भिद्य-
मानाःप्रलोभेनवायुभिन्नमिवार्णवम् ४२ पच्यतेहृदयंनीलंपरेभ्योज्ञानचक्षुषा ब्रह्मप्रोक्तमिवात्माबैविमुक्तोदेहबंधनात् ४३ सृजेद
पिपरंलोकंसंहरेदपिविद्यया तेजोमूर्त्तिरिवाविद्धमिहलोकंचसंसृजेत् ४४ तिर्यग्योनोगताश्चैवकर्मभिर्नियमोपमैः तान्यपिप्रतिमु-
च्येतब्रह्मयुक्तेनचेतसा ४५ अक्षरंचक्षरंचैवयोगकर्माभिविद्यते नक्षरंविद्यतेतत्रयद्ब्रह्मकर्मभिर्ध्रुवम् ४६ इतिश्रीमहाभार
तेखिलेषुहरिवंशेभविष्यपर्वणिनामषोडशोऽध्यायः १६ वैशंपायनउवाच पृथिव्यायत्नतच्छिद्रंतपनेनविवर्द्धता तस्मिन्यस्तो
यमेनाकःस्वभावविहतोचलः १

र्थ्यमितिज्ञेयंशास्त्रांतन्यायेजगद्व्यापारवर्जमित्युक्तेः ४४ तिर्यगिति नियमोपमैःनियम्यतेनिगृह्यतेऽनेनेतिव्यु
त्पत्तेर्नियमोनिगडःतत्तुल्यैःतानिकर्माणिअपिशब्दात्तिर्यग्योनिगतान्जीवान्प्रतिमुच्येतप्रतिमोचयेत्संकल्पसिद्धत्वात्ब्रह्मयुक्तेनब्रह्मणियोजितेन ४५
अक्षरमिति योगकर्मयोगाख्यंकर्मअक्षरंमोक्षंक्षरंभोगंच अभिव्याप्यविद्यते योगएवकृत्स्नंकर्मफलमप्यंतर्भूतमित्यर्थः एवंसर्वंतदाप्तिसमेतियाल्किंचप्र
जाःसाधुकुर्वंतीतिश्रुतेः नन्वेवंमोक्षेपिक्षरंस्यान्नयःस्यात्तेनमुक्तेनिर्विशेषत्वंभज्येतेत्याशंक्याह नेतियत्तुध्रुवंब्रह्मतत्रकर्मभिरुपलक्षितंक्षरंनविद्यतेइति
योजना प्रारब्धकर्मणावष्टब्धेदेहेसत्येवयोगिनिक्षरंस्यान्नयोनविदेहकैवल्यावस्थायामितिभावः ४६ इतिश्रीहरिवंशेभविष्यपर्वणिटीकायां
षोडशोऽध्यायः १६ ७ ७ एकादशेकर्मफलपरिच्छेदाययोगभूः वर्णितायाक्षरप्राप्त्यैयोगश्चोक्तोयथाविधि १ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पुरुषात् ईश्वरात् आप्तः पुरुषो भावः चैतन्यं कर्तृ एनं देहं वायुना करणेन स्यंदयते चालयते संघातात् एवं पंचानां भूतानां संघातं प्राप्य तत्र ज्योतिसंभवः ज्योतिषां इंद्रियाणां जाठरस्य च संभव उद्भवो भवति अग्निर्वाक् भूत्वा मुखं प्राविशदित्यादिश्रुतेः अतएव महान् कृत्स्नस्य ब्रह्मांडस्यात्र प्रवेशात् योगिहृदयदर्पणे तदभिव्यज्यत इत्यर्थः ज्योतिसंभव इति सलोप आर्षः ३२ भूतात्मा जीवः समेषां च भूतिकत्वात् न तिर्यगादितारतम्यरहिते तस्मिंस्तस्मिन्सर्वस्मिन्नस्ति स-नातनो ऽनादिकालमारभ्येत्यर्थः गुहायां बुद्धौ निहितं ज्ञानं सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायामिति श्रुतिप्रसिद्धम् किं तत् ज्ञानमित्यत आह यत्ज्ञः यस्य ज्ञो ज्ञाता यज्ञः सनातन ईश्वरः यस्य ज्ञानस्य ज्ञाता ईश्वरो भवतीत्यर्थः एतेन परमो व्योमन्सो ऽश्नुते सर्वकामान्सहेति श्रुत्यर्थो दर्शितः ३३ यः सनातनः स एव जीव इत्याह तपनस्येति तपनस्य प्रकाशकस्य अग्निरिवाग्निर्भोक्ता देहिनां देहाभिमानिनां मूढानां दृष्ट्या यो भोक्ता स एव तत्त्वदृष्ट्या ईश्वर इत्यर्थः

वायुना स्यंदते चैवं संघातात् ज्योतिसंभवः पुरुषात् पुरुषो भावः पंचभूतमयो महान् ३२ भूतात्मा वै समेतास्मिंस्तस्मिन्देहः सनातनः गुहायां निहितज्ञानयोगाद्यज्ञः सनातनः ३३ तपनस्यैव तद्रूपं योग्निर्वसति देहिनाम् शरीरे नित्यशो युक्ते धातुभिः सह संगतः ३४ स्वभावात्क्षयमायाति स्वभावाद्व्ययमेति च स्वभावाद्धि द्रुते शांतिं स्वभावाच्च न विंदति ३५ इंद्रियैर्व्यतिमूढात्मा मोहितो ब्रह्मणः पदे संभवन्निधनं चैव कर्मभिः प्रतिपद्यते ३६ यावत्तद्ब्रह्मविषयं नोपयातीह तत्त्वतः तावत्संसारमाप्नोति संभवांश्च पुनः पुनः ३७ इंद्रियैर्व्यतिरिक्तो वै यदा भवति योगवित् तदा ब्रह्मत्वमापन्नः प्रलयाग्रे प्रतिष्ठति ३८ प्रतिषिद्धममुं लोकं ब्रह्मवान्संभवत्युत न च रागव्ययैर्याति न च सज्जति कर्हिचित् ३९ आगतिं च गतिं चैव निधनं संभवं तथा भूतेभ्यो वेत्ति सर्वज्ञः परां सिद्धिमुपागतः ४०

तस्यानैश्वर्यसंतता देहाध्यासादित्याह शरीर इति धातुभिः पंचभूतैः देहयोगाद्वासो ऽपीति न्यायेन देहाभिमानात्परस्यापि ज्ञानैश्वर्यतिरोभाव इत्यर्थः ३४ यो ऽयं धातुभिः सह संगतः स्वभावात् पूर्वसंस्कारात् क्षयं ऐश्वर्यभ्रंशं अनैश्वर्यं चाप्नोति शांति सद्भावाभावाभ्यामित्याह स्वभावादिति ३५ इंद्रियकिंकरस्य-कर्मबंधो ऽस्ति ३६ यावत् ज्ञानेन ब्रह्माख्यं आनंदरूपं विषयं नाप्नोति तेन च संभवाख्यां जन्ममालां प्राप्नोतीत्याह द्वाभ्याम् ३७ एवमशांतस्य दुःखमुक्त्वा शांतस्यानंदावाप्तिमाह इंद्रियैरिति योगबलेन इंद्रियैर्व्यतिरिक्तः प्रलयाग्रे इंद्रियादिषु स्वरूपानंदे प्रतिष्ठां प्राप्नोतीत्यर्थः ३८ प्रतीति अमुं सविकल्पानंदाख्यं लोकं प्रतिषिद्धं कृत्वा ब्रह्मवान् निर्विकल्पपदभाक् योगफलं रागादिजयं सर्वज्ञत्वं चाह सार्द्धाभ्यां रागव्ययैरिति रागव्ययै रागादिकृतैरपि च ३९

आगतिं गर्भे प्रवेशं गतिं गर्भान्निर्गमनं निधनं मरणम् भूतेभ्यो हृष्टेभ्यो वेत्ति न तु स्वयमागत्यादीन् प्राप्नोतीत्यर्थः ४० ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रैः पूर्वोक्तपरिणामैश्चतुर्भिर्गुणितैश्चतुष्कोणो मेरुर्भवतीति बौद्धपक्षमुपक्षिप्यमानसत्वात् परिमाणनियमो नास्तीत्याह सार्द्धेन नगस्येति गुणितं परिमाणमिति शेषः ब्रह्मविद्भिर्मायाया अनंतत्वादानंत्येन निश्चितमित्यर्थः १० ११ मरुद्भिरित्यादि चत्रिभिः कालापकं भगवान् विष्णुना सह तेन ब्राह्मेण वपुषा वसुधाधिपान् पृथिवीं च ररक्षेति संबंधः शुद्धचिदात्मा मायोपाधिना रूपेण प्रकृतेन मेर्वधिपतेर्ब्रह्मणश्च रूपेण शरीराभिमानिनो जीवान् शरीरं च रक्षितवान् भोगमोक्षप्रदकर्मज्ञानोपदेशेनेत्यर्थः किंभूतां पृथिवीं मरुदादिभिस्तत्रावयवदेवतादिभिः विवस्वद्वरुणाभ्यां तद्देवत्यतेजोजलाभ्यां च संघातं गमिता लिंगात्मविशिष्टां तेजोबन्नात्मिकामित्यर्थः किंभूतेन ब्राह्मेण वपुषा ब्रह्मनिर्विशेषरूपं प्राप्तेन प्राप्तवता १२ १३ १४ किंतद्ब्रह्मेत्यत आह यत्तदिति न केवलं वेदपारगैरपि बहुभिर्नियमैः कर्तृभिः प्राप्तैरनुगतैः हठाकृष्टन येषां नियमाः अपि तु दासभूतास्तादृशैर्ब्राह्मणैरित्यर्थः १५ एवमिति एवं अन्योन्याश्रयेण एतेत्र-

चतुर्भिः पार्श्वविस्तारैः शिलाभिरभिसंवृतैः नगस्य यस्य राजेंद्र विस्तारैः शतयोजनैः १० कोटिकोटीशतस्तुत्रैर्गुणितं ब्रह्मवादिभिः योगयुक्तैः सदा सिद्धैर्नित्यं ब्रपरायणैः ११ मरुद्भिः सह देवेंद्रै रुद्रैर्वसुभिरेव च आदित्यैर्विश्वसहितै ररक्ष वसुधाधिपान् १२ ररक्ष पृथिवीं चैव भगवान्विष्णुना सह विवस्वद्वरुणाभ्यां च संघातं गमितां नृप १३ तेन ब्राह्मेण वपुषा ब्रह्मप्राप्तेन भारत यत्तद्विष्णुमयं तेजः सर्वत्र समतां गतम् १४ यत्तद्ब्रह्मेति वै प्रोक्तं ब्राह्मणैर्वेदपारगैः नियमैर्बहुभिः प्राप्तैः सत्यव्रतपरायणैः १५ एवमेतेत्रयो लोका ब्राह्मे हनि समाहिताः अहनि ब्रह्म चाव्यक्तं व्यक्तं प्राणे प्रतिष्ठितम् १६ ब्रह्मणो नियतं कर्म प्रभावेन प्रचोदितम् प्रवर्त्तमानं भावेन शश्वदच्छलवादिनाम् १७ एतद्धितमिति प्रोक्तं ब्राह्मणैर्वेदपारगैः यदेकं ब्रह्मणः पादं दिष्टत्वं गमितं पदम् १८

योत्रयं तद्इति लोकाः पृथिवीमरुदादिविष्णुशब्दिताः विराट्सूत्रांतर्यामिणः ब्राह्मे हनि ब्रह्मप्रापके योगयज्ञे समाहिताः तत्रस्थत्वात्तत्रैवानुभूयंत इत्यर्थः तत्रैवाहनि अव्यक्तं ब्रह्म च यत्प्रतिष्ठितं अनुभूयते योगिभिः तत्प्राणे प्राणाख्ये उपाधावप्यहमिति जीवरूपेण व्यक्तं सत् प्रतिष्ठितं शुद्धं ब्रह्मैव संसरतीत्यर्थः १६ अस्य मुक्त्युपायमुपदिशन् रक्षणमेवाध्यायशेषेणाह ब्रह्मण इति ब्रह्मण ईश्वरस्य प्रभावेन निःश्वसितमात्रेण वेदेन प्रचोदितं यत् नियतं नित्यं कर्म अकरणात्प्रत्यवायजनकं एतद्धितमित्युत्तरेण संबंधः शश्वत् निरंतरं अच्छलवादिनां भावेन शुद्धचेतसा प्रवर्त्तमानं क्रियमाणं कर्म येषां वाचापि च्छलं कदाचिदपि नास्ति किमुत कर्मणा तैः कृतं वेदोक्तं कर्म हितमित्यर्थः १७ आसक्तिं निषेद्धुं कर्मफलस्येयत्तामाह यदेकमिति यत्सदा दिष्टत्वं गमितं कर्मजसुकृतफलत्वं प्रापितं तत् ब्राह्मणः पादलेशमात्रमाहुः श्रुतयः पादोस्य विश्वा भूतानीत्याद्या इत्यर्थः १८ ५ ५ ५ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सोमोन्यानिप्रसक्तानु प्रसक्तःसंक्षेपण अंतरालंयोगंअभिधाय प्रकृतमध्यारोपमनुसरन् भित्वा पृथिवीमध्यमित्यादिपूर्वमुक्तंभूमेः सच्छिद्रत्वमनूद्यतत्राछिद्रेमेरुमूलंनिहितमित्याह पृथिव्यामिति मीनंहिंसितंअकंदुःखंयेस्तेमीनाःकाःनित्यसुखिनोदेवास्तेषामयमेनाकः माजूहिंसायां अस्मात्फेनमीनाविति निष्ठातस्यनत्वंनिपात्यतेस्वभावेनसंस्कारेणपूर्वोक्तसलिलादिविद्विहितः अतएवाचलःचित्तवतास्वभावस्य परिवर्तयितुमशक्यात् १ एवंनिर्दुःखत्वंतस्योक्तासुखप्रदत्वमप्याह पर्वभिरिति पर्वाणिपूरयंतिकामानितिचिंतामणिकामधेनुकल्पद्रुमादीनिविद्यंतेस्मिन्निति पर्वतःसंज्ञितसंकेतितंयोगरूढंपंकजादिपदवदित्यर्थः अचलात् अचलत्वंएवंविधोपिस्वभावात् कल्पनामात्रत्वात् मेरुरेवमितएवननत्रात्यंतिकीदुःखनिवृत्तिःसुखप्राप्तिर्वास्तीत्यर्थः उक्तहेतोरेवप्रक्षेप्रव्यएवेतिचार्थः माङ्मानेमिजू प्रक्षेपेस्माद्वासायारुरिञ्चेतिवामियिष्यांरुरितिवानिष्पन्नस्यमेरुशब्दस्योक्तार्थत्वात् २ तस्येतिव्यक्तःशिरःपाण्यादिमान् ज्योतिसंभवेत्युक्तार्थ तेनैवव्यक्तमेववस्तुत्वस्तापरमात्मनासता ३ इदमेवाह यत्तदिति शिरसोंतरेसहस्रारेवेदांतगर्भेवापुरुषसूक्तप्रतिपाद्योविग्रहःसंस्थानंयस्यतत्पुरुषविग्रहम्

पर्वभिःपर्वतत्वंचलभतेनामसंज्ञितम् अचलादचलत्वंचस्वभावान्मेरुरेवसः २ तस्यपृष्ठेस्तुविस्तीर्णेनिगस्यसुमहर्द्धिमान् तस्मिंस्तुपुरुषोव्यक्तोवसतिज्योतिरुद्भवः विहितश्चस्वभावेनतेनैवपरमात्मना ३ यत्तद्ब्रह्ममयंतेजोनिहतंशिरसोंतरे तस्यज्योतिर्मयंरूपंदीप्तंपुरुषविग्रहम् ४ वदनादभिनिष्क्रांतंज्वलंतमिवतेजसा चतुर्भिर्वदनैर्युक्तंचतुर्भिश्चभुजोत्तमैः ५ वक्त्रेब्रह्मसमुद्भूतंब्राह्मणाब्राह्मणपुंगवः तद्देवतन्महाभूतंपुनर्भावित्वमागतम् ६ उद्धृतापृथिवीदेवीपुरस्तात्सलिलाशयात् ब्रह्मत्वंब्रह्मणःस्थानादलोकोलोकतांगतः ७ पदसंधौब्रह्मलोकश्शृंगंमेरोस्तदाभवत् उच्छ्रितंयोजनशतंसहस्रशतमेवच ८ एवमेवचविस्तारंचतुर्भिर्गुणितंगुणैः अथवानैवसंख्यातुंशक्यंभूतेनकेनचित् ९

४ वदनादिति तस्यवदनात्निष्क्रांतंचतुर्वदनंविद्धीतिशेषः द्विजोत्तमैःसहनिष्क्रांतं द्विजानांउत्तमाःमुखादिंद्रश्चाग्निश्च॰ ब्राह्मणोस्यमुखमासीत् आसन्यंप्राणमूचुरितिईश्वरमुखजत्वेनश्रुतिप्रसिद्धास्तैःसहेत्यर्थः ५ तश्चब्राह्मणास्तोतिवक्त्रमिति तस्येत्यनुवर्त्ततेतस्यवक्त्रंब्रह्मवेदःसमुद्भूतोनिश्वसितरूपेणयस्मात्तथाब्रह्मातस्यवेदस्यधारकोब्राह्मणः सब्राह्मणानांब्रह्मोद्भवानामग्न्यादीनांमध्येमुख्यःब्रह्मब्राह्मणआत्मनेतिश्रुतेरर्थमाह तद्देवेति भावत्वंपूज्यतमत्वंब्राह्मणत्वमितियावत् भावःपूज्यतमोलोकेइत्यनेनेकार्थमंजरी ६ तद्देवेत्युक्तंकिंतन्महद्भूतमित्यतआह उद्धृतेति येनेतिशेषः ब्राह्मणस्थानंमेरुपृष्ठंप्राप्यतद्देवंब्रह्मत्वंचतुर्मुखत्वंगतंएवमेवलोकोपिधरोद्धर्त्तलोकतांव्यक्ततांगतः ७ पदेति पदयोःसंधौमेरोःशृंगंब्रह्मलोकं ब्रह्मपरंवस्तुलोक्यतेसाक्षात्क्रियतेयत्रस्थितेस्तद्ब्रह्मलोकंक्रममुक्तिस्थानमित्यर्थः मेरोःकल्पनामात्रशरीरत्वान्मेरुमरीचिकात्वाद्गांभीर्यस्यवनेयत्ताप्रमाणमस्तीत्याहसार्द्धेन उच्छ्रितमिति २३
८ ९ उच्छ्रायविस्तारयोरिवपरिधेरप्यनियममाह चतुर्भिरितिशिलाभिरुपष्टंभकशैलस्थानीयैर्धर्मज्ञानवैराग्यैश्वर्यैरभितःसंवृतैःपार्श्वानांविस्ता

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

बहुत्वादिति यस्यपादोविश्वंतद्ब्रह्मभूतात्मानित्यसिद्धआत्मानतुकर्मप्राप्यइतिभावः एवंविधोपिविप्राणांब्राह्मणानांभावाश्चित्तवृत्तयस्तासांबहुत्वात् स
ब्राह्मणेविश्वेइंद्रमित्रावरुणादयःशब्दाःयस्मिन्वाचकत्वेनप्रतिष्ठिताइतिसविश्वशब्दःयज्ञेषुप्रकर्षेणयुज्यतेविनियुज्यतेतैस्तैःशब्दैरित्यर्थः तथाचश्रुतिः
तद्यदिदमाहुरमुंयजेत्येतस्यैवसाविसृष्टिः एकंसद्विप्राबहुधावदंतीत्यादिकातस्मात्फलस्यतुच्छत्वान्निष्कामैरेवकर्मभिः परमात्माआराधनीयोमुमुक्षु-
भिरितिभावः १९ एवंयष्टव्यदेवतारूपंब्रह्मैवेत्युक्त्वायजमानरूपमपितदेवेत्याहद्वाभ्यां विश्वरूपंस्थूलंमनोरूपंसूक्ष्मंद्वयमपिबुद्धिमात्ररूपमितिमान
यन्जानन् एवंउक्तक्रमेणजानन् द्वंद्वंस्त्रीपुंसात्मकंसृजत् अडभावआर्षः २० यत्सृष्टंमिथुनंतदपिसख्युरेवनटस्येवरूपांतरमित्याह सहेवेतिविधा-
यवेदेनप्रकाश्यआचरतिभोगार्थंकर्माणिकरोति अनुगैःकश्यपादिभिःसहितःसानुगः २१ हविःस्वरूपमपिब्रह्मैवेत्याह सएषइतियानित्यंअकिंचन

बहुत्वाद्विप्रभावानांविश्वशब्दःप्रयुज्यते ब्राह्मणैर्ब्रह्मभूतात्मासत्यव्रतपरायणैः १९ विश्वरूपंमनोरूपंबुद्धिरूपंचमानयन् एवंद्वंद्वंसभग
वान्प्रथममिथुनंसृजत् २० सएवभगवान्विश्वोदेव्यासहसनातनः विधायविपुलान्भागान्ब्रह्माचरतिसानुगः २१ सएषभगवान्य
ह्यानित्यंब्रह्मविदांवरः निर्वाणप्रयगामीनामकिंचनपर्येषिणाम् २२ सोमात्सोमःसमुत्पन्नोधारासलिलविग्रहात् ययाभिषिक्तोभू-
तानामाधिपत्येमहेश्वरः २३ अभिषिच्यचभूतेशंकृत्वाकर्मस्वभावतः नदतिस्मतदानादंतेनसाह्युच्यतेनदी २४ सान्नग्नमलोकंसंभा
व्यअभिभूयसहस्रधा गांगतागगनाद्देवीसप्तधाप्रससारच २५ सहस्रधाचराजेंद्रबहुधाचपुनःपुनः इमंलोकममुंचैवभावयन्क्षर-
संभवम् २६

पर्येषिणाम् निर्वाणपदंगंतॄणांब्रह्मविदांवरोब्रह्मासएषः २२ सोमात्उमाब्रह्मविद्यातयासहितात्नित्यमलुप्तज्ञानशक्तेःपरमेश्वरा
त्सोमःचंद्रऔषधीशःसमुत्पन्नःकिंभूतात्सोमात् धारास्वर्गात्च्युतजलधारातद्देवविग्रहोमूर्तिर्यस्यतस्मात् ययाधारया २३ स्वभावतःनिसर्गेणैवकर्मम
हेश्वरस्यभूताधिपत्यप्रदानरूपंकृत्वानादंनदतिपुनःपुनर्गर्जतिनादमितिणमुलंतंनदित्वानदित्वेत्यर्थः अतःसानदीत्युच्यते २४ संभाव्यंमहीकृत्य अ-
भिभूयाक्षिप्यमार्गरोधकान्पर्वतानितिशेषःयतोगगनात्गांगताअतोगंगाभूदितिभावःसप्तधागोदावरीरूपेणसाहिसमुद्रसंगमेसप्तधाभूतेतिसिद्धं २५ सहस्र-
धाजान्हवीरूपेणइदमपिप्रसिद्धं बहुधाविभूतिभेदेन गंगाभगवतीनदीत्यादितत्तत्तीर्थमाहात्म्यप्रसंगेगंगायाअनेकधाभावदर्शनात् एवमोषधीशोत्पत्तिप्रसंगात्
गंगायास्तत्कारणेश्वरात्मत्वमुक्त्वाचंद्रोत्पत्तिप्रयोजनमाह इममिति इमंलोकंऔषधीनामाप्यायनेन अमुंचलोकंप्रथमांपिबतेवन्हिर्द्वितीयांपिबतेरविरित्यादिशास्त्रोक्त २४
प्रकारेणचभावयन्वर्द्धयन् क्षरसंभवंअविद्याप्रभवम् २६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ततः अस्यलोकस्यसंवर्द्धनात् उद्भूतैर्बीजैः भूतानिजरायुजादीनिरोहंतिवर्द्धंतेमहाभूतानि पृथिव्यप्तेजांसितेषांफलांसितेजोवन्नात्मकानिव्रीह्यादीनिसर्वस्यआत्मकत्वात् ततोव्रीह्यादिभ्योमनुष्यादिभ्यश्चयथायोग्यंसर्वेक्रियारंभाः प्रवर्ततेमनीषिणांकामजेतॄणाम् २७ मंत्रोपिब्रह्मैवेत्याह चतुर्भिरिति वदनैरिव वदनैर्वेदैः इत्थंभावेतृतीयातस्येश्वरस्यमुखपद्माद्वेदरूपेणविनिःसृता अक्षरंब्रह्मतन्मयीयत्प्राप्तिप्रधानासिद्धिर्वेदाख्यादिशत्वंउपदेशत्वंदिशअतिसर्जनेइगुपधलक्षणःकः २८ ऋत्विग्यजमानावपिब्रह्मैवेत्याह तस्येति ज्ञानमयंचिन्मयंपुण्यंपुण्यकारणंयज्ञंचतुष्पादंचत्वारऋत्विजोब्रह्मोद्गातृहोत्रध्वर्यवःपादाअस्यतंसनातनंअ-नादिंतस्यपतित्वेनब्रह्माब्रह्मणःकर्मरूपस्यअनुष्ठाताएतत्सर्वंपितामहःशब्दंब्रह्मैव २९ धर्मपादरूपाश्चत्वारआश्रमाअपिब्रह्मैवेत्याह पादाइतिद्वाभ्यां व्यक्तेनस्वाध्यायरूपेणनतुध्यानरूपेणव्यक्तेनएकःपादःगृहस्थेनगृहस्थाश्रमेणपावनेगृहेस्थितेनचाद्वितीयःपादः समासैकदेशस्यापिगृहस्यविशेषणंपावनेइतिआर्षत्वात् ३० गुरुभावेनतपोभारगौरवेणचवानप्रस्थाश्रमेणतृतीयःपादः वाक्येनतत्त्वमस्यादिनाकीदृशेनगुह्यगामिनाआत्मतत्त्वप्रतिपादकेन

ततोभूतानिरोहंतिमहाभूतफलानिच ततःसर्वेक्रियारंभाःप्रवर्त्ततेमनीषिणाम् २७ चतुर्भिर्वदनैस्तस्यमुखपद्माद्विनिःसृता तदाक्षरमयीसिद्धिर्दिशत्वंसमुपागता २८ तस्यज्ञानमयंपुण्यंचतुष्पादंसनातनम् पतित्वेनाभवद्देवोब्रह्माचात्रपितामहः २९ पादाधर्मस्य चत्वारोयैरिदंधार्यतेजगत् ब्रह्मचर्येणव्यक्तेनगृहस्थेनचपावने ३० गुरुभावेनवाक्येनगुह्यगामिनगामिना इत्येतेधर्मपादास्युःस्वर्गहेतोः प्रचोदिताः ३१ न्यायाद्धर्मेणगुह्येनसोमोवर्द्धतिमंडले ब्रह्मणोब्रह्मचरणात्वेदावर्ततिशाश्वताः ३२

तथानगामिनानगमचलंकूटस्थंब्रह्मसन्यासोब्रह्मणःस्थानमितिस्मृतेर्मेरुपृष्ठंवातत्प्राप्तिआगमयतिगमयतीतिनगामितेननगामिना कूटस्थवस्तुप्रापकेण-विचारध्यानाभ्यांवस्तुप्रतिप्रत्यर्थेनवाक्येनचतुर्थःपादोधर्मस्यभवतीत्यर्थः स्वर्गोभोगापवर्गाख्यंसुखं ३१ एवंयष्टव्यदेवतादिचातुराश्रम्यांतानांब्रह्मत्वंभावनार्थमुक्तं इदानींतुर्याश्रमयोग्यंयोगंप्रस्तोष्यन्तुर्याश्रमधर्ममेवस्तौतिद्वाभ्यां न्यायादितिन्यायात् वेदांतन्यायोद्भलितश्रवणमननात्मकविचाराधिगमात् गुह्यधर्मोयोगःतेनचमंडलेब्रह्मांडगोलेसोमत्वंद्वाधिष्ठेयंमनःविवर्द्धतिआध्यात्मिकपरिच्छेदाभिमानंत्यक्त्वासमष्ट्यभिमानंधत्तेइत्यर्थः एवंब्रह्मणोवेदादेवप्रमाणभूतात्ब्रह्मचरणेब्रह्मचरणंचर्यायोगस्तस्मात् शाश्वताअपिवेदाः वर्त्तीतिनिवर्त्ततेगच्छंतिबाध्यंतेइत्यर्थः अत्रपितापितेत्यादिलोका अलोकावेदाअवेदाइतिश्रुतेः वेदस्यापिबोधात्प्रागेवप्रामाण्यंसतितुबोधेबाधएवेत्यर्थः वर्त्ततिनेर्धृंटकेगत्यर्थेषुपद्यते ३२ किंचवाक्येनपूर्वोक्तोगुह्येत्यादिविशेषणेनयुक्तान्गृहस्थानपिअभिलक्ष्यपित्रादयस्तृप्यंतिधर्मेणयोगेननगस्यमेरोःएतेनयोगधर्मगृहस्थादेरप्यधिकारोस्तीतिदर्शितम् तथाचस्मृतिः न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतमेवस्तौतिरराजेति ब्रह्मयोगेनदेहादिता दात्म्याध्यासकृता ब्रह्मभाव व्यावृत्या विराजन् विराजमान नभसो हार्द्दाकाशस्य प्रभाभिश्चैतन्यंज्योतिः प्रकाशैः बहुवचनंसमाधिप्रयोग भेदाभिप्रायंनिर्विशेषचिन्मात्रमपिप्रत्याहार बलेनैवज्ञेयमित्यर्थः ३८ आक्रोशपूर्वकंदेशबंधश्चित्तस्यधारणेति प्रोक्तलक्षणांधारणामाह नोपेनि उपलभ्यातिप्राप्नोति ललाटमध्येभ्रूघ्राणसंधौतिष्ठंतंविष्णुक्रियानियमनक्रियांप्रतिसमुद्दिश्याद्विधाभूतंनियम्यानियामकरूपेणेत्यर्थः ३९ धारणायाःप्रदेशमुक्त्वाविषयमाह ज्योतिरिति भास्करसोमयोःतद्देवतयोरिडापिंगलयोर्मध्येबिंबभूतज्योतिर्धारणाविषयइत्यर्थःकिंभूतंबिंबंचक्षुषीसंबंधं चक्षुरिंद्रियंप्रतिबिंबनंयत्कृतंचक्षुषीरूपप्रकाशनसमर्थंतस्मिन्चिज्ज्योतिषिभ्रूघ्राणमध्यस्थेचित्तंधार्यमित्यर्थः बुध्येति पूर्वंअध्यात्मविषयेरताःसंतःपश्चात् बुध्यातंविषयंपश्यंतीतियोजना आत्मनिशरीरेयोधारणाविषया तत्ररताःपुनःपुण्येनतदेवचिंतयंतः एतेनात्रप्रत्ययैकताध्यानमित्युपलक्षणंध्यानमुक्तम् ४० ब्राह्मणाइतिनावबुध्यतेइतरैरितिशेषः अध्यात्मंअध्यात्मशास्त्रमपिनावबुध्यतेदूरेस्वरूपबोधइतिभावः ४१ इतरेकेतानाह हिंसायोगेरितिद्वाभ्यांयोभुवि-

रराजब्रह्मयोगेनसहस्रांशुरिवापरः विराजन्नभसोमध्येप्रभाभिरतुलंप्रभुः ३८ नोपलभ्यातिमूढानांप्रत्यक्षंब्रह्मशाश्वतम् ललाटमध्येतिष्ठंतंद्विधाभूतंक्रियांप्रति ३९ ज्योतिश्चक्षुषिसंबंधंबिंबंभास्करसोमयोः बुध्यापूर्वंतुपश्यंतिअध्यात्मविषयेरताः ४० ब्राह्मणावेदविद्वांसःसत्यव्रतपरायणाः नेतरेजातुपश्यंतिअध्यात्मंनावबुध्यते ४१ सिंहयोगैरयोगात्मासर्वप्राणचरैर्नृप भूतयोभूमिभूतेशोमोहप्राप्तेन चेतसा ४२ कर्मभिःकुत्सितेरन्यैःसर्वप्राणिवधैषिणाम् नराणांयोगमाधायस्वेषुमात्रेषुभारत ४३ समाहितमनाब्रह्मन्मोक्षप्राप्तेन हेतुना चंद्रमंडलसंस्थानात्ज्योतिश्चाद्भुतमहत्तदा ४४ प्रविश्यहृदयाक्षिप्रंगायत्र्यानयनांतरे गर्भस्यसंभवोयश्चचतुर्थापुरुषात्मकः ४५

भूतेशोभूतानांनिग्रहानुग्रहसमर्थोयोगीऐश्वर्यकृतंमोहंप्राप्तेनचेतसाअयोगात्मा नयोगेआत्माचित्तंयस्यसयोगंप्राप्यस्वरूपानंदात्च्युतमनस्कःतंभूतयःऐश्वर्याणिसर्वप्राणचरैःसर्वप्राणभक्षकैर्हिंसायोगैरभिभवंतीतिशेषः ४२ किंकृत्वामोहयंतीत्यतआह कर्मभिरितिसर्वप्राणिवधैषिणांनराणामन्यैःकुत्सितैःकर्मभिर्योगसंबंधंआधायप्रसंजयित्वा केषुनिमित्तेषुसत्सुस्वेषुस्वार्जितेषुमात्रेषुमीयंतेतेमात्राःभोग्याःविषयाःहृष्टोदृप्यतिदृप्तोधर्ममतिक्रामतीत्यापस्तंबोक्तेर्योगर्द्धिषुनसंतोषःकार्यःकिंतुविघ्नबुध्यातास्त्यक्तव्याएवेतिभावः ४३ समाहितेति यस्मादेवंयोगेविघ्नाःसंतितस्मात् ब्रह्मन्ब्रह्मणिसमाहितमनाःसम्यक्निहितमनाभवेत् मोक्षस्यप्राप्तंप्राप्तिःभावेक्तःमोक्षप्राप्त्यर्थः किंकृत्वाचंद्रमंडलंमनःचंद्रमामनोभूत्वेतिश्रुतेः तस्यसंस्थानंईशादिरूपंतत्परित्यज्येत्यर्थः ज्योतिर्द्योतिमानंजश्चैतन्यंहृदयायतनंप्रविश्य ४४ क्षिप्रंविघ्नशंकयाऐश्वर्यास्वादमकुर्वन् गायत्र्याःगायत्रीवाइदंसर्वंभूतमितिश्रुतिप्रसिद्धगायत्र्याख्यसगुणब्रह्मणोपिनयननयनवत्प्रकाशकंशुद्धंज्योतिःतस्यांतरेमध्येआसीतेतिशेषः अंतरस्वरूपमाह गर्भस्येतिअव्यक्तस्यसंभवउत्पत्तिः यइतिविधेयापेक्षंपुंस्त्वंचतुर्थआकारोकारमकारार्द्धमात्रात्वेन ४५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

निथिभिय: आइकृत्सत्यवादीचगृहस्थोपिविमुच्यते सद्याश्रमैर्विजिज्ञास्य: सर्वैरप्येवमेवतु द्रष्टव्यस्तथश्रोतव्योमंतव्यश्चोपपत्तिभिरित्यादिका ३३ तदेवंय नेगृहस्थस्यचयथोक्तस्वाश्रमधर्माननुतिष्ठत: अहिंसासत्यास्तेयब्रह्मचर्यपरिग्रहाख्यायमा:शौचसंतोषतप:स्वाध्यायेश्वरप्रणिधानाख्यानियमाश्चस्वभाव सिद्धाइतितानुक्त्वा आसनादीनियोगांगानिविधित्सु: प्रथममेरुशिराख्यब्रह्मलोकएवजेतव्यइत्याह नगस्येतिउत्तमंकमंमुक्तिस्थानत्वात् आसनंविधत्तेसार्द्धेन पद्भ्यामितियत:मेरो:शिखरंतै: ब्रह्मचर्यादिाश्रमधर्मसंपन्नैर्ऋषिभिर्विचार्यतेतत्पश्येतियोजना किंकुर्वन् वृषणौपद्भ्यांसंपीड्य मेढ्रादुपरिविन्यस्यसव्यंगुल्फंत थोपरि गुल्फांतरंचविन्यस्यसिद्धासनमिदंभवेदित्युक्तलक्षणेसिद्धासनेस्थित्वेत्यर्थ: ३४ ग्रीवांनिगृह्यजत्रुसंधौचुबुकंसंयोज्येत्यर्थ: पृष्ठंविनाम्ययथावक्षई षदुन्नतंस्यात्तथाविनामयेत्पृष्ठंप्रहसन्निवेत्यस्यदंतैर्दंतान्नस्पृशेदित्यर्थ: नाभिदेशेकरौन्यस्येत्यंजलिमुद्रांवामोपरिदक्षिणंहस्तंकृत्वेत्यर्थ: संक्षिपन्निगृण्ह न् ३५ आसनजविन:परकृतिसरूपार्थवादमुखेनसफलंप्राणायाममाह मूर्ध्नीतियोगेश्वरस्ययोगात् पितामह:मनसाविष्णुंअसृजत् किंकृत्वामनसामूर्ध्नि

गृहस्थानभिवाक्येनतृप्यंतिपितरस्तथा ऋषयोपिचधर्मेणनगस्यशिरसिस्थिता ३३ नगस्यतस्यसंपश्यमेरो:शिखरमुत्तमम् पद्भ्यांसंपी ड्यवृषणावृषिभिस्तैर्विचार्यते ३४ ग्रीवांनिगृह्यपृष्ठंचविनाम्यप्रहसन्निव नाभिदेशेकरौन्यस्यसर्वशोंगानिसंक्षिपन् ३५ मूर्ध्निब्रह्म समुत्क्षिप्यमनसापिपितामह: असृजन्मनसाविष्णुंयोगाद्योगेश्वरस्यच ३६ व्यतिरिक्तेंद्रियोविष्णुर्बिंबात्बिंबमिवोद्धृत: तेजोमू र्तिधरोदेवोनभसींदुरिवोदित: ३७

ब्रह्मसमुत्क्षिप्येतियोजना मनारोधो हियोग:सचप्राणरोधाधीनइतिप्राणरोधोयोगेश्वर:तस्ययोगादभ्यासात् पितामहोधिकारीमनसामन:प्रधानेनप्राणेन ब्रह्मस्वात्मानंजीवंप्राणोपाधिंमूर्ध्नि भ्रूघ्राणमध्येसमुत्क्षिप्यसंगम्यमनसासंकल्पेनविष्णुविश्वरूपंअसृजत् एवंचोक्तरीत्याभ्रूघ्राणमध्यंप्रापय्यजीवस्यऐ- श्वर्याविर्भावहेतु:प्राणायामोवश्यकर्तव्यइत्यर्थ: ३६ प्रत्याहारमाहात्म्यमाह व्यतिरिक्तइति व्यतिरिक्तानिविषयेभ्योव्यावृत्तानींद्रियाणियस्यस:कृतप्रत्या हारोयोगीसन्निहितमपिशब्दादिकमगृण्हन् सर्वात्मनापरिच्छेदाभिमाननिवृत्तेर्विष्णु:व्यापकएवभवति अयमत्रक्रम: यथाघटोदरगतादीपप्रभाघटमा त्रीभवतिसैवघटच्छिद्राद्बहिर्गताकियंतंभवनोदरगतंविषयं व्याप्नोतिसर्वात्मनाघटाद्बहिर्गतासतीकृत्स्नंभवनोदरंव्याप्नोति एवंजीवचैतन्यंदेहांतर्गतंसत्त न्मात्रंप्राप्नोति इंद्रियद्वाराबहिर्गतंसत्तत्तंविषयंप्राप्नोतिसर्वात्मनादेहाद्बहिर्गतासतीकृत्स्नंदृश्यंप्राप्नोति अतएवतस्यामवस्थायांसार्वज्ञंयोगिनांभवतीतिस्प ष्टम् बिंबादिति मूषोद्धृतप्रतिमावत्स्वरूपेणाविर्भवतीत्यर्थ: तेजोमूर्त्ति: चैतन्यज्योति: ३७ छ छ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

योगमुक्त्वा तद्विदंस्तौति योगारंभमिति इदंब्रह्मचर्यंयोविंदतिसवेदवित् यएतत्सर्वभूतानांप्रभवःतत्प्रापकत्वात् योगोहिप्रभावाप्ययाविति श्रुतेः कीदृशंतत् योगेनैवा रभ्यतेननुशुष्कविचारेणकर्ममनःसंयम तेनसाध्यम् ५५ ५६ वैष्णवमिति विष्णुशब्दवस्तुतत्प्रापकंवैष्णवंतस्मिन् वेदस्यउपनिषत् ब्रह्मविद्यातस्याधिग- म्यवेदोपनिषदेस्वाराज्येनिमित्तेसतिब्राह्मणाःब्रह्मविदःनियमेमनोनिग्रहेश्रांतास्तेब्रुवंते अत्यंतंदुष्करमनोजयसाध्योयमित्यर्थः ५७ प्रसंगात्समाधौप्रली नस्यचेतसःकुतःपुनरुपलंभइत्याशंकतेचेतसइति कामतइच्छयामनोग्राह्यस्यस्वेनैवस्वयंदग्धेंधनानलवदुपशामितुंयोग्यया ५८ शारीरेण कृतंशारी रंधर्माधर्मरूपंमानसमनसिभवतीतिमानसंशरीरकृतंकर्ममनसिसंस्काररूपेणस्थितमनसाउद्बोधकमित्यर्थः ५९ अस्यैवप्राबल्यमाह येनेति येनचै तन्येनसर्वंज्ञायतेतदात्मत्वादवेद्यमपिशास्त्राचार्योपदेशमनुलक्षणयावेद्यंभवत्येव तथापिकर्मणानयत्तुशक्यमतःकर्मैवबलवत्प्रतिबंधकमित्यर्थः ६० तस्य चनिवृत्तिरपिसत्कर्मणैवेत्याहब्राह्मणेनेत्यादिभिःचतुर्भिःब्राह्मणेनवेदाध्यायिनाविनीतेनविद्यामदहीनेनसदाब्रह्मनिषेवणाब्रह्मयज्ञादिपरेणसदाशास्त्रा

योगारंभंकर्मसाध्यंब्रह्मचर्यंसनातनम् प्रभवःसर्वभूतानांयोविंदतिसवेदवित् ५५ ससिद्धःप्रोच्यतेलोकेसिद्धिरेवनसंशयः निमुक्तैः सर्वकर्मभ्योमुनिभिर्वेदपारगैः ५६ वैष्णवेयज्ञमित्येवंब्रुवतेवेदपारगाः ब्राह्मणानियमश्रांतावेदोपनिषदेपदे ५७ जनमेजयउवाच चेतसस्तूपलंभोहिमनोग्राह्यस्यकामतः कारणंश्रोतुमिच्छामियथात्वमन्यसेमुने ५८ वैशंपायनउवाच नह्यस्यकारणंकिंचित् बाह्यंभवति भारत अंतर्गतंकारणंतुशारीरंमानसंनृप ५९ येनवेद्यंविदुर्मर्त्याब्राह्मणाःसंशितव्रताः अवेद्यमपिवेद्यंचशक्यंवेत्तुंनकर्मणा ६० ब्राह्मणेनवि नीतेनसदाब्रह्मनिषेविणा सदाविदिततत्त्वेनसिद्धिहेतोर्महीपते ६१ सदाचैवशुचिर्भूत्वानियतोब्रह्मकर्मणा उपतिष्ठेतसगुरुंबद्धांजलिपरो द्विजः ६२ सायंप्रातश्चतत्त्वज्ञोमोक्षकर्माणिकारयेत् विनीतोब्रह्मभावेनसमाहितमतिर्मुनिः ६३ संप्रपद्येतमनसावैष्णवंपदमुत्तमम् ध्याय न्नेवप्रसीदेतसमाहितमतिर्द्विजः ६४ गच्छतेपरमंब्रह्मनिर्विकारेणचेतसा अपुनर्भवभावज्ञोनिर्ममोभावबंधनात् ६५

चार्याभ्यांआत्मानात्मनोविंदिततत्त्वेनसिद्धिहेतोर्मोक्षार्थंभवितव्यमितिशेषः ६१ ब्रह्मकर्मणाब्रह्मण्यर्पितेनकर्मणानियतःशमादिमान् ६२ गुरुतत्त्वज्ञोमू त्वामोक्षकर्माणिप्रोक्तान्यासनादिधारणांतानिकारयेत् कुर्यात् विनीतोयोगप्राप्तिगर्वहीनः ब्रह्मभावेननतुसेवकभावेन अथयोन्यांदेवतामुपास्तेन्योसावन्योह मस्मीतिनसवेदयथापशुरेवंसदेवानामितितन्निंदाश्रुतेः ६३ मनसैवेदमाप्तव्यं दृश्यतेत्वग्र्ययाबुध्येत्यादिश्रुतेःवैष्णवंउत्तमंपदंशुद्धंब्रह्ममनोवृत्त्यैववेद्यमित्यर्थः ध्यायन्नेवनतुशुष्कविवेकंकुर्वन् मनसोहिप्रसादेनहंतिकर्मशुभाशुभं प्रसन्नात्मात्मनिस्थित्वासुखमक्षयमश्नुतइतिश्रुतेर्मनोजयएवकर्मनिर्मूलनेहेतुरित्यर्थः ६४ ग च्छतेकर्मव्यतिहारेतङ् यथायंब्रह्माभिमुखोभवतितथातथैनंब्रह्माप्यभिमुखंभवतियथोक्तंवृद्धैःयावद्यावन्निरस्यावंदेहादीनभ्यसंगच्छति तावत्तावत्तदर्थोपित्वमर्थंप्रवि विशतीति ६५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

चतुर्थभूतमेव पुरुषं स्तौति ब्रह्मेति सार्द्धेन ब्रह्मा निरतिशयोत्कृष्टं तेजश्चैतन्यं तन्मयं तद्रूपः अव्यक्तः इंद्रियाद्यगोचरः शाश्वतो नित्यः ध्रुवः कूटस्थ अतएव अव्ययः अपचयशून्यः इंद्रियग्राह्यैः रूपादिगुणैर्न च युक्तः तेजोगुणेन मनोगुणेन दुःखादिना युक्तो मनस्तादात्म्याध्यासात् चंद्रेत्याल्हादकत्वं भ्राजिष्णुरिति सद्रूपेण स्फुरमाणत्वं वर्णेषु लोहितशुक्लकृष्णेषु तेजोबन्नेषु देहाकार परिणतेषु स्थित आविर्भूतः ४६ अस्य चतस्रो मूर्त्तीराह नेत्राभ्यां ऋग्यजुर्वेदौ क्रमेण विश्वतैजसौ त्रिपुटीरूपेण दृश्यत्वान्नेत्राभ्यामिवोत्पन्नौ सामवेदः प्राज्ञः शब्दमात्रगम्यत्वाज्जिह्वाघ्राणादिवोत्पन्नः एतेभ्यो विलक्षणस्तुर्य ईश्वरोंतर्यामी योगैकगम्यत्वादवाग्दृशामगोचरत्वात् शुद्धसत्वमयत्वाच्च मूर्धत इवोत्पन्नः ४७ आविर्भूतमात्रा एते स्वं स्वं क्षेत्रं प्रकाश्यमुपाधिं विंदंति लभंते तस्मादेते वेदा उच्यंत इत्याह जातमात्रा इति ४८ तुर्यातीतत्वेनैष तनुस्यूत इत्याह ते इति चत्वारो प्येते शुद्धस्योपाधितां गताः स्वैः स्वैर्गुणैर्विशिष्टेन रूपेण पुरुषं विश्वादिरूपं कुर्वंतीत्यर्थः ४९ एवं चतुर्विधं भ्रूघ्राणमध्यस्थस्य धारणाविषयस्य ब्रह्मणो रूपमुपन्यस्य देहावयवतारतम्येन तत्र तत्र धारणायास्तारतम्यं सूचयति अथर्वेत्यादिना सार्द्धद्वयेन तुर्यधारणा ऽतिमुख्यत्वाच्छी

ब्रह्म तेजोमयो युक्तः शाश्वतोथ ध्रुवो व्ययः न चेंद्रियगुणैर्युक्तो युक्तस्तेजोगुणेन च ४६ चंद्रांशुविमलप्रख्यो भ्राजिष्णुर्वर्णसंस्थितः नेत्राभ्यां जनयद्देवो ऋग्वेदं यजुषा सह ४७ सामवेदं च जिह्वाग्रात् अथर्वाणं च मूर्द्धतः जातमात्रास्तु ते वेदाः क्षेत्रं विंदंति तत्वतः ४८ तेन वेदत्वमापन्ना यस्माद्विंदंति तत्पदम् ते सृजंति तदा वेदा ब्रह्म पूर्वं सनातनम् ४९ पुरुषं दिव्यरूपाभं स्वैः स्वैर्भावैर्मनोभवैः अथर्वणस्तु यो योगः शीर्षं यज्ञस्य तत्स्मृतम् ५० ग्रीवाबाह्वंतरं चैव ऋग्भागः सभवेत्ततः हृदयं चैव पार्श्वं च सामभागस्तु निर्मितः ५१ बस्तिशीर्षं कटीदेशं जंघोरुचरणैः सह एवमेष यजुर्भागः संघातो यज्ञकल्पितः ५२ पुरुषो दिव्यरूपाभः संभूतो ह्यमरात्पदात् ५३ स हि देवमयो यज्ञः सर्वभूतसुखावहः उभयोर्लोकयोस्तात हिंसावर्ज्यः सनातनः ५४

र्षतुल्या विश्वधारणा बाह्यत्वाद्ग्रीवादितुल्या ५० ५१ ५२ प्राज्ञधारणांतर्मुखत्वाद्धृदयतुल्या तैजसधारणा संसारमोक्षोभयव्यापित्वाच्छीर्षादिचरणांतरूपा यस्तु एतैर्दिव्यै रूपैराभाति स पुरुषः अमरात् अक्षरात् तुर्यात्पदात् उपलक्षणात् संभूतः एकीभावेनाधिगतो भवतीत्यर्थः ५३ अत्र द्विविधो योगः सबीजो निर्बीजश्च आद्यश्चतुर्द्धा वितर्कविचारानंदास्मितरूपः तत्र बाह्ये प्रतिमादौ चित्तं यदा संनियम्यते तदा स वितर्कः सो च ऋक् शब्देनोक्तः यदा तु स्वप्न इवांतः प्रज्ञैर्मनोमात्रकल्पिते प्रतिमादौ तदा स विचारः सो च यजुः शब्दितः यदा त्वेनं परित्यज्य तुर्यप्राविविक्षुर्मध्ये ध्यायते स सुषुप्तिलीनो च साम शब्देनोक्तः अयं च लयरूपत्वादयोगः तुर्यं प्राप्तोपि यदा सर्वैश्वर्यसार्वज्ञ्यादिभावयंतेदा सानंदः यदा तु तदपहाय अस्मीत्येतावन्मात्रेणावस्थानं तदा सास्मितः तदुभयमत्राथर्वशब्देनोच्यत इति विस्तरस्तु वेदस्तुतिटीकायां स्पष्टीकृतो स्मद्गुरुभिरित्युपरम्यते ५४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तदेवेति जीवरूपेणानित्यं वृद्धिह्रासभासमानमपि ब्रह्मतद्‌हितदेवं अक्षरं ह्रासादिरहितं प्रादुर्यदेव कर्मयोगादिनादर्शितं भवतीति ६६ केषांतदक्षरविदितमत आह ब्राह्मणानामिति पदसंचये पदनिश्चये निमित्तं सर्वद्रव्येभ्योतिरिक्तानां त्यागवतां कामयोगस्त्र्यादिसंगं विगर्हयंतितेषां ६७ अपुनरिति कथं कर्मयोगेषु पुनर्भवराहित्यं प्रतिष्ठितमत आह अनादानेनेति फलस्येतिशेषः कर्मणीति द्विरुक्तिर्वीप्सार्था सर्वस्मादपि कर्मणः फलाकांक्षां न कुर्यात् यथोक्तं भगवता यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं इति ६८ आदानादिति तत्रानादानं तत्संगत्या पूर्वजन्मसंस्काराच्च भवनितेन क्रियाणामवाप्तिः प्राप्तिर्भवति अन्यथा क्षुद्रफलोपधानेन व्यर्थं कर्म गच्छतीत्यर्थः ६९ अनादानस्यैव महाफलत्वमाह मुक्त इति तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसा नाशकेनेति श्रुतेर्विविदिषोत्पादनद्वारा कर्मैव मोक्षहेतुरित्यर्थः ७० इति श्रीमहाभारते हरिवंशे भविष्यपर्वणि टीकायां सप्तदशोऽध्यायः १७ ॥ ॥

तदेवाक्षरमित्याहुर्यत्तद्ब्रह्म सनातनम् तद्‌हितं कर्मयोगेन विद्यायोगेन दर्शितम् ६६ ब्राह्मणानां विनीतानां वैष्णवे पदसंचये सर्वद्रव्यातिरिक्तानां कामयोगविगर्हिणाम् ६७ अपुनर्भाविनो लोकाः कर्मयोगप्रतिष्ठिताः अनादानेन मनसा राजन् कर्मणि कर्मणि ६८ आदानाद्बध्यते जंतुर्निरादानात्प्रमुच्यते ब्राह्मणेभ्यः क्रियावाप्तिर्जंतोः पूर्वाज्जनाधिप ६९ मुक्त इंद्रियबंधेन प्राप्तश्च परसंपदम् न भूयः पुनरायाति मानुषं देहविग्रहम् ७० इति श्रीमहाभारते हरिवंशे भविष्यपर्वणि नाम सप्तदशोऽध्यायः १७ जनमेजय उवाच उपसर्गं च योगं च ध्यातव्यं चैव यत्सदम् न भूयः पुनरायाति मानुषं देहविग्रहम् १ वैशंपायन उवाच शृणु विस्तरतः सर्वं यथा पृच्छसि मेधया उपपन्नेन मनसा ब्रह्मादीनामनेकधा २ पंच सिद्धिगुणास्त्यक्त्वा पश्यतो ब्रह्मणो नृप योगयुक्तेन मनसा पंचेंद्रियनिवासिनः ३ ब्रह्मणाश्चिंतयानस्य ब्रह्मयज्ञं सनातनम् बहुरूपमनैश्वर्यात् प्रवर्त्तंति निरोधनम् ४ पंचेंद्रियस्य ग्रामस्य नवद्वारस्य भारत कामक्रोधस्य लोभस्य सन्निरुद्धस्य मेधया ५

योगोपसर्गा वर्ण्यंतेऽथ त्रिभिः प्रश्नपूर्वकम् तत्रापि द्वादशे योगमार्गे ये चिन्हतां गताः १ पूर्वत्राहिंसा योगैरित्यनेन योगोपसर्गाः सूचिताः आसनानि धारणांतानि योगांतानि च उक्तानि अवशिष्टयोगस्वरूपं ध्येयं ब्रह्मयोगसिद्ध्यश्च तदेतच्चतुष्टयं जिज्ञासमानो जनमेजय उवाच उपसर्गं चेति १ शृण्वेति ब्रह्मादीनां योगिनामनेकधा जायमानं योगोपसर्गादिकं यथा पृच्छसि तथा मेधायुक्तेन मनसा शृणु २ पंचेति पंच सिद्धयो दूरश्रवणाद्याः तासां गुणान् शब्दादीन् पंचेंद्रियेषु निवसंतीति पंचेंद्रियैरेव कल्पितानित्यर्थः तान् त्यक्त्वा योगयुक्तेन मनसा ब्रह्मणः पश्यतो ब्रह्मदर्शिनः ३ ब्रह्मणो ब्राह्मणस्य ब्रह्मैव यज्ञो ब्रह्मयज्ञो ब्रह्मो वतं चिंतयानस्य अनैश्वर्यात् परवैराग्यबलाभावात् निरुध्यतेनेनेति निरोधनं उपसर्गजातं प्रवर्त्तंति प्रवर्त्तंते ४ अपरवैराग्येण्य इंद्रियादिनिरोधस्य सद्भावेपि परवैराग्याभावात् योगो निरुध्यत इत्याह पंचेति पंचेंद्रियप्रधानस्य ग्रामस्य देहेंद्रियप्राणसंघातस्य कामसहितस्य क्रोधस्य मेधया सन्निरुद्धस्य सद्भावेपीति शेषः ५ २७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तानेवविभागानाह तेजसेति मूर्ध्नि भ्रूघ्राणमध्येनिहितेन तेजसाचक्षुःप्रणिधानेन आधायाचित्तंसंयोज्यस्थितस्ययोगिनः मूर्ध्नीतिहृदयपुंडरीकादेरप्युपलक्षणम् य-त्रकुत्रचिदाधारेगुरूक्तयुक्त्याचित्तंप्रणिधित्सतोयोगिनः धूमादिकंगोचरीभवति यच्चमनोमर्कटेननिरोधक्षुब्धेननाडीमार्गशाखाभ्रंक्रमतोनुभूयते तच्चयोगसिद्धि-चिन्हं तथाचश्रुतिः तस्मिन्शुक्लमुतनीलमाहुःपिंगलंहरितंलोहितंच एषपंथाब्राह्मणाह्यनुवित्तस्तेनैतिब्रह्मवित्पुण्यकृत्तैजसश्चेतिनीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनां एतानिरूपाणि पुरःसराणिब्रह्मण्यभिव्यक्तिकराणियोगेइतिचधातुभिः तुल्यव्यवर्णइतिशेषः ६ ७ ८ निरुध्यतेइतिगा-ढत्वदर्शितम् ९ एवंरजःसत्वतमःप्रधानासुनाडीषुसंचरच्चित्तंपार्थिवैर्धूमादिरूपैरुपेतंभातीत्युक्तंतदेवकिंचित्सत्वाधिकाःनाडीःप्राप्यअभास्वरंरूपंरूपेणगा-ढतमोवहतिभवतितदेतन्मेघधारादिरूपकेणाहनेइति निर्वेमुःवर्षितवंतःवसुधातलेदेहांतरेचनबहिः १० अतएवाग्नेर्विशेषणंमानसइति ११ १२ एवमग्नेर

तेजसासूर्ध्निचाधायधूमोदोधूयतेमहान् नीललोहितवर्णाभैःपीतैःश्वेतैश्चधातुभिः ६ मांजिष्ठरागवर्णाभैःकपोतसदृशैस्तथा मुक्तैर्वैडूर्यव-र्णाभैःपद्मवर्णदलप्रभैः ७ स्फाटिकैर्मणिवर्णाभैर्नागेंद्रसदृशैस्तथा इंद्रगोपकवर्णाभैश्चंद्रांशुसलिलप्रभैः ८ बहुवर्णैःसुधूम्रैर्घोरैर्द्रागुरु-समप्रभैः संपतद्भिश्चयुगपत्मेघैरिवसमागमे ९ निरुध्यंतइवाकाशेपक्षवद्भिरिवाद्रिभिः तेधूमवर्णाःसंघातापनाःसलिलधारिणः निर्वेमुर्भ-वतोयोयान्विविशुर्वसुधातलम् १० मूर्ध्निचैवमहानग्निर्मानसोधूयतेप्रभुः युक्तःपरमयोगेनशतशोर्चिभिरावृतः ११ तस्याच्चिर्विस्फुलिंगानां सहस्राणिशतानिच विसस्रुःसर्वगात्रेभ्योज्वलन्निवयुगाग्नयः १२ यावतिवर्षराशिस्तुतावंत्योच्चैर्निलस्यच समेयुर्वारिधाराभिर्विपुलेवसु-धातले १३ वर्णाभ्यांयुज्यमानस्यवायुर्दोधूयतेमहान् दिव्यासिद्धगुणोद्भूतःसूक्ष्मप्राणविवर्द्धनः १४ वेगवान्भीमनिर्घोषोबलवान्घ्राण-गोचरः तैरेवचाग्निसंघातैर्धातुभिःसहसंगतः १५ सहस्रशोयशतशोमूर्त्तिकृत्वापृथग्विधाम् अग्निर्वायुजलंभूमिर्धातवोब्रह्मचोदिताः १६ समवायत्वमापन्नाबीजभूतामहीपते संघातब्रह्मवेगेनधातवोगमितान्नृप १७

धितेजोजलादेर्मिश्रीभावः संकीर्णगुणवन्नाडीसंचाराद्बोध्यः यावंतइति अर्च्यःअर्चिषःईकारांतत्वमार्षं १३ वर्णाभ्यांजलाग्निवर्णाभ्यांश्वेतलोहिताभ्यांइत्यभावेततोया तद्रूपेणपरिणतस्यसत्वोत्कर्षेसितिनिरूपोवायुरूपंआकाशेभव-तिदिव्यान्भित्यादिषमनिधानात्सिद्धाःअनादयःतेचतेगुणाःशब्दतन्मात्रादयःतेभ्यउत्पन्नःसवायुर्नतुस्थूलइत्यर्थः सूक्ष्मःप्राणःसूत्रात्मातस्यविवर्द्धनःप्रका-शकः १४ वेगेनिसःइतिच्छेदःहप्रसिद्धंतैरेवअग्निनासंघातोदृढसंश्लेषोयेषांतैःभूजलैःधातुभिःसंगतःसन्घ्राणगोचरःप्राणशब्दवाच्यःसूत्रात्माभवतीत्य-र्थः वेगवान्मनसोपिजनकत्वात् भीमनिर्घोषःस्थूलाकाशस्यापिजनकत्वात् बलवान्ब्रह्मांडभेदनसामर्थ्यवत्वात् १५ सहस्रशइति धातवोमूर्तिंकृत्वास्थिता इतिशेषः १६ मूर्त्तिकरणप्रकारमाह समवेति ब्रह्मवेगेनचिदनुप्रवेशेनसंघातंगमिताःधातवःसमवायत्वंएककार्यकारणत्वंआपन्नागतवंतः १७ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

फलादुत्पन्नोरसोरेतः तन्मयंब्रह्मचैतन्यंगर्भः ब्रह्मद्वारैवदेहादेश्चैतन्यंनचेतनांतरसद्भावात्कृतम् नान्योतोस्तिद्रष्टेतिचेतनांतरनिषेधात् अतएवब्रह्मैवप्रधानमिति कारणांतरेयुक्त्यंतरैः यदितिविशेषाश्चेतनाःबहवःस्युःतर्हिवैधर्म्याभावात्तेषांभेदासिद्धिःयदिसविशेषास्तर्हिस्वाश्रयनाशमंतरेणविशेषानाशात्मुक्तसिद्धिरित्यादिभिः २७ कथंतर्हिनिर्विशेषस्यापिसंसारित्वमतआह अव्यक्तादिति अव्यक्तात्मायातःस्वेनभावेनअनादिसंस्कारेण विद्ययाब्रह्माकारचित्तवृत्त्यासहचरंतं प्रकाशमानम् २८ कस्तर्हिकर्त्ताभोक्तेत्यतआह कर्मेतिकर्मदृश्यंकर्तासाभासाहंकारः इदंद्वयमपिविषयस्थमेवनत्वविषयचिदात्मस्थंकर्तुरप्याभासरूपत्वेन दृश्यत्वात् अनेकधाभासमानमपिचक्षुर्भ्यांनोपलभ्यते मायानगरमिववीतचक्षुर्नोपलभ्यते मायानगरमिवपटलैरधिकारिभिः २९ ज्ञानिभिस्तुतदेवोपलक्ष्यतेकर्माद्यात्मनाकनकमिवकुंडलाद्यात्मना तथाचबृहद्वचनंसकलवान्मनसातिगताचितिःसफलवाङ्मनसव्यवहारभागिति यद्वा चक्षुर्भ्यांभ्रुवोर्मध्येयोजिताभ्यांतस्मात्निःसृतमाविर्भूतंब्रह्मोपलभ्यतइतियोजना ३० पक्षिवदित्यसंगत्वसूचितम् ३१ प्रादुरिति भूतस्यभूतजातस्यप्रादुर्भावंउत्पत्तिंक्षयंऐ-

रसश्चतन्मयोयज्ञेयत्तद्ब्रह्मसनातनम् प्रधानंब्रह्मचोद्दिष्टंबहुभिःकारणान्तरैः ब्राह्मणैस्तपसिश्रांतैःसत्यव्रतपरायणैः २७ अव्यक्तंव्यक्तमापन्नंस्वेनभावेनभारत अंतस्थंसर्वभूतेषुचरंतंविद्ययासह २८ कर्मकर्त्तेतिराजेंद्रविषयस्थमनेकधा नोपलभ्येतचक्षुर्भ्यांतिपसादग्धकिल्बिषैः २९ उपलभ्येतचक्षुर्भ्यांज्ञानिभिर्ब्रह्मवादिभिः निःसृतस्तुभ्रुवोर्मध्यान्मेघमुक्तइवांशुमान् ३० चरद्भिःपक्षिवल्लोकेनिर्द्वंद्वैर्निष्परिग्रहैः योगधर्मेणकौरव्यध्रुवमासाद्यतेफलम् ३१ प्रादुर्भावंक्षयंचैवभूतस्यनिधनंतथा विधत्तेशतशोब्रह्मासंक्षयेचभवेत्तदा ३२ कर्मणःकर्मयोगज्ञोभूतेभ्योनात्रसंशयः अविनाशायलोकस्यधर्मस्याप्यायनेनच ३३ युगंद्वादशसाहस्रंसहस्रयुगसंहितम् एतद्ब्रह्मयुगनामयुगानांप्रथमंयुगम् ३४ सहस्रयुगयोरंतेसंहारप्रलयांतकृत् सूक्ष्मंभवतिलोकानांनिर्विकारमचेतनम् ३५

श्वर्यंकुर्वद्रूपतांनिधनंनाशंसंक्षयेप्रलयेभवेसृष्टौब्रह्माब्रह्मवित् ३२ जगज्जन्मादिहेतुत्वेनयोगिनऐश्वर्यमुक्त्वाकर्मफलविभाजकत्वेनापितदाहकर्मणइति योगज्ञोभूतेभ्योकर्मणोयोगादेःसुखभाजकत्वंविभजतइतिशेषः धर्मस्याप्यायनेनलोकस्याविनाशायेतियोज्यं अस्यैवप्रीत्यैधर्मःक्रियते अनेनैवप्रीतेनलोकोरक्ष्यतइत्यर्थः ३३ युगमिति कालमानमविवक्षितं हिंसाशून्यायोगजधर्मएवचतुष्पात्ब्रह्मप्रापकंयुगंसमयःयदैवईदृग्धर्मप्रवणंचित्तंतदैवकृतंप्रवृत्तमितिज्ञेयमितिभावः ३४ अनेकैरेवंविधैःकृतैःप्रलयांतकृत्कालस्याप्यंतकर्त्तासंहारोमहाप्रलयोमुक्त्याख्योभवतियथोक्तंअनेकजन्मसंसिद्धस्ततोयातिपरांगतिमिति तदाहिलोकानांस्वरूपंसूक्ष्मंभवतिसत्तामात्रमवशिष्यतेतएवनिर्विकारंअचेतनंचचैतन्याभावात् यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यविद्यावस्थायांचेतनामुक्त्वायत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदितिकैवल्येद्रष्टृदृश्ययोर्लोपेननिर्विशेषचिन्मात्रावशेषश्रुतेः ३५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यदितियद्ब्रह्मधारणाविषयाः तदेवसूक्ष्मंसदेवचविराट् तयोःसूक्ष्मविराजोः ततोन्यान्तत्तुल्यान्ब्रह्मीभूतयोयोगीसृष्टवानित्यर्थः १८ सएवयोग्योभगवान्-
अतस्तस्यसूत्रादिरूपत्वंयुक्तमित्यर्थः १९ तमितितंयोगिनंमूर्धिधातुभिर्नद्धं भ्रूघ्राणमध्येसूत्रात्मत्वेनास्थितंब्रह्मचोदिताईशप्रेरिताइतरसुखादिभोक्तारोजीवाः
प्रविशंति सएवसर्वजीवसमष्टिरित्यर्थः २० अथेति सूत्रात्मभाव्यसाक्षात्कारानंतरं इदमेवकुतइत्यत आह धरणीमित्यास्थूलदेहंविहाय ब्रह्मसंमिताईशसाम्यंप्राप्ता
मूर्तयःसूत्रविभूतयःचेष्टितुमारब्धाश्चेद्दशदिशःप्रपद्यंते अस्यामवस्थायांयोगीसर्वात्म्यात्सर्वविद्भवतीतिभावः २१ इतीति यतोविद्वान्सर्वात्माइतिहेतोःएते-
पार्थिवाःपृथुभ्योभूतेभ्योजातत्वात् व्यावहारिकार्थाब्रह्मणायोगिनैवनिर्मिताः व्युत्थानेसंप्रज्ञातेच तत्रैवचलयंयांतिसुप्तौसमाधौचभूमित्वंस्वोपादानत्वंपार्थिवो
घटइवनाशेपृथिवीत्वमितिरूपकेणोक्तं २२ कर्मेतिचाद्विमुच्यंतइत्यनुषज्यते कर्मक्षयाभावेपुनःपुनरुद्भवंतीत्यर्थः २३ कर्मभ्योमुक्ताःक्वयांतीत्यत आह तामे

यद्ब्रह्मचक्षुषोर्मध्येससूक्ष्मःपुरुषोविराट् तयोरन्यान्बहून्सूक्ष्मान्ससृजेपुरुषोत्तमः १८ सएवभगवान्विष्णुर्व्यक्ताव्यक्तसनातनः
आधारःसर्वविद्यानांप्रलयंप्रलयांतकृत् १९ तंमूर्धिधातुभिर्नद्धंविशंतिब्रह्मचोदिताः तेतरास्तुरुषाःसर्वेज्ञातारःसुखदुःखयोः २० अथ
चेष्टितुमारब्धामूर्तयोब्रह्मसंमिताः भित्वाचधरणींदेवींप्रापद्यंतदिशोदश २१ इत्येतेपार्थिवाःसर्वेऋषयोब्रह्मनिर्मिताः तत्रैवप्रलयंयांता
भूमित्वमुपयांतिच २२ कर्मक्षयाद्विमुच्यंतेधातुभिःकर्मबंधनैः कर्मक्षयाद्विमुक्तत्वादिंद्रियाणांचबंधनात् २३ तामेवप्रकृतिंयांतिअ-
ज्ञाताकर्मगोचरैः क्षराद्धूमक्षयंचैवअग्निगर्भास्तपोमयाः २४ येनतंतुरिवाच्छिन्नोभावाभावःप्रवर्तते धूमादभ्रास्तुसंभूताअभ्रातो
यस्तुनिर्मलम् २५ जगतीजलात्तुसंभूताजगत्येवचयत्फलम् फलाद्रसस्तुसंजज्ञेरसात्प्राणस्तुदेहिनाम् २६

वेति कर्मगोचरैः क्षरात्कर्मणःहेतोःधूमक्षयं धूमादिमार्गगम्यस्थानंपुनरावृत्तिफलंयांति तेपियदि अग्निगर्भाअग्निहोत्रादिप्रधानाः तपःकृच्छ्रचांद्रा
यणादितन्मयाभवंतिनान्यथा येनकर्मणाभावाभावःसदसद्रूपसंसारःप्रवर्ततेयथातंतुरिवअच्छिन्नस्तेनधूमक्षयमेवयांतीतिपूर्वेणान्वयः २४
अच्छिन्नत्वमेवाहद्वाभ्याम् धूमादिति धूमादिमार्गेणपितृलोकंगताःकर्मक्षयेततश्च्युताःसंत आकाशादिक्रमेणधूमत्वंप्राप्यमेघाभूत्वावर्षधाराभिः
पृथिव्यामन्नभूताद्देतस्त्वंप्राप्यपुनर्भवंतीत्यर्थः २५ जलात् जलंप्राप्यसंभूतासंयुक्ताफलंव्रीह्यादि जगत्येवपृथिव्येवेतितस्यचेतनत्वंनिर- २८
स्यति २६ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ततोपिकिमित्यतआह तदेतिसार्द्धेन व्योमसंचिद्रूपं अंतरिक्षमपितदानिर्मलंनिरवद्यंशब्दब्रह्मप्राप्तिर्भवति तदेवविशिनष्टिसंहारइतिसर्वेषांषष्ठ्यंतानांसंहारोल
यस्थानंध्रुवंकूटस्थमिति प्रतिपद्यंतिप्रतिपद्यंतेजानंतिवेत्तारः वेदलोचनेनेतिशेषः देहिनःजीवस्य ९ सकामस्तुयोगीवाय्वादिरूपेणभवतीत्याह आकाशेतिसंयु
गेयोगयज्ञे यान्येवसंग्रामनामानितानियज्ञनामानी तिनैघंटकप्रसिद्धेः वादोर्थवादस्तावकोस्यास्तीतिवा दीतेनवादिनाआकाशैश्वर्यंअव्याकृतैश्वर्यंतद्भावंप्राप्तेन
आकाशैश्वर्यभूतेन प्रवर्त्तमानंब्रह्मकर्तृऐश्वर्यंवायुभूतंकरोतिब्रह्मैश्वर्यवत्त्वाव्योमसंविदाप्रवर्तमानोयोगीयोगकालेस्वात्मानंवाय्वादिरूपंकरोतीत्यर्थः विकारैःते
जआदिभिःसहेत्यध्याहारः १० संवृत्तैर्निष्पन्नैरपिविकारैर्निरुद्धैः ध्रुवमैश्वर्यंपूर्वोक्तंनिर्मलंब्रह्म ११ विकारनिरोधेतुकवचवत्स्थूलशरीरत्यागेनआकाश
गमनस्वदृश्यत्वंचाप्नोतीत्याहद्वाभ्यांशरीरादिति निरालंबान्व्याघ्रादीन् मनसेतिस्वप्रसादृश्यत्वंदर्शितम् १२ १३ ओमिति यंयोगिनंतेसाधवः पश्यंतीति
योजनायेओंकारवाच्यंव्यस्तसमस्तरूपं अउम् ओमित्येवंभूतंविराट्सूत्रांतर्यामिशब्दस्वरूपंपूर्वस्योत्तरोत्तरत्रप्रविलापनेन अधीयंतेप्राप्नुवंतिश्यत्विकरणस्य-

तदांतरिक्षंसंप्राप्तंनिर्मलंब्रह्मचाव्ययम् संहारःसर्वभूतानांनराणांब्रह्मवादिनाम् ध्रुवमैश्वर्ययोगानांप्रतिपद्यंतिदेहिनः ९ आकाशैश्वर्य
भूतेनसंयुगेब्रह्मवादिना प्रवर्त्तमानमैश्वर्यंवायुभूतंकरोतिच १० विकारैर्बहुभिःप्राप्तैःसंपतद्भिर्महाबलैः १० एतैर्विकारैःसंवृत्तैर्नि
रुद्धैश्चसमंततः ध्रुवमैश्वर्यमापन्नःसिद्धोभवतिब्राह्मणः ११ शरीराद्भिनिष्क्रम्यआकाशेनप्रधावति निरालंबोनिरालंबानालभ्यमन
सातततः १२ ऐश्वर्यभूतोभूतात्माचरन्दिविनदृश्यते चक्षुर्भिर्बहुभिर्लोकैःपुरंदरसमैरपि १३ ओंकारयेत्वधीयंतेमनसाब्रह्मसत्तमाः
विमुक्ताःसर्वकर्मभ्यस्तेयंपश्यंतिसाधवः १४ एतद्धिपरमंब्रह्मब्राह्मणानांमनीषिणाम् अतश्चरतिभूतानांबिद्धिचेतनयासह १५ एषशब्दो
महानादःपुराणोब्रह्मसंभवः वायुभूतोक्षरंप्राप्तोवदत्येवंद्विजातयः १६ अरूपीरूपसंपन्नोधातुभिःसहसंगतः अंतश्चरतिभूतेषुकामका
रकरोवशी १७

गत्यर्थस्यइङोरूपं १४ एतत्प्रणवाख्यंब्रह्मतत्प्रापकत्वात् चेतनयाचिद्भावविशिष्टवृत्त्या १५ ओंकारमेवस्तौति एषइतिद्वाभ्याम्
एषओंइतिशब्दःमहानादःसर्ववर्णानामभिव्यंजकःपुराणोनित्यःब्रह्मणःसंभवएकीभावोयेनालंबितेनसतयाएतद्वैसत्यकामपरंचापरंचब्रह्मयदोंकारस्त
स्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीतिश्रुतेः अयमेवपरापश्यंतीसंज्ञकशब्दशबलब्रह्मात्मासन्वायुभूतोमध्यमारूपः अक्षरंअक्षरत्वंप्राप्तःमातृकामय
वैखरीरूपोभवतीत्याहुर्ब्राह्मणाः १६ अरूपीरूपरहितोप्ययंप्रणवःरूपेणवैखर्यात्मकत्वेनसंपन्नःतत्रहेतुःधातुभिःसहसंगतःअन्नमयंहिसोम्यमनआ
पोमनःप्राणःस्तेजोमयीवागितिश्रुतेर्मनःकायाग्निमाहंतिसप्रेरयंतिमारुतंइत्यादिशिक्षोक्तप्रकारेणतेजोबन्नयोगाच्छब्दोत्पत्तिदर्शनात् अयमेवोपाधेः
सोक्ष्म्यात्जीवरूपेणसूक्ष्मतरत्वाच्चांतर्यामिरूपेणांतर्देहांतःस्थित्वाचरतिविषयान्भुंक्तेयतःकामकारइच्छातत्करःस्वतंत्रेच्छःवशीअसंगः १७ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कारणैःसत्वादिभिर्गुणैःनिर्मितंजगदित्यन्वयः तच्चसूक्ष्मंब्रह्मसंपद्यतेप्रलयमापन्नंसत् ३६ इतिश्रीमहाभा॰ हरिवंशेभविष्यपर्वणि टीकायां अष्टादशोऽध्यायः १८ ७ युगधर्मायुगेज्ञेयाब्राह्म्येप्रोक्तंकृतेकृतम् कृतंत्रेताद्वापरंचमुनिर्वक्तित्रयोदशे १ प्राग्वंशमिति यद्यपिसर्वोयोगीसर्वोत्कर्षेणैवयुक्तोभवति- तथापिपूर्वंमधुकैटभाख्यायिकयायोगिनस्तमोरजोभ्यामपिअभिभूयंतइत्यस्यदर्शितत्वात् यथास्वप्नंभयंमोहंविषादंमदमेवचेत्युक्तानांस्वप्नादीनांलोभः प्रवृत्ति रारंभः कर्मणामशमःस्पृहेत्युक्तानांलोभादीनांचतमोरजःकार्याणांयोगेपिसंभवात् शुद्धसत्वमयेपियोगेधूमादेर्विघ्नस्यदर्शितत्वेइतरत्रतस्यकैमुत्येनासिद्धत्वाच्च पृच्छतिप्राग्वंशमिति कृतस्योक्तत्वात्कलेर्वर्तमानत्वात् आद्ययोःत्रेताद्वापारयोरजस्तमसोःप्राक्पराभूतंवंशंकार्यंसंततिंश्रोतुमिच्छामि ब्रह्मप्राप्तस्यसगुणब्रह्मविदः १ शृण्विति दैवप्रत्ययसाधिनादिव्यज्ञानसाधनशीलेन २ योगात्मायोगैकनिष्ठचित्तः ब्रह्मरूपेणसंभवआविर्भावोयस्यब्रह्मसंभवः चकारेति भूतार्थेनिविवक्षितःकरोतीत्यर्थः ३ उक्तेर्थेहेतुमाह स्थितइतियतःअचलेनैवभावेनब्रह्मासनेब्रह्मस्वरूपेधिष्ठितोपिसहसाक्षिप्तोरजसेतिशेषः अतोभूतानांब

तथाप्रलयमापन्नंजगत्सर्वंसनातनम् ब्रह्मसंपद्यतेसूक्ष्मंनिमित्तंकारणैर्गुणैः ३६ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिनामाष्टादशोऽध्यायः १८ ७ जनमेजयउवाच प्राग्वंशंश्रोतुमिच्छामिविस्तरेणमहामुने आद्ययोर्युगयोर्ब्रह्मन्ब्रह्मप्राप्तस्यसर्वशः १ वैशंपायनउवाच शृणुविस्तरशःसर्वंयन्मांपृच्छसिमेधया उपपन्नेनमनसादैवप्रत्ययसाधिना २ ऋद्धिमांस्तु भगवान्योगात्माब्रह्मसंभवः भूतानांबहुलत्वंचचकारेहेश्वरःप्रभुः ३ स्थितोब्रह्मासनेब्रह्माविक्षिप्तःसहसाप्रभुः अचलेनैवभावेनस्थाणुभूतेनभारत ४ रक्तश्चमोक्षविषयेसचज्ञानमयेपदे यस्मात्सदसहस्राणिप्रभवंतिभवंतिच ५ ब्रह्मयज्ञंतुयजतेयोगाद्वेदात्मकंसदा ब्रह्मणोविपुलंज्ञानमैश्वर्यंचप्रवर्तते ६ ततःप्रथममैश्वर्यंयुंजानेनप्रवर्तितम् ब्रह्मणाब्रह्मभूतेनभूतानांहितमिच्छता ७ तदात्वाकाशमैश्वर्यंयुंजानस्यप्रवर्त्तते ब्रह्मणोब्रह्मभूतस्यनिर्विकारेणकर्मणा ८

हुलत्वंकरोतीतिसंबंधः ४ रक्तश्चेति सचविक्षिप्तोमोक्षस्यविषयवत्प्रतिबंधकेपदेज्ञानमयेमनोरथमात्रेरक्तश्चभवतियस्मात्भवंतिउत्पद्यंतेप्रभवंतिस्वकार्यसामर्थ्यंवंतिसोभारिशरीरादिवत् अतस्तत्ररक्तत्वंघटतइतिभावः ५ एतच्चैश्वर्यंअप्रार्थितमपिप्रवर्ततेइत्याह ब्रह्मयज्ञमिति यज्ञंसदावेदात्मकंवेदसर्वस्वरूपंब्रह्माख्यंयज्ञंविष्णुंयजते आराधयतियोगात् योगेनतस्यब्रह्मणोब्रह्मभावप्राप्तस्यतस्मात्स्वयंप्रवृत्तमैश्वर्यंमुमुक्षुणानिरोद्धव्यमिमितिश्लोकद्वयभावः ६ एतच्चैश्वर्यंपरोपकारेनियोजनीयंनस्वार्थमित्याह ततइति ब्रह्मणाब्राह्मणेनयुंजानेनेतिसंबंधः ७ तदेतिनिर्विकारेण रजस्तमोविकारशून्येनकर्मणाप्रत्याहारादिनायुंजानोभवतितदाआकाशमव्याहृतमैश्वर्यंप्रवर्ततेनतुव्याहृतंविक्षेपकम् ८ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतेर्विकारैरितिव्याख्यातोर्थः श्लोकः ३१ रसात्मकमिति जिह्वाग्रशब्देनतत्साध्योरसास्वादोलक्ष्यते ततोनेकविधमैश्वर्यंभवति धात्वर्थंशरीरभोगाद्यर्थंस र्वभूतानामैश्वर्यमिति पूर्वेणान्वयः ३२ ३३ तैजसैश्वर्यप्रयुक्तान् विघ्नानाह तेजसइतिब्राह्मणस्य ब्रह्मविदःकारणेमोक्षसाधनेयोगेस्वस्थःस्वस्थस्येति आत्मनइत्यस्यविशेषणंस्वशब्दपूर्वात्तिष्ठतेःक्विपङसिअतोधातोरित्यालोपःसोमपावत् ३४ ३५ जिह्वाग्रंविंदतिअवयवशोभिनत्तीत्यर्थः विदिअवय वेस्यरूपं ३६ ३७ प्रलोभयन् अडभावश्छांदसःलोभयतीत्यर्थः ३८ ३९ तरंतिचयोगिनं जयंतिचेत्यर्थः ४० एतैरितिव्याख्यानं ४१ तदर्चि

एतैर्विकारैःसंवृत्तैर्निरुद्धैश्चैवसर्वशः ध्रुवमैश्वर्यमासाद्यसिद्धोभवतिब्राह्मणः ३१ रसात्मकंतदैश्वर्यंजिह्वाग्रादभिनिःसृतम् सहस्रधारं विततमेघत्वंसमुपागतम् ३२ रसांश्चविविधान्योगात्ससिद्धःसृजतेप्रभुः धात्वर्थंसर्वभूतानांयोगप्राप्तेनहेतुना ३३ तैजसोरूपमैश्वर्यंवि कारैःसहवर्ततै आत्मनोविघ्नजननंस्वस्थोब्राह्मणकारणे ३४ उग्ररूपैर्विरूपैश्चहन्यतेदंडपाणिभिः घोररूपैःसुगंभीरैःपिंगाक्षैर्नररवि ग्रहैः ३५ नेत्रंसमुद्धरन्भीमं जिह्वाग्रंचास्यविंदति नदंतियुगपत्सर्वाद्जृंभमाणाःपुनःपुनः ३६ पुनरेवतदाभूत्वाबहुरूपातदाभवत् नृत्य माना प्रगायंतितत्पर्यंतोविशेषतः ३७ स्त्रीभूताश्चततःसर्वेयुंजानाश्चावलंबिरे कंठेषुबहुरूपत्वाद्विघ्नैश्चैवप्रलोभयन् ३८ मधुरैरभिधा नैश्चव्याहरंतानभीतवत् पतंतियुगपत्सर्वेपादयोर्मूर्ध्नभिर्युताः ३९ प्रसादकांक्षमाणाश्चयोगस्यांतरविघ्नतः बहुप्रकारंकथयन्नृत्यंतिच तरंतिच ४० एतैर्विकारैःसंवृत्तैर्निरुद्धैश्चैवसर्वशः ध्रुवमैश्वर्यमासाद्यसिद्धोभवतिब्राह्मणः ४१ तदर्चिषइवाग्नेयाआदित्यस्येवरश्मयः तेजोरूपकमैश्वर्यंजनितास्तेजबिंदवः ४२ ज्योतींषिचैवसंवृत्ताआकाशमुपसंगताः चरंतिलोकेसततंसूर्याचंद्रमसोर्जितम् ४३ चंद्रसू र्यात्मकंदिव्यंज्योतिषाद्भुतमुत्तमम् एतद्विभ्राजतेलोकेकालचक्रंध्रुवंपरम् ४४ अर्धमासाश्चमासाश्चऋतुःसंवत्सराण्यथ क्षणालवामु हूर्ताश्चकलाःकाष्ठास्तथैवच ४५ अहोरात्रप्रमाणंचनिमिषोन्मेषणंतथा ताराणांगतयश्चैवग्रहाणांचविशेषतः ४६ अथपार्थिवमैश्व र्यंविकारग्रहसंभवं योगयुक्तास्त्वभिग्रस्ताःयास्यंतेह्यचलासनात् ४७ अलोभाच्छिद्यतेसद्योवेपमानोनुकीर्त्यते सीदतेवसुधामध्येभि द्यमानःपुनःपुनः ४८ भूतानांबहुरूपैश्चअन्यैश्चतत्रवासिभिः विषयैर्युज्यतोक्षिप्रंसंक्षेपात्समवरुध्यते ४९

षइतितत्तत्रतेजोरूपाअपितएवजलबिंदवो भवंति ४२ गुणैःसत्वादिभिःसंवृताःयोगिनःज्योतींषिसंवृताःभवंति ४३ चंद्रसूर्यात्मकंप्राप्यसघनंसमेघमंडलंकालचक्रंध्रुवंअभिलक्ष्यचरन्सएवभवतिसएवका लस्यप्रवर्त्तकोभवतीत्यर्थः ४४ अर्धमासादिरूपश्चायमेवभवतीत्याहार्द्धेति ४५ ४६ अथेतिविकाराःरजस्तमोमयास्तेषांग्रहस्वीकारस्ततसंभवम् ४७ अलोभात् छिद्यतेऐश्वर्यमितिशेषः वेपमानोविघ्नात्भीतस्तु अनुकीर्त्यतेवाच्योनिंद्योभवतीत्यर्थः ४८ संक्षेपात्समवरुद्धातइत्यक्षराधिक्यमार्षम् ४९ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतदिति एतत्प्रणवात्मकं ब्रह्म पूर्वशास्त्राचार्योपदेशमनुचिंतयित्वा वेदात्मकं श्रुतिसारभूतं याज्ञं योगं चिंतयंतो भावयंतः मनसा संकल्पेन स्वोपाधिरूपेण आसमंतात् पूरयन्निव पूर्णीकृतवंत इव व्यापकं प्राप्ता इवेत्यर्थः इवशब्दो व्याप्त्यभावसूचकः तेन भिन्नं चित्तवद्व्यापकत्वमपि नास्त्येवेत्यर्थः १८ यशो ब्रह्म तेन सह युंजते ऐक्यं प्राप्नुवंति यशोयुजः समासेपि छांदसोनुभूयतः तदन्वयाः ब्रह्मप्रसूताः सैंधवखिल्यवत्सोपादाने एव लीयंते इत्यर्थः ब्रह्माख्यं लोकम् १९ पदेति प्रसवादाने जन्मगृहणनिमित्तं भवजन्म एते न हि इच्छंति किंतु ज्ञानार्थमेव २० त्रिभिर्माल्योपहारैर्माल्यवद्विश्वतैजसप्राज्ञानां उपहारैः समर्पणैर्विलापनैरिति यावत् प्रतिभावैः प्रतिभासमात्रैः माल्यैरिति समासैकदेशस्यापि विशेषणम् २१ ब्रह्मपूर्वाः वेदप्रमाणमेवं पूर्वं मुख्यं येषां ते यजनं योगं विक्रमं योगैश्वर्यं च चक्रिरे यस्मात् ब्रह्मा ब्रह्मवित् वैष्णवं तेजः ब्रह्मैव तत्र प्रमाणं वेदोक्तैरिति ब्रह्मैव सन्ब्रह्माप्येतीत्यादिभिः २२ ब्राह्मणैर्यथोक्तविशेषणैः धातुभिस्तेजोब्रह्मात्मकैः शरीरद्व

एतत्पूर्वमनुध्यायमनसापूरयन्निव वेदात्मकं तदा यज्ञं चिंतयंतो मनीषिणः १८ ब्राह्मणाः शुचयो दांता यशोयुंजस्तदन्वयाः ब्रह्मलोकं कांक्षमाणा वैष्णवं पदमुत्तमम् १९ पदहेतोः क्रियाः सर्वाः कुर्वंति विगतज्वराः नत्वेते प्रसवादाने भवमिच्छंति भारत २० त्रिभिर्माल्योपहारैश्च प्रतिभावैश्च वै द्विजाः यजंति परमात्मानं विष्णुं सत्यपराक्रमम् २१ यजनं विक्रमं चैव ब्रह्मपूर्वाः प्रचक्रिरे ब्रह्मापि वैष्णवं तेजो वेदोक्तैर्वचनैर्नृप २२ ब्राह्मणैर्ब्रह्मवृद्धिश्च ब्रह्मज्ञैर्ब्रह्मवादिभिः शुचिभिः कर्मनिर्मुक्तैः सत्यव्रतपरायणैः २३ धातुभिर्मोक्षकाले च महात्मा संप्रदृश्यते तदेव परमं ब्रह्म वैष्णवं परमाद्भुतम् २४ रसात्मकं तदैश्वर्यं विकारांते प्रदृश्यते घोररूपा विकारास्तु व्यथयंति महात्मनः २५ संच्छाद्यातीव तोयेन क्षुभ्यमाणो विचेतनः ऊर्मिभिश्छाद्यते चैव शीतोष्णाभिर्विकारतः २६ महार्णवगतश्चैव दह्यते न च सज्जते भग्नाश्चैव महानद्यः सलिलेनैव सीदति २७ सीदमानश्च सलिले सशीतात्पात्यते बलात् आसनाच्छादनाच्चैव मुच्यमानो विचेतनः २८ श्वभ्रे प्रपद्यमानश्च तोयेन परिषिच्यते शुक्लवर्णेन बहुधा स्रोतसा मूर्ध्नि सर्वतः २९ ऊर्ध्वज्योतिरवेक्षंश्च शुक्लैः पीतश्च बाध्यते वारिपूरैः सुगंभीरैर्विद्युद्भिरिव भासितैः ३०

येन मोक्षकाले परमात्मा संप्रदृश्यते २३ तदेव रसात्मकं रसो वै स इति श्रुतेः परमानंदात्मकं ऐश्वर्यं सैवास्य परमा संपदित्यादिश्रुत्या परमात्वेन स्तुतं विकारांते विकाराणां पूर्वोक्तानां राजसानां वाय्वादिरूपाणामंते विलये सति प्रकर्षेण दृश्यते योगिभिः २४ एवं लोभप्रवृत्यादिजनकानां
राजसविकाराणामंते पुनः सत्वोत्कर्षादात्मदर्शनमुक्तम् इदानीं तामसान् भयादीन्योगविघ्नान्विकारान्प्रस्तौति घोररूपा इत्यादिना विकारा व्यथयंतीत्युक्तं तांव्यथामेवाह पंचभिः संच्छाद्येत्यादिभिः २५ २६ २७ २८ २९ ३० ३०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सन्नस्यनूतनत्वपुराणत्वाद्यवस्थापरिणामःस्वरूपोपचयापचयलक्षणः एतौद्वावपिकालाधीनावेव अतएवसूक्ष्मेउक्तरूपेसर्वंसर्वत्रसर्वदासाविविस्थमस्तीति तद्
वस्थानांयोगिनांतस्यापरोक्षमितिप्रसिद्धं अतःसमष्टिसूक्ष्मेचित्तधारणाश्रेयस्करी धारणांतरेषुभेददृष्टिगर्भेतेषुभयादिदर्शनात् यन्मदन्यन्नास्तिकस्मान्नुबिभे
मीतितएवास्माकंभयंविहायकस्माद्बिभेष्यंतिद्वितीयाद्वैभयंभवतीतिश्रुतेरस्यांतददर्शनाच्च १ अस्याःफलमाह सर्वांगधारणांसर्वेअंगेषेवास्यास्ति ससर्वांगः
सूत्रात्माप्रहसन्निवमौढ्यमाहात्म्येनविस्मयात् मनसेत्यस्याद्वृत्त्यासूत्रात्मतायाःसृज्यस्यचकल्पितत्वमुक्तम् ब्रह्मणिसूत्रेयोगऐक्यंब्रह्मयोगस्तेन २ चक्षुषेति
अत्रअंगविशेषेनविवक्षितःसर्वस्यांगस्यसर्वात्मत्वेनसर्वेषांचिहेतुत्वौचित्यात् अप्सराइतिआकारांतत्वमार्षं अप्सरासुचयामेधेतिदर्शनाद्वा ३ ४ ५ स्व
क्षांद्विष्यलोचनरूपांशुचिगिरांनिष्कलंकांवेदवाणींसाहिश्रीर्ब्रह्मविदांऋचःसामानियजूंषिसाहिश्रीरमृतासतामितिश्रुतेः ६ ससृजेसृष्टिरत्रसंप्रदायप्रवृत्तिमात्रं

सर्वांगधारणांकृत्वामनसाप्रहसन्निव ब्रह्मयोगेनचब्रह्मासृजतेमनसाप्रजाः २ चक्षुषारूपसंपन्नाह्यप्सरासृजतेप्रभुः नासिकाग्राच्चगं
धर्वान्स्रग्विचित्रांबरवाससः ३ तुंबुरुप्रमुखान्सर्वान्शतशोथसहस्रशः नृत्यवादित्रकुशलान्कुशलान्सामगीतिषु ४ ब्रह्मयोगेनयोगज्ञः
स्वयंभूर्भगवान्प्रभुः चारुनेत्रांस्रुकेशांतांसुभ्रूंचारुनिभाननाम् ५ पद्मेनशतपत्रेणचारुणास्रुविराजिताम् स्वक्षांसुचिगिरंसेव्यांब्राह्मींसूर्त्ति
मतींश्रियम् ६ ससृजेमनसाब्रह्मासम्यक्प्रोक्तेनचेतसा भावयोगेनभूतात्मासर्वप्राणभृतांनृप ७ चक्षुषोरूपसंपन्नासृजत्सोप्सरसःप्र
भुः नासिकाग्राच्चगंधर्वान्सुवासःसुप्रवादितान् ८ नागप्रभाषंसंचक्रेगंधर्वाणामशेषतः अन्येषांचैवविप्राणांगानंब्रह्मप्रभाषितं ९
पद्भ्यांसृजतिभूतानिगतिमंतिध्रुवाणिच नरकिन्नरयक्षांश्चपिशाचोरगराक्षसान् १० गजांसिंहांश्चव्याघ्रांश्चमृगांश्चैवस हस्रशः तृण-
जातीश्चबहुधाभावहेतोश्चतुष्पदान् ११ येतुहस्तान्निरवादंतिकर्मप्राप्तेनहेतुना हस्तेभ्यःकर्मससृजेमंत्रवान्मनसातथा १२ वायुनास
विसर्गंचभूतानांसुखमिच्छता उपस्थेनतदानंदंपंचेंद्रियसमाधिना १३

नत्वभिनवोत्पत्तिःवाचाविरूपनित्ययेतिवेदस्यनित्यत्वश्रवणात् अतएवप्रोक्तेनेतिविशेषणं-
ईश्वरप्रोक्तेनेत्यर्थः योवैवेदांश्चप्रहिणोतितस्मैइतिसिद्धप्रधानश्रवणात् अस्यैवसर्वेश्वरत्वात् जीवानामाशयानुरोधेनायंसृजतिनस्वस्यभोगार्थमित्याह भावेति ७
८ गानंप्रभाष्यतेसुसाध्यतेनेनेतिगानप्रभाषंगांधर्वशास्त्रं तथाब्रह्मणिवेदेप्रभाषितंगानंसामाख्यंचक्षुषइतिश्लोकद्वयंपूर्वोक्तस्यैवविवरणम् ९ १० ११
येतुहस्तान् हस्तेआदायल्यब्लोपेधिकरणेपंचमी हस्तेतिपाठेविश्वाभूतानीतिताद्विभक्तेःपूर्वरूपमार्षं निरवादंतिभक्षयंति कर्मप्राप्तेनकर्मलब्धेनहेतुनाकारणे
नअदृष्टेन १२ वायुनाप्राणादिरूपेणविसर्गंविविधंप्राणनादिकार्यंसृष्टानांससृजेइतिपूर्वेणान्वयः एवंराजसींसृष्टिंकुर्वतःकथंमुक्तिःस्यादित्याकुलमाश्वासयति
पंचेंद्रियाणांसमाधिनिरोधस्तेनहेतुनाआपरमात्मानंउपलक्ष्यतेनतस्थेस्थितं लीलयासृष्टिंकुर्वन्नपिब्रह्मसामीप्यंप्राप्तस्तान्मुक्तएवेत्यर्थः १३ ६७ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५० ५१ एभिः मौमैः ५२ ततइति विकारतोनिर्मुक्तस्य पार्थिवमैश्वर्यमाविर्भवति ५३ समाधौसंजातेविकारेचप्रलयंगतेसतिदिव्यगंधादिसंविदोभवंती-
त्याहसार्धेनदिव्यपुरुषैःमुक्तैःसहभिद्यतेयावद्देहपातंऊर्ध्वंतुनभिद्यतेकैवल्येएकात्म्यप्राप्तेः ५४ अंतःगच्छन्सुक्ष्मतिनामंतःकरणमपिप्रविशतियतःप्रधाना
त्माप्रधानजयीक्षरन्निवप्रधानवत्परिणप्रमाणइतिसर्वंतिःकरणरूपोभवतीत्यर्थः ५५ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायामेकोनविंशोऽध्या
यः १९ ७ ७ चतुर्दशेपृथक्भूतधारणाभीतिदायतः अतःसूत्रेमनोधार्यमभयायेतिवर्ण्यते १ ततइति यतोभेददर्शनमयीएकैकभूतधारणाक्षुद्र-
फलदायोगविघ्नकरीचपूर्वोक्तरूपेण ततोहेतोः अत्यंतद्विपरीतां अहमेवेदंसर्वोस्मीतिमन्यते सोस्यपरमोलोकइतिश्रुतिप्रसिद्धांसमष्टिधारणांगत्वाप्राप्यततोव्यापकःस
र्वात्माभवतीतिशेषः पितामहःउक्तरीत्याशुद्धचिन्मात्ररूपोपिसन्मनसाउपाधिनैवसर्वत्र्यंगतः नतुस्वतःकीदृशेनमनसाब्रह्मकर्मब्रह्मप्रापकंकर्मउक्तविधंआसनादि
धारणांतंसमारंभंसम्यगारभ्यआरंभमितिणमुलंतंनिर्मुक्तेनबाह्यरूपादिभ्यः व्यावृत्तेनएतएवांतरात्मनाअंतरेवहार्दाकाशादौआत्मास्वरूपमस्यास्तिनब्रह्मिभ्यः

ततःपार्थिवमैश्वर्यंसेवमानश्चसर्वतः मूर्तिमद्भिश्चबहुधाधातुभिःसचहन्यते ५० शक्तितोमरनिस्त्रिंशैर्गदाभिश्चाप्यनेकधा असिभिःपा
त्यतेचैवक्षुरधारैःसहस्रशः ५१ भिद्यतेचैवबाणाग्रैःसुतीक्ष्णैर्मर्मभेदिभिः एभिर्विकारैर्निर्वृत्तैर्निरुद्धैश्चैवसर्वशः ५२ ध्रुवमैश्वर्यमापन्नः
सिद्धोभवतिब्राह्मणः ततःपार्थिवमैश्वर्यंनिर्मुक्तस्यविकारतः ५३ प्रादुर्भवतिसंजातेसमाधौप्रलयंगते दिव्यंगंधंसमाघ्रायदिव्यार्थांस्तान्
शृणोतिच ५४ दिव्यरूपैश्चपुरुषैश्छिद्यतेनचभिद्यते गच्छन्सुक्ष्मतिनाचांतःप्रधानात्माक्षरन्निव ५५ इतिश्रीमहाभारतेखिलेषुह
रिवंशेभविष्यपर्वणिनामएकोनविंशोऽध्यायः १९ ७ वैशंपायनउवाच ततोन्योधारणांगत्वामनसास्पितामहः ब्रह्मकर्मस
मारंभनिर्मुक्तेनांतरात्मना १

क्षुरादिद्वारारूपादौ इदमत्रतत्वं इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनः मनसस्तुपराबुद्धिर्योबुद्धेःपरतस्तुसइत्यादिश्रुतिभ्यः
सर्वेभ्यःसूक्ष्मतमःपरमात्मा अर्थास्तुइंद्रियेभ्यःसूक्ष्माअपितैर्गृहीताः संतोलोचनोत्तेजनेनपुस्तकाक्षराइवस्थूला एवावभासंते तथाआत्मानतिरिक्ताअप्यतिरिक्ता
वभासंतेस्वकरइवदर्पणेनबालस्य अन्यथायोगिनःसमाधौसार्वज्ञंनस्यात् सर्वस्यस्वरूपादन्यत्वेनकस्मिन्नुभगवतोविज्ञाते सर्वमिदं विज्ञातंभवतीत्येकविज्ञाना-
त्सर्वविज्ञानप्रतिज्ञाश्रुतेरुपरोधश्चस्यात् योगिनांसार्वज्ञस्यसर्वसंमतत्वाच्चनतदपलापःकर्तुंशक्यःतस्मादिंद्रियाणामुपसंहारे अर्थानांस्थूलत्वमनात्मत्वंचापग-
च्छतीतियुक्तमुक्तमन्यांधारणांगत्वाततोव्याप्तोभवतीति सूक्ष्मत्वंचात्रकालिकपरिणामराहित्यं तथाहिकनकादेःकुंडलादिधर्मपरिणामःस्वरूपविनाशेपिरूपांत ३१
रापत्तिरूपः तथाकुंडलादेःउत्पत्तेःप्रागूर्ध्वंचानागतत्वातीतत्वरूपौउत्पन्नोवर्तमानस्वरूपश्चेतित्रेधालक्षणपरिणामःस्वरूपप्रच्यवाप्रच्यवासिद्धिरूपः तथाउ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गावः गाः प्रथमा द्वितीयार्थे वैषै रेवनटवत् नतुपरिणामैः यदवोचं मूलकारणमेवांत्यात्कार्यान्तरङ्ग्वनत्तद्रूपेण भातीतितदितएवोत्थितम् १४ व्यतिषिक्तानिमिश्रितानि षट् इंद्रियाणियस्य सव्यतिषिक्तषडिंद्रियस्तं अस्माकंहि शब्दादयः श्रोत्रादीनां प्रतिनियताः विषयाः सर्वात्म्यकालेतुसर्वमिंद्रियं सर्वविषयग्राहकं भवति यथोक्तंवासिष्ठे सर्वात्मनितु यत्नेवच्छायातत्रैवचातपः नसंभवतिचेत्तत्सकथं सर्वात्मतामियादिति १५ तमंगिरसं भ्रुवोंतरे १६ भृगुंललाटमध्यात् नारदं सनत्कुमारंचमूर्ध्नः १७ १८ १९ २० तत्रेतिस्थानानि आदित्यादीनां द्युप्रभृतीनियोगात् अहोरात्रादिनिवर्त्तनाद्यधिकान् २१ एषआत्मोपादानकसृष्ट्यादिप्रपंचेन आसनध्यानसमाधिविधानेनच प्रपंचितो ब्रह्मप्रापकत्वाद्ब्रह्ममयो यंज्ञानयज्ञउक्त इतिशेषः अयमेवयोगोयोगशास्त्रप्राप्यः सांख्यनामावेदांतजन्यज्ञान-

हृदयादसृजद्दक्षंवो बाहुभ्यांपक्षिणस्तथा अङ्गानिचैवसत्वानितैस्तैर्भेदैः पृथग्विधैः १४ ऋषिमंगिरसंचैवमुनिंज्वलिततेजसम् ब्रह्मवंशकरंदिव्यंव्यतिषिक्तंतदिंद्रियम् १५ भ्रुवोंतरादजनयद्योगाद्योगेश्वरः प्रभुः ब्रह्मवंशकरंदिव्यं गुरुंपरमधार्मिकम् १६ ललाटमध्यादसृजन्नारदं प्रियविग्रहम् सनत्कुमारंमूर्ध्नश्चमहायोगीपितामहः १७ अभिषिक्तस्तुसोमश्च यौवराज्येपितामहः ब्राह्मणानांचराजानंशाश्वतरजनीश्वरम् १८ तपसामहतायुक्तोग्रहैः सहपुरःसरः चचारनभसोमध्येप्रभाभिर्भासयन्जगत् १९ सगात्रैर्भगवान्योगान्मनसासिद्धिमागतः सृष्टवान्सर्वभूतानिस्थावराणिचराणिच २० तत्रस्थानानिभूतानांयोगांश्चैवपृथग्विधान् निधत्तेशतशोब्रह्मा सर्वभूतपितामहः २१ एषब्रह्ममयोयज्ञोयोगः सांख्यश्चतत्वतः विज्ञानंचस्वभावश्च क्षेत्रंक्षेत्रज्ञएवच २२

मप्ययमेव नतुउक्तानयोर्विरोधः पुरुषैकत्वानेकत्वप्रकृतिमिथ्यात्वामिथ्यात्वरूपइतिचेन्नयोगैरपिगुणानांपरमंरूपंनदृष्टिपथमिच्छति यत्तुदृष्टिपथप्राप्तंतन्मायैवतुच्छकमितिदृश्यस्यभेदप्रकृत्यादेस्तुच्छत्वाभ्युपगमात् अत्यल्पमिदमुच्यतेवेदबाह्याअपिविज्ञानवादिचार्वाकादयोपिनानेनसिद्धांतेनविरुध्यंते सर्वेषांमोक्षस्यैकरूपत्वा
दित्याह विज्ञानंविज्ञानवादिनांसिद्धांतः स्वभावः स्वभाववादीनां चार्वाकाणांसिद्धांतः क्षेत्रंप्रकृतिः क्षेत्रज्ञः पुरुषः निरीश्वरसांख्यसिद्धांतोप्ययमेवेत्यर्थः २२ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एकत्वंचपृथक्त्वंचेतिज्ञानाज्ञानसमयभेदेनवाजगन्मिथोभिन्नमभिन्नमीश्वरादितिकापालिकमतेनवाएततज्ज्ञेयम् संभवोनिधनंचयोगएवएषब्रह्ममयो यज्ञः अज्ञातश्चेज्जन्मप्रदः ज्ञातश्चेज्जन्महंतेत्यर्थः योगोहिप्रभावाप्ययावितिश्रुतेः कालविदांकालाख्यईश्वरोप्ययमेवतत्प्रकाशत्वात् कालस्यक्षयोय स्मिन्सतिभवतितादृशंविशिष्टंअनुभवपर्यवसायिज्ञानंविज्ञानंआत्मानुभवोप्ययमेवज्ञेयमितिसर्वत्रसंबंधनीयंएतेनसर्वतंत्रसिद्धांतानांमुक्तावेकरू प्यंदर्शितम् तथाचवीतहव्यसमाधिप्रकरणेबृहद्वासिष्ठेदर्शितम् यच्छून्यवादिनांशून्यंयद्ब्रह्मब्रह्मवादिनांविज्ञानमात्रंविज्ञानविदांयदमलंपदम् पुरुषः सां ख्यदृशांनामीश्वरोयोगवादिनाम् शिवःशैवमतस्थानांकालःकालैकवादिनां आत्मात्मनस्तद्विदुषांनैरात्म्यंतादृशात्मनां मध्यंमाध्यमिकानांचसर्वंसुसमचे तसाम् यत्सर्वशास्त्रसिद्धांतोयत्सर्वहृदयानुगम् यत्सर्वंसर्वगंसर्वंयत्तत्सत्तदसौस्थितइत्यंतेन पाद्मेमाघमहात्म्येपि भूतयोगजचैतन्यंचार्वाकास्त्वामुपास ते सौगतास्त्वनुवर्तंतेतर्कैस्त्वांबुद्धिबोधलक्षणम् शरीरपरिणामंत्वामन्यंतेजिनदेवताः ध्यायंतिपुरुषंसांख्यास्त्वामेवप्रकृतेःपरम् जन्मादिरहितंपूर्णंसच्चिदान

एकत्वंचपृथक्त्वंचसंभवोनिधनंतथा कालःकालक्षयश्चैवज्ञेयोविज्ञानमेवच २३ इतिश्रीमन्महाभारतेखिलेषुहरिवंशेभवि-ष्यपर्वणिनामविंशतितमोऽध्यायः २० ७ ७ जनमेजयउवाच श्रुतंब्रह्मयुगंब्रह्मन्युगानांप्रथमंयुगम् क्षत्रस्या पियुगंब्रह्मन्श्रोतुमिच्छाम्यहंप्रभो १ ससंक्षेपंसविस्तारंनियमैर्बहुभिश्चितम् उपायज्ञैश्चकथितंक्रतुभिश्चैवशोभितम् २

दलक्षणम् त्वामौपनिषदाब्रह्मचिंतयंत्यनिशंविभो इत्यादि तस्माद्योयमुक्तोयोगयज्ञःसएवसर्वतंत्रसिद्धांतइतिसर्वरमणीयम् समाप्ताब्रह्मविद्या अतः परंधर्मचर्चाभविष्यति परैरदर्शितःपंथापौर्वापर्यवलान्मया यथाकथंचिदुन्नीतःपंडिताःशोधयंतुतम् २३ इतिश्रीमहाभारतेहरिवंशेभविष्यप र्वणिटीकायांविंशतितमोऽध्यायः २० ७ ७ ७ जीवन्मुक्तैर्यब्रह्मतत्त्वंचतुर्दशभिरीरितम् अथद्वादशभिर्धर्मंब्रवीतिक्रममुक्तये १ श्रुतमिति ब्रह्मयुगंब्रह्मप्राप्तिहेतुत्वात्प्रथमंयुगंकृतंयत्रसर्वधर्मफलांतर्भावः यथाकृतायविजितायाधनैयाःसंयंत्येवमेवैनंसर्वंतदभिसमेतियत्किंचप्र जाःसाधुकुर्वंतीतिकृतायनिदर्शनेनश्रुत्याप्रोक्तः क्षत्रस्यधर्मस्यतदेतत्क्षत्रस्यक्षत्रंयद्धर्मइतिधर्मस्यमुख्यक्षत्रत्वश्रवणात् युगंयुज्यतेअनेनतद्युगंस्व र्गादिप्रदत्वलक्षणंमाहात्म्यम् श्रोतुमिच्छामि १ एतदेवविशिनष्टि ससंक्षेपमिति २ ७ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

येनकारणेनत्रयाणामेववेदप्रोक्ताः क्रियाः स्मृतास्तेन कारणेनवः युष्माकंत्रयाणांब्राह्मणक्षत्रियविशामेववैष्णवेनयोगेनब्रह्मास्तिविष्णुभक्त्यावेदोक्तोतित्रैवर्णिकत्वंभगवद्रूपेकलभ्यमित्यर्थः १३ प्रज्ञयेति तेजसाऐश्वर्येणज्ञानेश्वर्ययोगात् प्राचेतसोदक्षः प्रभुर्विष्णुरेव यस्मात्पूर्वोक्तिव्यतिरिक्तषाडिंद्रियतादिविशिष्टस्तस्मात् तथाचबहुप्रजानिर्ऋतिमावेतीतिश्रुतेः बहुप्रजात्वाद्दक्षःसंसार्येवस्यादितिनशंकनीयमितिभावः कीदृशोदक्षः कर्मणामंतरंगतः अधिकारप्रदकर्मपाशावगुंठितःसृष्टिकरोतिनतुतस्याज्ञानमस्तीत्यर्थः एतेनजीवन्मुक्तानामपिकर्मपाशानुवृत्तिर्दर्शिता १४ प्रकृतमनुसरति ततइति निर्माणंशिल्पंत्रैवर्णिकसेवाकरणंवातदर्थमेवसंभूताः संस्कारंउपनयनंब्रह्मवेदः १५ १६ असंस्कृतंसंस्काराभावस्तेनहेतुनावेदप्रोक्तेनधर्मेणनोपयुंजतीतिपूर्वश्लोकगताक्रियान्वयः १७ ततोन्येब्रह्मणोवेदस्ययोनयः स्थानभूताब्राह्मणाइत्यर्थः १८ दक्षिणाः समर्थाः भोपुत्राः अहंभवतांमुखात् धात्र्याः युष्मच्छरीरजनित्र्याः अंतंसिद्धांतं-

त्रयाणांवर्णजातानांवेदप्रोक्ताः क्रियाः स्मृताः तेनब्राह्मणयोगेनवैष्णवेनमहीपते १३ प्रज्ञयातेजसायोगात्तस्मात्प्राचेतसः प्रभुः विष्णुरेवमहायोगीकर्मणामंतरंगतः १४ ततोनिर्माणसंभूताः शूद्राः कर्मविवर्जिताः तस्मान्नार्हंतिसंस्कारंनह्यत्रब्रह्मविद्यते १५ यथाग्नौधूमसंघातोह्यरण्यामथ्यमानया प्रादुर्भूतोविसर्पन्वैनोपयुंजतिकर्मणि १६ एवंशूद्राविसर्पंतोभुविकात्स्न्येनजन्मना नासंस्कृतेनधर्मेणवेदप्रोक्तेनकर्मणा १७ ततोन्येदक्षपुत्राश्चसंभूताब्रह्मयोनयः बलवंतोमहोत्साहामहावीर्यामहौजसः १८ पित्राप्रोक्तामहात्मानोदक्षिणायज्ञकर्मणा अंतमिच्छाम्यहंश्रोतुंधात्र्याःपुत्राबलोह्यहम् १९ ततोविधास्येतत्त्वज्ञः प्रजानांविपुलंबलम् विपुलत्वाद्धिक्षेत्राणांसमापिविपुलाः प्रजाः २० नतेषांदर्शयद्देवीचक्षुषारूपमात्मनः प्रजापतिसुतानांवैविपुलासारमिच्छताम् २१ आत्मनोभावनिर्वृत्तेभावेकृतयुगेतदा जनित्रीसर्वभूतानामंडजानुद्भिजांस्तथा २२

श्रोतुमिच्छामि अतोमह्यंधात्र्यंतंकथयतेतिभावः यतोहंबलोबलवानस्मिधात्र्याअंतंज्ञातुंसमर्थोस्मितस्माद्भवद्भिरपिमाद्दशेभवितव्यमितिभावः १९ ततइति युष्मत्तोधात्र्यंतंश्रुत्वाभवदीयबलाबलतत्त्वंज्ञात्वाबलबपक्षेभवतांविपुलंविधास्ये तवकुतएतावद्बलमित्यतआह क्षेत्रवैपुल्यात् बलवैपुल्यंअन्यथाल्पमितिमशक्यतंगजशरीरेदृष्टएवंबद्भिः प्रजाः सृजतोममबलमस्ति तस्माद्धात्र्याः स्वरूपंज्ञात्वासृष्टौप्रवर्तितव्यंअन्यथासृष्टिसंगेनदुष्यत्येवेतिभावः २० विपुलायामायायाः सारमिच्छतांतेषांदक्षपुत्राणांदेवीधात्रीआत्मनोरूपंचक्षुषाप्रमाणज्ञानेननदर्शयत् नदर्शितवतीअडभावआर्षः नहिमायाप्रमाणेनपरीक्षितुंशक्यातमइवदीपेन अनिरीक्ष्यमाणेवतेषांमायाबाधिताभूदितिभावः २१ आत्मनइतितेषांप्रजापतिसुतानांकृतयुगेभावेविशुद्धसत्त्वमयेभावेधात्र्यवलोकनेनजातेसतिमात्राप्रमात्राचेतनेनप्रचोदितासतीधात्रीसर्वभूतानांजनित्रीअभूत् तथाअंडजान्स्वेदजांश्चजनितवतीति परिणामेनयोज्यम् २२ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतदितिएतत्धर्मस्यमाहात्म्यम् यज्ञकर्मभिः यज्ञात्मकमेवकर्मयेषांनतूपास्याद्यात्मकंतेयज्ञकर्माणः कर्मठाः तैरर्चितं पूजितंदानधर्मैः उच्चादिविदक्षिणावंतो अस्युर्ये अ-
श्वदाःसहतेसूर्येण हिरण्यदाअमृतत्वंभजंते वासोदाः सोमप्रतिरंतआयुरितिश्रुतेर्दानजप्रभावैः प्रजाभिः यस्मिंजाते एतामिष्टिंनिर्वपति पूतएवसतेजस्व्यन्नाद इंद्रियावी प
शुमान्भवतिपुत्रकामाहाप्याख्यापयेरन् लभंतेह पुत्रानितिजातेष्टिशौनःशेपाख्यायनफलैः प्रजादिभिरुपशोभितम् ३ तेइति तेब्राह्मणाहृत्तसंपन्नाज्ञानसिद्धाः
समाहिताभवंतीनियोजनाकेतेये अंगुष्ठमात्रा इत्यल्पप्रमाणत्वेनउक्तांत्यादियोग्याः अंगुष्ठमात्रंपुरुषंनिश्चकर्षयमोबलादित्यारण्यकोक्तेः ननुयएवंवेदाहंब्रह्मास्मीति
सइदंसर्वेभवंतीतिश्रुतिप्रसिद्धविद्याफलसर्वात्म्यभाजः तेयज्ञकर्माणःविशिष्टधर्मेणसूर्यरश्मिभिरादत्ताः सूर्यमंडलंभित्वाब्रह्मलोकंगता अपीत्यर्थः मोक्षप्रासे-
नमोक्षप्रत्यासंनेनविधिनायथाशास्त्रं ४ प्रवृत्तेयज्ञादौअप्रवृत्तेशमादौब्रह्मपरायणाः वेदैकशरणाः परायणस्यब्रह्मणः कर्मणिषष्ठीसंगत्यईश्वरप्रीतिबुद्धि
ध्यवेदोक्तकर्मपराइत्यर्थः ५ ६ वित्तसंपन्नाः श्रीवृत्ताः श्रियाऋचः सामानियजूंषिसाहिश्रीरमृतासतामितिश्रु त्या वृताः सहजाः पुरवधिब्रह्मलोकेस्थित्वापूर्वस्मिन्क

वैशंपायनउवाच एतत्तेकथयिष्यामियज्ञकर्मभिरर्चितम् दानधर्मैश्चविविधैःप्रजाभिरुपशोभितम् ३ तेंगुष्ठमात्राः पुरुषा आदत्ताःसू
र्यरश्मिभिः मोक्षप्रासेनविधिनानिराबाधेनकर्मणा ४ प्रवृत्तेचाप्रवृत्तेचनित्यंब्रह्मपरायणाः परायणस्यसंगम्यब्राह्मणास्तुमहीपते ५
श्रीवृत्ताःपावनाश्चैवब्राह्मणाश्चमहीपते चरितंब्रह्मचर्यंश्चब्रह्मज्ञानावबोधिताः ६ पूर्णेयुगसहस्रांतेप्रभावेप्रलयंगताः ब्राह्मणावि
त्तसंपन्नाज्ञानसिद्धाःसमाहिताः ७ व्यतिरिक्तेंद्रियोविष्णुर्योगात्माब्रह्मसंभवः दक्षःप्रजापतिर्भूत्वासृजतेविपुलाःप्रजाः ८ अक्षरा
द्ब्राह्मणाःसौम्याःक्षरात्क्षत्रियबांधवाः वैश्याविकारतश्चैवशूद्राधूमविकारतः ९ श्वेतलोहितकैर्वर्णैःपीतैर्नीलैश्चब्राह्मणाः अभिनि-
र्वर्तितावर्णाश्चिंतयानेनविष्णुना १० ततोवर्णत्वमापन्नाःप्रजालोकेचतुर्विधाः ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चैवमहीपते ११ एक-
लिंगाःपृथग्धर्माद्विपादाःपरमाद्भुताः यातनायाभिसंपन्नागतिज्ञाःसर्वकर्मसु १२

ल्पेयेलयंगतास्तेऽग्निमकल्पेउक्तविशेषणविशिष्टाब्राह्मणाभवंति ७
व्यतिरिक्तेति तेषांब्राह्मणानांमध्येयोयोगात्मासन्व्यतिरिक्तेंद्रियोदेहेंद्रियासंगेनस्वप्रेश्वरांतः प्रज्ञोभूत्वाचतुर्भुजादिलक्षणंविष्णुंआत्मत्वेनाभिमन्यतेसोपिभेदद
र्शीसमस्युपास्तिराहित्यात् ब्रह्मणासहतेसर्वेसंप्राप्ते प्रतिसंचरे परस्यांतेकृतात्मानः प्रविशंतिपरंपदमितिस्मृत्युक्तक्रमसुक्त्यनधिकारादस्मिन्कल्पेब्रह्मपुत्रोद
क्षोभूत्वाप्रजाःसृजते ८ अक्षरंशुद्धसत्वमयत्वान्निष्कामोधर्मःश्वेतःसुधावत् क्षरंसत्वरजोमयत्वादुभयमिश्रोधर्मःरक्तःतदुभयसंघातवत् विकारोरजोम- ३३
यत्वात्सकामोधर्मःपीतोहरिद्रावत् धूमःतमोमयत्वात्विधर्मःकृष्णःधूमवत् ९ १० ततइतिततोगुणावर्णोपिचारात् ११ एकलिंगाःतुल्याकृतयः यातनायकर्मफ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

लभोगायसंपन्नास्तेनत्वेनवर्णेन १२

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सम्भवेदनंसंवेदः तस्यापिधरादिवृत्तेरपिजननीधात्र्येवाभवत् तथाकर्मभोगिनांकर्मफलभोगिनांकर्म फलभोगशीलानांजंतूनांअणुतांसूक्ष्मत्वंतनुतांविस्तृततां त
नुविस्तारेऽस्मादौणादिकुतः अणुनासाहचर्यात् विस्तृततांजनितवतीतिपूर्ववत् कीदृशेकृतयुगेभावे आत्मनोभावनिर्वृत्ते आत्मनःप्रतिच योभावःस्वभावःतेन
निर्वृत्तेनिष्पन्ने विदुषांस्वभावसिद्धएवकृतयुगधर्मइत्यर्थः यथोक्तंविष्णुधर्मोत्तरे ज्ञानवैराग्यमैश्वर्यधर्मश्चमनुजेश्वर आत्मनोब्रह्मभूतस्यनित्यमेवचतुष्टयमि
ति तस्मात्सर्वेषामुत्कृष्टज्ञानकर्मणामवश्यंभाविमुक्तिर्नत्ववरोहसंभावनापि २३ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांएकविंशतितमोऽध्यायः
२१ ५ ५ सान्निवृत्तेःप्रवृत्ताख्यस्याधर्मस्यफलमीरितम् प्रवृत्तिमात्रनिष्ठानांषोडशोस्थितिरीर्यते १ साध्वहमिति पूर्वंप्रवृत्तेचनिवृत्तेचानित्यंब्रह्मपराय
णइत्युक्तलक्षणस्यधर्मस्यफलंश्रुतंइदानींत्रेतायांकेवलप्रवृत्याख्येयज्ञादिरूपेधर्मेयत्साधुसमीचीनंतदेवाहंश्रोतुमिच्छामियेनसाधुनाआचरितेनविद्वांसां
ख्ययोगादीनांपरंतात्पर्यप्रतिपाद्यंअव्ययंब्रह्मपश्येयंविविदिषाद्युत्पत्तिद्वारेत्यर्थः १ अस्योत्तरंप्रकृतिसरूपार्थवादमुखेनैवाह दक्षस्त्विति दक्षःदेहार्द्धयोगवि

संवेदजननीधात्रीचेतिमात्राप्रचोदिता अणुतांतनुतांचैवजंतूनांकर्मभोगिनाम् २३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणि
एकविंशतितमोऽध्यायः २१ ५ ५ जनमेजयउवाच साध्वहंश्रोतुमिच्छामित्रेतायांब्राह्मणोत्तम यज्ज्ञात्वासर्वविद्यानांपरंप
श्येयमव्ययम् १ वैशंपायनउवाच दक्षस्तुपुनरालंब्यस्त्रीभावंपुरुषोत्तमः योगाद्योगेश्वरात्मानंविषण्णोगिरिमूर्द्धनि २ सुजानुः
पीनजघनासुभ्रूःपद्मनिभानना रक्तांतनयनाकांतासर्वभूतमनोरमा ३ दक्षःप्राचेतसस्तस्यांकन्यायांजनयत्प्रभुः देहार्द्धयोगविधि-
नाकन्याःपद्मनिभाननाः ४ दक्षःपुरुषरूपेणस्त्रीरूपमपहायवै दर्शनेसर्वभूतानांकांतःकांततरोभवत् ५ ताःकन्याःप्रददौदक्षःस्वयंप्रा
चेतसःप्रभुः ब्रह्मदेयेनविधिनाब्रह्मप्राशेनभारत ६ प्रददौदशधर्मायकश्यपायत्रयोदश सप्तविंशतिसोमायपत्नीहेतोःसमाहितः ७
दक्षोदत्वाथताःकन्याब्रह्मक्षेत्रंप्रपद्यच ब्रह्मणाध्युषितंपुण्यंसमाहितमनामुनिः ८ तप्यमानोमृगैःसार्द्धंचचारवसुधांनृप तृणमूलफले
र्हृष्टोहृद्यमतपसासकृत् ९

धिनास्त्रीभावंआलंब्येतितृतीयेनान्वयः सइममेवात्मानंद्वेधापातयत्ततःपतिश्चपत्नीचाभवतांतस्मादिदमर्द्धबृगलमिवस्वइतिश्रुतेःकीदृशंस्त्रीभावंयोगेश्वरस्यदक्षस्यैवात्मा
नंआत्मभूतं २ ३ कन्याःजनयत् अजनयत् अडभावआर्षः ४ दक्षइतिस्त्रीरूपंअपहायपुरुषरूपेणास्थितइतिशेषः ५ ब्रह्मदेयेनब्राह्मणानांदातुंयोग्येनविधिनाअ-
लंकृत्यकन्यामुदकपूर्वंदद्यादेषब्राह्मोविवाहइतिस्मृत्युक्तेनब्राह्मेणविधिनेत्यर्थः ६ ७ ब्रह्मक्षेत्रंप्रयागंअध्यासितं ८ तप्यमानइति एतावताच्चेताधर्मस्वरू
पंदारसंग्रहमपत्योत्पादनम् अपत्यसंविभागोवनंप्रतिगमनंचकेवलप्रवृत्तिधर्मैरेतस्यकर्तव्यमितिदक्षाख्यायिकामुखेनदर्शितमितितात्पर्यंदर्शितम् ९ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मृगास्तुनस्यतपसेत्यनुषज्यतेमोदंते अहिंसाप्रधानत्वात्तपसइतिभावः ब्राह्मणास्तुतपसःफलंअहिंसाप्रतिष्ठायांतत्सन्निधौ वैरत्यागइतियोगशास्त्रोक्तंदृष्ट्वा
मोदंतेदीक्षिताःइत्यादीनिब्राह्मणानांविशेषणानि १० संग्रामःयोगेनचित्तजयःतस्यकालेशरीरादीनांपतिः यथेष्टंप्रविलापनपरिग्रहसमर्थः अतएवसर्वज्ञत्वात्
कर्मणांसिद्धिंफलंप्राप्तिंस्वर्गनरकादिगत्यागतिरूपांपश्यति लक्ष्यतेसालक्षणातांपरिमेयामित्यर्थः ११ एवंदक्षाख्यायिकयापत्नीमपास्यवनंप्रतिगच्छेद्रिपु
त्कासपत्नीकस्यापिनदाहपुरा कल्पसरूपार्थवादमुखेन दानेति १२ स्तोत्रंवेदाध्ययनंयस्मैनूनमभिधत्तेवाचाविरूपनित्ययाकृष्णोचोदस्वसुष्टुतिमिन्त्रवर्णात्
तेनसंसिद्धाःशुद्धसत्वाःजनित्रंप्रथमंपदंब्रह्मतस्मिन्विषयेब्रह्मणाप्रणवेनइहअस्मिन्नेव जीवद्देहेअध्युषिताअधिवासनिष्ठांप्रापितास्तेनायंदेहोब्रह्मक्षेत्र-
मित्युच्यतेवेदेब्रह्मोपलब्धिस्थानत्वात् १३ यतिभिरुच्यतेइतिसंबंधः १४ एवंसपत्नीकानामपिवनस्थानांयोगजासिद्धिरस्तीत्युक्त्वायोगफलमाहयाप्रजे

मृगास्तुनस्यमोदंतिफलंमोदंतिब्राह्मणाः दीक्षिताःपुण्यकर्माणस्तपसादग्धकिल्बिषाः १० संग्रामकालेकालज्ञःशरीरादिपतिर्मुनिः कर्मयज्ञ
कृतांतानसिद्धिंपश्यतिलक्षणाम् ११ दानमानप्रवीराश्चनिरुद्धानिराशिषाः मृगैःसहजरांयांतिसपत्नीकास्तपस्विनः १२ ब्राह्मणास्तोत्रसं
सिद्धाजनित्रेप्रथमेपदे ब्रह्मणाध्युषितत्वाच्चब्रह्मक्षेत्रमिहोच्यते १३ यतिभिःकर्मभिर्मुक्तैर्जितक्रोधैर्जितेंद्रियैः चरद्भिर्वसुधांविप्रैरकिं-
चनपर्येषिभिः १४ याप्रजापूर्वमारूढामानसीब्रह्मचारिणी सैवैषाव्यक्तिमापन्नास्वभावदुरतिक्रमा १५ अव्यक्ताव्यक्तमापन्नास्वभा
वाद्दुरतिक्रमा व्यक्ताव्यक्तगतिश्चैषाकालधर्मान्महीपते १६ स्थावराजंगमाश्चैवस्थूलाःसूक्ष्माश्चभारत कालयोगेनकालज्ञाभवंतिनभवं
तिच १७ एताश्चैताःप्रजाःसर्वादक्षकन्यासुजज्ञिरे कश्यपेनाव्ययेनेहसंयुक्ताःकालधर्मणा १८ आदित्यावसवोरुद्राविश्वेचसमरुद्ग-
णाः नागाश्चानेकशिरसःसाध्यावैपन्नगास्तथा १९ गंधर्वाःकिन्नरायक्षाःसुपर्णाश्चतथापरे गरुत्मान्सहयक्षैश्चकिन्नराश्चसुवाससः
२० गावःपशुगणैःसार्द्धंनराश्चवसुधाधिप चराचरत्ववसुधाधर्तारश्चधराधराः २१

निसर्वंसर्वात्मकत्वात्हार्दाकाशाख्यंब्रह्मतदारूढामानसीमनोमा-
त्रकल्पिताब्रह्मचारिणीब्रह्मरूपेणैवगम्यमानासमाधिकालेदृष्टासैवएषालोकदृश्यावहिर्धास्वभावेनसंस्कारेणप्रारब्धबलेनदुरतिक्रमाअतिक्रमितुमशक्यासमा
धौब्रह्मभावंगतस्यापिप्रारब्धकर्मवशात्पुनःसंसारभजनमवश्यंभावीत्यर्थः १५ अव्यक्तेति स्वभावादेवसमाधावव्यक्तंरूपमापन्नाप्रजाप्रवर्तिव्युत्थाने तत्रहे
तुःकालधर्मान्व्युत्थानसमाधिकालभेदक्षणाद्धर्मात् प्रजाव्यक्ताव्यक्तरूपाभवति १६ एवागतिःप्राणिमात्रसाधारणेत्याह स्थावरेति यतःस्थावराणामपियोगज्ञत्वं
संभवतितस्मात्तदर्थंयतितव्यमितिभावः१७ एवंप्रसंगादपत्नीकसपत्नीकयोर्योगेऽधिकारमुक्त्वाप्रकृतांसृष्टिमनुसरति एताश्चेत्यादिभिःसार्द्धषड्भिःकश्यपेनानिमित्तेन अव्य
येनस्वभावेनकालधर्मोयस्यतेन १८ १९ २० २१ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२२ २३ धातायथापूर्वमकल्पयदितिश्रुतेः पूर्वोक्तिमपिसर्वंसर्वेषुकल्पेषुसमाननामरूपाधिकारमेवआनेप तव्यमित्याह तेषांरूपैरितिमुनयइतिसृज्यमानोप
लक्षणम् धर्मक्षेत्रेधर्मप्रसवभूमौभारतेवर्षे २४ क्षेत्रज्ञाःआत्मनिष्ठास्तुमानसेमनःकल्पितेबाह्येअभ्यंतरेवापूर्वोक्तिदिशाविर्भवंति यत्रोतिमानसेइत्यस्यवि
शेषणम् २५ गृहस्थादीनामप्युक्तविधयोगधर्मानुष्ठायिनांमुक्तिरस्तीत्याह त्रिभिःयेचेति २६ २७ शिलंकणिशादानंउंछंकणादानंदिविचराःहार्दाका
शचराःचरितव्रताःयस्माद्भवंतितस्माद्भूतचर्यैवमुख्यानाश्रमविशेषोमोक्षहेतुरितिभावः अतएवयाज्ञवल्क्योगृहस्थस्यापिमोक्षमाह न्यायागतधनस्तत्त्वज्ञान
निष्ठोतिथिप्रियः श्राद्धकृत्सत्यवादीचगृहस्थोपिविमुच्यतइति २८ इतिश्रीहरिवंशेभविष्यपर्वणिटीकायांद्वाविंशतितमोऽध्यायः २२ ७ ब्रह्मचर्यव्रतच-
र्येत्यस्यसूत्रेसप्तदशेव्रतम् प्राणयज्ञहविर्यज्ञसंज्ञंचित्तजयावहम् १ पूर्वाध्यायांतेसर्वेदिविचराभवंतिव्रतचारिणइत्युक्तंतत्रमनोजयाख्यंव्रतंएकादशेप्रोक्तमेवो

गजाःसिंहाश्चव्याघ्राश्चहयाःपक्षधरास्तथा खड्गाविषाणिनश्चैववृषभाश्चमृगास्तथा २२ चतुर्विषाणानागेंद्राःपद्माभावर्णतःशुभाः सर्वल
क्षणसंपन्नाःप्राणिनःकामरूपिणः २३ तेषांरूपैस्तथागात्रैस्तैःशीलैस्तैःपराक्रमैः मुनयःपुनरुद्भूताधर्मक्षेत्रेसनातने २४ क्षेत्रज्ञामान
सेल्लोकेधर्मिणोवेदगोचराः यत्रोद्भूताःसुराःसर्वेदिविल्लोकेप्रतिष्ठिताः २५ येचान्येतपसासिद्धागृहस्थामनुजाधिप ब्रह्मचर्येणसंसिद्धाः
परिचर्यागताःगुरोः २६ येचयोगगतिंप्राप्ताःसिद्धिहेतोर्महीपते क्लेशाधिकैःकर्मजन्यैर्नित्यंसिल्पप्यंतितेद्विजाः २७ शिलोंछवृत्तयःख्या-
ताःसपत्नीकादृढव्रताः सर्वेत्वितेदिविचराःभवंतिचरितव्रताः २८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिनामद्वाविंशाति
तमोऽध्यायः २२ ७ वैशंपायनउवाच पितामहंपुरस्कृत्यमेरुपृष्ठेसमाहिताः जटाजिनधराविप्रास्त्यक्तक्रोधाजितेंद्रियाः १

समाधिकारिणांमध्यमाधमानांतुचित्तजयायात्मविविदिषोत्पादनायचतृतीयाध्यायेसूचितंव्रतद्वयंप्राणरोधाख्यंहविर्यज्ञाख्यंचतदिहद्वयमभिधीयते तयोरा
द्यमपियज्ञरूपकेणैवविवक्षन् वैशंपायनउवाच पितामहंपुरस्कृत्येत्यादिश्लोकत्रयोक्तविशेषणाःव्रतहितेरताःदिविब्रह्मणिचराःसंचारिणोभवंतीति
पूर्वेणान्वयः अत्रयोगचिंतामणौसांख्ययोगेचक्रमध्येस्थितानाड्यस्तिस्रःतिस्रोचदेवताः इडाचवैष्णवीनाडीपिंगलाब्रह्मदेवताः ऐश्वरीसासुषुम्णास्या-
न्मेरुमध्येव्यवस्थिता नाडीमध्यमताग्रंथित्रययुक्तात्रिवेणिका उत्तरेवहतेगंगायमुनादक्षिणेस्मृता सरस्वतीपश्चिमायामासांसंगःसदांतरइत्युक्तेमेरुर्ना-
सिकातस्याःपृष्ठंभ्रूमध्यप्राणमध्यंतस्मिन् समाहिताःसमाधिंगताःकिंकृत्वापितामहंकार्यस्यपिताकारणंतस्यपिताब्रह्मह्मतत् पुरस्कृत्यतत्प्राप्तिमाहृत्य १ ३५
पर्वतेति पर्वतांतरसंसिद्धेपर्वतानांपर्ववतामस्थ्नांनासावंशकपालादीनामंतरेसंसिद्धंनित्यसिद्धंतन्नाशोप्यविनाशीहार्दाकाशप्रकृत्यचवधेनास्यहन्यतेइति

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रुतेर्देहनाशेपि आत्मोपलब्धिचक्राणामनाशावगमात् बहुपादपसंकुले बहुपादो नानायोगिगमनसाधनं धर्माधर्मवाहजहंकारः तंपातीति तदुपाधिः प्राणो वायुस्तेन संकुले धातुसंरंजितशिले धातवे वातपित्तकफाः मनःशिलादिधातुसरूपा नाडीमार्गवार्त्तैः संकुला शिला इव शिला आस्थिरूपा यस्मिन् समे सर्वस्य ब्रह्मण उपलब्धिस्थाने तृणं बहिष्ठत्वाज्जरारोगादिदुःखकंटकः अंतस्थत्वाच्छोकादिदुःखं देहद्वयधर्मरहितमित्यर्थः २ त्रयो ये ब्रह्मवेदयंतितेषां त्रयाणां ब्रह्मवेदानां इडापिंगलासुषुम्णारूपाणां जीवोपाधिभूतप्राणमार्गाणां संबंधिनः पंचस्वरास्स्वर्यंते गम्यते ब्रह्म यैस्ते स्वराः प्राणस्य वृत्तिभेदाः प्राणापानसमानव्यानोदानाः तैर्विराजिते पंचानामपि वायूनामेकीभावस्थाने इत्यर्थः मंत्रयज्ञपरा नित्यं मंत्राः प्राणादीनां तु रेफादिप्रभृतीनि बीजानि तेषां यज्ञो जपः तत्पराः नित्यं व्रते वायुजये हिते आनंदरूपे आत्मनि च रताः अत्र पंचानामपि प्राणादीनां स्थानवर्णबीजानि तानि नकुलीशयोगपरायणे प्रोक्तानि वर्त्तंत इति उक्तानि विशेषणानि मेरुपृष्ठे युज्यंते तानि च प्राणो घ्राणाग्रहृन्नाभिपादांगुष्ठांतसंस्थितः १ कृष्णोऽपानः कृकाटिस्थः पृष्ठपृष्ठांतपार्ष्णिगः सतारकवकारांतबीजेन विनियोजितः २ शक्रचापनिभो व्यानस्त्वगिंद्रियनिकेतनः तारकोपेतपांतश्च बीजतेजोविराजितः ३ मूर्धस्थो मध्यताल्वग्रकंठहृद्घनलाश्रयः उदानो ह्यरुणच्छायस्तारकाक्रांतयांतयुक् ४ श्वेतः

पर्वतांतरसंसिद्धे बहुपादपसंवृते धातुसंरंजितशिले समे निस्तृणकंटके २ त्रयाणां ब्रह्मवेदानां पंचस्वरविराजिते मंत्रयज्ञपरा नित्यं नित्यव्रतहितेरताः ३ एकमेवाग्निमाधाय सर्वे ब्राह्मणपुंगवाः विभिदुर्मंत्रविषयैः सुसमाहितमानसाः ४ त्रिधा प्रणीतो ज्वलनो मुनिभिर्वेदपारगैः अतस्ते तत्समापन्ना यदेकस्त्रिविधः कृतः ५ एक एव महानग्निर्हविषा संप्रवर्तते स्वधाकारेण मंत्रज्ञमंत्राणां कार्यसिद्धये ६

समानो हृन्नाभिसर्वसंधिनिकेतनः प्रणवाक्रांतलांतेन बीजेनात्यंतमुज्ज्वल इति ५ तत्रायं निष्कृष्टोर्थः मेरुपृष्ठाख्ये भ्रूघ्राणमध्योपलक्षिते ब्रह्मापि सर्वकारणे नित्यसिद्धे जीवोपाधिनानेकवर्णबीजवतानानावर्णनाडीत्रयसंचारिणा युते बाह्याभ्यंतर दुःखशून्ये क्रोधादिजयिनो निर्ममाः प्राणजयद्वारा चित्तवृत्तिमेकाग्रां कुर्वंति निरोधाभ्यासेन निर्विशेषं ब्रह्म प्रतिपत्तुमिति ३ एकमेव प्राणाग्निं आधाय आलंब्य मंत्रविषयैः मंत्राः उदाहृताः रेफादिमुख्याः तेषां प्रतिपाद्या विषयाः प्रीणनाद्याः प्रवृत्तिविशेषाः तैरुपाधिभिर्विभिदुः पंचधा प्राणापानादिप्रकारेण विभिन्नं चक्रुः यथोक्तं तत्रैव काष्ठो वायुः प्राणनादिकर्मभेदाद्यथाक्रमम् प्राणोपानसमानादिनामांतरमुपागत इति ४ त्रिधेति ज्वलनः प्राणाग्निः त्रिधा पूरकुंभकरेचकरूपेण प्रणीतो नाडीमार्गैः संचारितो अतः प्रणयनात्ते तत्त्वं प्राप्ताः पूरकाद्यभ्यासेनैव आत्मतत्त्वं अधिगम्यत इति भावः ५ एक एवेति एक एव प्राणाग्निः प्राणायामाभ्यासिनः हविषा आदेयानि च वक्ष्यामि क्षिप्रं योगस्य सिद्धये क्षीरघृतं च भिक्षान्नं मिताहारश्च शस्यत इति दत्तात्रेयोदितेन सम्यङ्निषेवितेन महान् भूत्वा सम्यक् योगिनो विक्षेपमकुर्वन् प्रवर्त्तते आरोहावरोहमार्गयोर्यथेष्टं संचरति अयमर्थः ना

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सिकांतो बहिरंतश्च द्वादश द्वादशांगुलमानेन प्राणः संचरन् तूलपिंडवत् घनीभूतः कुंभकाभ्यासेन तूलपिंडमिव शिथिलावयवसंयोगं कुर्यात् ततश्च बहिरंतश्च षट्त्रिंशत् षट्त्रिंशदंगुलमानेन परमाप्राणस्य गतिर्भवति स तदा सूक्ष्मोपि पुरोडाशवत्प्रथितो महानित्युच्यते एवंभूतस्य प्राणाग्नेः पार्ष्णिभागेन संपीड्य योनिमाकुंचयेद्दृढम् अपानमूर्ध्वमाकृष्य मूलबंधोयमुच्यत इत्यादिना हठोक्तप्रकारेण वायोरारोहः प्रसिद्धः भ्रुवोर्मध्ये प्राणमाविश्येति शास्त्रप्रसिद्ध एव अवरोहोपि योगियाज्ञवल्क्येनोक्तः संपूर्य कुंभवद्वायुमंगुष्ठात् मूर्ध्निमध्यतः धारयत्यनिलं बुध्या प्राणायामः प्रचोदितः व्योमरंध्रात्समाकृष्य ललाटे धारयेत्पुनः ललाटाद्वायुमाकृष्य भ्रुवोर्मध्ये निरोधयेत् नेत्रात्प्राणं समाकृष्य नासामूले निरोधयेत् नासामूलात्तु जिह्वाया मूले प्राणं निरोधयेत् कंठकूपात्तु हृन्मध्ये हृन्मध्यान्नाभिमध्यमे नाभिमध्यात्पुनर्मेढ्रे मेढ्राद्वह्न्यालये ततः देहमध्याद्गुदे गार्गि गुदादूरुमूलके ऊरुमूलात्तयोर्मध्ये तस्माज्जान्वोर्निरोधयेत् चितिमूले ततस्तस्माज्जंघयोर्मध्यमे तथा जंघातः समाकृष्य वायुं गुल्फे निरोधयेत् स्थानात्स्थाने समाकृष्य यस्त्वेवं धारयेत्प्रिया सर्वपापविशुद्धात्मा जीवेदाचंद्रतारकम् एतत्तु योगसिद्ध्यर्थमगस्त्येनापि कीर्तितमिति स्वधेति स्वस्मिन् शरीरे धानं निधानं देहे वायोर्धारणेति यावत् तस्याः कारणं करणेन हे मंत्रज्ञ राजन् मंत्राणां पूर्वोक्तानां रेफादिप्रभृतीनां प्रकाश्यत्वेन संबंधि कार्यं तत्तद्भूतजयः तत्सिद्धये ग्निः संप्रवर्तत इत्यर्थः तत्र धारणासिद्धय प्रोक्ता योगियाज्ञवल्क्येन यमादिगुणयुक्तस्य मनसः स्थितिरात्मनि धारणेत्युच्य

स्वयं च दक्षसंप्राप्तो भगवान् भूतसत्कृतः ब्रह्मा ब्राह्मणनिर्माता सर्वभूतपितामहः ७

ते सद्भिः शास्त्रतात्पर्यवेदिभिरित्यादिना व्योमांशे मारुतांशे च धारणां कुर्वतः शुभाम् त्रिदोषजनिता रोगा विनश्यंति न संशय इत्यं तेन यथेन दर्शिताः तत्र पादादिजान्वंतं जान्वादि पायुदांतं पाय्वादिहृदयांतं ततो भ्रूमध्यांतं ततो मूर्धांतं च क्रमेण भूम्यंबुतेजोवाय्वाकाशस्थानानि ब्रह्मविष्णुरुद्रेश्वरसदाशिवाधिष्ठितानि लवरयहबीजयुतानि तेषु तेषु पंच पंच घटिकापर्यंतं मनो धारयंस्तत्तद्भूतजयो भवति तथा परमात्मन्येव प्रणवेन नादांते धारणा मुख्या तथा तेजोबन्वेषु धारणां कुर्वतः क्रमात् वातपित्तश्लेष्मजा रोगा नश्यंतीति ज्ञेयं विस्तरभयात्तु न प्रपंचितम् ६ एवं त्रिधा प्रणीत इत्यादिना पूरककुंभकरेचकाभ्यासेन विपुलीकृतो हविष्याशनाभ्यासमहिम्ना वशीकृतो यत्र कुत्र चिद्धारितः प्राणाग्निस्तत्तद्धारणाफलं प्रसूत इत्युक्तं तत्र प्रणवेन परात्मन्येव धारितस्य प्राणस्य फलमुच्यते स्वयमिति दक्षते सर्वस्मिन्कार्ये संनह्यतीति दक्षः सूत्रात्मा तद्रूपेण संप्राप्तो भवति भगवान्सर्वैश्वर्यसंपन्नः भूतं नित्यसिद्धं च तत्तत्सत् च कारणं तेन सूतः निर्मितः आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ध्याननिर्मथनाभ्यासात्पाशं दहति पंडित इति श्रुतेः प्रणवेनात्मनि चेतो युंजतः प्रथमं उकारार्थभूतसूत्रात्मसाक्षात्कारो भवतीत्यर्थः स ३६
एवंभूतो दक्षो मुख्यो ब्राह्मण इति ब्रह्मा ब्राह्मस्य चतुर्मुखस्य निर्माता अत एव सर्वेषां भूतानामस्मदादीनां पितामहः ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कोयंदक्षइत्याशंक्यय॒ः पूरकादिनाराधितः प्राणाग्निःसएवाहमित्याह दंडीतियोयंपूर्वपूरककालेनासिकानलिकयापूर्यमाणत्वाद्दंडाकारमिव प्रासइति दंडीजातः स एवकुंभकावस्थायांचर्मीततइतिचर्मवर्मरूपेणसंवृत्तः सएवपुनः रेचकावस्थायांदंडरूपात्सूक्ष्मरूपेण शरकांडाकारत्वंपूर्ववत्प्राप्तः सएवसएषखड्गवत्तीक्ष्णधारः संसारवृक्षच्छेदनसमर्थः शिखीप्राणाग्निः पद्मनिभाननइत्यनेनदक्षरूपेणप्रसन्नइति लक्ष्यते अभवत् प्रसन्नभावेनन्यस्तसंतापोजितक्रोधोजितेंद्रियश्चस्व भावतोभवत् तत्रस्वाभाविकंवैराग्याद्याविर्भूतंनहठात्कृष्टमित्यर्थः यथोक्तंवृद्धैःउत्पन्नात्मप्रबोधस्यत्वद्वेष्टत्वादयोगुणाः भवंत्ययत्नतःसिद्धानतुसाधक रूपिणइति ८ यजतेइति ब्रह्मादक्षःपुष्करेआत्मतीर्थेमेधयाशास्त्राचार्योपदेशप्राप्तयाधीवृत्त्यासहसंगतोयजतेतन्निष्ठोभवति यस्यामवस्थायांइंद्र- आत्मदर्शिनेनप्रोक्तानिसामानिअहमन्नहमन्नइत्यादीनितैत्तिरीयप्रसिद्धानि इदमदर्शमिति ३ तस्मादिंद्रोनामेदंद्रोहवैनामतमिदंसंतमिंद्रइत्याचक्षते परोक्षेणपरोक्षप्रियाइवहिदेवाइत्यैतरेयकेचइंद्रशब्दस्यआत्मदर्शिनिप्रवृत्तिनिमित्तंदर्शितम् ९ ससमाहितोयोगीपूर्वसंस्कारात्समाधेरप्रच्युतयेतत्रयज्ञमेवक- ल्पितवानित्याह घृतमिति मखेबाह्ययज्ञेन्यस्तंदेवतोद्देशेनत्यक्तम् परमकंअभौतिकत्वात्श्रेष्ठं कल्पितंमनसैवनकर्मतः ब्रह्मणः सूत्रात्मनः पदेस्थानेसमाध्यवस्था-

> दंडीचर्मीशरीखड्गीशिखीपद्मनिभाननः अभवन्यस्तसंतापोजितक्रोधोजितेंद्रियः ८ यजतेपुष्करेब्रह्मामेधयासहसंगतः इंद्रप्रोक्तानिसा- मानिगीयतेब्रह्मवादिभिः ९ घृतंक्षीरंयवाव्रीहिः सर्वंपरमकंहविः वेदप्रोक्तंमखेन्यस्तंकल्पितंब्रह्मणःपदे १० निर्मथ्यारणिमाग्नेयींशमीग र्भसमुत्थिताम् सब्रह्माप्रथमंतस्मिन्नग्निमन्तुंप्रवर्त्तयत् ११ नह्यल्पंविहितंद्रव्यंयथाग्निर्यज्ञकर्मणि प्रवर्त्तयेद्धिभागेवाहुतद्रव्यमयंबलं १२

यामित्यर्थः १० निर्मथ्येति अग्नेःपरमेश्वरस्यतिरोधानस्थानभूतारणिरिवारणिरविद्यातांनिर्मथ्यविनाश्यशमीगर्भसमुत्थितम् शंसुखंईयतेगम्यतेनेनेतिशमी देहःशमीवृक्षतुल्योवातस्यगर्भेसम्यगुत्थितम् आविर्भूतं प्रथमंकारणंब्रह्मरूपमन्यमकल्पितमाग्निंअंतर्यामिणंप्रवर्त्तयत् अडभावस्त्वार्षः शरीरेनित्याविर्भूतमपिदेहाद्यभिमानवशात्तिरोहितेश्वरंसंतं देहाभिमानत्यागात्स्वेनेश्वरेणरूपेणाविर्भूवेत्यर्थः ब्रह्माब्रह्मवित्तस्मिन्सूत्रात्मनि ११ ननुयथासोमया गेआतिथ्यामग्निमंथनंक्रियतेयथावाचातुर्मास्येषुतद्वदिहापिघृतावत्काल्पनिकएवायंनिर्मथ्योग्निरस्तुकिंसूत्रादन्यस्यकारणाग्नेःकल्पनेनेत्याशंक्याह नह्य ल्पमिति यथायज्ञकर्मणिबाह्येअग्निनिर्मथ्य होम्यत्वेनविहितः अमृताहुतिरग्न्याहुतिःसैषास्वर्ग्याहुतिर्यदग्न्याहुतिरितिश्रुतिपूर्वकंमानसेयज्ञेतथात्रअन्या ख्यंअल्पंबाह्यंद्रव्यंविहितंनहियोगिनाइत्यंयज्ञाग्निंतनीयइतिविधिरस्ति किंतुयज्ञियसंस्कारदार्ढ्यादियोगेपितादृशाःसंकल्पाभवंति अतएवश्रुतिः सयदिपि- तृलोककामोभवति संकल्पादेवास्यपितरःसमुत्तिष्ठंतीतिचिरपरिचितानांपित्रादीनामेवयोगेनसंप्रज्ञातावस्थायामुत्थानमाह परिपक्वयोगिविषयंतुअद्द-

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कर्मेति कर्मयज्ञार्थं वर्द्धत इत्यनुषज्यते प्राप्तैर्वसुभिः कनकादिभिः कर्मभिरिष्ट्यादिभिः परान्वितैः परस्मिन्ब्रह्मणि समर्पितैः वत्सैश्च परिप्राप्तैरिति संबंधः छंदसि
रेपि व्यवहिताश्चेति धातूपसर्गयोः आर्षः संबंधः कोमलैः बालैः १९ ब्रह्मणा वेदघोषेण वृद्धः वयसा दक्षिणया वृद्धः यज्ञ आयुष्मान् सदक्षिणाभिरायुष्मा[न्]
ति श्रुतेः पुष्कलदक्षिणावानित्यर्थः तपसा ज्ञानेन वृद्धः ब्रह्मज्ञानमयस्तत्प्रधानस्तदर्थ इत्यर्थः विद्यया कर्मांगावबद्धउद्गीथाद्युपासनया २० मानसैरि[ति]
मनःकल्पितैः समिदादिभिः क्रियामूर्तिर्यज्ञात्मा ब्रह्मा ये च पदार्था अन्ये तस्माद्ब्रह्मणः स्वयंभूता विनापि कल्पनां स्वभावादेवात्मन्यध्यस्तान् घृतादीन् जुहोति २[१]
तेजोमूर्त्तिधरैः चिन्मयैः रूपैः द्रव्यदेवतादिभिर्यागरूपैः रूपैः तं तद्ब्रह्मणो यजनं सर्वप्राणभृतां कर्मणा न अस्पृशत् न स्पर्शं प्राप सर्वाधिकः यज्ञ इत्यर्थः २२ शम्य[ा]

कर्मप्राप्तैश्च पशुभिः कर्मभिश्चापरान्वितैः गोभिः पयस्विनीभिश्च परिवंशैश्च कोमलैः १९ ब्रह्मवृद्धो वयोवृद्धस्तपोवृद्धश्च भारत ब्रह्मज्ञा-
नमयो देवो विद्यया सहसंगतः २० मानसैश्च क्रियामूर्त्तिर्यैश्च भूताः स्वयं नृप ब्रह्मा जुहोति तांस्तस्मान्मरुद्भिः सहितस्तदा २१ तेजोमूर्त्ति-
धरै रूपैर्न च तत्कर्मणास्पृशत् वेदप्रोक्तेन विधिना सर्वप्राणभृतां नृप २२ निर्मथ्यारणिमाग्नेयीं शमीगर्भसमुत्थिताम् क्रतुना यजते पूर्वम-
ग्निष्टोमेन सप्रभुः २३ सदस्यास्तत्सदोऽध्यक्षं सुसुभे यज्ञकर्मणि जल्पंति मधुरा वाचः सानुसाराः क्रियास्तथा २४ कर्मभिश्च तपोयुक्तैः
वेदवेदांगपारगैः सूर्येंदुसदृशै राजन् विरराज महाक्रतुः २५ ब्रह्मघोषेण महता ब्रह्मावास इवापरः वसुधामिव संप्राप्तैः सर्वैरेव दिवौकसैः
२६ वेदवेदांगविद्भिश्च विनीतैर्ब्रह्मवादिभिः गतागतैस्तपःशांतैः स्वर्गलोके महीयते २७ ज्वलद्भिरिव विप्रैस्तैस्त्रिभिरेवाध्वरेऽग्निभिः
ब्रह्मलोक इवाभाति ब्रह्मणः स महाक्रतुः २८ इंद्रप्रोक्तानि सामानि गायंति ब्रह्मवादिनः वचनानि प्रयुक्तानि यजूंषि विततेऽध्वरे २९
तपःशांता ब्रह्मपराः सत्यव्रतसमाहिताः आययुर्मुनयः सर्वे मनोभिः श्रोत्रवादिभिः ३० होता चैव भवद्ब्रह्मा जनूब्रह्मत्वे च बृहस्पतिः
सर्वधर्मविदां श्रेष्ठः पुराणो ब्रह्मसंभवः ३१ यजमानश्च यज्ञांते विष्णोः पूजां प्रयुज्य च आदित्याः पश्चिमे गर्भे तपसा संवृते नृप ३२

गर्भेउत्पन्नो यो ऽश्वत्थस्तस्मादुद्भवो यस्यास्ताम् २३ अनुसराः सहायाश्च मसाध्वर्यादयः तत्सहिताः २४ २५ दिवौकसैः छांदसं अकारांतत्वम्
२६ गतैरागतैश्च महीयते क्रतुरित्यपकृष्यते मनुष्यलोके तु सुतरां महीयत इति भावः २७ त्रिभिरेव २८ सामानि स्तोत्राणि वचनानि शास्त्राणि
२९ श्रोत्रवादिभिः श्रुतमात्रानुसारिभिर्मनोभिः संकल्पैः ३० होता ब्रह्मा च बृहस्पतिरेव मूर्त्तिभेदं प्रकल्प्याभूदित्यर्थः ३१ विष्णोः पूजां विष्ण्वर्पणं प्र-
युज्य कृत्वा क्रतुमहिम्ना यजमानो दित्यागर्भे जात इति शेषः क्रतुभिर्देवत्वं प्राप्यामित्यर्थः ३२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रस्तुत वस्तुदर्शनं समाधावति प्राकृत कर्मणोत्रानधिकारादन्योग्निरत्र प्रकृतसूत्रादंतर ईश्वर एवग्राह्य यत् अल्पंद्रव्यं उत आज्यपयः प्रभृति अग्नौत्याग पूर्वकं-
प्रक्षिप्तं तद्धिकारभूतंस्वर्गेदिव्यदेहादितस्यबलं अत्रविभागैर्यथोच्चनीचस्थानं प्रवर्त्तयेन्नास्तिइत्यर्थः अल्पद्रव्यसाध्येषुहियज्ञेषुवित्तव्ययस्य रूपप्र-
ज्ञातारतम्येन फलतारतम्यमस्ति आत्मयज्ञे तु नायं विभागः सर्वेषां कैवल्यरूपस्य फलस्यैकरूपत्वादितिभावः १२ तर्हि किमर्थं संप्रज्ञातो हविरादिकल्पन
मुक्तमत आह फलानिति विततेऽध्वरे योगे यज्ञे हवींषि यानि विहितानि तैर्हविर्भिः फलानि च प्रयुक्तानि भवंति तं यथा यथोपासते तथा तथा प्रेत्य भवतीति श्रुतेः
यादृग्गुणविशिष्टमात्मानं चिंतयंति तादृक् फलभागी ब्रह्मलोके भवति ये तु ब्रह्मवादिनं अत्रैव ब्रह्मसाक्षात्कारवंतस्तेषां तानि फलानि अणिमाद्यैश्वर्याणि अ-
त्रैव निग्रहानुग्रह प्रयोगज्ञाः प्रयुंजते प्रकाशयंति तथा च काम्यमेव हविरादिकल्पनं न तात्विकमितिभावः १३ योगफलमेव भोग्यं तदाह षण्मासानिति बृ-
हस्पतिः देवाचार्यः परया ब्रह्म संपदा एषास्य परमा संपदिति श्रुतिः निर्विशेषावस्थया ब्रह्मसंबंधि नियज्ञे योगे विततेसति षण्मासान् अत्यंत संयोगे द्विती-
यामासषट्कं आदरनैरंतर्य दीर्घकालैः सम्यगभ्यस्तेसति चतुरोवेदान् बभाषे चतुर्भिर्वेदैः सह संवादं कृतवान् वेदान् लब्धवानित्यर्थः षण्मासादेव योगसि

फलानि तैः प्रयुक्तानि हवींषि विततेऽध्वरे प्रयुंजते प्रयोगज्ञा मुनयो ब्रह्मवादिनः १३ षण्मासांश्चतुरो वेदान् संबभाषे बृहस्पतिः ब्रह्मणो
वितते यज्ञे परया ब्रह्मसंपदा १४ शिक्षाक्षरसमेतायां मधुरायां समंततः सानुस्वरितरामायां सरस्वत्याः प्रभाषते १५ तेन ब्राह्मणशब्दे
न ब्रह्मप्रोक्तेन भारत विभाति समरवो व्यक्तं ब्रह्मलोक इवापरः १६ मखो ब्रह्ममुखोत्तीर्णैर्ब्रह्मशब्दैरनामयैः प्रयोगैः संप्रयुक्तस्य जल्पा-
न्विवसवर्द्धते १७ समिद्भिः सोमकलशैः पात्रैश्चैव बर्हिः स्रवैः यवैर्व्रीहिभिराज्यैश्च पूर्णैश्च जलभाजनैः १८

द्धिर्भवतीतिभावः तथा च मैत्रायणीयश्रुतिः षड्भिर्मासैस्तु युक्तस्य नित्ययु
क्तस्य देहिनः आनंदः परमो गुह्यः सम्यग्योगः प्रवर्त्तत इति १४ स लब्धवेदो बृहस्पतिर्वेदसंप्रदायं शिष्येषु प्रवर्त्तितवानित्याह शिक्षेतिसः सरस्वत्याः क-
र्मणि षष्ठी सरस्वतीं प्रभाषते सर्वेभ्यो वेदमध्यापयतीत्यर्थः सानुशिखरउपनिषदिति यावत् स्वरितं स्वर्गतिः तत्साधनं कर्म ताभ्यां रामाभिरामा तस्याः ब्रह्मा कर्मकांडाभ्यां
रमणीयेत्यर्थः १५ तेन वेदोपदेशेन ब्राह्मणानिः कर्मचोदनावाक्यानि तैः शिक्षंते इति ब्राह्मणः शब्दः तेन प्रवृत्तिप्रधानेनेत्यर्थः ब्रह्मप्रोक्तेन वेदोदितेन समी-
णा विरच्यमानः समरवः याज्ञिकप्रसिद्धो यज्ञः ब्रह्मलोक इव आध्यात्मिकयोगयज्ञ इव विभाति १६ मरवमेवस्तौति पदं विष्णुरजो ब्रह्मेत्यतः प्राक्तनेन संदर्भेण मरवदाति
ब्रह्मशब्दैः वेदशब्दैः अनामयैः अप्रमाण्यशंकाशून्यैः प्रयोगैः यथाश्रुतं विनियुक्तैः मंत्रैः संप्रयुक्तस्य सादरस्य यजमानस्य मरवो जल्पान्निवाविवर्द्धते १७ सोम ३७
कलशैः सोमधारणार्थैर्ग्रहचमसैः पात्रैः स्रुक्स्रुवादिभिः जलभाजनैः वसतीवर्यैः कैधनैः भाजनैः १८ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एवंकर्मफलंदेवताभावंसकरखबहुलमुक्तासुखदुःखस्पर्शशून्यंतेहवैशरीरस्यसतःप्रियाप्रिययोरपहतिरस्यशरीरंवावसंतंनप्रियाप्रियेस्पृशतइतिश्रुतिप्रसिद्धंशरीरतालक्षणंमोक्षंविष्णुपदमाह पदमिति पदंविष्णुरितिसामानाधिकरण्येनतद्विष्णोःपरमंपदमितिषष्ठीराहोःशिरइतिवदौपचारिकभेदपरेतिदर्शितं अजोनजायतेब्रह्मादिवदित्यजोकर्मप्राप्यःब्रह्माब्रह्मवित्विष्ण्वाख्यंनिर्द्वंद्वंकर्माप्राप्यंपदमेतीत्यर्थः निष्परिग्रहंनिर्गतज्ञाननत्कार्यं पदमेवस्तोतियत् इतिइंद्रादिपदसहस्राणीत्यर्थः ३३ अवध्यंसर्वकर्मफलगाभित्वंअवध्यमितिपाठेत्वविनाशिइतरत्रतुविनाशीत्यर्थः अजइत्यस्यव्याख्यानंव्यतिरिक्तमिति आत्मापिआत्मैवयस्यसुनयोभवंतीतिपदंविष्णोरभेदोव्याख्यातः ३४ परिग्रहाःपरितोगृण्हंतिबध्नंतीतिपरिग्रहाःविषयारूपादयःदोषप्राप्ताःरागादिदोषेणैवकल्पिताःतथाचाक्षपादाचार्यप्रणीतंन्यायोपबृंहितंसूत्रंदोषनिमित्तंरूपादयोविषयाःसंकल्पकृताइति बलात्पूर्वसंस्कारबलात्मनश्छादयंति अतोत्यंतावहितेनदोषानिग्राह्याइति

पदंविष्णुरजोब्रह्मानिर्द्वंद्वंनिष्परिग्रहम् यतःपदसहस्राणिभविष्यंत्युद्भवंतिच ३३ अवध्यंचाप्रमेयंचव्यतिरिक्तंचकर्मभिः आत्मापि-यस्यमुनयोभवंतिनिष्परिग्रहः ३४ परिगृहाश्चविषयादोषप्राप्तामहीपते दोषाश्चयुगपत्सर्वे छादयंतिमनोबलात् ३५ इंद्रियग्रामविषयेचरंतोनिष्परिग्रहाः परिग्रहंशक्रंबंधमविद्यालक्षणंविदुः ३६ विद्यालक्षणसंयोगान्नमनश्छाद्यतेनृप यदिचेन्मुनिशब्देनगृह्यतेब्रह्मवादिभिः ३७ वेदविद्याव्रतस्नातैर्नियतैःकुरुसत्तम दिविलोकाःसतांस्थानंलोकानांलोकउच्यते ३८ यत्रदेवाहव्यपुष्टानक्षय-यांतिभारत यजमानश्चभोगैःस्वैःकर्मप्राप्तोदितेपदे मोदतेसहपत्नीभिर्विज्वरोवसुधाधिप ३९ यज्ञावसानेशैलेंद्रंद्विजेभ्यःप्रददौप्रभुः दययासर्वभूतानांनिर्मलेनांतरात्मना ४०

भावः ३५ ननुरूपादिदर्शनंदेहवतामपरिहार्यंतत्कथंनिष्परिग्रह संवेत्स्यतीत्याशंक्य अहंममेत्यविद्यैवपरिग्रहोनदर्शनमात्रमित्याह इंद्रियेति चरंतोपिनिष्परिग्रहाएवभवंतिमुनयइतिशेषः ऐंद्रजालिक्यांसंपदितत्वविद्विवनसज्जतइतिभावःशक्रंवेदबोधितंधर्ममपि अविद्यालक्षणंपरिग्रहंबंधकमेवविदुरतोनिर्द्वंद्वमेवविष्णुपदंश्रेयइतिभावः ३६ विद्येति रागादिभिरितिशेषः कदानश्छाद्यतइत्यतआह यदिति ब्रह्मवादिभिर्यदियदामुनिशब्देनमुनित्वप्रतिपादकशब्देनतत्त्वमसिवाक्योपदेशेनवागृह्यतेऽनुगृह्यतेतदातदर्थमननात्ज्ञाततत्त्वोनरागादिभिः छाद्यतइत्यर्थः ३७ प्रासंगिकंविद्याफलादिकंसमाप्यप्रकृतंकर्मफलमनुसरति वेदेतिसतांलोकानांजनानांस्थानंयत्दिवितदेवकर्मठस्य लोकइत्युच्यतइत्यर्थः ३८ स्थानमेवविशिनष्टियत्रेत्यर्द्धेन कर्मप्राप्तोदितेकर्मभिःप्राप्तेअधिकारिभिश्चभुक्त्वेतत्पदमित्युदिते ३९ यज्ञेति शैलंदिव्यंदेहंपित्र्यंवागांधर्वंवादैवंवाप्राजापत्यंवाब्राह्मंचेतिश्रुतिप्रसिद्धंकर्मफलभूतंद्विजंद्विजेभ्यःत्रैवर्णिकेभ्योयजमानेभ्यःप्रभुर्यज्ञफलदातामहाविष्णुःदेवानांभूतपालकत्वाद्दययेति ४० ७ ७ ३८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तंशैलमितिशैलंसर्वगात्राणीतिसाम्नानाधिकरण्यंवेदाःप्रमाणमितिवत्सर्वगात्रात्मकक्षेत्ररूपंशैलंपरस्परविशेषिणोभेदद्दश्यामिथोब्राह्मणत्वक्षत्रियत्वादिजा
त्यभिमानेनविशेषवंतःभेत्तुंआत्मनोव्यतिरेकेणनिच्छेत्तुंनशेकुःसर्वोद्यमैः कृत्स्नैरपिकर्मभिःकिमर्थंभेदनंप्रविभागार्थंप्रकर्षेणविद्यादिभ्यआत्यंतिकव्यतिरेक
स्तदर्थंमोक्षार्थमित्यर्थः क्रतुकोटयापिमोक्षोनलभ्यतइत्याशयः ४१ ततइति देवताभावेप्युच्चनीचभावदर्शनिक्षोभेणश्रांतास्तेनिषेदुःवसुधातलेपुनःसंसा
रंप्रापुरित्यर्थःविवर्णवदनाःस्वर्गेभृशंदुःखेन ४२ सुपार्श्वइति शोभनंपार्श्वोपलक्षितंसामीप्यंयस्यससुपार्श्वःसद्गुरुःगिरिमुख्यःगिरतिहवेोद्विषंतंपाप्मा
नमितिश्रौतनिर्वचनात् पापच्छेत्तॄणांमुख्यःसमूलाविद्योच्छेदकत्वात् प्रणतःशांतःतान्प्रतिशिरसावेदांतवाक्येन ओमापोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोमि-
ति अनेनवाद्यादीनांब्रह्मभावप्रतिपादकेनअब्रवीत् ४३ नहीति अयंदेहाभिमानशैलःबलात्हठेनयुक्त्याविनाभेत्तुंनहिशक्यः तत्रहेतुःअसुसंगिभिःअ
सुष्ठुइंद्रियेषुसंगशीलैःदेहेंद्रियादिष्वात्मधीमद्भिः ४४ भेदनेउपायमाह एकीभूताःसमाहिताःसमाधिमंतोयदिसमाधौएकात्म्यंप्राप्ताअत्रह्येतेसर्वएकंभव

तंशैलंसर्वगात्राणिपरस्परविशेषिणः नशेकुःप्रविभागार्थंभेत्तुंसर्वोद्यमैरपि ४१ ततस्तेब्राह्मणगणानिषेदुर्वसुधातले श्रमेणाभिह
ताःसर्वेविवर्णवदनानृप ४२ सुपार्श्वोगिरिमुख्यस्तुवाग्भिर्मधुरभाषिताः अब्रवीत्प्रणतःसर्वान्शिरसातान्द्विजोत्तमान् ४३ नहिश
क्योबलाद्भेत्तुंयुष्माभिरसुसंगिभिः अपिवर्षशतैर्दिव्यैःपरस्परविरोधिभिः ४४ एकीभूतायदासर्वेभविष्यथसमाहिताः अविरोधेनयु
गपत्विभजिष्यथनिर्वृताः ४५ बलंहिरागदोषाभ्यांवर्द्धतेब्रह्मसत्तमाः विमुक्तंरागदोषाभ्यांब्रह्मवर्द्धतिशाश्वतम् ४६ यदाहंभेद-
यिष्यामिस्वर्गभिन्नैःशिलाशितैः धातुभिश्चाविसर्पद्भिःशिखरैश्चानुपातिभिः ४७

तीतिश्रुतिप्रसिद्धंहितत् अविरोधेनसर्वभूताभयदानेननिर्वृताःशांताःयादिभविष्यथतर्ह्येवेनंविभाजिष्यथसमाधिरेवदेहाहंधीभेदकइत्यर्थः ४५ बलमिति
बलंस्वभावःजयसामर्थ्यंरागःतत्सहचरोद्वेषाःताभ्यांवर्द्धतेच्छिद्यतेचौरादिकस्यवृद्धेर्द्यकिंचिद्रूपंब्रह्मब्रह्मनिष्ठावर्द्धतिवर्द्धतेआर्षस्तङ्भावः ४६ यदाह-
मिति अहंगुहाशयैश्चोद्यमानःएनंशैलंभेजयिष्यामियुष्मान्भेदनेनियोक्ष्यामितदेवभेत्स्यथेतिअध्याहृत्यश्लोकद्वयंयोज्यंअहंगुरुःगुहायांबुद्धौशेरतेतेसं-
स्काराःतैःस्वर्गभिन्नैःस्वर्गात्पृथक्भूतैः ऐहिकामुष्मिकभोगविरक्तैः एतएवशिलाशितैःस्फटिकशिलावदत्यच्छैर्धातवोदेहारंभकाणितेजोबन्नानितैस्तत्का
र्याणिवाक्प्राणमनांसिअन्नमयंहिसोम्यमनआपोमयःप्राणस्तेजोमयीवागितिश्रुतेःतेषांवागादीनांविसर्पणेनप्रवृत्तिलिंगेनेत्यर्थःशिखरैरिवोच्छ्रितैरिंद्रियैर
नुपातिभिःखलेकपोतन्यायेनतत्वेनपतनशीलैः ४७ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पार्श्वशब्देनसमीपस्थास्त्र्यादयस्तान्येवविवराणिचित्ताहिप्रवेशाबिलानितैर्विशीर्णैः तथानागैःश्वेतसर्पतुल्यैः शास्त्रादिव्यसनैः व्यालैःकृष्णसर्पतुल्यैः कामादि
व्यसनैश्चाविशीर्णैश्चोद्यमानः प्रेर्यमाणः एतैर्गुणैः प्रीतोगुरुर्यदादेहाद्यध्यासमपनिनीषत्तदैवतन्नाशोनान्यथेत्यर्थः ४८ तूष्णींबभूवुःवैराग्याद्यभावादात्म
नःदेहात्पृथक्करणव्यापारान्निवृत्ताइत्यर्थः ४९ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांत्रयोविंशतितमोऽध्यायः २३ ॥ अष्टादशेव-
पुर्भेत्तुमशक्तैःकर्मभूतले कर्तव्यंब्रह्मसदनेचित्तशुद्ध्यर्थमीर्यते १ बलिरिति तेषांशैलभेदासमर्थानांब्रह्मविदांकर्मविदांब्रह्मवादिभिस्तादृशैःऋत्विग्भिः
सार्द्धंपृथिव्यांबल्यादिकंवर्द्धतेतथादेवताविष्णुःअर्चा अर्च्यागुर्वादयः तेचपूज्यंतेतदाप्रभृतिशैलेंद्रवचनप्रतिग्रहप्रभृतीतिद्वयोःसंबंधः १ २ तत्रैव-
पृथिव्यामेवब्रह्मसदनेअविमुक्तंवैकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनमितिश्रुतिप्रसिद्धेवाराणस्याख्येअविमुक्तेतत्रैवेतिविशेषणंआध्या-

विशीर्णैःपार्श्वविवरैर्नागैश्चगलितैर्भुवि बहुभिर्व्यालरूपैश्चचोद्यमानोगुहाशयैः ४८ प्रतिगृह्यचतद्वाक्यंशैलेंद्रस्यप्रभाषितम् तूष्णींबभूवु
स्तेसर्वेतदाब्राह्मणसत्तमाः ४९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभाविष्यपर्वणित्रयोविंशतितमोऽध्यायः २३ वैशंपायनउवाच
बलिर्होमाश्चवर्द्धंतेअहन्यहनिभारत द्विजानांतपसाढ्यानांगृहधर्मेषुतिष्ठताम् १ देवताश्चार्चाश्चपूज्यंतेतदाप्रभृतिभारत तेषांब्रह्मविदांराज
न्पृथिव्यांब्रह्मवादिभिः २ तत्रैवब्रह्मसदनेसमेनिस्तृणकंटके प्राज्येंधनतृणेदेशेपुण्येपर्वतरोधसि ३ वासंयत्रप्रकुर्वंतिदृष्ट्वाभगवतः
क्रियाम् तपोर्थिनोमहाभागाब्रह्मचर्यव्रतेस्थिताः ४ गृहस्थधर्मनिरताजितक्रोधाःसमाहिताः यतयश्चापिकांक्षंतिधर्मेणेहविकांक्षिणः
५ वन्यैःकर्मफलैश्चैवरताब्राह्मणपुंगवाः अग्निहोत्रव्रतस्नाताजितक्रोधाःसमाहिताः ६ दैवयुक्तेनवायुक्ताःकर्मणाब्रह्मसत्तमाः चीरव
ल्कलसंवीतानियतानियतेंद्रियाः ७ चरंतोब्रह्मचर्यंचव्रतमास्थायदारुणम् अनेनविधिनाराजन्क्रमप्राप्तेनसर्वशः ८ क्रमाद्वेवेदसंस्का
रंपुण्यंप्राप्ताःसनातनम् पूर्वैराचरितंराजन्मुनिभिर्ब्रह्मवादिभिः ९

त्मिकभ्रूघ्राणसंध्याख्यब्रह्मसदननिवृत्त्यर्थंतदुपास्त्यनधिकारिणामेवप्रस्तुतत्वात् क्षेत्रमे
वात्रब्रह्मसदनशब्दार्थः पर्वतस्यविंध्यस्यरोधःसमीपे ३ भगवतःक्रियांप्राणिनांगत्यागतिरूपं तपोर्थिनःतपआलोचनेअत्रहिजंतोःप्राणेषुक्रममाणेषुरुद्रस्तार
कंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवतीतिश्रुतिप्रसिद्धमोक्षहेतुतत्वज्ञानार्थिनइत्यर्थः ४ यतइति सन्यासिनांगृहणं चोप्यर्थोयितयोपिइहकांक्षंति
वासमित्यनुषज्यते तेषामपिअविमुक्तेप्रतिष्ठानांविहारोनैवविद्यतइतिकाशीतोऽन्यत्रगमननिषेधात् विकांक्षिणोविशेषेणकांक्षाइच्छातद्वंतःइहवस्तुमित्यर्थः
५ वानप्रस्थाअपिएतदेवकांक्षंतीत्याह वन्यैरितिद्वाभ्यांएतेपीहवासंकांक्षंतीत्यनुषज्यते ६ दैवयुक्तेनअयाचितोपस्थितेनकर्मणायाच्ञादिनायुक्ताःवृत्य
र्थंप्रतिशेषः ७ ब्रह्मचर्यंब्रह्मनिष्ठांअनेनआश्रमक्रमेण ८ आचरितंसंस्कारम् ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नेति अवेदविद्वान् गृहधर्मेन आगच्छेत् कृत्स्नं वेदमप्राप्य गार्हस्थ्यं न कुर्यादित्यर्थः नच त्यागेन परिव्राजेन गच्छेत न्म्रियते एतच्च मनुनाप्युक्तं अनधीत्य द्विजो वेदान् नुत्पाद्य सुतानपि अनिष्ट्वा शक्तितो यज्ञैर्मोक्षमिच्छन् सर्वै व्रजत्यधइति एतच्चाविरक्तविषयं ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेदिति श्रुतिविरोधात् १० नापि वेदग्रहणात् प्राक्संन्यस्येदित्याह नैवमिति दुःस्थितं स्थानं अनिकेतत्वमित्यर्थः वेदसंचयस्यापियत्तामाह ऋचइति बह्वृचानां सामगानां चाध्वर्युवैदिनां पृथगेवसंचयः साम्नां यजुषां चाप्यृक्ष्वेवांतर्भाव इत्यर्थः ११ येचेति पुत्रिणो न स्युः गार्हस्थ्यं न चक्रुरित्यर्थः श्रुत्वा वेदांतानिति शेषः फलं ज्ञानं १२ यस्येति श्रुतं कर्म ब्रह्मणोः श्रवणं न गृहीतं नानुष्ठितं यस्य श्रवणमनुष्ठानं च नास्ति तं शूद्रतुल्यं राजा शूद्रकर्माणि कारयेत् १३ अथवेति अथवेति पक्षांतरे यत् ब्राह्मणः सन् ब्रह्म वेदं नाद्रियेत इति यत्तन्नैव विद्यते सर्वोपि ब्राह्मणो वेदवानेव अन्यथा ब्राह्मणत्वमेव तत्र नास्तीति भावः तेन तस्य शूद्रसमीकरणं-

नावेदविद्ब्रह्मन्नागच्छेन्नापि रौद्रव्रतं चरेत् नच त्यागेन गच्छेत गृहधर्मं न च त्यजेत् १० नैवं गच्छेत दुःस्थानमप्राप्ते वेदसंचयम् ऋचश्च संचयः पूर्वाः सामगानां च भारत ११ येचापि पुत्रिणो न स्युः श्रुत्वापि प्राप्नुयुः फलम् ब्राह्मणास्तपसा भ्रांता गुरोश्च परिचर्यया १२ यस्य नैव श्रुतं ब्रह्मन्न गृहीतं विशांपते कामं तं धार्मिको राजा शूद्रकर्माणि कारयेत् १३ अथवा नैव विद्येत यद्ब्रह्म नाद्रियो द्विजः द्वाभ्यां तु श्रोत्रविषये मनः पूर्वं समाहितम् १४ एवं सर्वेंद्रियारंभान् वेदपूर्वान्समाचरेत् ब्राह्मणो भूतिसंपन्नो य इच्छेद्भूतिमात्मनः १५ इति श्रीमहाभारते हरिवंशे भविष्यपर्वणि चतुर्विंशोऽध्यायः २४ वैशंपायन उवाच तेतु गोब्राह्मणा नागाश्चंद्रादित्यपुरस्कृताः ब्राह्मणान् पूजयन् देवान् वसुभिर्ब्रह्मसंभवैः १ नारदप्रमुखाश्चैव गंधर्वा ऋषयो नृप कुर्वंति सततं यज्ञे क्रमप्राप्तं पितामहम् २ वचोभिर्मधुराभासैः पंचेंद्रियानिवासिभिः सर्वभूतप्रियकरैः सर्वभूतहितैषिभिः ३

राज्ञामप्रसक्तमेव द्वाभ्यां ब्रह्मचारिगृहस्थाभ्यां श्रोत्रविषये श्राव्ये धर्मे ब्रह्मणि च पूर्वमध्ययनाध्यायनकालेऽ एव मनः समाहितं कृतं तस्मान्न ब्राह्मणस्यावहेलना राज्ञा कर्तव्येति भावः १४ उपसंहरति एवमिति यस्मादेवं तस्मात् भूतिर्विद्या भूतिं अपरोक्षज्ञानसंपदं १५ इति श्रीहरिवंशे भविष्य० टीकायां चतुर्विंशोऽध्यायः २४ एकोनविंशे श्रौतोपि यज्ञः कामादिविधुनः तेनेशभक्तिरेवैकांतमोहंत्रीति गद्यते १ तेत्विति द्वयोः संबंधः तेनारदादयः वैदिकमेवक मंश्रेयस्करं तदकरणे राजदंडश्चेति जानंतः गोब्राह्मणाः गौर्वाक् वेदप्रधाना इत्यर्थः नागाः नास्ति आगो विध्यपराधो येषु ते नागाः रजःप्रकृतिभावाः स भासांतश्चंद्रश्च आर्षः चंद्रादित्याभ्यां कालो लक्ष्यते दर्शपूर्णमासौ पुरस्कृत्येत्यर्थः ब्राह्मणान् ब्रह्मभावान् देवान् ऋषींश्च पूजयन् अपूजयन् अडभाव आर्षः वसुभिः हविर्दक्षिणाभिः ब्रह्मसंभवैरिति ब्रह्मैव ब्रह्मणार्चितवत इत्यर्थः १ क्रमप्राप्तं ब्राह्मणपूजया क्रमेण पितामहं ब्रह्माणमपि अपूजयन् कुत्र यज्ञे पुत्रयज्ञे पुत्रपूजया पितुराल्हादो भवतीति तद्धेतुः २ पंचेंद्रियाणि निवासयंति निश्चलीकुर्वंतिते: ३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तमसादेहनिगडेक्षिप्तमात्मानमुत्तमः उद्धरेत्सत्वसामर्थ्यादितिविशेषोनिरूप्यते १ मधुःआसुरोभावःमोहःपाशैःवासनामयैःमहेंद्रंआत्मानंपर्वतांतरेदेहमध्ये १
तमितिसतंबबंधेतिपूर्वेणान्वयःप्रन्हादवचनात्प्रन्हादोप्रहर्षःतदनुसारित्वाद्विषादाख्यस्यलयस्येतिभावःलक्षणंचयोगिनःपूर्णसत्वराहित्यंतदभिज्ञश्चमोहःइं
द्रस्यात्मनोबुद्धिसंक्षयात्भविष्यंद्वैतादर्शनरूपमैश्वर्यमाकांक्षन् सुषुप्तोनिर्विकल्पावस्थासदृशायांपातयिष्यन् इत्यर्थः २ बध्वेति युग्ममर्मविवर्जितैःभेद
स्थानरहितैरभद्यैरित्यर्थः अतएवआयसैरिवदृढैःविदारणैःअंतर्दुःखदैः ३ ४ द्वैधीभूताइतिप्रोक्तंद्वयाहप्रजापत्याद्यर्थमाह गंधर्वादियोरजःप्रधाना
मधोर्मोहस्यमनोधुन्वंतिविस्फारयंति ५ ६ ७ मधुनस्तमसःपद्मस्येवयस्ययोनिर्ब्रह्मेवेत्यर्थः राजस्यपिप्रकृतिस्तमोमूलिकैवेतिभावः ८ तत्रे-

वैशंपायनउवाच बलवान्सतुदैतेयोमधुर्भीमपराक्रमः बबंधपाशैर्निशितैर्महेंद्रंपर्वतांतरे १ तंवैप्रन्हादवचनात्लक्षणज्ञश्चभा
रत ऐश्वर्यमैंद्रमाकांक्षन्भविष्यबुद्धिसंक्षयात् २ बध्वेंद्रंसहसामध्येपाशैर्मर्मविवर्जितैः आयसैर्बहुभिश्चित्रैर्बलवद्भिर्विदारणैः ३
विष्णुसेनाग्रणीरुद्रमाव्हयद्युद्धकोविदः सुधेगणानांसर्वेषांकालस्यवशमागतः ४ द्वैधीभूताःकश्यपेयामधोर्वशमुपागताः युद्धार्थम
भ्यधावंतप्रगृह्यविपुलागदाः ५ गंधर्वाःकिन्नराश्चैववाद्यगीतेचकोविदाः प्रनृत्यंतिप्रगायंतिप्रहसंतिचसर्वशः ६ तंत्रीभिःसुमधु
राभिर्मधुराभिःस्वभावतः मनोमधोर्विधुन्वंतियुध्यमानस्यरागिणः ७ मधोर्बलार्थंमधुनोनियोगात्पद्मयोनिनः एतान्विकारान्कु
र्वंतिगंधर्वाःसत्यवादिनः ८ तत्रशक्तोहिगांधर्वेतस्मिन्शब्देमधुर्मनः दानवाश्चासुराश्चैवप्रत्यक्षयातिप्राणदन् ९ मधोश्चमनआक्षिप्य
पश्यन्योगेनचक्षुषा मंदरंप्रपतेविष्णुर्गूढोग्निरिवदारुषु १० ऋषयोदीप्तमनसःकिंचिद्व्यथितमानसाः पितामहंपुरस्कृत्यक्षणेनांतरधीय
त ११ विष्णुस्सोभ्यहनत्क्रुद्धोमधुर्मधुनिभेक्षणः भुजेनशंखदेशांतेनचकंपेपदात्पदम् १२ विष्णुश्चाभ्यहनद्दैत्यंकराग्रेणस्तनांतरे स
पपातमहींतूर्णंजानुभ्यांरुधिरंवमन् १३ नचैनंपतितंहंतिविष्णुर्युद्धविशारदः बाहुयुद्धेहिसमयमत्वाचिंत्यपराक्रमः १४ इंद्रध्वजइवो
त्तिष्ठन्जानुभ्यांसमहीतलात् मधूरोषपरीतात्मानिर्दहन्निवचक्षुषा १५ परुषाभिस्ततोवाग्भिरन्योन्यमभिगर्जतुः समीयतुर्बाहुयुद्धेप
रस्परवधैषिणौ १६ उभौतौबाहुबलिनावुभौयुद्धविशारदौ उभौचतपसाशांतावुभौसत्यपराक्रमौ १७ दृढप्रहारिणौवीरावन्योन्यंविच
कर्षतुः शैलेंद्राविवयुद्धांतौपक्षैःपाषाणसन्निभैः १८ विकर्षंतौवमंतौचअन्योन्यंवसुधातले गजाविवविषाणाग्रैर्नखाग्रैश्चविचेरतुः १९

तिप्राणदन्मधुस्तत्रगांधर्वेमनोदधावितिशेषः ९ आक्षिप्यआसमंतात्विषयेषुक्षिप्त्वास्वस्यापसरणेनसत्वंप्रयतेप्रगच्छतितिरोबभूवेत्यर्थः १० ऋषयोःमंत्रास्तज्ज्ञा
नानिपितामहंपरमात्मानंअंतरधीयतअंतर्हिताबभूवुःएकवचनमार्षं ११ विष्णुमित्यादिनाविष्णुदैत्यरूपकेणविवेकमोहयोर्युद्धमाहएकादशभिः १२ १३ १४ १५
१६ १७ १८ १९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

पंचाभिरिंद्रियैःसमाहितैरेकाग्रैःयज्ञंहब्राह्मब्रह्मापिदिष्ट्याभाग्येनएवंविधाभवतांयज्ञेप्रवृत्तिरितिस्तव्यमिदंकर्मेत्यर्थः ४ ५ भवान्यक्ष्यतेयक्षाःसुराश्चयक्ष्यं-
ते प्रतिगुणैःस्वस्वगुणासात्विकराजसतामसावाप्रतिगुणास्तैःस्वस्वाभिप्रायेणेत्यर्थः ६ एवंक्रतौप्रवृत्ते आध्यात्मिकाःदेवासुराःशमकामादयोमिथःस्पर्धमा-
नाआसन्तेषुशमादिभिस्तत्सादिंद्रियकर्मणास्तोत्रपाठादिनासुरान्जेष्यामइत्यध्यवसितैःसुरैःवागादिमनअंतानिसर्वाणींद्रियाणिपापविद्धानिकृतानिअतएवतेषां
शुभाशुभविषयप्रकाशकत्वमविशेषेणदृश्यते ततःप्राणाख्यंसूत्रात्मानंदेवाःश्रितवंतस्तेनसर्वेकामादयोनिहताइत्ययमर्थोद्वयाहप्राजापत्यादेवाश्चासुराश्चतत्र-
कानीयसाएवदेवाज्यायसोसुरास्तएषुलोकेष्वस्पर्द्धंतेत्यादिनाबृहदारण्यकेदर्शितस्तमुपबृंहयतिवयमिति ७ ८ विप्रैर्निरोद्धुमशक्याःद्विविधाःअपिवृत्त
इत्यर्थः ९ प्रयुद्धाःप्रकृष्टंयुद्धंयेषांते ततोयज्ञंविहायप्राणोपास्तौप्रवृत्तेस्वपितेषुसर्वेप्राणजयैषिणःअभूवन्सर्वशुभाशुभेंद्रियवृत्तिरूपाःसुरासुराःप्राणंसूत्रा

स्तूयमानश्चयज्ञांतेपंचेंद्रियसमाहितैः प्रोवाचभगवान्ब्रह्मादिष्ट्यादिष्ट्येतिभारत ४ ततःकश्यपमाभाष्यप्रोवाचभगवान्प्रभुः भवानपि-
सुतैःसार्धंयक्ष्यतेवसुधातले ५ क्रतुभिःपरमप्राप्तैःसंपूर्णवरदक्षिणैः यक्षासुराश्चतेसर्वेयथाप्रतिगुणैःप्रभो ६ वयंयक्ष्यामहेपूर्वंपूर्वंयक्ष्या
महेवयम् एवमन्योन्यसंरंभात्विवदंतेबलदर्पिताः ७ दैतेयाश्चाप्यदैतेयाःपरस्परजयैषिणः युद्धायैवप्रतिष्ठंतिप्रगृह्यविपुलौभुजौ ८
निवार्यमाणाऋषिभिस्तपसादग्धकिल्बिषैः अन्यैश्चविविधैर्विप्रैर्वेदवेदांगपारगैः ९ निवार्यमाणायुद्धंतेवृषभाइवगोकुले प्रयुद्धारंभ
संक्रांताःसर्वेप्राणजयैषिणः १० पश्यतांसर्वभूतानांमृत्योर्विषयमागताः ततःशब्देनमहतापरंक्रुद्धामहाबलाः ११ रुंधंतिबाहुभिःक्रु
द्धाःसपक्षाइवपक्षिणः चचालवसुधाचैवपादाक्रांताचरोचिभिः १२ नौर्यथापुरुषाक्रांतानिषीदतिमहाजले पर्वताश्चविशीर्यंतेन-
द्योनागजाइव १३ चुक्षुभुश्चमहानद्यस्ताडितामातरिश्वना ततःसमभवद्युद्धंमधोर्विष्णोश्चभारत १४ युगांतकरणंघोरंसर्वप्राणिभयं
करम् प्रममाथबलंविष्णुःसमग्रंबलपौरुषम् १५ वन्हेरिवबलंदीप्तंशमयत्यंबुनायथा तथाप्रशामितंतेनभगवत्यपकारिणा १६ इ-
तिश्रीमहा॰हरि॰भवि॰पंचविंशोऽध्यायः २५ छ छ

त्मानंजेतुमेषितवंतःतावत्तेवसर्वेपिनष्टाःपाषाणंप्राप्येवपांसुपिंडाः १० ततइति परंबाह्यें
द्रियवृत्तिसमूहंकृत्वाकर्त्तित्वाच्छित्वारुंधंतिमनइतिशेषः शब्देनशाब्दज्ञानजेनविवेकेनबाहुभिर्वातुल्यैर्वैराग्यादिभिः ११ तत्रापिपूर्वोक्तोरजस्तमोरूपोविघ्नउपस्थि
तइत्याहचचालेतिवसुधायोगभूमिःसत्वापत्याख्यारोचिभिःविषयवासनाज्वालाभिः १२ पर्वताःपर्वततुल्याःआसनबंधादयः१३नद्योनद्यःमातरिश्वनाप्राणवा
युनासूत्रभावादुत्थितोबभूवेत्यर्थः १४ ततइतिएवंविक्षिप्तंचित्तंपुनर्निरोध्यमानंसत्मधुनामानंलयंप्राप्नोति सचसत्वाख्येनविष्णुनाप्रतिहंतव्यइत्यर्थः
युगांतःसंसारांतः १५ बलंनिद्रातंद्राज्याड्यकषायांगमहादि १६ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांपंचविंशतितमोऽध्यायः २५ छ छ

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२० २१ २२ मुमुचुरिति अथ भूतानि पुष्करेताः स्तुतिः मुमुचुरितियत्तच्छब्दाध्याहारेण योज्यम् २३ शरीरमिति अनात्मनि देहादावात्माभिमानो विद्या
रव्यो मोहः तन्नाशायात्मानात्मनोर्विवेकाय स्थूलात् विविनक्ति धातवस्तेजोबन्नानि तेषां संयुक्तं संयोगः शरीरं तच्च मलपिंडतुल्यं चैतन्यं न संभावितमिति ततः पृथ
ग्भूतेन चेतनेनान्वितमिति वक्तव्यं तच्च चेतनं ब्रह्मैव तेजोभूतं चिन्मात्रं इंद्रियैर्युक्तं जीव इति शेषः २४ एवं जीवस्य ब्रह्मभावमुक्त्वा देहस्यापि तमाह ध्रुवमिति
ते देहारंभकाः भूतसूक्ष्मे कारणे ध्रुवं निश्चितं तिष्ठंति प्रलयतां प्रलयाधिष्ठानतां गते पुनश्च सूक्ष्ममेवानेकधा बहुरूपं भूत्वा पुनश्चोद्भवते अयं भावः शुद्ध प्रत्यक्चिद
ङ्मात्रमेवानिर्वचनीयमायामन इंद्रियादिभिः सूक्ष्मस्थूलस्थूलतरैः शबलपरागदृश्यरूपेण मुकुरे मुखमिव नेधाव भातितन्नातस्योपाधेः पूर्वस्मिन् लये लोचनोत्
जेनाक्षरन्यायेन स्थूलतरस्थूलरूपेणैवावशिष्यते एवं स्थूलमपि सूक्ष्मरूपेण तदपि मायापगमे चिन्मात्रेणेति युक्तं सर्वस्य ब्रह्ममात्रत्वमिति २५ प्रबोध्येति

ततो व्रणसुरैवेश्चैव सुस्राव रुधिरं बहु शोभांते धातुसंसृष्टं शैलेभ्य इव कांचनम् २० संसिक्तौ रुधिरौघैश्च स्नवद्भिः समरंजितौ अथोद्य
तैः पदाग्रैश्च तौ व्यदारयतां महीम् २१ अभिहत्य तु तौ वीरौ परस्परमनेकधा पतंगाविव युध्येतां पक्षाभ्यां संगृहीतौ २२ मुमुचुश्चांत
रिक्षे च सर्वभूतानि पुष्करे सिद्धा नावदनोन्मुक्ताः परयावर्णसंपदा २३ स्तुतयो विष्णुसंयुक्ताः सत्याः सत्यपराक्रमे शरीरधातुसंयुक्तं स
युक्तं चेतनेन च २४ तद्ब्रह्म इंद्रियैर्युक्तं तेजोभूतं सनातनम् ध्रुवं तिष्ठति भूतानां सूक्ष्मे प्रलयतां गते २५ पुनश्चोद्भवते सूक्ष्मं बहुरूपम
नेकधा प्रबोध्य भावं भूतानां त्रिषु लोकेषु कामदः २६ स्वरूपो बहुरूपास्तान् लोकान् संचरते वशी मानसीं तनुमास्थाय बहुभिः कारणां
तरैः २७ योगात्मा धारयन् धुर्वीं नागात्मा नदिवं धरः ब्रह्मभूतं परं चैव सूक्ष्मेणात्मानमीश्वरः २८ ब्राह्मेण विमानं वसति युक्तं च सत्रि
यान् प्रदानकर्मणा वैश्यान् शूद्रान् परिचरेण च २९ गावः क्षीरप्रदानेन अश्वान् यज्ञेषु मोक्षणैः पितरश्चोपभोगेन वेद हविर्भागेन देवताः ३०

त्रिषु लोकेषु कारणसूक्ष्मस्थूलरूपेषु भूतानां भावं स्वरूपं प्रबोध्य तानेव लोकान् स्वरूपचैतन्येनाभिव्याप्य वशी असंग आत्मा चरते भुंक्ते कर्मव्यतिहारेत २ लोकात्ज्ञानौ पर
स्परं भुंजाते पालयत इत्यर्थः २६ मानसामितिसार्द्धश्लोक एकवाक्यं २७ ईश्वरः सूक्ष्मेण रूपेण आत्मानं धारयन् चरते इति पूर्वेणान्वयः किं कृत्वा बहुभिः कारणांतरैः
दुष्टनिग्रहसाधुसंरक्षणादिभिः निमित्तैः मानसीं तनुं शेषकूर्मादिरूपं आस्थाय कीदृश ईश्वरः योगात्मा कीदृशमात्मानं शेषनागरूपं दिवं धरः द्युलोकस्य धर्ता ब्रह्म वेदं भूतं च चतु
र्विधं परं च पंचविधं भूतं धार्यं धारकश्चात्मैवेत्यर्थः २८ ब्राह्मेण वेदमयेन रूपेण विमानं अधिष्ठाय वसति सर्वत्र भगवानिति शेषः शेषं स्पष्टं २९ गाः अधिष्ठाय क्षीरप्रदा ४१
नेन वः युष्मान् अन्यानि यज्ञेषु अश्वान् याज्ञिय द्रव्याणि अधिष्ठाय मोक्षणैः फलान्यत सेकैश्च वः पांति पितरः पितॄन् उपभोगात् अन्यमाण हविर्भागेण उपभागा हि पितर इति श्रुतेः
३०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यत्ससप्तान्नानिमेधयातपसाजनयत्पिता एकमस्यसाधारणं द्वेदेवानभाजयत् त्रीण्यात्मने ऽकुरुत पितृभ्यः एकं प्रायच्छदितिसप्तान्नं ब्राह्मणार्थं संगृह्णातिचतुर्भिरिति
धातुभिः दर्शपूर्णमासपिंडपितृयज्ञसाधारणंतैः त्रिभिर्मनोवाक्प्राणैः एवंसप्तभिरन्नैः पितृभिः सहत्रींल्लोकान्परिरक्षति किंभूतैः सप्तभिः नित्यैः अकरणे प्रत्यवा
यकरैः ३१ चंद्रेति एतत्सप्तकंचंद्रसूर्यात्मकंयथात्मकंयथायोगं प्रकाशं अर्चिरादिमार्गरूपं अप्रकाशं धूमादिमार्गरूपं निहतः संकटे पातित आत्मा येन तत् स्वेन-
तेजसाचित्प्रकाशेननिगूढंव्याप्तंचसप्तकम् ३२ एतदेवविभजंते त्रयोमनोवाक्प्राणाः पितरइत्यनेनसप्तभेदमेषामाह निगृहीताएते ऽनावृत्तिफलं अर्चिरादि
मार्गं वर्द्धयंति अन्योन्यमित्यर्थः ३३ एतदेवाह त्रयइतितेपूर्वोक्तास्त्रयः पितृगणानित्यंनियमेनपश्चात्फलभोगांते पिंडान् स्थूलसूक्ष्मकारणदेहान् अदंतिसंहरंति
मनोवाचंप्राणंतान्यात्मनेकुरुतइतिश्रुतेः उपासिनाः मनोवाक्प्राणाः अवश्यंक्रमेणआत्मनोमुक्त्यैभवंतीत्यर्थः अन्येपितृगणास्तुउक्तादर्शादयः सिद्धाः शरीराकार-

चतुर्भिर्व्यतिरिक्तांगैस्त्रिभिरन्यैश्चधातुभिः सप्तभिःपितृभिर्नित्यैस्त्रीन्लोकान्परिरक्षति ३१ चंद्रसूर्यात्मकंनित्यंतद्रूपनिहतात्मकम् प्र-
काशंचाप्रकाशंचनिगूढंस्वेनतेजसा ३२ त्रयस्तुपितरोनित्यंवर्द्धयंतिदिवाकरम् चतुर्भिःपितृभिश्चैवचंद्रोवर्द्धतिमंडले ३३ त्रयःपितृ-
गणानित्यंपिंडान्यश्नाददंतिते चत्वारोन्येपितृगणाःसिद्धाःपंचकआददे ३४ त्वमेवपंचतान्धर्मांस्त्वमेवापंचतान्विभो सनातनप्रयो-
द्विभ्यःशाश्वतोब्रह्मसंभवः ३५ तस्मात्तत्तेजआदत्तेअग्निर्वायुश्चसर्वशः अतस्त्वंकर्मणातेनआदित्यःसमपद्यत ३६ यदश्नासिजगत्स
वैरश्मिभिःप्रदहन्निव युगांतकालेसंप्राप्तेपरांसिद्धिमुपागतः ३७ पक्षसंधावमावास्यांलोकंचरसिमानुषम् ऋषिभिःसहमुदात्मासूर्यै
र्वसुसंभवैः ३८ सफलंकर्मकुर्वाणंयजतांपुष्टिवर्द्धनम् हेतुनामविकारायमाभूत्कर्मविपर्ययः ३९ वानस्पत्योषधीश्चैववसुंगपत्यातिपद्य
से बालभावायवसुधांपक्षेपक्षेजनीस्तव ४० भूतानांभूविभूतेशभाव्यर्थंवसुधातले वसुयद्भुविकिंचिच्चसर्वंतत्त्वमयाविभो ४१

परिणताः पंचविषयादयोभवंतिकेतेयान् कः प्रजापतिर्यजमानः आददे आत्मत्वेनस्वीकृतवान् दर्शादिफलंदेहांतरप्राप्तिरेवनित्येत्यर्थः ३४ त्वमेवपंचतान्वि-
षदादीन्धर्मान्कनकमिवकुंडलादीन् ३५ तस्मादिति आदीयतेन्यैरग्न्यादिभिः स्वप्रयनायेत्यादित्यः सूर्यवत्प्रकाशकः ३६ प्रकारांतरेणादित्यपदार्थमाह
यदिति आदानादादित्यइत्यर्थः आदत्सीतिपरस्मैपदंआदातुःस्वर्गादिफलाभावात् ३७ पक्षसंधौपूर्णिमायांअमावास्यांअमावास्यायां ३८ हेतूनांस्व
र्गादिसाधनानांकर्मणांअविकाराय त्वमेवाह माभूदितिकाललोपेनधर्मवैफल्यंमाभूदित्यर्थः ३९ वनस्पतीति ओषधीर्वनस्पतींश्चदर्शेवसुधांचपृथिवींचंद्र
रूपेणप्रतिपद्यतेबालभावायपुनरुत्पत्तये ४० भूतानामतीतानांभाविनांअनागतानांच अर्थेप्रयोजनाय यत्किंचिद्वस्तुतत्सर्वंत्वन्मयमेव ४१ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्वमेवेति देवयज्ञंदेवयज्ञाद्यात्मकं कर्मविशेषणत्वात्क्लीबत्वम् ४२ द्विविधइति चंद्रसूर्यपदयोर्विवरणंचंद्रमाइति ४३ त्वमेवेति वसुधायुक्तो भौमप्राणिरूपेणचरसिविषयान्सेवसेसीमयामर्यादयानियमेन वसुधायुक्तत्वमेवाहैकीकृत्येति गणानूइंद्रियादीन् संक्षिप्यदेहमात्ररूपेण अमुत्रसंभवइत्यगोचरत्वंदर्शितं ४४ कामकारोलीला ४५ तेजसिरूपात्मनासंभूतः अतएवमूर्त्तश्चक्षुर्ग्राह्यः सप्तभिर्महदहंकारपंचतन्मात्राख्यैः ४६ साधनेसमानांसाधनकालेजीवरूपेणत्वमेवासिनिर्वाणेरुद्ररूपेण संहारेदैनंदिनलये प्रलयेब्राह्मलयेचरुद्ररूपेणधातापालयितानिष्णुरूपेणदिशोवर्णाश्रममर्यादातुत्वमेवासिधारिणिपोषके चक्षुषिइंद्रियेचचिद्रूपेणप्रवर्त्तकत्वेनत्वमेवासि ४७ सत्यंब्रह्मसमरागैः शत्रौमित्रेचतुल्यप्रीतिभिः सर्वस्यात्मत्वात्तेषांद्वेषोनास्त्येवातएवजितेंद्रियैःनित्य

त्वमेवविविधंधर्मंशाश्वतंवसुधातले देवयज्ञंमंत्रवाक्यमात्मयज्ञंसमानुषम् ४२ द्विविधःस्वर्गमार्गश्चसूर्यश्चंद्रश्चनिर्मलः चंद्रमाःपितृयानश्चदेवयानश्चभास्करः ४३ त्वमेववसुधायुक्तोविश्वंचरसिसीमया एकीकृत्यगणानूसर्वान् संक्षिप्यामुत्रसंभवः ४४ एकस्त्वमसिसंभूतःपुराणपुरुषोविराट् अक्षयश्चाप्रमेयश्चकामकारकरोवशी ४५ मूर्त्तस्तेजसिसंभूतोवायुःपर्येतिखेचरः सप्तभिर्रूपसंस्थानैर्नित्यमात्यतिष्ठति ४६ साधनेचापिनिर्वाणेसंहारेप्रलयेतथा धाताधारणकालेचादिशश्चक्षुषिधारिणि ४७ सेव्यमानोमुनिगणैर्नित्यंविगतकिल्बिषैः कर्मभिःसत्यमापन्नैःसमरागैर्जितेंद्रियैः ४८ स्तूयमानश्चविबुधैःसिद्धैर्मुनिवरैस्तथा सस्मारविपुलंदेहं हरिर्हयशिरोमहान् ४९ कृत्वावेदमयंरूपंसर्वदेवमयंवपुः शिरोमध्येमहादेवोब्रह्मातुहृदयेस्थितः ५० आदित्यरश्मयोबालाचक्षुषीशशिभास्करौ जंघेतुवसवःसाध्याःसर्वसंधिषुदेवताः ५१ जिह्वावैश्वानरोदेवःसत्यादेवीसरस्वती मरुतोवरुणश्चैवजानुदेशेव्यवस्थिताः ५२ एवंकृत्वातथारूपंसुराणामद्भुतंमहत् असुरंपीडयामासक्रोधात्रक्तांतलोचनः ५३ मधोर्मेदोवपूर्णांचपृथिवींसमदृश्यत प्रमदेवघनाढ्यैवशकुंशकनिवासिनीम् ५४

तमस्त्वात् ४८ एवंमधुविष्णुसंज्ञयोर्मोहविवेकयोर्युध्यतोःसतोःमधुनाबद्धोमहंद्राख्योजीवस्तुतिव्याजेनसिद्धैःसद्गुरुभिर्बोधितोहरिः स्वीयंविपुलंसर्वात्मकंदेहंसस्मारयत्हयशिरःसंज्ञम् ४९ ५० ५१ सत्यावेदवाणीसैवास्यसरस्वतीदेवीवाग्देवता ५२ एवंविश्वरूपाभिमानिनअसुरंमोहंपीडयामासमोहयामास ५३ मधोरिति त्वगसृङ्मांसमज्जास्थिमेदशुक्राख्यैर्धातुभिरितिवपुःशब्देनरूपितेमोहेमेदोमात्रमवशिष्टंयदज्ञानलेशमितिप्रसिद्धंतेनअवपूर्णांपृथिवीशरीरंसमदृश्यत यथाप्रमदाप्रकृष्टमदायुवतीघनावक्षोजभारेणकठिनाशकुंबरवतीमनोनंदिनीतथाप्रमधुमोहस्यवपुरभिनवमिवाभातीत्यर्थः तथाचश्रुतिः ब्रह्मविदइवभोग्यतेसुखंभातीतिदर्शयति ५४ ५ ५ ५ ५ ५ ५ ५ ४२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१५ कीदृशैः शृंगैः शिलाभिरिति १६ १७ नागाः गजाः कनकसंभूतैरलंकारैः १८ १९ वेल्लेवतोयंतदाभिधातोच्छलद्विंदुरूपं २० २१ सर्वोत्कर्ष
वशाद्योगिनो भोगभूमयो मधुमत्यादयः दिव्यविषयवत्सउपतिष्ठंतइत्याह विष्णुरिति २२ २३ सापिस्वप्नकल्पा मधुमती भूमिः नेहनानास्ति किंचनेतिश्रुत्या प्र
बोधितस्य योगिनो हार्दाकाशे विलीनेत्यर्थः ऋषिभिर्योगिभिः अनुचरिता आज्ञप्ता अनुसृत्य विसृष्टेत्यर्थः २४ एवंयोगोपसर्गेषु विलीनेषु ब्रह्मविद्याहंज्ञाता-
हंब्रह्मास्मीतिवाक्यजन्माचरमांतःकरणवृत्तिरुदेतीत्याह धात्रीतिमूलप्रकृतिः कपिलं त्रिगुणात्मत्वान्मिश्रवर्णं तेन रूपेण गोः गच्छत्यधिगच्छत्यात्मतत्त्वमिति गोः अवि
द्यावृत्तिर्भूत्वा पयः ब्रह्माक्षरते प्रकाशयति मधुरं आनंदमात्रत्वात् यज्ञेयोगे विशेषेण तते प्रथिते सति ब्राह्मणो वाक्यं अहंब्रह्मास्मीति तेन चोदिता प्रेरिता एवंवि

धात्यर्थंसर्वभूतानां मेरुपृष्ठेमहाबले निर्वेसुर्विमलंतोयंमेघजालैरिवोत्तमैः १५ शिलाभिर्बहुचित्राभिर्धातुभिर्बहुरूपिभिः प्रस्रवद्भि
गुंहाद्वारैः सलिलंस्फाटिकप्रभम् १६ ग्रीष्मातेवायुसंगूढाघनाइवसविद्युतः चित्रैः पुष्पैस्तरुगणाः शोभंतइवभूषिताः १७ नागाः कन
कसंभूतैर्विचित्रैरिवभूषिताः विहंगमाभिर्लीनाश्चलतास्तरुसमाश्रिताः १८ विलंबंत्यः सपुष्पाश्चनृत्यंतेवायुघट्टिताः पवनेनसमु-
द्भूताभहतामाधवेहनि १९ मुमुचुः पुष्पसंघातंतोयंवेल्लेववर्षंति बलवद्भिश्चविपुलैः शाखास्कंधावरोहिभिः २० पादपैर्वर्णबहुलैः-
श्रियतेचवसुंधरा मधुप्रियामधुकरामधुमत्ताविहंगमाः घोषयंतीवगायंतः कामस्यागमसंभवम् २१ विष्णुर्मधोर्निहंताचचकारमधुवा
हिनीम् नदींप्रस्रवनिर्भेदांसुतीर्थांबहूदकाम् २२ अंगारवर्णसिकतांमधुतीर्थांमनोरमाम् विमलैरंबुभिः पूर्णांपुष्पसंचयवाहिनीम्
२३ विवेशपुष्करंसातुब्रह्मणोवाक्यनोदिता ऋषिभिश्चानुचरिताब्रह्मतत्त्वनिषेविभिः २४ धात्रीकपिलरूपेणगोभूत्वाक्षरतेपयः म-
धुरंविततेयज्ञेब्रह्मणोवाक्यचोदिता २५ शिरश्चपृथिवीभूतंसंधातुप्राप्तवान्महीम् शुद्धंचभजतेलोकंशाश्वतंपरमाद्भुतम् २६
सरस्वत्याः समुद्भूतंब्रह्मक्षेत्रेतमोनुदम् मरुतीर्थमतिक्रम्यपुष्करेषुविसर्पति २७

धागोः २५ एतावपिप्रलीयानांशुद्धंचिन्मात्रमेवावशिष्यतइत्या-
ह शिरश्चेति शीर्यतइतिशिरः उत्तमांगवच्छ्रेष्ठापिप्रतिक्षणपरिणामिगुणकार्यत्वादपक्षयवतोवृत्तिः पृथिवीजडासती भूतं कूटस्थं वस्तु संधातुं समर्थापि महीं
स्वोपादानंजलं प्रतिप्राप्तवत् गतवती ततो योगी शुद्धं लोकं आत्मानं भजते निर्विकल्पेन समाधिनेत्यर्थः २६ ननु सर्वधर्मशून्यं निर्विकल्पकं चेत् शून्यमेव त-
त्स्यादित्याशंक्याह सरस्वत्याः अस्तीत्येवोपलब्धव्यइति वेदवाचः सकाशात् समुद्भूतं तमोनुदं अज्ञानविरोधितया ज्ञानमात्रं ब्रह्मक्षेत्रे शूर्प्राणमध्ये समुद्भू ४३
तं मरुतीर्थं मरुमरीचिकोदकतुल्यं ज्ञेयं अतिक्रम्य पुष्करेषु पुंभेदाद्बहुवचनं त्रयाणां मिथुनत्वे तदेकैकस्य पृथक्पृथगिति शुद्धे शजगतां मध्ये ईशजगतोः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रतिपूरुषंपृथक्त्वेनदर्शनात् पुष्करानेकसंयुक्तंमायाशबलेपरमेव्योम्निविसर्पति योवेदनिहितंगुहायांपरमेव्योमन्नितिव्योमन्नितिव्योम्नस्तदाश्रयत्वश्रुतेः २७ ननुकुतोऽज्ञेयस्यमरुतीर्थतुल्यत्वमतआहसुचार्विति अजामायाकनकवर्णाभंदिव्यरूपंब्रह्मरूपेणरूप्यतइतिव्युत्पत्त्यादृश्येनाहंकारादिनाच्छादयत् छादितवतीअडभावआर्षः जवनिकाच्छादकस्यसत्यत्वंमाभूदतःछाद्यंविशिनष्टि तपोयुक्तेनचेतसारूपमिति आलोचनवताचेनसैवयद्रूप्यतेसाक्षात्क्रिय तइतिरूपंसाक्षात्कर्तव्यंभवति भुजंगाच्छादितारज्जुरालोचनेनैवसाक्षात्क्रियतेनतुराजदारवज्जवनिकारूपस्यकस्यचिद्वस्तुनोपसारणेनतस्मात्ज्ञानमा त्रनाश्यत्वेनरज्जूरगवदजामृषैवकीदृशी अजासुचारुरूपासुचारूणिरूपाणिलोहितशुक्लवर्णानितेजोबन्नाख्यानियस्याःसातथाकुतःसाच्छादयतिवस्तुत- त्वमतआह धर्मज्ञेतिअदृष्टवशादध्यासोभवतीत्यर्थः २८ नन्वालोचनेनैवमायाजवनिकापगमोयक्रियेतेत्येतदेवकुतइत्याशंक्याह अजेति यस्मादयंम हान्पर्वतइवाभेद्योऽहमितितृतीयेनान्वयः अहंअहंकारादिःसंसारःसंभूतःसम्यक्स्थूलरूपेणउद्भूततयादृश्यमानोपि अजगंधकृतोन्मुक्तोस्ति अजंसन्मात्रं तस्यगंधोलेशःतेनपूर्वंकृतःपश्चादुन्मुक्तः अहंकारादिर्हिजाग्रदादौसन्निवदृश्यतेनतुसुप्तौ अतोस्यदुःखादिधर्मिणोनात्मरूपत्वंकिंतुनित्याविर्भूतंस्वाधि

स्वचारुरूपाधर्मज्ञाअजारूपेणछादयन् रूपंकनकवर्णाभंतपोयुक्तेनचेतसा २८ अजगंधकृतोन्मुक्तःसंभूतःपर्वतोमहान् गु रुहारगुणप्राणःशाश्वतःसिद्धसेवितः २९ वेदिकाभिःसुचित्राभिःकांचनाभिर्विराजितः पुष्कराणिपरीतानित्वष्ट्राविपुलदक्षिणा ३०

ष्ठानेएवकदाचित्कप्रतीतिविषयत्वेनरज्जूरगवन्मृषात्वमेवतत्वमस्येतिभावः अयमहंकारपर्वतःगुरुहारःगुणप्राणश्चगुरुरुद्देशादेवास्यतत्वमधिगम्यतेगुणैरेवाने भिरयंजीवतितस्माद्गुरुमाराध्यगुणत्रयंत्यक्तव्यमित्यर्थः शाश्वतोनादिःसिद्धसेवितःसिद्धैरपिसेवितःकिमुतमूढैः २९ ननुसुषुप्त्यादौमनःसंयोगाभावात्संसारी अहमर्थेनिप्रकाशतेनचतावतस्यानात्मत्वंभवति नहित्यक्तवास्त्यस्तक्षाऽतक्षाभवतीत्याशंक्याह वेदिकाभिरिति तस्यत्रयअवस्थारूपाःसम्राडितिश्रुतेःसंसा रिणःतिसृभिरेवक्रीडास्थानभूताभिर्वेदिकाभिर्विजाग्रत्स्वप्नसुषुप्त्याख्याभिःपरस्परवैलक्षण्यात्विचित्राभिरवस्थाभिर्विराजितोदृश्यते तथापिअवस्था- नांवैचित्र्यादवस्थांतरगतस्यदुःखादेरवस्थांतरेदर्शनाभावादक्षिगोपियक्षइवपरशरीरसंचारीतत्तद्देहाभिमानात्तदातदादुःखंप्राप्नोतितस्मात्तत्तदवस्थाभिमा नःकृतएवास्यसंसारोनस्वाभाविकइत्यर्थः तन्वभिमंतृत्वमपितात्विकमस्त्वित्याशंक्यदृश्यत्वान्नेत्याहपुष्कराणीतिअहंकाराद्युत्थानकारणानिमूलाज्ञानानि त्वष्ट्रेवत्वष्ट्राविचित्रजगन्निर्माणशिल्पिनाईश्वरेणपरीतानिव्याप्तानिनतुसइतरैरित्यर्थः नहिचित्रकाश्यंचित्रभावंभजतइतिभावः हेविपुलदक्षिण ३० ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

असुरस्यमोहस्यसंबंधितयासहैवपूर्यमाणमेवस्रवतीतिसहस्रंसुदुष्कलंशरीरंतेनजिभिदाख्लोहने अस्यरूपंमेदिनीतिस्निग्धेत्यर्थः अज्ञानलेशानुवृत्तेर्विद्वत्सु
परोद्धरिणकारुणिकत्वमायातनचेत्ज्ञानसमकालदेहपातःस्यादितिभावः ५५ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांषड्विंशतितमोऽध्यायः
२६ ७ सत्वेननिहतेमोहेगुरुशास्त्रादिकंजगत् हार्दंब्रह्माणिपश्यंतीत्येकविंशोसमीर्यते १ मधोरिति पुष्करेपरमव्योमाख्येकारणेब्रह्माणिव्योमपुष्करमं
बरमित्यमरःसर्वभूतानामिनितुल्यवद्देवर्षिमनुष्याणांप्रनृत्यतीतिवर्त्तमानापदेशेनेदानींतनानामस्मदादीनांचपुष्करप्रवेशेधिकारोदर्शितः १ तथाचश्रु-
तं तद्योयोदेवानांप्रत्यबुध्यतसएवतदभवत्तथर्षीणांतथाचमनुष्याणांतद्दिदमप्येतर्हियएवंवेदाहंब्रह्मास्मीतिसइदंसर्वंभवतीतिसूपार्श्वोव्याख्यानरीत्यासु

मेदिनीत्येवशब्दश्चलब्धःपृथ्व्यानरोत्तम नामासुरसहस्रेणधारण्यांसंप्रतिष्ठितम् ५५ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्व
णिनामषड्विंशोऽध्यायः २६ ७ वैशंपायनउवाच मधोर्निपतनंदृष्ट्वासर्वभूतानिपुष्करे प्रविष्टानिप्रगायंतिप्रनृत्यंतिचसर्व-
शः १ सुपार्श्वोगिरिमुख्यस्तुकांचनैःशिखरोत्तमैः बहुधातुविचित्रैश्चरवालिखन्निवचाबभौ २ गिरयश्चाभिशोभंतेधातुभिःसमरंजि
ताः प्रांशुभिःशिखरार्यैश्चसविद्युतइवांबुदाः ३ पक्षवातोद्धुतोरेणुःश्चूर्णैःसांजनवालुकैः छादयन्पर्वताग्राणिमहामेघइवाबभौ ४
मेघसंश्लिष्टशिखराःपक्षविक्षिप्तपादपाः कांचनाद्रेर्दशबहुलाःखेतिष्ठंतीवपर्वताः ५ पक्षवंतःसशिखराहेमधातुभिरंजिताः पवनेनस
मुद्धूतास्त्रासयंतिविहंगमान् ६ कांचनाःपर्वताःसर्वेस्फाटिकैर्मणिभिश्चिताः सूर्यकांतैश्चबहुभिश्चंद्रकांतैश्चनिर्मलाः ७ हिमवांश्चम
हाशैलःश्वेतैर्धातुभिराचितः कांचनैःशिखरार्यैश्चसूर्यपादप्रकाशितैः ८ मणिभिश्चप्रकाशाढ्यैःपक्षांतरविनिःसृतैः ताम्रपुष्पैश्चशि
खरैर्दीप्यमानैःस्वतेजसा ९ मंदरश्चाग्रशिखरःस्फाटिकैर्मणिभिश्चितः वज्रगर्भोनिरालंबैःस्वगोपमइवाबभौ १० सहस्रशृंगःकै
लासःशिलाधातुविभाषितः तोरणैश्चैवनिर्विडैःप्रांशुभिश्चैवपादपैः ११ प्रवादयद्भिर्गंधर्वैःकिन्नरैश्चप्रगायिभिः देवकन्यांगनाभि
श्चप्रक्रीडद्भिरिवाबभौ १२ मधुरैर्वाद्यगीतैश्चनृत्यैश्चाभिनयोद्धतैः शृंगारैःसंप्रहारैश्चकैलासोमदनायते १३ आदित्याभासिभिः
शृंगैर्भिन्नांजनचयोपमैः विंध्योनीलांबुदश्यामोविभिन्नइवतोयदः १४

रुःमेर्वाख्योगिरिरेवचाब्रह्माणमीशंकमलासनस्थमितिव्यवहितस्यापिब्र
ह्मलोकादेर्विश्वरूपात्मनिदर्शनस्यशास्त्रप्रसिद्धत्वात् २ समंसर्वत्ररंजिताः ३ ४ खेहार्दाकाशेतिष्ठंतिवेतीवशब्दोमानसत्वद्योतनार्थः ५ त्रासयंतिपर्वताः ६ ७ ८ पक्षा
णांअंतरंअंतरालंततोविनिःसृतैर्मणिभिः ९ १० तोरणैर्निरालंबैअस्तंभैस्तोरणैरिवप्रांशुभिःपादपैःसौक्ष्म्याददृष्टदंडैःउपरिपरिणाहवद्भिश्चेत्यर्थः ११ १२ मदनायतेम
दनवदुद्दीपकोभवति १३ आदित्येतियुग्मंयथानीलांबुदश्यामोविष्णुर्मेघैःपृथिव्यांतोयंवर्षति एवंमेरुपृष्ठाख्योभूप्राणमध्येसर्वेपर्वताःनीलांजनचयोपमैःआदित्येन
आभास्यमानैःस्वप्रभानोयंनिर्वेमुःउद्गीर्णवंतइत्यर्थः १४ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

येचेति कामविग्रहैः इच्छागृहीतैः रामकृष्णादिविग्रहैः रूपलक्षितं विष्णुं ये अधीयंते प्रणवाद्युच्चारणेन स्मरंति ते व्यक्तद्वारा व्यक्तं मां पश्येयुः अयमर्थः पूर्वो
क्तरीत्या स्फटिके रक्तपद्मरागत्ववत् चिन्मात्रे ईशे सूक्ष्मस्थूलान्यध्यस्तानि तत्र स्थूले श्रीगोपालप्रतिमादौ प्रणिधीयमानं चक्षुः प्रथमं प्रतिमायाजाड्यतिरो-
धानेन चेतनत्वं गृण्हाति रज्जूरगइव निहितमुरगतिरोधानेन रज्जुं अतएव भक्ताः स्वाराध्यैः सह व्यवहरंतीति बहुलमुपाख्यायते चेतनमूर्त्तावपि प्रणिहि
तं चक्षुस्तस्याताखिकं वैश्वरूप्यमेव गृण्हाति यद्पश्यद्यशोदा कृष्णमुखे र्जुनो वा श्रीकृष्णविग्रहे अस्यामवस्थायां योगी देहासंगात्स्वयमेव विश्वरूपो भू
त्वा सार्वज्ञं प्राप्नोति तदेतद्धितर्कजं प्रत्यक्षमभिप्रेत्योक्तं योगभाष्ये भगवता बादरायणेन तदेतत्परं प्रत्यक्षं तच्च श्रुतानुमानयोर्बीजमिति विश्वरूपेपि प्रणिधी
यमानं मनः तस्य तत्त्वं सन्मात्रं गृण्हद्दस्मितामात्रमवशिष्यते तस्मिन्नपि लीने योगी स्वरूपानंदं प्रतियुक्तमुक्तकामविग्रहद्वारा व्यक्तं पश्येयुरिति ३६

येच विष्णुमधीयंते बहुधा कामविग्रहैः तेमां पश्येयुरव्यक्तं तपसा दग्धकिल्बिषाः ३६ येच मामभिरोहेयुर्नरा धर्मपथे स्थिताः ते
पि स्वर्गजितः स्वर्गे पश्येयुर्मां गतक्लमाः ३७ यश्चैव पर्वतः प्रांशुः मेरुपृष्ठे व्यवस्थितः एतमारुह्य युद्धेयुः प्राणत्यागेषु निर्मलाः ३८
अप्सरोभिः समागम्य विचरेयुर्मनोजवाः नंदनवनमासाद्य काम्यकं च महद्वनम् ३९ इमां विद्यां समास्थाय मद्भक्ताः पुष्करेष्विह
शरीरं क्षपयिष्यंति व्रतैर्बहुविधैः कृतैः ४० सिद्धिं प्राप्य क्रमेयुस्ते कामैर्बहुविधैर्नराः इमं लोकममुं चैव संपतेयुर्यथासुखम् ४१
गौरीसिद्धेति व्याख्याता त्रिषु लोकेषु विद्यया प्रभावं तपसो वृत्तं दर्शयंति समाहिताः ४२ षण्णां ज्ञानाभिसंधीनामभिज्ञानात्ससंग्र
हाः भवेयुस्ते निरारंभा धातुनिर्मुक्तबंधनाः ४३

मां निर्गुणं अभिरोहेयुः उक्तसोपानक्रमेण ३७ मेरु
पृष्ठे भूमध्ये पर्वतः समस्त्यहंकारः कदायुद्धेयुः अविद्यया सह प्राणत्यागेषु इंद्रियेषु त्यक्तेषु तस्मिन् प्रविलापितेषु सत्सु ३८ वनंह्येयमिति शेषः योगोपसर्ग-
त्वात्तद्भोगस्य ३९ ४० कामैः क्रमेयुः इच्छया विषयान् प्राप्नुयुः इहलोकं परलोकं च संपतेयुः ४१ गौरीति यदा उक्तविधं प्रभावं तपः सकाशाद्वृत्तं समा
हिताः योगिनो दर्शयंति तदा विद्यया शास्त्राचार्योपदेशजज्ञानेन निष्पन्ना गौरी पराब्रह्मविद्या त्रिलोकेषु सिद्धा व्याख्याता सत्यसंकल्पो वा द्याविर्भाव एव वि
द्यासिद्धिस्तावक इत्यर्थः ४२ षण्णामिति ज्ञानं वृत्तिः तस्या आभिमुख्येन समित्येकीभावेनावधानं येषु ते ज्ञानाभिसंधयः संयमस्थानानि मूलाधा-
रादीनि वा कर्मांगं बाह्यमाभ्यंतरं च हृद्भागवन्मूर्तिरूपे प्रतीके विराट् सूत्रांतर्यामित्रयं चेति षट् तेषां अभिज्ञानं साकल्येनानुभवः तस्मात् हेतोः ससंग्र
हाः कामाभावात् अक्षीणयोगैश्वर्या अतएव निरारंभाः धातुरूपं निर्मुक्तं बंधनं येस्ते तथा ४३ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उत्तरार्द्धमेवविवृणोति महामेरोरिति धातुभिर्महाभूतैः शरीराकारपरिणतैः वृत्तोब्यासोहंकाररूपेणाद्भुतदर्शनः अनिर्वचनीयोपियाप्रसिद्धाचेतनातयाभिसंपन्नो
भवतिनस्वयंचेतनोयेनाभिमंतृत्वादिस्वभाव आत्मेत्यवसीयेतेतिभावः ३१ इदानींशास्त्रदृष्ट्यब्रह्मभावाभिनिवेशेनाहंमनुरभवंसूर्यश्चेतिवामदेववत् अहंसर्व
स्यप्रभवोमत्तःसर्वंप्रवर्त्तत इतिभगवानिवाहंकारादेशेनैवतत्वंनिरूपयन्निकरिष्यामीति अहमपि अहमेवएतत् एतंधर्मचारिणंदेहंमनसासंकल्प मात्रेणकरि
ष्यामिकरोमि नकेवलंदेहमात्रंअपितुलोकेबहुविधंरूपंदृश्यंतदपिमनसैवकरिष्यामि तथापार्थिवीं पृथिवीशरीरंतत्संबंधांचेतनांबहुरूपांकरिष्यामिस्वदे
हादिचेतनाचेतनंसर्वंमत्संकल्पमात्रोत्थंमत्तोनान्यदित्यर्थः इदंसर्वंयदयमात्मेतिश्रुतेरितिभावः ३२ सर्वात्म्यमुक्त्वासार्वज्ञमप्याह धातून्पृथिव्यादीन्ल
क्षयंत्येतैस्तानिधातुलक्षणानीन्द्रियाणितैःपंचभिः त्रीन्लोकान्प्रपद्येयंजानीयां अनात्मभूतदृश्यज्ञानमुक्त्वात्मज्ञत्वमप्याह षष्ठेनमनसात्वधर्मचारि-

महामेरोर्यथारूपंपंचभिर्धातुभिर्वृतम् चेतनायाभिसंपन्नोरूपेणाद्भुतदर्शनः ३१ करिष्याम्यहमप्येतत्मनसाधर्मचारिणम्
रूपंबहुविधंलोकेपार्थिवींचेतनांतथा ३२ त्रींश्चलोकान्प्रपद्येयंपंचभिर्धातुलक्षणैः षष्ठेनचससृज्येयंमनसाधर्मचारिणीम् ३३
संगेषुभावमोहाभ्यांपश्यंतिचसमृद्धयः विमुक्ताःसर्वसंगेभ्योधारयंतिपरिग्रहान् ३४ नचविंदेतमांकश्चित्मनसाकामरू-
पिणाम् पंचधातुनिबद्धश्चनानाभाषितचोदनाः ३५

णींआत्मसदृशीमसंगांचिदाकारांवृत्तिंसज्येयंसृजेयंविद्याः विद्यारूपोप्यहमेवसःसमोहंविद्याप्रदातापीत्यर्थः ३३ येदीयमानायांविद्यायामधिकारिणस्ता-
नाह संगेष्विति येसमृद्धयःसम्यक्प्रफल्लाऋद्धिःऐश्वर्यंयेषांतेसमृद्धयः पुरुषाःसंगेषुऋद्धीनांयोगेषुभावमोहाभ्यांइत्थंभावेतृतीयासंकल्पमात्रत्वेनभ्रम
त्वेनचऋद्धिःपश्यंति एतेनविषयदोषदर्शनमुक्तंअतएवविमुक्ताःसर्वसंगेभ्यइतिवैराग्यमुक्तंपरिगृह्यतेविषयाःयैस्तेपरिग्रहाः बुद्धींद्रियमनःप्राणाः
तान्धारयंतिनिगृण्हंतिएतेनाभ्यासोदर्शितः एतत्त्रयवंतोविद्याधिकारिणइत्यर्थः ३४ नचेतियस्मात्पंचधातुमयेनदेहेननिबद्धःनानाभाषितंअ-
पामसोममृताअभूमेतिनानार्थवादिकफलप्रेरिताःप्रायेणसर्वेतस्मात्मांकश्चिन्नविंदेतेतियोजना ३५ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सुकबंधत्वंदानेनैवभवतीतिलौकिकदृष्टांतेनाह सहस्रमिति यथात्रकश्चिदपराधीसहस्रगुणमपिराज्ञेकरंदत्वादानफलाद्राजप्रीतेर्मुच्यते एवंविप्राणाम-
वमानेनसन्मानेनमनःशब्देनकामरहितेनमनसाशब्देनदानकर्मणा ४४ अप्रमेयेणासंकुचितेनअत्यंतंफलंआत्यंतिकदुःखपरिहारंपरमेश्वरप्रीतेः
ब्रह्मलोकेपूर्वजैःसहप्राप्नुयुरितिश्लोकद्वयार्थः ४५ तेषांयजमानऋत्विजांसान्निध्यंयज्ञांगदेवतादौचित्तैकाग्र्यंतेपिपुनःपुनरप्यभिषिच्यबहुयज्ञा
वभृथंप्राप्यपूर्वोक्तंफलमाप्नुयुरित्यर्थः ४६ तथेतियथादानयज्ञयोःसंपदंमन्यसेतथाचेत्तांपूर्वोक्तांगौरींब्रह्मविद्यासंपदंतपोधनेसमीपेऽग्रेस्थितांचे
न्मन्यसेराजन्नितिशेषःतर्हितन्मम तन्नैवमंतव्यंत्वयेत्यर्थः कीदृशींगौरींभूतानामनुग्रहायमनसाधर्मचारिणीं बाह्येनदानयज्ञादिनासाध्याबाह्या-
संपत् परिमिताइयंतुमानसत्वादनंतेतिभावः ४७ किमर्थंतर्हिदानादिकंकर्तव्यमतआहसत्यइति एषआत्मागौरीलभ्यःसत्योबाधितःअविद्येपुं-

सहस्रगुणमप्यत्रदत्वादानफलादिव अविमानेनविप्राणांमनःशब्देनकर्मणा ४४ सर्वत्रैवाप्रमेयेणअत्यंतंफलमाप्नुयुः अमुष्मिंल्लोके
धर्मज्ञाःसहसर्वकुलोद्भवैः ४५ एषामिहचसान्निध्यंयज्ञेब्राह्मणसंकुले तेभूयोयजमानाद्याअभिषिच्यपुनःपुनः ४६ तथातांमन्यसे
गौरींमनसाधर्मचारिणीम् अनुग्रहायभूतानांतन्ममाग्रेतपोधने ४७ सत्यएषपरोविद्येभवितानात्रसंशयः नाफलोविद्यतेधर्मश्चारि
तोधर्मचारिणा ४८ इतिश्रीमहाभा० हरि० भविष्यपर्वणिसप्तविंशतितमोऽध्यायः २७ वैशंपायनउवाच दिशंजगामि
षुर्दिव्यामुत्तरांसत्यसाधनः तथासधातुनिचयेपुण्येपर्वतरोधसि १ विष्णुःपरमधर्मात्माएकपादेनतिष्ठति दशवर्षसहस्राणिपुष्करेपु
ष्करेक्षणः २ आत्मन्यात्मानमाधायतपसाब्रह्मसंभवः घटतेकर्मणोग्रेणलोकमुत्थानकारणात् ३ भास्करोभस्मनाच्छाद्यगात्राणिस्वय
मात्मनः अष्टौवर्षसहस्राणिसहस्रंचतपोधनः ४

सिपरोदूरिभूतःभविताधर्मादपिआविष्यत्येवचित्तशब्द्यादिद्वारायस्मात्धर्मचारिणाधर्मचरणशीलेननिष्कामेने
त्यर्थः आचरितोधर्मःअफलोनविद्यतेतद्विद्यार्थंधर्मोनुष्ठेयएवविविदिषंतियज्ञेनेत्यादिश्रुतेरितिभावः ४८ इतिश्रीमहाभा० हरिवंशेभविष्यपर्वणिटीकायां-
सप्तविंशोऽध्यायः २७ द्वाविंशेपरमैश्वर्यंविष्णवाद्यायोगगोचरात् प्रापुरित्युच्यतेसम्यग्योगसिद्धाविद्द्वये १ दिशमिति उत्तरांदिशंपरांकाष्ठांमोक्षाख्यं
धातुनिचयेशरीरेपर्वतरोधसिनासामूलेभ्रुवोःसंधौ १ विष्णुरितिपुष्करेहार्दाकाशेएकपादेनविश्वतैजसप्राज्ञतुरीयेश्चतुष्पादंब्रह्मतत्राद्यैश्चतुष्टयानुगतःपरे
क्रमात्त्रिधह्यकैःएकपादेनतुरीयेणतुर्यात्मनानिर्विकल्पकेन २ आत्मनीति आत्मानिशब्दे आत्मानंमायोपाधिंशरीरंआधायप्रविलाप्यलोकंशिक्षयितुमितिशेषः ४५
उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहमितिभगवद्वचनात्उत्थानकारणात्मोक्षहेतोः ३ भासुरःसोमःसिद्धिमुपागतइतितृतीयेनान्वयः अष्टौसहस्रंचेतिनवसह
स्राणि ४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तेनप्रसिद्धेज्योतींषिग्रहतारादीनि विभाव्यअभिभाव्यतिष्ठतेप्रकाशते प्रकाशनस्थेमाख्ययोश्चेतितङ्विषयंबंधकंशब्दादिं ५ आक्षिप्याधिकृत्यचेत्यर्थः युक्तो
योगवान् सुक्तःशितिवा ६ प्रदृश्यतप्रादृश्यत ज्योतिष्णुकर्मप्रकाशनक्रिया बहुरूपत्वंनानारसास्तौषधिषनुप्रवेशेननानारसत्वं सोमोभूत्वारसात्मकइतिसो
मस्यरसात्मत्वस्मृतेः ७ बलीवर्दरूपकेणधर्मात्मानंमहेश्वरंरूपयति उद्धृत्यधर्मस्यअहिंसागभौजियादिरूपोनिष्कामसकामोदक्षिणोपादोहिंसागर्भोयज्ञादि
रूपोसकामनिष्कामोउत्तरो तेषुनिष्कामजपादिरूपंपादंपुरस्कृत्येत्यर्थः ८ सैकशतंनवसहस्त्रंवर्षाणि ९ योगजधर्मादेवविश्वहितमिति द्योतयन्नृष्टप-
रूपाच्छंकरान्मेघोत्पत्तिमाह गोपतेःइंद्रियनिग्राहकस्यअंतरेघनीभूतःनिपीडिततूलपिंडवत्कठिनीभूतः तंफेनीभूतंपवनंसमुद्गारैःमुखात्बहिःनिर्गिरन्

तेजसातेनज्योतींषिविभाव्यब्राह्मणर्षभः तिष्ठतेनभसोमध्येयोगात्माभावयन्जगत् ५ सोमोविषयमाक्षिप्यमनसाधारयन्मनः
युक्तःपरमधर्मात्माब्राह्मींसिद्धिमुपागतः ६ संप्रदृश्यतसर्वत्रादिविभुर्व्यंतरेतया ज्योतिष्णुकर्मकुर्वाणोबहुरूपःससंपदा ७ महेश्वरोति
गूढात्मावृषरूपेणतिष्ठति उद्धृत्यदक्षिणंपादंवायुभक्षःसमाहितः ८ अष्टौवर्षसहस्त्राणिसहस्त्रशतमेवच महायोगीमहादेवोनियमा
द्ब्रह्मसंभवः ९ अथवायुर्घनीभूतोअंतेचरतिगोपतेः फेनीभूतंसमुद्गारैःपवननिर्गिरन्मुखात् १० सन्निकृष्टस्ततोवक्त्रात्प्राणेनपर
मात्मवान् निर्व्यासभूतोपतितोनैवार्द्रोनैवपार्थिवः ११ सफेनोवारिणाविश्यचचारवसुधातले नैवार्द्रोनैवशुष्कांगोवायुसंघातमागतः
१२ तत्कालफेनमुत्क्षिप्यपवनःसहवारिणा निरालंबोनिरालंबस्त्वभ्राणिसमपद्यत १३ तेक्षिपंतिपयोभूमावात्मानंस्वेनघट्टिताः नील
मेघारुणप्रख्यानैवार्द्रोनैवपार्थिवः १४ ब्राह्मींमूर्तिंसमाधायवायुःसर्वत्रगोवशी समाःसहस्त्रंसपूर्णंचचारविपुलंतपः १५ वन्हिर्बहु
जटीभूत्वाचीरवल्कलवासभृत् तपस्तप्यदनाहारोमौनमास्थायपोष्करे १६ वर्षाणांचसहस्त्राणित्रीणिचैकंचयत्नतः तस्याग्नेस्तेजसंभूतो
महानग्निःप्रवर्त्तते १७

निगीर्णवान्गोपतिः १० प्राणेनउद्गारवायुनापरंरूपांतरं नियसिःवृक्षमदःपार्थिवःपाषाणादिवच्छुष्कः ११ सफेनश्चर्मकोशाकारोवारिजलंआविश्यचगृहीत्वा
चचारवसुधापृथ्वीरसातलंअधोभागोयस्यतत्वसुधातलंअंतरिक्षंतस्मिन् १२ पवनःवारिणासहसाहितंफेनंउत्क्षिप्यनिरालंबेगगनेनिरालंबःआश्रयांतरशू
न्यः अभ्राणिआपोजलानिबिभ्रतीत्यभ्राणिमेघसंज्ञांसमपद्यत १३ आत्मानंपयोरूपं स्वेनैवरूपेणघट्टिताः घनत्वंप्राप्ताःकरकावत् तेनीलमेघाःसंतोअरुणे
नारुणसारथिनासूर्येणघनीभूतंजलंद्रावयताप्रख्यायंतेमेघत्वंनसेचनकर्तृत्वेनीलमेघारुणप्रख्याः १४ ब्राह्मींमूर्तिंब्राह्मणशरीरंसमाधायकृत्वा १५
तपस्तप्यत्अतप्यत् सार्द्धश्लोकोवाक्यं १६ तस्यततोग्नेःतेजसःसमुद्भूतोग्निःस्वर्गप्रकाशकृत्कर्मोपयोगीगार्हपत्यादिस्वर्गवासीचक्षुरनुग्राहीसूर्यादिः
१७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वह्निति सः युगांते आदित्यं प्राप्नोति रश्मिषु संपूर्णो नैव ह्यारा जलं तैलं न्यायेन कृत्स्नमादित्य मयूखजालं व्याप्यास्थितः अत एव बहुताप इति बहुतपः प्रभावः समाः सहस्रं संपूर्णमिति वा पाठः २७ फलमाह निगृह्णीति ललामरलयोरभेदात् रराभरेखेनिर्विसन् भोगेनैव कामं उक्षन् अतिभोगेन रसाभवंतीति भावः २८ यस्तपः कामो यस्य सः कुबेरो भूदीत्यर्थः तेजसोंतेतपसोंते २९ नहीति विष्णोरेवांशः कुबेर इति भावः ३० वासुकिरिति मनोनिधाय ब्रह्मणीति शेषः ३१ शेष इति वृक्षमारुह्य तत्र पुच्छमासज्य धूमपानं चकारेत्यर्थः ३२ एतद्धितामसं तपो लोको द्वेजकमित्याह द्विभिः जिह्वाभिरिति ३३ ३४ स्थावरं वत्सनाभसोमलस्थानादि ३५ परस्परेति परस्पर प्राणग्राहि क्रोधरूपेण तामसं तपः परिणमत इति भावः ३६ अथाहिंसकविशेषस्य नंतरं तत्प्रतिकाराय अहिंसकं विषघ्नं मंत्रं ब्रह्माक्षरं वेदवर्णमयं ब्रह्मा सृजते स्म ३७ तमेव मंत्रमाह श्लोकद्वयेन गरुत्मानिति गरुत्मान् सलिलं मही चममृजीवनभूतं हुं हुं ग्रादीनिशेषः

बहुतापः पुनर्भूत्वा निषण्णो वसुधातले सयोरश्मिषु संपूर्णस्तपस्तेपे सुदारुणम् २७ निगृह्णीतेंद्रियो भूत्वा अप्सरोभिर्ललामह मेरोः शिखरमासाद्य कामं कामेन निर्वसन् २८ तपः कामः सयक्षस्तु कुबेरो नरवाहनः विष्णुरेव तपो ध्यक्षस्तेजसोंते विजृंभति २९ नहि कश्चित्सु मानस्तिय एवं तपआचरेत् त्रिपुलोके सुराजेंद्र कृते विष्णु सनातनम् ३० वासुकिर्बहुशीर्षस्तु नागेंद्रो योनमास्थितः तप आचरते सम्यक् कु-निधाय मनसा मनः ३१ शेषः सत्यधृतिर्नागो बलवान् ब्रह्मसंभवः वृक्षमारुह्य धर्मात्मा अवाक्शीर्षो विलंबते ३२ जिह्वाभिर्द्वे लिहानाभिर्गात्रजं विषमुत्सृजन् समाः सहस्रं संपूर्णं निराहारस्तपोधनः ३३ कालकूटं विषं तद्धि सुमहत्समपद्यत येन लोको ह्यभिग्रस्तो न सुखं विंदते नृप ३४ सर्वत्रानुगतं तीक्ष्णं भुजंगेषु महीपते जंगमं स्थावरं चैव सर्वत्रानुगतं विषम् ३५ परस्परविरुद्धेन सिंहयुक्तेन भारत नाशयत्यात्मनो गात्राणि तेन तीक्ष्णेन भारत ३६ अथ ब्रह्मा महाभागो भूतानां हितकाम्यया मंत्रं विसृजते राजन् ब्रह्माक्षरमहिंसकम् ३७ गरुत्मान्वितते पक्षैर्नखाग्रैः सलिलं महीम् समा सहस्रं संपूर्णं चूडाग्रेणावलंबिना ३८

यद्वा ब्रह्म प्रणवः अहिंसकमक्षरं अमृतबीजं व-बीजमित्यर्थः गरुत्मानिति यथापाठं विततैर्दीर्घैः पक्षैः खरैः युक्तेन वं बीजेनेत्यर्थः नखाग्रैः पंचांगैः तथा चायं प्रयोगः ॐ वां गरुत्मान् हृदयाय नमः अंगुष्ठयोः ॐ वीं गरुत्मान् शिरसे स्वाहा तर्जन्योः ॐ वूं गरुत्मान् शिखायै वषट् मध्यमयोः ॐ वैं गरुत्मान् कवचाय हुं अनामिकयोः ॐ वौं गरुत्मान् नेत्रत्रयाय वौषट् कनिष्ठयोः ॐ वः गरुत्मान् अस्त्राय फट् करतलकरपृष्ठयोः एवं हृदयादिमूलमंत्रमाह सलिलं वं बीजम् महीलं बीजं समा सहस्रं समासः समन सहस्रं हकार सहस्रं हकाररसकाररेफानां कूटं ते वर्णाः संपूर्णं चरमः स्वरः चूडाशिखांतस्था अयं वषट् पदं तेन अवलंबनशीलेन पल्लवेन च मंत्रः ५ वषाडिति पंचाक्षरः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्वर्गवासीत्येतद्विवृणोतिदिवीति ब्रह्माग्निःब्राह्मणरूपोग्निः १८ तत्तमइतिय:स्वर्गप्रकाशकृदग्निरुक्तस्तस्यतमोधूमःतदुपलक्षितोधूमादिमार्गःमानुषेषुव
र्णाश्रमाभिमानिषुप्रतिष्ठितेतेजसामग्न्यादीनांसंहर्ताभास्करस्तुततःपूर्वोक्तवह्नेःसत्तमउत्कृष्टतमोभवतिगार्हपत्याद्याराधकाःपुनरावर्त्तंते सूर्यमंडलांतस्थपु
रुषाराधकास्तुनेतिभावः १९ भास्करंस्तौति मर्त्यानामितिसार्द्धेनयोगबलेसतितुतेज आक्षिप्यवर्त्तते अन्यस्यापिब्राह्मणस्यतुसुतरांनेत्यर्थः २० तत्तम
इति सउत्कृष्टगुणोभास्करःतत्पूर्वोक्तंतमःरात्रौनाशयन् रात्रावपिमृतस्यधूमादिगतिंआराधितःसन्नाशयति किंतुसौरीमेवगतिंयोगिनेप्रयच्छतीत्यर्थः तथा
रात्रौवर्त्तमानस्यादिवापिमृतस्याहोर्चिरादिमार्गोनभविताकीदृशंअहः अद्वयंअद्वयपदप्रापकंउपासकस्यदिवारात्रौमृतस्यार्चिरादिगतिरेवभवतिनान्याएवंकृ
मिणोपिदिवापिमृतस्यधूमादिगतिरेवनित्येतिभावः पुष्पमित्रोनामयक्षोभाविकुबेरः २१ कायव्यूहेनतिष्ठतेप्रकाशातइत्यर्थःपूर्ववत्तद्‌. २२ जानुभ्यां-

स्वर्गप्रकाशकृत्त्वेचस्वर्गवासीतमोनुदः दिविभूतप्रकाशाख्यस्तपसाब्रह्मसंभवः १८ तत्तमोभुविराजेंद्रमानुषेषुप्रतिष्ठितम् भास्क
रस्तेजसंहारस्ततोभवतिसत्तम: १९ मर्त्यानांसर्वभूतानांतेजआक्षिप्यवर्त्तते नतुयोगबलेराजन्ब्राह्मणस्यविशेषतः २० तत्तमोना
शयेद्रात्रौनाप्यहोभविताद्वयम् पुष्पमित्रोमहातेजायक्षःसर्वत्रगोवशी तपश्चरतिधर्मात्मापुष्करेषुसमाहितः २१ महेंद्रशिखराद्धारा
यावंत्योयांतिमेदिनीम् तावत्स्वरूपमास्थायतिष्ठतेनिखिलाःसमाः २२ जानुभ्यांपतितोभूमौज्योतिर्निर्भासिपश्यति समासहस्रंनिखि
लंनेत्रैरनिमिषैर्जगत् २३ नेत्राणिबहुधातस्यनेत्रांतैरभिनिःसृताः मध्यंदिनकरेप्राप्तेरश्मिवान्सपरिग्रहे २४ तेरश्मयःप्रभानेत्रैःश
तशोथसहस्रशः रराजतेजःसंयोगात्विद्दद्भिरिवपावकः २५ सविस्फुलिंगैर्नेत्रांतैरादित्यमनुवर्त्तते कर्मणोंतेयुगांतेवाजगतोबहुरूपिणः
२६

पतितोभूमावित्यनेननमस्कारप्रियस्यसूर्यस्याराधनंसूचितम् तत्फलंचसूर्यसंयमाद्भुवनज्ञानमितियोगेःसूचितंतदाह ज्योतिःसूर्यमंडलंतत्रयन्नभःमध्येनभइ
वावभाति तत्रदर्पणोदरसरूपेनियोजितैःनेत्रैरनिमिषैःजगन्निखिलंपश्यति २३ एतदेवोपपादयति द्वाभ्यांनेत्राणीति मध्यंदिनकरेदिनकरमंडलमध्येसाहि
दिनकरःपरिवेषइवरश्मिवान्मध्येत्वादर्शनत्वतुल्यइत्यर्थः तत्रतस्मिंश्चनेत्रांतैःप्राप्तेलब्धेसतिसूर्यप्रभामिश्रितैर्नेत्रैःसहतेप्रसिद्धारश्मयोमंडलमयूखास्तनो
भिनिःसृताःसर्वत्रउपर्यधस्तिर्यङ्‌निर्गताःसंतः तस्यधारणावतःशतशोथसहस्रशोनेत्राणिभवंतिसतैरनेकैर्नेत्रैःविद्दद्भिरुल्लिखिःयज्ञेपावकइवरराज
सूर्यमंडलंप्राप्यमूर्छिताःचक्षुरश्मयःसूर्यरश्मिभिरेवसार्द्धंभुवनंव्याप्यप्रकाशयंतीतिभावः २४ २५ सइतिसपुष्पमित्रःभाविकुबेरःविस्फु-
लिंगवद्भास्वरैःनेत्रांतैर्दूरिभूतैरादित्यंप्राप्नोतिकदाकर्मणोंतेदेहारंभककर्मक्षयेधारणाबलेनचिरंजीवीभूत्वाजगतोयुगांतेजगत्प्रलयकालेवा २६ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अस्यऋषिर्ब्रह्मागायत्रीच्छंदः गरुत्मान्देवता वंबीजं ह्मःशक्तिः ळंकीलकं विषनाशनेविनियोगः पर्णभारैरिति ध्यानश्लोकः पक्षभारैः कृत्स्नांपृथिवींद्यां
चव्याप्यास्थितमित्यर्थः विततैःपक्षैःनखाग्रैः अवलंबिनाचूलाग्रेणच कीदृशंमांसंपूर्णं बाह्याभ्यंतरज्योतिर्भिःसूर्यवागादिभिःतत्प्रकाश्यंतद्व्याप्यास्थितमि
त्यर्थः ३८ एतदेवाह पर्णभारैरिति यःवसुब्रह्मधीयतेतस्मिन्इतिवसुधाशरीरं तस्यतलेगर्भेविकचैर्विकाशिभिर्विशीर्णैःसर्वतोविप्रकीर्णैःपर्णभारैःप
क्षैरिवपक्षैरिंद्रियैस्तेषांभारैःकार्यसमूहैःरराजतेयोगिनांहृत्स्थोतिभावः यस्यचपर्णैस्तैरेवपक्षैर्बहुविचित्रितैर्विषयभेदात् वसुधाशरीरंचरराजयोंतःशरी
रेसर्वात्मरूपेणराजतेशरीरंचयेनराजतेसइत्यर्थः ३९ मंत्रजयफलमाह येनेति येनमंत्रेणवृत्तेनस्पृष्टेनआवृत्तेनआवर्त्तितेन येनचमंत्रेणानिर्विषामही
शरीरंतलविसर्पिभिरिंद्रियाद्यैः आचितनक्षत्राद्यौरिवरराजेत्यनुषंगः सार्द्धश्लोकाद्वाक्यम् ४० हिमवानिति पुष्कराभ्रसिमायाशबलस्याश्रयभूतेनि
र्विशेषचैतन्येमत्स्योल्लिखितमूर्धजः मत्स्यइवमत्स्यः संसारनद्याजायत्स्वप्नाख्यकूलद्वयसंचारिजीवः तेनउल्लिखितंसंश्लिष्टंमूर्द्धजसहस्रारंयेनसः जीवा

पर्णभारैश्चविकचैर्विस्तीर्णैर्वसुधातले रराजवसुधाचैवपर्णैर्बहुविचित्रितैः ३९ येनवृत्तेनजीवेयुःसर्वभूतानिभारत इहलोके
मनुष्येंद्रदेवलोकेचभारत द्यौरिवाचितनक्षत्रामहीतलविसर्पिभिः ४० हिमवान्हिमसंपातेभवत्येकचरोवशी पुष्कराभ्रसिध
र्मात्मामत्स्योल्लिखितमूर्द्धजः ४१ अथस्रुतलमाक्रम्यपृथिवीधांघ्रिदेहिनी तपश्चरतिधर्मात्माबाहुमुद्यम्यदक्षिणम् ४२ साग्र
वर्षसहस्रंचशतमेकंचसुव्रत तपश्चरतिसंयोगात्वायुभक्षःसमाहितः ४३ समाधियोगात्संगाद्वाब्रह्मयोगस्यभारत येनेयंपृथि
वीराजन्धार्यतेब्रह्मयोगिना ४४ अनाद्यंतेननित्येनसर्वत्रविषयैषिणा योसौविष्णुरगाधात्मापरमात्मानिराकृतिः ४५ दि
नेनिषण्णोभवतिरात्रौभवतिवैस्थिरः सत्यसंधःसधर्मात्माकामकारकरोभवेत् ४६

त्मानंसहस्रारेनिधायनिर्विशेषचिन्मात्रंलंभासइत्यर्थः ४१ अथेतिसुतलंमूलाधारंदक्षिण बाहूद्यमनेनदानादिकंबहुकृत्वेतिलक्ष्यते तेनविनाचित्तशु
द्ध्यभावाद्योगेप्रवृत्त्यनुपपत्तेः ४२ संयोगात्समीचीनाद्योगात् ४३ एतदेवविवृणोति ब्रह्मणासहयोगोयेननिमित्तेन सब्रह्मयोगः प्रणवःतस्यसंयोगात् येनभ
णवेनवाच्यवाचकयोरभेदादीश्वरेणब्रह्मयोगिनाब्रह्मोपलब्धिस्थानेनपृथ्वीशरीरंधार्यतेध्रियते ४४ विषयैषिणाजीवरूपेणविषयाभिलाषिणातस्यवास्तव
रूपमाह योसावितियोविष्णुस्तेनपृथिवीधार्यतइतिपूर्वेणान्वयः ४५ दिनेविद्यायांनिषण्णःउपविष्टःविदेकलभ्यइत्यर्थः रात्रावविद्यायांस्थिरोयस्मात् ध ४७
र्मात्मापुण्यादिमान् इदमपिकुतःकामकारकरोलीलावशःलोकवत्तुलीलाकैवल्यमितिन्यायेनभगवतःसृष्टिप्रवृत्तिलीलयैवेत्यर्थः ४६ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तदेवंब्राह्मणएवंविधंप्रदृश्यमुत्त्युपायमाहतस्येति तस्यविष्णोः यः सउद्यतः भक्तानुद्धर्तुमुद्धृतः पाणिरिवपाणिर्धर्मः सपृथिव्यासमोविधारकत्वात् रात्रौअविद्यायां-
तपनः प्रकाशकोविवेकप्रदोधर्मएवभवति मंडलंराष्ट्रंविपुलंनभोहार्दंब्रह्मभोगापवर्गावपिधर्मप्राप्यावेवेत्यर्थः ४७ सइतिधर्मः चंद्रस्यमनसोविषयंबंधकरा
गादिकषायं शमयामासनाशयतीत्यर्थः ग्रहादीनांक्रुद्धतारातुल्यानांचक्षुरादीनांगतयोगतीः शमयति शमंदमंचधर्मः ४८ प्रसंगाद्धर्मस्यमुक्त्युपायत्वमु-
क्त्वाप्रकृतंपृथिव्यांकृतेयोगमनुसरति ताञ्छायामिति सपृथिव्यांदक्षिणेहस्तोधर्मः महायोगीमहान्योगीयेनभवतिसतथा महत्ज्ञानोत्पत्तिक्षमंमनोयेनस
तथा योगदः चित्तशुद्धिदश्चभवतीत्यर्थः किंकुर्वन् सोमात्स्ववह्निः पूर्वोक्तैः सप्तधासहस्रधानेकधाचभूतैः मंडलेनचसोमस्यधारणाविषयीकृतेनतांछायां
रात्रिशब्दोक्तामविद्यामाक्षिपन् शिथिलीकुर्वन् गंगासेवनंचंद्रमंडलेधारणाचक्रमेणाविद्यांनाशयतइत्यर्थः ४९ महायोगीमहात्मनाइत्येतत्संक्षेपेणाविष्णो-
ति सैवेतिसाएषाअविद्यारात्रिरूपाछायाअलिंगानिर्वचनीयत्वेनतत्त्वावेदकप्रमाणशून्यापृथिवीलिंगात्भूमिबिंबहंप्राप्यशशीभूताकृत्स्नैकारूपेणचंद्रीभूतासती

तस्ययः सोद्यतः पाणिः पृथिव्यांपृथिवीसमः रात्रौतपनोभवतिमंडलंविपुलंनभः ४७ सचंद्रविषयंराजन्शमयामासरुंधति ग्रहाणां
गतयश्चैवताराणांचविशेषतः ४८ तांच्छायामाक्षिपन्सोमात्स्ववह्निर्मंडलेनवै पृथिव्यादक्षिणोहस्तोमहायोगीमहात्मनाः ४९ सै
षाच्छायाशशीभूताशशिमंडलमाविशत् अलिंगापृथिवीलिंगादद्भुतादक्षयादिवि ५० अंगांगान्युपगृह्यैवतुपश्चरतिनिश्चयात् सो
स्यपादौतुसतुल्यौपृथिवीतपसिस्थिता ५१ सूर्यार्चिर्भिः पीयमानादाक्षिप्यतमहीतले महीमिवाबुवसनांयुगांतेविष्णुतेजसा ५२ र-
राजसूर्यरश्मिभिर्व्यतिषिक्तामहानदी स्फाटिकेवशुभ्रासैषाकांचनैर्धातुभिर्वृता ५३ आदित्येनसमाहृत्तारश्मितेजोभिसंभवैः मंडलांतर्ग
तादेवीचक्षुषानोपलभ्यते ५४

चंद्रमंडलमाविशत् अंतेचंद्रतादात्म्यंप्राप्येत्यर्थः कुत्रदिविआकाशेनतुमानसेपृथिवीलिंगात् कीदृशात् अद्भुतात् अनिर्वाच्यात् की
दृशीछायाअक्षयामिथ्यात्वादेवापचयशून्यामरीचिकाहृदवत् ५० पृथिव्याः शशीभवनप्रकारमाह अंगांगानीति सर्वांगान्युपसंहृत्येत्यर्थः प्रोक्ष्येत्यनेनती-
र्थस्नानादिकमपिकृत्वेतिलक्ष्यते ५१ एवंजलघनीभावरूपचंद्रीभूतापृथ्वीपुनः सूर्यधारणाभ्यासाद्भंगात्मभावमाहचतुर्भिः सूर्यार्चिर्भिरिति सूर्यार्चिर्भिः पी
यमानात् जलात् महीआक्षिप्य तेतिसंबंधः वह्निनाकर्पूरशिलेवार्कांशुभिः शोष्यमाणापृथ्वीस्वस्वरूपमपनीतासूर्यभावंप्रापेत्यर्थः तत्रदृष्टांतः महीमिवेतियुगांतेप्र
लयकालेविष्णुतेजसाऽबुवसनासजलांमहींस्ववशेकृतामिवतांपृथ्वींकृत्वापश्यामइतिभावः ५२ हराजेति साभूः सूर्यरश्मिभिर्व्यतिषिक्ताभिश्रितासतीमहान
दीरूपेणबभूवेत्यर्थः ५३ रश्मितेजसाभिसंभवाऽभिन्नएकीभावागतैर्हेतुभिरादित्येनग्रस्तासतीचक्षुरग्राह्याभूत् ५४ ५५ ५५ ५५ ५५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इदंसरस्वत्यास्तत्वंस्पष्टतरमपिदुर्ग्रहमित्याहनिःस्वनमितिसर्वभूतानिइमंनिःस्वनंनादंब्रह्माख्यंनियमैरपिनशृण्वते यस्मादतींद्रियंतस्मात्तेकिंमानमतआह मं-
दराग्रेस्थूलप्रपंचस्यअग्रेप्रथमंअतिस्थूलत्वात् कृत्स्नंजगत् विसर्पतंव्याप्नुवंतंयोयंवैखरीशब्दः सएवायंतथापिसूक्ष्मत्वात् दुर्ग्राह्यइत्यर्थः तथाचश्रुतिः च-
त्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्यावदंतीति ६३ विरामेति विरमत्यस्मिन्निति विरामस्तु-
रीयः तस्यापिनियमेनिग्रहे तुरीयाख्ये षोडशेप्राप्तेसति वाक्तूष्णीभूता यतोवाचोनिवर्त्तंतइतितस्यवागविषयत्वात् अत्रहेतुमाहसत्येति यासत्यवादिनीब्रह्म-
प्रतिपादकासानियमात् नैववाचमीरयेत् वाचोदितंतदनृतमितिस्मृतेः तद्वह्वावचनेनैवप्रोवाचेतितंह द्वितीयेवातृतीयेवावचनेनप्रोवाचब्रूमःखलुत्वंतुनविजाना-
स्युपशांतोयमात्मेतिश्रुतेश्च ६४ अथसृष्टौसमाधौवातूर्यप्राप्त्यनंतरम् ६५ कथंतदवचनीयस्यापिप्रतिपत्तिरित्यतआह विभज्येतियोगेएकत्वंम-
नसाउपाधिनाविभज्यबिंबप्रतिबिंबभेदेनद्विधाकृत्वासर्वभूतेष्वज्ञानग्रस्तेष्वनुग्रहंतत्वकथनेनकर्तुंसरस्वतीतीरयुतातीरमिवतीरंतटस्थंब्रह्मशाखाचंद्रन्या-

निःस्वनंसर्वभूतानिनियमैश्चनशृण्वते मंदराग्रेविसर्पंतंजगत्कृत्स्नमतींद्रियम् ६३ विरामेनियमेप्राप्तेतूष्णीभूताबभूवह नवाचमी-
रयेद्देवीनियमात्सत्यवादिनी ६४ अथभूतानिसर्वाणितूष्णीभूतानिसर्वशः नशेकुरभिधानार्थंव्याहर्त्तुंवदनेर्बलात् ६५ विभज्ययो-
गमनसासर्वभूतेष्वनुग्रहम् सरस्वतीतीरयुताव्याजहारमहास्वनम् ६६ सरस्वत्यासमायुक्ताशिक्षांगृण्हातिदेहिनः तस्मिन्नेवायतेस-
र्वेगानंगायंतिशिक्षया ६७ आदित्यावसवोरुद्रामरुतश्चाश्विभिःसह जटिलाश्चीरवसनामुंजमेखलधारिणः ६८ गंधर्वाःकिन्नरा-
श्चैवसनागाःसहचाप्सरः तपश्चरंतिसहिताःपुष्करेषुमनीषिणः ६९ अपिकीटपतंगैश्चसहसर्वैःसरीसृपैः शोषयंतिशरीराणितपसो-
ग्रेणयत्नतः ७० विष्णुर्विष्णुत्वमापन्नोदेहांतरविसृष्टवान् संरक्षतिमहायोगीसर्वांस्तान्सहचारिणः ७१

येनोपलक्षणीभूतंतेनयुतासतीत-
क्षणयाचंद्रमिवप्रदर्श्यव्याजहारमहास्वनेतिबहुप्रमाणोपष्टंभमुक्तार्थेसूचयति साक्षाद्वक्तुमसमर्थापिवाक्लक्षणयाब्रह्मप्रतिपादयिष्यत्येवेतिभावः ६६
तावतैवलोकशिक्षापिभवतीत्याहसरस्वत्येति तस्मिन्नेवशब्दगम्येशबलेपदेस्थित्वागायंति एतमानंदमयमात्मानमुपसंक्रम्यएतत्सामगायन्नास्तेहावु अ-
हमन्नमहमन्नमित्यादि ६७ केगायंतितानेवाहादित्याइति ६८ अंभसिभवआंभसोवरुणः ६९ अपीति कीटादीनामपियोग्यदेहःप्राप्स्यातपस्यधिका-
रोस्तीत्यर्थः ७० एवंशरीररूपापृथिवीयोगबलाज्जलादिभावेनपरिणम्यशब्दाद्याकारेणसर्वलोकहितायभवतीत्युक्तंतथाशरीराभिमानीचशब्दस्यैवच-
रमंरूपंपराख्यमित्युक्तंएवंवाच्यवाचकयोरभेदात्सर्वाद्वैतंसिद्धमनउपाधिकोभेदव्यवहारइत्यपिसमाहितं तत्रैवंसतिजीवादन्यईश्वरोनास्तीतिप्राप्तेतन्निषे-

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 सैवार्करश्मिमार्गेणोत्तीर्णरविजलात्मनाधावतीत्यर्थः ५५ ५६ ५७ ५८ सैषेति साएषाब्जोकानांधारणेरता पृथ्वीसुतपाशोभनंतपः कुर्वतीपूर्वं चं-
द्रविहितचंद्ररूपेणनिष्पन्नापश्चाद्गंगात्वंप्राप्तापुष्करेणपरमात्मनासमाहिता एकीभूतासतीफलं अर्थात्तपसःलेभेसार्वात्म्यं पावनत्वंचप्राप्तवतीत्यर्थः ५९ ए-
षेवसार्वात्म्यात्वाग्देवतादिभावंप्राप्तेत्याह सरस्वतीत्यादिभिः तदासरस्वतीऋषिभिःशिक्षयाप्रार्थितान् चतुरोवेदान् व्यक्तैःस्वरैरधीतेइतित्रयाणांश्लोकानां
संबंधः साब्जोकधात्रीगंगात्वंप्राप्यपुष्करेणासरव्यकालेसरस्वतीभूत्वाव्यक्तैःस्वरैः अकारोकारमकारैःवादिनीसविशेषब्रह्म वदनशीलाअधीतेप्राप्नोतिकिंब्रह्म
विराट्सूत्रेश्वररूपमित्यर्थः कीदृशीसरस्वती पृष्ठात्मंदरेप्रयाता पृष्ठं भ्रूघ्राणमध्यस्थओंकारणंब्रह्ममेरुपृष्ठाख्यंसर्वेंद्रियदेवतावासभूतंततोमंदराख्यं अर्वाचीनं-
स्थूलप्रपंचंवैखरीभावंप्रयातेत्यर्थः यथोक्तंमंत्रशास्त्रेयोगपटलेहेमरूपोभ्रुवोर्मध्येमेरुस्तिष्ठतिपर्वतः तस्याभितोमहीपार्श्वेपंचाशच्छतयोजना लवणे
क्षुसुरासर्पिर्दधिक्षीरजलात्मभिः सिंधुभिस्सप्तभिर्द्वीपैस्सप्तसंख्यैर्द्विगुणोत्तरैः मंदरःपारियात्रश्चेत्यादि ६० ऋङ्मयानीतिचतुरोवेदानकारोकारमकारान्दै

रश्मिभिःपुनरुत्तीर्णाततोयोगेनधावति आकाशगंगासातुस्याविपुलैरंबुविग्रहैः ५५ शीतच्छायैश्चतरुभिर्लताभिश्चस्रगंधिभिः ग
दरवैश्चविविधैःशकुनैर्दिव्यगंधिभिः ५६ कांचनापीडजघनास्फाटिकांतरभेखला पद्मरेणुसितापीताचक्रवाकस्तनसिका ५७ नीक्ष
गर्भसुकेशांतापृथुसंश्चयसंकुला शोभतेविप्रसर्वत्रीसुमदेवविभूषिता ५८ सैषागंगाफलंलेभेपुष्करेणसमाहिता सुतपाचद्रविहिता लोका
नांधारणेरता ५९ सरस्वतीस्वरैर्व्यक्तैरधीतेब्रह्मवादिनी पृष्ठात्प्रयाताशैलेंद्रेमंदरेमंदगामिनी ६० ऋङ्मयांश्चतुरोवेदानपादैश्चतुर्भिरी
डितान् यजुर्भिस्सामभिश्चैवप्रार्थितान् शिक्षयातथा ६१ ऋषिभिर्ज्वलनप्रख्यैस्तपसादग्धकिल्बिषैः सुपार्श्वस्यागिरेःपादेपरिद्वार्येसुपारणैः
६२

मात्राख्यान्प्रत्येकंचतुर्भिःपादैरावृतान् अतएवऋङ्मयान् यजुर्भिःसामभिश्चप्रार्थितान् तुरीयस्यसर्वत्रसंततत्वादनुक्तिः अयमर्थः अकारादयोविश्वतैज-
समाज्ञतुरीयाःप्रत्येकंविश्वादिचतुष्ट्यात्मकाइतीयंप्रसिद्धाः तेषामाद्योविश्वविश्वःअंत्यस्तुरीयतुरीयःयंप्रकृत्यतत्त्वेवोक्तं ईश्वरप्रासस्तुरीयइतितेनयुक्तसु
क्तंऋङ्मयानीत्यादिविस्तरभयात्तुनतदिहप्रपंचितम् ६१ कीदृशैःऋषिभिःसुपार्श्वस्यस्थूलशरीराख्यगिरेःपादेएकदेशेभ्रूघ्राणमध्यादौ यद्वासुपार्श्वस्यगु
रोःपादेचरणे परितोदीप्यतेचित्तंब्रह्माख्यंयेषांतैःपरिद्वार्यैःसुपारणैःसुष्ठुशोभनंशिष्यान्पारयंतीतिसुपारणाःपरोद्धारसमर्थास्तैः ६२ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तमितितंविष्णुंअग्निंजाठरं अतएवात्मसंसृष्टं देहांतस्थं अहंवैश्वानरोभूत्वेत्यादिस्मृतेर्महामतिंदिव्यज्ञानप्रदंनागोवारिणावववर्षेत्युत्तरेणसंबंधः ७९ दहनंजाठरंवारिणावारिजेनान्नादिना फलभोक्ताजीवोऽप्ययमेवेत्यर्थः ८० ततइतिभोक्तृत्वादेवकर्तृत्वाधिकारासन्न्पुष्करेसमष्टिब्रह्मणिआत्मानंव्यष्ट्याभिमानिनंसंहृत्यप्रविलाप्यतपस्तप्यतेबलंवैराग्यंपादगात्राणिपादादीनिगात्राणिपूर्वोक्तरीत्याधोधस्तनमुपर्युपरितनेसंहृत्यमूर्ध्निसहस्रारे अचलंपरमशिवाख्यम् ८२ एषइति नोपधानविकल्पितःनिरुपाधिःस्वभावसिद्धइत्यर्थः ८३ अत्रापियोगोपसर्गाउपस्थिताःपरिहर्तव्याइत्याह अथेत्यादिना दैत्याःकामादयःहताःपूर्वंयोगारंभात्प्राक्निर्जिताः अपितत्रसमाधिकालेउद्यतानिआयुधानिस्त्र्यादीनियैस्तेनगरैःशरीरैः ८४ अग्निंयोगिनंदैत्याःपर्वताग्र्यैःदिव्यवनितादिशरीरैः

तमग्निमात्मसंसृष्टंलेलिहानंमहामतिम् प्रतिप्रष्टं स्ततेजोभिर्भूतानांहितकाम्यया ७९ वारिणासुखशीतेनप्राणिनांप्राणवर्द्धनः न्यषिंचद्दहनंतत्रनागोबालाहकस्तदा ८० ततःसिद्धगणैर्जुष्टःपुष्करेतप्यतेतपः संहृत्यमनसात्मानंमहायोगीमहाबलः ८१ पादगात्राणिसंहृत्यमनोमूर्ध्निविधारयन् अचलस्थानमासाद्यतूष्णींभूतोबभूवह ८२ एषधर्मोहिधर्माणांनोपधानविकल्पिताः हितःसर्वेषुभूतेषुइहचामुत्रचोभयोः ८३ अथदैत्याहतास्तत्रसमागम्योद्यतायुधाः मायाप्रायैर्बहुविधैर्नगरैरभिसंवृताः ८४ अग्निंदैत्याःपर्वताग्र्यैरभिघ्नंतिपरंतप ज्वलंतंज्वलनप्रख्यामहाकायामहाबलाः ८५ मेघीभूताश्चमायाभिर्वर्षंतिबलदर्पिताः तस्मिन्नेवाभिसंघातेससंघातंमहाबलम् ८६ तेयोगाग्न्यर्चिषादग्धाःशतशोथसहस्रशः युगांतेप्रभुरादित्यःप्रजाइवदिधक्षति ८७ नशोकुरग्निंदैत्यास्तेमायाभिर्सुरवधुद्यनम् आदित्यइवदीप्यंतंनभःसूर्योदयेयथा ८८ विहितैरुद्यमैःसर्वैर्दैत्याभग्नपराक्रमाः गंधमादनमासाद्यानिषण्णानगमूर्द्धनि ८९ सचाग्निर्वैष्णवैर्लोकैर्विद्युद्भिःसहसंगतः अंतरिक्षचरान्दैत्यान्निर्दहन्विचरन्दिवि ९० नागोबालाहकश्चैवमेघसंघातमागतः सुमोचसलिलंभूमौपर्जन्यइववृष्टिमान् ९१ मंत्रैःसंचोदितोनागोद्विजेभ्योवदनोद्गतैः सुमोचतोयसंघातमानयन्विप्रजंजनम् ९२ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिनामाष्टाविंशतितमोऽध्यायः २८ ॥ ॥

प्रदर्शितैःज्वलंतंविन्याकंज्वलनप्रख्याःविन्याकाएवनतुभौतिकाःमानसाइत्यर्थः ८५ मेघीभूताइत्यादयःस्पष्टार्थाःश्लोकाः ८६ ८७ ८८ ८९ ९० नागइति एवंयोगोपसर्गान्जित्वास्थितंयोगिनंपूर्वोक्तोयज्ञादिफलरूपोधर्मोवृष्ट्यादिद्वारेणयातीत्यर्थः ९१ नागोवृष्ट्यधिष्ठात्रीदेवताद्विजेभ्योवदनद्वाराद्गतैर्मंत्रैःप्रेरितःसन् विप्रजंजनंब्राह्मणसंततिभूतंलोकं विगतप्रजंवानैष्ठिकम् ९२ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांअष्टाविंशतितमोऽध्यायः २८ ॥ ॥ ॥ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्तुरीशादन्य एव जीवो नास्तीत्याह विष्णुरिति विष्णुः परमात्मा विष्णुत्वं व्यापकत्वं प्राप्तोपि देहांतरस्य चतुर्भुजस्य विसृष्टं विशेषण सर्जनं तद्भान भूत् व्यापकेन रूपे
ण पालयितुमशक्तश्चतुर्भुजं विग्रहं यज्ञादि भोक्तारं सर्वभूतनियंतारं चाश्रितवानित्यर्थः तेन च तान् आदित्यादीन् रक्षति रज्जूरगवत् अधिष्ठानाधिक मध्यस्तं ना
स्ति आध्यस्तात्तु जीवादधिष्ठान भूत ईश्वरोस्तीति भावः ७१ एतदेवाह पुष्करे इति पुष्करे सर्वकार्यात्मिके जगति विष्णुरेव नरनारायणादि रूपो भूत्वा रमते तप
आदि लीलां करोति लोकशिक्षार्थे ७२ लीलामेवाह सोग्निरिति स विष्णुः मनः कल्पितोग्निः गार्हपत्यादिरूपो भूत्वा पृथिव्यभिमानिनं पृथिवी देहमात्मन इच्छ
ति पृथिवी वा चरत्वा पुरुषः पृथिवीति श्रुतेः देहिनं तापयन् कनकवन्निर्दोषं कुर्वन् अग्निहोत्रादीनां तत्त्वतेन पृथिव्या पुरुषेण समं दशयोजनं ब्रह्मांड मंडलं-
धावति तस्मै फलं ददातु प्राज्ञेनात्मना संपरिष्वक्त उत्सर्जन्याती तीति जीवस्य लोकांतर गमने तत्साहित्य श्रुतेः स्वयमेव कर्मतदंगरूपो भूत्वा जीवेभ्यस्तल्लोकं गतिं प्रयच्छ
तीत्यर्थः ७३ विरराजेति पृष्ठतः चात्सर्वतः विशीर्णो नाशितः पार्थिवः पृथिव्या अपत्यं पार्थिवः देहात्मवादी तस्य भवः सामर्थ्यं यैस्तैः मोह सामर्थ्यं दहद्भिर

पुष्करे समंते विष्णुर्विष्णुरेव द्विधा कृतः दीप्यमानः स्वतेजोभिर्विधूम इव पावकः ७२ सोग्निर्मनः समुद्भूतः पृथिवीं तापयन्निव प्रधावति
समंतेन मंडलं दशयोजनम् ७३ विरराजार्चीभिर्दीप्तैः पृष्ठतश्चावलंबिभिः विशीर्णपार्थिवभवैर्मयूखैरिव दीपितः ७४ तस्याग्ने-
र्विस्फुलिंगानां न शेकुर्लंघने रताः विप्रकीर्णस्य वसुधामर्यादामिव भास्करम् ७५ सोग्निर्दीप्तिविभज्यात्मानं विधूम इव पावकः क्रतुभिर्ज्वल-
न मखेष्वेव विक्रीयत इवाध्वरे ७६ सोग्निर्धूमागतस्तत्र तिष्ठते विपुलं तदा यावद्विष्णुः क्रमप्राप्तो नियमस्य समापनात् ७७ रक्षां कृत्वा स्थितं वि
द्यात् विष्णुर्विष्णुपराक्रमः भूत्वा शतशरीरस्तु नागो बालाहकोभवत् ७८

त्यर्थः तैर्मयूखैर्दीपितोग्निः रराजेति ७४ तस्येति अग्नेर्विष्णुरूपस्य रताः विषयासक्ताः यथा भास्करं लंघयितुं न समर्थाः तथा विस्फुलिंगानां ब्रह्मादिरूपाणां लंघ
नेन शेकुः कीदृशं भास्करं वसुधामर्यादां पृथिव्याः परिच्छेत्तारं भूचरैर्भुवः परिच्छेत्तारं लंघयितुमशक्य इत्यर्थः ७५ सोग्निः दीप्त्या विपुलं प्रकाशं कृत्वा आत्मानं स्था
नविभज्य द्रव्य देवतादिरूपेणानेकधा कृत्वा स्थितः स एव क्रतुभिः विक्रियते विविधं क्रियते सोमक्रयिभिः सोमरूपः सन् क्रियते ७६ सोग्निः तत्र अध्वरे तिष्ठते द्र
व्य देवतादिरूपेण प्रकाशते यावत् नियमस्य क्रतोः समाप्तनं तावत् धूमागतो धूम प्राप्तो निर्धूम इत्यर्थः स एव चाग्निः स रूपेण यावद्विष्णुक्रम पृथिव्यंतरिक्षद्युपर्यंतं
प्राप्तोगतः विष्णुरेव लोकहितार्थी सिर्व क्रतु तदंग तत्फलरूपोभूदित्यर्थः ७७ रक्षामिति तमेव रक्षां कृत्वा स्थितं विष्णुं विद्यात् न कोपि जानाति स तु विष्णुर्व्यापी
तादृग्विभवश्च योगेन शतशरीरो भूत्वा बालाहको बलाहके मेघे तिष्ठतीति बालाहको नाग ऐरावतो मेघानां भेत्ताभवत् यज्ञफलं वृष्टिरूपमप्ययमेवेत्यर्थः ७८ ४९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

योगविघ्नविघातायकर्माण्येवाचरेदिति प्रयोविंशे पुराकल्पमुखेनैतत्प्रसाध्यते १ तत्रअचलंस्थानमासाद्यतूष्णींभूतोबभूवहेति प्राप्तप्राप्यस्ययोगिनस्तूष्णींभा वउक्तस्तेनप्रयोजनाभावात्सर्वप्रवृत्तिशून्योयोगीस्यादितिमन्वानोजनमेजयउवाच संयुज्येति तपसायोगेन १ प्रारब्धकर्मवेगेनतूष्णींभावोल्पथापियोगीपू र्ववासनाकर्माण्येवयज्ञादीनिकरोतीतिपुरासरूपार्थवादमुखेनदर्शयन्वैशंपायनउवाच अथेतिदीक्षामपरिच्छेदमाखिलक्षणांरूपांतरापत्तिम् विष्णुमयाः ब्र ह्मयथाअग्निमित्युपलक्षणं सर्वमपिद्रव्यंयज्ञियंपुष्कराख्यंजगत्कारणमयमेवेतिसूचयति ब्रह्मार्पणंब्रह्महविरितिगीतोक्तदृष्ट्यासिद्धाकर्माणिचक्रुरित्यर्थः जुहुवुरित्यग्रिमेणसंबंधः २ मंत्रैःप्रकाशितंप्रयोगकालेपिस्मारितंपूतंच ३ सचेति चतुर्भिरिष्टयोगध्यानं ४ असिचर्मणीखड्गखेटके धनुश्चधारयन्

जनमेजयउवाच संयुज्यतपसादेवाःकिमकुर्वंस्ततःपरम् नहिताहूयतेलोकेतपसायन्नलभ्यते १ वैशंपायनउवाच अथ दीक्षांसमास्थायसर्वेविष्णुमयागणाः पुष्करादग्निमुद्धृत्यप्रणीयचयथाविधि २ जुहुवुर्मंत्रविधिनाब्राह्मणामंत्रचोदिताः हविषामंत्रपू तेनयथावैविधिरेवच ३ सचाग्निर्विधिवत्तत्रवर्द्धितोब्रह्मतेजसा तेजोभिर्बहुलीभूतःप्रभुःपुरुषविग्रहः ४ ब्रह्मदंडइतिख्यातोवपुषा- निर्दहन्निव दिव्यरूपप्रहरणोह्यसिचर्मधनुर्धरः ५ सगदीलांगलीचक्रीशरीचर्मीपरश्वधी शूलीवज्रीखड्गपाणिःशक्तिमान्वरकार्मु- कः ६ विष्णुश्चक्रधरःखड्गीमुसलीलांगलायुधः नरोलांगलमालंब्यमुसलंचमहाबलः ७ वज्रमिंद्रस्तपोयोगाच्छतपर्वाणमाक्षिपत् रुद्रःशूलंपिनाकंचमनसाधारयत्प्रभुः ८ मृत्युर्दंडंपाशमापःकालःशक्तिमगृण्हत जग्राहपरशुंत्वष्टाकुबेरश्चपरश्वधम् ९ निर्विका- रैःसमायुक्ताःशतशोयसहस्रशः विश्वकर्माचत्वष्टाचचक्रातेह्यायुधंबहु १० इंद्रायाग्निरथंप्रादात्सूर्यायचप्रतापिने परमात्माददौरु- घोरुद्रायचमहात्मने ११ छंदोभिरेवत्वष्टाचसचकाराथवाहिनीम् विश्वकर्माविमानानिचकारबहुभिःक्रमैः १२ शरीरांशंसमुद्धृत्य- विष्णुःसत्यपराक्रमः पुष्करात्पर्वणिवनात्पृतनार्थेप्रवर्तयन् १३ ग्रांश्चैवसर्वनक्षत्राणांवाचावैसमकल्पयत् यथाक्षपूज्यःसंग्रामेशत्रूंश्च विभिदेरणे १४ सतंदंडंसमुचितंनिर्विकारंसमाहितं ब्रह्माजग्राहविधिनाअंतर्धानगतःप्रभुः १५

५ ६ अस्यादिखड्गांतैःषोडशभिरायुधैःषोडशभुजोनारायणः लांगलमुसलायुधोनरः ७ योग बलप्रभावनिरूपणादीनांह्मादिभिरुत्कर्षकारणान्याहवज्रमिति ८ आपःवरुणः ९ विश्वकर्मात्वष्टुरेवमूर्त्तिभेदः १० विष्णुरपिइंद्रायसूर्यायरुद्रायचरथंप्रादात् सर्वेयोग- प्रभावकल्पितम् ११ छंदोभिर्वेदैःप्रदर्शितरीत्या १२ वनादव्ययात्पुष्कराख्यात्शरीरांशंसमुद्धृत्यपृतनाशब्दार्थेसेनां १३ सूर्यस्यनक्षत्राणांचस्थित्यैग्रामकल्पयत् यथादिवापूज्यः इंद्रः १४ सइति प्रसिद्धोब्रह्मरूपीविष्णुःतंअसुरेषुइंद्रेणसमाहितंनिपातितंदंडंउचितंनिर्विकारंयथास्यात् तथाजग्राह अनुमेनेतान्प्रतिअंतर्धानंचगतवान् १५ ६५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१६ दितेःपुत्रा अपितपसाशिक्षयाचयुक्ता अपिविकारैः कामादिभिः १७ अप्रधृष्याःसमपद्यन्तसपत्नाःएकत्वमार्षं १८ नेदितेःपुत्राःगुहाःगुह्यानिसूत्रादात्मकानिस्व-
रूपाणिविहायरथेसभांडोपस्करेइतिभोग्यवस्तुसहितमध्येनिषण्णाःसंतःमंदरस्यस्थूलकार्यस्यपादेएकदेशेविचेरुःपृथ्व्याऊर्ध्वगतिंनलेभिरेइत्यर्थः १९ तमसःका
र्यआसुरंबलंसंहृत्यविष्णुरेवबलिष्ठइत्यर्थः आसुरंकर्मक्षययुक्तमितिभावः २० भूयइतिआसेदुरसुराःब्राह्मणैःसुरैश्चसार्द्धंनदर्पितमःकार्यत्वान्नश्वरमिति-
सात्विकएवधर्मोमुमुक्षुभिःआदृतव्यइतिभावः २१ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांएकोनत्रिंशोऽध्यायः २९ ॥ ॥ प्राप्तुर्योगफलं-
मोक्षंसात्विकानतुतामसाः तुल्यश्रमाअपीत्येतच्चतुर्विंशेभिधीयते १ मनःसिंधुर्मतिःशैलःशमकामौसुरासुरौ अभ्यासोमंथनंमुक्तिःसुधाधात्राहरूपकैः २ एवं-

स्वैःप्रभावैश्चविधिनासोऽस्त्रग्रामंचतुर्विधम् ऐंद्रमाग्नेयवायव्यैरौद्रंरौद्रेणवर्चसा १६ एभिर्विकारैःसंयुक्तादितेःपुत्रामहाबलाः तपसाशिक्ष
याचैवशास्त्रैःप्रहरणैरपि १७ बलेनचतुरंगेणवीर्य्येणसुसमाहिताः अप्रधृष्यारणेसर्वेसमपद्यन्तवैतदा १८ तेविहायगुहामध्येसभांडो
पस्करेरथे मंदरस्यगिरेःपादेविचेरुर्वसुधातले १९ चतुरंगंबलंसर्वंसंहृत्यतमसःप्रभुः विष्णुरेवमहायोगीचचारवसुधातले २० भू-
योऽन्यत्तपआसेदुश्चरंतोब्राह्मणैःसह तैश्चसर्वैःसुरगणैश्चर्मचीरनिवासिभिः २१ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिए
कोनत्रिंशोऽध्यायः २९ जनमेजयउवाच ब्रह्मन्खिलेवर्तमानेनिर्मर्यादेमहाग्रहे अविनाशेचभूतानांकथमासन्प्रजास्तदा १
वैशंपायनउवाच अभ्यषिंचत्पृथुंवैन्यंपुराराज्येप्रजापतिः राज्यायऋषिभिःसार्द्धंप्रजाधर्मपरायणः २ एषनोपरमोराजासानुरागा
दजायत त्रेतायांसंप्रवृत्तायामन्योन्यमनुजल्पिरे ३ एषनोवृत्तिदाताचविप्राणांचप्रवर्त्तिता निर्मातासर्वभूतानांसत्यप्रासेनकर्म्मणा ४
एतस्मिन्नंतरेदेवागंधमादनसानुषु बहुभिर्नियमैःश्रांतानिषण्णागिरिसानुषु ५ अथगंधंसमासाद्यसमंताद्देवमानवाः माधवेसमयेप्रा
प्तेतेनगंधेनदर्पिताः ६ पुष्पमासस्यपद्मीयंमारुतेनविसर्पितम् मनोग्राह्यसुखंसर्वंपार्थिवंगंधमुत्तमम् ७

तामसस्यजनस्यपुनःपुनःसंसारप्राप्तिश्रुत्वाद
यथा नेषांगतिंजिज्ञासमानोजनमेजयउवाच ब्रह्मन्निति खिलेअयःशंकुतुल्येमहाग्रहेमहत्यज्ञानेहृदयशल्येसति अविनाशेनिर्मोक्षेचकथंदुःखपरंपरामग्नाःआसन्नि
ति १ अनन्तरोत्तरंराज्ञास्वधर्मेस्थापिताःप्रजाःक्रमेणचित्तशुद्धिंप्राप्यमुच्यंतइतिविविक्षुर्वैशंपायनउवाच अभ्यषिंचत्राज्येराज्यभावेराज्यायराजकर्मणे प्रजानांधर्मए
वपालनीयतयापरायणंयस्यसतया २ ३ सत्यप्रासेनपरमेश्वरेर्पितेनईश्वरानुग्रहेणेत्यर्थः ४ स्वधर्मस्थास्वपिप्रजासुयेविष्णुभक्तास्तएवमुक्तिभाजोनान्येयोगशते
नापीत्यमृतमंथनाख्यायिकामुखेनाह एतस्मिन्नित्यादिना ५ गंधंकंठकूपेसुस्निग्धानिवृत्तिरितिकिंचित्क्षुद्धारणाफलं माधवेवसंते ६ ७ ॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८ ९ कर्मबुद्धयः धारणोत्थानिज्ञानानिशुभानिमुक्त्यर्थानिअशुभानिभोगार्थाः बुद्धिप्राणेनबुद्धिबलेन १० तस्मादिति यस्मात् योगफलमतिश्रेष्ठमित्यनुमा
नेननिश्चितंतस्मात् पयोअमृतसाधनंज्ञानं मध्येसमुद्रतुल्येदेहाभ्यंतरेऔषधीः औषधीसंभवंदेहंनिक्षिप्यमंदरेणविवेकेनसाधयामहे ११ एतदेवविशदयति
ससुद्रमिति सोमजंजलंअमृतंपीत्वासम्यगास्वाद्यकामरूपिणोभविष्यामइतिशेषः सहिताः सर्वेप्रस्थिताअविद्यानाशार्थंउद्युक्ताः १२ विष्णुरिति आराधितो-
विष्णुरेवास्माकंअग्रणीयोगमार्गेनेतोभविष्यतितावताचादिवंवसुधांचभोक्ष्यामः कामादिभिःसहस्थिताः अपिसत्यसंकल्पाः सत्यकामाश्चभविष्यामइत्यर्थः १३
मूलपित्रादयः पत्रमात्रादयः शाखाः भ्रात्रादयः पुष्पादिकंअपत्यादितैःसहिताः सर्वेग्रहान् ऐकात्म्यग्रहं सुधांमोक्षंचगृण्हीमः वसुधातलेइत्यनेनगत्यपेक्षतावारस

तेदैत्यास्तेनगंधेनकिंचिद्विस्मयमागताः प्रसन्नमनसोभूत्वापरंसौख्यमुपागताः ८ ऊचुश्चसहिताःसर्वेतेनगंधेनदर्पिताः पुष्पमात्रस्ययद्‌-
वीर्यंकिंतस्यफलतोभवेत् ९ अनुमानेनविज्ञेयाविविधाःकर्मबुद्धयः शुभाश्चवाशुभाश्चैवबुद्धिप्राणेनदेहिनाम् १० तस्माद्वयंपयोम
ध्येऔषध्योनिर्मथामहे मंदरेणविशालेनबलिनाकामरूपिणा ११ समुद्रमभिसंरभात्समश्नीमःसोमजंजलम् पीत्वाचसहिताःसर्वेप्र
स्थिताःकामरूपिणः १२ विष्णुरेवाग्रणीस्तेषांभविष्यतिमहाबलः दिवंचवसुधांचैवभोक्ष्यामःसहशत्रुभिः १३ समूलपत्रशाखाश्चसपु-
ष्पाःफलशालिनः सर्वग्रहांश्चगृण्हीमःसुधांचवसुधातले १४ उद्धृत्यगिरिपादेभ्योगंधमादनसानुजान् प्रभाष्यवचनंदैत्यामंदरस्यप्र
कंपने १५ समुद्धर्तुंप्रधावंतःकंपयंतिस्ममेदिनीम् निश्चयेनमहावीर्याबाहुभिःपरिणाहिभिः १६ नशक्तास्तेसमुद्धर्तुंशैलेंद्रंदनुवंशजाः
निपेतुर्जानुभिर्दृष्ट्वाविपुलेपर्वतांतरे १७ समाधायात्मनात्मानंतपसादग्धकिल्बिषाः पितामहंप्रपद्यंतेशिरोभिःकामरूपिभिः १८

तिअत्रैवेत्यर्थः तथाचश्रुतिः नतस्यप्राणाउत्क्रामंत्यत्रैवसमवनीयंतेब्रह्मैवसन्ब्रह्माप्येतीति १४ देवाःमंदरस्यप्रकंपनेवचनंप्रभाष्यसंकेतंकृत्वागिरिपा-
देभ्यः गंधमादनसानुजान् उद्धृत्येतियोजनागुरुशिष्यसंकेतपूर्वकंदेहस्यप्रविलापनेविषयेउपदेशंप्राप्यब्रह्मांडांतर्गततत्तद्विषयेषुनिमग्नावासनाश्चोद्धृत्य
१५ समुद्धर्तुंमंदररूपंदेहमुन्मूलयितुंपरिणाहिभिर्विशालैर्बाहुभिरिवबाहुभिः प्राणायामाद्यैः प्रधावंतोमेदिनींकृत्स्नंब्रह्मांडंकंपयंतितदपिप्रविलापयि
तुंयतंतेइत्यर्थः कथापक्षेऋजुरेवार्थः १६ नशक्ताः नशेकुः प्रथमप्रयोगेहृतोद्यमाबभूवुरित्यर्थः १७ समाधायेतिपितामहंईश्वरंशिरोभिः प्रपद्यंतेश
रणंगताइत्यर्थः कामरूपिभिर्दिव्यैः तथाचयोगाईश्वरंप्रणिधानफलमामनंतिततः प्रत्यक्चेतनाधिगमोत्तरायाभावश्चेति १८ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तेषामितियुग्मं अशरीरांसरस्वतींप्रणवरूपांनतुदेवतांशरीरस्थोंतर्यामीपरयावैखर्यादित्रिकात्परयानिर्गुणयासहबहुविधैः ओमित्येतदक्षरमिदंसर्वमित्या
द्यैकात्म्यप्रतिपादकैर्वाक्यैर्व्याजहारउपदेशं १९ २० व्याहृतमेवाह आदित्यैरितित्रिभिः आदित्याद्यैःप्राणाद्यभिमानिभिः २१ समेत्यमनसिएकीभावंप्राप्य
गिरिःशरीराख्यःसमुद्धरितुंउद्धर्तुंमूलनउच्छेत्तुंशक्यः धातुभिर्वातादिभिःसमंसर्वंबरंजितः २२ तेसुरासुरगणाःसर्वेमिनुष्यादयोपिगिरिंसमुत्पाट्याहिमव
तोरसंसंसारंदेहिनांभोग्यंश्रेयस्त्वेनाभिमतंवीरुधोवीरुद्रूपेणवासनासंततिरूपेणपश्यंतिदेहासंगशून्याःहार्दाकाशे कीदृश्योवीरुधःहस्तारूढाःकरतलाम
लकवदित्यर्थः २३ एतदिति दैतेयाअप्येतत्श्रुत्वाश्रुतार्थानुष्ठानेप्रवृत्ताइतिभावः २४ तथाभूताश्चयेयत्रभ्रूघ्राणमध्यादौचक्रेपुष्करस्यहृत्कमलकार्य
स्यविन्यस्तोविन्यासोवस्थानंतत्रस्थस्यलवणांभसआक्रीडभूताबभूवुः वैराग्याभावात् पूर्वोक्तैर्विघ्नैरभिभूताःसलिलेनइतस्ततोदोलायमानाबभूवुरित्य

तेषांमनोभिलषितंब्रह्मासर्वज्ञगोवशी ज्ञात्वाबहुविधैर्वाक्यैर्व्याजहारसरस्वतीम् १९ अशरीरांशरीरस्थःपरयावर्णसंपदा सर्वलो
कपतिर्ब्रह्मालोकानांहितकाम्यया २० आदित्यैर्वसुभिश्चैवरुद्रैश्चससमरुद्गणैः देवैर्यक्षैःसगंधर्वैःकिन्नरैश्चप्रगायिभिः २१ समेत्यस
हितैःसर्वैःशक्यउद्धरितुंगिरिः अमृतार्थेमहातेजाधातुभिःसमरंजितः २२ सुरासुरगणाःसर्वेसमुत्पाट्यमहागिरिम् हस्तारूढाःप्रप-
श्यतिवीरुधोहिमवद्रसम् २३ एतच्छ्रुत्वाचवचनंसर्वेषामंतिकेतदा दैतेयाबाहुबलिनोमनोभिर्वाग्भिरेवच २४ विक्रीडभूताबहुधाबभूवु-
र्लवणांभसः यत्रपुष्करविन्यस्तःसहितैर्देवदानवैः २५ सुरासुरगणाःसर्वेसहितालवणांभसः मंदरंपुष्करंकृत्वानेत्रंवासुकिमेवच २६ स
माःसहस्रमथितंजलमोषधिभिःसह क्षीरभूतंसमायोगात्अमृतसमपद्यत २७ तज्जह्रुरसुराःपूर्वमाक्रांताल्लोभमन्युना धन्वंतरिस्तथाम
द्यंश्रीर्देवीकौस्तुभोमणिः २८

र्थः २५ सुरासुरैरितिलवणांभसः जलंअमृतंसमपद्येतइतिहूयोर्येजिनासहिताःभूत्वेतिशेषःपुष्करंसनालंविलसत्क
मलसादृश्यान्मथनदंडपुष्करंतत्स्थानेदेहंकृत्वामनःसमुद्रेवासनौषधीःसंहृत्यतत्रतंदेहंनिक्षिप्यवासुकिंसर्पाकारांकुंडलिनींनेत्रंयोगमार्गनयनक्षमसहायंकृ
त्वाकुंडलिनीमूलंबंधेनोद्बोध्येत्यर्थः २६ एतावत्कृत्वापिसहस्रंसमाइत्यनेकजन्मसाध्यत्वंमथनस्यदर्शितं अथवावासुकिवत्श्वेतंशुद्धसत्त्वमयंभूतंसत्मायाया
ऐकात्म्यवृत्तेर्योगादमृतंशुद्धचिन्मयमुक्तरूपंबभूवेत्यर्थः २७ तादित्यर्द्ध्असुरायोगोपसर्गाः जितोपसर्गस्यषट्योगसिद्धयोभवंतीत्याह धन्वंतरीति अ
त्रधन्वंतरिशब्देनलघुत्वमारोग्यमलोलुपत्वंवर्णप्रसादंस्वरसौष्ठवंचेतिश्रुतिप्रसिद्धालघुत्वादयोलक्ष्यंतेमद्यशब्देनमधुमत्यादयोयोगिचित्तोन्मादकाःभूम-
योयोगशास्त्रप्रसिद्धालक्ष्यंतेश्रीर्देवीतिऋगादिरूपवेदविद्यास्फूर्तिर्लक्ष्यतेकौस्तुभवद्देहस्यभास्वरत्वम् २८ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

शशांकवदह्लादकत्वादिगुणैरितराल्हादकत्वं उच्चैःश्रवइतिदूरश्रवणंदूरेदर्शनादिसत्वंचलक्ष्यते पारिजातादिनाप्यन्यत्रदृष्टेनशश्रगंधादिमत्वंद्रष्टव्यं तेषामनंतरं पीयूषनिर्विशेषकेवल्येएतेषुमद्यमसकरान् प्रतिगत अन्यत्सुरान् प्रतीतिपुराणांतरात्द्रष्टव्यम् २९ अथराहोराख्यायिकासुखेनकपटंविद्याथिनोविनाशमाह पश्चादिति कथापक्षेतुस्पष्टएवार्थः राहुमब्रुवन्राहुमुद्दिश्यपरस्परंविचारितवंतः नत्विति अयंतुपिबतीतिभावः ३० राहोःकंशिरइत्यर्थः ३१ अनिर्मुक्तइ तिसार्द्धश्लोकएकवाक्यं तदमृतंज्ञानंपितृभिर्देवैःमुनिभिश्चकारादन्यैश्चगंधर्वादिभिरधिकारिभिः अनिर्मुक्तंनित्यसेवितंइंद्रहस्तात्सतद्ग्नादिशिष्योपशिष्य परंपरयापृथिवीजहारपृथिव्यामानुषाअपितत्तग्रहणेधिकारिणइत्यर्थः अंकंगताशिष्यत्वंप्राप्ताब्रह्मवाक्यंवेदवाक्यंतत्त्वमस्यादितेनचोदिताप्रबोधिता ३२

शशीकोविमलश्चापिसमुत्तस्थुःसमंततः उच्चैःश्रवाहयोरम्यःपीयूषंतदनंतरम् २९ पश्चाद्देवास्तदादातुउद्यतांराहुमब्रुवन् नतुकेचित्पि-बतिस्मदैत्यानैवचदानवाः ३० चिच्छेदाथहरिःसंरब्धेराहोश्चक्रेणकंतदा अनिर्मुक्तंपितृगणैर्मुनिभिश्चसनातनैः ३१ तदिंद्रहस्तादमृतंज हारपृथिवीस्वयम् जगामांकगतादेवीब्रह्मवाक्यप्रचोदिता ३२ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणित्रिंशत्तमोऽ ध्यायः ३० ५ ५ जनमेजयउवाच निहतेदैत्यसंघातेविष्णोश्चातिपराक्रमे देवेयादानवेयाश्चकिमिच्छंतिपराक्रमा-त् १ वैशंपायनउवाच दानवाराज्यमिच्छंतिपराक्रममहाबलाः तपइच्छंतिसहितादेवाःसत्यपराक्रमाः २ जनमेज यउवाच कथंकालस्यमहतांहिरण्यकशिपुस्तदा यजतेब्रह्मणःक्षेत्रेप्राप्तैश्वर्यःसकामदः ३ वैशंपायनउवाच य-जद्धहुसुवर्णेनराजसूयेनपार्थिवः क्रतुनादानवःश्रेष्ठोवसुधायांमहाबलः ४ गंगायांमुनयोमध्येयदश्रूद्विपुलंतपः समेयुस्तत्रस-हितायजमानेमहासुरे ५ ब्राह्मणावेदविद्वांसोमहाव्रतपरायणाः यतयश्चापरेसिद्धायोगधर्मेणभारत ६ मुनयोवालखिल्याश्च धन्याधर्मेणशोषिताः बहवोहिद्विजामुख्यानित्याधर्मपरायणाः ७ ऋषयश्चमहाभागाविप्रैःपूज्याःसहस्रशः विपुलैरत्रविभवे-र्न्हियमाणैस्ततःस्ततः ८ शुक्रस्तुसहपुत्रेणदैत्यंयोजयतेप्रभुः हिरण्यकशिपुंमध्येगणानांप्रभवःप्रभुः ९

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणित्रिंशत्तमोऽध्यायः ३० ५ ५ पंचविंशोकूटशिष्योप्येतिकालेनसाधुतामिति तद्दर्शयन्नाहहिरण्य कशिपुस्वयम् १ लक्ष्मीवान्माद्यतीत्यस्याचित्तंहरतिकेशवः दर्पयैवेतिवक्तुंचताद्दृग्भ्रंशोपिवर्ण्यते २ निहतेइति मोक्षान्निरस्तादैत्याःकिंचक्रुरितिप्रश्नस्यरा ज्यंचक्रुरित्युक्तेतेषांपुनर्मोक्षोस्तिनवेतिपृष्टेउत्तरंतेषामपियोगोस्तीतिब्रह्मक्षेत्रेभ्रूप्राणमध्यंतत्रगंगायमुनयोर्मध्ये १ २ ३ ४ ५ ६ ७ ८ ९ ५२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

हिरण्यकशिपुरितिआख्यायिकयाअविवक्षितत्वात्तेनशब्देनबलिरेवग्राह्यः तस्यहियस्यानुग्रहमिच्छामितस्यवित्तंहराम्यहमितिप्रतिजानताहरिणाकृपयाऐश्वर्यभ्रंशः
कृतःसःअर्थएवात्रविवक्षितःतामसैरथ्याराधितईश्वरःकालेनैश्वर्यपाशांछिनत्तीतिहरिभक्तस्योत्कर्षःप्रदर्श्यते व्याजहारवामनंप्रतीत्यपठ्यते १० प्रतिगृण्ह-
तिप्रतिगृण्हामि द्वेपदेपदंचेतित्रीणिपदानि ११ मुनिभिःआश्चर्याणितिशेषः क्रांतैःक्रमणैःपदविन्यासैःक्रमितुमारेभेक्रांतवानित्यर्थः १२ एवमैश्वर्यमदेविष्णु-
नानाशितेदरिद्रस्यइतरेमदाःस्वयमेवनष्टाभवंति ततोबलिरैंद्रतुरीयेप्रत्यगात्मनिकालांतरेदेवाअभ्यषिंचन्इत्याख्यायिकामनुसृत्यदर्शयतिहृतराज्येत्यादि
ना १३ १४ लोकानामधिपेआधिपत्येसुरादेवाःबलिमितिशेषः १५ सबलिःतान्सुरान् ब्रह्मावेदस्तदमृतंबलिनादत्तंहविः तेनबलिकृतेनसंहृतइंद्रःसार्द्ध
श्लोकः १६ सत्यसंकल्पेनब्रह्मविदाबलिनाब्रह्मबुध्याभावितादेवादयस्तादृशाएवभवंतीतिब्रह्मवित्सर्वोपिकारीतितत्त्वइत्यादिश्लोकद्वयार्थः १७ १८

हिरण्यकशिपुश्चैवव्याजहारसरस्वतीम् कामादूरंददातीतितद्दैसंप्रतिपद्यताम् १० विष्णुर्वामनरूपेणभिक्षांतांप्रतिगृण्हति हिरण्यक-
शिपोर्हस्तात्द्वेपदेपदमेवच ११ ततःक्रमितुमारेभेविष्णुःसत्यपराक्रमः त्रींल्लोकान्मुनिभिःक्रांतैर्दिव्यंवपुरधारयन् १२ हृतराज्याश्च-
तेदैत्याःपातालविवरंययुः ससैन्यगणसंबद्धाःसप्रासाःसासितोमराः १३ सयंत्रलगुडाश्चैवसपताकारथध्वजाः सचर्मवर्मकोशाश्चसा
युधाःसपरश्वधाः १४ ततइंद्रविष्णुसहिताःसद्यस्तेभ्युत्थितागणाः अभ्यषिंचन्प्रमुदितालोकानामधिपेसुराः १५ सतान्स्वधामृतेनाशु
पितृत्वेसमतर्पयत् ब्रह्मातदमृतंदिव्यमहेंद्रायप्रयच्छति १६ अक्षयश्चाव्ययश्चैवसंवृतस्तेनकर्मणा १६ ततःशंखमुपध्मासीद्विष
ताल्लोमहर्षणम् पितामहकरोद्भूतजनितृप्रथमेपदे १७ तंश्रुत्वाशंखशब्दंतुत्रयोलोकाःसमाहिताः निर्वृत्तिंपरमांप्राप्ताइंद्रंप्राप्यसबांध
व १८ सर्वैःप्रहरणैश्चैवसंयुक्तावन्हिसंभवैः मंदराग्रेष्वविहितैर्ज्वलद्भिरिवपावकैः १९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्व
णिएकत्रिंशोऽध्यायः ३१ वैशंपायनउवाच ततोमहतिवृत्तांतेस्थितेराज्येमहोदये देवतानामनुष्याणांसहवासोभवत्तदा १ ए
कतःसमधीयंतिसहिताःप्ररुदंतिच स्वयंचभागंगृण्हंतियज्ञकर्मणिभारत २

सर्वैरितिप्रकर्षेणहरंतिविषयान्प्रतिइतिप्रहरणानिइंद्रियाणिवन्हिसं
भवैःप्रज्ञानतःउत्पन्नैर्मंत्रिणैरित्यर्थः मंदराग्रेदेहशैलस्याग्रेस्थितैःसंयुक्ताःत्रयोलोकाःपरांनिवृत्तिंसुखंप्राप्ताइतिपूर्वेणान्वयः १९ इतिश्रीमहाभारतेहरि
वंशेभविष्यपर्वणिएकत्रिंशोऽध्यायः ३१ ५ ५ षड्विंशेद्रौहिणंदक्षंभूदंडेनचसत्सये न्यवेशयाल्कियंतस्तुबलौभक्तेप्यनुग्रहः १ ईश्वरद्रौहिणाप्ये
षःकृतोधर्मोमिहाफलः इतिसंदर्शयन्नाहषड्विंशोदक्षनिग्रहम् २ ततइति ततःसर्वेषांनिवृत्तिप्राप्त्यनंतरंदेवामनुष्याश्चब्रह्मवित्त्वेनतारतम्याभावात्सहैव
वासंचक्रुरित्यर्थः १ समधीयंतिआत्मचर्यांकुर्वंतिप्ररुदंतिचप्रेम्णास्वयंदेवाःभागंमनुष्यैर्दत्तम् २ ५ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सम्मृगरूपीयज्ञोमृगशीर्षसंज्ञंसोमदैवत्यंनक्षत्रमभवदितिद्वाभ्यामाह एवमिति २६ २७ संचारभूतःप्रांतसंचारः २८ २९ यच्चैतदित्यादिभिस्त्रिभिरिंद्रध-
नुषउत्पत्तिमाह वर्षेवर्षाकालेवर्षप्रदंवृष्टिप्रदानेचिन्हंइंद्रायुधंइंद्रधनुरितिलोकेप्रसिद्धम् ३० ३१ इंद्रायुधमेववर्णयति चक्षुषीइतित्रिभिः मनुष्यस्येयेमा
नुषे अविक्षितअवक्षेतांमनसासंप्रकल्पितमितिछत्रस्यापिप्रस्तुतार्थस्यविशेषणम् ३२ एतत्सर्वस्वप्नवृत्तांतवत्कथ्यमानंरात्रौअविद्यायांदेहादिष्वात्माभि
मानरूपायांसत्यांनप्रदृश्यतइतिआह नन्विति अविद्यानिवृत्तौतुहार्दाकाशेसब्रह्मणिशब्दब्रह्मोपलब्धिस्थानेसंज्ञितंवागालंबनत्वेनविद्यमानंदिनस्यैवाग्रेअ-
विद्यारात्रेरपगमेकार्यंसर्वंघटादिकंसदाअतीतानागतव्यवहिताद्यवस्थायामपिप्रकर्षेणशब्दानुमानजसामान्यविषयज्ञानात्प्रकर्षेणविशेषार्थस्वरूपेणदृश्यते यत्त
त्कार्यंमहदेवब्रह्मैवास्ति नहिब्रह्मणोतीतादित्वंसंभाव्यतइतिहार्दाकाशेस्वेकार्यदर्शनंयुक्तमितिभावः ३३ भूमाविति इयमविद्यारात्रिः भूमौशरीरेसत्येवो

तमुवाचमृगंब्रह्माशक्रप्रंसानुनयंवचः स्वरेणोत्तमवीर्येणगंभीरेणसुभाषिणा एवंरूपेणप्रसितंभविष्यसिमहामृगः २६ विजितश्चत्रिपर्वे-
णशरेणानतपर्वणा तिष्ठन्नक्षत्रशिरसिसहरुद्रेणनित्यशः २७ सोमेनसहसंयुक्तोऽव्ययेनाव्ययेनच दिविसंचारभूतोवैताराभिःसह
संगतः २८ ज्योतिर्भूतोज्योतिषांत्वंध्रुवस्येवमहाध्रुवः यच्चैतद्रुधिरंदिव्यंक्षतजादिभिर्निःसृतम् २९ नभस्युत्पतितंचैवप्रवेगेनप्रधावतः
क्षतजंबहुवर्णंचक्षेत्रंमंडलसंज्ञितम् निमित्तभूतंभूतानांवर्षेवर्षप्रदंतथा ३० सुखंदुःखंचभूतानांदर्शनेसंप्रवर्त्तते इंद्रियश्रवणाच्चैवत
प्रसीद्रायुधोभवत् ३१ चक्षुषीमानुषेराजन्नविस्मयात्समवेक्षत अद्भुतंबहुचित्रंचमनसासंप्रकल्पितम् ३२ ननुरात्रौप्रदृश्येतस्वेसब्र
ह्मणिसंज्ञितम् दिनस्यैवसदाग्रेप्रमहत्कार्यंप्रदृश्यते ३३ भूमावेवसमुत्तिष्ठेदाकाशेतुविलीयते शतशश्चसमंसर्वेप्रधावंतिप्रचेतसः ३४
भयाद्रुद्रस्यमहतोधन्विनोबाणपाणयः नंदीरुद्रगणैःसार्द्धंपिनाकीसमतिष्ठत युगांतकालेज्वलितोब्रह्मदंडइवोद्यतः ३५ विष्णुसंग्राम
संभूतंप्रगृह्यविपुलंधनुः प्रातिष्ठतमहाबाहुःपाणिनाचक्रमादधत् ३६ गदांसघंटामन्येनखड्गमन्येनपाणिना प्रगृह्यसोऽग्रतोतिष्ठ-
द्रुद्रायोद्यतपाणये ३७

स्थितानहितदभावेसत्याःसंभवोस्तिरज्वभावेइवसर्पस्यदेहाभावेतुआकाशेभून्येलीयते कालत्रयेऽपिबाधिताभवतीत्यर्थः यस्मा
देवंतस्मात्प्रचेतसःसंबंधिनोदक्षाःशतशश्चसमंसर्वात्मकंब्रह्मदेहात्मबुद्धिरूपाविद्यानाशमात्रेणाभिलक्षितंप्रतिधावंतिउपतिष्ठंतिशब्दाभिलप्यप्रपंचादनं-
तगुणितःप्रपंचोहार्देदृश्यतइत्यर्थः ३४ पूर्वश्लोकस्यउत्तरार्द्धमुपजीव्यकथामनुसरतिभयादित्यर्द्धेन ३५ ३६ ३७ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ ह॰ टी॰ एवंसर्वेषुविद्वत्सुसत्सुविद्वान्दक्षःप्रचेतसःपुत्रोबृहस्पतिर्नानुगृह्यते स्मेत्याह प्राचेतसमिति ३ मातामहे मातामहीये दक्षदुहितॄणामेव सर्वेलोकाःसं- अ॰ ५
५३ तानंततःसर्वेषांमातामहः अविदितात्मनःशून्यस्यशापमिवंदक्षस्यैवपशुभूतस्यहिंसनम् ४ ५ सत्यवचनेर्वेदवाक्यैःविहितंप्रकाशितं तेनैवरुद्रेणैव ३२ ३
६ ७ ८ ९ १० सपिनाकोदेवःअंतकइवउग्रायुधधरःसन्रराज ११ १२ १३ १४ रसनांतावलंबिभिःरसनायाःअंतंगजशु

प्राचेतसंततोदक्षंदीक्षितंवैबृहस्पतिः वाजिमेधायभगवानृषिभिःपरिवारितः ३ तस्मिन्मातामहेयज्ञेदक्षस्याविदितात्मनः शापमिव मकरोद्रुद्रोभागार्थेसहनंदिना ४ रुद्रस्यैवहितद्रूपंद्विधाभूतंतदीशया जातःपरमधर्मात्मानंदीपुरुषविग्रहः ५ तेनयोगेनराजेंद्रयत्त द्ब्रह्मसनातनम् विहितंसत्यवचनैस्तेनैवपरमात्मना ६ स्वरूपैश्चाप्यरूपैश्चविरूपाक्षैर्घटोदरैः उल्वणैर्भीमैर्महाकायैर्विकटैरमितैस्तथा ७ शि खिभिर्जटिभिश्चैवन्यक्षैर्वैशंकुकर्णिभिः चीरिभिश्चर्मिभिश्चैवकूटमुद्गरपाणिभिः ८ सघंटधारिभिश्चैवभुजगैरवलंधारिभिः सहस्रकटकै श्चैवस्वर्णकुंडलधारिभिः ९ सडिंडिमैःसभेरीकैःसमृदंगैःसवेणुभिः एतैःपरिवृतोदेवोमखंतंसमुपाद्रवत् १० सशरवसरुजेश्चापिसता- लफलपाणिभिः उग्रायुधधरोदेवःसपिनाकइवांतकः ११ विरराजाक्षिभिर्दीप्तैर्मखेमखवतांवरः कालाग्निरिवदीप्तार्चिर्जगद्दग्धुमिवोद्यतः १२ नंदीपिनाकपाणिश्चजघ्नतुर्मखमुत्तमम् युगांतइवकालाग्निःक्षिप्रंदग्धुमिवोद्यतः १३ यूपमुत्क्षिप्यधावंतिनिशाचरगणास्तथा त्रासय न्मुनिसंघांश्चचीरचर्मनिवासिनः १४ हवींष्यन्येपिबंत्येवजिह्वाभिस्ताम्रलोचनाः भक्षयंतिपशूनन्येरसनांतावलंबिनः १५ मुमुचुश्चाप रेयूपान्पशवःप्रहरंतिच वह्निमन्येप्रासिंचन्निवारिभिःप्रशमायच १६ सोममन्येजहुःकेचित्नेत्रैस्तान्नचयोपमैः दर्भान्केचिद्विलुपंतिह स्तैःपद्मदलप्रभैः १७ बभंजिरेचयूपाग्रान्कलशांश्चापिचिक्षिपुः चिच्छिदुःकांचनान्वृक्षांश्छोभार्थमुपकल्पितान् १८ बिभिदुःश्चैक बाणैस्तेसुमुचुश्चहिरण्मयान् कुलुपुश्चैवपात्राणिममंथुश्चारणीमपि १९ अजरुश्चैवप्राग्वंशंलुलुपुश्चसमाहिताः चरवादीन्पुरोडाशान्- नखाग्रैश्चाववृत्तिरे २० एवंदिवाचरात्रौचाभिद्यमानोमहामखः चुक्रोशाचमहानादान्भिद्यमानइवार्णवः २१ धनुःसशरमादायपूर्वंदत्तं स्वयंभुवा कृतकीचकवेणुभ्यांसमरेसुमहारथः २२ प्रतिगृह्यमहादेवःसशरैःसमयोजयत् धनुर्विगृह्यजानुभ्यांजघानसमहाक्रतुम् २३ सविद्धस्तेनबाणेनस्वसमुत्पतितःक्रतुः मृगोभूत्वानदन्मानोब्रह्माणमुपधावति २४ शरेणाभिहतस्त्राणंनलेभेससुरस्त्रभुवि शरणार्थी ह्ययंप्रासःशरेणांतर्गतेनच २५

डावत्प्रांतंअवलंबंतेतादृग्रूपैःस्थितान्भक्षयंति १५ मुमुचुःउच्चिक्षिपुःपशवःपशून् १६ १७ १८ १९ ५३
२० महामखोमूर्तोभूत्वामहानादांश्चुक्रोश २१ २२ धनुरितिविगृह्यविनम्यजानुभ्यांस्थितइतिशेषः २३ २४ अंतर्गतेनशरेणतुद्यमानः २५ ५३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

शृंगाग्रसंभूताशार्ङ्गधन्वाधिष्ठात्रीदेवतामहाविष्णुः ज्ञानाधिष्ठात्रीदेवतासदाशिवः तयोः परस्परविरोधेआदित्यादयः विष्णुपक्षाः ज्ञानंद्विषंति तथाचश्रुतिः
तस्मादेषांतन्नप्रियंयदेतन्मनुष्याविदुरिति अक्षरयोजनास्पष्टा ३८ ३९ ४० ४१ ४२ रुद्रइति ४३ यतःसर्वात्माऽतोनचकंपे ४४
उद्यतशरम् ४५ सविद्धइति वज्रेणेतिव्यतिरेकदृष्टांतः यथावज्रेणमंदरस्यमहासंधिर्वर्मस्थानंचाल्यतेतेनैवबाणेनरुद्रःकंपतेचालनंदूरापेतमितिभावः
४६ ततःरुद्रास्याकंप्यत्वावगमानंतरंततः यतोविष्णुःकृष्णवर्णः महेशकंठेइंद्रनीलमयग्रैवेयकवद्बभुस्ततोहेतोर्नीलकंठोभवत् इदमत्रआख्यायिकातात्प-
र्यंयद्यपिसत्त्वोत्सत्त्वेज्ञानस्यधर्मापेक्षास्तिउत्सन्नंचज्ञानंधर्मंमूलत्तउच्छिन्नसितथापिविदुषएवधर्माधिकारात् ज्ञानस्यैवकंठेशिशुःशिवधर्मोलिङ्गोऽस्तीति ४७

ततःशृंगाग्रसंभूतंप्रगृह्यविपुलंधनुः शरंचाप्रतिमंलोकेशरांश्चानतपर्वणः ३८ विष्णुरग्रस्थितोभातिसबलःसंहतांजलिः बद्धगोधां
गुलित्राणःसचंद्रइवतोयदः ३९ आदित्यावसवश्चैवदिव्यैःप्रहरणैःसह विष्णुमेवाभितःसर्वेतिष्ठंतिज्वलनप्रभाः ४० मरुतश्चैवविश्वेच
रुद्रमेवाभिपेदिरे गंधर्वाःकिन्नराश्चैवनागायक्षाःसपन्नगाः ४१ ऋषयोन्यस्तदंडाश्चउभयोःपक्षयोर्हिताः जपंतिशांतयेनित्यंलोकानां-
हितकाम्यया ४२ शरेणहतवान्रुद्रोविष्णुमेवाग्रणीरणे हृदिसर्वांगसंधीषुतीक्ष्णाग्रेणरुक्मपक्षिणा ४३ नचकंपेतदाविष्णुःसर्वात्माब्रह्मसं-
भवः नचरोषमनानित्यंवृतःसर्वैःषडिंद्रियैः ४४ विष्णुश्चधनुरानम्यशरेणसमयोजयत् जत्रुदेशेमुमोचाशुब्रह्मदंडमिवोद्यतम् ४५
सविद्धस्तेनबाणेनमहादेवोनकंपते वज्रेणचमहासंधिर्मंदरस्यनचाल्यते ४६ ततःप्रसभमाप्लुत्यरुद्रंविष्णुःसनातनम् कंठेजग्राहभगवा
न्नीलकंठस्ततोभवत् ४७ अनादिनिधनोदेवोक्षमतांहिभवान्मम सर्वभूतागमाचार्योमममकर्त्ताचकर्मणाम् ४८ कर्मणांचैवकर्ताचि
विकर्त्ताचैवभारत अशेषत्वाच्चभूतानांसर्वभूतेषुचोत्तमः ४९

कथाप्रसंगाद्विज्ञानमेवस्तौति अनादीति दीव्यति प्रकाशयत्यर्थजातमितिचिन्मात्ररूपआत्मादेवः सच अनादिनिधनःनहिज्ञानेनपरिच्छेद्यंसर्वज्ञानस्यआ
द्यंतौप्रकाशयितुंक्षमते कुतः कर्मणांकर्षोत्स्यादितानांमहदादीनामचलत्वात् पर्वतवज्जडत्वात् नहिजडेनाजडंप्रकाशयितुंशक्यंनतस्याद्यंतावितिभावः यतो
हंसर्वेषांभूतानांआगमानामाचार्यःप्राइकगुरुःईशानःसर्वविद्यानामितिश्रुतिप्रसिद्धत्वाद्वेद्यिअतोभवान्ममापराधंक्षमतामितियोजना ४८ कर्मणांचकर्त्ताचि-
दात्मैवअहंकारादेःसत्ताप्रदत्वात् विकर्त्ताविषमकर्ताअशेषत्वात् भूतानांदृश्यानामर्थानांशेषस्यविधिष्यतइतिशेषःकारणंतस्यज्ञानस्यकालत्रयेप्यभावात् सर्वेषुभू
तेषुचराचरे षुउत्तमोजीवेशापेक्षयानिरुपाधित्वादुत्कृष्टतमोभवानेवेतिशेषः ४९ ५ ५ ५ ५ ५ ५ ५

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्वयमितिकर्मयोनिषुकर्मणालब्धनानाविधशरीरेषुस्थितः अंतर्यामिरूपेणस्वयमेवकर्मविधत्तेकरोतिप्रयोजकतयेतियत् ततूतयोःकर्तृकारयित्रोरन्यःशुभ्रतमो
यःशुद्धरूपःसएवतथानियमंपूर्वोक्तंअकरोत् निर्विशेषचिन्मात्रेएवजीवेशादिकंकल्पितमितिभावः ५० कथामनुस्मृत्योक्तमर्थंस्तौतिअंतरिक्षादिति ५१
नंदीत्यादिश्लोकद्वयतात्पर्यंतुपरमज्ञानंप्रत्यासन्नंमहदध्यात्मज्ञानंनंदितुल्यंतत् धर्मरूपस्यविष्णोर्नद्रावकंनहितेनज्ञानेनाविद्यामयेनकर्मक्षयःसंभवति प्रत्युत-
कर्मणैवाचित्तशल्यातिशयेतस्यज्ञानस्यस्तंभोभवतीति ५२ ५३ विष्णुरितिविष्णुःपरमोधर्मोयोगाख्यःशुद्धज्ञानैरप्रकंप्यःसब्रह्मसमोज्ञानेनसमानोभूत्वा
एकंसांख्यंचयोगंचयःपश्यतिसपश्यतीतिभगवदुक्तेःपरमपुरुषार्थप्रदोभूत्वातेजसःस्वरूपप्रकाशेनक्षमयामोक्षमय्यामोक्षाख्यशांत्याचसमायुक्तःस्थाणुवा
दिविशेषवानभूदितिशेषः सार्द्धश्लोकोवाक्यम् ५४ किंकृत्वाएवंविधोभूत्तदाह युगांतेति सकार्यमविद्यांभस्मसात्कृत्वास्वतःशांतात्माऽव्ययः हरिःकर्म-

सर्वमेवहियत्कर्मविधत्तेकर्मयोनिषु तयोःशुभ्रतमोराजन्स्वयमेवतथाकरोत् ५० अंतरिक्षाच्छुभावाचःश्रूयंतेपरमाद्भुताः सिद्धानांवदनोन्मु
क्ताःसनातननमोस्तुते ५१ नंदीपिनाकसुद्यम्यबलवान्रुद्रसंभवः मूर्द्धन्यभिजघानाजौविष्णुंक्रोधेनमूर्च्छितः ५२ ततःप्रहसितोविष्णुर्न-
दिंदृष्ट्वासुरोत्तमः स्तंभयामासभगवान्सर्वभूतपतिर्हरिः ५३ विष्णुर्ब्रह्मसमोभूत्वातेजसाप्रज्वलन्निव क्षमयाचसमायुक्तःस्थितःस्थाणुरि-
वाचलः ५४ अचिंत्यश्चाप्रमेयश्चब्रह्मजेयश्चाप्यरिंदमः युगांताग्निसमोभूत्वाशांतात्माहरिरव्ययः ५५ प्रसन्नःकल्पयामासभागंरुद्रायधी
मते विष्णोर्धर्मपरोनित्यंत्यक्तकामःसुरोत्तमः ५६ विष्णुनाचैवराजेंद्रसयज्ञःसंधितःपुनः यथायक्षश्चतेसर्वेगणास्त्वासन्महीपते तस्मि
न्युद्धेमहाघोरेविष्णोरुद्रस्यचैवह ५७ यथापक्षंभवद्युद्धंदक्षयज्ञविनाशने विनाशश्चैवयज्ञस्यतदालोकेप्रतिष्ठितः ५८ सर्वभूतेषुराजेंद्राहि
तोयज्ञःसनातनः दक्षोयज्ञफलंचैवप्राप्तवान्सप्रजापतिः ५९ इमांचोदाहृतांदिव्यांकथामितिसबुद्धिमान् श्रावयेद्यस्तुविप्रेभ्यःशुचिःप्रय
तमानसः ६०

पाशहरश्चासन्नित्यर्थः ५५ नन्वेवंयोगेनैवेष्टसिद्धौकिंज्ञानेनेत्याशंक्याह प्रसन्नइति रोदयतीतिरुत् अज्ञानंसर्वानर्थमूलंद्रावयतीतिरुद्रःएका
त्म्यबोधः तस्यभागोद्वैतबोधःयोगेनात्मदर्शनज्ञानेनात्मबोधश्चेतितयोर्विषयविभागंइतिभावः ५६ विष्णुनेति सरुद्रविद्राविततोऽनात्मज्ञस्यदक्षस्ययज्ञः
विष्णुनाश्रद्धामयेनसत्वेन ५७ यथेति एवंसांख्ययोगयोःश्रवणासनादिसहाययोःमिथोविरोधेसत्यपियज्ञविनाशोज्ञानस्यैवाभिप्रेतउत्कर्षोभूदितिश्लोक
द्वयार्थः ५८ यद्यप्येवंतथापिज्ञानेसन्निपत्योपकारित्वाद्यज्ञएवहितइत्याहसर्वेति अन्यथाद्वारलोपात् ज्ञानमपिनसिद्ध्येदितिभावः तथानात्मनोदक्षोपिवि
ष्णवनुग्रहादेवयज्ञफलंपरंपरयातत्वज्ञानंप्राप्येत्याह दक्षइति दक्षःप्रजापतिरितिसमानाधिकरणेप्रथमे ५९ यश्चेमइत्यादिशेषःस्पष्टार्थः ६० ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किमात्मक इत्यस्योत्तरं विश्वात्मकोसावित्याह विश्वेदेवाइत्यादिना १० ११ १२ १३ अस्यरूपस्यसूर्यवदस्तोदयावाहपूर्णेयुगेत्यादिनायावदध्यायसमा प्तिनिर्वाणाअदर्शनेउत्पाताःवज्रपातनेत्रस्फुरणभूकंपादयः १४ त्रिशिखः अग्निवायुसूर्यरूपास्तिस्रःशिखायस्यसतेजोधातुहिरण्यगर्भः वृषाकपिःहरिहरात्मावर्षतीतिवृषाकंजलंपिबतीतिकपिःवर्षणशोषणयोःकर्त्तेतिवा १५ हतार्चिरितिसंधिरार्षः १६ १७ छंदतःईश्वरस्यइच्छातःछंदजाइतिपाठेतदिच्छा

विश्वेदेवास्तथासाध्यारुद्रादित्यास्तथाश्विनौ प्रजानांपतयश्चैवसप्तचैवमहर्षयः १० मनःसंकल्पजांश्चैवपूर्वजाश्चमहर्षयः वसवोप्सरसः श्चैवगंधर्वायक्षराक्षसाः ११ दैत्याःपिशाचानागाश्चभूतानिविविधानिच ब्राह्मणाःक्षत्रियावैश्याःशूद्राम्लेंच्छादयोभुवि १२ चतुष्पदा निसर्वाणितिर्यग्योनिगतानिच जंगमानिचसत्वानियच्चान्यज्जीवसज्ञितम् १३ पूर्णेयुगसहस्रांतेब्राह्मेहनितथागते निर्वाणेसर्वभूतानां सर्वोत्पातसमुद्भवे १४ हिरण्यरेतास्त्रिशिखस्ततोभूत्वावृषाकपिः शिखाभिर्विधमंल्लोकान्संशोषयतिदेहिनः १५ दह्यमानास्ततस्तस्यते जोराशिभिरग्रतः विवर्णवर्णादग्धांगाहतार्चिष्मद्गिराननैः १६ सांगोपनिषदावेदाइतिहासपुरोगमाः सर्वविद्याश्रयाश्चैवसत्यधर्मपरा यणाः १७ ब्रह्माणमग्रतःकृत्वाछंदतोविश्वतोमुखम् सर्वेदेवगणाश्चैवत्रयस्त्रिंशच्चकोटयः १८ तस्मिन्नहनिसंप्राप्तेतहंसंमहदक्ष रम् प्रविशंतिमहायोगंहरिंनारायणंप्रभुम् १९ तेषांभूयःप्रविष्टानांनिधनोत्पत्तिरुच्यते यथासूर्यस्यसततमुदयास्तमयाविह २० पू र्णेयुगसहस्रांतेकल्पोनिःशेषउच्यते तस्मिन्जीवकृतंसर्वंनिःशेषमवतिष्ठते २१ संहृत्यलोकान्सर्वान्ससदेवासुरपन्नगान् कृत्वात्म गर्भेभगवान्आस्तेएकोजगद्गुरुः २२ यःस्रष्टासर्वभूतानांकल्पांतेषुपुनःपुनः अव्यक्तःशाश्वतोदेवस्तस्यसर्वमिदंजगत् २३ नष्टार्ककिर णेलोकेचंद्ररश्मिविवर्जिते त्यक्तभूताग्निपवनेक्षीणयज्ञवषट्क्रिये २४ अपक्षिगणसंघातेसर्वप्राण्यचरेपथि अमर्यादाकुलेरौद्रेसर्व तस्तमसावृते २५ अदृश्येसर्वलोकेस्मिन्नभावेसर्वकर्मणाम् प्रशांतेसर्वसंपातेनष्टेवैरपरिग्रहे २६ गतेस्वभावसंस्थानंलोकेनारायणा त्मके परमेष्ठीहृषीकेशःशयनायोपचक्रमे २७ पीतवासालोहिताक्षःकृष्णजीमूतसन्निभः शिखासहस्रविकचंजटाभारंसमुद्वहन् २८ श्रीवत्सकौलिलपुण्यंरक्तचंदनभूषितम् वक्षोबिभ्रन्महाबाहुःसविद्युदिवतोयदः २९ पुंडरीकसहस्रस्यमालास्यशुशुभेतदा पत्नीचै वस्यलक्ष्मीर्देहमावृत्यातिष्ठति ३०

तोजाताः १८ अहनिक्षयावसरे १९ तेषामिति यथाप्रदेशांतरस्थोभानुरस्माभिरदृश्यमानोस्तंगतइत्युच्यते एवंब्र ह्मादिनांतेनारायणेलीनंजगन्नष्टमित्युच्यते उपरिस्थैःमार्कंडेयादीनांलयकालेतदुदूरेतद्दर्शनादितिभावः २० निःशेषप्रलयहेतुनांवाय्वादीनामप्यभावात् अवतिष्ठतेभोगंनप्रयच्छति २१ २२ तस्यसृज्यमितिशेषः २३ २४ सर्वप्राणिनामचरेसंचारहीने २५ सपातेशेषे २६ २७ २८ २९ ३०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अधीत्येति इदंसर्वंकथाछलेनोक्तंसर्वमपि अध्यात्मानमधिकृत्यैव प्रवृत्तंशास्त्रंनवृथावादरूपं अधीत्य अर्थतः पाठतश्च देवलोके आत्मस्वरूपे महीयते सुप्रतिष्ठितो भवति कृतकृत्योभवतीत्यर्थः ६१ ६२ ६३ यश्चेनंइत्यादिशेषःस्पष्टार्थः परैरदर्शितःपंथाःपौर्वापार्येक्षयामया यथाकथंचिदुन्नीतःसुधियःशोधयंतुतं इतिश्रीमहाभारते हरिवंशेभविष्यपर्वणिटीकायांद्वात्रिंशोध्यायः ३२ ॥ ॥ प्रादुर्भावइति अध्यात्मविद्यांसमाप्यनत्तद्विघ्नविनाशायईश्वरःशरणीकरणीयइतिविदधानस्तस्यरक्षोघ्नत्वे भक्तानुग्राहकत्वमाविष्करोति वराहादिप्रादुर्भावैर्त्रयेणविष्णोर्व्यापकस्यापिवन्हेरिवकाष्ठेषुलोकेप्रादुर्भावः सनाविदुषांवाराहः प्रथमइतिशेषः १ चरितंकार्यं विधिंप्रवर्त्तकं हेतुंकारणंकर्मणांलीलानागुणवद्भावंलोकोपकारित्वलक्षणंगुणवत्वम् २ किमात्मकःकिंयज्ञमयो योगमयोवा कामूर्त्तिःशरीरंभौतिकंमायिकंवा अस्यवराहस्याधिष्ठात्रीदेवताकिंहरिर्हरोवा आचारप्रभावौपूर्वंनिषेधमुखेनपृष्टाविति पुनःपृष्टमनूद्यते ३ द्विजातीनांचश्रुतिविस्तरंकथाविस्तरमित्यावर्तते ४ ५ चरितंतावत्संक्षेपेणाहदंष्ट्रयेति ६ श्रुतिभिःयस्यरूपंबिभ्रदिमामविदद्गुहांप्रविष्टांशरीरस्यमध्यतइति आधानेवराहसंभारेणविनियुक्तान्मंत्रतस्तावत्प्रतीयते यस्यवराहस्यरूपंविभ्रदीश्वरः इमांपृथिवींगुहांगूढस्थानेसलिलस्यमध्येप्रविष्टांअविंदत् लब्धवानूइत्यर्थः केवेदैः ७ ८ पुराणमिति अत्रैवउक्तवक्ष्यमाणरीत्यासांख्ययोगयोरंतर्भावोस्तिकार्त्स्न्येनतत्त्वविद्वत्तमोकोन्वेयंइतरेनुकथापल्लालमात्रोपजीविनःपंडिताःपशवइतिभावः ९ ॥ ॥ ॥ ॥ ५५

अधीत्यसर्वमध्यात्मंदेवलोकेमहीयते एषपौष्करकोनामप्रादुर्भावोमहात्मनः ६१ पुराणेपौष्करेचैवमयाद्वैपायनेरितः यथावदनुपूर्वेणसंस्कृतःपरमर्षिभिः ६२ यश्चेनंसर्वपुरुषंपुराणंसदाप्रमत्तःशृणुयाद्यथोक्तम् अवाप्यकामानिहवीतशोकःपरत्रचस्वर्गफलानिभुंक्ते ६३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिद्वात्रिंशोऽध्यायः ३२ जनमेजयउवाच प्रादुर्भावःपुराणेषुविष्णोरमिततेजसः सतांकथयतांविप्रवाराहइतिनश्रुतः १ नजानेतस्यचरितंनविधिंनैवविस्तरम् नकर्मगुणवद्भावंनहेतुंनमनीषितम् २ किमात्मकोवराहोसौकामूर्त्तिःकास्यदेवता किमाचारःकिंप्रभावःकिंवातेनपुराकृतम् ३ एतन्मेसंशयत्वेनवाराहश्रुतिविस्तरम् यज्ञार्थेचसमेतानांद्विजातीनांमहात्मनाम् ४ वैशंपायनउवाच एतत्तेकथयिष्यामिपुराणंब्रह्मसंमितम् नानाश्रुतिसमायुक्तंकृष्णद्वैपायनेरितम् महावराहचरितंकृष्णस्याद्भुतकर्मणः ५ यथानारायणोराजन्वाराहवपुरास्थितः दंष्ट्रयागांसमुद्रस्थामुज्जहारारिसूदनः ६ छांदसीभिरुदाराभिःश्रुतिभिःसमलंकृतः शुचिःप्रयत्नवान्भूत्वानिबोधजनमेजय ७ इदंपुराणंपरमंपुण्यंवेदैश्चसंमितम् नानाश्रुतिसमायुक्तंनास्तिकायनकीर्त्तयेत् ८ पुराणमेतदखिलंसांख्यंयोगंतथैवच कार्त्स्न्येनविधिनाप्रोक्तंयोस्यार्थंज्ञास्यतेपुमान् ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतेषांविभागमेवाहयदितिपरागानिर्ब्रह्मलोकप्रापिका यदधोद्वारद्वयंतद्रसायाः भूमेस्तलंनरकंतत्प्रापकम् ४ यदंडंशरीरमकरोत् दिवोव्याकृतान् कारणात् तत्रैव चयानिच्छिद्राणितानिसर्वाणिदिशाः ५ दिशंतिस्वंविषयंग्राहयंतीतिदिशःइंद्रियाणिचतानिचमनसैवोपाधिनाकरोद्रूपादिदिदृक्षुरसृजत् द्विधेतिस्थूलसूक्ष्मविषयभेदात् ६ ७ द्रवंगर्भोदकादन्यदंडप्रस्वेदरूपंतस्यद्रवस्यक्लेदार्णवोघेनआर्द्रेदिभारेणप्राच्छादयतप्रच्छन्ना ८ ९ तस्यैवद्रवस्यवाकार्यमाहयच्चेति

यच्छिद्रम् ऊर्ध्वमाकाशंपरासुकृतिनांगतिः विहितंविश्वयोगेनयदधस्तद्रसातलम् ४ यदंडमकरोत्पूर्वंदेवलोकसिसृक्षया सुमंनादष्टधायानिच्छिद्राणिकृतवांस्तुसः ५ विदिशस्तादिशःसर्वामनसैवाकरोद्द्विधा नानारागविरागाणियान्यंडशकलानिवै ६ बहुवर्णधराश्चित्राबभूवुस्तेवलाहकाः यदंडमध्येस्कन्नंतत्द्रवमासीत्समाहितम् ७ जातरूपंतदभवततत्सर्वंपृथिवीतले तस्यक्लेदार्णवोघेनप्राच्छाद्यतसमंततः ८ पृथिवीनिखिलाराजन्युगांतेसागरैरिव ९ यच्चांडमकरोत्पूर्वंदेवलोकचिकीर्षया तत्रयत्सलिलंस्कन्नंसोभवत्कांचनोगिरिः १०
तेनांभसाप्लुताःसर्वादिशश्चोपदिशस्तथा अंतरिक्षंचनाकंचयच्चान्यत्किंचिदंतरम् ११ यत्रयत्रजलंस्कन्नंतत्रतत्रास्थितोगिरिः शैलैःसमस्तैर्गहनाविषमामेदिनीभवत् १२ तैःसपर्वतजालौघैर्बहुयोजनविस्तृतैः पीडितागुरुभिर्देवीपृथिवीव्यथिताभवत् १३ महीतलेभूरिजलंदिव्यंनारायणात्मकम् हिरण्मयंसमुद्दिष्टंतेजोविमलरूपितम् १४ अशक्तावैधारयितुमधःसाप्रविवेशह पीड्यमानाभगवतस्तेजसातेनसाक्षितिः १५ पृथिवींविशतींदृष्ट्वातामधोमधुसूदनः उद्धारार्थंमनश्चक्रेलोकानांहितकाम्यया १६ श्रीभगवानुवाच मत्तेजएववलवत्समासाद्यतपस्विनी रसातलंविशद्देवीपंकेगौरिवदुर्बला १७ धरण्युवाच त्रिविक्रमायामितविक्रमायमहानृसिंहायचतुर्भुजाय श्रीशार्ङ्गचक्रासिगदाधरायनमोस्तुतस्मैपुरुषोत्तमाय १८ त्वयात्मनाधार्यतेवैत्वयासंह्रियतेजगत् त्वंधारयसिभूतानिभुवनंत्वंबिभर्षिच १९ यत्त्वयाधार्यतेकिंचित्तेजसाचबलेनच ततस्तवप्रसादेनमयापश्चात्तुधार्यते २० त्वयाधृतंधारयामिनाधृतंधारयाम्यहम् नहितद्विद्यतेरूपंयत्त्वयानतुधार्यते २१ त्वमेवपुरुषव्याघ्रनारायणयुगेयुगे ममभारावतरणंजगतोहितकाम्यया २२ तवैवतेजसाक्रांतांरसातलतलंगताम् त्रायस्वमासुरश्रेष्ठत्वामेवशरणंगताम् २३ दानवैःपीड्यमानाहंराक्षसैश्चदुरात्मभिः त्वामेवशरणंनित्यमुपयामिसनातनम् २४

१० ११ १२ एवंसृष्टिमुक्त्वावाराहावतारबीजमाहतेनेतिअयमर्थः ब्रह्मांडमुत्पाद्यतद्गर्भोदकेसमुद्ररूपेयोमंडःक्षीरद्रप्सुतुल्यःसापृथिवीतद्यदपांशरआसीत्समहन्यतसापृथिव्यभवदितिश्रुतेःतस्यांयदंडस्वेदोदकंपतितंतन्मेर्वादिरूपमभूतस्यभारेणपृथिवीनिममज्जेति १३ महीतलेमह्याअधस्तात्हिरण्मयंस्वच्छं १४ तेनद्रवनेनपर्वतादिना १५ १६ १७ १८ १९ २० २१ २२ रसातलस्यापितलंअधोभागः २३ २४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३१ ३२ ३३ ३४ कर्तृभूतानां विकर्त्तभौतिकानां विधिरूपेणस्रष्टाधातासाधारणं कालादिरूपं विधाताविशेषकारणंकर्मरूपम् ३५ ३६ ३७
परंचैतन्यज्योतिः ३८ ३९ त्रिदशैरिंद्रियैर्यस्मकाश्यंतदनेनैवप्रकाश्यतेअनेनयत्प्रकाश्यंस्वरूपंतदिंद्रियाणिनगोचरयंतीत्यर्थः ४० ४१ ४२ ४३ अ
ग्निमारुतयोर्जठरप्राणयोःगतिःगतिहेतुः ४४ ४५ संसारमुपसंहृत्यसृष्टिंसृष्ट्वयतिसुप्तोचेति ४६ ४७ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटी

ततःस्वपितिधर्मात्मासर्वलोकपितामहः किंमप्यामितविक्रांतोनिद्रायोगमुपागतः ३१ ततोवर्षसहस्रेतुपूर्णेसपुरुषोत्तमः स्वयमेवविभुर्भूत्वा
बुध्यतेविबुधाधिपः ३२ ततश्चिंतयतेभूयःसृष्टिंलोकस्यलोककृत् पितृदेवासुरनरान्पारमेष्ठ्येनकर्मणा ३३ ततश्चिंतयतःकार्यंदेवेषुस-
मितिंजयः संभवंसर्वलोकस्यविदधातिसवाक्पतिः ३४ कर्त्ताचैवविकर्त्ताचसंहर्ताचप्रजापतिः धाताविधाताचतथासंयमोनियमोयमः ३५
नारायणपरोदेवानारायणपराःक्रियाः नारायणपरोयज्ञोनारायणपराश्रुतिः ३६ नारायणपरोमोक्षोनारायणपरागतिः नारायणपरोधर्मोना
रायणपरःक्रतुः ३७ नारायणपरंज्ञानंनारायणपरंतपः नारायणपरंसत्यंनारायणपरंपदम् नारायणपरोदेवोनभूतोनभविष्यति ३८
स्वयंभूरितिविज्ञेयःसब्रह्माभुवनाधिपः सवायुरितिविज्ञेयएषयज्ञःसनातनः ३९ सदसच्चसविज्ञेयासयज्ञःसप्रजाकरः यद्वेदितव्यंत्रिद-
शैस्तदेषपरिविंदति ४० यच्चवेद्यंभगवतोदेवाअपिनतद्विदुः प्रजानांपतयःसर्वऋषयश्चसहामरैः ४१ नास्यांतमधिगच्छंतितेनोनंतइति
श्रुतिः यदस्यपरमंरूपंतन्नपश्यंतिदेवताः ४२ प्रादुर्भावेषुसंभूतंयत्तदर्चंतिदेवताः यन्नदर्शितवान्देवःकस्तदन्वेष्टुमर्हति ४३ ग्रामणीःस-
र्वभूतानांअग्निमारुतयोर्गतिः तेजसस्तपसश्चैवनिधानममृतस्यच ४४ चतुराश्रमवर्णेषुचातुर्होत्रफलाशनः चतुःसागरपर्यंतश्चतुर्युग
निवर्त्तकः ४५ तदेषसंहृत्यजगत्कृत्वागर्भस्थमात्मनः सुष्वापांडेमहायोगीधृतवर्षसहस्रिकम् ४६ सुरासुरद्विजभुजगाप्सरोगणैर्महौष-
धिक्षितिधरयक्षगुह्यकैः प्रजापतिश्रुतिधररक्षसांकुलंतदासृजज्जगदिदमात्मनाप्रभुः ४७ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणि
त्रयस्त्रिंशत्तितमोऽध्यायः ३३ वैशंपायनउवाच जगदंडमिदंपूर्वमासीत्सर्वंहिरण्मयम् प्रजापतेर्मूर्त्तिमयमित्येवंवैदिकीश्रुतिः
१ ततोवर्षसहस्रांतेबिभेदोर्ध्वमुखंविभुः लोकसंजननार्थायबिभेदाधोमुखंपुनः २ भूयोष्टधाबिभेदांडंप्रभुर्वैलोकयोनिकृत् चका
रजगतश्चात्रविभागंसर्वभागवित् ३

कायांत्रयस्त्रिंशत्तितमोऽध्यायः ३३ ५ ५ सूत्रितमर्थंविवृणोतिजगदिति-
द्वादशभिः प्रजापतेःसमष्टिजीवस्यमूर्तिर्मयशरीररूपंअंडम् १ ऊर्ध्वंबिभेदब्रह्मरंध्रद्वारात्ततःपूर्वमुत्पन्नमिति एकःपुनःशब्दोवाक्यालंकारेपुनरन्यच्छिद्रमपि ५६
तत्रजनयामासइत्यर्थः २ अष्टधेति वाक्पाणिपादाख्यच्छिद्रत्रयंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यंछिद्रपंचकंउपस्थस्यत्वपानएवांतर्भावः ३ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांचतुस्त्रिंशोऽध्यायः ३४ तस्योपरिसंप्लुवंमज्जनं १ २ विलेखनंमार्गज्ञापनंलेखारूपेण प्रमाणंयो
जनतःगतिंप्राङ्मुखादिमहात्म्यंपावनत्वंविशेषंप्रतापरहस्यम् ३ चतुरंतांचतुर्दलपद्माकारांभरताःकेतुमालाश्चभद्राश्वाःकुरवस्तथा पत्राणिभूमिपद्मस्यमर्या-

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिचतुस्त्रिंशोऽध्यायः ३४ वैशंपायनउवाच तस्योपरिजलौघस्यमहतीनौरिवास्थि
ता विततत्वात्तुदेहस्यनययौसंप्लुवंमही १ ततःसचिंतयामासप्रविभागंक्षितेर्विभुः समुच्छ्रयंचसर्वेषांपर्वतानांनदीषुच २ विलेखनंप्रमा
णंचगतिंप्रस्रवमेवच महात्म्यंचविशेषंचनदीनामन्वचिंतयत् ३ चतुरंतांधरांकृत्वातथाचैवमहार्णवम् मध्येपृथिव्याःसौवर्णमकरोन्मेरुप
र्वतम् ४ प्राचींदिशमथोगत्वाचकारोदयपर्वतम् शतयोजनविस्तारंसहस्रंचसमुच्छ्रयम् ५ जातरूपमयैःशृंगैस्तरुणादित्यसंनिभैः
आत्मतेजोगुणमयैर्वेदिकाभोगकल्पितम् ६ विविधांश्चमहास्कंधान्कांचनान्पुष्करेक्षणः नित्यपुष्पफलान्वृक्षान्कृतवांस्तत्रपर्वते ७
शतयोजनविस्तारंततस्त्रिगुणमायतम् चकारसमहादेवःपुनःसौमनसंगिरिम् ८ नानारत्नसहस्राणांकृत्वातत्रसुसंचयम् वेदिकांबहु
वर्णांचसंध्याभ्राभामकल्पयत् ९ सहस्रशृंगंचगिरिंनानामणिशिलातलम् कृतवान्वृक्षगहनंषष्टियोजनमुच्छ्रितम् १० आसनंतत्र
परमंसर्वभूतनमस्कृतम् कृतवानात्मनस्थानंविश्वकर्माप्रजापतिः ११ शिशिरंचमहाशैलंतुषारचयसंनिभम् चकारदुर्गंगहनंकंदरांतर
मंडितम् १२ शिशिरप्रभवांचैवनदींद्विजगणायुताम् चकारपुलिनोपेतांवसुधारामितिश्रुतिः १३ सादिशंनिखिलांप्राचींपुण्यांसुरवृशोभि
श्चिताम् शोभयत्यमृतप्रख्यैर्मुक्ताशंखविभूषितैः १४ नित्यपुष्पफलोपेतैश्छादयाद्भिःसुसंवृतैः भूषिताप्यधिककांतैःसानदीतीरजैर्द्रु
मैः १५ कृत्वाप्राचीविभागंचदक्षिणायामथोदिशि चकारपर्वतंदिव्यंसर्वकांचनराजतम् १६ एकतःसूर्यसंकाशंएकतःशशिसन्निभम् स
विभज्यशुभेतीवद्वौवर्णौपर्वतोत्तमः १७ तेजसायुगपद्व्याप्तंसूर्याचंद्रमसोरिव वपुष्मंतमथोतत्रभानुमंतंमहागिरिम् १८ सर्वकामफ-
लैर्वृक्षैर्वृतंरम्यैर्मनोरमैः चकारकुंजरंचैवकुंजरप्रतिमाकृतिम् १९ सर्वतःकांचनगुहंबहुयोजनविस्तृतम् ऋषभःप्रतिमंचैवऋषभंनाम
पर्वतम् २० हेमकांचनवृक्षाढ्यपुष्पहाससमृष्टवान् महेंद्रमथशैलेंद्रंशतयोजनमुच्छ्रितम् २१ जातरूपमयैःशृंगैःसपुष्पितमहाद्रुम
म् मेदिन्यांकृतवान्देवःप्रतिक्षोभमिवाचलम् २२ नानारत्नसमाकीर्णंसूर्येंदुसदृशप्रभम् चकारमलयंचाद्रिंचित्रपुष्पितपादपम् २३
मैनाकंचमहाशैलंशिलाजालसमावृतम् दक्षिणस्यांदिशिशुभंचकाराचलमायतम् २४ सहस्रशिरसंविंध्यंनानाद्रुमलताकुलं नदींचाविपु
लावर्त्तांपुलिनश्रोणिभूषिताम् २५
दाशैलवाह्यतइतिपुराणांतरोक्तेः ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ककुद्मिनंमहास्कंधवृषोपमम् २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ वेदपादइत्यादिनायज्ञाख्यांतदधिष्ठात्रींदेवतामाह ३४
 ब्रह्मशीर्षः प्रणवशिराः वेदांगश्रुतिभूषणः षडंगकुंडलः ३५ ३६ क्रियामयानिसत्राणिगवामयनादीनिघोणोनासिकायस्यउद्गातेवअंत्राणियस्य ३७ ३८

तावन्मेस्तिभयंभूयोयावन्नत्वांककुद्मिनम् शरणंयामिमनसाशतशोप्युपलक्षये २५ श्रीभगवानुवाच माभैर्धरणिकल्याणिशां
तिंव्रजसमाहिता एषत्वामुचितंस्थानंमानयामिमनीषितम् २६ वैशंपायनउवाच ततोमहात्मामनसादिव्यंरूपमचिंतयत् किंनु
रूपमहंकृत्वाउद्धरामिवसुंधराम् २७ जलेनिमग्नांधरणींयेनाहंवैसमुद्धरे इत्येवंचिंतयित्वातुदेवोनारायणःप्रभुः २८ जलक्रीडारुचिस्त
स्माद्वाराहंरूपमस्मरत् हरिरुद्धरणेयुक्तस्तदाभूदस्यभूमिभृत् २९ अधृष्यंसर्वभूतानांवाङ्मयंब्रह्मसंमितम् दशयोजनविस्तारमुच्छ्रि
तशतयोजनम् ३० नीलमेघप्रतीकाशंमेघस्तनितनिःस्वनम् महागिरेःसंहननंश्वेतदीप्तोग्रदंष्ट्रिणम् ३१ विद्युदग्निप्रतीकाशमादित्य-
समतेजसम् पीनवृत्तायतस्कंधंदृप्तशार्दूलगामिनम् ३२ पीनोन्नतकटीदेशंवृषलक्षणपूजितम् रूपमास्थायविपुलंवाराहममितंहरिः
३३ पृथिव्युद्धरणार्थायप्रविवेशरसातलम् वेदपादोयूपदंष्ट्रःक्रतुदंतश्चितीमुखः ३४ अग्निजिह्वोदर्भरोमाब्रह्मशीर्षोमहातपाः अ
होरात्रेक्षणधरोवेदांगश्रुतिभूषणः ३५ आज्यनासाःस्रुवस्तुंडःसामघोषस्वरोमहान् सत्यधर्ममयःश्रीमान्क्रमविक्रमसत्कृतः ३६ क्रिया
सत्रमहाघोणःपशुजानुर्मखाकृतिः उद्गात्रंत्रोमहालिंगोबीजौषधिमहाफलः ३७ वाय्वंतरात्मामंत्रस्फिक्विक्रमःसोमशोणितः वेदस्कंधोह-
विर्गंधोहव्यकव्यातिवेगवान् ३८ प्राग्वंशकायोद्युतिमान्नानादीक्षाभिरर्चितः दक्षिणाहृदयोयोगीमहासत्रमयोमहान् ३९ उपाकर्मोष्ठरुच
कःप्रवर्ग्यावर्तभूषणः नानाछंदोगतिपथोगुह्योपनिषदासनः ४० छायापत्नीसहायोवैमणिशृंगइवोच्छ्रितः भूत्वायज्ञवराहोसौयुगपत्या
विशद्गुरुः ४१ अद्भिःसंच्छादितांसुर्वीसतामार्च्छत्प्रजापतिः रसातलतलेमग्नांपातालांतरसंश्रयाम् ४२ प्रभुर्लोकहितार्थायदंष्ट्राग्रेणो-
ज्जहारगाम् ततःस्वस्थानमानीयपृथिवींपृथिवीधरः ४३ मुमोचपूर्वंसहसाधारयित्वाधराधरः ततोजगामनिर्वाणंमेदिनीतस्यधारणात्
४४ चकारचनमस्कारंतस्मैदेवायशंभवे एवंयज्ञवराहेणभूत्वाभूतहितार्थिना ४५ उद्धृतापृथिवीदेवीलोकानांहितकाम्यया अथोध्दृ-
त्यक्षितिंदेवोजगतःस्थापनेच्छया ४६ पृथिवीप्रविभागायमनश्चक्रेंबुजेक्षणः रसातलगतामेवंविचिंत्यसमुरोत्तमः ४७ ततोविष्णुःप्र-
वरवराहरूपधृक्वृषाकपिःप्रसभमथैकदंष्ट्रया समुद्धरद्धरणिमथैकविक्रमोमहायशालोकहितार्थमच्युतः ४८ ५७

३९ उपाकर्मस्मार्त्तवेदोपकरणंतदेवओष्ठरुचकंओष्टस्यभूषणंयस्यआवर्त्तोनाभिः ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ समुद्धरत्समुद्दधार ४८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा. ह. टी. २६ २७ अकरोदितिशैलेंद्रं अस्ताचलमित्यर्थः २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ सास्थितिवि अ. ५.
४८ सूर्योपिरात्रावपि ४० लक्ष्याधिकंचंद्रमंडलं यथातपतारविणाभातिएवंरविस्तेनपर्वतेनेत्यर्थः अतएवान्हिमध्यान्हार्कसंनिधिस्थश्चंद्रइवसूक्ष्मलक्षणोविज्ञे ३५ ३

क्षीरसंकाशसलिलांपयोधारामितिश्रुतिः स्वरम्यांतोयकल्लोलांविहितांदक्षिणांदिशम् २६ दिव्यांतीर्थशतोपेतांप्लावयंतीशुभांप्रभा दिशं-
याम्यांप्रतिष्ठाप्यप्रतीचींदिशमागमत् २७ अकरोत्तत्रशैलेंद्रं शतयोजनमुच्छ्रितम् शोभितंशिखरैश्चित्रैःसुमहद्भिर्हिरण्मयैः २८ कांचनी
भिःशिलाभिश्चगुहाभिश्चविभूषितम् समाकुलंसूर्यनिभैःशालैस्तालैश्चभास्वरैः २९ शुशुभेजातरूपश्चप्रासादैश्चित्रवेदिकैः षष्टिंगिरि
सहस्राणितत्रासौसन्यवेशयत् ३० मेरुप्रतिमरूपाणिवपुषाप्रभयासह सहस्रजलधारंचपर्वतंमेरुसन्निभम् ३१ पुण्यतीर्थगुणोपेतंभ
गवान्सन्यवेशयत् षष्टियोजनविस्तारंतावदेवसमुच्छ्रितम् ३२ आत्मरूपोपमंतत्रवाराहंनाममानतः निवेशयामासगिरिंदिव्यंवैडूर्यपर्व-
तम् ३३ रजताःकांचनाश्चैवयत्रदिव्याःशिलोच्चयः तत्रैवचक्रसदृशंचक्रवंतमहाबलम् ३४ सहस्रकूटंविपुलंभगवान्सन्यवेशयत्
शंखप्रतिमरूपंचराजतंपर्वतोत्तमम् ३५ सितद्रुमसमाकीर्णंशंखंनामन्यवेशयत् सुवर्णरत्नसंभूतंपारिजातंमहाद्रुमम् ३६ महतःपर्व
तस्याग्रेपुष्पहासंन्यवेशयत् शुभ्रामतिरसांचैवघृतधारामितिश्रुतिः ३७ वराहःसरितंपुण्यांप्रतीच्यामकरोत्प्रभुः प्रतीच्यांसविधिंकृत्वा
पर्वतान्कांचनोज्वलान् ३८ गुणोत्तरानुत्तरस्यांसन्यवेशयदच्युतः ततःसौम्यगिरिंसौम्यमंतरिक्षप्रमाणतः ३९ रुक्मधातुप्रतिच्छन्नम
करोद्भास्करोपमम् सतुदेशोविसूर्योपितस्यप्रभासाप्रकाशते ४० तस्यलक्ष्म्याधिकंभातितपनारविणायथा सूक्ष्मलक्षणविज्ञेयस्तपतीव
दिवाकरः ४१ सहस्रशिखरंचैवनानातीर्थसमाकुलम् चकाररत्नसंकीर्णंभूयोस्तंनामपर्वतम् ४२ मनोहरगुणोपेतंमंदरंचाचलोत्तम
म् उद्दामपुष्पगंधंचपर्वतंगंधमादनम् ४३ चकारतस्यशृंगेषुसुवर्णरससंभवम् जांबुंजांबूनदमयीमनंताद्भुतदर्शनाम् ४४ गिरिं-
चशिखरंचैवतथापुष्करपर्वतम् शुभ्रपांडुरमेघाभंकैलासंचनगोत्तमम् ४५ हिमवंतंचशैलेंद्रंदिव्यधातुविभूषितम् निवेशयामासहः
रिर्वाराहीतनुमास्थितः ४६ नदीसर्वगुणोपेतामुत्तरस्यांदिशिप्रभुः मधुधारांसकृतवान्दिव्यामृषिशताकुलाम् ४७ एवंत्वेवक्षितिधराःस
पक्षाःकामरूपिणः तदाकृताभगवताविचित्राःपरमेष्ठिना ४८ सकृत्वाप्रविभागंतुपृथिव्यांलोकभावनः देवासुराणामुत्पत्तौकृतवान्बु
द्धिमव्ययाम् ४९

यः ४१ भूयास्तंनामेतिभूयःपदात्पूर्वंअकरोदित्यत्रसउक्तएवेत्यर्थः अत्रपुनरुक्तिःपाश्चात्यजनाभिप्रायेणपाश्चात्यानांहिदक्षिणस्यामुदया ५८
चलउत्तरस्यांअस्ताचलः एवंप्राच्यांउत्तरेउदयाचलोदक्षिणतोऽस्ताचलः तथाऔदीच्यानांप्रतीच्यांउदयःप्राच्यांअस्तइति ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५० इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांपंचत्रिंशोऽध्यायः ३५ जगदित्यादिनास्थावरजंगमसृष्टिमाह १ २ ३ ४ ५ ६ ७

सर्वासुदिक्षुक्षतजोपमाक्षश्चकारशैलान्विविधाभिधानान् हितायलोकस्यसलोकनाथःपुण्याश्चनद्यःसलिलोपगूढाः ५० इतिश्रीमहा-
भारतेहरिवंशेभविष्यपर्वणिपंचत्रिंशोऽध्यायः ३५ वैशंपायनउवाच जगत्स्रष्टुमनादेवश्चिंतयामासपूर्वजः तस्यचिंतयतोव-
क्त्रान्निःसृतःपुरुषःकिल १ ततःसपुरुषोदेवंकिंकरोमीत्युपस्थितः प्रत्युवाचस्मितंकृत्वादेवदेवोजगत्पतिः २ विभजात्मानमित्युक्त्वा-
गतोंतर्धानमीश्वरः अंतर्हितस्यदेवस्यसशरीरस्यभारत ३ प्रशांतस्येवदीपस्यगतिस्तस्यनविद्यते ततस्तेनेरितांवाणींसोन्वचिंतयत्प्र
भुः ४ हिरण्यगर्भोभगवान्यएवच्छंदसिश्रुतः एषप्रजापतिःपूर्वमभवद्भुवनाधिपः ५ तदाप्रभृतितस्याद्योयज्ञसांगोविधीयते प्रजा
पतिरुवाच विभजात्मानमित्युक्तस्तेनास्मिसुमहात्मना ६ कथमात्माविभज्यस्यात्संशयोह्यत्रमेमहान् इतिचिंतयतस्तस्यओमि
त्येवोत्थितःस्वरः ७ सभूमावंतरिक्षेचनाकेचकृतवांस्ततः नचैवाभ्यसतस्तस्यमनसारमयत्पुनः ८ हृदयाद्देवदेवस्यवषट्कारःसमुत्थि
तः भूम्यंतरिक्षनाकानांपरंभूयःस्वरात्मिकाः ९ महास्मृतिमयाःपुण्यामहाव्याहृतयोभवन् छंदसांप्रवरादेवीचतुर्विंशाक्षराभवत् तत्स
दंसंस्मरन्दिव्यांसावित्रीमकरोत्प्रभुः १० ऋक्सामाथर्वयजुषश्चत्वारोभगवान्प्रभुः चकारनिखिलान्वेदान्ब्रह्मयुक्तेनकर्मणा ११
ततस्तस्यैवमनसःसनःसनकएवच सनातनश्चभगवान्वरदश्चसनंदनः १२ सनत्कुमारश्चविभुस्तत्रजज्ञेसनातनः मानसाश्चैवपूर्वा
ग्र्याइत्येतेषण्महर्षयः १३ ब्रह्माणंकपिलंचैवषडेतांश्चैवयोगिनः यतयोयागतंचेतुयान्स्तुवंतिद्विजातयः १४ ततोमरीचिमत्त्रिंचपुल-
स्त्यपुलहंक्रतुम् भृगुमंगिरसंचैवमनुंचैवप्रजापतिम् १५ पितॄंश्चसर्वभूतानांदेवतासुररक्षसाम् महर्षीनसृजच्छंभुरष्टावेतांश्चमान
सान् १६ एतेयुगसहस्रांतेयाश्चैषामभवन्प्रजाः कल्पेनिःशेषभुक्तेतुततोगच्छंतिनिर्वृतिम् १७ भूयोवर्षसहस्रांतेउत्पत्तिस्तुविधीयते
एतेषामेवदेवानांप्रजाकर्तृषुवैतदा १८ किंतुकर्मविशेषेणदेवतानांयुगेयुगे नामजन्मविशेषाश्चतएवयुगपर्यये १९ अंगुष्ठाद्दक्षिणाद्द
क्षउत्पन्नोभगवानृषिः तस्यैवतुपुनर्भार्यावामांगुष्ठादजायत २० तस्यतत्राभवन्कन्याविश्रुतालोकमातरः याभिर्व्याप्तास्त्रयोलोका
प्रजाभिर्मनुजाधिप २१ अदितिंचदितिंकालामनायुंसिंहिकांमुनिम् प्राधांक्रोधांचसुरभिंविनतांसुरसांतथा २२ दनुंकद्रुंचदुहितॄःप्रद
दौकश्यपायतु प्रजांसांचिंतस्मनसागतिज्ञेनांतरात्मना २३ अरुंधतींवसुंयामींलंबांभानुंमरुत्वतीम् संकल्पांचमुहूर्तांचसाध्यांविश्वांचभा
रत २४

८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मनवेब्रह्मपुत्रायकन्यादक्षोददौदश ततःसर्वानवद्यांगीः कन्याःकमललोचनाः २५ पूर्णचंद्राननादिव्यागंधवत्योमनोरमाः कीर्तिर्लक्ष्मी
धृतिपुष्टिबुद्धिर्मेधाक्षमातथा २६ मतिर्लज्जावसुश्चैवदक्षोधर्मायवैददौ अत्रेस्तुतनयोजातस्तस्यतोयात्मकःशशी २७ पुत्रोग्रहाणा
मधिपःसहस्रांशुस्तमिस्रहा तस्मैनक्षत्रयोगिन्यःसप्तविंशतिरुत्तमा २८ रोहिणीप्रमुखाःकन्यादक्षःप्राचेतसोददौ एतासांपुत्रपौत्रं-
चशोभ्यमानंमयाशृणु २९ कश्यपस्यमनोश्चैवधर्मस्यशशिनस्तथा अर्यमावरुणोमित्रःपूषाधातापुरंदरः ३० त्वष्टाभगोंशुःसवितापर्
जन्यश्चेतिविश्रुताः अदित्यांजज्ञिरेदेवाःकश्यपस्यमहात्मनः ३१ दित्याःपुत्रद्वयंजज्ञेकश्यपादितिनःश्रुतम् हिरण्यकशिपुश्चैवहिरण्या
क्षश्चवीर्यवान् द्वावप्यमितविक्रांतौतपसाकश्यपोपमौ ३२ हिरण्यकशिपोःपुत्राःपंचैवसुमहाबलाः प्रल्हादश्चैवसंल्हादस्तथानुल्हाद-
एवच ३३ ल्हदश्चैवतुविक्रांतःपंचमोनुल्हदस्तथा प्रल्हादःपूर्वजस्तेषामनुल्हादस्तथापरः ३४ प्रल्हादस्यत्रयःपुत्राविक्रांतासुमहाबलाः
विरोचनश्चजंभश्चकुजंभश्चेतिविश्रुताः ३५ बलिर्विरोचनसुतोबाणएकोबलेःसुतः बाणस्यचेंद्रदमनःपुत्रःपरपुरंजयः ३६ दनोःपु
त्रास्तुबहवोवशोरव्यातामहासुराः विप्रचित्तिःप्रथमजस्तेषांराजामहामनाः ३७ गणःप्रजज्ञेक्रोधायाःपुत्रपौत्रमनंतकम् रौद्राःक्रोधव
शानामक्रूरकर्माणिएवच ३८ सिंहिकासुषुवेराहुंचंद्रार्कग्रहमर्द्दनम् यस्तारंचैवचंद्रस्यसूर्यस्यचमहाप्रभम् ३९ काल्मायाःकालकल्प-
स्तुगणःपरमदारुणः अभवद्दीप्तसूर्याक्षोनीलमेघसमप्रभः ४० सहस्रशीर्षाःशेषश्चवासुकिस्तक्षकस्तथा बहूनांकद्रुपुत्राणामेतेप्रा
धान्यमागताः ४१ धर्मात्मानोवेदविदःसदाप्राणिहितेरताः लोकतंत्रधराश्चैववरदाकामरूपिणः ४२ तार्क्ष्यश्चारिष्टनेमिश्चगरुडश्चम-
हाबलः अरुणिश्चारुणिश्चैवविनतायाःसुताःस्मृताः इमाश्चाप्सरसःपुण्याविविधाःपुण्यलक्षणाः ४३ सुषुवेप्रोमहाभागाःप्राधादेवर्षि
पूजिताः अनवद्यामनूकांचअनूनामरुणांक्रियाम् अनुगांसुभगांभासींस्त्रियःप्राधाव्यजायत ४४ अलंबुसामिश्रकेशीपुंडरीकातिलोत्त
मा सुरूपालक्ष्मणाक्षेमातथारंभामनोरमा ४५ असिताचसुबाहुश्चसुवृत्तासुमुखीतथा सुप्रियाचसुगंधाचसुरसाचप्रमाथिनी ४६ काम्याश
रद्वतीचैवषोनेताप्सरसःस्मृताः विश्वावसुरारण्याश्चगंधर्वाश्चैवविश्रुताः ४७ मेनकासहजन्याचपर्णिनीपुंजिकस्थला घृतस्थलाघृताची
चविश्वाचीचोर्वशीतथा ४८ अनुम्लोचेत्यभिरव्याताप्रम्लोचेतिचतादश मनोवतीवापितथावैदिक्योप्सरसस्तथा ४९ प्रजापतेस्तुसंकल्पा
संभूताभुवनप्रियाः अमृतंब्राह्मणागावोरुद्राश्चेतिचतुष्टयम् ५० ५१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांषट्त्रिंशोऽध्यायः ३६ ६५

सुरभ्यपत्यमित्येतत्पुराणेनिश्चयोमहान् एतद्वैकश्यपापत्यंमनोर्वंशंनिबोधमे ५१ संक्षेपेणैवतत्सर्वंकीर्तयिष्यामितेनघ विश्वेदेवास्तुविश्वा
याःसाध्यासाध्यान्व्यजायत ५२ मरुत्वत्यामरुत्वंतोवसोस्तुवसवःस्मृताः भानोस्तुभानवस्तातमुहूर्त्ताश्चमुहूर्तजाः ५३ लंबायाघोषंविज
ज्ञेयनागवीथीचजामिजा पृथिव्यांविषमसर्वंमरुद्वत्यामजायत ५४ संकल्पायास्तुकौरव्यजज्ञेसंकल्पएवच धर्मस्यपुत्रोलक्ष्म्यास्तुका
मोजज्ञेजगत्प्रभुः ५५ यशोहर्षश्चकामश्चरत्यांपुत्रद्वयंस्मृतम् सोमस्यपुत्रोरोहिण्यांजज्ञेवर्चोमहाप्रभः ५६ उदयन्नेवभगवान्वर्चस्वी
येनजायते पुरूरवाचभगवान्उर्वशीयेनयुज्यते ५७ एवंपुत्रसहस्राणिस्त्रीणांचैवपरस्परम् एतावत्तुजगन्मूलंयत्रलोकाःप्रतिष्ठिताः
५८ प्रजापतिस्तुभगवान्गुणतःप्रेक्ष्यदेहिनः आधिपत्येषुयुक्तेषुनियोजयतियोगवित् ५९ दिशोदशाक्षितिंपृथ्वीमर्णवान्नगान्द्रुमोषधीरु
रगसरित्सुरासुरान् प्रजापतिर्भुवनसृजोनभोभुवःक्रियामखानयत्कृतवान्गिरींश्चसः ६० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्य
पर्वणिषट्त्रिंशोऽध्यायः ३६ वैशंपायनउवाच त्रयाणामपिलोकानामादित्यानांचभारत चकारचक्रराजानमादित्यसमतेजस
म् १ सवज्रीकवचीविष्णुरदित्यामभिजज्ञिवान् स्मृतेःसहायोद्युतिमान्यथासोध्वर्युभिष्टुतः २ जातमात्रोथभगवान्सकुशेब्राह्मणैर्धृ
तः तदाप्रभृतिदेवेशःकौशिकत्वमुपागतः ३ अभिषिच्याधिराज्येतुसहस्राक्षंपुरंदरम् यथाक्रमेणराज्यानिव्यादेष्टुमुपचक्रमे ४ यज्ञानां
तपसांचैवनक्षत्रग्रहयोस्तथा द्विजानामोषधीनांतुसोमंराज्येभ्यषेचयत् ५ दक्षंप्रजापतीनांतुअंभसांवरुणंपतिम् पितृणांसर्वनिधनं-
कालंवैश्वानरंप्रभुम् ६ गंधानांचैवसर्वेषांभूतानांचशरीरिणाम् शब्दाकाशबलानांचवायुरीशःसदाकृतः ७ सर्वभूतपिशाचानांमृत्यु
नांचगवांतथा उत्पातग्रहरोगाणांव्याधीनांतुतथैवच ८ भूतानांचैवसर्वेषांमहादेवःकृतःप्रभुः यक्षाणांराक्षसानांचगुह्यकानांधनस्य
च ९ रत्नानांचैवसर्वेषांकृतोवैश्रवणःप्रभुः सर्वेषांदंष्ट्रिणांशेषोनागानामथवासुकिः १० सरीसृपाणांसर्वेषांप्रभुर्वैतक्षकःकृतः साग
राणांनदीनांचमेघानांवर्षणस्यच आदित्यानामवरजःपर्जन्योधिपतिःकृतः ११ गंधर्वाणामधिपतिःतथाचित्ररथःकृतः सर्वाप्सरोगणानां
चकामदेवःप्रभुःकृतः १२ चतुष्पदानांसर्वेषांवाहनानांचसर्वशः महेश्वरध्वजःश्रीमान्गोवृषोधिपतिःकृतः १३ दैत्यानांचमहातेजाहिर-
ण्याक्षःप्रभुःकृतः हिरण्यकशिपुश्चैवयौवराज्येभिषेचितः १४ गणानांकालकेयानांमहाकालःप्रभुःकृतः अनायुषायाःपुत्राणांवृत्रोराजातदा
कृतः १५

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ अनायुषायाःतणुभार्यायाः १५ ६५ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६ ७ ८ ९ १० ११ १२ १३ १४ १५ रश्मिभिस्तेजोयुक्तैरट्टालसदृशैश्चेतिगंडशैलविशेषणं भुशुंडीभिरितिपाठे दंडाग्रस्थितमु
कुराकृतिफल्गुतोमरः फलशल्येनयंत्रितः पट्टिशएकधारःखड्गः क्षेपणीयैर्दूरात्मुक्तैः घातनीभिर्गुर्वीभिरितिविशेषणद्वयंशतघ्नीनां शतघ्नीभिः शसंहंत्रीभिर्गुर्वीभिरि

केचित्कवचिनःसज्जामत्तनागांस्तथापरे केचिद्‌ग्वरथान्युक्ता अपरेश्वान्महास्फरा: ६ केचिदुष्ट्रांस्तथाखड्गान्माहिषान्गर्दभानपि स्वबा
हुबलमास्थाय केचिच्चापिपदातयः ७ परिवार्यहिरण्याक्षंतस्थुर्बद्धाः कलापिनः इतश्चेतश्चनिश्चेरुर्हृष्टाःसर्वेयुयुत्सवः ८ ततोदेवगणाःप
श्चात्पुरंदरपुरोगमाः दैत्यानांविदितोद्योगाश्चक्रुरुद्योगमुत्तमम् ९ महताचतुरंगेणबलेनसुसमाहिताः बद्धगोधांगुलित्राणास्तूणवंतःसमा
र्गणाः १० उग्रायुधधरादेवाःस्वेष्वनीकेष्ववस्थिताः ऐरावतगतंशक्रमन्वगच्छतपृष्ठतः ११ ततस्तूर्यनिनादेनभेरीणांचमहास्वनैः अभ्यद्र
वद्धिरण्याक्षोदेवराजंपुरंदरम् १२ तीक्ष्णैःपरश्वनिस्त्रिंशैर्गदातोमरशक्तिभिः मुशलैःपट्टिशैश्चैवच्छादयामासवासवम् १३ ततोऽस्त्रबलवेगेन
सार्चिष्मत्यःसुदारुणाः घोररूपामहावेगानिपेतुर्बाणवृष्टयः १४ शिष्टाश्चदैत्याबलिनःसितधारैःपरश्वधैः परिघैरायसैःखड्गैःक्षेपणीयैश्चमु
द्गरैः १५ गंडशैलैश्चविविधैरश्मिभिश्चाद्रिसन्निभैः घातनीभिश्चगुर्वीभिःशतघ्नीभिस्तथैवच १६ युगैर्यन्त्रैश्चनिर्मुक्तैरर्गलैश्चविदारणैः
सर्वान्देवगणान्दैत्याःसंनिजघ्नुःसवासवान् १७ धूम्रकेशंहरिश्मश्रुंनानाप्रहरणायुधम् रक्तसंध्याभ्रसंकाशंकिरीटोत्तमधारिणम् १८ नी
लपीतांबरधरंशितदंष्ट्रोर्द्ध्वधारिणम् आजानुबाहुंहर्यक्षंवैडूर्याभरणोज्वलम् १९ समुद्यतायुधंदृष्ट्वासर्वेदेवगणास्तदा तेहिरण्याक्षमसु
रंदैत्यानामग्रतःस्थितम् २० युगांतसमयेभीमंस्थितंमृत्युमिवाग्रतः प्रविव्यथुःसुराःसर्वेतदाशक्रपुरोगमाः २१ दृष्ट्वायांतंहिरण्याक्षंमहा-
द्रिमिवजंगमम् देवाःसंविग्नमनसःप्रगृहीतशरासनाः २२ सहस्राक्षंपुरस्कृत्यतस्थुःसंग्राममूर्द्धनि साचदैत्यचमूरेजेहिरण्यकवचोज्वला
२३ प्रवृद्धतप्ततत्रगणा शारदीद्यौरिवामला तेऽन्योन्यमपिसंपेतुःपातयंतःपरस्परम् २४ बभंजुर्बाहुभिर्बाहून्द्वंद्वमन्येयुयुत्सवः गदानिपा-
तैर्भग्नांगाबाणैश्चव्यथितोरसः २५ विनिपेतुःपृथक्केचित्तथान्येपिविजघ्निरे बभंजिरेरथान्केचित्केचित्संमृदितारथैः २६ संबाध
मन्येसंप्राप्तानशेकुश्चलितुंरथाः दानवेंद्रबलंतत्तुदेवानांचमहद्बलम् २७ अन्योन्यबाणवर्षेणयुद्धदुर्दिनमाबभौ हिरण्याक्षस्तुबलवा
न्क्रुद्धःसदितिनंदनः २८ व्यवर्द्धतमहातेजाःसमुद्रइवपर्वणि तस्यक्रुद्धस्यसहस्रामुखान्निश्चेरुरर्चिषः २९

तिशालासंबंधात् १६ युगैर्युगाकारैरस्त्रैः आग्नेयादिभिरस्त्रैःपाषाणवर्षिभिः १७ धूम्रकेशत्वादिविशेषणंहिरण्याक्षंदृष्ट्वा प्रविव्यथुरितिचतुर्णामन्वयः १८ १९
२० २१ महेंद्राख्यपर्वतमिवजंगमंचलम् महाद्रिमिवेतिवापाठः २२ २३ २४ २५ २६ २७ २८ २९ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१६ १७ १८ चक्षुषांचक्षुष्मतांदूरदर्शनसमर्थानामित्यर्थः १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१
३२ ३३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांसप्तत्रिंशोऽध्यायः ३७ एवमाधिपत्यस्थापनानंतरंयद्वृत्तंतदाह कदाचित्तुअसुराणांसप

सिंहिकातनयोयस्तुराहुर्नाममहासुरः उत्पातानामनेकानामशुभानांप्रभुःकृतः १६ ऋतूनामथसर्वेषांयुगानांचैवभारत पक्षाणांचैवमासानां-
तथैवतिथिपर्वणाम् १७ कलाकाष्ठामुहूर्त्तानांगतेरयनयोस्तथा कृतःसंवत्सरोराजायोगस्यगणितस्यच १८ पक्षिणांचैवसर्वेषांचक्षुष्मां
चमहाबलः सुपर्णोभोगिनांचैवगरुडोधिपतिःकृतः १९ अरुणोगरुडभ्राताजपापुष्पचयप्रभः योगानांचैवसर्वेषांसाध्यानामधिपःकृतः
२० पुत्रोस्याविरथोनामकश्यपस्यप्रजापतेः राजाप्राच्यांदिशितथावासवेनाधिपःकृतः २१ आदित्यस्यविभोःपुत्रोधर्मराजोमहायशाः दक्षि
णस्यांदिशियमोमहेंद्रेणैवसत्कृतः २२ कश्यपस्यौरसःपुत्रःसलिलांतर्गतःसदा अंबुराजइतिख्यातःप्रतीच्यांदिशिपार्थिवः २३ पुलस्त्यपु
त्रोद्युतिमान्महेंद्रप्रतिमःप्रभुः एकाक्षःपिंगलोनामसौम्यायांदिशिपार्थिवः २४ एवंविभज्यराज्यानिस्वयंभूर्लोकभावनः लोकांश्चत्रिदिवे
दिव्यानददत्सपृथक्पृथक् २५ कस्यचित्सूर्यसंकाशान्कस्यचिद्वह्निसन्निभान् कस्यचित्सुविद्योतान्कस्यचिच्चंद्रनिर्मलान् २६ ना
नावर्णान्कामगमाननेकेशतशोजनान् सतान्सुकृतिनांलोकान्पापदुष्कृतिदुर्लभान् २७ येषांभासोविभांत्यग्रेसौम्यास्तारागणाइव ए
तेसुकृतिनांलोकायेजाताःपुण्यकर्मिणः २८ येयजंतिसरवैःपुण्यैःसमाप्तवरदक्षिणैः स्वदारनिरताक्षांताऋजवःसत्यवादिनः २९ दीनानु-
ग्रहकर्त्तारोब्रह्मण्यालोभवर्जिताः संत्यक्तरजसःसंतोयांतितेव्रतपोमलाः ३० एवंनियुज्यतनयान्स्वयंलोकपितामहः पुष्करंब्रह्मसदनमा
रुरोहप्रजापतिः ३१ सर्वेस्वयंभुदत्तेषुपालनेषुदिवौकसः रेमिरेस्वेषुलोकेषुमहेंद्रेणाभिपालिताः ३२ स्वयंभुवाशक्रपुरःसराःसुराःकृता
यथार्हप्रतिपालनेषुते यशोदिवंचप्रतिपेदिरेशुभंमुदंचजग्मुर्मखभागभोजिनः ३३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणि
सप्तत्रिंशत्तितमोऽध्यायः ३७ वैशंपायनउवाच कदाचित्तुसपक्षास्तेपर्वताधरणीधराः प्रस्थिताधरणींत्यक्त्वानूनंतस्यैवमाय
या १ तदासुराणांनिलयंहिरण्याक्षेणपालितम् दिशंप्रतीचीमागम्यन्हदेमज्जन्यथागजाः २ तत्रासुरेभ्यःशंसंतआधिपत्यंसुराश्रये त
च्छुत्वाथासुराःसर्वेचक्रुरुद्योगमुत्तमम् ३ क्रूरांचबुद्धिमतुलांपृथिवीहरणेरताः आयुधानिचसर्वाणिजगृहुर्भीमविक्रमाः ४ चक्राशनी
स्तथाखड्गान्भुशुंडीश्चधनूंषिच प्रासान्पाशांश्चशक्तीश्चमुसलानिगदास्तथा ५

क्षाः मित्राणि १ २ सुराश्रयंकनिष्ठाःसुराआधिपत्यंकुर्वंति यस्यज्येष्ठाअपिअनीश्वराइतिशशंसुरित्यर्थः सर्वेहिरण्याक्षादयः ३ ४ ५ ६ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ३० ३१ ३२ ३३ ३४ ३५ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांअष्टत्रिंशोऽध्यायः ३८ निःप्रयत्नइति १ पर्वतोनामपर्वाणि दश
 पूर्णमासादीनि अवयवत्वेनवर्त्तन्तेस्मिन्निति पर्वतोयज्ञतन्तुर्नमित्यर्थः यएषःवक्ष्यमाणगुणःसवराहोभूत्वेति संबंधः २ ३ ४ ५ ६ त्रिधाहुतंहूयमा

शस्त्रजालैर्बहुविधैर्धनुर्भिःपरिघैरपि सर्वमाकाशमावव्रेपर्वतैरुत्थितैरिव ३० बहुभिःशस्त्रनिस्त्रिंशैश्छिन्नभिन्नशिरोरसः नशेकुश्चलितुंदेवा हिरण्याक्षाहितायुधि ३१ सर्वेवित्रासितादेवाहिरण्याक्षेणसंयुगे नशेकुर्यत्नवंतोपियत्नंकर्तुंविचेतसः ३२ तेनशक्तःसहस्राक्षःस्तंभितोस्त्रेणधीमता ऐरावतगतःसंख्येनाशकच्चलितुंभयात् ३३ सर्वांश्चदेवानखिलान्सपराजित्यदानवः स्तंभयित्वाचदेवेशमात्मस्थंमन्यतेजगत् ३४ सतोयमेघप्रतिमोग्रनिःस्वनप्रभिन्नमातंगविलासविग्रहम् धनुर्विधुन्वंतमुदारवर्चसंतदासुरेन्द्रंददृशुःसुराःस्थिताः ३५ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिवाराहेअष्टात्रिंशोऽध्यायः ३८ वैशंपायनउवाच निःप्रयत्नेसुरपतौधर्षितेष्वसुरेषुच हिरण्याक्षवधेबुद्धिंचक्रेचक्रगदाधरः १ वाराहःपर्वतोनामयःपूर्वंसमुदाहृतः सएषभूत्वाभगवान्आजगामसुरांतकृत् २ ततश्चंद्रप्रतीकाशमगृण्हाच्छंखमुत्तमम् सहस्रारंचतच्चक्रंचक्रपर्वतसन्निभम् ३ महादेवोमहाबुद्धिर्महायोगीमहेश्वरः पठ्यतेयोमरैःसर्वैर्गुह्यैर्नामभिरव्ययः ४ सदसच्चात्मनिश्रेष्ठःसद्भिर्यःसेव्यतेतदा इज्यतेयःपुराणैश्चत्रिलोकेलोकभावनः ५ योवैकुंठःसुरेंद्राणामनंतोभोगिनामपि विष्णुर्योयोगविदुषांयोयज्ञोयज्ञकर्मणाम् ६ मखेयस्यप्रसादेनभुवनस्थादिवौकसः आज्यंमहर्षिभिर्दत्तमश्नुवंतित्रिधाहुतम् ७ योगतिर्देवदैत्यानांयःसुराणांपरागतिः यःपवित्रंपवित्राणांस्वयंभूरव्ययोविभुः ८ यस्यचक्रप्रविष्टानिदानवानांयुगेयुगे कुलान्याकुलतांयांतियानिदृष्टानिवीर्यतः ९ ततोदैत्यद्रवकरंपौराणंशंखमुत्तमम् धमन्वक्त्रेणबलवान्आक्षिपद्दैत्यजीवितम् १० श्रुत्वाशंखस्वनंघोरमसुराणांभयावहम् क्षुभितादानवाःसर्वेदिशोदशव्यलोकयन् ११ ततःसरक्तनयनोहिरण्याक्षोमहासुरः कोयमित्यब्रवीद्रोषात्नारायणमुदीक्षत १२ वाराहरूपिणंदेवंसंस्थितंपुरुषोत्तमम् शंखचक्रोद्यतकरंदेवानामार्त्तिनाशनम् १३ रराजशंखचक्राभ्यांताभ्यामसुरसूदनः सूर्याचंद्रमसोर्मध्येयथानीलपयोधरः १४ ततोसुरगणाःसर्वेहिरण्याक्षपुरोगमाः उद्यतायुधनिस्त्रिंशादृष्ट्वादेवमुपाद्रवन् १५ पीड्यमानोतिबलिभिर्दैत्यैःसर्वायुधोद्यतैः नचचालहरिर्युद्धेकंप्यमानइवाचलः १६ ततःप्रज्वलितांशक्तिंवाराहोरसिदानवः हिरण्याक्षोमहातेजाःपातयामासवीर्यवान् १७ तस्याःशक्त्याःप्रभावेणब्रह्माविस्मयमागतः समीपमागतांदृष्ट्वामहाशक्तिंमहाबलः १८

नप्रहृतारव्यप्रकारत्रयेणहुताग्नौहूयमाना-
अनग्नौप्रहुताब्राह्मणभोजनेइत्याश्वलायनव्याख्यातेन ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१९ २० २१ २२ अप्रतिचक्रं अप्रतिहताज्ञं चक्रं यस्य सः २३ इतिश्रीमहाभारते हरिवंशे भविष्यपर्वणि टीकायां एकोनत्रिंशोऽध्यायः ३९ विद्राव्ये

हुंकारेणैव निर्भर्त्स्य पातयामास भूतले तस्यां प्रतिहतायां तु ब्रह्मा साध्विति चाब्रवीत् १९ यः प्रभुः सर्वभूतानां वराहस्तेन ताडितः ततो भगवता
चक्रमाविध्यादित्यसंनिभम् २० ततः स्थितस्यैव शिरस्तस्य भूमौ पपात ह हिरण्मयं वज्रहतं मेरुशृंगमिवोत्तमम् २१ हिरण्याक्षे हते दैत्ये शे-
षा ये तत्र दानवाः सर्वे तस्य भयत्रस्ता जग्मुरास्तु दिशो दश २२ स सर्वलोकप्रतिचक्रचक्रो महाहवेष्वप्रतिमोग्रचक्रः बभौ वराहो युधि चक्रपा
णिः कालो युगांतेष्विव दंडपाणिः २३ इतिश्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि एकोनत्रिंशोऽध्यायः ३९ वैशंपायनउवाच
विद्राव्य तु रणे सर्वान् असुरान् पुरुषोत्तमः मुमोच तत्र बद्धांस्तान् पुरंदरमुखान् सुरान् १ ततः प्रकृतिमापन्नाः सर्वे देवगणास्तथा पुरंदरपुर-
स्कृत्य नारायणमुपस्थिताः २ देवाऊचुः त्वत्प्रसादेन भगवन् तव बाहुबलेन च जीवा मोघ महाबाहो निष्क्रांताश्चांतकाननात् ३ त्व
च्छासनाद्धि भगवन् किं कुर्वंत्वादितेः सुताः इच्छामः पादशुश्रूषां तव कर्तुं सनातन ४ वैशंपायनउवाच तच्छ्रुत्वा वचनं तेषां पुंडरीकनि
भेक्षणः उवाच वचनं देवान् मुदा युक्तो हृतद्विषः ५ श्रीभगवानुवाच यो यस्य भवतां लोको मयैव विहितः पुरा पाल्यतां स तु यत्ने
न नियोगश्च क्वचित् क्वचित् ६ ऐश्वर्यं प्रतिपन्नास्थ क्रतुभागपुरस्कृतम् मयैव पूर्वं निर्दिष्टो नियोगः प्रतिपाल्यताम् ७ शक्रं चोवाच भगवा
न् घनदुंदुभिस्वनः इदं यथावत्कर्तव्यं सत्सु चासत्सु च त्वया ८ गच्छंतु तपसा स्वर्गं मुनयः संशितव्रताः यज्ञैरिष्ट्वा याययजूकाः फलं ते प्राप्नुवं
तु च ९ भावः सद्धर्मशीलानामभावः पापकर्मणाम् संतः स्वर्गजितः संतु सर्वाश्रमनिवासिनः १० सत्यशूरा रणे शूरा दानशूराश्च ये नराः ते नराः
स्वर्गमश्नुतु सदा ये चानसूयवः ११ अश्रद्दधानाः पुरुषाः कामिनोऽर्थपराः शठाः अब्रह्मण्या नास्तिकाश्च नरकं यांतु मानवाः १२ एतावत्क्रियतां
वाक्यं मयोक्तं त्रिदशेश्वराः ततो मयि स्थिते सर्वान् बाधिष्यंते न चारयः १३ इत्युक्त्वांतर्हितो देवः शंखचक्रगदाधरः देवतानां च सर्वेषामभव
द्विस्मयो महान् १४ एतदत्यद्भुतं दृष्ट्वा वाराहचरितं सुराः नमस्कृत्वा वराहाय नाकपृष्ठमितो गताः १५ ततः स्वान्याधिपत्यानि प्रतिपन्नानि
दैवतैः सर्वलोकाधिपत्ये च प्रतिष्ठां वासवो गतः १६ विमुक्ता दानवगणैः प्रकृतिं धरणी गता स्थैर्यहेतोर्धरिण्यास्तु ज्ञात्वा चाग स्कृतान् गिरीन्
१७ स्वेषु स्थानेषु संस्थाप्य पर्वतान् पुरंदरः चिच्छेद भगवान् पक्षान् वज्रेण शतपर्वणा १८ सर्वेषामेव पक्षा वै छिन्नाः शक्रेण धीमता एकः सप
क्षो मैनाकः सुरैस्तत्समयः कृतः १९

ति १ २ ३ ४ ५ लोकः स्थानं नियोग अज्ञा वेदरूपा ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
१७ चिच्छेद पूर्वं दानवो योगकरत्वेन सापराधानां पर्वतानां पक्षान् चिच्छेद १८ सुरैः समयः मैनाकरक्षार्थे कृतः यथा समुद्रे स्थितस्य तेन पक्षच्छेदो भवितेति १९ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२० २१ २२ २३ २४ २५ २६ अयनायगतये २७ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांचत्वारिंशोऽध्यायः ४० वाराहएष
मृगेंद्रेणनृसिंहेनभूत्वाआविर्भूय १ २ स्थातुंशीलमस्येतिस्थानंस्थावरंनंद्यादिषुप्रत्ययांतःतद्भूयोनंस्थानमोनम् ३ ४ ५ ६ दिग्भिःदिग्देवता ४० १

एषनारायणस्यायंप्रादुर्भावोमहात्मनः वाराहइतिविप्रेंद्रैःपुराणेपरिकीर्त्तितः २० कृष्णद्वैपायनमतंनानाश्रुतिसमाहितम् नाशुचेर्नकृतघ्ना
यननृशंसायकीर्त्तयेत् २१ नक्षुद्रायननीचायनगुरुद्वेषकारिणे नाशिष्यायतथाराजन्नकृतघ्नायचैवहि २२ आयुःकामैर्यशःकामैर्महीका
मैश्चमानवैः जयैषिभिश्चश्रोतव्योदेवानामेषवैजयः २३ पुराणोवेदसंबद्धःशिवःस्वस्त्ययनोमहान् पावनःसर्वसत्वानांतत्कालविजयप्र-
दः २४ एषकौरव्यतत्त्वेनकथितस्त्वनुपूर्वशः वाराहस्यनृपश्रेष्ठप्रादुर्भावोमहात्मनः २५ येयजंतिमखैःपुण्यैर्दैवतानिपितॄनपि आत्मान-
मात्मनानित्यंविष्णुमेवजयंतिते २६ लोकायनायत्रिदशायनायब्रह्मायनायात्मभवायनाय नारायणायात्महितायनायमहावराहायनम
स्कुरुध्व २७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिवाराहप्रादुर्भावेचत्वारिंशत्तमोऽध्यायः ४० वैशंपायनउवाच
वाराहएषःकथितोनारसिंहमतःशृणु यत्रभूत्वामृगेंद्रेणहिरण्यकशिपुर्हतः १ पुराकृतयुगेराजन्हिरण्यकशिपुःप्रभुः दैत्यानामादिपुरुष
श्चकारसुमहत्तपः २ दशवर्षसहस्राणिशतानिदशपंचच जलवासीसमभवत्स्थानमौनव्रतस्थितः ३ ततःशमदमाभ्यांचब्रह्मचर्येण
चैवहि ब्रह्माप्रीतोभवत्तस्यतपसानियमेनच ४ ततःस्वयंभूर्भगवान्स्वयमागम्यतत्रह विमानेनार्कवर्णेनहंसयुक्तेनभास्वता ५ आ
दित्यैर्वसुभिःसाध्यैर्मरुद्भिर्दैवतैःसह रुद्रैर्विश्वसहायैश्चयक्षराक्षसकिन्नरैः ६ दिग्भिश्चाथविदिग्भिश्चनदीभिःसागरैस्तथा नक्षत्रैश्चमु
हूर्तैश्चखचरैश्चमहाग्रहैः ७ देवैर्ब्रह्मर्षिभिःसार्द्धंसिद्धैःसप्तर्षिभिस्तथा राजर्षिभिःपुण्यकृद्भिर्गंधर्वैरप्सरोगणैः ८ चराचरगुरुःश्रीमान्वृतोदे
वगणैःसह ब्रह्माब्रह्मविदांश्रेष्ठोदैत्यंवचनमब्रवीत् ९ ब्रह्मोवाच प्रीतोस्मितवभक्तस्यतपसानेनसुव्रत वरंवरयभद्रंतेयथेष्टकामसा
प्नुहि १० ततोहिरण्यकशिपुःप्रीतात्मादानवोत्तमः कृतांजलिपुटःश्रीमान्वचनंचेदमब्रवीत् ११ हिरण्यकशिपुरुवाच नदेवासुर-
गंधर्वानयक्षोरगराक्षसाः नमानुषाःपिशाचाश्चनिहन्युर्मांकथंचन १२ ऋषयोनैवमांक्रुद्धाःसर्वलोकपितामह शपेयुस्तपसायुक्तावरएषवृ
तोमया १३ नशस्त्रेणनचास्त्रेणगिरिणापादपेनच नशुष्केणनचार्द्रेणस्यान्नचान्येनमेवधः १४ नस्वर्गेप्यथपातालेनाकाशेनावनिस्थले न
चाभ्यंतररात्र्यन्होनचाप्यन्येनमेवधः १५ पाणिप्रहारेणैकेनसभृत्यबलवाहनम् योमान्नाशयितुंशक्तःसमेमृत्युर्भविष्यति १६

भिःएवमन्यत्रापि ७ ८ ९ १० ११ १२ १३ १४ १५ १६ ६७ ६७ ६७ ६७ ६७ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६

भवेयमहमेवार्कःसोमोवायुर्हुताशनः सलिलंचांतरिक्षंचनक्षत्राणिदिशोदश अहंक्रोधश्चकामश्चवरुणोवासवोयमः १७ धनदश्चधना-
ध्यक्षोयक्षःकिंपुरुषाधिपः मूर्त्तिमंतिचदिव्यानिममास्त्राणिमहाहवे उपतिष्ठंतुदेवेशसर्वलोकपितामह १८ पितामहउवाच एते-
दिव्यावरास्तातमयादत्तास्तवाद्भुताः सर्वान्कामानत्वमाप्तात्वाप्स्यसित्वंनसंशयः १९ वैशंपायनउवाच एवमुक्त्वासभगवान्ज
गामाकाशमेवच वैराज्यंब्रह्मसदनंब्रह्मर्षिगणसेवितम् २० ततोदेवाश्चनागाश्चगंधर्वामुनिभिःसह वरप्रदानंश्रुत्वैवपितामहमुपस्थि
ताः २१ देवाऊचुः वरेणानेनभगवन्वधिष्यतिसनोसुरः तत्प्रसीदस्वभगवन्वधोप्यस्यविचिंत्यताम् २२ वैशंपायनउवाच
भगवन्सर्वभूतानामादिकर्त्तास्वयंप्रभुः स्रष्टाचहव्यकव्यानामव्यक्तःप्रकृतिर्ध्रुवः २३ सर्वलोकहितंवाक्यंश्रुत्वादेवःप्रजापतिः आश्वासयामा
ससुरान्सुशीतैर्वचनांबुभिः २४ अवश्यंत्रिदशास्तेनप्राप्तव्यंतपसःफलम् तपसोंतेसभगवान्वधंविष्णुःकरिष्यति २५ एतच्छ्रुत्वासुराः
सर्वेवाक्यंपंकजजन्मनः स्वानिस्थानानिदिव्यानिप्रतिजग्मुर्मुदान्विताः २६ वैशंपायनउवाच लब्धमात्रेवरेतस्मिन्सर्वाःसोबाध
तप्रजाः हिरण्यकशिपुर्दैत्योवरदानेनदर्पितः २७ आश्रमेषुमुनीन्सर्वान्ब्राह्मणान्संशितव्रतान् सत्यधर्मरतान्दांतान्धर्षयामाससवीर्यवा
न् २८ देवांस्त्रिभुवनस्थांश्चपराजित्यमहासुरः त्रैलोक्यंवशमानीयस्वर्गेवसतिदानवः २९ यदावरमदोन्मत्तश्चोदितःकालधर्मणा यज्ञिया
नकरोद्दैत्यान्देवतानप्ययज्ञियान् ३० तदादित्याश्चसाध्याश्चविश्वेचवसवस्तथा रुद्रादेवगणायक्षादेवाद्विजमहर्षयः ३१ शरण्यंशरणंवि
ष्णुंउपतस्थुर्महाबलम् देवदेवमयंयज्ञंब्रह्मदेवंसनातनम् ३२ भूतंभव्यंभविष्यंचप्रजालोकनमस्कृतम् देवाऊचुः नारायणमहा
भागदेवत्वांशरणंगताः ३३ त्वंहिनःपरमोधातात्वंहिनःपरमोगुरुः त्वंहिनःपरमोदेवोब्रह्मादीनांसुरोत्तम ३४ त्वंपद्मामलपत्राक्ष शत्रुप
क्षभयावह क्षयायदितिवंशस्याक्षयायभवनःप्रभो ३५ त्रायस्वजहिदैत्येंद्रंहिरण्यकशिपुंप्रभो विष्णुरुवाच भयंत्यजध्वममम
राअभयंवोददाम्यहम् ३६ तथैवत्रिदिवंदेवाप्रतिपत्स्यथमाचिरम् एषतंसगणंदैत्यंवरदानेनदर्पितम् ३७ अवध्यममरेंद्राणांदानवेंद्रंनि
हन्म्यहम् वैशंपायनउवाच एवमुक्त्वासभगवान्विसृज्यत्रिदिवौकसः ३८ वधंसंकल्पयित्वातुहिरण्यकशिपोःप्रभुः ३९ सोचिरे
णैवकालेनहिमवत्पार्श्वमागतः किंतुरूपंसमास्थायनिहन्म्येनंमहासुरम् ४० यत्सिद्धिकरमाशुस्याद्वधायविबुधद्विषः अनुत्पन्नंततश्चक्रे
सोत्यंतंरूपमास्थितः ४१

३७ ३८ ३९ ४० ४१ ५ ५ ५ ५ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ४२ ओंकारसहायत्वं ओंकारार्थस्यसार्वात्म्यस्यानुसंधानंतद्बलेनैववशमादिभिःरावणादीनांनिहतत्वात् ४३ ४४ ४५ अध्यर्द्धसार्द्धशतं ४६ ४७
 ४८ अवतानैःवितानप्रांतेषुलंबमानैःचित्रपटैःझालरइतिप्रसिद्धैःगुल्मैःतेष्वेवगुच्छाकारैरेवपटैः ४९ ५० प्रभालावण्यंतद्वतीभास्वरादीप्तिमती ५१

नारसिंहमनाधृष्यंदैत्यदानवरक्षसाम् सहायंतुमहाबाहुर्जग्राहोंकारमेवच ४२ अथोंकारसहायोसौभगवान्विष्णुरव्ययः हिरण्यकशिपोः
स्थानंजगामप्रभुरीश्वरः ४३ तेजसाभास्कराकारःकांत्याचंद्रइवापरः नरस्यकृत्वार्द्धतनुंसिंहस्यार्धतनुंविभुः ४४ नारसिंहेनवपुषापाणिंसं
स्पृश्यपाणिना ततोपश्यतविस्तीर्णांदिव्यांरम्यांमनोरमाम् ४५ सर्वकामयुताशुभ्राहिरण्यकशिपोःसभाम् विस्तीर्णायोजनशतंशतमध्यर्द्ध
मुच्छ्रिताम् ४६ विहायसींकामगमांपंचयोजनमुच्छ्रिताम् जराशोकक्लमत्यक्तांनिःप्रकंपांशिवांशुभाम् ४७ शुभासनवतींरम्यांज्वलंतीमिव
तेजसा अंतःसलिलसंयुक्तांविहितांविश्वकर्मणा दिव्यरत्नमयैर्वृक्षैःफलपुष्पप्रदैर्युताम् ४८ नीलपीतासितश्यामैःसितैर्लोहितकैरपि
अवतानैस्तथागुल्मैर्मंजरीशतधारिभिः ४९ सिताभ्रघनसंकाशाप्लवंतीवाप्सुदृश्यते धन्यासनवतीरम्याज्वलंतीमिवतेजसा ५० प्रभावतीभा
स्वराचदिव्यगंधमनोरमा नासुखानचदुःखासानसीतानचघर्मदा ५१ नक्षुत्पिपासेनग्लानिंप्राप्यतांप्राप्नुवंतिहि नानारूपैर्विरचिताविचित्रै
रतिभास्वरैः ५२ स्तंभैर्मणिमयैर्दिव्यैःशाश्वतीचाक्षताचसा अतिचंद्रंचसूर्यंचपावकंचस्वयंप्रभा ५३ दीप्यतेनाकपृष्ठस्थाभर्त्सयंतीवभा-
स्करम् सर्वेचकामाःप्रचुराःयेदिव्यायेचमानुषाः ५४ रसवंतःप्रभूताश्चभक्ष्यभोज्यंतथाक्षयम् पुण्यगंधाःस्रजस्तत्रनित्यपुष्पफलद्रुमाः
५५ उष्णेशीतानितोयानिशीतेचोष्णानिसंतिवै पुष्पितायान्महाशाखान्प्रवालांकुरधारिणः ५६ लतावितानसंच्छन्नान्सरित्सुचसरःसुच
मनोहरांश्चविविधान्ददर्शसततदाप्रभुः ५७ द्रुमान्बहुविधांस्तत्रमृगेंद्रोददृशेद्भुतम् गंधवंतिचपुष्पाणिरसवंतिफलानिच ५८ नातिशीता
नितोयानितत्रतत्रसरांसिच अपश्यत्सर्वतीर्थानिसभायांशतशोविभुः ५९ नलिनैःपुंडरीकैश्चशतपत्रैःसुगंधिभिः रक्तैःकुवलयैर्नीलैःकुमुदैः
संयुतानिच ६० सकांतैर्धार्त्तराष्ट्रैश्चराजहंसैःसुरप्रियैः कदंबैश्चक्रवाकैश्चसारसैःकुररैरपि ६१ विमलस्फटिकाभानिपांडुराच्छदलानिच
कलहंसोपगीतानिसारिकाभिरुतानिच ६२ गंधवत्यःशुभास्तत्रपुष्पमंजरिधारिणीः दृष्टवान्पादपाग्रेषुनानापुष्पधरालताः ६३ केतक्यशो
कसरलाःपुन्नागतिलकार्जुनाः चूतानीपानागपुष्पाःकदंबबकुलाधवाः ६४ प्रियंगुपाटलीवृक्षाःशाल्मल्यःसहरिद्रवः शालास्तालाश्चःप्रि
यालाश्चनंपकाश्चमनोरमाः ६५ तथाचान्येव्यराजंतसभायांपुष्पितादुमाः वैदुमाश्चद्रुमानीलादावाग्निज्वलितप्रभाः ६६

६३

५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्कंधवंतः सुशाखाश्चबहुतालसमुच्छ्रयाः अंजनाशोकवर्णाभाभांतिरंजलकाद्रुमाः ६७ वरणावत्सनाभाश्चपनसाश्चंदनैःसह नीलाःसु
मनसश्चैवपीतास्ताश्वत्थतिंदुकाः ६८ प्राचीनामलकारोध्रामल्लिकाभद्रदारवः आम्रातकास्तथाजंबूलकुचाःशैलवालुकाः ६९ सर्जार्जुनाः
कुंडरवाःपतंगाकुटजास्तथा रक्ताःकुरबकाश्चैवनीपाश्चागरुभिःसह ७० कदंबाश्चैवभव्याश्चदाडिमीबीजपूरकाः कालीयकादुकूलाश्च
हिंगवस्तैलपर्णिकाः ७१ खर्जूरानालिकेराश्चपूगवृक्षाहरीतकाः मधूकाःसप्तपर्णाश्चबिल्वाःपारावतास्तथा ७२ पनसाश्चतमालाश्चना
नागुल्मलतावृताः लताश्चविविधाकाराःपत्रपुष्पफलोपगाः ७३ एतेचान्येचबहवस्तत्रकाननजाद्रुमाः नानापुष्पफलोपेताव्यराजंतसमंत
ततः ७४ चकोराःशतपत्राश्चमत्तकोकिलसारिकाः पुष्पितान्फलितायांश्चसंपतंतिमहाद्रुमान् ७५ रक्तपीतारुणास्तत्रपादपाग्रगताद्विजाः
परस्परमवेक्षंतप्रहृष्टाजीवजीवकाः ७६ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिएकचत्वारिंशोऽध्यायः ४१ वैशंपायनउवा
च तस्यांसभायांदैत्येंद्रोहिरण्यकशिपुःप्रभुः आसीनआसनेदिव्येनल्वमात्रेप्रमाणतः १ दिवाकरनिभेरम्येदिव्यास्तरणसंभृते रराजसुवि
रराजन्नुज्वलत्कांचनकुंडलः २ तस्यदैत्यपतेर्मंदंविरजस्कःसमंततः दिव्यगंधवहस्तत्रमारुतःसुसुखोववौ ३ तत्रदेवाःसगंधर्वागणेरप्सर
सांवृताः दिव्यतालेनदिव्यानिजगुर्गीतानिगायनाः ४ विश्वाचीसहजन्याचप्रम्लोचेत्यभिविश्रुता दिव्याचसौरभेयाचसमीचीपुंजिकस्थ
ला ५ मिश्रकेशीचरंभाचचित्रसेनाशुचिस्मिता चारुनेत्राघृताचीचमेनकाचोर्वशीतथा ६ एताःसहस्रशश्चान्यानृत्यगीतविशारदाः उ
पतिष्ठंतिराजानंहिरण्यकशिपुंतदा ७ हिरण्यकशिपुस्तत्रविचित्राभरणांबरः स्त्रीसहस्रैःपरिवृतस्तस्थौज्वलितकुंडलः ८ तत्रासीनंम
हाबाहुंहिरण्यकशिपुंप्रभुम् उपासंतिदितेःपुत्राःसर्वेलब्धवराःसुरा ९ बलिर्वैरोचनस्तत्रनरकःपृथिवीजयः प्रह्लादोविप्रचित्तिश्चगवि
ष्ठश्चमहासुरः १० अहंताक्रोधहंताचसुमनाःसुमारेःस्वरः घटोदरोमहापार्श्वःक्रथनःपिठरस्तथा ११ विश्वरूपश्चरूपश्चविरूपश्चमहाद्यु
तिः दशग्रीवश्चवालीचमेघवासामहारवः १२ कटाभोविकटाभश्चसंह्रादश्चेंद्रतापनः दैत्यदानवसंघाश्चसर्वेज्वलितकुंडलाः १३ स्रग्विणो
वाग्मिनःसर्वेसर्वेसुचरितव्रताः सर्वेलब्धवराःशूराःसर्वेविगतमृत्यवः १४ एतेचान्येचबहवोहिरण्यकशिपुंप्रभुम् उपासंतेमहात्मानःसर्वे
दिव्यपरिच्छदाः १५ विमानैर्विविधैरम्यैर्भ्राजमानैरिवार्चिभिः स्रग्विणोभूषणधराःयांतिचायांतिहेलया १६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१७ १८ १९ २० ददर्शेत्यत्र दृदृशेइतिस्वरभक्त्याक्षरपूरणं ज्ञेयं दंतगवाक्षाः जरोखाइतिभाषायां प्रसिद्धाः २१ इतिश्रीमहाभारते हरिवंशे भविष्यपर्वणि-
टीकायां द्विचत्वारिंशोऽध्यायः ४२ ततोदृष्ट्वा १ २ १३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ यथामहादर्शे

विचित्राभरणोपेताविचित्रावसनास्तथा विचित्रशस्त्रकवचाविचित्रध्वजवाहनाः १७ महेंद्रचापसंकाशैर्विचित्रै रंगदैर्वरैः भूषितांगादितेः
पुत्रा स्तमुपासंतिनित्यशः १८ तस्यांसभायांदिव्यायामसुराःपर्वतोपमाः हिरण्यमुकुटाःसर्वे दिवाकरसमप्रभाः १९ कनकमणिविचित्रवेदि
कायामुपहितरत्नसहस्रवीथिकायाम् सददर्शमृगाधिपःसभायांसुरुचिरदंतगवाक्षसंवृतायाम् २० कनकविमलकहारभूषितांगंदितित
नयंसमृगाधिपोददर्श दिनसकरकरप्रभंज्वलंतमसुरसहस्रगणैर्निषेव्यमानम् २१ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणि
नारसिंहेद्विचत्वारिंशोऽध्यायः ४२ वैशंपायनउवाच ततोदृष्ट्वामहाबाहुंकालचक्रमिवागतम् नरसिंहवपुश्छन्नंभस्मच्छन्न
मिवानलम् १ विकुंचितसटंतस्यनारसिंहस्यभारत रूपोदार्यंबभौतत्रसहस्रशशिसन्निभम् २ अहोरूपमिदंचित्रंशरत्कुंदेंदुसन्नि
भम् अब्रुवन्दानवाःसर्वेहिरण्यकशिपुश्चसः ३ एवंहिब्रुवतांतेषांनिर्दग्धानांमहात्मनाम् नारसिंहेनचक्षुर्भ्यांचोदितःकालधर्मणा
४ हिरण्यकशिपोःपुत्रःप्रन्हादोनामवीर्यवान् दिव्येनचक्षुषासिंहमपश्यद्देवमागतम् ५ तंदृष्ट्वारुक्मशैलाभमपूर्वांतनुमास्थितम् वि
स्मितादानवाःसर्वेहिरण्यकशिपुश्चसः ६ प्रन्हादउवाच महाराजमहाबाहोदैत्यानामादिसंभव नश्रुतंनैवदृष्टंचनारसिंहमिदंवपुः
७ अव्यक्तप्रभवंदिव्यंकिमिदंरूपमद्भुतम् दैत्यांतकरणंघोरंशंसतीवमनोमिनः ८ अस्यदेवाःशरीरस्थाःसागराःसरितस्तथा हिमवान्-
पारियात्रश्चयेचान्येकुलपर्वताः ९ चंद्रमाःसहनक्षत्रैरादित्याश्चाश्विनौतथा धनदोवरुणश्चैवयमःशक्रःशचीपतिः १० मरुतोदेवगंधर्वाः
मुनयश्चतपोधनाः नागायक्षाःपिशाचाश्चराक्षसाभीमविक्रमाः ११ ब्रह्मादेवःपशुपतिर्ललाटस्थाविभांतिवै स्थावराणिचभूतानिजंगमा
नितथैवच १२ भवांश्चसहितोऽस्माभिःसर्वैर्दैत्यगणैर्वृतः विमानशतसंकीर्णातथाभ्यंतरजासभा १३ सर्वंत्रिभुवनंराजन्लोकधर्माश्च
शाश्वताः दृश्यतेनारसिंहेस्मिन्यथेंदौविमलंजगत् १४ प्रजापतिश्चात्रमनुर्महात्माग्रहाश्चयोगाश्चमहीनभश्च उत्पातकालश्चधृतिःस्मृ-
तिश्चरजश्चसत्वंचतपोदमश्च १५ सनत्कुमारश्चमहानुभावोविश्वेचदेवाप्सरसश्चसर्वाः क्रोधश्चकामश्चतथैवहर्षोदर्पश्चमोहःपितरश्च
सर्वे १६ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिनारसिंहेत्रिचत्वारिंशोऽध्यायः ४३

कल्पेचंद्रमंडलेचक्षुर्धारयतांकृत्स्नंजगदृष्टि ६४
गोचरीभवत्यस्येतियोगिप्रसिद्धोयंदृष्टांतः १४ १५ १६ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणित्रिचत्वारिंशोऽध्यायः ४३ ७ ६ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१

वैशंपायनउवाच प्रल्हादस्यचतच्छ्रुत्वाहिरण्यकशिपुर्वचः उवाचदानवान्सर्वान्सगणांश्चगणाधिपः १ मृगेंद्रोगृह्यतांशीघ्रमपूर्वांत
नुमास्थितः यदिवासंशयःकश्चित्वध्यतांवनगोचरः २ तच्छ्रुत्वादानवाःसर्वेमृगेंद्रंभीमविक्रमम् परिक्षिपंतोमुदितास्त्रासयामासुरोजसा
३ सिंहनादंनदित्वातुपुनःसिंहोमहाबलः बभंजतांसभांरम्यांव्यादितास्यइवांतकः ४ सभायांभज्यमानायांहिरण्यकशिपुःस्वयम् चिक्षेपा
स्त्राणिसिंहस्यरोषव्याकुललोचनः ५ सर्वास्त्राणामथश्रेष्ठंदंडमस्त्रंसुभैरवम् कालचक्रंतथात्युग्रंविष्णुचक्रंतथैवच ६ धर्मचक्रंमहच्चक्र
मजितंनामनामतः चक्रमैंद्रंतथाघोरमृषिचक्रंतथैवच ७ पैतामहंतथाचक्रंत्रैलोक्यमहितस्वनम् विचित्रामशनींचैवशुष्कार्द्रंचाशनिद्व
यम् ८ रौद्रंतदुग्रंशूलंचकंकालंमुशलंतथा अस्त्रंब्रह्मशिरश्चैवब्राह्ममस्त्रंतथैवच ९ ऐषीकमस्त्रमैंद्रंचआग्नेयंशैशिरंतथा वायव्य-
मथनंनामकापालमथकिंकरम् १० तथाचाप्रतिमांशक्तिंक्रौंचमस्त्रंतथैवच अस्त्रंहयशिरश्चैवसौम्यमस्त्रंतथैवच ११ पैशाचमस्त्रममि
तसत्यमस्त्रंतथाद्भुतम् मोहनंशोषणंचैवसंतापनविलापनम् १२ जृंभणंप्रापणंचैवत्वाष्ट्रंचैवसुदारुणम् कालमुद्गरमक्षोभ्यंक्षोभणंतुम
हाबलम् १३ संवर्त्तनंमोहनंचतथामायाधरंपरम् गांधर्वमस्त्रंदयितमसिरत्नंचनंदकम् १४ प्रस्वापनंप्रमथनंवारुणंचास्त्रमुत्तमम् अ
स्त्रंपाशुपतंचैवयस्याप्रतिहतागतिः १५ एतान्यस्त्राणिसर्वाणिहिरण्यकशिपुस्तदा चिक्षेपनरसिंहस्यदीप्तस्याग्नेर्यथाहुतिः १६ अस्त्रैःप्र
ज्वलितैःसिंहमावृणोदसुराधिपः विवस्वान्घर्मसमयेहिमवंतमिवांशुभिः १७ सह्यमर्षानिलोद्भूतोदैत्यानांसैन्यसागरः क्षणेनप्लावयन्सि
हंमैनाकमिवसागरः १८ प्रासैःपाशैस्तथाशूलैर्गदाभिर्मुशलैस्तथा वज्रैरशनिकल्पैश्चशिलाभिश्चमहाद्रुमैः १९ मुद्गरैःकूटपाशैश्चशूलो
लूखलपर्वतैः शतघ्नीभिश्चदीप्ताभिर्दंडैरपिसुदारुणैः २० परिवार्यसमंतात्तुनिघ्नन्तस्त्रेहरिंतदा स्वल्पमप्यस्यनक्षुण्णमूर्जितस्यमहात्मनः
२१ तेदानवाःपाशगृहीतहस्तामहेंद्रवज्राशनितुल्यवेगाः समंततोभ्युद्यतबाहुशस्त्राःस्थितास्त्रिशीर्षाइवपन्नगेंद्राः २२ सुवर्णमालाकुल
भूषितांगानानांगदाभोगपिनद्धगात्राः मुक्तावलीदामविभूषितांगाहंसाइवाभांतिविशालपक्षाः २३ तेषांतुवायुप्रतिमौजसांवैकेयूरमालाव
लयोत्कटानि तान्युत्तमांगान्यभितोविभांतिप्रभातसूर्यांशुसमप्रभाणि २४ तैःक्षिप्यद्भिर्ज्वलितानलोपमैःमहास्त्रपूगैःसससमावृतोबभौ
गिरिर्यथासंततवर्षिभिर्घनैःकृतांधकारोद्भुतकंदरद्रुमः २५ तैर्हन्यमानोपिमहास्त्रजालैःसर्वैस्तदादैत्यगणैःसमेतैः नाकंपताजौभगवान्प्रताप
वान्स्थितःप्रकृत्याहिमवानिवाचलः २६

२२ २३ २४ २५ २६ ७ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 २७ २८ इतिश्रीमहाभारते हरिवंशे भविष्यपर्वणि टीकायां चतुश्चत्वारिंशोऽध्यायः ४४ ईहामृगमुखाः वानरास्याः १ २ ३ ४ ५ ६

संतापितास्तेन नरसिंहरूपिणा दितेः सुताः पावकदीप्ततेजसः भयाद्विचेलुः पवनोद्धुता यथा महोर्मयः सागरवारिसंभवाः २७ शतैर्धनुर्भिः सुमहातिवेगा युगांतकालप्रतिमान् शरोघान् एकायनस्थाः मुमुचुर्नृसिंहे महासुराः क्रोधविदीपितांगाः २८ इतिश्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि नारसिंहे चतुश्चत्वारिंशोऽध्यायः ४४ वैशंपायन उवाच खराः खरमुखाश्चैव मकराशीविषाननाः ईहामृगमुखाश्चान्ये वराहसदृशाननाः १ बालसूर्यमुखाश्चैव धूमकेतुमुखास्तथा चंद्रार्धचंद्रवक्त्राश्च प्रदीप्ताग्निमुखास्तथा २ हंसकुक्कुटवक्त्राश्च व्यादितास्या भयावहाः पंचास्या लेलिहानाश्च काकगृध्रमुखास्तथा ३ विद्युज्जिह्वास्त्रिशीर्षाश्च तथोल्कासन्निभाननाः महाग्राहनिभाश्चान्ये दानवा बलदर्पिताः ४ कैलासवपुषस्तस्य शरीरे शरवृष्टयः अवध्यस्य मृगेंद्रस्य न व्यथां चक्रुराहवे ५ एवं भूयोऽपरान् घोरान् असृजन् दानवाः शरान् मृगेंद्रस्योरसि क्रुद्धा निश्वसंत इवोरगाः ६ ते दानवशरा घोरा मृगेंद्राय समीरिताः विलयं जग्मुराकाशे खद्योता इव पर्वते ७ ततश्चक्राणि दिव्यानि दैत्याः क्रोधसमन्विताः मृगेंद्रायाक्षिपंत्याशु प्रज्वलंतीव सर्वशः ८ तैरासीद्गगनं चक्रैः संपतद्भिः समावृतम् युगांते संप्रकाशद्भिश्चंद्रसूर्यग्रहैरिव ९ तानि चक्राणि वदनं प्रविशंति विभांति वै मेघोदरदरीं घोरां चंद्रसूर्यग्रहा इव १० तानि चक्राणि सर्वाणि मृगेंद्रेण महात्मना निर्गीर्णानि प्रदीप्तानि पावकार्चिःसमानि वै ११ हिरण्यकशिपुर्दैत्यो भूयः प्रासृजदूर्जिताम् शक्तिं प्रज्वलितां घोरां हुताशनसमप्रभाम् १२ तामापतंतीं संप्रेक्ष्य मृगेंद्रः शक्तिमुत्तमाम् हुंकारेणैव रौद्रेण बभंज भगवांस्तदा १३ रराज भग्ना सा शक्तिर्मृगेंद्रेण महीतले सविस्फुलिंगा ज्वलिता महोल्केव नभश्च्युता १४ नाराचपंक्तिः सिंहस्य सृष्टा रेजे विदूरतः नीलोत्पलपलाशानां मालेवोज्वलदर्शना १५ गर्जित्वा तु यथाकामं विक्रम्य च यथासुखम् तत्सैन्यमुत्सारितवान् तृणाग्राणीव मारुतः १६ ततोऽश्मवर्षं दैत्येंद्रा व्यसृजंत नभोगताः नगमात्रैः शिलाखंडैर्गिरिकूटैर्महाप्रभैः १७ तदश्मवर्षं सिंहस्य गात्रे निपतितं महत् दिशो दश प्रकीर्णं हि खद्योतप्रकरो यथा १८ तदश्मौघैर्दितिसुतास्तदा सिंहमरिंदम प्रच्छादयन्यथा मेघा धाराभिरिव पर्वतम् १९ न च तं चालयामासुर्दैत्यौघा देवमास्थितम् भीमवेगा बलश्रेष्ठं समुद्रा इव पर्वतम् २० ततोऽश्मवर्षे निहते जलवर्षमनंतरम् धाराभिरक्षमात्राभिः प्रादुरासीत्समंततः २१ नभसः प्रच्युता धारास्तिग्मवेगाः सहस्रशः आवृण्वन् सर्वतो व्योम दिशश्चोपदिशस्तथा २२ धाराणां सन्निपातेन वायोर्विस्फूर्जितेन च वर्द्धता चैव वर्षेण न प्राज्ञायत किंचन २३

७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ न ततं अश्मेत्यादि १९ २० २१ २२ २३ ६५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नस्पृशंतिमध्येएवस्पृष्यंतीत्यर्थः २४ मृगेंद्रस्योपरिष्टान्नअन्नत्तु अस्तीत्यर्थः २५ २६ २७ २८ २९ ३० ३१ ३२ इतिश्रीमहाभार
तेहरिवंशेभविष्यपर्वणिटीकायांपंचचत्वारिंशोऽध्यायः ४५ १ २ ३ ४ ५ ६ ७ अथोगतःयथोक्तप्रहिन्हाससंबंधंविना

धारादिविचसंसक्त्मवसुधायांचसर्वशः नस्पृशंतिस्मतंतत्रनिपतंत्योनिशंभुवि २४ बाह्यतोवद्दषेववर्षनोपरिष्टाच्चुतोयदः मृगेंद्रप्रति
रूपस्यास्थितस्ययुधिमायया २५ हतेश्मवर्षेतुमलेजलवर्षेचशोषिते ससृजुर्दानवामायामग्निंवायुंचसर्वशः २६ नभसःप्रच्युतश्चैव
तिग्मवेगःसमंततः ज्वालामालीमहारौद्रोदीप्ततेजाःसमंततः २७ ससृष्टःपावकस्तेनदैत्येंद्रेणमहात्मना नशशाकमहातेजादग्धुंमप्र
तिमौजसम् २८ तमिंद्रस्तोयदैःसार्द्धंसहस्राक्षोमितद्युतिः महतातोयवर्षेणशमयामासपावकम् २९ तस्यांप्रतिहतायांतुमायायांयु
धिदानवाः ससृजुर्घोरसंकाशंतमस्तीव्रंसमंततः ३० तमसासंवृतेलोकेदैत्येष्वात्तायुधेषुवै स्वतेजसापरिवृतोदिवाकरइवाबभौ ३१
त्रिशिखांभृकुटींचास्यददृशुर्दानवारणे ललाटस्थांत्रिकूटस्थांगंगांत्रिपथगामिव ३२ इतिश्रीमहाभारतेखिलेषुहरिवंशेनारसिंहे
भविष्यपर्वणिपंचचत्वारिंशोऽध्यायः ४५ वैशंपायनउवाच ततःसर्वासुमायासुहतासुदितिनंदनाः हिरण्यकशिपुंसर्वेवि
षण्णाःशरणंगताः १ ततःप्रज्वलितःक्रोधात्प्रदहन्निवतेजसा हिरण्यकशिपुर्दैत्यश्चालयामासमेदिनीम् २ ततःप्रक्षुभिताःसर्वे
सागराःसलिलाकराः चलितागिरयःसर्वेसकाननवनद्रुमाः ३ तस्मिन्क्रुद्धेतुदैत्येंद्रेतमोभूतमभूज्जगत् तमसासमभूच्छन्नंनप्रज्ञा
यतकिंचन ४ आवहःप्रवहश्चैवविवहश्चसमंततः परावहःसंवहश्चैवउद्वहश्चमहाबलः ५ तथापरिवहःश्रीमान्मारुताभयशासिनः
इत्येतेक्षुभिताःसप्तमारुतागगनेचराः ६ येग्रहाःसर्वलोकस्यक्षयेप्रादुर्भवंतिवै तेग्रहागगनेहृष्टाविचरंतियथासुखम् ७ अयोग
तश्चतारास्तुसर्वेपक्षेषुसंगताः सग्रहंसहनक्षत्रंप्रजज्वालनभोनृप ८ विवर्णलंचभगवान्गतोदिविदिवाकरः कृष्णःकबंधश्च
महान्लक्ष्यतेचानभस्तले ९ अमुंचचासितांसूर्योधूमवर्त्तिंभयावहाम् गगनस्थश्चभगवानभीक्ष्णंपरितप्यते १० सप्तधूमनि
भाघोराःसूर्यादिविसमुत्थिताः सोमस्यगगनस्थस्यग्रहास्तिष्ठंतिशृंगगाः ११ वामेचदक्षिणेचैवस्थितौशुक्रबृहस्पती शनैश्चरोलो
हितांगोलोहितार्कसमद्युतिः १२ समंसमभिरोहंतिदुर्गाणिगगनेचराः शृंगाणिकनकेयोरायुगांतावर्तकाग्रहाः १३ चंद्रमासहनक्ष
त्रैर्ग्रहैःसप्तभिरावृतः चराचरविनाशार्थंरोहिणीनाभ्यनंदत १४

तीव्रवृध्यातीवन्हासेनचनियतगतिरप्यनियतंजगाम ८ विवर्णलंनिःप्र
भत्वंकबंधोराहुरदृश्योपिदृश्यत्वंगतइत्यर्थः ९ १० सप्तग्रहाःसोमस्यशृंगगाइतियोजना ११ १२ कनकेनिर्मितानिशृंगाणिमेरोरित्यर्थात् १३ १४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१५ १६ १७ १८ १९ २० २१ वानस्पत्याः चैत्यदेवताः २२ २३ अपराह्णगतेपिसूर्ये छायानपरिवर्त्ततेनिःप्रभत्वात्सूर्यस्येत्यर्थः

गृहीतोराहुणाचंद्रउल्काभिरभिहन्यते उल्काःप्रज्वलिताश्चंद्रेप्रचेलुर्घोरदर्शनाः १५ देवानामपियोदेवःसोप्यवर्षतशोणितम् अपत
द्गगनादुल्काविद्युद्रूपाःसनिस्वनाः १६ अकालेपादपाःसर्वेपुष्यंतिचफलंतिच लताश्चसफलाःसर्वायाःप्राहुर्दैत्यनाशनम् १७ फ
लेफलान्यजायंतपुष्पेपुष्पंतथैवच उन्मीलंतिनिमीलंतिहसंतिचरुदंतिच १८ विक्रोशंतिचगंभीरंधूमायंतिज्वलंतिच प्रतिमाःस
र्वदेवानांकथयंतियुगक्षयम् १९ आरण्यैःसहसंसृष्टाग्राम्याश्चमृगपक्षिणः चुक्रुशुर्भैरवंतत्रमृगेंद्रेसमुपस्थिते २० नद्यश्चप्र-
तिलोमाहिवहंतिकलुषोदकाः अपराह्णगतेसूर्येलोकानांक्षयकारके २१ नप्रकाशंतिचादिशोरक्तरेणुसमाकुलाः वानस्पत्यानपूज्यं
तेपूजनार्हाःकथंचन २२ वायुवेगेनहन्यंतेभिद्यंतेप्रणदंतिच तदाचसर्वभूतानांछायाचपरिवर्त्तते २३ अपराह्णगतेसूर्येलोका
नांचयुगक्षये तदाहिरण्यकशिपोर्दैत्यस्योपरिवेश्मनः २४ भांडागारायुधागारेनिविष्टमभवन्मधु तथैवचायुधागारेधूमराजिरदृ
श्यत २५ सचदृष्ट्वामहोत्पातान्हिरण्यकशिपुस्तदा पुरोहितंतदाशुक्रंवचनंचेदमब्रवीत् २६ किमर्थंभगवन्नेतेमहोत्पाताःसमु
त्थिताः श्रोतुमिच्छामितत्त्वेनपरंकौतूहलंहिमे २७ शुक्रउवाच शृणुराजन्नवहितोगदतोमेमहासुर यदर्थमिहदृश्यंतेम-
होत्पातामहाभयाः २८ यस्यैतेसंप्रदृश्यंतेराज्ञोराष्ट्रेमहासुर देशोवाम्रियतेतस्यराजावावधमर्हति २९ अतोबुध्यासमीक्षस्व
यथासर्वंप्रणश्यति हृद्गृहंयहिनचिराद्भविष्यतिनसंशयः ३० एतावदुक्त्वाशक्रस्तुहिरण्यकशिपुंतदा स्वस्त्यस्त्वित्युक्त्वातुदैत्येंद्रंजगामस्वंनि
वेशनम् ३१ तस्मिन्गतेसदैत्येंद्रोध्यातवान्सुचिरंतदा आसांचक्रेसुदीनात्माब्रह्मवाक्यमनुस्मरन् असुराणांविनाशायसुराणांविजया
यच ३२ दृश्यंतेविविधोत्पाताघोराघोरनिदर्शनाः एतेचान्येचबहवोघोराह्युत्पातदर्शनाः ३३ दैत्येंद्राणांविनाशायदृश्यंतेकालनिर्मिताः
ततोहिरण्यकशिपुर्गदामादायसत्वरम् ३४ अभ्यद्रवत्तुवेगेनधरणीमनुकंपयन् हिरण्यकशिपुर्दैत्योयदासंसृष्टवान्महीम् ३५ संद
ष्टोष्ठपुटःक्रोधाद्वाराहइवपूर्वजः मेदिन्यांकंपमानायांदैत्येंद्रेणमहात्मना ३६ महीधरेभ्योनागेंद्रानिपेतुर्भयविक्लवाः विषज्वालाकुलै
र्वक्त्रैर्विमुंचंतोहुताशनम् ३७ चतुःशीर्षाःपंचशीर्षाःसप्तशीर्षाश्चपन्नगाः वासुकिस्तक्षकश्चैवकर्कोटकधनंजयौ ३८ एलापत्रश्च
कालीयोमहापद्मश्चवीर्यवान्सहस्रशीर्षधृङ्नागोहेमतालध्वजःप्रभुः ३९ शेषोनंतोमहीपालोदुष्प्रकंपःप्रकंपितः दीप्तान्यंतर्जलस्थानि
पृथिवीधरणानिच ४०

२४ मधुक्षौद्रपटलम् २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ पृथिवीध
रणानिदिग्गजादीनि ४० ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

नागः शेषः तेजोधराः मणिगतेजोमूर्धनिः ४१ ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४

तदाकूद्वेनदैत्येनकंपितानिसमंततः पातालतलचारिण्योनागतेजोधराःशिवाः ४१ आपश्चसहसाक्रुद्धादुःप्रकंप्यरसाःशुभाः नदीभागी
रथीचैवसरयूकौशिकीतथा ४२ यमुनाचैवकावेरीकृष्णावेणानथैवच स्रुवेणाचमहाभागानदीगोदावरीतथा ४३ चर्मण्वतीचसिंधुश्च
तथानदनदीपतिः मेकलप्रभवश्चैवशोणोमणिनिभोदकः ४४ स्रुभोगानर्मदाचैवतथावेत्रवतीनदी गोमतीगोकुलाकीर्णातथापूर्णास
रस्वती ४५ महीकालनदीचैवतमसापुण्यवाहिनी सिताचेक्षुमतीचैवदेविकाचमहानदी ४६ जंबुद्वीपंरत्नवंतसर्वरत्नोपशोभितं
स्रुवर्णकूटकंचैवसुवर्णाकरमंडितम् ४७ महानदश्चलौहित्यःशैलकाननशोभितः पत्तनंकौशिकारण्यद्रुमंचरजताकरम् ४८ माग
धांश्चमहाग्रामानंगान्वंगांस्तथैवच सुह्मान्मल्लान्विदेहांश्चमालवान्काशिकोसलान् ४९ भुवनंवैनतेयस्यसुवर्णस्यचकंपितम्
कैलासशिखराकारंयत्कृतंविश्वकर्मणा ५० रक्ततोयोभीमवेगोलौहित्योनामसागरः शुभःपांडुरमेघाभःक्षीरोदश्चैवसागरः ५१ उ-
दयश्चैवराजेंद्रउच्छ्रितःशतयोजनम् सुपर्णवेदिकःश्रीमान्नागपक्षिनिषेवितः ५२ भ्राजमानोर्कसदृशैर्जातरूपमयैर्द्रुमैः शालैस्तालै
स्तमालैश्चकर्णिकारैश्चपुष्पितैः ५३ भ्राजमानोर्कसदृशैर्जातरूपमयैःशुभैः ५४ अयोमुखश्चविपुलःपर्वतोधातुमंडितः तमालव
नगंधश्चपर्वतोमलयःशुभः ५५ स्रुराष्ट्राश्चसुबाल्हीकाःशूराभीरास्तथैवच भोजाःपांड्याश्चवंगाश्चकलिंगास्ताम्रलिप्तकाः ५६
तथैवांध्राश्चपुंड्राश्चवामचूडाःसकेरलाः क्षोभितास्तेनदैत्येनसदेवाःसाप्सरोगणाः ५७ अगस्तिभुवनंचैवयदगस्त्यपुराकृतम् सिद्ध
चारणसंघैश्चसेवितसुमनोहरम् ५८ विचित्रनागविहगंसुपुष्पितलताद्रुमम् जातरूपमयैःशृंगैरप्सरोगणसेवितम् ५९ गिरिःपु
ष्पितकश्चैवलक्ष्मीवान्प्रियदर्शनः उत्थितःसागरंभित्त्वावयस्यश्चेंदुसूर्ययोः ६० रराजसुमहाशृंगैर्गगनंविलिखन्निव सूर्यचंद्रांशु
संकाशैःसागरांबुसमावृतः ६१ विद्युत्वान्पर्वतःश्रीमानायतःशतयोजनम् विद्युतांयत्रसंपातानिपात्यंतेनगोत्तमे ६२ ऋषभःपर्व
तश्चैवश्रीमानृषभसंस्थितः कुंजरःपर्वतश्चैवयत्रागस्त्यगृहंमहत् ६३ वैशालरख्यादुर्धर्षासिर्पाणामालयापुरी तथाभोगवतीचा-
पिदैत्येंद्रेणाभिकंपिता ६४ महामेघगिरिश्चैवपारियात्रश्चपर्वतः चक्रवांश्चगिरिश्रेष्ठोवाराहश्चैवपर्वतः ६५ प्राग्ज्योतिषपुरंचैवजा-
तरूपमयंशुभम् यस्मिन्वसतिदुष्टात्मानरकोनामदानवः ६६ मेरुश्चपर्वतश्रेष्ठोमेघगंभीरनिःस्वनः षष्टितत्रसहस्राणिपर्वतानांविशा
पते ६७

५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७ [illegible] [illegible]

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१७ १८ १९ २० २१ २२ चतुर्विभक्तमूर्त्तिः चतुर्द्धाविश्वतैजसप्राज्ञतुरीयेणनृसिंहतापनीयाद्युपनिषत्प्रसिद्धेन प्रकारेणविभक्तस्वरूपः २३ २४
२५ २६ परांचसिद्धिमित्यादयः सप्तश्लोकाःपुनःपुनस्तमेवार्थं प्रकाशयंतीतिप्राचः नृसिंहतापनीयोपनिषदितुविश्वादीनांचतुर्णांप्रत्येकंविश्वचतुष्टयगर्भितत्वेन
षोडशभेदानुदाहृत्यईश्वरग्रासस्तुरीयइतिचतुर्थस्यापिचतुर्थः षोडशोनृसिंहइत्युक्तंतदनुसारेणात्रापि आद्यंश्लोकत्रयं विश्वादिषुत्रिषुंतर्भूतंयद्रूपंपरंतद्देवप्र
काश्यतेततश्चतुर्भिः श्लोकैः सूर्यस्यचत्वारो भेदाः अतोनुज्ञात्रनुज्ञाःविकल्परूपावर्ण्यंतेइत्यपौनरुक्त्यंतत्राखंडैकरसंचिन्मात्रंकृत्स्नंजगत् खंडशर्करामयमिक्षुसै
न्यंसिकतामात्रंइत्येतदृष्टिराकारसत्वमुपेत्यतस्यचिन्मात्रत्वमुक्तंअनुज्ञातृदृष्टौतुस्वाप्नजगद्वदाकारस्यमिथ्यात्वमुपेत्याचिन्मात्रत्वमुक्तंअनुज्ञादृष्टौतुशशशृंगादिवद्विक

देवाऊचुः यत्त्वयाविहितंदेवनारसिंहमिदंवपुः एतदेवार्चयिष्यंतिपरावरविदोजनाः मृगेंद्रत्वंचलोकेषुसर्वसत्वेषुवाविभो १७ गा
यंतित्वांचमुनयोमृगेंद्रइतिनित्यशः त्वत्प्रसादात्स्वकस्थानंप्रतिपन्नास्मवैविभो १८ एवमुक्तोदेवसंघैर्नरसिंहोमहामनाः ब्रह्माचपर
मप्रीतोविष्णोस्तोत्रमुदीरयत् १९ ब्रह्मोवाच भवानक्षरमव्यक्तमचिंत्यंगुह्यमुत्तमम् कूटस्थमकृतंकर्तृसनातनमनामयं २०
सांख्ययोगेचयाबुद्धिस्तत्वार्थपरिनिष्ठिता भगवान्वेदविद्यात्मापुरुषःशाश्वतोध्रुवः २१ त्वंव्यक्तश्चतथाव्यक्तस्त्वत्तःसर्वमिदंजगत् भ
वन्मयावयंदेवभवानात्माभवान्प्रभुः २२ चतुर्विभक्तमूर्तिस्त्वंसर्वलोकविभुर्गुरुः चतुर्युगसहस्रेणसर्वलोकांतकांतकः २३ प्रतिष्ठा
सर्वभूतानामनंतबलपौरुषः कपिलप्रभृतीनांचयतीनांपरमागतिः २४ अनादिमध्यनिधनःसर्वात्मापुरुषोत्तमः स्रष्टात्वंत्वंचसंहर्तात्व-
मेकोलोकभावनः २५ भवान्ब्रह्माचरुद्रश्चमहेंद्रोवरुणोयमः भवान्कर्त्ताविकर्ताचलोकानांप्रभुरव्ययः २६ परांचसिद्धिंपरमंचदेवंप
रंचमंत्रंपरमंमनश्च परंचधर्मंपरमंयशश्चत्वामाहुरग्र्यंपुरुषंपुराणम् २७ परंचसत्यंपरमंहविश्चपरंपवित्रंपरमंचमार्गम् परंचयज्ञं
परमंचहोत्रंत्वामाहुरग्र्यंपुरुषंपुराणम् २८ परंशरीरंपरमंचधामपरंचयोगंपरमांचवाणीम् परंरहस्यंपरमांगतिंचत्वामाहुरग्र्यंपुरुषंपुरा
णम् २९

ल्पयात्रत्वमाकारस्येत्यतितुच्छत्वमुक्तम् अविकल्पेतुतुच्छत्वमानमपिनास्तीतिसप्तानांश्लोकानांयोजनातत्रपरशब्दाःपूर्वपूर्वापेक्षयाअपेक्षिकाःय
थाइंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनः मनसस्तुपराबुद्धिर्बुद्धेरात्मापरात्परः महतःपरमव्यक्तमव्यक्तात्पुरुषःपरः पुरुषान्नपरंकिंचित्साकाष्ठासापरागति-
रिति इंद्रियार्थमनोबुद्धिमहदव्यक्तपुरुषाणांउत्तरंपरत्वम् इंद्रियाणामपिपरत्वंभगवताउक्तं इंद्रियाणिपराण्याहुरिति तद्वदत्रापि परंपराज्ञेयाइंद्रियादीन्येववास
प्तसप्तानामपिश्लोकानांक्रमेणप्रतिपाद्यानिसर्वथापिनात्रपौनरुक्त्यदोषोस्तीतिसर्वज्ञेयम् २७ २८ २९ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

तरुणादित्यसंकाशोमहेंद्रश्चमहागिरिः देवावासःशुभःपुण्योगिरिराजोहिरण्मयः ६८ हेमशृंगोमहाशैलस्तथामेघसखोगिरिःकैलासश्चा
पिदुष्कंपोदानवेंद्रेणकंपितः ६९ यक्षराक्षसगंधर्वैर्नित्यंसेवितकंदरः श्रीमान्मनोहरश्चैवनित्यपुष्पितपादपः ७० हेमपुष्करसंछन्न-
तेनवैखानससरः कंपितमानसंचैवराजहंसैर्निषेवितम् ७१ त्रिशृंगःपर्वतश्चैवकुमारीचसरिद्वरा तुषारचयसंकाशोमंदरश्चैवपर्वतः
७२ उशीरबीजश्चगिरीरुद्रोपस्थस्तथाविराट् प्रजापतेश्चनिलयस्तथापुष्करपर्वतः ७३ देवाभ्रपर्वतश्चैवतथावैवालुकोगिरिः क्रौंचः
सप्तर्षिशैलश्चधूम्रवर्णश्चपर्वतः ७४ एतेचान्येचगिरयोदेशाजनपदास्तथा नद्यश्चसागराश्चैवदानवेंद्रेणकंपिताः ७५ कपिलश्चमही
पुत्रोव्याघ्राक्षश्चैवकंपितः खेचराश्चनिशापुत्राःपातालतलवासिनः ७६ गणास्तथापरेरौद्रामेघनादांकुशायुधाः ऊर्ध्वगोभीमवेगश्च-
सर्वएवाभिकंपिताः ७७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिनारसिंहेषट्चत्वारिंशोऽध्यायः ४६ वैशंपायनउवाच
ततादित्याश्चसाध्याश्चवसवोमरुतस्तथा रुद्रादेवामहात्मानोमरुतश्चमहाबलाः १ आगम्यतेमृगेंद्रस्यसकाशंसूर्यवर्चसः ऊचुःसंत्रस्त
मनसोदेवालोकस्यपादिताः २ जहिदेवदितेःपुत्रदानवंलोकनाशनम् दुर्वृत्तमसदाचारंसहसैवमहासुरं ३ त्वंह्येषामंतकृन्नान्योदैत्या
नांदैत्यनाशन तन्नाशयाहितार्थायलोकानांस्वस्तिवैकुरु ४ त्वगुरुःसर्वलोकानांत्वमिंद्रस्त्वंपितामहः कृतेत्वदन्यच्छरणंनभूतंनभ
विष्यति ५ तच्छ्रुत्वावचनंदेवोदेवानामादिसंभवः ननादसुमहानादमतिगंभीरनिःस्वनम् ६ पातितान्यसुरेंद्राणांमृगेंद्रेणमहात्मना
सिंहनादेनमहताहृदयानिमनांसिच ७ गणःक्रोधवशोनामकालकेयस्तथापरः वेगश्चवैगलेयश्चसिंहिकेयश्चवीर्यवान् ८ संह्रा
दीयोमहानादीमहावेगस्तथापरः कपिलश्चमहीपुत्रोव्याघ्राक्षःक्षितिकंपनः ९ खेचराश्चनिशापुत्राःपातालतलचारिणः गणस्त-
थापरोरौद्रोमेघनादोंकुशायुधः १० ऊर्ध्वगोभीमवेगश्चभीमकर्मार्कलोचनः वज्रीशूलीकरालश्चहिरण्यकशिपुस्ततः ११ जीमूत-
घनसंकाशोजीमूतइववेगवान् जीमूतघनसंनादोजीमूतघनवद्युतिः १२ देवारिर्दितिजोदृप्तोनृसिंहसमुपाद्रवत् समुत्पत्यततस्ती
क्ष्णैर्मृगेंद्रेणमहानखैः १३ तदोंकारसहायेनविदार्यनिहतोयुधि १४ महीचलोकश्चशशीनभश्चग्रहाश्चसूर्यश्चदिशश्चसर्वाः नद्य-
श्चशैलाश्चमहार्णवाश्चगताःप्रकाशंदितिपुत्रनाशात् १५ ततःप्रमुदितादेवाऋषयश्चतपोधनाः तुष्टुवुर्विविधैःस्तोत्रैरादिदेवंसनातनं १६

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ३० ३१ ३२ ३३ ३४ उत्तरंकूलंश्वेतद्वीपं ३५ त्यक्त्वाअदृश्यंकृत्वावपुः तस्याःजातिमांसोराणंवैष्णवंचतुर्भुजादिलक्षणम् ३६ भूतयुक्तेनपंचमहाभू
तघटितेन अष्टचक्रेण अष्टौमहा अष्टावतिग्रहाइत्यादिश्रुतिप्रसिद्धशब्दस्पर्शादियहानिमहानिग्रहरूपैररनिशंचक्रवच्चाल्यमानेनदेहेनसाधनेन अव्यक्तःप्रकृतिरव्यक्त
प्रकृतिरहंकारान्निकृष्टादेवआत्मानृसिंहरूपीखंस्थानंनिर्विशेषचिन्मात्रस्वरूपंतद्विष्णोःपरमंपदमितिश्रुतिप्रसिद्धमगमत् ३७ ३८ इतिश्रीमहाभारतेहरि-

परंपरस्यापिपरंचयत्परंपरंपरस्यापिपरंचदेवम् परंपरस्यापिपरंप्रभुंचत्वामाहुरग्र्यंपुरुषंपुराणम् ३० परंपरस्यापिपरंप्रधानंपरंप
रस्यापिपरंचतत्त्वम् परंपरस्यापिपरंचधातात्वामाहुरग्र्यंपुरुषंपुराणम् ३१ परंपरस्यापिपरंरहस्यंपरंपरस्यापिपरंपरंयत् पर
परस्यापिपरंतपोयत्त्वामाहुरग्र्यंपुरुषंपुराणम् ३२ परंपरस्यापिपरंपरायणंपरंचगुह्यंचपरंचधाम परंचयोगंपरमंप्रभुंत्वांत्वामाहु
रग्र्यंपुरुषंपुराणम् ३३ वैशंपायनउवाच एवमुक्त्वासभगवान्सर्वलोकपितामहः स्तुत्वानारायणंदेवंब्रह्मलोकंगतःप्रभुः
३४ ततोनदत्सुतूर्येषुनृत्यंतीष्वप्सरःसुच क्षीरोदस्योत्तरंकूलंजगामप्रभुरीश्वरः ३५ नारसिंहीतनुंत्यक्त्वास्थापयित्वाचतद्वपुः पौरा
णंरूपमास्थायययौसगरुडध्वजः ३६ अष्टचक्रेणयानेनभूतियुक्तेनशोभिना अव्यक्तःप्रकृतिर्देवःस्वस्थानमगमत्प्रभुः ३७ एवंम-
हात्मनातेननृसिंहवपुषातदा देवेननिहतःपूर्वंहिरण्यकशिपुस्त्वसः ३८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिनारसिंह
प्रादुर्भावेहिरण्यकशिपुवधकथननामसप्तचत्वारिंशोऽध्यायः ४७ वैशंपायनउवाच नृसिंहएषःकथितोभूयोयंवामनोपरः
यत्रवामनमास्थायरूपंरूपविदांवरः १ बलेर्बलवतोयज्ञेबलिनाविष्णुनापुरा विक्रमैस्त्रिभिराक्रम्यत्रैलोक्यमखिलंहृतम् २ समुद्र-
वसनाचोर्वीनानानगविभूषिता हृत्वादत्तासुरेंद्रायशक्रायप्रभविष्णुना ३ जनमेजयउवाच अत्रमेसंशयोब्रह्मन्मनकौतूह
लंमहत् कथंनारायणोदेवोवामनत्वमुपागतः ४ यःपुराणेपुराणात्माभूत्वानारायणःप्रभुः पद्मनाभोमहाबाहुर्लोकानांप्रकृतिर्ध्रुवम्
५ अनादिमध्यनिधनस्त्रैलोक्यस्यादिःसनातनः देवदेवःसुराध्यक्षःकृष्णोलोकनमस्कृतः ६ हव्यकव्यवहःश्रीमान्हव्यकव्यभुगव्ययः
अदित्यादेवमातुश्चकथंगर्भेभवत्प्रभुः स्रष्टायोवासव स्यापिसकथंवासवानुजः ७ प्रसूतोदेवदेवेशोविष्णुत्वंप्राप्तवान्कथम् एतदत्र
त्वमेवेविप्रप्रादुर्भावंमहात्मनः ८

वंशेभविष्यपर्वणिटीकायांसप्तचत्वारिंशत्तमोऽध्यायः ४७ ६७ ६२ नृसिंहइति १ २ ३ अत्रमइति
नारायणइतिप्राख्यारख्यातरीत्या कृत्स्नब्रह्मांडलयस्थानभूतब्रह्मांडदेवासुरविभागमुपजीव्यदेवानांपक्षपातेनासुरान्विध्वंसयतीत्युक्तंसर्वात्मनःस्वानयतेश्चवतेषु- ६८
विषमत्वप्रयोगादितिशंकार्थः ४ ५ ६ ७ विष्णुत्वंवामनस्यापिकथंत्रैलोक्यव्यापकत्वंचेतिभावः ८ ६९ ६९ ६२ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उत्तरमाह शृण्विति दिव्यांलौकिकदृष्टांतागम्यां अथापिऋषिपुंगवैर्मंत्रदृष्टृप्रवरैरर्चितांकविभिर्ब्रह्मनिष्ठैः स्वानुभवप्रामाण्येनप्रकर्षेणोक्तांमंत्रसूचितांब्राह्मणेमंत्रविवर-
णरूपेपिईरितां अयंभावः इंद्रोमायाभिः पुरुरूपईयतेइत्यादिश्रुतौएकस्यांमायायामसमवेतंबहुवचनंपाशन्यायेन तदवयवेषुसत्त्वरजस्तमःसुपर्यवस्यतितत्रसत्त्वप्र
धानानिरूपाणिदेवतादीनिरजःप्रधानानियक्षरक्षःप्रभृतीनितमःप्रधानानिभूतप्रेतादीनित्रिविधानींद्रस्यरूपाणितद्देवतादीनिरजःप्रधानानियक्षरक्षःप्रभृतीनि-
तमःप्रधानानिभूतप्रेतादीनित्रिविधासत्त्वकार्यंकदाचिदुपकरोतिकदाचिदुभयस्याप्यभिभवंकरोतिउभयेनाप्यभिभवंकरोतिउभयेनाप्यभिभूयतेचतदेवंमूलगु
णानांयथाविरोधएवंतत्प्रधानानांदेवादीनामपितत्रयथासलिलस्यमाधुर्यंइक्षुद्राक्षादौबीजगुणादतिशयेनाविर्भवतिनिंबूमारीचरसादौतुनिरवशेषेणावृतंभ
वतिऔपाधिकंचाम्लकटुत्वादिकंअतीवप्रकाशतेएवमिंद्रस्यस्वरूपभूतंज्ञानंसात्त्विकेषुदेवतादिष्वाविर्भवतिइतरेषुतुतस्यतिरोभावऔषधकानांचकामक्रो-

वैशंपायनउवाच शृणुराजन् कथांदिव्यामर्चितामृषिपुंगवैः पुराणैःकविभिःप्रोक्तांब्रह्मोक्तांब्राह्मणेरिताम् ९ मारीचस्यसुरेभ्य
स्यकश्यपस्यप्रजापतेः अदितिर्दितिर्द्वेभार्येभगिन्यौजनमेजय १० अदित्यांजज्ञिरेदेवाःकश्यपस्यमहात्मनाः धातार्यमाचमित्रश्च
वरुणोंशोभगस्तथा ११ इंद्रोविवस्वान्पूषाचपर्जन्योदशमस्तथा तथैकादशमस्त्वष्टाद्वादशोविष्णुरुच्यते १२ दित्यांजातोहिबलवा
न्हिरण्यकशिपुःप्रभुः तस्यानुजश्चदैत्येंद्रोहिरण्याक्षःप्रतापवान् १३ हिरण्यकशिपोःपुत्राःपंचघोरपराक्रमाः प्रह्लादश्चानुह्लादश्च
जंभःसंह्लादएवच १४ विरोचनश्चप्राह्लादिस्तस्यपुत्रोबलिःस्मृतः पुत्रपौत्रंचबलवत्तेषामक्षयमव्ययम् १५ तेजस्विनासुरारीणां
दैत्येंद्राणांमनस्विनाम् गणाःसुबहुशोराजन्देशेदेशेसहस्रशः १६ तंदृष्ट्वानारसिंहेनहिरण्यकशिपुंहतम् दैत्यादेववधार्थायबलि
मिंद्रंप्रचक्रिरे १७ दृष्ट्वाधर्मपरंनित्यंसत्यवाक्यजितेंद्रियम् शौर्याध्ययनसंपन्नंसर्वज्ञानविशारदम् १८ परावरगृहीतार्थंतत्त्वदर्शि
नमव्ययम् तेजस्विनंसुररिपुंहिरण्यकशिपुंयथा १९ अभिषेकेणदिव्येनबलिंवैरोचनिंतथा दैत्याधिपत्येदितिजास्तदासर्वेभ्यपूजयन्
२०

धादीनामतिशयेनाविर्भावोभवतीतिइंद्रस्यापिसविशेषरूपवतःस्वरूपप्रकाशहेतुत्वाद्देवेषुपक्षपातःतत्तिरोधानहेतुत्वादितरेषुद्रोहश्चयुज्यतेसंतिहींद्रस्यपंचरूपा
णिभूबीजांकुरतरुफलोपमानिशब्दब्रह्मबलसूत्रविराड्विष्णुसंज्ञानितत्रशब्दंनिर्विशेषंविष्णुस्तुसर्वविशेषन्युक्तोराजवच्छिष्टेष्वनुग्रहंदुष्टेषुद्रोहंचकरोतीतियुज्यत-
एवस्वांगमपित्याज्योदुष्टःप्रियोप्यासीद्दुष्टोंगुष्ठइवाहिनेतिन्यायेनबाधितुंशक्यमेवमायाविलास्यवामनत्वंव्यापकत्वंचयुज्यतइतिसर्वमनवद्यम् ९ १०
११ १२ पुराणांतरेहिरण्याक्षस्यज्येष्ठकथनंकल्पभेदाभिप्रायम् १३ १४ १५ १६ १७ १८ १९ २० ५ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

२१ २२ २३ २४ २५ २६ २७ २८ २९ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायां अष्टचत्वारिंशोऽध्यायः ४८

अभिषिक्तस्तदादैत्यैर्बलिर्बलवतांवरः ब्रह्मणाचैवतुष्टेनहिरण्यकशिपोःपदे २१ अभिषिक्तोसुरगणैर्बलिर्वैरोचनिस्तदा कांच
नैःकलशैःस्फीतैःसर्वतीर्थांबुसंभृतैः २२ जयशब्दंततश्चक्रुरभिषिक्तस्यदानवाः बलेरतुलवीर्यस्यसिंहासनगतस्यवै २३ छत्रेंद्र
दानवाःसर्वेबलिंबलवतांवरम् ततोविज्ञापयामासुःशिरोभिःपतिताःक्षितौ २४ दैत्याऊचुः विदितंतवदैत्येंद्रहिरण्यकशि
पोर्यथा त्रैलोक्यमासीदखिलंजगत्स्थावरजंगमम् २५ पितामहंतुहत्वातेसुरेश्वरनिषूदन हृतंतदनत्रैलोक्यंशक्रश्चैवाभिषेचि
तः २६ तत्पितामहराज्यंत्वंमत्वाहर्तुमिहार्हसि अस्माभिःसहितोनाथत्रैलोक्यमिदमव्ययम् २७ प्रत्यानयस्वभद्रंतेराज्यंपैतामहंप्र-
भो २८ असुरगणसहस्रसंवृतस्त्वंजयदिविदेवगणान्महानुभावान् अमितबलपराक्रमोसिराजन्नतिशयसेस्वगुणैःपितामहंत्व
म् २९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिवामनबलेरभिषेकोनाम अष्टचत्वारिंशोऽध्यायः ४८ वैशंपायनउवाच
निशम्यतेषांवचनंमहामतिर्बलिस्तदाभीतमनामहाबलः आज्ञापयामाससदैत्यकोटिंत्रैलोक्यमद्यैवजयामसर्वम् १ तस्यतद्वचनंश्रुत्वाब-
लेर्वैरोचनस्यतु उद्योगंपरमंचक्रुर्दानवायुद्धदुर्मदाः २ महापद्मोनिकुंभश्चपूर्णकुंभश्चवीर्यवान् कांचनाक्षःकपिस्कंधोमैनाकःक्षितिकंप
नः ३ शितिकाशार्दूलवक्त्रश्चवज्रनाभःशिखीजटी सहस्रबाहुर्विकटोव्याघ्राक्षःप्रियदर्शनः ४ एकाक्षएकपान्मुंडोविद्युदक्षश्चतुर्भुजः
गजोदरोगजशिरागजस्कंधोगजेक्षणः ५ अष्टदंष्ट्रश्चतुर्वक्त्रोमेघनादोजलंधरः करालोज्वलजिह्वास्यःशतांगःशतलोचनः ६ सहस्र
पादःसुमुखःकृष्णश्चैवमहासुरः रणोत्कटोदानपतिःशैलकंपीकुलाकुलिः ७ समुद्रोरश्मिसश्चंडोधूम्रश्चैवमहासुरः गोत्रजोगोक्षुरो
रौद्रोगोदंतःस्वस्तिकोध्रुवः ८ मांसपोमांसभक्षश्चवेगवान्केतुमान्शिबिः पंकदिग्धशरीरश्चबृहत्कीर्त्तिर्महाहनुः ९ समप्रभोविकु
भांडोविरूपाक्षोमहोदरः श्वेतशीर्षश्चंद्रहनुश्चंद्रहाचंद्रतापनः १० विक्षरोदीर्घबाहुश्चमद्यपोमारुताशनः तालजंघोमहाभागःसर
भःशलभःक्रथः ११ समुद्रमथनोनादीवितत्श्चमहाबलः प्रलंबोनरकोव्यालीधेनुकःकाललोचनः १२ वरिष्ठश्चगरिष्ठश्चभूत-
लोमातथाविधुः दुःप्रसादःकिरीटीचसूचीवक्त्रोमहासुरः १३ सुबाहुःकंजबाहुश्चकरणःकलशोदरः सोमपोदेवयाजीचप्रवरोवीर
मर्दनः १४ सुपथःखंडमुक्तिश्चशिखिनेत्रःशिखिध्वजः यथास्मृतिमयाप्रोक्तामरीचेःकीर्तिवर्धनाः १५ एतेचान्येचबहवोनानाभूष
णभूषिताः रथौघैर्बहुसाहस्रैर्ययुर्योद्धुमरिंदमाः १६ ६९

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ ६७ ६७ ६७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३

दिव्यांबरधरादैत्या दिव्यमाल्यानुलेपनाः दिव्यैश्चकवचैर्नद्धादिव्यैश्चैवोच्छ्रितैर्ध्वजैः १७ दिव्यायुधधरादैत्यागर्जमानायथांबुदाः दृह
द्भिरथघोषैश्चचालयंतोवसुंधराम् १८ महाबलादिव्यबलास्त्रधारिणो भुजंगभोगप्रतिमैर्महाभुजैः सुदुर्जयादैत्यवृषाःसुरारयोदिति
प्रियालोहितलोहितेक्षणाः १९ तेजस्विनुरर्कज्वलनेंद्रवीर्यामहेंद्रवज्राशनितुल्यवेगाः विद्युद्दंष्ट्राहरिधूम्रकेशाविवर्द्धमानाःशरदीव-
मेघाः २० सहस्रबाहुर्बाणश्चबलेःपुत्रोमहाबलः रथातिरथकोट्यावैतेनद्युतंमहाबलाः २१ सर्वेमायाधरादैत्याःसर्वेदिव्यास्त्र-
योधिनः सर्वेमदबलोत्सिक्ताःसर्वेलब्धवराःपुरा २२ सर्वेकांचनशैलाभाःपीतकौशेयवाससः किरीटोष्णीषमुकुटादिव्यभूषणभूषि
ताः २३ हिरण्यकवचाःसर्वेहिरण्यध्वजकेतवः स्यंदनस्थाव्यराजंतशारदाइवखेग्रहाः २४ तापनीयैर्वरैर्निष्कैरनलज्वलितप्रभैः हे
मपर्वतशृंगस्थाःपुष्पिताइवकिंशुकाः २५ तेषामध्यगतोबाणःप्रावृषीवोत्थितोघनः स्थितःशक्तिगदापाणिस्त्रिनल्वप्रतिमेरथे २६
विचित्राश्वध्वजयुगेचित्रभक्तिविराजिते गदापरिघसंपूर्णेहेमजालविभूषिते २७ अन्वीयमानोदितिजैर्बलिरिवल्यैरिवांशुमान् ना-
नाप्रहरणैर्घोरैस्तीक्ष्णदंष्ट्रैरिवोरगैः २८ पंचतस्यमहावीर्यादानवायुद्धदुर्मदाः ररक्षूरथमव्यग्राव्यादितास्याभयावहाः २९ सुबाहु
र्मेघनादश्चभीमगर्भश्चवीर्यवान् तथाकनकमूर्द्धाचवेगवान्केतुमानपि ३० कनकरजतभक्तिचित्रपार्श्वेपतगपतिप्रतिमेरथेस्थितो
भूत् जलदनिनदतुल्यनेमिघोषेसुरगणसैन्यवधायदानवेंद्रः ३१ अनायुषायाःपुत्रस्तुबलोनाममहासुरः वृतःशतसहस्रेणरथानां
भीमवर्चसाम् ३२ युक्तमृक्षसहस्रेणरथमारुह्यवीर्यवान् नीलायसमयंघोरंवायसांकंसुदुर्जयम् ३३ नीलांबरधरःश्रीमान्वैडू-
र्याचलसंनिभः महतारथवंशेनप्रययौदानवस्तदा ३४ तत्रैकार्णवसंकाशेसैन्यमध्येव्यराजत प्रभातसमयेश्रीमान्समुद्रस्थइ
वांशुमान् ३५ स्रुतस्त्रजांबूनदतुल्यवर्चसानिशाकराकारतडिद्गुणाकरः किरीटमुख्येनविभातिशोभिनायथागिरिःशृंगवरेणभा-
स्वता ३६ षष्टिरथसहस्राणिनमुचेरसुरस्यवै खरयुक्तानिसर्वाणिमेघतुल्यरवाणिच ३७ नानाप्रहरणाःसर्वेसर्वेतेचित्रयोधि
नः महाभ्रघनसंकाशावेगवंतोमहाबलाः ३८ रथोव्याघ्रसहस्रेणयुक्तःपरमवेगवान् नमुचेरसुरेंद्रस्यसर्वरत्नविभूषितः ३९
शार्दूलचिन्हःशुशुभेतस्यकेतुर्हिरण्मयः रथमध्येसुरेशस्यमध्यंदिनरविर्यथा ४० सभीमवेगश्चमहाबलश्चप्रगृह्यचापंहिम-
वानिवस्थितः नीलांबरःकांचनपट्टनद्धोदिशागजोयद्वदुपेतकक्षः ४१

३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किंकिणीजालनिर्घोषंतपनीयविभूषितम् सपताकाध्वजोपेतंससंध्यमिवतोयदम् ४२ चक्रैश्चतुर्भिःसंयुक्तमष्टनल्वायतांतरम् हेमजाला
कुलंदीप्तकालचक्रमिवोदितम् ४३ नानायुधधरंघोरंव्याघ्रचर्मपरिष्कृतम् ईहामृगगणाकीर्णंचित्रभक्तिविराजितम् ४४ तूणीरश
रसंपूर्णंशक्तितोमरसंकुलम् गदामुद्गरसंबाधंचापरत्नविभूषितम् ४५ युक्तमृक्षसहस्रेणलंबकेसरवर्चसा राजतेनविकीर्णेनशोभितं
सिंहकेतुना ४६ सतेनसुशुभेदैत्योमयोमायाविसर्पिणा रथरत्नस्थितःश्रीमानुदयस्थइवांशुमान् ४७ विमलरजतबिंदुशोभितांग
मणिकनकोज्वलचारुभक्तिचित्रम् अयुतशतसहस्रमूर्जितानांमयमनुयातिनदामहारथानाम् ४८ इतिश्रीमहाभारतेखिलेषुह
रिवंशेभविष्यपर्वणिवामनप्रादुर्भावेमयस्ययुद्धाभिगमनंनाम एकोनपंचाशत्तमोऽध्यायः ४९ वैशंपायनउवाच पुलोमा
तुमहादैत्यस्तिमिराकारगह्वरम् आरुरोहायसंघोरंरथपररथारुजम् १ उत्कर्णपर्वताकारंलोहजालांतरांतरम् निमिघोषेणमहता
क्षुभ्यन्तमिवसागरम् २ गदापरिघनिस्त्रिंशैःसतोमरपरश्वधैः शक्तिमुद्गरसंकीर्णंसतोयमिवतोयदम् ३ रथमुष्ट्रसहस्रेणसंयुक्तंवा
युवेगिना पुलोमारुह्ययुद्धायप्रस्थितोयुद्धदुर्मदः ४ षष्टिंरथसहस्राणिपुलोमानंमहारथम् अन्वयुःसूर्यवर्णानिप्रदीप्तानीवतेजसा
५ शार्ङ्गध्वजेनमहतातप्तकांचनवर्चसा भ्राजतेरथमध्यस्थःपर्वतस्थइवांशुमान् ६ सुचारुचामीकरपट्टनद्धांमहागदांकालनिभां-
महाबलः प्रगृह्यबभ्राजसशत्रुमध्येकार्ष्णायसींकेतुरिवोत्थितोव्योम्नि ७ हयग्रीवस्तुबलवान् हयग्रीवोमहासुरः वृतःशतसहस्रेण-
रथानारथसत्तमः ८ धराधरनिभाकारंसपत्नानीकमर्दनम् स्यंदनंभीममास्थाययुद्धायाभिमुखःस्थितः ९ श्वेतशैलप्रतीकाशःश्वे
तकुंडलभूषणः शुशुभेरथमध्यस्थःश्वेतशृंगइवाचलः १० महतासप्तशीर्षेणशोभितोनागकेतुना वैडूर्यमणिचित्रेणप्रवालांकुर-
शोभिना ११ अमितबलपराक्रमाहृतीनांवररथिनामनुजग्मुरूर्जितानाम् असुरगणशताभिगच्छमानंत्रिदशगणाइववासवंप्रया
तम् १२ प्रह्लादस्तुमहाप्राज्ञःसर्वशास्त्रविशारदः सर्वमायाधरःश्रीमानृष्टाक्रतुशतैरपि १३ समनह्यततेजस्वीपावकार्चिःसमप्रभः
रथांभोदेनमहतादुर्दिनांभोदनादिना १४ शूरेणामितवीर्येणयमकुंडलधारिणा वृतोदैत्यसहस्रेणदेवैरिवपितामहः १५ सवीर्यादि-
मणीईस्रोमत्तवारणविक्रमः सरसैन्यस्यसर्वस्यप्रतिक्षोभइवास्थितः १६ सवीर्येणोदधेस्तुल्यःप्रदीप्ताग्निरिवज्वलन् तेजसाभास्करा
कारःक्षमयापृथिवीसमः १७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

१८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांपंचाशत्तमो

तालध्वजेनदीप्तेनरथेनातिविराजिता तंयांतमनुयांतिस्मदानवाःशतसंघशः १८ सर्वेहिरण्यकवचाःसर्वेरत्नविभूषिताः दिव्यांगरागा
भरणाःसमरेष्वनिवर्तिनः १९ जांबूनदविचित्रांगावैडूर्यविकृतांगदाः दिव्यस्यंदनमध्यस्थाःस्वस्थाइवमहाग्रहाः २० आचारवांश्चैव
जितेंद्रियश्चधर्मेरतःसत्यपरोनसूयः स्थितःसतोयंबुदवायुकल्पोरूपीयथासर्वहरःकृतांतः २१ शंबरस्तुमहामायोरथयूथपयूथपः
आरुरोहरथंदिव्यंसर्वयुद्धविशारदः २२ लोहिताक्षोमहाबाहुःश्वेतसोत्तमकुंडलः जीमूतघनसंकाशोदिव्यस्रगनुलेपनः २३ विद्यु-
ज्ज्योतिर्निकाशेनमुकुटेनार्कवर्चसा मणिरत्नविचित्रेणवैडूर्यवरशोभिना २४ तपनीयेनमहताकवचेनविराजिता संध्याभ्रेणेव सं
च्छन्नःश्रीमानस्तशिलोच्चयः २५ त्रिंशच्छतसहस्राणिदैत्यानांचित्रयोधिनाम् बलिनांकालकल्पानामन्वयुःशंबरंतदा २६ युक्तंहय
सहस्रेणशुक्लवर्णेनराजता क्रौंचध्वजेनदीप्तेनरथेनाहवशोभिना २७ व्यासक्तवैडूर्यसुवर्णजालंनानाविहंगैरपिभक्तिचित्रम् वि
द्युत्प्रभंभीमरवंसुवेगंरथंसमारुह्यरराजदैत्यः २८ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिवामनप्रादुर्भावेशंबरादिदैत्यसन्नहन
नामपंचाशत्तमोऽध्यायः ५० वैशंपायनउवाच अनुह्लादश्चतत्रैवदैत्यःपरमदुर्जयः हिरण्यकशिपोःपुत्रःप्रययौयुद्धलाल
सः १ चतुश्चक्रेणयानेनत्रिनल्वप्रमितेनतु युक्तेनाश्वैर्महावीर्यैःसिंहवक्त्रैरजिह्मगैः २ भीमगंभीरनादेननेमिघोषेणवीर्यवान्
चालयन्वसुधांसर्वांसशैलवनकाननाम् ३ विनर्दमानादैत्यौघाअनुह्लादंययुःशुभाः शतंशतसहस्राणिरथानांहेममालिनाम् ४
परिघैर्भिंडिपालैश्चभल्लैःपाशैःपरश्वधैः विविधायुधहस्तास्तेशूलमुद्गरपाणयः ५ सुवर्णजालनिर्मुक्तैर्वज्रैश्चसमलंकृताः रथैश्चित्रै
श्चकवचैःसज्जमानामहासुराः ६ तदाविशालोच्छ्रितशैलरूपेबभौरथेकांचनचित्रितांगे दैत्याधिपःसत्वबलानुरूपेसमास्थितःस्वप्र
तिमेयरूपः ७ विरोचनश्चबलवान्वैश्वानरसमद्युतिः महतारथवंशेनसर्वास्त्रकुशलःशुचिः ८ व्यूहानांविनियोगज्ञोज्ञानविज्ञान
तत्ववित् बलेःपितासुरवरःसुराणामिववासवः ९ सर्वायुधसमोपेतंकिंकिणीजालभूषितम् युक्तानांवाजिमुख्यानांसहस्रेणाशुगामि
ना १० रथमारुह्यदैत्येंद्रोबभौमेरुरिवापरः किंकिणीजालपर्यंतं गजेंद्रध्वजशोभितम् संध्याभ्रसमवर्णाभिःपताकाभिरलंकृतम्
११ प्रवालजांबूनदभक्तिचित्रंव्यालाधिकारांतरनेमिघोषम् रथंसमारुह्यकिरीटमालीययौसयुद्धायमहासुरेंद्रः १२

ऽध्यायः ५० ५३

अनुह्लादश्चेति १ त्रिनल्वाद्वादशशतहस्तोच्छ्रायाप्रतिमेयस्यतेन २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ ५३ ५३

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२

हेमतालीमहाद्वंद्वः स्रग्वीरुचिरकुंडलः रक्तमाल्यांबरधरश्चंडः समरदुर्जयः ३७ सुमहाद्वृत्तनयनः सकिरीटीधनुर्धरः प्रभिन्नइ
वमातंगः शार्दूलसमविक्रमः ३८ महातालनिभंचापंतथारुचिरसायकम् विस्फारयन्महावेगंवज्रनिर्घोषनिस्वनम् ३९ र
थेनरत्नयुक्तेनध्वजेनभुजगेनह शुशुभेस्यंदनस्थः ससंध्यागतइवांसुमान् ४० रथैस्तुबहुसाहस्रेहेमपट्टविभूषितैः कूटमुद्गर
संपूर्णैर्जलपूर्णैरिवांबुदैः सुदेदैस्तैर्द्वीभिचक्रामतस्मिन्युद्धउपस्थिते ४१ पवनसमगतिर्विशालवक्षाधिकसितपंकजचारुगंभीगो
रः प्रवररथगतोयथोसतूर्णंत्रिदशगणैरभिलक्षितप्रभावः ४२ सिंहिकातनयश्चैवराहुर्नाममहासुरः विकटः पर्वताकारः शतशी
र्षाः शतोदरः ४३ पीतमाल्यांबरधरोजांबूनदविभूषितः स्निग्धवैडूर्यसंकाशः पद्मपत्रनिभेक्षणः ४४ सर्वकांचनसंयुक्तमणि-
जालपरिष्कृतम् पताकाशतसंकीर्णंयुक्तंपरमवाजिभिः ४५ आरुरोहरथंदिव्यंदैत्यः परमवीर्यवान् ननादचमहानादंकंपयन्नुव
सुधातलम् ४६ मयेनविहितोदिव्यस्तस्यकेतुर्हिरण्मयः मयूरपक्षसंकाशंकवचंचायसंमहत् ४७ भीमवेगरवैश्चान्यैरथैर्दि
व्यैः सुभासुरैः नानाप्रहरणाकीर्णैः सेव्यमानोमहाबलः ४८ असुरगणपतिर्गजेंद्रगामीगतिरभसंगतिर्महास्फुराणाम् अरिगण
मभितोविभुः प्रयातोगिरिवरमस्तमिवांशुमान्सुदीप्तः ४९ विप्रचित्तिस्तुतत्रैवदनोर्वंशाविवर्द्धनः कश्यपस्यात्मजः श्रीमान्ब्रह्म
णस्तेजसासमः ५० सप्तक्रतुसहस्राणांवेदवित्तूपसान्वितः स्वयंभुवादत्तवरोवरदश्चस्वयंभुवः ईशित्वंचवशत्वंचप्रकाश्यंचम
हाद्युतेः ५१ ऐश्वर्यगुणसंपन्नोब्रह्मेवस्वयंभूजितः सार्द्धंपुत्रैश्चपौत्रैश्चसंनद्धतमहाबलः ५२ सर्वेमायाधराः शूराः कृतास्त्रार
णदुर्जयाः सर्वेकमलवर्णाभाहेमकूटोच्छ्रयोच्छ्रयाः ५३ सर्वेरजतसंकाशाः कैलासशिखरोपमाः मयेननिर्मितास्तेषांसर्वमाया-
मयारथाः ५४ विचरंतोव्यराजंतशारदाइवतोयदाः सर्वेहंसध्वजाः श्वेताः श्वेतदंडसमुच्छ्रयाः ५५ श्वेतांबरधरादैत्याः श्वेतमा
ल्यविभूषिताः श्वेतातपत्राः सर्वेतेश्वेतकुंडलमंडिताः ५६ मुक्ताहारवृतोरस्काभांतिनाकेश्वराइव महाम्बूहनिभाकाराः शत्रूणां-
लोमहर्षणाः ५७ रक्तचित्रांबरधराश्चित्राभरणभूषिताः त्रैलोक्यविजयंनामरथमास्थायवीर्यवान् ५८ कैलासशिखराकारमष्ट
नल्वायतांतरम् युक्तंवाजिसहस्रेणसितेनशिववर्चसा पताकाशतसंच्छन्नंनानायुधविकल्पितम् ५९

५३ ५४ ५५ ५६ ५७ ५८ ५९ ६ ६ ६ ६ ६ ६ ६ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१३ १४ भिन्नांजनचयप्रभाः कज्जलगुटिकागर्भवत्कृष्णाः १५ १६ १७ १८ १९ २० २१ तपनीयनिष्काः सुवर्णमयपदकालंकाराः

विरोचनानुजश्चैवकुजंभोनामदानवः स्यंदनैर्बहुसाहस्रैर्मणिकांचनभूषितैः १३ वृतोमदबलोत्सिक्तैर्दैवारिभिररिंदमः प्रासपाश
गदाहस्तैर्दानवैर्युद्धकांक्षिभिः १४ सपर्वतनिभाकारोभिन्नांजनचयप्रभः महताभ्राजमानेनकिरीटेनसुवर्चसा १५ सर्वरत्नवि-
चित्रेणकवचेनचसंवृतः महतादीप्तवपुषारथेनेंदुरिवांशुमान् १६ शातकौंभेनमहतातालवृक्षेणकेतुना रराजरथमध्यस्थो-
मेरुस्थइवभास्करः १७ रणपटुरतिवीर्यसत्वबुद्धिःसुरसमराभिमुखःप्रयातितूर्णम् असुरगणसमावृतःकुजंभस्त्रिदशगुणैरि
ववृत्रहामरेंद्रः १८ असिलोमाचतत्रैवदानवःपर्वतायुधः दारुणंवपुरास्थायसदारुणोदारुणाननः १९ रौद्रःशकटचक्राक्षोमहाका
योमहाबलः कृष्णवासामहादंष्ट्रःकिरीटीलोहिताननः २० वृतोदैत्यसहस्रौघैर्गिरिपादपयोधिभिः नानारूपधरैर्दृप्तैर्दैत्यैस्त्रिद-
शशत्रुभिः २१ तेशूलहस्तागगनेचरंतइतस्ततस्तोयदवृंदतुल्याः स्वच्छादयंतस्तपनीयनिष्कायथोन्नताःप्रावृषिकालमेघाः २२
अनायुषायाःपुत्रस्तुवृत्रोनाममहासुरः देवशत्रुर्महाकायस्ताम्रास्योनिर्नतोदरः २३ दीप्तजिह्वोहरिश्मश्रुरूर्ध्वरोमामहाहनुः नी
लांगोलोहितमुखःकिरीटीलोहितांबरः २४ आजानुबाहुर्विकृतःश्वेतदंष्ट्राविभीषणः महामायाधरोभीमोहेमकेयूरभूषणः २५
महतामणिचित्रेणकवचेनतुसंवृतः हेममालाधरोरौद्रश्चक्रकेतुरमर्षणः २६ किंकिणीशतसंघुष्टंतपनीयविभूषितम् युक्तंहय-
सहस्रेणरक्तध्वजपताकिनम् २७ रथानीकेनमहतायुद्धायाभिमुखोययौ दिव्यस्यंदनमास्थायदैत्यानांनंदिवर्द्धनः २८ तपितक
नकबिंदुपिंगलाक्षोदितितनयोसुरसैन्ययुद्धनेता विकसितकमलाभचारुवक्त्रःशितदशनःशक्रुभेरथासनस्थः २९ एकचक्रस्तु
तत्रैवसूर्यचक्रइवोदितः कालचक्रसमोरौद्रश्चक्रायुधइवोद्यतः सर्वायसमयंदिव्यंरथमास्थायभास्करम् ३० वृतोदैत्यगणैर्दृप्तैः
कालायसशिलायुधैः तस्याशीतिसहस्राणिरथानांचित्रयोधिनाम् ३१ सर्वेकालांतकप्रख्यारुधिराक्षामहाबलाः आयसैः
कांचनैश्चैवसन्नद्धावरवर्णिनः ३२ विराजतांतरिक्षस्थानीलाइवपयोधराः सर्वेकालांतरप्रख्याधीराःसमरदुर्जयाः ३३ साग
रोदरगंभीरानीलवज्रादुरासदाः रेजुर्यांतोसुरवराबेलातीताइवार्णवाः ३४ तेभीमसायाःसुसमृद्धकायाःकिरीटिनःकांचनभू
षितांगाः ययुस्तदास्वायुधदीप्तहस्तानभःसपक्षाइवपर्वतेंद्राः ३५ संदिष्टोबलिपुत्रेणवृत्रभ्रातामहासुरः वधायसुरसैन्यस्यसंनह्य ७१
सोतिवीर्यवान् ३६

२२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८२ ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९० ९१ महाबलानिमहांतिसैन्यानि ९२ इतिश्रीमहाभारतेहरिवंशे

विज्यंतिबालव्यजनैर्विनीतामहासुरास्स्यंदनवेदिकास्थाः अयःशिराअश्वशिरादुरापःशिबिर्मतंगोबिशिराःशतास्यः ८२ अयोनिकुंभः
कथनश्चदानवोररक्षिरेतेदशदानवाधिपम् पुराश्चराश्चैवसहस्रशोऽसुरापदातयोदानवराजरक्षिणः ८३ शतघ्निचक्राशनिशक्ति
पाणयःप्रजग्मुरग्न्यनिलतुल्यवेगिनः घंटाःसुशब्दास्तपनीयबद्धाआडंबरागर्गरडिंडिमाश्च ८४ महारवादुंदुभयश्चनेदुरथप्रया
णेदितिजेश्वरस्य तस्योत्थितःकांचनवेदिकाढ्योहिरण्मयोदिव्यमहापताकः ८५ महाध्वजोवैतपनीयनद्धोरराजवीरस्ययथाविव
स्वान् समुच्छ्रितंकांचनमातपत्रंस्रक्कांचनीवक्षसिचास्यभाति ८६ समंततश्चाप्यसुराश्चरंतिदैत्यर्षयःप्रांजलयोजयंति पुरोहिताः
शत्रुवधेसमाहितास्तथैवचान्येश्रुतशीलवृद्धाः ८७ जपैश्चमंत्रैश्चतथौषधीभिर्महात्मनःस्वस्त्ययनंप्रचक्रुः सतूत्तवस्त्राणिशुभा
श्चगावःफलानिपुष्पाणितथैवनिष्कान् ८८ बलिर्द्विजेभ्यःप्रयतःप्रयच्छन्विराजतेतीवयथाधनेशः सहस्रसूर्योबहुकिंकिणीकः
परार्ध्यजांबूनदहेमचित्रः ८९ सहस्रचंद्रायुततारकश्चरथोबलेरग्निरिवावभाति तमास्थितोदानवसंगृहीतंमहाबलःकार्मुकधृ
क्सबाणः ९० उद्वर्तयिष्यन्त्रिदशेंद्रसेनामतीवरौद्रंसविभर्तिरूपम् सवेगवान्वीररथौघसंकुलःप्रयातिदेवान्प्रतिदैत्यसागरः ९१
महार्णवोवीचितरंगसंकुलोयथाजलौघैर्युगसंक्षयेतथा त्रैलोक्यवित्रासकरैर्वपुर्भिस्तान्यग्रतोयांतिबलेरथस्य महाबलान्युच्छ्रि
तकार्मुकाणिसपर्वतानीववनानिराजन् ९२ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यप०बलेरुद्योगोनामएकपंचाशत्तमोऽध्यायः
५१ वैशंपायनउवाच श्रुतस्तेदैत्यसैन्यस्यविस्तरोजनमेजय भूयस्त्रिदशसैन्यस्यशृणुविस्तरमादितः १ सुराधिपस्तुभ
गवान्आज्ञापयतवैसुरान् मरुद्गणास्तथादिव्यान्विश्वान्देवांश्चवासवः २ वसूनष्टौमृशस्सर्वान्यक्षरक्षोमहोरगान् विद्याधरग
णान्सर्वान्गंधर्वांश्चमहाबलान् ३ महार्णवांश्चशैलांश्च तथारुद्रान्महौजसः यमवैश्रवणौचोभौवरुणंचजनाधिपम् ४ येतु-
सिद्धामहात्मानःपितरश्चमनस्विनः राजर्षयश्चशतशोयोगसिद्धास्तथैवच ५ त्रिदशाज्ञापकःशक्रआज्ञापयतिवीर्यवान् भवंतोदै
त्यनाशायसंनह्यतामितिप्रभुः ६ शक्रस्यवचनंश्रुत्वाततःसर्वेदिवौकसः संनह्यतमहात्मानःशक्रस्यसमविक्रमाः ७ नानाकव
चिनःसर्वेविचित्रकवचध्वजाः नानायुधोद्यतकरामत्ताइवमहागजाः ८ केचिदारुरुहुर्व्याघ्रान्केचिदारुरुहुर्गजान् केचिदारुरुहुर्ना
गान्केचिदारुरुहुर्वृषान् ९
भविष्यपर्वणिटीकायांएकपंचाशत्तमोऽध्यायः ५१ ५ १ २ ३ ४ ५ ६ ७ ८ ९ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

हिमांसुकुंदप्रतिमंविशालंसितातपत्रंदनुजेश्वरस्य विभातितस्योपरिधार्यमाणंश्वेताद्रिमूर्ध्नीवगतःशशांकः ६० केशोदानश्मश्रुरक्त-
स्तुजिह्नस्ताम्राक्षदर्शनः नीलमेघचयप्रख्यःकालःपुरुषविग्रहः ६१ महाग्रहनिभाकारःशत्रूणांलोमहर्षणः चित्रमाल्याम्बरध-
रोरक्ताभरणभूषितः ६२ शताक्षःशतबाहुश्चहरिश्मश्रुर्महाबलः शंकुकर्णोमहानादोवपुषाघोरदर्शनः ६३ युक्तंसाहस्रिकैर्दिव्यैर्घं
टाकोटिकृतस्वनम् महावारिधराकारमास्थायरथमुत्तमम् ६४ ध्वजेनोच्छ्रेणमहतानीलकेसरवर्चसा नानारागविचित्राभिःपताका
भिर्विभूषितः ६५ द्विपंचाशत्सहस्राणिरथानामुग्रवर्चसाम् ययुस्तस्यासुरेंद्रस्यप्रयातस्यसुरान्प्रति ६६ भांतिभिन्नाञ्जननिभाः
प्रयातस्यमहात्मनः दंष्ट्रोग्रचंद्रवदनासबलाकाइवाम्बुदाः ६७ ततस्यवैडूर्यसुवर्णचित्रंविद्युत्प्रभंभास्कररश्मितुल्यम् किरीटमाभा
त्यसुरोत्तमस्यदावाग्निदीप्तंशिखरंयथाद्रेः ६८ वृषपर्वासुरश्चैवश्रीमांश्चसुरसूदनः आरुरोहरथंदिव्यंमेरुशृंगमिवांशुमान् ६९ प्रवा
लजाम्बूनदचित्रकूबरमहारथंभारसहंमहाहम् स्वलंकृतंराजतहेमकुंडलंगभस्तिनक्षत्रतडिन्निकाशम् ७० केयूरयुक्तांगदनद्धबाहुः
सहस्रतोरणचचर्मणासः संग्रामिकैराभरणैश्चचित्रैर्मध्यान्हसूर्यप्रतिमोबभूव ७१ महाबलोबद्धतलांगुलित्रोबद्धोत्कटःकिंशुकलो
हिताक्षः प्रगृह्यचामीकरचारुचित्रंचापंस्थितोवृत्तविशालनेत्रः ७२ महासुरश्चमहासुरवृतोबलिस्तदास्यंदनमारुरोह वैडूर्यहेमो
पचितंविशालंविद्युत्प्रभंषोडशनल्वमात्रम् ७३ युक्तंसहस्रेणदितेःसुतानांगजाननानांविकृताकृतानाम् चामीकरोरःस्थलभूषितानां
प्रनर्दतांप्राव्रुषिचाम्बुदानाम् ७४ महारथंदेवरथप्रकाशंमयासहायेनमयेनसृष्टम् ईहामृगाक्रीडितभक्तिचित्रंदिव्यैरथंदिव्यरथानु
यातम् ७५ सकिंकिणीकंविमलंसुविस्तृतंहिरण्मयैःपद्मशतैरलंकृतम् अभ्याददेवैजयिकींजयायस्रजंबलिर्हेमविचित्रपुष्पाम् ७६
आबध्यमालांप्रभयाविचित्राबलिस्तदाभातिभुजैर्विशालैः रराजतैःसर्वसमृद्धियुक्तैर्महार्चिषासूर्यइवांबुरस्थः ७७ स्रजंतदाबध्य
तिचास्यदुर्गांसर्वासुराणामिवहारभूताम् वैरोचनिःसर्वश्रियाभिजुष्टोविभ्राजतेसौशरदीवचंद्रः ७८ मेरोस्तटेवाज्वलनप्रकाशेरादि
त्यसंयुक्तमिवाभ्रजालम् प्रासाश्चपाशाश्चहिरण्यबद्धावर्माणिखड्गाश्चपरश्वधाश्च ७९ धनूंषिवज्रायुधसप्रभाणिदिव्यागदावज्र
मुखाश्चशक्तयः दिव्याश्चखड्गाविशिखाश्चदीप्तानाराचपूर्णाविविधाश्चतूणाः ८० धृतारथेदैत्यवृषस्यतस्यचकाशिरेप्रज्वलितायथो-
ल्काः तेचामरापीडधराःसुदंष्ट्राःसुवर्णमुक्तामणिहेमचित्राः ८१ ७२

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रथंआरुह्योतिशेषः १० ११ आभिताभंइषत्सर्वतस्तांमेरूचारुरूपोपिचारुयानंरथं प्रतिचक्रस्यवैरिसमूहस्यापिचक्रं आज्ञापकंपातालंगच्छतेत्येवमादि १२ १३

हरिनेत्रोहरिश्मश्रुर्हरिदेहोद्धृतध्वजम् रथंहरिहयैर्युक्तंसमायात्समरंप्रति १० आदित्यवर्णैर्विरजंसुधौतंत्वष्ट्रास्वयंनिर्मितमीश्वरार्थं
जालैश्चजांबूनदभक्तिचित्रैरलंकृतंकांचनदामभिश्च ११ सकूबरोपस्करबंधुरेषंविद्युत्प्रभाभिःकृतमाभितांगम् कैलासशृंगोप-
ममिंद्रयानंसुचारुचारुप्रतिचक्रचक्रम् १२ तारासहस्रैरवचितज्वलद्भिर्देवाहमाल्यार्चितसर्वदेहम् समुच्छ्रितंचाध्वजमस्ययाक्षंप्र
ज्वाल्यमानंपुरुषोत्तमेन १३ आस्थायतंभास्करमाशुवेगंशचीपतिर्लोकपतिःसुरेशः वज्रस्यधर्त्ताभुवनस्यगोप्ताययौमहात्माभगवा
न्महेंद्रः १४ आमुच्यवर्मार्थसहस्रतारंहुताशनादित्यसमप्रभावम् सूर्यप्रभंचाप्यमुचेकिरीटंमालांचजांबूनदवैजयंतीम् १५ त्व
ष्ट्राकृतंभास्कररश्मिदीप्तंसुतीक्ष्णधारामलतीव्रधारम् महासुराणांरुधिरार्द्रमुग्रंप्रगृह्यवज्रंशतपर्वभीमम् १६ महाशनींद्रंचमहा-
ग्रहाभंदीप्तामभोघांचसुशक्तिमुग्राम् चक्रंतथेंद्रसुमहत्प्रतापंप्रगृह्यशक्रःप्रययौरणाय १७ सहस्रदृक्शूलपतिःसनातनःसनातना
नामपियःसनातनः खङ्गंचदेवाधिपतिर्महात्मावैय्याघ्रमादायचचर्मचित्रम् १८ क्षीरोदधिक्षोभसमुच्छ्रितानिपुरामृतादुत्तमभूष-
णानि देवासुराणांसमनिर्जितानिसोमार्कनक्षत्रतडित्प्रभाणि १९ दत्तान्यदित्यामणिकुंडलानियुद्धंप्रयातस्यसुरेश्वरस्य तेभूषितो
भातिसहस्रचक्षुरुद्योतयद्वैविदिशोदिशश्च २० हरिःप्रभुर्नेत्रसहस्रचित्रोविभातियुद्धाभिमुखःसुरेंद्रः यथासितशारदमभ्रकल्प
नभस्तलंऋक्षसहस्रचित्रम् २१ स्तुवंतियंतंविपुलैर्वचोभिर्जयाशिषाचोर्जितसत्ववीर्यम् अत्रिर्वसिष्ठोजमदग्निरुर्वोबृहस्पतिर्ना
रदपर्वतौच २२ तमन्वयुर्देवगणामहेंद्रंप्रयातमादित्यसमानवर्चसम् विश्वेचदेवामरुतस्तथैवसाध्यास्तथादित्यगणाश्चसर्वे २३
तेदेवराजस्यपुरंदरस्यहयाश्चयेमातलिसंगृहीताः प्रयांतिदेवेश्वरमुद्वहंतोनभस्तलंपंक्तिरिवाक्षिपंतः २४ ब्रह्मर्षयश्चैवमहर्षयश्च
राजर्षयश्चाक्षयपुण्यलोकाः सर्वेनुजग्मुःसहसाज्वलंतंतेजोन्वितंशक्रममित्रसाहम् २५ प्रगृह्यशूलांश्चपरश्वधांश्चदीप्तानिचा
पान्यशनिर्विचित्राः वर्माणिचामुच्यहिरण्मयानिप्रयातिसूर्यांशुसमप्रभाणि २६ तथाकुबेरोश्वसहस्रयुक्तंश्रेष्ठंरथंसर्वसहंम
हार्हम् दिव्यंसमारुह्यरणाययातोधनेश्वरोदीप्तगदाग्रहस्तः २७ निशाचराःपावकधूमकायारक्षोद्रुपारूढसरवस्यतस्य विशालनानायु
धदीसहस्ताय्यांत्ययतोवैश्रवणस्यराज्ञः २८ तेलोहिताक्षाःपरिवार्यदेवंव्रजंतिचूर्णांजनभिन्नवर्णाः यक्षोत्तमायक्षपतिंधनेशंरक्षंतिवैपा
शगदासिहस्ताः २९

१४ जांबूनदमयीचासौवैजयंतीआपादतलंबिनीतांजांबूनदवैजयंतीं १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३० ३१ ३२ ३३ ३४ ततस्त्रीनितित्रयवाक्यं ३५ ३६ ३७ ३८ ३९ ४० निभानिवर्माणीतिअग्रिमेणसंबंधः ४१ ४२

पुण्यः प्रभुः प्राणपतिर्जितात्मा वैवस्वतो धर्मभृतां वरिष्ठः तडिद्गुणाभं शतवाजियुक्तं रथं समारोहत सूर्यकल्पम् ३० तं लोकपालं पितरोऽनुज
ग्मुर्विसुरूपा ज्वलितास्तपोभिः सर्वे च भूता भुवनप्रधाना नानायुधव्यग्रकराः सुभीमाः ३१ दंडं महास्त्रं परिगृह्य देवो लोकांकुशं निग्रह
निश्चितार्थम् हिरण्मयानां कमलोत्पलानां माल्यां मनोज्ञामवसज्य कंठे ३२ स्थितोऽस्य मेदामिषलोहिताई सर्वासुराणां निधनं विरूपम्
तेजोमयं मुद्गरमुग्ररूपं विकर्षमाणोऽरुणधूम्रनेत्रः ३३ समन्वितो व्याधिशतैरनेकैर्ययौ हरिश्मश्रुरुदारसत्वः महासुराणां निधनाय बुद्धिं
चक्रे तदा व्याधिपतिः कृतांतः ३४ ततस्त्रिशीर्षैर्भुजगैर्बृहद्भिर्युक्तं रथं हेमचितं महात्मा आस्थाय कुंदेंदुनिभं जलेशो ययौ रणायासुरद
र्पहंता ३५ वैडूर्यमुक्तामणिभूषितांगस्तेजोमयः पाशगृहीतहस्तः महासुराणां निधनाय देवः प्रयाति रूप्यांगदबद्धबाहुः ३६ कैलासशृं
गप्रतिमोऽप्रमेयः सेंदुद्भनाथो मृतपो महात्मा महोरगैः स्वैस्तनयैश्च गुप्तो ययौ रथेनार्कसमप्रभेण ३७ युद्धाय तं यांतमदीनसत्वं नभस्तले चं
द्रमिवातिकांतम् पश्यंति भूतानि महानुभावं सहृष्टरोमाणि कृतांजलीनि ३८ धातार्यमांशोऽथ भगो विवस्वान् पर्जन्यमित्रौ च शशी च दे
वः त्वष्टा तथैवोर्जितविश्वकर्मा पूषा च साक्षाद्दिवि देवराजः ३९ सोरच्छदैः सध्वजकिंकिणीकैर्वैडूर्यनिष्कोद्ग्रथित हेमकंठैः हयैर्वरैः शक्र
रथप्रकाशैर्युक्तान्त्रयानारुरुहुः सुरास्ते ४० दिवाकराकारनिभानि केचित् हुताशनार्चिःप्रतिमानि केचित् निशाकरांशुप्रतिमानि केचि-
त्तडिद्गुणोद्योतनिभानि केचित् ४१ नीलांशुमेघप्रतिमानि केचित् कार्ष्णायसाकारनिभानि केचित् वर्माणि दिव्यानि महाप्रभाणि त्वष्ट्रा
कृतान्युत्तमभानुमंति ४२ आमुच्य माला अश्वसुवर्णपुष्पाः प्रयांति तौ यानिलतुल्यवेगाः द्वावश्विनौ चैव महानुभावौ रूपोत्तमौ धर्मभृतां व
रिष्ठौ ४३ रथं समारुह्य सुवर्णचित्रं रणं गतौ कांचनतुल्यवर्णौ मनोः सुता वैवस्वतश्च सर्वे वलोत्कटा दैत्यवधाय देवाः ४४ रथाश्वनागा
श्वमहाप्रमाणानास्थाय जग्मुः सुशुभास्त्रहस्ताः रुद्राश्च सर्वे रुणधूमवर्णाः श्वेतैर्युगैः पतिभिर्बृहद्भिः ४५ महौजसः सर्वगुणोपपन्ना
दीप्तात्मनो भाभिरिवज्वलंतः नानायुधव्यग्रकरैर्भुजैस्ते लोकान् समस्तानिव निर्दहंतः ४६ ययुः ससैन्यास्तपनीयनद्धाः सविद्युतस्तोय
धरा यथैव विश्वे च देवास्तपसा ज्वलंतो वीर्योत्तमाः सूर्यमरीचिवर्णाः ४७ ययुः ससैन्या युधि दुर्निवार्या बलोत्कटाः पद्मसहस्रमालाः
रथैः सुपुंखैस्तपनीयवर्णैर्वैडूर्यमुक्तामणिदामचित्रैः ४८ नानाविधाकारसमाकुलास्ते पारिप्लवैश्चैव सितातपत्रैः तेजोमयैः कांचनचा
रुचित्रैः सुनिर्मलैः पावकसन्निभास्ते ४९

४३ ४४ ४५ ४६ ४७ ४८ ४९ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३

एतस्मिन्नंतरेतेषामन्योन्यमभिनिघ्नताम् द्वंद्वयुद्धान्यवर्त्तंतदेवानांदानवैःसह ५ वैशंपायनउवाच मरुतांपंचमोयस्तुसबा
णेनाभ्ययुध्यत महाबलःसुरवरःसावित्रइतियंविदुः ६ अनायुषायाःपुत्रस्तुबलोनाममहासुरः सोयुध्यतरणेत्युग्रोध्रुवेणवसुनासह
७ नमुचिश्चासुरश्रेष्ठोधरेणसहयुध्यत प्रवरोविश्वकर्मणोरव्यातोदेवासुरेश्वरो ८ पुलोमातुमहादैत्योवायुनासहयुध्यत ससैन्यः
पर्वताकारोरणेयुध्यतदंशितः ९ हयग्रीवस्तुदितिजःसहपूष्णाययुध्यत शूरेणामितवीर्येणभास्कराकारवर्चसा १० शंबरस्तुमहा
दैत्योमहामायोमहासुरः भगेनायुध्यततदासहितोयुद्धदुर्मदः ११ शरभःशलभश्चैवदैत्यानांचंद्रभास्करौ प्रयुद्धौसहसोमेनशीशि
रास्त्रेणधीमता १२ विरोचनस्तुबलवान्बलेर्बलवतःपिता विष्वक्सेनेनसाध्येनदेवेनचसयुध्यत १३ कुजंभस्तुमहातेजाहिरण्य-
कशिपोःसुतः अंशेनायुध्यततदाप्रासप्रहरणेनवै १४ असिलोमातुबलिनामारुतेनसमंविभो तदायुध्यतदीप्तास्योविकृतःपर्वता
युधः १५ अनायुषायाःपुत्रस्तुवृत्रोनाममहासुरः अश्विभ्यांदेववैद्याभ्यांसहयुध्यतसंयुगे १६ एकचक्रस्तुदितिजश्चक्रहस्तोदुरा
सदः सहायुध्यतदेवेनसाध्येनदितिजारिणा १७ बलस्तुमधुपिंगाक्षोवृत्रभ्रातामहासुरः मृगव्याधेनरुद्रेणसहायुध्यतवीर्यवान्
१८ राहुस्तुविकृताकारःशतशीर्षाःसहोदरः अजैकपादेनरणेसहायुध्यतदंशितः १९ केशीतुदानवःश्रेष्ठःप्रावृट्कालांबुदप्रभः ध
नेश्वरेणभीमेनसहायुध्यतसंयुगे २० वृषपर्वातुबलिनानिकुंभेनमहारणे विश्वेदेवेनविश्वेशःसहायुध्यतवीर्यवान् २१ प्रह्लादस्तु
महावीर्यैर्वीरैःस्वैस्तनयैर्वृतः युयुधेसहकालेनरणेकालइवापरः २२ अनुह्लादःकुबेरेणधनदेनमहारणे गदाहस्तेनयुयुधेक्षोभ
यन्रिपुवाहिनीम् २३ विप्रचित्तिस्तुदैतेयोवरुणेनमहात्मना प्रवृत्तोवैरणकर्त्तुंदैत्यानांनंदिवर्द्धनः २४ बलिस्तुसहशक्रेणसुरेशे
नमहात्मना युयुधेदेवराजेनबलिनाबलवान्रणे २५ शेषादेवाश्चदैत्याश्चजघ्नुरन्योन्यमाहवे विनदंतोमहानादान्प्रासासिशरश
क्तिभिः २६ अदृश्यंतोमहोत्पातायेप्रोक्ताजगतःक्षये मारुताःसप्ततेक्षुब्धाव्यशीर्यंतमहीधराः २७ सप्तचैवोत्थिताःसूर्याःशोषयं
तोमहार्णवान् बहुधाभिद्यतधरावायुनामथितायथा २८ व्युत्थिताश्चमहामेघाःशक्रचापांकितोदराः प्रणेदुःसर्वभूतानिसर्वाःस
तिमिरादिशः २९ देवानामजयोघोरोदृश्यतेकालनिर्मितः घोरोत्पातःसमुद्भूतोयुगांतसमयेयथा ३० नद्यंतरिक्षनदिशोनभूमिर्नभा
स्करोदृश्यतरेणुजालैः ववुश्चवातास्तुमुलाःसुधूमादिशाश्चसर्वास्तिमिरोपगूढाः ३१

२४ २५ २६ २७ २८ २९ ३० ३१ ५ ५

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उरः छादयंतितैः आरूढानांपुंसांअत्युच्छ्रितकंधरत्वेनवक्षस आच्छादकैः ५० स्वाधीनचक्राआत्मायत्तसैन्याः ५१ ५२ ५३ ५४ ५५ ५६

उरश्छदैः सध्वजकिंकिणीकैर्हयैश्चवायोःसमवेगवद्भिः दिशांगजैश्चैवमहाबलैस्तैःकैलासशृंगप्रतिमैर्महद्भिः ५० प्रजग्मुरुग्रायुधचापहस्ताश्चतुर्युगांतेज्वलिताइवोल्काः साध्याश्चदेवाःसुमहाप्रभावाःस्वाधीनचक्राःप्रतिदीप्तवक्त्राः प्रयांतिजांबूनदभूषितांगागांगौघमात्रैर्गगनेविलोघैः ५१ विद्योतयंतोविदिशोदिशश्चमहाबलास्तेजयतांवरिष्ठाः वरिष्ठपुष्टोष्ठभुजाःसुहृष्टावैश्वानरार्कप्रतिमप्रभावाः ५२ तेब्रह्मविद्भिश्चसमस्यमानाःसंपूज्यमानाश्चसुरैःसमस्तैः गंधर्वसंघैरनुगम्यमानावधायतेषामसुराधिपानाम् ५३ वैडूर्यवज्रस्फटिकाग्रचित्रैर्ध्वजैःसुवर्णैश्चपरिष्कृतानाम् रूपप्रभोत्कटभूषणानांदैत्येंद्रनाशायविभूषितानाम् ५४ आत्मप्रभाभिश्चरणोत्कटाभिर्वर्मप्रभाभिश्चतपोनुदाभिः ध्वजोत्तमाभिःस्वशरीरभाभिर्महाप्रभाभिश्चमहोज्ज्वलाभिः ५५ विभांतितेदेववराःससाध्याःप्रध्मातशंखस्वनसिंहनादाः ५६ महारथस्थास्त्रिदिवौकसस्तेमहाबलाःशत्रुबलंप्रयांति महास्त्रहस्तायमसूर्यकायामहासुराणांनिधनायदेवाः ५७ तथैवसर्वेमहतोतितीव्राबलोत्कटाःस्तेसमरंप्रतीताः ययुर्महामेघसमानवर्णाश्चक्रायुधास्तोयदनादनादाः ५८ महेंद्रकेतुप्रतिमामहाबलाःप्रगृह्यसर्वासुरसूदनांगदाम् रणोत्कटालोहितचंदनाक्ताःसहेममाल्यांबरभूषितांगाः ५९ तेयुद्धशौंडाःसुभुजास्त्ववीर्याबलोत्कटाःक्रोधविलोहिताक्षाः ययुःसजांबूनदपद्ममालायथेष्टनानाविधकामरूपाः खड्गप्रभाश्यामलितांसपीठापुरंदरंवैपरिवार्यदेवाः ६० वैडूर्यचामीकरचारुरूपाण्यावध्यगात्रेषुमहाप्रभाणि वर्माणिदैत्यास्त्रनिवारणानिप्रयांतियुद्धायसपत्नसाह्वाः ६१ तैरुत्थितैःकांचनवेदिकाद्यैर्वरध्वजैर्भास्कररश्मिवर्णैः ययौसुराणांपृतनोग्रभासासमुन्नदंतीयुधिसिंहनादान् ६२ इत्येवमुक्तंत्रिदिवेश्वरस्यसैन्यंतदासीत्सुमहत्प्रभावम् युद्धंप्रयातस्यजयावहस्यवधायतेषामसुराधिपानाम् ६३ इतिश्रीमहाभारतेखिलेषुहरिवंशे॰ भ॰ वामनप्रादुर्भावेद्विपंचाशत्तमोऽध्यायः ५२ वैशंपायनउवाच ततःप्रवृत्तोसुरदेवविग्रहस्तदद्भुतोभातिसुरासुराकुलः वेलामतिक्रम्ययुगांतकालेमहार्णवान्योन्यमिवाश्रयंतः १ नानायुधोद्योतविदीपितांगामहाबलाव्यायतकार्मुकास्ते रणोत्सुकावारणहस्तहस्ताःसुदुर्जयास्तोयदनादनादाः २ विस्फारयंतःसहसाधनूंषिचक्राणिचादित्यसमप्रभाणि समुत्क्षिपंतोह्यशनींश्चघोरान्खड्गांश्चतेवज्रमुखाश्चशक्तीः ३ महागदाःकांचनपट्टनद्धास्तथायसान्कार्मुकमुद्गरांश्च शूलांश्चवृक्षांश्चविगृह्यदीप्तान्नदंतिशूराःशतशोरणस्थाः ४

५७ ५८ ५९ ६० ६१ ६२ ६३ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांद्विपंचाशत्तमोऽध्यायः ५२ ततःमहार्णवाइवेतियोजना १ २ ३ ४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

१३ १४ १५ इध्माःप्रस्ताराःशरपंक्तयःपरिधयोगदाइतिसंबंधः १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६

कल्माषदंडाविमलाविपुलारथपंक्तयः यूपाश्चसमकल्पंतयुद्धयज्ञेमहाफले १३ कर्णनालीकनाराचवत्सदंतोपबृंहिकाः तोमराःसोम-
कलशाविचित्राणिधनूंषिच १४ अस्थीन्यत्रकपालानिपुरोडाशाःशिरांसिच आज्यंचरोइंरुधिरंतस्मिन्यज्ञेभिहूयते १५ इध्माःप
रिधयस्तत्रप्रस्ताराविपुलागदाः हयग्रीवोसिलोमाचराहुःकेशीचदानवः १६ विरोचनश्चजंभश्चकुजंभश्चमहाबलः सदस्यास्तत्रतु
मुखेविप्रचित्तिस्तुवीर्यवान् १७ इषवस्तुस्रुवःस्तत्ररथाक्षसदृशाशुभाः धनुष्कोट्योधनुर्ज्याश्चस्रुचस्तत्रमहामखे १८ प्रतिप्रास्था
निकंकर्मवृषपर्वाकरोदिह दीक्षितस्तत्रतुबलिस्तस्यपत्नीमहाचमूः १९ शंबरस्तत्रशामित्रमकरोद्दितिनंदनः अनिरात्रेमहाबाहुर्वि
ततेयज्ञकर्मणि २० दक्षिणास्तस्ययज्ञस्यकालनेमिर्महासुरः वैतानेकर्मणिविभोयःख्यातोहव्यवाडिव २१ त्रिदशानांतुसैन्यस्यश
रीरैर्गतजीवितैः तस्मिन्यज्ञेतुसवनंवर्धितंदैत्यनिर्मितम् २२ देवानांरुधिरंसंख्येपपुरुग्रादितेःसुताः नर्द्दमानाःप्रमुदिताःसोमपानंरणा-
ध्वरे २३ यदाबलिर्महादैत्योविजेतासमरेसुरान् तदाह्यवभृथोयज्ञेभविष्यतिनसंशयः २४ महासुरेंद्रपतयोयज्वानोभूरिदक्षिणाः
वेदवंतोवृत्तवंतःशूराःसर्वेतनुत्युजः २५ त्रैलोक्यहरणेसज्जायुद्धयज्ञायदीक्षिताः बद्धकृष्णाजिनाःसर्वेव्रतिनोमुंजधारिणः २६ ए
कनिश्चयकर्यास्मिंत्रैलोक्यजयकांक्षिणः सुरदानवदैत्यानांशब्दःसमभवन्महान् २७ नानायुधविहस्तानांत्वरितानांप्रधावताम् क्ष्वेडि
तोत्कुष्टनिनदैर्गजबृंहितनिःस्वनैः २८ रथनेमिस्वनैर्घोरैस्तुमुलःसर्वतोभवत् शंखदुंदुभिनिर्घोषैर्हयहेषितनिःस्वनैः २९ हयानां
हेषमाणानांदानवानांचगर्जताम् क्ष्वेडितोत्कृष्टनिनदैःपाणिपादरवैस्तथा ३० दानवानांपरेषांचशस्त्रवंतिमहांतिच समरेभीमकर्मा-
णिसैन्यानिप्रचकाशिरे ३१ ततोनागारथाश्चैवजांबूनदविभूषिताः भ्राजमानाव्यराजंतमेघाइवसविद्युतः ३२ ऋष्टिशक्तिगदास्तीक्ष्ण
शूलशक्तिपरश्वधाः चारुवर्माजिरेतत्रतेषांकेषुभागशः ३३ रथाबहुविधाकाराःशतशोयसहस्रशः हेमप्रच्छन्नशिखराज्वलंतइ
वपावकः ३४ दानवानांसुराणांचसमालोक्यंतसैनिकाः कांचनैःकवचैःसर्वेज्वलिताकर्समप्रभैः ३५ संनद्धाःसमदृश्यंतज्योतींषिग
गनेयथा उद्यतैरायुधैश्छिन्नैस्तलबद्धाःकलापिनः ३६ ऋषभाक्षाःसुरगणाश्चभूसुखगताबभुः नानावर्णाःपताकाश्चध्वजमालाश्च
संयुगे ३७ युध्यतांरणशौंडानांयुद्धमासीत्सुदारुणम् ध्वजालंकारवस्त्राणिकवचानिचरश्मिभिः ३८ भासयामाससर्वाणिरश्मिवर्णा-
निरश्मिवत् उभाभ्यामप्रमेयाभ्यांबलाभ्यांपादचारिणाम् ३९

२७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ षट्योगेश्वराःसनकसनंदनसनातनसनत्कुमारकपिलजैगीषव्याः ४० ४१ इतिश्रीह

एतेचान्येचबहवोदृश्यंतेदेवनिर्मिताः भूमौतथांतरिक्षेचमहोत्पाताःसमंततः ३२ तद्युद्धंदेवदैत्यानांभीमानांभीमदर्शनम् अपश्यत-
गुरुर्ब्रह्मासर्वैरेवसुरैःसह ३३ वेदैश्चतुर्भिःसांगैश्चविद्याभिश्चसनातनः पद्मयोनिर्वृतःश्रीमान्सिद्धैश्चपरमर्षिभिः ३४ नानारू
पिस्तंभसहस्रचित्रमारुह्ययानंददृशेसस्वयंभूः स्फभास्वरभूतसहस्रयुक्तंप्रदीप्यमानंवपुषापरेण ३५ सुतप्तजांबूनदभक्तिचित्र-
आनंदभेरीशतसंप्रणादम् नक्षत्रचंद्रांशुभिरप्रमेयंतंवैडूर्यसोमार्कविभूषितांगम् ३६ तमात्मजोवैपुलहःपुलस्त्यस्तथामरीचिर्भृ
गुरंगिराश्च ऋक्सामभिःसम्यगभिष्टुवंतःसेवंतिदेवंवरदंविमाने ३७ तपावकाल्लोकगुरुस्वयंभुवंसांगाश्चवेदाःसदेवताश्च से
वंतिदेवंभुवनेश्वरेशंभूतानिचान्यानिमहानुभावम् ३८ एतेवभृगुश्चमहर्षिसंघावैश्वानरापावकयोनयश्च सर्वेयथुर्देवपुरोहिता
श्चयुद्धोत्सुकाःसर्वसुरासुराणाम् ३९ योगेश्वराःषट्चदिवाकराभाविभूषणैर्भूषितसर्वदेहाः अंतर्हितावेदहृदश्वनेर्भूस्थानारायण
श्चैवनरश्चदेवाः ४० यज्ञैश्चतुर्वेदधरैश्चतुर्भिःसंपूर्णचंद्रप्रतिमैःसुकांतैः सर्वादिशोनिस्तिमिराश्चकारनवोदितोसौशरदीवचंद्रः
४१ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिदेवासुरयुद्धेसनकादिकागमनंनामत्रिपंचाशत्तमोऽध्यायः ५३ ॥
वैशंपायनउवाच उभयोःसेनयोराजन्भूयोयुद्धमवर्तत नादेनसंचालयतात्रैलोक्यमिदमव्ययम् १ गोमुखाडंबराणांचभेरी
णांमुरजैःसह झल्लरीडिंडिमानांचव्यश्रूयंतमहास्वनः २ प्रवृत्तोयुद्धयज्ञस्तुतुमुलोलोमहर्षणः रणमध्येमहानादःस्वर्गायैःशूरसंम
तः ३ युद्धयज्ञस्यनेताभूत्प्रह्लादोदैत्यसत्तमः विरोचनस्तथाध्वर्युर्युद्धयज्ञप्रवर्तकः ४ होताचैवाचनमुचिर्वृत्रःस्तोत्रोपकल्पकः
मन्त्रादैत्याःसमाख्यातायज्ञकर्मणितत्रवै ५ अनुज्ञातैश्चपितृभिरधिकोवापराक्रमे यजतेत्राभवद्ब्राह्मणःसंयुगेचोपतिष्ठते ६ ऐं
द्रपाशपतब्राह्मस्तूणाकर्णसुदुर्जयम् मंत्रास्तत्राप्यवर्ततसाध्वनुह्लादयोजिताः ७ उद्गाताचमयःश्रीमान्स्थितःशत्रुभयंकरः
विनदन्दितिजःश्रेष्ठोदेवानीकंविदारयत् ८ बलिस्तुराजाद्युतिमान्स्वयंतत्रमहासुरः जप्यहोमैश्चसंयुक्तोब्रह्मत्वमकरोत्प्रभुः ९
रणाग्निर्ज्वलितोघोरोवैरेधनसमीरितः हूयतेत्वसुरैस्तत्रदेवोविष्णुःसुरैःसह १० शंखशब्दैःसुतुमुलैर्भेरीणांचमहास्वनैः उ
द्घुष्टंविमलंचैवब्रह्मण्यंसुप्रयुज्यते ११ बलश्चबलकश्चैवपुलोमाचमहासुरः प्रशास्तंचसमभूत्त्वासन्नसम्यक्प्रचक्रिरे १२

त्रिपंचाशत्तमोऽध्यायः ५३ उभयोर्गोमुखादीनांनादेनप्रोत्साहितयोःसेनयोः १ गोमुखादयस्तूर्यविशेषाः २ ३ ४ स्तोत्रोपकल्पकःप्रस्तोदाः ५ ६ ७ ८ ९ १०
११ १२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ऊर्णापांडुराश्वेतोर्णावत् शुक्लाः पत्तोर्णेतिपाठे धौतकौशेयवत् शुक्लाः पत्तोर्णंधौतकौशेयमितिकोशात् ४० ४१ पञ्चवाजैःशरपुंखवेगितैः ४२ ४३ ४४

रजःप्रच्छादयामासपत्तोर्णपांडुरादिशः दिव्यायुधधराःसर्वेदीप्तायुधपरिच्छदाः ४० पतितंस्तंभिरेन्योन्यमनीकंप्रत्यनीकतः गिरिकूटो
च्छ्रयाःसर्वेतदातेदेवदानवाः ४१ अन्योन्यमभिनिघ्नंतोरणस्थाश्चित्रयोधिनः बाणैःसुरुचिरैस्तीक्ष्णैःपञ्चवाजैर्दुरासदैः ४२ मुद्गरैस्त्रिशू
लैःशूलैरयस्तुंडैरुलूखलैः वज्रैरशनिकल्पैश्चखड्गवृक्षादिभिस्तथा ४३ तथाप्रवर्तितेतेषांप्रमर्देद्भुतविक्रमे सावित्रस्यवधंप्रेप्सुर्बा
णोजग्राहकार्मुकम् ४४ शरजालेनदिव्येनछादयानःसुरोत्तमम् मंत्रैर्हुतइवार्चिष्मान्संप्रजज्वालतेजसा ४५ सागराभांमहासेनांदे
वानांदैत्यपुंगवः संशोषयतिबाणौघैरर्कांशुभिरिवार्णवम् ४६ मारुतःसुमहावेगःसावित्रःशक्तिमुत्तमाम् चिक्षेपबलिपुत्रायशक्रो
शनिमिवाद्रये ४७ आपतंतींचतांशक्तिंमहोल्कांज्वलितामिव द्विधाच्छिन्नांक्षुरप्रेणबाणेनाद्भुतकर्मणा ४८ हतायामथशक्त्यां
तुसावित्रोदेवसत्तमः विश्वकर्मकृतंदिव्यंसुतीक्ष्णंदानवार्दनम् ४९ सुपीनधारंविमलंविपुलंचंद्रवर्चसम् अगृह्णान्निशितंखड्गमाशी
विषमिवोरगम् ५० तंगृहीत्वारणमुखेप्रज्वलंतंमहाप्रभम् बाणाभ्यासेमहातेजाःखड्गपाणिरवस्थितः ५१ सतंस्थितमथालक्ष्यसावित्रं
बलिनंदनः लोहिताख्यंमहाकायंचिक्षेपेषुंननादच ५२ ततोर्ककिरणाकारानशनिप्रतिमांश्छितान् संदधेचाशुबाणौघानाशीविष
शिलीमुखान् ५३ रुक्मपुंखान्प्रदीप्ताग्रानुग्रवेगानलंकृतान् आकर्णपूराञ्चिक्षेपशरानुग्रान्समंततः ५४ दृढचापप्रमुक्तास्तेशरावैश्वा
नरप्रभाः सावित्रंछादयामासुःकैलासमिवतोयदाः ५५ संछाद्यमानःशरौघैर्बाणेनबलिसूनुना पराङ्मुखःसुरवरःप्रयातःसरथध्व
जः ५६ पराजित्यसतंसावित्रंबाणःपरमहर्षितः प्रगृह्यकार्मुकंघोरंगतःशक्ररथंप्रति ५७ बलस्याप्यसुरःश्रेष्ठःप्रगृह्यमहतींगदाम् ध्रु
वायवसवेमूर्ध्निरौद्रांचिक्षेपदानवः ५८ तस्यनिर्मथितस्त्वसौहेमचित्रंचचर्मवै गदावेगेनभीमेनध्रुवस्यसमरेतदा ५९ शेषाश्चवसु
वःसर्वेदिव्यास्त्रैर्घोरदर्शनैः प्राच्छादयन्रणेदैत्यमादित्यमिवतोयदाः ६० ततःसमाहितोबाणैर्बलोदानवसत्तमः अवातरद्रथात्तस्मात्
गदामुद्यम्यवेगवान् ६१ पातयामासशत्रूणांसमाविध्यमहासुरः दिशःप्राद्रावयत्सर्वांस्त्रिदशान्सामहागदा ६२ इंद्राशनिरिवेंद्रे
णप्रसृष्टासामहाबला तस्याःसविद्युद्घोषायास्तेनशब्देनवेजिताः ६३ व्यद्रवत्परिभ्रष्टाश्चरथेभ्योरथिनस्तदा तदुदीर्णंरथानीकंसू
र्याभिमेघानिःस्वनम् ६४ देवानांशरधाराभिःसमंतादभ्यवर्षत क्षुरकैर्विशिखैर्भल्लैर्वत्सदंतैःशिलीमुखैः ६५

४५ ४६ ४७

४८ ४९ ५० बाणाभ्यासेबाणसमीपे ५१ सावित्रंचिक्षेप ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६६ ६७ ६८ ६९ ७० ७१ ७२ ७३ ७४ ७५ ७६ ७७ ७८ ७९ ८० इतिश्रीमहाभारतेहरिवं-

मुहुर्मुहुर्महातेजाःप्रत्याविध्यन्महासुरः बलकस्तु गदापाणिर्व्यादितास्यइवांतकः ६६ तडिद्गणार्कसदृशोवैश्वानरइवापरः पिबन्निवशरौघांस्तान् तेनचापसमुच्छ्रितान् ६७ अभ्यद्रवत्तदैत्येंद्रोमहार्णवइवापरः अवस्फूर्जन् दिशःसर्वाःस्वेनवीर्येणदानवः ६८ आरुजन्स्त्रिदशान्दैत्यःसिंधुवेगान्नगाइव समुद्रस्तरसादेवान्वायुर्वृक्षानिवौजसा ६९ शमयन्सुमहेष्वासानभ्विष्वास्समसज्जत आपश्चैवानिलश्चैवववर्षतुररिंदमौ ७० शरवर्षाणिदीप्तानिमेघाविवपरंतपौ क्षिप्तांस्तान्विशिखान्दीप्तानंतरिक्षेसचिच्छिदे ७१ अमृष्यमाणस्तत्कर्मध्रुवस्तमभिदुद्रुवे तौपृथक्शरवर्षाभ्यामन्योन्यमभिजघ्नतुः ७२ उत्तमाभिजनौशूरौदेवदैत्यौयशस्करौ तौनरवेरिवशार्दूलौदंतैरिवमहाद्विपौ
७३ रथशक्तिभिरन्योन्यंविशिखैश्चाप्यकृंतताम् निर्भिंदंतौचगात्राणिविलिखंतौचसायकैः ७४ स्तंभयंतौचबलिनौमतुदंतौस्थितौरणे चरंतौविविधान्मार्गान्मंडलानिचभागशः ७५ मुद्गरैर्जघ्नतुःकुद्धावन्योन्यमभिमानिनौ असिभ्यांचर्मणादिव्यौविपुलेचशरासने ७६
निकृत्याचलसंकाशौबाहुयुद्धंप्रचक्रतुः व्यूढोरस्कौदीर्घभुजौनियुद्धकुशलावुभौ ७७ बाहुभिःसमसज्जेतामायसैःपरिघैरिव तयोरासीत् भुजाघातैर्निग्रहःप्रग्रहस्तथा ७८ अतीवभीमःसंह्रादोवज्रपर्वतयोरिव द्विपाविवविषाणाग्रैःशृंगैरिवमहावृषौ ७९ अन्योन्यमभिसंरब्धौमुहूर्तपर्यकर्षताम् ततःपराजितोदेवोबलकेनतथाध्रुवः रथंत्यक्त्वाभयात्तस्यप्रनष्टःप्राङ्मुखोवसुः ८० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिवामनप्रा० वसुभ० चतुःपंचाशत्तमोऽध्यायः ५४ वैशंपायनउवाच पुनरेवतुतत्रासीन्महायुद्धंसुदारुणम् कुद्धस्यनमुचेश्चैवधरस्यचमहात्मनः १ संरब्धौचमहाबाहूमहेष्वासावरिंदमौ परस्परमुदैक्षेतांदहंताविवलोचनैः २ विस्फार्यचमहाचापंहेमपृष्ठंदुरासदम् संरंभात्सवसुश्रेष्ठस्त्यक्त्वाप्राणानयुध्यत ३ ससायकमयैर्जालैर्धरोदैत्यरथंप्रति भानुमद्भिःशिलाधौतैर्भानोःप्राच्छादयत्प्रभाम् ४ ततःप्रहस्यनमुचिर्धरस्यचशिलाशितान् असृजत्सायकान्दीप्तान्भीमवेगान्दुरासदान् ५ महातेजामहाबाहुर्महावेगोमहारथः विव्याधातिबलोदैत्योनवभिर्निशितैःशरैः ६ सतोत्त्रैरिवमातंगोवार्यमाणःपतत्रिभिः अभ्यधावच्चसंकुद्धोनमुचिंवसुसत्तमः ७ तमापतंतंवेगेनसंरंभान्नमुचीरणे दैत्यःप्रत्यसरद्देवंमत्तोमत्तमिवद्विपम् ८ ततःप्रध्मापयच्छंखंभेरीशतनिनादितम् विक्षोभ्यतद्बलंहर्षादुद्धूतार्णवसंभ्रमम् ९ अश्वान्ऋक्षसवर्णाभान्हंसवर्णैःसुवाजिभिः मिश्रयन्प्रसरेदैत्योवसुंप्राच्छादयच्छरैः १०

शेभविष्यपर्वणिटीकायांचतुःपंचाशत्तमोऽध्यायः ५४ १ २ ३ ४ ५ ६ ७ प्रत्यसरत् अभिससार ८ ९ १०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

११ १२ महामेघोपमंमहांतोमेघायत्राकाशेतदुपमंसंकीर्णमेघेननभसातुल्यमित्यर्थः आयोधनंयुद्धभूमिः यमराष्ट्रोपममित्यपिपाठः १३ नैकसंश्रयाः
उभयपक्षीयाःताभ्यांनिमित्तभूताभ्यांस्वजयमाशंसंतः १४ देवदानवयोर्धरनमुच्योः १५ १६ १७ १८ १९ २० २१ २२ २३

समाश्लिष्टावथान्योन्यंवसुदानवयोरथौ दृष्ट्वाप्राकंपतमुहुस्त्रिदशानांमहद्बलम् ११ क्रोधसंरंभताम्राक्षौप्रेक्षमाणौमुहुर्मुहुः गर्जंताविव
वशार्दूलौप्रभिन्नाविववारणौ १२ महामेघोपमंरौद्रमासीदायोधनंतयोः रथाश्वनरसंबाधंमत्तवारणसंकुलम् १३ समाजमिवतंदृष्ट्वाः
प्रेक्षमाणामहारथाः आशंसंतोजयंताभ्यांयोधावैनैकसंश्रयाः १४ तयोःप्रेक्ष्यंतसंरंभंसान्निकृष्टमहास्त्रयोः सिद्धगंधर्वमुनयोदेवदान
वयोस्तदा १५ तौच्छादयंतावन्योन्यंसमरेनिशितैःशरैः शरजालावृतव्योमचक्रतुश्चमहाबलौ १६ तावन्योन्यंजिघांसंतौशरैस्तीक्ष्णै
र्महारथैः प्रेक्षणीयतमावास्तांवृष्टिमंताविवांबुदौ १७ सुवर्णविकृतान्बाणान्प्रमुंचंतावरिंदमौ भास्कराभंतदाकाशमुल्काभिरिवचक्र
तुः १८ तयोःशराःप्रकाशंतेदेवदानवयोस्तदा पंक्त्यःशरदमत्तानांसारसानामिवांबरे १९ त्रिदशाश्वगजानांहिशरीरैर्गतजीवितैः क्षणे
नसंहृताभूमिर्मेघैरिवनभस्तलम् २० ततःसधारंज्वलितंसूर्यमंडलसन्निभम् धरायवसवेमुक्तंचक्रंनमुचिनारणे पततातेनचक्रेणधर
स्यस्यंदनोत्तमः २१ सध्वजःसायुधःसाश्वोदग्धोर्ककिरणप्रभः सुत्यक्त्वास्यंदनंदेवःप्रदीप्तंचक्रतेजसा २२ भयात्तस्यासुरेंद्रस्यगतः
स्वगृहमुत्तमम् पराजित्यसुरंदैत्यानमुचिर्बलगर्वितः २३ प्रयातःस्वेनसैन्येनभूयःसुरचमूप्रति यौतौमयश्चत्वष्टाचदेवदैत्येषुविश्रुतौ
२४ प्रवरौविश्वकर्माणौमायाशतविशारदौ घोरस्तयोःसंप्रहारःप्रावर्त्ततसुदारुणः २५ अन्योन्यस्पर्द्धिनोस्तत्राचिरात्प्रभृतिसंयुगे त्व
ष्टातुनिशितैर्बाणैर्दैत्यंतुबलदर्पितम् २६ पराक्रांतपराक्रम्यविव्याधत्रिशताशरैः मयस्तुप्रतिविव्याधत्वष्टारंनिशितैःशरैः २७ सुघो
तैःसुप्रसन्नाग्रैःशातकुंभविभूषितैः ननाददितिजःश्रेष्ठोहतस्त्वष्टुःशरैर्मयः २८ संक्रुद्धोदैत्यसैन्यस्याविचिन्वन्निवजीवितम् शक्तिंक
नकवैडूर्यचित्रदंडांमहाप्रभाम् २९ देवोगृहीत्वासमरेदैत्येंद्रंसमपातयत् भीमांसर्वायसींदृष्ट्वापुरंदरइवाशनि ३० तांत्वष्टुर्भुजनिर्मुक्तां
अर्कवैश्वानरप्रभाम् मयश्चिच्छेदतीक्ष्णाग्रैस्तूर्णंसप्तभिराशुगैः ३१ ततःक्षुरवन्निवप्राणांस्त्वष्टुःकोपान्महासुरः प्रेषयामाससंरब्धः
शरान्बर्हिणवाससः ३२ चिच्छेदबाणांस्त्वष्टातान्ज्वलितैर्नतपर्वभिः दैत्यस्यसुमहावेगैःसुवर्णविकृतैःशरैः ३३ तौनृपाविवनर्दंतौबलि
नौवासितांतरे शार्दूलाविवचान्योन्यंप्रसक्तावभिजघ्नतुः ३४ अन्योन्यप्रतियुध्यंतावन्योन्यंवधकाक्षिणौ अन्योन्यमभिवीक्षंतौक्रुद्धावा-
शीविषाविव ३५ ७७
२४ २५ २६ २७ त्वष्टुःत्वष्टारं २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२

महागजाविवासाद्यविषाणाग्रैःपरस्परम् शरैःपूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ३६ ततःसुविपुलांदीप्तांमयोरुक्मांगदोगदाम् त्वष्टरि
प्राहिणोत्क्रुद्धःसर्वप्राणिहरांरणे ३७ तयाजघानातिरथस्त्वष्टुरुत्तमवाजिनः गदयादानवःक्रुद्धोवज्रेणेंद्रइवाचलान् ३८ ततःक्रुद्धो
महादैत्यःक्षुराभ्यामथसंयुगे पुनर्द्वाभ्यांशराभ्यांतुनिशिताभ्यामहारणे ३९ ध्वजंत्वष्टुरथाच्छित्वासूतंनिन्येयमक्षयम् महाबलान्
महावेगान्सदश्वान्गदयाहनत् ४० दृष्ट्वात्वष्टाहतंसूतमश्वांश्चविनिपातितान् हताश्वंरथमुत्सृज्यसूतंचपतितंभुवि ४१ विस्फार-
यन्महाचापंस्थितोभूमाविवाचलः हताश्वसूतंविरथंदृष्ट्वारिपुमवस्थितम् ४२ जयश्रियासेव्यमानोदीप्यमानइवानलः मयःकालांतक
प्रख्यश्चापपाणिरदृश्यत ४३ प्रादहद्देवसैन्यानिदावाग्निरिवकाननम् त्वष्टुःसोक्षिपतानुग्रान्नाराचांस्तिग्मतेजसः ४४ चतुर्दश-
शिलाधौतान्सायकान्विविधाकृतीन् तेपपुस्तस्यसैन्यस्यशोणितंरुक्मभूषणाः ४५ आशीविषाइवक्रुद्धाभुजंगाःकालचोदिताः तेक्षितिंस-
मवर्त्तंतशोभंतेरुधिरोक्षिताः ४६ अर्द्धप्रविष्टाःसंरब्धाबिलानीवमहोरगाः तंमयोविध्यत्त्वष्टातुजांबूनदविभूषितैः ४७ चतुर्दशभिरत्यु-
ग्रैर्नाराचैरभिदारयन् तेतस्यदैत्यस्यभुजंसव्यंनिर्भिद्यपत्रिणः ४८ विदार्यविविशुर्भूमिंपन्नगाइववेगिनः तेप्रकाशंतनाराचाःप्रविशं
तोवसुंधराम् ४९ अस्तंगच्छंतमादित्यंप्रविशंतइवांशवः मयस्त्रिभिरथानच्छत्त्वष्टारंतुपतत्रिभिः ५० सुपर्णवेगैर्विकृतैर्ज्वलद्भिःप्रा
णनाशनैः त्वष्टाथमयनिर्मुक्तैःसायकैरर्दितःप्रभुः ५१ अपयातोरणाद्धित्वाव्रीडयाभिसमन्वितः तंतत्रहतसूताश्वंभुजगइवनिर्विषम्
५२ त्वष्टारंविरथंहत्वामुदितःसतुदानवः विस्फार्यमाणोरुधिरंचापंरुक्मांगददृढम् ५३ रणेव्यतिष्ठद्दैत्येंद्रोज्वलन्निवहुताशनः पु
लोमातुबलश्लाघीदृप्तोदानवसत्तमः ५४ रथेश्वेतहयेनेहसार्द्धंयुध्यतिवायुना सर्वेषामेवभूतानांयःप्राणःकथ्यतेद्विजैः ५५ ब
लिनाकालकल्पेनवायुनासहसंगतः पुलोम्नस्तत्रपवनःश्रुत्वाज्यातलनिःस्वनम् ५६ नामृष्यततथामत्तोगजःप्रतिगजस्वनम् दैत्य
चापच्युतैर्बाणैःप्राच्छादयतदिशोदश ५७ रश्मिजालैरिवार्कस्यविततंसांबरंजगत् सताम्रनयनःक्रुद्धःश्वसन्निवमहोरगः ५८ वृतो
दैत्यशरैर्वायूरश्मिवानिवभास्करः दैत्यचापभुजोत्सृष्टाःशराबर्हिणवाससः ५९ रुक्मपुंखाःप्रकाशंतहंसाःश्रेणीकृताइव चापध्वज-
पताकाभ्यःशस्त्रादीप्तमुखाश्च्युताः ६० प्रासवंतश्चदृश्यंतेदैत्यस्यापततःशराः एवंसुतीक्ष्णान्खचरान्शलभानिवपावके ६१

५३ ५४ ५५ ५६ ५७ ५८ ५९ शस्त्राः बाणाः च्युताः धनुषइत्यर्थः ६० ६१ ६२ ६३ ६४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पूषाणंपूष्णं ८९ ९० अग्निचक्रंअलातचक्रं ९१ ९२ ९३ ९४ ९५ ९६ संप्रकाशंतअडभावआर्षः ९७ ९८ ९९ सपू-

विस्फार्यसुमहच्चापंहेमजालविभूषितम् पूषाणंदितिजोपश्यत्क्रुद्धोघोरेणचक्षुषा ८९ भुजाभ्यामाददानस्यसंदधानस्यवैशरान् मुंच
तःकर्षतोवापिददृशुस्तत्रनांतरम् ९० अग्निचक्रोपमंदीप्तंमंडलीकृतकार्मुकम् तदासीद्दानवेंद्रस्यसव्यदक्षिणमस्यतः ९१ रुक्मपुंखै-
स्ततस्तस्यचापमुक्तैःशितैःशरैः प्राच्छाद्यंतशिलाधौतैर्दिशःसूर्यस्यचप्रभाः ९२ ततःकनकपुंखानांशराणांनतपर्वणाम् ९३ नभस्चरा
णांनभसिदृश्यंतेबहवोव्रजाः गिरिकूटनिभाच्चापात्प्रभवंतःशरोत्तमाः ९४ श्रेणीभूताःप्रकाशंतेयांतःश्येनाइवांबरे गृध्रपत्रान्शिला
धौतान्कार्तस्वरविभूषितान् ९५ महावेगान्प्रशस्ताग्रान्मुमोचदितिजःशरान् ततश्चापबलोद्भूताःशातकुंभविभूषिताः ९६ देहेसम
वकीर्यंतपूष्णःसंन्निहिताःशराः तेव्योम्निरुक्मविकृताःसंप्रकाशंतसर्वशः ९७ खद्योताइवधर्मांतेखेचरंतःसमंततः शिलाधौताःप्रस-
न्नाग्राःपूषाणंसिषिचुःशराः ९८ पर्वतंवारिधाराभिर्यथाप्रावृषितोयदाः ततःप्रच्छादयामासपूषाणंशरवृष्टिभिः ९९ पर्वतंवारिधारा
भिश्छादयन्निवतोयदाः ततःसपूष्णोदेवस्यबलवीर्यपराक्रमम् १०० व्यवसायंचसत्त्वंचपश्यंतित्रिदशाद्भुतम् तांसमुद्रमिवोद्भूतांशरवृ-
ष्टिंसमुत्थिताम् १०१ नाचिंतयत्तदापूषादैत्यंचाभ्यद्रवद्रणे हेमपृष्ठमहानादपूष्णआसीन्महद्धनुः १०२ विकृतंमंडलीभूतंशक्राशनिनि
भम् ततःशराःप्रादुरासन्पूरयंतइवांबरम् १०३ सुवर्णपुंखाःपूष्णस्तेप्रभवंतःशरासनात् मालेवरुक्मपुंखानांविततांव्योम्निपत्रिणा
म् १०४ प्रादुरासीन्महाघोराबृहतीपूर्णकार्मुकात् ततोव्योम्निविभक्तानिशरजालानिसर्वशः १०५ आहतानिव्यशीर्यंतशरैःसन्नतपर्वभिः
ततःकनकपुंखानांछिन्नानांकंकवाससाम् ६ पततांपात्यमानानांरवमासीच्चाहवेतरणे पूषाप्रापूरयद्बाणैर्हयग्रीवंशिलाशितैः ७ नासा-
केरुकसहस्रांर्दिव्यहेमपरिष्कृतैः ततोव्यसृजदुग्राणिशरजालानिदानवः ८ अमर्षीबलवान्क्रुद्धोदिधक्षन्निवपावकः पूष्णस्तांजोद्ध्व
जंचैवपताकांधनुरेवच ९ रश्मीन्योक्त्राणिचाश्वानाहयग्रीवोरणेच्छिनत् अथाप्यश्वान्पुनर्हत्वाचतुर्भिःसायकोत्तमैः ११० सारथिंसु
महातेजारथोपस्थादपातयत् कृतस्तुविरथःपूषाहयग्रीवेणसंयुगे ११ पूषातस्यरथाभ्यासात्सयत्नोतेनवोजितः गतःशक्ररथाभ्यासमु-
त्तेभ्यःसुसुखादिव १२ तत्राद्भुतमिदंभूयोयुद्धवर्त्ततदारुणम् कृतप्रतिकृतंघोरंशंबरस्यमगस्यच १३ सप्तकिष्कुपुरीणाहंद्वादशारत्नि
कार्मुकम् चापंचाशानिनिर्घोषंदृढज्यंभारसाधनम् कर्षन्रथाक्षसदृशान्व्यसृजत्सायकान्बहून् १४

ष्णः पूष्णायुध्यमानस्यअदेवस्यअसुरस्य १०० १०१ १०२ १०३ १०४ १०५ १०६ १०७ १०८ १०९ ११० १११ ११२ ११३ ११४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

सुवर्णविकृतान्चित्रान्मुमोचादितिजःशरान् तमंतकमिवक्रुद्धमापतंतंसमारुतः ६२ त्यक्त्वाप्राणानतिक्रम्यविव्याधनवभिःशरैः तस्यवेग
मसह्यंदृष्ट्वावायुःसनातनः ६३ उत्तमंजवमास्थायव्यधमत्सायकव्रजान् तेजोविधम्यबलवान्शरजालानिमारुतः ६४ विव्याधदैत्यं
विंशत्याविशिखैर्नतपर्वभिः मरुद्गणानांप्रवरादशदिव्यामहौजसः ६५ साधुसाध्वितिवेगेनासिंहनादंप्रचक्रिरे तस्मिन्समुत्थिताशब्दस्तु
मुल्लोमहर्षणे ६६ अभ्यधावन्दितिजाःपौलोमाःक्रोधमूर्च्छिताः तेसमासाद्यपवनंसमावृण्वन्शरोत्तमैः ६७ पर्वतंवारिधाराभिःप्रा
वृषीवबलाहकाः तेपीडयंतःपवनंक्रुद्धाःसप्तमहारथाः ६८ प्रजासंहरणेघोराःसोमंसप्तग्रहाइव ततोदक्षिणमाक्षोभ्यंनानारत्नविभू-
षितम् ६९ करंगजकराकारमुद्यम्ययुधिमारुतः तेषांमूर्धसुदैत्यानांपातयामासवीर्यवान् ७० निहतावायुवेगेनतेनसप्तमहारथाः
त्यक्त्वाप्राणान्पुलोमातुविव्याधनवभिःशरैः ७१ प्रदर्पितमसह्यंदृष्ट्वावायुंसनातनम् असंचिंत्यसुरोधांस्तान्ज्वलितांश्चपुलोमतः ७२
तेषांविदार्यतेजांसिदानवानांमहात्मनाम् शोणितक्लिन्नमुकुटागैरिकाक्ताइवाद्रयः ७३ तेभिन्नवर्मास्थिभुजाःपतंतोभांतिदानवाः मातंग-
यूथसरुग्णापुष्पिताइवपादपाः ७४ तेषांविदारितेदेहेदानवानांमहात्मनाम् ततःप्रावर्त्ततनदीरौद्ररूपाभयावहा ७५ प्रस्रवंतीरणेरक्तं-
भीरूणांभयवर्द्धिनी देवैर्दैत्यगणैश्चैवरुधिरौघपरिप्लुता रणभूमिरभूद्घोरातत्रतत्रसहस्रशः ७६ संप्राप्तागतसत्वैश्चयक्षराक्षसखेचरैः
सानुगैःसपताकैश्चसोपासंगरथध्वजैः ७७ शीर्णकुंभैस्तथानागैर्घंटाभिस्तुविभूषितैः सुवर्णपुंखैर्ज्वलितैर्नाराचैस्तिग्मतेजसैः ७८ दै
वदानवनिर्मुक्तैःसविषैरुरगैरिव प्रासतोमरनाराचैःशक्तिखड्गपरश्वधैः ७९ सुवर्णविकृतैश्चापिगदामुशलपट्टिशैः कनकांगदकेयूरैर्मणि
भिश्चसकुंडलैः ८० तनुत्रैःसतलत्रैश्चहारैर्निष्कैश्चशोभनैः हतैश्चादितिजैस्तत्रशस्त्रस्पंदनवर्जितैः ८१ पतितैरपिविद्धैश्चशतशोथस
हस्रशः निपातितध्वजरथोहतवाजिरथद्विपः ८२ विमर्द्दोदेवदैत्यानांसदृशःकर्मणाबभौ अथदैत्यसहस्रेणपौलोमेनमहासुरः ८३ सं
वृतःपवनःश्रीमान्गदामुशलपाणिना ८४ तेजघ्नुःशतसाहस्राःपवनंदानवोत्तमाः तैर्वध्यमानःसबभौसमंतादर्पितैःशरैः ८५ हत्वाष्टौ
तत्रयोधानांशतानिपवनःप्रभुः कृत्वामार्गंसुरश्रेष्ठःननादसुमहारथः ८६ अद्यापिचसुविस्तीर्णःपंथाःसंदृश्यतेदिवि नाम्नावायुरथोना
मसिद्धाःपश्यंतितंदिवि ८७ वैशंपायनउवाच हयग्रीवस्तुदितिजःपूषाणंप्रतिवीर्यवान् ननादसुमहानादःसिंहनादंमहारथः ८८

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७

अदृश्यतदिवस्तंभःशतशृंगइवाचलः येन्येदैत्याश्चसाध्याश्चयेचविश्वेचदेवताः ५२ क्षिपंत्यस्त्राणिदिव्यानितानिसोथसतासुरः युध्यमान
श्चसमरेसरथःसोसुरोत्तमः ५३ गंधर्वनगराकारस्तत्रैवांतरधीयत तेभीताःसमुदीक्षंतस्त्रिदशाभीमविक्रमाः ५४ सहस्राक्षमायंससमरेशं
बरंचित्रयोधिनम् सभ्रगोभयसंत्रस्तोदानवेंद्रस्यसंयुगे ५५ रथंत्यक्त्वामहाभागोमहेंद्रःशरणंगतः पराजित्यतुतंदेवंदानवेंद्रःप्रतापवान्
५६ गतोयत्रमहातेजाजातवेदामहाप्रभः सर्वान्हृताग्निरुग्राभिःक्रुद्धस्तर्जयतेबली भवाम्येषांहितमृत्युरित्युक्त्वांतरधीयत ५७
वैशंपायनउवाच एतस्मिन्नंतरेभूत्वाब्राह्मणेंद्रोमहाबलः जघानसोमःशीतास्त्रोदानवानांचमूरणे ५८ कैलासशिखराकारोद्यु
तिमद्भिर्गणैर्वृतः अवधीद्दानवान्दृष्ट्वादंडपाणिरिवांतकः ५९ पोथयन्दृथवृंदानिवाजिवृंदानिवैप्रभुः दैत्येषुविचरन्श्रीमान्युगांतेकाल-
वद्बली ५० सोमर्षद्रथजालानिउरुवेगेनचंद्रमाः ददाहदानवान्सर्वान्दावाग्निरिवचोदितः ५१ मृडन्रथेभ्योरथिनोगजेभ्योगजयोधि
नः सादिनश्चाश्वपृष्ठेभ्योभूमौचापिपदातिनः ५२ शीतेनव्यधमत्सर्वान्वायुर्वृक्षानिवौजसा चंद्रमाःसुमहातेजादानवानांमहाचमूम्
५३ तदस्त्रमभवत्तस्यप्रदिग्धंशत्रुशोणितैः पिनाकमिवरुद्रस्यक्रुद्धस्याभिघ्नतःपशून् ५४ युगांतकोपमःश्रीमान्दैत्येषुव्यचरद्बली
आचार्यमहतींसेनांप्राद्रवंतींपुनःपुनः ५५ चंद्रंमृत्युमिवायांतंदृष्ट्वायोधाविसिस्मयुः यतोयतःप्रक्षिपतिशिशिरास्त्रंतमोनुदः ५६
ततस्ततोव्यशीर्यंतदैत्यसैन्यानिसंयुगे व्यदारयन्ससैन्यानिस्वबलेनाभिसंवृतः ५७ ग्रसमानमनीकानिव्यादितास्यमिवांतकम् तंत
थाभीमकर्माणंगृहीतास्त्रंमहाहवे ५८ दृष्ट्वाशशांकमायांतंदैत्याभ्रंचंद्रभास्करौ तालमात्राणिचापानिकर्षमाणौमहाबलौ ५९ छा
दयंतौशरैश्चंद्रंवृष्टिमंताविवांबुदौ अथविस्फार्यमाणानांकार्मुकाणांसुरासुरैः १६० अभवत्सुमहाशब्दोदिशःसन्नादयन्निव विनद-
द्भिर्महानागैर्हेषमाणैश्चवाजिभिः ६१ भेरीशंखनिनादैश्चतुमुलःसर्वतोभवत् युयुत्सवस्तेसंरब्धाजयगृध्रायशस्विनः ६२ अन्योन्यम-
भिगर्जंतोगोष्ठेष्विवमहावृषाः शिरसापात्यमानानांसमरेनिशितैःशरैः ६३ अश्मवृष्टिरिवाकाशेह्यभवत्सेनयोस्तयोः कुंडलोष्णीषधा
रीणिजातरूपस्रजांसिच ६४ पतितानिस्मदृश्यंतेशिरांसिरणमूर्द्धनि विशिखैर्मथितैर्गात्रैर्बाहुभिश्चसकार्मुकैः ६५ सहस्राभरणैश्चान्ये
र्विच्छिन्नैरुचिरोक्षितैः कवचैरावृतैर्गात्रैरुरुभिश्चंदनोक्षितैः ६६ मुखैश्चचंद्रसंकाशैस्तप्तकुंडलभूषणैः गजवाजिमनुष्याणांसर्वगात्रैःस
मंततः ६७

५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्रोधसंरक्तनयनः शंबरः सर्वयोगवित् तेनवित्रास्यमानानिदेवसैन्यानिसर्वशः ११५ समकंपंतभीतानिसिंधोरिवमहोर्मयः तमापतंतंसं
प्रेक्ष्यविरूपाक्षंविभीषणम् १६ भगःप्रस्फुरमाणोष्ठस्त्वरमाणोव्यदारयत् ततोभगोमहेष्वासोदिव्यंविस्फारयन्धनुः १७ अवाकिरन्
दैत्यगणान्शरजालेनछादयत् तमभ्यगाद्भगोदैत्यंतूर्णमस्यंतमंतिकात् १८ मातंगमिवमातंगोवृषभंतिवृषोयथा तौप्रगृह्यमहावेगौ
धनुषीभारसाधने १९ प्रच्छादयेतामन्योन्यंतक्षमाणौरणेशरैः तयोःसुतुमुलंयुद्धमासीद्घोरंमहारणे २० भगशंबरयोर्भीममप्रमेयंमहा
त्मनोः अथपूर्णायतोत्सृष्टैःशरैःसुन्नतपर्वभिः २१ व्यदारयेतामन्योन्यंकार्ष्णानिभिद्यचर्मणी तौतुविक्षतसर्वांगौरुधिरेणसमुक्षितौ २२
संप्रेक्ष्यमाणौरथिनावुभौपरमदुर्मदौ तक्षमाणौसितैर्बाणैर्नान्वीक्षितुमशक्नुताम् २३ अथविव्याधसमरेत्वरमाणःसुरोभगम् नाराचैः
क्रोधताम्राक्षःकालांतकयमोपमः २४ गरुत्मानिवचाकाशेपोथयानोमहोरगम् नाराचान्यपतन्देहेतूर्णंशंबरचोदिताः २५ तानंतरिक्षे
नाराचान्भगश्चिच्छेदपत्रिभिः ज्वलंतमचलश्रेष्ठंवैश्वानरसमप्रभम् २६ ततोभगंचतुःषष्ट्याविव्याधासुरसत्तमः शिलीमुखैर्महावे
गैर्जांबूनदविभूषितैः २७ तदातत्सुचिरंकालंयुद्धसमभिवाभवत् शंबरस्यचमायाभिर्नादृश्यततत्तोंबरम् २८ दोर्भ्यांक्षिपतश्चापर-
णोविष्टभ्यातिष्ठतः श्रूयतेधनुषःशब्दोविस्फूर्जितमिवाशनेः २९ सभगस्यहयान्हत्वासारथिंचमहाहवे अभ्यवर्षच्छितैरेनंपर्जन्यइववृष्टि
मान् १३० नतस्यासीदनिर्भिन्नंगात्रेद्व्यंगुलमंतरम् भगदेवस्यदैत्येनशंबरेणास्त्रघातिना ३१ दैत्यस्यचाद्भुतंदिव्यमस्त्रमस्त्रेणधारयन्
मायायुद्धेनमायावीशंबरोस्त्रमयोभवत् ३२ अवंचयद्रूपंदैत्योमायाभिर्लाघवेनच भगस्तस्यरथस्याश्वंशरवर्षैरवाकिरन् ३३ सहस्रमा
योद्युतिमान्देवसेनानिषूदयत् अदृश्यतशरैश्छन्नःशंबरःशतशोरणे ३४ अदृश्यन्पतितोभूमौगतचेताइवासुरः अथस्मयुध्यतेभूयः
शतधाशैलसन्निभः ३५ दिशागजेंद्रमारूढोदृश्यतेसपुनर्बली मादेशमात्रश्चपुनःपुनर्भवतिशैलवत् ३६ महामेघइवश्रीमान्तिर्यगूर्ध्वं
चसोभवत् पुनःकृत्वाविरूपाणिविकृतानिचसर्वशः ३७ सर्वांभीषयतेसेनांदेवानांभीमदर्शनः तेभीताःप्रपलायंतेसिंहंदृष्ट्वामृगायथा
ततःसोन्यंवरंदेहंकृत्वाप्रांशुतरंपुनः ३८ गच्छत्यूर्ध्वगतिंघोरोदिशःशब्देनपूरयन् नभस्तलगतश्चापिवर्षतेवासवोयथा ३९ संवर्त्तकां-
बुदप्रख्यःपूरयन्पृथिवीतलम् संवर्तकोनलश्चैवभूत्वाभीमपराक्रमः ४० शतवक्त्रःशतशिखोददाहचपुनःसुरान् मुहूर्ताच्चमहाशैलःश ७९
तशीर्षःशतोदरः ४१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६८ ६९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांपंचपंचाशत्तमोऽध्यायः ५५ १ २ ३ ४ ५ ६ ७ ८

आसीत्सर्वासमाकीर्णामुहूर्त्तेनवसुंधरा चापमेघाश्चविपुलाःशस्त्रविद्युत्प्रकाशिनः वाहनानांचनिर्घोषैःस्तनयित्नुसमोभवत् ६८ ससंप्र
हारस्तुमुलःक्रूरकःशोणितोदकः प्रावर्त्ततसुराणांचदानवानांचसंयुगे ६९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिवामन
प्रादुर्भावेपंचपंचाशत्तमोऽध्यायः ५५ वैशंपायनउवाच तस्मिन्महाहवेरौद्रेतुमुलेलोमहर्षणे ववर्षुःशरवर्षाणिसंरब्धादे
वदानवाः १ व्याक्रोशंतगजास्तत्रशरघातप्रपीडिताः अश्वाश्चपर्यधावंतहताारोहादिशोदश २ उत्पत्यनिपतंत्यन्येशरवर्षप्रपीडिताः
देवानांदानवानांचगजाश्चरथिनोरणे ३ समरेतत्रशूराणामन्योन्यमभिधावताम् धनुषांतलशब्देननप्रज्ञायतकिंचन ४ शरश
क्तिगदाभिस्तेखड्गैश्चामिततेजसः निजघ्नुर्महतींसेनांअन्योन्यस्यपरंतप ५ बाहूनामुत्तमांगानांकार्मुकाणांचसंयुगे राशयस्तत्रदृ
श्यंतेदेवदैत्यसमागमे ६ अश्वानांकुंजराणांचरथानांचवसुंधराम् नांतंसमभिगच्छंतिनिहतानांसुरासुरैः ७ गदाभिरष्टिभिःप्रासैः
मुद्गलैःसन्नतपर्वभिः योधास्तत्राभ्यहन्यंतहस्त्यश्वंचामितंबहु ८ प्रावर्त्ततनदीघोराशोणितौघातरंगिणी तदाप्रभ्रष्टसैन्यानांकेश
शैवलशाड्वला ९ हाहाकारोमहाशब्दोयोधानामभवत्तदा दानवैर्हन्यमानानांत्रिदशानांमहारणे १० वैशंपायनउवाच
तेषांतदभवद्युद्धंदेवानामसुरैःसह विभीषणंमहारौद्रंविकृतंभीमदर्शनम् ११ विरोचनस्तुतत्रैवविष्वक्सेनंमहाहवे जघानरु
धिराभाक्तंसाध्यंपरमधन्विनम् १२ तमायांतमभिप्रेक्ष्यविष्वक्सेनःसुरैर्वृतः अपयात्वासुरश्रेष्ठःपुत्याविध्यत्स्तनांतरे १३ साध्य
स्यबाणाभिहतस्तोत्रार्दितइवद्विपः विरोचनःप्रजज्वालक्रोधेनाग्निरिवाध्वरे १४ सकार्मुकविनिर्मुक्तैःशरैर्दानवसत्तमः विष्वक्
सेनोविभेदाजौदीप्तैःसप्तभिराशुगैः १५ सोतिविद्धोबलवतादानवेनसुरोत्तमः मूर्च्छामभिजगामाशुध्वजचापाश्रयस्तप्रभुः १६
ततःसपुनराश्वस्यसाध्योयुद्धमनोदधे विस्फार्यचमहाचापंदैत्यमध्येव्यवस्थितः १७ विरोचनस्तुबलवानभ्ययुध्यतसर्वशः
क्षोभयन्सुरसैन्यानिसमंतान्निशितैःशरैः १८ ततस्तस्यासुरेंद्रस्ययुध्यमानस्यसंयुगे श्रूयतेतुमुलःशब्दोजीमूतस्येवगर्जतः
१९ जगर्जचमहाघोषोविनिघ्नन्देववाहिनीम् चंडवेगाभ्रवर्षीचसविद्युत्स्तनयित्नुमान् २० दिशोविद्रावयामासशरवर्षेणदानवः स
र्वसैन्यानिदेवानामुद्यतास्त्रोमहाहवे २१ तेप्राद्रवंतवित्रस्तारथेभ्योरथिनस्तदा सादिनश्चाश्वपृष्ठेभ्योभूमौचापिपदातयः २२

९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ ६९ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

२३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७

श्रुत्वाकार्मुकनिर्घोषंविस्फूर्ज्जितमिवाशनेः सर्वसैन्यानिभीतानिविव्यलीयंतसंयुगे २३ विरोचनभयत्रस्तारथेभ्योरथिनस्तदा पदा-
तीनांययुःसंघायत्रदेवशचीपतिः २४ विष्वक्सेनस्यसाध्यस्यसर्वतःसुमहाबलः पादैरक्षःसहस्राणिनिजघानचतुर्दश २५ अश्व-
वृंदेषुनागेषुरथानीकेषुचाविभुः पदातीनांचसंघेषुविनिघ्नन्प्रत्यदृश्यत २६ वितत्यश्येनवत्पक्षौसर्वतःसवरूथिनाम् भित्वाछित्वा
महाबाहुःशिरास्याजौव्यहृंतत २७ सादिनश्चपदाताश्चहतशेषारथास्तथा विष्वक्सेनेनसहिताविरोचनमथाद्रवन् २८ तेसिचर्म-
गदाशक्तिपरिघप्रासतोमरैः तमेकमभ्यधावंतसिंहनादंप्रचक्रिरे २९ ततःसोसिंसमुद्यम्यजवमास्थायदानवः चकर्तरथिनामाजौशिरां
सिचधनूंषिच ३० रथनागाश्ववृंदेषुबलवानरिसूदनः विरोचनश्चरन्मार्गान्प्रकारानेकविंशतिम् ३१ भ्रांतमुद्भ्रांतमाविद्धमाप्लुतवि-
प्लुतयुगम् संपातसमुदीर्णंचदर्शयामासदानवः ३२ केचिद्वरासिनारुग्णादानवेनमहात्मना विनेदुश्छिन्नवर्माणोनिपेतुश्चगतासवः
३३ छिन्नपृष्ठाहतारोहादानवेनमहात्मना विद्रुताःस्वान्यनीकानिजघ्नुस्त्रिदशवारणाः ३४ निपेतुरुर्व्यामाकाशेनिकृत्ताहृदधन्विना
विविधास्तोमराश्चापामहामात्रशिरांसिच ३५ प्रतीपमाहरन्नागानश्वांश्चदृढविक्रमान् चकर्त्तरथिनामाजौशिरांसिचधनूंषिच ३६
आप्लुत्यरथिनःकांश्चित्सरामृध्यमहाबलः सूतांश्चिच्छेदखड्गेनरथानपिचदानवः ३७ मुहुरुत्पततोदिक्षुधावतश्चयशस्विनः मार्गा-
श्चरतोविचित्रान्विस्मयंतस्ततोसुरान् ३८ निजघानपदाकांश्चित्आक्षिप्यान्यानपोथयत् खड्गेनचान्यांश्चिच्छेदनादेनान्यांश्चभीष-
यन् ३९ ऊरुस्तंभगृहीताश्चनिपतंत्यपरेभुवि अपरेदैत्यमालोक्यभयात्प्राणानवासृजन् ४० तस्मिंस्तथावर्त्तमानेयुद्धेमहतिदारुणे रथौ-
घगजपत्तीनांसुराणांचमहाक्षये ४१ कुजंभोदानवश्रेष्ठोह्यंशमादित्यमाहवे योधयामाससमरेवृषःप्रतिवृषंयथा ४२ जयानाचल
संकाशोमत्तवारणविक्रमः स्फुरद्भिर्निशितैस्तीक्ष्णशरैर्बहुभिराशुगैः ४३ देवसैन्यसहस्राणिसरथानिमहाहवे तस्यबाणपथंप्राप्य-
नाभ्यवर्त्तंतसर्वशः ४४ प्रणेदुःसर्वभूतानिबभूवुस्तिमिरादिशः देवानामजयःक्रूरःप्रत्यपद्यतदारुणः ४५ अंशस्तुदानवेंद्रस्यजघा
नोत्तमविक्रमः अनीकंदशसाहस्रंकुंजराणांतरस्विनाम् ४६ आपतंतंगजानीकंकुजंभोवीक्ष्यदानवः गदापाणिरथारोहद्द्वयोपस्था
दरिंदमः ४७ अद्रिसारमयींगुर्वींप्रगृह्यमहतींगदाम् अभ्यद्रवद्गजानीकंव्यादितास्यइवांतकः ४८

३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ७ ७ ७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सगजान्गदयानिघ्नन्व्यचरत्समरेबली कुजंभोदानवश्रेष्ठोगदापाणिर्बलाधिकः ४९ विशीर्णदंतांश्चबहून्भिन्नकुंभांश्चदारुणान्
अकरोद्दानवश्रेष्ठउद्दिश्योद्दिश्यतान्बली ५० विशीर्णदंताबहवोभिन्नकुंभास्तथापरे कुजंभेनार्दितानागाव्यद्रवंतदिशोदश ५१ कुजं
भस्यान्वयेमात्यादानवाघोरविक्रमाः नाराचैर्विविधैस्तीक्ष्णैरपास्तगजयोधिनः ५२ क्षुरैःक्षुरप्रैर्भल्लैश्चपातैरंजलिकैःशितैः चिच्छेदचो
त्तमांगानिकुजंभोदानवोत्तमः ५३ शिरोभिःप्रपतद्भिस्तुगगनंप्रत्यपूर्यत अश्मवृष्टिरिवाकाशेबहुभिश्चसहांकुशैः ५४ हतोत्तमांगाःस्कं
धेषुगजानांगजयोधिनः अदृश्यंतमहाराजतालाविशिरसोयथा ५५ आपतंतंमहाभागमंशस्योसुरसत्तमः जघानैकेषुणाक्रुद्धस्ततःस
विमुखोभवत् ५६ विगाह्यैवंगजानीकंकुजंभोदानवोत्तमः विनिघ्नन्प्रवरान्सैन्यान्गदयाबलिनांवरः ५७ एकप्रहाराभिहतान्कुज
भेनमहागजान् अपश्यंतसुराःसर्वेपर्वतानिवपातितान् ५८ कुजंभस्यचमार्गेषुविशीर्णास्तेमहागजाः वज्राहताइवेंद्रेणविशीर्णाइवप
र्वताः ५९ अपश्यंस्त्रिदशाःसर्वेमूर्तिमंतमिवांतकम् गजास्तथाव्यदीर्यंतसिंहस्येववनेमृगाः ६० सबभौतांगदांबिभ्रत्प्रोक्षितांगदशो
णितैः व्यादितास्योनदन्क्रुद्धोरौद्ररूपोभयानकः ६१ यथाहिभगवान्क्रुद्धःप्रजानांसंक्षयेपुरा विक्रीडमानोगदयारणमध्येमहासुरः
६२ गोपालइवदंडेनकालयन्सुमहागजान् क्रुद्धंकालमिवाकालेदंडमुद्यम्यदानवम् ६३ अपश्यंतसुराःसर्वेकुजंभंभीमविक्रमम् ह
तारोहास्तुतत्रान्येप्रभिन्नावारणोत्तमाः ६४ तेहन्यमानागदयाबाणैश्चभृशविक्षताः असहंतःकुजंभस्यगदावेगंमहाहवे ६५ सान्यनी
कानिमृद्नंतःप्राद्रवंतमहागजाः महावातइवाभ्राणिविधमन्गदयागजान् अतिष्ठत्समरेदैत्यःकालःसंवर्तकोयथा ६६ इतिश्रीम-
हाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकुजंभोत्कर्षवर्णनंनामषट्पंचाशत्तमोऽध्यायः ५६ वैशंपायनउवाच ततःसर्वाणि
सैन्यानिदेवराजस्यशासनात् अभ्यद्रवंतदितिजान्नदंतोभैरवान्रवान् १ तंबलौघमपर्यंतंदेवानांसुदुरासदम् रथनागाश्वकलिलं
शंखदुंदुभिनिःस्वनम् २ आपतंतंसुदुःपाररजसासर्वतोवृतम् सैन्यसागरमक्षोभ्यंवेलेवमकरालयम् ३ तदाश्चर्यमपश्यंतअश्रद्धे
यमिवाद्भुतम् उदीर्णांपृतनांसर्वांसाश्वांसरथकुंजराम् ४ आचार्यःसमरेतिष्ठन्कुजंभस्तरसाबली सैन्यार्णवंदेवतानांगिरिर्मेरुरिवा
चलः ५ अनीकिनींकुजंभस्तुगदयासन्यवारयत् सातथावारितासेनाविह्वलाभून्निरुद्यमा ६ तस्मिंस्तथावर्तमानेसंप्रहारेसुदारुणे अ
सिलोमातुबलवान्दानवोदानवाधिपः ७ ८१

६५ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांषट्पंचाशत्तमोऽध्यायः ५६ १ २ ३ ४ ५ ६ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

देवसैन्यस्यसर्वस्यधूमकेतुरिवोत्थितः तमांसिइवापोह्यत्सुरसैन्यानिसंयुगे ८ सहस्ररश्मिप्रतिमोदानवस्यरथोत्तमः शरैर्मेघइवावर्ष
त्देवानीकंप्रतापवान् ९ शरौघरश्मिभिर्दीप्तैःप्रतप्तोघोरविक्रमः रौद्रःक्रूरोदुराधर्षोदुरापोध्वजिनीमुखे १० युध्यतेदैवतैःसार्धंग्रस-
मानइवप्रभुः उग्रश्चरुग्रवदनःसमारुह्यमहाजगम् ११ सुराणामुत्तमांगानिप्रचिनोतिमहाबलः ग्रसन्दैवतसैन्यानिशरदंष्ट्रःप्रतापवान्
१२ असिजिह्वश्चक्रहस्तश्चापव्यात्ताननोसुरः परश्वधनखःश्रीमान्मृदंगापूरितध्वनिः १३ तिष्ठतेदानवश्रेष्ठःसंयुगेव्याघ्रवद्बली मौ
र्वीघोषःस्तनयित्नुःपृषत्कःप्रथितोमहान् १४ धनुर्विद्युद्गुणाटोपोमहामेघइवापरः इष्वस्त्रसागरोघोरोबाहुग्राहोदुरासदः १५ कार्मु-
कोर्म्मितरंगौघैर्बाणावर्त्तमहाह्रदः गदासिमकरोरौद्रोज्यावेलःशिक्षयोद्धुतः १६ पदातिमीनःसुमहान्गर्जितोहृष्टघोषवान् हयान्गजा
न्पदातींश्चरथांश्चसहसाबहून् १७ न्यमज्जयतसमरेपरवीरान्महारथान् आप्लावयत्सदेवोघान्दारुणोदानवेश्वरः १८ प्रावर्त्तत
युधिश्रीमान्युधिश्रेष्ठोयुधिष्ठिरः अपश्यंस्त्रिदशाःसर्वेशक्रुजांबूनदप्रभम् १९ सन्नद्धंतंयुध्यंतंज्वलंतमिवपावकम् मध्यंदिनगतंसू
र्यंज्वलंतमिवतेजसा २० नशेकुःसर्वभूतानिदानवंप्रसमीक्षितुम् यथाप्ररूढंघर्मांतेदहत्कक्षंहुताशनः २१ तथासौरवरोदैत्योदहति
स्मस्वतेजसा देवानांदानवानांचबलमद्भुतदारुणम् २२ विरूढमभवत्सर्वमाकुलंचसमंततः शूराश्चतेबलोदग्राहस्त्यश्वरथधूर्गताः २३
आर्यांबुद्धिंसमास्थायनत्यजंतिमहारणम् तदुत्सिजलकंयुद्धमभवद्रोमहर्षणम् २४ देवदानवयोःसंख्येरुधिरस्रावकर्दमम् नोदिशःप्र
त्यजानंतभयग्राहनिपीडिताः २५ शस्त्रपातांश्चविविधान्दानवानांमहारणे अन्योन्यमूढचित्तास्तेनिजघ्नुर्व्याकुलीकृताः स्वान्परान्नाभि
जानंतिविमूढाःशस्त्रपाणयः २६ शिरोरुहेषुसंगृह्यकश्चित्क्रूरस्यसंयुगे भूरश्चिच्छित्तिमूर्द्धानंसंदष्टोष्ठपुटाननम् २७ बाहुभिर्मुष्टिभि
श्चैववज्रकल्पैःसुदारुणैः प्रहरंतिरणेवीरान्यस्तशस्त्राःपरस्परम् २८ योधप्राणहरेरौद्रेस्वर्गद्वारेनृपाहृते संकुलेतुमुलेयुद्धेवर्त्तमाने
महाभये २९ हयोहयंगजोनागंवीरोवीरंमहाहवे अभ्यद्रवन्जिघांसंतोह्यसमंजसमाहवे असुराश्चसुराश्चैवविक्रमाढ्यामहारथाः
३० जुहुवुःसमरेप्राणान्निजघ्नुरितरेतरम् मुक्तकेशाविकवचाविरथाश्छिन्नकार्मुकाः ३१ हस्तैःपादैश्चयुध्यंतेदानवैस्त्रिदशाःसह ह
रिस्तुनिशितंभल्लंप्रेषयामाससंयुगे ३२ सतस्यधनुषःकोटिंछित्वाभूमावपातयत् पुनश्चापिपृषत्कानांशतानिनतपर्वणाम् ३३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ ह॰ टी॰ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ अवेजयत् अकंपयत् ४६ ४७ अ॰ पृ॰
८२ ५७ ३

प्राहिणोत्सहसातस्यदानवेंद्रस्यसंयुगे तस्यदेहविमुक्तास्तेमारुतेनसमीरिताः ३४ मग्नाईकायाविविशुःपन्नगाइवपर्वते सतैर्निपतितैर्गा
त्रैःक्षरद्भिरसृगावलीः ३५ बभौदैत्योमहाबाहुर्मेरुर्धातुमिवोत्सृजन् पुनश्चापिपृथुत्कानाशतानिनतपर्वणाम् ३६ ततोसिद्धोमासंकु
द्धःप्रगृह्यान्यन्महद्धनुः रुक्मपुंखांश्चनिशितान् प्रेषयामाससायकान् ३७ तेस्तुमर्मसुविव्याधसर्पानलविषोपमैः गात्रंसञ्छादयामा
समहाभ्रैरिवपर्वतम् ३८ भूयःसंधायचशरंमुमोचांतकसन्निभम् स्फुरंतंसूर्यसंकाशंबाणमप्रतिमंरणे ३९ तेनबाणप्रहारेणसंयुगे
भीमकर्मणा मुमोहसहसादेवोभूमौचापिपपातह ४० ततोहाहाकृताःसर्वेदेवभूतलमाश्रिते जगत्सदेवमाविग्नंयथार्कपतनेतथा ४१
परिवार्यतुसमरेतस्यहत्वामहासुरः एकत्रिंशत्सहस्राणियोधानांदानवोत्तमः ४२ जयश्रियासेव्यमानोदीप्यमानइवाचलः आगृह्यकार्मु
कंघोरंगतःशक्रस्यप्रति ४३ तथैवतुमहायुद्धेससैन्यावश्विनावुभौ प्रयुद्धौसहवृत्रेणबलिनादेवतारिणा ४४ बाणखड्गधनुःपाणिःस
मरेत्यक्तजीविनः आसाद्यसोश्विनौदैत्यःस्थितोगिरिरिवाचलः ४५ ततःशंखमुपाध्मायद्विषतांलोमहर्षणम् ज्याघोषतलशब्दैश्चसर्वभू
तान्यवेजयत् ४६ ततःसंहृष्टरोमाणःशंखशब्दंविशश्रुवुः यक्षराक्षसदेवौघावृत्रस्यापिचनिःस्वनम् ४७ गदातोमरनिस्त्रिंशशूलशा-
क्तिपरश्वधाः प्रगृहीतास्त्वराजंतयक्षराक्षसबाहुभिः ४८ तैःप्रमुक्तान्महाकायैःशूलशक्तिपरश्वधान् भल्लैर्वृत्रःपरिच्छेदभीमवेगैरवैस्त
था ४९ अंतरिक्षचराणांचभूमिस्थानांचगर्जताम् शरैर्विव्याधगात्राणिदेवानांप्रियदर्शिनाम् ५० वृत्रासुरभुजोत्सृष्टैर्बहुधायक्षरक्ष
साम् निकृत्तान्येवदृश्यंतेशरीराणिशिरांसिच ५१ अथरक्तमहावृष्टिरभ्यवर्षतमेदिनीम् गदापरिघभिन्नानांदेवानांगात्रसंभवा ५२
प्रच्छादयंतोबाणौघैर्वृत्रंभीमपराक्रमम् ददृशुःसर्वभूतानिभानुमंतमिवाभ्रकैः ५३ तीक्ष्णरश्मिरिवादित्यःप्रतपन्सर्वदेवताः अश्वि
नौर्बलवान्क्रुद्धःसायकैर्मर्मभेदिभिः ५४ नदतोविविधान्नादानर्दितस्यापिसायकैः नमोहमस्फुरंद्रस्यददृशुस्त्रिदशारणे ५५ तौसिच
र्मैगदाभिश्चपरिघप्रासतोमरैः परश्वधैश्चशूलैश्चप्रववर्षुर्महारथाः ५६ ततोवृत्रःसुसंक्रुद्धस्तैस्तदाभ्यर्दितोबली अभ्यवर्षच्छितैर्बा
णैस्तान्सर्वान्सत्यविक्रमः ५७ तेनवित्रासितादेवाविप्रकीर्णमहायुधाः घोरमार्त्तस्वरंचक्रुर्वृत्रासुरभयार्दिताः ५८ उत्सृज्यतेगदाशक्ति
शूलर्ष्टिपरिघाशनीन् उत्तरांदिशमाजग्मुस्त्रासितादृढधन्विना ५९ शूलशक्तिगदापाणिर्व्यूढोरस्कोमहाभुजः प्रावर्त्ततरणेवृत्रस्त्रासयानश्च ८२
राचरान् ६०

४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांसप्तपंचाशत्तमोऽध्यायः ५७

तत्रैकस्तुमहाबाहुरसिशूलधरःप्रभुः अभ्यधावतदैत्येंद्रंवृत्रमप्रतिमंरणे ६१ तमापतंतंसंप्रेक्ष्यनिर्भिन्नमिववारणम् वत्सदंतैस्त्रिभिःपा-
र्श्वेविव्याधसुरसत्तमं ६२ सोतिविद्धोमहेष्वासःशरैरमितविक्रमः गदांजग्राहबलवान्गदायुद्धविशारदः ६३ तांप्रगृह्यमहाभीमाम-
यःसारमयींदृढाम् अश्विनौसहसागम्यताडयामासवीर्यवान् ६४ दीप्यमानंततःशूलमश्वीसुविपुलंदृढम् प्रासृजद्वृत्रदैत्यायसहसा
रोमहर्षणम् ६५ भंक्त्वाशूलंगदाग्रेणगदायुद्धविशारदः अश्विनंसहसाभ्यर्च्यगरुत्मानिवपन्नगम् ६६ सोंतरिक्षात्समुत्पत्यविधूयम
हतींगदाम् नासत्योपरिचिक्षेपगिरिशृंगोपमांबली ६७ गदयाभिहतःसोश्वीत्यक्त्वाशूलमनुत्तमम् प्रयातःसहसातत्रयत्रयुध्य-
तिवासवः ६८ पराजित्यतुसंग्रामेअश्विनंभीमविक्रमम् जयाश्रियासेव्यमानोवृत्रोयुद्धेव्यवस्थितः ६९ इतिश्रीमहाभारतेखिले
षुहरिवंशेभविष्यपर्वणिवृत्रासुरोत्कर्षवर्णनंनामसप्तपंचाशत्तमोऽध्यायः ५७ वैशंपायनउवाच तत्रैवतुमहायुद्धेरणाजि
देवसत्तमः युध्यतेसहदैत्येनएकचक्रेणधीमता १ प्रच्छाद्यरथपंथानमुत्क्रोशंश्चमहाबलः एकचक्रस्यसैन्यंततुशरवर्षैरवाकिरत्
२ महासुरामहावीर्यामहापट्टिशयोधिनः शूलानिचभुशुंडीश्चक्षिपंतिस्ममहारणे ३ तच्छूलवर्षंसुमहत्गदाशक्तिसमाकुलम् अ-
विशद्दितिजैर्मुक्तंदुर्निवार्यंचराचरैः ४ अन्योन्यमभिवर्तंतदेवासुरगणायुधि महाद्रिशिखराकारावीर्यवंतोमहाबलाः ५ तुरंगमातंग
शतयुक्तंतस्यमहारथे महासुरवरस्येवहिरण्यकशिपोर्युधि ६ तेषांचरणपातेनचक्रनेमिस्वनेनच तस्यबाणनिपातैश्चहतावैशतशः
सुराः ७ ततःसलघुभिश्चित्रैःशरैःसन्नतपर्वभिः सायुधानछिनत्क्रुद्धःशतशोथसहस्रशः ८ वध्यमानाःशतैस्तीक्ष्णैरथद्विरदवाजि
नः गमिताःप्रक्षयंकेचित्त्रिदशैर्दानवारणे ९ ततःप्रक्षीयमाणांस्तानुपप्रेक्ष्यदितेःसुताः त्यक्त्वाबाणान्न्यवर्तंतप्रगृहीतवरायुधाः १०
तेदिशोविदिशश्चैवप्रतियुध्यप्रहारिणः अभ्यघ्नन्निशितैःशस्त्रैर्देवान्दितिसुतारणे ११ रणाद्विचलितंघोरंपरमंतिग्मतेजसम् मुमोचा
स्त्रंमहाबाहुर्मथनंनामसंयुगे १२ ततःशस्त्राणिशूलानिनिशितानिसहस्रशः अतिवीर्येणमहतादितिजःसंप्रचाच्छिदे १३ छित्वाशू
लांस्तुतान्सर्वानेकचक्रोमहासुरः अभ्यविध्यततंसाध्यंदशभिर्निशितैःशरैः १४ अस्त्रवेगंनिहत्यैवसोस्त्रैस्तस्यानुसैनिकान् ज्वलि
तैरपरैःशीघ्रैस्तानविध्यत्सहस्रशः १५ तेषांछिन्नानिगात्राणिविसृजंतिस्मशोणितम् प्रावृषीवांबुवृष्टीनिशृंगाणिधरणीभृताम् १६

तत्रैवेति रणाजि साध्यविशेषः १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६०

उत्थिताघोररक्ताक्षाव्योम्निमुद्गरपाणयः सतुतैःसहसोत्थायवेष्टितोविमलेंबरे ४४ मुद्गरैरर्दितोभीमैर्वृक्षैःपरशुभिर्यथा तेषांवेगवतां
वेगंनिहत्यससहारथः ४५ निपपातपुनर्भूमौसुपर्णसमविक्रमः सशालवृक्षमुत्पाट्यमहाशाखंमहाबलः ४६ सर्वान्पारिषदान्संख्ये
सूदयामासदानवः सतैर्वीक्षितदेहस्तुरुधिरौघपरिप्लुतः ४७ शुशुभेदानवःश्रेष्ठोबालसूर्यइवोदितः अथोत्पाट्यगिरेःशृंगंसमृगव्याल
पादपम् ४८ जघानतान्पारिषदान्समरेदानवेश्वरः ततस्तेषुचभग्नेषुमहापारिषदेषुवै ४९ बलंतदवशेषंतुनाशयामासवीर्यवा
न् अश्वैरश्वान्गजैर्नागान्योधान्योधैरथान्रथैः ५० दानवःसूदयामासयुगांतेंतकवत्सजाः हतैरश्वैश्चनागैश्चभग्नाक्षैश्चमहारथैः
५१ त्रिदशैश्चाभवद्भूमीरुद्धमार्गासमंततः एवंबलःसदैत्येंद्रोमृगव्याधश्चवीर्यवान् ५२ युधिप्रबुद्धोबलिनोप्रभिन्नाविववारणौ ५३
वैशंपायनउवाच तत्रैवयुध्यतेरुद्रोद्वितीयोराहुणासह विश्रुतस्त्रिषुलोकेषुक्रोधात्मात्ह्यजएकपात् ५४ तद्यथासमहत्युद्धंतुमु
लंलोमहर्षणम् आसीत्सातिभयंरौद्रंवीराणांजयमिच्छताम् ५५ देवदानवदेहैस्तुदुस्तराकेशशाड्वला शरीरसंघातवहाप्रसृतालोहि
तापगा ५६ आजघानायसंक्रुद्धोरुद्रोरौद्राकृतिःप्रभुः राहुंशतमुखंयुद्धेशत्रुसैन्यनिवारणम् ५७ तस्यकांचनचित्रांगंरथंसाश्वंस
सारथिम् जघानसमरेश्रीमान्क्रुद्धोदैत्यस्यसायकैः ५८ तस्यपारिषदस्त्वेकोरथशक्त्यामहाबलः बिभेदसमरेहृष्टोदानवंतंस्तनांतरे
५९ सभिन्नगात्रोरुद्रेणतथापारिषदैरपि रुद्रस्यरथमायांतंसराहुर्दानवोत्तमः ६० प्रममाथतलेनाशुसहसाक्रोधमूर्च्छितः भिन्नगा
त्रंशरैस्तीक्ष्णैर्मेरुंसूर्यइवांशुभिः ६१ हतैर्दानवमुख्यैश्चरुद्रेणामिततेजसा रुद्रपारिषदान्सर्वान्निजघानमहासुरः ६२ वर्त्तमानेमहा
घोरसंग्रामेलोमहर्षणे रुधिरौघामहावेगामहानद्यःप्रसुस्रुवुः ६३ दानवंसमरेरुद्रोनीलांजनचयोपमम् निर्बिभेदशरैस्तीक्ष्णैर्मेरुंसू
र्यइवांशुभिः ६४ हतैर्दानवमुख्यैश्चशक्तिशूलपरश्वधैः पतितैःपर्वताभैश्चदानवैःकामरूपिभिः ६५ वर्त्तमानेमहाघोरेसंग्रामेलोमह
र्षणे महाभेरीमृदंगानांपणवानांचनिःस्वनः ६६ शंखवेणुस्वनोन्मिश्रःसंबभूवाद्भुतोपमः हतानांस्वनतांतत्रदैत्यानांचापिनिःस्वनः
६७ देवानांचतथातत्रप्रशुश्रुवेदारुणोमहान् तुरंगमखुरोत्कीर्णंरथनेमिसमुत्थितम् ६८ रुरोधमार्गंयोधानांचक्षूंषिचधरारजः अस्त्र
पुष्पोपहारासातत्रासीद्युद्धमेदिनी ६९ दुर्दर्शादुर्विगाह्याचमांसशोणितकर्द्दमा भग्नैःखड्गैर्गदाभिश्चशक्तितोमरपट्टिशैः ७०

६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ६२ ६२ ६२ ६२

१७ १८ १९ २० त्रिभाकंठकरकुंभदेशेषुमदंक्षरंतः क्षरतः द्वितीयार्थेप्रथमा २१ २२ २३ २४ ऋष्यधूसरोमृगविशेषस्तद्वर्णान् २५

इंद्राशनिसमस्पर्शैर्निपतद्भिरजिह्मगैः दितिजैःकाल्यमानास्तेविनेशुःसुरसत्तमाः १७ एकश्चक्रेरथेतिष्ठन्नपश्यद्गजयूथपम् वनाभर-
णानिन्हादान्समुद्भस्वन्निःस्वनान् १८ मत्तान्सुविहितान्दृप्तान्महामात्रैरधिष्ठितान् कुलीनान्वीर्यसंपन्नान्प्रतिद्विरदघातिनः १९
शिक्षितान्गजशिक्षायामैरावतसमान्युधि न्यहनत्सुरसैन्यस्यगजान्गजइवासुरः २० विक्षरंतोमहानागान्भीमवेगांस्त्रिधामदम् मे
घस्तनितनिर्घोषान्महाद्रीनिवचोत्थितान् २१ सहस्रसंमितान्दिव्यान्जांबूनदपरिष्कृतान् सुवर्णजालैर्विततान्तरुणादित्यवर्च्चसः २२
एकचक्रोगदापाणिर्बलवान्गदिनांवरः उत्सारयामासराजन् महाभ्राणीवमारुतः २३ निहत्यगदयासर्वांस्तान्गजान्गजमर्द्दनः भूयोश्व
संघान्सबलीनिरैक्षतमहासुरः २४ शुकवर्णान्कृष्णवर्णान्मयूरसदृशांस्तथा पारावतसवर्णांश्चहंसवर्णांस्तथैवच २५ मक्षिकाक्षा
न्विरूपाक्षान्क्रौंचवर्णान्मनोजवान् अश्वसैन्यंमहाबाहुस्तदप्रतिमपौरुषः २६ निषूदयामासबलीगदयाभीमविक्रमः रणाजिस्तस्य
समरेसर्वान्व्यस्यस्फुरद्विषः २७ अचिंत्यविक्रमःश्रीमानथयाद्देववाहिनीम् गदायुद्धेषुकुशलोरथेनरथयूथपः २८ दृष्टसैन्योमहाबा
हुःप्रस्थितःशक्रसन्निधौ त्रिंशच्छतसहस्राणिरथानांविनिहत्यसः २९ रणेतिष्ठतदैत्येंद्रोविधूमइवपावकः तस्मिन्नेवतुसंग्रामेबलदृ-
प्तोमहासुरः ३० मृगव्याधमहात्मानंयोधयत्यजितंरणे मृगव्याधस्यरुद्रस्यमहापारिषदास्तथा ३१ समुत्पेतुर्बलंदृष्ट्वाहुताग्निसमते
जसः गजैर्मत्तैरथैर्दिव्यैर्वाजिभिश्चमहाजवैः ३२ अस्त्रैश्चनिशितैर्बाणैःशरैश्चानलसन्निभैः ददृशुस्तेततोवीरादीप्यमानमहासुरम्
३३ रश्मिवंतमिवोद्यंतंकृतेजोरश्मिमालिनम् संग्रामस्थमहावेगमहासत्वमहाबलम् ३४ महामतिंमहोत्साहमहाकायमहारथम् स-
मीक्ष्यतमहायोधंदिक्षुसर्वास्ववस्थितम् ३५ ततःप्रहरणैर्घोरैरभिपेतुःसमंततः तस्यसर्वायसास्तीक्ष्णाःशराःपीतमुखाःशिताः ३६
शिरस्यद्रिप्रतीकाशेमृगव्याधेनपातिताः तैश्चसप्तभिराविष्टःशरैःशिरसिचार्पितैः ३७ उत्पपाततदाव्योम्निदिशोदशनिनादयन् ततस्तं
त्रिदशोवीरःसरथःसज्जकार्मुकः ३८ अनुवव्राजसंहृष्टःश्वेतदासमहाबलः असुरंछादयामासतंव्योम्निशरवृष्टिभिः ३९ वृष्टिभि
निवजीमूतोनिदाघांतेधराधरम् अर्द्यमानस्ततस्तेनमृगव्याधेनदानवः ४० चकारनिनदंघोरमंबरेजलदोयथा सदूरंसहसोत्पत्यमृग-
व्याधरथंप्रति ४१ निपपातमहावेगःपक्षवातैर्गिरिर्यथा बभंजचततोदैत्योभग्नेषाकूबरंयथा ४२ मृगव्याधःपरित्यज्यस्थितोभूमौम-
हाबलः विरथंप्रेक्ष्यरुद्रंतुतस्यपारिषदाःशुभाः ४३ ८३

२६ व्यस्यत्यस्ता २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३

बाहुभिःपरिघाकारैर्निघ्नंतःपरिघैस्तथा रुद्रपारिषदान्सर्वान्सूदयंतिस्मदानवाः रुद्रपारिषदाश्चैवमहाद्रुममहास्त्रभिः ९६ विदारयन्नति-
कम्प्यशस्त्रैश्चादित्यसन्निभैः एतस्मिन्नंतरेक्रुद्धःकेशीदानवसत्तमः ९७ संग्राममर्षीघोरःसस्वान्यनीकानिहर्षयन् तेषांपरमसंक्रुद्धोव
ज्रमस्त्रमुदीरयन् ९८ वज्रेणास्त्रेणदिव्येनशस्त्रेणचमहात्मना महापारिषदाःसर्वेनिहतायुधिदुर्जयाः ९९ वज्रास्त्रपीडिताभ्रातारुद्र
पारिषदायुधि विप्रकीर्णद्रुमाःपेतुःशैलावज्रहताइव १०० एवंतुतुमुलंयुद्धमभवल्लोमहर्षदम् केशिनःसहरुद्रेणतदद्भुतमिवाभ-
वत् १०१ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिवामनप्रादुर्भावेकेशिरुद्रयुद्धकथनंनामअष्टपंचाशत्तमोऽध्यायः ५८
वैशंपायनउवाच वृषपर्वातुदैत्येंद्रोविश्वमद्भुतदर्शनम् निकुंभंयोधयामासलोहिताक्षसमद्युतिम् १ क्रोधमूर्छितवक्त्रस्तुधुन्व
न्परमकार्मुकम् धनूंषिप्रेक्ष्यशत्रूणांसारथिंत्वरितोब्रवीत् २ अत्रैवतावत्त्वरितंनयमेसारथेरथम् एतेदेवाश्चसहिताघ्नंतिनःसमरेबल
म् ३ एतान्निहंतुमिच्छामिसमरेश्लाघिनोरणे एतेहिदानवानीकंकृतंछिद्रमिदंमहत् ४ ततःप्रजविताश्वेनरथेनरथिनावरः अ
रीनभ्यहनत्क्रुद्धःशरजालैर्महास्फुरः ५ नस्यातुंदेवताःशक्ताःकिंपुनर्योद्धुमाहवे वृषपर्वेषुनिर्भिन्नाःसर्वएवाभिदुद्रुवुः ६ तान्मृत्युव
शमापन्नान्वैवस्वतवशंगतान् समीक्ष्यनिहतान्ज्ञातीनवतस्थेमहास्फुरः ७ दृष्ट्वातंतत्रनिकुंभंसर्वेतेत्रिदशोत्तमाः समेत्यसहिताःस
र्वेद्रुतंतंपर्यवारयत् ८ व्यवस्थितंतुनिकुंभंदृष्ट्वात्रिदशसत्तमाः बभूवुर्बलवंतोवैतस्यास्त्रबलतेजसा ९ वृषपर्वातुशैलाभनिकुंभं
समरेस्थितम् महेंद्रइवधाराभिःशरवर्षैरवाकिरत् १० अचिंतयित्वातुशरान्शरीरेपतितान्बहून् स्थितश्चप्रमुखेश्रीमान्ससैन्यः
समहाबलः ११ संप्रहस्यमहातेजावृषपर्वामहाहवे अभिदुद्राववेगेनकंपयन्निवमेदिनीम् १२ तस्यत्वाधावमानस्यदीप्यमानस्यतेज-
सा बभूवरूपंदुर्धर्षंदीप्तस्येवविभावसोः १३ रथस्थस्त्वामहातेजाःसक्रोधःसमपद्यत वृक्षमुत्पाटयामासमहातालंमहोच्छ्रयम् १४
ततश्चिक्षेपतंवृक्षंनिकुंभोवृषपर्वणः तंगृहीत्वामहावृक्षंपाणिनैकेनदानवः १५ विनद्यसुमहानादंभ्रामयित्वाचवीर्यवान् संगजान्स
गजारोहान्सरथान्रथिनस्तथा १६ जघानदानवस्तेनशाखिनात्रिदशांस्तथा तमंतकमिवक्रुद्धंसमरेप्राणहारिणम् १७ वृषपर्वाणमा-
साद्यत्रिदशाविप्रदुद्रुवुः तमापतंतंसंक्रुद्धंत्रिदशानांभयावहम् १८ आलोक्यधन्वीनिकुंभश्चक्रोधंचननादच सतत्रनिशितैर्बाणैस्त्रिं
शद्भिर्मर्मभेदिभिः १९

अपविद्धैश्च भग्नैश्च रथैः संग्रामिकैर्हतैः निहतैः कुंजरैर्मत्तैस्तथा त्रिदशदानवैः ७१ चक्राक्षयुगशाखैश्च भग्नैरवनिपातितैः बभूवायो
धनं घोरं पिशिताशनसंकुलम् ७२ उत्पेतुश्च कबंधानि दिक्षु सर्वासु संयुगे अन्योन्यबद्धवैराणां दैत्यानां जयगृद्धिनाम् ७३ संप्रहा-
रस्तथा युद्धे ववर्तेति भयंकरः सैन्यानां संप्रयुद्धानां शूराणामनिवर्त्तिनाम् ७४ अजस्य चैकपादस्य राहोश्चैव महात्मनः तेषां तु तत्र पत-
तां क्रुद्धानामतिनिःस्वनः ७५ उद्धूत इव भूतानां समुद्राणां तु शुश्रुवे तत्रैकस्तु सुधूम्राक्षः श्रीमान् रुद्रो मुनीश्वरः ७६ बिभेद कौशिकं श-
स्त्रात्यागदापरिघशूलभृत् नानाप्रहरणा घोरा भीमाख्या भीमविक्रमाः ७७ निपेतुरुद्ददयिता महापारिषदास्तथा रथमास्थाय चक्री
मान् तसकांचनकुंडलः ७८ दानवैः संवृतः केशी युद्ध्यते युद्धदुर्जयैः तस्य संग्रामशौंडस्य संग्रामेषु युयुत्सतः ७९ निपेतुरुग्रवीर्यस्य-
ज्वालाहिप्रसृता मुखात् स तु सिंहर्षभस्कंधः शार्दूलसमविक्रमः ८० महाजलदसंकाशो मृदंगध्वनिनिःस्वनः तस्य निष्पतमानस्य दा
नवैः संवृतस्य च ८१ बभूव सुमहानादः क्षोभयंस्त्रिदिवं यथा तेन शब्देन वित्रस्ता त्रिदशानां महाचमूः ८२ द्रुमशैलप्रहरणा योद्धुमेवा
भ्यवर्त्तत तेषां च देवदैत्यानां युयुत्सूनां परस्परम् सन्निपातः सुतुमुलो रौद्रो लोकभयावहः ८३ तेषां युद्धं महाघोरं संजज्ञे लोमहर्षणम्
देवदानवसंघानां प्राणांस्त्यक्त्वा महाहवे सर्वे ह्यतिबलाः शूराः सर्वे पर्वतसन्निभाः ८४ सर्वे सर्वास्त्रविद्वांसः सर्वे सर्वायुधोद्यताः त्रिदशा-
दानवाश्चैव परस्परजिघांसवः तेषां तेन दता शब्दः संयुगे मेघनिःस्वनः ८५ शुश्रुवेऽतिमहाघोरः शूरस्थावरकंपनः रेणुश्चारुणसंकाशो-
भीमः समपद्यत ८६ उद्धूतो देवदैत्यौघैः संरुरोध दिशो दश अन्योन्यं रजसा तेन कौशेयारुणपांडुना ८७ संवृता बहुरूपेण ददृशु-
र्न च किंचन न ध्वजो न पताकाश्च वर्म बाहूरगोपि वा ८८ आयुधं स्यंदनो वापि दृश्यते नैव सारथिः स शब्दस्तुमुलस्तेषामन्योन्यं समधा
वताम् ८९ निपेतुरुग्रवीर्यस्य ज्वालाहिप्रसृता मुखात् स तु सिंहर्षभः स्कंधः शार्दूलसमविक्रमः ९० तस्य निःपतमानस्य दानवैः संवृ
तस्य च श्रूयते तुमुलः शब्दो नरूपाणि चकाशिरे ९१ दानवास्तत्र संक्रुद्धा दानवानेव जघ्निरे त्रिदशास्त्रिदशांश्चैव निजघ्नुस्तुमुले तदा
९२ न परांश्च विनिघ्नतः स्वांश्च युद्धे महासुराः रुधिरार्द्रं तथा चक्रुर्मेदिनीं च महास्फुराः ९३ ततस्तु रुधिरौघेण सासिक्तमुदितं रजः श
रीरशतसंकीर्णं बभूव धरणीतलम् ९४ शूलशक्तिगदाखड्गपरिघप्रासतोमरैः त्रिदशा दानवाश्चैव जघ्नुरन्योन्यमाहवे ९५ ८४

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४७ ४८ ४९ ५० ५१ ५२ निवर्त्तयिष्यंति हतानांदेवभावंगतानामर्थेशत्रुमांसानिशत्रुरूपाणांपशूनांहृदयाद्यंगानिनिवर्त्तयिष्यं
तिइदममुष्माइतितत्तदुद्देशपूर्वकंकल्पयिष्यंति ५३ ५४ ५५ कालश्चासाविंद्रश्चकालेंद्रोयमः ५६ ५७ ५८ ५९ ६०

तेनशंखनिनादेनभेरीतूर्यरवेणच निर्घोषेणरथानांचक्रोशतीवनभस्थलम् ४७ सागरप्रतिमौघेनबलेनमहतावृतः प्रह्लादायुत्स्यत
रणेकालांतकयमोपमः ४८ तस्यनादेनरौद्रेणघोरेणाप्रतिमौजसः विनेदुःसर्वभूतानित्रैलोक्यविकृतैःस्वनैः ४९ अंतरिक्षात्परंत्स
त्काबायुश्चपरुषाववौ वमंत्सःपावकंघोरंशिखाश्चैववबासिरे ५० प्रह्लादस्तुमहावीर्यःप्रहसन्युद्धदुर्मदः उवाचवचनंश्रीमांस्त्रत्का
लक्षमुत्तमम् ५१ अद्याहंदर्शयिष्यामिस्वबाहुबलमूर्जितम् अद्यमद्बाणनिहतान्देवान्द्रक्ष्यथसंयुगे ५२ बांधवानिहतायेषां
त्रिदशैरिहसंयुगे अद्यनिर्वर्त्तयिष्यंतिशत्रुमांसानिदानवाः ५३ इममद्यसमुद्भूतरेणुसमरमूर्द्धनि अहंतुशमयिष्यामिशत्रुशोणित-
विस्रवैः ५४ तिमिरौघहतार्केंतुसैन्यरेणवरुणीकृतम् आकाशंसंपतिष्यंतिखद्योताइवमेशराः ५५ हृष्टाःसंपरिमोदध्वंदेवेभ्यस्त्य
ज्यतांभयम् अद्याहंनिहनिष्यामिकालेंद्रंधनुषारणे ५६ तोषयिष्यामिराजानंबलिंबलवतांरणे त्रिदशान्सगणान्हत्वारणेचांत
कमंतिकात् ५७ अक्षयाःसंतिमेतूणाःशराश्चाशीविषोपमाः स्थातुंमेपुरतःशक्ताःकेरणेजीवितेप्सवः ५८ हत्वारिपुगणान्तुष्टिर
नुरागश्चराजसु हतस्यात्रिदिवेवासोनास्तियुद्धसमागतिः ५९ तेभयपृष्टतःकृत्वारणेदानवसत्तमाः निहत्येमानरीन्सर्वान्मोदध्वं
दतेवने ६० एवमुक्त्वामहत्सैन्यंप्रह्लादोदानवोत्तमः कालसैन्यंमहारौद्रंतरसामर्द्दतासुरः ६१ सर्वास्त्रविद्वान्वीरश्चनित्यंचापधरा-
जितः युद्धेष्वभिमुखोनित्यंस्वबाहुबलदर्पितः ६२ षष्टिरथसहस्राणिविविधायुधधारिणाम् प्रह्लादस्यातिवीर्यस्ययेतस्यतनया-
त्मजाः ६३ तैस्तुक्रतुशतैरिष्टंविपुलैराप्तदक्षिणैः क्षांताधर्मपरानित्यंसत्यव्रतपरायणाः ६४ दातारःप्रियवक्तारोवक्तारःशास्त्रव-
स्तुषु स्वदारनिरतादांताब्रह्मण्याःसत्यसंगराः ६५ यष्टारःक्रतुभिर्नित्यंनित्यंचाध्ययनेरताः इष्वस्त्रकुशलाःसर्वेबहुशोदृढविक्रमाः
६६ मत्तवारणविक्रांताःशत्रुसैन्यप्रमर्दकाः दारयंतःपदाक्षेपैःसुघोरान्वातरेचकान् ६७ युद्धोत्सुकधियानित्यंक्रोधसंजितलोचनाः
सदष्टौष्ठपुटादैत्याविनेदुर्भीमविक्रमाः क्ष्वेडितास्फोटितरवैरन्योन्यंसमहर्षयन् ६८ वेणुशंखरवश्चैवसिंहनादैश्चपुष्कलैः आप्लुत्या
प्लुत्यसहसारणेवव्रुरनेकशः ६९ तालमात्राणिचापानिविकृष्यसुमहाबलाः अमृष्यमाणाःसहसादानवाश्चापपाणयः ७०

६१ ६२ ६३ ६४ ६५ ६६ वातरेचकान्व्यजनीकृतान्वृक्षादीन्ईरयंतः ६७ ६८ ६९ ७० ७१ ७२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

निर्बिभेदमहावीर्योनिकुंभोदानवाधिपः शरशक्तिभिरुग्राभिर्दैत्यानामधिपंप्रभुम् २० विद्धःसमरमध्यस्थोरुधिरंप्रास्रवद्बहु उद्विग्ना
गुरुकेशास्तेभग्नदर्पाःपराजिताः २१ ध्वसंतोदुद्रुवुःसर्वेभयार्द्वैवृषपर्वणः अन्योन्यंप्रममंथुस्तेत्रासितावृषपर्वणा २२ पृष्ठवक्त्राःसु
संविग्नाःप्रेक्ष्यमाणामुहुर्मुहुः त्यक्तप्रहरणाःसर्वेकृतास्तेवृषपर्वणा २३ संग्रामेयुद्धशौंडेनतदानिकुंभसैनिकाः तत्रैवतुमहावीर्यःप्र
ह्लादःकालमाहवे २४ योधयामासरक्ताक्षोहिरण्यकशिपोःसुतः तस्यदानववीरस्ययुद्धकालेजयक्रियाः २५ चकारत्वरयायुक्तोभा-
र्गवोविजयावहः हुताशनंतर्पयतोब्राह्मणांश्चनमस्यतः २६ आज्यगंधप्रतिवहोमारुतःसुरभिर्ववौ स्रजश्चविविधाश्चित्राजयार्थमभि
मंत्रिताः २७ प्रह्लादस्यशुभेमूर्द्धन्याबबंधोशनाःस्वयम् कालेनसहसंग्रामेप्रयुद्धस्यमहात्मनः २८ प्रह्लादस्यातिवीर्यस्यशांतिंचक्रेस-
भार्गवः दशशिष्यसहस्राणिभार्गवस्यमहात्मनः २९ यानिदानववीराणांजेपुःशांतिमनुत्तमाम् अथर्वाणमथोदिव्यंब्रह्मसंस्तवचोदित
म् ३० रणप्रवेशसदृशंकर्मवैजयिकंकृतम् ततःसर्वास्त्रविदुषःसमरेष्वनिवर्त्तिनः ३१ विद्ययातपसायुक्ताःकृतस्वस्त्ययनक्रियाः ध
नुर्हस्ताःकवचिनोवेगेनाप्लुत्यदानवाः बलिमभ्यर्च्यराजानंप्रह्लादपर्यवारयत ३२ आस्थायपरमंदिव्यंरथंपररथारुजम् नानाप्रहरणा-
कीर्णंसवज्रमिवपर्वतम् ३३ तद्बभूवमुहूर्तेनक्ष्वेडितास्फोटिताकुलं मेरोःशिखरसंकीर्णंद्यौरिवांबुधरागमे ३४ स्रजःपद्मपलाशा
नामामुच्यस्रग्विभूषिताः बांधवान्संपरित्यज्यनिपतंतिरणप्रियाः ३५ महायुधधरःश्रीमान्शुभचर्मधरःप्रभुः शिरस्त्राणतनुत्राणिध-
न्वीपरमदुर्जयः ३६ सिंहशार्दूलदर्पाणांगदतांकिंकिणीकिनाम् तस्यदैत्यसहस्राणिप्रयांत्यग्रेमहारणे ३७ सैन्यपक्षहतास्तस्यरथाः
परमदुर्जयाः सप्ततिर्वैसहस्राणिगजास्तावंतएवच ३८ मध्येव्यूहोदरस्थस्तुकालनेमिर्महासुरः धनुर्विस्फारयामासननादप्रजहास-
च ३९ तस्मिंच्छतसहस्राणिपुरोयांतिमहाद्युतेः दानवानांबलवतांशक्रप्रतिमतेजसाम् ४० ससंवर्त्तमानस्तुपक्षाभ्यांविस्तृतोमहान्
अभावद्दानवव्यूहोदुर्भेद्यःसर्वदैवतैः ४१ षष्टिरथसहस्राणिदानवानांधनुर्भृताम् नानाप्रहरणानांचपरिमाणंनविद्यते ४२ गदापरि-
घनिस्त्रिंशैःशूलमुद्गरपट्टिशैः प्रगृहीतैर्व्यराजंतदानवाःपर्वतोपमाः ४३ गर्जंतोविनदंतश्चविक्रोशंतःपुनःपुनः अयुध्यंतमहावीर्याःस
मरेष्वनिवर्त्तिनः ४४ तत्रतूर्यसहस्राणिभेरीशंखरवाणिच हयानांचगजानांचगर्जतामतिवेगिनाम् ४५ दुंदुभीनांचनिर्घोषःपर्जन्य
निनदोपमः शुश्रुवेशंखशब्दश्चपटहानांचनिःस्वनः ४६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

९७ ९८ ९९ १०० १०१ १०२ १०३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायां एकोनषष्टितमोऽध्यायः ५९

नगृण्हंतोशरान्घोरान्तेचसंदधतोस्तयोः अंतरंददृशेकश्चित्तयतादपिसंयुगे ९७ लघुत्वाच्चमहाबाहूयुद्धशौंडौमहाबलौ मंडलीभू
तधनुषौसद्धदेवबभूवतुः ९८ प्रन्हादस्यचबाणौघैर्द्रुद्रावांतकवाहिनी उह्यमानाबलवतावायुनेवाभ्रमंडलम् ९९ हतदर्पंतुविज्ञा-
यप्रन्हादःकालमाहवे अपध्यातंचसमरेद्विषंतंसंप्रतर्क्यतम् १०० मत्वावशगतंचैवप्रन्हादोयुद्धदुर्मदः तत्रैवान्यांचमूंभूयःसममर्द्दम
हासुरः १०१ कालप्रन्हादयोर्युद्धमभवद्यादृशंपुरा तादृशंसर्वलोकेषुनभूतंनभविष्यति १०२ एवमद्भुतवीर्योजामहारणेकृतव्रणः प्र-
न्हादस्त्वयनृद्धोत्रकालस्त्वपसृतोरणात् १०३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकालप्रन्हादयुद्धेएकोनषष्टितमोऽ
ध्यायः ५९ वैशंपायनउवाच धनाध्यक्षमनुन्हादःप्रन्हादस्यानुजोबली ससैन्ययोधयामासक्षोभयन्यक्षवाहिनीम्
१ महताचबलौघेनत्वनुन्हादोसुरोत्तमः अर्दयामाससंक्रुद्धोधनाध्यक्षंप्रतापवान् २ अमृष्यमाणास्त्रिदशानाहवस्थानुदायुधान् च
कारकदनंघोरंधनुष्पाणिर्महासुरः ३ आवर्तइवसंजज्ञेबलस्यमहतोमहान् क्षुभितस्याप्रमेयस्यसागरस्येवसंप्लुवः ४ त्रिदशा-
नाशरीरैस्तुदानवानांचमेदिनी बभूवनिचिताघोरैःपर्वतैरिवसंप्लुवे ५ मेरुपृष्ठंतुरक्तेनरंजितंसंप्रकाशते सर्वतोमाधवेमासिपु
ष्पितैरिवकिंशुकैः ६ हतैर्वीरैर्गजैरश्वैःप्रावर्ततमहानदी शोणितौघामहाघोरायमराष्ट्रविवर्द्धिनी ७ शक्तिमत्स्यामहापकास
प्रकीर्णास्त्रशैवला छिन्नकायशिरोमीनाअंगावयवशाड्वला ८ गृध्रहंससमाकीर्णाकंकसारसनादिता वसाफेनसमाकीर्णाप्रोत्कृष्टस्तनि
तस्वरा ९ तांकापुरुषदुस्तारांयुद्धभूमौमहानदीम् नदीमिवातपापायेहंससंघोपशोभिताम् १० त्रिदशादानवाश्चैवतेरुस्तेदुस्तरांनदीम्
यथापद्मरजोध्वस्तांनलिनींगजयूथपाः ११ ततःसृजंतंबाणौघाननुन्हादंरथेस्थितम् ददर्शतरसादेवोनिघ्नंतंयक्षवाहिनीम् १२ क्रुद्धस्
तोदैत्यबलंसूदयामासवित्तपः विक्षिपन्निवखेवायुर्महाभ्रपटलंबलात् १३ समीक्ष्यतुमुलंयुद्धमनुन्हादश्चवीर्यवान् रथेनादित्यवर्णे
नकुबेरमभिदुद्रुवे १४ सधनुर्धन्विनांश्रेष्ठोविकृष्यरणमूर्धनि उत्ससर्जशितान्बाणान्वित्तेशस्यमहात्मनः १५ कुबेरंप्राप्यतेबाणा-
निर्भिद्यसुसमाहिताः अपरान्पृष्ठतोजघ्नुर्व्यासक्तान्यक्षराक्षसान् १६ देवःशरैरभिहतोनिशितैर्ज्वलनोपमैः अनुन्हादंप्रत्युदि-
यात्सक्रुद्धःपरमाहवे १७ ततोवैश्रवणोराजाक्रुद्धोयक्षगणैःसह ववर्षशरवर्षाणिदानवेप्रतिवीर्यवान् १८

भा·ह·टी· ७१ ७२ ७३ ७४ ७५ ७६ ७७ ७८ ७९ ८० ८१ ८२ ८३ ८४ ८५ ८६ अ· पृ·
९६ ५९ ३

सुरासुरैरप्यजितंयोधयंतिरणेनकम् प्रतप्तहेमाभरणाःसर्वेतेश्वेतवाससः ७१ दानवामानिनःसर्वेसर्वेस्वर्गाभिकांक्षिणः सर्वेजयैषिणो-
वीराःसर्वेशत्रुवधोद्यताः ७२ शुभ्रशुभ्रसाचमूर्दीप्तापताकाध्वजमालिनी गजाश्वरथसंबाधास्वर्गमार्गाभिकांक्षिणी ७३ ततःकालः
कृतनिर्यातोभीमोभीमपराक्रमः निनदन्सुमहाकायोव्याधिभिर्बहुभिर्वृतः ७४ ददर्शमहतींसेनांदानवानांबलीयसाम् अभिसंजात-
दर्पाणांकालसमभिगर्जताम् ७५ तदापातंतदानीकंदानवानांतरस्विनाम् प्रतिलोमंचकाराशुव्याधिभिःसहितोंतकः ७६ प्राविश्यध्व-
जिनींचैषांपातयामासदानवान् कालोरुधिररक्ताक्षःसेनानीकेनसंवृतः ७७ प्रह्लादबलमप्युग्रंप्रह्लादंचमहाबलम् आजघानरणेका
लोदंडमुद्गरपट्टिशैः ७८ शरशक्त्यृष्टिखड्गांश्चशूलानिमुशलानिच गदाश्चपरिघांश्चैवविचित्रांश्चपरश्वधान् ७९ धनूंषिचविचित्राणि
शतघ्नीश्चास्थिरायसीः पातयंतेव्याधिभिर्युद्धेदानवानांचमूसुरे ८० बहवोव्याधयोयुद्धेबहूनसुरपुंगवान् व्याधीनपिचदैत्यौघानिज-
घ्निर्बहवोबहून् ८१ शूलैःप्रमथिताःकेचित्केचिच्छिन्नाःपरश्वधैः परिघैराहताःकेचित्केचिच्चपरमायुधैः केचिद्द्विधाकृताःखड्गैःस्फु
रंतःपतिताभुवि ८२ व्याधयोदानवैरेवनानाशस्त्रैर्विदारिताः तेचापिव्याधिभिःसर्वेविविधैरायुधोत्तमैः ८३ खड्गैश्चमुशलैस्तीक्ष्णैः
प्रासतोमरमुद्गरैः भिन्नाश्चदानवाःसर्वेनिकृत्ताश्चपरश्वधैः ८४ मुद्गरैःपट्टिशैश्चैवव्याधिभिश्चमहाबलैः हलाशस्त्रैरनेकैश्चमुष्टिभि
श्चहताभृशम् ८५ वेमुःशोणितमन्योन्यंविष्टब्धदशनेक्षणाः आर्तस्वरंचनदतांसिंहनादंचगर्जताम् ८६ बभूवतुमुलःशब्दःसंग्रामे
लोमहर्षणे मुष्टिभिश्चोत्तमांगानितलैर्गात्राणिचासकृत् ८७ सादितानिमहीजग्मुस्तिष्ठतामेवसंयुगे अस्त्रफेनाध्वजावर्ताच्छिन्नबाहु
महोरगा ८८ शूलशक्तिमहामत्स्याचापग्राहसमाकुला रथेभूपलसंबंधाध्वजद्रुमलतावृता ८९ सशब्दघोरविस्तारालोहितोदाप्रव
न्नदी सधनुःशक्रधनुषौकांचनांगदविद्युतौ ९० तौदैत्यकालजलदौशरधाराविमुंचताम् तौमहामेघसंकाशौरथनागगतौतदा ९१
बभूवतुरभिक्रुद्धौसांबुगर्भाविवांबुदौ तप्तकांचनसन्नाहौदिव्यहारविभूषितौ ९२ तौविरेजतुरायत्तौसूर्यवैश्वानरोपमौ तौमहाबल
संकाशावन्योन्यस्यचमूसुरे ९३ शक्राशनिसमस्पर्शैर्बाणैर्जघ्नतुराहवे परस्परंसमाद्यंततयोर्युधिदुरासदम् ९४ नाशांसंततदा-
योधाजीवितान्यपिसंयुगे शराभिभिन्नसर्वांगायुधिप्रक्षीणबांधवाः निपेतुर्योधमुख्यास्तुरुधिरोक्षितवक्षसः ९५ पतितैर्निष्पतद्भि-
श्चपात्यमानैश्चसंयुगे बभूवभूःसमाकीर्णायोधैरुद्धृतजीवितैः ९६ ९६

८७ ८८ ८९ ९० ९१ ९२ ९३ ९४ ९५ ९६ ७

तद्दृष्ट्वा शारदं वर्षं गोवृषः शीघ्रमागतम् अपारयन्वारयितुं प्रतियुद्धनिमीलितः १९ एवमेव कुबेरस्य शरवर्षं महासुरः निमीलिताक्षः
सहसा दैत्यः सहति दारुणम् २० रोषितः शरवर्षेण धनदेन महासुरः इंद्रकेतुप्रतीकाशमभितोपश्यत द्रुमम् २१ प्रवृद्धशाखाविटपं त
रुणांकुरपल्लवम् उत्पाट्य कुपितो दैत्यस्तरुं फलसमन्वितम् २२ निजघान हयान्श्रेष्ठान्कुबेरस्य महात्मनः तस्य कर्म महाघोरं दृष्ट्वास
र्वे महासुराः २३ सिंहनादं नदंति स्म अनुन्हाद महर्षिताः तयोस्तु तुमुलं युद्धं संजज्ञे देवदैत्ययोः २४ ततस्तौ क्रोधरक्ताक्षावन्योन्यवधकां
क्षिणौ अन्योन्यं विविधैः शस्त्रैर्घोरैर्जघ्नतुराहवे २५ त्रिदशा दानवान्सर्वे मथिला प्रणदंस्तथा दानवैस्त्रिदशाश्चापि क्रुद्धैर्भुवि निपा
तिताः २६ दानवास्त्वथ संक्रुद्धास्त्रिदशान्निशितैः शरैः विव्यधुर्वज्रसंकाशैः कंकपत्रैरजिह्मगैः २७ विदार्यमाणा दैत्यौघैस्त्रिदशास्तु
महाबलाः अमर्षिततराश्चक्रुर्युद्धकर्माण्यभीतवत् २८ ते गदाभिः सुभीमाभिः पट्टिशैः शूलमुद्गरैः परिघैश्च सुतीक्ष्णाग्रैर्दानवाः पी
डिताः शरैः २९ शरनिर्भिन्नगात्राश्च खड्गविच्छिन्नवक्षसः जगृहुस्ते शिलाश्चैव द्रुमांश्चासुरसत्तमाः ३० ते भीमसंगादितिजानर्दमा
नाः पुनः पुनः ममंथुस्त्रिदशान्वीर्याच्छतशोथ सहस्रशः ३१ ततस्तु तुमुलं युद्धं तेषां समभिवर्त्तत शिलाभिर्विपुलाभिश्च शतशश्चैं
वपादपैः ३२ परिघैः पट्टिशैर्भल्लैर्भिंडिपालैः परश्वधैः केचिन्निकृत्तशिरसः केचिच्चाविदलीकृताः ३३ केचिद्धिनिहता भूमौ रुधिरार्द्राः
सुरासुराः केचिद्रणाजिरान्नष्टाः परस्परवधार्दिताः ३४ विभिन्नहृदयाः केचित् छिन्नपादाश्च शेरते विदारितास्त्रिशूलैश्च केचित्तत्र
गतासवः ३५ तत्सुभीमं महत् युद्धं देवदानवसंकुलम् बभूव तुमुलं युद्धं शिलापादपसंकुलम् ३६ धनुर्ज्यातंत्रिमधुरं हिक्कातालस-
मन्वितम् आर्त्तस्तनित घोषाढ्यं युद्धगांधर्वमाबभौ ३७ कुबेरः सधनुःपाणिर्दानवान्रणमूर्द्धनि दिशो विद्रावयामास संक्रुद्धः शर
वृष्टिभिः ३८ कुबेरेणार्दितं सैन्यं विद्रुतं प्रेक्ष्य दानवः अभ्यद्रवदनुन्हादः प्रगृह्य महतीं शिलाम् ३९ क्रोधाद्द्विगुणरक्ताक्षः पितृतु-
ल्यपराक्रमः शिलां तां पातयामास कुबेरस्य रथोत्तमे ४० आपतंतीं शिलां दृष्ट्वा गदापाणिर्धनाधिपः रथादाप्लुत्य वेगेन वसुधायां व्य-
तिष्ठत ४१ सचक्रकूबरहयं सध्वजं सशरासनम् भंक्त्वा रथोत्तमं तस्य निपपात शिला भुवि ४२ विमथ्य तु कुबेरस्य प्रन्हादस्यानुजो
रथम् शस्त्राणां कदनं चक्रे सस्कंधविटपैर्द्रुमैः ४३ निर्भिन्नशिरसो भग्नास्त्रिदशाः शोणितोक्षिताः द्रुमप्रव्यथिता गाश्चा निपेतुर्धरणीतले
४४

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६०

विद्राव्यविपुलंसैन्यमनुन्हादोमहासुरः गिरिशृंगंगृहीत्वातुकुबेरमभिदुद्रुवे ४५ तमापतंतंधनदोगदामुद्यम्यवीर्यवान् विनद्यबलवद्
धायामासदानवेंद्रंमहाबलम् ४६ तस्यदैत्यस्यसंक्रुद्धोगदांताबहुकंटकाम् न्यपातयतवित्तेशोदानवस्योरसिप्रभो ४७ दैत्यःसंक्रोध
ताम्राक्षस्तंप्रहारमचिंतयन् वित्तेशस्योपरितदागिरिशृंगमपातयत् ४८ सविह्वलितसर्वांगोगिरिशृंगेणताडितः पपातसहसाभू
मौविशीर्णइवपर्वतः ४९ वित्तेशंविह्वलंदृष्ट्वासर्वेतेयक्षराक्षसाः परिवार्यमहात्मानंररक्षुर्भीमविक्रमाः ५० मुहूर्तंविह्वलोभूत्वा
पुनर्विश्रवसःसुतः उपतस्थेचसहसाधनदःक्रोधमूर्छितः ५१ सनिनादमहानादंत्रैलोक्यमभिनादयन् जनयन्निवनिर्घोषंविधम-
न्निवपर्वतान् ५२ तमवध्यंतुविज्ञायनिहतंपुनरुत्थितम् प्रेक्ष्यपिंगाक्षमायांतंदानवाविप्रदुद्रुवुः ५३ तांस्तुविद्रवतोदृष्ट्वानुन्हादो-
ह्यसुरोब्रवीत् कालनेमिंदानवंचवीर्यदर्पसमन्वितम् ५४ आत्मानंचैववीर्यंचविस्मृत्याभिजनंतथा क्वगच्छथभयत्रस्ताःप्राकृता
इवदानवाः ५५ निवर्तध्वंमहावीर्याःकिंप्राणान्परिरक्षथ नालंयुद्धाययक्षोयंमहतीयंविभीषिका ५६ एतांविभीषिकामद्यदान
वानांसमुत्थिताम् विक्रम्यविधमिष्यामिनिवर्तध्वंमहासुराः ५७ तेसुराःसन्निवृत्तास्तेसमदाइवकुंजराः निजघ्नुःपरमक्रुद्धादेवसै-
न्यमहासुराः ५८ क्षीणप्रहरणाःकेचिन्महामेघनिभस्वनाः दर्पोत्कटाभुजैरेवसंप्रहारंप्रचक्रिरे ५९ प्राशभिश्चैवकाष्ठैश्चशिलाभि
श्चमहाबलाः बाहुभिश्चतथान्योन्यमाक्षिपंतिस्मवेगिताः ६० मुष्टिभिश्चतलैश्चैवनखपातैर्महाबलाः पादपैश्चमहाशाखैर्युयुधुस्तर
णाजिरे ६१ अनुन्हादस्तुसंक्रुद्धोदेवतानांमहाचमूम् ममंथपरमायत्तोवनान्यग्निरिवोत्थितः ६२ रुधिरार्द्रास्तुबहवःशेरतेयोधसत्त
माः विह्वलाःपतिताभूमौताम्रपुष्पाइवद्रुमाः ६३ अनुन्हादश्चविक्रांतोदेवांस्ताशीविषोपमान् युध्यमानस्यसमरेव्यसृजन्निशिताञ्
शरान् ६४ धनाधिपेनविद्धस्यअनुन्हादस्यसंयुगे अंगारमिश्राःक्रुद्धस्यमुखान्निश्चेरुरर्चिषः ६५ अथबाणसहस्रेणवित्तेशोदानवो
त्तमः विव्याधसशरैःक्रुद्धोदंडपाणिरिवांतकः ६६ कुबेरस्तुशरैर्भिन्नःसमंतात्क्षतजोक्षितः रुधिरंपरिसुस्रावगिरिःप्रस्रवणैरिव ६७
लब्ध्वासंतुपुनःसंज्ञांरोषरक्तेक्षणःसुरः गदामथसमासाद्यभीमांभीमपराक्रमः चिक्षेपदैत्यमुद्दिश्यबलात्क्रोधनमूर्छितः ६८ अ
प्राप्तामंतरेसोथतांगदांगदयासुरः बभंजविनदन्क्रुद्धस्तदाश्चर्यमभूत्तदा ६९ प्रगृह्यतुगदांभूयोह्यभिदुद्रावदानवम् तमापतंतंदृष्ट्वै
वअनुन्हादोमहाबलः ७०

६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२१ २२ २३ सर्वसंहारंसर्वेषामेकीकरणम् २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४

शीर्यमाणस्यचूर्णानिखद्योताइवचांबरे सतुतेनप्रहारेणनचचालजलाधिपः २१ परिघेणहतःसंख्येयथाभूमिर्यथाचलः स्वसैन्येष्वपि
भग्नेषुभिन्नदेहेषुचाहवे २२ मुहूर्त्तमभवत्क्षोभ्यमपांपतिरमर्षणः सोमर्षंचसमापन्नोवरुणोमितविक्रमः २३ सर्वसंहारमकरो
त्स्वपक्षस्यारिमर्दनः ससागरैश्चतुर्भिश्चवृतोदीप्तैश्चपन्नगैः २४ शंखमुक्तामणिचितोबिभ्रत्तोयमयंवपुः पांडुरोद्धृतवसनोना
नारत्नविभूषितः २५ वरुणःपाशधृक्श्रीमान्कूर्ममीनसमाकुलः वरुणस्तुतदाक्रुद्धस्तान्निरीक्ष्यस्वसैनिकान् २६ उवाचदृष्ट्वा-
युत्स्यध्वंदानवानांजिघांसया अहमेनंहनिष्यामिभयमुत्सृज्ययुध्यत २७ ततस्तेपन्नगाःसर्वेमहार्णवजलाश्रयाः जघ्नुर्दैत्यान्रण
मुखेनदंतोजयगृद्धिनः २८ तेतुनालीकनाराचैर्गदाभिर्मुशलैस्तथा अभ्यघ्नन्दानवान्हृष्टान्मुदितावरुणानुगाः २९ विप्रचित्तिस्तु
संक्रुद्धोमहाबलपराक्रमः पन्नगानांशरीराणिव्यधमद्युद्धदुर्मदः ३० गारुडेनापिचास्त्रेण पन्नगान्दानवोत्तमः समरेघातयामास-
गरुडैःपन्नगाशनैः ३१ सुशरैःसूर्यसंकाशैःशातकुंभविभूषितैः पन्नगान्समरेवीरःप्रममाथसुदुर्जयान् ३२ समरेभिन्नगात्रास्ते
पन्नगाःशरपीडिताः पेतुर्मथितसर्वांगागजाइवमहागजैः ३३ तपंतमिवादित्यंदीप्तैर्बाणगभस्तिभिः अभ्यधावतसंक्रुद्धःसमरेवरु
णःप्रभुः ३४ ततस्तुदानवास्तत्रभिन्नदेहाःसहस्रशः व्यथिताविद्रवतिस्मदिशोदशविचेतसः ३५ इंद्रस्यार्थेपराक्रम्यवरुणस्त्यक्त
जीवितः विनर्दमानोयुयुधेसमरेपाशभृद्वरः ३६ वारुणःपन्नगाश्चैवमुष्टिभिःसमरोत्कटाः अभ्यवर्त्तंतसमरेविप्रचित्तिंमहासुरम्
३७ ततोस्त्रैश्चशिलाभिश्चप्राहरत्सबलोत्कटान् व्यपोहतमहातेजाविप्रचित्तिर्महासुरः ३८ ततःपावकसंकाशैःसुमुक्तैःशीघ्रगामि
भिः वरुणस्यमहावेगान्बिभेदसमरेहयान् ३९ कर्मणातेनमहताविप्रचित्तेर्महात्मनः अग्नेराज्याहुतस्येवतेजःसमभिवर्धते ४०
सशरैःसूर्यसंकाशैःसुमुक्तैःशीघ्रगामिभिः वारुणींतामहासेनांनिर्ममंथमहाबलः ४१ क्षीणास्त्रांसायकाकीर्णांशरजालेनमोहिताम्
शूलशक्त्यृष्टिभिन्नांचचकाररुधिरोक्षिताम् ४२ अभिद्रुतोथदैत्येनससैन्यःसलिलाधिपः महेंद्रंशरणंप्राप्तोविप्रचित्तेर्भयार्दितः
४३ इतिश्रीमहाभारतेखि०ह०भविष्यपर्वणिवामनेविप्रचित्तियुद्धंनामएकषष्टितमोऽध्यायः ६१ वैशंपायनउवाच
पराजयंतुदेवानांदृष्ट्वाग्निर्देवसत्तमः चकारबुद्धिंदैत्यानांवधेब्रह्मर्षिभिःस्तुतः १ स्वयंप्रभायाःशांडिल्यायःपुत्रोहव्यवाहनः हि-
रण्यरेताःपिंगाक्षोदेवहूतोहुताशनः २

३५ ३६ ३७ व्यपोहतनिराकृतवान् ३८ ३९ ४० ४१ ४२ ४३ इतिहरिवंशेभ०टीकायांएकषष्टितमोऽध्यायः ६१ पराजयमि
ति १ २

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७१ ७२ ७३ ७४ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांषष्टितमोऽध्यायः ६० १ २ ३ ४ ५

गिरिशृंगमिवोत्पाट्यकैलासाचलसन्निभम् धनाधिपंप्रदुद्राव व्यादितास्यइवांतकः ७१ तमंतकमिवायांतमजेयंसकलैःसुरैः ग्रसंत
मिवतद्दैत्यंत्रैलोक्यमखिलंरुषा ७२ तमालोक्यतथाभूतंधनाध्यक्षोरणाद्भयात् अपहायययौतत्रयत्रशक्रःसुराधिपः ७३ तस्यचा
पिमहत्कर्मदृष्ट्वावित्तपतिस्तदा जगामभयसंत्रस्तोयत्रदेवःशचीपतिः ७४ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिवा-
मनप्रादुर्भावेअनुह्रादकुबेरयुद्धवर्णनंनामषष्टितमोऽध्यायः ६० वैशंपायनउवाच विप्रचित्तिस्तुवरुणंदैत्यानामादिरव्य
यम् जघानेषुगणैःक्रुद्धोदीप्तैरिवमहोरगैः १ सदह्यमानोदैत्येनदीप्तैःशरगभस्तिभिः नाभ्यजानतकर्त्तव्यंसंग्रामेसजलेश्वरः २
सर्वलोकेश्वरस्यैवपरमेष्ठीप्रजापतिः नशक्तोत्यग्रतःस्थातुंविप्रचित्तेर्जलाधिपः ३ वज्रोनाममहाव्यूहोनिर्भयःसर्वतोमुखः तंव्यूह्य-
प्रत्यदृश्यंतदानवादेववाहिनीम् ४ वन्हिज्वालासमंतत्ररविमंडलसन्निभम् मुखमाभातिदैत्यस्यविप्रचित्तेर्महात्मनः ५ वरुण-
स्तुमहातेजाविप्रचित्तिंमहासुरम् प्रदहन्निवतेजोभिर्जिगीषुःप्रत्यवैक्षत ६ स्रक्दामसमालाभरणःकेयूरांगदभूषणः जग्राहपरि
घंदैत्यःकैलासशिखरोपमम् ७ पिनद्धंकांचनैःपट्टैर्हैममाल्यैनमायसम् यमदंडोपमंघोरंदैत्यानांभयनाशनम् ८ भ्रामया-
माससंक्रुद्धोमहाशक्रध्वजोपमम् विननादविवृत्तास्योविप्रचित्तिर्महासुरः ९ सकंठस्तेननिष्केनभुजस्थैरपिचांगदैः कुंडला-
भ्यांविचित्राभ्यांप्रजज्वालेवविचित्रयन् १० दानवोभूषणैर्भातिपरिघेणायसेनच यथेंद्रधनुषामेघःसविद्युत्स्तनयित्नुमान् ११ प्रस्फु
रत्परिघास्त्रेणवातस्कंधान्महात्मनः जज्वालचसधूमार्चिःसांकर्षणइवानलः १२ विद्याधरगणैःसार्द्धंगंधर्वनगरैरपि सहचैवमरा
वत्यासिद्धलोकैस्तथासह १३ ग्रहनक्षत्ररचितंसार्कचंद्रविभूषितम् दैत्येंद्रपरिघोद्भूतंभ्रमतीवनभस्तलम् १४ दुरासदःसुरसं
जज्ञेपरिघाभरणक्षमः सुरेंधनोसुरेंद्राग्निर्युगांताग्निरिवोत्थितः १५ त्रिदशावरुणश्चैवनशेकुःस्पंदितुंभयात् तत्रासीन्निर्भयस्त्वे-
कःकौशिकोवासवःप्रभुः भास्करप्रतिमंघोरंपरिघंरौद्रदर्शनम् १६ पातयामाससेनायांजलेशस्यसदानवः पततातेनसंग्रामेजले
शस्यमहात्मनः १७ भृतानांशतसाहस्रंपरिघेणसमाहतम् तेषांगात्राणिचासाद्यव्यशीर्यंतसहस्रशः १८ विशीर्यमाणंविबभावु
ल्काशतमिवांबरे भूयश्चैनंतदाभ्राम्यवरुणायन्यपातयत् १९ पात्यमानेतदातस्मिन्शरीरेवारुणेतदा सभिन्नपरिघोघोरोदेवगात्रेव्य ८८
शीर्यत २०

६ ७ ८ ९ १० ११ वातस्कंधान्वातमयान्स्कंधचरान्परिधीनित्यर्थः १२ १३ १४ १५ १६ १७ १८ १९ २०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तोयंयोनिस्थानंयस्यतेनजलशायिनानारायणेनतोययोनिनावन्हिनावा २५ वारिविक्षरेजलवर्षिणी २६ २७ २८ २९ ३० ३१
३२ ३३ ३४ तपसेऽर्करूपीसन्गोपुरश्मिपुमंडलेइत्यर्थः ३५ वृषाणान्कस्यजलस्यपानात्चवृषाकपिः अन्येभ्योपिदृश्यतइतिदीर्घः ३६

ध्रुवःस्वयंभुवासृष्टोयुगांतस्तोययोनिना इत्येवंदानवाःसर्वेमेनिरेत्रस्तचेतसः २५ मयश्चशंबरश्चैवमहामायाधरौतदा पर्जन्यवारु
णीमायेसृजेतांवारिविक्षरे २६ ताभ्यांवन्हिःसमायाभ्यांसिच्यमानःसमततः तोयौघैःपर्वतनिभैर्मृदुश्चिरंभवद्रणे २७ शाम्यमाने
तुसमरेपावकेदैत्यनाशिनि बृहत्कीर्तिर्बृहत्तेजावन्हिमाहबृहस्पतिः २८ गुरुरुवाच हिरण्यरेतःसुमुखज्वलनाद्व्यसर्वभु
क् सप्तजिव्हाननक्षामलेलिहानमहाबल २९ आत्मावायुस्तवविभोशरीरंसर्ववीरुधः योनिरापश्चतेप्रोक्तायोनिस्त्वमसिचांभसः ३०
ऊर्ध्वंचाधश्चगच्छतिसंचरंतिचपार्श्वतः अर्चिषस्तेमहाभागसर्वतःप्रभवंतिच ३१ त्वमेवाग्नेसर्वमसित्वयिसर्वमिदंजगत् त्वंधारय
सिभूतानिभुवनंत्वंबिभर्षिच ३२ त्वमग्नेहव्यवाडेकस्त्वमेवपरमंहविः यजंतिचसदासंतस्त्वामेवपरमाध्वरे ३३ त्वमन्नंप्राणिनांभुंक्ते
जग्धपीतासितप्रभो त्वयिप्रवृत्तोविजयस्त्वयिलोकाःप्रतिष्ठिताः ३४ सर्वांल्लोकांस्त्रीनिमान्हव्यवाहप्राप्तेकालेत्वपचस्येवदीप्तः त्वमे
वैकस्तपसेजातवेदोनान्यस्त्वत्तोविद्यतेगोषुदेव ३५ वृषाकपिःसिंधुपतिस्त्वमग्नेमहामखेषुग्र्यहरस्त्वमेव विश्वस्यभूम्नस्त्वमसिप्र
सूतिस्त्वंचप्रतिष्ठाभगवन्प्रजानाम् ३६ सृजस्यपोराश्चाभिजातवेदस्त्वयोषधीरोषधीनारसांश्च विश्वंत्वमादाययुगांतकालेस्रष्टाभ-
वस्यानलसर्वकाले ३७ त्वमग्नेसर्वभूतानांयोनिर्वेदेषुगीयसे त्वयादेवहितार्थायनिहतादानवारणे ३८ स्वयोनिस्तेमहातेजःस्तो-
यमरवशतार्चितम् तांस्वयोनिसमासाद्यकिंविषीदसिपावक ३९ त्रायस्वसमरेदेवान्दैत्येभ्यःसुरसत्तम पिंगाक्षलोहितग्रीवकृष्ण
वर्त्मन्हुताशन ४० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिवामनेग्निस्तवोनामद्विषष्टितमोऽध्यायः ६२ वैशंपा
यनउवाच बृहस्पतेस्तुवचनंश्रुत्वासत्यंसमीरितम् प्रजज्वालरणेवन्हिर्हविषेवमहामखे १ हतास्तुमायादैत्यानांप्रदीप्तेनाग्नि-
नारणे हतमायाहतबलाबलिंतेसमुपस्थिताः २ पराजितेषुदैत्येषुवन्हिनाद्भुतकर्मणा प्रन्हादस्तूत्तरंवाक्यंआहदैत्यपतिंबलिम् ३
भवानग्निश्चवायुश्चभास्करःसलिलंशशी नक्षत्राणिदिशोव्योमभूश्चदानवसत्तम ४ भविष्यंचैवभूतंचभवच्चासुरसत्तम द-
त्तंहितेभगवतावरदेनस्वयंभुवा ५ इंद्रत्वंचामरत्वंचयुद्धेचाप्यपराजयः ईशित्वंचवशित्वंचबलंचैवामितंशुभम् ६

३७ ३८ ३९ ४० इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांद्विषष्टितमोऽध्यायः ६२ बृहस्पतेस्त्विति १ २ ३ ४ ५ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ३ सऋब्रह्मात्मा शोभनयज्ञस्वरूपः वेदःस्वरूपोवा सुवर्चस्कःशोभनंवर्चःविद्यातपोजन्यंतेजःयस्यास्सतथा ४ अर्चिष्मान् शमीगर्भोऽश्वत्थः सएव-
स्वस्ययोनिर्यस्यासौशमीगर्भस्वयोनिः ५ ६ शुचिरोमापावनधूमः ७ ८ सोमः पूताशनः अभिषुतंसोमंमश्नातीत्यर्थः अद्रिधृक् सोमाभिषं
वार्थंग्रावाणोध्रियंतेस्मइत्यद्रिधृक् ९ १० ११ १२ १३ यस्यवायोर्योनिराकाशः सप्तस्वरगतानादब्रह्मप्रासायत्रनादात्मकंब्रह्मस

रोहितोलोहितग्रीवोहूर्तादाताहविःकविः पावकोविश्वभुक्देवःसर्वदेवाननःप्रभुः ३ सऋब्रह्मात्मासऋवर्चस्कःसहस्रार्चिर्विभावसुः
कृष्णवर्त्माचित्रभानुर्देवानामपिदेवराट् ४ लोकसाक्षीद्विजहुतःसदार्चिष्मान्वषट्कृतः हव्यभक्षःशमीगर्भःस्वयोनिःसर्वकर्म-
कृत् ५ पावनःसर्वभूतानांत्रिदशानांतपोनिधिः शमनःसर्वपापानांलेलिहानस्तपोमयः ६ प्रदक्षिणावर्तशिखःशुचिरोमामखा-
कृतिः हव्यभुक्भूतभव्येशोयज्ञभागहरोहरिः ७ सोमपःसुमहातेजाभूतेशःसुमहातपाः अधृष्यःपावकोभूतिर्भूतात्मावैस्वधाधि
पः ८ स्वाहापतिःसामगीतःसोमपूताशनोऽद्रिधृक् देवदेवोमहाक्रोधोरुद्रात्माब्रह्मसंभवः ९ लोहिताश्ववायुचक्ररथमास्थायभूत-
धृक् धूमकेतुर्धूमशिखोनीलवासाःसुरोत्तमः १० उद्यम्यदिव्यमाग्नेयंशस्त्रंदेवोरणेमहान् दानवानांसहस्राणिप्रयुतान्यर्बुदानिच ११ द
दाहभगवान्वह्निःसंक्रुद्धःप्रलयेयथा प्राणोयःसर्वभूतानांवेदांतिष्ठतिपंचधा १२ यंतायश्चहुताशश्चसखाचप्रभुरीश्वरः प्रभंजनेयो
लोकानांयुगांतेसर्वनाशनः १३ सप्तस्वरगतायस्ययोनिर्गीर्भिरुदीर्यते योह्याकाशमयोदेवोदूरगःसर्वसंभवः १४ यश्चकर्ताविकर्ताच
गतिर्गतिमतांप्रभुः वेदकर्तासमोलोकेब्रह्मणायःसनातनः १५ अमूर्तिर्मतंयंप्राहुर्महाभूतंमहत्तरम् सोग्निस्समीरयामासशमीगर्भंस-
मीरणः १६ त्रिदिवारोहिभिर्ज्वालैर्जृंभमाणोदिशोदश दानवानामभावाययुगांताग्निरिवोत्थितः १७ मेदोमज्जामहापंकांकेशशैवलशालि
नीम् योधशीर्षोपलवहांमृतद्वीपतटोत्कटाम् १८ शोणितोदांरणेदृष्ट्वासंग्रामसरितंविभुः वन्हिःप्रस्कंदयामासदैत्यानांभयवर्द्धनः १९
ततोग्निर्दितिजान्सर्वान्प्रह्लादप्रमुखांस्तथा पराजयानःसविभुःक्रोशमानोमहामृधे २० केचित्प्रदीप्तैर्मुकुटैःकेचिद्दीप्तैःशिरोरुहैः के
चित्प्रदीप्तवसनैःकेचिद्दीप्तैर्भुजाननैः २१ केचित्प्रदीप्तैरुरुभिःकेचिच्छत्रैर्ध्वजैरथैः असुरास्तत्रदृश्यंतेप्रदीप्तेनाग्निनावृताः २२ त्य
क्त्वायुधानिसर्वाणिसध्वजांश्चरथोत्तमान् प्रयांतिसमरेभीताःपावकेनपराजिताः २३ नचपश्यंतितेवन्हिंप्रदीप्तंध्वजिनीमुखे दि-
शःखड्गाश्रमेघाश्चदीप्तान्पश्यंतिदानवाः २४

वैवेदकारणंआविर्भवतीत्यर्थः अनएवाकाशमयः १४ वेदकर्तावागुच्चारणहेतूनांस्थानकरणादी
नांचहेतुत्वात्ब्रह्मणाचतुर्मुखेन १५ १६ १७ १८ सरितंप्रस्कंदयामासप्रवाहयामास १९ २० २१ २२ २३ २४ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८

प्रगृह्यरुचिरंवज्रंदांसंरौद्राट्टहासिनम् दैत्यानयोधयत्सर्वान्महेंद्रःपाकशासनः १३ अधृष्यःसर्वभूतानाम दित्यादयितःसुतः ततः
प्रवृत्तःसंग्रामोबलिवासवयोस्तदा १४ उभाभ्यांदेवदैत्याभ्यामचिरान्महदद्भुतः अतिवीर्यबलोदग्रस्तुमुलोलोमहर्षणः १५ प्रह्लादे-
नस्तुतिशतैःकर्मभिर्जयसम्मतैः प्रबोधितोदैत्यपतिरग्निरिद्धइवाबभौ १६ सुरासुरेंद्रयोर्दृष्ट्वासंग्रामंलोमहर्षणम् देवानांदानवानांच
भूयोयुद्धमभूत्तदा १७ ततोविध्यन्महेंद्रस्तंबलिंशस्त्रैर्महाबलम् तान्यस्त्राणिमहाबाहुश्चिच्छेदशतधारणे १८ ततःक्रुद्धःपुनस्तत्र-
निजघ्नेदानवंमहत् आग्नेयमथशत्रुघ्नंचिक्षेपेंद्रोमहाबलः तदृष्ट्वाखेसमागच्छत्प्रलयानलसन्निभम् १९ पातयामासतच्चेंद्रवारुणा
स्त्रेणधीमता सक्रुद्धोमघवान्वज्रमगृण्हात्सर्वतोपमम् २० हंतुकामोरणश्लाघीबलिंदैत्याधिपंरणे ततःशुश्रावदेवेंद्रःकौशिकोह-
रिवाहनः २१ अशरीरांशुभांवाणींतस्मिन्महतिवैशसे निवर्तस्वमहाबाहोसुराणानंदिवर्धन २२ पुरंदरसुरश्रेष्ठनजेष्यसिरणे-
बलिम् तपसात्युत्तमोदैत्योवरदानेनचाधिकः २३ स्वयंभूःपरितोषाच्चसत्यधर्माच्चवासव नैषशक्यस्त्वयाजेतुंत्रिदशैर्वासुरेश्वर
२४ योह्यस्यजेताभगवान्तंशृणुष्वसमाहितः ब्रह्मणःसहिसर्वस्वंदेवानांचैवसागतिः २५ पररहस्यंधर्मस्यपरस्यचपरागतिः परात्प
रतरःश्रीमान्परावरगतिःप्रभुः २६ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् शंखचक्रगदापाणिःपीतवासाःसुरारिहा २७ जेता
जेयोजयश्श्रीमान्सोऽस्यजेताभविष्यति श्रुत्वादिव्यांतुमधुरांवाणींतामशरीरिणीम् २८ अपयातोरणाच्छक्रःसार्द्धंसर्वैःसुरोत्तमैः अ
पयातेतुदेवेंद्रेकौशिकेहरिवाहने २९ सिंहनादोमहानासीद्दानवानांमहामृधे ततःकिलकिलाशब्दःक्ष्वेडितास्फोटितस्वनः ३० शंखा
नानिनदश्चात्रयोधानांवल्गितस्वनः वादित्राणांचनिर्घोषस्तुमुलश्चाभवत्तदा ३१ जयशब्दरवाश्चैवदेवानांतुपराजये ससैन्योदैत्य
राजस्तुस्तूयमानःसुहृद्गणैः ३२ बलिर्द्यौर्विबभौदैत्योहिरण्यकशिपुर्यथा ३३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणि
वामनेदेवासुरसंग्रामोनामचतुःषष्टितमोऽध्यायः ६४ वैशंपायनउवाच निःप्रयत्नेषुदेवेषुत्रैलोक्येदैत्यपालिते जयेब
लेर्बलवतोमयशंबरयोस्तथा १ सुधासुदिक्षुसर्वासुप्रवृत्तेधर्मकर्मणि अपावृत्तेचंद्रमसिअयनस्थेदिवाकरे २ प्रह्लादशंबर
मयैरनुह्रादेनचैवहि दिक्षुसर्वासुगुप्तासुगगनेदैत्यपालिते ३ दैत्येषुमखशोभाभ्यस्वर्गार्थदर्शयत्सुच प्रकृतिस्थेतदालोकेवर्त्तमानेच-
सत्पथे ४

२९ ३० ३१ ३२ ३३ इतिश्रीमहाभारतेहरि०भविष्य०टीकायांचतुःषष्टितमोऽध्यायः ६४ निःप्रयत्नेष्विति १ सुधासुअमृतमयीषुअपवृत्तेउद्धरिते २ ३ ४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सर्वभूतेश्वरस्त्वंचदैत्यराजसदातव महायोगीश्वरस्त्वंचशूरस्त्वंचमहामृधे ७ अणिमालघिमाश्चैवयेचान्येसात्विकागुणाः तत्पराजित्य
दैत्येंद्रदेवान्सर्वांश्चसानुगान् ८ यथोक्तंब्रह्मणाराजन्तत्तथाननृतंन्यथा तस्यतद्वचनंश्रुत्वाप्रह्लादस्यमहात्मनः ९ बलिःपरम
संहृष्टःप्रायाच्छक्ररथप्रति ९ ततःप्रयातस्त्रिदशेंद्रसान्निध्यंमहासुरेंद्रंबलिमुत्तमश्रियम् तमजसाजग्मुरभिप्रदक्षिणंद्विजाश्चपु-
ण्याःपशवश्चसत्तमाः १० महाजटाभारधरास्तपस्विनस्तदानमाहुर्विधिमंत्रमंगलैः अभिष्टुवंतःकवयःस्वलंकृतंबलिंप्रयांतंरणमूर्द्धनि-
स्थितम् ११ प्रतप्तजांबूनदचित्रभूषणैर्दिव्यैश्चरत्नैर्विविधैरलंकृतः विराजमानःपरमेणवर्चसारणेविभात्यग्निशिखेवदानवः १२ सर्वे
तदाशत्रुबलार्दितंबलंबलिर्ददर्शोत्तमसत्ववीर्यवान् जलागमेश्रीमदिवाभ्रमंडलंविशीर्यमाणंनभसीववायुना १३ ततोददर्शाथबला-
निसर्वतोरणेप्रयुक्तानिहुताशनेनवै समुच्छ्रितान्युग्रतराणितत्रवैसमुद्रवेगानिवपर्वसंधिषु १४ सशूलशक्त्यृष्टिगदासिसायकान्क्षिपन्
रिपूणांसमरेमहात्मनाम् ननादसिंहर्षभमत्तनागवज्जलागमेतोयदवच्चवीर्यवान् १५ दिव्यास्त्रधूमःसुभुजोग्रवायुर्महाबलःपौरुषवि
क्रमेंधनः प्रजादिधक्षन्निवकालवह्निःसुघोररूपोविबभौरणेबली १६ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिवामनप्रा
दुर्भावेत्रिषष्टितमोऽध्यायः ६३ वैशंपायनउवाच बलिनातुसुराःसर्वेविजयित्वासुराधिपम् रणेशरशतैर्भिन्नाःससैन्यावै
पराजिताः १ विद्रुतायातिदैत्येंद्रवध्यमानामहाचमूः जितास्तुबलिनादेवाःशक्रमाहुर्महाबलम् २ देवाऊचुः भवान्नि
हंताधाताचलोकानांप्रभुरव्ययः त्वमप्रतिमकर्माचतथैवानुपमद्युतिः ३ विद्रुतानीहसैन्यानिसहास्माभिःसुरेश्वर रथचक्रध्वजाक्षा
णिविभिन्नानिमहासुरैः ४ रथहस्त्यश्वयोधाश्चपदाताश्चसहस्रशः भिन्नाश्छिन्नाश्चशतशोगदामुसलपट्टिशैः ५ महाभैरवरू
पंहिदैत्येंद्रेणकृतंरणे किमुपेक्षसिदैत्येंद्रैर्हन्यमानांमहाचमूम् ६ त्रायस्वत्रिदशश्रेष्ठशरण्यःशरणागतान् श्रुत्वातुवचनंतेषांदेवाना
ममराधिपः ७ सवत्ताग्निसमःक्रुद्धःसर्वान्दहतिदानवान् दिवाकरकराकारकिरीटंधारयन्प्रभुः ८ वैडूर्यवर्णसंकाशोनानारत्नाचि
तांगदः मयूररोमारक्ताक्षःशतबाहुःसहस्रदृक् ९ हरिरेकोहरिश्मश्रुर्नानाकेतुर्महाबलः वज्रप्रहरणःश्रीमान्योगीशतशिरोधरः १०
सधनुर्बद्धसन्नाहःशतादित्यसमप्रभः देवगंधर्वयक्षौघैरनुयातःसहस्रशः ११ सामगैश्चजपैश्चापिस्तूयमानोमहर्षिभिः शतपर्वमहा
रौद्रंस्फोटनंसर्वतोमुखम् १२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 अभावेपापानांभावानांभावेपुण्यानामित्यर्थः ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ इत्याद्यौतक्रियाकेव
 ल्याक्रियावापूर्त्तादिका १७ १८ इतिश्रीमहाभारतेहरिवंशेभविष्यपर्वणिटीकायांपंचषष्टितमोऽध्यायः ६५ १ २ ३ ४ ५ ६

अभावेसर्वपापानांभावेचैवतथास्थिते भावेतपसिसिद्धानांसर्वत्राश्रमरक्षिषु ५ चतुष्पादेस्थितेधर्मेअधर्मेपादविग्रहे प्रजापालन
युक्तेषुभ्राजमानेषुराजसु ६ स्वधर्मसंप्रयुक्तेषुसर्वाश्रमनिवासिषु अभिषिक्तोसुरैःसर्वैर्दैत्यराजोबलिस्तदा ७ हृष्टेष्वसुरसंघेषु
नदत्सुमुदितेषुच अथाभ्युपगतालक्ष्मीर्बलिंपद्मासनेस्थिता ८ पद्मोद्यतकरादेवीवरदासुरमोहिनी श्रीरुवाच बलेब
लवतांश्रेष्ठमहाराजमहाद्युते ९ प्रीतास्मितवभद्रंतेदेवतानांपराजये यत्त्वयायुधिविक्रम्यदेवराजःपराजितः १० दृष्ट्वातेपरमंस
त्त्वंततोहंस्वयमागता नाश्चर्यंदानवश्रेष्ठहिरण्यकशिपोःकुले ११ प्रसूतस्यासुरेंद्रस्यतवकर्मेदमीदृशम् विशेषतस्त्वयाराजन्नुदे
वेंद्रःप्रपितामहः १२ येनभुक्तंहिनिखिलंत्रैलोक्यमिदमव्ययम् विशेषतस्तवविभोसर्वेधर्मपथेस्थिताः १३ तेनत्रैलोक्यमुख्येन
मोक्ष्यस्यामितविक्रम एवमुक्त्वातुसादेवीलक्ष्मीर्दैत्यपतिंबलिम् १४ प्रविष्टावरदासौम्यासर्वभूतमनोरमा शिष्टाश्चदेव्यःप्रवरा
ह्रीःकीर्त्तिर्द्युतिरेवच १५ प्रभाधृतिःक्षमाभूतिर्नीतिर्विद्यादयास्मृतिः स्मृतिर्लज्जातथामेधालक्ष्मीरीहागतिस्तथा १६ श्रुतिःशा
न्तिरिलाकीर्त्तिःशांतिःपुष्टिःक्रियास्तथा सर्वाश्चाप्सरसोदिव्यानृत्यगीतविशारदाः १७ पतिंप्राप्ताःसुदैत्यंत्रैलोक्येसचराचरे
प्राप्तमैश्वर्यममितंबलिनाब्रह्मवादिना १८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिवामनप्रादुर्भावेपंचषष्टितमोऽध्यायः
६५ जनमेजयउवाच पराजिताःसुरादैत्यैःकिमकुर्वंतवैमुने कथंचत्रिदिवंलब्धंभूयोदेवैर्द्विजोत्तम १ वैशंपायनउवाच
श्रुत्वावाणींतुतांदिव्यांसहदेवैःसुराधिपः प्राग्दिशंप्रस्थितःश्रीमानादित्यालयमुत्तमम् २ प्राप्यादित्यालयंशक्रःकथयामासतांगिरम् अ
दित्यास्सापुत्रायुक्तेतेनवाणीपुराश्रुता ३ अदितिरुवाच यद्येवंपुत्रयुष्माभिर्नशक्योहंतुमाहवे बलिर्विरोचनसुतःसर्वैश्चै
वमरुद्गणैः ४ सहस्रशिरसाहंतुंकेवलंशक्यतेसुरः तेनैकेनसहस्राक्षनह्यन्येनशतक्रतो ५ तद्वःपृच्छस्वपितरंकश्यपंसत्यवा
दिनम् पराजयार्थंदैत्यस्यबलेस्तस्यमहात्मनः ६ ततोदित्यासहसुराःसंप्राप्ताःकश्यपांतिकम् अपश्यन्कश्यपंतत्रमुनिंदिव्यतपो
निधिम् ७ आद्यंदेवगुरुंदिव्यंक्लिन्नंत्रिषवणांबुभिः तेजसाभास्कराकारंगौरमग्निशिखाप्रभम् ८ न्यस्तदंडंतपोयुक्तंबद्धकृष्णा
जिनोत्तरम् वल्कलाजिनसंवीतंप्रदीप्तंब्रह्मवर्चसा ९

७ ८ ९ ६६ ६६ ६६ ६६ ६६ ६६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१० ११ यइति उत्तम इतिचतुर्मुखउक्तः तस्यआत्मावैपुत्रनामासीतिश्रुत्यावगतःपुत्रेमरीचौआत्मभावः एवंपरंपरयापौत्रेपिसाधारण्येनात्मभावप्रा-
प्तावाह आत्मभावविशेषेणेति पुत्रापेक्षयापौत्रेआत्मभावोविशेषतोस्तिअतएवप्रह्लादगुणाःवैष्णवत्वादयःपौत्रेबलौकात्स्न्येनाभिव्यक्ताःनतुपुत्रेविरो
चने अतएवदाक्षिणात्याःपौत्रंपितामहनाम्नायोजयंति १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२

हुताशमिवदीप्यंतमाज्यमंत्रपुरस्कृतम् स्वाध्यायनिरतंनित्यंवपुष्मंतमिवानलम् १० तंब्रह्मवादिनंश्रेष्ठंसुरासुरगुरुंप्रभुम् प्रतपंतमिवा
दित्यंमारीचंदीप्ततेजसम् ११ यःस्रष्टासर्वभूतानांप्रजानांपतिरुत्तमः आत्मभावविशेषेणतृतीयोयःप्रजापतिः १२ ततःप्रणम्यतेवीराः
सहादित्याःसुरर्षभाः ऊचुःप्रांजलयःसर्वेब्रह्मणामिवमानसाः १३ तच्छ्रुतंयुधिशक्रेणसस्स्वत्वासमीरितम् अजेयास्त्रिदशैःसर्वेब-
लिर्दानवसत्तमः १४ श्रुत्वातुवचनंतेषांपुत्राणांकश्यपस्तदा चकारगमनेबुद्धिंब्रह्मलोकायलोककृत् १५ कश्यपउवाच
गच्छामब्रह्मसदनंब्रह्मघोषनिनादितम् यथाश्रुतंचतत्रैवब्रह्मणेवदतानघाः १६ वैशंपायनउवाच ततोदित्यासहसुरायां
तंकश्यपमन्वयुः प्रस्थितंब्रह्मसदनंदेवर्षिगणसेवितम् १७ तेमुहूर्तेनसंप्राप्ताब्रह्मलोकंदिवौकसः दिव्यैःकामगमैर्यानैर्ग्रहाद्यैःसुम-
नोहरैः १८ दिदृक्षवस्तेब्रह्माणंतपसोराशिमव्ययम् अभ्यगच्छंतविस्तीर्णांब्रह्मणःपरमांसभाम् १९ षट्पदोद्गीतनिनदांसामगीतविमि
श्रिताम् श्रेयस्करीममित्रघ्नोदृष्ट्वासंजहृषुर्मुदा २० ब्राह्मणैश्चमहाभागैर्वेदवेदांगपारगैः ऋचोबह्वृचमुख्यैश्चप्रेर्यमाणपदाक्षराः २१
शुश्रुवुस्तमरव्याघ्राविततेषुचकर्मसु यज्ञवेदांगविदुषांपदक्रमविदांतथा २२ घोषेणपरमर्षीणांसाबभूवनिनादिता यज्ञसंस्तवविद्भि
श्चशिक्षाविद्भिस्तथाद्विजैः २३ शब्दनिर्वचनार्थज्ञैःसर्वविद्याविशारदैः मीमांसाहितवाक्यज्ञैःसर्ववादविशारदैः २४ हृष्टपुष्टस्वरैस्तत्र
द्विजैर्वल्गुवादिभिः नादितंब्रह्मसदनंप्रवरैर्देवसद्मवत् २५ ततस्तत्रसमनुप्राप्यशृण्वतोवैध्वनिंसुराः पूतान्यात्मशरीराणिमेनिरेतुन
संशयः २६ तूष्णींभूताएकचित्ताब्राह्मण्यगतमानसाः विस्मयोत्फुल्लनयनानिरीक्षंतःपरस्परम् २७ नमस्कुर्वंतिचपुनर्गुरुंलोकगुरुंप्र
भुम् मनसैवसुरश्रेष्ठाःपुरस्कृत्यतुकश्यपम् २८ पुनःसंपूज्यपरमवेदोच्चारणनिस्वनम् गंभीरोदारमधुरंसुस्वरंहंसगद्गदम् २९ ऐ
क्यनानात्वसंयोगसमवायविशारदैः लोकायतिकमुख्यैश्चशुश्रुवुःस्वनमीरितम् ३०

२३ २४ २५ २६ २७
२८ २९ लोकायतिकमुख्यैःशास्त्रविद्भिःसहदेवाःशुश्रुवुरितिसंबंधः नचलोकायतानांदेहात्मवादिनांवेदद्रोहिणांब्रह्मलोकेगतिःसंभवतीतिशंकनी-
यम् अत्रलोकायतशब्दस्यतच्छास्त्राभिमानिदेवतापरत्वात् तत्रमूर्तिमंतावेदानांसामगानांशास्त्राणांचसर्वेषांसद्भावस्यकथनादित्यूह्यम् ३० ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७ ८ ९ १० उष्णगेउष्णोग्रीष्मः गतोतीतोयत्रतस्मिन्नुष्णगेवर्षाकाले ११ १२ १३ अमोघःरवोयस्यमुखेतिपाठेपिरवएवलक्ष्मः
१४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ सुरेशायसुरेशस्य २५ २६ २७ इतिश्रीमहा

तंदेवापिमहात्मानंनविदुःकोप्यसाविति वेदात्मानंचविश्वंचसदेवःपुरुषोत्तमः ७ तस्यैवतुप्रसादेनप्रवक्ष्येहंपरांगतिम् यत्रयोगंसमा-
स्थायतपश्चरतिदुश्चरम् ८ क्षीरोदस्योत्तरेकूलेउदीच्यांदिशिदेवताः अमृतंनामपरमंस्थानमाहुर्मनीषिणः भवंतस्तत्रवैगत्वातपसासं
शितव्रताः ९ अमृतस्थानमासाद्यतपश्चरतदुश्चरम् तत्रश्रोष्यथविस्पष्टांस्निग्धगंभीरनिःस्वनाम् १० उष्णगेतोयपूर्णस्यतोयदस्य
समस्वनाम् युक्ताक्षरपदांस्निग्धांरम्यामभयदांशिवाम् ११ वाणींपरमसंस्कारांवरदांब्रह्मवादिनीम् दिव्यांसरस्वतींसत्यांसर्वकिल्बिष
नाशिनीम् १२ सर्वदेवाधिदेवस्यभाषितांभावितात्मनः तस्यव्रतसमाप्तौतुयावद्व्रतविसर्जनम् १३ अमोघस्यतुदेवस्यविश्वरूपस्यमहा
त्मनः स्वागतंवःसुरश्रेष्ठामत्सकाशेव्यवस्थिताः १४ कस्यकिंवावरंदेवाददामिवरदःस्थितः तंकश्यपोदितिश्चैववरंगृण्हीतवैततः १५
प्रणम्यशिरसापादौतस्मैयोगात्मनेतदा भवानेवचनःपुत्रोभवत्वितिनसंशयः १६ उक्तश्चपरयाभक्त्यातथास्त्विति सवक्ष्यति देवाभ्रुवं
तुतसर्वेभ्रातानस्त्वंभवेतिह १७ तथास्त्वितिचसश्रीमान्वक्ष्यतेसर्वलोककृत् १८ तस्मादेवंगृहीत्वातुवरंत्रिदशसत्तमाः कृतकृत्याः
पुनःसर्वेगच्छध्वंस्वस्वमालयम् १९ तथास्त्वितिसुराःसर्वेकश्यपोदितिरेवच वंदित्वाब्रह्मचरणौगताःसोम्यादिशंप्रति २० तेचि
रेणैवसंप्राप्ताःक्षीरोदस्योत्तरंतटम् यथोद्दिष्टंभगवताब्रह्मणाब्रह्मवादिना २१ तेतीत्यसागरान्सर्वान्पर्वतांश्चबहून्क्षणात् नद्य
श्चविविधादिव्याःपृथिव्यांसुरसत्तमाः २२ पश्यंतिचसुघोरांवैसर्वसत्वविवर्जिताम् अभास्करामपर्यांदांतमसासंवृतांदिशम् अ
मृतस्थानमासाद्यकश्यपेनसुरैःसह २३ दीक्षिताकुमदुर्दिव्यंव्रतंवर्षसहस्रकम् २४ प्रसादार्थंसुरेशायतस्मैयोगायधीमते ना
रायणायदेवायसहस्राक्षायधीमते २५ ब्रह्मचर्येणमौनेनस्थानवीरासनेनच दमेनचसुराःसर्वेतपोदुश्चरमास्थिताः २६ कश्य
पस्तत्रभगवान्प्रसादार्थंमहात्मनः उदीरयतिवेदोक्तंयमाहुःपरमंस्तवम् २७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यप-
र्वणिवामनप्रादुर्भावेसप्तषष्टितमोऽध्यायः ६७ कश्यपउवाच नमोस्तुतेदेवदेवेशएकशृंगवराहवृषार्चिषसिंधुवृषवृषाकपे
सुरवृषभसुरनिर्मित अनिर्मितभद्रकपिलविष्वक्सेनध्रुवधर्मधर्मराजवैकुंठत्रेतावर्त्त १७

भारतेह०भ०टीकायांसप्तषष्टितमोऽध्यायः ६७ नमोस्तु० १ २ ३ वृषार्चिषिध-
र्मभयूरव ४ वृषसिंधुधर्मसागर ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ त्रेतावर्त्तकर्मणाश्रौतेनावर्त्ततेनाभिमुखोभवतीतित्रेतावर्त्त १७ १८ १९ २० अग्निजकार्त्तिकेय
२१ १७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तत्रतत्रचविप्रेंद्रान्नियतान्संशितव्रतान् जपहोमपरान्मुख्यान्ददृशुःकश्यपात्मजाः ३१ तस्यांसभायामास्तेस्मब्रह्मालोकपितामहः
सुरासुरगुरुःश्रीमान्विधिवद्देवमायया ३२ उपासतेचतत्रैनंप्रजानांपतयःप्रभुम् दक्षःप्रचेताःपुलहोमरीचिश्चद्विजोत्तमः ३३ भृ
गुरत्रिर्वसिष्ठश्चगौतमोनारदस्तथा मनुर्द्यौरंतरिक्षंचवायुस्तेजोजलंमही ३४ शब्दस्पर्शौचरूपंचरसोगंधस्तथैवच प्रकृतिश्चविकाराश्चय-
च्चान्यत्कारणंमहत् ३५ सांगोपांगाश्चतुर्वेदाःसरहस्यपदक्रमाः क्रियाश्चक्रतवश्चैवसंकल्पःप्राणएवच ३६ एतेचान्येचबहवःस्वयंभु-
वमुपस्थिताः अर्थोधर्मश्चकामश्चद्वेषोदर्पश्चनित्यदा ३७ शुक्रोबृहस्पतिश्चैवसंवर्तोबुधएवच शनैश्चरोथराहुश्चग्रहाःसर्वेह्यशेष
तः ३८ मरुतोविश्वकर्माचनक्षत्राणिचभारत दिवाकरश्चसोमश्चब्रह्माणंसमुपासते सावित्रीदुर्गतरिणीवाणीसप्तविधातथा ३९
सर्वाणिश्रुतिशास्त्राणिगाथाश्चनियमास्तथा भाष्याणिसर्वशास्त्राणिदेहवंतिविशांपते क्षणालवामुहूर्ताश्चदिवारात्रिश्चभारत ४०
अर्धमासाश्चमासाश्चऋतवःषट्तथैवच संवत्सराश्चतुर्युगमासारात्रिश्चतुर्विधा ४१ कालचक्रंचयद्दिव्यंनित्यंध्रुवमव्ययम् एते
चान्येचबहवःस्वयंभुवमुपस्थिताः ४२ तेप्रविष्टाःसभांदिव्यांब्रह्मणःसर्वकामदाम् कश्यपस्त्रिदशैःसार्धंपुत्रैर्धर्मविशारदैः ४३
सर्वतेजोमयींदिव्यांब्रह्मर्षिगणसेवितम् ब्राह्म्याश्रियादीप्यमानामचिंत्यांविगतक्लमम् ४४ ब्रह्माणंवीक्ष्यतेसर्वेआसीनंपरमासने ज
ग्मुर्मूर्ध्नाशुभौपादौब्रह्मणस्तेदिवौकसः ४५ शिरोभिःस्पृश्यचरणौतस्यतेपरमेष्ठिनः विमुक्ताःसर्वपापेभ्यःशांताविगतकल्मषाः ४६ दृ
ष्ट्वातुतान्सुरान्सर्वान्कश्यपेनसहागतान् आहब्रह्मामहातेजादेवानांप्रभुरीश्वरः ४७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभवि-
ष्यपर्वणिवामनप्रादुर्भावेषट्षष्टितमोऽध्यायः ६६ ब्रह्मोवाच यदर्थमिहसंप्राप्ताभवंतःसर्वएवहि विजानाम्यहमव्यग्र
एतत्सर्वंमहाबलाः १ भविष्यतिवचःसोर्थःकांक्षितोयःसुरोत्तमाः बलेर्दानवमुख्यस्ययोविजेताभविष्यति २ नखल्वसुरसंघानामे-
कोजेतासविश्वकृत् त्रैलोक्यस्यापिजेतासौदेवानामपिचोत्तमः ३ धाताचैवहिलोकानांविश्वयोनिःसनातनः पूर्वदेवःसदाप्राहुर्हेमगर्भ
निदर्शनम् ४ आत्मादेवेनविभुनाकृतोजेयोमहात्मना बलेरसुरमुख्यस्यविश्वस्यजगतस्तथा ५ प्रभवःसहिसर्वेषामस्माकमपिपू
र्वजः अचिंत्यःसहिविश्वात्मायोगयुक्तःपरंतपः ६

४७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांषट्षष्टितमोऽध्यायः ६६ ९२

यदर्थमिति १ २ ३ हेमगर्भनिदर्शनं हिरण्यगर्भोनिदर्शनंप्रतिमापुत्रोयस्यसतथातंममपितरमित्यर्थः ४ विश्वस्याजेयमित्यर्थः ५ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीमहाभारते हरिवंशे भविष्यपर्वणि टीकायांमष्टषष्टितमोऽध्यायः ६८ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणि वामनप्रादुर्भावे अष्टषष्टितमोऽध्यायः ६८ वैशंपायनउवाच नारायणस्तुभ
गवान्श्रुत्वैतत्परमंस्तवम् ब्रह्मज्ञेनाद्विजेंद्रेण कश्यपेनसमीरितम् १ स्निग्धगंभीरनिर्घोषजीमूतःस्वनिनिःस्वनम् मनसाप्रीतियुक्तेन
विबुधानांमहात्मनाम् २ उवाचवचनंसम्यक्हृष्टपुष्टपदाक्षरम् आकाशात्सुसुवेशब्दोदर्शनंनोपलभ्यते ३ श्रीमान्प्रीतिमनादेवः
प्रोवाचप्रभुरीश्वरः विष्णुरुवाच प्रीतोस्मिवःसुरश्रेष्ठाःसर्वमंत्रोविनिश्चयम् वरंवृणुतभद्रंवोवरदोस्मिसुरोत्तमाः ४
कश्यपउवाच यदेवभगवान्प्रीतःसर्वेषाममरोत्तमः तदेवकृतकृत्याःस्मत्वंहिनःपरमागतिः ५ यदिप्रसन्नोभगवान्दातव्यो-
वावरोयदि वासवस्यानुजोभ्राता ज्ञातीनानंदिवर्द्धनः ६ आदित्यावामनःश्रीमान्भगवानसुवेसुरः वैशंपायनउवाच अदि
तिर्देवतामाचएतमेवार्थमुत्तमम् पुत्रार्थेवरदंप्राहभगवंतंवरार्थिनी ७ अदितिरुवाच याचेत्वांपुत्रकामावैभवान्पुत्रोभव
त्विति निःश्रेयसायसर्वेषांदेवानांहिमहात्मनाम् ८ देवाऊचुः भ्राताभर्त्ताचदाताचशरणंचभवस्वनः आदित्यास्त्वंतयात्वंयदे
वाःसवासवाः देवशब्दंवहिष्यतिकश्यपस्यात्मजोभव ९ वैशंपायनउवाच ततस्तानब्रवीद्विष्णुर्देवान्कश्यपमेवच एवंभव
तुभद्रंवोयथेष्टंकाममाप्नुत सर्वेषामेवयुष्माकंयेभविष्यंतिशत्रवः १० मुहूर्तमपितेसर्वेनस्थास्यंतिममाग्रतः हत्वासुरगणान्सर्वान्ये-
चान्येदेवशत्रवः ११ करिष्येदेवताःसर्वायज्ञभागाग्रभोजिनाः हव्यादांश्चसुरान्सर्वान्कव्यादांश्चपितॄनपि १२ करिष्येविबुधश्रेष्ठाः
पारमेष्ठ्येनकर्मणा यथागतेनमार्गेणनिवर्त्तध्वंसुरोत्तमाः १३ देवमातुस्तथादित्याःकश्यपस्यामितात्मनः यथामनीषितंकर्त्तागच्छध्वं-
स्वंस्वमालयम् १४ वैशंपायनउवाच एवमुक्तेतुवचनेविष्णुनाप्रभविष्णुना देवाःप्रहृष्टमनसःपूजयंतिस्मसर्वशः १५
विश्वेदेवामहात्मानःकश्यपोदितिरेवच साध्यामरुद्गणाश्चैवशक्रश्चैवमहाबलः नमस्कृत्यसुरेशायतस्मैदेवायरंहसे १६ प्रयाताःप्राग्
दिशंदिव्यंविपुलंकश्यपाश्रमम् गत्वातआश्रमंतत्रब्रह्मर्षिगणसेवितम् चेरुःस्वाध्यायनियताअदित्यागर्भसीम्नवः १७ अदितिर्देवे
मातावगर्भंदध्रेतितेजसम् भूतात्मानंमहात्मानंदिव्यंवर्षसहस्रकम् १८ पूर्णेवर्षसहस्रेतुप्रसूतागर्भमुत्तमम् सुराणांशरणंदेवमसुरा
णांविनाशनम् १९ गर्भस्थेनतुदेवेनपरित्राताःसुरास्तदा आददानेनतेजांसित्रैलोक्यस्यमहात्मना २० तस्मिन्जातेतुदेवेशेत्रैलोक्यस्य
सुखावहे भयदेदैत्यसंघानांसुराणानंदिवर्द्धने २१

१३ १४ १५ १६ १७ १८ १९ २० २१ ६९ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ द॰ टी॰ त्रिककुत् धर्मज्ञानवैराग्यस्कंध २८ दुंदुभेविजयावहध्वने ४० हंसाक्षर अजयमंत्र चंद्ररथसमष्टिमनोधिरूढविराडात्मन्नित्यर्थः ७२ ७३ आदोगतिः अ॰ प॰
९३ धर्मरूपः ९४ शतधारः सोमः १० एवंसहस्रधारः १०७ १३२ धात्रापरमेणयज्ञेनहेतुनाधाम्नोस्नेहेतोर्दिग्भ्यस्समाहृतास्रुकूलमेव १३३ स्रुक्भांडःस्रुगादि ६८ ३

अनादिमध्यनिधनधनंजय शुचिःश्रवः अग्निज २२ हविर्जअजअजयमृतेशयसनातनविधातस्त्रिकाम त्रिधामत्रिककुत् ककुद्मि
न् २८ दुंदुभेमहानाभलोकनाभपद्मनाभविरिंचेवरिष्ठबहुरूपविरूप विश्वरूपक्षयाक्षयसत्याक्षर ४० हंसाक्षर ४१ हव्यभुक्
खडपरशोशक्रमुंजकेशोहंसमहाहंसमहदक्षरहृषीकेशसूक्ष्मपरसूक्ष्मतुराषाट्विश्वमूर्तेस्रष्टाग्रजनीलनिस्तमोविरजस्तमोरजःसत्वधा
मसर्वलोकसर्वलोकप्रतिष्ठशिपिविष्टसुतपस्तपोग्रअग्रअग्रजधर्मनाभगभस्तिनाभधर्मनेमसत्यधामसत्याक्षरगभस्तिनेमेविपाप्मन्
७२ चंद्ररथ ७३ विपाप्मन् त्वमेवसमुद्रवासाः अजैकपात्सहस्रशीर्षसहस्रसंमितमहाशीर्षसहस्रदृक्सहस्रपात् अधोमुखमहा-
मुखमहापुरुषपुरुषोत्तमसहस्रबाहोसहस्रमूर्तेसहस्रास्यसहस्राक्षसहस्रभुजसहस्रभुव ९१ सहस्रशस्त्वामाहुर्वेदाःविश्वेदेवविश्वसं
भवसर्वेषामेवदेवानासोभग ९३ आदोगतिः विश्वत्वमाप्यायनःविश्वत्वामाहुःपुष्पहासपरमवरदस्त्वमेव १०० त्वमेववौषट्ओंकार
वषट्कारत्वामेकमाहुरग्र्यमखभागप्राशिनम् १०५ शतधार १७ सहस्रधारभूर्दभुवर्दस्वर्दभूर्भुवःस्वर्दत्वमेवभूतभुवनत्वंस्वधात्वमे
वब्रह्मेशयब्रह्ममयब्रह्मादिस्त्वमेवद्यौरसिपृथिव्यसिपूषासिमातरिश्वासिधर्मोसिमघवासिहोतापोतानेताहंतामंताहोम्यहोतापरात्परस्त्वम्
१३ होम्यहोतात्वमेवआपासिविश्वबाकू १३२ धात्रापरमेणधाम्नात्वमेवादिग्भ्यःस्रुक् १३३ स्रुग्भांडत्वंगणइष्टोसिइज्यासिईड्यासित्व
म्त्वमसिसमिद्धस्त्वमेवगतिर्गतिमतामसिमोक्षोसियोगोसिगुह्योसिसिद्धोसिधन्योसिधातासिपरमोसियज्ञोसिसोमोसियूपोसिदक्षिणा
सिदीक्षासिविश्वमसिस्थविष्ठस्थविरविश्वतुराषाट्हिरण्यगर्भहिरण्यनाभहिरण्यनारायणनारायणात्तरनृणामयनआदित्यवर्णआदि-
त्यतेजःमहापुरुषसुरोत्तमआदिदेवपद्मनाभपद्मेशयेपद्माक्षपद्मगर्भहिरण्यायकेशशंभुविश्वदेवविश्वतोमुखविश्वाक्षविश्वसंभवविश्व
भुक्त्वमेवभूरिविक्रमःचक्रक्रमात्रिभुवनस्वविक्रमस्त्वविक्रमबभ्रुस्तुविभुःप्रभाकरशंभुःस्वयंभूश्चभूतादिर्भूतात्मन्महाभूतविश्वभुक्त्व
मेवविश्वगोप्तासिविश्वंभरपवित्रमसिहविर्विशारदहविःकर्मअमृतेधनस्वरास्वरगुरोमहदादिदेवनृदेव १९९ ऊर्ध्वकर्मन् २०० पू
तात्मन्अमृतेशादिवस्पृक्विश्वस्यपते २०१ ३ घृताच्यसिअनंतकर्मनेद्रुहिणवशस्त्ववशाविश्वपास्त्वस्त्वमेवविश्वबिषार्थिवराथिनोनस्त्रा-
यस्वेति २२२ ९३
यज्ञोपस्करः १३ १९ ऊर्ध्वकर्मन्ऊर्ध्वगतिपदानिकर्माणियस्य २०० घृताचीजुहूयभूतध्रुवाच २०५ द्रुधनवृक्षवत्घनदेह २०६ २२२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२७ २८ २९ ३० ३१ ३२ रोमजातेनरोमावर्त्तेन ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१

कच्छपश्चापहर्त्ताचतक्षकश्चमहाबलः अधृष्टास्तेजसायुक्तामहाक्रोधामहाबलाः २७ एतेनागामहात्मानस्तस्मैप्रांजलयःस्थिताः तार्क्ष्य
श्चारिष्टनेमिश्चगरुडश्चमहाबलः २८ अरुणश्चारुणिश्चैववैनतेयाह्युपस्थिताः पितामहश्चभगवान्स्वयमागम्यलोककृत् २९ प्रा-
हचैवंगुरुःश्रीमान्सहसर्वैर्महात्मभिः ब्रह्मोवाच यस्मात्त्वं सूयतेलोकःप्रभविष्णुःसनातनः तस्माल्लोकेश्वरःश्रीमान्विष्णुरेव
भवत्त्वयम् ३० एवमुक्त्वातुभगवान्सार्द्धंदेवर्षिभिःप्रभुः नमस्कृत्वासुरेशायजगामत्रिदिवंपुनः ३१ सतुजातःसुरेशानःकश्यपस्यात्म
जःप्रभुः नवदुर्दिनमेघाभोरक्ताक्षोवामनाकृतिः ३२ श्रीवत्सेनोरसिश्रीमान्रोमजातेनराजता उत्फुल्ललोचनाःसर्वाःपश्यन्त्यप्सरस-
स्तदा ३३ दिविसूर्यसहस्रस्यभवेद्युगपदुत्थिता यदिभासदृशीसास्याद्भासस्तस्यमहात्मनः ३४ सुरर्षिप्रतिमःश्रीमान्भूर्भुवोभूत
भावनः शुचिरोमामहास्कंधःसर्वतेजोमयःप्रभुः ३५ यागतिःपुण्यकीर्त्तीनामगतिःपापकर्मणाम् योगसिद्धमहात्मानोयंविदुर्योगसु
त्तमम् ३६ यस्याष्टगुणमैश्वर्यंयमाहुर्देवसत्तमम् यंप्राप्यशाश्वतंविप्रानियतामोक्षकांक्षिणः ३७ जन्मनोमरणाच्चैवमुच्यंतेभयमा
रवः यदेतत्तपइत्याहुःसर्वाश्रमनिवासिनः ३८ सेवंतेयंयताहारादुश्चरंव्रतमास्थिताः योनंतइतिनागेषुसेव्यतेसर्वभोगिभिः ३९
सहस्रमूर्द्धारक्ताक्षःशेषादिभिरनुत्तमैः योयज्ञइतिविप्रेंद्रैरिज्यतेस्वर्गलिप्सुभिः ४० नानास्थानगतःश्रीमानेकःकविरनुत्तमः यंदे
वागातिवेत्तारंयज्ञभागप्रदायिनम् ४१ वृषार्चिश्चंद्रसूर्याक्षंदेवमाकाशविग्रहम् समाहत्रिदशान्सर्वान्वाचावैपरयाविभुः ४२
जानन्नपिमहातेजागतोयोगेनबालताम् किंकरोमिसुरश्रेष्ठाःकंवरंचददामिवः ४३ यत्कांक्षितंवैसर्वेषांतद्ब्रूतसुदायुताः तस्यतद्वच
नंश्रुत्वावामनस्यमहात्मनः ४४ सर्वेतंहृष्टमनसोदेवाःकश्यपनंदनम् ऊचुःप्रांजलयोविष्णुंसुराःशक्रपुरोगमाः ४५ ब्रह्मणोवरदा
नेनहृतंनोनिखिलंजगत् तपसामहताचैवविक्रमेणदमेनच ४६ बलिनादैत्यमुख्येनसर्वज्ञेनमहात्मना अवध्यःकिलसोस्माकंस
र्वेषांदेवसत्तम ४७ भवान्प्रभवतेतस्यनान्यःकश्चनसुव्रत यत्प्रपद्यामहेसर्वेभवंतंशरणार्थिनः शरण्यवरदंदेवंसर्वदेवभयापहम्
४८ ऋषीणांचहितार्थायलोकानांचसुरेश्वर प्रियार्थंचतथादित्याःकश्यपस्यतथैवच ४९ कव्यंपितॄणामुचितंसुराणांहव्यमुत्त-
मम् प्रवर्त्ततमहाबाहोयथापूर्वंसुरोत्तम ५० आनृण्यार्थंसुरेशस्यवासवस्यमहात्मनः प्रत्यानयमहेंद्रस्यत्रैलोक्यमिदमव्ययम् ५१

५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ५० ५१

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायां एकोनसप्ततितमोऽध्यायः ६९ प्रजानांसप्तमरीच्यादयः १ भास्करत्वकर्त्तीत्रिरप्याजगामेत्याह

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिएकोनसप्ततितमोऽध्यायः ६९ वैशंपायनउवाच प्रजानांपतयःसप्तसप्तचैवम
हर्षयः तस्यदेवस्यजातस्यनमस्कारंप्रचक्रिरे १ भरद्वाजःकश्यपोगोतमश्चविश्वामित्रोजमदग्निर्वसिष्ठः यश्चोदितोभास्करेसंप्रणष्टेसो
प्यत्रात्रिभगवानाजगाम २ मरीचिरंगिराश्चैवपुलस्त्यःपुलहःक्रतुः दक्षप्रजापतिश्चैवनमस्कारंप्रचक्रिरे ३ और्वोवसिष्ठपुत्रश्चस्तंबः
काश्यपएवच कपीवानकपीवांश्चदत्तोनिश्च्यवनस्तथा ४ वसिष्ठपुत्राःसप्तासन्वासिष्ठाइतिविश्रुताः हिरण्यगर्भस्यसुताऊर्जाजाताःसु-
तेजसः ५ गार्ग्यःपृथुस्तथैवान्योजन्योवामनएवच देवबाहुर्यदुध्रश्चपर्जन्यश्चैवसोमजः ६ हिरण्यरोमावेदशिराःसप्तनेत्रस्तथैवच
विश्वोतिविश्वश्च्यवनःसुधामाविरजास्तथा ७ अतिनामासहिष्णुश्चनमस्कारमकुर्वत उद्योतमानावपुषासर्वाभरणभूषिताः ८ उप-
नृत्यंतिदेवेशंविष्णुमप्सरसांवराः ततोगंधर्वतूर्येषुप्रणदत्सुविहायसि ९ बहुभिःसहगंधर्वैःप्रागायततुंबरुः महाश्रुतिश्चित्रशिराऊ
र्णायुरनघस्तथा १० गोमायुःसूर्यवर्चाश्चसोमवर्चाश्चसप्तमः युगपस्तृणपःकार्ष्णिर्नंदिश्चित्ररथस्तथा ११ त्रयोदशःशालिशिरः
पर्जन्यश्चचतुर्दशः कलिःपंचदशश्चात्रनारदश्चैवषोडशः हाहाहूहूश्चगंधर्वोहंसश्चैवमहाद्युतिः
१३ सर्वेतेदेवगंधर्वाउपगायंतिकेशवम् तथैवाप्सरसोहृष्टाःसर्वालंकारभूषिताः १४ वपुष्मतःसुजघनाःसर्वांगशुभदर्शनाः ननृतुश्च
महाभागाजगुश्चायतलोचनाः १५ सुमध्याश्चारुमध्याश्चप्रियमुख्यावरानना अनूकाथतथाजामीमिश्रकेशीत्वलंबुषा १६ मरीचि
शुचिकाश्चैवविद्युत्पर्णातिलोत्तमा अद्रिकालक्षणाचैवरंभातद्वन्मनोरमा १७ असिताचसुबाहुश्चसुप्रियासुभगातथा उर्वशीचित्र
रेखाचसुग्रीवाचसुलोचना १८ पुंडरीकासुगंधाचसुरथाचप्रमाथिनी नंदाशारद्वतीचैवतथान्यास्तत्रसंघशः १९ मेनकासहजन्या-
चपर्णिकापुंजिकस्थला एताश्चाप्सरसोन्याश्चप्रनृत्यंतिसहस्रशः २० धातार्यमाचमित्रश्चवरुणोंशोभगस्तथा इंद्रोविवस्वान्पूषाच
त्वष्टाचसवितातथा २१ कथितोविष्णुरित्येवंकाश्यपेयोगणस्तथा इत्येतेद्वादशादित्याज्वलंतःसूर्यवर्चसः २२ चक्रुस्तस्यसुरेशस्यनम
स्कारंमहात्मनः मृगव्याधश्चसर्पश्चनिर्ऋतिश्चमहाबलः २३ अजैकपादहिर्बुध्न्यःपिनाकीचापराजितः दहनोथेश्वरश्चैवकपालीचविशां
पते २४ स्थाणुर्भगश्चभगवान्रुद्रास्तत्रावतस्थिरे अश्विनौवसवश्चाष्टौमरुतश्चमहाबलाः २५ विश्वेदेवाश्चसाध्याश्चतस्यप्रांजलयः
स्थिताः शेषानुजामहाभागावासुकिप्रमुखास्तथा २६

यश्चोति २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ वंचितस्त्वमितिशक्रःनवंचितइति

यजत्तावाजिमेधेनक्रतूनांप्रवरेणतु सर्वपापविनाशायत्वयास्वर्गप्रदर्शिना ३ सर्वकाममयोह्येषःसंमतोब्रह्मवादिनाम् क्रतूनांप्रवरःश्री
मानश्वमेधइतिश्रुतिः ४ सुवर्णशृंगोहिमहानुभावोलोहक्षुरोवायुजवोमहास्यः स्वर्गेक्षणःकांचनगर्भगौरःसविश्वयोनिःपरमोहिमेध्यः
५ आस्थायवैवाजिनमश्वमेधमिष्ट्वानरादुष्कृतमुत्तरंति आहुश्चयंवेदविदोद्विजेंद्रावैश्वानरंवाजिनमश्वमेधम् ६ यथाश्रमाणांप्रवरो
गृहाश्रमोयथानराणांप्रवराद्विजातयः यथासुराणांप्रवरोभवानिहतथाक्रतूनांप्रवरोश्वमेधः ७ वैशंपायनउवाच एतच्छ्रुत्वा
तुवचनंवामेनसमीरितम् मुदापरमयायुक्तःप्राहदैत्यपतिर्बलिः ८ बलिरुवाच कस्यासिब्राह्मणश्रेष्ठकिमिच्छसिददामिते
वरंवरयभद्रंतेयथेष्टंकाममाप्नुहि ९ वामनउवाच नराज्यंनचयानानिनरत्नानिनचस्त्रियः कामयेयदितुष्टोसिधर्मंचेयदि
तेमतिः १० गुर्वर्थंमेप्रयच्छस्वपदानित्रीणिदानव त्वमग्निशरणार्थायएषमेप्रवरोवरः वामनस्यवचःश्रुत्वाप्राहदैत्यपतिर्बलिः ११
बलिरुवाच त्रिभिःकिंतवविप्रेंद्रपदैःप्रवदतांवर शतशतसहस्राणांपदानामागतोभवान् १२ शुक्रउवाच माददस्व
महाबाहोनत्वंवेत्सिमहासुर एषमायाप्रयच्छन्नोभगवान्प्रवरोहरिः १३ वामनंरूपमास्थायशक्रप्रियहितेप्सया त्वांवंचयितुमाया
तोबहुरूपधरोविभुः १४ एवमुक्तःसशुक्रेणचिरंसंचिंत्यवैबलिः प्रहर्षेणसमायुक्तःकिमतःपात्रमिष्यते १५ प्रगृह्यहस्तेसंभ्रांतोभृं
गारंकनकोद्भवम् बलिरुवाच विप्रेंद्रप्राङ्मुखस्तिष्ठस्थितोस्मिकमलेक्षण १६ प्रतीच्छदेहिकिंभूमिंकामात्राभोःपदत्रयम्
दत्तंचपातयजलंनैवमिथ्याभवेद्गुरुः १७ शुक्रउवाच मोनदेयंकुतोदैत्यविज्ञातोयंमयाध्रुवम् कोयंविष्णुरहोभ्रांतिर्वंचितस्त्वं
नवंचितः १८ कथंसनायोयंविष्णुर्यज्ञेस्वयमुपस्थितः दास्यामिदेवदेवाययद्यदिच्छत्ययंविभुः १९ कोवान्यःपात्रभूतोस्मात्विष्णोः
परतरोभवेत् एवमुक्त्वाबलिःशीघ्रंपातयामाससवैजलम् २० वामनउवाच पदानित्रीणिदैत्येंद्रपर्याप्तानिममानघ यन्मयापूर्व
मुक्तंहितत्तथानतदन्यथा २१ वैशंपायनउवाच इत्येतद्वचनंश्रुत्वावामनस्यमहोजसः कृष्णाजिनोत्तरीयंसकृत्वावैरोचनिस्त
दा २२ एवमस्त्वितिदैत्येशोवाक्यमुक्त्वारिसूदनः ततोवारिसमापूर्णंभृंगारंसपरामृशत् २३ वामनोह्यसुरेंद्रस्यचिकीर्षुःकदनंमह
त् क्षिप्रंप्रसारयामासदैत्यक्षयकरंपरम् २४ प्राङ्मुखश्चापिदैत्येशतस्मैसमनसाजलम् दातुकामःकरेयावत्तावत्तंप्रत्यषेधयत् २५

बलिरित्यादियावोगमूह्यम् १८ १९ २० २१ २२ २३ २४ २५ ५ ५ ५ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्रतुनावाजिमेधेनयजतेसहिदानवः यस्त्वयानयनेयुक्तंलोकानांतद्विचिंतय ५२ वैशंपायनउवाच एवमुक्तस्तदादेवैर्विष्णु
र्वामनरूपधृक् प्रहर्षयन्नुवाचाथसर्वान्देवानिदंवचः ५३ विष्णुरुवाच तस्ययज्ञसकाशंमामहर्षिर्वेदपारगः बृहस्पतिर्म-
हातेजानयत्वांगिरसःसुरः ५४ तस्याहंसमनुप्राप्तोयज्ञवाटंसुरोत्तमाः विचरिष्येयथायुक्तंत्रैलोक्यहरणायवै ५५ वैशंपाय
नउवाच ततोबृहस्पतिर्धीमाननयद्वामनंप्रभुम् यज्ञवाटंमहातेजादानवेंद्रस्यधीमतः ५६ मौंजीयज्ञोपवीतीचछत्रीदंडीध्व-
जीतथा वामनोधूम्ररक्ताक्षोभगवान्बालरूपधृक् ५७ तंगत्वायज्ञवाटंचब्रह्मर्षिगणसंकुलम् आत्मनाचैवभगवान्वर्णयामासत
त्क्रतुम् ५८ लोकेश्वरेश्वरःश्रीमान्सुरैर्ब्रह्मपुरोगमैः अध्यास्यमानोभगवान्दृष्टोप्यथदृष्टवत् ५९ दानवाधिपतेस्तस्यबलेर्वैरोचन
स्यच यज्ञवाटमभिप्रेक्ष्याजगामसुरसत्तमः ६० पालितोपिहिदैतेयैःसांग्रामिकपरिच्छदैः द्वारंदानवसंबाधंसहसैवविवेशह ६१
ऋषिभिश्चैवमंत्राद्यैःसर्वतःपरिवारितम् दैत्यदानवराजेंद्रसुपतस्थेबलिंबली ६२ वर्णयित्वायथान्यायंयज्ञंयज्ञसनातनः विस्तरेण
नरश्रेष्ठप्रयोगैर्विविधैस्तथा ६३ शुक्रादीनृत्विजश्चापियज्ञकर्मविचक्षणाः सर्वानेवनिजग्राहचकारचानिरुत्तरान् ६४ आराद्यथव
द्बैस्तस्यऋत्विजामभितस्तथा यज्ञमात्मानमेवासौहेतुभिःकारणैर्विभुः ६५ वैदिकैरप्रकाशैश्चपुनरप्यथभारत प्रत्यक्षमृषिसंघानांव
र्णयामासचित्रगुः ६६ ततोनिरुत्तरान्दृष्ट्वासोपाध्यायानृषींश्चतान् अवृद्धेनापिवृद्धांस्तान्वामनेनमहोजसा ६७ अद्भुतंचापितेनैस
विरोचनसुतोबली मूर्ध्निकृतांजलिश्चेदमब्रवीद्विस्मितोवचः ६८ कुतस्त्वंकोसिकस्यासिकिंतेहास्तिप्रयोजनम् नैवंविधःपरिज्ञातोदृ
ष्टपूर्वोमयाद्विजः ६९ बलोमतिमतांश्रेष्ठोज्ञानविज्ञानकोविदः शिष्टवाग्रूपसंपन्नोमनोज्ञःप्रियदर्शनः ७० नेदृशाःसंतिदेवानांऋ-
षीणामपिसुव्रत ननागानांनयक्षाणांनासुराणांनरक्षसाम् ७१ नपितॄणांनसिद्धानांगंधर्वाणांतथैवच योसिसोसिनमस्तेस्तुब्रूहि
किंकरवाणिते ७२ वैशंपायनउवाच उक्तएवंह्यचिंत्यात्माबलिनावामनस्तदा प्रोवाचोपायतत्त्वज्ञःस्मितपूर्वमिदंवचः ७३
इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिवामनप्रादुर्भावेबलिवामनसंवादेसप्ततितमोऽध्यायः ७० विष्णुरुवाच अ
हंयज्ञोसुरेशस्यबहुभक्ष्यःसुसंस्कृतः पितामहस्यैवपुरायजतःपरमेष्ठिनः १ सुरेशस्यचशक्रस्ययमस्यवरुणस्यच विशेषितस्त्वया
यज्ञोदानवेंद्रमहाबल २

७५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५१ ५२ ५३ ५४ ५५ ५६ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांएकसप्ततितमोऽध्यायः ७१ १ २

पृष्ठेस्यवसवोदेवामरुतःपर्वसंधिषु सर्वच्छंदांसिदशनाज्योतींषिविमलाःप्रभाः ५१ ऊरूरुद्रोमहादेवोधैर्यंचास्यमहार्णवः उदरेचास्यगंधर्वा
भुजगाश्चमहाबलाः ५२ लक्ष्मीर्मेधाधृतिःकांतिःसर्वविद्याचवैकटिः ललाटमस्यपरमंस्थानंचपरमात्मनः ५३ सर्वज्योतींषियानीह्तत्
पःशक्रस्तुदेवराट् तस्यदेवाधिदेवस्यतेजसासीन्महात्मनः ५४ स्तनौकुक्षौचवेदाश्चओष्ठौचास्यमखास्थिताः इष्टयःपशुबंधाश्चद्विजानांचे
ष्टितानिच ५५ तस्यदेवमयंरूपंदृष्ट्वाविष्णोर्महासुराः अभिसर्पंतुसंक्रुद्धाःपतंगाइवपावकम् ५६ इतिश्रीमहाभारतेखिलेषुहरि
वंशेभविष्यपर्वणिवामनप्रादुर्भावेएकसप्ततितमोऽध्यायः ७१ वैशंपायनउवाच शृणुनामानिसर्वेषांरूपाण्यभिजनानिच
प्रायुधानिचमुख्यानिदानवानांमहात्मनाम् १ विप्रचित्तिःशिबिःशंकुरयःशंकुस्तथैवच अयःशिराअश्वशिराहयग्रीवश्चवीर्यवान् २
वेगवान्केतुमानुग्रःसोग्रव्यग्रोमहासुरः पुष्करःपुष्कलश्चैवसाश्वोश्वपतिरेवच ३ प्रह्लादोश्वशिराःकुंभःसंह्लादोगगनप्रियः अनुह्ला-
दोहरिहरौवाराहःसंहरोरुजः ४ वृषपर्वाविरूपाक्षोअतिचंद्रःस्फलोचनः निःप्रभःसुप्रभःश्रीमांस्तथैवचनिरूदरः ५ एकवक्त्रोमहावक्त्रो
द्विवक्त्रःकालसन्निभः शरभःशलभश्चैवकुणपःकुलपःक्रथः ६ बृहत्कीर्तिर्महागर्भःशंकुकर्णोमहाध्वनिः दीर्घजिह्वोर्कवदनोमृदुबाहु
र्मृदुप्रियः ७ वायुर्गविष्ठोनमुचिःशंबरोविक्षरोमहान् चंद्रहंताक्रोधहताक्रोधवर्द्धनएवच ८ कालकःकालकाक्षश्चवृत्रःक्रोधोविमो-
क्षणः गविष्ठश्चमहविष्ठश्चप्रलंबोनरकःपृथुः ९ चंद्रतापनवातापीकेतुमान्बलदर्पितः असिलोमापुलोमाचबाष्कलःप्रमदोमदः १०
सृगालवदनश्चैवकरालःकेशिरेवच एकाक्षश्चैकबाहुश्चतुहुंडःसृमलःसृपः ११ एतेचान्येचबहवःक्रममाणंत्रिविक्रमं उपतस्थुर्महा
त्मानविष्णुंदैत्यगणास्तदा १२ प्रासोद्यतकराःकेचिद्गर्वोदितास्याःखरस्वनाः शतघ्नीचक्रहस्ताश्चवज्रहस्तास्तथापरे १३ खड्गपट्टिशह-
स्ताश्चपरश्वधधराःपरे प्रासमुद्गरहस्ताश्चतथापरिघपाणयः १४ महाशनिव्यग्रकरामौशलास्तुमहाबलाः महावृक्षोद्यतकरास्तथैवच
धनुर्धराः १५ गदाभुसुंडिहस्ताश्चवज्रहस्तास्तथापरे महापट्टिशहस्ताश्चतथापरिघपाणयः १६ असिकंपनहस्ताश्चदानवायुद्धदुर्म
दाः नानाप्रहरणाघोरानानावेषामहाबलाः १७ कूर्मकुक्कुटवक्त्राश्चहस्तिवक्त्रास्तथापरे खरोष्ट्रवदनाश्चैववराहवदनास्तथा १८ भीमाश्च
मकरवक्त्राश्चशिशुमारमुखास्तथा मार्जारशुकवक्त्राश्चदीर्घवक्त्राश्चदानवाः १९ गरुडाननाःखड्गमुखामयूरवदनास्तथा अश्ववक्त्राबभ्रुवक्त्रा
घोरामृगमुखास्तथा २०

३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तस्यतद्रूपमालोक्यह्यचिंत्यंचमहात्मनः अभूतपूर्वंचहरेर्जिहीर्षोःश्रियमासुरीम् २६ इंगितज्ञोयतस्थित्वा प्रह्लादस्त्वब्रवीद्वचः
प्रह्लादउवाच माददस्वजलंहस्तेबटोर्वामनरूपिणः २७ सत्वसौयेनतेपूर्वंनिहतःप्रपितामहः विष्णुरेषमहाप्राज्ञस्त्वांवंचयितुमाग
तः २८ बलिरुवाच हंततस्मैप्रदास्यामिदेवायेमंप्रतिग्रहम् अनुग्रहंकरंदेवमीदृशंजगतःप्रभुम् २९ ब्रह्मणोपिगरीयांसं
पात्रंलप्स्यामहेवयम् अवश्यंचासुरश्रेष्ठदातव्यंदीक्षितेनवै ३० इत्युक्त्वासुरसंघानांमध्येवैरोचनिस्तदा देवायप्रददौतस्मैपदानित्री
णिविष्णवे ३१ प्रह्लादउवाच दानवेश्वरमादास्त्वविप्रायास्मैप्रतिग्रहम् नैवविप्रांशिशुंमन्येनेदृशोभवतिद्विजः ३२ रूपेणानेन
दैत्येंद्रसत्यमेवब्रवीमिते नारसिंहमहंमन्येतमेवपुनरागतम् ३३ एवमुक्तस्तदातेनप्रह्लादेनामितौजसा प्रह्लादमब्रवीद्वाक्यमिदंनिर्भर्त्स
यन्निव ३४ बलिरुवाच देहीतियाचतेयोहिप्रत्याख्यातिचयोसुरः उभयोरप्यलक्ष्मीर्वैभागस्त्वविशतेनरम् ३५ प्रतिज्ञायतु
योविप्रेनददातिप्रतिग्रहम् सयातिनरकंपापीमित्रगोत्रसमन्वितः ३६ अलक्ष्मीभयभीतोहंददाम्यस्मैवसुंधराम् प्रतिग्रहीताचाप्यन्यः
कश्चिदस्माद्विजोर्थवे ३७ नाधिकोविद्यतेयस्मात्तद्ददामिवसुंधराम् हृदयस्यचमेतुष्टिःपराभवतिदानव ३८ दृष्ट्वावामनरूपेणया-
चंतंद्विजपुंगवम् एवंतस्मात्प्रदास्यामिनस्थास्यामिनिवारितः ३९ भूयश्चप्राब्रवीदेनंवामनंविप्ररूपिणम् स्वल्पैःस्वल्पमतेकिंतेपदैस्त्रि
भिरनुत्तमम् ४० कृत्स्नांददामितेविप्रपृथिवींसागरैर्वृताम् वामनउवाच नपृथ्वीकामयेकृत्स्नांसंतुष्टोस्मिपदैस्त्रिभिः एष
एवरुचिष्योमेवरोदानवसत्तम ४१ वैशंपायनउवाच तथास्त्वितिबलिःप्रोच्यस्पर्शयामासदानवः पदानित्रीणिदत्वायवि-
ष्णवेमिततेजसे ४२ तोयेतुपतितेहस्तेवामनोभूदवामनः सर्वदेवमयंरूपंदर्शयामाससवैविभुः ४३ भूःपादौद्यौःशिरश्चास्यचंद्रादित्यौ
चचक्षुषी पादांगुल्यःपिशाचाश्चहस्तांगुल्यश्चगुह्यकाः ४४ विश्वेदेवाश्चजानुस्थाजंघेसाध्याःसुरोत्तमाः यक्षानखेषुसंभूतालेखा
श्चाप्सरसस्तथा ४५ तडिदृष्टिःस्वविपुलाकेशाःसूर्यांशवस्तथा तारकारोमकूपाणिरोमाणिचमहर्षयः ४६ बाहवोविदिशश्चास्यदिशः
श्रोत्रेतथैवच अश्विनौश्रवणौचास्यनासावायुर्महाबलः ४७ प्रसादश्चंद्रमाश्चैवमनोधर्मस्तथैवच सत्यमस्याभवद्वाणीजिह्वादेवी
सरस्वती ४८ ग्रावादितिर्महादेवीतालुःसूर्यश्चदीप्तिमान् द्वारंसर्गस्यनाभिर्वैमित्रस्त्वष्टाचवैभ्रुवौ ४९ मुखंवैश्वानरश्चास्यवृषणौतुप्रजा
पतिः हृदयंभगवान्ब्रह्मापुंस्त्वंवैविश्वतोमुनिः ५०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२

ममान्नमशनंदेवप्राशनार्थमरिंदम तद्भदस्वसुरश्रेष्ठतृप्तिर्येनममाक्षया ४६ श्रीभगवानुवाच अश्रोत्रियंश्राद्धमधीतमव्रतम-
दक्षिणंयज्ञमनृत्विजाहुतम् अश्रद्धयादत्तमसंस्कृतंहविरेतेप्रदत्तास्तवदैत्यभागाः ४७ पुण्यसहोषितंयच्चमद्भागहेषिणांतथा क्रयविक्र-
यसक्तानांपुण्यंयच्चाग्निहोत्रिणाम् ४८ अश्रद्धयाचयद्दानंददतांयजतांतथा तत्सर्वंतवदैत्येंद्रमत्प्रसादाद्भविष्यति ४९ वैशंपायन
उवाच एतच्छ्रुत्वातुवचनंबलिर्विष्णोर्महात्मनः एवमस्त्वितितंप्रोक्त्वापातालमसुरोत्तमः ५० प्रविवेशमहाभागोदेवाज्ञांप्रतिपा
लयन् भगवानपिराज्यानांप्रविभागंचकारह ५१ ददौपूर्वांदिशंचेंद्रेशक्रायामिततेजसे याम्यांयमायदेवायपितृराज्ञेमहात्मने ५२
पश्चिमांतुदिशंप्रादाद्वरुणायमहात्मने उत्तरांचकुबेराययक्षाधिपतयेदिशम् ५३ अधस्तान्नागराजायसोमायोर्ध्वंदिशंददौ एवंविभ
ज्यत्रैलोक्यंविष्णुर्बलवतांवरः ५४ जगामत्रिदिवंदेवःपूज्यमानोमहर्षिभिः वामनःसर्वभूतेशःप्रतिष्ठाप्यचवासवम् ५५ तस्मिन्
प्रयातेदुर्धर्षेवामनेमिततेजसि सर्वेसुमुदिरेदेवाःपुरस्कृत्यशतक्रतुम् ५६ वैशंपायनउवाच गतेतुत्रिदिवंकृष्णेवध्वावैरोच
निंबलिम् नागैःसप्तशिरोभिश्चकंबलाश्वतरादिभिः ५७ नागबंधनदुःखार्त्तंबलिंवैरोचनिंततः यदृच्छयासोदेवर्षिर्नारदःप्रत्यपद्य
त ५८ सतंकृच्छ्रगतंदृष्ट्वाकृपयाभिपरिप्लुतः उवाचदानवश्रेष्ठमोक्षोपायंददामिते ५९ स्तवंदेवाधिदेवस्यवासुदेवस्यधीमतः अना-
दिनिधनस्यास्यअक्षयस्याव्ययस्यच ६० तमधीष्वाथदैत्येंद्रविशुद्धेनांतरात्मना तद्गतस्तन्मनाभूत्वाद्रुतमोक्षमवाप्स्यसि ६१ ततोवि
रोचनसुतःप्रयतःप्रांजलिःशुचिः मोक्षविशंकमव्ययोनारदात्समधीतवान् ६२ तमधीत्यस्तवंदिव्यंनारदेनसमीरितम् पृथिवीचाह्
तायेनतंजजापमहासुरः ६३ ओंनमोस्त्वनंतपतयेअक्षयायमहात्मने जलेशयायदेवायपद्मनाभायविष्णवे ६४ सप्तसूर्यवपुःकृत्वा
त्रीन्लोकान्क्रांतवानसि भगवान्कालकालस्त्वंतेनसत्येनमोक्षय ६५ नष्टचंद्रार्कगगनेक्षीणयज्ञतपःक्रिये पुनश्चिंतयसेलोकांस्ते
नसत्येनमोक्षय ६६ ब्रह्मरुद्रेंद्रवाय्वग्निसरिद्भुजगपर्वताः त्वत्स्थादृष्टाहिजेंद्रेणतेनसत्येनमोक्षय ६७ मार्कंडेनपुराकल्पेप्रविश्य
जठरंतव चराचरगतंदृष्टंतेनसत्येनमोक्षय ६८ एकोविद्यासहायस्त्वंयोगीयोगमुपागतः पुनस्त्रैलोक्यमुत्सृज्यतेनसत्येनमोक्षय ६९
जलशय्यामुपासीनोयोगनिद्रामुपागतः लोकांश्चिंतयसेभूयस्तेनसत्येनमोक्षय ७० वाराहरूपमास्थायवेदयज्ञपुरस्कृतम् धराजलो
द्धृतायेनतेनसत्येनमोक्षय ७१

६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ७१ ७ ७ ७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उष्ट्रशल्यकवक्त्राश्च दीर्घवक्त्राश्च दानवाः नकुलस्यैव वक्त्राश्च पारावतमुखास्तथा २१ चक्रवाकमुखाश्चैव गोधावक्त्रास्तथापरे तथा-
मृगाननाः शूरा गोजादिमहिषाननाः २२ हुकलासमुखाश्चैव व्याघ्रवक्त्रास्तथापरे ऋक्षशार्दूलवक्त्राश्च सिंहवक्त्रास्तथापरे २३ ग
जेन्द्रचर्मवसनास्तथा कृष्णाजिनाम्बराः चीरसंवृतगात्राश्च तथा फलकवाससः २४ उष्णीषिणो मुकुटिनस्तथा कुण्डलिनोऽसुराः किरी-
टिनो लम्बशिखाः कंबुग्रीवाः सुवर्चसः २५ नानावेषधरा दैत्या नानामाल्यानुलेपनाः स्वान्यायुधानि दीप्तानि प्रगृह्यासुरसत्तमाः २६ क्र
ममाणं हृषीकेशमुपातिष्ठंत दानवाः प्रमथ्य सर्वान्दैतेयान्पादहस्ततलैः प्रभुः २७ रूपं कृत्वा महाकायं जहाराशु स मेदिनीम् त्रैलोक्यं क्र
ममाणस्य स्थूलिरादित्यसंभवा २८ तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे नभः प्रक्रममाणस्य सक्थिदेशे व्यवस्थितौ परं विक्रममाण
स्य जानुदेशे व्यवस्थितौ २९ विष्णोरमितवीर्यस्य वदंत्येवं द्विजातयः जित्वा लोकत्रयं कृत्स्नं हत्वा चासुरपुंगवान् ३० ददौ शक्राय वसु-
धां हरिर्लोकनमस्कृतः सुतलं नाम पातालमधस्ताद्वसुधातले ३१ बलेर्दत्तं भगवता विष्णुना प्रभविष्णुना तदवाप्यासुरश्रेष्ठश्चकारम
तिमुत्तमाम् ३२ रसातलतले वासमकरोदसुराधिपः तत्रस्थश्च महातेजा ध्यानपरमास्थितः ३३ उवाच वचनं धीमान्विष्णुं लोकन
मस्कृतम् किं मया देव कर्तव्यं ब्रूहि सर्वमशेषतः ३४ ततो दैत्याधिपं प्राह देवो विष्णुः सुरोत्तमः विष्णुरुवाच ददामि ते महाभा
ग परितुष्टोऽस्मि तेऽसुर वरं वरय भद्रं ते यथेष्टं काममाप्नुहि ३५ मा च शुक्रस्य वचनं प्रतिहासीः कथंचन अहमाज्ञापयामि त्वा श्रेयश्चैवम
वाप्स्यसि ३६ अथ दैत्याधिपं प्राह विष्णुर्देवाधिपानुजः वाचा परमया देवो वरेण्यः प्रभुरीश्वरः ३७ यत्त्वया सलिलं दत्तं गृहीतं पाणिना
मया तस्मात्ते दैत्य देवेभ्यो नास्ति जातु भयं क्वचित् ३८ सुतलं नाम पातालं तत्र त्वं सानुगो वस सर्वदैत्यगणैः सार्द्धं मत्प्रसादान्महासुर
३९ न च ते देवदेवस्य शक्रस्यामिततेजसः शासनं प्रतिहंतव्यं स्मरता शासनं मम ४० देवताश्चापि ते सर्वाः पूज्या एव महासुर भोगांश्च
विविधान्सम्यक् यज्ञांश्च सहदक्षिणान् ४१ प्राप्स्यसे च महाभाग दिव्यान्कामान्यथेप्सितान् इह चामुत्र चाक्षय्यान्विविधांश्च परिच्छदा
न् ४२ दैत्याधिपत्यं च सदा मत्प्रसादादवाप्स्यसि यदा चैतां मया प्रोक्तां मर्यादां चालयिष्यसि वधिष्यन्ति तदा हि त्वां नागपाशैर्महाबलाः ४३
नमस्कार्यश्च ते नित्यं महेन्द्राद्या दिवौकसः मम ज्येष्ठः सुरश्रेष्ठः शासनं प्रतिगृह्यताम् ४४ बलिरुवाच देवदेव महाभाग शंखचक्रगदाधर १७
सुरासुरगुरो श्रेष्ठ सर्वलोकमहेश्वर तत्रासतो मे पाताले भागं ब्रूहि सुरोत्तम ४५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

उन्हृत्यदंष्ट्रयायज्ञांस्त्रीन्पिंडान्कृतवानसि त्वंपितॄणामपिहरेतेनसत्येनमोक्षय ७२ प्रदुद्रुवुःसुराःसर्वेहिरण्याक्षभयार्दिताः परित्राता
स्त्वयादेवतेनसत्येनमोक्षय ७३ दीर्घवक्त्रेणरूपेणहिरण्याक्षस्यसंयुगे शिरोजहारचक्रेणतेनसत्येनमोक्षय ७४ भग्नमूर्द्धास्थिस-
न्निष्काहिरण्यकशिपुःपुरा हुंकारेणहतोदैत्यस्तेनसत्येनमोक्षय ७५ दानवाभ्याहृतावेदाब्रह्मणःपश्यतःपुरा परित्रातास्त्वयादेवतेनसत्ये
नमोक्षय ७६ कृत्वाहयशिरोरूपंहत्वातुमधुकैटभौ ब्रह्मणेनर्पितावेदास्तेनसत्येनमोक्षय ७७ देवदानवगंधर्वायक्षसिद्धामहोरगाः
अंतंतवनपश्यंतितेनसत्येनमोक्षय ७८ अपांतरतमानामजातोदेवस्यवैसुतः कृतास्त्वतेनवेदार्थास्तेनसत्येनमोक्षय ७९ वेदयज्ञाग्निहो
त्राणिपितृयज्ञहवींषिच रहस्यंतवदेवस्यतेनसत्येनमोक्षय ८० ऋषिर्दीर्घतमानामजात्यंधोगुरुशापतः त्वत्प्रसादाच्चचक्षुष्मांस्तेनसत्ये
नमोक्षय ८१ ग्राहग्रस्तंगजेंद्रंचदीनंमृत्युवशंगतम् भक्तंमोक्षितवांस्त्वंहितेनसत्येनमोक्षय ८२ अक्षयश्चाव्ययश्चैवब्रह्मण्योभ-
क्तवत्सलः उच्छ्रितानानियंतासितेनसत्येनमोक्षय ८३ शंखंचक्रंगदांपद्मंशार्ङ्गंगरुडमेवच प्रसादयामिशिरसातेबंधान्मोक्षयंतुमा
म् ८४ शंखचक्रगदातूणशार्ङ्गंचगरुडादयः प्रसादयामासुर्हरिंबलिंमोक्षयबंधनात् ८५ ततःप्रसन्नोभगवानादिदेशखगेश्वरम्
गरुडंनागहंतारंबलिंमोक्षयबंधनात् ८६ ततोविक्षिप्यगरुडःपक्षावतुलविक्रमः जगामवसुधांसद्यःयत्रास्तेसंयतोबलिः ८७ आगमंत
स्यविज्ञायनागामुक्त्वामहासुरम् ययुःपुरींभोगवतींवैनतेयभयार्दिताः ८८ मुक्तःकृष्णप्रसादेनचिंतयानमधोमुखम् तमुवाचे
दंगरुत्मान्पन्नगाशनः ८९ गरुडउवाच दानवेंद्रमहाबाहोविष्णुस्त्वामब्रवीत्प्रभुः मुक्तोनिवसपातालेसपुत्रजनबांधवः ९०
इतस्त्वयानगंतव्यंगव्यूतिमपिदानव समयंयदिभिंद्यास्त्वंमूर्द्धातेशतधाभवेत् ९१ पक्षींद्रवचनंश्रुत्वादानवेंद्रोब्रवीदिदम् स्थितोस्मि
समयेतस्यअनंतस्यमहात्मनः ९२ जीवोपायंतुभगवान्ममकिंचित्करोतुसः इहस्थोहंकथंत्वासीनोयेनाप्याययेखगेश्वर ९३ बलेस्तुवच
नंश्रुत्वागरुत्मानिदमब्रवीत् पूर्वमेवकृतस्तेनजीव्योपायोमहात्मना ९४ वर्तयिष्यंतियेयज्ञाविधिहीनानऋत्विजः प्रायश्चित्तमजानंतोय
ज्ञभागस्तवस्तव ९५ नतेषांयज्ञभागंवैप्रतिगृह्णंतिदेवताः अनेनाप्यायितबलःसुखमात्रनिवत्स्यसि ९६ वैशंपायनउवाच
संदेशमेतंभगवान्दत्तवान्कश्यपात्मजः दानवेंद्रमहाबाहोविष्णुस्त्रैलोक्यभावनः ९७ इमंस्तवमनंतस्यसर्वपापप्रमोचनम् यःपठेतन
रोभक्त्यातस्यनश्यतिकिल्बिषम् ९८ १८

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९९ १०० १०१ १०२ १०३ १०४ १०५ १०६ अत्रनमोस्त्वनंतपतयइत्यादिस्तवःवंदिमोक्षार्थंजप्यः १०७ इतिश्रीमत्सदवाक्यप्रमाणज्ञा
नमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोःश्रीनीलकंठस्यकृतौभारतभावदीपेहरिवंशेभविष्यपर्वणिटीकायांवामनप्रादुर्भावांतग्रंथार्थप्रकाशोनामद्विसप्तति
तमोऽध्यायः ७२ समाप्तोयंवामनप्रादुर्भावः धन्योपाख्यानमारभ्यबाणयुद्धेरुद्रजपांतंविष्णोरुत्कर्षोवर्णितःप्रादुर्भावेषुचतस्यैवनिर्गुणंसगुणंचस्वरूपंव्या-
ख्यायतद्गुणकथनपरंभारतंचश्रवणफलश्रुतिप्रदर्शनांतंसमापितं तत्रबाणयुद्धेचहरिहरयोरभेदउक्तःसचममात्माभद्रसेनइतिवत् औपचारिकइतिभवेत्कस्य-
चित् अत्यंताभेदेशास्त्रभावासंभवंमन्वानस्त्वमंदमतेर्मतिंतामपनिनीषुःकैलासयात्रादित्रिपुरवधांतंग्रंथमारभतेतेनतयोःसर्वत्रप्रत्येकंसर्वोत्तमत्वेनकीर्त्यमानयोःका

गोहत्यायाःप्रमुच्येतब्रह्मघ्नोब्रह्महत्यया अपुत्रोलभतेपुत्रंकन्याचैवेप्सितंपतिम् ९९ सद्योगर्भात्प्रमुच्येतगर्भिणीजनयेत्सुतम् ये-
चमोक्षेषिणोलोकेयोगिनःसांख्यकापिलाः १०० स्तवेनानेनगच्छंतिश्वेतद्वीपमकल्मषाः सर्वकामप्रदोह्येषस्तवानंतस्यकीर्त्यते १०१
यःपठेत्प्रातरुत्थायशुचिःप्रयतमानसः सर्वकामानवाप्नोतिमानवोनात्रसंशयः १०२ एषवैवामनोनामप्रादुर्भावोमहात्मनः वेदविद्भि-
र्द्विजैरेषपठ्यतेवैष्णवंयशः १०३ यस्त्विमंवामनंदिव्यंप्रादुर्भावंमहात्मनः शृणुयान्नियतोभक्त्यासदापर्वसुपर्वसु १०४ परान्विजित्य
तेराजायथाविष्णुर्महाबलः यशोविमलमाप्नोतिविपुलंचाप्नुतेवसु १०५ प्रियोभवतिभूतानांसर्वेषांवामनोयथा पुत्रपौत्राश्चवर्द्धंत-
आरोग्यगुणसंपदः १०६ प्रियतेपठतश्चास्यदेवदेवोजनार्दनः सर्वकामयुतश्चैवकृष्णद्वैपायनोब्रवीत् १०७ इतिश्रीमहाभारत-
खिलेषुहरिवंशेभविष्यपर्वणिवामनप्रादुर्भावोनामद्विसप्ततितमोऽध्यायः ७२ जनमेजयउवाच किमर्थंभगवान्विष्णु-
र्देवदेवोजनार्दनः गतःकैलासशिखरमालयंशंकरस्यच १ नारदाद्यैस्तपोवृद्धैर्मुनिभिस्तत्त्वदर्शिभिः तत्रदृष्टोमहादेवःशंकरोनीललोहि
तः २ केशवेनपुराविप्रकुर्वतातपउत्तमम् अर्चितोदेवदेवेनशंकरश्चेतिनःश्रुतम् ३ देवौतत्रजगन्नाथौदृष्टवंतौपुरातनौ अर्चयांचक्रिरे-
देवाइंद्राद्याःशंकरंहरिम् ४

यद्व्यूहेयोगिनइवदेहभेदेप्यैकात्म्यंसिद्धांतितंनतुदेहभेदाद्व्यक्तिभेदःसर्वोत्तमद्वयायोगात्इतितत्रानुशासनिकेप
र्वणिकृष्णःशंकराराधनार्थंकैलासंगतइतिसंक्षेपेणोक्तंतद्विस्तरेणबुभुत्सुरनुवदति किमर्थंभगवान्विष्णुरित्यादिना देवानांब्रह्मादीनांदेवापिजनैःअर्च्यतेय
स्यतेप्रलयकालेयाचतेइष्टसिद्ध्यर्थंस्थितिकालइतिजनार्दनोपिसन्कथमन्यंपूजयितुंगतःकथंचतदन्यस्यशंकरस्यपूर्णानंदरूपस्वरूपोधिकःकथमल्पस्स्वलि
प्सयान्यंप्रतिगतइत्यर्थः १ २ ३ एवंपूज्यपूजकभावेनावगतयोःकथमेकात्मत्वमित्याहदेवाविति ४ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१९ २० २१ राजविद्याब्रह्मविद्यातद्भूतांमध्येपुरस्कृतं २२ २३ २४ २५ २६ २७ २८ २९ ३० आत्मना
एवद्वितीयंस्वरूपंपुत्र इत्यत्रश्रुतिंपठतिपतिर्जायामिति ३१ पुत्रवंतंदृक्ष्येतिशेषः पुत्रवान्इंद्रपदमपिजयतीत्यर्थः ३२ नरकेपातयतीतिशेषः यस्माद्वि

कदाचिच्चतयासार्द्धंशेतेरात्रौजगत्पतिः विहरंश्चयथायोग्यंप्रीतःप्रीतिसुजातया १९ अथोवाचतदादेवीरुक्मिणीरुक्मभूषणा पुत्रमि-
च्छामिदेवेशत्वत्तोमाधवनंदनम् २० बलिनंरूपसंपन्नंत्वयेवसदृशंप्रभो वृष्णीनामपिनेतारंवीर्यवंततपोनिधिम् २१ सर्वशास्त्रा
र्थकुशलंराजविद्यापुरस्कृतम् एवमादिगुणैर्युक्तंदातुमर्हसिसत्तम २२ त्वयिसर्वस्यदातृत्वंनित्यमेवप्रतिष्ठितम् त्वंहिसर्वस्यकर्त्ताच
दाताभोक्ताजगत्पतिः २३ विशेषतस्तुभृत्यानांशुश्रूषानियतात्मना वक्तव्यंकिमुदेवेशयद्भिक्तास्मिकेशव २४ अनुग्रहोयदिस्या
न्मेदेवदेवजगत्पते दातुमर्हसिपुत्रंत्वंवीर्यवंतंजनार्दनम् २५ वैशंपायनउवाच इत्युक्तोदेवदेवेशःप्रिययाप्रियमाणया
तयामहिष्यारुक्मिण्यारुक्मिशत्रुर्यदूद्वहः २६ प्रोवाचवचनंकालेरुक्मिणींयादवेश्वरः दातास्मितादृशंपुत्रंयत्वमिच्छसिभामिनि २७
नित्यंभक्तासिमेदेवीनात्रकार्याविचारणा अवश्यंतवदास्यामिनित्यंशत्रुनिबर्हणम् २८ पुत्रेणलोकान्जयतिसतांकामदुघाहियेन
रकंपुदितिख्यातंदुःखंचनरकंविदुः २९ पुदस्त्राणात्ततःपुत्रमिहेच्छंतिपरत्रच अनंताःपुत्रिणांलोकाःपुरुषस्यप्रियेशुभाः ३० पति
र्जायांप्रविशतिगर्भोभूत्वासमातरम् तस्यांपुनर्नवोभूत्वादशमेमासिजायते ३१ पुत्रवंतंविभेतींद्रःकिंनुतेनाजितंभवेत् नापुत्रोवि
दतेलोकान्कुपुत्राद्ध्यतावरा ३२ कुपुत्रोनरकायस्यात्सुपुत्रात्स्वर्गएवहि तस्माद्धितसत्पुत्रंश्रुतवंतंदयापरम् ३३ विद्याविं-
नयायस्माद्विद्यायुक्तंसुधार्मिकम् इच्छेत्पुत्रंपुत्रकामःपुरुषोयत्नवान्बुधः ३४ तस्माद्दास्यामितेपुत्रंविद्यावंतंसुधार्मिकम् एषग-
च्छामिपुत्रार्थंकैलासंपर्वतोत्तमम् ३५ तत्रोपास्यमहादेवंशंकरंनीललोहितम् ततोलब्धास्मिपुत्रंतेभवान्भूतहितेरतात् ३६ न
पसाब्रह्मचर्येणभवशंकरमव्ययम् तोषयित्वाविरूपाक्षमादिदेवमजंविभुम् ३७ गमिष्याम्यहमद्यैवद्रष्टुंशंकरमव्ययम् सचमे-
दास्यतेपुत्रंतोषितस्तपसामया ३८ तत्रगत्वामहादेवंनमस्कृत्यसहोमया प्रविश्यबदरीपुण्यामुनिजुष्टांतपोमयीम् ३९ अग्निहो
त्राकुलांदिव्यांगंगांबुप्लावितांसदा मृगपक्षिसमायुक्तांसिंहद्वीपशताकुलाम् ४० बदरीफलसंपूर्णांवानरक्षोभितद्रुमाम् वेत्रारूढम
हावृक्षांकदलीखंडमंडिताम् ४१ मुनिभिर्वेदतत्वार्थविचारनिपुणैःसदा वेदनिश्चिततत्वार्थैःप्रमाणकुशलैर्युताम् ४२
यथाविनयोभवतितस्मा
द्विद्यायुक्तम् ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० वेत्रैःआरूढाःमहावृक्षाःयस्यांसा ४१ ४२ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एकआत्मास्वरूपयोस्तादृशावपिकार्यभेदाद्भिन्नशरीरौसिद्धौइवभासेतइत्येतत्इदमपिकिमर्थं ५ परस्परेति अग्नावग्निरिवजलेजलमिवचान्यो-
न्यस्मिन्नैक्यंगताविसुक्तंतदपिकथंकिमर्थम् ६ ऐक्यंगतौतौदृष्ट्वाऋषयःकिमचेष्टंतनतत्कथंतयोस्तत्त्वंव्याख्यातवंतइत्यर्थः ७ गतःशिवंअभेदे
नेतिशेषःसाक्षात्कृतवान्हरिंप्रत्यगात्मत्वेनेतिशेषः ८ नगंकैलासं ९ १० ११ १२ १३ नन्वेवंयोगिवदेकएवेश्वरोनेकदेवतात्माचे
त्तर्हिकथंहरिहरावितिप्रतिपादनेनेत्याशंक्याह ध्येयमिति पुण्यात्मनांध्येयंआलोचनीयमिदंहरिहरयोरैक्यंवेदार्थत्वेननिश्चितंयतः अनेकैररण्यैःआरण्य
कैःउपनिषद्भिःसंयुक्तंतात्पर्यवत्तयासमाहितम् नित्यंब्राह्मणस्यावश्यकंनित्यंअनवरतंसेवंतेतेचिंतयंति अयमर्थः बीजांकुरवन्मिथःकार्यकारण

तौहिदेवौमहादेवावेकीभूतौद्विधाकृतौ एकात्मानौजगद्योनिसृष्टिसंहारकारकौ ५ परस्परसमावेशाज्जगतःपालनेस्थितौ तयोस्तत्र
यातकैलासेपर्वतोत्तमे ६ ऋषयःकिमचेष्टंतदृष्ट्वातौपुरुषोत्तमौ एतत्सर्वमशेषेणवक्तुमर्हसिसत्तम ७ यथागतोहरिर्विष्णुःकृष्णो
जिष्णुःपुरातनः तथाचशंकरःसाक्षात्कृतवान्नागभूषणः एतत्सर्वंविप्रवर्यब्रूहितत्वेनयत्नतः ८ वैशंपायनउवाच शृणुष्वाव
हितोराजन्यथाकृष्णोगतोनगम् यथाचदृष्टोदेवेशःशंकरोवृषवाहनः ९ यथाचचारसतपोयथातेमुनयोगताः एवंतयोर्यथावृत्तंत-
थात्वंशृणुनरोत्तम १० द्वैपायनोथभगवान्यथाप्रोवाचमांतथा नमस्कृत्यप्रवक्ष्यामिकेशवंखगवाहनम् ११ यथाशक्तियथाप्रज्ञंशृणु
यत्नेनसुव्रत नचाशुश्रूषवेवाच्यंनृशंसायातपस्विने १२ नानधीतायवक्तव्यंपुण्यंपुण्यवतांसदा स्वर्ग्यंयशस्यंधन्यंचबुद्धिशुद्धिकरंस
दा १३ ध्येयंपुण्यात्मनांनित्यमिदंवेदार्थनिश्चितम् अनेकारण्यसंयुक्तंसेवंतेनित्यमीदृशम् १४ मुनयोवेदनिरतानारदाद्यास्तपोध
नाः अत्यद्भुतमहापुण्येप्रतकैलासपर्वते १५ शिवयोर्द्वयोस्तत्रहरेस्त्र्यंबकस्यह हतेषुक्रूरसंघेषुनरकादिषुभूमिप १६ हतेषुच
नृपेष्वेवंकिंचिच्छिष्टेषुशत्रुषु शासतिस्मसदाविष्णुःपृथिवींपुरुषोत्तमः १७ द्वारवत्यांजगन्नाथोवसन्वृष्णिभिरीश्वरः रुक्मिण्यासंग
तोदेवोवससतत्रपुरेहरिः १८

भावंगतयोर्हरिहरयोःपर्यायेणजीवेशभावमापादयितुमिदमुच्यतेतथाहियदाजीवःईश्वरोविष्णुर्यदाविपरीतंतदातदाईश्वरंजीवोजलेजलमिवाग्नावग्निरिवावि
लीयतइतिसर्ववेदांतसिद्धांतः तत्रकेषुचित्पुराणेष्वाद्यःपक्षउपादीयतेकेषुचिद्द्वितीयःसर्वथापिजीवेशयोरभेदःसर्वस्यशास्त्रस्यार्थः देवतांतराणितुसम-
ष्टिजीवस्यावयवभूतानीतिअहंकृत्स्नोहंकृत्स्नेनपरब्रह्मणात्यंतमैक्यमश्नुवतइतिखिलग्रंथेस्मिन्सर्वपुराणार्थसंग्रहइतिप्राक्शिवोजीवोविष्णुरीशइत्युक्तंइदानींवि ९९
ष्णुर्जीवःशिवईश्वरइतिप्रतिपाद्यतेतेनसर्वेषांपुराणानांमिथोविरुद्धार्थत्वेपितत्त्वतोनविरोधगंधोपीतिप्रतिपादितमुपोद्घातेपीतिशिवं १४ १५ १६ शासतिशास्तिस्मो
वादित्वमार्षम् १७ १८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४३ ४४ ४५ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांत्रिसप्ततितमोऽध्यायः ७३ प्रभातायामिति १ २ ३ ४
१०० ५ देवव्रतसमप्रभंदेवसुप्रभम् ६ मह्यंममपितुःसखे ७ ८ ९ १० ११ भीमेनभीमद्वारा १२ १३ १४ १५ १६ १७ ७३ ३

इदमेकमिदंतत्वमितिनिश्चितमानसैः उपास्यमानामन्यत्रसिद्धैःसिद्धार्थतत्परैः ४३ इतिहासपुराणज्ञैःसेव्यमानांमहर्षिभिः गच्छद्भिः स्वर्गनिलयपरित्यज्यकलेवरम् ४४ प्रसिद्धांमहतींदेवींयास्यामिसकृतालयाम् इत्युक्त्वाविररामैवदेवदेवोजनार्दनः ४५ इति श्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांत्रिसप्ततितमोऽध्यायः ७३ वैशंपायनउवाच प्रभातायांतुशर्वर्यांगंतुमैच्छज्जनार्दनः हुताग्निःकृतकल्याणःसमाप्तवरदक्षिणः १ गाश्चदत्वाथविप्रेभ्योनमस्कृत्याद्विजोत्तमान् आस्थानमंडपकृष्णःप्रविवेशजगत्पतिः २ आसनमहदास्थायकृष्णमाहूयसर्वशः बलभद्रंशिनेःपुत्रंहार्दिक्यशतसारणौ ३ उग्रसेनमहाबुद्धिमुद्धवनीतिमत्तरम् यस्यबुद्धिंसमाश्रित्यजीवंतेयादवाःसुखम् ४ नेताचयदुवृष्णीनांसतुधर्मपरःसदा यस्यविप्रायतिदेवाश्चनीतिस्तस्यमहात्मनः ५ यस्यबुद्धिवशाद्विष्णुःशशासपृथिवींसदा तंचवृष्णिवरंवीरमुद्धवंदेवसमप्रभम् ६ अन्यानपियदून्सर्वानुवाचभगवान्हरिः शृण्वतुममवाक्यानियादवाःसर्वएवहि शृणुचापिवचोमह्यंपितुरुद्धवमेसखे ७ बाल्यात्प्रभृतियोयत्नोममदुष्टनिबर्हणे प्रत्यक्षंभवताद्दृष्टंपूतनानिधनंनृपाः ८ केशीचनिहतोबाल्येमयाबालेनयादवाः गोवर्द्धनोधृतःशैलोगावश्चपरिपालिताः ९ अभिषिक्तोस्मिशक्रेणदेवानामग्रतःस्थिताः कंसोपिनिधनंनीतोमयाचाणूरमुष्टिकौ १० उग्रसेनोभिषिक्तश्चकृताद्वारवतीमया अन्येचापिनृपाराजन्बलिनानिहतामया ११ योपिवीरोजरासंधोनिगृहीतोबलान्मया भीमेनबलिनाराजन्नयेनममयादवाः १२ शृगालोनिहतःसंख्येगोमंताद्गच्छतामया योपिवीरोदुरात्मासौदानवोनरकोहतः १३ निष्कंटकमिमंलोकंकृतवान्राजसत्तमाः किंतुवीरोनृपोजज्ञेसखाभौमस्ययादवाः १४ पौंड्रोवीर्यवतांनेताद्रुष्टाचासौसदामम शिष्योद्रोणस्यराजेंद्रोबलीब्रह्मास्त्रवित्कृती १५ शास्त्रज्ञोनीतिमान्साक्षान्नेतासर्वस्ययत्नवान् योद्धायुद्धप्रियोराजाजामदग्न्यइवापरः १६ एकांतशत्रुरस्माकंछिद्रान्वेषीसदाममबाधिष्यतेपुरींयोद्धाच्छिद्रंयदिलभेतसः १७ नह्यल्पसाध्योबलवान्पुंड्रस्येशोनृपोत्तमाः यत्ताभवंतस्तिष्ठंतुप्रगृहीतशरासनाः १८ यथानबाधतेराजापुरींयदुकुलाश्रयाम् अहंतुयास्येकैलासंकुतश्चित्कारणान्नृपाः १९ शंकरंद्रष्टुकामोस्मिभूतभावनभावनम् यावदागमनंमह्यंतावद्यत्ताभवंत्विह २०

१८ १९ भूतभावनभावनंवियदादिकारणस्याव्यक्तस्यापिकारणंअव्यक्तस्यापिसादित्वस्मरणात् २० ७४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२१ २२ २३ २४ २५ २६ २७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांचतुःसप्ततितमोऽध्यायः ७४ १ २
३ ४ ५ कामपालस्यबलस्यबलरामस्य ६ ७ पाशिनंवरुणं ८ ९ १० ११ १२ १३ किमिदंवाक्यम् १४ १५

मयाविरहितांचेमांयदिजानातिपुंड्रकः आगमिष्यतिराजेंद्रोयोत्स्यतेचपुरीमिमाम् २१ इमांनिर्यादवीकर्तुंशक्नोतीतिचमेमतिः यत्ताभ
वतराजेंद्राःखड्गैःपाशैःपरश्वधैः २२ पाषाणैःकर्षणीयैश्चसन्नद्धाभवतस्फकैः पिधायचकपाटानिमहाद्वाराणियत्नतः २३ एकए
वमहाद्वारेगमनागमनेसदा मुद्रयासहगच्छतुराज्ञोयेगंतुमीप्सवः २४ नचामुद्रःप्रवेष्टव्योद्वारपालस्यपश्यतः यावदागमनंमह्यंता
वदेवंभविष्यति २५ मृगयानात्रकर्तव्यानचक्रीडाबहिःपुरात् ज्ञातव्याश्चपरेस्वेचगमनागमनेसदा २६ एवमादिक्रियाकार्यायाव
दागमनंमम इत्युक्त्वायादवान्सर्वान्सात्यकिंपुनराहच २७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायां-
चतुःसप्ततितमोऽध्यायः ७४ श्रीभगवानुवाच सात्यकेशृणुमद्वाक्यंयत्तोभवयुधांवर त्वंतुखड्गीगदीभूत्वाचापपाणि
तलत्रवान् १ तिष्ठयत्नेनरक्षस्वपुरींबहुनृपाशयाम् नचनिद्रात्वयाकार्यारात्रौयदुवृषप्रभो २ नचव्याख्यात्वयाकार्याशास्त्राणांशा
स्त्रतत्पर नचवादस्त्वयाकार्योवादिभिःसहवृष्णिप ३ त्वंहियोद्धाबलीज्ञाताधनुर्वेदाख्यवेदवित् तथाकुरुयथावीरनोपहास्याभवे
दियम् ४ सात्यकिरुवाच करिष्यामिवचस्तुभ्यंयथाशक्तिजनार्दन आज्ञातवजगन्नाथधार्यायत्नेनमेसदा ५ भृत्यव
त्संचरिष्यामिकामपालस्यमाधव यावदागमनंतुभ्यंतावत्स्थास्यामियत्नतः ६ प्रसादस्तवगोविंदयदिस्यान्मयिमाधव किंनाममेच
दुःसाध्यंशत्रूणांनिग्रहेरणे ७ यदिशक्रंयमंवापिकुबेरमपिपाशिनम् सर्वानेतान्विजेष्यामिकिमुपौंड्रंनृपोत्तमम् ८ गच्छकार्यंकु
रुष्वेदंयत्तोहंसततंहरे उद्धवंपुनराहेदंकृष्णःपद्मनिभेक्षणः ९ शृणूद्धवत्वंवाक्यंमेकुर्यास्त्वेतन्मयत्नवान् रक्ष्यानयेनराजेंद्रपुरी
द्वारवतीत्वया १० यत्तोभवसदातातकुरुसाहाय्यमत्रनः लज्जाममसमुत्पन्नावदतस्त्वंवसांप्रतम् ११ त्वंहिनेतासमस्तस्यविद्यापा
रस्यसर्वतः कोनुशक्ष्यातिमेधावीवक्तुंविद्यावतःपुरः १२ यत्कार्यंतद्भवान्वेत्तिह्यकार्यंवापिसर्वतः अतोहंविरमेतानवक्तुंसंप्रतिवृष्णिप
१३ उद्धवउवाच किमिदंतवगोविंदवर्त्ततेमांप्रतिप्रभो अहोप्रसन्नतामह्यंकिंतुप्रीतिरियंतव १४ जानाम्यहंजगन्नाथप्र-
सादस्यैषविस्तरः यस्यप्रसन्नोभवसितस्यांकिंनास्तिकेशव १५ त्वंहिसर्वस्यजगतःकर्ताहर्त्ताप्रधानतः प्रभवःसर्वकार्याणांवक्ता-
श्रोताप्रमाणवित् १६

१६ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१० पेक्षणपक्षवातेनपर्वतान्क्षोभयामासेत्यनुषज्यते ११ १२ १३ परागतेसाकाष्ठासापरागतिरितिश्रुत्युक्तपरगतिःस्वरूपःदैर्घ्यमार्षम् १४
१५ १६ १७ १८ १९ २० यत्रबदरिकाश्रमे २१ २२ २३ एतत्शासनंएतांशास्त्राज्ञांशक्रेणकृतानिर्गुणमपिब्राह्मणं

ततोययौजगन्नाथोदिशंप्रागुत्तरांहरिः रवेणमहतातार्क्ष्यस्त्रैलोक्यंसमकंपयत् १० सागरंक्षोभयामासपद्भ्यांपक्षीव्रजंस्तदा पक्षेण
पर्वतान्सर्वान्वहन्देवजनार्द्दनम् ११ ततोदेवाःसगंधर्वाआकाशाधिष्ठितास्तदा तुष्टुवुःपुंडरीकाक्षंवाग्भिरिष्टाभिरीश्वरम् १२
जयदेवजगन्नाथजयविष्णोजगत्पते जयाजेयनमोदेवभूतभावनभावन १३ नमःपरमसिंहायदैत्यदानवनाशन जयाजेयहरे
देवयोगिध्येयपरागते १४ नारायणनमोदेवकृष्णकृष्णहरेहरे आदिकर्त्तःपुराणात्मन्ब्रह्मयोनेसनातन १५ नमस्तेसकलेशा
यनिर्गुणायगुणात्मने भक्तिप्रियायभक्तायनमोदानवनाशन १६ अचिंत्यमूर्तयेतुभ्यंनमस्तेसकलेश्वर इत्यादिभिस्तदादेवंवा
ग्भिरीशानमव्ययम् १७ तुष्टुवुर्देवगंधर्वाऋषयःसिद्धचारणाः शृण्वन्नेवजगन्नाथस्तुतिवाक्यानितानिच १८ ययौसार्द्धंसुरग
णैर्मुनिभिर्वेदपारगैः यत्रपूर्वंस्वयंविष्णुस्तपस्तेपेसुदारुणम् १९ लोकवृद्धिकरःश्रीमान्लोकानांहितकाम्यया वर्षायुतंतपस्त-
प्तंविष्णुनाप्रभविष्णुना २० यत्रविष्णुर्जगन्नाथस्तपस्तप्त्वासुदारुणम् द्विधाकरोत्समात्मानंनरनारायणाख्यया २१ गंगायत्र
सरिच्छ्रेष्ठामध्येधावतिपावनी यत्रशक्रःस्वयंहत्वावृत्रंवेदार्थतत्त्वगम् २२ ब्रह्महत्याविनाशार्थंतपोवर्षायुतंचरत् यत्रासिद्धा-
श्चसिद्धास्तुध्यात्वादेवंजनार्द्दनम् २३ यत्रहत्वारणेरामोरावणंलोकरावणम् एतच्छासनमिच्छंश्चतपोघोरमतप्यत २४
देवाश्चमुनयश्चैवसिद्धिंयातिमुचिव्रताः यत्रनित्यंजगन्नाथःसाक्षाद्वसतिकेशवः २५ यत्रयज्ञाःप्रवर्त्तंतेनित्यंमुनिगणैःसह यस्याः
स्मरणमात्रेणनरःस्वर्गंगमिष्यति २६ स्वर्गसोपानमिच्छंतियांपुण्यांमुनिसत्तमाः शत्रवोमित्रतांयांतियत्रानित्यंनृपोत्तम २७ यासा
कुःपुण्यशीलानांस्थानमुत्तमधर्मिणाम् यत्रविष्णुंसमाराध्यदेवाःस्वर्गंसमाययुः २८ सिद्धिक्षेत्रमिदंप्राहुऋषयोवीतमत्सराः विशा
लांबदरींविष्णुस्तांदृष्ट्वासकलेश्वरः २९ सायाह्नेचामरगणैर्मुनिभिस्तत्वदर्शिभिः प्रविवेशमहापुण्यमृषिजुष्टंतपोवनम् ३० अ
ग्निहोत्राकुलेकाले पक्षिव्याहारसंकुले नीडस्थेषुविहंगेषुदुह्यमानासुगोषुच ३१ ऋषीष्वथ्यतिष्ठत्सुमुनिवीरेषुसर्वतः समाधि
स्थेषुसिद्धेषुचिंतयत्सुजनार्द्दनम् ३२ अधिश्रितेषुहविष्षुज्वाल्यमानेषुचाग्निषु हूयमानेषुतत्रैवपावकेषुसमंततः ३३

हत्वाब्रह्महत्याव्रतंचरेदित्येवंइच्छन्पालयितुमितिशेषः २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१७ १८ हेवेदमंत्रमूर्त्तेनीतिःनीतिप्रदर्शकः १९ २० निग्रहावग्रहेक्रमेणस्वस्य अन्येनरोधेस्वेनवान्यस्यरोधेसिद्धेसतिः दंडयेषुदुर्बलेषुनये
समतायांसामान्यंसामैव २१ बलवत्स्वदानंत्रयाणामप्यगोचरेअविषयेशत्रौभेदःप्रयोक्तव्यः २२ २३ २४ २५ २६ २७ २८

ध्याताध्यानमयोध्येयइतिब्रह्मविदोविदुः जेतादेवरिपूणांचगोप्तानाकसदांभवान् १८ कोनुनामनयोवेदत्वांविनासांप्रतंवद नीति
स्त्वसर्वकार्याणामितिमेनिश्चितामतिः १९ दुर्गादानप्रयोगोयमित्याहुस्तद्विदोजनाः चतुर्द्धाप्रोच्यतेनीतिःसामदानेजनार्द्दन २० द-
डोभेदोमनुष्याणांनिग्रहावग्रहेसदा दंडेषुदंडयमिच्छंतिसामान्यंतुनयेहरे २१ बलवत्सु यदानंतुत्रयाणांवेदगोचरे प्रयोक्तव्योम-
हाभेदइतिनीतिमतांमतम् २२ तेषुतेषुचसर्वेषुप्रमाणंत्वांविदुर्बुधाः किमत्रबहुनोक्तेनसर्वंत्वयिसमर्पितम् २३ वैशंपायनउवाच
इत्युक्त्वाविररामैवंउद्धवोनीतिमत्तरः ततःसभगवान्विष्णुरेवमेवनृपोत्तम २४ कामपालमहाबाहुमुवाचयदुसंसदि उग्रसेनंनृप-
राजेंद्रंतथाहार्दिक्यमेवच २५ कामपालंपुनर्विष्णुरिदमेवाचतत्त्ववित् नप्रमादस्त्वयाकार्यःसर्वदायत्नवान्भव २६ स्थितेत्वयिम
हाबाहोकापीडाजगतोभवेत् गदीभवसदात्वायनक्रीडासर्वदाभवेत् २७ रक्षत्वसर्वदायत्नात्पुरीद्वारवतीप्रभो नोपहास्यायथास्या
मतथाकुरुगदोभव २८ उत्साहःसर्वथाकार्योनिरुत्साहोनयत्नतः बाढमित्यब्रवीद्रामःकृष्णंवृष्णिकुलोद्भवम् २९ वृष्णयःसर्व-
एवैतेस्वंस्वंसद्मसमाययुः गंतुमैच्छज्जगन्नाथःकैलासंपर्वतोत्तमम् ३० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकै
लासयात्रायांपंचसप्ततितमोऽध्यायः ७५ वैशंपायनउवाच ततःसंचिंतयामासगरुडंपक्षिपुंगवम् आगच्छत्वरितंता
र्क्ष्यइतिविष्णुर्जगत्पतिः १ ततःसभगवांस्ताक्ष्र्योवेदराशिरितिस्मृतः बलवान्विक्रमीयोगीशास्त्रनेताकुरूद्वह २ यज्ञमूर्त्तिःपुरा-
णात्मासामसूर्द्धाचपावनः ऋग्वेदपक्षवान्पक्षीपिंगलोजटिलाकृतिः ३ ताम्रतुंडःसोमहरःशक्रजेतामहाशिराः पन्नगारिःपद्मनेत्रःसा
क्षाद्विष्णुरिवापरः ४ वाहनंदेवदेवस्यदानवीगर्भकृंतनः राक्षसासुरसंघानांजेतापक्षबलेनयः ५ प्रादुरासीन्महावीर्यःकेशवस्या
ग्रतस्तदा जानुभ्यामपतद्भूमौनमोविष्णोजगत्पते ६ नमस्तेदेवदेवेशहरस्वामिन्त्रिभुवन् पस्पर्शपाणिनाकृष्णःस्वागतंताक्ष्र्यपुं
गवम् ७ इत्युवाचतदाताक्ष्र्ययास्येकैलासपर्वतम् शूलिनंद्रष्टुमिच्छामिशंकरंशाश्वतंशिवम् ८ बाढमित्यब्रवीत्ताक्ष्र्यआ
रुह्येनंजनार्द्दनः तिष्ठध्वमितिहोवाचयादवान्पार्श्ववर्तिनः ९

२९ ३० इतिश्रीनीलकंठकृतौभावदीपेखिलेषुहरिवंशेभविष्यपर्वणि १०१
कैलासयात्रायांटीकायांपंचसप्ततितमोऽध्यायः ७५ ततःसमिति १ ततःसइति २ ३ ४ दानवीगर्भकृंतनःयद्दर्शनमात्राद्दानवीनांगर्भनिश्यंतीत्यर्थः ५ ६
७ ८ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वैशंपायनउवाच ततःसभगवान्विष्णुर्दुर्विज्ञेयगतिःप्रभुः यत्रपूर्वंतपस्तप्तसमात्मनायादवेश्वरः १ गंगायाश्चोत्तरेतीरेदेशंदृष्टु
मुपागतः स्वयमेवहरिःसाक्षात्प्रविवेशतपोवनम् २ प्रविश्यसुचिरंदेशंददर्शचमनोरमम् निषसादततस्तस्मिन्नाश्रमेपुण्यवर्द्धनः
३ समाधौयोजयामासमनःपद्मनिभेक्षणः किमर्थेषजगन्नाथोध्यातादेवेश्वरःस्थितः ४ स्थितेदेवगुरौतत्रसमाधौद्वीपवद्धरौ तत्र
शब्दोमहाघोरःप्रादुरासीत्समंततः ५ खादखादतमोदतयातयातमृगानिमान् प्रेषयेहपुनःसर्वान्प्रसादाच्छार्ङ्गधन्वनः ६ एष
विष्णुरयंकृष्णोहरिरीशइतोच्युतः नमोस्तुविष्णोदेवेशस्वामिन्माधवकेशव ७ इत्यादिशब्दःसुमहानाविरासीत्तदानिशि ततश्चसु
महानादःसिंहानांमृगविहिंसाम् ८ धावतांचशुनांराजन्मृगाननुविनर्दताम् मृगाणांभीतियुक्तानामृक्षाणांद्वीपिनांतथा ९ गजा-
नांनर्दतांराजन्बृंहितंचततस्ततः महावातसमुद्भूतक्षुभितस्येववारिधेः १० नादस्त्रैलोक्यवित्रासःप्रादुरासीत्तदानिशि श्रुत्वाशब्दं
हरिर्देवस्ताद्दृशंतत्राधिष्ठितः ११ समाधिक्षोभमासाद्यविश्वस्यचजगत्पतिः ततःसंचिंतयामासकोयमेषमहास्वनः १२ कस्यायमीदृ
शःशब्दस्तुतियुक्तोममत्विति अहोस्मिन्मृगयाशब्दःशुनांसंचरतांवने १३ मृगाणामथसर्वेषांनादश्चसुमहानयम् व्यामिश्रस्तुतिसु
क्ताभिर्वाग्भिर्ममसमंततः १४ इतिसंचिंत्यमनसादिशोविप्रेक्ष्यसर्वतः तत्रआस्तेहरिस्तत्रज्ञातुंतस्यसमुद्भवम् १५ ततोमृगाःसमा
धावन्यत्रतिष्ठतिकेशवः तांश्चैवानुचरोराजन्सगणःसमपद्यत १६ अथवैद्वीपिकाराजञ्छतशोथसहस्रशः ततस्तेमांपिव्यन
शाद्विवेवसमपद्यन १७ ततोनुभूतसंघाश्चसमदृश्यंततत्रह पिशाचाश्चमहाघोरानदंतोबहुविस्वनम् १८ भक्षयंतोथपिशितं-
पिबंतोरुधिरंबहु प्रादुरासन्महाघोराःपिशाचाविकृताननाः १९ हन्यमानाहताराजन्पततःपतितामृगाः इतश्चेतश्चधावंतोबाणै-
र्विद्धामृगद्विपाः २० ततोमृगसहस्राणिसमुदीर्णानिभारत यत्रासौतिष्ठतेदेवस्तत्रायातानिभारत २१ अंतरीकृत्यदेवेशंस्थितानी
त्यनुशुश्रुम पिशाच्योविकृताकाराःकरालारोमहर्षणाः २२ पुत्रवत्यःसमापेतुर्यत्रतिष्ठतिकेशवः श्वगणस्तत्रराजेंद्रचरत्येवतं-
तस्ततः २३ ततःसभगवान्विष्णुःसर्वमालोक्यवेष्टितः विस्मयपरमंगत्वापश्यन्नास्तेस्मकेशवः २४ कस्यैषविस्तृतोनादःकस्यवायं-
जनोपतत् कोनुमांस्तौतिभक्त्यावैभविष्येप्रीतिमानहम् २५ कस्यमुक्तिःसमायाताप्रीतेमयिसुदुर्लभा इतिसंचिंत्यभगवानास्ते-
प्राकृतवद्धरिः २६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३४ ३५ ३६ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांषट्सप्ततितमोऽध्यायः ७६ १ २ ३ ४ ५ जल

अतिथीपूज्यमानेचसंध्याविष्टेजगन्मये सतस्यामथवेलायांदेवैःसहजनार्दनः ३४ विवेशबदरींविष्णुर्मुनिजुष्टांतपोमयीम् आश्रम
स्यायमध्यंतुप्रविश्यहरिरीश्वरः ३५ गरुडादवरुह्याथदीपिकादीपितेतदा प्रदेशेपुंडरीकाक्षःस्थितस्तावत्सहामरैः ३६ इ
तिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांषट्सप्ततितमोऽध्यायः ७६ वैशंपायनउवाच ततोमुनिग
णाहृष्टादेवदेवमुपस्थितम् समाप्यचाग्निहोत्राणिसंपूज्यातिथिसत्तमान् १ मुनयोदीर्घतपसःसमाधौकृतनिश्चयाः जटिनोमुंडि-
नःकेचित्शिराधमनिसंतताः २ निर्मज्जानीरसाःकेचिद्दृतालाइवकेचन अश्मकुट्टाशनपराःपर्णभक्षास्तथापरे ३ वेदविद्याव्रत-
स्नातानिराहारामहातपाः स्मरंतःसर्वदाविष्णुतद्भक्तास्तत्परायणाः ४ आसन्नयुक्तयःकेचित्केचिद्ध्यानैकतत्पराः ध्यानेनमनसा
विष्णुंदृष्टवंतस्तपोधनाः ५ संवत्सराशिनःकेचित्केचिज्जलविचारिणः शक्रस्यभयदातारःश्रुतिस्मृतिपरायणाः ६ वसिष्ठोवामदेव
श्चरैभ्योधूम्रस्तथैवच जाबालिःकश्यपःकण्वोभरद्वाजोथगौतमः ७ अत्रिरश्वशिराभद्रःशंखःशंखनिधिःकुणिः पाराशर्यःपवित्रा
क्षोयाज्ञवल्क्योमहामनाः ८ कक्षीवानंगिराश्चैवमुनिर्दीप्ततपास्तथा असितोदेवलस्तात वाल्मीकिश्चमहातपाः ९ एतेचान्येचमुन
योद्रष्टुमीश्वरमव्ययम् आदायार्घ्यंयथायोग्यमुटजात्स्वात्समाययुः १० तेचगत्वाहरिंकृष्णंविष्णुमीशंजनार्दनम् भक्तिनम्रास्तदा
देवप्रणेमुर्भक्तवत्सलम् ११ नमोस्तुकृष्णकृष्णेतिदेवदेवेतिकेशवम् प्रणवात्मन्जगन्नाथनतास्मःशिरसाहरे १२ कृष्णविष्णोहृषी
केशकेशवेतिचसर्वदा प्रणामप्रवणाविप्राःप्राहुरित्थंजगत्पतिम् १३ इदमर्घ्यमिदंपाद्यमिदंविष्टरमेवच कृतार्थाःसर्वदादेवप्रसन्नो
नोजगत्पतिः १४ किंकर्मकिंनुनःकृत्यंकश्चिद्दोषःप्रमोहरे इतिप्रांजलयःसर्वेप्राहुर्देवस्यपश्यतः १५ कृष्णोपितद्यथायोगमुपयुज्य
सहामरैः कृतसर्वमुनिवरावद्धृतानपउत्तमम् १६ इत्यब्रुवन्पुराणात्माप्रीतस्तेनगरुत्मता आसनंलंभयामासराजीवदेवोजनार्दनः
१७ कुशलंपृष्टवान्भूयोमुनीनांभावितात्मनाम् अग्निहोत्रेषुतपसितथाभृत्येषुसर्वतः १८ एवमादिजगन्नाथःपृष्टवानीश्वरस्तदा-
सर्वत्रकुशलंतत्रब्रूयुःकृष्णस्यसर्वतः १९ आतिथ्यंचाक्रिरेतेनुनीवारैःफलमूलकैः देवानामथसर्वेषांविष्णोःकृष्णस्ययत्नतः आति
थ्यमुपयुंजानस्ततःप्रीतोभवद्धरिः २० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांसप्तसप्ततितमोऽध्यायः ७७

विचारिणःजलवासपराःजलमात्राहारावा ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० इतिश्रीम॰खि॰ह॰भ॰टी॰सप्तसप्ततितमोऽ
ध्यायः ७७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२४ प्राकृतबुद्धयः देहात्मवादिनः २५ २६ पीडनंकर्तुं २७ २८ २९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांएकोनाशीतितमो
ऽध्यायः ७९ ७९ ततइतिदीपिकाधारिणौतदानींरात्रेःसत्वात् १ २ अंतरीकृत्यकेशवमथकेशवीकृत्य ३ ४ ५ ६ ७ ८

पापानिबहुरूपाणिकुर्वंतेज्ञानतस्तदा संसारस्यैषमहिमाविस्तृतःसर्वजंतुषु २४ अच्छेद्यःशस्त्रसंपातैरुपायैर्बहुभिःसदा एतस्मा
न्नानिवर्तंतेमर्त्याःप्राकृतबुद्धयः २५ इमंहत्वामनुष्येंद्रमिदमस्मादुराम्यहम् चोरयित्वाधनमिदंहरिष्याम्याददाम्यहम् २६ निर्भ-
त्स्यैनमिमंशांतंहरिष्यामिधनंबली इत्यादिव्याकुलामूर्खायंतेप्राणिपीडनम् २७ अस्यैवदुःखमूलस्यसंसारस्यसदाहरिः भेषज
सर्वथादेवःशंखचक्रगदाधरः २८ आदिदेवःपुराणात्माआत्माब्रह्मविदांसदा तेवयंसर्वयत्नेनद्रक्ष्यामःसर्वथाहरिम् इत्यपिशा
चौभाषंतौप्रादुरास्तांहरेःपुरः २९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांएकोनाशीतितमोऽध्यायः
७९ वैशंपायनउवाच ततःसभगवान्विष्णुःपिशाचौमांसभक्षकौ ददर्शाथमहाघोरौदीपिकाधारिणौहरिः १ विलोक्या
न्तर्हितस्तौपिशाचौदेवकीसुतम् स्थितंसुखासनेविष्णुंदृष्ट्वालोकेश्वरेश्वरम् २ तौचगत्वासमुद्देशंपिशाचौकेशवस्यह ततस्तावूच
तुर्विष्णुमंतरीकृत्यकेशवम् ३ कोभवान्कस्यवामर्त्यःकुतश्चागम्यतेत्वया किमर्थमिहसंप्राप्तोवनेघोरेमृगाकुले ४ निर्मनुष्ये-
ऽपिवृत्तेपिशाचगणसेविते श्वापदैःसेव्यमानेचविपिनेव्याघ्रसंकुले ५ सुकुमारोनवद्यांगःसाक्षाद्विष्णुरिवापरः पद्मपत्रेक्षणः
श्यामःपद्माभिःश्रीपतिःस्वयम् ६ अस्मत्प्रीतिकरःसाक्षाद्ब्रह्मेवविष्णुरिवापरः देवोवायदिवायक्षोगंधर्वःकिन्नरोपिवा ७ इंद्रोवा
धनदोवापियमोथवरुणोपिवा एकाकीविपिनेघोरेध्यानार्पितमनाइव ८ ब्रूहिमर्त्ययथातत्त्वंज्ञातुमिच्छामिमानद एवंपृष्टःपि
शाचाभ्यामाहविष्णुरुरुक्रमः ९ क्षत्रियोस्मीतिमामाहुर्मनुष्याःप्रकृतिस्थिताः यदुवंशेसमुत्पन्नःक्षात्रवृत्तमनुष्ठितः १० लोका-
नामथपातास्मिशास्तादुष्टस्यसर्वदा कैलासंगंतुकामोस्मिद्रष्टुंदेवमुमापतिम् ११ इत्येवंममवृत्तांतःकथ्यतांकौयुवामिति युवामि
हसमायातौकिमर्थंब्राह्मणाश्रमम् १२ एषाहिमहतीपुण्यानानाविप्रनिषेविता बदरीयसमाख्यातानक्षुद्रैराश्रिताक्वचित् १३
तपस्विभिस्तपोयुक्तैर्जुष्टासिद्धनिषेविता श्वगणानात्रदृश्यंतेपिशाचामांसभोजनाः १४ नहंतव्यामृगाश्चात्रमृगयानात्रवर्तते न
तुक्षुद्रैःप्रवेष्टव्यानकृतघ्नैर्ननास्तिकैः १५ अहमस्यतुदेशस्यरक्षितानात्रसंशयः व्यतिक्रमोयदिभवेत्तस्यशास्तास्मियत्नतः १६

हेमर्त्येतिसंबोधनं अंतरीकृत्यादेव ९ १० ११ १२ १३ १४ १५ १६ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीमहाभारतेनीलकंठकृतौभारतभावदीपेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांअष्टसप्ततितमोऽध्यायः ७८ १ मांसस्यपिटकंमंजूषामिवपरस्य
शरीरमित्यर्थः २ लंबमानंचमहाप्रांतंचतत्शूलंचतत्रप्रोतानिशिरोधराणियाभ्यांतौ नृमुंडमालासंयुक्तशूलधारिणावित्यर्थः ३ ४ ५ ६

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांअष्टसप्ततितमोऽध्यायः ७८ वैशंपायनउवाच तेषाम
नुमहाघोरौपिशाचौविकृताननौ श्मश्रूपिंगलरोमाणौदीर्घजिह्वौमहाहनू १ लंबकेशौविरूपाक्षौहाहाहाहेतिवादिनौ खादंतौमांस
पिटकंपिबंतौरुधिरंबहु २ आंत्रवेष्टितसर्वांगौदीर्घौकृशकृतोदरौ लंबमानमहाप्रांतशूलप्रोतशिरोधरौ ३ कर्षंतौशवयूथानिबा-
हुभ्यांतत्रतत्रह हसंतौविविधंहासंस्वजातिसदृशंनृप ४ वदंतौबहुरूपाणिवचांसिप्राकृतानिच कंपयंतौमहावृक्षान्नूरुपादप्र
घट्टनैः ५ सृक्किणीलेलिहंतौचदंतान्कटकटायिनौ अस्थिस्नायुसमाकीर्णौधमनीरज्जुसंततौ ६ वदंतौकृष्णकृष्णेतिमाधवेतिच
सततम् कदानुद्रक्ष्यतेविष्णुःसइदानींक्वतिष्ठति ७ स्वामिनःकुत्रवसतिःकुतोद्रष्टुंयतामहे अत्रवाकुत्रदेवेशःकुतोनुस्थास्यतेहरिः
८ कुतःपद्मपलाशाक्षःसाक्षाद्विष्णुरजोहरिः यमाहुःपुंडरीकाक्षंब्रह्मब्रह्मविदोजनाः ९ तमजंपुरुषंविष्णुंद्रष्टुमभ्युद्यतावयम् अं
तकालेजगन्नाथंप्रविवेशजगत्त्रयम् १० तमजंविश्वकर्तारंकुतोद्रक्ष्यामसांप्रतम् यस्यविस्तारएवैषलोकःप्राणिनिवासिनः ११
तंद्रष्टुंदेवमीशानंयतामःसांप्रतंहरिम् दशाघोरतमालोकेविहिष्टासर्वजंतुभिः १२ पैशाचेयंसमुत्पन्नावयोर्नोप्रविशन्मलात् नर
मांसास्थिकलुषासर्वभीतिप्रदायिनी १३ अहोनौदुष्कृतकर्मप्राक्तनंकर्मसंचये अतएवमहतीप्रीतिवर्त्ततेसर्वदातथा १४ यावन्नौ-
दुष्कृतंकर्मतावत्स्थास्यतितादृशी दशासासर्वविद्विष्टाप्राणिपीडनकारिणी १५ सर्वथादुष्कृतंकर्मबहुभिर्जन्मसंचयैः तथाहि-
तत्फलंघोरमव्यापिननिवर्त्तते १६ यतामःस्मप्राणिनोहंतुंश्वगणैःसहसांप्रतम् तथाहिप्राणिनोलोकेबाल्यमादौसमास्थिताः १७
अज्ञानावृतचित्ताश्चकृत्याकृत्यंनजानते तथायौवनिनोमाताविषयैर्बहुलीकृताः १८ यततेश्रेयसेनैवततोविषयसंस्थिताः वि
षयाकृष्टचित्ताहिमनुष्यानविजानते १९ तथाचवृद्धभावेतुव्याधिभिर्बहुभिर्वृताः ज्वरादिभिर्महाघोरैर्नानादुःखविधायिभिः २०
यततेनहिवैश्रेयोविनष्टेंद्रियगोचराः ततोमृतागर्भवासेवसंतिसततंनराः २१ विण्मूत्रकलिलेघोरेदुःखैर्बहुभिराचिताः च्यवंते
तुततोघोराद्भ्रमत्संसारमंडले २२ परस्परंविहिंसंतःकुर्वंतःकर्मसंचयम् महत्यवसदाघोरेसंसारेदुःखसंकुले २३

७ ८ ९ १०
११ १२ १३ १४ १५ १६ १७ १८ १९ २० श्रेयश्रेयसेविनष्टेंद्रियगोचराः इतस्ततोभ्रममाणानामिंद्रियाणांवशगाइत्यर्थः २१ २२ २३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४१ तेनैवदूषितेनविष्णुनाहेतुभूतेन तस्यद्वेषाद्देवममेमतिःसमाकुलाजातेत्यर्थः ४२ ४३ देवमुनिर्मार्कंडेयः ४४ ४५ ४६ ४७ ४८

स्रष्टाचयोसौसकलस्यदेवःपाताचहर्त्ताचहरिःसएव द्रष्टुंयमिच्छामिनिरीक्षितुंतं भुवनेश्वरंहरिंपुराणमाद्यंप्रभविष्णुमव्ययम् ४१ अजस्यकर्त्ताभु
वनस्यगोप्ताभुवश्चकर्त्ताहरिरेकएव तंयोगिनोयोगविशुद्धबुद्धिंलभेमतेनैवमतिःसमाकुला ४२ निगीर्यविश्वंसकलंजगत्पतिःशेते
शिशुत्वंसमवाप्यसाक्षात् वटस्यपत्रेजगतांनिवासःपादौचविक्षिप्यकरौविधुन्वन् ४३ यस्योदरेदेवमुनिःपुरातनोददर्शलोकानखि
लान्स्वमायया प्रविश्यविश्वंसकलंययाव दृहरिर्यथाभूतमभूदिदंमहत् ४४ निगीर्यविश्वंजगदादिकालेशेतेमहात्माजलधेर्ज
लौघे देव्याश्रियाचामरलोलहस्तयानिषेव्यमानःपुरुषोत्तमस्तदा ४५ नाभेश्चयस्याविरभूत्सपद्मपद्ममहत्काञ्चनसप्रभंप्रभोः
जन्मास्पदंलोकगुरोर्यदासीद्विस्तारिपद्मंजगदादिसृष्टौ ४६ दधारयोभूतपतिर्महान्महींदंष्ट्राग्रसंस्थापितरूढमूलाम् नदन्महा
मेघइवादिकालेकुर्वन्वराहोमुनिगीतमूर्त्तिः ४७ हरिःपुराणःपुरुषोत्तमःप्रभुःकर्त्तासमस्तस्यसमस्तसाक्षी यज्ञात्मकोयज्ञपतिर्ज
गत्पतिर्द्रष्टुंतमीशंवयमुद्यतास्मः ४८ केचिद्बहुत्वेनवदंतिदेवमेकात्मनाकेचिदिमंपुराणम् वेदांतसंस्थापितसत्वयुक्तंद्रष्टुंतमीशंव
यमुद्यतास्मः ४९ अनेकमेकंबहुधावदंतिश्रुतिस्मृतिन्यायनिविष्टचित्ताः आहुर्यमात्मानमजंपुराविदोद्रष्टुंतमीशंवयमुद्यतास्मः
५० यमाहुरीड्यंवरदंवरेण्यमेकांततत्वंमुनयःपुरातनाः यंसर्वगंदेवमजंजनार्द्दनंद्रष्टुंहरिंसंप्रतिसंयतास्मः ५१ यस्मिन्निदंविश्वमिदं
प्रोतमादिकालेजगत्सतो तंद्रष्टुमभिसंवृत्ताःकंनुवक्ष्यामसांप्रतम् ५२ गच्छामोवयमन्यत्रगच्छत्वंकामसन्यतः नियमोप्यस्ति
नोमर्त्यायूयंचैवगच्छसांप्रतम् ५३ रात्रिमध्यमनुप्राप्तंनात्रकार्याविचारणा इत्युक्त्वाघोररूपोसौपिशाचोविकृताननः ५४ तस्मि
न्नेवसमेदेशेपीत्वाचरुधिरंबहु भक्षयित्वायथाकाममांसराशिंविचक्षणाः ५५ अपःसंस्पृश्यतत्रैवपार्श्वेसंस्थाप्यसाधनम् आ
त्मपाशंमहाघोरंसंस्थाप्यविपुलंमहत् ५६ आसनंकुशसंयुक्तंकृत्वाचाभ्युक्ष्यवारिणा उत्सार्यश्वगणान्सर्वान्यत्नेनमहतातदा ५७
स्वस्वासनंसमास्थायसमाधायततेस्वपः एकचित्तस्तदाभूत्वानमस्कृत्यचकेशवम् इमंमंत्रंपठन्घोरःपिशाचोभक्तवत्सलम् ५८
नमोभगवतेतस्मैवासुदेवायचक्रिणे नमस्तेगदिनेतुभ्यंवासुदेवायधीमते ५९ ओंनमोनारायणायविष्णवेप्रभविष्णवे ममभूया
न्मनःशुद्धिःकीर्त्तनात्तवकेशव ६० जन्मेदमीदृशंघोरंमाभून्ममदुरासदम् देवदूतोभविष्यामिस्मरणात्तवगोपते ६१
केचित्याज्ञिकाः बहुत्वेनइंद्रा
दिरूपेण एकात्मनाऐक्येनउपासकाः वयंतुप्रत्यगभेदेनद्रष्टुमिच्छामइत्यर्थः ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

वैतौभवंतो क्रतुपुंगवांकस्येयंमहतीचमूः नातःपरंप्रवेष्टव्यमृषयस्तत्रसंस्थिताः १७ विघ्नस्तत्रप्रवर्त्तेततपःसुचतपस्विनाम् इहैवस्थी
यतांतावद्वक्तव्यंचततस्करवम् १८ अन्यथाहंनिषेधास्याबलाद्वाक्यैस्तथैवच वैशंपायनउवाच एवंपृष्टौपिशाचौतु
वक्तुमेवोपचक्रतुः १९ तयोरेकोमहाघोरःपिशाचोदीर्घबाहुकः उवाचवचनंतत्रयथाहृदिसमर्पितम् २० पिशाचउवाच
श्रूयतामभिधास्यामिसमाहितमनाभव नमस्कृत्यजगन्नाथंहरिंकृष्णंजगत्पतिम् २१ आदिदेवमजंविष्णुंवरेण्यममघंशुचिम्
वक्ष्यामिसकलंयद्वत्तथाशृणुयदीच्छसि २२ घंटाकर्णोस्मिनाम्नाहंपिशाचोघोरदर्शनः मांसादोविकृतोघोरःसाक्षान्मृत्युरिवापरः
२३ धनदस्यानुगंताहंसाक्षाद्रुद्रसखस्यच ममायमनुजःसाक्षादंतकस्यांतकोह्यहम् २४ मृगयेयंसुमहतीविष्णोःपूजार्थमित्यु
त मृमेयवर्त्ततेसेनास्वगणापिममैवतु २५ आगतोहमहाशैलात्कैलासाद्रुद्रसेवितात् अहंपिशाचवेषेणसंविष्टःपापकर्मकृत् २६
सततंद्वेषयन्विष्णुंघंटामाबध्यकर्णयोः ममनप्रविशेन्नामविष्णोरितिविचिंतयन् २७ अहंकैलासनिलयमासाद्यवृषभध्वजम् आ
राध्यतंमहादेवमस्तुवस्ततंशिवम् २८ ततःप्रसन्नोमामाहवृणीष्वेतिवरंहरः ततोमुक्तिर्मयातत्रप्रार्थितादेवसन्निधौ २९ मुक्तिंप्रा
र्थयमानंमांपुनराहत्रिलोचनः मुक्तिप्रदातासर्वेषांविष्णुरेवनसंशयः ३० तस्माद्गत्वाचबदरींतत्राराध्यजनार्दनम् मुक्तिंप्राप्नुहिगो
विंदान्नरनारायणाश्रमे ३१ इत्युक्तोदेवदेवेनशूलिनाज्ञातवानहम् तमेवपरमंमत्वागोविंदंगरुडध्वजम् ३२ तस्मात्प्रार्थयमानः
सन्मुक्तिदेशमुपागतः अन्यच्चशृणुमेकार्यंयदिकौतूहलंतव ३३ पुरीद्वारवतीनाम्नपश्चिमस्यादधेस्तटे यदुवृष्णिसमाकीर्णासाग
रोर्मिसमाकुलाम् ३४ अध्यास्तेसहरिर्विष्णुस्तांपुरींपुरुषोत्तमः दुष्टलोकहितार्थायवसंतद्वारकापुरे ३५ निर्गताःसांप्रतमस्यैव
यमेतैःसहानुगैः विष्णुःसर्वेश्वरःसाक्षाद्रष्टव्योस्माभिरद्यवै ३६ लोकानांप्रभवःपाताकर्त्ताहर्त्ताजगत्पतिः आदिःसाहिसमस्तस्यप्र
भवःकारणंहरिः ३७ कर्त्तासमस्तस्यहरिःपुरातनःप्रभुःप्रभूणामपियःसदात्मकः तमादिदेवंवरदंवरेण्यंद्रष्टुंहरिंसंप्रतिसंयतास्मः
३८ यस्यप्रसादाज्जगदेवमासीत्सप्राणिगंधर्वमहोरगौघम् देवंजगद्योनिमजंजनार्दनंद्रष्टुंहरिंसंप्रतिसंयतास्मः ३९ यस्योदरा-
द्विश्वमिदंप्रभूतंलयंचतस्मिन्समुपैतिकल्पे तस्यैवसाक्षाद्वशवर्त्तिविश्वंद्रक्ष्यामदेवंपुरुषोत्तमंहरिम् ४०

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८७ ८८ ८९ ९० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांअशीतितमोऽध्यायः ८० १ २ ३ ४ ५ ६ ७

नासिकाग्रंसमालोक्यपठन्ब्रह्मसनातनम् निर्वातस्थोयदादीपःप्रोच्चरन्प्रणवंसदा ८७ प्रणवंवाचकंसत्वावाच्यंब्रह्मेतिनिश्चितः ए
कायंसततंकृत्वाचित्तंविष्णौसमर्पितम् ८८ विकल्परहितंचित्तंहृदिमध्येन्यवेशयत् पुंडरीकेशुभदलेसमावेश्यजगत्पतिम् ८९
आस्तेसुखमहायोगीपिशिताशस्तदामहान् त्रिधामानंजपंस्तत्रस्मरन्विष्णुंसनातनम् ९० इतिश्रीमहाभारतेखिलेषुहरिवंशेभ-
विष्यपर्वणिकैलासयात्रायांघंटाकर्णचित्तसमाधिर्नामअशीतितमोऽध्यायः ८० वैशंपायनउवाच ततःसभगवान्विष्णुःपि
शाचंदृष्टवांस्तदा चिंतयंतंस्वमात्मानंशुद्धिबुद्धिसमन्वितम् १ आत्मन्यवस्थितंसाक्षात्पठंतंप्रणवंसकृत् प्रार्थयंतंस्वमात्मानमेकांते
नियतंहरिः २ अचिंतयज्जगन्नाथःकारणंपुण्यसंचये ध्यात्वातुसुचिरंविष्णुःकारणंपुण्यकर्मणः ३ धनदस्योपदेशेनपठन्सुबहु-
शःक्षितौ वासुदेवेतिकृष्णेतिमाधवेतिचमांसदा ४ जनार्दनहरेविष्णोभूतभावनभावन नराकारजगन्नाथनारायणपरायण ५
इतिमानामभिर्नित्यंपठत्येवदिवानिशम् स्वपन्जाग्रंस्तथातिष्ठन्भुंजन्गच्छंस्तथावदन् ६ भक्षयन्मांसपिंडकंपिबंच्छोणितमेव
वा बाधमानंचसुचिरंहत्वाचापिमृगान्बहून् ७ हननेभोजनेचैवजाग्रत्स्वप्नेतथैवच सर्वेष्वपिचकार्येषुकर्ताहमितिमन्यते ८
एतस्यकर्मणःपाकएषघोरस्यकर्मणः निश्चित्यैवंजगन्नाथःप्रीतस्तस्यबभूवह ९ अदर्शयत्स्वमात्मानमनन्यस्यजगत्पतिः शुद्धेंतः
करणेतस्यपिशाचस्याथभूमिप १० सचघोरःपिशाचोपिददर्शात्मनिकेशवम् पीतकौशेयवसनंपद्माक्षंश्यामलंहरिम् ११ शंखि
नंचक्रिणंविष्णुंस्रग्विणंगदिनंविभुम् किरीटिनंकौस्तुभिनंश्रीवत्साच्छादितोरसम् १२ नीलमेघनिभंकांतंगरुडस्थंप्रभंजनम् च
तुर्भुजंशुभगिरंनिश्चलंसर्वगंशिवम् १३ अनादिनिधनंनित्यंमायाविनममायिनम् सत्ययुक्तंसदाशुद्धंसिद्धिगम्यंसदामलम् १४
मनस्येवंजगन्नाथंदृष्ट्वाविष्णुमनेकधा अनुमित्येवनयनेकृतार्थोस्मीत्यमन्यत १५ अथदृष्टोहरिर्विष्णुःसाक्षात्सर्वत्रगःशुभः प्र-
सन्नोहिहरिर्मह्यंतेनाहंदृष्टवान्हरिम् १६ सिद्धंमेजन्मनःकृत्यंकिमतःकृत्यमस्तिमे ग्रंथयोममनिर्भिन्नावश्यान्येवेंद्रियाणिमे १७
प्रायेणजितमित्येवमनोमन्येस्मृतेहरौ इषणाचनिरस्तामेप्रसन्नोहंतथाभवम् १८ एतेभ्योपिपिशाचेभ्योनिर्मुक्तःसांप्रतंतथा यो
सौममानुजःसाक्षात्सचभक्तस्तथाहरौ १९ कालेनचैवनिर्मुक्तोविष्णोःसायुज्यमाप्नुयात् इत्येवंचिंतयित्वासआंत्रपाशंविभिद्यच २०

८ ९ १० आत्मनिहृदयपंकजे ११ १२ १३ १४ १५ १६ १७ १८ १९ २० ६९ ६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ६२ ६३ ६४ ६५ ६६ ६७ इंद्रियार्थेषुशब्दादिषुप्रसक्तानातिशेषः ६८ ६९ ७० ७१ सर्वगंपरमात्मगतंममनः
 कर्तृविषयांतरेविषयःशब्दादिः अंतरःभेदः तेउभेकर्मणीनरक्षतांविषयप्रवणंभेदबुद्धिपरंचमनोमाभूदित्यर्थः ७२ अन्यथादोषमाहमानइतिविपर्यये

तवचक्रप्रहारेणकायोनश्यतुसांप्रतम् ममभूयोभवोमाभूदेषामेप्रार्थनाविभो ६२ अर्थिनांकल्पवृक्षोसिदातासर्वस्यसर्वदा यत्रयत्रभवेज्जन्मतत्रतत्रभवान्हृदि ६३ वर्ततांममदेवेशप्रार्थनैषाममापरा नमस्तुभ्यंनमस्तुभ्यंभवत्वेवंसदामम ६४ निर्विघ्नाप्रार्थनादेवनमस्तेस्तुसदामम यदास्मेस्मरणंभूयात्तदामाभूत्स्मृतिभ्रमः ६५ दिनेदिनेक्षणंचित्तंत्वयिसंस्थंभवत्विति एवंप्रेरयमांदेवमाभूत्तेचित्तमीदृशम् ६६ नृशंसोयंपिशाचोयंदयास्मिन्काभवेदिति एवंचिंतयमांदेवभृत्योमह्यमितिप्रभो ६७ परपीडानमत्तोस्तुनमस्तेभगवन्प्रभो इंद्रियाणींद्रियार्थेषुमाभूवन्सांप्रतंहिमे ६८ अंतकालेममाप्येवंप्रसादात्तवकेशव पृथिवीपातुमेघ्राणंरसनापातुमेपयः ६९ सूर्यश्चपातुमेचक्षुःस्पर्शंपातुचमारुतः श्रोत्रमाकाशमप्येतुमनःप्राणंचगच्छतु ७० जलंमांरक्षतांनित्यंपृथिवीरक्षतांहरे सूर्योमांरक्षतांविष्णोनमस्तेसूर्यतेजसे ७१ वायुर्मांरक्षतांदुःखादाकाशंचजनार्दन नमनःसर्वगंदेवरक्षतांविषयांतरे ७२ मनोविपर्ययेघोरेपुरुषान्हंतिनित्यशः पापेषुयोजयेत्पुंसःपरपीडात्मकेषुच ७३ नमस्तद्रक्षतांदेवभूयोभूयोजनार्दन माभून्मनसिकालुष्यंमनोमेनिर्मलंभवेत् ७४ कलुषंतस्ययच्चित्तंनरकेपातयत्यमुम् बाह्यानिनिर्मलान्येवमिंद्रियाणिभवंत्युत ७५ नतानिकार्यवंतोहमनश्चेत्कलुषंभवेत् नांगानिसुष्ठिनामेध्यंगृहीत्वायोव्यवस्थितः ७६ बहिःप्रक्षालनंकुर्वन्किंभवेत्तस्यकेशव व्यर्थोहिकेवलंतस्यप्रग्रहोबाह्यगोचरः ७७ तस्मात्सर्वप्रयत्नेनचित्तंरक्षजनार्दन बलवानिंद्रियग्रामोवारयेनंजनार्दन ७८ परिवादाज्जगन्नाथवाचंरक्षदुरूहहाम् ७९ परद्रव्यान्मनोरक्षपरदाराज्जनार्दन सर्वत्रमेदयाभूयात्प्रसादात्तवकेशव ८० त्वय्येवभक्तिरचलाभूयाद्भूतेषुमेदया बहुनात्रकिमुक्तेनशृणुष्वेदंवचोमम ८१ सुखेदुःखेचरागेचभोजनेगमनेतथा जागृत्स्वप्नेषुसर्वत्रत्वय्येवरमतांमनः ८२ मामकंदेवदेवेशनमस्तेस्तुजनार्दन इतिब्रुवन्घोरतमोजात्याहीनोनचित्रकः ८३ पिशाचोभगवद्भक्तःसमाधिंसमपद्यत दृढंबध्वात्मनःकाममांत्रपाशेनमांसपः ८४ निश्चलेनैवमनसासुखमास्तेस्मसंयतः ध्यायहरिंजगद्योनिंविष्णुपीतांबरंशिवम् ८५ मुकुंदमादिपुरुषमेकाकारमनामयम् नित्यंशुद्धंज्ञानगम्यंकारणंसर्वदेहिनाम् ८६

विषयादिप्रावण्ये ७३ ७४ ७५ नांगानी
तिसार्द्रः ७६ प्रग्रहःश्रध्यर्थमाग्रहः ७७ ७८ ७९ ८० ८१ ८२ ८३ मांसपःमांसभक्षकःपातिरत्रभक्षणार्थः ८४ ८५ ८६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२१ २२ २३ फणेआक्रम्येतिशेषः फणाद्वयोरित्यमरः पुंसिद्विवचनमिदं २४ २५ गोधरंशैलं २६ स्तनमध्येहृदये २७ २८ २९
३० दामानिपुष्पमालाः माल्यकृतेमालाकाराय ३१ ३२ गजंकुवलयापीडंविषाणंदंतं ३३ ३४ यादवानामधेयंतुयादवंद्रुमिलजलात् ३५ पुत्रंन

पयःपानंतथाकुर्वन्भक्षयन्दधिपिंडकम् दाम्नाबद्धोदरोविष्णुर्मात्रारुषितयादृढम् २१ ततश्चदाम्नासुदृढेनबद्धोजघानयोसौयमला
र्जुनौच क्रीडन्हरिर्गोकुलवासवासीगोपीभिरास्वाद्यमुखंस्तनंच २२ वृंदावनेवसन्विष्णुर्गोपैर्गोकुलवासिभिः तत्रहत्वाहयंराजन्
विरराजांशुमानिव २३ यःक्रीडतेनागफणेजनार्दनोनिषेव्यमानःसहगोपदारकैः महाह्रदेनागपतिंजगत्पतिर्ममर्दवीर्यातिशयंप्र
दर्शयन् २४ योधेनुकंतालवनेतत्फलैःसममच्छिनत् हत्वादानवमुग्रंतंगोपान्विस्मापयत्यसौ २५ दधारयोगोधरमुग्रपौरुषात्स
हामतिर्मेघसमागमेसति विडंबयंश्छत्रकवल्लभमोदयन्गोपांश्चगोपीश्चसगोकुलेहरिः २६ गोपीनांस्तनमध्येतुक्रीडतेकाममीश्वरः
योसौपिबस्तनधरमायामानुषदेहवान् २७ गोपीभिरास्वाद्यमुखंविविक्तेशेतेस्मरात्रौसुखमेवकेशवः स्तनांतरेष्वेवतदाचतासांका-
मीचकांताधरपल्लवंपिबत् २८ अक्रूरेणसमाहूतस्तेनगच्छन्हियामुने जलेयोद्यार्चितस्तेनत्रागच्छोकेसएवहि २९ ततश्चगच्छ
न्बलवान्जनार्दनोहत्वातमुग्रंरजकंबलात्पथि हत्वाचवस्त्राणियथेष्टमीश्वरोययौसरामोमथुरापुरींहरिः ३० लब्ध्वाचदामानिबहूनि
कामदोदत्वावरंमाल्यवतेमहांतम् लब्ध्वानुलेपंसुरभिंचयादवःकुब्जांचकाराशुमहार्हरूपाम् ३१ योसौचापंसमादायमध्येछित्वाम
हद्धनुः सिंहनादमहांश्चक्रेकल्पांतेजलदोयथा ३२ हत्वागजंघोरमुदग्ररूपंविषाणमादायततोनुकेशवः ननर्तरंगेबहुरूपमीश्वरः
कंसस्यदत्वाभयमुग्रवीर्यः ३३ योसौहत्वामहामल्लंचाणूरंनिहतद्विषम् यादवेभ्याददौप्रीतिंकंसस्यैवतुपश्यतः ३४ जघानकंसं
रिपुपक्षघातिनंपितृद्विषयादवनामधेयम् संस्थाप्यराज्येहरिरुग्रसेनंसांदीपिनंकाश्यमुपागतोयः ३५ विद्यामवाप्यसकलांदत्वापु
त्रमहामुनेः साग्रजोथजगामाशुमथुरांयादवींपुरीम् ३६ हत्वानिशुंभनरकमहामतिःकृत्वासुघोरंकदनंजनार्दनः ररक्षविप्रान्
मुनिवीरसंघान्देवांश्चसर्वान्जगतांजगत्पतिः ३७ सएषभगवान्विष्णुरद्यदृष्टोजनार्दनः कृतकृत्योस्मिसंजातोसायुज्यंप्राप्तवा
नहम् ३८ येनदृष्टोहरिःसाक्षात्तस्यमुक्तिःकरेस्थिता सोयमेषहरिःसाक्षात्प्रत्यक्षमिहवर्त्तते ३९ नूनंजन्मांतरेपूर्वंधर्मसंचि
तएवमे यस्यपाकःसमुत्पन्नोयेनासौदृश्यतेमया ४० सर्वथापुण्यवानस्मिनष्टसंसारबंधनः किमस्मैदीयतेवस्तुकिंनुवक्ष्यामिसां-
प्रतम् करिष्येकिमहंविष्णोर्वदस्वाद्ययथेप्सितम् ४१

इष्टमितिशेषः ३६ ३७ ३८ ३९ ४० ४१ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्रमेणप्राणानुन्मुच्यविलोक्यचदिशस्तथा शरीरंसुसमंकृत्वाप्राविशत्ससुखेनह २० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्य
पर्वणिकैलासयात्रायांपिशाचस्यविष्णुसाक्षात्कारोनामएकाशीतितमोऽध्यायः ८१ वैशंपायनउवाच पिशिताशोजग-
न्नाथंददर्शाथजगद्गुरुम् समाधौचयथादृष्टंभूमौचापितथाहरिम् १ अयंविष्णुरयंविष्णुरित्यूचेपिशिताशनः समाधौचयथादृ-
ष्टःसोयमत्रापिदृश्यते इत्युवाचपुनर्भूतेनित्यंन्निवहसन्निव २ अयंसचक्रीशरशार्ङ्गधन्वागदीरथीसध्वजतूणपाणिः सहस्रमू-
र्द्धासकृष्ठमरेशोजगत्प्रसूतिर्जगतांनिवासः ३ विष्णुर्जिष्णुर्जगन्नाथःपुराणःपुरुषोत्तमः विश्वात्माविश्वकर्त्तायःसोयमेषःसनातनः
४ अस्यैवदेवस्यहरेस्तनान्तरेविराजतेकौस्तुभरत्नदीपः यस्यप्रसादाज्जगदेतदादौविराजतेचंद्रमसेवरात्रिः ५ योसौपृथ्वींदधारा
भुद्दंष्ट्रयाजलसंचयात् सोयमेवहरिःसाक्षाद्वाराहवपुरास्थितः ६ बध्वातथादानवपुंगपौरुषदर्दौचशक्रायततोनुराज्यम् बलिंब-
लाद्देषहरिःसवामनःस्तुतस्त्वभूत्तस्यामुनिभिःपुरातनैः ७ दष्ट्राकरालान्सुमहान्हत्वायोदानवान्रणे निःशोकमखिलंलोकंचका
रासौजनार्द्दनः ८ आदौदधारैकभुजेनमंदरंनिर्जित्यसर्वानसुरान्महार्णवे ददौचशक्रायसुधामयमहान्सएषसाक्षादिहमाप्रव-
स्थितः ९ यःशेतेजलधौनागेदिव्यालक्ष्म्यासुखावहे हत्वातौदानवौघोरौमधुकैटभसंज्ञितौ १० यमाहुराद्यंविबुधाजगत्पतिंसर्वस्य
धातारमजंजनित्रम् अणोरणीयांसमतिप्रमाणंस्थूलात्स्थविष्ठंहरिमेवविष्णुम् ११ यत्रस्थितमिदंसर्वंप्राप्तेलोकस्यनाशने आ
दौयस्मात्समुत्पन्नंसोयंविष्णुरितिस्थितः १२ यस्येच्छयासर्वमिदंप्रवृत्तंप्रवर्त्ततेचापिजनार्द्दनस्य अयंसविष्णुःपुरुषोत्तमःशिवः
प्रवर्त्ततेमामिहयादवेश्वरः १३ भृगोर्वंशेसमुत्पन्नोजामदग्न्यइतिश्रुतः शिष्यत्वसमवाप्यैवमृगव्याधस्ययःस्थितः १४ जघा
नवीर्याद्बलिनंमहारणेकुठारशस्त्रेणगिरीशशिष्यः सहस्रबाहुंकृतवीर्यसंभवंहयेर्गजैश्चैवरथैश्चनिर्गतम् १५ कुरुक्षेत्रंसमासाद्ययश्च
कारपितृक्रियाम् निःक्षत्रियमिमंलोकंकृतवानेकविंशतिः १६ दशरथकुलेजातोरामोनामजनार्द्दनः सीतयाचश्रियायुक्तोलक्ष्मणा
नुचरःकृती १७ कृत्वाचसेतुंजलधौजनार्द्दनोहत्वाचरक्षःपतिमाशुगैःशरैः दत्वाचराज्यंसविभीषणायदशाश्वमेधैरयजच्चयोसौ
१८ वसुदेवकुलेजातोवासुदेवेतिशब्दितः गोकुलेक्रीडतेयासौसंकर्षणसहायवान् १९ उत्तानशायीशिशुरूपधारीपीत्वास्तनंपूतनि
काप्रदत्तं व्यसुंचकाराशुजनार्द्दनस्तदादनोःसुतांतांप्रवसत्सुरखहरिः २०

९ १० जनित्रंजनयितारं ११ १२ १३ १४ १५ पितृक्रियांपितृतर्पणंरुधिरेणेतिशेषः १६ १७ १८
१९ २०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कोनुनामजगन्नाथमाश्रितःसीदतेनृप सहिसर्वत्रकल्याणोयोहिनित्यंजनार्दनम् २२ ध्यायन्पठन्जपन्वापितस्यकिंनास्तिभूपते
ततःप्रोवाचभगवान्स्थितंकाममिवापरम् २३ अक्षयःसर्ववासस्तेयावदिंद्रोवसिष्यति तावत्स्वर्गेभवानस्तुशासनान्ममसान्यतः
२४ नष्टेशक्रेततःस्वर्गात्सायुज्यंममगच्छतु योयंभ्रातातवस्वर्गेयावदिंद्रोभवेत्तदा २५ वरंवरयभद्रंतेयस्तेमनसिवर्त्तते दातास्मिसर्वंसर्वत्रनात्रकार्याविचारणा २६ घंटाकर्णउवाच यश्चमेसंगमंदेवसंस्मरंनियतात्मवान् भक्तिस्तस्याचलादेव
त्वयिभूयाज्जनार्दन २७ मनःशुद्धिर्भवेत्तस्यमाभूत्कलुषताहरे कालुष्यंमनसस्तस्यमाभूद्देववरोमम २८ एवमस्त्विति देवेशः
सर्वंगच्छेतिकेशवः इंद्रातिथिर्भवानस्तुत्वांप्रतीक्ष्यहरिःस्थितः २९ इत्युक्त्वाभगवान्कृष्ण उत्थाप्यब्राह्मणंतदा तेनस्तुतोजगन्नाथः
पूजयित्वाचतद्विजम् ३० ततोविसृज्यगोविंदस्तस्माद्देशादुपागमत् यत्रतेमुनयःसिद्धाअग्निहोत्रसमन्विताः ३१ सचस्वर्गंततः
स्वर्गमाज्ञयाकेशवस्यह तस्मात्पठसदाराजन्मनःशुद्धिंयदीच्छसि मनश्चशुद्धिर्भवतिपठतस्तेजगत्पते ३२ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिघंटाकर्णमुक्तिप्रदानंनामत्र्यशीतितमोऽध्यायः ८३ वैशंपायनउवाच ततःसभग
वान्विष्णुर्मुनिभ्यस्तत्समादितः कथयामासयद्वृत्तंपिशाचस्यमहात्मनः १ तच्छ्रुत्वामुनयःसर्वेविस्मयपरमंगताः अहोस्यकर्मणः
पाकस्तवसंदर्शनादिति २ अर्चितोमुनिभिःसर्वैःप्रीतःप्रीतिमताप्रियः ततःप्रभातेविमलेसूर्येचाप्युदितेसति ३ आरुह्यगरुड
विष्णुर्ययौकैलासमुत्तमम् भवद्भिस्तत्रगंतव्यमित्युक्त्वामुनिसत्तमान् ४ यत्रविश्वेश्वरात्सिद्धास्तपस्यंतियतव्रताः यत्रवैश्रवणःसा
क्षादुपास्तेशंकरंशिवम् ५ यत्रतन्मानसंनामसरोहंसालयंमहत् यत्रभृंगीरिटिर्देवमुपास्तेशंकरंशिवम् ६ गाणपत्यमवाप्याथहर
पार्श्वचरःसदा यत्रसिंहावराहाश्चद्विपद्वीपिमृगैःसह ७ क्रीडंतिवन्यरतयःपरस्परहितेरताः यत्रनद्यःसमुत्पन्नागंगाद्याःसागरं
गमाः ८ यत्रविश्वेश्वरःशंभुरच्छिनद्ब्रह्मणःशिरः यत्रोत्पन्नामहावेत्राभूतानादंडतांययुः ९ उमयायत्रसहितःशंकरोनीललो
हितः ऋषिभिःप्रार्थितःपूर्वंददौयत्रगिरिःसुताम् १० शंकरायजगद्धात्रेशिवायजगतीपते यत्रलेभेहरिश्चक्रेमुपास्यबहुभिर्दि
नैः ११ पुष्करैःशतपत्रैश्चनेत्रेणचगजत्पतिम् गुहायत्रसमाश्रित्यक्रीडंतिसिद्धकिन्नराः १२ प्रियाभिःसहमोदंतेप्रियंतेमधुचोत्तमम्
यमुद्धृत्यभुजैःसर्वैःपौलस्त्योविरराम ह १३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४२ केशवेत्यंतंपठत् ४३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांद्व्यशीतितमोऽध्यायः ८२ १ २ ३ गृह्णाणे
नियोग्यंयदन्नःपुरुषोभवतितदन्नास्तस्यदेवताइतिश्रुतेरित्याशयः ४ ५ ६ ७ ८ ९ १० ११ १२ १३ अक

वैशंपायनउवाच इत्युक्त्वाविस्तरंनादंननर्दबहुशस्तदा जहासविकृतंभूयोननर्तेपिशिताशनः ४२ नमोनमोहरेकृष्णयाद-
वेश्वरकेशव प्रत्यक्षंचहरेस्तत्रननर्तविविधंनृप ४३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांघंटाक
र्णस्तुतिर्नामद्व्यशीतितमोऽध्यायः ८२ वैशंपायनउवाच विहस्यविकृतंभूयःप्रनृत्यचयथाबलम् ब्राह्मणस्यहतस्याथ
शवमादायसत्वरः १ द्विधाकृत्यमहाघोरंपिशितंकेशशाद्वलम् ततःखंडंसमादायआंद्रिरभ्युक्ष्ययत्नतः २ निधायपात्रेस्कंभुमेन
मस्कृत्यजनार्दनम् इदंप्रोवाचदेवेशंप्रांजलिःप्रणतःस्थितः ३ गृहाणमेजगन्नाथ भक्ष्ययोग्यंतवप्रभो भवादृशैर्जगन्नाथप्राह्यंस
र्वात्मनाहरे ४ भक्तिनम्रावयंविष्णोनात्रकार्याविचारणा दत्तंयद्भक्तिनम्रेणग्राह्यंतत्स्वामिनाहरे ५ नवस्तुसंस्कृतंभक्ष्यंब्राह्मणशवमु
त्तमम् अस्माकंपिशिताशानांशास्त्रेनियतमेवहि ६ तस्माद्गृहाणभगवन्यदिदोषोनविद्यते इत्युक्त्वाविकृतंभूयोविहस्यसतुकामतः ७
दातुमैच्छत्तदाखंडमस्पृश्यंतुशवस्यह ततःप्रीतोभवत्तस्मैमनसापूजयच्चतम् ८ अहोस्यस्तेहकारुण्यंमयिसर्वंचवर्तते इतिसंचिंत्य
मनसाप्रोवाचयदुपुंगवः ९ अलमेतेनसर्वत्रपिशाचपिशिताशन अस्पृश्यमादृशैरेतद्ब्राह्मण्यशवमुत्तमम् १० ब्राह्मणःसर्वथापूज्यो
जंतुभिर्धर्मकांक्षिभिः पिशाचाघोरकर्माणोयतंतेब्रह्महिंसने ११ नहंतव्याःसदाविप्रास्तद्धिंसानरकावहा तस्मादस्पृश्यमस्माभिर्नात्र
कार्याविचारणा १२ भक्त्याप्रीतोस्मिभद्रंतेमनोनिर्मलतातव मनःशुद्धिंयदायत्नंततःप्रीतोस्मिमांसप १३ अस्मात्संकीर्तनाच्छुभ्रत्
वंधहाकरणंतव अतीवमनसाप्रीतइत्युक्त्वाभगवान्हरिः १४ पस्पर्शांगंतदाविष्णुःपिशाचस्याथसर्वतः करेणमृदुनादेवःपापान्वि
मोचयन्हरिः १५ ततस्तस्याभवद्रूपंकामरूपसमप्रभम् दीर्घकुंचितकेशाढ्योदीर्घबाहुःसुलोचनः १६ समांगुलिःसमनखःसमव
क्त्रःसमुन्नसः पद्माक्षःपद्मवर्णाभःपद्मकेसरभूषणः १७ केयूरीचांगदीचैवकौशेयवसनस्तदा ज्ञानवान्सत्वसंपन्नःसाक्षाद्दिद्रइवापरः
१८ गंधर्वइवगायंस्तुसिद्धःसिद्धइवस्वयम् साक्षात्स्पृष्टंतदाविष्णोःकरेणमृदुपूर्वकम् १९ ननूनंतादृशंरूपमासीत्कालांतरेष्वपि अ
द्यापिनैवमुनयोलभंतेतादृशंवपुः २० कृत्वास्कबहुशोघोरंतपःपरमदारुणम् यच्चलब्धंतदातेनपिशाचेननृपोत्तम २१

रणंअंतःकरणम् १४ १५ १६ पद्माक्षःसनिमेषदृष्टिःपिशाचानांप्राकृनदृभावात् १७ १८ १९ २० २१ ८२ ८२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ इतिश्रीमहाभारतेखिलेषुहरिवं-

सार्द्धंकुबेरेणसगुह्यकेनसख्याप्रियेणप्रभुरीश्वरःशिवः स्वयंजटीभूतपिशाचसंवृतःशरीरखड्गीशशिखंडशेखरः १० करेणबिभ्र
त्सहदर्भकुंडिकांकरेणसाक्षादपरेणदीपिकाम् अन्येनबिभ्रन्महतींसडिंडिमांशूलंचबिभ्रन्त्वपरेणबाहुना ११ गुणान्सरुद्राक्षकृ
तान्समुद्वहन्जटाभिरापिंगलताम्रमूर्त्तिः विराजमानःप्रभुरिंदुशेखरोवृषेणयुक्तःससितेनशंकरः १२ उमास्तनद्वंद्वसमर्पिताननं-
स्तयासमाश्लिष्यनिपीडिताधरः गंगांबुविक्षालितचंद्रशेखरस्तांचापिवीक्षन्बहुशस्तदाशिवः १३ भस्मांगरागैरनुलेपिताननोम
होरगैर्बद्धजटःसनातनः शिरःकपालैःपरिशोभितस्तदादृष्टुहरिंकेशवमभ्ययाच्छिवः १४ यमाहुरग्र्यंपुरुषंमहांतंपुरातनंसांख्यनि
बद्धदृष्टयः यस्यापिदेवस्यगुणान्समग्रांस्तत्वांश्चतुर्विंशतिमाहुरेके १५ यमाहुरेकंपुरुषंपुरातनंकणादनामानमजंमहेश्वरम् दक्ष
स्ययज्ञंविनिहत्ययोवैविनाश्यदेवानसुरान्सनातनः १६ यंविदुर्भूतनत्वज्ञभूतेशंभूतभावनम् वामदेवंविरूपाक्षमाहुस्तत्वविदोजनाः
१७ महादेवंसहस्राक्षंकालमूर्त्तिंचतुर्भुजम् रुद्रंरोदननामानमाहुर्विश्वेश्वरंशिवम् १८ अप्रमेयमनाधारमाहुर्माहेश्वराजनाः नग्नं-
नग्नपरीतंतुनागिनंनागचीवरम् १९ आहुर्विश्वेश्वरंशांतंशिवमादिंसनातनम् तस्यमूर्तिरिमाःसर्वाधराद्याःसकलान्नृप २० भू-
मिरापोनलोवायुःखंसूर्यश्चतथाशशी अग्निश्चयजमानश्चप्रकृतिश्चैवसप्तधा २१ महादेवोमहायोगीगिरीशोनीललोहितः आ
दिकर्त्ताऽमहाभर्त्ताशूलपाणिरुमापतिः द्रष्टुंविश्वेश्वरंविष्णुंभूतसंघैःसमाययौ २२ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्य
पर्वणिकैलासयात्रायांशिवागमनकथननामपंचाशीतितमोऽध्यायः ८५ वैशंपायनउवाच तस्याग्रेसमपद्यंतभूतसं
घाःसहस्रशः घंटाकर्णोविरूपाक्षःकुंडधारःसमुद्वहः १ दीर्घग्रीवोदीर्घभुजोदीर्घबाहुर्निरंजनः उरुनेत्रःशतमुखःशतग्रीवःशतो-
दरः २ कुंडोदरोमहाग्रीवःस्थूलजिह्वोहूहूबाहुकः पार्श्ववक्त्रःसिंहमुखउन्नतांसोमहाहनुः ३ त्रिबाहुःपंचबाहुश्चव्याघ्रवक्त्रःसि
ताननः एतेचान्येचबहवोदीर्घास्यादीर्घलोचनाः ४ नृत्यंतःप्रहसन्तश्चस्फोटयंतःपरस्परम् तथान्येघोररूपाश्चतथान्येविकृतान
नाः ५ प्रेतभक्षाःप्रेतवाहामांसशोणितभोजनाः शवानिसबहून्याशुभक्षयंतस्ततस्ततः ६ पिबंतोरुधिरंघोरंखंडयंतःशवान्बहून्
करालाविततादीर्घाधमनिस्नायुसंतताः ७ नानाविधाःसुवीराश्चशूलाग्रप्रोतमानुषाः शिरामालावृताःकेचिदांत्रपाशावपालिताः ८

शेभविष्यपर्वणिकैलासयात्रायांटीकायांपंचाशीतितमोऽध्यायः ८५ १ २ ३ ४ ५ ६ ७ ८ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तमारुह्यमहाशैलंदेवकीनंदनोहरिः मानसस्योत्तरंतीरंजगामयदुनंदनः १४ तपश्चर्तुंकिलहरिर्विष्णुःसर्वेश्वरःशिवः जटीचीरी
जगन्नाथोमानुषवपुरास्थितः १५ तपसेधृतचित्तस्तुशुचौभूमावुपाविशत् अवरुह्यततोयानाद्गरुडाद्देवसंमितात् १६ द्वादशा-
ब्दतपश्चर्तुमनोदध्रेततोहरिः फाल्गुनेनतुमासेनसमारंभेजगत्पतिः १७ शाकभक्षःकृतजपोवेदाध्ययनतत्परः किमुद्दिश्यजग
न्नाथतपश्चरतिमानवः १८ तन्नविद्मोयथाकामंदुर्ज्ञेयैश्वरचिंतना तपस्यतितदाविष्णौपर्वतेभूतसेविते १९ गरुडःकाश्यपसुत
इंधनानिसमाचिनोत् होमार्थंवासुदेवस्यचरतस्तपउत्तमम् २० चक्रराजोथपुष्पाणिसंचिनोतितदाहरेः दिक्षुसर्वासुसर्वत्रपूर
कजलजस्तदा २१ खड्गआहृत्ययत्नेनकुशान्सुबहुशस्तदा गदाकौमोदकीचैवपरिचर्यांचकारह २२ धनुःप्रवरमत्युग्रंशार्ङ्ग
नामविभीषणम् स्थिताहिपुरतस्तस्ययथाभृत्यवत्स्वयम् २३ जुहोतिभगवान्विष्णुरेधोभिर्बहुभिःसदा आज्यादिभिस्तदाह
व्यैरग्निंसंपूज्यमाधवः २४ समाप्तौचैषःसमाप्तिचसमस्तव्यस्ततःकृतौ एकस्मिन्नेकदामासेभुंजानोनियतात्मवान् २५ द्वितीये
स्यपर्यायेभुंजन्नेकेनकेशवः एकस्मिन्वत्सरेभुंजंस्तथैवैकेनकेनचित् २६ समाप्यतत्तपःसर्वमेवमेवजगत्पतिः द्वादशाब्देतथापू
र्णेऊनमासेजगत्पतिः २७ जुह्वन्नग्निंसमास्थायपठन्मंत्रंजनार्दनः आरण्यकंपठन्विष्णुःसाक्षात्सर्वेश्वरोहरिः आस्तेध्यानपरस्त
त्रपवन्पणवमुत्तमम् २८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांकृष्णतपोवर्णनंनामचतुरशीतित
मोऽध्यायः ८४ वैशंपायनउवाच ततइंद्रःस्वयंतत्रआरुह्यगजमुत्तमम् द्रष्टुंसर्वेश्वरंविष्णुंतपस्यंतंसमाययौ १ त
तोयमस्तुभगवानारुह्यमहिषंवरम् किंकरैश्चस्वयंसाक्षादाययौनगमुत्तमम् २ प्रचेताहसमारुह्यवारुणैश्चसमन्वितः श्वेतच्छत्र
समायुक्तःश्वेतव्यजनवीजितः ३ ययौकैलासशिखरंद्रष्टुंकेशवमंजसा अन्येचापितथादेवाआदित्यावसवस्तथा ४ रुद्राश्चैवत-
थाराजन्द्रष्टुंकेशवमाययुः सिद्धाश्चमुनयश्चैवगंधर्वायक्षकिन्नराः ५ सर्वाश्चाप्सरसोराजन्नृत्यगीतविशारदाः ततोदेवगणाः
सर्वेकैलाससमपद्यत ६ पर्वतोनारदश्चैवतथान्येमुनिसत्तमाः विस्मयस्थितलोलाक्षाःसर्वदेवगणास्तथा ७ आश्चर्यंखलुप-
श्यध्वंनभूतंनभविष्यति योगिध्येयःस्वयंकृष्णस्तप्यतिगुरुःस्वयम् ८ ततःसमासेसकलेजगत्पतेर्व्रतेसमूलेसकलेश्वरःशिवः
द्रष्टुंहरिंलोकहितैषिणंप्रभुंययौभवान्यासहभूतसंघैः ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९ १० ११ १२ १३ १४ १५ १६ १७ १८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिषडशीतितमोऽध्यायः ८६

डिंडिभेरट्टहासैश्चनादयंतोवसुंधराम् कपालिनोभैरवाश्चजटिलामुंडिनस्तथा ९ एवंबहुविधाघोराःपिशाचाविकृताननाः तथान्येमु-
निवीराश्चध्यायंतःपरमेश्वरम् १० पठंतोवेदवाक्यानिसांगानिविविधानिच कुंडिकास्यकराःकेचित्केचित्कुशविचारिणः ११ कौ-
पीनवसनाःकेचित्केचित्कार्पाससंवृताः स्तुवंतःशंकरंभक्त्यास्तोत्रैर्माहेश्वरैस्तथा १२ एकत्रतेमुनिगणाअपरत्रगणास्तथा अन्यत्र
सिद्धगंधर्वाःप्रियाभिःसहसंगताः १३ नृत्यंतिनृत्यकुशलागायंतिस्मचकन्यकाः विद्याधरास्तथान्यत्रस्तुवंतःशंकरंशिवम् १४
ननृतुस्तस्यपुरतोगच्छतोप्सरसांगणाः एवमेतैर्महाघोरैःपिशाचैर्भूतकिन्नरैः १५ मुनिभिश्चैवप्रमथैःसमंशर्वःसमाययौ यत्रविश्वे
श्वरोविष्णुस्तपस्तेपेसुदारुणम् १६ यत्रतेलोकपालाश्चतिष्ठंतिस्मदिदृक्षया उमयालोकभाविन्यागंगयाचेदृशेश्वरः १७ ससर्वलो
कप्रभवोभवोविभुर्जटीचसाक्षात्क्षणवात्मकःकृती ददर्शहरिंविष्णुमुदारविक्रमोययौयत्रेष्टपिशिताशनैर्वृतः १८ इतिश्रीमहा-
भारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांमहादेवागमनंषडशीतितमोऽध्यायः ८६ वैशंपायनउवाच एवं-
बहुविधैर्भूतैःपिशाचैरुरगैःसह आगत्यभगवान्रुद्रःशंकरोवृषवाहनः १ ददर्शविष्णुंदेवेशंतपंतंपुरुषोत्तमम् जुह्वानमग्निंविधिव
द्ध्येयैर्मध्येर्जगत्पतिम् २ गरुडाहृतकाष्ठंतुजटिलंचीरवाससम् चक्रेणानीतकुसुमंखड्गानीतकुशंतथा ३ गदाहृतसमाचारंदेव
देवंजनार्दनम् इंद्राद्यैर्देवसंघैश्चवृत्तंमुनिगणैःसह ४ अचिंत्यंसर्वभूतानांध्यायंतंकिमपिप्रभुम् अवरुह्यवृषाच्छर्वोभगवान्भूतभावनः
५ ततःप्रीतःप्रसन्नात्मालल्लाटाक्षउमापतिः ततोभूतपिशाचाश्चराक्षसागुह्यकास्तथा ६ मुनयोविविधाश्चजयशब्दंप्रचक्रिरे जय
देवजगन्नाथजयरुद्रजनार्दन ७ जयविष्णोहृषीकेशनारायणपरायण जयरुद्रपुराणात्मन्जयदेवहरेश्वर ८ आदिदेवजगन्नाथ
जयशंकरभावन जयकौस्तुभदीप्तांगजयभस्मविराजित ९ जयचक्रगदापाणेजयशूलिन्त्रिलोचन जयमौक्तिकदीप्तांगजयनागवि
भूषण १० इतितेमुनयःसर्वेप्रणामंचक्रिरेहरिम् ततउत्थायभगवान्दृष्ट्वादेवमवस्थितम् ११ वृषध्वजंविरूपाक्षंशंकरंनीललोहि
तम् ततोहृष्टमनाविष्णुस्तुष्टावहरमीश्वरम् १२ श्रीभगवानुवाच नमस्तेशितिकंठायनीलग्रीवायवेधसे नमस्तेशो
चिषेअस्तुनमस्तेउपवासिने १३ नमस्तेमीढुषेअस्तुनमस्तेगदिनेहर नमस्तेविश्वतनवेवृषायवृषरूपिणे १४

१ २ ३ ४ ५
६ ७ ८ ९ १० ११ १२ शितिकंठायशितिर्विषमेवकवर्णत्वात्कंठेयस्यतस्मैअततएवनीलकंठायशोचिषेदीप्तिमते १३ १४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कूंभायकूपवासिने १५ तुंडायसुखायसर्वभक्षकायेत्यर्थः तुष्यायतुष्टिमते तुदितुदायहिंस्राय १६ हिम्रायहिनोतिश्री पूतिर्चिनेति हिम्रेरेचकः पूरकश्च
नदुभयरूपाय १७ अघंटायघंटायघंटावतेघटिघटायघटयतांस्रष्टृणामपिस्रष्ट्रे १८ पुरायक्षेत्ररूपायअष्टौपृथिव्यादीनिस्वरूपाणियस्यतस्मैअष्टस्व
रूपिणे १९ २० २१ २२ २३ २४ हरिकेशाय हरयोरश्मयः इंद्रियाणिवाकेशाइवस्वरूपानर्गताबहिर्भूतान्श्चयस्येतिहरिकेशःपंपर

अमूर्तायचदेवायनमस्तेस्तुपिनाकिने नमःकुब्जायकूप्यायशिवायशिवरूपिणे १५ नमस्तुंडायतुष्यायनमस्तुटितुटायच नमःशिवा
यशांतायगिरिशायचतेनमः १६ नमोहरायहिम्रायनमोहरिहरायच नमोघोरायघोरायघोरघोरप्रियायच १७ नमोघंटायघंटा
यनमोघटिघटायच नमःशिवायशांतायगिरिशायचतेनमः १८ नमोविरूपरूपायपुरायपुरहारिणे नमआद्यायबीजायशुचयेष्ट
स्वरूपिणे १९ नमःपिनाकहस्तायनमःशूलासिधारिणे नमःखट्वांगहस्तायनमस्तेकृत्तिवाससे २० नमस्तेदेवदेवायनमआका
शमूर्तये हरायहरिरूपायनमस्तेतिग्मतेजसे २१ भक्तप्रियायभक्तायभक्तानांवरदायिने नमोस्तुमूर्तयेदेवजगन्मूर्तिधरायच २२
नमश्चंद्रायदेवायसूर्यायचनमोनमः नमःप्रधानदेवायभूतानांपतयेनमः २३ करालायचमुंडायविकृतायकपर्दिने अजायचनम-
स्तुभ्यंभूतभावनभावन २४ नमोस्तुहरिकेशायपिंगलायनमोनमः नमस्तेभीरुहस्तायभीरुभीरुहरायच २५ हरायभीतिरूपा
यघोराणांभीतिदायिने नमोदक्षमखघ्नायभगनेत्रापहारिणे २६ उमापतेनमस्तुभ्यंकैलासनिलयायच आदिदेवायदेवायभवाय
भवरूपिणे २७ नमःकपालहस्तायनमोजमथनायच त्र्यंबकायनमस्तुभ्यंत्र्यक्षायचशिवायच २८ वरदायवरेण्यायनमस्तेचंद्र
शेखर नमइध्मायहविषेध्रुवायचकुशायच २९ नमस्तेशक्तियुक्तायनागपाशप्रियायच विरूपायसुरूपायमद्यपानप्रियायच ३०
श्मशानरतयेनित्यंजयशब्दप्रियायच खरप्रियायखर्वायखरायखररूपिणे ३१ भद्रप्रियायभद्रायभद्ररूपधरायच विरूपाय
सुरूपायमहाघोरायतेनमः ३२ घंटायघंटभूषायघंटभूषणभूषिणे तीव्रायतीव्ररूपायतीव्ररूपप्रियायच ३३ नग्नायनग्नरूपा
यनग्नरूपप्रियायच भूतावासनमस्तुभ्यंसर्वावासनमोनमः ३४ नमःसर्वात्मनेतुभ्यंनमस्तेभूतिदायक नमस्तेवामदेवायमहा
देवायतेनमः ३५ ननुवाक्स्तुतिरूपातेकानुस्तोतुंप्रशक्नुयात् कस्यवास्फुरतेजिव्हास्तुतौस्तुतिमतांवर ३६

मेभ्यरस्यसितकृष्णकेशौरामकृष्णावित्युक्तेः
कृष्णावतारःकेशोयस्यावतारिणोमहेश्वरस्येतिवाहरिकेशस्तस्मै अभीरुहस्तायअर्जुनसारथयेभीरुभीरुश्चासौहरश्चतस्मैभीरुभीरुहराय अतिभीतायातिसंहर्त्रे
चेत्यर्थः २५ २६ २७ अजमथनायब्रह्मशिरोहर्त्रे २८ २९ भद्रेतिपाठेपिमद्यमेवभद्रं ३० खरायकर्कशाय ३१ ३२ ३३ ३४ ३५ ३६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९

चक्षुर्घ्राणंतथास्पर्शोरसनंश्रोत्रमेवच मनःषष्ठंतथादेवप्रेरकंतत्रतत्रह २४ कर्मेंद्रियाणिचान्यानिवागादीनिजनार्द्दन त्वमेवतानिस
र्वाणिकरोषिनियतात्मवान् २५ स्वेषुस्वेषुजगन्नाथविषयेषुतथाहरे निवेशयसिदेवेशयोग्यामिंद्रियपद्धतिम् २६ यदात्वंरजसायु
क्तस्तदाभूतानिसृष्टवान् यदाचसत्वयुक्तोसितदापाताजगत्त्रयम् २७ यदात्वंतमसाक्रुष्टस्तदासंहरसेजगत् त्रिभिरेवगुणैर्युक्तःसृ-
ष्टिरक्षाविनाशने २८ वर्त्तसेत्रिविधांमूर्तिमादायनियतात्मवान् इंद्रियाणींद्रियार्थेषुनियोजयसिमाधव २९ प्राणिनामुपभोगार्थम-
तःस्थित्वाजगद्गुरो तस्मात्सर्वत्रभूतेषुवर्त्तसेसर्वभोगवान् ३० ब्रह्मात्वंसृष्टिकालेतुस्थितौविष्णुरसिप्रभो संहारेरुद्रनामासित्रिधामा
त्वमसिप्रभो ३१ भूमिरापोनलोवायुःखंमनोबुद्धिरेवच एताःप्रकृतयोदेवभिन्नाःसर्वत्रतेहरे ३२ सहस्रशीर्षापुरुषःसहस्राक्षःस
हस्रपात् सहस्रधारःसाहस्रीसहस्रात्मादिवस्पतिः ३३ भूमिंसर्वामिमांप्राप्यसप्तद्वीपांससागराम् अणुःसर्वत्रगोभूत्वाअत्यतिष्ठ
द्दशांगुलम् ३४ त्वमेवेदंजगत्सर्वंयद्भूतंयद्भविष्यति त्वत्तोविराट्प्रादुरभूत्तस्मात्चैवजनार्द्दन ३५ तववक्त्राज्जगन्नाथब्राह्मणोलो
करक्षकः प्रादुरासीत्सुराणात्मन्षट्कर्मनिरतःसदा ३६ राजन्यस्तुतथाबाह्वोरासीत्संरक्षणेरतः ऊर्वोर्वैश्यस्तथाविष्णोःपादाच्छूद्रउ
दाहृतः ३७ एवंवर्णाजगन्नाथतवदेहाज्जनार्द्दन मनसस्तवदेवेशचंद्रमाःसमपद्यत ३८ सुखकृत्सर्वभूतानांशीतांशुरमितप्रभः
अक्ष्णोःसूर्यःसमुत्पन्नःसर्वप्राणिविलोचनः ३९ यस्यभासाजगत्सर्वंभासतेभानुमानसौ मुखादिंद्रश्चअग्निश्चप्राणाद्वायुरजायत
४० नाभेरभूदंतरिक्षंतवदेवजनार्द्दन द्यौरासीत्तुमहाघोराशिरसस्तवगोपते ४१ पद्भ्यांभूमिःसमुत्पन्नादिशःश्रोत्राज्जगत्पते एवंदृष्ट्वा
जगत्सर्वंव्याप्यसर्वंव्यवस्थितः ४२ व्याप्यसर्वानिमान्लोकान्स्थितःसर्वत्रकेशव ततश्चविष्णुनामासिधातोर्व्याप्तेश्चदर्शनात् ४३
नाराआपःसमाख्यातास्तासामयनमादितः यतस्त्वंभूतभव्येशतन्नारायणशब्दितः ४४ हरसिप्राणिनोदेवततोहरिरितिस्मृतः शंकरो
षिसदादेवततःशंकरतांगतः ४५ बृहत्वाद्बृंहणत्वाच्चतस्माद्ब्रह्मेतिशब्दितः मधुरिंद्रियनामेतिततोमधुनिषूदनः ४६ हृषीकाणींद्रिया
ण्याहुस्तेषामीशोयतोभवान् हृषीकेशस्ततोविष्णोख्यातोदेवेषुकेशव ४७ कइतिब्रह्मणोनामईशोहंसर्वदेहिनाम आवांतवांगसं
भूतौतस्मात्केशवनामवान् ४८ माविद्याचहरेप्रोक्तातस्याईशोयतोभवान् तस्मान्माधवनामासिधवःस्वामीतिशब्दितः ४९

४० ४१ ४२ धातोःविष्णुव्याप्तावित्यस्यव्याप्त्यर्थत्वदर्शनात् ४३ ४४ ४५ ४६ ४७ ४८ ४९ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्षमस्वभगवन्देवभक्तोहंत्राहिमांहर सर्वात्मन्सर्वभूतेशत्राहिमांसततंहर ३७ रक्षदेवजगन्नाथलोकान्सर्वात्मनाहर त्राहिभक्तान्स
दादेवभक्तप्रियसदाहर ३८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांविष्णुकृतईश्वरस्तुतिर्नामसप्ताशीति
तमोऽध्यायः ८७ वैशंपायनउवाच ततोवृषध्वजोदेवःशूलीसाक्षादुमापतिः करंकरेणसंस्पृश्यविष्णोश्चक्रधरस्यह १
प्रोवाचभगवान्रुद्रःकेशवंगरुडध्वजम् शृण्वतांसर्वदेवानांमुनीनांभावितात्मनाम् २ किमिदंदेवदेवेशचक्रपाणेजनार्दन तपश्चर्यां
किमर्थंतेप्रार्थनातवकाविभो ३ स्वयंविष्णुर्भवान्नित्यस्तपस्त्वंतपसांहरे पुत्रार्थंयदितेदेवतपश्चर्याजनार्दन ४ पुत्रोदत्तोमयादेव
पूर्वमेवजगत्पते शृणुतत्रापिभगवन्भगवान्कारणात्मकः ५ तपश्चर्तुंप्रवृत्तोहंकुतश्चित्कारणाद्धरे वर्षायुतंमहाघोरंपुराकृतयुगे
तदा ६ भवानीतत्रमेदेवपरिचर्तुंतदाभवत् पित्रानियुक्तादेवेशउमैषावरवर्णिनी ७ प्रीतइंद्रस्तदादेवमारंसंप्रेषयत्तदा मधुना
सहसंयुक्तोमारोमामागतस्तदा ८ लक्ष्यंमामकरोत्तत्रबाणस्यप्रेषितस्यह एषामांसेवतेतत्रदानात्पुष्पादिनाहरे ९ ततःक्रुद्धोह
मभवंदृक्षामारंतथाविधम् क्रुध्यतोममदेवेशनेत्रादग्निःपपातह १० सोयमग्निस्तदामारंभस्मसात्कृतवान्हरे अचिंतयंतदावि
घ्नोशक्रस्यैतच्चिकीर्षितम् ११ ततःप्रभृतिदेवेशदयातंप्रतिवर्त्तते ब्रह्मणाचनियुक्तोस्मिप्रीतस्तत्रजनार्दन १२ नियुक्तःपुत्ररूपेण
सतेदेवजगत्पते ज्येष्ठस्तवसुतोदेवप्रद्युम्नइत्यभिविश्रुतः १३ स्मरंतंविद्धिदेवेशनात्रकार्याविचारणा इत्युक्त्वापुनरीशहरेयाथात्म्यंदर्श
यन्निव १४ मुनीनांश्रोतुकामानांयाथात्म्यंतत्रसत्तमः अंजलिंसंपुटंकृत्वाविष्णुमुद्दिश्यशंकरः १५ उमयासार्द्धमीशानोयाथात्म्य
वक्तुमैहत हरेःकुर्वंतितत्रैवमंजलिंकुरुसत्तम १६ मुनयोदेवगंधर्वाःसिद्धाश्चसहकिन्नराः अंजलिंचक्रिरेविष्णोर्देवदेवेश्वरेहरौ १७
महेश्वरउवाच यत्तत्कारणमाहुस्तत्सांख्याःप्रकृतिसंज्ञकम् ततोमहान्समुत्पन्नःप्रकृतिर्यस्यकारणम् १८ त्रिधाभूतंजगद्यो
निःप्रधानंकारणात्मकम् सत्वंरजस्तमोविष्णोजगद्धेतुंजनार्दन १९ तस्यकारणमाहुस्त्वांसांख्यप्रकृतिसंज्ञकम् तद्रूपेणभवान्विष्णोप
रिणम्याधितिष्ठति २० तस्मात्तुमहतोघोरादहंकारोमहानभूत् सत्वमादौजगन्नाथपरिणामस्तथाहिसः २१ अहंकारात्प्रभोदेवका
रणानिमहांतिच तन्मात्राणितथापंचभूतानिप्रभवंत्युत २२ तानिलोमाहुरीशानभूतानीहजगत्पते पृथिवीवायुराकाशमापोज्योतिश्चपं
चमम् २३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७ ८ ९ १० ११ संसारस्यविभवः नानारूपेणभवनं यस्याः सकाशात् सामूलाविद्यातांत्रिशरीरिणंब्रह्मादित्रयदेहम् १२ १३ ध्यात्वेति स्वस्यसगुणब्रह्मभावंजानीतेतिकेशवस्यनिर्गुणब्रह्मभावनंचसूचयतिउपास्यः चिंतनीयः उपास्येउपगत्यप्राप्ये १४ १५ १६ निरसन् निरस्तवंतः १७

एतदेवप्रशंसंतिसांख्ययोगसमाश्रिताः एषब्रह्मविदांमार्गःकथितोवेदवादिभिः ७ एषमेवविजानीतनात्रकार्याविचारणा हरिरेकःस दाध्येयोभवद्भिःसत्त्वमास्थितैः ८ नान्योजगतिदेवोस्तिविष्णोर्नारायणात्परः ओमित्येवंसदाविप्राःपठतध्यातकेशवम् ९ ततोनिःश्रे यसप्राप्तिर्भविष्यतिनसंशयः एवंध्यातोहरिःसाक्षात्प्रसन्नोवोभविष्यति १० भवनाशमयंदेवःकरिष्यतिहृदंहरिः सदाध्यातहरिंवि प्रायदीच्छाप्राप्तुमच्युतम् ११ एषसंसारविभवविनाशयतिवोगुरुः स्मरध्वंसततंविष्णुपठध्वंत्रिशरीरिणम् १२ मनःसंयमनंविप्राः कुरुध्वंयत्नतःसदा शुद्धेतःकरणेविष्णुःप्रसीदतितपोधनाः १३ ध्यात्वामांसर्वयत्नेनततोजानीतकेशवम् उपास्योहंसदाविप्राउपा- स्येस्मिन्हरौस्मृतः १४ उपायोयंमयाप्रोक्तोनात्रसंदेहइत्यपि अयंमायोसदाविप्रायतध्वमघनाशने १५ यथावोबुद्धिरखिलाश्रद्धाप्र वर्तियत्नतः तथाकुरुतविप्रेंद्रायथादेवःप्रसीदति १६ वैशंपायनउवाच एवमुक्ताःस्ततःसर्वेमुनयःपुण्यशीलिनः यथावदुपगृह्णानानिरसन्संशयंनृप १७ एवमेवतितविप्राःप्राहुःप्रांजलयोहरम् छिन्नोनःसंशयःसर्वोगृहीतोर्थःसतादृशः १८ एतदर्थंसमायातावयमद्यतवाल्ययम् संगमाद्युवयोःसर्वेनिष्टोमोहोमहानिह १९ यथावदसिदेवेशतथानःश्रेयसेपरम् यथाहभग वान्रुद्रोयतामःसततंहरौ इतितेमुनयःप्रीताःप्रणेमुःकेशवंहरिम् २० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकै- लासयात्रायांएकोननवतितमोऽध्यायः ८९ वैशंपायनउवाच ततःसभगवान्रुद्रःसर्वान्विस्मापयन्निव स्तुत्याप्र चक्रमेस्तोतुंविष्णुंविश्वेश्वरंहरिम् अर्थ्याभिस्तुतदावाग्भिर्मुनीनांशृण्वतांतदा १ महेश्वरउवाच नमोभगवतेतुभ्यंधा त्रेदेवायधीमते यस्यभासाजगत्सर्वंभासतेनित्यमुच्यते २ नमोभगवतेदेवनित्यंसूर्यात्मनेनमः यःशीतयतिशीतांशुर्लोकान्सर्वान्प्रभ न्विभुः ३ नमस्तेविष्णवेदेवनित्यंसोमात्मनेनमः यःप्रजाःप्रीणयत्येकोविश्वात्माभूतभावनः ४ नमःसर्वात्मनेदेवनमोवागात्मनेहरे यो दधारकरेणासौकुशचीरादियत्सदा ५ दधारवेदान्सर्वांश्चितुभ्यंब्रह्मात्मनेनमः सर्वान्संहरतेयस्तुसंहारेयस्तुहृत्कुसदा ६ क्रोधात्मा सिविरूपोसितुभ्यंरुद्रात्मनेनमः सृष्टेस्त्रष्टासमस्तानांप्राणिनांप्राणदायिने ७ अजायविष्णवेतुभ्यंस्त्रष्ट्रेविश्वसृजेनमः आदौप्रह्व तिमूलायभूतानांप्रभवायच ८

१८ १९ २० इतिश्रीमहाभारतेहरिवंशेभवि॰टीकायांएकोननवतितमोऽध्यायः ८९ ततःसइति १ २ ३ ४ ५ ६ ७ ८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६
६७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांकैलासयात्रायांशिवकृताविष्णुस्तुतिर्नामअष्टाशीतितमोऽध्यायः ८८ इत्युक्त्वेति १ एतदि-

गौरेषातुयतोवाणीतांचवेदयतोभवान् गोविंदस्तुततोदेवमुनिभिःकथ्यतेभवान् ५० त्रिरित्येवत्रयोवेदाकीर्तितामुनिसत्तमैः क्रमतेतां-
स्तथासर्वान्त्रिविक्रमइतिश्रुतः ५१ अणुर्वामननागासियतस्त्वंवामनाख्यया मननान्मुनिरेवासियमनाद्यतिरुच्यते ५२ तपश्चरतिय
स्मात्वंतपस्वीतिचशब्दितः वसंतिलयिभूतानिभूतावासस्ततोहरे ५३ ईशस्त्वंसर्वभूतानामीश्वरोसिततोहरे प्रणवःसर्ववेदानांगायत्री
छंदसांप्रभो ५४ अक्षराणामकारस्त्वंस्फोटस्त्वंवर्णसंश्रयः रुद्राणामहमेवासिवसूनांपावकोभवान् ५५ अश्वत्थोवृक्षजातीनांब्रह्मा-
लोकगुरुर्भवान् मेरुस्त्वंपर्वतेंद्राणांदेवर्षीणांचनारदः ५६ दानवानांभवान्दैत्यःप्रल्हादोभक्तवत्सलः सर्पाणामेवसर्वेषांभवान्वासुकि
संज्ञितः ५७ गुह्यकानांचसर्वेषांभवान्धनदएवच वरुणोयादसांराजागंगात्रिपथगाभवान् ५८ आदिस्त्वंसर्वभूतानांमध्यमंतस्त
थाभवान् त्वत्तःसमभवद्विश्वंत्वयिसर्वंप्रलीयते ५९ अहंत्वंसर्वगोदेवत्वमेवाहंजनार्द्दन आवयोरंतरंनास्तिशब्दैरर्थैर्जगत्पते ६० ना
मानितवगोविंदयानिलोकेमहांतिच तान्येवममनामानिनात्रकार्याविचारणा ६१ त्वदुपासाजगन्नाथसैवास्तुममगोपते यश्चत्वांद्वेष्टि
देवेशसमांद्वेष्टिनसंशयः ६२ त्वद्विस्तारोयतोदेवअहंभूतपतिस्ततः नतदस्तिविनादेवयत्तेविरहितंहरे ६३ यदासीद्वर्ततेयच्चयच्चभा
विजगत्पते सर्वंत्वमेवदेवेशविनाकिंचित्त्वयानहि ६४ स्तुवंतिदेवाःसततंभवंतंस्वैर्गुणैःप्रभो ऋक्त्वंयजुरेवासिसामासिसततंप्रभो
६५ किमुच्यतेमयादेवसर्वंत्वंभूतभावन नमःसर्वात्मनादेवविष्णोमाधवकेशव ६६ नमस्करोमिसर्वात्मन्नमस्तेस्तुसदाहरे नमः
पुष्करनाभायवंदेत्वामहमीश्वर ६७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांशिवकृताविष्णुस्तुतिर्नामअ
ष्टाशीतितमोऽध्यायः ८८ वैशंपायनउवाच इत्युक्त्वादेवदेवेशंमुनीनाहपुनःशिवः एवंजानीतहेविप्रायेभक्ताद्रष्टुमागताः
१ एतदेवपरंवस्तुनैतस्मात्परमस्तिवः एतदेवविजानीध्वमेतद्वःपरमंतपः २ एतदेवसदाविप्राध्येयंसततमानसैः एतद्वःपरमंश्रेयए-
तद्वःपरमंधनम् ३ एतद्धिजन्मनःकृत्यमेतद्वस्तपसःफलम् एषवःपुण्यनिलयएषधर्म्मःसनातनः ४ एषवोमोक्षदाताचएषमार्गउ
दाहृतः एषपुण्यप्रदःसाक्षादेतद्वःकर्मणांफलम् ५ एतदेवप्रशंसंतिविद्वांसोब्रह्मवादिनः एषत्रयीगतिर्विप्राःप्रार्थ्योब्रह्मविदांसदा ६ १११

स्वंगुल्याकृष्णंदर्शयिति तपःतपःफलं २ सततमानसैःअविछिन्नचित्तवृत्तिभिः ३ फलंएकाग्र्यं ४ ५ त्रयीगतिःकर्मकांडप्राप्यः ६ ७ ८

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३६ ३७ ३८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांनवतितमोऽध्यायः ९० बाणयुद्धेयदुक्तंहरिहराद्वैतंतदेवकैलासयात्रायां-
हरेःशिवाराधनकर्तृत्वेनशिवस्यविष्णुस्तावकत्वेनचदृढीकृतंतेनशास्तृशास्ययोर्जीवेशयोरविकृतब्रह्मभावःकृत्स्नस्यशास्त्रस्यार्थउक्तः अथावतारकृत्यशेषंव्याचष्टेए
तस्मिन्नेवकालइत्यादिना १ २ ३ ४ ५ ६ चक्रस्यनाशकमितिशेषः ७ ८ अनेकंबहुविग्रहं अहतंअप्रतिहतंतादृशंमम

आरुह्यभगवान्विष्णुर्गरुडंपक्षिपुंगवम् शंखीचक्रीगदीखड्गीशार्ङ्गीतूणीतलत्रवान् ३६ यथागतंजगन्नाथोययौबदरिकामनु सायान्हेपुंडरीकाक्षोनित्यंमुनिनिषेविताम् ३७ तत्रगत्वायथायोगंविनम्यहरिरीश्वरः अर्चितोमुनिभिःसर्वैर्निषसादसुखासने ३८
इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांनवतितमोऽध्यायः ९० वैशंपायनउवाच एतस्मिन्नेव-
कालेतुपौंड्रोनृपवरोत्तमः बलवान्सत्त्वसंपन्नोयोद्धाविपुलविक्रमः १ दृष्णिशत्रुस्तदाराजाकृष्णद्वेषीबलात्तदा नृपान्सर्वान्समाहूय
प्रोवाचनृपसंसदि २ जिताचपृथिवीसर्वाजिताश्चनृपसत्तमाः वृष्णयस्तेबलोन्मत्ताःकृष्णमाश्रित्यगर्विताः ३ दास्यंतिमेकरंसर्वेनहि
तेकृष्णसंश्रयात् सतुकृष्णाश्चक्रबलान्मामवज्ञायतिष्ठति ४ अहंचक्रीतिगर्वोभूत्तस्यगोपस्यसर्वदा शंखीचक्रीगदीशार्ङ्गीशरीतूणी
सहायवान् ५ एवमादिर्महागर्वस्तस्यसंप्रतिवर्त्तते लोकेचममयन्नामवासुदेवेतिविश्रुतम् ६ अगृण्हन्ममतन्नामगोपोमदबलान्वि
तः तस्यचक्रस्ययच्चक्रंममापिनिशितंमहत् ७ गर्वहंतुंसदातस्यनाम्नाचापिसुदर्शनम् सहस्रारंमहाघोरंतस्यचक्रस्यनाशनम् ८
अनेकमहतंचक्रंगोपजस्यनृपोत्तमाः ममाप्येतद्धनुर्दिव्यंशार्ङ्गनाममहारवम् ९ गदाकौमोदकीनाममममेयंबृहतीदृढा कालायस
सहस्रस्यभारेणसुकृतामया १० खड्गोनंदकनामासौममायंविपुलोदृढः अंतकस्यांतकोघोरस्तस्यखड्गस्यनाशकः ११ तत्रायंचग-
दीखड्गीशंखीचक्रीतनुत्रवान् युधिजेताचकृष्णस्यनात्रकार्याविचारणा १२ मांसंब्रूतनृपाश्चैवगदिनंचाक्रिणंतथा शंखिनंशार्ङ्गिणं-
वीरंब्रूतनित्यंनृपोत्तमाः १३ वासुदेवेतिमांब्रूतननुगोपंयदूत्तमम् एकोहंवासुदेवोहिहत्वातंगोपदारकम् १४ सख्युर्ममबलाद्धता-
नरकस्यमहात्मनः मांतथायदिनब्रूतदंड्याभारशतैःशतम् १५ सुवर्णस्यचनिष्कस्यगृहीष्येबहुशस्तदा तथाब्रुवतिराजेंद्रेमनसाद्रु-
सहंयया १६ केचिल्लज्जासमायुक्ताआसंतेबलवत्तराः रसज्ञाबलवीर्यस्यराजानस्तेसदानृप १७ अपरेतुनृपाराजन्नेवमेवेतिचुक्रु-
शुः अन्येबलमदोत्सिक्ताजेष्यामःकेशवंरणे १८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभवि॰पौंड्रकोक्तौएकनवतितमोऽध्यायः ९१

पीतिभावः ९ १० ११ १२ १३ १४ भारस्याद्विशतिस्तुलाःतेषांभाराणांशतंअयुतमित्यर्थः १५ १६ १७ १८ इतिश्रीमहाभारतेहु॰भ॰टी॰एकनवतितमोऽध्या
यः ९१ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९ १० घृणः घृणयोरश्मयस्तद्वान् सूर्यः घृणिरितिपाठः स्वच्छः ११ १२ १३ १४ १५ १६ ब्रह्मब्रह्मात्मनेवेदयज्ञस्वरूपाय १७ १८ १९

नमस्तेदेवदेवेश प्रधानायनमोनमः पृथिव्यांगंधरूपेणसंस्थितः प्राणिनांहरे ९ दृढायदृढरूपायतुभ्यंगंधात्मनेनमः अपांरसायसर्वत्र
प्राणिनांसुखहेतवे १० नमस्तेविश्वरूपायरसायचनमोनमः तेजसाभास्वरोयस्तुघृणोजतुहितःसदा ११ तस्मैदेवजगन्नाथनः
मोभास्कररूपिणे वायोःस्पर्शगुणोयत्रशीतोष्णसुखदुःखदः १२ नमस्तेवायुरूपायनमस्पर्शात्मनेहरे आकाशेवस्थितःशब्दःसर्वश्रो
त्रनिवेशनः १३ नमस्तेभगवान्विष्णोतुभ्यंसर्वात्मनेनमः योदधारजगत्सर्वंमायामानुषदेहवान् १४ नमस्तुभ्यंजगन्नाथमायिनेमा
यदायिने नमआद्यायबीजायनिर्गुणायगुणात्मने १५ अचिंत्यायसुचिंत्यायतस्मैचिंत्यात्मनेनमः हरायहरिरूपायब्रह्मणेब्रह्मदायि-
ने १६ नमोब्रह्मविदेतुभ्यंब्रह्मब्रह्मात्मनेनमः नमःसहस्रकिरणेसहस्रकिरणायच १७ नमःसहस्रवक्त्रायसहस्रनयनायच विश्वा
यविश्वरूपायविश्वकर्त्रेनमोनमः १८ विश्ववक्त्रेनमोनित्यंमूलावासनमोनमः इंद्रियायेंद्ररूपायविषयायसदाहरे १९ नमोऽब्धिशिरसे
तुभ्यंवेदाभरणरूपिणे अग्नयेग्निपतेतुभ्यंज्योतिषांपतयेनमः २० सूर्यायसूर्यपुत्रायतेजसांपतयेनमः नमःसोमायसौम्यायनमः
शीतात्मनेहरे २१ नमोयज्ञायइज्यायहविषेहव्यसंस्कृते नमःस्रुवायपात्राययज्ञांगायपरायच २२ नमःप्रणवदेहायक्षराया‌क्ष
रायच वेदायवेदरूपायशास्त्रिणेशस्त्ररूपिणे २३ गदिनेखड्गिनेतुभ्यंशंखिनेचक्रिणेनमः शूलिनेचर्मिणेनित्यंवरदायनमोनमः
२४ बुधप्रियायबुद्धायप्रबुद्धायसुखायच हरयेविष्णवेतुभ्यंनमःसर्वात्मनेगुरो २५ नमस्तेसर्वलोकेशसर्वकर्त्रेनमोनमः नमःस्व
भावशुद्धायनमस्तेयज्ञसूकर २६ नमोविष्णोनमोविष्णोनमोविष्णोनमोहरे नमस्तेवासुदेवायवासुदेवायधीमते २७ नमःकृष्णा
यकृष्णायसर्वावासनमोनमः नमोभूयोनमस्तेस्तुपाहिलोकान्जनार्दन २८ इतिस्तुत्वाजगन्नाथमुवाचमुनिसत्तमान् इमंस्तोत्रम
धीयानानित्यंव्रजतकेशवम् २९ शरण्यंसर्वभूतानांतत्रश्रेयोविधास्यति येचेमंधारयिष्यंतिस्तवंपापविमोचनम् ३० तेषांप्रीतः
प्रसन्नात्मापठतांशृण्वतांहरिः श्रेयोदास्यतिधर्मात्मानात्रकार्याविचारणा ३१ अवश्यंमनसाध्यातकेशवंभक्तवत्सलम् श्रेयःप्रा-
प्तुंयदिच्छंतिभवंतःशंसितव्रताः ३२ इत्युक्त्वाभगवान्रुद्रस्तत्रैवांतरधीयत सगणःशंकरःसाक्षादुमयाभूतभावनः ३३ तेमुस्तमु
नयःसर्वेपरांनिर्वृत्तिमाययुः तमेवपरमंगत्वामेनिरेस्वकृतार्थताम् ३४ लोकपालास्तदाविष्णुंनमस्कृत्यहरिंतदा जग्मुःस्वान्पथवे-
श्मानिगणैःसर्वैर्नृपोत्तम ३५ ११२

२० २१ २२ २३ २४ २५ २६ २७ कृष्णायनामतःकृष्णायवर्णतः २८ २९ ३० ३१ ३२ ३३ ३४ ३५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांपौंड्रनारदसंवादेद्विनवतितमोध्यायः ९२ १ २ ३ ४ ५ ६ ७ ८
९ १० ११ १२ १३ १४ महावाद्योपमंमहामेघगर्जिततुल्यध्वनिंमहत्महांतंरथम् १५ १६ १७ १८ १९ २०

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिपौंड्रकनारदसंवादेद्विनवतितमोऽध्यायः ९२ वैशंपायनउवाच ततःक्रुद्धो
महाराजपौंड्रोमदबलान्वितः नारदंविप्रवर्यंतंप्रोवाचनृपसंसदि १ किमिदंप्राहविप्रर्षेराजाहंचाद्विजैःसह गच्छत्वंकाममथवामु-
नेशापप्रदःसदा २ भीतस्त्वत्तोमहाबुद्धेगच्छत्वकाममद्यहि इत्युक्तोनृपवर्येणतूष्णीमेवसनारदः ३ जगामाकाशगमनोयत्रातिष्ठति
केशवः सगत्वाविष्णुसंकाशंविष्णोःसर्वंशशासह ४ तच्छ्रुत्वाभगवान्विष्णुर्यथेष्टंवदतामिति दर्पंतस्यापनेष्यामिशवोभूतेद्विजसत्तम
५ इत्युक्त्वाविररामैवतस्मिन्बदरिकाश्रमे ततःपौंड्रोमहाबाहुर्बलैर्बहुभिरीश्वरः ६ अश्वैरनेकसाहस्रैर्गजैर्बहुभिरन्वितः शस्त्रको
टिसमायुक्तःसराजासत्यसंगरः ७ अनेकशतसाहस्रैःपत्तिभिश्चसमन्वितः एकलव्यप्रभृतिभीराजभिश्चसमंततः ८ अष्टौरथ
सहस्राणिनागानामयुतंतथा अर्बुदंपत्तिसंघानांतद्बलंसमपद्यत ९ एतेनचबलेनाजौप्रस्फुरन्नृपसत्तमः विरराजमहाराजउदय-
स्थोमहारविः १० सययौमध्यरात्रेणनगरीद्वारकामनु पत्तयोदीपिकाहस्ताराज्ञोतमसिदारुणे ११ ययुर्विविधशस्त्रौघान्संपतंतो
महाबलाः द्वारकांवीर्यसंपन्नांमहाघोरांनृपोत्तमाः १२ रथंमहांतमारुह्यशस्त्रौघैश्चसमावृतम् पट्टिशासिसमाकीर्णंगदापरिघसंकु
लम् १३ शक्तितोमरसंकीर्णंध्वजमालासमावितम् किंकिणीजालसंयुक्तंशरासिप्राससंयुतम् १४ महाघोरंमहारौद्रंयुगांतजल-
दोपमम् धनुर्गदासमाकीर्णंमहावाद्योपमंमहत् १५ अग्न्यर्कसदृशाकारंययौद्वारवतीमनु गृहीतदीपिकोराजावीर्यवान्बलवान्नृप
१६ हंतुमैच्छज्जगन्नाथंवृष्णींश्चैवसमंततः आकर्षन्बलमुख्यांस्तान्राज्ञःसर्वान्महाद्युतिः १७ पुरद्वारंसमासाद्यबलंसंस्थाप्यच
त्वतः इदंप्रोवाचराजातुनृपान्सर्वानवस्थितान् १८ ताडयतामत्रभेरीतुनामविश्राव्यमामकम् युध्यतायुध्यतामत्रद्रुतंवाप्रतिदीय
ताम् १९ आगतःपौंड्रकोराजायुद्धार्थीवीरवत्तरः हंतुकामःससग्रान्वःकृष्णबाहुबलाश्रयान् २० इतितेप्रेषिताःसर्वेसमीयुःसूच
कान्बहून् दीपिकाश्चप्रदीप्यंतेबह्व्यःशतसहस्रशः २१ इतश्चेतश्चराजानोयुद्धंतेयुद्धलालसाः पुरींतेपुरतस्तत्रक्षत्रियाःशस्त्रिण-
स्तथा २२ सिंहनादंप्रकुर्वंतःशस्त्रधारासमाकुलाः कुतोयंवृष्णिप्रवरःकुतोराजाजगत्पतिः २३ कुतोयंसात्यकिर्वीरःकुतोहार्दिक्यएव
च कुतोनुबलभद्रश्चसर्वयादवसत्तमः इत्येवंकथयंतोवैराजानःसर्वएवते २४

सूचकान्बाह्याभ्यंतरवृत्तांतज्ञान्यादवभटान् सूर्यकान्इतिपाठेसूर्यप्रतिछतान्तत्तुल्यान्यदून् २१ २२ २३ २४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 १ २ ३ ४ ५ ६ वदपौंड्रकएववासुदेवशब्दितइतिख्यापयेत्यर्थः ७ ८ ९ १० ११ १२ १३ १४ १५
 १६ आचार्यःशरणीकरणीयःपाठांतरेगमनेआचार्यइतियोज्यम् १७ १८ कोनामधारयेदितिशेषः १९ गोमतीसूर्यकिरणसंपर्कवतीद्वेभुवनेद्युभूनाम-

वैशंपायनउवाच ततःकैलासशिखरान्निर्गतोमुनिसत्तमः नारदःसर्वलोकज्ञःपौंड्रस्यनगरंप्रति १ अवतीर्यनभोभागात्प्रत्या
गम्यनरोत्तमम् द्वास्थेनचसमाज्ञप्तःप्रविवेशगृहोत्तमम् २ अर्घ्यादिसमुदाचारंनृपाल्लब्ध्वामहामुनिः निषसादासनेशुभ्रेह्यास्तृ
तेशुभवाससा ३ कुशलंपृष्टवान्भूयोनृपःसमुनिसत्तमम् उवाचनारदंभूयःपौंड्रकोबलगर्वितः ४ भवान्सर्वत्रकुशलःसर्वका
र्येषुपंडितः प्रथितोदेवसिद्धेषुगंधर्वेषुमहात्मसु ५ सर्वत्रगोनिराबाधोगंतासर्वत्रसर्वदा अगम्यंतवविप्रेंद्रब्रह्मांडेनहिकिंचन ६
नारदेदंवदत्वंहियत्रयत्रगतोभवान् तत्रतत्रतपःसिद्धोलोकेप्रथितवीर्यवान् पौंड्रएवचविख्यातोवासुदेवेतिशब्दितः ७ शंखीचक्रीग
दीशार्ङ्गीखड्गीतूणीतनुत्रवान् विजेताराजसिंहानांदातासर्वस्यसर्वदा ८ भोक्ताराज्यस्यसर्वस्यशास्ताराजाबलाद्बली अजेयःशत्रुसै
न्यानांरक्षितास्वजनस्यह ९ योद्यगोपकनामासौवासुदेवेतिशब्दितः तस्यवीर्यबलेनस्तोनाम्नोस्यममधारणे १० सहिगोपोद्यथाबा-
ल्याद्धारयत्येवनाममे इदंनिश्चिनुविप्रेंद्रएकएवभवाम्यहम् ११ वासुदेवोजगत्यस्मिन्निर्जित्यबलिनंयदुम् वृष्णीन्सर्वान्बलान्
क्षिप्त्वानिहनिष्येचतांपुरीम् १२ द्वारकांविष्णुनिलयांयोद्धाचाहंमहामते एतेचबलिनःसर्वेनृपाममसमागताः १३ अश्वाश्ववेगि
नःसंतिरथावायुजवाममम नानामंत्राःसहस्रंचगजानियुतमेवच १४ एतेनाहंबलेनाजौहनिष्येकेशवंरणे तस्माद्देवंसदाविप्रवद
ब्रह्मन्पुरेमम १५ इंद्रस्यापिसदाविप्रवदनारदसांप्रतम् प्रार्थनैषाममविप्रोनमस्येत्वांतपोधन १६ नारदउवाच सर्वत्र
गःसदाचास्मियावद्ब्रह्मांडसंस्थितिः आचार्यःसर्वकार्येषुगमनेकेनचिन्नृप १७ किंतुवक्ष्येतथाराजन्शृणुसहेनृपसत्तम महीशा
सतिदेवेशेचक्रपाणौजनार्दने १८ विष्णौसर्वत्रगेदेवेदुष्टान्हत्वासबाधवान् वासुदेवेतिकोनामतिष्ठत्यस्मिन्हराविति १९ कोना
मवक्तुमेवेदंकृष्णेशासतिगोमती अज्ञानाद्वक्तुमेवचसमर्थाःप्राकृताजनाः २० हरिःसर्वत्रगोविष्णुर्दर्पंतेव्यपनेष्यति अचिंत्यविभ
वोविष्णुःशार्ङ्गधन्वागदाधरः २१ आदिदेवःपुराणात्माद्दर्पंतेव्यपनेष्यति हास्यमेतन्महाराजयच्चवैतत्रसंस्थितम् २२ शार्ङ्गख-
ड्गतथाराजमहाघोरंनदाप्यते अतीवहासकालोयंतवसंप्रतिवर्त्तते २३

नीशासतिपालयतिसतिइदंवक्तुंकोनामसमर्थःस्यात् नकोपीत्यर्थः प्राकृता-
स्त्वादृशाःमूढाः २० २१ २२ तच्चशार्ङ्गादिकंतत्रविष्णौस्थितंनदाप्यतेत्वदीयेनशार्ङ्गादिनानच्छेद्येतइत्यर्थः दापूलवनेइत्यस्यरूपम् २३ ५ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांचतुर्नवतित-

परस्परंसमाश्रित्यपरस्परवधैषिणः न्यस्तशस्त्रामहात्मानःसमंतात्क्षतविग्रहाः २४ पेतुर्गतासवःकेचिद्यमराष्ट्रविवर्द्धनाः एवंतेनिहता-
राजन्योधिताःसर्वएवतु २५ एतस्मिन्नंतरेशूरएकलव्योनिषादपः धनुर्गृह्यमहाघोरंकालांतकयमोपमः २६ शरैरनेकसाहस्रैरर्द्दया
मासयादवान् परशतैःशराणांतुनिशितैर्मर्मभेदिभिः २७ वृष्णीनांचबलंसर्वंपोथयामाससर्वतः युद्ध्यतःशस्त्रपाणींश्चक्षत्रियान्वी
र्यवत्तरान् २८ निशठंपंचविंशत्याशराणांनतपर्वणाम् सारणंदशभिर्विध्वाहार्दिक्यंपंचभिःशरैः २९ उग्रसेनंनवत्याशुवसुदेवंच
सप्तभिः उद्धवंदशभिश्चैवव्यक्रूरंपंचभिःशरैः ३० एवमेवैकशःसर्वंनिहतानिशितैःशरैः विद्राव्ययादवीसेनांनासविश्राव्यवीर्यवान् ३१
एकलव्योयदुश्रेष्ठान्वीर्यवान्बलवानहम् इदानींसात्यकिर्वीरःक्वयास्यतिमहाबलः ३२ मदमत्तोहलीसाक्षात्क्वयातीहगदाधर इ-
त्याहसिंहनादंनसिंहान्विस्मापयन्निव ३३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिपौंड्रकवधेचतुर्नवतितमोऽध्यायः
९४ वैशंपायनउवाच निवृत्तेष्वथसैन्येषुवृष्णिवीरेषुचैवहि भीतेष्वथमहाराजन्हतेषुयुधिसर्वतः १ दीपिकासुप्रशां-
तासुनिःशब्देसतिसर्वतः जितमित्येवयन्मत्वावृष्णीनांबलमुत्तमम् २ ततःपौंड्रोमहावीर्योबभाषेसैनिकान्स्वकान् शीघ्रंगच्छतनरा-
जेंद्राटंकैःकुंतैःपुरीमिमाम् ३ कुठारैःकुंतलैश्चैवपाषाणैःसर्वतोदिशम् कर्षणस्थैःसुपाषाणैःसर्वतोयातभूमिपाः ४ भिद्यताप्राकार
चयाःप्रासादाश्चसमंततः गृह्यताकन्यकाःसर्वादास्यश्चैवसमंततः ५ गृह्यतावसुमुख्यानिधनानिसुबहून्यथ तेतथेतिमहात्मानोरा
जानःसर्वएवतु ६ कुठारैःसर्वतश्चैवविच्छिदुःपौंड्रकाज्ञया प्राकारांश्चैवसर्वत्रप्रासादान्नरसंचयात् ७ अथतत्रमहाशब्दःप्रादुरासी
त्समंततः टंकेषुपात्यमानेषुप्राकारेषुमहाबलैः ८ पूर्वद्वारेमहाराजभिन्नाःप्राकारसंचयाः श्रुत्वाशब्दंमहाघोरंसात्यकिःक्रोधमूर्च्छि
तः ९ मयिसर्वंसमारोप्यकेशवोयादवेश्वरः गतःकैलासशिखरंद्रष्टुंशंकरमव्ययम् १० अवश्यंहिमयारक्ष्यापुरीद्वारवतीत्वियम् इति
संचिंत्यमनसाधनुरादायसत्वरम् ११ रथमहांतमारुह्यदारुकस्यमहात्मनः पुत्रेणसंस्कृतंघोरंयंताचस्वयमेवहि १२ धनुर्महत्तदादा
यशरांश्चाशीविषोपमान् आमुच्यकवचंघोरंशस्त्रसंपातदुःसहम् १३ अंगदीकुंडलीतूणीशरीचापीगदासिमान् ययौयुद्धायशैने
यःसंस्मरन्केशववचः १४ दीपिकादीपितेदेशेययौसात्यकिरुत्तमः तथैवबलदेवोपिरथमारुह्यभास्वरम् १५

मोऽध्यायः ९४ १ २ ३ ४ ५ वसुमुख्यानिरत्नानि ६ ७ ८ ९ १० ११ १२ १३ १४ १५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 निबद्धानिबद्धानीतिनिबद्धशःसर्वेसन्नाहनिबद्धाइत्यर्थः २५ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांत्रिनवतितमोऽध्यायः ९३ १ २

आदायशस्त्राणिबहूनिसर्वतःशरांश्चचापानिबहूनिसर्वे युद्धायसन्नाहनिबद्धशोययुर्हरेःपुरींद्वारवतींनृपोत्तमाः २५ इतिश्रीम
हाभारतेखिलेषुहरिवंशेभविष्यपर्वणिपौंड्रकवधेत्रिनवतितमोऽध्यायः ९३ वैशंपायनउवाच ततस्तेयादवाःसर्वेदृष्ट्वा
सैनिकसंचयम् रात्रौचव्यसनंप्राप्तंमहाशस्त्रसमाकुलम् १ महावातसमुद्भूतंकल्पांतेसागरोपमम् सन्नद्धाःसमपद्यंतशस्त्रिणो
युद्धलालसाः २ गृहीतदीपिकाःसर्वेयादवाःशस्त्रयोधिनः सात्यकिर्बलभद्रश्चहार्दिक्योनिशठस्तथा ३ उद्धवश्चमहाबुद्धिरुग्रसे-
नोमहाबलः अन्येचयादवाःसर्वेकवचप्रग्रहेरताः ४ समस्तयुद्धकुशलाराात्रौसन्नाहयोधिनः शस्त्रिणःखड्गिनश्चैवसर्वेशस्त्रसमा
कुलाः ५ युद्धायसमपद्यंतबहवोबाहुशालिनः रथिनोगजिनश्चैवसादिनःसायुधास्तथा ६ नित्ययुक्तामहात्मानोधन्विनःपुरुषोत्त
माः निर्ययुर्नगरात्तूर्णंदीपिकाभिःसमंततः ७ कुतःपौंड्रकइत्येवंवदंतःसर्वसात्वताः दीपिकादीपितोदेशोनिस्तमाःसमपद्यत ८
ततोवितिमिरोदेशःसमंतात्समपद्यत युद्धंसमभवद्घोरंवृष्णिभिःशत्रुभिःसह ९ ततोमहान्समभवत्संनादोरोमहर्षणः हयाहयैः
समायुक्तागजाश्चगजयूथपैः १० रथारथैःसमायुक्ताःसादिभिःसादिनस्तथा खड्गिनःखड्गिभिःसार्द्धंगदिभिर्गदिनस्तथा ११ प
रस्परव्यतीकारोरणआसीत्सुदारुणः महाप्रलयसंक्षोभःशब्दस्तेषांमहात्मनाम् १२ धावंतःप्रहरंत्येतान्हत्वैतान्सर्वतोनृपान् अ
यमेषमहाबाहुःखड्गीपततिवीर्यवान् १३ अयमेषशरोघोरोवर्त्ततेतिसुदारुणः गदीचायंमहावीर्यःसर्वान्नोबाधतेनृपः १४ अ-
यंरथीशरीचापीगदीतूणीतनुत्रवान् याद्दृशःसर्वतोयातिकृतपाणिरयंबली १५ अयमत्रमहाशूलीसंश्रितःसर्वतोदिशम् गजो-
यंसविषाणाग्रोवर्त्ततेसर्वतःप्रति १६ अस्तिसवत्रगःशूरोवेगवान्वातसन्निभः शरान्शरैःसमाहंतिदंडान्दंडैर्जगत्सते १७ कुं
तान्कुंतैःसमाजघ्नुर्गदाभिश्चगदास्तथा परिघान्परिघैःसार्द्धंशूलान्शूलैःसमंततः १८ एवंतेषांमहाराजकुर्वतांरणमुत्तमम्
संग्रामःसुमहानासीच्छब्दश्चापिमहानभूत् १९ भूतानिसुबहून्याजौशब्दवंतिमहांतिच प्रादुरासन्सहस्राणिशंखानांभीम
निःस्वनः २० रात्रौप्रादुरभूच्छब्दःसंग्रामेरोमहर्षणः वर्त्तमानेमहायुद्धेवृष्णीनांचैवतैःसह २१ केचित्स्वस्ताःसमापेतुःपृथि
व्यांपृथिवीक्षितः केचित्सततिनश्लिष्टाश्चविप्रकीर्णशिरोधराः २२ पेतुरुर्व्यांमहावीर्याराजानःशस्त्रपाणयः केचित्तुभिन्नवर्माणःसमापेतुःस
हस्रधः २३

३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांपौंडकवधेपंचनवतितमोऽध्यायः ९५ १ २ ३ ४ प्रवर्त्तनेतवनामेतिशेषः सएवंश्वोनभ-
विष्यतिमरिष्यति ५ ६ ७ राजन्कुत्सितराजन् ८ ९ नागच्छीःनगतोभूःतर्हिनैतदायासीःयत् आगतोसिअतःसत्यमेवममवचनमित्य-

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिपौंड्रकवधेसात्यकिपौंड्रभाषणंनामपंचनवतितमोऽध्यायः ९५ वैशंपायनउवाच
ततःक्रुद्धोमहाराजसात्यकिर्वृष्णिपुंगवः उवाचवचनंराजन्वासुदेवंस्मरन्निव १ अवोचदीदृशंवाक्यंवासुदेवंनृपाधमः कोनामजग-
तांनाथमित्यन्ब्रूयाज्जिजीविषुः २ मृत्युस्त्वांसर्वथायातिवदंतंतादृशंवचः जिह्वातेशतधादीर्याद्वदतस्तादृशंवचः ३ एषतेपातयिष्या
मिशिरःकायाच्चपौंड्रक यन्नामवासुदेवेतितवसंप्रतिवर्त्तते ४ यावत्ततिकायात्तेशिरस्तावत्प्रवर्त्तते सएवश्वोनभगवान्वासुदे-
वोभविष्यति ५ एकएवजगन्नाथःकर्त्तासर्वस्यसर्वगः दुरात्मन्सर्वथादेवोभविष्यतिनसंशयः ६ एषतेहंशिरःकायात्पातयिष्यामि-
राजक यद्सौभगवान्विष्णुर्नागमिष्यतिसांप्रतम् ७ अस्त्रवीर्यबलंचैवसर्वंदर्शयसांप्रतम् नातःपरतरंराजन्वीर्यंचतववर्त्तते ८
सर्वंदर्शयियत्नेनस्थितोस्मिव्यवसायवान् शरीचापीगदीखड्गीसर्वथाहमुपस्थितः ९ नेतंनगरमायासीःसत्येनैतद्ब्रवीम्यहम् सर्व
थाकृतकृत्योस्मिदृष्ट्वात्वावासुदेवकम् १० तवांगंतिलशःकृत्वाश्वभ्योदास्यामिराजक इत्युक्त्वाबाणमादायवासुदेवमहाबलः ११
आकर्णपूर्णमाकृष्यविव्याधनिशितंशरम् सतेनविद्धोयदुनावासुदेवःप्रतापवान् १२ वमच्छोणितमत्युष्णमंगान्नेत्रान्नृपोत्तम ततश्चु-
क्रोधनृपतिर्वासुदेवःप्रतापवान् १३ नवभिर्दशभिश्चैवशरैःसन्नतपर्वभिः विव्याधसात्यकिंराजानदंश्चबहुधाकिल १४ ततोनाराच
मादायनिशितंयमसंनिभम् धनुराकृष्यभगवान्वासुदेवोनृपोत्तम १५ विव्याधसात्यकिंभूयोनिशिभल्लादयन्सुरकान् नाराचे
नसमाविद्धःसात्यकिःसत्यसंगरः १६ ललाटेसुदृढंवीरोवृष्णीनामग्रणीस्तदा निषसादरथोपस्थेनिश्चेष्टइवसत्तमः १७ ततःसपौं
ड्रकोराजाविध्याद्दशभिराशुगैः सारथिंपंचविंशत्याहयांश्चचतुरोनृपः १८ तेहयारुधिराक्तांगाःसारथिश्चसमंततः विह्वलाःसम
पद्यंतवासुदेवस्यपश्यतः १९ वासुदेवोरथेचापिसिंहनादंसमादधे तेननादेनतत्राभूद्विबुद्धःसात्यकिर्नृप २० विद्धान्हयांस्तथादृष्ट्वा
सारथिंचतथागतम् शैनेयोथमहावीर्यःकुपितोनृपसत्तमः २१ अलंद्रक्ष्यामितेवीर्यमित्युक्त्वाबाणमाददे विव्याधतेनबाणेनवक्ष
स्येनंमहाबलः २२ ततश्चचालतेनाजौवासुदेवःशरेणह सुस्रावरुधिरंघोरमत्युष्णंवक्षसान्नृप २३ रथोपस्थेपपाताशुनिश्वसन्नु
रगोयथा कृत्यंचापिनजानातिकेवलंनिषसादह २४
थ॰: १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गदीशरीमहावीर्यःप्रायाद्रणचिकीर्षया सिंहनादंप्रकुर्वंतोमुंचन्वैभैरवंरवम् १६ उद्धवोपिबलीसाक्षाद्गजमारुह्यसत्वरम् मत्तंमहार
वंघोरसंग्राममनीतिमत्तरम् १७ ययौनीतिंविचिन्वानःपरांप्रीतिमहाबलः अन्येचवृष्णयःसर्वेयुयुःसंग्रामलालसाः १८ रथान्गजा
न्समारुह्यहार्दिक्यप्रमुखास्तथा दीपिकाभिश्चसर्वत्रपुरोवृत्ताभिरीश्वराः १९ सिंहनादंप्रकुर्वंतःस्मरंतःकेशववचः पूर्वद्वारंसमासाद्यवृ
ष्णयोयुद्धलालसाः २० तेसमेत्ययथायोगंस्थितास्तत्रमहाबलाः स्थितेसैन्येमहाघोरेदीपिकादीपितेपथि २१ शिनिर्वीरःशरीचापीम
दीतूणीरवान्विभो वायव्यास्त्रंसमादाययोजयित्वामहाशरम् २२ आकर्णपूर्णमाकृष्यधनुःप्रवरमुत्तमम् मुमोचपारिसैन्येषुशिनिर्वी
रःप्रतापवान् २३ वायव्यास्त्रेणतेसर्वेतत्रस्थानरसत्तमाः विजितास्तस्यवीर्येणयत्रातिष्ठत्पौंड्रकः २४ तत्रगत्वास्थितास्सर्वेनिर्द्धू
तावातरंहसा यत्रपूर्वंस्थिताःसर्वेविद्रुताराजसत्तमाः २५ तत्रास्थित्वाचशैनेयःशरमादायसत्वरम् निशितंसर्पभोगाभंबभाषेसात्य
किस्तदा २६ क्वइदानींमहाबुद्धिःपौंड्रकोराजसत्तमः स्थितोस्मिव्यवसायेनशरीचापीमहाबलः २७ यदिद्रष्टादुरात्मानंततोहंता
नृपाधमम् भृत्योस्मिकेशवस्याहंजिघांसुःपौंड्रकस्थितः २८ छित्वाशिरस्तुतस्यास्यसर्वक्षत्रस्यपश्यतः बलिदास्यामिगृध्रेभ्यःश्व
भ्यश्चैवदुरात्मनः २९ कोनामईदृशंकर्मचौरवच्चसमाचरेत् सुप्तेषुनिशिसर्वत्रयादवेषुमहात्मसु ३० चौरोयंसर्वथाराजानहिराजा
बलान्वितः यदिशक्तोनकुर्याच्चिचौर्यमेवंनृपाधमः ३१ अहोस्यबलिनोराज्ञश्चौरकार्यंप्रकुर्वतः सर्वथागमनंतस्यनहिपश्यामिसां
प्रतम् ३२ इत्युक्त्वासात्यकिर्वीरःप्रजहासमहाबलः विस्फार्यसुदृढंचापंसंदधेकार्मुकेशरम् ३३ आकर्ण्यवचनंवीरःसात्यकेस्तस्य
धीमतः क्वनुकृष्णःक्वगोपालःकुतःसोत्रप्रवर्तते ३४ स्त्रीहंतापशुहंताचक्वचःस्वामीतिसेवितः सइदानींक्ववर्तेतगृहीत्वामममानमत
तु ३५ हतास्तस्युर्महावीर्यानिरकस्यमहात्मनः ममैवतातयुद्धेस्मिन्हतेतस्मिन्दुरात्मनि ३६ गच्छत्वंकामतोवीरयोद्धुनक्षमतेभवान्
अथवातिष्ठकिंचित्तुततोद्रक्ष्यसिमेबलम् ३७ शिरस्तेपातयिष्यामिशरैर्घोरैर्दुरासदः हतस्यतववीरेहभूमिःपास्यतिशोणितम्
३८ श्रोष्यतेसतथागोपोहतःसात्यकिरित्यपि योगर्वस्तस्यगोपस्यसर्वदावर्ततेमहान् ३९ विनश्यतिसतुक्षिप्रंहतेत्वयियदूत्तम
त्वयिरक्षांसमादिश्यगोपःकैलासपर्वतम् ४० गतइत्येवमस्माभिःश्रुतपूर्वंमहामते शरंगृहाणनिशितंयदिशक्तोसिसात्यके इ
त्युक्त्वाबाणमादाययथायोद्धुव्यवस्थितम् ४१ ११५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 २४ २५ २६ २७ २८ २९ ३० शरवान्सर्वतःशरैःसह ३१ मनस्वीउदारःरिक्तःनिर्धनःसत्पात्रेआगत इतिशेषः ३२ ३३

सात्यकिस्तुरथंविध्यादशभिःसायकैस्तथा ध्वजंचिच्छेदभल्लेनवासुदेवस्यवृष्णिपः २५ हयांश्चचतुरोहत्वाबाणैःसारथिमेवच युं
युधानोथराजेंद्रबाणैःसारथिमेवच २६ सारथेश्चशिरःकायादाहरत्सरथात्तदा रथयंत्रंचिच्छेदहयाश्चव्यसवोभवन् २७ चक्रं
चतिलशःकृत्वाबाणैर्दशभिरंहसा जहासविपुलंराजन्वासुदेवंमहाबलः २८ ततःपरमहत्कायसात्यकिर्वृष्णिनंदनः शल्यंकृत्वा
बलीसाक्षात्सर्वक्षत्रस्यपश्यतः २९ शरैःसप्ततिसंख्याकैरर्दयामाससत्वरम् तेशराःशल्यभाकारानिपेतुःसर्वशस्तदा ३० शिरस्तः
पार्श्वतश्चैवपृष्ठतःपुरतस्तथा केवलंधैर्यनिचयस्तृषार्तःशरवान्यथा ३१ यथामनस्वीरिक्तश्चतथातिष्ठतिपौंड्रकः ततश्चक्रोधव
लवान्वासुदेवःप्रतापवान् ३२ अर्धचंद्रंसमादायविव्याधयुधिसात्यकिम् विध्वासप्तभिरायांतंक्रोधेनप्रस्फुरन्निव ३३ विद्धोथ
सात्यकिस्तेनशरैःपंचभिराशुगैः चापंचिच्छेदपौंड्रस्यसिंहनादंव्यनीनदन् ३४ वासुदेवोगदांगृह्यभ्रामयित्वापदात्पदम् त्वरितंपा
तयामाससात्यकेर्वक्षसिप्रभो ३५ सव्येनतांसमाकृष्यकरेणयदुनंदनः शरंप्रगृह्यविव्याधसात्यकिर्युधिपौंडकम् ३६ तमंतरंगृ
हीत्वाशुवासुदेवःप्रतापवान् शक्तिभिर्दशभिश्चैवसात्यकिंनिजघानह ३७ ताभिर्विद्धोरणेवीरःसात्यकिःसत्यसंगरः अपास्यध
नुरन्यत्तद्धनुरादायसत्वरम् आजघानतदावीरोवृष्णीनामग्रणीर्नृपः ३८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणि
कैलासयात्रायांपौंड्रकवधेषण्णवतितमोऽध्यायः ९६ वैशंपायनउवाच ततःक्रुद्धोगदापाणिःसात्यकिर्वृष्णिनंद
नः वासुदेवंजघानाशुगदयातीक्ष्णयानृप १ सात्यकिंवासुदेवस्तुगदयाभ्यहनद्बली तावुद्यतगदौवीरौशुशुभातेसुदारुणौ २
दृप्तौवनेयथासिंहौपरस्परवधैषिणौ ततःससात्यकिःक्रुद्धःसव्यंमंडलमागमत् ३ दक्षिणंवासुदेवस्तुतंजघानस्तनांतरे युयु-
धानोथवीरस्तुबाह्वोर्मध्यमताडयत् ४ दृढंसताडितोवीरोजानुभ्यामपतद्भुवि ततउत्थायवीरस्तुललाटेभ्यहनद्गदाम् ५ वि
षण्णःकिंचिदायस्तस्ततउत्थायसत्वरम् गदयाभ्यहनद्वीरःसात्यकिःपौंड्रसत्तमम् ६ वासुदेवोबलिर्वीरःसाक्षान्मृत्युरिवापरः
जघानगदयावृष्णिंनिर्दहन्निवचक्षुषा ७ सतयाताडितोवृष्णिर्गदयाबाहुमुक्तया आलंब्यभूमिंसहसामृत्योरंकगतोयथा
८ संज्ञांपुनःसमालंब्यपाणिभ्यांदृढमेवच गदांतस्यमहाराजागृहीत्वाप्रग्रहेणह ९
३४ ३५ ३६ ३७ ३८ इतिश्रीमहाभा
रतेहरिवंशेभविष्यपर्वणिटीकायांषण्णवतितमोऽध्यायः ९६ १ २ ३ ४ ५ ६ ७ अंकगतःसमीपंगतः ८ प्रग्रहेणपरप्रयुक्तायाउत्प्लुत्यप्रग्रहणंप्रग्रहस्तेन ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्विधाकृत्वावेणुवत्भंक्त्वा १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४

द्विधाकृत्वामहागुर्वीगदांकालायसींशुभाम् उत्सृज्यसहसावीरःसिंहनादंव्यनीनदत् १० ततउत्सृज्यराजातुवासुदेवोमहाबलः
सव्येनसात्यकिंगृह्यदक्षिणेनकरेणह ११ मुष्टिंकृत्वामहाघोरांवासुदेवःप्रतापवान् ताडयामासमध्येतुस्तनयोःसात्यकेर्नृप १२
शैनेयोवृष्णिवीरस्तुगदामुत्सृज्यसत्वरम् तलेनाभ्यहनद्वीरोवासुदेवंरणाजिरे १३ तलेनवासुदेवोपिसात्यकिंसत्यसंगरम् त-
योरेवंमहाघोरंतलयुद्धंप्रवर्त्तत १४ जानुभ्यांमुष्टिभिश्चैवबाहुभ्यांशिरसातदा उरसोरःसमाहत्यजानुभ्यांजानुनीतथा १५
कराभ्यांकरमाहत्यतौयुद्धंसंप्रचक्रतुः तालयोस्तत्रराजेंद्रवृक्षयोःसंनिकर्षयोः १६ वनेयथानिरुस्वन्नस्तथैवाभून्महास्वनः तावा
जौप्रथितौवीरावुभौपौंड्रकसात्यकि १७ निशिस्तिमितमूकायांशस्त्रंत्यक्त्वामहाबलौ युयुधातेमहारंगेमल्लौद्वाविवविश्रुतौ १८
उभेसेनेमहाराज्ञःसंशयंजग्मतुस्तदा किन्नुस्यात्सात्यकिर्वीरोहतस्तेनभविष्यति १९ अहोस्विद्वासुदेवस्तुहतस्तेनमहात्मना
अद्यवेतौमहावीरौपरस्परवधैषिणौ २० युध्यमानौमहावीरौनूनंस्वर्गंगमिष्यथः अन्यथानोपरम्येतांयुद्धाद्वीरौसुनिश्चितौ २१
अहोवीर्यमहोधैर्यमेतयोर्बलशालिनोः एतौमहाबलौलोकेएतौप्रकृतिसत्तमौ २२ नैवंयुद्धंमहाघोरमासीद्द्वापरेप्यपि नश्रुतो
नचवादृष्टःसंग्रामोयंकदाचन २३ एतेवैसैनिकाब्रूयुःसेनयोरुभयोरपि रात्रौनिशीथेसंघोरेदृष्ट्वायुद्धंसुदारुणम् २४ अथ
तौबाहुभिर्वीरौसंनिपेततुरंजसा दशभिर्मुष्टिभिर्जघ्नेसात्यकिःपौंड्रकंतदा २५ पंचभिःसात्यकिंपौंड्रसमाजघ्नेमहाबलः तयो
श्चटचटाशब्दोब्रह्मांडक्षोभणोमहान् प्रादुरासीत्तुसर्वत्रसर्वान्विस्मापयन्निव २६ इतिश्रीमहाभारतेखिलेषुहरिवंशेभ
विष्यपर्वणिपौंड्रकवधोनामसप्तनवतितमोऽध्यायः ९७ वैशंपायनउवाच एतस्मिन्नन्तरेक्रुद्धएकलव्योनिषादपः
बलभद्रमभिक्षिप्रंधनुरादायसत्वरम् १ नाराचैर्दशभिर्विद्ध्वाबाणैश्चदशभिःपरैः चिच्छेदधनुरव्यग्रंतत्सर्वंक्षत्रस्यपश्यतः २
सूतंदशभिराहत्यरथंत्रिंशद्भिरेवच ध्वजंचिच्छेदमल्लेननिषादस्यजगत्पतिः ३ ततःपरमहच्चापंनिषादोवीर्यसंमतः दृढमौर्व्या-
समायुक्तंदशतालप्रमाणतः ४ कामपालंशरेणाशुजघानजनमध्यतः बलदेवोमहावीर्यःसर्पशीर्षइवश्वसन् ५ दशभि
स्तद्धनुर्दिव्यंशरैःसर्पसमैर्बलः चिच्छेदमुष्टिदेशेतुमाधवोमाधवाग्रजः ६

२५ २६ इतिश्रीमहाभारतेखि० हरिवंशेभविष्यपर्वणिटीकायां
सप्तनवतितमोऽध्यायः ९७ एतस्मिन्निति १ २ ३ दशतालप्रमाणतःदशप्रादेशसंमितं ४ ५ माधवोमधुवंश्यःमाधवाग्रजोलक्ष्मीपतेर्ज्येष्ठभ्राता
६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

छत्रदेशेमूर्द्ध्नि ६ ७ ८ ९ १० ११ १२ १३ १४ १५ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांनवनवतितमोऽध्यायः

जघानगदयाराजन्छत्रदेशेनिषादपः ततोरामोगदोराजन्निषादंबाहुशालिनम् ६ आजघ्नेगदयाक्रूरंमदमत्तोहलायुधः तयोश्चतु-
मुलंयुद्धंगदाभ्यांसमवर्त्तत ७ आकाशेशब्दआसीत्तुतयोर्युद्धेमहाभुज समुद्राणांयथाघोषःसर्वेषांसन्निगच्छताम् ८ कल्पक्षये
महाराजन्शब्दःसतुमुलोभवत् क्षोभितानागराजश्चनागाःक्षोभसमाययुः ९ पृथिवीचांतरिक्षंचसर्वंशब्दमयंबभौ ततःसपौंड्र
कोराजासात्यकिंवृष्णिनंदनम् १० गदयैवजघानाशुसलररणकोविदः युयुधानोबलीराजन्वासुदेवंजघानह ११ तयोश्चतुमुलः
शब्दःप्रादुरासीन्महारणे चतुर्णांयुध्यतांराजन्परस्परवधैषिणाम् १२ ब्रह्मांडक्षोभणोराजन्शब्दआसीत्सुदारुणः ततोराजःप्रा
दुरभूत्तस्मिन्संग्राममूर्द्धनि १३ तारकानिःप्रभाराजंस्तमस्येवक्षयंगते उषसिप्रतिबुद्धायांततोनिःशेषतांययौ १४ उदितोभगवान्
सूर्यश्चद्वंद्वक्षयमाययौ तयोर्युद्धंप्रादुरभूच्चतुर्णांबाहुशालिनाम् देवासुरसमंराजन्नुदितेभास्करेमहत् १५ इतिश्रीमहाभा
रतेखिलेषुहरिवंशेभविष्यपर्वणिपौंड्रकयुद्धेनवनवतितमोऽध्यायः ९९ वैशंपायनउवाच ततःप्रभातेविमलेभगवा
न्देवकीसुतः गंतुमैच्छज्जगन्नाथःपुरंबदरिकाश्रमात् १ नमस्कृत्यमुनीन्सर्वान्ययौद्वारवतींनृप आरुह्यगरुडंविष्णुर्वेगेनमह
ताप्रभुः २ समहान्शुश्रुवेशब्दस्तेषांयुद्धप्रकुर्वताम् गच्छतादेवदेवेनपुरींद्वारवतींनृप ३ अचिंतयज्जगन्नाथःकोन्वयंशब्दउ-
त्थितः संग्रामसंभवोघोरोआर्यशैनेयसंयुतः ४ व्यक्तमागतवान्पौंड्रोनगरींद्वारकामनु तेनयुद्धंसमभवत्पौंड्रकेनदुरात्मना ५
यदूनांवृष्णिवीराणांयुध्यतामितरेतरम् शब्दोयंसुमहान्व्यक्तोनात्रकार्याविचारणा ६ इत्येवंचिंतयित्वातुदध्मौशंखंमहारवम्
पांचजन्यंहरिःसाक्षात्प्रीणयन्वृष्णिपुंगवान् ७ रोदसीपूरयामासतेनशब्देनकेशवः यादवावृष्णयश्चैवश्रुत्वाशंखस्यतेरवम् ८
व्यक्तमायातिभगवान्पांचजन्यरवोह्ययम् इतितेमेनिरेराजन्वृष्णयोयादवास्तथा ९ निर्भयाःसमपद्यंतवृष्णयोयादवाश्चते
तस्मिन्नेवक्षणेदृष्टस्तार्क्ष्यश्चपततांवरः १० ततश्चदेवकीसूनुर्दृष्टस्तैर्यादवेश्वरः सूताश्चमागधाश्चैवपुरोयांतिजगत्पतेः ११
स्तुत्यास्तुतंहरिंविष्णुमीश्वरंकमलेक्षणम् ततश्चयादवाःसर्वेपरिवव्रुर्जनार्दनम् १२ कृष्णस्तुगरुडंभूयोगच्छस्वनाकमुत्तमम् इ
त्युक्त्वागरुडंविष्णुर्विसृज्ययदुनंदनः १३ दारुकंपुनराहेदंरथमानयमेप्रभो सतथेतिप्रतिज्ञायरथमादायसत्वरम् १४

९९. १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ स्तुतंतैरेवसूतादिभिः १२ १३ १४ ६७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एकलव्यो निषादेशः खड्गमादाय सत्वरः ग्राहिणो हलमादाय निशितं घोरविग्रहम् ७ तमंतरे पदुर्वीरो वृष्णिवीरः प्रतापवान् तिलशः
पंचभिर्बाणैश्चकार यदुनंदनः ८ ततो परं महत्खड्गं सर्वकालायसं शुभम् ग्राहिणो तु सारथेः कायमालोक्याथ निषादजः ९ तं चा
पि दशभिर्वीरो माधवो यदुनंदनः बाह्वोरंतरयोश्चैव निर्बिभेद महारणे १० ततः शक्तिं समादाय घंटामालाकुलां नृप निषादो बलदे
वाय प्रेषयित्वा महाबलः ११ सिंहनादं महाघोरमकरोत्स निषादपः साशक्तिः सर्वकल्याणि बलदेवमुपागमत् १२ उत्पतंतीं म
हाघोरां बलभद्रः प्रतापवान् आदायायनिषादेशं सर्वान्विस्मापयन्निव १३ तथैव तं जघानाशु वृक्षोदेशे स माधवः स तया ताडितो
वीरः स्वशक्त्याथ निषादपः १४ विह्वलः सर्वगात्रेषु निपपात महीतले प्राणसंशयमापन्नो निषादो राम ताडितः १५ निषादास्तस्य
राजेंद्र शतशोऽथ सहस्रशः अष्टाशीति सहस्राणि निषादास्तु स्वयोधिनः १६ गदिनः खड्गिनश्चैव महेष्वासा महाबलाः शरैरनेकसा
हस्रैः शक्तिभिश्च परश्वधैः १७ गदाभिः पट्टिशैः शूलैः परिघैः प्रासतोमरैः कुंतैश्च कुठारैश्च यादवानां महौजसाम् १८ शलभा इव
राजेंद्र दीप्यमानं हुताशनम् ते शरं पातयांचक्रू राममरामिवापरम् १९ केचित्कुठारै राजघ्नुः केचित्कुंतैः परश्वधैः गदाभिः केचिदाघ्नं
ति शक्तिभिश्च तथापरे २० निजघ्नुः सहसा रामं स्फुरत्पावकं यथा ततः क्रुद्धो हली साक्षाद्धलमुद्यम्य सत्वरम् २१ समाकर्ष
यामास मुशलेनाभिपीडयन् ते हन्यमाना राजेंद्र निषादाः पर्वताश्रयाः २२ निपेतुर्धरणीपृष्ठे शतशोऽथ सहस्रशः क्षणेन तन्महाराज
हत्वा सर्वान्महाबलान् २३ सिंहवद्व्यनदत्तत्र तस्थौ रामो महाबलः ततो रात्रौ महाघोराः पिशाचाः पिशिताशनाः २४ आहृत्य मां-
सयूथानि भक्षयंतः समासते पिबंतः शोणितं कोष्ठात्संछिद्य च शवं बहु २५ इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि
एकलव्यसैन्यवधो नाम अष्टनवतितमोऽध्यायः ९८ वैशंपायन उवाच क्रव्यादाः सर्व एवाशु भक्षयंतस्तदा शिवम् हृ
संतो विविधं घोरं नादयंतो वसुंधराम् १ राक्षसाश्च पिशाचाश्च पिबंतः शोणितं बहु आशिखं भुंजते राजन् शवस्य पिशिताशनाः २
नृत्यंति स्म तदा राजन्नग्र्यं रणतोषिताः काकाबलूकागृध्राश्च श्येनागोमायवस्तथा ३ भक्षयंतः प्रवर्तंते राक्षसाश्चैव दारुणाः ए
तस्मिन्नंतरे वीरो निषादो लब्धसंज्ञकः ४ हतान्सर्वान्समालोक्य निषादान्नगचारिणः गदामादाय कुपितो राममेव जगाम ह ५

२४ २५ ३ ११७

ति श्रीमहाभारते खि॰ हरि॰ भविष्यपर्वणि टीकायां अष्टनवतितमोऽध्यायः ९८ क्रव्यादा इति शवं शवजातीयं १ आशिखं शिखामपि केशास्थ्यपि न त्यजंतीत्यर्थः २ ३
४ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वृत्तनः वर्तुलत्वेन ४० ४१ ४२ ४३ ४४ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांकृष्णपौंड्रकयुद्धेशततमोऽध्यायः १०० छ
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ आयसास्यंअयसंलोहमयंतच्चतत् आस्यंक्षेप्यंतत् आयसास्यम् १२ १३ १४

तत्तुल्यंममचक्रंतुवृत्ततोनतुवीर्यतः आयुधेष्वथसर्वत्रशब्दसादृश्यमस्तिते ४० गोपोहंसर्वदाराजन्प्राणिनांप्राणदःसदा गोप्तासर्वेषु-
लोकेषुशास्तादुष्टस्यसर्वदा ४१ कथंनसर्वकार्येहिजित्वाशत्रून्नृपाधम अजित्वाकिंभवान्ब्रूतेस्थितेमयिचशस्त्रिणि ४२ हत्वागान्व्र
हिराजंद्यदिशक्तोसिपौंड्रक स्थितोहंचक्रमाश्रित्यरथीचापीगदासिमान् ४३ रथमारुह्ययुद्धायसन्नद्धोभववानद इत्युक्त्वाभग
वान्विष्णुःसिंहनादंव्यनीनदत् ४४ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांकृष्णपौंड्रकयुद्धेनामश
ततमोऽध्यायः १०० वैशंपायनउवाच ततःशरंसमादायवासुदेवःप्रतापवान् पौंड्रंजघानसहसानिशितेनशरेणह १
पौंड्रोथवासुदेवस्तुशरैर्दशभिराशुगैः वासुदेवंजघानाशुवार्ष्णेयंवृष्णिनंदनम् २ दारुकंपंचविंशत्याहयान्दशभिरेवच सप्तत्यावा
सुदेवंतुयादवंवासुदेवकः ३ ततःप्रहस्यसुचिरंकेशवःकेशिसूदनः दृष्ट्वासाविविमनसासंपूज्ययदुनंदनः ४ आकृष्यशार्ङ्गंबलवा
न्संधायरिपुसूदनः नाराचेनसुतीक्ष्णेनध्वजंचिच्छेदकेशवः ५ सारथेश्चशिरःकायादाहत्ययदुनंदनः अश्वांश्चचतुरोहत्वाचतुर्भिः
सायकोत्तमैः ६ रथंराज्ञःसमाहत्यतदोभौपार्ष्णिसारथी चक्रेचतिलशःकृत्वाहसन्किंचिदवस्थितः ७ पौंड्रकोवासुदेवस्तुरथादुत्प्लुत्य
सत्वरः आदायनिशितंखड्गंप्राहिणोत्केशवायसः ८ सखड्गंशतधाकृत्वातूष्णीमासीच्चकेशवः ततःपरंमहाघोरंपरिघंकालसंमित
९ गृहीत्वावासुदेवायवासुदेवःप्रतापवान् प्राहिणोद्वृष्णिवीरायसर्वक्षत्रस्यपश्यतः १० तद्विधाजगतांनाथश्चकारयदुनंदनः
ततश्चक्रंमहाघोरंसहस्रारंमहाप्रभम् ११ त्रिंशच्चारंसमायुक्तमायसास्यममित्रहा आदायाथमहाराजकेशवंवाक्यमब्रवीत् १२
पश्येदंनिशितंघोरंतवचक्रविनाशनम् अनेनतवगोविंददर्पंदर्पवतांवर १३ अपनेष्यामिवार्ष्णेयसर्वक्षत्रस्यपश्यतः त्वामुद्दिश्यम-
हाघोरंकृतमन्यदुरासदम् १४ यदिशक्तोहरेकृष्णदारयेदंमहास्पदम् इत्युक्त्वातच्छतगुणंभ्रामयित्वामहाबलः १५ चिक्षेपायुम
हावीर्यःपौंड्रकोनृपसत्तमः अवप्लुत्यततोदेशात्तदुत्सृज्यमहाबलः १६ सिंहनादंमहाघोरंव्यनदद्वीर्यवांस्तदा ततोविस्मयमापन्नो-
भगवान्देवकीसुतः १७ अहोवीर्यमहोधैर्यमस्यपौंड्रस्यदुःसहम् इतिमत्वाजगन्नाथउत्थितश्चरथोत्तमात् १८

१५ अवप्लुत्यचक्रंवंचितवानित्यर्थः १६ १७ १८ छ छ छ छ छ छ छ छ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१५ १६ १७ १८ १९ २० २१ २२ २३ २४ क्रियतांकरोतु २५ २६ २७ २८ पीडितोस्मित्वदीयस्यचक्र

रथोयंभगवन्देवकिमतःकृत्यमस्तिमे इत्युक्त्वारथमादायप्रणम्याग्रेस्थितोहरेः १५ गतेथगरुडेविष्णूरथमारुह्यसत्वरम् यत्रयुद्धं
समभवत्तत्रयातिस्मकेशवः १६ तत्रगत्वामहाराजयुध्यतांचमहात्मनाम् पांचजन्यंमहाशंखंदध्मौयदुद्वहोत्तमः १७ पौंड्रोथवासु
देवस्तुकृष्णाद्दक्षारणोत्सुकम् सात्यकिंपृष्ठतःकृत्वावासुदेवमुपागमत् १८ क्रुद्धोथसात्यकीराजन्वारयामासपौंड्रकम् नगंतव्य-
मितोराजन्नेषधर्मःसनातनः १९ जित्वामांगच्छराजेंद्रपरयोद्धुंमहारणे क्षत्रियोस्मिमहावीरस्थितेमयिरणोत्सुके २० एषतेगर्वम-
खिलंनाशयिष्यामिसंयुगे इत्युक्त्वाचाग्रतस्तस्थौगच्छतेयादवेश्वरः २१ पौंड्रस्याशिनिनप्तातुपश्यतःकेशवस्यह अवज्ञायशिनेः
पौत्रंकृष्णमेवजगामह २२ निर्भर्त्स्यसहसाभूयःसात्यकिःक्रोधमूर्च्छितः गदयात्वाहरत्पौंड्रंवासुदेवस्यपश्यतः २३ यथाप्राणंय
थायोगंसात्यकिःसत्यविक्रमः हंतुकामंभगवान्नेवसात्यकिंप्रशशासह २४ निवार्यसात्यकिंकृष्णोयथेष्टंक्रियतामसौ उपारमद्युयुधानोयो
गसात्यकिःकृष्णवारितः २५ सततःपौंड्रकोराजावासुदेवमुवाचह भोभोयादवगोपालइदानींक्वगतोभवान् २६ तांदृष्टुमयसंप्रा
प्तोवासुदेवोस्मिसांप्रतम् हत्वात्वांसबलंकृष्णबलैर्बहुभिरन्वितः २७ अहमेकोभविष्यामिवासुदेवोमहीतले यच्चक्रंतवगोविंद
प्रथितंसुप्रभंमहत् २८ अनेनतवचक्रेणपीडितोस्मिचतद्दृणे चक्रमस्तीतिमद्वीर्यंतवमाधवसांप्रतम् २९ नाशयिष्यामितत्सर्वं
सर्वक्षत्रस्यपश्यतः शार्ङ्गीतिमांविजानीहिनत्वंशार्ङ्गीतिशिष्यते ३० शरत्वमस्तीतित्तद्वीर्यंतवमाधवसांप्रतम् नाशयित्वाहवेचा-
हंगदीचाहंजनार्द्दनम् ३१ मामेवहिसदाब्रूयुर्जानंतोवीर्यशालिनः आदौत्वंबलवद्बद्धान्हत्वास्त्रीबालकान्बहून् ३२ गाश्च
हत्वामहागर्वस्तुवृत्तसंप्रतिवर्तते तत्तेहंव्यपनेष्यामियदितिष्ठसिमत्पुरः ३३ शस्त्रंगृहाणगोविंदयदियोद्धुंव्यवस्थितः इत्युक्त्वा-
बाणमादायतस्थौपार्श्वेजगत्पतेः ३४ एतद्वचनमाकर्ण्यवासुदेवस्यभाषितम् स्मितंकृत्वाहरिःकृष्णोबभाषेपौंड्रकंनृपम् ३५
कामंवदनृपत्वंहिपातव्यस्मिसदानृप गोघातीबालघातीचस्त्रीहंतासर्वथानृप ३६ चक्रीभवगदीराजन्शार्ङ्गीचसततंभव
नामधेयंतृथामह्यंवासुदेवेतिचप्रभो ३७ शार्ङ्गीचक्रीगदीशंखीत्येवमाद्द्विदृयाप्मम किंतुवक्ष्यामिकिंचित्तुशृणुष्वयदिमन्यते क्षत्रिया-
बलिनोयेतुस्थितेमयिजगत्पतौ ३८ तथानुब्रुवतेत्वांहिजीवत्येवमयिप्रभो यत्तेचक्रंमहाघोरमसकृत्शतकरंमहत् ३९

स्यानाशादितिभावः २९ ३० ३१ ३२ ३३ ३४ ३५ गोघातीवृषभासुरवधात् बालघातीपञ्चभिर्णाकंसद्वाराघातनात् ३६ मह्यंमम ३७ ३८ ३९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 तांप्रेषयामासनिवर्तयामासेत्यर्थः १९ २० २१ सहस्रारं शतारमितिकार्यभेदात्रूपभेदः २२ २३ २४ २५ इतिश्रीमहाभारतेखिलेषु

ततःशिलांसमादायप्रेषयामासकेशवम् तांशिलांप्रेषयामासतस्मैयदुकुलोद्वहः १९ पौंड्रेणसुचिरंकालंविक्रीड्यभगवान्हरिः तत
श्चक्रंसमादायनिशितंरक्तभोजनम् २० दैत्यमांसप्रदिग्धांगंनारीगर्भविमोचनम् शातकुंभमयंघोरंदैत्यदानवनाशनम् २१ सह
स्रारंशतारंतदद्भुतंदैत्यभीषणम् ऐश्वर्यवर्मपरमंनित्यंस्रग्गणार्चितम् २२ विष्णुःकृष्णस्तथाशार्ङ्गीनित्ययुक्तःसदाहरिः जघा-
नतेनगोविंदोपौंड्रकंनृपसत्तमम् २३ तस्यदेहंविदार्याशुचक्रंपिशितभोजनम् कृष्णस्याथकरंभूयःप्रापसर्वेश्वरस्यह २४ ततः
सपौंड्रकोराजागतासुःप्रापतद्भुवि निहत्यभगवान्विष्णुर्दुर्विज्ञेयगतिःप्रभुः प्रतिपेदेसुधर्मांतुयादवैःपूजितोहरिः २५ इतिश्रीम
हाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांपौंड्रकवासुदेववधोनामशततोपरिप्रथमोऽध्यायः १०१ वैशंपायनउवाच
निषादेशंततोरामःशक्त्यावीर्यवतांवरः आजघानस्तनद्वंद्वेसिंहनादंव्यनीनदत् १ ततःक्रुद्धोनिषादेशोरामंमत्तंमहाबलम् गदया-
लोकविख्यातोजघानस्तनवक्षसि २ आहतःसतुतेनाशुबलभद्रोमहाबलः उभाभ्यांचैवरामस्तुकराभ्यांविष्णुपुंगवः ३ गदांगृह्य
महाघोरामायांतींप्राणहारिणीम् दुद्रावाथनिषादेशःसमुद्रंमकरालयम् ४ धावत्येवंतदाराज्ञिएकलव्येनिषादपे धावत्येवंचरा
मोपियत्रयातोनिषादपः ५ सागरंसंप्रविश्याशुगत्वायोजनपंचकम् भीतएवतदाराजन्नेकलव्योनिषादपः ६ कंचिद्द्वीपांतरंराज
न्प्रविश्यन्यवसत्तदा ततोरामोनिषादेशंजिगाययदुनंदनः ७ तांसभांमणिरत्नाढ्यांप्रविवेशहलायुधः सात्यकिर्युद्धसंसक्तस्तांस
भांप्रविवेशह ८ अन्येचयादवाराजन्यथायोगमुपस्थिताः आसीनेषुचसर्वेषुवृष्णिवीरेषुसर्वतः ९ अभिवाद्ययथायोगंवृष्णी
न्सर्वांश्चकेशवः उवाचवचनंकालेभगवान्देवकीसुतः १० दृष्टंकैलासशिखरंशंकरोनीललोहितः सतुमह्यंयदुवराप्रीतिमांश्चवद
दौवरम् ११ तत्रदेवाःसमायातामुनयश्चतपोधनाः दृष्टवांशंकरश्चैवप्रीतस्तुत्वासमाययौ १२ अत्यद्भुतमयादृष्टंरात्रौयादवस
त्तमाः पिशाचौद्वौमहाघोरौवदंतौमामिकांकथाम् १३ मृगयांचक्रतुस्तौतुचिंतयंतौतुमांसदा दृष्टवांतौतुराजेंद्राःप्रीतिमंतौतपस्वि
नौ १४ भक्तिनम्रौमहात्मानौप्रणामंचक्रतुस्तदा ततोहंसुर्वथाप्रीतस्तौनीतौस्वर्गमुत्तमम् १५ तोषयित्वामहादेवंमयाचाद्यसमा
गमम् वैशंपायनउवाच ततस्तेवृष्णयःसर्वेदेवदेवंशशासिरे १६

हरिवंशेभविष्यपर्वणिटीकायांकैलासयात्रायांशततोपरिप्र
थमोऽध्यायः १०१ निषादेशमितिनिषादेशंएकलव्यं १ २ ३ प्राणहारिणींज्ञात्वादुद्राव ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सर्वथाकृतकृत्यास्तेवृष्णयःकेशवाश्रयाः यादवाःसर्वएवैतेस्वंस्वंजग्मुर्यथालयम् १७ अभ्यंतरंजगन्नाथःप्रविश्यहरिरीश्वरः रुक्मि
णीसत्यभामाभ्यामाचचक्षेयथाभवत् १८ तेप्रीतेप्रीतियुक्तेनकेशवेनसमन्विते एतत्तेसर्वमाख्यातंकेशवस्यचचेष्टितम् १९ शशास
पृथिवींकृत्स्नांदुष्टान्हत्वामहाबलान् नरकंघोरकर्माणंपौंड्रकंनृपसत्तमम् २० हयग्रीवंनिशुंभंचतथास्कंदोपसुंदकौ रक्षांसिविप्रान्दे
वेशोमुनीन्मुनिवरार्चितः २१ विप्रेभ्यश्चददौवित्तंगाश्चदत्वासकेशवः अग्निहोत्रंप्रयुंजानोब्राह्मणांश्चसक्रतुपर्ययन् २२ मुनींश्चब्रह्म
चर्येणदेवान्यज्ञैरनेकधा स्वधयाचपितॄन्सर्वान्प्रीणयन्नेवसर्वदा २३ तस्मिन्शासतिदेवेशेराज्यंनिष्कंटकंप्रभो सुखमेवप्रजाः
सर्वाजीवंतिब्राह्मणादयः २४ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांपौंड्रकवधसमाप्तौशततोपरिद्वि
तीयोऽध्यायः १०२ जनमेजयउवाच भूयएवद्विजश्रेष्ठशंखचक्रगदाभृतः चरितंश्रोतुमिच्छामिविस्तरेणतपोधन १
नहिमेतृप्तिरस्तीह शृण्वतःकेशवींकथाम् कोनुनामहरेर्विष्णोर्देवदेवस्यचक्रिणः २ शृण्वंस्तथास्मरन्वापितृप्तिंयातिदिवानिशम्
पुरुषार्थायमेवंकोयत्कथाश्रवणंहरेः ३ कथमासीज्जगद्भर्तुर्हंसस्यडिभकस्यच समितिःसर्वभूतानांसदाविस्मयदायिनी ४ विच
क्रस्यकथयुद्धंदानवस्यमहात्मनः सतयोर्मित्रतांयातइत्येवमनुशुश्रुम ५ तौसुतौवीर्यसंपन्नौशिष्यौभृगुसुतस्यह सर्वास्त्रकुश
लौवीरौहंसद्वंद्वपुरौकिल ६ संग्रामःसुमहानासीदित्युक्तंभवतापुरा तयोश्चनृपयोर्विप्रकेशवस्यजगत्पतेः ७ कस्यपुत्रौसमु
त्पन्नौयथाभूद्विग्रहोमहान् अष्टाशीतिसहस्राणिदानवानांतरस्विनाम् ८ बलान्यथविचक्रस्यशितशूलधराणिच आसन्यु-
द्धेमहाराजदानवस्यमहात्मनः ९ यदूनामंतरंप्रेप्सुर्यदूनांयुद्धकांक्षया देवासुरेमहायुद्धेदेवान्जयतिदुर्धरः तद्वधार्थंसदायत्न
मकरोत्त्वंवकेशवः १० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिहंसडिभकोपाख्यानेशततोपरितृतीयोऽध्यायः १०३
वैशंपायनउवाच आसीत्शाल्वेषुराजेंद्रब्रह्मदत्तोनृपोत्तमः नाम्नाराजन्सपूतात्मासर्वभूतदयापरः १ पंचयज्ञपरोनित्यं
जितात्माविजितेंद्रियः ब्रह्मविद्वेदविच्चैवसदायज्ञमयःशिवः २ तस्यभार्येमहीपालरूपौदार्यगुणान्विते बभूवतुःसुसंपन्ने-
अनपत्येनृपोत्तम ३ सताभ्यांसुसुंदरीराजाशच्याशक्रइवांबरे नाम्नामित्रसहोनामसखाचासीद्द्विजोत्तमः ४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वरयवरतम् ११ १२ १३ १४ भृगिरिटीभृंगिरिटिंच १५ १६ १७ १८ १९ २० २१ २२ पितुर्ब्रह्मदत्तस्य-
सख्युःमित्रासहस्य २३ २४ २५ २६ २७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांशतोपरिपंचमोऽध्यायः १०५

श्रीभगवानुवाच वरंवरयभद्रंवांयथेच्छावांतथास्तुवौ तावूचतुस्तदाराजन्प्रीतस्त्वंभगवन्यदि ११ देवासुरैश्चमुसुरैर्व्येर्यक्षै
गंधर्वदानवैः आवामजय्यौसर्वस्मिन्नेषनौप्रथमोवरः १२ द्वितीयोनौविरूपाक्षरौद्रास्त्राणांचसंग्रहः माहेश्वरंतथारौद्रमस्त्रंब्रह्म-
शिरोमहत् १३ अभेद्यंकवचंदिव्यमच्छेद्यंचापिकार्मुकम् परशुंचतथाशर्वसदारक्षार्थमेवच १४ सहायौहिमहादेवभूतौयुद्धेहि
गच्छताम् एवमस्त्वितिदेवेशआहभृंगिरिटीहरः १५ कुंडोदरंविरूपाक्षंसर्वप्राणिहितेरतम् युवामथचभूतेशौसहायौसत्तरणे
१६ संग्रामंगच्छतांघोरमेतयोर्बलशालिनोः इत्युक्त्वाभगवान्शर्वस्तत्रैवांतरधीयत १७ ततस्तौवीर्यसंपन्नौहंसोडिभकएवच द्व
तास्त्रौशस्त्रसंपन्नौचापिनौवीर्यवत्तरौ १८ आमुक्तकवचौवीरावजय्यौदेवदानवैः अत्यंतभक्तौदेवेशेशंकरेनीललोहिते १९ नित्यौ
त्सवकरौदेवभस्मोद्धूलनशोभिनौ कृतत्रिपुंड्रकौनित्यंजटायुक्तशिरोधरौ २० रुद्राक्षार्पितसर्वांगौव्याघ्रचर्मांबरावृतौ नमःशिवाय
शांतायमहादेवायधीमते २१ इत्यादिभिःसहादेवंस्तुवंतौनामभिःशिवम् साक्षादिवमहादेवौरेजतुर्जलधारिणौ २२ ततःस्वभ-
वनगत्वापितुःपादावगृह्णताम् पितुश्चसख्युर्बलिनोमातुश्चचरणौतदा २३ जनार्दनोपिधर्मात्माकालेनमहतानृप विद्यापारमहा
बुद्धिर्युक्तेनासावुपेयिवान् २४ सचविष्णुर्हृषीकेशंपीतकौशेयवाससम् अह्लातलपरोनित्यमुपास्तेविजितेंद्रियः २५ हंसश्चडि
भकश्चवकृतदारौबभूवतुः जनार्दनोपिधर्मात्माकृतदारोबभूवह २६ सर्वेतेयज्ञनिरताःपंचयज्ञपरास्तथा स्वदारनिरताःसर्वेगु
रुशुश्रूषणेरताः धर्मएवपरंश्रेयइतितेमनिरेनृप २७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांहंस
डिभकोपाख्यानेशतोपरिपंचमोऽध्यायः १०५ वैशंपायनउवाच ततःकदाचित्तौवीरौमृगयामटतुःकिल जनार्दने
नसहितौरथैरश्वैर्गजैरपि १ वनंगत्वातुतौवीरौसिंहव्याघ्रांश्चजघ्नतुः शितैर्बाणैर्महाराजवराहानथसर्वशः २ व्यालानन्यान्मृगा
न्हिंस्रान्श्वभिश्चसहितौनृप एषआयातिविपुलोवराहोदीर्घलोचनः ३ एतंबाणेनसंछिंधियातिचायंमृगाधिपः अयमन्योथ
महिषःशृगप्रोतसरीसृपः ४ एतेखलुमृगाःसार्द्दूलावैबाधंतिसर्वशः एतद्भ्रमतिसर्वत्रभीतशशकुलमहत् ५
५ ५ ५

१ २ ३ ४ बाधंतिबाधामनुभवंतिशावैःपातैःसहिताः ५ ५ ५ ५ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५ ताभ्यांस्त्रीभ्यांसह ६ सदा‌इतितेनवैष्णवेन सत्रेणशंकरस्यार्चनंविष्णुशंकरयोर्वस्तुतोभेदाभिप्रायेण ७ ८ ९ १० ११ १२ १३ १४

तस्यराज्ञोमहायोगीवेदवेदांततत्परः अनपत्यःसविप्रेंद्रोयथाराजाबभूवह ५ सराजासहितस्ताभ्यामर्चयामासशंकरम् पुत्रार्थंशूलिनं-
सर्वंदशवर्षाण्यनन्यधीः ६ सविप्रोवैष्णवंसत्रंपुत्रार्थेसमयोजयत् अर्चितस्तेनराजेंद्रशंकरोनीललोहितः ७ आत्मानंदर्शयामा-
सस्वप्नेराजानमब्रवीत् प्रीतोस्मितवभद्रंतेवरंवरयसुव्रत ८ अथराजाजगन्नाथमुवाचेदंस्मयन्निव पुत्रोमेभवतोहितथेत्युक्त्वा
वृषध्वजः ९ अंतर्धानंगतःशंभुःप्रतिबुद्धस्ततोनृपः सोपिमित्रसुहृद्विद्वान्देवंकेशवमव्ययम् १० पंचवर्षंजगन्नाथमर्चयामास
भक्तितः अर्चितस्तेनविप्रेणदेवदेवोजनार्दनः ११ पुत्रमेकंददौतस्मैस्वात्मनासदृशंहरिः तेभार्येगर्भमाधत्तांतेजसाशंकरस्यह १२
विप्रभार्यामहाराजवैष्णवंतेजआदधत् महिष्यौतेमहावीर्यौपुत्रौशंकरनिर्मितौ १३ असूयतामहीपालक्रमेणैवनृपस्यह सतयोश्च
महाराजनामकर्मादिकाःक्रियाः १४ चकारविधिवत्सर्वाविप्रेभ्योदान्महद्धनम् सचविप्रोविनीतात्मापुत्रमेकंहिलब्धवान् १५
साक्षाद्विवजगन्नाथस्थितंपुत्रात्मनानृप जातकर्मादिकंसर्वंब्राह्मणःसचकारह १६ तौकुमारावयंचैवत्रयःसवयसोभवन् वेदा
नधीत्यतेसर्वान्श्रुत्वाचान्वीक्षिकींतथा १७ धनुर्वेदंतथास्त्रेचनिपुणास्तेभवंस्तदा हंसोज्येष्ठोनृपसुतोडिंभकोनंतरोभवत् १८
सचविप्रसुतोराजन्जनार्दनइतिस्मृतः अन्योन्यमित्रतांयाताःसर्वेचैवकुमारकाः १९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभ-
विष्यपर्वणिहंसडिंभकोत्पत्तौशततोपरिचतुर्थोऽध्यायः १०४ वैशंपायनउवाच हंसश्चैवतपश्चचारतथाडिंभोमहामतिः
मनश्चक्रतुरात्मानौशंकरस्यनृपोत्तम १ गत्वातुहिमवत्पार्श्वेतपश्चक्रतुरूर्जसा उद्दिश्यशंकरंशर्वंनीलग्रीवमुमापतिम् २ वीर्यास्त्रे
चैवनौस्यातामित्याध्यायन्तुमानसे एकाग्रौप्रयतौभूत्वावाय्वम्बुप्राशिनौनृप ३ नमस्तेदेवदेवेतिशंकरेतिदिवानिशम् हरशर्वेशि
वानंदनीलग्रीवउमापते ४ वृषध्वजविरूपाक्षहर्यक्षजगतांपते भक्तप्रियगिरीशेशवासुदेवशिवाच्युत ५ सद्योजातमहादेवदे
वदेवगुहाशय भूतभावनदेवेशप्रणवात्मन्सदाशिव ६ इत्यादिनामभिर्नित्यंस्तुवंतौशंकरंभवम् हृदिकृत्वाविरूपाक्षंतपस्तेपतुरू
र्जसा ७ निर्ममौनिरहंकारौमौनव्रतसमास्थितौ वर्षाणिहतदाराजन्पंचचक्रतुरोजसा ८ ततःप्रीतोभवच्छर्वस्ताभ्यांसंयमनेन
च सद्दौदर्शनंनैजंव्याघ्रचर्मांबरोहरः ९ त्रियक्षःशंकरःशर्वःशूलपाणिरुमापतिः अग्रतःसंस्थितशर्वंचंद्रार्द्धकृतशेखरं तौदृष्ट्वाप्र
णमनसौनमश्चक्रतुरंजसा १०

१५ १६ १७ १८ १९ इतिश्रीम·खि·ह·भविष्यप·टीकायांशततोपरिचतुर्थोऽध्यायः १०४ १ २ ३ ४ ५ ६ ७ ८ ९ त्रियक्षःत्रिभिर्वेदैरिज्यतइति
त्रियक्षःयज्ञेशः १०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यदिस्यात्राजसूयःतर्हितत्रगच्छामोन्यथात्रैवास्महे १० एवंकर्मनिष्ठैःसहसंवादंकृत्वानैष्कर्म्यनिष्ठायुक्ताउच्छेत्तुंप्रवृत्ताइत्याह ततोदेशानित्यादिना ११
मंत्रब्रह्ममंत्रमयंब्रह्मप्रणवरूपं ब्रह्मसूत्रंब्रह्मविदाप्नोतिपरमित्यादितत्रनिर्दिष्टं यत्पदंपदनीयंवस्तुतत्रसक्ताःतस्यास्यर्थंयतमानाः १२ १३ १४ १५

मुनयऊचुः यदिस्यात्तत्रगच्छामोवयंशिष्यैर्नृपोत्तम आस्महेवान्यथाराजन्नित्यूचुःकिलतापसाः १० वैशंपायनउवाच
ततोदेशान्महाराज गंतुंनिश्चितमानसौ पुष्करस्योत्तरंतीरं दुर्वासायत्रतिष्ठति ११ यतयोनियताभूत्वामंत्रब्रह्मनिषेविणः ब्रह्मसू
त्रपदेसक्तास्तदर्थालोकतत्पराः १२ निर्ममानिरहंकाराःकौपीनाच्छादनव्रताः तमात्मानजगद्योनिंविष्णुविश्वेश्वरंविभुम् १३ ब्र
ह्मरूपंशुभ्रंशांतमक्षरंसर्वतोसुखम् वेदांतमूर्त्तिमव्यक्तमनंतंशाश्वतंशिवम् १४ नित्ययुक्तंविरूपाक्षंभूताधारमनामयम् ध्या
यंतंसर्वदादेवमनसासर्वतोसुखम् १५ दुर्वाससासदोपास्यंवेदांतैकरसंगुरुम् तर्कनिश्चिततत्त्वार्थाज्ञाननिर्मलचेतसः १६ हंसाः
परमहंसाश्चशिष्याद्दुर्वाससःप्रभो गत्वातत्रमहात्मानौतौद्दृक्षातूर्ध्वरेतसम् १७ दुर्वाससंमहाबुद्धिंविचिन्वानपरंपदम् क्रुद्धोय
दिसदुर्वासादग्धुंल्लोकानिमान्क्षमः १८ देवाअपिचयंदृष्ट्वाक्रुद्धंवेन्नक्षमाःसदा योमूर्तिःसदायस्तुरुद्रात्माविश्वरूपधृक् १९
रक्तकौपीनवसनोहंसःपरमएवच दृक्षेणंचतयोरेवंबुद्धिरासीन्महामते २० कोनामासौमहाभूतःकाषायीवर्णवित्तमः कश्चायमा-
श्रमोनामविहायचगृहाश्रमम् २१ गृहस्थएवधर्मात्मागृहस्थोधर्मवित्तमः गृहस्थोधर्मरूपस्तुगृहस्थोवर्णएवच २२ गृहस्थश्च-
सदामाताप्राणिनांजीवनंसदा तंविनान्येनरूपेणवर्त्ततेयोतिमूर्खवत् २३ उन्मत्तोयंविरूपोयमथवामूर्खएवच ध्यायन्निवसदा
चायमास्तेवंचयितापिवा २४ किमेतेप्राकृतज्ञानाध्यायतइतिकिंचन वयमेतान्दुरारोहानाश्रमातरकल्पकान् २५ स्थापयिष्या
महेसर्वान्मदबुद्धीनिमान्गृहे बलादेवद्विजानेतान्मूढविज्ञानतत्परान् २६ असद्ग्राहगृहीतांश्चबालीशान्दुर्मतीनिमान् एषां
शास्ताचकोमूढानविप्रोवयमत्रह २७ धर्मवर्त्मनिसंस्थाप्यपुनर्यास्यावनिर्वृतौ इतिसाचिंत्यतौवीरौविप्रेणसहितौनृप २८ ज
नार्द्दनेनराजानौमोहान्मग्यक्षयान्नृप समीपंतस्यराजेंद्रयतेःसंयतचेतसः २९ गत्वाचप्रोचतुरुभौदुर्वाससमतौद्वयम् यतो-
श्चानियतान्क्रुद्धौराजानौराजसत्तम ३० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिहंसडिभकोपाख्यानेशततोपरिसप्त
मोऽध्यायः १०७

१६ १७ १८ १९ २० वर्णवित्तमःवर्णविभागविदांश्रेष्ठइत्युपहासःसर्ववर्णबाहिष्कृतइत्याशयः २१ २२ २३
२४ २५ २६ संस्थाप्यएषांशास्तारमित्यर्थात् २७ २८ २९ ३० इतिश्रीमहा० खि० ह० भवि० टीकायांशततोपरिसप्तमोऽध्यायः १०७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

६ ७ ८ ९ अनूपंसजलप्रदेशस्तेनहितंसानूपं वीजन्मारुतवतात्मासानूपंचेतिविग्रहः १० ११ १२ १३ १४ १५ १६
सत्रंयजतःअनुतिष्ठतः १७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांशततोपरिषष्ठोऽध्यायः १०६ जनार्दनजतिसदःयज्ञमंडपम् १ २ ३

शावंस्तनंपिबत्साधुनहंतव्यमिदंशुभम् गृहीतव्यमिदंसर्वंनिरुध्यश्वगणैरिह ६ इत्यादिशब्दःसुमहान्मृगयांकुर्वतोर्नृप क्षत्रियाणांनृप
श्रेष्ठव्याधानांचैवधावताम् ७ हत्वामृगान्सुबहुशोव्याघ्रान्सिंहान्नृपोत्तमौ श्रमंचजग्मतुर्वीरौमध्यंयातेदिवाकरे ८ अलंहिमृगया-
स्माकंश्रमःसमुपजायते इत्यूचतुर्महाराजपुष्करंजग्मतुःसरः ९ सरःसमीपमागम्यमुनिसिद्धनिषेवितम् वीजन्मारुतसानूपश्रमात्त-
त्रसुखंस्थितौ १० ततोजनाःसरःसर्वेविगात्यश्रमकर्शिताः विश्रम्यसरसस्तीरेतदासातेपरात्तवत् ११ जनार्दनेनसहितौहंसडिभ
कएवच सरःकच्चित्समाश्रित्यसमंसत्यज्यातिष्ठतः १२ विश्रम्यसरसस्तीरेतदासातेसुखंनृपौ अशृणुतांपरंब्रह्मसुनिसुखैःसमी
रितम् १३ मध्यंदिनंतथासर्वैःसवनंसस्वरंनृपौ ततःप्रीतौनृपौभूत्वाश्रुत्वावेदध्वनिंतदा १४ ऐच्छेतांतौतदाद्रष्टुंयज्ञंमुनिकृतं
तदा स्थापयित्वाततःसेनांसर्वांमृगसमन्विताम् १५ आदायचमहाचापेशरान्कतिचिदेवच जनार्दनस्तदावीरोहंसोडिभकएवच
१६ पदातिनौमहाराजजग्मतुश्चाश्रमंकिल महर्षेःकाश्यपस्याथसत्रंवैध्यावसंज्ञिकम् यजतांमुनिभिःसार्द्धंजपहोमपरायणैः
१७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांहंसडिभकोपाख्यानेमृगयावर्णनंनामशततोपरिषष्ठोऽध्या
यः १०६ वैशंपायनउवाच जनार्दनश्चधर्मात्माहंसोडिभकएवच सदःप्रविश्यसत्रस्यनमश्चक्रुर्मुनीश्वरान् १ ता
नागतान्महात्मानोमुनयःशिष्यसंयुताः अर्घ्यपाद्यासनादीनिचक्रुःपूजांचयत्नतः २ तौनृपौसचविप्रेंद्रःसपर्यामतिगृह्यच प्रीता
त्मानौमहात्मानआसतेससुखंनृप ३ ततोहंसोबभाषेतान्मुनीन्संयतवान्नृप पिताहिनौमुनिश्रेष्ठायष्टुमिच्छत्ससाधनम् ४
गंतव्यंतत्रयुष्माभिःसत्रांतेमुनिसत्तमाः राजसूयेनयज्ञेनकृत्वादिग्विजयंवरम् ५ याजयिष्यामहेविप्राःपितरंधार्मिकंनृपम् आ
यांतुतत्रविप्रेंद्राःसशिष्याःसपरिच्छदाः ६ वयमद्यैवसहितौदिशोजेष्यामहेद्वयम् शक्तावयामिहैवेतत्कर्तुंसैनिकसंचयैः ७
आवयोःपुरतःस्थातुंनशक्तादेवदानवाः कैलासनिलयाद्देवाद्वरंलब्ध्वास्वयत्नतः ८ अजय्योशत्रुसंघानामस्त्राणिविविधानि
च इत्युक्त्वाविररामैवहंसोमदबलान्वितः ९

४ ५ सपरिच्छदाःअग्निहोत्रादिसामग्रीसहिताः ६ अहंचायंहयसामग्रीरहितंय
थास्यात्तथाकेवलंसैनिकैःपुरुषैःसहएवदिग्विजयाख्यंकार्यकर्तुंशक्ताविनियोजना ७ वरंलब्ध्वाःअजेयाखेतियोजना ८ ९ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ब्राह्मणंजनार्द्दनं इतरांन्स्त्रीयान्प्रतिध्वंसनइतः शीघ्रंप्रस्थानंकुर्वेत्विति वचनंउवाचेत्यर्थः ३ तदाह इतोगच्छतेति भोराजानावित्यादिवाक्यांतरं ४ ५
मंदज्ञौमंदफलंगार्हस्थ्य मेवजानंतौ ६ गंतुंदेशांतरं निषेद्धुंसन्यासधर्मादपाकृष्टुम् ७ ८ हाइतीतिच्छेदः ९ १० ११ १२ १३
वायुवयोःसज्जीवःसदितिमृत्युनास्वर्गमनुल्लाभादितिभावः १४ एतावतासंन्यासिद्रोहेणजरासंधोबंधुत्वंयुवयोस्त्यक्ष्यतीत्यर्थः १५ वांयुवाभ्याम् १६ १७

ब्राह्मणंचक्षुषापश्यन्सौम्येनान्येनकेवलम् उवाचवचनंराजन्ध्वंसतध्वंसतेतिच ३ इतोगच्छथराजानौकिंविलंबितमाचिरम्
नवांवचनसंभूतंरोषंधारयितुंक्षमे ४ अन्यथावांमहीपालान्सर्वान्दग्धुमहंक्षमः किमतःसाहसंवक्तुंकश्च्यशक्नोतिमत्पुरः ५ द्र
र्पवांल्लोकविख्यातःशंखचक्रगदाधरः व्यपनेष्यतिमंदज्ञौकिंवोवक्ष्यामिसांप्रतम् ६ ततउत्थायधर्मात्मागंतुमैच्छद्यतीश्वरः ततोनि-
षेद्धुंहंसस्त्वंयततेस्मयतीश्वरम् ७ तस्यबाहुंसमादायहंसोनृपवरोत्तमः कौपिनंचिच्छिदेक्रूरःकृतांतइवसत्तम ८ यतयोन्येप-
लायंतिदिशोदशविचेतसः कृष्णंहेतिवदन्विप्रोमित्रभावाज्जनार्द्दनः ९ न्यवारयद्यथाशक्तिकिमिदंसाहसाश्विनि दुर्वासाःसत्यधर्म
स्तुहंतुमीशोपितंततः १० मंदमंदमुवाचेदंहंसंडिंभकमेवच शापेनाहंसमर्थोपिहंतुंराजकुलाधमौ ११ तथापिनकरोम्येतंयतयो
ह्यत्रतेवयम् योहिदेवोजगन्नाथःकेशवोयादवेश्वरः १२ शंखचक्रगदापाणिर्युवांव्यपनेष्यति लोकेतस्मिन्यदुश्रेष्ठेरक्षत्येवज
गत्सतो १३ युवयोःसर्वथाजीवःसज्जीवइतिमेमतिः जरासंधोपिवांबंधुःसचवक्तुंनचेच्छति १४ ईदृशंलोकविद्विष्टंसहिधर्मपथे
सदा एतावतासवांबंधुर्नहिभूयोभविष्यति १५ विद्वेषोह्यस्तुवांतस्यमागधस्यमहीपतेः श्रुत्वेदंघोररूपंतुसहिबंधुःसहेतचेत् १६
धर्मनाशोभवेत्तस्यनात्रकार्याविचारणा इत्युक्त्वागच्छगच्छेतिहंसंप्राहपुनःपुनः १७ जनार्द्दनमुवाचेदंदुर्वासायतिसत्तमः स्वस्ति
स्तुतवविप्रेंद्रभक्तिरस्तुजनार्द्दने १८ संगतिस्तवतस्यास्तुशंखचक्रगदाभृतः अद्यश्वोवापरश्वोवासाधुरेवसदाभवान् १९ नहिसा-
द्धोर्विनाशोस्तिलोकयोरुभयोरपि गच्छसर्वंपितुर्ब्रूहिज्ञात्वावृत्तंयथाखिलम् २० इतिश्रीमहाभारतेखिलेषुहरिवंशेभवि-
ष्यपर्वणिकैलासयात्रायांहंसडिंभकोपाख्यानेदुर्वासेभाषणेशततोपरिनवमोऽध्यायः १०९ वैशंपायनउवाच तत-
स्तौहंसडिंभकौक्रुद्धौकालेनचोदितौ शिक्यंकमंडलुंचैवहृदिदलंदारुमेवच १ दंडान्पात्रविशेषांश्चछित्वाभित्वाचसर्वशः तस्मि
न्देशेमहाराजव्याधेर्मासान्यदीदहत् २

१८ १९ २० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांकैलासयात्रायांहंसडिंभको-
पाख्यानेदुर्वासभाषणंनामशततोपरिनवमोऽध्यायः १०९ ततस्तावितिहृदिदलंदारुंगोकर्णाकारंभोजनपात्रंदारुमितिपुंस्त्वमार्षं १ पात्रविशेषान्शाल्यग्रामसंपु-
टादीन् २

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ज्ञानलेशादिति १ दंभः दंभमूर्तिः २ ३ ४ त्वद्विनेतात्वशाब्दिकः ५ ६ ७ ८ ९ १० ११ १२ १३ अग्रअग्र्यः
१४ १५ १६ अन्यज्ञानंधर्मप्रभवं धर्मस्यफलं युवयोर्ज्ञानं तु पापस्य विधातृरूपं पापोत्पत्तिहेतु १७ १८ १९ इतिश्रीमहाभारतेखिलेषु-

हंसडिंभकाऊचतुः ज्ञानलेशाद्द्विहीनात्मन्नुकिंतेव्यवसितंद्विज कश्चायमाश्रमोविप्रभवताय‌ःसमाश्रितः १ गृहमेधंपरित्य
ज्यांकिंत्वयासाधितपदम् दंभएवभवान्व्यक्तशंकेनास्त्यत्रकारणम् २ लोकांश्चेमान्सदामूढनाशयिष्यसिनिर्वृतः एतान्सर्वा-
न्विनेतासिनरकेपातयिष्यसि ३ स्वयंनष्टःपरान्मूर्खनाशयिष्यसियत्नतः अहोशास्ताकथंनास्तितवमदमतेद्विज ४ सर्वथा
त्वद्विनेताचपापंनास्त्यत्रसंशयः त्यक्तेममाश्रमंविप्रगृहीभवयतात्मवान् ५ पंचयज्ञान्सदाविप्रकुरुयत्नपरोभव ततःस्वर्गंपरंगत्वास्व
र्गेद्विजमहत्सुखम् ६ एषश्रेयःपथोविप्रजीवितेचेत्स्पृहातव इत्युक्तवंतौधर्मात्माश्रुत्वाविप्रोजनार्दनः ७ उवाचचयतिर्दृक्षाप्रण
म्यासौकृतनीतवत् माब्रूतामीदृशंवाक्यंराजानौमंदचेतसौ ८ अश्राव्यमीदृशंघोरंलोकयोरुभयोरपि कोवक्तुमीशोमंदात्मायदिजी
वेत्सबांधवः ९ सर्वथाकालएवायंयुवयोर्मंदचेतसोः समाप्तआयुषःशेषोब्रह्मदंडहतौयुवाम् १० एतेहियतयःशुद्धाज्ञानदीपित-
चेतसः ज्ञानाग्निदग्धकर्माणःप्राणान्प्राणेषुजुह्वति ११ कृतेवामीदृशंवाक्यंकःसमर्थोह्यनुब्रुवन् सर्वथाज्ञातमस्माभिःसमाप्तमि
हजीवितम् १२ चत्वारआश्रमाःपूर्वमृषिभिर्विहितानृपौ ब्रह्मचारीगृहस्थश्चवानप्रस्थश्चभिक्षुकः १३ तेषामग्र्यश्चतुर्थोयमाश्र
मोभिक्षुकःस्मृतः आस्तेतस्मिन्महाबुद्धिःसहिपुण्यतरःस्मृतः १४ नोपासिताभवद्भ्यांश्चवृद्धाःसम्यग्विनीतवत् ज्ञानंनाप्तंतपस्ते-
भ्यस्तथाचैवंवदतकः १५ अश्राव्यमीदृशंघोरंमयाप्राणभृतान्नृप किंकरिष्यामिमंदात्मन्नुमित्रत्वाद्भवतोनृप १६ ज्ञानंयदाप्तंभ
वतागुरुभ्यस्तदत्रदुःखायहिकेवलंनृप ज्ञानंहिधर्मप्रभवंयथेष्टंबलाद्धिपापस्यविधातृरूपम् १७ युवांविहायर्यास्येवापतंतयेवाशि
लातलम् पिबेयंवाविषंघोरंपतेयंवामहोर्मिषु १८ आत्मानंवात्रसत्पक्षेपश्यतांशृण्वतांपुनः इत्युक्त्वाविलप्यैवंमाब्रूतमभितो
वदन् १९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांहंसडिंभकोपाख्यानेशततोपरिअष्टमोऽध्यायः
१०८ वैशंपायनउवाच ततःक्रुद्धोयदुर्वासाधक्ष्यन्निवतयोरसून् एकेनाक्ष्णाथदुर्वासारौद्रेणाग्निद्युजासदा १
पश्यंस्तौचदुरात्मानौरोषव्याकुलितेंद्रियः कुर्वन्निवतदालोकान्भस्मभूतानिमान्नृप २

हरिवंशेभविष्यपर्वणिकैलासयात्रायांहंसडिंभकोपाख्यानेटीकायांशततोपरिअष्टमोऽध्यायः १०८ ५ ५ ततःक्रुद्धइति १ २ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

७ ८ विविशुस्तापसाइतिशेषः ९ १० ११ ल्हादयंतंमुनीन्गोलकंपश्यंतं १२ १३ १४ १५ हंसेनराज्ञाअसादितकल्मषं
ग्रासितदुःखम् १६ १७ १८ १९ २० २१ २२ अस्मिन्स्थाने २३ किंचिदद्दृष्टंवाद्वयंउभयत्रयथाक्रमंयोज्यम् २४

अन्यव्यापाररहितोभूतात्माभूतभावनः विजहारयथाशूमस्रुग्रीवेणपुरानृपे ७ मध्यंदिनेमहाविष्णुःशैनेयेनसहाच्युतः विक्रीडय-
सुचिरंकृष्णाउपारसीत्सयादवः ८ हास्येनवारिताःपूर्वंह्यार्यवचसमास्थिताः इदमंतरमित्येवविविशुस्तांसभांनृप ९ यतयोदीर्घ
तपसाःपुरस्कृत्यतपोधनम् दुर्वाससंसुमनसोददृशुर्यादवेश्वरम् १० गोलक्रीडासमासक्तकरसंस्थितगोलकम् पद्मपत्रविशाला
क्षंविष्णुंतंसात्यकिंहरिम् ११ एकेनाक्ष्णाल्हादयंतंपरेणान्येनगोलकम् यतयश्चमहाराजनृत्यदृश्यंततत्पुरः १२ वृष्णिपःपुंड
रीकाक्षःसात्यकिर्बलभद्रकः वसुदेवस्तथाक्रूरउग्रसेनस्तथानृपः १३ अन्येचयादवाःसर्वेसंभ्रमंप्रतिपेदिरे इदंकिमिदमित्येवं
व्याशंकमनसोभवन् १४ पृष्ठतोप्यनुगच्छंतंदिधक्षंतंजगत्त्रयम् अर्धकौपीनवसनंस्मरंतंकमपिद्विजम् १५ अंतस्तापसमा-
युक्तंछिन्नदंडधरंयतिम् अंतर्ज्वलितरोषेणहंसासादितकल्मषम् १६ नेत्रोत्थितमहावन्हिंप्रेक्षंतंयादवेश्वरम् दुर्वाससंतेददृशु-
र्भीतायादवसत्तमाः १७ किंकरिष्यत्यसौक्रुद्धःकिंवावक्ष्यतिनःप्रभुः इतिप्रांजलयःसर्वेयादवाःप्रतिपेदिरे १८ इदमासनमित्येवं
किंचिदूचुश्चवृष्णायः ततःकृष्णोहृषीकेशःकिंचिदुत्सृत्यतत्पुरा १९ इदमासनमित्येवंस्थीयतामिहनिर्वृतः अहमद्यास्थितोविप्रकिं
करोस्मीतिचाब्रुवीत् २० ततःकिंचिदिवासीनआसनेयतिविग्रहः आसनेसंस्थितेतास्मिन्यतयोवीतमत्सराः २१ आसनानियथा
योगंभेजिरेनिर्वृताःकिल अर्घादिसमुदाचारंचक्रेकृष्णःकिरीटभृत् २२ आहभूयोहृषीकेशोयतिंदुर्वाससंप्रभुम् किमर्थंब्रू-
हिविप्रेंद्रअस्मिन्प्रत्यागमोहिवः २३ दृष्टवाह्यथवाकिंचित्कारणंचास्तिवोमहत् संन्यासिनोद्विजश्रेष्ठायूयविगतकल्मषाः २४
निःस्पृहाश्चसदायूयमस्मत्तोद्विजपुंगवाः प्रार्थ्यंनामनचैवास्तिस्पृहानैवास्तिवोयतः २५ स्पृहाप्रेरितकर्माणःक्षत्रियास्तेतिसुव्रताः
निरूप्यमाणमस्माभिर्विप्रकिंचिन्नदृश्यते २६ नजातेकारणंब्रह्मन्युष्मदागमनंप्रति एतावताचानुमेयंकिंचित्कारणमस्तिवै २७
तद्ब्रूहियदिविद्येतत्वत्तोज्ञास्यामहेवयम् इत्युक्तवतिदेवेशेचक्रपाणौजनार्दने २८ तस्यापिराजन्विप्रस्यभूयःकोपोमहानभूत्
तस्मादप्यधिकःपूर्वात्कोपःसंजायतेमहान् २९ दिधक्षन्निवलोकांस्त्रीन्भक्षयन्निवपश्यतः रोषरक्तेक्षणःक्रुद्धोहसन्निवदह-
न्निव ३०

२५ २६ २७ २८ २९ पश्यतःपुरुषान् ३० ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३ ४ ५ ६ ७ ८ पापकृतान् पापजन्मभाजः ज्ञानेषु ज्ञानसाधनेषु अमानित्वादिषु ९ यानं प्रयाणं १० ११ कर्पटं काषाय
वाससः १२ अर्धप्रोतकपालकं अलाबुफलस्य मूलादग्रांतं द्विधाकृतस्यैकदेशः १३ १४ लोमशाः गलादधः केशवर्जिताः उपरि केशवर्जिता वा

भक्षयित्वा ततो देशात्स्वपुरीं तौ प्रजग्मतुः जनार्दनश्च धर्मात्मा स्नेहादनुययौ तयोः ३ नष्टाविमाविति तदा समेनेदुःखितः परम् गते
ष्वेतेषु सर्वेषु दुर्वासा यतिसत्तमः ४ पलायनपरान्सर्वान्निदग्राहयतीश्वरान् इतो देशाद्धि निर्गत्य पुष्करात्पुण्यसंयुतान् ५ मंदं-
मंदं समाश्वास्य विश्रम्य च ततस्ततः प्रविश्य द्वारकां देवं शंखचक्रगदाधरम् ६ द्रक्ष्याचतस्मै प्रभवे वक्ष्यामो यतिसत्तमाः सद्भिरक्षे
न्जगदिदं धर्मवर्त्मनि संस्थितः ७ आद्यो लोकगुरुर्विष्णुर्यतात्मा तत्त्ववित्प्रियः उद्धृत्य कंटकान्सर्वाञ्छशास पृथिवीमिमाम् ८
स च पापान्महाघोरान्सर्वान्पापकृतान्प्रभुः रक्षेन्नः सकलान्सर्वाञ्ज्ञानेषु नियतात्मनः ९ इदमद्य क्षमा विप्रा यानमद्य विधी
यताम् साहसं यत्कृतं ताभ्यां पात्रभेदादि सत्तमाः १० एतत्सर्वमशेषेण दर्शयाम जनार्दनम् तथेति ते प्रतिज्ञाय यतयो ज्ञानचक्षु
षा ११ छिन्नास्ताभ्यां समादाय शिक्यं दारुमयं तथा द्विदलं कर्पटं चैव कौपीनमथ वल्कलम् १२ कमंडलुं तथा राजन्नर्धप्रोतकपा
लकम् एतान्यन्यानि समादाय द्रष्टुं केशवमाययुः १३ पंचचैव सहस्राणि पुरस्कृत्य महामुनीन् दुर्वाससं तपोयोनिमीश्वरस्यात्मसंभवम्
१४ अहोरात्रेण ते सर्वे द्वारकां कृष्णपालिताम् ययुर्दांता महात्मानो लोमशाः केशवर्जिताः १५ प्रातः प्रविश्य राजेंद्र वापिकायां यतीश्व
राः स्नात्वोपस्पृश्य ते सर्वे यत्नेन महता तदा १६ द्रष्टुमभ्युद्यता विष्णुं कंटकोद्धृतितत्परम् एकरूपं समास्थाय सुधर्मायामवस्थितम्
१७ इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि कैलासयात्रायां हंसडिंभकोपाख्याने यतीनां द्वारकागमनं नाम शतोपरि दशमो
ऽध्यायः ११०

वैशंपायन उवाच

अथ सर्वेश्वरो विष्णुः पद्मकिंजल्कलोचनः श्यामः पीतांबरः श्रीमान्चलद्बाबरभूषणः १
किरीटी श्रीपतिः कृष्णो नीलकुंचितमूर्धजः अव्यक्तः शाश्वतो देवः सकलो निष्कलः शिवः २ क्रीडाविहारोपगतः कदाचिदभवद्धरिः
कुमारैरपरैः सार्धं सात्यकिप्रमुखैर्नृप ३ गोलक्रीडां सुधर्मायामध्ये यादवसत्तमः चकार प्रियकृत्कृष्णो युयुधानेन केशवः ४ म
मायं प्रथमो गोलस्तव पश्चाद्भविष्यति इति ब्रुवंस्तदा विष्णुः सात्यकिं कमलेक्षणः ५ पार्श्वस्था यादवास्तस्य वसुदेवपुरोगमाः उद्धव-
प्रमुखा राजन्नासेदुः क्वचिदत्र वै ६

१५ १६ एकरूपं मुख्या विग्रहं श्रीकृष्णम् १७ इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि टीकायां
शतोपरि दशमोऽध्यायः ११० अथेति पद्मकिंजल्कलोचनः किंजल्कपदं तद्वत्लात्तत्रेत्र ज्ञेयं तेन पद्मपत्रनेत्र इत्यर्थः १ २ ३ गोलक्रीडां गोलाकारे रक्षे द्यूतक्रीडां
४ ५ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५६ ५७ ५८ ५९ ६० ६१ ६२ त्वंसदाअसिरक्षसिच अथाप्येतत् चित्रंआश्चर्यंयदस्माकमीदृशीअवस्थेति ६३ ६४ ६५
६६ ६७ जरासंधोपितयोःपुरःस्थातुंनशक्तइति द्वयोःसंबंधः ६८ ६९ ७० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायां-

ईदृशीयमवस्थानोनेतांस्मरसिकेशव एतत्पुनर्भाग्यमतोनष्टमित्येवचिंतये ५६ मंदभाग्यावयंविष्णोयतोनानःस्मरेःप्रभो कौचि
त्क्षत्रियदायादौगिरीशवरगर्विती ५७ नाम्नाहंसडिंभकौचबाधेतेनोजनार्दन गार्हस्थ्यंहिसदाश्रेयोवदताविनिकेशव ५८
इतस्ततश्चधावंतौवदंतौबहुकिल्बिषम् अयुक्तंबहुभाषंतौधर्षयंतौचनःसदा ५९ इदमन्यत्कृतंदेवअसह्यंपापमुच्यते पश्येदं
बहुधादेवभिन्नंभिन्नंसहस्रशः ६० शिक्यंचदारवंपात्रंहिदलान्वेणुकान्बहून् इदमप्यपरंपश्यतयोःसाहसचेष्टितम् ६१ कौ-
पीनंबहुधाच्छिन्नंतदस्माकंमहद्धनम् कृतंकपालमात्रेणकमंडलुजगत्प्रभो ६२ त्वंतुनोरक्षसेनित्यंक्षात्रंवैव्रतमास्थितः चित्रंचि
त्रमिदंदेवरक्षस्यसिसदानिशम् ६३ किंकरिष्यामिमंदात्मामंदभाग्यावयंविभो किंनःशरणमद्यैवतद्ब्रूहिजगतीपते ६४ जीवंतो
तौयदिस्यातांनष्टालोकाइमेत्रयः नविप्रान्चराजानोनवैश्यान्चपादजाः ६५ अत्यंतबलिनोमत्तौतीक्ष्णदंडधरौनृप नतयोःपुर-
तःस्थातुंशक्तादेवाःसवासवाः ६६ नचभीष्मोनवाराजाबाल्हीकोभीमविक्रमः योहिवीरोजरासंधःक्षत्रियाणांभयंकरः ६७ नैव-
चप्रायशःस्थातुंगिरीशवरदर्पिणोः तयोःकृष्णहरेशक्तोनित्यमप्रतिसंगिनोः ६८ तस्मात्त्वजहितौवीरौरक्षलोकानिमान्प्रभो अ
न्यथारक्षसीत्येवंव्यर्थःशब्दोत्रजायते ६९ बहुनात्रकिमुक्तेनरक्षरक्षजगत्त्रयम् इत्युक्त्वाविररामैवंदुर्वासाःक्रोधमूर्च्छितः ७०
इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांहंसडिंभकोपाख्यानेदुर्वासःसमागमोनामशतोपरिएकादशो
ध्यायः १११ वैशंपायनउवाच यतेर्वचनमाकर्ण्यमंदमुच्छ्रस्यकेशवः दुर्वाससंसमालोक्यबभाषेयादवेश्वरः १
क्षंतव्यंभवतापूर्वंदोषएवममैवहि शृणुवाक्यंममैतत्तुमुत्वाशांतिपराभव २ जेष्यामितौरणेविप्रहंसडिंभकमेवच गिरीशा-
वावरंदद्यात्शक्तोवाधनदोपिवा ३ यमोवावरुणोवापिब्रह्मावाथचतुर्मुखः सबलोसानुजोहत्वापुनर्दास्यामिवोरतिम् ४ स-
त्येनैवशपाम्यद्यमारोषवशगोभव रक्षांवोहंकरिष्यामिहत्वातौचनृपाधमौ ५ जानामितौदुरात्मानौयुष्मद्दोषकरौहितौ श्रुतं-
चपूर्वमस्माभिस्तीक्ष्णदंडधराविति ६ अत्यंतबलिनौमत्तौगिरीशवरदर्पितौ नाल्पप्रयत्नसंसाध्यौजरासंधहितैषिणौ ७

हंसडिंभकोपाख्यानेदुर्वासःसमागमोनामशतोपरिएकादशोऽध्यायः १११ यतेरिति १ २ ३ ४ ५ ६ ७ ६३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ३१ ३२ निगूहसे आत्मानं नोस्मान्प्रति ३३ ज्ञानाःज्ञानवंतः ३४ ३५ ३६ ३७ प्रविवेचनं विचारं ३८ ३९ ४०
४१ ४२ ४३ ४४ ४५ यद्यदिति यत्रवस्तुनिधारणाक्रियते तत्रैवाविर्भवसीत्यर्थः ४६ तदेवाहवायुरित्यादि ४७ ४८ ४९

उवाचवचनंविष्णुंदुर्वासाःक्रोधमूर्छितः नजानेइतिकस्मात्वंब्रूषेनोयादवेश्वरः ३१ जानामित्वांमहादेवंवंचयन्निवभाषसे पुरात
नावयंविष्णोपूर्ववृत्तांतवेदिनः ३२ तथाहिदेवदेवोसिमायामानुषदेहवान् निगूहसेप्रभुरतःकस्मान्नोजगतीपते ३३ सोसिब्रह्म
विदांमूर्तिस्त्वमेवतत्परमंपदम् यदभ्यर्च्यपुराब्रह्मायच्चज्ञानावयंपुरा ३४ यतोविश्वमिदंभूतंतदेतत्परमंपदम् यच्चस्थूलंविजानंति
पुरातत्वेनचेतसा ३५ पुराविदोथविश्वेशतदेतत्परमंवपुः कर्मणाप्राप्यतेयत्तुयत्स्मृत्वानिर्वृतावयम् ३६ प्रत्यक्षमपियद्रूपंनेव
जानंतिमानुषाः नहिमूढधियोदेवनवयंतादृशाहरे ३७ नजानेइतियद्रूषेकिमतःसाहसंवचः योहिमूलंविजानातितेषांतुप्रविवे
चनम् ३८ कुर्वंतःकिंफलंदेवत्वंवकेशिनिषूदन वेदांतेप्रथितंतेजस्त्वयैवदाविचार्यते ३९ येचविज्ञानतृप्तास्तुयोगिनोवीतकल्म
षाः पश्यंतिहृत्सरोजेपितदेवेदंवपुःप्रभो ४० वेदैर्यद्गीयतेतेजोब्रह्मेतिप्रतिपाद्यवै तदवेदंविजानेहंरूपमैश्वरमेवच ४१ वै
ष्णवंपरमंतेजइतिवेदेषुपठ्यते अवगच्छाम्यहंविष्णोतदेवदेवपुस्तव ४२ यओमित्युच्यतेशब्दोयस्यवागितिगीयते सएवा
सिप्रभोविष्णोनजानेइतिमावद ४३ परोक्षंयदिकिंचित्स्यात्तववक्तुंप्रयुज्यते नजानेइतिगोविंदमवादीःसाहसंहरे ४४ वि
श्वंयदाप्रादुरासीद्यस्मिन्लीनंक्षयेसति इदंतदैश्वरंतेजस्त्ववगच्छामिकेशव ४५ कर्तात्वंभूतभव्येशप्रतिभासिसदाहृदि
यद्यद्रूपंस्मरेन्नित्यंतत्तदेवासिमेहृदि ४६ वायुरेवयदाविष्णुरितिमेधीयतेमतिः तदातद्रूपमेवासिहृन्मध्येसंस्थितोविभो ४७
आकाशोविष्णुरित्येवकदाचिद्धीयतेमतिः तदातद्रूपमेवासिहृन्मध्येसंस्थितोविभो ४८ पृथिवीविष्णुरित्येतत्कदाचिद्धीयतेमतिः त
दापार्थिवरूपस्त्वंप्रतिभासिसदामम ४९ रसोयंदेवइत्येवकदाचिच्चिंत्यतेमया तदारसात्मनाविष्णोर्हृन्मध्येसंस्थितोविभो ५० य
दात्वंतेजइत्येवंस्मर्तास्म्यापुरुषोत्तम तदातद्रूपसंपन्नःप्रतिभासिसदाहृदि ५१ चंद्रमाहरिरित्येवंतदाचाद्रमसंवपुः निरीक्ष्यचक्ष
षादेवततःप्रीतोस्मिकेशव ५२ यदासौरंवपुरितिस्मर्तास्म्याजगतीपते तदातद्भावनायोगात्सूर्यएवविराजसे ५३ तस्मात्सर्वंत्वमेवा
सिनिश्चितामतिरीदृशी अतोनजानेहमितिवक्तुंनेशोजनार्दन ५४ इत्यर्थेसंस्थितोविष्णोपीडांनोनैवचिंत्यसे अत्यंतदुःखिता
विष्णोवयंत्वामनुसंस्थिताः ५५

५० ५१ ५२ ५३ ५४ चिंत्यसेचिंतयसेअकारलोपआर्षः ५५ ध॰ ध॰

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जनार्द्दनः ऋषिपुत्रः ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२

जनार्द्दनस्तुविप्रेंद्रोदृष्ट्वासाहसतत्परौ अशक्यमितिमन्वानोवयस्यंहंसमब्रवीत् ७ शृणुहंसवचोमह्यंश्रुत्वानिश्चित्यवीर्यवान् आयुधन्त्वा
हंसंकर्त्तुमुद्यतोसिनृपोत्तम ८ स्थितेभीष्मेजरासंधेबाल्हिकेचनृपोत्तमे किंचवीरेषुसर्वेषुयादवेषुनृपोत्तम ९ भीष्मोहिबलवान्वृद्धः
सत्यसंधोजितेंद्रियः त्रिःसप्तकृत्वःपृथिवींयोजिगायभृगूत्तमः १० तंयुद्धेजितवान्भीष्मःसर्वक्षत्रस्यपश्यतः जरासंधस्यतद्वीर्यंतद्व
द्वान्वेत्तिसंयुगे ११ वृष्णिवीरास्तुतेसर्वेकृतास्त्रायुद्धदुर्मदाः तत्रकृष्णोहृषीकेशोजितशत्रुःकृतीःसदा १२ जरासंधेनसहितःस-
दायुद्धेजितश्रमः प्रमुखेतस्यनस्थातुंशक्तोजीवन्नृपोत्तमः १३ बलभद्रस्तथामत्तःक्रुद्धोयदिभवेद्बली लोकानिमान्समाहर्तुंश-
क्तोतीतिमतिर्मम १४ तथाचसात्यकिर्वीरःशक्तोजेतुंरणेरिपून् तथान्येयादवाःसर्वेकृष्णमाश्रित्यदंशिताः १५ अस्माभिश्चकृतः
पूर्वंविरोधोयतिभिःसह दुर्वासायतिभिःसार्द्धंगतोद्रष्टुंसकेशवम् १६ इतिश्रुतंनृपश्रेष्ठब्राह्मणाद्भोक्तुमागतात् तथासतियथा-
सिद्धंतत्तथाचिंत्यंचमंत्रिभिः १७ ततःपश्चाद्विधास्यामोराजसूयंमहाक्रतुम् हंसउवाच कोनामभीष्मोमदात्मावृद्धोहि
नबलःसदा १८ आवयोःपुरतःस्थातुंशक्तःसकिलवृद्धकः यादवाइतिचित्रंनःशक्ताःस्थातुंरणेद्विज १९ कश्चकृष्णःपुरःस्थातुं
बलदेवश्चमत्तकः शैनेयश्चातिविप्रेंद्रस्थातुंनइतिचिंतय २० जरासंधस्तुधर्मात्माबंधुरेवसदामम गच्छविप्रयदुश्रेष्ठंब्रूहिमद्
द्वचनात्त्वरन् २१ दीयतांकरसर्वस्वंयज्ञार्थंसुंदरंबहु लवणानिबहून्यद्यगृह्यकेशवमाचिरम् २२ आगच्छत्वरितंकृष्णनतेकार्यं
विलंबनम् इतिब्रूहियदुश्रेष्ठंयाहित्वरितविक्रमः २३ नब्रूयाश्चोत्तरंविप्रशापेयंत्वांप्रियोसिमे मित्रभावादिदंब्रूहिपश्यामित्वांपु
नःपुनः २४ इतिसंचोदितोविप्रोनोत्तरंप्रत्यभाषत मित्रभावात्तथाराजन्स्नेहाच्चजनमेजय २५ जनार्द्दनस्तुधर्मात्मानित्यंगंतुंस
मुद्यतः अद्यश्वोवापरश्वोवागच्छामीतियतेततः २६ देवंद्रष्टुंजगद्योनिंशंखचक्रगदाधरम् एकएवचधर्मात्माहयमारुह्यसत्व-
रम् २७ प्रातरेवजगामाशुद्रष्टुंद्वारवतींद्विजः हरिंकृष्णंहृषीकेशंमनसासंस्मरन्द्विजः २८ इतिश्रीमहाभारतेखिलेषुह
रिवंशेभविष्यपर्वणिकैलासयात्रायांहंसडिंभकोपाख्यानेशततोपरित्रयोदशोऽध्यायः ११३ वैशंपायनउवाच ततः
प्रायाद्धरिंविष्णुंब्राह्मणोब्रह्मवित्तमः हयेनैकेनराजेंद्रत्वरितंसययौनृप १ यथानिदाघसमयेसूर्यांशुपरिपीडितः पांथोयातिजलंह्र-
स्रात्त्वरितंतत्पिपासया २

२३ २४ २५ २६ २७ २८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांशततोपरित्रयोदशोऽध्यायः ११३ १ २

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्राणानपितयोराजादास्यत्येवनसंशयः जरासंधोमहीपालोविनातोजयतेमहीम् ८ जयेतयोर्विप्रवर्यतत्रश्रेयोभवेत्ततः यत्र
यत्रतुतौगत्वास्थितावित्यनुशुश्रुम ९ तत्रतत्रचहंतारंनात्रकार्याविचारणा गच्छध्वंयतयःस्वैरंनिजकार्यपरायणाः १० अ
चिरेणैवकालेनजेष्यामिरणपुंगवौ . ततःप्रीतःप्रसन्नात्मायादवेश्वरमाहसः ११ स्वस्त्यस्तुभवतेकृष्णजगतांस्वस्तिकुर्वते किंतु
नामजगन्नाथदुःसाध्यंतवकेशव १२ त्रिलोकेशस्त्रिधामासिसर्वसंहारकारकः देवानामपिदेवेशःसर्वत्रसमदर्शनः १३ विष्णो
देवहरेकृष्णनमस्तेचक्रपाणये नमःस्वभावशुद्धायशुद्धायनियतायच १४ शब्दगोचरदेवेशनमस्तेभक्तवत्सल अज्ञानादथ-
वाज्ञानाद्यन्मयोक्तंक्षमस्वतत् १५ त्वमेवाहंजगन्नाथनावयोरंतरंपृथक् अतःक्षमस्वभगवन्क्षमासाराहिसाधवः १६
श्रीभगवानुवाच क्षंतव्यंभवताविप्रक्षमासारावयंसदा सन्यासिनःक्षमासाराःक्षमातेषांपरंबलम् १७ क्षमामोक्षकरी
नित्यंतत्वज्ञानमिवाद्विज क्षमाधर्मःक्षमासत्यंक्षमादानंक्षमायशः १८ क्षमास्वर्गस्यसोपानमितिवेदविदोविदुः तस्मात्सर्वप्रय
त्नेनक्षमापालयतस्वकाम् १९ प्रत्यक्षज्ञानसंयुक्तायूयंसर्वेयतीश्वराः यएतेयतयोविप्राःपूजनीयामयाध्रुवं २० भोक्तव्याय
तयोविप्राभिक्षुकाःसर्वएवहि तथेतितेप्रतिज्ञायभोक्तुमैच्छन्हरेर्गृहे २१ ततःस्वभवनंविष्णुःप्रविश्यहरिरीश्वरः चतुर्विधंत-
थाहारंकारयित्वायथाविधि २२ भोजयामासतान्सर्वान्यतीन्यतिवरार्चितः छित्वाछित्वाचदेवेशोदुकूलानिमृदूनिसः २३
ददौतेभ्यःस्तदाविष्णुःसर्वेभ्योजनमेजय तेचप्रीतायथायोगंयथापूर्वंततोगताः २४ इतिश्रीमहाभारतेखिलेषुहरिवंशे
भविष्यपर्वणिकैलासयात्रायांहंसडिंभकोपाख्यानेयतिभोजनंनामशततोपरिद्वादशोऽध्यायः ११२ वैशंपायनउवाच
दुर्वासास्त्वथतत्रैवनारदेनमहात्मना चिंतयन्ब्रह्मणस्तत्वंविजहारयथासुखम् १ भगवानपिगोविंदोदुर्वाससमसमन्यत ततस्तौ
हंसडिंभकौतस्मिन्काले महीपतिम् २ ब्रह्मदत्तमहीपालंपितरंवीर्यशालिनम् प्रावोचतामिदंवाक्यंसमंताज्जनसंसदि ३
राजसूयमहायज्ञंपितःकुरुस्वयत्नतः अस्मिन्मासिनृपश्रेष्ठयत्नावोयज्ञसिद्धये ४ आवांतेद्यमहाराजदिशाविजयतत्परौ यति-
ष्यावोबलैःसार्द्धंगजैरश्वैरथैरपि ५ संभारायज्ञसिद्ध्यर्थमानेतव्यानृपोत्तम तथेतिसमहाबाहाब्रह्मदत्तोब्रवीत्तदा ६

१२५

२४ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांशततोपरिद्वादशोऽध्यायः ११२ दुर्वासाःनारदेनसह १ २ ३ ४ ५ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

२८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ प्रपिबामिसादरंपश्यामि ४० ४१ ४२
इतिश्रीनीलकंठकृतौभारतभावदीपेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांहंसडिंभकोपाख्यानेशतोपरिचतुर्दशोऽध्यायः ११४ सःनिवेदितंइश्वरेर्पितंसर्वस्वंयेन

प्रीतिमानस्तुमेविष्णुवक्तुंघोरस्यकर्मणः उन्मिषंनेत्रयुग्मेनद्रक्ष्यामिसकृदीश्वरम् २८ आमूलमसकृद्विष्णुंपश्यामिचपुनःपुनः पिबा-
मिनेत्रयुग्मेनवपुःकृष्णस्यकेवलम् २९ धारयिष्याम्यहंपांसुंतत्पादप्रभवंशिवम् ततःकृतार्थतांयास्येस्वर्गमार्गेहितद्विजः ३० मेघग
भीरनिर्घोषंश्रोष्यामिचहरेःस्वरम् पादाब्जंचक्रिणोविष्णोःपश्यामिचजगत्पतेः ३१ पश्यामिचहरेर्वक्त्रंपूर्णेंदुसदृशप्रभम् हरेरि
दंजगद्रूपंपश्यामीवचसर्वतः ३२ प्रसीदतुसदाविष्णुरयुक्तंवक्तुमिच्छतः आलोलकुंडलयुतंहरिचंदनचर्चितम् ३३ स्फुरत्केयूररत्ना
र्चिर्बाहुद्वयविराजितम् सव्येद्योतन्महाशंखरश्मिजालविराजितम् ३४ प्रोद्यत्भास्करवर्णाभिचक्रज्वालाविराजितम् प्रोज्वलत्कंकण
युतंतप्तजांबूनदांगदम् ३५ पीतकौशेयवसनंविस्तीर्णोरस्कमच्युतम् कदाद्रक्ष्यामिदेवेशमिदानीमथवान्यदा ३६ सर्वथाकृतकृत्यो
हंयद्वपुर्द्रष्टुमुद्यतः नमोमह्यंनमोमह्यंयतोद्रष्टुमहंहरिम् ३७ उद्यतोस्मिजगन्नाथंबलभद्रकृतास्पदम् द्रक्ष्याम्यवश्यमद्यैवजिष्णुं
विष्णुंजगद्गुरुम् ३८ श्रीकौस्तुभोद्भवरुचिस्फुरितोरुवक्षःपीतांबरंमकरकुंडलपंकजाक्षम् कृष्णंकिरीटवरचक्रगदोर्ध्वहस्तंतेजोस-
यंसमहरेवपुरस्तुभूत्यै ३९ वेदोदधौविशदशास्त्रमहाहियोगेनिष्णातशुद्धमतिमंदरमथ्यमाने उद्योतमानममरैरनिशंनिषेव्यंनारा
यणाख्यममृतंप्रपिबामिचाद्य ४० ध्येयंमुमुक्षुभिरमेयमनाद्यनंतंस्थूलंसुसूक्ष्मतरमेकमनेकमाद्यम् ज्योतिस्त्रिलोकजनकंत्रिद-
शैकवंद्यमक्ष्णोर्ममास्तुसततंहृदयेच्युताख्यम् ४१ चिंतयन्निति विप्रेंद्रोययौद्वारवतींपुरीम् मत्वाकृतार्थमात्मानंवाहयन्हयमुत्तमम्
४२ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांहंसडिंभकोपाख्यानेविप्रस्यद्वारवतीगमनेशतोपरिचतु-
र्दशोऽध्यायः ११४ वैशंपायनउवाच सनिवेदितसर्वस्वोद्वास्थ्येनद्विजनार्दनः अथप्रविश्यधर्मात्मासुधर्मांवैद्वि-
जोत्तमः १ अपश्यद्देवदेवेशंसुधर्माकृतिसंस्थितम् बलभद्रेणसंयुक्तमध्यासितमहासनम् २ अग्रतस्थितशैनेयंपार्श्वतःस्थित
नारदम् दुर्वाससाकृतकथमुग्रसेनपुरस्कृतम् ३ गायद्गंधर्वमुख्यैश्चनृत्यदप्सरसांगणैः सेव्यमानंमहाराजसूतमागधबंदिभिः ४
उद्गीयमानयशसंमाधवंमधुसूदनं उद्गीयमानंविप्रैश्चसामभिःसामगैर्हरिम् दृष्ट्वाप्रीतमनाविष्णुंप्रोद्भूतपुलकच्छविः ५
नतादृशोद्वास्थेनद्वाराप्र-
विश्यसुधर्मांसभांअपश्यत् १ सुधर्मेयोगधर्मासाक्षात्तदाकारेणसंस्थितिःसंस्थानंयस्यतंसुधर्माकृतिसंस्थितम् २ ३ ४ ५ ६ ७

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

धावत्येवतथाविप्रोहारिंद्रष्टुंजनार्द्दनः गच्छन्सचिंतयामासचोदयन्हयमुत्तमम् ३ हंसएवप्रियोमह्यंकुर्यात्प्रियाहितंमम तथाहि
प्रेषितस्तेनहरिंपश्याम्यहंप्रभुम् ४ अहमेवसदाधन्योमत्तोह्यभ्यधिकोनहि यतोद्रक्ष्याम्यहंविष्णुंवसंतंद्वारकापुरे ५ साहिमे-
जननीधन्याहरिद्रक्ष्याम्यनगतम् कृतार्थसर्वदादेवीद्रक्ष्यत्येषामनस्विनी ६ मुखमुन्निद्रहेमाब्जकिंजल्कसदृशप्रभम् द्रक्ष्यामि-
देवदेवस्यचक्रिणःशार्ङ्गधन्वनः ७ वपुर्द्रक्ष्याम्यहंविष्णोर्नीलोत्पलदलच्छविम् शंखचक्रगदाशार्ङ्गवनमालाविभूषितम् ८
नेत्रेतेदेवदेवस्यपद्मकिंजल्कसप्रभे पश्याम्यहमदीनात्मानष्टदुःखोस्मिनिर्वृतः ९ अपिद्रक्षतियोगात्मासौम्येनैवस्वचक्षुषा
अपिवामाशियब्रूयास्वस्तित्वेतिचवावदेत् १० द्रक्ष्यामिचक्रिणोवक्षस्ततस्त्रैलोक्यसन्निभम् पादाब्जंचक्रिणोद्रष्टुंत्वरत्येवचमेम
नः ११ वक्षस्थलंसदाविष्णोःस्फुरद्रत्नप्रभायुतम् पश्यन्निवचगच्छामिस्मरञ्श्वानिशमीश्वरम् १२ पीतकौशेयवसनंलंबहारवि
भूषितम् ईषत्स्मिताधरंविष्णुंपश्यामिचपुनःपुनः १३ स्मरतश्चहरेरूपंरोमहर्षोयमीदृशः गच्छतश्चपुरोभातिशंखचक्रगदासिमा
न् १४ यातीवचपुरोभातिमह्यंदेवोजगद्गुरुः एषोयमितिमेवक्तुंजिव्हाप्रस्फुरतीवतम् १५ इदंदुःखतरंमन्येकरंदेहीतिमद्वचः इ
दंतस्याहंसमन्येयद्वचस्तस्यभूपते १६ हंसस्यकरदोविष्णुस्तदाज्ञापरिचारकः तस्यसर्वंपुरोगत्वावक्ताहंकिलनिर्दयः १७ मूढा
नामग्रणीरस्मिनिर्लज्जश्चतथावदन् करंदेहिहरेविष्णोहंसस्ययदुपुंगव १८ लवणानिबहून्याशुदातव्यानिकरात्मना इतिवि
ज्ञनमेयुक्तंपुरतस्तस्यशार्ङ्गिणः १९ तथापिमित्रभावात्तुवक्तव्यंघोरमीदृशम् कष्टोह्ययंमित्रभावोमनुष्याणांकृतात्मनाम् २०
अथवासर्वविद्विष्णुःसर्वस्यहृदिसंस्थितम् जानात्येवसदाभावंप्राणिनांशोभनेतरः २१ तथासतिनमेदोषोमित्रभावोयतोह्ययम्
सर्वथारक्षतांविष्णुर्घोरंवक्तुंयतस्यमे २२ द्रक्ष्याम्यहंजगन्नाथंनीलकुंचितमूर्द्धजम् कंबुग्रीवाधरंविष्णुंश्रीवत्साच्छादितोरसम्
२३ स्फुरत्पद्ममहाबाहुंरत्नच्छायाविराजितम् द्रक्ष्यामिकेशवंविष्णुंचक्रिणंयादवेश्वरम् २४ अचिंत्यविभवंदेवंभूतभव्यभवत्प्र
भुम् आत्मेच्छयाजगद्रक्षंद्रक्ष्यामिजलशायिनम् २५ कृतार्थःसर्वथाचाहंभवामिविगतज्वरः अद्यमेसफलंजन्मसाक्षाद्दृष्ट
वतोहरिम् २६ अद्यमेसफलायज्ञाःसाक्षात्कृतवतोहरिम् नेत्रेमेसफलेविष्णुंपश्यतश्चजगन्मयम् २७

१३६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ इतिश्रीनीलकंठकृतौभारतभावदीपेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांहंसडिं-
भकोपाख्यानेवासुदेववाक्यंनामशतोपरिपंचदशोऽध्यायः ११५ हासमिति १ २ ३ वांयुवयोःयांयुवां ४ ५ ६ ७ ८ ९

इदमश्रुतपूर्वंमेमत्तोयस्तुकरग्रहः इत्युक्त्वाकेशवोदूतमिदमाहस्मयादवः ३२ हास्यमेतद्यदुश्रेष्ठामत्तोयस्तुकरग्रहः युधिष्ठिरोराजसूय
स्यब्रह्मदत्तोमहीपतिः ३३ तौतयाजयितारौहिहंसोडिंभकएवच वोढाकिलयदुश्रेष्ठोलवणस्यदुरात्मनः ३४ करदोवासुदेवोहिजि
तोस्मियदुसत्तमाः हास्यंहास्यमिदंभूयःशृणुध्वंयादवावचः ३५ इत्युक्तवतिदेवेशेबलभद्रपुरोगमाः यादवाःसर्वएवैतेहासायसम-
वस्थिताः ३६ करदःकृष्णइत्येवंब्रुवंतःसर्वसात्वताः हासमुमुचुरत्यर्थंतलंदत्वापरस्परम् ३७ तलशब्दोहासशब्दोरोदसीपर्यपू
रयत् सचविप्रोनृपश्रेष्ठनंदयन्मित्रमात्मनः ३८ अहोकष्टमहोकष्टदोत्स्ययत्कृतवानहम् इतिलज्जासमाविष्टस्तूष्णीमासीद्वाङ्मु
खः ३९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांहंसडिंभकोपाख्यानेवासुदेववाक्यंनामशतोपरिप
ंचदशोऽध्यायः ११५ वैशंपायनउवाच हासंकुर्वत्सुतेष्वेवंकेशवःकेशिसूदनः उवाचवचनंदूतंगच्छमद्वचनाद्द्विज
१ तावित्थंहंसडिंभकौब्रूहिलरितविक्रमः बाणैर्दास्यामिनिशितैःशार्ङ्गमुक्तैःशिलाशितैः २ असिनावाथदास्यामिनिशितेनमहात्मनोः
शिरोवच्छेत्स्यतेचक्रमत्करप्रहितंबलिम् ३ योवरंदत्तवान्रुद्रोयुवयोर्धार्ष्ट्यकारणम् सएवरक्षितावांस्यात्तंजित्वावांनिहन्म्यहम् ४
देशोयंसुविधातव्योयत्रनःसंगतिर्भवेत् तत्रगंतातथाचास्मिसबलःसहवाहनः ५ भवंतौनिर्भयौभूत्वागच्छतांसबलौनृपौ पुष्क
रेवाप्रयागेवामथुरायामथापिवा ६ तत्राहंसबलोयातानात्रकार्याविचारणा अथवामित्रभावात्त्ववक्तुमेवंनतेक्षमम् ७ नशक्यंय
त्त्वयावक्तुंतत्त्ववक्ष्यतिसात्यकिः त्वयासहततोगत्वासाक्षिभूतोभवद्विज ८ इदंत्वजानेविप्रेंद्रस्नेहोममसदात्वयि तेनत्वंविजयीभूत्वा
संसारेदुःखसंकुले मत्कथापरमोनित्यंसदाभवजनार्दन ९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायां
हंसडिंभकोपाख्यानेशतोपरिषोडशोऽध्यायः ११६ वैशंपायनउवाच इत्युक्त्वाब्राह्मणंकृष्णःसात्यकिंपुनराहसः ग
त्वाशैनेयविप्रेणब्रूहिमद्वचनात्तयोः १ यन्मयोक्तमशेषेणपदगत्वातयोःपुरः यथानःसंगतिर्युद्धेतथावदबलात्तदा २ धनुरादायगच्छ
त्वंबद्धगोधांगुलित्रवान् एकेनाश्वेनगच्छत्वमसहायोयदूत्तम ३ सात्यकिस्तंतथेत्युक्त्वाहयमारुह्यशीघ्रगम् गंतुमैच्छत्ततोराजन्न-
सहायःससात्यकिः ४

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांशतोपरिषोडशोऽध्यायः ११६ इतीति १ २ ३ ४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

नाम्नाजनार्द्दनोस्मीतिननामचरणोहरेः बलभद्रंततोदेवंववंदेशिरसाद्विजः ६ दूतोस्मिदेवदेवेशहंसस्यडिंभकस्यच इतिब्रुवाणंवि-
प्रेंद्रमिदमाहसमाधवः ७ आस्वेदंविष्टरपूर्वंपश्चाद्ब्रूहिप्रयोजनम् तथेतिचाब्रवीद्विप्रोमहदासनमास्थितः ८ वाचासंपूज्यविप्रेंद्र
मपृच्छत्कुशलंहरिः ब्रह्मदत्तस्यराजेंद्रहंसस्याडिंभकस्यच ९ श्रुतंचापितयोर्वीर्यंप्रयोजनमतोद्विज अपिवाकुशलंविप्रपितुस्तवज
नार्द्दन १० जनार्द्दनउवाच कुशलंब्रह्मदत्तस्यपितुश्चममकेशव तयोरेवजगन्नाथहंसस्यडिंभकस्यच ११ श्री
भगवानुवाच किमाहतुर्महीपालौतौहंसडिंभकौनृपौ ब्रूहिसर्वमशेषेणनात्रशंकाद्विजोत्तम १२ वाच्यंवाप्यथवावाच्यंकर्तव्यम
थवेतरत् श्रुत्वातस्यविधास्यामोयुक्तरूपंद्विजोत्तम १३ दूतोसिसर्वथाविप्रनवाच्यावाच्यकल्पना यत्कर्मकारनिर्दिष्टंतद्वाच्यंदूतजन्म
ना १४ नात्रशंकात्वयाकार्यावक्तव्यस्येतरस्यच अतोवदयथाप्रोक्तंताभ्यामिहजनार्द्दन १५ केशवेनैवमुक्तस्तुप्रोवाचसजनार्द्दनः
अजानन्निवकिंब्रूषेसर्वप्रत्यक्षदर्शिवान् १६ नचास्तितेपरोक्षंतुजगद्वृत्तांतमच्युत सर्वंहिमनसापश्यन्किलत्वमात्थवदेतिमाम् १७
विद्वद्भिर्गीयसेविष्णोत्वमेवजगतीपते इच्छयासर्वमाप्नोसिदृष्टादृष्टविवेचनम् १८ त्वमेवेदंजगत्सर्वंजगच्चत्वयितिष्ठति नत्वयार
हितोह्येकःपदार्थःसचराचरः १९ नास्तिकिंचिदवेद्यंतेसर्वगोसिजगत्पते त्वमिंद्रःसर्वभूतानांरुद्रःसंहारकर्मकृत् २० रक्षितासिस-
दाविष्णुःसर्वलोकस्यमाधव संसारस्यभवान्स्रष्टाकिंत्वमात्थवदेतिमाम् २१ विद्वद्भिर्गीयतेनित्यंज्ञानात्मेतिचमाधव प्राणप्राणवि
दुःप्राहुस्त्वामेवपुरुषोत्तम २२ शब्दशब्दविदःप्राहुस्त्वामेवपुरुषोत्तम तथासतिहृषीकेशकिंत्वमात्थवदेतिमाम् २३ तथापिशृ-
णुदेवेशचोदितोस्मियतस्त्वया वदेत्यसकृद्देवेतत्तस्माद्वक्ष्यामिमाधव २४ राजसूयेनयज्ञेनब्रह्मदत्तोद्ययक्ष्यते तदर्थंप्रेषितस्ता
भ्यांहंसेनडिंभकेणच २५ करायेयदुमुख्येभ्यस्तवचामंत्रणाहयि लवणंबहुदेयंतेयज्ञार्थंतस्यकेशव २६ इत्यर्थंप्रेषितस्ताभ्यां
करंदेहितदाज्ञया इदंत्वमपरंताभ्यामुक्तंशृणुजगत्पते २७ लवणानिबहून्याशुप्रगृह्यत्वरितंभवान् आगच्छतुतयोराज्ञाःसेयंके
शववाग्विभो २८ इत्युक्तवतिविप्रेंद्रेदूतेतत्रतयोर्नृप प्रहस्यसुचिरंकृष्णोबभाषेदूतमीश्वरः २९ शृणुदूतवचोमह्यंयुक्तमुक्तंद्विजो-
त्तम करंददामिताभ्यांतुकरदोस्मियतोनृपे ३० धार्ष्ट्यमेतत्तयोर्विप्रमत्तोयत्तुकरग्रहः अहोधार्ष्ट्यमहोधार्ष्ट्यंतयोःक्षत्रियबीजयोः ३१

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ककुद्मानंमाहात्म्यवंतंविभावसुंभास्वंतं १० ११ युवांस्मरंतमद्राक्षमित्यन्वयः क्वदेशेतौवर्तेतेक्वचवाकालेतौद्रक्ष्यामीतिस्मरंतमित्यर्थः १२ कुतःके-
नोपायेनमत्पुरोगतौतौस्यातांइतिशेषः १३ १४ दापयंतंशिष्येभ्यःपाठयितुंअनुज्ञांप्रयच्छंतंमुनीश्वरंदुर्वाससम् १५ अचिंतयमित्युक्त्वास्वचिंतय
मेवाह असाध्यमितिइदंराजसूयाख्यंकर्म १६ १७ साकथाकृष्णात्करोग्राह्यइति इयंकृष्णप्रशंसात्मिका १८ एषभ्रमःअस्मास्वशक्त

अद्राक्षंसंभोजयुगंदधानंप्रभुंविभुंभूतमयंविभावनम् आद्यंककुद्मानमुरुंविभावसुंसंस्मृत्यसंस्मृत्यतमेवनिर्वृतः १० अद्राक्षं
जगतामीशंवक्षोराजितकौस्तुभम् वीज्यमानंहरिंकृष्णंचामराणांशतैःसदा ११ युवांविहृष्यमुक्तेनचेतसायादवेश्वरम् स्मरंतौस-
र्वदाविष्णुंक्वचैवंक्वचवेत्तिकः १२ क्वचद्रक्ष्यामितौमंदौकुतोवामत्पुरोगतौ ध्यायंतमित्थंदेवेशंकरशंखवहंसदा १३ हसंतमेनमद्रा
क्षंकरदंहास्यतत्परम् वदंतंनारदेवाचंदुर्वाससिस्थितेश्वरे १४ ब्रह्मसूत्रपदांवाणींदीपयंतंमुनीश्वरम् दृष्ट्वाहंतंहरिंदेवंपुनःपुन
रवीवदम् १५ असाध्यमिदमारब्धंताभ्यामितिनृपोत्तम नारब्धव्यमिदंकार्यमितःप्रभृतिभूमिप १६ निवृत्तास्त्वकथाहंसाचित
यन्नग्रहणंतव तद्वृत्तमखिलंसर्वंवदिष्यतिहिसात्यकिः एतद्वचनमाकर्ण्यहंसःक्रुद्धोब्रवीद्वचः १७ हंसउवाच अ
रेब्राह्मणदायादतन्मायातववाचियत् आवयोःपुरतोवक्तुंत्रैलोक्यंजेतुमिच्छति १८ माययालंभ्रमयतिकृष्णोलीलाविधानवि
त् तद्दृष्ट्वाभ्रमएवैषतवसंजायतेमहान् १९ शंखचक्रगदाशार्ङ्गवनमालाविभूषितम् वृष्णिवीरंसमावेश्यसमुच्छ्रितयशोधरम्
२० सूतमागधसंस्तावप्रकटद्वारबाहुकम् अत्यद्भुतयशोराशिंविक्रमाल्लोकमंडनम् २१ चतुर्भुजंबलाक्रांतंवृष्णियादवसंमतम्
अहोह्यभ्रमएवैषदर्शनात्तस्यचक्रिणः २२ इदानींचमहाराजभ्रामयत्येवदुर्मतिः त्वामेवविप्रमदात्मान्निंद्रजालिकताहिते २३ य
द्वाल्यमिदमेवैतत्तवविप्रभ्रमोद्भवम् अहोहिखलुसाद्दृश्यंवक्तव्यंभवतामम २४ अहमेवत्त्वयाविप्रमर्षयेप्रादितंवचः सखि-
भावाद्विजश्रेष्ठअन्यथाकःसहेदिदम् २५ गच्छमंदमतेविप्रयथेष्टंसांप्रतंतव द्विजगच्छयथेष्टंत्वंपृथिवींपृथिवीप्रभ २६ जि
त्वागोपालदायादंहत्वायादवकान्बहून् एषनःप्रथमःकल्पोजेष्यामइतियादवान् २७ गच्छागच्छेतिविप्रत्वंधृष्टपरुषवादिन
म् शत्रुपक्षस्तुतिपरंसहयुक्त्वासदामया २८ नमेविप्रवधःकार्यकष्टादपिहिसर्वतः इत्युक्त्वाब्राह्मणंभूयोहंसःसात्यकिमब्रवीत्
२९ भोभोयादवदायादकिमर्थंप्राप्तवानिह किमब्रवीन्नृदस्कृतःकिंवासौमेदिशत्करम् ३०

ताबुद्धिः माययेत्यादिवाक्यंनिंदापरतयाभासमानमपि
वाग्देवताभिप्रायेणायथार्थमेवस्पष्टमेवाहिमायावित्वंचतुर्भुजादिकंचभगवतःशास्त्रेइतिदिक् १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

५ ६ प्रविश्यगृहमितिशेषः यादवेसात्यकिंनिमित्तपुनःआसनविसृज्यसमर्प्य ७ विप्रःजनार्दनःहंसडिंभयोरन्यद्वाराआह ८ ९ १० ११

१२ १३ १४ इतिश्रीनीलकंठकृतौभारतभावदीपेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांशततोपरिसप्तदशोऽध्यायः ११७ १ २ ३ ४

जनार्दनंविसृज्याशुदूतंतंयादवेश्वरः अहोधार्ष्ट्यमहोधार्ष्ट्यमित्युवाचजनार्दनः ५ नमस्कृत्यतदादूतोमाधवंमाधवेश्वरम् सययौशाल्व
नगरंशैनेयेनसमन्वितः ६ यतःप्रविश्यधर्मात्माब्राह्मणोब्रह्मवित्तमः आसनंमहदास्थायविसृज्ययादवंपुनः ७ आस्तेस्मरवयदाविप्रः
शैनेयेनसमन्वितः अथतंहंसडिंभयोर्दर्शयामाससात्यकिम् ८ दूतोयंसात्यकिःप्राप्तःसव्योबाहुरयंहरेः तस्यतद्वचनंश्रुत्वाहंसःप्रा
हवचस्तदा ९ श्रुतःसमागमःपूर्वमद्यदृष्टोमयाप्यसौ धनुर्वेदेचवेदेचशास्त्रेशस्त्रेतथैवच १० निपुणोयंसदाधीरइत्येवमनुशुश्रु
मः अद्यदृष्टिपथंप्राप्तःप्रीतिंनोविदधात्यसौ ११ कुशलंवासुदेवस्यबलभद्रस्यवापुनः कुशलाःसात्वताःसर्वेउग्रसेनपुरोगमाः
१२ तथेतिसात्यकिःप्राहमंदमुन्मथिताननः ततोजनार्दनंप्राहहंसोवाक्यविशारदः १३ अपिदृष्टस्त्वयाचक्रीसिद्धंनःकार्यमीहितम्
वदसर्वमशेषेणमाहृथाकालमत्ययाः १४ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांहंसडिंभकोपाख्या
नेहंससंभाषणेशततोपरिसप्तदशोऽध्यायः ११७ वैशंपायनउवाच इत्युक्तवतिहंसेचधर्मात्माथजनार्दनः उवाचप्र-
हसन्वीरस्तुवन्नारायणंतदा १ अद्राक्षमद्राक्षमहंजनार्दनंहस्तस्थशंखवरचक्रधारिणम् आतप्तजांबूनदभूषितांगदस्फुरत्प्रभाद्यो
तितरत्नधारिणम् २ अद्राक्षमेनंयदुभिःपुरातनैःसंसेव्यमानंमुनिवृंदमुख्यैः संस्तूयमानंप्रभुभिःसमागधैःस्मितप्रवालाधरपल्लवा
रुणम् ३ अद्राक्षमेनंकविभिःपुरातनैर्विविच्यवेद्यंविधिवत्सहामरैः प्रफुल्लनीलोत्पलशोभितश्रियाविनिद्रहैमाब्जविराजितोदरम्
४ भूयोहमद्राक्षमजंजगद्गुरुंप्रमोदयंतंवचनेनयादवान् निरूपयंतंविधिवन्मुनीश्वरैःप्रवृत्तवेदार्थविधिंपुरातनैः ५ अद्राक्षमद्राक्ष
महंपुनःपुनःसमस्तलोकैकहितैषिणंहरिम् वसंतमास्मिन्जगतोहितायजगन्मयंतान्परिभूयशत्रून् ६ भूयोप्यपश्यंसहयादवेश्वरै
र्विक्रीडयमानंचविहारकाले रमंतमीड्यंरमयंतमीश्वरान्यदूत्तमान्यादवमुख्यमीश्वरम् ७ भूयोप्यपश्यंसरसीरुहेक्षणंसमेतया-
भीष्मतनूजयाहरिम् वसंतमंभोनिधिशायिनंविभुंभक्तप्रियंभक्तजनास्पदंशिवम् ८ अद्राक्षमद्राक्षमहंस्फुनिह्नुतःपिबन्पिबन्नुत
स्यवपुःपुरातनम् नेत्रेणमीलद्विवरेणकेवलंधन्योहमस्मीतितदाह्यचिंतयम् ९

५ ६ भूयोप्यद्राक्षमित्यनुषंगः ७ ८ मीलद्विवरेण अच्छिद्रेण ९ ५२ ५२ ५२ ५२ ५२ ५२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अन्यथाबुध्यएवत्वंप्रलपन्परुषंवचः सत्वनिर्लज्जएवासियद्ब्रूयादीदृशंवचः ५ आवामिदंजगत्सर्वंशासितुंसंयतोनृपो कोना-
ममानुषेलोकेकरदोनैवजीवति ६ हत्वागोपालकान्सर्वान्वृष्ण्यंधकयादवकान्बहून् गृण्हीमःकरसर्वस्वंततोगच्छनराधम ७ अव
ध्योदूततांप्राप्तोबद्ध्वबहुप्रभाषसे ईश्वरोनोवरदाताह्यस्त्राणामपिचप्रभुः ८ रक्षितारोमहाभूतोसंग्रामंगच्छतोश्वतेः पितरंया
जयिष्यावोजित्वागोपालकंरणे ९ एतेप्रोक्ताभृशंयुद्धेकातराःसर्वएवते हत्वातान्सबलान्युद्धेपुनर्जेष्यामिकेशवम् १० संहर्त-
व्यामहासेनाप्रगृहीतशरासना गृहीतप्रासमुशलागृहीतकवचासदा ११ आरूढारथसाहस्रगदापरिघसंकुला रुक्मप्रभूतंधनव-
तीप्रभूतबलसाधना १२ चाल्यतांवाहिनीघोराबलाध्यक्षासमंततः अवध्यएवगच्छत्वंनतेमरणतोभयम् १३ संग्रामःपुष्करे-
स्माकंश्वःपरश्वोपिवानृप ततोज्ञास्यामहेवीर्यंकेशवस्यबलस्यच येत्वयोक्तानृपाःसंख्येतेषामपिचयद्बलम् १४ सात्यकि
रुवाच हंसगच्छामिवांहंतुंश्वःपरश्वोपिवानृप अद्यैवहिमयावध्योनचेद्दूतोभवाम्यहम् १५ नहिश्वोवापरश्वोवायुवांकटु
कभाषिणो दौत्यंहिदुःखमतुलंवहाम्येवसदानृणाम् १६ अन्यथाहंयुवांहत्वातोयास्यामिनिर्वृतिम् स्ववीर्यबाहुदर्पंचदर्शयन्वा
नृपाधमौ १७ शंखचक्रगदापाणिःशार्ङ्गधन्वाकिरीटभृत् नीलकुंचितकेशाढ्योलंबबाहुःश्रियावृतः १८ ससर्वलोकप्रभवोविश्व
रूपःस्वरूपवान् दैत्यदानवहंतासौयोगिध्येयःपुरातनः १९ पद्मकिंजल्कनयनःश्यामलःसिंहविक्रमः ।सृष्टिस्थितिलयेष्वेकःक-
र्तात्रिजगतोगुरुः २० शरेणनिशितेनाजौदप्यंवांव्यपनेष्यति इत्युक्त्वारथमारुह्यप्रययौसात्यकिःकिल २१ इतिश्रीमहा
भारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांहंसडिभकोपाख्यानेशतोपरिएकोनविंशोऽध्यायः ११९ वैशंपायनउ-
वाच प्रविश्यसपुरंविष्णोःसात्यकिःशिनिपुंगवः आचचक्षेयकृष्णाययथावृत्तंतयोस्तथा १ ततःप्रभातेविमलेकेशवःकेशि
सूदनः बलाध्यक्षानुवाचेदंचक्रपाणिर्गदाधरः २ संनह्यतांबलंसर्वंरथकुंजरवाजिमत् अनेकभेरीपणवप्रासासिपरिघाकुलम्
३ सध्वजंसपताकंचसालंकारपरिच्छदम् तेतथेतिप्रतिज्ञायसर्वंचक्रुरधीनगाः ४ आदायसुदृढंचापंरथमारुह्यदंशिताः अग्र-
तोजग्मुरत्यर्थंसेनायाःपुरुषोत्तमाः ५ सात्यकिश्चतथाराजन्प्रगृहीतशरासनः बभौक्रोधसमायुक्तोजगामाग्रेमहाबलः ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सात्यकिरुवाच इदंसत्यंवचोहंसशंखचक्रगदाभृतः शरैर्निशितधाराग्रैःशार्ङ्गमुक्तैःशिलाशितैः ३१ दास्यामिकरसर्वस्व
मसिनानिशितेनते शिरश्छेत्स्यामितेहंसकरदानस्यसंग्रहम् ३२ धार्ष्ट्यात्वमदात्मन्किमतापिनृपाधम देवदेवाज्जगन्नाथा
त्करमिच्छतियोनृपः ३३ तस्यैषकरसंक्षेपोजिह्वाच्छेदोनराधम तस्यशार्ङ्गरवश्रुत्वाशंखस्यचहरेःपुनः ३४ कोनामजीवितंकां
क्षेत्तिष्ठेदानींसमग्रवे गिरीशवरदर्पेणब्रूयादसदृशंवचः ३५ सहायावयमेवैतेबलभद्रपुरोगमाः प्रथमोबलभद्रोसौद्वितीयोहं
चसात्यकिः ३६ कृतवर्मातृतीयस्तुचतुर्थोनिशठोबली पंचमोथचबभ्रुस्तुषष्ठश्चैवोल्मुकःस्मृतः ३७ सप्तमस्तारणोधीमान्
स्त्रशस्त्रविशारदः अष्टमस्त्वथसारणोनवमोविप्रथुस्तदा ३८ दशमश्चोद्धवोधीमान्वयमेतेबलान्विताः तएतेपुरतोगोप्तुः
शंखचक्रगदाभृतः ३९ देवदेवस्ययुद्धेषुतिष्ठंतेचदिवानिशम् योहिवीरोसुतोतस्यनासत्यसदृशोबले ४० तावेवबांधवौ
युद्धेहेतुबलसंपदान्वितौ योगिरीशागिरादेवोवरदत्तास्तिष्ठति ४१ युवांहिकिंबलौयुद्धेतिष्ठतःसशरधनुः गृहीत्वाशात्रुभिः
सार्धंयुद्धंकर्तुंसमुद्यतौ ४२ इदृशोयथभृत्येषुयुद्धंकुर्वत्सुशत्रुभिः त्रैलोक्यरक्षतस्तस्मात्करमिच्छन्व्रजतकः ४३ हनिष्यत्यैववा
युद्धेत्रैलोक्यंयोहिरक्षति शरेणनिशितेनाजौशार्ङ्गमुक्तेनकेवलम् ४४ क्वनःसंग्रामइत्येवंपुनराहजगत्पतिः पुष्करेपुण्यदेनित्यम्
तगोवर्द्धनेगिरौ ४५ मथुरायांप्रयागेवादर्शयंतोबलानिमे शंखचक्रधरेदेवजगत्पालनतत्परे ४६ राजसूयमहायज्ञंकर्तुमिच्छति
कःस्वयम् वदन्वास्वस्तिमान्मर्त्यस्त्वांविनाकोव्रजेत्सुखम् ४७ इदमिच्छसिचेन्मूढ हास्यतांयासिभूतले इत्युक्त्वासात्यकिर्वीरोहृ-
सन्निवभुविस्थितः ४८ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांहंसडिंभकोपाख्यानेसात्यकिवाक्य-
नामशतोपरिअष्टादशोऽध्यायः ११८ वैशंपायनउवाच ततःक्रुद्धोमहाराजहंसोडिंभकएवच इदंवैप्रोचतुर्वाक्य
रोषव्याकुलितेक्षणौ १ दिधक्षंतौदिशःसर्वाःसर्वान्वीक्ष्यनृपोत्तमान् करेणनिष्पीड्यकरंस्मरंतौतद्वचोमहत् २ क्वनुद्धवानंदसू
नुःक्वरामोबलोत्कटः इतिब्रुवाणोसाक्षेपोसात्यकिंसत्यसंगरम् ३ अरेयादवदायादकिंब्रूषेनःपुरोगतः इतोनिर्गच्छमंदात्मन्दू
तस्त्वमसिसांप्रतम् ४ ११९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

योहिपुराद्यनः समभवत्स एवविचक्रः तस्यविचक्रस्य दृत्तस्यभित्रतांयातो हिडिंबोनामराक्षसेश्वर इतियोजना १० ११ १२ १३ १४ दैत्येनविचक्रे
णतेनहिडिंबेन १५ नृपसाहाय्यंहंसडिंभकयोः साहाय्यंविग्रहमपिताभ्यांसहचशापः परासक्तः परेणहंतव्य इतिशास्त्रातिक्रमजोदोष १६ १७ १८
१९ २० २१ २२ २३ २४ ताभ्यांकुरुनमस्कारमितिवैशंपायनोदिव्यदृष्ट्यातमप्यर्थंवर्त्तमानवत्पश्यन्जनमेजयंप्रेरयतिजनमेज-

हंसस्यडिंभकस्याथसाहाय्यंकर्त्तुमुद्यतः विचक्रस्याथदैत्यस्यहिडिंबोराक्षसेश्वरः १० अतीवमित्रतांयातोद्यात्माणांश्चसंयति
राक्षसैरपरैःसार्द्धंशिलाशूलासिपाणिभिः ११ ययौतस्यसहायार्थीहिडिंबःपुरुषादपः अष्टाशीतिसहस्राणिराक्षसास्तस्यचाभवन्
१२ अनुयातामहाराजशिलापरिघबाहवः तयोस्तत्रमहासैन्यंगच्छतोःकेशवंप्रति १३ मिश्रितंदैत्यसंघैश्चराक्षसैश्चसमंततः अ
त्यद्भुतंमहारौद्रंत्रैलोक्यभयदायकम् १४ दैत्येनसहितौतौहिजग्मतुःपुष्करंप्रति तावेतौहंसडिंभकौहंतुंकेशवमंजसा १५ ततःश्रु
त्वाजरासंधोविग्रहंयदुभिःसह नाकरोन्नृपसाहाय्यंपापमेभवितेतिह १६ गच्छतोःसमितिंराजन्हंसस्यडिंभकस्यच अतित्व
रितविक्रांतास्तेययुःपुष्करंप्रति १७ सिंहनादंविमुंचंतःकथयंतःपरस्परम् अहमेवनृपायुद्धंकरोमिप्रथमंहरेः १८ इत्यब्रुवन्नृ
पाराजन्शतशःकेशवंप्रति संप्राप्तास्तेनृपश्रेष्ठाःपुष्करंपुण्यवर्द्धनम् १९ मुनिजुष्टंतपोवृद्धैर्ऋषिभिश्चनिषेवितम् अत्यंतंभद्रलो
केषुपुष्करंप्रथमंनृप २० पुष्करंपुंडरीकाक्षोद्वावेवजगतीपते दर्शनात्स्पर्शनाच्चैवकिल्बिषच्छेदिनौनृप २१ पुष्करंपुंडरीकाक्षो
द्वावेवनृपसत्तम सेव्यमानौमुनिश्रेष्ठैरमरैर्धर्महात्मभिः २२ द्वावेवहिनृपश्रेष्ठसर्वपापप्रणाशकौ तावुभौयत्रसहितौतत्रतेसंस्थि
तानृपाः २३ दृष्टवंतोहरिविष्णुविष्टरश्रवसंपरम् पुष्करंपुण्यनिलयंतीर्थंब्रह्मनिषेवितम् २४ तेभ्यःकुरुनमस्कारंमनसानृपस
त्तम अहोनिःशेषमभवत्तत्रभूयोनसंशयः २५ सैन्यंतत्रचसंप्राप्तंदैत्यरक्षःसमाकुलम् अनेकभेरीपणवझर्झरीडिंडिमाकुल
म् २६ नानापणवसंमिश्ररक्षोनादविनादितम् प्रविश्यसरसस्तीरंपुष्करस्यविशांपते दर्शयामासदेवेशंयुद्धायसमुपस्थितम् २७
इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिहंसडिंभकोपाख्यानेशतोपरिएकविंशतितमोऽध्यायः १२१ वैशंपायन-
उवाच हंसेनेसंगतेराजन्सध्वजेसपरिच्छदे महापरिघसंकीर्णेगदाशक्तिसमाकुले १

येतादृशेशब्दजन्यंपरोक्षंज्ञानंसंभावयन्
२५ कथमेवानुसंधत्तेसैन्यमितिसैन्यंकर्तृदेवेशंदर्शयामासअयंकृष्णोयंकृष्णइत्यन्योन्यंदर्शयामासेत्यर्थःद्वयोःसंबंधः २६ २७ इतिश्रीनीलकंठकृ-
तौभारतभावदीपेखिलेषुहरिवंशेभविष्यपर्वणिहंसडिंभकोपाख्यानेटीकायांशतोपरिएकविंशतितमोऽध्यायः १२१ ५ ५ हंसेनेइति १ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ७ ८ ९ १० ११ १२ सशंखजः १३ दध्मुः ध्मातः १४ १५ १६ १७ १८ १९ इतिश्रीमहाभारतेखिलेषुह
 रिवंशेभविष्यपर्वणिटीकायांशततोपरिविंशतितमोऽध्यायः १२० अथेति १ पुरःसरौचतौमहाभूतौचेतिविग्रहः २ ३ ४ ५ पुरःसरः

अन्येचयादवाःशूराःप्रगृहीतमहायुधाः सिंहनादंप्रकुर्वंतोजग्मुरग्र्यरथोत्तमाः ७ हरिस्तुरथमारुह्यसंस्कृतंदारुकेणह शार्ङ्गंसार-
सहंघोरंगृहीत्वासशरंधनुः ८ चक्रपाणिस्तदाशंखीगदीशरवरासिमान् बद्धगोधांगुलित्राणःपीतवासाजनार्दनः ९ पद्ममा
लावृतोरस्कोनवजीमूतसन्निभः ययौरथगतोविप्रैस्तूयमानोमुदान्वितैः १० सूतैर्मागधपुत्रैश्चगीयमानस्ततस्ततः आनीयसेनां-
सकलांययौकाष्ठामथोत्तराम् ११ पांचजन्यंमुखेन्यस्यसर्वप्राणेनकेशवः दध्मौमहारवंकुर्वन्शत्रूणांभयवर्द्धनः १२ आध्मात
स्तेनहरिणासचक्रेशंखराट्ध्रुवम् रवःसरोदसीराजन्पूरयामाससर्वतः १३ तस्मिन्शंखेतथाध्मातेदध्मुःशंखाःसहस्रशः भे-
र्यश्चापिसमाध्मातामृदंगाबहवोनृप १४ नेदुरत्यर्थमतुलंघर्मांतेजलदायथा अथाययुर्महाराजपुष्करंपुण्यवर्द्धनम् १५ सरस
स्तस्यराजेंद्रपुष्करस्यनृपोत्तमाः प्रतीक्षन्हंसडिंभकौयुद्धायसमवस्थितः १६ निवेशंकारयामासुर्यादवाःसर्वएवहि स्वंस्वंयथासु
खराजन्प्रगृहीतकुटीमठम् १७ भगवानपिगोविंदःसरोदृष्ट्वासुशोभनम् उपस्पृश्यजलेतस्मिन्प्रणम्ययतिपुंगवान् १८ तयोरा
गमनंलिप्सरास्तेतीरेयथासुखम् शृण्वन्वेदध्वनिंविष्णुर्ब्राह्मणानांसमततः १९ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्य
पर्वणिकैलासयात्रायांहंसडिंभकोपाख्यानेकृष्णपुष्करप्रवेशोनामशतोपरिविंशतितमोऽध्यायः १२० वैशंपायनउवाच
अथतौहंसडिंभकौजग्मतुःपुष्करंप्रति प्रगृहीतमहाचापौसरथौसध्वजौनृप १ पुरःसरमहाभूतौसंहरंताविवोल्बणौ प्रकुर्वंतौ-
सिंहरवंभस्मनापरिलेपितौ २ त्रिपुंड्रकललाटांतौरुद्राक्षपरिशोभितौ अन्योन्याविवरुद्रौतौलोकसंहारकारकौ ३ ततोनुजग्मुः
शतशःसैन्यानिनृपसत्तम आक्षौहिण्योदशैवासन्तयोरथसमागताः ४ विचक्रस्तुमहाराजदानवोनगसन्निभः तयोरेवसखा
पूर्वमासीच्चबलशालिनोः ५ शक्रोयस्यपुरःसरःस्यात्तुशक्तोनवज्रभृत् योहिवीरोमहाराजदेवदैत्यसमागमे ६ देवान्निघ्नंस्तथा
राजन्देवेंद्रमजयन्महान् अकरोच्चपरायुद्धंविष्णुनाप्रभविष्णुना ७ योहिद्वारवतींप्राप्यबबाधेयदुपुंगवान् सतदानींमहाराजस्तुला
युद्धमुपस्थितम् ८ अनेकशतसाहस्रैर्दानवैःपरिघायुधैः वृत्तःसमभवद्दैत्योवृष्णिद्विषान्नृपोत्तमः ९

पुरोगामी विसर्गलोपःपूर्वपदेआर्षः ६ ७ ८ ९ [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१ २ ३ ४ ५ ६ ७ तारामयेबृहस्पतिभार्याप्रधानेतन्निमित्तेइत्यर्थः ८ ९ १० ११ १२ १३

वैशंपायनउवाच एतस्मिन्नंतरेराजन्द्वंद्वयुद्धमवर्तत विचक्रंयोधयामासशार्ङ्गधन्वागदाधरः १ बलभद्रोयुहंसेनाडिंभके
णचसात्यकिः वसुदेवोग्रसेनाभ्यांहिडिंबःपुरुषादकः २ शेषाश्चशेषराजेंद्रचक्रुर्युद्धमदीनगाः वासुदेवस्त्रिसप्तत्यादैत्यवक्षस्यता
डयत् ३ शरैर्निशितधाराग्रैर्विस्मयंदर्शयन्रणे दानवोदेवदेवेशंहृदनेनिशितेनच ४ शरेणाकर्णमाकृष्यधनुःप्रवरमीश्वरम् जघा
नस्तनमध्येचपश्यतस्तुशचीपतेः ५ तेनविद्धोथभगवान्वक्षोदेशेजनार्दनः अवमच्छोणितंविष्णुरादिकालेयथाप्रजा ६ ततःक्रु
द्धोहृषीकेशःक्षुरप्रेणाहनद्ध्वजम् अश्वांश्चचतुरोहत्वासारथिंचशरैस्त्रिभिः ७ ततोदग्धोमहाशंखंययातारामयेरणे रथादुत्प्लु
त्यसहसादानवःक्रोधमूर्च्छितः ८ गदांगृह्यमहाघोरांदुःसहांवीर्यशालिनीम् तयाजघानदैत्येंद्रःकिरीटेकेशवस्यह ९
ललाटेचपुनर्विष्णुंसिंहनादंव्यनीनदत् ततःशिलांचमहतींप्रगृह्यदनुजःकिल १० भ्रामयित्वादशगुणंप्राहरत्केशवोरसि ता
मापतंतींसंप्रेक्ष्यहस्तेनादायकेशवः ११ जघानचतयादैत्यंसपपाताक्षितिःक्षितौ गतासुरिवसंजज्ञेश्वसन्निवपपातह १२ प्राप्य
संज्ञांततोदैत्यःक्रोधाद्द्विगुणमावभौ आदायपरिघंघोरमिदमाहजनार्दनम् १३ अनेनतवगोविंददर्पजातंनिहन्म्यहम् विक्र-
मज्ञस्तदाचासिममदेवासुरेरणे १४ तावेवविपुलौबाहूसएवास्मिजनार्दन तथापियुध्यसेवीरज्ञात्वात्वंमामकंबलम् १५ धार
येनंमहाबाहोपरिघंबाहुनिःसृतम् इत्युक्त्वादेवदेवेशंशंखचक्रगदाधरे १६ चिक्षेपदैत्योलोकेशेसर्वलोकस्यपश्यतः तंगृह्य
बाहुनाकृष्णोहतोसीतिवदन्हरिः १७ खंडशःकारयामासखड्गेननिशितेनह उत्पाट्यवृक्षंदैत्येशःशतशाखंमहाशिखम् १८
तेनसंपोथयामासविष्टरश्रवसंविभुम् छित्वातंचापिखड्गेनतिलशश्चचकारह १९ विक्रीड्यसुचिरंविष्णुस्तेनदैत्येनमाधवः हं
तुमैच्छत्तदादैत्यमादायनिशितंशरम् २० आग्नेयास्त्रेणसंयोज्यजघानेनमहान्हरिः सदग्धःसशरोदैत्यःसर्वलोकस्यपश्यतः २१
ययापूर्वंजगामाशुकरंभगवतःपुनः हताशिष्टास्ततोदैत्याःपलायंतोदिशोदश अद्यापिननिवर्तंतेगच्छंतोवैमहोदधिम् २२
इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिकैलासयात्रायांहंसडिंभकोपाख्यानेकृष्णस्योत्कर्षवर्णनंनामशततोपरित्रयोविं
शोऽध्यायः १२३ वैशंपायनउवाच बलदेवस्तुधर्मात्माधनुरादायसत्वरम् जघानहंसंदशभिर्बाणैर्बाणभृतांवरः १

१४ १५ १६ १७ १८ १९ २० २१ २२ इतिश्रीमहाभारतेखि० ह० भ० टीकायांशततोपरित्रयोविंशोऽध्यायः १२३ १

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भेरीझर्झरसंपूर्णेडिंडिमारावसंकुले प्रगृहीतमहाशस्त्रेशूलासिवरकार्मुके २ परस्परकृतोत्साहेचक्रातेयुद्धमुल्बणम् तेशराः
कार्मुकोत्सृष्टानिर्भिद्याथशरीरिणाम् ३ शरीराणिमहाराजजग्मुर्दूरंसहस्रशः भटबाहुविनिर्मुक्ताःखड्गानिर्भिद्यवक्षसि ४
स्फुरितांश्चतथाराजन्शिरांस्याहृत्यरवंययुः परिघाश्चतथाराज्ञांबाहुभिःपरिचोदिताः ५ तिलशश्चक्रुरतुलंशरीरंनृपरक्षसाम्
दैत्यानांकुर्वतांनादमन्योन्यवधकांक्षिणाम् ६ दैत्यारक्षांसिराजेंद्रराजानश्चसमंततः अन्योन्यंपरिघैर्जघ्नुश्चापमुक्तैःशिलाशितैः
७ शरैश्चभोगिभोगाभैस्तीक्ष्णमन्येमहाबलाः राक्षसादानवाश्चान्येमत्तमातंगविक्रमाः ८ अन्योन्यंजघ्निरेराजंश्चापमुक्तैर्महाश
रैः नागानागैर्महाराजहयाअश्वैःसमंततः ९ रथारथैःसमाजग्मुःसादिनःसादिभिस्तथा पट्टीशासिशरव्रातैःकुंतैःसायककर्षणैः
१० सशक्तिपरिघप्रासपरश्वधसमाकुलैः भिंडिपालैर्महारौद्रैर्जघ्नुरन्योन्यमाहवे ११ अन्योन्यंजघ्निरेराजंश्चापमुक्तैःशिलाशितैः
१२ राक्षसादानवाराजन्क्षत्रियाश्चसमंततः इतश्चेतश्चधावंतःकुर्वंतोविस्वरंरवम् १३ हताःकेचिन्महाराजपेतुरुर्व्यांमहासिभिः
केचिन्माथितमांस्तस्काःगदाभिर्वीर्यवत्तमाः १४ भिन्नग्रीवामहाराजपरिघैःपरिघायुधैः यमराष्ट्रंगताःकेचित्केचित्स्वर्गंसमाययुः
१५ अप्सरोभिःसमासेदुःपश्यतःस्वकलेवरम् केचित्स्वांश्चपरांश्चैववृहत्वाभ्रांताइवाभवन् १६ एतस्मिन्नंतरेराजच्छरवाभेर्यःसहस्र
शः सस्वनुःसर्वतःसैन्येमृदंगाबहवस्तथा १७ मध्यंदिनगतेसूर्येतापदधनिघोरवत् ततःपिशाचाविकृताःकरालाविनतोदराः १८
राक्षसाश्चमहाघोराःपिशितंकेशशाब्दलम् मुदिताभक्षयामासुःपिबंतःशोणितंबहु १९ संचितानिशवान्यासन्कबंधाःखड्गपा-
तिताः विभज्यदेशंबहुशोयुद्धभूमौशवाशिनः २० अथश्येनामृगाश्चैवककागृध्रास्तथापरे तुंडैःशवान्विनिष्कृष्यभक्षयंतिततस्त
तः २१ सप्ताशीतिसहस्राणिहतानागानृपोत्तम त्रिंशत्सहस्रमयुतंनिहताहयसत्तमाः २२ हतंलक्षंमहाराजरथानांरथिभिःसह
त्रिंशत्कोट्योहतास्तत्रसादिनःसायुधाभृशम् २३ मध्यंदिनगतेसूर्येहताःकेचनानिर्गताः केचित्तृषिताराजन्विविशुःपुष्करंसरः
२४ केचिद्भूमिंसमागम्यभीताइत्यब्रुवन्रणे मुक्तकेशाःपतंतिस्मरथान्संत्यज्यकेनच २५ संदष्टोष्ठपुटाःकेचित्सादिनःपुरतोहताः
अत्यद्भुतमहायुद्धमासीत्पुष्करतीर्थके यथादेवासुरंयुद्धमासीत्पूर्वंनृपोत्तम २६ इतिश्रीमहाभारतेखि॰ह॰भवि॰शतोपरिद्वा
विंशोऽध्यायः १२२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२ ३ निषिद्धन्खंडयन् निनदन्गर्जन्ब्रुवन्गर्जितंशब्देनैवतेषांनिषेधंचकारेत्यर्थः ४ ५ ६ ७ ८ ९ १० ११

कृतश्रमौमहायुद्धेसततंवृद्धसेविनौ सात्यकिर्दशभिर्वीरोडिंभकंवेदपारगम् २ अविध्यन्निशितैर्बाणैस्तेनवक्रेतथोरसि
सतेनविद्धोबलिनाडिंभकःक्षत्रियोत्तमः ३ नाराचैःपंचसाहस्रैर्विव्याधयुधिगर्वितः तानंतरेवृष्णिवीरोनिषिद्धन्निदमब्रुवन्
४ अथक्रुद्धोनृपवरोविद्धःसप्तभिराशुगैः पुनःशतसहस्रेणप्रत्यविध्यतसात्यकिम् ५ सात्यकिस्त्वथविक्रांतोधनुश्चिच्छेदतस्यतत्
अर्धचंद्रेणतीक्ष्णेनडिंभकस्यसयादवः ६ आजघ्नेडिंभकोवीरश्चापमादायचापरम् क्षुरप्रेणाथरौद्रेणतैलधौतेनविक्रमी ७ सतेन
विद्धोबाणेनवमन्शोणितकंनृप अतीवशुशुभेराजन्वसंतेकिंसुकोयथा ८ धनुश्चिच्छेदभूयस्तुगृहीतयसुराधनुः ततोन्यद्ध-
नुरादायडिंभकोयादवेश्वरम् ९ जघाननिशितैर्बाणैःसर्वक्षत्रस्यपश्यतः सधनुःपुनरप्युग्रंचिच्छेदयुधिसात्यकिः १० शरेण
तीक्ष्णपुंखेनडिंभकस्यदुरात्मनः ततोन्यद्धनुरादायसत्वरंसनृपोत्तमः ११ धनुषातेनराजेंद्रसात्यकिंविव्यधेपुनः एवंधनूंषिरा
जेंद्रशतपंचचपंचच १२ छिन्नाननादर्शनैयःसर्वक्षत्रस्यपश्यतः धनूंषितौपरित्यज्यवीरौडिंभकसात्यकी १३ खड्गौप्रगृह्य
चाप्युग्रौयुद्धायसमुपस्थितौ तौहिखड्गविदांश्रेष्ठौवीरौडिंभकसात्यकी १४ दौःशासनिर्महाभागसोमदत्तिस्तथैवच अभिम-
न्युश्चविक्रांतोनकुलश्चतथैवच १५ एतेखड्गविदांश्रेष्ठाःकीर्तितायुधिसत्तमाः एधेतांहिनृपश्रेष्ठौखड्गेहिनृपसत्तम १६ तावे
तावसिनायुद्धंचक्रतुर्युद्धलालसौ भ्रांतमुद्भ्रांतमाविद्धप्रबाधेबाहुनिःसृतम् १७ आकरविक्षरमित्रानिमर्यादममानुषम् स
कोचितकुलचितसव्यजानुविजानुच १८ अहितचक्रकक्षिसंकुसकबलंबनंधृतम् सव्यबाहुर्विनिर्बाहुःसव्येतरमथोत्तरम् १९
त्रिबाहुस्तुगवाहुश्चसव्यानतमुदासिच पृष्ठतःप्रहरंचैवयाधिकप्रथितंतथा २० इतिप्रकारान्द्वाविंशच्चक्रतुःखड्गयोधिनौ पुनः
पुनःप्रहरतौनचश्रममुपेयतुः २१ पुष्करस्थौमहाराजयुद्धायकृतनिश्चयौ ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः २२ तुष्टुवुस्तौ
महाराजजयेकृतपरिश्रमौ अहोवीर्यमहोधैर्यमनयोर्बाहुशालिनोः २३ एतावेवरणेशक्तौखड्गेधनुषिपारगौ एकःशिष्योगिरी
शस्यद्रोणस्यानोह्यधीमतः २४ अर्जुनःसात्यकिश्चैववासुदेवोजगत्पतिः त्रयएतेमहाराजप्रथिताःसंगरेसदा २५ डिंभकःश
क्तिभृच्छर्वस्त्रयएतेमहारथाः प्रसिद्धाःसर्वएवैतेवीर्येषुचबलेषुच २६

१२ १३ १४ १५ १६ भ्रांतमुद्भ्रांतमित्यादयो
द्वात्रिंशत्खड्गभेदायथायथमूह्याःखड्गशास्त्रेवाऽन्वेषणीयाः १७ १८ १९ २० २१ २२ २३ २४ २५ शक्तिभृत्कार्तिकेयः २६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तंप्रत्यविध्यन्नाराचैर्हंसःपंचभिराशुगैः तानंतरेहलीछित्वानाराचैर्दशभिःपुनः २ नाराचेनाशुविव्याधललाटेहंसमोजसा हृ
दपतन्सनाराचस्तस्यसंज्ञांसमाददे ३ लब्ध्वाहंसःससंज्ञांतुविध्वातेनयदूत्तमम् सिंहवद्व्यनदद्धंसोदेवान्विस्मापयन्रणे ४
ततःक्रुद्धोहलीविद्धस्तेनबाणेनमाधवः ववर्षशोणितमत्युष्णंनिश्वसंश्चरणाजिरे ५ लोहिताविष्टगात्रस्तुकुंकुमादिववाभवत्
नाराचैःशतसाहस्रैरर्दयामाससमाधवः ६ हंसंहंसगतिर्वीरंनीलवासाहलायुधः तेमुक्तानिशिताघोरानाराचाश्चसुवाजिनः ७
रथेध्वजेतथाचापेचक्रेतूणीद्वयेनृप पतिताःसर्वतोराजन्व्यथांचैवतथाददुः ८ ततःक्रुद्धोमहाराजहंसोवीर्यमदान्वितः शरे
णहलिनंविध्वाध्वजंचिच्छेदकालवित् ९ शरैश्चतुर्भिरश्वांश्चसूतंप्रेताधिपंददौ ततःक्रुद्धोहलीतस्मैगदांगृह्यमहारणे १०
आपपातमहाबाहुर्हंसंशेषइवश्वसन् तथारथध्वजंचक्रमश्वान्सूतंहलायुधः ११ बभंजतिलशःसर्वंननादचपुनःपुनः ११
भूयश्चगदयाहंसंचिक्षेपचबलीकिल सोपिहंसोगदांगृह्यरथात्तस्मादवापतत् १२ ततस्तौहंसहलिनौयुयुधातेमहारणे महा
रथौमहाबाहूलोकप्रथिततेजसौ १३ अत्यद्भुतौसुविक्रांतौपरस्परवधैषिणौ छलश्चैवमहायुद्धंहंसविक्रांतगामिनौ १४ य-
थादेवासुरेयुद्धेशक्रवृत्रौपुरावरे उभौसंसक्तसर्वांगौशोणितेनमहारणे १५ अत्यंतरौद्रेनायुद्धेपरस्परबलेनह ततश्चदाक्षि
णंमार्गंबलभद्रोह्यगृह्णत १६ सव्यंतुहंसोराजेंद्रोह्यगृण्हाल्लयमेवहि पोथयांचक्रतुर्युद्धेगदाभ्यांगजविक्रमौ १७ ययाप्रा-
णंमहाबाहूजघ्नतुर्मरणायतौ अतिप्रवृद्धंसंग्रामंदेवासुररणोपमम् १८ विदधातेमहारंगेपश्यतांत्रिदिवौकसाम् देवाश्चमु
नयश्चैवविस्मयंपरिजग्मिरे १९ अहोखल्वीदृशंयुद्धंदृष्टपूर्वंनचश्रुतम् इत्यूचुर्विस्मयवशाद्देवगंधर्वकिन्नराः २० परस्पर-
कृतोत्साहौचक्रतुर्युद्धमुत्तमम् अथहंसोमहारंगेदक्षिणंदक्षिणोत्तमः २१ व्यचरन्मार्गमत्यर्थंसव्यंतुबलवान्बलः निकुं
च्यजानुनौपूर्वंचक्रतुर्गदयाभृशम् रणेरणविदांश्रेष्ठौपश्यतांत्रिदिवौकसाम् २२ इतिश्रीमहाभारतेखिलेषुहरिवं
शेभविष्यपर्वणिकैलासयात्रायांहंसडिभकोपाख्यानेहंसबलभद्रयुद्धंशतोपरिचतुर्विंशतितमोऽध्यायः १२४ वैशंपा
यनउवाच युद्धंचक्रतुरत्यर्थंततोडिभकसात्यकी तावुभौबलिनौवीरौविख्यातौक्षत्रियेषुच १

१७ १८ १९ २० १२२
२१ २२ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांहंसडिभकोपाख्यानेशतोपरिचतुर्विंशतितमोऽध्यायः १२४ १ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६

वसुदेवंमहीपालंराजानंवृद्धसेविनम् गृहीतुंराक्षसश्रेष्ठोयततेनृपसंसदि २१ हिडिंबउवाच एषत्वांभक्षयिष्यामि
वसुदेवत्वयासह उग्रसेनकिमर्थंत्वंतिष्ठसेमत्पुरोगमः २२ आगच्छप्रविशास्यंमेग्रासभूतौतुवांमम विधिनानिर्मितौवृद्धौवसु
देवोहरेःपिता २३ बुभुक्षितःश्रमार्तश्चयुद्धेत्वरितविक्रमः मन्मुखान्तेवगच्छेतांप्रविशेतौत्वरान्वितौ २४ युवयोःशोणितंपीत्वा
तृप्तियास्यामिनिर्वृतः खादामिचपुनर्मांसंवृद्धयोर्युवयोःसुखम् २५ इतिब्रुवंस्तथारक्षोव्यादितास्यमहाहनु धावतिस्मतदाक्षि
प्रंहिडिंबोराक्षसेश्वरः २६ वसुदेवोग्रसेनौचभीतौविप्रेक्ष्यसर्वतः दिशिह्यभ्याजितौराजन्निःशस्त्रौवृष्णिपुंगवौ २७ एतस्मिन्नं
तरेदृष्ट्वाबलभद्रःप्रतापवान् दृष्ट्वाचतौतथाभूतौवसुदेवोग्रसेनकौ २८ वासुदेवंसमादिश्यहसंयुध्यतमीश्वरः निर्गत्यचांतरं
तस्यराक्षसस्यदुरात्मनः २९ माकृथाःसाहसंरक्षोमुंचतौराजसत्तमौ स्थितोस्मियुध्यतारक्षोमयाशत्रूनजिघांसता ३० अह
मेवहनिष्येत्वांकाचर्यातवभीषिका इतिब्रुवाणंहलिनंतौविसृज्यमहारणे ३१ महानयमसौदुष्टोभक्षयाम्येनमग्रतः विदार्यपूर्वं
वद्वक्त्रंबलभद्रमुपाद्रवत् ३२ विसृज्यसशरंचापंराक्षसस्यपुरःस्थितः मुष्टिंप्रगृह्यबलवानास्फोटयन्बाहुमुत्तमम् ३३ हिडिं
बस्त्वथदुष्टात्मामुष्टिंकृत्वाभयानकाम् जघानवक्षोरामस्यव्यादितास्यइवांतकः ३४ क्रुद्धोथबलभद्रस्तुमुष्टिनातेनताडितः ज
घानमुष्टिनातेनराक्षसेशमनिंदितः ३५ मुष्टियुद्धंसमभवन्नरराक्षसवीरयोः युध्यतोर्युद्धरंगेथनरराक्षससिंहयोः ३६ त-
योश्चटचटाशब्दःप्रादुरासीद्भयानकः अथराक्षसराजस्तुमुष्टिनागममाहवे ३७ जघानवक्षोदेशेतुवज्रेणेवपुरंदरः अथ
रामोबलीसाक्षान्मुष्टिंसंवर्त्ययत्नतः ३८ हिडिंबंताडयामासवक्षस्यमरविद्विषम् तलाभ्यामथरामस्तुवक्त्रेहत्वासुराक्षसम्
३९ आहतस्तलघातेनहिडिंबोराक्षसेश्वरः जानुभ्यामपतद्भूमौगतासुर्नरराक्षसः ४० ततउत्थाय्यरामस्तुदोर्भ्यांसंगृह्यराक्ष
सम् आदायबाहुवेगेनभ्रामयित्वापदास्पदम् ४१ व्याविध्यत्स्वचिरंरामोदर्शयन्नात्मनोबलम् उत्क्षिप्यराक्षसंद्रुतंसर्वलो
कस्यपश्यतः ४२ गव्यूतिमात्रंचिक्षेपततोदेशाद्धलायुधः गतासूराक्षसश्रेष्ठस्ततोदेशान्निराक्रमत् ४३ येकेचिद्राक्षसास्तत्रहतशे
षामहारणे बलभद्रात्ततोभीताजग्मुश्चैवंदिशोदश ४४ अथांशुमालीभगवान्दिनेशःसंहृत्यतेजांसिसहस्ररश्मिः अस्तंययौचक्ष
रपिप्रजानामीषत्तमश्चापितमोविवेश ४५

३७ ३८ ३९ ४० ४१ ४२ गतासुःप्राप्तसंज्ञःनिराक्रमत्निर्गतः ४३ ४४ ४५ ६ ६

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 २७ इतिश्रीनीलकंठकृतौ भारतभावदीपे खिलेषु हरिवंशे भविष्यपर्वणि टीकायां शतोपरि पंचविंशोऽध्यायः १२५ वसुदेवइति १ राजमार्गः क्षत्रध
 र्मेयुद्धाख्यः तत्रविशारदौ २ ३ ४ विलोचनः विरूपनेत्रः ५ ६ ७ ८ नास्यग्रासंनासया अत्तुंयोग्यंनास्यमिवग्रासिलेतिनास्य

इतितेदेवगंधर्वाःसिद्धायक्षामहोरगाः दिविस्थिताःसमंभूयुर्युद्धदर्शनलालसाः २७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभ
विष्यपर्वणिकैलासयात्रायांहंसडिभकोपाख्यानेशतोपरिपंचविंशोऽध्यायः १२५ वैशंपायनउवाच वसुदेवोग्रसे
नौवृद्धौयुद्धेऽस्मन्निवृत्तौ जराजर्जरितसर्वांगौपलितांगशिरोरुहौ १ ज्ञानविज्ञानसंपन्नौराजमार्गविशारदौ युयुधातेमहारंगेराक्ष
सेनदुरात्मना २ शरैरनेकसाहस्रैरर्दयामासतूरणे राक्षसेंद्रंदुरात्मानंहिडिंबंपुरुषादकम् ३ हिडिंबोराक्षसेंद्रस्तुभक्षयन्
सर्वतोनरान् अतिप्रवृद्धोदुष्टात्मालंबबाहुर्महाहनुः ४ लंबोदरोविरूपाक्षःपिंगकेशविलोचनः श्येननासोमहारौद्रऊर्ध्वरोमा
महाभुजः ५ पर्वताकारवर्ष्माचदीर्घदंष्ट्रःशिवाननः लंबोदरोदीर्घदंतोजगद्ग्रासपरस्तथा ६ उत्तुंगांसोमहोरस्कोदीर्घग्रीवोगजो
पमः भक्षयन्मांसपिटकंपिबन्शोणितसंचयम् ७ गजान्नागैःसमाहत्यहयैरश्वान्नृपोत्तम रथान्रथैःसमाहत्यसादिनःसादिभि
स्तथा ८ मनुष्यान्स्वपुरोदृष्ट्वानास्यग्रासंचकारसः कांश्चित्स्थूलान्महाराजवृष्णिपालान्समंततः ९ भक्षयामाससहसाहिडिं
बःपुरुषादकः यान्पश्यत्सुरतोरक्षस्तान्जघानविरूपधृक् १० भक्षयन्नपरान्वृष्णीन्यादवान्राक्षसेश्वरः चिक्षेपसहसाकां-
श्चिद्धिडिंबःपुरुषादकः ११ अंतकालेयथाक्रुद्धोरुद्रःप्राणभृतोनृप क्षणेनैकेनसर्वांस्तान्भक्षयामासराक्षसः १२ केचिद्भी
तादिशःप्रापुर्वृष्णयोवीर्यशालिनः केचित्तुभक्षितास्तेनरक्षसावृष्णिपुंगवाः १३ कुंभकर्णोयथाराजन्भक्षयामासवानरान्
निःशेषंवृष्णिसैन्येतुचकारपुरुषादकः १४ निश्चेष्टंवृष्णिसैन्यंतुस्थितंचित्रपटेयथा एतस्मिन्नंतरेक्रुद्धोयुद्धोयादवपुंगवो धनु
र्गृह्यमहाघोरंराक्षसस्यपुरःस्थितौ १५ यथाक्रुद्धस्यसिंहस्यमृगौवृद्धतमाविव व्यादायास्यंमहाराजतौदृष्ट्वाथह्यधावत १६
विरवादिषुविरूपाक्षःपातालतलसन्निभः ततोरथःपर्यधावत्खादन्खादन्कलेवरम् १७ पूरयामासतुर्वीरौशरैर्यदुनृपोनृपो
हिडिंबस्यमहाघोरंव्यादितास्यमिवांतकम् १८ सर्वांस्तान्वारयामासदेवशत्रुर्विरूपधृक् धावतिस्मततोरक्षोव्यादितास्यंभया
नकम् १९ तयोर्गृहीत्वाधनुषीबभंजयुधिसत्वरम् बाहुप्रसार्यदुष्टात्माराक्षसोविकृताननः २०

ग्रासंश्वासोच्छ्वासोनमहिषोमश
कानिवनासामार्गेणमनुष्यान्संजहारेत्यर्थः ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५

शंखान्दध्मुःपृथक्त्र्हादंस्वेस्वेसर्वेरथेस्थिताः अथकृष्णोहृषीकेशःपांचजन्यंमहारवम् २० दध्मौपद्मपलाशाक्षःसर्वान्विस्मा
पयन्निव अथभूतौमहाघोरौलंबोदरशरीरिणो २१ दद्रुवतुर्महाराजशूलमादायकेशवम् शूलेनपोथयांरामंश्चक्रतुर्यदवेश्वर
म् २२ ताभ्यांसमाहतोविष्णुर्देवगंधर्वसन्निधौ ईषात्स्मिताधरोदेवःकिंचिदुत्सुत्यसत्वरम् २३ रथाद्रथिवरश्रेष्ठस्तौप्रगृह्यज
नार्दनः भ्रामयित्वाशतगुणमालातमिवकेशवः २४ कैलासंचसमुद्दिश्यप्राचिक्षेपततोहरिः तावुपेत्यगिरेःशृंगंकैलासस्यम-
हामते २५ दृष्ट्वातत्कर्मदेवस्यविस्मयंजग्मतुःपरम् हंसश्चदृष्ट्वातत्कर्मरोषताम्रायतेक्षणः २६ उवाचवचनंहंसःशृण्वतांत्रिदि
वौकसाम् किमर्थंराजसूयस्यविघ्नंचरसिकेशव २७ ब्रह्मदत्तोमहीपालोयष्टातस्यमहाक्रतोः करंदिशयथायोगंयदिप्राणान्
हिरक्षसि २८ अथवात्वंक्षणंतिष्ठततोज्ञानकरंबहु ददासित्वंनदप्तुचततोयष्टासमेगुरुः २९ ईश्वरोहंसदाराज्ञांदेवानामिव
शूलभृत् एषतेवीर्यमतुलंनाशयिष्यामिसंयुगे ३० इत्युक्त्वाराशरंचापंशालतालोपमंनृपः आकृष्यचयथाप्राणंनाराचेन
चकेशवम् ३१ ललाटेचाक्षिपेहंसोललामइवसोभवत् उवाचसात्यकिंकृष्णोरथंवाहयमेप्रभो ३२ दारुकंपृष्ठवाहंतंकृत्वा
देशांतमीश्वरः अथतेनसमादिष्टःसात्यकिर्वाहयन्रथम् ३३ मंडलानिबहून्याजौदर्शयामाससत्वरम् अथविद्धोहृदंतेनशरे
णहरिरीश्वरः ३४ आग्नेयमस्त्रंसंयोज्यशरेकस्मिंश्चिदव्ययः उवाचहंसंराजेंद्रसात्यकिंप्रेरयन्रणे ३५ अनेनत्वांदहाम्यद्य
यदिशक्तोसिवारय अलंतेबहुबद्धेनक्षत्रियोसिसदाशठ ३६ मत्तश्चेत्करमिच्छेस्त्वंदर्शयाद्यपराक्रमम् यतोहंबाधितोहं
सपुष्करेसंस्थितस्त्वया ३७ शास्तात्वंखलुविप्राणांस्थितेमयिनराधम स्थितेमयिजगन्नाथेहत्वाक्षत्रियकंटकान् ३८ शास्ता
स्म्यथोत्वांहिलोकेदुष्टानांब्रह्मविद्विषाम् शापेनयतिमुख्यानांहतएवनृपाधम ३९ मृत्यवेत्वांनिवेद्याद्यरक्षिताब्राह्मणानहम्
इतिब्रुवस्तदस्त्रंतुमुमोचयुधिकेशवः ४० तदस्त्रंवारुणेनाथहंसोपिप्रत्यषेधयत् वायव्यमथगोविंदोमुमोचयुधिहंसके ४१
तदस्त्रंवारयामासमाहेंद्रेणनृपोत्तमः अथमाहेश्वरंकृष्णोमुमोचास्तुमसमाहवे ४२ रौद्रेणतत्ततोहंसोवारयामासतत्क्षणात् गां
धर्वंराक्षसंचैवपैशाचमथकेशवः ४३ ब्रह्मास्त्रमथकौबेरमासुरयाम्यमेवच चत्वार्येतानिहंसस्तुमुमोचयुधिसत्वरम् ४४

३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ४६ हेनृप प्रभातकालेगोवर्द्धनेरणः सत्तमइतिब्रुवंतइत्यन्वयः पुष्करदेशादपक्रम्यगोवर्द्धनंदेशंप्रतिपालयिताइत्यर्थः ४७ इतिश्रीनीलकंठकृतौभारत
 भावदीपेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांहंसडिंभकवधेहिडिंबपराभवोन्नामशतोपरिषड्विंशोऽध्यायः १२६ उभौताविति १ सर्वज्ञोगोविंदोपिसह्य

तस्मिन्प्रविष्टेथसमुद्गतोयंप्रजापतौविश्वसुखेजगद्गुरौ नक्षत्रनाथःसमुपाजगामसंध्यातमोपिव्यनशन्नृपोत्तम ४६ प्रभातकाले
नृपसत्तमोरणेगोवर्द्धनेकिन्नरगीतनादिते इतिब्रुवंतोनृपसत्तमास्तदाव्यपारमंस्तत्ररणोत्सवेनृप ४७ इतिश्रीमहाभारते-
खिलेषुहरिवंशेभविष्यपर्वणिहंसडिंभकवधेहिडिंबपराभवेशतोपरिषड्विंशोऽध्यायः १२६ वैशंपायनउवाच उ
भौतौहंसडिंभकौराजावेवमहागिरिम् जग्मतुःसहितौराजन्गोवर्द्धनमथोनृप १ अथप्रभातेविमलेसूर्येचाभ्युदितेसति गोवर्द्धनंज
गामाशुकेशवःकेशिसूदनः २ शैनेयोबलभद्रश्चयादवाःसारणादयः गंधर्वैरप्सरोभिश्चनादितंबहुधागिरिम् ३ जग्मतुःसहितौ
राजन्गोवर्द्धनमथोगिरिम् गाधनैरथसैन्यैश्चनादितंबहुधागिरिम् ४ तस्यांतरंनृपश्रेष्ठपार्श्वंसंप्राप्ययादवाः निकषायमुना
राजंस्ततोयुद्धमवर्त्तत ५ विव्याधहंसडिंभकौवसुदेवश्चसप्तभिः सारणःपंचविंशत्यादशभिःकंकएवच ६ हंसेनडिंभकेनाथ
यादवैश्चसमंततः उग्रसेनस्त्रिसप्तत्याशराणानतपर्वणाम् ७ विराटस्त्रिंशताराजन्सात्यकिश्चापिसप्तभिः अशीत्याविपृथूराज
न्नुद्धवोदशभिःशरैः ८ प्रद्युम्नस्त्रिंशताराजन्सांबश्चापिचसप्तभिः अनाधृष्टिस्त्वेकपष्ट्याशराणानतपर्वणाम् ९ एवंतैसहि
ताराजश्चक्रुर्युद्धमदीनवत् अत्यद्भुतमहाघोरंयादवाःसर्वएवहि १० चक्रुस्ताभ्यांमहायुद्धंवासुदेवस्यपश्यतः सर्वानपिमहा
राजयादवान्बलदर्पितान् ११ तावुभौहंसडिंभकौनृपास्तान्प्रत्यविध्यताम् प्रत्येकंदशभिर्विध्वाबाणैर्निशितकोमलैः१२जघ्नतुश्च
शरैस्तीक्ष्णैरत्यर्थंयादवेश्वरान् व्यथिताःसर्वएवैतेवसंतःशोणितंबहु १३ माधवेकिंशुकाराजन्पुष्पिताइवतेबहु भीताश्चया
दवाराजन्पलायनपरायणाः १४ एतस्मिन्नंतरेराजन्वसुदेवात्मजोनृप वासुदेवोहलीयुद्धेप्रमुखेधन्विनौतयोः १५ चक्रतुर्यु
द्धमतुलंस्कंदशक्राविवांबरे तयोरेवसगंधर्वाःसिद्धायक्षामहर्षयः १६ विमानस्थाश्चददृशुर्युद्धंदेवासुरोपमम् ततःप्रादुरभू
तांतौदूतौभूतेश्वरौनृप १७ शूलिनाप्रेषितौयुद्धेरक्षार्थंबलिनास्तयोः हंसोथवासुदेवश्चयुद्धंचक्रतुरीश्वरौ १८ रामश्चडिंभ
कश्चैवसंयुक्तौयुद्धकांक्षया विस्मृत्यसर्वएवैतेह्यस्त्रशस्त्रेतयाबले १९

स्तत्रगतइत्याह अथेति २ ३ ४ यमु
नांनिकषायमुनायाःसमीपे ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

२ ३ अथेतिपादपूरणार्थः ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ इतिश्रीनील
कंठकृतौ भारतभावदीपे खिलेषु हरिवंशे भविष्यपर्वणि टीकायां हंसडिंभकोपाख्याने हंसडिंभकवधो नाम शततोपरि एकोनत्रिंशोऽध्यायः १२९ यशोदेति

डिंभको वीर्यसंपन्नो यमुनामनुजग्मिवान् तमन्वधावद्वेगेन बलभद्रो हलायुधः २ हतोऽहमित्यत्र पतितस्तत्रासौ निपपात ह यमुनायां म
हाराज विलोडय जलसंचयम् ३ अथ क्रुद्धः स डिंभको भ्राममथिला जलं बहु उन्मज्ज्योन्मज्ज्य सहसा निमज्ज्य च पुनः पुनः ४ न ददर्श
तदा राजन् भ्रातरं वीर्यशालिनम् उन्मज्ज्याथ महाबाहुर्वासुदेवं विलोक्य च ५ उवाच वचनं राजन् डिंभको वीर्यवत्तमः अरे गोप क्व दा
यादः क्वासौ हंस इति स्थितः ६ वासुदेवोऽपि धर्मात्मा यमुनां पृच्छ राजक इत्यब्रवीत्प्रसन्नात्मा वासुदेवः प्रतापवान् ७ तच्छ्रुत्वा यमु
नां भूयः प्रविश्य डिंभकः किल बहुप्रकारमुद्वीक्ष्य भ्रातरं भ्रातृवत्सलः ८ विलपन् पतता राजा डिंभको भ्रातमानसः क्व नु गच्छसि
राजेंद्र विहायेत्थं मबांधवम् ९ कुतो भ्रातरितो गच्छेः परित्यज्यैव मामिह विलप्यैवं नृपश्रेष्ठ डिंभको भ्रातृवत्सलः १० आत्मत्या
गे मनः कुर्वन् यमुनायां महाह्रदे निमज्ज्योन्मज्ज्य सहसा मरणे कृतनिश्चयः ११ हस्तेन जिह्वामाकृष्य भूयो भूयो विलप्य च ततः
समूलामाकृष्य जिह्वां साहसकृत्स्वयम् १२ ममार तज्जले राजन् डिंभको नरकाय वै एवं तु निहते हंसे डिंभके वीर्यशालिनि १३
आगमत्पुंडरीकाक्षो भूतान् विस्मापयन्निव ततः प्रीतः प्रसन्नात्मा वासुदेवः प्रतापवान् १४ गोवर्द्धने यथा विश्रम्य बलभद्रसहाय
वान् कंचित्कालं महाराज पूर्वं भुक्तमुवास ह १५ इति श्रीमहाभारते खिलेषु हरिवंशे भविष्यपर्वणि हंसडिंभकोपाख्या
ने हंसडिंभकवधो नाम शततोपरि एकोनत्रिंशोऽध्यायः १२९ वैशंपायन उवाच यशोदानंदगोपश्च कृष्णदर्शन
लालसौ गोवर्द्धनगतं श्रुत्वा वासुदेवं महाग्रजम् १ नवनीतं च दधि च पायसं कृसरं तथा वन्यं पुष्पं महाराज मयूरांगदमेव च २
वत्सैश्च वरपरैः सार्द्धं गोपीभिश्च समंततः जग्मतुः सहसा प्रीतौ गोवर्द्धनमथो नृप ३ क्वचिद्वृक्षोत्समासक्तं कृष्णं कृष्णमृगेक्षणम्
ददर्शतुर्महाबाहुं वासुदेवं सहाग्रजम् ४ प्रणमतुः सुसंहृष्टौ तत्र हृष्टौ महाबलौ दर्शयामासतुर्देवौ पायसानि महांति च ५ ता
त मा त व्रजे कोशे कुशलं वां स्वगोधने अपि गावः क्षीरवत्यो वत्सा वत्सतराः पितः ६ अपि वासस्सु भक्षीरमपि गावः सुशोभनाः
अपि वा दारका मातर्वत्सपालाः पिबंति च ७ बहूनि चापि दामानि कीलका अपि वा बहु तृणानि बहुरूपाणि किंवा संति पितः सदा ८

१ मयूरांगदं मयूरपिच्छमयं बाहुभूषणम् २ ३ ४ ५ ६ ७ ८ ९ ९ ९ ९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 ४५ ४६ ४७ ४८ ४९ ५० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांहंसडिंभकेहंसकेशवयुद्धेशतोपरि-
 सप्तविंशतितमोऽध्यायः १२७ अथेति १ २ ह्रदमितिक्लीबत्वमार्षम् ३ ४ ५ ६ ७ ८ ९ कोनमस्य

वारणार्थंतुदस्त्राणांचतुर्णांमाधवस्यह अस्त्रंब्रह्मशिरोघोरमस्त्रंशत्रुविनाशकम् ४५ मुमोचहंसमुद्दिश्यदेवदेवोजनार्द-
नः अस्त्रंवैष्णवमादायशरेसन्निहितेहरिः ४६ योजयामासतद्धंसेमहाघोरपराक्रमम् अथभीतोमहारौद्रमस्त्रंदृष्ट्वानृपो-
त्तमः ४७ हंसोपितेनराजेंद्रवारयामासतंशरम् यमुनापउपस्पृश्यदेवदेवोजनार्दनः ४८ अस्त्रंवैष्णवमादायशरेसन्निशितेहरिः
योजयामासभूतात्माभूतभावनभावनः ४९ येनदेवारणेहत्वाराज्यमायुःपुरासुरान् तदस्त्रंयोजयामासवधार्थंतस्यभूपते ५०
इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिहंसडिंभकोपाख्यानेहंसकेशवयुद्धेशतोपरिसप्तविंशतितमोऽध्यायः १२७
वैशंपायनउवाच अथभीतोमहारौद्रमस्त्रंदृष्ट्वानृपोत्तम हंसोराजामहाराजनिश्चेष्टइवसंबभौ १ उत्प्लुत्यसरथात्तस्माद्य-
मुनामभ्यधावत यत्रकृष्णोहृषीकेशःकालियाहिममर्दह २ महान्ह्रदमहारौद्रयावत्पातालसंस्थितम् तावद्दीर्घंमहानीलंकालां-
जननिभंहियत् ३ तस्मिन्ह्रदेमहाघोरेपपाताथसहंसकः हंसेपतितितस्मिंस्तुमहान्रावोबभूवह ४ गिरीणांपात्यमानानांसमु-
द्रइववज्रिणा रथादुत्प्लुत्यकृष्णोपितस्योपरिपपातह ५ देवदेवोजगन्नाथोजगद्धितमापयन्निवे प्राहरत्तंमहाबाहुःपादाभ्यांस-
यकेशवः ६ पादक्षेपन्नृपस्तस्माल्लुब्ध्वाहंसोनृपोत्तम ममारचनृपश्रेष्ठकेचिदेवंवदंतिहि ७ अन्येपातालमायातोभक्षितःपन्न-
गैरिति अद्यापिनैवराजेंद्रदृष्टइत्यनुशुश्रुमः ८ यथापूर्वंजगन्नाथोरथंसमुपजग्मिवान् हतेतस्मिन्महाराजधर्मपुत्रोयुधिष्ठि-
रः ९ अकरोद्राजसूयंचतवपूर्वपितामहः यदिजीवेत्सोहंसःकोनमस्यतितंक्रतुम् १० सचसर्वास्त्रविन्नित्यंरुद्राल्लुब्धवरःप्र-
भो क्षणादेवमहाराजवान्तेयंगामगाहत ११ हतोहंसोहतोहंसःकृष्णेनरिपुमर्दिना जगुर्गंधर्वपतयोदेवलोकेदिवानिशम् १२
कृष्णेनलोकनाथेनविष्णुनाप्रभविष्णुना यमुनायांह्रदेघोरेहंसोनिहतइत्यपि १३ इतिश्रीमहाभारतेखिलेषुहरिवंशे
भविष्यपर्वणिहंसडिंभकोपाख्यानेहंसवधोनामशतोपरिअष्टाविंशतितमोऽध्यायः १२८ वैशंपायनउवाच श्रुत्वानि-
हतमत्युग्रंभारतवीर्यशालिनम् बलदेवपरित्यज्ययुध्यमानमहारणे १

तिकःपूजयेन्नकोपीत्यर्थः १० इयंवार्तांहंसमरणकथांगांपृथिवींअगाह-
तआक्रांतवती ११ १२ १३ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांहंसवधेशतोपरिअष्टाविंशतितमोऽध्यायः १२८ श्रुत्वेति १

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० इतिश्रीनीलकंठकृतौभारतभावदीपे- अ. ९
खिलेषुहरिवंशेभविष्यपर्वणिटीकायांशतोपरित्रिंशोऽध्यायः १३० गच्छन्नृयादवैःसहेतिशेषः १ २ ३ ४ ५ ६ धाताप्रवर्त्त १३० ३

शकटानिसगंधानिकिंवासंतिपितर्ध्रुवम् अपिगोप्यःपुत्रवत्योदारकान्किमजीजनन् ९ घटाःकिंबहवोमातरभिन्नाःसर्वतोव्रजे
किंगावःक्षीरमतुलंस्रवंत्यहरहःपितः १० हस्त्यंगवनिक्षीराणिदधिवाकिमजीजनन् गोधनंसर्वमेवेदंनिरोगंप्रतिपद्यते ११
नंदउवाच सर्वमेतद्यदुश्रेष्ठनीरोगंबहुशःप्रभो कुशलंगोधनस्यैवसर्वकालेषुकेशव १२ रक्षणात्तवदेवेशसदाकुशलि
नोवयम् सगोधनास्सवत्सास्चनीरोगाइवकेशव १३ एकमेवसदादुःखंनत्वांद्रक्ष्यामिकेशव यदेतत्केवलंदुःखमितिधीःशी
र्यतेसदा १४ वैशंपायनउवाच एवमादिविलप्यंतंगच्छेत्याहसकेशवः यशोदांपुनराहेदंमातर्गच्छगृहंप्रति
१५ येचत्वांकीर्तयिष्यंतितेचस्वर्गमवाप्नुयुः येकेचित्वांनमस्यंतितेमेप्रियनराःसदा १६ मद्भक्ताःसर्वदासंतुगच्छेत्याहचताहरिः
इत्युक्त्वापितरौदेवोवासुदेवःसनातनः १७ गाढमालिंग्यतौप्रीतोप्रेषयामासकेशवः यशोदानंदगोपश्चजग्मतुःस्वगृहंप्रति १८
ततःकृष्णोहृषीकेशोयादवैःसहवृष्णिभिः गंतुमैच्छत्तदाविष्णुःपुरींद्वारवतींकिल १९ यएतत्शृणुयान्नित्यंघटद्वापिसमाहितः
पुत्रवान्धनवांश्चैवअंतेमोक्षंचगच्छति २० इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणियशोदानंदगोपवल्लभ
कृष्णसमागमोनामशतोपरित्रिंशोऽध्यायः १३० वैशंपायनउवाच गच्छन्नथमहाविष्णुःपुष्करंप्राप्ययाद
वैः अपश्यन्मुनिमुख्यांस्तुपुष्करस्थान्नृपोत्तम १ तेसमेतामहादेवमृषयोवीतमत्सराः अर्घ्यादिसमुदाचारंकृत्वेनंयादवोत्तम
म् २ प्रोचुर्विश्वेश्वरंविष्णुंभूतभव्यभवत्प्रभुम् अत्यद्भुतमिदंविष्णोतववीर्यंजनार्दन ३ येनत्वंतौनिहतौयुद्धे हंसोडिंभकएवच
योवैचक्रोदुराधर्षोदेवैरपिसुदुःसहः ४ संगरेनिहतोदेवदुःसाध्यइतिनोमतिः क्षेमंनःसर्वकार्येषुचरतातपउत्तमम् ५ निःकं
टकाभविष्यामस्तवसंस्मरणाद्धरे त्वंहिसर्वस्यदुःखस्यहर्तात्वांध्यायतांसदा ६ त्वदनुस्मरणंजगतःसदापुण्यप्रदंप्रभो त्वं
हिनःसततंधाताविधातातपसोहरे ७ त्वमोंकारवषट्कारस्त्वंयज्ञस्त्वंपितामहः त्वंज्योतिर्ब्रह्मणोमूर्तिस्त्वंब्रह्मारुद्रएवच ८
प्राणस्त्वंसर्वभूतानामंतरात्मेतिकथ्यते उपास्यःसर्वभूतानांयज्ञेदानेजगत्पते ९ नमोविश्वसृजेदेवनमस्तेविश्वमूर्तये पा-
हिलोकमिमंदेवहत्वाब्रह्मद्विषःसदा १० १३६

कःविधाताफलप्रदः ७ ८ ९ १० ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

११ १२ इतिश्रीनीलकं[illegible]तोभारतभावदीपेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांशतोपरिएकत्रिंशोऽध्यायः १३१ भगवन्निति यद्यपि
भारतंस्वर्गारोहणांतमवभातितथापिशतपर्वगणनायांहरिवंशस्यांतर्भावकथनात्‌हरिवंशांतमेवभारतमितिस्पष्टयितुंअत्रभारतश्रवणविधिःकीर्त्यते
पारणेषुसमाप्तिषु एतेनअसकृन्निरंतरंभारतंश्रोतव्यंपठितव्यंचेतिदर्शितम्‌ १ २ ३ दिवीतिदेवाःस्वर्गादित्यात्रक्रीडित्वादिवंगताइतिमुनिराहेतियोज्यम्‌ ४

सतथेतिहरिर्विष्णुर्ययौद्वारवतींपुरीम्‌ अवसद्वृष्णिभिःसार्द्धंस्तूयमानःसमागधैः ११ इयंहिदेवदेवस्यचेष्टाहिजनमेजय प्रोक्तातेपृच्छ
तेराजन्‌किमन्यच्छ्रोतुमिच्छसि १२ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणि द्वारकायांकृष्णप्रत्यागमननामशतोपरिए
कत्रिंशोऽध्यायः १३१ जनमेजयउवाच भगवन्‌केनविधिनाश्रोतव्यंभारतंबुधैः फलंकिंकेचदेवाश्चपूज्यावैपारणेवि
ह १ देयंसमाप्तेभगवन्‌किंचपर्वणिपर्वणि वाचकःकीदृशश्चात्रएष्टव्यस्तद्ब्रवीहिमे २ वैशंपायनउवाच शृणुरा
जन्विधिमिमंफलंयच्छतिभारतात्‌ श्रुताद्भवतिराजेंद्रयत्त्वंमामनुपृच्छसि ३ दिविदेवामहीपालक्रीडार्थमवनिंगताः कृत्वाकार्यमि
दंचैवततश्चदिवमागताः ४ हंतयत्तेप्रवक्ष्यामितच्छृणुष्वसमाहितः ऋषीणांदेवतानांचसंभवंवसुधातले ५ अत्ररुद्रास्तथासा-
ध्याविश्वेदेवाश्चशाश्वताः आदित्याश्चाश्विनौदेवौलोकपालामहर्षयः ६ गुह्यकाश्चसगंधर्वानागाविद्याधरास्तथा सिद्धाधर्मःस्व
यंभूश्चमुनिःकात्यायनोवरः ७ गिरयःसागरानद्यस्तथैवाप्सरसांगणाः ग्रहाःसंवत्सराश्चैवअयनान्यृतवस्तथा ८ स्थावरंजंगमं
चैवजगत्सर्वंसुरासुरम्‌ भारतेभरतश्रेष्ठएकस्थमिहदृश्यते ९ तेषांश्रुत्वाप्रतिष्ठानंनामकर्मानुकीर्त्तनात्‌ कृत्वापिपातकंघोरंस-
द्यासुच्यतमानवः १० इतिहासमिमंश्रुत्वायथावदनुपूर्वशः संयम्यांतःशुचिर्भूत्वापारगत्वाचभारते ११ तेषांश्रृणुत्वदेयानिश्रुत्वा
भारतभारतम्‌ ब्राह्मणेभ्योयथाशक्त्याभक्त्याचभरतर्षभ १२ महादानानिदेयानिरत्नानिविविधानिच गावःकांस्योपदोहाश्चक
न्याश्चैवस्वलंकृताः १३ सर्वकामगुणोपेतायानानिविविधानिच भाजनानिविचित्राणिभूमिर्वासांसिकांचनम्‌ १४ वाहनानिच
देयानिहयामत्ताश्चवारणाः शयनंशिबिकाश्चैवस्यंदनाश्चस्वलंकृताः १५ यद्यद्गृहेवरंकिंचिद्यद्यदस्तिमहद्वसु तत्तद्देयंद्विजा-
तिभ्यआत्मदाराश्चसूनवः १६ श्रद्धयापरयादत्तंक्रमशस्तस्यपारगः शक्तितःसुमनाहृष्टःशुश्रूषुरविकंपनः १७ सत्यार्जवरतो
यतःशुचिःशौचपरायणः श्रद्दधानोजितक्रोधोयथासिद्ध्यतितच्छृणु १८

एतदेवविवृणोति हंतेति ५ ६ ७ ८ ९ तेषा
मिति यतोत्रमहतायत्नेनएतत्‌श्रवणात्‌पापनाशोभवतीत्यर्थः १० ११ तेषांभारतयुद्धेमृतानांभीष्मादीनाम्‌ १२ १३ १४ १५ १६ १७ १८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

३८ ३९ ४० दशमेतुपारणेततोपिद्विगुणंविष्णुसालोक्यंक्रममुक्तिप्रापकंप्राप्नोतीत्याह दशमंपारणमित्यादिनाविष्णोर्यातिसलोकतामित्यंतेन ४१
४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ अत्रविष्णुसालोक्यंप्राप्तस्यनपुनःसंसारबंधोस्तीतिभावःश्रवणमात्रस्यैत

कांचनस्तंभनिर्व्यूहंवैडूर्यकृतवेदिकम् जांबूनदमयैर्दिव्यैर्गवाक्षैःसर्वतोदिशम् ३८ सेवितंचाप्सरःसंघैर्गंधर्वैर्दिविचारिभिः विमा
नंसमधिष्ठायश्रियापरमयाज्वलम् ३९ दिव्यमाल्यांबरधरोदिव्यचंदनभूषितः मोदतेदैवतैःसार्द्धंदिविदेवइवापरः ४० दशमंपार
णंप्राप्यद्विजातीनभिवंद्यच किंकिणीजालनिर्घोषंपताकाध्वजशोभितम् ४१ रत्नवेदिकसंकाशंवैडूर्यमणितोरणम् हेमजालप-
रिक्षिप्तप्रवालवलभीमुखम् ४२ गंधर्वैर्गीतकुशलैरप्सरोभिर्निषेवितम् विमानंसुकृतावासंसुखेनैवोपपद्यते ४३ मुकुटेना-
र्कवर्णेनजांबूनदविभूषणः दिव्यचंदनदिग्धांगोदिव्यमाल्यविभूषितः ४४ दिव्याँल्लोकान्प्रचरतिदिव्यैर्भोगैःसमन्वितः विबुधा
नांप्रसादेनश्रियापरमयायुतः ४५ अथवर्षगणानेवंस्वर्गलोकेमहीयते ततोगंधर्वसहितःसहस्राण्येकविंशति ४६ पुरंदरपुरे-
रम्येशक्रेणसहमोदते दिव्ययानविमानेषुलोकेषुविविधेषुच ४७ दिव्यनारीगणाकीर्णोनिवसत्यमरोयथा ततःसूर्यस्यभवनेच
द्रस्यभवनेतथा ४८ शिवस्यभवनेराजन्विष्णोर्यातिसलोकताम् एवमेतन्महाराजनात्रकार्याविचारणा ४९ श्रद्दधानेनवैभव्य
मेवमाहगुरुर्मम वाचकस्यतुदातव्यंमनसायद्यदिच्छति ५० हस्त्यश्वरथयानानिवाहनंचविशेषतः कटकंकुंडलेचैवब्रह्मसूत्र
तथापरम् ५१ वस्त्रंचैवविचित्रंचगंधंचैवविशेषतः देववत्पूजयेत्तंतुविष्णुलोकमवाप्नुयात् ५२ अतःपरंप्रवक्ष्यामियानिदेया
निभारते वाच्यमानेथविप्रेभ्योराजन्पर्वणिपर्वणि ५३ जातिंदेशंचसत्यंचमाहात्म्यंभरतर्षभ धर्मवृत्तिंचविज्ञायक्षत्रियाणांनरा
धिप ५४ स्वस्तिवाच्यद्विजानादौततःकार्यंप्रवर्तयेत् समाप्तेपर्वणिततःस्वशक्त्यातर्पयेद्द्विजान् ५५ आदौतुवाचकंचैववस्त्र
गंधसमन्वितम् विधिवद्भोजयेद्राजन्मधुपायससंयुतम् ५६ ततोमूलफलप्रायंपायसंमधुसर्पिषा आस्तिकेभोजयेद्राजन्
दद्याच्चैवगुडोदनम् ५७ अपूपैश्चैवपूपैश्चमोदकैश्चसमन्वितम् सभापर्वणिराजेंद्रहविष्यंभोजयेद्द्विजान् ५८

फलंअर्थविधारणपूर्व
कमनुष्ठानवतस्तुभारताध्ययनात्तपुण्यादपिपादमधीयतश्रद्दधानस्यपूयंतेसर्वपापान्यशेषतइतिप्रागेवफलमुक्तंसर्वपापानिप्रारब्धफलभोगपातकेभ्योन्या
नि ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ पूपैःमालपुवाइतिमध्यदेशप्रसिद्धैःअपूपैस्तत्सदृशैःसाच्छिद्रपक्वान्नैः ५८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१९ २० अनायस्तमकर्कशाक्षरम् ऊर्जितंस्पष्टाक्षरं असंसक्तं अग्रस्तंअक्षरंपदंचयस्मिन् तत्तथानचभावेन लोभाद्यभिप्रायेणसमन्वितंच २१ त्रिष

ष्टीत्यनेनचंकारवकारशसयजादिवर्णानांविवेकेनउच्चारणंकर्तव्यमित्यर्थः तदेवाहस्थानेति उरःशिरआदिस्थानेषुसमन्वितं वबयोरभेदपक्षेहिस्थानभेदाभावा-न्नषष्टिवर्णताभवतीत्यर्थः २२ वाचकस्यविधिमाहनारायणमिति २३ २४ प्रथमंपारणंहरिवंशांतेनियमपूर्वकंश्रवणम् २५ २६ २७ २८

शुचिःशीलान्विताचारःशुक्लवासाजितेंद्रियः संस्कृतःसर्वशास्त्रज्ञःश्रद्दधानोनसूयकः १९ रूपवान्सुभगोदांतःसत्यवादीजितेंद्रियः दानमानगृहीताचकार्योभवतिवाचकः २० अविलंबमनायस्तमद्रुतंधीरमूर्जितम् असंसक्ताक्षरपदंनचभावसमन्वितम् २१ त्रि-षष्टिवर्णसंयुक्तमष्टस्थानसमीरितम् वाचयेद्वाचकःस्वस्थःस्वासीनःसुसमाहितः २२ नारायणंनमस्कृत्यनरंचैवनरोत्तमम् देवींसर स्वतींचैवततोजयमुदीरयेत् २३ ईदृशाद्वाचकाद्राजञ्छ्रुत्वाभारतभारतम् नियमस्थःशुचिःश्रोताशृण्वन्सफलमश्नुते २४ पार णंप्रथमंप्राप्यद्विजान्कामैश्चतर्पयेत् अग्निष्टोमस्ययागस्यफलंवैलभतेनरः २५ अप्सरोगणसंकीर्णंविमानंलभतेमहत् प्रहृष्टः सतुदेवैश्चदिवंयातिसमाहितः २६ द्वितीयंपारणंप्राप्यअतिरात्रफलंलभेत् सर्वरत्नमयंदिव्यंविमानमधिरोहति २७ दिव्यमाल्यां वरधरोदिव्यगंधविभूषितः दिव्यांगदधरोनित्यंदेवलोकेमहीयते २८ तृतीयंपारणंप्राप्यद्वादशाहफलंलभेत् वसत्यमरसंकाशो-वर्षाण्ययुतशोदिवि २९ चतुर्थेवाजपेयस्यपंचमेद्विगुणंफलम् उदितादित्यसंकाशंज्वलंतमनलोपमम् ३० विमानंविबुधैःसा-र्द्धमारुह्यदिविगच्छति वर्षायुतानिभवनेशक्रस्यदिविमोदते ३१ षष्ठेद्विगुणमस्तीतिसप्तमेत्रिगुणंफलम् कैलासशिखराकारंवै डूर्यमणिवेदिकम् ३२ परिक्षिप्तंचबहुधामणिविद्रुमभूषितम् विमानंसमधिष्ठायकामगंसाप्सरोगणम् ३३ सर्वाँल्लोकाननुविचर-न्द्वितीयइवभास्करः अष्टमेराजसूयस्यपारणेलभतेफलम् ३४ चंद्रोदयनिभंरम्यंविमानमधिरोहति चंद्ररश्मिप्रतीकाशैर्हयै-र्युक्तंमनोजवैः ३५ सेव्यमानोवरस्त्रीणांचंद्रकांततरैर्मुखैः मेखलानांनिनादेननूपुराणांचनिःस्वनैः ३६ अंकेपरमनारीणांसुखसुप्तो विबुध्यते नवमेक्रतुराजस्यवाजिमेधस्यभारत ३७

२९ पंचमेद्विगुणंवाजिमेधद्वयफलम् ३० ३१ षष्ठेद्विगुणं वाजिमेधचतुष्टयफलं सप्तमेत्रिगुणंद्वादशवा जिमेधफलम् ३२ ३३ अष्टमेराजसूयस्यफलंतेनचतुर्विंशतिवाजिमेधतुल्योराजसूयइतिगम्यते ३४ ३५ ३६ क्रतुराजस्येत्यनेन सोपासनस्यवाजिमेधस्यफलंतेनकेवलानांराजसूयानामष्टचत्वारिंशतातुल्यः सोपासनोराजसूयइतिगम्यते ३७ ᳚ ᳚ ᳚ ᳚

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

१३८ ७६ ७७ ७८ ७९ ८० तदर्थमिति प्रभुःप्रथमकल्पस्ययोनुकल्पेनवर्त्तेत सनाप्नोतिफलंतस्येतिवचनात् सर्वथापादोनपलत्रयं १३२ ३

अरण्यकेमूलफलैस्तर्पयेत्तुद्विजोत्तमान् अरणीपर्वआसाद्यजलकुंभंप्रदापयेत् ५९ तर्पणानिचमुख्यानिवन्यमूलफलानिच स
र्वकामगुणोपेतंविप्रेभ्योन्नंप्रदापयेत् ६० विराटपर्वणितथावासांसिविविधानिच उद्योगेभरतश्रेष्ठसर्वकामगुणान्वितम् ६१
भोजनंभोजयेद्विप्रान्गंधमाल्यैरलंकृतान् भीष्मपर्वणिराजेंद्रदत्वायानमनुत्तमम् ततःसर्वगुणोपेतमन्नंदद्यात्सुसंस्कृतम् ६२
द्रोणपर्वणिविप्रेभ्योभोजनंपरमार्च्चितम् शराश्चदेयाराजेंद्रचापान्यसिवरास्तथा ६३ कर्णपर्वण्यपितथाभोजनंसार्वकामिकम्
विप्रेभ्यःसंस्कृतसम्यक्दद्यात्संयतमानसः ६४ शल्यपर्वणिराजेंद्रमोदकैःससगुडोदनैः अपूपैस्तर्पयेच्चैवसर्वमन्नंप्रदापयेत् ६५
गदापर्वण्यपितथामुद्गमिश्रंप्रदापयेत् स्त्रीपर्वणितथारत्नैस्तर्पयेत्तुद्विजोत्तमान् ६६ घृतौदनंपुरस्ताच्चऐषिकेदापयेत्पुनः त-
तःसर्वगुणोपेतमन्नंदद्यात्सुसंस्कृतम् ६७ शांतिपर्वण्यपिगतेहविष्यंभोजयेद्द्विजान् आश्वमेधिकमासाद्यभोजनंसार्वकामिक
म् ६८ तथाश्रमनिवासेतुहविष्यंभोजयेद्द्विजान् मौसलेसार्वगुणिकंगंधमाल्यानुलेपनम् ६९ महाप्रस्थानिकेतद्वत्सर्वकाम
गुणान्वितम् स्वर्गपर्वण्यपितथाहविष्यंभोजयेद्द्विजान् ७० हरिवंशसमाप्तौतुसहस्रंभोजयेद्द्विजान् गामेकांनिष्कसंयुक्तांब्रा
ह्मणायनिवेदयेत् ७१ तदर्द्धेनापिदातव्यादरिद्रेणापिपार्थिव प्रतिपर्वसमाप्तौतुपुस्तकंवैविचक्षणः ७२ सुवर्णेनचसंयुक्तंवाचकाय
निवेदयेत् हरिवंशपर्वणिचपायसंतत्रभोजयेत् ७३ श्लोकंवाश्लोकपादंवाअक्षरंवानृपात्मज शृणुयादेकचित्तस्तुसविष्णुदयितो
भवेत् ७४ व्यासंचैवसपत्नीकंपूजयेच्चयथाविधि लक्ष्मीनारायणंदेवंपूजितंतच्चपूजयेत् ७५ वाचकंपूजयेद्यस्तुभूमिवस्त्रसुधे
नुभिः विष्णुःसंपूजितस्तेनससाक्षाद्देवकीसुतः ७६ पारणेपारणेराजन्यथावद्भरतर्षभ समाप्यसर्वाःप्रयतःसंहिताःशास्त्रको-
विदः ७७ शुभेदेशेनिवेश्याथक्षौमवस्त्राभिसंवृतः शुक्लांबरधरःश्रीमान्शुचिर्भूत्वास्वलंकृतः ७८ अर्चयेत्तुयथान्यायंगंधमाल्यैः
पृथक्पृथक् संहितान्पुस्तकान्राजन्प्रयतःशिष्टसंमतः ७९ भक्ष्यैर्मांसैश्चपेयैश्चकामैश्चविविधैःशुभैः हिरण्यंगाश्चवस्त्रैश्च
दक्षिणामथदापयेत् ८० सर्वत्रत्रिपलंस्वर्णंदातव्यंप्रणतात्मना तदर्द्धंपादशेषंवावित्तशाठ्यविवर्जितम् ८१

नंनदेयमित्यर्थः पादःत्रिपलचतुर्थोभागः सएवशेषोंतिमःपक्षेयत्रततत्पादशेषम् ८१ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८२ ८३ अतिरात्रस्येतिपारणाभावेपिबोद्धव्यम् अत्यल्पवर्णश्रवणेक्ष्रुद्रक्रतुफलम् ८४ ८५ ८६ ८७ ८८ ८९ यत्नव-
ताब्रह्मचर्यादिनियमवता ९० भारतंभवनेपुस्तकरूपं ९१ ९२ ९३ ९४ ९५ ९६ ९७ विनापिभारतंकेवलोहरिवंश
एवश्रोतव्यइत्याशयेनाह क्रियतइतिक्रियतेशिष्टैरितिशेषः असारेनिच्छेदः वांछितस्यैककारणंइष्टप्रदम् ९८ पारणात् नियमपूर्वकसमापनात् ९९

यद्यदेवात्मनोभीष्टंतत्तद्देयंद्विजायते सर्वथातोषयेद्भक्त्यावाचकंगुरुमात्मनः देवताःकीर्त्तयेत्सर्वानरनारायणस्तथा ८२ ततोगंधै
श्चमाल्यैश्चस्वलंकृतद्विजोत्तमान् तर्पयेद्विविधैःकामैर्दानैश्चोच्चावचैस्तथा ८३ अतिरात्रस्ययज्ञस्यफलंप्राप्नोतिमानवः प्राप्नु
याच्चक्रतुफलंतथापर्वणिपर्वणि ८४ वाचकोभरतश्रेष्ठव्यक्ताक्षरपदस्वरः भविष्यंश्रावयेद्विद्वान् भारतंभरतर्षभ ८५ भुक्तव-
त्सुद्विजेंद्रेषुयथावत्संप्रपूजयेत् वाचकंभरतश्रेष्ठभोजयित्वास्वलंकृतम् ८६ वाचकेपरितुष्टेतुशुभाप्रीतिरनुत्तमा ब्राह्मणेषुचतु-
ष्टेषुप्रसन्नाःसर्वदेवताः ८७ ततोहिभरणंकार्यंद्विजानांभरतर्षभ सर्वकामैर्यथान्यायंसाधुभिश्चयथाक्रमम् ८८ इत्येषविधि
रुद्दिष्टोमयातेद्विपदांवर श्रद्दधानेनवैभाव्यंयन्मांत्वंपरिपृच्छसि ८९ भारतश्रवणेराजन्पारणेचनृपोत्तम सदायत्नवताभाव्यंश्रे
यस्तुपरमिच्छता ९० भारतंशृणुयान्नित्यंभारतंपरिकीर्त्तयेत् भारतंभवनेयस्यतस्यहस्तगतोजयः ९१ भारतंपरमंपुण्यंभारतेवि
विधाःकथाः भारतंसेव्यतेदेवैर्भारतंपरिकीर्त्तयेत् ९२ भारतंसर्वशास्त्राणामुत्तमंभरतर्षभ भारतात्प्राप्यतेमोक्षस्तत्त्वमेतद्ब्रवी
मिते ९३ महाभारतमाख्यानंक्षितिंगांचसरस्वतीम् ब्राह्मणंकेशवंचापिकीर्त्तयन्नावसीदति ९४ वेदेरामायणेपुण्येभारतेभरत
र्षभ आदौचान्तेचमध्येचहरिःसर्वत्रगीयते ९५ यत्रविष्णुकथादिव्याःश्रुतयश्चसनातनाः तच्छ्रोतव्यंमनुष्येणपरंपदमिहेच्छता
९६ एतत्पवित्रंपरममेतद्धर्मनिदर्शनम् एतत्सर्वगुणोपेतंश्रोतव्यंभूतिमिच्छता ९७ क्रियतेसारसंसारेवांछितस्यैककारणम् ह
रिवंशस्यश्रवणमितिद्वैपायनोब्रवीत् ९८ अश्वमेधसहस्रेणवाजपेयशतैस्तथा यत्फलंप्राप्यतेपुंभिस्तद्धरेर्वंशपारणात् ९९ अ-
जरममरमेकंध्येयमाद्यन्तशून्यंसगुणमगुणमाद्यंस्थूलमत्यंतसूक्ष्मम् निरुपममनमेयंयोगिनांज्ञानगम्यंत्रिभुवनगुरुमीशंत्वांप्रपन्नो
स्मिविष्णो १००

भारतप्रतिपाद्यांदेवतांप्रणमतिअजरमिति १०० ७ ७ ७ ७ ७ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्वयमाह प्राजापत्यादेवाश्चासुराश्च ततःकानीयसाएवदेवाज्यायांसोअसुराइत्यादिना बृहदारण्यकोक्तरीत्याध्यात्मविद्यायामात्रशमादयोदेवाःकामक्रोधादयोसुरा-
इत्यभिप्रेत्यसमाधत्तेशृणुविति दैत्यानांकामादीनांनेधनंनिरन्वयोच्छेदविधिम् २ शंकरेणपरमानंदंप्रतिलुनाबाधनंत्रिभिःशूलैःश्रवणादिभिःसाधनैःकृ-
तंअसुरेंद्राणांवधंशृणुवित्यनुषज्यते ३ त्रिपुरंपुरत्रयंजाग्रत्स्वप्नसुषुप्त्यभिमानिभिर्विश्वतैजसप्राज्ञैर्भोग्यंबहुभिर्धातुभिर्मायाकार्यैर्गुणैःसमीरितंपाठांतरे
बृहद्वातुर्मुख्यप्राणस्तेनसमीरितंनभसिस्वकारणेआकाशेघनपटलमिवाकस्मादुत्थितम् ४ प्राकारेणअन्नमयपिंडेनकांचनेनभोगमोक्षोपयोगितयारम
णीयेनमणिभिःइंद्रियैरित्यादियथायथंनगरसाम्यमूह्यंपिंडस्य ५ कर्मणायज्ञादिनागंधर्वाणांपुरमिवेतिमिथ्यात्वेदृष्टांतः ६ वाजिनइंद्रियाश्वाःम

वैशंपायनउवाच शृणुविस्तरतःसर्वंयन्मांपृच्छसिनैधनम् दैत्यानांबाहुबलिनांसर्वप्राणिविरोधिनाम् २ शंकरेणवधं
राजन्शूलैस्त्रिभिरजिह्मगैः कृतंपुरासुरेंद्राणांसर्वभूतवधैषिणाम् ३ त्रिपुरंपुरुषव्याघ्रबृहद्वातुसमीरितम् विकासतिनभोस
ध्येमेघवृंदमिवोत्थितम् ४ प्राकारेणप्रवृद्धेनकांचनेनविराजिता मणिभिश्चप्रकाशाद्भिःसवरत्नैश्चतोरणैः ५ वभासेनभसोमध्येऽधि
यापरमयाज्वलत् गंधर्वाणामिवोदग्रकर्मणासाधितंपरम् ६ वाजिनःपक्षसंयुक्तावहंतिबलदर्पिताः पुरंप्राकारश्रेष्ठमनोभिःका
मचारिणः ७ धावंतिन्हेषमाणास्तेविक्रमैःप्राणसंभृतैः आहूयतइवाकाशंखुरैःशष्पदलप्रभैः ८ वायुवेगसमैर्वेगैःकालयंतइवां
बरम् असुराःसमदृश्यंतचक्षुभिर्विदितात्मभिः ९ ऋषिभिर्ज्वलनप्रख्यैस्तपसादग्धकिल्बिषैः गीतवादित्रबहुलंगंधर्वनगरोप
मम् १० चित्रायुधसमाकीर्णैःप्रतप्तकनकप्रभैः भवनैर्बहुभिश्चैवप्रांशुभिःसमलंकृतैः ११

नोभिःमनोवृत्तिभिःप्रवर्त्तिकाभिःपुरंदेहंवहंतिश्रेष्ठंस्थानंप्रापयं-
ति ७ विक्रमैःउत्तरोत्तरवासनावृध्यापरात्परंधावतःक्रमंबृंहणैस्तृष्णायाःपोषकैर्वाजिभिःप्राणसंभृतैरितिपाठेमुख्यप्राणेनसम्यक्चालितैः ८ चतुर्भिर्द-
र्शनसाधनैःदृश्यप्रकाशेनलिंगेनेत्यर्थविदितात्मभिःअनुमानेनआज्ञातैःवेगैर्वेगवद्भिस्तेवाजिभिरसुराअंबरंकारणंब्रह्मकालयंतइवअपलायनेयत्नसंतइवस-
मदृश्यंतअसुराःकामादयः ९ ऋषिभिरितिअदग्धकिल्बिषैःअविनाशितदुःप्रवाहैर्वाजिभिरेवउपेतंगंधर्वनगरोपमंपुरंतत्सुसुभेइत्युत्तरेणान्वयः १०
भवनैश्चित्तप्रवेशस्थानैःस्त्र्यादिभिःआयुधानिकामोद्दीपनानिस्मरणादीनिकटाक्षादीनिवातैःसमाकीर्णैः ११ ५ ५ ५ ५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भारतसमाप्तौ शंनोमित्रःशंवरुणइत्यादिवत् शांतिंपठतिसर्वस्तरत्विति १०१ इतिश्रीनीलकंठकृतौभारतभावदीपेखिलेषुहरिवंशेभविष्यपर्वणिटी-
कायांश्रवणफलंनामशतोपरिद्वात्रिंशोऽध्यायः १३२ त्र्यक्षादिति प्रश्नस्योत्थानमपिनसंभवतिभारतश्रावसमापनेनज्ञातव्यानशेषात् पूर्वमुक्तम
पिदार्ढ्यायपुनःपृच्छतीत्युत्तरमिहनसाधुअतिप्रसंगात् इतरेषामपिअर्थानांपृष्टव्यत्वापत्तेःशिवोत्कर्षज्ञापनार्थमित्यपिनहरिहरार्द्वैतस्यभूयसाप्रबंधेनसा
धितत्वात् वक्तृविवक्षामात्रमित्यपिननिःप्रयोजनायामहतांविवक्षाया असंभवात् अयकृत्स्नभावाज्जुगृहिणोपसंहारइतिन्यायेन छंदोग्येययाकुटुंबेशुचौदे
शेस्वाध्यायमधीयानइत्यादिनानचपुनरावर्त्ततइत्यंतेनभोगमोक्षोभयोपभोगतयागार्हस्थ्यायत्तत्वेनोपसंहारोदर्शितःनतुमोक्षमात्रोपयोगिनाभोगविरोधि-
नाश्रमांतरेणैतद्वतइहापियस्यानुग्रहमिच्छामितस्यवित्तंहराम्यहमितिवदतांविष्णोरुपास्तिभोगविरोधिनीमोक्षैकफलानांसमाख्यारुद्रोपास्त्याउभयफलयाउ

सर्वस्तरतुदुर्गाणिसर्वोभद्राणिपश्यतु सर्वेषांवाञ्छिताअर्थाभवंत्वस्यचपारणात् १०१ इतिश्रीमहाभारतेखिले
षुहरिवंशेभविष्यपर्वणिश्रवणफलंनामशतोपरिद्वात्रिंशतितमोऽध्यायः १३२ जनमेजयउवाच अक्षा
द्धर्महन्ब्रह्मन्श्रोतुमिच्छामितत्त्वतः त्रयाणांपुरसंज्ञानांखचराणांसमासतः १

पसंहारःतेनसंन्यासगार्हस्थ्ययोरिवहरिहरोपास्त्योरवांतरफलभेदोज्ञेयइतिमत्तम् तदपिनातीवरमणीयम् एकैकोपास्तेःप्रत्येकंकात्स्न्येंनफलप्रदत्वस्यसर्वशा
स्त्रसिद्धत्वात् विकल्पोविशिष्टफलत्वादित्यवशिष्टफलत्वेनोपासनानांविकल्पाभिधानाच्चतस्मादन्यदिहप्रश्नकारणंवक्तव्यम् तच्च ससाधनाब्रह्मविद्यासमाप्तां
तेउक्तंयत्रविष्णुकथादिव्याश्रुतयश्चसनातनाः तत्श्रोतव्यंमनुष्येणपरंपदमिहेच्छतेतिविष्णुकथानांश्रुतीनांचश्रवणमात्रात्परपदप्राप्तिरुक्तातत्रासंभा-
वनावान्पृच्छतीति त्र्यक्षात् त्रीणिश्रवणमनननिदिध्यासनानिअक्षवदिंद्रियवत् दर्शनसाधनानियस्यसत्र्यक्षःविद्वान्श्रवणादिसमुदायवा-
न् त्र्यक्षः तस्मात् त्रयाणांस्थूलसूक्ष्मकारणदेहानांवधःसमूलोच्छेदःकथंस्यात् मनननिदिध्यासनाभ्यांफलोपकार्यंगाभ्यांसहितान्वेदांतमहावा-
क्यश्रवणात्कथंसंसारस्यात्यंतोच्छेदःस्यात् नहिज्ञानमात्रात्कस्यचिदर्थस्यउच्छेदोदृष्टइतिभावः १

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

देवेंद्रभवनाकारैः साक्षात्स्वर्गरूपैरित्यर्थः प्रासादाग्र्यैः गृहोपरिगृहेः तद्वदत्र संसारपुरोपरि मनोरथपुरं बहुलं आनंत्यात् तेषाम् १२ १३ १४ १५
अक्षाभ्यां चक्षुभ्यां क्षुप आदित्यहृदयान्मनो मनसश्चंद्रमाः इति ताभ्यां सूर्योनाभोयस्येति व्युत्पत्त्या सूर्यजनकं चक्षुः चक्षुः सूर्यनाभ एवं चंद्रनाभोमनः तावुभौपु
राध्यक्षौ तदनुगाश्च सर्वकामादय इति तावेवं दैत्येंद्रो अन्येच मदमत्सरादयो दानवाः १६ ते सर्वे देवयानपितृयानमार्गप्रापको कर्मोपासनामार्गौ विनाशितवंत

देवेंद्रभवनाकारैः शुशुभेतन्महाद्युति प्रासादाग्र्यैः प्रवृद्धैश्च कैलासशिखरप्रभैः १२ शुशुभे दैत्यनगरं बहुसूर्यमिवांबरम् वरादा
लकसंपन्नं तप्तकांचनसप्रभम् १३ प्रदीप्तमिवतेजोभी रराजाथमहाप्रभो क्ष्वेडितोत्कृष्टबहुलं सिंहनादविनादितम् १४
बभौवल्गुजनाकीर्णं वनं चैत्ररथं यथा समुच्छ्रितपताकं तद्ध्वजैर्भिश्च विराजितम् १५ रराज त्रिपुरं राजन्महाविद्युद्दिवांबरे सूर्य-
नाभश्च दैत्येंद्रश्चंद्रनाभश्च भारत १६ तथान्येच महावीर्या दानवा बलदर्पिताः ममृदुश्च बभंजुश्च मोहिताः परमेष्ठिना १७ प
थानं देवगगनं पितृयानं च भारत तैरेवमसुराग्र्यैश्च प्रगृहीतशरासनैः १८ दानवैर्नरशार्दूल देवयाने महापथे वन्हि पितृवलो
पेते हृते भरतसत्तम १९ ब्रह्माणमभ्यधावंत सर्वे सुरगणास्तथा विवर्णवदना दीनाः क्लिन्नेव सतिकर्मणि २० अब्रुवंश्च ग
ताः स्थित्वा स्वरेणार्त्तनिनादिना हन्यामहे शत्रुगुणे भागोच्छेदनभागतः २१ तेषां चैव वधोपायं वदस्व वदतां वर यं ज्ञात्वा बा-
हुबलिनो बाधेम समरे रणान् २२ सांत्वयित्वा तु वरदो ब्रह्मा प्रोवाच देवताः शृणुध्वं देवताः सर्वाः शत्रुप्रतिकृतिं पराम् २३ अ
वध्या दानवाः सर्वे ऋते शंकरमव्ययम् प्रतिगृह्य च तद्वाक्यमनोभिर्वाग्भिरेव च २४

इत्यर्थः १७ प्रगृहीतशरासनैः स्वीकृतद्यू
तपानादिव्यसनैः १८ वन्हिवलोपेते देवयाने पितृवलोपेते पितृयाने चापहृते श्रद्धादिराहित्येन सर्वस्मिन्कर्मणि रक्षोभिरपहृते सतीत्यर्थः १९ ब्रह्माणं
ईश्वरं दीनाः मार्गद्वयभ्रष्टत्वादत्यंतशोकाकुलाः २० हन्यामहे हतास्मः भागोच्छेदन पुण्यलोकप्राप्त्यभावेन २१ २२ शत्रुप्रतिकृतिं प्रतीकारं परां शत्रूणां १५०
निरन्वयोच्छेदकराम् २३ ऋते शंकरं सुखकरं बोधं विना कामादीनां निरन्वयोच्छेदो न भवति अव्ययमिति तद्धेतोर्मूलाज्ञानस्यैवोच्छेदात् २४ छ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तेनपुनरपिकारणकर्मभूमौउग्रेणतपसाप्राणैःसहशंकरंशरणंगताइत्याह भूमाविति द्वाभ्याम् तपश्चांद्रायणादिवानप्रस्थधर्मःयोगोनिष्कामकर्मानुष्ठानंगृहस्थध
र्मःजपोवेदाभ्यासोब्रह्मचारिधर्मःब्रह्मसंहितांप्रणवंइतिउभयोःसंबंधः २५ २६ तेषांतपोयोगजैश्वर्यंप्रार्थमानानांसंबंधिनःपरदाराःकामादिपरिग्र-
हास्तृणादयःतासांजनेवंध्यतानिष्फलतावैराग्यहेतुरभूत् ततस्तेतृष्णादयोऽत्यंतंदुर्बलाअभूवन्नितिरूपकेणाह विन्यस्तेति दर्भनिचयेतृणमयेकूटेशेरतेइ-
त्यर्थः २७ शुभानिव्याघ्राजिनादीनि २८ वनचारिणांमृगाणांदेहेभ्योगृहीतानिविमुक्तानिपरिहितानितएवंकामादयोत्यंतदारिद्र्यग्रस्ताःइतःअ
दर्शनंगताइत्याह अंतरिक्षमिति इतउत्पन्नाअपियोगपरिपाककालेबाधितुंअंतरिक्षेहृदयाकाशेसूक्ष्मवासनारूपेणनिलीनाइत्यर्थः २९ योगजा

भूमौप्रपेदिरेसर्वेसहरुद्रैश्चभारत विंध्यपादेचमेरौचमध्येचपृथिवीतले २५ तपसोग्रेणयोगज्ञाःसर्वेतेमुनयोभवन् का-
श्यपेयंहरंप्राप्ताजपंतोब्रह्मसंहिताम् २६ तेषांचपरदाराणामभवद्वंध्यताजने विन्यस्तदर्भनिचयेताम्नलोहंचभूषणम् २७
परिधानानिचर्माणिमृदूनिचशुभानिच स्वयमृतानांकृष्णानांमृगाणांकुरुसत्तम २८ गृहीतानिविमुक्तानिदेहेभ्योवनचा
रिणाम् अंतरिक्षमथोपेत्यविविशुर्मायया वृताः २९ हरालयंसुराःसर्वेव्याघ्रचर्मनिवासिनः प्रणिपत्याथतेदीनाभगवंतं
जगत्पतिम् ३० स्वव्यक्तेनाभिधानेनप्रभाषतहरंततः हविर्दत्तमविज्ञानाद्भस्मच्छन्नेषुवह्निषु ३१ वरदानंवृथास्मासुप्रभग
वन्विसुखत्वयि यथादेशंयथाकालंक्रियतांब्रह्मणोवचः ३२

येक्षीणाशुभभोगवासनास्तउपासनायांअधिकारिणःसंसारादुद्विग्नाःसंतःप्रवर्त्तंतइत्याह हरालयमिति हरतिसंसारमितिहरोनिर्गुणंब्रह्मतस्यालयंतदुपलब्धिस्थानंहा-
र्दाकाशाख्यंसगुणंब्रह्मतदुपासितंजग्मुःसुराःशांत्यादयःविशेषेणआघ्रातिविषयान् आस्वादयतीतिव्याघ्रोभोक्तातस्यचर्मवदावरकंदेहंवसानाइत्यर्थः भगवंतंईश्व
रंप्रणिपत्यउपास्य ३० हरंस्वुद्दंप्रभाषंतअडभावआर्षःशुद्धंब्रह्मास्मीतिपरोक्षनिश्चयंकृत्वालोकेपिअवदन्नित्यर्थः हरंमद्दष्ट्वाभगवंतमेवप्रार्थयंते हविरितिसा
र्द्धेन यथाभस्मच्छन्नेषुअग्निषुहविर्निष्फलंएवमस्मासुमलिनचित्तेषु ३१ वरदानश्रेष्ठस्यआत्मवस्तुज्ञानस्यप्रदानंहरज्ञानंप्राप्तमपिनिष्फलमतस्त्वमेवानु
ग्रहंकृत्वायथाब्रह्मणोवचोवेदवाक्यंयमेवैषवृणुतेतेनलभ्यतइतितत्प्रसादफलख्यापकंतत्यथादेशंयथाकालंकुरुष्वक्रियतां अस्मासुप्रसन्नोभूत्वातत्त्वंआ
त्मतत्त्वंप्रकाशयेतिभावः ३२ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अतएवनोपलभ्यंतअव्यक्तभावंगतत्वादित्यर्थः येहिव्यक्ताःसंतोदुर्लक्षाःपरमाण्वादयस्तेदिव्यचक्षुर्योद्यानत्वेनइतिभावः दिनकरेबोधेनिशासुरेलयेचप्राप्ते सतिसुरेंद्राःशमादयोपिछिन्नाभिन्नरूपाःनिलीनाएवेत्यर्थः ४३ अथसोप्तुसेनतमसासर्वेषांनाशेसुषुप्तौस्वप्नरूपोविक्षेपउत्पन्नइत्याह अथेति तदानीमेव कामादयोलब्धवृत्तयोभूवन् निशायांअविद्यास्वरूपायांस्थिताःसंतःशमादीनजयंश्चेत्यर्थःशरैःसूक्ष्मैःविषयैः ४४ ४५ उशनोहव्यबोधिताःबृहस्पतिर्हिशक्रोभूत्वेंद्रस्याभयायासुरेभ्यःक्षयायेमामविद्यामसृजदितिमैत्रायणीयश्रुतेःउशनसाकल्पिताःयेवेदविरोधिनोमार्गास्तान्निषेवणादसंतबालिनइत्यर्थः ४६ एवंत्यक्तस्थूलदेहानामपियोगिनांसूक्ष्मदेहप्रवेशादर्वाकुलयविक्षेपाख्यंसूक्ष्मंव्याप्यमहत्तत्वापरपर्यायलिंगमात्रेअस्मितारूपंप्राप्तसू

नोपलभ्यंतचक्षुर्भ्यामपिदिव्येनचक्षुषा अस्तंप्राप्तेदिनकरेसुरेंद्रास्तेनिशासुरे छिन्नभिन्नक्षतमुखानिपेतुर्वसुधातले ४३ अथ दैत्याजयंप्राप्तानिशायांनिशितैःशरैः विनेदुर्विपुलैर्नादैर्मेघाइवमहारयाः ४४ जयंप्राप्तासुराश्चैवतेन्योन्यमभिजल्पिरे त्रासिता-स्त्रिदशाःसर्वेसंग्रामजयकांक्षिणः ४५ अस्माभिर्बलसंपन्नैःसहप्रासासितोमरैः विरेजुश्चजयंप्राप्ताउशनोहव्यबोधिताः ४६ समरेबलसंपन्नाःसायुधादैत्यसत्तमाः सुरैश्चसहितःसर्वैरथमास्थायशंकरः ४७ दर्पितान्निवदन्दैत्यान्प्रदहन्निवतेजसा युगांतकालेविततेरश्मिवानिवनिर्दहन् ४८ सर्वभूतानिभूताग्र्यःप्रलयेसमुपस्थिते सरथोवाजिभिःशीघ्रैरुह्यमानोमनोजवैः ४९ विबभौनभसोमध्येसुविद्युद्दिवतोयदः वृषभेणध्वजाग्रेणगर्जमानेनभारत ५० भातिस्मसरथोराजन्सेंद्रायुधइवाबुदः ततोंबरगताःसिद्धास्तुष्टुवुर्वृषभध्वजम् ५१ क्रमाभिःपूर्वजपूर्वैःशुचिभिस्त्र्यंबकंतदा ऋषयश्चतपःशाताःसत्यव्रतपरायणाः ५२ अमृतप्राशिनश्चैवसुरसंघास्तथैवच गंधर्वाप्सरसश्चैवगंधर्वेणस्वरेणवै ५३ प्रहृष्टवदनाःसौम्याःपैत्र्येस्थानांतरेनृप चयाट्टा-लकसंपन्नेशतघ्नीशतसंकुले ५४

नपिलयविक्षेपबाधाभवंतीतिप्रपंचयिष्यन्सूक्ष्मंप्रतिगमनंतावदाहसुरैश्चेत्यादिनासुरैःशमादिभिःसहायैःशंकरोयोगीरथंसूक्ष्मशरीरंआस्थायसम्यगधिष्ठाय ४७ विदेहत्वदशामाहदर्पितानिति युगांताग्निर्लोकानिवकामादीन्दग्धवनित्यर्थः ४८ वाजिभिर्वासनामयैःसूक्ष्मैरिंद्रियैः ४९ वृषभेणयोगजधर्मेणध्वजाग्रेणध्वजाग्रवदत्युच्छ्रितेन ५० तमेनंदर्पाक्रांतंसुस्थितंमन्यंयोगिनंआरूढभूमिस्थैर्देवादिभिःस्तूयमानंपुनर्विघ्नआविवेशेत्याहतपइत्यादिना ५१ ५२ ५३ पित्र्यपित्राईश्वरेणसृष्टंस्थानांतरंस्थूलदेहादन्यत्रसूक्ष्मदेहस्थितमितिशेषः ५४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा॰ ह॰ टी॰ खेहार्दाकाशेचरतामुपासकानांसमीपेयदुक्तं सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज अहंत्वासर्वपापेभ्योमोक्षयिष्यामिमाशुचइत्यादिरूपंवचनं इतरदेववचोभि- अ॰ प॰
१४१ श्चभाविनोर्थस्यवैभवात् मोक्षरूपस्यार्थस्यवैभवाच्चमहादेवईश्वरःसमनह्यत् अविद्यामुच्छेत्तुंसज्जोबभूवसाधकानुग्रहंकर्तुमभिमुखोभूदित्यर्थः ३३ तत्रा १३३ ३
दित्यपथाख्यमुपासनामार्गमेवाहदेवैःशमादिभिःसहप्रकटीचकार इत्याहसमनह्यादिति ३४ रुद्रेणध्यातेनईश्वरेणसहिताःरुद्राउपासकाउपासनाबलाद-
त्यंतमशोभंते त्यर्थः ३५ विश्वविश्वेनवपुषातपोयोगबलेनसर्वेसर्वात्मकाजाताइत्यर्थः ३६ केनोपायेनकामरूपिणोभवत्इत्यतआहसमनह्यन्निति
महात्मनःवैराग्यादियुक्तादानवानांकामादीनांउच्छेदंविधित्सवः एभिःसाधनैःधनाध्यक्षैःश्रद्धावित्तंअध्यक्षोसुखव्यायेषुतैःशमाद्यैःपरिवारितोवृतःशरणी
कृतः ३७ त्र्यक्षोविद्वान्त्रिपुरंयोधयत्कोशभंगंकर्तुमुद्युक्तः तत्रसशरंधनुःप्रगृह्यप्रणवोधनुःशरोह्यात्मेतिश्रुतेःप्रणवेचेतःसंयोज्येत्यर्थः अथ

यदुक्तंदेवदेवेनखेचराणांसमीपतः एवंदेववचोभिश्चभाविनोर्थस्यवैभवात् ३३ समनह्यन्महादेवोदेवैःसहसवासवैः आदित्यपथमास्था
यसन्नद्धाःसमलंकृताः ३४ सर्वेकांचनवर्णाभावभुर्दीप्ताइवाग्नयः रुद्रेणसहितारुद्राद्दहतइवतेजसा ३५ सन्नद्धाःकुशलाःसर्वे
प्रांशवःपर्वताइव विश्वविश्वेनवपुषाबलिनःकामरूपिणः ३६ समनह्यन्महात्मानोदानवांतांविधित्सवः एभिःसहधनाध्य-
क्षैःसमंतात्परिवारितः ३७ त्रिपुरंयोधयन्त्र्यक्षःप्रगृह्यसशरंधनुः अथदैत्याभिन्नदेहाःपुराद्गालुगताइव ३८ न्यपतंस्तविदेहास्तेविशीर्णा
इवपर्वताः अतिविद्धाःसुविद्धाश्चरणमध्यगतानृप ३९ न्यपतन्दैत्यसंघातावज्रेणेवहतानगाः असिभिश्चहतादेवैःशक्तिचक्रपरश्वधैः ४० बा
णैश्चभिन्नमर्माणोदैत्यंद्रायुद्धगोचरे प्रपेतुःसहिताउर्व्यांछिन्नपक्षाइवाचलाः ४१ तत्रसंज्ञांविमुंचातिदीप्यमानेनतेजसा एवंतेन्योन्यसं-
बाधेक्षीयंतक्षयकर्मणा ४२

योगारंभानंतरंदैत्याःकामादयोभिन्नदेहाःभिन्नःप्रविलापितःस्थूलदेहआश्रयभूतोयेषांतेतथाध्यानबलेनस्थूलदेहाध्यासनिवृत्तौकामा
द्याःभिन्नदेहाःनष्टमूर्तयोभवन्विशेषणांतराणिकथाशोभार्थानि ३८ ३९ ४० ४१ तत्रेति इयमत्रप्रक्रियाविशेषाविशेषलिंगमात्रालिंगानिगुणपर्वाणीतिपातं
जलसूत्रात् एकादशेंद्रियाणिस्थूलभूतानिचविशेषाःअहंकारःपंचतन्मात्राणिचाविशेषाःमहत्तत्त्वंलिंगमात्रंअलिंगंप्रधानं तत्रविशेषादविशेषंप्रविविक्षतोयोगि
नोमध्येलयविक्षेपाख्योयोगविघ्नोआगच्छतः एवमविशेषाल्लिंगमात्रंतस्मात्पुरुषंचप्रविविक्षतस्तौआगच्छतइति तत्रयोगिनोविशेषाख्यस्थूलदेहवियोगेदैन्नादि
नलयाभ्यासात्प्रथमंलयोभ्येतीत्याह तत्रेति तत्रतस्यांअवस्थायांकामादयःयोगिनांबलेननिरुध्यमानाःसंतःदुष्टाश्चवदतीवप्रदीप्यंतेततःकषायेणजडीभूयल १४१
यंप्राप्नुवंतितदिदमुक्तंदीप्यमानेनतेजसेति एवंकर्तुःकरेणअन्योन्यसंबाधेसंकटेसतिउभयेपिअक्षीयंतक्षयकर्मणाअन्योन्यविरोधेन ४२ ७ ७

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

किंतत्तेजोयत् रथमुज्जहारेत्यतआह अथविष्णुरिति अथोपायांतराभावनिश्चयानंतरं सर्वतोदृश्यतत्त्वतः सर्वान् इंद्रादीनकिंचित्करानवेक्ष्य धर्मएवतमसिमग्नस्यजीवस्योद्धर्तेत्यर्थः ७० एतदेवाहसमाक्रांतमितितंचेतोरथंदेवैःशमादिभिराक्रांतंवृषरूपीधर्मः विषाणाभ्यांहेतुभ्यांदेवयानप्रयाणार्थंपितृयानभयनार्थंवातोलयित्वानमोहृदयसकाशादुद्धृत्यननादगर्जति स्म प्राणयोगेनबलवत्तेन ७१ एवंलिंगशरीररूपामविशेषाख्यांभूमिंविजित्यलिंगमात्रापरपर्यायांमहत्तत्त्वाख्यांअस्मितामात्रप्रत्ययांयोगभूमिंधर्मवृषएवप्रापयतीत्याहतृतीयमिति वायुविषयंनिरूपदेशंतत्रविषयदर्शनाभावेनशब्दत्वंपदार्थमात्रस्याभावात् विषाणवान् धर्मस्तामपिभूमिमेनंप्राप्यगर्जतिस्मेत्यर्थः ७२ ततोलिंगमात्रात्मुमुक्षुवस्तुप्रपित्सोरपियोगिनःपुनर्लयविक्षेपौभवतइत्याह द्वाभ्यांततोनादेनेतिनादेनधर्मएषगर्जनेनयद्यप्यत्रलयोनोक्तस्तथापिसोपिबोध्यः अतएवचात्रप्रथमोलीनःसुषुप्ताएवोच्यतेद्वितीयोलीनोविदेहइत्युच्यते स्थूलशरीरस्यत्यागात् अथतृतीयोलीनस्तुप्रकृतिलयइत्युच्यते योगिभिस्तस्मादत्रापिलयोस्तीतिज्ञेयम् ७३ ७४ अग्निमिति अग्निदेवतात्वादग्निंतत्त्वमस्यादिकंमहा-

अथविष्णुर्महायोगीसर्वतोदृश्यतत्त्वतः वृषरूपंसमास्थायप्रोज्जहाररथोत्तमम् ७० समाक्रांतंदेवगणैःसमग्रबलपौरुषैः बलवांस्तोलयित्वातुविषाणाभ्यांमहाबलः ननादप्राणयोगेनसंक्षुभ्यमाणइवार्णवः ७१ तृतीयंवायुविषयंसमाक्रम्यविषाणवान् ननादबलवान्नादंसमुद्रइवपर्वणि ७२ ततोनादेनवित्रस्तादैतेयायुद्धदुर्मदाः पुनस्तेकृतसन्नाहायुयुधुःसुमहाबलाः ७३ सर्वेवैबाहुबलिनःसमर्थबलपौरुषाः सुरसैन्यप्रमर्दैतःप्रगृहीतशरासनाः ७४ अग्निंसंधायधनुषिशितंबाणंसुपत्रिणम् ब्राह्मास्त्रेणाभिसंयोज्यब्रह्मदंडंशिवोव्ययः मुमोचदैत्यनगरेत्रिधामात्रानुसंज्ञितम् ७५

वाक्यंधनुषिप्रणवेसंधायतयोरैक्यंभावयित्वायःप्रणवार्थःसएवमहावाक्यार्थः ॐमित्येतदक्षरमिदंसर्वंसर्वंह्येतद्ब्रह्मपरमात्माब्रह्मेतिचानुसंधायेत्यर्थः शितंबाणंसुयंत्रितंसूक्ष्मयाबुद्ध्यासुयंत्रितं स्वार्थेस्थापितंवाक्यतात्पर्यभ्रमरहितंयथास्यात्तथेत्यर्थः सूक्ष्मीकृतेचेतसिवाक्यार्थानुसंधानजन्याच्चपरमावृत्तिब्रह्मविद्यानामसैवब्रह्मास्त्रंतेनब्रह्मदंडंब्रह्मणेननानायोनिपातनेनदंडयितारंचिदाभाससंज्ञंजीवंसंयोज्यतृतीयेदैत्यनगरेमूलाज्ञानेमुमोचकःअव्ययःशिवःअयमर्थःवाक्यजन्यवृत्त्यासंगतश्चिदाभासःस्वात्मनासहमूलाज्ञानंनाशयति ततश्चाव्ययश्चतुर्थएवावशिष्यतइति कीदृशंब्रह्मदंडंत्रिधामात्रानुसंज्ञितंत्रिधाप्रकारत्रयेणमात्राभिरकारोकारमकाररूपाभिरनुसंज्ञितंविश्वतैजसप्राज्ञेतिसंज्ञावंतम् त्रिधाशब्देनेतिपाठेतुशब्देनप्रणवेनत्रिधाभेदेनसंज्ञितमितिसएवार्थःसार्द्धश्लोकः
७५

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तस्मिन्मध्यमे ५५ सुराणामुपरीतिशेषः मध्येस्थितानांलिंगदेहस्थाःशुभवासनाःसर्वयोगोपसर्गभूतैःकामादिभिर्मधुमत्यांभूमौस्थित्वानिवारिताइ
त्यर्थः ५६ ५७ ५८ अशनिःअशनयःमृत्योरज्ञानसंबंधिनिविषयगोचरेशब्दादिपारवश्येवस्थिताइतिसंबंधः ५९ एवंसूक्ष्मदेहस्थस्य
विक्षेपरूपंविघ्नमुक्त्वालयरूपमपितमाहगंधर्वेति मनोमयंसूक्ष्मशरीरंध्येयेश्वरेणापिसहितंविलीनमित्यर्थः ६० शचीपतियोगीअतिष्ठत्कुंठितःम
हांधकारमग्नत्वात् ६१ अस्यावस्थामन्ययोगिमुखेनानुवदतिततोमध्यइत्यादिनाश्लोकचतुष्टयेन ६२ ६३ ६४ ६५ एवंविघ्नेषु

तस्मिंस्तुदैत्यनगरेसर्वभूतभयावहे ततस्तुशरवर्षाणिमुमुचुर्दैत्यदानवाः ५५ सुराणामरयोमध्येतीक्ष्णाग्राणिसमंततः शतघ्नी
भिश्चानिघ्नतोभल्लैःशूलैश्चभारत ५६ तेचान्येमहत्कर्मदानवायुद्धकोविदाः गदाभिश्चगदाजघ्नुर्भल्लैर्भल्लांश्चिच्छिदुः ५७
अस्त्रैरस्त्राण्यबाधंतमायामायाभिरेवच ततोऽपरेसमुद्यम्यशरशक्तिपरश्वधान् ५८ अशनीश्चमहाघोरान्मुक्तान्शतसहस्रशः
असिभिर्मायाविहितैर्मृत्योर्विषयगोचरे ५९ तेवध्यमानाविबुधाःशरवर्षैर्व्यवस्थिताः गंधर्वनगराकारःसोऽसीदत्सहरोरथः ६०
हन्यमानोऽसुरगणैःप्रासासिशरतोमरैः तैश्चदैत्यप्रहरणैर्गुरुभिर्भारसाहिभिः चितैश्चबहुभिःशस्त्रैरतिष्ठतशचीपतिः ६१ ततोमध्येदि-
व्यशब्दःप्रादुरासीन्महीपते ऋषीणांब्रह्मपुत्राणांमहतामपिभारत ६२ सएषशंकरस्याग्रेरथोभूमिप्रतिष्ठितः अजेयोजय्यतांप्राप्तःस
र्वलोकस्यपश्यतः ६३ तस्मिन्निपतितेराजन्रथानांप्रवरेरथे निपेतुःसर्वभूतानिभूतलेवसुधाधिप ६४ विचेलुःपर्वताग्राणिचेलुश्चैव
महीद्रुमाः विचुक्रुशुःसमुद्राश्चनेदुश्चापिदिशोदश ६५ वृद्धाश्चब्राह्मणास्तत्रजेपुश्चपरमंजपम् यत्तद्ब्रह्ममयंतेजःसर्वत्रविजयैषिणाम्
६६ शांत्यर्थंसर्वभूतानामिहलोकेपरत्रच समाधायात्मनात्मानंयोगप्राप्तेनहेतुना ६७ रथंतरेणसाम्नाथब्रह्मभूतेनभारत तेजसाच
लयंविष्णोरुक्षस्यचमहात्मनः ६८ सर्वेषांचैवदेवानांबलिनांकामरूपिणाम् ऋषीणांतपसाध्यानाद्वसतांविजनेवने ६९

सन्नेषुसंतःस्वस्त्ययनानिकुर्वंतीत्याहवृद्धाइतितत्फलमाहयत्तदित्यादिनासार्द्धचतुष्टयेन ब्रह्ममयंवेदप्रधानंयत्तत्तेजःसर्वभूतानांशांत्यर्थंआत्मनासमाधाययो
गबलेनवृषरूपधर्मस्वरूपमाश्रित्यरथंतरेणसाम्नारथोत्तमंउज्जहारेत्यन्वयः ६६ इहजीवन्मुक्तिलाभार्थंपरत्रविदेहमुक्तिलाभार्थमित्यर्थः योगप्राप्तेनहेतुना १४२
बलेन ६७ रथंलिंगशरीरंतरत्यनेनेतिरथंतरंप्रणवाख्यप्रतीकंतेनसाम्नासाधुनाब्रह्मभूतेनशब्दब्रह्मरूपेणपुनःकीदृशेनसाम्नाविष्ण्वादीनांतेजसासारभूतेन ६८
६९

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिटीकायांनीलकंठकृतौत्रिपुरवधोनामशतोपरित्रयस्त्रिंशोऽध्यायः १३३ हरिवंशइति हरिवंशेवृत्तांताइति

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणित्रिपुरवधोनामशतोपरित्रयस्त्रिंशोऽध्यायः १३३ वैशंपायनउवाच
हरिवंशेत्रवृत्तांताःप्रकीर्त्यंतेक्रमोदिताः तत्राद्यमादिसर्गस्तुभूतसर्गस्ततःपरः १ पृथोर्वैन्यस्यचाख्यानंमनूनांकीर्त्तनंतथा वैवस्वतकु
लोत्पत्तिर्धुंधुमारकथातथा २ गालवोत्पत्तिरिक्ष्वाकुवंशस्याप्यनुकीर्त्तनम् पितृकल्पस्तथोत्पत्तिःसोमस्यचबुधस्यच ३ अमावसोर
न्वयस्यकीर्त्तनंकीर्त्तिवर्द्धनम् च्युतिप्रतिष्ठेशक्रस्यप्रसवःक्षत्रवृद्धजः ४ दिवोदासप्रतिष्ठाचत्रिशंकोःक्षत्रियस्यच ययातिचरितंचै
वपुरुवंशस्यकीर्त्तनम् ५ कीर्त्तनंकृष्णसंभूतेःस्यमंतकमणेस्तथा संक्षेपात्कीर्त्तिताविष्णोःप्रादुर्भावास्ततःपरम् ६ तारकामययु
द्धंचब्रह्मलोकस्यवर्णनम् योगनिद्रासमुत्थानंविष्णोर्वाक्यंचवेधसः ७ पृथ्वीवाक्यंचदेवानामंशावतरणंतथा ततोनारदवाक्यंच
स्वप्नगर्भविधिस्तथा ८ आर्यास्तवःपुनःकृष्णेसमुत्पत्तिःप्रपंचतः गोव्रजेगमनंविष्णोःशकटस्यनिवर्त्तनम् ९ पूतनायावधोभं
गोयमलार्जुनयोरपि वृकसंदर्शनंचैववृंदावननिवेशनम् १० प्रावृषोवर्णनंचापियमुनाह्रददर्शनम् कालीयस्यापिदमनंधेनुक
स्यचभंजनम् ११ प्रलंबनिधनंचैवशरद्वर्णनमेवच गिरियज्ञप्रवृत्तिश्चगोवर्द्धनविधारणम् १२ गोविंदस्याभिषेकंचगोपीसंक्री
डनंतथा रिष्टासुरस्यनिधनमक्रूरप्रेषणंतथा १३ अंधकस्यचवाक्यानिकेशिनोनिधनंतथा अक्रूरागमनंचैवनागलोकस्यदर्शन
म् १४ धनुर्भंगस्यकथनंकंसवाक्यमतःपरम् कुवलयापीडवधश्चाणूरांध्रवधस्तथा १५ कंसस्यनिधनंचापिविलापःकंसयोषि
ताम् उग्रसेनाभिषेकश्चयादवाश्वासनंतथा १६ प्रत्यागतिर्गुरुकुलाद्यथोक्तारामकृष्णयोः मथुरायाश्चोपरोधोजरासंधनिवर्त्तनम् १७
विकद्रुवाक्यंरामस्यदर्शनंभाषणंतथा गोमंतारोहणंचापिजरासंधगतिस्तथा १८

सप्तार्थः १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

एतदेवस्पष्टयतितंबाणमिति सूक्ष्मधारेवस्थौल्यदशायांजाग्रदादिभेदेनत्रिविधाग्रासीदितिमनसाभिनिश्चित्यशास्त्रतोयुक्तितस्ततोवीर्यात् ध्यानबले
नउग्रेणतपसाशमनसश्चेंद्रियाणांचएकाग्र्यंपरमंतपइत्येकाग्रतारूपेणालोचनेनततः सत्येनाबाधितेनजीवस्यब्रह्मयोगेनब्रह्माभेदेनानतंधीबाणंमुमोचध्या
ताकृत्नमुमुचेअथदैत्यनगरेमूलाज्ञानेधीवृत्तौनष्टायामूलाज्ञानस्यनिरन्वयोच्छेदोभवतीतिभावः ७६ सर्वप्राणहरानित्यादिश्लोकाः काव्यशोभार्थाः
७७ ७८ त्र्यक्षाद्दग्धमित्यादौपृष्टकथंज्ञानमात्रेणसत्यस्यवस्तुनोनाशइतितत्राह अग्निनेति अग्निर्विज्ञानधातुर्वाग्वायादृशोयक्षस्तादृशो-

तंबाणंत्रिविधंवीर्यंसंधायमनसाप्रभुः सत्येनब्रह्मयोगेनतपसोग्रेणभारत ७६ मुमोचदैत्यनगरेसर्वप्राणहरांच्छरान् दीप्तानक
नकवर्णाभान्सुवर्णाश्चस्फनिर्मलान् ७७ मुक्तावरशरान्घोरान्सविषानिवपन्नगान् स्फदीप्तैस्त्रिभिर्बाणैर्वेगिभिस्तद्विदारित-
म् ७८ शरघातप्रदीप्तानिविध्याग्रोणाविभारत गोपुराणिपुरेःसार्द्धंव्यशीर्यंतनराधिप ७९ तानिवैडूर्यवर्णानिशिखराणिगिरेरिव
शंकरेणप्रदग्धानिब्रह्मास्त्रेणापतन्नृप ८० हतेचत्रिपुरेदेवैर्वाचोहर्षाकिलेरिताः सर्वान्जहीतिशत्रूंस्त्वंप्रहृष्टान्पुरुषोत्तम ८१
विष्णुरेवमहायोगीयोगेनप्रस्मयन्निव स्तूयतेब्रह्मसदृशैर्ऋषिभिःशंकरेणच ब्रह्मणासहितेदेवैःसंपन्नबलपौरुषेः ८२

नालिरितिन्यायेनधीमयानिपुराणिधियैवरज्जुरगवन्नष्टानीत्यर्थः यद्वाशब्दगात्राणितानिशब्देनैवनष्टानिनाश्यनाशकयोर्द्वयोरपिमिथ्यात्वादितिभावः धारणी
मित्यादिकथाशोभा ७९ एवंशंकरेणकल्याणकारिणाजीवेनब्रह्मविद्यास्त्रेण त्रीणिपुराणिजाग्रदादीनिप्रदग्धानि ८० अत्रत्रिपुरदाहेमुख्यंकारणंधर्मएव
वेतितत्स्तुतिमाह हतेचेतिहेपुरुषोत्तमहेधर्मरूपिन्महाविष्णो ८१ विष्णुर्धर्मसंयोगेनसाम्यबुद्ध्याऽनुष्ठितःसन्प्रस्मयन्आश्चर्यमिवस्तूयते अविद्यासुप्तजी
व्यप्रवृत्तोपितामेवमूलउच्छिनत्तीत्याश्चर्यम् तदेवमनेनाध्यायेनकृत्स्नस्यभारतस्यतात्पर्यंवर्णितंधर्मबलेनैवविद्योत्पत्तावविद्योच्छेदात्परमानंदाभिव्यक्तिरितिनिश्चितं ८२ १४३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभवि-
ष्यपर्वणिटीकायांश्रवणफलकथनंनामशतोपरिपंचत्रिंशोऽध्यायः १३५ ॐ ॐ इतिश्रीमत्सदवाक्यप्रमाणमर्यादाधुरंधरचतुर्द्धरवंशावतंसश्रीगोविं

तत्फलंसमवाप्नोतिवैष्णवोनात्रसंशयः श्लोकार्द्धंश्लोकपादंवाहरिवंशसमुद्भवम् ४ शृण्वंतिश्रद्धयायुक्तावैष्णवंपदमाप्नुयुः जंबुद्वीपंस-
माश्रित्यश्रोतारोदुर्लभाःकलौ ५ भविष्यंतिनराराजन्सत्यंसत्यंवदाम्यहम् स्त्रीभिश्चपुत्रकामाभिःश्रोतव्यंवैष्णवंयशः ६ दक्षिणाचात्रदे
यावैनिष्कत्रयसुवर्णकम् वाचकाययथाशक्त्यायथोक्तंफलमिच्छता ७ स्वर्णशृंगीचकपिलांसवत्सांवस्त्रसंयुताम् वाचकायप्रदद्याद्धि-
आत्मनःश्रेयकांक्षया ८ अलंकारंप्रदद्याच्चपाण्योर्वैभरतर्षभ कर्णस्याभरणंदद्याद्यानंचसविशेषतः ९ भूमिदानंसमादद्यात्ब्राह्म
णायनराधिप भूमिदानसमंदानंनभूतंनभविष्यति १० शृणोतिश्रावयेद्वापिहरिवंशंतुयोनरः सर्वपापविनिर्मुक्तोवैष्णवंपदमाप्नुया-
त् ११ पितॄनुद्धरतेसर्वानेकादशसमुद्भवान् आत्मानंससुतंचैवस्त्रियंचभरतर्षभ १२ दशांशश्चात्रहोमोवैकार्यश्चात्रनराधिप इ-
दमुयातवाग्रेचसर्वंप्रोक्तंनरर्षभ १३ यस्यस्मरणमात्रेणसर्वपापैःप्रमुच्यते अपुत्रःपुत्रमाप्नोतिअधनोधनमाप्नुयात् १४ नरमेधा
श्वमेधाभ्यांयत्फलंप्राप्यतेनरैः तत्फलंलभतेनूनंपुराणश्रवणान्नरैः १५ ब्रह्महाभ्रूणहागोघ्नःसुरापोगुरुतल्पगः सद्यःपुराणश्रवणा
त्पूतोभवतिनान्यथा १६ इदंमयातेपरिकीर्तितंमहत्श्रीकृष्णमाहात्म्यमपारमद्भुतम् शृण्वन्पठन्नाशुसमाप्नुयात्स्वर्गंयच्चापिलोके
षुसुदुर्लभंमहत् १७ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वणिश्रवणफलकथननामशतोपरिपंचत्रिंशोऽध्यायः १३५
इतिहरिवंशग्रंथःसमाप्तः श्रीकृष्णार्पणमस्तु श्रीमज्जगदीश्वरार्पणमस्तु शुभमस्तु ॐ ॐ ॐ

दसूनोर्नीलकंठस्यकृतौभारतभावदीपेहरिवंशांतग्रंथार्थप्रकाशकःसमाप्तिमगमत् अत्रहरिवंशाध्यायसंख्यात्रिशतोपरिअष्टादश ३१८ श्रीकृष्णार्पणमस्तु
मुंबईयेथेंबापुसदाशिवशेटहेगिष्टेशेटयेश्रीवर्द्धनकरयाणिआपल्ले छापखान्यात छापिलें· शके १७८७ क्रोधननामसंवत्सरचैत्रशुक्ल १५ समाप्तिमगमत्

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

गोमंतस्यगिरेर्दाहः करवीरपुरेगतिः शृगालस्यवधस्तत्रमथुरागमनंततः १९ यमुनाकर्षणंचैवमथुरापक्रमस्तथा उपायेनवधःकाल
यवनस्यप्रकीर्त्तितः २० निर्माणंद्वारवत्यास्तुरुक्मिणीहरणंतथा विवाहश्चैवरुक्मिण्याःरुक्मिणोनिधनंतथा २१ बलदेवान्हिकंपुण्यं
बलमाहात्म्यमेवच नरकस्यवधःपारिजातस्यहरणंतथा २२ द्वारवत्याविशेषेणपुनर्निर्माणकीर्त्तनम् द्वारकायांप्रवेशश्चसभायांच-
प्रवेशनम् २३ नारदस्यचवाक्यानिवृष्णिवंशानुकीर्त्तनम् षट्पुरस्यवधाख्यानमंधकस्यनिबर्हणम् २४ समुद्रयात्राकृष्णस्यज
लक्रीडाकुतूहलम् तथाभैमप्रवीराणामधुपानप्रवर्त्तकम् २५ ततश्छालिक्यगांधर्वसमुदाहरणंहरेः भानोश्चदुहितुर्भानुमत्याहर
णकीर्त्तनम् २६ शंबरस्यवधश्चैवधन्योपाख्यानमेवच वासुदेवस्यमाहात्म्यंबाणयुद्धप्रपंचितम् २७ भविष्यपुष्करंचैवप्रपंचेनैव
कीर्त्तितम् वराहनारसिंहंचवामनंबहुविस्तरम् २८ कैलासयात्राकृष्णस्यपौंड्रकस्यवधस्ततः हंसस्यडिंभकस्यैववधश्चैवप्रकीर्त्तितः
२९ पुरत्रयस्यसंहारइतिवृत्तांतसंग्रहः कथितोनृपशार्दूलसर्वपापप्रणाशनः ३० वृत्तांतंशृणुयाद्यस्तुसायंप्रातःसमाहितः सयाति
वैष्णवंधामलब्धकामःकुरूद्वह धन्यंयशस्यमायुष्यंभक्तिमुक्तिफलप्रदम् ३१ इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्व
णिवृत्तांतसंग्रहेशततोपरिचतुस्त्रिंशोऽध्यायः १३४ समाप्तोयंहरिवंशः अथश्रवणफलकथनम् जनमेजय-
उवाच हरिवंशेपुराणेतुश्रुतेमुनिवरोत्तम किंफलंकिंचदेयंवैतद्ब्रूहिममाग्रतः १ वैशंपायनउवाच हरिवंशेपुराणेतुश्रुतेच
भरतोत्तम कायिकंवाचिकंचैवमनसासमुपार्जितम् २ तत्सर्वंनाशमायातिहिमंसूर्योदयेतथा अष्टादशपुराणानांश्रवणाद्यत्फलंभवेत् ३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

भा· ह· टी:
१४५

(3)

इतिश्रीमहाभारतेखिलेषुहरिवंशेभविष्यपर्वहरिवंशश्चसमाप्तः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri